भारतीय-संस्कृति-सौरभम्

रामजी उपाध्याय

प्रकाशकः

भारतीयसंस्कृति-संस्थानम्

महामनापुरी, वाराणसी-५

फोन ३११८१३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

लेखक-परिचयः

उत्तरप्रदेशस्य गङ्गासरयू-प्यायिते बलिया-मण्डलान्तर्गते उपसरयूनदं महाकुलधौरेयी जन्मभूमी राजते लेखकस्य श्रीरामजी उपाध्यायस्य । बाल्ये ग्राम-शालायां मण्डल-विद्यालये च गुरुवर्यान् समाश्रित्य पश्चाद् वाराणस्यां महामहोपाध्यायानां श्रीलक्ष्मण-शास्त्रिणां तैलङ्गानां चरणचञ्चरीकः संस्कृत-महावृक्षस्य प्रथमकुसुमानि रसयते स्म । तदनु प्रयाग-विश्वविद्यालये प्रो० बाबूरामसक्सेना - महोदयानां श्रीचरणेषु एम. ए., डी. फिल. उपाधिं प्रथमस्थानीय-मर्जितवान् । लेखकस्य प्रायो दश ग्रन्थाः पुरस्कृताः सन्ति । उत्तरप्रदेश - संस्कृताकादमी २५००० रूप्यकाणां विशिष्टपुरस्कारेण १९८७ ख्रीष्टाब्दे तं समभाजितवती ।

उपाध्यायः १९४७-१९८० वर्षाणि यावत् निसर्ग-निधिमण्डिते परमरमणीये मध्यप्रदेशे सागर-विश्व-विद्यालये संस्कृतप्राचार्यः प्राभवत् । अध्यापनकाले १९६३ ख्रीष्टाब्दे स सागर-विश्वविद्यालयतो डी. लिट् उपाधिं प्राचीनभारतीय-साहित्यस्य सांस्कृतिक-भूमिकेति विषयमधिकृत्य शोधप्रबन्ध-समर्पणेना-वाप्तवान् । १९८१ ख्रीष्टाब्दे वाराणसेय-हिन्दू-विश्व-विद्यालयस्तं 'डी. लिट्.-मानदोपाधिनालंकृतवान् ।

उपाध्यायोऽयं तपसैव परं कल्याणमादर्शीकुर्वन् निरन्तरं लेखनाध्यापनाभ्यां भारतीय-संस्कृतेरतीतं तपःपूतं गौरवं सुप्रसादमुपायनीकर्त्तुमनिश यतते ।

द्वात्रिंशद्वर्षाणि स सागरिकेति त्रैमासिकीं संस्कृत-शोधपत्रिकां सम्पादयन्नास्ते । ज्ञानविज्ञानकार्यजात-विभावितवैदुषीकः स १९७८ ई० वर्षे पुण्यपत्तने अखिल - भारतीय-प्राच्य-परिषदः साहित्य-विभाग-स्याध्यक्षपदं सभाजितवान् । १९८१ ई० वर्षतः स वाराणस्यां भारतीय-संस्कृति-संस्थानम् इति संस्थां संचालयन्नास्ते ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA



CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भारतीय-संस्कृति-सौरभम्

150717

रामजी उपाध्यायः

स्व. डा. निगम शर्मा स्मृति संग्रह
पूर्व अध्यक्ष संस्कृत विभाग
गुरुकुल काँगड़ा विश्वविद्यालय, हरिद्वार

प्रकाशकः

भारतीयसंस्कृति-संस्थानम्

महामनापुरी, वाराणसी - ५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रमुखवितरकाः —

१. चौखम्भा संस्कृत प्रतिष्ठान
३८ यू. ए. बंगलो रोड, जवाहरनगर, दिल्ली

२. चौखम्भा-विद्याभवन
चौक, वाराणसी

३. चौखम्भा-सुरभारती प्रकाशन,
गोपालमन्दिर-लेन, वाराणसी

प्रथमसंस्करणम् — १९९५

मूल्यम् ३००/-

मुद्रक—
तारा प्रिंटिंग वर्क्स, कमच्छा, वाराणसी

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

निवेदनम्

स्मरतु भवान् निजगौरवं पुरस्तात्।

कुलजा मनीषिणः !

स्वतन्त्रभूतेऽपि भारतेऽ धुनास्माकं स्वत्वमात्मशक्तिश्च नोत्कर्षतः। परतन्त्रता गता किन्तु तस्याश्च्छायास्मान् प्रगमन-पथे पदे पदे संवर्तयति। बहवो भारतीया अद्यापि वैदेशिकैरभिमुखीकृतादाचार-विचार-पञ्जराद् बहिर्गन्तुकामा न सन्ति। अस्माद् वैदेशिक-पञ्जराद् बहिः सनातनं सत्यं शिवं सुन्दरं विलसन्तीति दर्शयितुं मे पुस्तक-प्रणयनोत्साहः प्रभवति।

मरीचिकाभ्रान्ता लोका विचारयन्ति यद् भारतीयसंस्कृतौ कश्चिदभावो वर्तते यस्मात् कारणाद् विदेशवासिनामिवास्माकं प्रगतिर्न भवति। तेषां संस्कृतेरात्मसात्करणेनास्माकं तैः समोऽभ्युदयः सम्भविष्यति। तेषां विभ्रमस्य निराकरणायैकमेवैतिहासिकतथ्यमुद्घाटनमर्हति। यदा ते वैदेशिका भारतमुपगतास्तदा देशोऽयं भारतीयसंस्कृति-प्रसादेनैव विश्वे प्रशस्यतमः समृद्धतमश्च बभूव। कालान्तरे तेषां वैदेशिकानां सुचिन्तितकपटयोजनाभिर्देशोऽयमात्मविस्मृत्युन्मादेन संस्कृतिदृष्ट्यापि परमुखापेक्षः कृत इति यथास्थानं दर्शितम्।

स देशो जीवति यः प्राणपणेनात्मसंस्कृतिं रक्षति। यदि नाम संस्कृतिर्विनष्टा तर्हि तद् राष्ट्रं निष्प्राणं भवति। उद्देश्यविहीनमधुनातनं भारतं सांस्कृतिकवैषम्यमहार्णवमनुकृत्युडुपेन तितीर्षतीति चिन्त्यम्।

कस्येदं कर्म संस्कृति-रक्षणं नाम। यथा पुरा तथैवाधुनापि महात्मनां साधुसतां श्रमण-ब्राह्मणानां मनीषिणामाचार्याणां च सम्मिलितप्रयासेन सर्वोदयोन्मुखी प्राच्यसंस्कृतिः शाश्वतं संरक्षिष्यते। तदर्थमेतेषामाचारविचारप्रचाराणामौदात्त्यं नितरामावश्यकम्। तत्रैकमेवाशाकेन्द्रम्। तत्तु भवतामनुविधेयं पदम्।

विजानीहि संस्कृतिम्। श्रद्धास्पदं भूता सास्मान् विश्वगौरवपथे यथापूर्वं प्रणेष्यति। स्वसंस्कृति-सम्मान एव कस्यचित् पुरुषस्य राष्ट्रस्य च महिमानं प्रचिनोति।

भारते संस्कृति-प्रचारस्य भाषा स्वभावतः संस्कृतमेव। सांस्कृतिकप्रकरणानि सातिशय-सौकर्येण बोधयितुं प्रकाशयितुं च संस्कृतमेव क्षमम्। अन्यच्च संस्कृतभाषा विविधप्रादेशिकभाषासु एकसूत्रतां स्थापयति। अथ च सांस्कृते लब्धजनिः मम संस्कृति-स्रोतस्विनी अन्या आधुनिकप्रान्तीयभाषास्तदर्थं सम्पोष्य तद्विषयकमभिनवसाहित्य-सर्जनामुन्नमयेदिति मेऽभिलाषः। भारतीय-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सस्कृति-पथो नित्यमेवाभिनवज्ञानोपपत्तिभिः संसृष्टः, युगे युगे क्वचिन्नवीनशाखा-प्रशाखायोगैः संस्कारितश्चेत्यस्य प्रथमो विशेषः। अयमेव संस्कृतेः सजीवतां प्रगुणयति। अस्यावान्तरशाखा-प्रशाखाः साधनभूताः सनातनमेकमेव निगूढतत्त्वं सत्यं ब्रह्मेति दर्शयन्ति बोधयन्ति च, येन विश्वात्मकं सत्यं शिवं सुन्दरं प्रस्फुटीभूतं विश्वजनीनमैक्यं सर्वेषां प्राणिनां समभावेन सहभावेन च समुदितम्।अतएव भूत-जातस्य विषये 'सर्वे भवन्तु सुखिनः' इति भारतीयसंस्कृतेः सनातनोऽनन्योप-देशः। एतद्धिया सांस्कृतिकप्रगतिं प्रपश्यन् पुरुषः सर्वत्र समदृष्टिसमुल्ला-सेनाध्यात्मिकसौम्यमनुभवति। तदेव भूमा सन् भारतीयसंस्कृतेर्जगत्यां विश्व-स्मिन् स्वीकरणीयतां प्रसाधयन् स्पृहणीयतां गतः।

संस्कृतिस्तु एकैव या भारतेन निरवशेषमभिज्ञाता। तया विश्वमानवता काले काले दिशि दिशि चालोकितानादिकालतोऽनन्तकालं यावत् प्रचरिष्यति। यथा जलं महार्णवे, मानसरोवरे, सुरसरिति दीर्घिकायां, पुष्करिण्यां कमण्डलौ वा शैत्यमेव धरति शाश्वतं धारयति च तथैव निपानभूता सरस्वतीव संस्कृतिः शुद्धात्मना लोकं शोधयति, प्रशमयति च।सेयं विश्वात्मकसंस्कृतिः क्वचिद्विकृति-मापन्नापि महामनीषिभिर्ज्ञानविज्ञान-दर्शनदृशा स्वीयं प्राक्तनस्वरूपं प्रापय्यते।

भारतीया संस्कृतिः स्वीयोत्तमगुणैर्नैकवैदेशिकसमालोचकैर्भूयिष्ठं प्रशंसितेति यथास्थानमुद्धृतम्। तेषां मतानुसारेण विश्वसंस्कृतेरौदात्त्यमधिकांशतो भारतीयसंस्कृतेरवदानं सुगृहीतमेव। तथापि भारतीयसंस्कृतेः क्वचिद् विकृतां-शान् संलक्ष्य कद्वदालोचका अवाच्यवादान् प्रवदन्ति। तत्तु वस्तुतः सांस्कृतिक-धाराया विमलप्रवृत्तिं विहाय तटस्थं मलिनांशमाधृत्य कपटार्थसाधनाय प्रचारमात्रम्। सत्यानुसन्धानं खलु विपरीतमेव।

पुस्तकेऽस्मिन् प्राच्यमहर्षिभिर्मनीषिभिश्च प्रकल्पितं संस्कृतेर्विराट्स्वरूपं सानुसन्धानं पुरस्कृतम्। संस्कृति-विषये ये मिथ्यावादाः प्रचारिताः सन्ति तेषां सप्रमाणं निरसनं यथास्थानं सन्दृब्धम्। एतत् सर्वं बहुलीकृतं येन भवतां मानसे भारतीयसंस्कृतिं प्रति यथायोग्यं प्रीतिः सम्मानश्च संवर्धेताम्। संस्कृतेः शुद्धरूपं नित्यमेव परमोत्साहेनानुसन्धेयम्।

संस्कृत-प्राकृतादिभाषाभिर्निबद्धा गौरवग्रन्था महार्णवा इवाप्रतिमानाः सन्ति। पुनः पुनः तेषामवगाहनेन समुद्धृताभिनवसंस्कृति-रत्नराशिः शाश्वतं मान-वतां समलंकरिष्यतीति समाश्वासेन सम्प्रति विरतकार्यभरः —

उपाध्यायो रामजी

महामनापुरी, वाराणसी ५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विषयानुक्रमणिका

पृष्ठ-संख्या

१. पूर्वपीठिका १ २९

संस्कृतेः साध्यं साधना च १

प्रकृतेः सान्निध्यम् २
हिमालयः ३, गङ्गा ७, वनम् १०, सागरः ११, भारतभूः ११ ।

संस्कृतेर्निर्मातारः १३
वेदाः १३, उपनिषदः १४, महाभारतम् १४, पुराणनि १६, मनुस्मृतिः १६, रामायणम् १७, प्राकृतिकः सहयोगः १८, लौकिकसमृद्धिः १९, ऋतूनां पारमेष्ठ्यम् २० ।

संस्कृतेर्द्विविधाः प्रवृत्तयः २०

संस्कृतेर्विशेषाः २१
देवतात्मकता २२, आत्मरतिः २४, मधुमत्त्वम् २४, कर्मफलभोगः, जन्मान्तरवादश्च २५, वर्णाश्रमव्यवस्था २५, सर्वप्राणिहितैषिता २५, प्रजापालनवृत्तिः २६, संस्कृति-वैचित्र्यम् २६, विकास-शीलता २७, विश्वात्मकप्रसारः २७ ।

संस्कृतिज्ञानस्य साधनानि २८

२. प्रथमाश्रमः ३०-१३२

शिक्षा-समारम्भाः ३१

उपनयनं शिक्षाव्रतं च ३२
वासः ३२, मेखला ३३, दण्डः ३३, उपनयन-विधिः ३४, यज्ञोपवीतम् ३६, गायत्री ३८ सन्ध्योपासनं ४० ।४१

आचार्यगौरवम् ४१
आचार्यः ५०, प्रवक्ता ५१, श्रोत्रियः ५१, शिक्षकः ५१, उपाध्यायः ५१ ।

शिक्षाया उद्देश्यम् ५२
विद्ययामृतमश्नुते ५४, योगक्षेमो नः कल्पताम् ५२, नास्ति विद्यासमं चक्षुः ५५, वृत्त्यर्थं यस्य चाधीतं निष्फलं तस्य जीवितम् ५७, परमार्थकरी विद्या, आत्मज्ञानं परं स्मृतम् ५७ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

शिक्षण-विषयाः ५८
परा विद्याः, अपरा विद्याः ५८ वैदिकसंहिताः, ब्राह्मणानि, आरण्यकानि ५९, उपनिषदः (ब्रह्मविद्याः) ६०, इतिहास-पुराणानि, क्षत्रविद्या ६०, त्रयी आन्विक्षिकी, वार्ता, दण्डनीतिः ६१, चतुर्दशविद्याः ६४, संसर्गविद्या, हस्तिसूत्रम्, धनुर्वेदः, अष्टादश शिल्पानि, वेदाङ्गानि, त्रिपिटकानि, द्वादशाङ्गानि, चतुर्दशपूर्वाः ६४ उपवेदाः ६५ आयुर्वेदः ६६, धनुर्वेदः ६७, गन्धर्वविद्या ६८, स्थापत्यशास्त्रम् ६९, औद्योगिकविद्याः शिल्पानि च ७१, हीनविद्याः, कलाः ७३।

शिक्षण-संस्थाः ७५
ऋषिकुलम् ७५, आश्रमः ७७, तक्षशिलाविश्वविद्यालयः ७९, आचार्यकुलम्, देवायतनम् ८०, ब्रह्मदेयग्रामः, चरकः ८१, गुरुकुलम् ८२, विद्यामन्दिरम् ८५, अग्रहारः ८६, बौद्धविद्यालयः, विहारः ८८, नालन्दा-विश्वविद्यालयः ९०, वलभीविश्वविद्यालयः ९९, विक्रमशिला-विश्वविद्यालयः १००, जगद्दलविद्यापीठम् १०१, उदन्तपुरी-विद्या-पीठम् १०२, जैनविद्यालयाः १०३।

शिक्षणविधिः १०३
निदर्शनम् १०८, व्याख्यानम् १०९।

अनुशासनम् ११४

विदुषां प्रतिष्ठा ११४

शिक्षाधिकारी ११९
स्त्रीणां शिक्षाधिकारः १२३ शूद्राणां विद्याधिकारः १२५

समावर्तनम् १२७

नैष्ठिकब्रह्मचर्यम् १३०

शैक्षणिक-विशेषाः १३२

३. गृहाश्रमः १३३-१९७
वैदिकगृहाः गृहस्थाश्च १३३

सपत्नीकवृत्तिः १३४
कर्माधिकारभूता जाया १३४, पत्नीं विनापूर्णता १३६, पत्न्याः साहचर्यमपरिहार्यम् १३७, वधूगुणाः १३८

अष्टांविधविवाहयोजनम् १३९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ब्राह्म-दैवार्ष-मानवासुर-गान्धर्व-राक्षस-पैशाच-विवाहाः १३९-१४३,
स्वयंवरस्त्रिविधः १४४।

वैवाहिक-प्रकिया १४६
शोभायात्रा (१४०) सप्तपदी-विधानम्, वध्वा अभिनन्दनम् १४८

गार्हपत्यम् १४८
श्रेष्ठब्राह्मणगृहस्थः— शालीनः, यायावरश्च १४९ अपरब्राह्मणः— वार्ता-वृत्तिकः १४९ उपनिषदि महाशालब्राह्मणाः १४९
संविभागः, परमं कर्तव्यं गृहस्थस्य १४९ विद्यशाशी, अमृतभोजनो भवेद् गृहस्थः १५०

पञ्च महायज्ञाः १५०
ब्रह्मयज्ञः, स्वाध्यायोऽध्यापनं च १५२, देवयज्ञ १५३, पितृयज्ञः १५४ भूतयज्ञः १५७, अतिथि-यज्ञः १५८, मधुपर्कः १६१।

जीवनदर्शनम् १६१

कर्मनिष्ठा १६३
ब्राह्मणैर्लोकोत्थानापेक्षयाहर्निशकर्मोद्योगैः प्रजापतिरिव प्रजारक्षणम् १६४ क्षत्रियैः प्राणपणेन प्राणिजातस्य पालनम् १८९ वैश्यैर्गो- शस्य-शिल्प-संवर्धनेन, दानेन च लोकसौष्ठव-विधानम् १९१ शूद्रैः शिल्पपाटवेन विश्वात्मक-सौन्दर्य-विधानं साहचर्यं च १९३

सोमपानम् १९४

बौद्धगार्हस्थ्यम् १९४
महामङ्गलयोजना१९५

गृहे वसति संन्यासी १९५

कर्मयोगः १९६
निष्कामकर्मयोगः १९६

४. वनाश्रमः १९८-२५४

वानप्रस्थः १९९
ऋषिधर्मः २००

जीवन-विधिः २०२

वानप्रस्थस्य मूलम् २०३
साधारणधर्माः २०७ तपः स्वरूपम् २०८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सपत्नीको वानप्रस्थः २०९

शास्त्रीय-विधानम् २१०

वानप्रस्थानां भेदाः २११

वालखिल्याः २११, चक्रचराः २१२

उदवासाः २१२

यज्ञो याजनं च २१२

प्रवृत्ति-निवृत्तिमार्गः २१३

कौटुम्बिकजीवनम् २१४

पर्णशाला २१७

तपःस्वरूपं योगश्च २१७

तपोभेदाः २१९, तपसः प्रभावः २२१, तपसो जन्मान्तरफलम् २२६, वानप्रस्थस्य लोकप्रियता २२७

तपसोऽधिकारः २२१

तपोविभवेन लोकसेवा २३२

ऋषिगणः २३९

तपोवन-व्युष्टिः २४१

भारतंपृणा आश्रमाः २४७

वानप्रस्थानां पीडकास्तेषां पराभवश्च २५०

संन्यासाश्रमः २५५-२९२

ब्रह्माश्रमः २५६

योगपथः २५७, योगशक्तिः २५८, योगदृष्टिः २५९, ध्यानपथः २५९, आत्मनात्मानमभिसंविवेश,२५९ मामृतं कृधि २६०, यतिधर्मः २६२, परा दृष्टिः २६३। महाभारते ब्राह्मणाः संन्यासिनः २६४, ब्राह्मण-(संन्यासि-) लक्षणम् २६५, पुराण-ब्राह्मणानां लक्षणानि २६६, आत्मारामाः २६७, निवृत्तब्राह्मणाः संन्यासिनः ३६९, साध्याः ३६९ संन्यास-प्रतिरोधकाः २७०

उद्देश्यम् २७०

जीवनविधिः २७१

प्रवृत्तिधर्मो गृहस्थाश्रमः, निवृत्तिधर्मो संन्यासाश्रमः २७३, शास्त्रीयं जीवन-विधानम् २७५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

संन्यासिनां प्रभेदाः २७८
प्रवृत्तिमार्गः २७९ निवृत्तिमार्गः २८०

जपः २८१

योगो ध्यानं च २८२
योगविधिः २८५, सांख्याः २८६, योगसिद्धयः २८६, भक्तियोगः, योगेन विस्मय- जननम् २८७।

तत्त्वदर्शी २८८

संन्यास-योगाधिकारिणः २८९
योगाधिकारः २९०, ध्यानम् २९१

लोकसेवा २९१

६. सामाजिकसंरचना २९३-४०७

वैदिकवर्ण-व्यवस्था २९४
देवाः २९४, परस्परसहायाः २९५, परिवार-योजना, मानव-रक्षकाः, समृद्धिः २९६, देवा ऋषयो मानवाश्च समकालिकाः २९७, देवानां व्यापृतिः २९८, लोकसेवा, परस्परोपासना २९९, ऋषि-देवयोर्विपर्ययः ३००, आचार-प्रतिष्ठापकाः ३००, ब्रह्मा, बृहस्पतिः, ब्रह्मणस्पतिः ३०१, ऋषयः ३०२, कर्मयोगिनः, ब्रह्मज्ञाः मेधाविनः ३०३, ऋषिकाः ३०४, देवैः सह वसतिः ३०६, ऋषिः ब्रह्माणश्च, व्यापृतिः ३०९, लोकशिक्षणम् ३१२, एकान्तवासिनोऽरण्यवासिनो ग्रामवासिनश्च ३१२, कौटुम्बिक-व्यवस्था ३१३, देवर्षिमानवानां परस्पर-सम्बन्धाः ३१३ तपोधनाः सप्तर्षयः ३१४।

मानवः ३१६
राजन्याः क्षत्रियाः, क्षत्रा वा ३१६, विशः (वैश्याः) ३१८, शूद्राः ३२०, असुराः ३२१, दासो दस्यवो वा ३२२, राक्षसाः यातुधानाः, यातवो वा ३२५, गन्धर्वाः, पिशाचाश्च ३२६

समाजरचनात्मिकी मनीषा ३२७
विश्वकल्याणम् ३३१

अपरवर्गीयदेवादीनां स्वीकरणम् ३३४

संघीभावः ३३४

लोकोपकारभावना ३३६

वैदेशिकानामात्मसात्करणम् ३३८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वर्णव्यवस्थायाः प्रक्रमः ३३९
जातिः ३४३

महाभारतयुगीया वर्णव्यवस्था ३४३
ब्राह्मण-लक्षणम् ३४५, हीनवृत्तिका ब्राह्मणाः ३४८, ब्राह्मणानां योग्यता वृत्तिश्च ३४९, ब्राह्मणानामकार्यम् ३५५, ब्राह्मणभेदाः ३५६

क्षत्रियः ३५७
क्षत्रियवृत्तिः ३५८, क्षत्रधर्मस्य श्रेष्ठता ३५९, क्षत्रियाणां कार्याकार्याणि ३५९

वैश्यः ३६०

शूद्रः ३६२
आत्मविकासः ३६२, शूद्राणामाजीवः, शूद्रधर्माः ३६४, देवालयदर्शनम् ३६६, तीर्थस्थानम् ३६६, सामाजिकप्रतिष्ठा ३६७

चाण्डालादयः ३७०

दस्यूनां विशेषाः ३७२
प्रशस्या दस्यवः ३७३, दस्यूत्थानम् ३७३, निषादाः ३७४

सर्ववर्णानामभ्युदययोजना १७६
वर्णसंकरता३७८

व्यवसाय-संकरता ३८१

शिल्पकारास्तेषां जातयः ३८५

वर्णनां सम्भूय-समुत्थानम् ३८६

वर्णपरिवर्तनम् ३८८
ऐतिहासिकराजवंशानां वर्णपरिवर्तनम् ३९०

अस्पृश्यता ३९१

गुप्तकालीनवर्णव्यवस्था ३९२
ब्राह्मणाः ३९२ क्षत्रियाः ३९३ वैश्याः ३९४ शूद्राः ३९५

दासो दासी च ३९७

अस्पृश्यता ४००

वर्णव्यवस्थायाः समर्थनम् ४०१
विरोधः ४०२

विदेशेषु वर्णव्यवस्था ४०४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सामाजिकसात्त्विकता ४०५

वृद्धानां समादरः ४०५

७. वंशकुलकुटुम्बानि ४००-४२५

कौटुम्बिकसदस्याः ४११

गृहपतिः ४१३

गृहपत्नी ४१४
कुटुम्बस्त्री ४१४

पत्नी-प्रशंसा ४१७
आदर्शभार्या ४१८

प्रेमादर्शः ४१९

कुलस्त्री ४२०

मातापितरौ ४२१

पुत्रः ४२२

भ्राता ४२४
पोष्यवर्गः ४२५

८. नारीप्रतिष्ठा ४२६-४७५

वैदिकनारी ४२६

महाभारतीया नारी ४२७

स्त्रीवर्गस्य सम्मानावमानौ ४२८
स्त्रीणां पारलौकिकसद्गतिः ४३१

पत्नीव्रतं बहुभार्यत्वं च ४३२

एकभार्यत्वम् ४३४

विवाहावस्था ४३५

कन्या ४३६

परदर्शनम्, अवगुण्ठनं च ४३८
अवगुणण्ठनं लज्जार्थम्४४१

विदेशेष्ववगुण्ठनम् ४४३, स्त्रीस्वातन्त्र्यम् ४४३

गृहकार्याणि ४४४, गृहाद्बहिः कार्याणि ४४५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

राजनये प्रावीण्यम् ४४६
राजनीतिज्ञता सैनिकप्रशिक्षणं च ४४८

मनोरञ्जनम् ४५१

साधारणस्त्रियः ४५३
गणिका वेश्याश्च ४५३, देवदासी ४५६

स्त्रीनिन्दा ४५९

सतीत्वानुष्ठानम् ४६१
सहमरणविरोधः ४६३, विधवा ४६६, ४६८ नियोगः ४६७

स्त्रीधनम् ४७१

स्त्रीदूषणं शुद्धीकरणं च ४७२

भारते नारीणां सर्वोच्चप्रतिष्ठा ४७५

९. राजनीतिकप्रवृत्तयः ४७६

राज्यस्य सप्ताङ्गानि ४०६

राजा ४०७
राज्ञः कल्याणगुणाः ४७७, राज्ञ आत्मसम्पत् ४८४ राजगुणाः ४८४,
आत्मत्यागवृत्तिः ४८६

सप्तसैन्धवराजाः ४८६

अन्तर्वेदीया राजानः ४८८
अशोकः ४९०, खारवेलः ४९२ कनिष्कः, ४९२, यज्ञश्रीः ४९२,
समुद्रगुप्तः ४९३, चन्द्रगुप्तो विक्रमादित्यः ४९४, प्रवरसेनः ४९४,
हर्षवर्धनः ४९४, महेन्द्रवर्मा प्रथमः ४९६

काश्मीरका राजानः ४९७
ललितादित्यः, विनयादित्यः, अवन्तिवर्मा ४९७, जयापीडः, रणादित्यः,
जयसिंहः ४९८।

मध्यभारतीया राजानः४९८

यशोवर्मा, धङ्गः, वाक्पतिः ४९९

भोजः ४९९

दाक्षिणात्या राजानः ४९९
राष्ट्रकूटनृपाः दन्तिदुर्गः, कृष्णः, ध्रुवः ४९९, अमोघवर्षः ५००

कलिङ्गस्य राजानः ५००

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अनन्तवर्मा, नरसिंहः ५००

देवगिरेः यादवाः ५००
सिंघणः, रामचन्द्रः ५००

काकतीयराजाः ५००
प्रतापरुद्रः

देशोद्धारण-सांघिकपराक्रमाः ५०१

राज्ञः प्रशिक्षणम् ५०१

केन्द्रीयशासनम् ५०२
रत्निनः ५०२, अमात्यो मन्त्रिपरिषच्च ५०३, महामन्त्री ५०६, सेनापतिः ५०७ राजकर्मचारिनियोगः ५०९, पुरोहितः, ५१०, दूतः ५१२

राष्ट्रम् ५१४
साम्राज्यम्, माहाराज्यम् ५१५ जनपदः ५१६, राज्यस्य भागाः ५१८ परराष्ट्र-, वैदेशिकनीतिः ५१८, मित्रराजः ५२०, वैदेशिकराज्यानि ५२३

दुर्गः ५२४

कोशः आयः, व्ययश्च ५२५

मित्रम् ५३०

सामन्तराज्यम् ५३२

संघः श्रेणी च ५३४

राजरक्षोपायः ५३४

राजकार्य-परिधिः ५३६

सभा समितिश्च ५४५

आदर्शराज्यम् ५४९

राज्ञोऽकार्यम् ५५२

गणराज्यम् ५५३
सिन्धु-पञ्चनदप्रदेशयोः ५५६, केन्द्रीय-समितिः ५५७, मन्त्रिमण्डलम् ५५८, नगर-परिषदः, ग्रामपरिषदश्च ५५८

व्यवहार-विधिः ५५९

न्यायिकदण्डविधानम् ५५९
विवादप्रकरणानि ५६०

न्यायाधिकारिणः ५६१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

न्याय-मूलम् ५६२
व्यवहार-विधाः ५६४, दाण्डिकविशेषाः ५६४, आशुमृतकपरीक्षा ५६७

शारीरिकदण्डभेदाः ५६८
साक्ष्यम् ५६९, शपथः दिव्यपरीक्षा च ५७१ तुलाग्नि-जल-परीक्षा ५७२, विष-कोष-तण्डुल-तप्तमाषफाल-परीक्षा ५७३, धर्मपरीक्षा ५७५

राजकीयशासन पत्र-संग्रहः ५७४
शासनाधिकारिणां परिभ्रमणम्५७४

शासन-व्यवस्था ५७५
ग्रामशासनम् ५७५, केन्द्रीयसभा ५७७, समाहर्ता ५७७, न्यायव्यवस्था ५७८

पौरशासनम् ५७९, सर्वार्थचिन्तकः ५८०, नागरकः ५८०, सेनापतयः ५८१

युद्धम् ५८२
युद्धकारणानि ५८२

सेनापतिः ५८५, सेना ५८६, युद्ध-प्रयाणम् ५८९

राजसेना ५९१

रथसेना ५९३

अश्वसेना ५९४

नौसेना ५९८

सेनावैविध्यम् ५९८

अस्त्रशस्त्राणि ६००

युद्धाचार-संहिता ६०२

युद्ध-विज्ञानं युद्धविधानं च ६०४

युद्धाभिरुचिः ६०६
युद्धसज्जा-स्कन्धावार-शिबिराणि६०२

युद्धस्वरूपम् ६०३
दिग्विजयः ६०३, युद्धमहोत्सवः ६०९ युद्धे कूटनीतिः

राजधर्मप्रयोक्तारः ६०८

राजनीति-वैशिष्ट्यम् ६०९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१०. धार्मिकप्रवृत्तयः ६२०-८१७

वैदिको धर्मः ६२१
वैदिकानामादर्शाः ६२१

देवानुग्रहः ६२५
याज्ञिकदेवाः ६२७, यज्ञस्वरूपम् ६२७, यज्ञस्य फलमुद्देश्यं च ६३०

यज्ञ-विश्लेषणम् ६३४
अग्निहोत्रम् ६३४, दर्शपूर्णमासौ यज्ञौ ६३६, चातुर्मास्य-यज्ञाः ६३६, आग्रयणम् ६३६, काम्येष्टिः, सोमयज्ञः, वाजपेय-यज्ञः, ६३७, राजसूयः अश्वमेघः, ६३८

स्तुतिः ६४१

नमः, अभिवादनम्, पादग्रहणं च ६४६
कायिकं नमः ६५०

दानं, दक्षिणा, वस्त्र ६५२
अभयदानम् ६५५, महादानानि ६५५ तुलापुरुषदानम्, हिरण्यगर्भदानम्, ब्रह्माण्डदानम्, कल्पवृक्षदानम्, गोसहस्रदानम्, धरादानम्, विश्वचक्रदानम्, रत्नधेनुदानम् ६५७

गोदानम् ६५९

पापनिवृत्तिः ६६१
महात्मनां प्रभावः ६६६

पापावरोधनम् ६६६

प्रायश्चित्तम् ६६७
पापनिवेदनम्, अनुतापः, प्राणायामः, तपः, वेदाभ्यासः, होमः, उपवासः, ६७०

श्रमः ६७२

ब्रह्म, ब्रह्मचर्यं, ज्ञानं च ६७४

श्रद्धा ६७५

सत्यमनृतं च ६७६

जपः ६७७

तपः ६८०

पारत्रौकिकम् ६८२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पारलौकिकजीवनम् ६८३

उत्तरजीवनम् ६८३

मोक्षः ६८५
ब्रह्मणः सायुज्यम् ६९९ ध्यानयोगः ६९०, आत्मज्ञानेन मोक्षः ६९१
चतुर्विधो मोक्षः ६९२

स्वर्गः ६९२
स्वर्गस्य स्थायिनिवासिनः ६९४, ब्रह्मलोकाः ६९६, स्वर्गमार्गः ६९७

पितृलोकः देवलोकश्च ६९८

नरकः ६९९

पुनर्जन्म ७०१

कर्मविपाकः ७०२
त्रिविधं कर्म ७०३, ७०५

श्राद्धम् ७०७
सार्वजनिकलाभाः ७०९

व्रत-पूजा-प्रतिष्ठा ७११
मूलतो वैदिकसंस्कृतेरङ्गम् ७१५, लौकिकलाभाः ७१६, अर्चना- सामग्री ७१७

व्रतारम्भः, भोजनीयाः, व्रतानुशासनम् ७१८, व्रतभङ्गः, उपवासः ७१९

तीर्थव्रत-पूजादीनां समन्वयः ७२१
एकादशी ७२१, जन्माष्टमी, ७२२, ऋषि-पञ्चमी ७२३, दुर्गोत्सवः, नवरात्रम् ७२३ महाशिवरात्रिः ७२५, पुण्यकव्रतम् ७२७ विचित्रव्रतानि ७२७

मूर्तिपूजा ७२८
मूर्तिपूजा समीचीनम् ७३०

वैदिकभक्तिः ७३१

महाभारतीया भक्तिः ७३४
के ते सन्ति पूज्यवर्याः ७३६, अन्यदेवताः ७३८

भक्तिः ७४०
गीतायां भक्तेर्विशेषाः, ७४२, वैदिककालतो भक्तिप्रवृत्तिः ७४४, भक्तेः फलम् ७४५, भक्तियोगः ७४५, भक्तस्य चारित्रिकविशेषाः ७४६, भक्तस्य जीवनदर्शनम् ७४६ भक्तिपथे हर्षोल्लासायोजनम् ७४८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भक्त्यधिकारिणः सर्वे प्राणिनः ७४९

अवतारः ७४९

षोडशोपचारपूजा ७५२

शङ्करभक्तिः ७५३

भक्तेः साम्प्रदायिकाचार्याः ७५३
रामानुजः ७५३, मध्वः (आनन्दतीर्थः) ७५४, निम्बार्कः ७५५, रामानन्दः ७५५, कबीरः ७५७, तुलसीदासः ७५७, वल्लभा चार्यः ७५८, चैतन्यः ७५९, नामदेवः ७६०, तुकारामः ७६०

भक्तेर्दार्शनिकभूमिका ७६२
समष्टिपरायणता ७६२, भक्तिपथ-विशेषाः ७६२

प्रपत्तिः ७६४

शैवधर्मः ७६४
शिवार्चन-विधिः ७६६, पाशुपतधर्मः ७६६, पूजा ७६७

उपासना ७६८

बौद्धधर्मः ७६९
धर्मचक्रप्रवर्तनम्, आर्यसत्यानि, अष्टाङ्गिकमार्गः ७७१, भिक्षूणां कृते निवृत्तिमार्गः ७७३ पञ्चशीलम् ७७४-७७८, कर्मणा जातिः ७७४।
पूजाविधिः ७७४, स्मृत्युपस्थानम् ७७५, ब्रह्मचर्यम् ७७६, यज्ञ-देवब्रह्मादेर्मूलविचारणा ७७६-७७७, प्रवृत्तिमार्गः ७७९

इहलोके कथं व्यवहर्तव्यम् ७८०

मरणोत्तरगतिः ७८१

वैदेशिकप्रसारः ७८२
पूर्वदिश्यप्रसारः ७८३, मध्येशियायां बौद्धधर्मः ७८४

तीर्थानि ७८४

जैनधर्मः ७८५

तीर्थङ्करपरम्परा ७८५
नेमिनाथः ७८६, पार्श्वनाथः ७८७, महावीरः ७८७

जैनधर्मस्य लोकप्रियता ७८८

धर्मस्य प्रयोजनानि ७९०
धर्मस्य लक्षणानि, पूजाविधिः ७९१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्रावक- (गृहस्थ-) धर्माः ७९३

भावनाचतुष्टयम् ७९३, गुणव्रतत्रयम् ७९३, शिक्षाव्रतचतुष्टयम् ७९३, एकादश प्रतिमाः ७९४

मुनिधर्मः ७९४

धर्मादर्शाः ७९४

धार्मिकसहिष्णुता ७९५

सर्वधर्मरतिः ७९६ धार्मिकविवादः ७९७, परस्परादानप्रदानम् ७९९, अल्लाह-मन्दिरम् ८००, सर्वधर्ममिश्रणम् ८०१, कलाद्वारेण धार्मिकसहिष्णुता ८०३, सूफीवेदान्तयोः संगमः ८०३

स्वधर्मरक्षणम् ८०५

धर्मसंवर्धने संस्कृतस्य प्रभावः ८०९

सनातनो धर्मः ८०९

धर्मस्य नूतनप्रवृत्तयः ८०८, एकं जगद् विश्वकल्याणधायम् ८०९

अहिंसा ८१२

एकेश्वरवादः ८१३

ग्रीक-वैदिकधर्मयोः साम्यम् ८१५

धर्मप्रचार- साधनानि ८१५

पण्डितपरिषदो धर्मनिर्णयः ८१६

मन्त्रशक्तिः ८१७

११. विश्वतोमुखं सौरभम् ८१८

पश्चिमेशिया ८१९, एशिया-माइनर ८२१, अरबदेशः ९२१, विक्रमादित्यस्य धर्मदूताः ८२२, कनिष्कराज्यम् ८२७, अफगानिस्तानम् ८२८

योरपीय-सांस्कृतिक-समुच्चयः ८३०

ईरानभारतयोः सम्बन्धाः ८३१

धार्मिकप्रभावः ८३३

ईराकः ८३४

कास्पियनप्रदेशः ८३६

ग्रीस-भारतयोः सम्बन्धः ८३६

सीरिया-एशियामाइनर प्रदेशौ ८३६

फिलीस्तीनदेशेन-सम्बन्धः ८३८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

बलखेन सम्बन्धः ८३९

खोतान-राज्यम् ८४०
तुर्किस्ताने बौद्धधर्मः ८४२

ह्वेनसांगपथे भारतीय-संस्कृति-केन्द्राणि ८४३
बामियान-राज्यम् ८४३

बुखारा-राज्यम् ८४४

मङ्गोकिया ८४४
मंगोलियादेशे बौद्धधर्मः ८४५

चीनदेशेन सम्बन्धः ८४६

कोरिया-देशः ८५१

त्रिविष्टपः (तिब्बतदेशः) ८५२

नेपालः ८५३

दक्षिण-पूर्वदिश्यप्रदेशाः ८५३

भारतीय-राज्यानि ८५५, स्यामः-थाईलैण्डः ८५५, थाईलैण्डदेशे भारतीया संस्कृतिः ८५८, कम्बुजः (कम्बोडिया) ८५९ अङ्गकोरवाटः ८६२, लाओसः ८६५ अन्नाम, चम्पा, वियतनाम ८६५, मलयप्रायद्वीपः ८६६, सुमात्रा (स्वर्णद्वीपः) ८६८, बालिद्वीपः, ८६९, जावा-(यव) द्वीपः ८७१ श्रीविजय साम्राज्यम् ८७४, शैलेन्द्र-साम्राज्यम् ८७४ वरुण-द्वीपः (बोर्नियो) ८७४

प्रकीर्णदेशैः सम्बन्धाः ८७६

लियुआनिया-देशेन सम्बन्धः ८७६, मिसर-देशेन-सम्बन्धः ८७७, रूसमाहाराष्ट्रे भारतीयाः ८७७, इटलीप्रदेशे ८७८ लङ्का ८७९, बर्मा ८८०, जापानदेशेन सम्बन्धः ८८१, अमेरिकामहाद्वीपेन प्रागैतिहासिक-सम्बन्धः ८८३, मैक्सिको ८८४, पेरू ८८४, आस्ट्रेलिया-महाद्वीपस्य समासादनम् ८८५

वैदेशिकैः संव्यवहारः ८८६

ऋषीणामवदानम् ८८७

१२. अन्वीक्षणम् ८८९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१३. परिशिष्टम्

तीर्थदर्शनम् १-५४

आपः, नैसर्गिकसौहित्यम् ३, तीर्थपर्यायाः ४ पृथिवी-प्रदक्षिणा ५, चतुर्धा तीर्थत्वम् ५, तैर्थिकगुणाः ७ तीर्थलक्षणानि ९

नानाविधतीर्थलाभाः १०

तीर्थयात्राधिकारिणः १२

तीर्थसज्जा (ऋषिचर्यम) १३

तीर्थानुशासनम् १४

तीर्थवर्णनम् ६३

अमरनाथगुहा १५, हिङ्गलाजः १६, कुरुक्षेत्रम् १७, गङ्गा १८ पुष्करम् २१ नैमिषारण्यम् २२, हरिद्वारम् ३३, तीर्थोत्तमानि २४, प्रयागः २४, काशी २५ विन्ध्यवासिनी २८, अयोध्या २९, नेपालस्य तीर्थानि ३०, विहार प्रदेशे तीर्थानि ३०, वैद्यनाथधाम ३१ सम्मेदशिखरः पार्श्वनाथ- पर्वतः ३१, गया ३१, उत्तरप्रदेशीयतीर्थानि ३२, मानससरः ३३, बदरिकाश्रमः ३३, गङ्गोत्तरी-गङ्गावतारः ३४, मथुरा ३४, वृन्दावनम् ३५, गोकुलम् ३६, गोवर्धनम् ३६ चित्रकूटः ३६, वङ्गदेशीयतीर्थानि ३७ गङ्गासागरः (कलकत्ता) ३७, नवद्वीपधाम ३७ असमप्रदेशीयतीर्थानि ३८, कामाख्यातीर्थम् ३८ उत्कलप्रदेशीय-तीर्थानि ३८ जगन्नाथपुरी ३८ मध्यप्रदेशीय-तीर्थानि ४०, उज्जयिनी-अवन्ती ४०, नर्मदा ४१, माहिष्मती (महेश्वरः) ४१ दक्षिणभारतीय-तीर्थानिः ४१, गोदावरी ४२, रायगढम् ४२, पण्ढरपुरम् (पुण्डरीकः) ४२, विजयनगरम् ४३, गोकर्णमहाबालेश्वरः ४३, हालेविदः द्वारकासमुद्रः ४४, शृङ्गेरी ४४, उदीपी ४४ काली ३४४, मेलकोटेयादवगिरिः, ४४, गोम्मटतीर्थम् ४४, वेङ्कटाचलम् तिरुपति बालाजी ४५, अरुणाचलम् ४५, चिदम्बरम् ४७ कुम्भकोणम् ४७ तञ्जौर-बृहदीश्वरः ४८, श्रीरङ्गम् ४८, सेतुबन्ध-रामेश्वरः ४८, धनुष्कोटिः ४८, मीनाक्षीमन्दिरम् ४९ कन्याकुमारी ४९, विवेकानन्दमन्दिरम् ५०, त्रिवेन्द्रम्तिरुअनन्तपुरम् ५०, पश्चिमभारतीयतीर्थानि ५०, अर्बुदाचलः (आबू) ५०, द्वारका-द्वारवती-पिण्डारकम् ५१, सोमनाथः प्रभासो वा ५१, गिरिनगरम् (जूनागढ़) ५२; भौमतीर्थानि ५३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पूर्वपीठिका

संस्कृतिर्नाम मानवस्याद्वितीयो विशेषः। मानवतां यथायोग्यं प्रतिष्ठापयितुं मनुष्यो नित्यमुपायान् प्रकल्पते, तान् प्रकरोति च। सृष्टेः समारम्भात् प्रभृति न केवलं स्वस्यापितु परेषामपि[1] विश्वेषां चराचराणामपि च सुखं कथं वर्धेत दुःखं च क्षीयेत' इति शिवसंकल्पं मनसि निधायोत्तरोत्तरोपचीयमानं स्वनिधिं—ज्ञानं, बलं, सत्त्वं, बुद्धिं, प्रतिभां, सौहार्दं च साधनरूपेणोपयुञ्जानो मानवः प्रकृतिभूतानां क्षित्यप्तेजोमरुदादीनां तत्त्वानामसंख्येयगुणवैभव-शक्तिसम्पदः सरहस्यं[2] विज्ञाय विज्ञाय नित्यनूतनानन्दोल्लासोपभोगार्थमुपयुङ्क्ते। नैतावता परितुष्टः पुरुषः प्रकृति-परिधेर्बाह्यमात्मतत्त्वं स्वानन्दानुभूतये परिचिन्वन्नास्ते।[3] सोऽयमात्मा हृदि सन्निविष्ट[4] ऋषिभिः संस्पृष्टोऽन्वीक्षितश्च साध्यं[5] साधनं[6] चेति रूपद्वयेन संस्कृति-परीक्षणहेतुः प्रथमो दीप-स्तम्भः।

---

१. तद्यथा वेदादिषु निर्दिष्टम्—प्रियं सर्वस्य पश्यत। अथर्व० १९.६२.१

सर्वभूतात्मभूतस्य सर्वभूतहितस्य च।
देवा अपि मार्गमुह्यन्ति अपदस्य पदैषिणः॥ महा० शान्ति० २३१.२३
स्वार्थो यस्य परार्थ एव य पुमानेकः सतामग्रणीः।
एके सत्पुरुषाः परार्थघटकाः स्वार्थं परित्यज्य ये॥

२. रहस्यं यथा बृहदारण्यकोपनिषदि व्याख्यातम्—इदं मानुषं सर्वेषां भूतानां मधु। अस्य मानुषस्य सर्वाणि भूतानि मधु।...इदं ब्रह्मेदं सर्वम्। २.५.१३

३. अथर्ववेदे—पुरं यो ब्रह्मणो वेद यस्याः पुरुष उच्यते। १०.२.२८

४. छान्दोग्ये—एष म आत्मान्तर्हृदयेऽणीयान् व्रीहिर्वा ज्यायान् पृथिव्याः' ३.१४.३

५. साध्यरूपेण—सत्येन लभ्यस्तपसा ह्येष आत्मा। मुण्डक० ३.१.५ तरति शोकमात्मवित्। छान्दोग्य० ७.१.३ आत्मन्येव सायुज्यमुपैति। मैत्री० ४.१ विन्दत्यात्मनि यः सुखम्। गीता ५.२१ अयमात्मा सर्वेषां भूतानां मधु। बृहदा० २.५.१४। देवासुरा ह वै य आत्मकामा मैत्री ७.१०। आत्मरतिरात्मक्रीडः। छान्दोग्य० ७.२५.२ मुण्डक० ३.१.४। शीघ्रमात्मज्ञः कृतकृत्यः। मैत्री० २.१।

६. साधनरूपेण—आत्मना विन्दते वीर्यम्। केन० २.४

यदात्मतत्त्वेन तु ब्रह्मतत्त्वं दीपोपमेनेह युक्तः प्रपश्येत्।
अजं ध्रुवं सर्वतत्त्वैर्विशुद्धं ज्ञात्वा देवं मुच्यते सर्वपाशैः॥ श्वेत० २.१५
तदात्मतत्त्वं प्रसमीक्ष्य देही एकः कृतार्थो भवते वीतशोकः॥ श्वेत० २.१४

यावद्ध वा इन्द्र एतमात्मानं न विजज्ञे, तावदेनमसुरा अभिबभूवुः। कौषीतकि० ४.२१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पूर्वोक्तेन मानवव्यापारेण स्पष्टं प्रतिभाति यत्परम्परया लोकस्याध्यात्मिकं बौद्धिकं सात्त्विकं चावदानं बहुलीभूतम्। विश्वस्य रूपं नित्यमेव चारुतरं कृतम्।[1] इयं प्रातिभोत्कर्षशालिनी प्रक्रिया मानवानामेव सुलभा, सा च तेषां संस्कृतिः। संस्कृतेः सततमुच्चतरोऽभ्युदयो मानवस्य तपसा, चिन्तनेन, कर्मण्यव्यवसायेन च सम्भवति। तस्य चतुर्दिशमभ्युत्थानं संस्कृतेः फलम्।[2] संस्कृतिरेव समाजं निर्माति यत्र बहूनामैक्येन सर्वोदयः समुदेति।[3] महाभारते समर्थितम्—

लोका ह्येवं विवर्धन्तेऽन्योन्यं समुपाश्रिताः। आरण्यकपर्वणि १०१.२

प्रकृतेः सान्निध्यम्

प्रकृतेर्निदर्शनेन मानवस्यौदात्त्यं प्रतिजागर्ति—दिशामेकं पुण्डरीकमसि। अहं मनुष्याणामेकं पुण्डरीकं भूयासम्। बृहदारण्यके ६.३ ६।

पुरुषस्य प्रकृत्या सान्निध्यं द्विविधं भवति—आत्मरूपेण, अनात्मरूपेण च।[4] प्रथमं तावदात्मरूपेणोपवर्णितम्—आत्मैवाधस्तात्, उपरिष्टात्, पश्चात्,

---

१. तद्यथा ऐतरेयब्राह्मणे—

आत्मसंस्कृतिर्वाव शिल्पानि। एतैर्यजमान आत्मानं संस्कुरुते। ६. ५. १

इयमेवात्मसंस्कृतिर्जगतः प्रतिसंस्कारं विदधाना मानवतायाः कृत आधिभौतिक-सौख्य-साधनानि कलात्मकव्यापारांश्च प्रस्नापयति।

द्रष्टव्यमत्र—तस्मात् तव बहु विश्वरूपं कुले दृश्यते। छा० उ० ५. १३. १

२. संस्कृतिस्तु वैदेशिकैः कल्चरशब्देनाभिहिता नैकदृष्टिभिः परिभाषिता। तथाहि—

Culture seeks to do away with classes to make the best that has been thought and known in the world, to make all men live in an atmosphere of awareness and light. Culture is the acquainting our selves with the best that has been known and said in the world and thus with the history of the human spirit. Matthew Arnold : Preface to Literature and Dogma.

Culture opens the sense of beauty. Emerson : Culture, The Conduct of life.

3. What holds society together and gives the individual balance and perspective is the possession of culture. Report of the University Commission, 1949 p. 55

४. एतद् द्वयं ब्रह्मेति महाभारते निदर्शितम्—

ब्रह्मतेजोमयं शुक्रं यस्य सर्वमिदं जगत्।
एकस्य ब्रह्मभूतस्य द्वयं स्थावर-जङ्गमम्॥ शान्ति० २२४.३२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पुरस्तात्, दक्षिणतः, उत्तरतः। आत्मैवेदं सर्वमिति।[1] अनात्मरूपेण प्रकृतिः प्रभवति योऽयं संसार इति।[2] इयमपरा संस्कृतिर्बाह्यसौन्दर्यशालिनी गोऽश्व-हस्तिहिरण्य-दासभार्यं क्षेत्राण्यायतनानीति प्रतिष्ठात्मकं व्याहृतम्। इयं बुद्धिर्लोकसंस्कृतिकारिणी बहुजनासक्तिनिर्बन्धिनी च बहुलोकप्रियतया प्रथम-स्थानीया राराजते। अत्रापि पृथ्वी, आपः, अग्निः, वायुः, आदित्यः दिशः, विद्युत्, मेघः, आकाशः, धर्मः, मानुषः, आत्मादयः संस्कृतिविभवेन सर्वेषां भूतानां मधु। इयं माध्वीवृत्तिः कथमुपजायत उपचीयते वा। तत्र निमित्तं भवति रूपवैविध्यजननम्। यथा पुरुष एको निमित्तभेदात् बहुरूपमीयते तथैव पञ्चभूतादीनां शक्यतान्वेषणेन रूपवैचित्र्यं सृज्यते सर्वोपभोगयोग्यतायाः संवर्धनाय। परमात्मविकारश्च नामधेयमात्रम्।

परा संस्कृतिरपरा च संस्कृतिरुभे सहजाते मानवोपकारिण्यौ मानवाय लौकिकीं वाध्यात्मिकीं प्रवृत्तिं सृजतः। तदनु लौकिकी पारलौकिकी चाभ्युदयनिःश्रेयसोपलब्धिः सम्भाव्यते।[3]

हिमालयः

शुभ्रो धर्मध्वजो मातुः किं वा राशीकृतं यशः।
रौप्यं वा मुकुटं दिव्यं वन्देऽहं तं हिमालयम्॥

भारतीयसंस्कृतेर्निर्माणे हिमालयोऽनुत्तमः प्रवर्धको वर्तते। सनातनधारणा तदिह वर्तते—

ब्रह्मर्षिराजर्षिसुरर्षिजुष्टः पुण्यः समीपे हिमवान् हि शैलः।
तपांसि तान्येव तपोधनानां यत्संनिकर्षाद् बहुलीभवन्ति॥ बु० च० ७.३०

ऋग्वेदे तु ऋषेः प्रश्नो विद्यते—

कस्येमे हिमवन्तो महित्वा सं नो अद्रिः सं नो पर्वतः।

कालिदासेनोत्तरं समाधीयते

---

१. छान्दोग्य० ७.२५.२। अपरं च 'स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नात्म-रतिरात्मक्रीड आत्ममिथुन आत्मानन्दः। स स्वराड् भवति। तस्य सर्वेषु लोकेषु कामचारो भवति।'

नातः परं ज्ञानमस्ति। संस्कृतेरियं सर्वातिशायिनी विभूतिः। इयं परा संस्कृतिः।

२. क्रिया-कारक-फलभेदो हि संसारः। छान्दोग्योपनिषद् ७.१४.१ अधिकृत्य शाङ्कर-भाष्यम्। अत्र या प्रकृतिरिति वर्णिता, सा वस्तुतो ब्रह्म एव। तद्यथा बृहदारण्यके— इदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमे वेदा इमानि भूतानीदं सर्वं यदयमात्मा। ४.५.७.

३. तद्यथा कालिदासेन रघुवंशे निदर्शितम्

शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्।
वार्धक्ये मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्॥ १.५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः ।
पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्या इव मानदण्डः ।। इति

भारतस्य शिरोभूतो हिमालयः स्वकीयेन परमौदात्त्येन भारतीयप्रजाभ्य आत्मनो गौरवातिशयेन सर्वानतिशयितुं सन्दिशतीव । निसर्गेण पर्वतोऽयं रम्यः, सौरभः, शान्तः, शरण्यः, लोकरक्षकः, समुच्छ्रितः, समाहितश्च सर्वान् समाश्रितानेतैः स्वकीयैर्विशेषैरात्मानं मण्डयितुमादर्शयति । अस्मात् कारणात् प्राचीनकालत उच्छ्रायोपासका हिमालयस्योपरिर्युपरि शिखरान् द्रष्टुकामाः सोत्साहं पर्वतशिखरानारोहन्ति ।

रवीन्द्रो हिमालय-दर्शनप्रभावं वर्णयति—सीमातिग आकाशो, भूविस्तारो, दूरतः प्रतिभाता नीलाभशालतालतरुषण्ड-श्यामता, शान्ति-स्मृति-वैभवरूपा मामकीनं स्वभावमभिविशन्तीति ।

अर्जुनेन स्तुतोऽयं शैलराजः —

साधूनां धर्मशीलानां मुनीनां पुण्यकर्मणाम् ।
त्वं सदा संश्रयः शैल स्वर्गमार्गाभिकांक्षिणाम् ।।

प्राचीनकालादेव हिमालयो देवभूमिः सुप्रथितः । शिवमुखेन कालिदासः पार्वतीं सन्दिशति—

पितुः प्रदेशास्तव देवभूमयः । इति

देवानां सन्निवासेन पावनोऽयं शैलस्तेषामुदात्तचरितानां घटनास्थलमेवास्मान् दिव्यकर्मविभूतिभिरात्मानं प्रसाधयितुमुत्सेचयति । अत्रैव तपोवनं, नन्दनवनं, व्यासगुहा, गणेशगुहा, सगराश्रमः, दीर्घायामाः शीता उष्णाश्च जलकुण्डाः, सरोवराः, वसुधारादयः प्रपाता मनः, शरीरं, नेत्रं च रमयन्ति प्रेक्षकाणाम् । अत्रैव साक्षान्नन्दा प्रतिद्वादशवर्षं सचमत्कारं चतुःशटङ्गं मेढ्रं पूजोपहारं गृह्णति । अत्रैव कस्तूरीमृगाश्चतुर्दिशं सुगन्धयन्ति । अत्रैव भगीरथप्रयासेन गङ्गा स्वर्लोकादवातरत् । अत्रैव शिवः शिरसा शैलराजसुतां गङ्गां स्वर्गतो मानवलोकावतरणकालेऽधारयत् । एतत् सर्वं व्याख्यातमादिकविना वाल्मीकिना—

ततो हैमवती ज्येष्ठा सर्वलोकनमस्कृता ।
तदा सा सुमहद्रूपं कृत्वा वेगं च दुःसहम् ।
आकाशादपतद् गङ्गा शिवे शिवशिरस्युत ।।
हिमवत्प्रतिमे राम जटामण्डलगह्वरे ।
सा कथञ्चिन्महीं गन्तुं नाशक्नोद् यत्नमास्थिता ।।
विससर्ज ततो गङ्गां हरो बिन्दुसरः प्रति ।
तस्यां विसृज्यमानायां सप्त स्रोतांसि जज्ञिरे ।।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

हिमालयस्तु तपःप्रधान-भारतस्य सर्वोत्तमा तपोभूमिर्विजयते। न केवलं मानवा ऋषयश्चापि तु देवानां महादेवोऽपि हिमालयस्यातिथ्यं तपःकाले स्वीचकार। तद्यथा महाभारते—

तत्रोत्तरां दिशं गत्वा शैलराजस्य पार्श्वतः।
तपोऽतप्यत दुर्धर्षं तात नित्यं वृषध्वजः॥

विष्णुरपि हिमालये तपश्चकार—

विष्णुना तत्र पुत्रार्थे तपस्तप्तं महात्मना। इति

विश्वामित्र-वसिष्ठ-कण्व-व्यासादीनां महर्षीणां तपोभूमिराश्रमाश्च हिमालये ऽवर्तन्त। तत्र वनजानामैश्वर्यैराश्रमाणां काचिन्मनोहारिणी, लोकोचित-वैषम्यापहारिणी च शोभा वस्तुतो वर्तत एव। आधुनिकयुगेऽपि सन्तो नान्यत्र-लभ्यां शान्तिं वा चित्तशुद्धिं वात्मसात्कर्तुं तामेव हिमभूमिमाश्रयन्ते। तद्यथा हिमालये रामतीर्थेनानुभूतम्—

The air is redolent with the perfume of roses, the sight is ravished with carpets of variegated blossoms for miles. The atmosphere is filled with celestial bird music.

शङ्कराचार्योऽत्रैव हिमाच्छादितप्रदेशे बदरिकाश्रमे संस्थितो भारतस्य वेदान्तानुयोगिनीं प्रतिभां जागरयतिस्म। अत एव सद्धर्मविचारणा सहजां सुयोग्यां च भूमिकां समादाय स्वर्गतोऽमृतेन परिपोष्यमाणान् भारतवासिनो-ऽध्यात्मपथे नियोजयति।

आनन्त्यमेवादर्शयति हिमालय-शिखरम्। एतस्यानन्त्यस्य भारतीय-संस्कृतेः सर्वेष्वङ्गेषु कश्चित्प्रत्यक्षो वाप्रत्यक्षो वा प्रभावो विद्यते। तथा हि—सर्वसंस्कृतिमौलिभूतं दर्शनमेव। तत्र वेदान्तस्य ब्रह्म तस्यैवर्षेस्तपःपूतं दर्शनं, येन हिमालयस्य सन्निधौ भूमा परिकल्पितः। अथ च भूमा वै सुखं, नाल्पे सुखमस्तीति वितर्कितम्। तत्र हिमालये नास्ति किंचिदल्पम्। तदेवा-नल्पत्वं भारतीयसंस्कृतौ राराजते। तदेव हिमालयस्य परमोच्चं प्रदानम्।

प्रायः १२५० क्रोशान् दीर्घोऽयं हिमालयोऽसमप्रदेशतो जम्मूकश्मीर-पर्यन्तं स्थितः। हिमालयस्य क्रोडे भारतस्य शिरोभागो, भूटान-सिक्किम-नेपाला-दयश्च समानीताः। पादप्रदेशादारभ्य प्रायः ५० क्रोशान् यावत् प्रस्थ उपर्युपरि शिखरश्रेणिभिराकाशं चुम्बमानः पर्वतराजोऽयं विश्वस्य भूभृन्मण्डले स्वकीयेन केनचिद् विशिष्टेनौदार्येण भारतं शिरस्त्राणरूपेण क्षत्रयति, गङ्गादीनां वारिभिः पोषयति, पावयति च लोकान्, रत्नराशिभिः समृध्यति, शिखर-शरण्यान् तापसांश्च पावकैर्ब्राह्मीकरोति। तत्रासमप्रदेशे ब्रह्मकुण्डः, नेपालदेशे पशुपतिनाथः, कश्मीरेऽमरनाथश्च पर्यन्त-तीर्थानि। कैलास-मानसरोवर-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

बदरीनाथ-केदारनाथादयश्च मध्यभागे मुनीनां वसतरूपाणि तीर्थायन्ते। नैसर्गिकसौन्दर्य-चरिष्णूनां कृते कश्मीरादयः प्रदेशा अनुत्तमा एव जागतिक-विभूतिषु।

अध्यात्मपरायणा मनीषिणो हिमालयस्य क्रोडं शरणीकृत्य तपःपरिपूताः सन्तो लोकोन्नयनसमर्थ-जीवनपथमादर्शीकुर्वन्त आसते। एवमेव बहवः शिल्प-विदः, कलाकाराः संगीतनृत्यविशारदाः पर्यटकाश्च हिमालयात् प्रचुरं प्रीति-भोजं समुपलभ्यानुत्तमां नित्यनूतनां वैदग्धीं पल्लवयन्ति।

हिमालयस्योच्छ्रायेण प्राचीनकालत एवावरसंस्कृति-परायणा मध्यैशिया-वासिनो भारत आक्रमणादपवारिताः, शत्रवश्च ततो निवारिता इति वदन्ति पुरातत्त्वविदः। हिमालयादुत्तरदिशः शीतवायोरिह समाक्रमणमवरुद्धमेव पर्वतराजेन। प्रत्यक्षमेव परमो लाभो हिमालयस्य स्थितेर्यत् महोदधेर्जलं संगृह्य पयोधरा यदा देशे देशे सहस्रगुणमुत्सृष्टुं समारभन्ते, तदा पर्वतराजोऽयं भारतीयप्रजाभ्योऽधिकाधिकं दानं कर्त्तुं तान् जलदान् प्रेरयति।

अपरं च कविदृशा दर्शनीयोऽयं भास्कर-भान्वितो हिमालयस्य शिखर-भागः। पृथिव्या अयं सीमारेखा, स्वर्गराज्यस्य प्रारम्भश्च। सर्वदिक्षु प्रसारिता उत्तुङ्गपर्वतमालाः परिहिततुषारकिरीटाः, सहास्यवदनाः, शान्ताः, स्निग्धाः, सौम्याश्च भान्ति। उदेति तत्र प्रदीप्तः, प्रफुल्लस्तरुणतपनो दिग्दिगन्तेषु किरणजालानि प्रसार्य। तस्य स्नेहस्पर्शेनैव मुहुर्तेन तानि शुभ्रतुषारमुकुटानि सुवर्णं धारयन्ति। यतो महास्पर्शमणिप्रतिमोऽयं भास्वरो भास्करः, यस्य प्रभाभिः सर्वान्धकाराणि, सर्वपापानि, सर्वदुःखानि च परिणमन्त आलोक-रूपेण पुण्यरूपेण च यथाक्रमम्। महामायावी अयं महिममयो मरीचिमाली, यस्य माया-तूलिकया मुहूर्तेन सुवर्णायते लौहकृष्णमपीदं जगत्।

वैदेशिका अपि हिमालयस्यानुत्तमतां विशदयन्ति। तथा हि नाइजेल-निकोलसनः —

The Himalayas demand superlatives. They have the highest peaks and passes, steepest scarps and the most precipitious ravines, the deepest gorges cut by swift cascading foaming rivers, towering glaciers-sculpted crests crowned with perpetual snows looking down to the most deeply scooped valleys, resplendent with lakes and rush-ing streams.

जवाहरलालनेहरुः हिमालयस्य महिमानं वर्णयति—

The Himalayas have exercised a peculiar fascination on me. They are not only physically present in India, dominating the vast

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

Indian plain, but for every Indian they convey a deeper message. They have been entwined in the life of our race from the dawn of history and have not only affected our politics but have been an intimate part of the art and literature, mythology and religion of our poeple. I suppose nowhere else in the world have any mountains or mountain ranges played such an important part in the development of a race as the Himalayas have done in India for thousands of years.

Foreword of 'Devātmā Himālaya' by Prabodhkumar Sanyal.

गङ्गा

भारतीयसंस्कृतेः पावनत्वं गङ्गायास्तटे वसतां मनीषिणां महामुनीनां पुण्यप्रभावेण समवर्धत ।[1] गङ्गा-विषयिणी पावनी लोकधारणा तेषां मुनीनां व्यासङ्गेन सञ्जाता—

दृष्टा तु हरते पापं स्पृष्टा तु दिवं नयेत ।
प्रसङ्गेनापि या गङ्गा मोक्षदा त्ववगाहिता ॥

महाभारते व्यासो भारतीय-संस्कृति-प्रतिष्ठापनार्थं शाश्वतं गङ्गागौरवं निदर्शयति । तथा हि—

ते देशास्ते जनपदास्त आश्रमास्ते च पर्वताः ।
येषां भागीरथी गङ्गा मध्येनैति सरिद्वरा ॥
विसोमा इव शर्वर्यो विपुष्पास्तरवो यथा ।
तद्वद्देशा दिशश्चैव हीना गङ्गाजलैः शुभैः ॥

त्रिविधनैर्मल्य-विधायिना संस्कृतिस्तन्येन गङ्गा भारतान् बिभर्तीति प्रोक्तम्—

त्रिषु लोकेषु ये केचित् प्राणिनः सर्व एव ते ।
तर्प्यमाणाः परां तृप्तिं यान्ति गङ्गाजलैः शुभैः ।

उपगङ्गं महर्षीणां ज्ञानधारासारनिष्णाता उपासका भवन्ति परितुष्टाः ।

ते संविभक्तां मुनिभिर्नूनं देवैः सवासवैः ।
येऽभिगच्छन्ति सततं गङ्गामभिगतां सुरैः ॥

सौन्दर्यं च सम्भ्राजते गङ्गायाः —

हंसादिभिः सुबहुभिर्विविधैः पक्षिभिर्वृताम् ।
गङ्गां गोकुलसम्बाधां दृष्ट्वा स्वर्गोऽपि विस्मृतः ॥

---

१. वानप्रस्थैर्गृहस्थैश्च यतिभिर्ब्रह्मचारिभिः ।
विद्याकद्भिः श्रितां गङ्गां पुमान् को नाम नाश्रयेत् ॥ अनु० २६.६९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

इयं सा गङ्गा मधुमत्तमेति कविना दर्शितम्[1]—

मधुप्रवाहाधृतरागोद्धृताभिर्महोर्मिभिः शोभिता ब्राह्मणैश्च ।
दिवश्च्युता शिरसाप्ता भवेन गङ्गावनीध्रात् त्रिदिवस्य माला ।।

गङ्गाया आदर्शचरितं सद्भिरनुकरणीयम् । तदस्ति—

उस्रां जुष्टां मिषतीं विश्वतोयामिरां वज्रीं रेवतीं भूधराणाम् ।
शिष्टाश्रयाममृतां ब्रह्मकान्तां गङ्गां श्रयेदात्मवान् सिद्धिकामः ।।

भवतां कृते गङ्गा किं करिष्यतीति कविर्वर्णयति—

तव मम च गुणैर्महानुभावा जुषतु मतिं सततं स्वधर्मयुक्तैः ।
अभिमतजनवत्सला हि गङ्गा जगति युनक्ति सुखैश्च भक्तिमन्तम् ।।

वाल्मीकिर्गङ्गाया रमणीयतां निर्वर्णयति—

जलाघाताट्टहासोग्रां फेननिर्मलहासिनीम् ।[2]

शिवो गङ्गाधर इति सुरसरितो गौरवं प्रत्यक्षयति ।

गङ्गा तु भारतीय-संस्कृतेरपरं नाम । अस्ति किंचिदनन्यतमं तत्त्वं गङ्गा-जले येन पुण्यमूर्तिरियं दिक्चक्रवासिभिः स्वीक्रियते, सम्मान्यते च । तस्या जले काचिदप्रमेया शक्तिः किंचिद् विभूतिप्रदं सत्त्वं, कश्चिदाध्यात्मिकः प्रकाशश्च वर्तन्ते । एतानि च तत्र स्नानेन, जलपानेन, दर्शनेन, संवासेन, नामग्रहणेन चात्मसात्कृत्य स्वजीवनस्य सर्वोच्चसिद्धिं यथा पुरा तथाद्यापि आत्मकामा जुषन्ते ।

वस्तुतो निकामौदात्त्यशालिनीयं गङ्गा भारतस्यैको निधिः । इयं दूरान्तिकवासिनः स्वसंस्कृतिसन्दोहेन परिपोषयन्ती न केवलं भारतमपितु विश्वमखिलं वसुधैव कुटुम्बकमिति धारणया जागरयति ।

गङ्गाया इतिहास आदौ मध्येऽन्ते च दिव्य एव । तथा हि—

आदावादिपितामहस्य नियमव्यापारपात्रे जलम् ।
पश्चात् पन्नगशायिनो भगवतः पादोदकं पावनम् ।।
भूयः शम्भुजटाविभूषणमणिर्जह्नोर्महर्षेरियं ।
कन्या कलमषनाशिनी भगवती भागीरथी भूतले ।।

अनेनोपकारैकव्रतो भवेति शिक्ष्यते, स्वीया शाश्वती सत्ता च विभायते ।

बहवस्तत्र नद्यो भारतभूभरणोद्यमा गङ्गेव स्वेषु प्रदेशेषु यथायोगं लोकानामुपकारं निर्वहन्ति ।[3] राजस्थानं विहाय सर्वत्र तासां कृतार्थता

१. अस्मिन् प्रकरणेऽन्यत्रापि गङ्गाया माध्वी प्रवृत्तिर्व्याहृता । यथा महाभारते—
'ऊर्जावतीं मधुमतीं महापुण्याम्' इत्यादि अनु० २७.८३

२. द्रष्टव्यम्—अयोध्याकाण्डे ५५.१६, १९, २४

३. गङ्गे च यमुने चैव गोदावरि सरस्वति । नर्मदे सिन्धो कावेरि जलेऽस्मिन् सन्निधिं कुरु ।।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रत्यक्षीभवति । परस्परं सहायभूतास्ता स्वकुटुम्बमिव निर्मान्ति । उत्तर-प्रदेशे गङ्गायाः सहायीभूताः सन्ति यमुना-सरयू-गोमती-रामगङ्गा-तमसादयः । उत्तर-दक्षिण-भारतं नर्मदा स्वीयसुधामृतेन सम्मिश्रयति ।

भारतीय-संस्कृति-स्वरूप-निर्माणे गङ्गा-हिमालययोर्महाश्रेयः प्रभवति । तद् वर्णितमृग्वैदिकमहर्षिणा—

उपह्वरे गिरीणां सङ्गमे च नदीनाम् । धिया विप्रो अजायत । ८. ६. २८

जवाहरलालो गङ्गां प्रोन्नमयति—

The Ganga, especially, is the river of India, beloved of her people, round which are intertwined her racial memories, her hopes and fears, her songs of triumph, her victories and her defeats. She has been a symbol of India's age-long culture and civilization, ever-changing, ever-flowing, and yet ever the same Ganga. She reminds me of the snow-covered peaks and the deep valleys of the Himalayas, which I have loved so much, and of the rich and vast plains below, where my life and work have been cast. Smiling and dancing in the morning sunlight, and dark and gloomy and full of mystery as the evening shadows fall, a narrow, slow and graceful stream in winter and a vast, roaring thing during the monsoon, broad-bosomed almost as the sea, and with something of the sea's power to destroy, the Ganga has been to me a symbol and a memory of the past of India, running into the present, and flowing on to the great ocean of the future. And though I have discarded much of past tradition and custom, and am anxious that India should rid herself of all shackles that bind and constrain her and divide her people, and suppress vast numbers of them, and free development of the body and the spirit, though I seek all this, yet I do not wish to cut myself off from the past completely. I am proud of that great inheritance that has been, and is, ours, and I am conscious that I too, like all of us am a link in that unbroken chain which goes back to the dawn of history in the immemorial past of India. That chain I would not break, for I treasure it and seek inspiration from it. And as witness of this desire of mine and as my last homage to India's cultural inheritance, I am making this request that a handful of my ashes be thrown into the Ganga at Allahabad to be carried to the great ocean that washes India's shore.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वनम्

वनं वा तपोवनं वा मुनीनां गृहमेव समेधते भारतीय संस्कृतौ। तद्यथा महाभारते कण्वाश्रमं परितो मालिनीमनु वनानि वर्णितानि—

मनःप्रह्लादजननं दृष्टिकान्तमतीव च ।
शीतमारुतसंयुक्तं जगामान्यन्महद्वनम् ॥
पुष्पितैः पादपैः कीर्णमतीव सुखाशाद्वलम् ।
विपुलं मधुरारावैर्नादितं विहगैस्तथा ॥
सर्वर्तु कुसुमैर्वृक्षैरतीव सुखशाद्वलम् ।
मारुतागलितास्तत्र द्रुमाः कुसुमशालिनः ।
पुष्पवृष्टि-विचित्रां स्म व्यसृजंस्ते पुनः पुनः ॥
परस्पराश्लिष्टशाखैः पादपैः कुसुमाचितैः ।
अशोभत वनं तत्तैर्महेन्द्रध्वजसन्निभैः ॥
सुखशीतः सुगन्धी च पुष्परेणुवहोऽनिलः ।
परिक्रामन् वने वृक्षानुपैतीव रिरंसया ॥

रवीन्द्रनाथेन भारतीयसंस्कृतिपथनिर्माण एतेषां वनानां महदवदानमधोविधं वर्णितम् —

A most wonderful thing we notice in India is that here the forest, not the town is the fountainhead of all its civilisafion

Wherever in India its earliest and most wonderful manifestations are noticed, we find out that men have not come into such close contact as to be rolled or fused into a compact mass. There trees and plants, rivers and lakes, birds and beasts had ample opportunity to live in close relationship with men. In these forests though there was human society, there was enough of open space, of aloofness, there was no jostling. Still this aloofness did not produce inertia in the Indian mind, rather it rendered it all the brighter. It is the forest that has nurtured the two great ancient ages of India-the Vedic and the Buddhist.

As did the Vedic seers, Lord Buddha also, showered his teaching in the mango woods of India. The currcnt of civilisation that flowed from forests inundated the whole of India.

The Message of the Forest.

धम्मपद इदं समर्थितम्—

रमणीयानि अरञ्ञानि यत्थ न रमते जनो ।
वीतरागा रमिस्सन्ति न ते कामगवेसिनो ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सागरः

सागरस्तूत्तालयति मानवोत्साहतरङ्गान् स्वचेष्टाभिः। तमधिकृत्य बहवः पुरावृत्तान्ताः सरसं प्रकल्पिताः। तथा हि सगरेणोत्खातोऽयं सागरः।[1] चन्द्रोऽयं सागराज्जातः। प्रलयकाले विष्णुः सागरमधिशेते। इन्द्रवज्रभीताः पर्वतास्तस्मिन् शरणं लभन्ते। देवासुरैः सागरोऽयं रत्नादीनामुपलब्धये मथितः[2]। तत्र वडवाग्निर्वर्तते। सागरस्तु नदीपतिः। पृथ्वीदेव्या अम्बरं मेखला वास्ति सागरः। वरुणवासोऽस्ति सागरः।

उत्तरस्यां दिशि हिमवत उच्छ्रयेणौदात्त्यं शेषदिशात्रये च सागरस्यानन्त्येनौदार्यमिति संस्कृतेः सर्वोच्चतत्त्वद्वयमनुगृह्णन्तो भारता धन्याः। नैतादृशी विभाविनी स्थितिः कस्यचिदन्यस्य देशस्य भूमण्डले।

भारतभूः

भारतभूर्यथा कविना गीतं प्रायः सर्वत्र स्वीयेन सौम्येन, सौन्दर्येण, सौरभेण च प्रकामं सुसंस्कृति-पोषिणी प्रवर्तते। तथा हि—

सुजलां सुफलां मलयजशीतलां
शस्यश्यामलां मातरं वन्दे मातरम्।
शुभ्रज्योत्स्नां पुलकितयामिनीम्
फुल्लकुसुमितद्रुमदलशोभिनीम्।
सुहासिनीं सुमधुरभाषिणीम्
सुखदां वरदां मातरम्, वन्दे मातरम्।

अपरञ्च मातृरूपेण सा—

उन्नतौ विन्ध्यकैलासौ तव देवि पयोधरौ।
जाह्नवी हारयष्टिस्ते समुद्रा रत्नमेखला॥
यज्ञाङ्गानां समुत्पत्त्यै वासवस्त्वां प्रवर्षति।
रत्नानामोषधीनां च त्वां प्रसूतिं प्रचक्षते॥
कुक्षौ सन्धारणाद् धात्री जननाद् जननी तथा।

---

१. कालिदासो वर्णयति—

गुरोर्यियक्षोः कपिलेन मेध्ये रसातलं संक्रमिते तुरङ्गे।
तदर्थमुर्वीमवदारयद्भिः पूर्वैः किलायं परिवर्धितो नः॥ रघु० १३.३

२. सागरोत्थानि चतुर्दशरत्नानि सन्ति—

लक्ष्मीः कौस्तुभपारिजातकसुरा धन्वन्तरिश्चन्द्रमाः।
गावः कामदुघाः सुरेश्वरगजो रम्भादिदेवाङ्गनाः।
अश्वः सप्तमुखो विषं हरिधनुः शङ्खोऽमृतं चाम्बुधेः।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अङ्गानां वर्धनादम्बा वीरसूत्वेन वीरसूः ।
शिशोः शुश्रूषणाच्छक्तिर्माता स्यान्माननाच्च सा ॥[1]

वस्तुतो भारतमिदं पृथिव्या एकमङ्गमेव वर्तते । न खल्वस्य देशस्य पार्थक्यं सावधारणमुच्चरितमपि तु समग्रा पृथ्वी एव जन्मभूमिरिति मनीषिभिर्व्याहृतम् । गुणवतीयं पृथ्वी 'आदौ मध्येऽन्ते चास्माकं मातेति ऋषिभिः प्रगीतम् । अथर्ववेदस्य द्वादशकाण्डस्य प्रथमसूक्तानुसारेण—

माता भूमिः पुत्रोऽहं पृथिव्याः । भूमे मातर्निधेहि मा भद्रया सुप्रतिष्ठितम् । संविदाना दिवा कवे श्रियां मा धेहि भूत्याम् । सा नो भूमिर्विसृजतां माता पुत्राय मे पयः । पृथिव्या अकरं नमः । सा नो मधु प्रियं दुहाम् । सा नो भूमिस्त्विषं बलं राष्ट्रे दधातूत्तमे । सा नो भूमिर्भूरिधारा पयो दुहाम् । गिरयस्ते पर्वता हिमवन्तोऽरण्यं ते पृथिवि स्योनमस्तु । वाचो मधु पृथिवि धेहि मह्यम् । सा नो भूमे प्ररोचय हिरण्यस्येव सन्दृशि । सा नो भूमिः प्राणमायुर्दधातु । पृथिवीं विश्वधायसं धृतामच्छा वदामसि ऊर्जं पुष्टं बिभ्रतीमन्नभागं घृतं त्वाभिनिषीदेम भूमे । स्वस्ति भूमे नो भव । माते हृदयमर्पिषम् । सा नो भूमिरादिशतु यद्धनं कामयामहे । मणिं हिरण्यं पृथिवी ददातु मे । सहस्रं धारा द्रविणस्य मे दुहाम् । वयं तुभ्यं बलिहृतः स्याम ।

अस्मात् सूक्तात् स्पष्टमेव—यथा माता पुत्राय भवति तथैव मातृभू राष्ट्रवासिभ्यो भवति सर्वविधिकल्याणसन्निधात्रीति । अथवा किं न सत्यमधोविधं वर्तते यथा स्वामी रामतीर्थोऽपश्यत्—आत्मनो भारतेनैक्यं प्रतीयात् । तदा भारतमात्मानं त्वयैकात्म्यं प्रतिगच्छति । यदाहं चलामि, इदं भारतमेव चलति । यदाहं वदामि, इदं भारतमेव वदति । यदाहं श्वसिमि, भारतमेव श्वसिति । अहं वस्तुतो भारतम्[2] । किं न मनुना प्रोक्तं तद्विधम्—

सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ।
समं पश्यन्नात्मयाजी स्वाराज्यमधिगच्छति ॥ १२. ९१

---

१. मातृत्वमेव भारतभुवः पुनः पुनर्देशेऽस्मिन् जननं प्रातुष्टवत्—

न मे वाञ्छास्ति यशसि विद्वत्त्वे न च वा सुखे ।
प्रभुत्वं नैव वा स्वर्गे मोक्षेऽत्यानन्ददायके ॥
परं च भारते जन्म मानवस्य च वा पशोः ।
विहङ्गस्य च वा जन्तोर्वृक्षपाषाणयोरपि ॥

2. Feel one with mother India and the country shall feel one with you. When I walk, India is walking, when I speak, it is India speaking, when I breathe, it is India breathing. I am India. Swami Ramatirtha P. 160. ऋग्वेदे कथितम् तस्माग्निर्भारत । ४.२५.४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

संस्कृतेर्निर्मातारः

प्रागेव प्रतिपादितं यत् प्रकृतिः स्वोदाहरणैः संस्कृतेः प्रथमशिक्षिकेवाचरति। ततोऽपि विशिष्टतरं महत्त्वं विद्यतेऽधोलिखितानां संस्कृतिनिर्मातृणां पुराण-पुरुषाणाम्—

द्रष्टा चैवोपनिषदां गीताशास्त्रप्रवर्तकः।
षड्दर्शनप्रवक्ता च भगवान् पाणिनिर्मुनिः॥
वाल्मीकिश्च तथा व्यासः कालिदासो महाकविः।
आर्यभट्टश्च भरतः शङ्करोऽद्वैतकेसरी।
भीष्मरामार्जुना वीरा नृपौ रामयुधिष्ठिरौ।
सावित्री द्रौपदी सीता दमयन्ती च तारका॥
महाधान्यद्वितीयानि रत्नान्येतानि भूतले।
जननी भारती तेषां रत्नगर्भा कथं न सा॥

अस्मिन् प्रकरणे गौतमबुद्धस्य महावीरस्य, अशोकस्य, शंकरस्य महात्मगान्धिनश्च नामानि शाश्वतं स्मरणीयानि सन्ति, येषां चारित्रिकनिदर्शनेन विश्वमिदमुज्ज्वलतरं सञ्जातम्। एते सन्ति ज्ञानदर्शनाचारादीनां प्रवर्तकाः, उन्नायका वा। स्वीयेन तपसा ब्राह्मीश्रिया च न केवलमात्मनोऽपि तु चराचरस्य लोकस्याभ्युदयाय शान्तिपूर्णसाहचर्याय च तैर्यद्विचारितं, चरितं दर्शितं च तदेव धर्मः। पूर्वोक्तेभ्यः पुरस्सराश्चासन्नसंख्येया तेऽज्ञाता महात्मानो येषां पिण्डीभूता विचाराचारलवाः परम्परया परिणता अपौरुषेयवाक्कोटिं गताः सर्वमान्या इति ऋषिभिः स्वीकृताः समादृताश्च। सनातनोऽयं भारतीयसंस्कृतिनिधेर्मौलिक उत्सः। तस्यापरं नाम वेदो ब्रह्म वा।

वेदाः

वेदा नाम भारते मानवजातेः पुराणतमसमग्र-ज्ञानविज्ञानयोरेकायनमेव। तत्र देवानामृषीणां महामानवानामादर्शकार्यप्रवृत्तयस्तासां प्रशंसकैर्वर्णिताः सन्ति। तासामनुकरणेन मानवजातेर्निरापदभ्युन्नतिः सम्भवेत्।[1] एतेषु वेदेषु मानवीयसंस्कृतेः पुराणतमनिदर्शनानि संचितानि सन्ति। न खलु विश्वप्राङ्गणे वेदेभ्यः प्राचीनतरं साहित्यं विद्यते।[2] यदन्यथा न प्राप्यते तत्सर्वं वेदेभ्यः

---

१. इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः। सायणः तैत्तिरीय-संहिता-भाष्यस्य भूमिकायाम्।

2. They (Vedas) are the oldest of books in the library of mankind. Maxmuller.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रापणीयम् ।[1] वेदाः खलु मानवाचारस्य शाश्वतमानदण्डाः ।[2] वेदानामध्ययनं पारलौकिकाभ्युदयाय सम्मतमेव तथा । हि महाभारते—

अधीत्य सर्वान् वेदान् वै सद्यो दुखाद् विमुच्यते । अनु० ७. २०

साधारणी धारणा विद्यते यद् वेदविरुद्धं न किंचित् विचारणीयमाचरणीयं वा । परवर्तिषु वा साहित्यग्रन्थेषु, कलाकृतिषु, जीवनचर्याविधिषु, धार्मिक-विधिनिषेधेषु वा वेदानेव प्रमाणीकृत्य किंचिन्नव्यं प्रतिपादितम् ।

उपनिषदः

मानवजीवनस्योद्देश्यपरकं रहस्यं तपसा ब्रह्मचर्येण च दृष्टिगतमासी दुपनिषत्कालिकसाधकानाम् । तत्र लोके पथद्वयं विलोकितम्—आध्यात्मिकम्, आधिभौतिकञ्च । भौतिकसुखमुपेक्ष्याध्यात्मिक-शान्तिमन्विष्यन्तस्ते महात्मानः स्वानुभूतिमुपवर्णयन्ति । परवर्तिभारतीयविचारणा तेषां चिन्तनप्रकाशेन सततं सम्पृक्ता सती विश्वलोकेऽपि समादृता भारतं प्रतिष्ठास्पदं विधत्ते । इयं सा विचारणा साहित्य-शिल्पकलादिक्षेत्रेषु नित्यं नवचेतनां जागरयन्ती किंचिदनन्यतमं माहात्म्यं प्रसाधयति भारतीयसंस्कृतेः ।

उपनिषदां संस्कृत्युपस्कारास्तासां सूक्तिभिरधोविधं परिचेयाः —

पुरुषो वाव सुकृतम् । ऐ० २.३
न वित्तेन तर्पणीयो मनुष्यः । कठ० १.१.२७
आत्मनस्तु कामाय वित्तं प्रियं भवति । बृ० २.४.५
ब्रह्मसंस्थोऽमृतत्वमेति । छान्दोग्य० २.१३.१
यो वै भूमा तत्सुखं नाल्पे सुखमस्ति । छान्दोग्य० ७.२३. १
अथ परा यया तदक्षरमधिगम्यते । मुण्डक० १.१.५
तपसा चीयते ब्रह्म । मुण्डक० १.१.८
सत्येन लभ्यस्तपसा ह्येष आत्मा ।
सम्यग्ज्ञानेन ब्रह्मचर्येण नित्यम् ।। मु० ३.१.५
सत्यमेव जयति नानृतम् । मु० ३.१६

महाभारतम्

भारतीयसंस्कृति-विधायकेषु ग्रन्थेषु महाभारतं तु अनुत्तममेव यतो हि नाम ग्रन्थेऽस्मिन्

धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित् ।।

---

१. प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते ।
एतं विदन्ति वेदेन तस्माद् वेदस्य वेदता ।। सायणभाष्ये

२. वेदप्रणिहितो धर्मः । भागवते ६.१.४०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

रवीन्द्रनाथ ठक्कुरो रामायण-महाभारतयोः शाश्वतोपजीव्यतां प्रथयति—
It will not be correct to call the Mahābhārata epic only, it is history too; not the history of incidents, which concern a particular age only but the eternal history of India. Other histories change with the passage of time, but this history has suffered no change, The history of what has been the object of India's devoted endeavour, of India's adoration, and India's resolve, is seated on the throne of eternity in the palace of the two vast epics.

ग्रन्थेऽस्मिन् स्वीयं महदवदानं कवीनां कृते निष्कृष्टम्—

इतिहासोत्तमादस्माज्जायन्ते कविबुद्धयः ।
पञ्चभ्य इव भूतेभ्यो लोकसंविधयस्त्रयः ॥ आदि० २.२३७
इदं सर्वैः कविवरैराख्यानमुपजीव्यते ।

भारतीयसंस्कृतेर्विश्वकोशमिदं महाभारतमिति ग्रन्थेऽस्मिन् स्पष्टीकृतम्—

ब्रह्मन् वेदरहस्यं च यच्चान्यत् स्थापितं मया ।
साङ्गोपनिषदां चैव वेदानां विस्तरक्रिया ॥
इतिहासपुराणानामुन्मेषं निर्मितं च यत् ॥
भूतं भव्यं भविष्यं च त्रिविधं कालसंज्ञितम् ।
जरामृत्युभयव्याधिभावाभावविनिश्चयः ।
विविधस्य च धर्मस्य ह्याश्रमाणां च लक्षणम् ॥
चातुर्वर्ण्यविधानं च पुराणानां च कृत्स्नशः ।
तपसो ब्रह्मचर्यस्य पृथिव्याश्चन्द्रसूर्ययोः ॥
ग्रहनक्षत्रताराणां प्रमाणं च युगैः सह ।
ऋचो यजूंषि सामानि वेदाध्यात्मं तथैव च ॥
न्यायशिक्षाचिकित्सा च दानं पाशुपतं तथा ।
हेतुनैव समं जन्म दिव्यमानुषसंज्ञितम् ॥
तीर्थानां चैव पुण्यानां देशानां चैव कीर्तनम् ।
नदीनां पर्वतानां च वनानां सागरस्य च ॥
पुराणं चैव दिव्यानां कल्पानां युद्धकौशलम् ।
वाक्यजातिविशेषाश्च लोकयात्राक्रमश्च यः ॥
यश्चापि सर्वगं वस्तु तच्चैव प्रतिपादितम् ।[1]

आदिपर्वणि १.६२-७०

---

१. अमेरिकादेशस्य सर्वोच्चन्यायालये विश्वस्मै मनोर्न्यायिकयोगदानस्य स्मारकरूपेण तस्य विशालमूर्तिः स्थापिता वर्तते ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पुराणानि

भारतीयसंस्कृतिनिर्माणे पुराणानां महत्त्वमन्यूनमेव। एतेषु भागवत-पुराणस्य स्थानं शीर्षण्यम्। पुराणश्रवणेन ग्राम्या जना अपि प्राचीनराजर्षीणां, साधुमहात्मनां भगवतोऽवताराणां च चरितमात्मसात्कुर्वन्ति। इमानि पुराणानि नैकविधाख्यानोपाख्यानानां महार्णवा एव सम्पत्तौ च विपत्तौ च कथं प्रवर्तितव्यमिति लोकान् निदर्शयन्ति। धर्मविषयान् व्यतिरिच्य अत्रैव शिविदधीच - हरिश्चन्द्र-प्रह्लाद-ध्रुव-मार्कण्डेयादिमहात्मनां लोकोपकारीणि कथानकानि रमणीयविधिना ग्रन्थितानि। बालानां हृदयस्थलेऽङ्कितानि एतेषां वृत्तानि यावज्जीवं तान् परमार्थपथे नियोजयन्ति, तत्रापतितानि वैषम्याणि च भगवत्प्रसादेन दूरीकरणार्थमाश्वासयन्ति च। पुराणानि भारतीयसंस्कृतेर्ज्ञानाय विश्वकोश एव सन्ति।

मनुस्मृतिः

बहुषु स्मृतिषु मनुस्मृतिर्वरेण्या वर्तते। ग्रन्थेऽस्मिन् वर्णाश्रम-व्यवस्थाया यत्स्वरूपं संस्कारितं तत् शाश्वतं लोकस्य, समाजस्य, राष्ट्रस्य च प्रगमन-पथ-निर्देशनं कुर्वदास्ते। न केवलं भारतेऽपितु विदेशेष्वपि मनुस्मृतिर्धर्म-व्यवस्थानिर्धारणाय समादृता वर्तते। कवयः कलाकारा राजानश्च स्वादर्शान् विनिश्चेतुं मनुस्मृतिं भूयिष्ठमुपजीवन्ति। स एष ग्रन्थो येन ब्राह्मीकृतेषु विद्वत्सु प्रमाणितमधोवाक्यम्--

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥

जीवनस्योद्देश्यानि, व्रतानि, आदर्शाश्च

संस्कृतिपथं संचरतो जनस्य मनसापि कृतानि उद्देश्यानि, व्रतानि, आदर्शाश्च तमधिकाधिकं श्रम-प्रवणं विदधति। वस्तुत एतान्येव जीवनस्य प्रगल्भतां व्यञ्जन्ति, मानवस्य कार्यशक्तिं च वर्धयन्ति। उद्देश्यानि तु सृष्टेः प्रारम्भादेव धमार्थकाममोक्षविषयकाणि भवन्ति। एतानि ऋषिभिर्निरूपितानि। उपनिषत्सूद्देश्यानामौदात्त्यं परां काष्ठां गतम्। तथाहि—

असतो मा सद्गमय तमसो मा ज्योतिर्गमय।
मृत्योर्मा अमृतं गमय। बृहदारण्यक० १.३.२८
भूमा त्वेव विजिज्ञासितव्यः। छा० ७ २३.१
शरीरं मे विचर्षणम्। जिह्वा मे मधुमत्तमा।
कर्णाभ्यां भूरि विश्रुवम्। तै० उ० ४.१
तेजस्वि नावधीतमस्तु। तै० उ० २.१.१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्। कठ० २.१.१
श्रेयो हि धीरोऽभिप्रेयसो वृणीते। कठ० १.२.२
उत्तिष्ठत जाग्रत प्राप्य वरान् निबोधत। कठ० १.३.१४

महाभारते चारित्रिकादर्शाः सम्यक् चित्रिताः सन्ति। तद्यथा—

त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्॥ आदि० ११५.३६
संविभागो हि भूतानां सर्वेषामेव दृश्यते।
तथैवापचमानेभ्यः प्रदेयं गृहमेधिना॥ आर० २.५४
आर्जवे वर्त्तमानस्य ब्राह्मण्यमभिजायते। आर० २१२.१२
तथा च सर्वभूतेषु वर्तितव्यं यथात्मनि॥ शा० १६७.९
सर्वेषां यः सुहृन्नित्यं सर्वेषां च हिते रतः।
कर्मणा मनसा वाचा स धर्मं वेद जाजले॥ शान्ति० २६१.९
अनर्थो ब्राह्मणस्यैष यद् वित्तनिचयो महान्॥ अनु० ६१.१९

महाभारतस्य एकोंऽशः श्रीमद्भगवद्गीता कस्यचित् पुरुषस्य राष्ट्रस्य वा जागरणाय महामन्त्रमुपदिशति। तथाहि—

धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते। २.३१
मा कर्मफलहेतुर्भूः। २ ४७
नियतं कुरु कर्म त्वम्। ३.८
उद्धरेदात्मनात्मानम्। ६.५
निर्वैरः सर्वभूतेषु। १२.५५

महाभारतानुसारेण सक्तुदानेनापि युधिष्ठिरस्य राजसूययज्ञादधिकतरं पुण्यं भवतीति तत्र सद्वृत्तेरेव महोच्चता प्रदर्शिता।

रामायणम्

रामायणस्य चरितनायका भारतीयसंस्कृतेः सर्वोच्चादर्शान् प्रस्तुवन्ति। तत्र रामः—

गोब्राह्मणहितार्थाय देशस्य च हिताय च।
तत्र चैवाप्रमेयस्य वचनं कर्तुमुद्यतः॥ बाल० २६.५

अत्र रामस्य देशसेवा परमो धर्मः।
अन्यच्च—'अहं हि वचनाद् राज्ञः पतेयमपि पावके।'
जीवनस्यापरदिक्मार्थवत्तास्मिन् ग्रन्थे वर्णिता। तद्यथा—

न राज्यभ्रंशनं भद्रे न सुहृद्भिर्विना भवः।
मनो मे बाधते दृष्ट्वा रमणीयमिमं गिरिम्॥ अयो० ९४.३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सीता तु राज्योचितविलासं परित्यज्य वनं गतवती । सा व्रतं विचिनुते—

फलमूलाशना नित्यं भविष्यामि न संशयः ।
इच्छामि परतः शैलान् पल्वलानि सरांसि च ।
द्रष्टुं सर्वत्र निर्भीता त्वया नाथेन धीमता ।।

लक्ष्मणो भरतश्च भ्रातृत्वस्य महौदार्यमादर्शयतः ।

लोकस्य कर्तव्यपथविकल्पानां नित्यं समाधानेन रामायणस्य लोकप्रियता सातिशयं प्रवर्तते ।[1]

प्राकृतिकः सहयोगः

कस्यचिद् राष्ट्रस्य भौतिकसमृद्धेः प्रथमं कारणं तत्रत्यानां पाञ्चभौतिक-तत्त्वानां प्राचुर्यं तेषां कार्यप्रतिपत्ति-योग्यता च भवतः । भारते तु द्वयमेव सामग्र्येण विलसति । अत्र क्षितिस्तु मातृभूमिरेव भूमा दृश्यते । अद्यापि विश्वस्य बृहत्तमदेशचतुष्टयेऽस्य स्थानं विद्यते । तत्रापि प्रकृत्यानन्यतमः सुखसुरभिर्भारते प्रवर्तत इति समर्थितं विश्वविद्भिः । रत्नगर्भात्र वसुन्धरा वरिष्ठानि धातुरत्नादीनि खनिजानि धारयति[2] । तत्र भूतलोऽतीवोर्वरो लोकोपयोगाय वन्यसम्पदोऽन्नफलशाकादीनि भूयिष्ठान्यपि स्वल्पश्रमेण प्रददाति । असंख्येया एव पशुजन्तवः स्वयं तु प्रकृतिसुलभानि तृणपुष्पफलानि भुञ्जाना उद्योगेषु साह्येन दुग्धमधुचर्मादिप्रदानेन च मानवतां प्रीणयन्ति । एवमेव नभश्चरा लोकोपयोगसाधकाः प्रायशो रूपगुणस्वरमाधुर्यविशेषै-र्निर्विशेषं रञ्जयन्ति जनमानसम् ।

निर्मलजलनिर्भरा जलाशय–ह्रद-कासार-नदी-निर्झर-कुल्या-पल्वल-वापी-पुष्करादयः स्वस्वोत्पादैः पुष्पफलादिभिरनुरञ्जनोपायप्रसाधनैश्च यत्र तत्र सर्वत्र लोकान् सेवितुं सुलभा एव । न केवलं जलचराणामपितु स्थलचराणां-नभश्चराणामपि समाश्रया एते सुखसौन्दर्यसमृद्धिविलासं प्रकुर्वन्ति राष्ट्र-स्याभ्युदयार्थम् ।

पाञ्चभौतिकजगतः समृद्धि-संसाधनस्य-प्रकरणे आकाशस्य निरतिशयं

---

१. मैकडानलो रामायणं प्रशंसति—No product of Sanskrit literature has enjoyed a greater popularity in India down to the present day than the Ramayana

2. Chamber's Encyclopaedia says that the minerals of India are rich and varied. Diamonds, emeralds, beryl and topaz are among the products. Gold has been found in India from time immemorial etc.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

महत्त्वं राजते । आकाशोऽयं सूर्य-चन्द्र-ग्रहोपग्रह-ताराणां काल-संचरणस्य-सुखदविधानेन लोकं समीचीनं समुद्धरति । विपुलप्रसारोऽयमाकाशो वारिदानां परिभ्रामणेन, तेषां मूर्तीकरणेन, रञ्जनेन, नर्तनेन; विद्युल्लतायाः स्फोटेन चानन्त्याभिमुखं प्रवर्तयति मानसम् । नीलगगनोऽयं शिवरूपो विष्णुपदं धारयन् विबुधान् प्रोन्नमयति कवींश्च प्रातिभदर्शनेनोदञ्चयति । भारतीय-प्रकृतेः सर्वातिशायिनी समृद्धिशालिता मैक्समूलरमहोदयेनाधोविधं वर्णिता—

If I were to look over the whole world to find out the country most richly endowed with all the wealth, power and beauty that nature can bestow, in some parts a very paradise on earth. I should point to India. India–What Can It Teach Us ? P. 8.

एतन्मतं प्लीनीमहोदयेन समर्थितम् । स कथयति—बहुमूल्यरत्नानां मौक्तिक-निधेश्च सर्वश्रेष्ठा जनिर्भारतभूमिः ।

लौकिकसमृद्धिः

लौकिकसमृद्धिस्तु लोकानां शिल्पचातुर्येण वैज्ञानिककौशलेन, महताध्यव-सायेन चोपजायते । भारतीयशिल्पिभिः कृतानि उपभोग्यानि वस्तूनि विदेशेषु प्रहितानि विक्रयेण[1] महान्तं धनराशिं भारताभिमुखं प्रवाहयन्तिस्म ? भारतीयाः शिल्पिनः श्रेष्ठकलाकृतीनां निर्माणेन विश्वविख्याता आसन्[2] । अस्मिन् प्रसङ्गे डा० प्रफुल्लचन्द्रायमहोदयस्य मतमवलोकनीयम्—To these classes of professional experts were due three of the great Indian discoveries, in the chemical arts and manufactures which enabled India to command for more than a thousand years the markets of the East as well as the West and secured to her an easy and universally recognised pre-eminence among the nations of the world in manufactures and exports.[3]

---

1. India was naturally reputed to be the seat of inmense riches. Foreign commerce on such a gigantic scale was one of the principal causes of the immense riches of ancient India. Encyclopaedia Brittanica Vol. XI—Article Hindustan

2. The skill of the Indians in the production of delicate woven fabrics in the mixing of colours, the working of metals and precious stones, the preparation of essences and in all manners of technical arts from early times enjoyed a worldwide celebrity. Weber's Indian LIterature P. 276.

3. History of Hindu Chemistry Vol II p. 133.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ऋतूनां पारमेष्ठ्यम्

भारतीया प्रकृतिः ऋतुद्वारेण संस्कृतेरुपादानानि भूयिष्ठं समेधयति। ऋतूनां प्रभावो विश्वप्राङ्गणे प्रायः सर्वत्र वर्तते, किन्तु भारते तेषां प्रभविष्णुता, सर्वातिशायिनी परिलक्ष्यते। संवत्सरे षड्ऋतुक्रमोऽन्यत्र क्वचिदेव दृश्यते। भारते पुनः पर्वत-वनादीनां तत्रत्यानां नदीनदलता-वृक्षपशुजीवादीनां च ऋतुक्रमेण नवं नवं रूपं भवति। मानवास्तु ऋतुक्रमेण भोजन-वस्त्र-प्रसाधन-मनोरञ्जन-व्यवसाय-धार्मिककार्यकलापादीन् नवं नवं परिगृह्णन्ति। भारतीयकलाविलास-प्रकरण ऋतूनां सौन्दर्य-विशेषानुरूपा मनोहारिप्रवृत्तयः प्रकल्प्यन्ते।

सर्वे ऋतवः शीततापयोर्नातिविषमत्वात् लोकानां विसृष्टपरिग्रहमपि जीवन-विन्यासं निर्बाधं विदधति। अत्र सरलं जीवनं स्वाभाविकमेव।

संस्कृतेर्द्विविधाः प्रवृत्तयः

संस्कृतिर्विशुद्धदृष्ट्या द्विविधा भवति—परा अपरा च। तयोर्विशेषास्तत्सम्बन्धिभिरुपलब्धिभिः परिचेयाः सन्ति।

अपरा संस्कृतिः	परा संस्कृतिः
१. लौकिकविभूतीनां संग्रहेण ऐन्द्रियकभोगविलासानामुपचयः।	१. तपोमयजीवनोचित-सम्यग्-परिग्रहः। इन्द्रियादीनां विषयेभ्यो विरतिरेव तपः।
२. नीतिपथानुसारेण लौकिकव्यवहार-युद्ध-वार्तादिषु व्यापृतिः।	२. आचारपथानुसारेण लौकिक-व्यवहारोपेक्षा।
३. सामाजिक-प्रतिष्ठा-प्राप्त्युपायानुष्ठानम्।	३. लौकिक-प्रतिष्ठां प्रति सम्यङ् निःसङ्गता।
४. शारीरिक-सुखकारकं ज्ञानमेव ध्येयम्।	४. ज्ञानेन मोक्षोपलब्धिः। सा विद्या या विमुक्तये।
५. सुखार्थं कुटुम्ब-ग्राम-समाज-राष्ट्र-शासनव्यवस्थादिसंरचना	५. सङ्गत्यागः।
६. नागरक-विभूतिः[1]	६. अनागार-स्थितिः।

एकः परां संस्कृतिमपरोऽपरां संस्कृतिं च स्वीकुरुतः। बहवो जनाः पुनर्द्वयोर्मिश्रितं रूपं विचिन्वते। एतद्द्वयोरपरा संस्कृतिः सर्वसाधारणानां कृते

---

१. बौधायनो व्यवस्थापयति—

पुररेणुकुण्ठित-शरीरः तत्परिपूर्ण नेत्र...नगरे वसन् सुनियतात्मा सिद्धिमवाप्स्यतीति।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भवति, परा संस्कृतिस्तु विशेषयोग्यताव्युत्पन्नानामेव सम्भवति ।[१]

संस्कृतेर्विशेषाः

समृद्धिशालि-प्रकृतिसमेधिता गङ्गाहिमालयानुरूपिणीयं भारतीया संस्कृतिः । सा ऋतूनां रामणीयकेन परिपोषिता चतुर्दिशं सौमनस्यपरिपश्यैर्मनस्विभिः पदे पदे सन्धारितक्रमा, वर्षसहस्रशो दिव्यं मूलमाश्रित्य विदेशेष्वपि परिलसिता सर्वथा विश्वमानवसमागमनाह्वानेन शोभते ।

प्रकृतेरनुगुणं संस्कृतिरियं प्रवर्तते । हिमालयेन छत्रिता समुद्रैश्च मेखलिता भारतभूः पुरा वैदेशिकसंस्कृतीनामाघातैः क्वचिदेव स्वार्षपथात् स्खलिता बभूव । अत एव संस्कृतेः सनातनत्वं देशेऽस्मिन् साधु विलसति ।

भारतीयाः स्वभावतः पुराणप्रियाः सन्ति । तेषां संस्कृति-परिग्रहो वस्तुतः सनातन एव । यद्यपि विदेशतः संसृतानि कतिपय-संस्कृति-स्रोतांसि भारतीयसंस्कृतिधारया संगमितानि किन्तु तानि सर्वाणि तत्र विलीनानि बभूवुः । भारतीया संस्कृतिरभिनवज्ञान-विज्ञानसमर्थिता स्वच्छभावेन सततं प्रवहन्ती अद्याप्यनवच्छिन्ना प्रभवति ।[२]

भारतदेशे सांस्कृतिकदृष्ट्या नैकविधा जनसमुदायाः सुदूरप्राचीनकालतः सौहार्दपूर्वकं प्रतिवसन्तिस्म । अत्र ते स्थूलत आर्या आर्येतराश्च संज्ञामर्हन्ति । तेषां परस्परं सम्मिश्रणं स्वाभाविकरूपेणाभवत् । अस्यां स्थितौ भारतीया संस्कृतिर्नवनवरङ्गैर्विविधयुगेषु विविधप्रदेशेषु च प्रचरति ।

---

१. संस्कृतेः पक्षद्वयं आल्डुअस-हक्सले-महाभागेन साधु विवृतम्—Of the significant and pleasurable experiences of life only the simplest are open indiscriminately to all. The rest cannot be had except by those who have undergone a suitable training. Beliefs, Ends and Means. आयन्सटाइन-महोदयः समर्थयति—The ideals which have always shone before me and filled me with the joy of living are goodness, beauty and truth. To make a goal of comfort or happiness have never appealed to me; a system of ethics built on this basis would be sufficient only for a herd of cattle. Eienstein; I. Believe. p. 70.

२. जवाहरलालः संवदति—Inspite of all the changes and battles and invasions, the thread of ancient Indian civilisation has cotinued to run on in India and China. The old Indian civilisation is the basis of Indian life seen today. In a sense we in India are the heirs of thousands of years : Glimpses of World History. P. 12.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

चतुवर्गपरायणेयं संस्कृतिः धर्मानुबन्धमेव काममर्थं चानुसन्दधाति । सामान्यजनानां कृते कस्यापि वर्गस्यावहेलनं समीचीनं न भवति । जीवनस्यान्तिमचरणे वैराग्येण मोक्षोपायानुष्ठानमेव समीहितम् । मोक्षस्तु सर्वोत्कृष्टं सुखस्थानम् ।[1] श्रेष्ठादर्शा यतस्तत आत्मसात् करणीया इति बुद्धचा प्रायश उच्चस्तराल्लोकात् संस्कृतिरवरजनान् प्रति प्रवहति । ब्राह्मणस्य जीवनवृत्तयः कर्तव्याकर्तव्यादीनि च शूद्राणामपि जीवनपथे किं योग्यं किमयोग्यमिति प्रकाशयन्ति । तथैव संन्यासिप्रवृत्तयोऽवराश्रमधारिणां व्रतनिष्ठामुद्बोधयन्ति ।

देवतात्मकता

देवाधीना अस्माकं प्रवृत्तय[2] इति सन्धारयन् देवानां प्रीत्यर्थं यज्ञार्चनं ध्यानादीनि प्रतिपदं संकल्पनीयानि । पुरातनकालतो भारतीय-संस्कृतौ दिव्यता भृशं विलसति । पञ्चभूतानि तु वस्तुतः शिवभूतानि[3] जगत उपादानकारणानि सर्वतो दिव्यतामनुष्ठापयन्ति । विष्णुस्तु निर्विशेषमेव सर्वस्मिन् वस्तुजाते प्रतिष्ठित एवे[4]ति विष्णुपुराणे वर्णितम्—

यदम्बु वैष्णवः कायस्ततो विप्र वसुन्धरा ।
पद्माकारा समुद्भूता पर्वताब्ध्यादि-संयुता ।।
ज्योतींषि विष्णुर्भुवनानि विष्णुर्वनानि विष्णुर्गिरयो दिशश्च ।
नद्यः समुद्राश्च स एव सर्वं यदस्ति यन्नास्ति च विप्रवर्य ।।
ज्ञानस्वरूपो भगवान् यतोऽसावशेषमूर्तिर्न तु वस्तुभूतः ।
ततो हि शैलाब्धिधरादिभेदाञ्जानीहि विज्ञान-विजृम्भितानि ।।

---

१. बाणभट्टो बालमित्रमण्डलस्य मध्यगतो मोक्षसुखमिवान्वभवत् । हर्षचरितस्य प्रथमोच्छ्वासे ।

२. ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ।। गीता १८.६१

३. एतत्तु 'या सृष्टिः स्रष्टुराद्या वहति विधिहुतम्' इत्यादि शाकुन्तलस्य नान्दीश्लोके स्मृतम् । महाभारतानुसारेण देवानामधिष्ठानं शरीरेऽधोविधं वर्तते—

क्रान्ते विष्णुर्बले शक्रः कोष्ठेऽग्निर्भुक्तमर्छति ।
कर्णयोः प्रदिशः श्रोत्रे जिह्वायां वाक् सरस्वती ।। शान्ति० २३१.८

अन्यच्च—

यत्रासते मतिमन्तो मनस्विनः शक्रो विष्णुर्यत्र सरस्वती च ।
वसन्ति भूतानि च यत्र नित्यं तस्माद्विद्वान् नावमन्येत देहम् ।।
शान्तिपर्व १२०.४४

४. ईशावास्यमिदं सर्वम् इत्यादि । ईशोपनिषदि १ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यदा तु शुद्धं निजरूपि सर्वं कर्मक्षये ज्ञानमपास्तदोषम् ।
तदा हि संकल्पतरोः फलानि भवन्ति नो वस्तुषु वस्तुभेदाः ॥
२.१२.३७–४०

इमे देवाः प्रतिवेशिवद् व्यवहरन्ति । तथा हि—

देवान् भावयतानेन ते देवा भावयन्तु वः ।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥ गीता ३.११

भारतीय-संस्कृतेः सर्वोच्चं शिखरं देवार्चन-संकल्पैः प्रतीष्टम् । विशेषतः कलाविलासा देवानां प्रीत्यर्थं सन्तीति शिल्पकाराणां सर्वातिशायिनी आस्था मनोयोगश्च तत्र विलसतः । मन्दिराणां मूर्तीनां चित्राणां च शिल्प-विन्यासेन दिव्या काचित् कलाकाराणां प्रेरणा, कल्पना च प्रस्फुटतः । तथैव सङ्गीत-नृत्य-नाट्यादीनि मुख्यतो देवार्चनविधिरिति तत्र तत्रालौकिकी प्रतिभा समुन्मिषति ।

श्रेष्ठदेवानां सर्वविधसाह्यं मानवानां कृते वर्तत इति वैदिककालादेव ऋषिभिर्दृष्टम् ।

इन्द्रेण दत्तो वरुणेन शिष्टो मरुद्भिरुग्रः प्रहितो न आगन् ।
एष वां द्यावापृथिवी उपस्थे मा क्षुधन् मातृषत् ॥ अथर्व २.२९.४

अत एव सर्वथा दिव्यमेव मानवास्तित्वम् ।

के ते सन्ति देवा इत्यस्मिन् विषये प्रो० राधाकृष्णो व्याख्याति—ते दातारः Deva is one who gives to man. God is Deva because He gives the whole world. The learned man who imparts knowledge to fellow men is also a deva. The sun, moon and the sky are deva because they give light to all creation. Father and mother and spiritual guides are also devas. Even a guest is a deva.[1]

निरुक्ते देवशब्दस्य निर्वचनं विद्यते—देवो दानाद् वा, द्योतनाद् वा, दीपनाद् वा द्युस्थानीयो वा भवति । संस्कृतिपथे कस्माद् देवात् को लाभ इति व्यासो वदति महाभारते —

ऐन्द्रे जये धृतमना याम्ये कोपविधारणे ।
विसर्गे चैव कौबेरे वारुणे चैव संयमे ॥
आत्मप्रदानं सौम्यत्वं मद्भ्यश्चैवोपजीवनम् ।
भूमेः क्षमा च तेजश्च समग्रं सूर्यमण्डलात् ॥
वायोर्बलं विद्धि स त्वं भूतेभ्यश्चात्मसम्भवम् ।
अगदं वोऽस्तु भद्रं वो द्रक्ष्यामि पुनरागतान् ॥ सभापर्वणि ६९.१६-१८

1. Indian Philosophy Vol. I. p. 72.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अस्मिन् प्रकरणे महाभारतीय-नारायणी-संस्कृतिः प्रकृतिश्चोभे निर्वर्णनीये। तद्यथा-नारायणमुखेन व्याख्यातम्—सर्वे देवा अग्नयादयः पञ्चभूतानि, चन्द्रादित्यौ च नारायण एव। स शेषभूतो वसुन्धरां धारयति।[1] स एव नारायणो नभस्तले तारारूपाणि दृश्यते, समुद्राः सर्वे तस्य रूपम्। स आत्मस्वरूपमुद्घाटयति—

कामं क्रोधं च हर्षं च भयं मोहं तथैव च।
ममैव विद्धि रूपाणि सर्वाण्येतानि सत्तम॥ आर० १८७.२०
सृष्ट्वा देवमनुष्यांश्च गन्धर्वोरगराक्षसान्।
स्थावराणि च भूतानि संहराम्यात्ममायया॥ आर० १८७.२९

यथा देवास्तथैवावतारा ऋषयः, पितरः महात्मानश्च दैनन्दिनं स्मरणेन स्तुत्या च लोकानुत्थापयन्ति। अस्यां दिशि नैत्यिकपञ्चमहायज्ञविधानं सातिशयं महत्त्वं भजते। ते सन्ति महाविभूतयो लोकानामादर्शभूता काव्य-कला-शिल्पादिषु प्रत्यक्षीकृताः

आत्मरतिः

जगत्यस्मिन्नानन्दो वस्तुत आत्मन्येव विद्यते। आत्मनो बहिर्नास्ति किंचित्साधनं साध्यं वा यस्मादानन्दो वास्तविको जायेत। गीतायामिदं सत्यमधोविधं प्रतिपादितम्—

उद्धरेदात्मनात्मानं नात्मानमवसादयेत्।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः॥

मधुमत्त्वम्

प्रागेव प्रतिपादिता शाश्वती मधुवृत्तिर्बृहदारण्यकस्य।[2] ऋग्वेदेऽस्याः प्रथमप्रकाशः स्फुटीकृतोऽधोविध आस्ते—

मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः।
माध्वीर्नः सन्त्वोषधीः॥
मधु नक्तमुतोषसो मधुमत् पार्थिवं रजः।
मधु द्यौरस्तु नः पिता॥
मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः।
माध्वीर्गावो भवन्तु नः॥ १.९०.६-८

---

१. चतुस्समुद्रपर्यन्तां मेरुमन्दरभूषणाम्। शेषो भूत्वाहमेवैतां धारयामि वसुन्धराम्॥ आरण्यकपर्वणि १८७.१०

२. बृहदारण्यकोपनिषदि २.५।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मधुमन्तं तनूनपाद् । १. १३. २
मधोर्धारामनुक्षर । ९. १७. ८
मधुमन्मे परायणं मधुमत् पुनरायनम् ।
ता नो देवा देवतया युवं मधुमतस्कृतम् ॥ १०. २४.६
मधु नो द्यावापृथिवी मिमिक्षतां ।
मधुश्चुता मधुदुघे मधुव्रते ॥ ६. ७०. ५
मधुपृष्ठं घोरमयासमश्वम् । ९. ८९. ४
क्षेत्रस्य पते मधुमन्तमूर्मिं
मधुश्चुतं घृतमिव सुपूतम्
मधुमती रोषधीद्याव आपो
मधुमन्नो भवत्वन्तरिक्षम् ।
क्षेत्रस्य पतिर्मधुमान् नो अस्तु ।
शुनं पर्जन्यो मधुना पयोभिः ॥ ऋग्वेद ४. ५७. २, ३, ८

सर्वं खलु मधुरमस्मिन् जगति मानवतां मधुरीकरोति ।

कर्मफलभोगः जन्मान्तरवादश्च

कर्मफलं भोक्तव्यमेवेति भारतीया धारणा किं कर्तव्यं किं न कर्तव्यमिति विचारणां प्रस्तावयति । पापाद्विरमणीयमित्यनेनोत्स्थाप्यते यतो हि नाम पापकर्मणः फलं दुःखमेव । अन्यच्च पापानां फलस्वरूपं जन्मान्तरेऽशुचियोनिषु पुनर्जन्म भवति । जन्मान्तर उच्चगति-प्राप्त्यर्थं शुभकर्म करणीयमेव । आधुनिकविज्ञानमपि भारतीयजन्मान्तरवादं प्रमाणयति ।[1]

वर्णाश्रम-व्यवस्था

वर्णचतुष्टये आश्रमचतुष्टये च भारतीयः समाजो विभक्तः । प्रत्येकं वर्णस्य प्रत्येकामाश्रमस्य च कर्तव्याकर्तव्यं, जीवन-विधिः, व्यवसायश्च निर्धारितानि । एषा व्यवस्था नैकसहस्रं वर्षाणि पारस्परिकसौमनस्येनसाह्येन च, सर्वेषां वर्णानामाश्रमाणां च परिपालनाय सम्यक् समर्थाभवत् । पुरा राजकीय-शासनतन्त्रस्य प्रथममुत्तरदायित्वं प्रजासु वर्णाश्रमधर्मव्यवस्थापनमभवत् ।

सर्वप्राणिहितैषिता

सर्वे भवन्तु सुखिनः, वसुधैव कुटुम्बकमिति चादर्शवाक्यानि भारते केवलं

१. Prof lan Stephenson, Head of the Deptt. of Psychology at the University of Virginia, U S A. has gone on record as saying that 'Science feels there is a case for re-incarnation.
Sunday Standard April II, 1976.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भावनात्मकानि नाभवन् । सर्वेषां गृहिणां दैनन्दिनकृत्येषु तत्र पञ्चमहायज्ञानां विधानमावश्यकमासीत्, येन न केवलं देवर्षयो, मानवा वाऽपितु सर्वे चराचराः पुण्यभावेन पालिताः ।

महाभारते सर्वभूतानुकम्पकः प्रशंसितः ।[1]

गौतमबुद्धेनायं विचारः साधु व्याख्यातः —

माता यथा नियं पुत्तं आयुसा एकपुत्तमनुरक्खे ।
एवं पि सब्बभूतेसु मानसं भावयेऽपरिमाणं ।।

अस्यां दिशि इष्टापूर्तस्य महिमा वैदिकालादेव प्रतिज्ञातमासीत् ।[2]

प्रजापालन-वृत्तिः

कस्यचिद् राष्ट्रस्य राजा तत्रत्य-प्रजानां पिता भवति । यथा कश्चित् पिता स्वकुटुम्बे सर्वेषां सदस्यानां सुख-समृद्धि-शान्ति-कल्याणेभ्यो महता प्रयासेन यतते तथैव राज्ये राजा सर्वासां प्रजानां सर्वविधकुशलाय यतेतेति तस्यादर्श आसीत् । वस्तुतो राजा लोकपालानामंश एव तत्समः प्रजापालकः स्यात् । एतदेव समाहृत्य कालिदासो दिलीपमधिकृत्य रघुवंशे प्रवक्ति—

प्रजानां विनयाधानाद् रक्षणाद् भरणादपि ।
स पिता पितरस्तासां केवलं जन्महेतवः ।।

तं वेधा विदधे नूनं महाभूतसमाधिना ।
तथा हि सर्वे तस्यासन् परार्थैकफला गुणाः ।। १.२९

अन्यत्रापि—ब्रह्मचर्येण तपसा राजा राष्ट्रं वि रक्षति । अथर्व० ११.५.१७

संस्कृति-वैचित्र्यम्

महानयं भारतदेशः । अत्र वेदमूलापि संस्कृतिर्देशकालवैभिन्न्यात्

---

१. कर्णपर्वणि २८.१०

२. कठोपनिषदि—इष्टापूर्ते पुत्रपशूंश्च सर्वान् । १.१.८
मार्कण्डेयपुराणे—अग्निहोत्रं तपः सत्यं वेदानां चानुपालनम् ।
आतिथ्यं वैश्वदेवं च इष्टमित्यभिधीयते ।।
वापीकूपतडागादिदेवतायतनानि च ।
अन्नप्रदानमारामाः पूर्तमित्यभिधीयते ।।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्थाने-स्थाने वैचित्र्यमादधती विविधजनसमुदायानां[1] तत्सम्बन्धिनीमास्थां सम्यक् प्ररोचयति। नैकस्यापि जनसमुदायस्य मतिर्भवति यदुपरिष्टात् काप्यन्येषां संस्कृतिर्बलादस्माभिरुह्यते।

विकासशीलता

यद्यपि भारतीया संस्कृतिर्वस्तुतः सनातनी वर्तते, नास्ति प्रतिवाच्येयं मनीषिणां मतिस्तथापि नेदमुपेक्ष्यं महासत्यं यदियं संस्कृतिर्वेदधृतमूलापि अभिनव-ज्ञान-विज्ञानानुसन्धानानि स्वायत्तीकुर्वाणा परम्परागता अपि मन्द-प्रवृत्तीः परित्यजन्ती युगानुरूपिणी नूतनप्रवृत्तीरात्मसात्कुर्वाणा नित्यं संवर्धनपथे प्रवर्तते[2]। मनुना स्पष्टमेव प्रतिपादितः सांस्कृतिकविकासः —

अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरे परे।
अन्ये कलियुगे नृणां युगह्रासानुरूपतः॥ १.८५

नैकसंस्कृतीनामुच्चादर्शानामात्मसात्करणेनापि विदेशेष्वपि भारतीया संस्कृतिः सर्वजनग्राह्याभवत्।

विश्वात्मकप्रसारः

सांस्कृतिकविचारणा विदेशेष्वपि प्रचरन्ती तत्र च गुणनिर्भरत्वात् लोक-प्रियत्वं समाधत्ते स्म। प्रो० हीरेन भारतीयसांस्कृतिकगौरवं सादरं घोषयति–

---

१. प्राचीनतमाः सन्ति नेग्रिटो-जातयोऽफ्रीकातोऽरबपारसीकौ पारयन्त्यो भारतमागतास्ता मलाया-देशं यावत् प्रस्तृताः। ततोऽपि इण्डोनेशिया-न्यूगिनीदेशौ प्रति प्रस्थिताः। अद्यापि ता दक्षिण-भारते क्वचित् प्राप्यन्त आदिवासिभूताः। फिलिस्तीनदेशतः प्रोटो-आस्ट्रालायड इति जातिर्भारते कोल-मुण्डा-निषाद-नागा इति ख्याता आष्ट्रेलिया-महाद्वीपं यावद् गता। मंगोलायडकिरात इति पूर्वभारत-काश्मीरोत्कल-मध्यप्रदेश-वासिनः। द्रविडा पूर्वमध्य-सागर-प्रदेशत एशिया-माइनरदेशं ततो भारतं समागताः। सिन्धुसभ्यतायाः निर्मातारः सन्ति ते। पूर्वोक्तं केषाञ्चिन्मतम्। मेगस्थनीजो कथयति सर्वे भारतवासिनो मूलत भारतीया एव सन्ति। Ancient India p. 34
कर्णपर्व ३०, ३१ अध्यायौ।

२. Indian culture is like a palimpsest in which new characters do not entirely efface the old. In a single spiral pattern fragments of different ages are brought together. It is like a living organism growing in richness and content. Primitive cultures are marked by extreme conservatism where social groups follow the same path of custom and convention with irrational persistence. Living cultures are dynamic and maintain their cultural pattern by a continuous effort of individual and social discipline.
The Report of the University Commission P. 5.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

India is the source from which not only the rest of Asia but the whole Western World derived their knowledge and their religion. Historical Researches Vol II P. 45.

संस्कृति-ज्ञानस्य साधनानि

संस्कृति-ज्ञानस्य नैकविधानि साधनानि प्रायशो भूयिष्ठं समृद्धानि सन्ति। तेषु साहित्यमेवानुत्तमं साधनम्, यतो हि नाम नैकसांस्कृतिकविषयाणां ज्ञानं प्रायः शब्दसापेक्षमेव, यथा दर्शनाचारविचारादीनाम्। भारते सुदूरप्राचीनकालत एव निरन्तरं लोकाभिलक्षितं साहित्यं स्वान्तः सुखाय प्रकामं विरचितम्। अयमस्माकं भारतदेशो यत्र विश्वस्य प्राचीनतमे साहित्ये—वेदपुराणादिके विपुलविषयानधिकृत्य मानवजातेरनादिकालतः सञ्चितो ज्ञाननिधिरुपदीकृतः।[1] न केवलं संस्कृतेनापितु पालि-प्राकृत-तमिल-तेलुगु-कन्नड-मलयालीभाषाभिश्च भारतीयसंस्कृतेर्ज्ञानाय बहुमूल्या सामग्री ग्रन्थेषु संचिता वर्तते। पालिभाषया कृतानि त्रिपिटकादीनि प्राकृतभाषाभिश्च कृतानि—अङ्गोपाङ्गादीनि महासमृद्धा आकराः सन्ति। नाट्यशास्त्रं काव्यशास्त्रमर्थशास्त्रं नीतिशास्त्रं च ग्रन्थेषु बहुविधं विलसितानि दृश्यन्ते।

---

१. वैदिकसंस्कृतेन मौलिकं प्रमुख-साहित्यमधोविधं विकसितम्—

(क) वैदिकसंहिताः—ऋग्यजुस्सामाथर्ववेदाः।

संहितानां ब्राह्मणाः—ऐतरेय-कौषीतकि-शतपथ-गोपथ-पञ्चविंश-मैत्रायणी-तैत्तिरीयादयः।

आरण्यकानि—ऐतरेय-कौषीतकि-बृहदारण्यक-तैत्तिरीय-तवल्कारा आरण्यकम्।

महाभारतानुसारेण दध्नो यथा नवनीतं तथैव वेदेभ्य आरण्यकानि सन्ति। शान्ति० ३३१.३

उपनिषदः—ऐतरेय-कौषीतकीश–बृहदारण्यक-कठ-तैत्तिरीय-श्वेताश्वतर-छान्दोग्य-केन-मुण्डक-माण्डूक्य-प्रश्नोपनिषदः।

(ख) उपवेदाः—ऋग्वेदस्यायुर्वेदः, यजुर्वेदस्य धनुर्वेदः, सामवेदस्य गान्धर्ववेदः, अथर्ववेदस्य स्थापत्यवेदः।

सांस्कृतिकदृष्ट्या विशेषमहत्त्वपूर्णं परवर्तिसूत्रसाहित्यमधोविधं वर्तते—

श्रौतसूत्राणि—आश्वलायन-शांखायन-कात्यायन-बौधायन-जैमिनि-कौशिक-भारद्वाजापस्तम्ब-वाराह-मानव-वैखानस-सत्याषाढ-कृतानि

गृह्यसूत्राणि—आश्वलायन-शांखायन-पारस्कर-मानव-जैमिनि-कौशीतक्यापस्तम्बादीनि।

धर्मसूत्राणि—गौतमधर्मसूत्रापस्तम्बधर्मसूत्र-बौधायनधर्मसूत्र-विष्णुधर्मसूत्र-हिरण्य-केशिधर्मसूत्राणि।

(ग) वेदाङ्गानि—शिक्षा-कल्प-निरुक्त-छन्दोज्योतिष-व्याकरणानि।

(घ) पुराणेतिहासाः—अष्टादश पुराणानि, उपपुराणानि, महाभारतं, रामायणम्।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पुराततननगरीणां ध्वंसावशेषा बहुषु स्थानेषु[1] भारते, बंगलादेशे, पाकिस्तानदेशे चोत्खननेन प्राप्ताः समकालिकजीवनस्याधिभौतिकं कलात्मकं च स्वरूपं निदर्शयन्ति। द्वारकासमीपं समुद्रगर्भे ये ध्वंसावशेषाः समधिगतास्तेषां महत्त्वं महाभारतीयसंस्कृतेर्वास्तविकपरिचयायालम्। पर्वतगुहासु वन्यानां संस्कृतेरवशेषाः चित्रशस्त्रास्त्रादयः प्राप्यन्ते। तेषां संस्कृतेर्ज्ञानाय तेषामवशेषाणां महत्त्वमन्यूनमेव।

परवर्तियुगस्य संस्कृतिर्वैदेशिक-यात्रिणां लेखकानां च भारतवर्णनेन प्रायः प्रामाणिकमेव प्राप्यते। बहवो योरपीया इस्लामदेशवासिनश्चीनदेशीयाश्च भारतस्य विविधप्रदेशेषु पर्यटन्तः स्वयं दृष्टानि सांस्कृतिकवृत्तानि निरूपयामासुः।

भारतीयसंस्कृतेर्बहवस्त्रुटितांशा अधुना भारताद्बहिः स्वरूपेणाथवानुकृत्या विदेशेषु निरूपयितुं शक्यन्ते। अमेरिका-महाद्वीपे, जापाने, चीनदेशे, एशिया-पूर्वद्वीपसमूहेषु, हिन्दचीने, कम्बुजप्रदेशे, मध्यैशियाक्षेत्रे, पश्चिमैशियाक्षेत्रे च भारतीयसंस्कृतेरत्राप्राप्याण्यपि सूत्राणि तत्र तत्र संस्कृति-संरचनायामुपादीयमानानि दृश्यन्ते।

प्राचीनाः शिलालेखा मुद्रा मन्दिर-विहार-चैत्यादीनि भवनानि बाहुल्येन प्राप्तानि सन्ति। तेषां निर्वर्णनेन सजीवा इव तत्कालीना लोकाः पुरासंस्कृतिं प्रत्यक्षं निर्वहन्तो दृश्यन्ते।

---

१. सिन्धुसभ्यतायाः प्राचीनतरा अवशेषाः 'मेहरगढ़' नामके स्थाने प्राप्ताः सन्ति। एते तु ८००० वर्षाणि प्राचीनाः सन्ति। एतेषां विषये पुरातत्त्वविदुत्तमः पुण्यपत्तनस्य प्रो० सङ्कालिया लिखति—The Mehergarh excavation has not only traced back the beginning of civilisation in the Indus valley to a period before 6000 B. C. but also given us the first glimpse of the artistic effort of the early man. Mehargarh is situated on the Bolan river at the foot of the Bolan pass.

The discovery is significant as until now it was believed that there was no evidence on the region of a long period of settled agricultural habitation.

The French archaeologist who conducted the excavation Dr. Jean Francois Jarrige of Museum Gulmes (Paris) says—The rich site provides an archaeological record with a lone sequence of occupation revealing a process of continuous elaboration That affected cereal cultivation, animal husbandry, crafts, architecture and even ideology.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रथमाश्रमः

तत्र गुरुकुलवासमेव तावत् प्रथममाश्रममुदाहरन्ति । सम्यगत्र शौच-संस्कार-विनय-नियम-प्रणीतो विनीतात्मा, उभे सन्ध्ये भास्करागिनदैवतान्युपस्थाय विहाय तन्द्रालस्ये गुरोरभिवादन-वेदाभ्यास - श्रवण-पवित्रीकृतान्तरात्मा त्रिषवणमुपस्पृश्य ब्रह्मचर्याग्नि-परिचरण – गुरुशुश्रूषानित्यो भैक्षादिसर्व - निवेदितान्तरात्मा गुरुवचन – निर्देशानुष्ठानाप्रतिकूलो गुरुप्रसादलब्धस्वाध्यायतत्परः स्यात् ।

महाभारते शान्तिपर्वणि १८४.८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

शिक्षा

मानवेतरप्राणिनः प्रकृतिप्रदत्तसाधनैः स्वजीवनस्य स्वाभाविकावश्यकता आपूरयन्ति। अत एव तेषां साधनानि साध्यानि उपभोग्यानि च सीमितानि भवन्ति। न तत्र काचिद् युगानुगतिका संवृद्धिरभिलक्ष्यते। मानवः पुनः प्राकृतिकसाधन-साध्योपभोग्यैरपरितुष्टः सन् सृष्टेरादिकालतो हृदयमनो-बुद्धिप्रयोगेण नित्यनूतनानन्दास्वादरुचिरसनायोगं कल्पयितुं श्रमं वा परिहर्तुं प्राकृतानि, अप्राकृतानि वा साधनानि साध्यानि, उपभोग्यानि च संवर्ध-यन्नास्ते। अस्मिन्नुपक्रमे तस्य ज्ञान-विज्ञाना[1]ऽनुसन्धान-कौशलेन व्यष्टिशः समष्टिश्च लोकः शुचितरं शुभतरं चात्मानं प्रकुरुते। मानवस्येदं प्रगमनं 'शिक्षा' इत्यभिधीयते। सा शिक्षा अध्ययनम्, अर्थज्ञानम्, आचरणम्, अध्ययनमिति चतुर्भिः प्रकारैर्विलसति।[2]

शिक्षायाः प्रारम्भः कस्यचित् शिशोर्मातृकुक्षिसंवर्धन-कालतो भवति।[3] आजन्मनो जीवनपर्यन्तं[4] मानवः प्रत्यक्षमप्रत्यक्षं वा गुरूणामध्यापनेन, स्वानुभवेन प्रकृति-दर्शनेन च नित्यं शिक्षते। एतेषु प्रथमं स्थानमस्मत्कृते गुरुभिर्दत्तायाः शिक्षाया विद्यते। एतस्याः प्रथमं प्रामाणिकं स्वरूपमृग्वेदे प्राप्यते। विद्याध्ययनं द्वादशवर्षपर्यन्तं प्रथमपदे साधारणतः प्राचरत्।[5]

जीवनस्य विकास-क्रमेण चत्वारो भागाः प्रत्येकं पंचविंशतिवार्षिका विहिताः। तेषु प्रथमो भागः शैशवं द्वितीयो यौवनं तृतीयो वार्धक्यं चतुर्थश्च-स्थाविरम् सन्ति। शैशवेऽध्ययनस्य विशेषयोग्यता प्रभवति। पूर्वोक्ताश्चत्वारो भागाः क्रमशो ब्रह्मचर्य-गृहस्थ-वानप्रस्थ-संन्यासाश्रमा[6] इति संज्ञिताः। महाभारतानुसारेण ब्रह्मलोकप्राप्त्यर्थमाश्रमाः सोपानवत् भवन्ति। तथाहि—

चतुष्पदी हि निःश्रेणी ब्रह्मण्येषा प्रतिष्ठिता।
एतामारुह्य निःश्रेणीं ब्रह्मलोके महीयते॥ शान्ति० २३४.१५

वैदिकयुगे वेदविद्यायाः प्राधान्यमासीत्। वेदाध्ययनकामा ब्रह्मचारिण

---

१. 'मोक्षे धीर्ज्ञानं, विज्ञानं शिल्पशास्त्रयोः। इत्यमरः।

२. अधीतिबोधाचरण-प्रचारणैर्दशाश्चतस्रः प्रणयन्नुपाधिभिः। नैषधीयचरिते १.४

३. महात्मा गान्धी : आत्मकथा पृष्ठम् २५५

४. 'बुध्येम शरदः शतम्' अथर्व० १९.६७.३

५. छान्दो० ४. १०.१

६. श्रमस्तु तप इति शतपथे व्याख्यातम्—श्रमेण तपसारिषन् तस्मादृषय इति। ६.१.१.१। आ समन्तात् श्रम इत्याश्रमः। आश्रमानुसारेण समग्रं जीवनमेव तपः।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

इति संज्ञिताः ।[1] कश्चिद् वटुर्वेदानध्येतुमुपनयन-विधिना ब्रह्मचारी भवतिस्म । तस्य जीवनविधानं ब्रह्मचर्यमासीत् ।[2]

उपनयनम्

उपनयनं वस्तुतः कस्यचिद् विद्यार्थिन आचार्येण स्वीकरणमथवा आचार्य-समीपगमनमस्ति । वैदिकयुग इदमाचार्यकरणमुच्चतरज्ञानार्थिनामेवाव-धारितमासीत्[3] । पितुः सकाशादारम्भिकशिक्षां समुपलभ्य विशेषशिक्षा-धिगमार्थं ब्रह्मचारीभूय प्रज्ञतमानामाचार्याणां सविधे कश्चिद् वटुरधीतवान् ।[4] नवनवब्रह्मविदां सकाशे नवनवमुपनयनं सम्पादितमासीत् ।

परवर्तियुगे वर्णत्रयस्य क्रमशोऽष्टमे, एकादशे द्वादशे वर्षे चोपनयनं कृतम् । शनैः शनैरुपनयनायायुस्सीमा लघ्वी निर्धारिता । तथाहि मनुः —

ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे ।[5]
राज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे ।। २.३७

वर्णत्रयस्य क्रमशो वसन्ते, ग्रीष्मे, शरदि चोपनयनमभीष्टं मतम् । ब्रह्म-चारिणामुपकल्पाः प्रकृतिप्रदत्ता यतस्तत प्राप्ताः आसन् ।

वासः

ब्रह्मचारिणो वस्त्रयुग्ममथर्ववेदे वर्णितम् ।[6] शरीरस्योपरिभाग उत्तरीयेण, अधोभागश्च वाससा परिहित आसीत् । वर्णक्रमेणैतयोरुपादानानि वर्णाश्च विविधानानि बभूवुः ।[7] विविधधर्मशास्त्रकाराणां ब्रह्मचारिणां परिधानयोः

---

१. ऋग्वेदे बृहस्पतिर्ब्रह्मचारीव वर्णितः —ब्रह्मचारी चरति वेविषद् विषः १०.१०९.५

२. ब्रह्मणे वेदज्ञानाय चर्यमिति ब्रह्मचर्यम् । महाभारतानुसारेण (ब्रह्म) विद्या ब्रह्म-चर्येण लभ्या ।

३. ऋग्वेदानुसारेण—

युवा सुवासः परिवीत आगात् । स उ श्रेयान् भवति जायमानः ।। ३.८.४.

इत्यनेन स्पष्टं भवति यद्युवकानामुपनयनं समभवत् । न तु बालकानाम् । मन्त्रोऽय-मुपनयन-प्रकरणे आश्व० गृ० १.२०.८, पार० २.२ प्रयुक्तः ।

४. तं धीरासः कवय उन्नयन्ति । अथर्ववेदे ११.७

५. 'ब्रह्मवर्चस्तु स्वाध्यायेन व्रत्तेन च तेज इति छान्दोग्योपनिषदि ३.१३.३ अधिकृत्य शाङ्करभाष्यम् ।

६. काष्णं वसानो दीक्षितो दीर्घश्मश्रुः । अथर्व ११.७.६ ।

७. आपस्तम्बानुसारेण वासः शाणीक्षौमाजिनानि । काषायं चैके वस्त्रमुपदिशन्ति । माञ्जिष्ठं राजन्यस्य । हारिद्रं वैश्यस्य । १.१.२.३९–४१; १.१.३.१–२ । शुक्ल-महतं वासो ब्राह्मणस्य । माञ्जिष्ठं क्षत्रियस्य । हारिद्रं कौशेयं वा वैश्यस्य । सर्वेषां वा तान्तवमरक्तम् । वसिष्ठ० ११.६४–६७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

परिशीलनेन स्पष्टं प्रतिभाति यद्यस्मिन्देशे यत् परिधानं सरलतया प्राप्तमासीत्, तस्मिन् देशे तदेव गृहीतम्। शाणाविकक्षौमकार्पास-चर्मादीनां विविधानि परिधानानि ब्रह्मचारिभिर्गृहीतानि। तत्र मनुमतं बहुप्रचलितं प्रतिभाति। तथाहि—

कार्ष्णरौरव बास्तानि चर्माणि ब्रह्मचारिणः।
वसीरन्नानुपूर्व्येण शाणक्षौमाविकानि च॥ २. ४१

विशेषयोग्यताधानाय विशिष्टप्रकारकं वासो विहितमासीद् वैदिकयुगे क्वचित्।[1]

मेखला

अथर्ववेदानुसारेण ब्रह्मचारी स्वमेखलया, समिदाधानेन भिक्षया, श्रमेण संयमेन च लोकं तपसा बिभर्ति।[2] मेखला ब्रह्मचारिणः कटौ सुनिबद्धा बभूव। इतरेतरैरुपादानैर्मेखला कृता। ब्राह्मणानां कृते मुञ्जेन क्षत्रियाणां कृते मूर्वातृणैः वैश्यानां कृते शणैश्च मेखला विरचिता।[3]

दण्डः

आत्मरक्षार्थं वा गोरक्षणाय वा ब्रह्मचारी दण्डधरो बभूव। कस्य वृक्षस्य दण्डो भवेदित्यस्मिन् विषय आचार्याणां निर्देशा बहुविधाः सन्ति। मनुर्निर्दिशति—

ब्राह्मणो वैल्वपालाशौ क्षत्रियो वटखादिरौ।
पैलवौदुम्बरौ वैश्यो दण्डावर्हन्ति धर्मतः। १२.४५

अन्यत्र—उदुम्बर-बदर-रौहितकाश्वत्थादीनामपि दण्डा निर्दिष्टाः सन्ति। अपरार्को दण्डस्योपयोगितां स्पष्टयति—तत्र दण्डस्य कार्यमवलम्बनं गवादिनिवारणं तमोवगाहनमप्सु प्रवेशनमित्यादि।

आ केशमा लालटमा नासाग्रं च क्रमशो वर्णत्रयस्य दण्डो भवेदितिशास्त्रकाराणां सम्मतम्। तथा हि मनुः—

केशान्तिको ब्राह्मणस्य दण्डः कार्यः प्रमाणतः।
ललाटसम्मितो राज्ञः स्यात्तु नासान्तिको विशः॥ २. ४६

---

१. ब्रह्मवृद्धिमिच्छन्नजिनान्येव वसीत (ब्राह्मणः) क्षत्रवृद्धिमिच्छन् वस्त्राण्येव। उभयवृद्धिमिच्छन्नुभयमिति। आ० ध० १.१.३.९–१० उद्धृतम्

२. अथर्व० ११.७.४

३. मनुः समाहरति—

मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्या विप्रस्य मेखला।
क्षत्रियस्य तु मौर्वी ज्या वैश्यस्य शणतान्तवी॥ २. ४२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

उपनयन-विधिः

प्रारम्भिके वैदिकयुगे सरलविधानमासीद् उपनयनस्य। विद्यार्थी पूर्वोक्तोपादानैः सज्जित आचार्यसमीपमभ्यगच्छत्। आचार्यस्य पुत्ररूपो जायते तस्य शिष्यो ब्रह्मचारीति प्रतीकवन्निष्पन्नं विधानमथर्ववेदमन्त्रेण प्रकटितम्—

आचार्य उपनयमानो ब्रह्मचारिणं कृणुते गर्भमन्तः।
तं रात्रीस्तिस्र उदरे बिभर्ति तं जातं द्रष्टुमभिसंयन्ति देवाः॥

वैदिकोपनयविधेर्विशदं निरूपणं शतपथब्राह्मणे लभ्यते। तत्र ब्रह्मविद्यामभ्यर्थयन् शिष्यो ब्रह्मज्ञमाचार्यमुपगम्य निवेदयति—

ब्रह्मचर्यमागामिति। ब्रह्मण एवैतदात्मानं निवेदयति।
ब्रह्मचार्यसानीत्याह। ब्रह्मण एवैतदात्मानं परिददाति।

अथैनमाह—को नामासीति। प्रजापतिर्वै कं प्राजापत्यमेवैनं तत्कृत्वोपनयते।

अथ अस्य हस्तं गृह्णाति।

आचार्यः—इन्द्रस्य ब्रह्मचार्यसि। अग्निराचार्यस्तव। अहमाचार्यस्तवासाविति। एते वै श्रेष्ठे बलिष्ठे देवते। एताभ्यामेवैनं श्रेष्ठाभ्यां बलिष्ठाभ्यां देवताभ्यां परिददाति।[1] अथैनं भूतेभ्यः परिददाति।

आचार्यः—प्रजापतये त्वा परिददामि। देवाय त्वा सवित्रे परिददामि।

एते वै श्रेष्ठे वर्षिष्ठे देवते।

अद्भ्यस्त्वौषधीभ्यः परिददामि। द्यावापृथ्वीभ्यां त्वा परिददामि।

विश्वेभ्यो भूतेभ्यस्त्वा परिददाम्यरिष्टयै। ब्रह्मचार्यसि।
ब्रह्मण एवैनं तत्परिददाति। अपोऽशानेत्यमृतं वा।
कर्म कुर्विति। वीर्यं वै कर्म। वीर्यं कुर्वित्येनं तदाह।

समिधमाधेहीति।

समित्स्वात्मानं तेजसा ब्रह्मवर्चसेनेत्येवैनं तदाह—मा सुषुप्था इति मा मृथा इत्येवैनं तदाह।

आपोऽशानेत्यमृतं वा। तदेनमुभयतोऽमृतेन परिगृह्णाति।
अथास्मै सावित्रीमन्वाह पश्चादाचार्यस्तस्मै गायत्रीमेव सावित्रीमनु-

---

१. अत एव ब्रह्मचारी न कांचनार्तिमार्च्छति। न स य एवं वेद। शतपथ० ११.५.४.२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ब्रूयात् ।[1]

शनैः शनैरुपनयनविधिर्विस्तारितो दृश्यते । तथा हि—यथोचितवासो-दण्डमेखलादीनि परिगृह्याचार्यमुपगच्छति कुमारः । समन्वारब्धे हुत्वोत्तर-तोऽग्नेः प्राङ्मुख आचार्योऽवतिष्ठते । पुरस्तात् प्रत्यङ्मुख इतरः । अपा-मञ्जली पूरयित्वा तत्सवितुर्वृणीमह इति पूर्णेनास्य पूर्णमवक्षारयत्यासिच्य देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णोर्हस्ताभ्यां हस्तं गृह्णाम्य-सावितिं । तस्य पाणिना पाणिं साङ्गुष्ठं गृह्णीयात् । सविता ते हस्तमग्रभीद-सावितिं द्वितीयम् । अग्निराचार्यस्तवासावितिं तृतीयम् । आदित्यमीक्षयेत् । देव सवितरेष ते ब्रह्मचारी । तं गोपाय । स मा मृतेत्याचार्यः । कस्य ब्रह्म-चार्यसि । प्राणस्य ब्रह्मचार्यसि । कस्त्वा कमुपनयते । काय त्वा परिददामीति । 'युवा सुवासाः परिवीत आगाद' त्यर्धर्चेनैनं प्रदक्षिणमावर्तयेत् । तस्याध्यंसौ पाणी कृत्वा हृदयदेशमालभेतोत्तरेण । अग्निं परिसमुह्य ब्रह्मचारी तूष्णीं समिधमादध्यात् । तूष्णीं वै प्राजापत्यम् । प्राजापत्यो ब्रह्मचारी भवतीति विज्ञायते । मन्त्रेण हैके अग्नये समिधमाहार्षं बृहते जातवेदसे । तया त्वमग्ने वर्धस्व समिधा ब्रह्मणा वयं स्वाहेति । स समिधमाधायाग्निमुपस्पृश्य मुखं निर्मार्ष्टि त्रिः तेजसा मा समनज्मीति । मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु ।...मयीन्द्र इन्द्रियं दधातु । ...सूर्यो भ्राजो दधातु । यत्तेऽग्ने तेजस्तेनाहं तेजस्वी भूयासम् । ... वर्चस्वी भूयासम्, हरस्वी भूयासम् । इत्युपस्थाय जान्वाच्योपसंगृह्य ब्रूयात् । अधीहि भोः सावित्रीं भो अनुब्रूहीति । तस्य वाससा पाणिभ्यां च पाणी संगृह्य सावित्रीमन्वाह । पच्छोऽर्धर्चशः सर्वाम् । यथाशक्ति वाचयीत । हृदयदेशेऽस्योर्ध्वाङ्गुलिं पाणिमुपदधाति । मम व्रते हृदयं ते दधामि । मम चित्तमनु चित्तं तेऽस्तु । मम वाचमेकव्रतो जुषस्व । बृहस्पति-ष्ट्वा नियुनक्तु मह्यम् । मेखलामाबध्य दण्डं प्रदाय ब्रह्मचर्यमादिशेत् । ब्रह्मचार्यस्यपोशान । कर्म कुरु । दिवा मा स्वाप्सीः । आचार्याधीनो वेदम-

---

१. शतपथब्राह्मणे ११.५.४ संक्षेपेणोदधृतम् । गायत्र्यां चतुर्विंशत्यक्षराणि क्रमशो-ऽग्निः, वायुः, सूर्यः, आकाशः, यमराजः, वरुणः, बृहस्पतिः, पर्जन्यः, इन्द्रः, गन्धर्वः, पूषा, मित्रः, त्वष्टा, वसुः, मरुद्गणः, सोमः, अङ्गिराः, विश्वेदेवाः अश्विनौ, प्रजापतिः, सर्वदेवः, रुद्रः, ब्रह्मा, विष्णुश्च । एतेषां ज्ञानेन सम्पूर्णं वाङ्मयं विज्ञातं भवति, ज्ञाता च सर्वपापेभ्यः प्रमुच्यते, ब्रह्मपदं च लभते । पद्मपुराणे सृष्टिखण्डे त्रिचत्वारिंशत्तमेऽध्याये । महाभारतानुसारेण गायत्री वेदचतुष्टयादपि महत्तरः । सर्वेषां वेदानां सारम्, प्राणाश्च । तत्र भूः भुवः स्वः तिस्रः समिधः । अथर्ववेदे ११.५.४ । गायत्र्या पुरुषयज्ञस्य प्रातः सवनं सम्पाद्यते । छान्दोग्ये० ३.१६.१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

धीष्वेति ।[1]

उपनयनविधौ शिष्याचार्ययोः सात्त्विकसम्बन्धः पाणिग्रहणरीत्या प्रतिष्ठाप्यते । शिष्यस्तु पुत्रः, आचार्यश्च पिता भवति ज्ञानशरीरोपकल्पनाय । सर्वमेतद् देवानां साह्येन, सान्निध्येन, साक्ष्येण च सम्पाद्येत इत्यनेन परम-पावनत्वं दिव्यानुभूतिश्च जागर्ति । परिणामत एष भरो देवानामनुयोगेन सम्पद्यत इति विचारणा शिष्याचार्ययोर्मनोबलं दृढं करोति । शिष्यश्च 'मेधा, तेजः, वर्चः, हरः' इत्येतान्यपि ब्रह्मविद्यया सहोद्दिशति ।

यज्ञोपवीतम्—ब्रह्मसूत्रम्

वैदिकयुगे यजनकाले यजमान उत्तरीयं वासो दक्षिणबाहोरधःकृत्य वामांसोपरि निदधाति[2] । शनैः शनैरुत्तरीयस्थानेऽपवादेन त्रिवृतसूत्रस्य प्रचलनमभवत् । इदं त्रिवृतीकरणमथर्ववेदे सुप्रचलितं प्रतिभाति । तद्यथा—

नव प्राणान् नवभिः सम्मिमीते दीर्घायुस्त्वाय शतशारदाय ।
हरिते त्रीणि रजते त्रीण्ययसि त्रीणि तपसा विष्टितानि ॥ ५.२८.१
अग्निः सूर्यश्चन्द्रमा भूमिरापो द्यौरन्तरिक्षं प्रदिशो दिशश्च ।
आर्तवा ऋतुभिः संविदाना अनेन मा त्रिवृता पश्यन्तु ॥
त्रयः पोषास्त्रिवृतं श्रयन्तामनक्तु पूषा पयसा घृतेन ।
अन्नस्य भूमा पुरुषस्य भूमा भूमा पशूनां त इह श्रयन्ताम् ॥

अथर्ववेदः ५.२८.१—३

परवर्तियुगे पूर्वोक्त-त्रिवृतीकरणस्य प्रतीकरूपेण सूत्रस्य त्रिवृतं यज्ञोपवीतं गृहीतम् । सूत्रकालात् सूत्रकृतं यज्ञोपवीतं धारितं श्रूयते ।[3]

यज्ञसम्पादने यजमानो यज्ञोपवीती भवेदिति विधानमनुसृत्य ब्रह्मचारी नित्यमेव यज्ञोपवीती बभूव यतो हि नाम 'दीर्घसत्रं वा एष उपैति यो ब्रह्मचर्य-मुपैति' ।[4] अन्यच्च—'यत्किच ब्राह्मणो यज्ञोपवीत्यधीते' यजत एव तत् । तस्माद्यज्ञोपवीत्येवाधीयीत याजयेद्यजेत वा यज्ञस्य प्रसृत्यै ।[5] समग्रजीवनमेव यज्ञ इति सम्प्रधार्य निरन्तरं यज्ञोपवीतधारणं समभ्यस्तम् । नित्यमुत्तरवासः कार्यम् । अपि वा सूत्रमेवोपवीतार्थे ।[6] सोत्तराच्छादनश्चैव यज्ञोपवीती

१. आश्व० गृ० सू० १.१९.८; १.२२.१०
२. तैतिरीयसंहिता २.५.११.१, शतपथ० ११.३.३.२ ।
३. यज्ञोपवीतं कुरुते वस्त्रं वापि वा कुशरज्जुमेव । गोभिलगह्यसूत्रे १.२.१ ।
४. शतपथ० ११.३.३.२ ।
५. तैत्तिरीयारण्यक २.१ ।
६. आप० ध० सू० २.२.४.२२, २३ । नित्ययज्ञोपवीती स्यादिति वसिष्ठः ८.९ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भुञ्जीत ।[1]

'यज्ञोपवीतं कुर्वीत सूत्रेण नव तन्तुकम्' । तन्तुषु प्रत्येकशो देवप्रतिष्ठाभिप्रेता । पूर्वोक्तेऽथर्ववेदमन्त्रे 'अग्निः' सूर्यः, चन्द्रः इत्यादयो नव देवता अधिष्ठिताः सन्तीति धारणासीत् । देवलानुसारेण तत्र 'ओङ्कारः, अग्निः, नागदेवः, सोमः, पितृदेवः, प्रजापतिः, वायुः, सूर्यः, सर्वदेवाश्च प्रतिवसन्ति । एते रक्षन्ति सन्धारयन्ति च यज्ञोपवीतिनमिति विश्वासः समापन्नः ।[2]

कति यज्ञोपवीतानि धारणीयानि ? ब्रह्मचारी, संन्यासी चैकमेव यज्ञोपवीतं धारयताम् । स्नातको गृहस्थश्च यज्ञोपवीतद्वयम् । दीर्घायुष्कामेन अधिकानि दशापि यज्ञोपवीतानि धारयितव्यानि ।[3]

ब्रह्मचारिण्योऽपि ब्रह्मविद्यामधिगन्तुमुपनीता बभूवुः । धर्मशास्त्रेषु तासां यज्ञोपवीतधारणस्य रीतिर्बहुशः प्रथितैव ।[4] कादम्बर्यां महाश्वेताया ब्रह्मसूत्रेण पवित्रीकृतकायेति विशेषणं निर्दिष्टम् ।

डा० वामन-पाण्डुरङ्गकाने यज्ञोपवीतस्येतिहासमनुसन्धाय निर्णयति—

---

१. आप० ध० सूत्रे २.८. १९.१२

केवलं ब्राह्मणा एव साधारणतो नित्यं यज्ञोपवीतिन आसन् । क्षत्रिया वैश्याश्च संस्कारवशादेव यज्ञोवीतं धारयन्ति स्म । यज्ञोपवीतेन ब्राह्मणस्य जातिरेव लक्षिता । रघु० ११.६६ । वेणीसंहारस्य तृतीयाङ्केऽश्वत्थामा यज्ञोपवीतत्यागेन ब्राह्मणत्वं जहाति ।

२. ब्राह्मप्रतीकं यज्ञोपवीतस्याधोविधं द्रष्टव्यम्—कर्मकाण्डस्योपासनाकाण्डस्य क्रमशः ८०,००० मन्त्राः १६,००० मन्त्राश्च सन्ति । अत एव सूत्रस्य तयोर्योगसमान्तरेण ९६ चापाः क्रियन्ते प्रतिसहस्रमेकश्चापः । इदं त्रिगुणं क्रियत इति तत्र वर्णत्रयाधिकारो द्योतितः । पुनस्तस्य त्रिवृत्करणमाश्रमत्रयं व्यनक्ति । एतस्य पुनस्त्रैतं बन्धनं च पुरुषस्य ऋणत्रयं समक्षयति । ब्रह्मग्रन्थौ तस्य समाप्तिर्भवति । मध्ये त्रिगुणचक्रं वर्तते । अनेन एकस्मात् ब्रह्मणस्त्रिगुणात्मकप्रकृतियोगेन सृष्टिचक्रस्य विकासोन्मुखं प्रवर्तनं प्रतीकेनोद्भावितम् ।

श्रवणस्तु इन्द्रवरुणसोमादीनां स्थानम् । अत एवापवित्रावस्थायां तत्र यज्ञोपवीतस्य धारणम् । गोभिलगृह्यसंग्रहे २.९०

३. एकैकमुपवीतं तु यतीनां ब्रह्मचारिणाम् । गृहिणां च वनस्थानामुपवीतद्वयं स्मृतम् ॥
सोत्तरीयं त्रयं वापि बिभृयाच्छुभ्रतन्तु वा ॥ वृद्धहारीत ८.४४,४५
त्रीणि चत्वारि पञ्चाष्ट गृहिणः स्युर्दशापि वा । संस्कारमयूखे कश्यपः

४. तत्र ब्रह्मवादिनीनामुपनयनमग्नीन्धनं वेदाध्ययनं स्वगृहे भिक्षाचर्येति । हारीतः स्मृतिचन्द्रिकायामुद्धृतः । विवाहसंस्कारे 'यज्ञोपवीतिनीमभ्युदानयन् जपेत्' इत्यादि गोभिलगृ० २.१.१९ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

It is most probable, if not certain, that sacred thread was not invariably used in the older times as in the times of the later Smṛtis and in modern times, that originally the upper garment was used in various positions for certain acts, that it could be laid aside altogether in the most ancient times and that the cord of threads came to be used first as an option and later on exclusively for the upper garment History of Dharmaśastra Vol II part I p. 291.

सावित्री-(गायत्री-) धारणम्

उपनयनविधेरन्तिमो भागो गायत्री शिक्षा भवति। गायत्र्याः पाठोऽस्ति—

तत सवितुर्वरेण्यं भर्गो देवस्य धीमहि।
धियो यो नः प्रचोदयात्॥ ऋग्वेद ३.६२.१०

अतः पूर्वं तु प्रणवस्य व्याहृतीना च[1] क्रमशो निधानं भवतु नाम। प्रणवस्तु 'ओ३म्' वाचारम्भणे शुभमाधातुं विनियोज्यं भवत्यनिवार्यतः। किमिदम् ओ३म् नाम। इदं तु ब्रह्मणः प्रतीकमेव।[2] यथा कठोपनिषदि—

सर्वे वेदा यत् पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीमि।
ओ३मित्येतत्।[3]

एतद्ध्येवाक्षरं ब्रह्म एतदेवाक्षरं परम्।
एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत्॥
एतदालम्बनं श्रेष्ठमेतदालम्बनं परम्।
एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते॥ कठ० १.२.१५-१७

---

१. व्याहृतयः सन्ति भूर्भुवः स्वर्—एता तिस्रो व्याहृतयः। तै० उ० १.५.१ अपरे सप्त व्याहृतय इति वदन्ति महः जनः तपः सत्यमिति योगेन।

२. ओमिति ब्रह्म। माण्डूक्य उ० १२। ओमितीदं सर्वम्। ओमिति ब्राह्मणः प्रवक्ष्यन्नाह—ब्रह्मोपाप्नवानीति। ब्रह्मैवाप्नोति तै० उ० १.८.१। ओङ्कारः स्वर्गद्वारम्। तस्माद् ब्रह्माध्येष्यमाण एतदादि प्रतिपद्येत। आ० ध० सू० १.४.१३.६। मनुना व्याकृतमेतत्—

ब्रह्मणः प्रणवं कुर्यात् आदावन्ते च सर्वदा।
स्रवत्यनोङ्कृतं सर्वं पुरस्ताच्च विशीर्यति॥ २.७४
अकारं चाप्युकारं च मकारं च प्रजापतिः।
वेदत्रयान्निरदुहद् भूर्भुवः स्वरितीति च॥ २.७६

३. छान्दोग्यानुसारेण ओमित्येतदमृतमयम्। तत्प्रविश्य देवा अमृता अभया अभवन्। १.४.४। स य एतदेवं विद्वानक्षरं प्रणौत्येतदेवाक्षरं स्वरममृतमयं प्रविशति। १.४.५।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ओमित्येतदक्षरमिदं सर्वम् । तस्योपव्याख्यानं भूतं भवद् भविष्यदिति सर्वमोङ्कार एव। यच्चान्यत् त्रिकालातीतं तदप्योङ्कार एव। माण्डूक्योपनिषद् १

प्रश्नोपनिषदनुसारेण ओमिति साधनमालम्बनं वा ब्रह्मप्राप्तेः। तथाहि-

परं चापरं च ब्रह्म यदोङ्कारः। तस्माद् विद्वान् एतेनैवायतनेनैकतरमन्वेति। ५.२।

तत्र 'अ' मात्रस्याक्षरस्य ध्यानेन जगत्यां मनुष्यलोकं प्राप्य तपसा, ब्रह्मचर्येण, श्रद्धया च सम्पन्नो महिमानमनुभवति। तथैव 'अउ' इति अक्षरद्वयेन सोमलोकं, 'अउम्' इति अक्षरत्रयध्यानेन सूर्यलोकं प्राप्य ब्रह्मलोकमधिगच्छति। ५.३-५।

निष्कृष्टमिदं प्रश्नोपनिषदि—

तमोङ्कारेणैवायतनेनान्वेति विद्वान्।
यत्तच्छान्तमजरममृतममयं परं चेति॥ ५.७

तैत्तिरीयोपनिषदि व्याख्यातम्—ओमिति ब्रह्म। १.८

ओङ्कारस्य सर्वव्यापकता वाङ्मये निदर्शिता। 'ओङ्कारेण सर्वा वाक् संतृण्णा (व्याप्ता)। ओङ्कार एवेदं सर्वमोङ्कार एवेदं सर्वम्।[1]

तत्र माण्डूक्येऽस्ति विशेषः—

अकारो नयते विश्वमुकारश्चापि तैजसम्।
मकारश्च पुनः प्राज्ञं नामात्रे विद्यते गतिः॥ २३

व्याहृतयः सन्ति भूः, भुवः स्वरिति। छान्दोग्योपनिषदि व्याख्यातम्-प्रजापतिर्लोकानुद्दिश्य ध्यानं तपः कृतवान्। तेभ्यो लोकेभ्योऽभितप्तेभ्यो 'भूर्भुवः स्वरिति संप्रास्रवन्त। तेभ्य ओङ्कारः सम्प्रास्रवत।[1]

छान्दोग्योपनिषदि गायत्री अन्यथा परिभाषिता वर्तते। तद्यथा—गायत्री वा इदं सर्वं भूतं यदिदं किं च वाग्वै गायत्री वाग्वा इदं सर्वं भूतं गायति च त्रायते च। अपरं च इयं गायत्री पृथ्वीत्यादि। सैषा चतुष्पदा षड्विधा।

तावानस्य महिमा ततो ज्यायांश्च पूरुषः।
पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवीति॥ छन्दोग्ये ३.१२

गायत्र्युपदेशस्योद्देश्यं बृहदारण्यके निर्दिष्टम्-शिष्यस्य प्राणरक्षणमिति। तद्यथा—तस्माद् गायत्री नाम स यामेवामूं सावित्रीमन्वाहैषेव। स यस्मान्वाहृतस्य प्राणांस्त्रायते। ५. १४. ४

बृहदारण्यके गायत्र्या उपस्थान-मन्त्रो निर्दिष्टः। तद्यथा—

१. छान्दोग्ये २.२३.२-३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

गायत्र्यस्येकपदी द्विपदी त्रिपदी चतुष्पद्यपदसि न हि पद्यसे (ज्ञायसे)। नमस्ते तुरीयाय दर्शताय पदाय परो रजसेऽसावदो मा प्रापदिति।

अनेनोपस्थानेन शत्रोः कामना न पूर्येत, स्वीयकामना तु भूयः समृद्ध्येत। बृहदारण्यके ५.१४.७। अहमदः प्रापमिति उपतिष्ठेत।

अथर्ववेदानुसारेण सावित्री वेदमातास्ति। तस्याः प्रसादेन दीर्घजीवनं, प्राणं, प्रजां, पशुं, कीर्तिं, धनं ब्रह्मवर्चसं च प्राप्नोति।[1] बृहदारण्यकानुसारेणाचार्यस्य गायत्री-शिक्षणेन तस्य ब्रह्मचारिणः प्राणांस्त्रायन्ते।[2] गायत्र्यां सविता भवति श्रियः प्रसविता। अयं सविता ब्रह्मविष्णुशिवसमुच्चयः।

'ब्रह्मचारी प्रतिदिनं गायत्रीं जपेत्' इति मनुना निर्दिष्टम्।[3] बौधायनस्तु प्रतिदिनं सहस्रवारं ब्रह्मचारी गायत्रीं जपेदिति प्रथयति। तया सह ओऽम् व्याहृतयश्च संगच्छन्ते। तेन सन्ध्यायां सप्राणायामा गायत्री अनुमोदिता।[4] सन्ध्या तु मूलतो गायत्री-जप एव। सन्ध्योपासनविधौ 'आचमनं, प्राणायामः, मार्जनं कुशैः पूतमन्त्रजलाभ्युक्षणम् अघमर्षण[5]मर्घ्यं[6] (सूर्याय जलदानम्), गायत्रीजपः, उपस्थानं (प्रातः सूर्यस्य सन्ध्यायां वरुणस्य च स्तुतिपाठः) इत्येतानि समाविष्टानि।

सन्ध्योपासनं विना द्विजत्वं नास्तीति मन्वादीनां स्पष्टं मतम्। तद्यथा—

न तिष्ठति तु यः पूर्वां नोपास्ते यश्च पश्चिमाम्।
स शूद्रवद् बहिष्कार्यः सर्वस्माद् द्विजकर्मणः॥ मनु० २.१०३
अनर्हः कर्मणां विप्रः सन्ध्याहीनो यतः स्मृतः। गोभिल० २.१
एतत्सन्ध्यात्रयं प्रोक्तं ब्राह्मण्यं यत्र तिष्ठति।
यस्य नास्त्यादरस्तत्र न स ब्राह्मण उच्यते॥ गोभिल०२.१५-१६

---

१. स्तुता मया वरदा वेदमाता प्रचोदयन्तां पवमानी द्विजानाम्।
आयुः प्राणं प्रजां पशुं कीर्तिं द्रविणं ब्रह्मवर्चसम्।
मह्यं दत्त्वा व्रजत ब्रह्मलोकम्॥ अथर्व० १९.७१.१

२. स यामेवामूं सावित्रीमन्वाहैषैव सा यस्मा अन्वाह तस्य प्राणांस्त्रायते। बृ० उ० ५.१४.४। अत्र गयस्तु प्राणा एव। तांस्त्रायत इति गायत्री।

३. मनु० १०.१०४

४. बौ० ध० सू० २.४.७-९

५. पापप्रणाश-प्रार्थनामन्त्रपाठः। (ऋग्वेदस्य १०.९० सूक्तपाठः)

६. उद्यन्तमस्तं यन्तमादित्यमभिध्यायन् कुर्वन् ब्राह्मणो विद्वान् सकलं भद्रमश्नुते। तै० आ० २.२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

बौधायनोऽकृतसन्ध्योपासना ब्राह्मणाः शूद्रकर्मणि नियोक्तव्या इति राजानं निर्दिशति ।[1]

समिदाहरणं होमाय स्वस्याचार्यस्य च भोजनाय भिक्षाचर्या च ब्रह्मचारिणो नित्यं कर्म बभूव । 'भैक्ष्यस्याचरणे दोषः पावकस्यासमिन्धने' इति बौ. ध. सू० १.२.५४

आचार्य-गौरवम्

आचार्यगौरवस्य मूलप्रतिष्ठा प्रजापतेर्गौरवेणावधारणीया । देवा असुराश्च तस्यान्तेवासिनो बभूवुरिति बृहदारण्यके वर्णितम् ।[2] इमे देवमानवासुरास्तस्य पुत्रा आसन् । अत आचार्यस्य पितृवद्गुरुभावो देवप्रतिष्ठितः प्रतिभाति ।[3]

आचार्याद्ध्येव विद्या विदिता साधिष्ठं प्रापति । छान्दोग्ये ४.९.३

विद्यां दत्त्वा ब्राह्मणाय ब्रह्मलोके महीयते ।
दद्यादहरहस्तास्तु श्रद्धया ब्रह्मचारिणे ।
सर्वपाप-विनिर्मुक्तो ब्रह्मस्थानमवाप्नुयात् ॥ पद्मपुराण १.५१.१०

अन्यच्च—कृतार्थो ह्याचार्यो नाम भवति । तैत्तिरीयोपनिषदः शांकरभाष्यं १.१ अधिकृत्य ।

यथाचार्यस्तथा शिष्य इति शाश्वतविधानं सुसम्मतम्

वैदिकयुगे आचार्य इन्द्रस्याग्नेश्च प्रतिरूप आसीत् ।[4] तत्राचार्या ऋषयो वैदिकसूक्तानां रचयितारो महामनीषिणः स्वयमेवोत्कृष्टतमा वेदवेदाङ्गविदो बभूवुः । न केवलं विद्वांस एवासन् त आचार्या अपि तु स्वसमाजस्य राष्ट्रस्य चाभ्युत्थानाय सचेष्टा बभूवुरित्यत्र वैदिकसूक्तान्येव प्रमाणम् ।

आचार्यस्य पितृत्वमभिमतमासीत् ।[5] यथा माता शिशुं कुक्षौ धारयित्वा

---

१. बौ० ध० सू० २.४.२०

२–३. बृहदा० ५.२.१. । प्रवाहणः श्वेतकेतुं पप्रच्छ—अनुशिष्टोऽन्वसि पित्रा ? श्वेतकेतुरुवाच—ओमिति । बृहदा० ५.२.१

४. वैदिक युगे आचार्यः शिष्यं प्राबोधयत्—त्वमिन्द्रस्य शिष्यः । त्वमग्नेः शिष्यः । त्वं मम शिष्यः । शतपथ० ११.५.४.१ । छान्दोग्यानुसारेण स्वयमग्निरुपकोसलं ब्रह्मज्ञानमशिक्षयत् । ४.१० । ईशोपनिषदि १८ अग्निराचार्यः । महाभारतानुसारेणार्जुन इन्द्रात् शस्त्रास्त्रादि-विद्याः शिक्षतेस्म । आर० ४५.३,४ पूषाचार्यो वर्णितः ईशे ११, १५, १६ । अथर्ववेदे च मृत्युर्वरुण आचार्यो ११.५.१४–१५ । कठोपनिषदि यमस्याचार्यत्वं विदितमेव ।

५. वस्तुतः पितैवादर्शशिक्षको बभूव । पुत्रायेव पितरा मह्यं शिक्षतम् । ऋग्० १०.३९.६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भौतिकशरीरं तस्य जनयति तथाचार्यस्तं शिष्यं गर्भे तिस्रो रात्रीर्धारयित्वा तस्य ज्ञानशरीरं जनयति ।[1] तद्यथा—

आचार्य उपनयमानो ब्रह्मचारिणं कृणुते गर्भमन्तः ।
तं रात्रीस्तिस्र उदरे बिभर्ति तं जातं द्रष्टुमभिसंयन्ति देवाः ।
अर्थव० ११.५.३

भागवतानुसारेण यज्ञदीक्षया तृतीयं जन्म भवति ।। ४.३१.१०३

आचार्यस्य हार्दिकीच्छासीद्यत् तस्य शिष्या निरन्तरमधिकाधिकज्ञान-विज्ञान-प्रकाशिता भवितुमायान्तु । स आत्माभिलाषं प्रकटयति—

यथापः प्रवता यन्ति यथा मासा अहर्जरम् ।
एवं मां ब्रह्मचारिणो धातरायन्तु सर्वतः ।। तै० उ० १.४.३

आचार्यस्य जीवनस्य साफल्यमासीद यत् स विज्ञानसन्ततिं वर्धयति ।[2]

वैदिककालीनाः कतिपया आचार्याः सुपरिचिताः सन्ति । वेदसूक्तानां रचयितारो द्रष्टारो वा कवय ऋषयः प्रायश आचार्या आसन् इति तं धीरासः कवय उन्नयन्तीति' मन्त्रेण स्पष्टमेव । याज्ञवल्क्याधिष्ठिताचार्यश्रेणी बभूव[3] । उपनिषत्सु वर्णिता आचार्या विनयेन शोभन्तेस्म । एतादृशा आचार्या एवं सम्बोधयन्तः श्रूयन्ते—यान्यस्माकं सुचारितानि, तानि त्वयोपास्यानि । ये के चास्मच्छ्रेयांसो ब्राह्मणाः, तेषां त्वयासनेन प्रश्वसितव्यम् । तैत्तिरीयोपनिषदि शीक्षावली ११.२-३

आचार्यस्तु महामानवः कर्मण्यः, कृतभूरिश्रमः सर्वथा आदर्शश्चासीत् ।

---

१. एतत्समर्थितं प्रश्नोपनिषदि यत्र शिष्य आचार्यं निवेदयति—

त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसि । ६.८

महाभारते समर्थितमेतदुद्योगपर्वणि चतुश्चत्वारिंशऽध्याये-आचार्यशास्ता या जातिः सा सत्या ।५। आचार्ययोनिमिह ये प्रविश्य भूत्वा गर्भं ब्रह्मचर्यं चरन्ति ।।६।

शान्तिपर्वणि च—आचार्यशिष्टा या जातिः सा दिव्या साजरामरा । १०९.१७

२. उत्कर्षति हत्रै ज्ञानसन्ततिम् । माण्डूक्योपनिषद् १०

३. छान्दोग्ये ५.३.७ राजा प्रवाहणः श्वेतकेतुपितरमारुणिमशिक्षयत्, यतो हि नाम ब्राह्मणा नाजानन्—प्रजा इतः कुत्र प्रयन्तीति ।

एतेषु कतिपयप्रसिद्धतमा ऋषयः सन्ति—गृत्समदः, विश्वामित्रः, वामदेवः. बुधः, वसुश्रुतः, अत्रिः, सत्यश्रवाः, भरद्वाजः, वसिष्ठः, देवातिथिः, गौतमः, अपाला, जमदग्निः, मेधातिथिः, शुनःशेपः, कश्यपः, ऋषभः, उशनाः, कण्वः, पराशरः, ययातिः, मनुः, नारदः, घोषा, बृहस्पति;, वाक्, यमी, त्वष्टा इत्यादयः । एतेषां बहूनां पुत्रा अपि मन्त्ररचयितारः सन्ति ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तैत्तिरीयोपनिषदि स आत्मानं व्याचष्टे—

स मेन्द्रो मेधया स्पृणोतु। अमृतस्य देव धारणो भूयासम्। शरीरं मे विचर्षणम्। जिह्वा मे मधुमत्तमा। कर्णाभ्यां भूरिविश्रुवम्। श्रुतं मे गोपाय। १.४। क्षत्रिया राजानोऽपि ब्रह्मविद्या-निष्णाता आचार्या बभूवुः।[1]

नासीदाचार्य उपनिषत्कालिकः सर्वस्वत्यागी संन्यासी वा। स श्रियमैच्छत् शिष्याणामपि पोषणाय। यशो जनेऽसानि। श्रेयान् वस्यसोऽसानि[2] इति तस्य कामना तदर्थं प्रकटयति।

आचार्या याज्ञिकपौरोहित्येन ब्रह्मविद्यावैशिष्टचेन च राजभ्यो बहुधनं पश्वादिकमलभन्त।

उपनिषदनुसारेण बहवो गुरवो ब्रह्मज्ञानं शिक्षयन्ति स्म। तेषु भगवान्[3] सनत्कुमारः श्रेष्ठः प्रतिभाति। स ब्रह्मणः सात्वत-(नारायण)-धर्ममशिक्षत।[4] स गङ्गातटे कनखलगिरौ तपस्तप्यमानः सिद्धिं प्राप्तवानासीत्।[5] शङ्कराचार्यानुसारेण स ब्रह्मिष्ठो योगीश्वर आसीत्।[6] नारदं स शिक्षयते स्म—नाम, वाक्, मनः संकल्पः, चित्तं, ध्यानं विज्ञानं, बलमन्नं, जलं, तेजः, आकाशः, स्मरः आशा, प्राणश्चोत्तरोत्तरं भूयांसि। अनन्तरं स विज्ञानस्य, मतेः, श्रद्धायाः निष्ठायाश्च, कृतेः सुखस्य चोत्तरोत्तरं भूयस्त्वं विज्ञाप्यान्ततः प्रवक्ति—यो वै

---

१. बृहदारण्यकोपनिषदनुसारेण राजा प्रवाहणो गौतमनामधेयं ब्राह्मणं विद्वांसमशिक्षयत्। ६.२.८।

२. आवहन्ती वितन्वाना कुर्वाणाचीरमात्मनः।
वासांसि मम गावश्च अन्नपाने च सर्वदा॥
ततो मे श्रियमावह। तै० उ० १.४

३. उत्पत्तिं प्रलयं चैव भूतानामगतिं गतिम्।
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति॥ विष्णुपु० ६.५.७८

४. धर्ममेतं स्वयं देवो हरिर्नारायणः प्रभुः।
उज्जगारारविन्दाक्षो ब्रह्मणः पश्यतस्तदा॥
सनत्कुमारो भगवांस्ततः प्राधीतवान् नृप।
सनत्कुमारादपि च वीरणो वै प्रजापतिः।
कृतादौ कुरु शार्दूल धर्ममेतमधीतवान्॥ महाभारते शान्ति० ३३६.३६-३७

५. एते कनखला राजन्नृषीणां दयिता नगाः।
एषा प्रकाशते गङ्गा युधिष्ठिर महानदी॥
सनत्कुमारो भगवानत्र सिद्धिमगात् पराम्॥ महाभारते आर० १३५.६

६. छान्दोग्ये ७.१.१ भाष्यं—सनत्कुमारं योगीश्वरं ब्रह्मिष्ठं नारद उपसन्नवान्।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भूमा तत्सुखं नाल्पे सुखमस्तीति । छान्दोग्ये ७.२३.१

स हि सनत्कुमारोऽस्माकं लोके यथावश्यकमागत्य मानुषान् सत्पथं दर्शयति, तत्त्वज्ञानं चोपदिशति ।[1] महर्षीणां विवादेषु स निर्णायकोऽभवत् ।[2] न केवलं देवानृषींश्चापि तु असुरराजानपि नारायण-विषयकं रहस्यं प्राबोधयत् ।[3] महर्षीणां परिषत्सु तस्य तत्त्वार्थावबोधनमौदात्त्यपरम् । तथाहि—

नास्ति विद्यासमं चक्षुर्नास्ति विद्यासमं तपः ।
नास्ति रागसमं दुःखं नास्ति त्यागसमं सुखम् ॥ ६
आनृशस्यं परो धर्मः क्षमा च परमं बलम् ।
आत्मज्ञानं परं ज्ञानं न सत्याद्विद्यते परम् ॥ १२
सर्वारम्भफल - त्यागी निराशीर्निष्परिग्रहः ।
येन सर्वं परित्यक्तं स विद्वान् स च पण्डितः ॥ १४
न हिंस्यात् सर्वभूतानि मैत्रायणमतश्चरेत् ।
नेदं जन्म समासाद्य वैरं कुर्वीत केनचित् ॥ १८
पुत्रदारकुटुम्बेषु सक्ताः सीदन्ति जन्तवः ।
सरःपङ्कार्णवे मग्ना जीर्णा वनगजा इव ॥ ३०
यदा सर्वं परित्यज्य गन्तव्यमवशेन ते ।
अनर्थे किं प्रसक्तस्त्वं स्वमर्थं नानुतिष्ठसि[4] ॥ ३३

औपनिषदाचार्यो नित्यमेव मेधया वाण्या कर्मण्यतया प्रतिभया च शिखरस्थो भवितुमियेष । तै० उ० शीक्षावल्ली ४ ।

यज्ञपरायणा राजानोऽपि तत्राचार्या दृश्यन्ते । तेषु जनकः, अजातशत्रुः, प्रवाहणश्च विख्याताः सन्ति ।

महाभारतानुसारेण बहवो राजान आचार्योपमाः सन्ति । तत्र राजराजः श्रीकृष्णो भगवद्गीताया शास्ता वर्तते । अपरश्चास्ति महत्तमः शास्ता भीष्माचार्यः । तस्याचार्यत्वाधिकारस्तस्य मुखेन वर्णितः शान्तिपर्वणि—

यच्च भूतं भविष्यच्च भवच्च परमद्युते ।
तत् सर्वमनुपश्यामि पाणौ फलमिवाहितम् ॥ ५४.१७
वेदोक्ताश्चैव ये धर्मा वेदान्तनिहिताश्चये ।
तान् सर्वान् सम्प्रपश्यामि वरदानात्तवाच्युत ॥ ५४.१९

---

१. ब्रह्मलोकादुपेत्य कुपथं चरन्तं पुरूरवसं स सत्पथाचरणायोपादिदेश । आदिपर्व ७०.१९
२. अत्रिगौतमयोर्विवादं स सत्यनिदर्शनेन प्राशमयत् । आरण्यक प० १८३.२०-२७
३. शान्तिपर्व २७१.३-५५
४. शान्ति० अध्यायः ३१६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

शिष्टैश्च धर्मो यः प्रोक्तः स च मे हृदि वर्तते ।
देशजातिकुलानां च धर्मज्ञोऽस्मि जनार्दन ॥ ५४.२०
चतुर्ष्वाश्रमधर्मेषु योऽर्थः स च हृदि स्थितः ।
राजधर्माश्च सकलानवगच्छामि केशव ॥ ५४.२१
वक्तुं श्रेयः समर्थोऽस्मि त्वत्प्रसादाज्जनार्दन ॥ ५४.२३

महाभारते कतिपयाचार्याणां माहात्म्यं निभालितम्। तेषु प्रमुखो व्यासो भारतीयज्ञान-विज्ञानयोरेको महानिधिः ऋषिकुले जातः स्वमात्रा सत्यवत्या पोषितो स्वतः पूर्वतरं ज्ञानार्णवं प्रथमं स्वयं सम्यगुन्मज्ज्य साहित्यराशिमात्म-मनीषया जिज्ञासूनां कृते सत्पथ-प्रपन्नं कृतवान्। अयं तस्य प्रयासो महा-भारतेवर्णितः —

विव्यासैकं चतुर्धा यो वेदं वेदविदांवरः ॥ आदि० ५४.५
ब्रह्मणो ब्राह्मणानां च तथानुग्रहकाम्यया ।
विव्यास वेदान् यस्माच्च तस्माद् व्यास इति स्मृतः ॥ आदि० ५७.७३

तस्य कृतित्वं महाभारते संक्षेपेण वर्णितम्—

वेदानध्यापयामास महाभारतपञ्चमान् ।
सुमन्तुं जैमिनिं पैलं शुकं चैव स्वमात्मजम् ॥ आदि० ५७.७४
परावरज्ञो ब्रह्मर्षिः कविः सत्यव्रतः शुचिः । आदि० ५४.५

व्यासस्याश्रमो हिमालये बदरी-समीपमवस्थित आसीत्।[1] न केवलमात्मानं शिष्यानपि स वेदार्थेन लोकं प्रकाशयितुं नियुयुजे।[2] तेन विद्यायोगस्य प्रभावो वर्णितः —

'सर्वस्तरतु दुर्गाणि सर्वो भद्राणि पश्यतु ।
श्रावयेच्चतुरो वर्णान् कृत्वा ब्राह्मणमग्रतः ॥ शान्ति० ३१४.४५

तेषां शिष्याणामभीष्टमासीत् — शैलादस्मान्महीं गन्तुं काक्षितं नो महामुने

स स्वयमेव वेदवेदाङ्गपारगैः शिष्यैः सह राजभ्य उपदेष्टुं परिभ्रमणं चकार।[3] महाभारतानुसारेण स श्रेष्ठो राजनीति-विशारदो बभूव। यथा-वश्यकं स राजभ्यः किं कर्तव्यं किं चाकर्तव्यमिति सात्त्विकबुद्ध्याशिक्षयत्।[4]

द्रोणाचार्यः पाण्डवादीनां गुरुरासीत्। तस्य सत्त्व-ज्ञान-विज्ञान-वैदग्धी

१. उवास हिमवत्पृष्ठे पाराशर्यो महामुनिः। शान्ति० ३१४.३०
२. भवन्तो बहुलाः सन्तु वेदो विस्तार्यतामयम्। शा० ३१४.४१
३. आदि० ५४.७।
४. उद्योगपर्व ६७.११-१५।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

महाभारतेऽध्वोविधं वर्णिता—

दीर्घबाहुर्महातेजा बलरूपसमन्वितः ।
सर्वलोकेषु विख्यातो भारद्वाजः प्रतापवान् ॥
बुद्ध्या तुल्यो ह्युशनसा बृहस्पतिसमो नये ।
वेदास्तथैव चत्वारो ब्रह्मचर्यं तथैव च ॥
ससंहाराणि दिव्यानि सर्वाण्यस्त्राणि मारिष ।
धनुर्वेदश्च कात्स्न्र्येन यस्मिन् नित्यं प्रतिष्ठितः ॥
क्षमा दमश्च सत्यं च आनृशंस्यमथार्जवम् ।
एते चान्ये च बहवो गुणा यस्मिन् द्विजोत्तमे ॥ विराट० ५३.३-६

न खलु महाभारतीयो धर्मव्याधो विस्मरणीयः । स विप्राय शिष्टाचारमशिक्षयत् । स आत्म-विषयकं वदति—

ये चैव मां प्रशंसन्ति ये च निन्दन्ति मानवाः ।
सर्वान् सुपरिणीतेन कर्मणा तोषयाम्यहम् ॥

आरण्यक० १९८.३७

रामायणे वसिष्ठ-भरद्वाज-विश्वामित्रादयो बहव ऋषय आचार्याः सन्ति । तेभ्योऽपि महत्तर आसीत् अगस्त्यो दण्डकारण्यवासी यस्य विषये वाल्मीकिः सूचयति—

निगृह्य तरसा मृत्युं लोकानां हितकाम्यया ।
दक्षिणा दिक् कृता येन शरण्या पुण्यकर्मणा ॥ अर० ११.८१
यदाप्रभृति चाक्रान्ता दिगियं पुण्यकर्मणा ।
तदाप्रभृति निर्वैरा प्रशान्ता रजनीचराः ॥ अर० ११.८३
मार्गं निरोद्धुं सततं भास्करस्याचलोत्तमः ।
सन्देशं पालयंस्तस्य विन्ध्यशैलो न वर्धते ॥ अर० ११.८५

न केवलं मानवा अपितु देवा गन्धर्वा सिद्धाः परमर्षयश्चापि तमगस्त्यं पर्युपासतेस्म ।[1] मुनिरगस्त्यः शिष्यैः परिवृत आसीत् ।[2] रामोऽपि तमभिवाद्य कृताञ्जलिस्तत्रातिष्ठत् । स रामाय वैष्णवं चापं ददौ, येन सोऽसुरान् जघान ।[3]

रामायणयुगे वाल्मीकिः, वसिष्ठः, भरद्वाजः, परशुरामः, कण्व इत्यादयो महर्षय आसन् । वाल्मीकेराश्रमो तमसागङ्गा-सङ्गमे प्रयाग-वाराणसी-मध्ये आसीत् । वसिष्ठो मेरुगिरावाश्रमं चकार । भरद्वाजः प्रयागे गङ्गा-

१. अरण्यकाण्ड ११.८९ ।
२. ततः शिष्यैः परिवृतो मुनिरप्यभिनिष्पतत् ॥ १२.२१
३. अरण्य० १२.३३-३५ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यमुनयोर्मध्ये शिष्यानध्यापयामास। परशुरामो महेन्द्रगिरौ वसति चकार।

तक्षशिला-विश्वविद्यालये तत्रासीत् जीवकस्यायुर्वेदाचार्यः। स सप्त-वर्षाणि जीवकमध्यापयामास, तस्य भोजन-परिधानादीनि च स्वयं दत्तवान्। समाप्तविद्याय स्वनगरमागन्तुकामाय तस्मै गुरुणा यात्राव्ययार्थ-मपि धनमदात्। जीवकोऽपि आचार्यस्यौदार्यभरं स्वार्जितधनराशितः कोटिशः प्रदायानृणोऽभवत्।[1]

ऐतिहासिकोऽयं महात्मा बुद्धः समसामयिकमानवतायाः श्रेष्ठतम आचार्यो[2] बभूव। मानवताया दुःखनिवारणाय तस्य मानस आत्मगुणानां महासागर एव सम्प्रतिष्ठितः आसीत्। मनसा वाचा कर्मणा च स स्वयुगस्य महत्तम उद्धारको बभूव। दिव्यचक्षुषा तेन दृष्टमासीद्यत् कश्चिन्मानवः स्व-त्यागेन, परोपकारभावेन परेषां दुःखहरणेन च महान् भवति। यावज्जीवं स लोकेभ्योऽविश्रान्त एवार्यसत्यानामष्टाङ्गिकमार्गस्य चोपदेशं प्रादात्। तस्य महती प्रेरणासीद्यद् भारते तस्यानुयायी महाराजोऽशोको विश्वलोके सर्वत्र दया-दान-दाक्षिण्यादीनां प्रसारं कृतवान्। सर्वभूतहितैषिता तादृशानां महात्मनां समुदिता बभूव। गौतमः सर्वजनहितायासंख्यान् शिष्यान् विदेशेष्वपि प्रेषितवान्।[3]

दिवाकर मित्र इति बौद्धाचार्यो बाणभट्टस्य समकालिक आसीत्। बाणो महाराजहर्षापेक्षया तस्य परिचयं प्रस्तौति—शार्दूलैरपि अमांसाशिभिरुपा-स्यमानम्, आसनोपान्तोपविष्ट-विस्रब्धानेककेसरिशावकतया मुनिपरमेश्वरम्, अकृत्रिम इव सिंहासने निषण्णम्, उपशममिव पिबद्भिर्वनहरिणैर्जिह्वालता-भिरुपलिह्यमानपादपल्लवम्, वामकरतल-निविष्टेन नीवारमश्नता पारावत-पोतेन कर्णोत्पलेन इव प्रियां मैत्रीं प्रसादयन्तम्, उद्ग्रीवं मयूरं मरकत-मणिकरकमिव वारिधाराभिः पूरयन्तम्; इतस्ततः पिपीलकश्रेणीनां श्यामाक-तण्डुलकणान् स्वयमेव किरन्तम्, चीवर-पटलेन अदीयसा संवीतं बहलबाला-तपानुलिप्तमिव पौरन्दरं दिग्भागम्, स्निग्धधवलप्रसन्नेन चक्षुषा जनक्षुण्ण-क्षुद्रजन्तुजीवनार्थममृतमिव वर्षन्तम्, सर्वशास्त्राक्षरपरमाणुभिरिव निर्मितम्,

१. महावग्ग ८.६-८

२. गौतमेन शिष्या आदिष्टाः—विश्वस्य सर्वेभ्यः दयाभावं धारयत। सर्वेषां कल्याणाय, लाभाय, मंगलाय च चेष्टध्वम्। तदेव जीवनदर्शनं विज्ञापयत यदादौ, मध्येऽवसाने च कल्याणमयं वर्तते। महावग्ग १.६.३

३. अश्वघोषो निबोधयति बुद्धविषये—
आचार्यकं प्राप्स्यसि तत् पृथिव्यां यन्नर्षिभिः पूर्वयुगेऽप्यवाप्तम्। बु० च० ७.५७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

परमसौगतमिवावलोकितेश्वरम्, अस्खलितमपि तपसि लग्नम्, आलोकमिव यथावस्थित-सकलपदार्थप्रकाशकं दर्शनार्थिनाम्, सुगतस्यापि अभिगमनीयमिव, धर्मस्यापि आराधनीयमिव, सर्वस्वं सर्वज्ञतायाः, पारं परानुकम्पायाः, निवृतिं सुखस्य, मध्यमे वयसि वर्त्तमानं दिवाकरमित्रमद्राक्षीत् ।

भारतीय-संस्कृतेर्मध्ययुगेऽनन्यतम आचार्यः शङ्करो जगद्गुरुरिति प्रख्यातो बभूव । शिव एव शङ्कराचार्यरूपेण समवतरदिहलोक इति तस्या-लौकिकप्रतिभया लोक-कल्याण-प्रवृत्त्या च प्रभाविता जना वदन्ति । अष्टवर्षीय एव स वेदवेदाङ्गादिषु परं नैपुण्यमवाप । तदनु स मात्रा कथंकथमप्यनुज्ञातः प्रव्रज्याक्रमं स्वीचकार । ततश्च

अष्टवर्षे चतुर्वेदान् द्वादशे सर्वशास्त्रकृत् ।
षोडशे कृतवान् भाष्यं द्वात्रिंशे मुनिरभ्यगात् ।।

बाल्य एवाद्वैतपारावारे निष्णातो गुरोराज्ञया भारते दिग्दिगन्तरमद्वैत-ध्वजं स्फारयितुं धर्मविजयं प्रारेभे । अस्यां दिग्विजय-यात्रायां विविधैर्देव-रूपैराचार्यैः सङ्गतः तेषामुपदेशेन स स्वकीयं ज्ञानाम्बुधिं तरङ्गितवान् । तस्य लघुजीवनस्य प्रत्येकं क्षणं कार्यव्यापृतिनैरन्तर्य-विशिष्टमेव लक्ष्यते । आसीदेव परमो निष्कामकर्मयोगी सः । भारतस्य सांस्कृतिकैक्यं विधातुं स देशस्य चतुर्षु सीमान्तप्रदेशेषु विश्वविद्यालयरूपान् अद्वैतप्रकाशस्तम्भानिव महामठान् स्थापयामास । अद्यापि मठा बदरी-द्वारका-शृङ्गेरी-पुरी-श्रीनगरादिषु अद्वैतदर्शनं विच्छुरन्ति । स देवानामृणीणां च भूमिं ज्ञानशिखरमेव हिमालयमद्वैतसूर्यस्य प्रतिष्ठापनायाचिनोत् । तस्मादेवोच्चशिखरादद्वैत-रवे रमणीया रश्मयः सर्वासु दिशासु स्फुरन्ति ।

ब्रह्मसूत्रोपनिषद्गीतानां भाष्याणि कृत्वा शङ्करः तेषु भारतीयसंस्कृते-र्निगूढतत्त्वानि लोकहितार्थं स्पष्टीचकार । तस्य भाष्यशैली पद्मपादाचार्येण समीक्षिता—

यद्वक्त्र मानससरः प्रतिलब्धजन्म-
भाष्यारविन्दमकरन्द – रसं पिबन्ति ।
प्रत्याशमुन्मुखविनीतविनेय-भृङ्गाः ।
तान् भाष्यवित्तकगुरून् प्रणतोऽस्मि मूर्ध्ना ।।

अपरं चानन्दलहरी-मोहमुद्गर-विवेकचूडामणि-स्वात्म-प्रकाशिका-प्रबोध-सुधाकरादयस्तेन विरचिताः । एतेषु सर्वेषु ग्रन्थेषु मानवमात्रस्यैक्यम् विश्वा-त्मकब्रह्मत्वं, वर्णजातिनिरपेक्षनिःश्रेयसाधिगम इत्येते विषयाः सरलभाषया विचाराक्षरैर्हृदयंगमविधिना सुष्ठु प्रतिपादिताः । काश्यां हिन्दूविश्वविद्या-लयस्य संस्थापको मदनमोहनमालवीयोऽधोविधं शङ्कराचार्यमभिनन्दति—

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यद्वाचां लसितैस्त्रिलोकजनता - मोहान्धकारक्षयः
पादाब्जस्मरणेन यस्य कलुषध्वंसात् प्रसादः स्थिरः ।
तस्याद्वैतगिरां गुरोर्भगवतः श्रीशङ्करस्योन्नतं
काञ्चीपीठपदं यतीश्वर महन् स्थाने त्वयाधिष्ठितम् ॥

तस्य शिष्या गुणगणार्जिता एव पद्मपादः सुरेश्वरः हस्तामलकः तोटकश्च परत आचार्या बभूवुः ।

अद्यापि केरलप्रदेशे पूर्णातटे शङ्करस्मारको मन्दिररूपेण तिष्ठति । अत्रैकस्मिन् प्रकोष्ठ आद्यशङ्करस्य विग्रहः स्थापितः । मन्दिरसोपानैर्नदीं गत्वा तज्जलमाचम्यते । तेन विशदीभूतं मानवशरीरं सच्चिदानन्दब्रह्मसायुज्यं चाधिगच्छति । शङ्करस्य मातृभक्तिः, देशभक्तिः, धर्मनिष्ठा, ब्रह्मपरायणता, शास्त्राध्ययनं, वैदिकधर्मस्याभिनवव्यवस्थानिर्धारणमित्यादीनि सविशेषं चारुतामावहन्ति ।

सार्वभौमप्रतिष्ठापन्नाः कतिपयप्रमुखाचार्याः परवर्तियुगेऽधोविधा बभूवु :— यामुनाचार्यः, रामानुजाचार्यः, मध्वाचार्यः, वल्लभाचार्यः, चैतन्यमहाप्रभुश्च । एते सर्वे आचार्या मानवतायाः कल्याणाय, सुखशान्तिसमिद्धये च यावज्जीवं स्वचरितेन व्याख्यानेन, ग्रन्थप्रणयनेन च लोकेभ्यः सत्पथं प्रकाशितवन्तः । एतेषामनुयायिनः परम्परया संस्कृतिज्ञानज्योतिर्भूयो भूयोऽद्योतयन् ।

भारते विश्वात्मकसत्कृति-प्रयोजनमेव परममुद्देश्यं विदधाना आधुनिकयुगे कतिपय-श्रेष्ठा आचार्या अभवन् । तेषु विवेकानन्दः, रवीन्द्रनाथठाकुरः, महात्मगान्धि-महाभागः सर्वोच्चश्रेयोभाजो विश्वप्राङ्गणे भारतमादरास्पदमकुर्वन् । एतेषामादर्शमात्मसात्कुर्वाणा जनाः स्वजीवनं भारतीयसंस्कृत्यनुरूपं सार्थयितुं समर्था भविष्यन्ति ।

स्वस्वशास्त्रादिप्रवर्तकाः प्रायो लब्धप्रतिष्ठा आचार्या आदर्शभूताः । तथा हि व्याकरणस्य पाणिनिः, नाटचशास्त्रस्य भरतः, अर्थशास्त्रस्य कौटिल्यः, ज्योतिषस्य वराहमिहिरः, आयुर्वेदस्य चरक-सुश्रुतौ इत्यादयः सर्वे महामनीषिणः स्वयमेव स्वार्जितज्ञाननिधिः स्वान्तःसुखाय विद्याया आनन्त्याय चाध्यापनेन व्यतरन् ।

धर्मशास्त्रमाचार्यविशेषानादर्शयति । आपस्तम्बानुसारेण यस्माद् धर्मानाचिनोति स आचार्यः ।[1] स शिष्यं पुत्रवन्मन्यमानः श्रमसाध्येषु स्वकीयकार्येषु तं न नियोजयेत् । परम्परया पाण्डित्यपरायणः स्वयमेवोच्चकोटिको

१. आप० ध० सू० १.१..१.१४ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विद्वान् आचार्यपदमलंकुर्यादिति धर्मशास्त्रीयं विधानम् ।[1]

आचार्यः सात्त्विकं जीवनविधिं स्वीकुर्यात्, येन शिष्यास्तमादर्शीकृत्य विहारविलासादिभ्यो विरक्ता भवेयुः । स आत्मानं मालाभिर्नालंकृतवान् । सोऽर्धरात्रं यावदस्वपत्, तदनु शिष्यानध्ययने न्ययोजयत् । अथवा स्वयं स्वाध्यायमकरोत् । आचार्योऽधमजनैरसम्पृक्तोऽभवत्, जनसम्मर्दादसंस्पृष्टश्चासीत् । अकर्मतः स विरतोऽभवत् ।[2]

आचार्याध्यापनं वृत्त्यर्थं नासीत् । महायज्ञ एवाध्यापनमिति निर्दिष्टं मनुना ।[3] विद्याधनं दानाय भवतीत्यादर्श आचार्याणां समक्षमासीत्[4] । विद्याप्राप्त्यनन्तरं शिष्यो गुरोः परितोषाय दक्षिणां दद्यादिति नियमो वैकल्पिकोऽभवत् ।

निरुक्तानुसारेण आचारं ग्राहयतीत्याचार्यः । अन्यच्च—आचिनोति अर्थान्, आचिनोति बुद्धिमिति वा ।[5]

पाणिनिश्चतुर्विधानध्यापकान् गौरवक्रमेण लक्षयते । तेष्वाचार्यः प्रथमो बभूव प्रमाणभूतः । तेनोपनीयते शिष्य इत्याचार्यकरणमुपनयनम् । आचार्यस्य शिष्या अन्तेवासिन उच्यन्ते । आचार्यस्य नाम्ना शिष्याख्या प्रसिद्धा बभूव । यथा आचार्यस्य पाणिनेः शिष्यः पाणिनीयः । आचार्याध्यक्ष्ये वेदा-

---

१. आप० ध० सू० १.२.८.२४-२७; १.१.१.११-१२ ।

२. आप० ध० सू० १.१.१.३२ ।

३. अध्यापनं ब्रह्मयज्ञः ३.७० ।

४.
विद्यादानात् परं दानं न भूतं न भविष्यति ।
विद्यादानेन दानानि न हि तुल्यानि बुद्धिमन् ॥
दश वापी समा कन्या भूमिदानं च तत्सममं ।
भूमिदानाद्दशगुणं विद्यादानं विशिष्यते ॥
राजसूयसहस्रस्य सम्यगिष्टस्य यत् फलम् ।
तत्फलं लभते विप्रो विद्यादानेन पुण्यवान् ॥
यावच्च पातकं तेन कृतं जन्मशतैरपि ।
तत्सर्वं नाशयत्याशु विद्यादानेन भो द्विज ॥
आत्मविद्याप्रदातारो ये भवन्ति सदा मुने ।
न पुनस्तेऽपि निरयं प्रविशन्ति सुनिश्चयम् ॥
वेदविद्याश्च यो दद्यात् स्वर्गे कल्पत्रयं वसेत् ।
आत्मविद्यां च यो दद्यात् तस्य संख्या न विद्यते ॥

५. निरुक्त १.२.३ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दीनध्यापयन् द्वितीय आसीत् प्रवक्ता। तृतीयः श्रोत्रियो वेदपाठकोऽभवत्। तेन वेद-पारायणविधिः शिक्षितः। चतुर्थः शिक्षकोऽध्यापको लौकिकशास्त्र-विज्ञानादिविषयाणां पाठक आसीद्यथा धनुर्वेदस्य।

उपाध्याय इति पूर्वोक्तानां सर्वेषां संग्रहेणोपाधिः[1]। उपेत्याधीयतेऽस्मादित्युपाध्यायः। उपाध्यायपदमभिज्ञानशाकुन्तले कुलपतये कण्वाय,[2] मुद्रा-राक्षसे च चाणक्याय प्रयुक्तम्। भरतानुसारेणाचार्यस्य सम्बोधनमासीदु-पाध्यायः। तद्यथा—

उपाध्यायेति चाचार्यं वृद्धं तातेति चैव हि॥ ना० शा० १७. ६९

महाभारत उपाध्याय आचार्यादपि दशगुणोत्तर इति प्रोक्तम्। तद्यथा—

दशैव तु सदाचार्यः श्रोत्रियानतिरिच्यते।
दशाचार्यानुपाध्याय उपाध्यायान् पिता दश॥
शान्ति० १०९. १५; अनु० १०८. १४
येन प्रीणात्युपाध्यायं तेन स्याद् ब्रह्म पूजितम्।
शान्ति० १०९. २३; अनु० ७.२५

महाभारतानुसारेण गौतमः, बृहस्पतिः, व्यास इत्येते उपाध्यायाः सन्ति।[3] अन्यत्रोपाध्यायो याज्ञिकविधानेषु निर्देशक इव सर्वोच्चं प्रतिष्ठितः।[4] सर्वेऽपि ब्राह्मणा उपाध्याया इत्युपाध्यायस्य श्रेष्ठप्रतिष्ठापदं द्योतयति।[5]

यदि नामोत्तमो गुरुर्न लभ्येत तर्हि अवरादपि गुरोर्विद्या तु प्रापणीयैव। अस्मिन् विषये मनुर्निर्दिशति—

श्रद्धधानः शुभां विद्यामाददीतावरादपि।
अन्त्यादपि परं धर्मं स्त्रीरत्नं दुष्कुलादपि॥

---

१. महाभाष्ये उपाध्यायो दृश्यते न त्वष्टाध्याय्याम्। बहवोऽभिनवकोटिका अध्या-पननिरता विद्वांसो महाभाष्ये दर्शिताः। यथा—प्राचार्यः, शिक्षकः, उपाध्यायः, गुरुश्च। प्राचार्यस्तु आचार्यादपि श्रेष्ठतरोऽभवत्। प्रगत आचार्यः प्राचार्य इति। आचार्याः प्राचार्याश्च ब्रह्मविद्यावैशारद्येन परिनिष्ठिता अत एव महायशस्का बभूवुः। शिक्षकास्तु धनुर्वेदादिशिल्पानि शिक्षयन्तिस्म। आचार्या अपि शिल्पविद्यानां शिक्षका आसन्। यथा द्रोणाचार्यः।

२. अभिज्ञानशाकुन्तले ५.१३ अनन्तरम्—कश्चिदेषामुपाध्यायसन्देशः। मुद्राराक्षसे—शिष्यः—अस्माकमुपाध्यायस्य सुगृहीतनाम्न आर्यचाणक्यस्य।

३. आर० २८२.१४, शान्ति० ३११. २३; ३२३.५; ३२७.१००।

४. शल्य० ४८.८

५. आश्व० ९०.२५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विषादप्यमृतं ग्राह्यं बालादपि सुभाषितम् ।
अमित्रादपि सद्वृत्तममेध्यादपि काञ्चनम् ।।
स्त्रियो रत्नान्यथो विद्या धर्मः शौचं सुभाषितम् ।
विविधानि च शिल्पानि समादेयानि सर्वतः ।।
अब्राह्मणादध्ययनमापत्काले विधीयते ।
अनुव्रज्या च शुश्रूषा यावदध्ययनं गुरोः ।।

मनुस्मृति २.२३८-२४१

पूर्वोक्तैर्विवरणैः स्पष्टं प्रतीयते यदध्ययनाध्यापनयोः प्रकरणं सर्वथा शुल्कानुबन्ध-रहितमासीत् । यथा मनुरन्वीक्षते—शुल्कदातारो विद्यार्थिनस्तेषामाचार्याश्चोपपातकग्रस्ताः सन्ति । अत एव न ते समादरणीयाः ।

आचार्यशिष्ययोरद्वैतं प्रतिभाति । तद्यथा शिष्येण निगदितम्[1]—

सह नौ यशः । सह नौ ब्रह्मवर्चसम् । तैत्तिरीयोपनिषदि ३.१

शिक्षाया उद्देश्यम्

त्रैलोक्यराज्याद् गुरुतरा विद्येति शंकरः[2] । प्राचीनशिक्षाया वैदिकजीवनादर्शोपेतमुद्देश्यं संक्षेपेणाधोविधमृषिणा प्रचितम्—

१. आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायताम् ।
२. आ राष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी महारथो जायताम् ।
३. दोग्ध्री धेनुर्वोढानड्वानाशुः सप्ति पुरन्धिर्योषा । जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायताम् ।
४. योगक्षेमो नः कल्पताम् । यजुर्वेद २२.२२
५. तस्माद् ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन[4] तिष्ठासेत । बृहदारण्यके ३.५.१
६. वेदसंन्यसनाच्छूद्रः ।
७. आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च सर्वाणि । सर्वं ब्रह्मौपनिषदं माहं ब्रह्म निराकुर्यां मा मा ब्रह्म निराकरोदनिराकरणमस्त्वनिराकरणं मेऽस्तु । तदात्मनि निरते य उपनिषत्सु धर्मास्ते

---

१. तत्र सहिताद्युपनिषत्परिज्ञाननिमित्तं यद्यशः प्रार्थ्यते तन्नावावयोः शिष्याचार्ययोः सहैवास्तु । तन्निमित्तं च यद् ब्रह्मवर्चसं तेजस्तच्च सहैवास्तु । तै० उ० १.१ अधिकृत्य-शाङ्करभाष्यम् ।

२. छा०उ० ८.७.२ अधिकृत्य ।

३. धनुर्वेदे कुशलः ।

४. ज्ञानबलभावेन ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मयि सन्तु । ते मयि सन्तु । शान्तिपाठः केनोपनिषदि ।

अपरं च शिक्षायाः परमोद्देश्यममरत्वस्य प्राप्तिरेवेति फलेन परिचीयते । ऐतरेयोपनिषदनुसारेण वामदेवर्षिरेवं (आत्मज्ञानं) विद्वानस्माच्छरीरभेदादूर्ध्वं उत्क्रम्यामुष्मिन् स्वर्गे लोके सर्वान् कामानाप्त्वामृतः समभवत् । २.१.६

८. अमृतत्वस्य नाशास्ति वित्तेन । बृहदारण्यके २.४.२; यजुर्वेदे २२.२२

पूर्वोक्तेन ब्राह्मणादीनां शिक्षया क्रमशो ब्रह्मवर्चस्विता युद्धविद्यावैशारद्यम्, गोवृन्दारक-स्वाम्यं च सम्भवेयुः । ब्रह्मविद्योपलब्ध्या मुखे काचिदनिर्वर्णनीया प्रभा दृश्यते इति छान्दोग्योपनिषदि निदर्शितम् ।[1] नारदोऽध्येतुमिच्छति । स गुरवे उपदेशस्य परमं लाभं प्रकटयति—भगवद्दृशेभ्यस्तरति शोकमात्मविदिति । सोऽहं भगवः शोचामि । तं मा भगवान् शोकस्य पारं तारयत्विति ।[2]

स सर्वांश्च लोकानाप्नोति, सर्वांश्च कामान् यस्तमात्मानमनुविद्य विजानातीति । छान्दोग्ये ८.१२.६

य ओङ्कारस्य प्रथमाक्षरं 'अ' इति जानाति, स 'आप्नोति ह वै सर्वान् कामान्, आदिश्च भवति[3] ।'

तैत्तिरीयोपनिषदि ब्रह्मविदोऽनुपमलाभाः परिगणिताः सन्ति । तथा हि—ब्रह्मविदाप्नोति परम् । तदेषाभियुक्ता—सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायां परमे व्योमन्, सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति ।[4] शङ्कराचार्यो व्याख्याति ब्रह्मविदः स्थितिमस्मिन् प्रसङ्गे—

'ब्रह्मभूतो विद्वान् ब्रह्मस्वरूपेणैव सर्वान् कामान् सहाश्नुते, न यथोपाधिकृतेन स्वरूपेण' इत्यादि ।

अन्यच्च—

यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ।
आनन्दं ब्राह्मणो विद्वान् न बिभेति कदाचन ।। छान्दोग्ये २.४.१

अर्थादानन्दरूपं ब्रह्म विजानतः कुतोऽपि भयं न भवति ।

---

१. ब्रह्मविद इव सोम्य ते मुखं भाति । ४. १४.२

२. छान्दोग्ये ७.१.३

३. माण्डूक्योपनिषद् ९ । ऐतरेयोपनिषदि स्पष्टीकृतमेतदाचार्यमुखेन—य एवमेता महासंहिता व्याख्याता वेद (स) सन्धीयते प्रजया पशुभिः, ब्रह्मवर्चसेनान्नाद्येन सुवर्गेण लोकेन । १.३.४

४. तै० उ० २.१.१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विज्ञानं ब्रह्म चेद्वेद तस्माच्चेन्न प्रमाद्यति ।
शरीरे पाप्मनो हित्वा सर्वान् कामान् समश्नुते । छान्दोग्ये २.५.१

उपनिषद्युगे तत्रासीत् कल्पना कामहतस्य श्रोत्रियस्य यस्यानन्दः समान एव प्रजापतेरानन्दशतेन ।[1]

बृहदारण्यके याज्ञवल्क्योऽक्षरज्ञानस्योद्देश्यं विवृण्वन्नाह—

'एतदक्षरमविदित्वास्मिँल्लोके जुहोति, यजते, तपस्तप्यते बहूनि वर्षसहस्राणि अन्तवदेवास्य तद् भवति । यो वा एतदक्षरमविदित्वास्माल्लोकात् प्रैति स कृपणः[2] । अथ य एतदक्षरं विदित्वास्माल्लोकात् प्रैति स ब्राह्मणः ।' ३.८.१०

औपनिषदाख्यायिकाभ्यो ज्ञायते यत् प्रवचनशौण्डा विद्यावन्तः स्ववाग्वैभवेन जनकदृशान् शिक्षयित्वा बहुधनमाप्नुवन् ।[3] स जनको महर्षिं निवेदितवान्—याज्ञवल्क्य यो नो भगवन्नभयं वेदयसे, नमस्ते अस्त्विमे विदेहा । अयमहमस्मि ।[4]

नैककर्मकाण्डविधानेषु यजमानस्य वेदादिज्ञानमपेक्षितमासीत् । अज्ञ एव धर्मप्रिया वर्णत्रयी वेदमधीयते । शबरेण स्पष्टीकृतमेतत्—दृष्टो हि तस्यार्थः कर्मावबोधनम् ।

विद्ययामृतमश्नुते, विद्यया विन्दतेऽमृतमितीशोपनिषदि केनोपनिषदि च विद्याया परमोद्देश्यं विज्ञापितम् । ब्राह्मणत्वस्य सिद्धिर्वेदाध्ययनं विना न भवतीति महत्प्रयोजनं वेदाध्ययनस्य ।[5] मनुः प्रवक्ति—

वेदशास्त्रार्थतत्त्वज्ञः यत्र तत्राश्रमे वसन् ।
इहैव लोके तिष्ठन् स ब्रह्मभूयाय कल्पते ।। १२. १०३

---

१. तै० उ० २.८.४

२. बृहदारण्यके प्रागपि समर्थितमेतदधोविधम्—यथा वेदो वाननूक्तोऽन्यद् वा कर्माकृतं यदिह वा अप्यनेवंविद् महत्पुण्यं कर्म करोति, तद्धास्यान्ततः क्षीयते । एवमात्मानमेव लोकमुपासीत । स य आत्मानमेव लोकमुपास्ते, न हास्य कर्म क्षीयते । १.४.१५

३. जनको याज्ञवल्क्यमुवाच—किमर्थमचारीः पशूनिच्छन्नण्वन्तानिति । ·····जनक उवाच—हस्त्यृषभं सहस्रं ददामीति । याज्ञवल्क्य उवाच—पिता मेऽमन्यत नाननुशिष्य हरेतेति । बृहदारण्यके ४.१.१, २

४. तत्रैव ४. २. ४ । जनकः सर्वस्वमात्मानमपि याज्ञवल्क्यायार्पितवान् ।

५. ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेय इति । महाभाष्यम् । तपः स्वाध्याय इति ब्राह्मणम् । आप० धर्म० १.४.१२.१,३ । वेदाभ्यासो हि विप्रस्य तपः परमिहोच्यते । मनु० २.१६६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो द्विजन्मना । २.१६५

महाभारतानुसारेण—

नास्ति विद्यासमं चक्षुर्नास्ति विद्यासमं बलम् । शा० १७०.३३
विद्यया जायते नित्यमव्ययो ह्यव्ययात्मकः । शा० २३३.८
विद्यया तदवाप्नोति यत्र गत्वा न शोचति । शा० २३३.११
यत्र गत्वा न म्रियते यत्र गत्वा न जायते ।
न जीर्यते यत्र गत्वा यत्र गत्वा न वर्धते । शा० २३३.१२
यत्र तद् ब्रह्म परममव्यक्तमजरं ध्रुवम् ।
अव्याहतमनायासममृतं चावियोगि च ॥ शा० २३३.१३
विद्यया च प्रमुच्यते । शा० २३३.७
तद् विद्वानक्षरं प्राप्य जहाति प्राणजन्मनी । शा० २३१ ३४
परिनिष्ठितकार्यो हि स्वाध्यायेन द्विजो भवेत् ॥ शा० २३०.१३
ज्ञानवानेव कर्माणि कुर्वन् सर्वत्र सिध्यति ॥ शा० २३०.१
अविद्वान् मोक्षधर्मेषु बुद्धो भ्रमति चक्रवत् । शा० २८७.१९
शब्दब्रह्मणि निष्णातं परे च कृतनिश्चयम् ।
अन्तःस्थं च बहिष्ठं च येऽऽधियज्ञाधिदैवतम् ॥
जानन्ति तान्नमस्यामस्ते देवास्तात ते द्विजाः ।
तेषां माहात्म्य-भावस्य सदृशं नास्ति किंचन । शा० २२९.२२-२४
ज्ञाने तिष्ठन्न बिभेतीह मृत्योः । उद्योग ४२ १४

प्रज्ञावन्तः सम्मानिता आसन्निति महाभारते—

अपरं च— नाधर्मः श्लिष्यते प्राज्ञमापः पुष्करपर्णवत् ।
अप्राज्ञमधिकं पार्थ श्लिष्यते जतुकाष्ठवत् । शा० २८.७८

इहलौकिकी उन्नतिरपि प्रज्ञावद्भिरेव लभ्यते । तथा हि—

कृष्यादीनि हि कर्माणि सस्यसंहरणानि च ।
प्रज्ञावद्भिः प्रकल्प्तानि यानासनगृहाणि च ॥ शा० २२९.७
यद् बालानां बलं श्रेष्ठं तत् प्रज्ञाबलमुच्यते । उद्योग० ३७ ५१
आक्रीडानां गृहाणां च गदानामगदस्य च ।
प्रज्ञावन्तः प्रवक्तारो ज्ञानवद्भिरनुष्ठिताः ॥ शान्ति० २२९.८
प्रज्ञा संयोजयत्यर्थैः प्रज्ञा श्रेयोऽधिगच्छति ।
राजानो भुञ्जते राज्यं प्रज्ञया तुल्यलक्षणाः ॥ शान्ति० २२९.९

अन्यच्च ब्रह्मचर्येण लौकिकी पारलौकिकी चानुत्तमा सिद्धिर्महाभारते वर्णिता—

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

एवं वसन् सर्वतो वर्धतीह बहून् पुत्राँल्लभते च प्रतिष्ठाम् ।
वर्षन्ति चास्मै प्रदिशो दिशश्च वसन्त्यस्मिन् ब्रह्मचर्ये जनाश्च ।।
उद्योग० ४४.१३

न केवलं मानवा अपितु देवा अपि ब्रह्मचर्येणाभीष्टं प्राप्नुवन्ति । तद्यथा—

एतेन ब्रह्मचर्येण देवा देवत्वमाप्नुवन् ।
ऋषयश्च महाभागा ब्रह्मलोकं मनीषिणः ।।
गन्धर्वाणामनेनैव रूपमप्सरसामभूत् ।
एतेन ब्रह्मचर्येण सूर्योऽह्नाय जायते ।।
ब्रह्मैव विद्वांस्तेन अभ्येति सर्वम् ।
नान्यः पन्था अयनाय विद्यते ।। उद्योग ४४.१४-१७
तपसा ब्रह्मचर्येण व्यस्य वेदं सनातनम् ।
इतिहासमिमं चक्रे पुण्यं सत्यवती-सुतः ।। आदि० १.५२

शूद्रोऽपि ब्रह्मज्ञानेन परब्रह्मणः सायुज्यं लभते ।[1] इहलोके राजसम्मानं विद्वांसो लभन्तेऽग्रहारादिकं च । कवीनां ब्रह्मवादिनां च सर्वत्र पूजा भवति । ऋषीणां परितर्पणं ब्रह्मचर्येण भवति ।[2] ज्ञानवृद्धत्वं तु महच्छ्रेयो विद्याभिरवाप्यते ।[3]

विद्यामनधीत्य मूढमतय इहलोके परलोके च दुर्गतिं लभन्त इति निःसंशयमेव । विष्णुपुराणे प्रोक्तम्—सा विद्या या विमुक्तये ।

यज्ञानुष्ठानस्याधिकारस्तत्सम्बन्धि वेदज्ञानं विना न भवतीति जैमिनिना स्पष्टीकृतम् ।[4]

कौटिल्येन संक्षिप्तमेव विद्यानामुद्देश्यं प्रत्यपादि । स प्रस्थापयति—

प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम् ।
आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता ।।

इयमान्वीक्षिकी 'लोकस्योपकरोति, व्यसनेऽभ्युदये च बुद्धिमवस्थापयति,

---

१. भागवते ९.२
२. आदि० १३.४२
३. महाभारते आदि० ८४.२
४. ज्ञाते च वाचनं न ह्यविद्वान् विहितोऽस्ति । ३.८.१८ । शबर एतद् व्याख्याति—अनारभ्य कर्माणि वेदाध्ययनं श्रूयते । तस्मात् स्वाध्यायोऽध्येतव्य इति । ..... कियता पुनर्विदितेन विद्वानधिक्रियते । यावता विदितेन शक्तो भवति यथोक्तं क्रतुमभिनिर्वर्तयितुं तावद्यो वेद स तेन क्रतुनाधिक्रियते ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रज्ञावाक्य-क्रियावैशारद्यं च करोति। अर्थशास्त्रे १.२.१२

कस्मै प्रयोजनाय विद्याध्येया' इति परवर्तियुगे लौकिकोपयोगदृष्ट्या-कविभिर्भूरिप्रशंसया स्पष्टीकृतम्। तथाहि भर्तृहरिः —

वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते। नीति० १८
विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्'
विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः।
विद्या राजसु पूजिता न तु धनं विद्याविहीनः पशुः॥ नीति० २०
विद्या बन्धुजनार्तिनाशनकरी विद्या परं देवता।
विद्या भोग्यवशः कुलोन्नतिकरी विद्याविहीनः पशुः॥

पृथक् पृथग्विद्यानामध्ययनेन पृथक् पृथगुद्देश्यं सम्पद्यते। तद्यथा पतञ्जलिर्व्याकरणाध्ययनस्योद्देश्यं संकेतयति—

(१) रक्षार्थं वेदानामध्येयं व्याकरणम्।

(२) असन्देहार्थं चाध्येयं व्याकरणम्।

(३) दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्॥

(४) यस्तु प्रयुंक्ते कुशलो विशेषे शब्दान् यथावद् व्यवहारकाले।
सोऽनन्तमाप्नोति जयं परत्र वाग्योगविद् दुष्यति चापशब्दैः॥

अर्थकरी विद्या ब्राह्मणानां कृतेऽप्रशस्ता मता। कूर्मपुराणानुसारेण —

वृत्त्यर्थं यस्य चाधीतं निष्फलं तस्य जीवितम्। उत्तरार्धे १९.१८

गौणरूपेण तु अध्यात्मविद्ययापि धनं प्राप्यत एव किन्तु विद्या अधीत्य धनं प्राप्स्यामीत्युद्देश्यमवनतमासीत्। द्विविधा विद्यासीत्—परमार्थकरी, अर्थकरी च। एतयोर्द्वयोः परमार्थकरी अभिजातानामर्थकरी च पृथग्जनानां कृतेऽभूत्।

तथापि नागरकजीवनवृत्तये तु धनमपेक्षितं भवत्येव। तत्तु विद्यया चतुर्वर्णानां कृते सम्भवति। कामसूत्रे व्यावहारिकसत्यमधोविधं प्रतिष्ठितम्—

विद्यामधीत्य ब्राह्मणो दानेन, क्षत्रियो विजयेन, वैश्यो वाणिज्येन शूद्रश्च शिल्पकलादिभिर्धनमर्जयेत्। १.४.१

अन्ते मनोरन्वीक्षणं ध्येयमेव। तदनुसारेण—

वेदशास्त्रार्थतत्त्वज्ञो यत्र तत्राश्रमे वसन्।
इहैव लोके तिष्ठन् स ब्रह्मभूयाय कल्पते॥ १२.१०२
सर्वेषामपि चैतेषामात्मज्ञानं परं स्मृतम्।
तद्ध्यग्र्यं सर्वविद्यानां प्राप्यते ह्यमृतं ततः॥ १२.१०२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

आत्मज्ञाने शमे च स्याद् वेदाभ्यासे च यत्नवान् ।
एतद्धि जन्मसाफल्यं ब्राह्मणस्य विशेषतः ।
प्राप्यैतत् कृतकृत्यो हि द्विजो भवति नान्यथा ॥ २९.९३
बिभर्ति सर्वभूतानि वेदशास्त्रं सनातनम् ।
तस्मादेतत्परं मन्ये यज्जन्तोरस्य साधनम् ॥ १२.९९
सैनापत्यं च राज्यं च दण्डनेतृत्वमेव च ।
सर्वलोकाधिपत्यं च वेदशास्त्रविदर्हति ॥
तपो विद्या च, विप्रस्य निःश्रेयसकरं परम् ।
तपसा किल्विषं हन्ति विद्ययामृतमश्नुते ॥ १२.१०४

शिक्षण-विषयाः

प्रागैतिहासिकयुगे भारतस्य नैकप्रदेशेषु आर्येतराणां पुराणी संस्कृतिराधिभौतिकदृष्ट्या सम्यक् समुन्नतासीत् । भारते पाकिस्ताने च नैकस्थलेषु तस्याः संस्कृतेः प्राचीनस्वरूपं ध्वंसावशेषेषु लभ्यते । तेषां निर्वर्णनेन स्पष्टं ज्ञायते यत् तत्रत्यजनाः पुरुषार्थत्रयस्य प्रतिपत्तौ आश्चर्यकरीं सफलतामर्जितवन्तः । तेषां नागरजीवनापेक्षितसामग्रीणामुपलब्धये नैकविज्ञानानां कलानां च गभीराध्ययनाध्यापनयोः प्रचरणमावश्यकमासीदेव । वास्तुमूर्त्तिचित्रादिशिल्पाधिकरण-नैपुण्यं महताध्यवसायेन तैर्निष्पादितम् । नृत्यसंगीतादिमनोरञ्जनानां प्रस्तुतीकरणायान्तेवासिनः सम्यक् सुशिक्षिता आसन् । तत्र धार्मिकशिक्षा प्रावर्तत । योगसाधनासु युवकाः प्रशिक्ष्यन्तेस्म । शरीरस्य परिधान-प्रसाधनादीनां कृत औद्योगिकी शिक्षा चिरमभ्यस्ता । विशेषमहत्त्वं तत्कालीन-प्रशिक्षणे लेखनकलाया आसीत् । सुचिराभ्यासेन छात्राः समानुपातिकाक्षराणि लिखितुं समर्था बभूवुः । तेषां धातुविद्याभ्यासः पर्याप्त आसीत् । नवकर्मिका एवास्त्रशस्त्राणां मृण्मयक्रीडनकानां, गृहोपयोगिपात्राणां, शय्यासनादिविश्रामोपकरणानां निर्माणे परं दाक्ष्यं लब्धवन्तः ।

मनुरध्येय-विषयाणां विभाजनं वर्गत्रयेण करोति । तद्यथा—

लौकिकं वैदिकं वापि तथाध्यात्मिकमेव च । २.११

तत्र लौकिकस्तु शिल्पकलादिक औद्योगिक एव । वैदिकस्तु अपरा विद्या वेद-वेदाङ्गेतिहास-पुराण-काव्य-शास्त्रान्वीक्षिकीत्यादयः । अध्यात्मविद्या तु परा विद्योपनिषत्सु प्रामुख्येणानुसंहिता ।

वैदिकशिक्षाया धर्मपरिधौ द्विविधं स्वरूपं वर्तते—प्रथमं येन वैदिकसूक्तानि, मन्त्रास्तेषां ब्राह्मणानि च विरच्यन्ते । द्वितीयं पुनर्येन सूक्तादीनां यज्ञकर्मणि विनियोगः क्रियते । वैदिकसाहित्यस्य रचना वेदाङ्गानां—शिक्षा-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कल्प-निरुक्त-छन्दोज्योतिषव्याकरणानां ज्ञानमपेक्षते । वेदाङ्गानां ज्ञानं न केवलं मन्त्राणां रचनायै भवति, अपि तु तेषामर्थबोधाय, तदनु विनियोगायाप्यपरिहार्यमस्ति ।

वैदिकसूक्तेषु पुरातनानामपि देवर्षीणां नराणां नृपतीनां च चरितानि, सामर्थ्यं प्रवृत्तयश्च स्थाने-स्थाने वर्णितानि। प्रसङ्गेऽस्मिन् तेषामार्येतरसमुदायैः संघर्षोऽवलोक्यते । आर्याणामार्येतराणां च जीवनदर्शनं तासु तासु वैदिककृतिषु निहितम् । एतत् सर्वं गुरूणां सान्निध्येऽधीत्यान्तेवासिस्नातको लोकविधौ प्रवणो बभूव ।

वैदिकयुगे तत्रासीत् परा विद्या विकसिता यया ज्ञातव्यमासीत् अक्षरं ब्रह्म । अन्यच्चापरा विद्या—वेदा वेदाङ्गानि च ।[1] परा विद्या उपनिषद् विद्यास्ति । तस्यै अपरा विद्यायाः प्रतिष्ठैव ।[2] परब्रह्मापरब्रह्मेति उभे विजिज्ञासितव्ये उपनिषद्विद्यया वेदविद्यया च ।

एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजा द्युलोकश्चक्षुर्विश्वरूपः (आदित्यः), प्राणःपृथग्वर्त्मात्मा (वायुः) संदेहो (शरीरस्य मध्यभागः) बहुलः (आकाशः) वस्तिः (उदरम्), रयिः (जलम्), पृथिव्येव पादौ, उर एव वेदिः, लोमानि बर्हिः (कुशग्रासः) हृदयं, गार्हपत्यो मनोऽन्वाहार्यपचन आस्यमाहवनीयः । छान्दोग्योपनिषद् ५.१८.२

अत्र परमात्मनो विश्वरूपता सालंकृति परिभाषिता । अपरं च यथा नारदो सनत्कुमारेण शिक्षितः —अपरा विद्या तु नामैव । अतः परं वाक्, मनः, संकल्पः, चित्तम्, ध्यानम्, विज्ञानम्, बलम्, अन्नम्, आपः तेजः, आकाशः, स्मरः, आशा, प्राणः इत्येतानि भूयांस्युत्तरोत्तरम् । एतानि ज्ञात्वा 'अतिवादी' भवति । अतिवादी सत्येन वदति । सत्यं त्वेव विजिज्ञासितव्यम् । छान्दोग्ये ७. १–१६

वैदिकसंहितासूच्चकोटिकं ब्रह्मज्ञानं यत्र-तत्र स्पष्टतया वर्णितम् । अथर्ववेदस्य वेदान्तप्रकरणे यजुर्वेदस्येशोपनिषच्चाध्यात्मिकज्ञानप्रवणं शिष्यं करोति ।

वैदिकयुगे युद्धं प्रियमासीत् । योद्धारो नैकशस्त्रास्त्रप्रयोगे शिक्षिता आसन् । वैश्या वार्ता-कृषि-पशुपालन-वाणिज्येषु नैपुण्यमवापुः । वाणिज्ये

---

१. मुण्डकोपनिषद् १.५

२. तस्यै (उपनिषद्विद्याकृते) तपो दमः कर्म (साधनम्) । प्रतिष्ठा वेदाः सर्वाङ्गानि । सत्यमायतनम् । केन० ४.८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

आर्येतराः पणयः सविशेषं दाक्ष्यमलभन्त। नैकविधशिल्पानां विज्ञानं नवकर्मिका भूत्वा रथकारादयः शिक्षितवन्तः। तत्र तक्षा (रथकारः) काष्ठकर्मनिष्णात आसीत्।[1] वर्धकिर्नौनिर्माणमकरोत्। तन्तुवायो वस्त्रं वयतिस्म चर्मकृत् चर्मकर्मणि दक्षो बभूव।[2] स्त्रियो वस्त्रवयनेऽतिशेरते स्म कला परिपाकेन।[3] कुम्भकारः (मृत्पचः) मृद्भाण्डानि रचितवान्।[4]

शतपथब्राह्मणे स्वाध्यायस्य विषयाः स्पष्टीकृताः सन्ति—ऋग्यजुःसामाथर्वा वेदाः, इतिहास-पुराणानि, गाथानाराशंसी च।[5] छान्दोग्योपनिषदनुसारेण ब्रह्मविद्योपक्रमात् प्रागेव चत्वारो वेदाः, इतिहासपुराणानि (पञ्चमवेदः) व्याकरणं पित्र्यम् (श्राद्धकर्म) राशिः (गणितम्), दैवं (शकुनम्, उत्पातज्ञानम्) निधिः (कालान्तरज्ञानम्), वाकोवाक्यम् (तर्कशास्त्रम्), एकायनं (नीतिशास्त्रम्), देवविद्या (शब्दनिर्वचनम्), ब्रह्मविद्या (शिक्षा-कल्प-छन्दश्चितयः), भूतविद्या, क्षत्रविद्या (अस्त्रशस्त्रादिप्रयोगज्ञानम्), नक्षत्रविद्या (ज्योतिषम्), सर्पविद्या, देवजनविद्या (लोकानां देवानां प्रीत्यर्थं संगीतादि, आलेपनादि) केचिदशिक्षन्त।[6]

बृहदारण्यके चत्वारो वेदा इतिहास-पुराण-विद्या उपनिषदः श्लोकाः सूत्राणि, अनुव्याख्यानानि, व्याख्यानानि च ब्रह्मणो निःश्वसितानि सन्तीति विज्ञापितम्।

एतावतोऽपि बृहत्तरं ज्ञानक्षेत्रं छान्दोग्योपनिषदि अधोविधं प्रकटितम्—दिवं, पृथिवीं, वायुमाकाशमापः, तेजः, देवान् मनुष्यान्, पशून्, वयांसि (पक्षिणः), तृण-वनस्पतीन्, श्वापदानि, आकीटपतङ्ग-पिपीलिकं धर्मं चाधर्मं च, सत्यं चानृतं च, साधु चासाधु च, हृदयज्ञं चाहृदयज्ञं, चान्नं च रसं चेमं च लोकममुं च विज्ञानेनैव विजानाति।

महाभारते नैकविधा अध्येया विषया वर्णिताः सन्ति। तदनुसारेण

---

१. ऋग्वेदे ९.११२.१

२. ऋग्वेदे ८. ५५.३

३. ऋग्वेदे २.३८.४

४. वाज० सं० १६.२७; ३०.७

५. शतपथ ११.५.७.४-८

६. नारदः सनत्कुमारादध्येतुं गतवान्। प्रागेव तेनाधीतं गुरवे निवेदितम्—ऋग्वेदं यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यं राशिं, दैवं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्यां सर्पदेवजनविद्यामेतद्भगवोऽध्येमि। छन्दो० ७.१.२; ७.१.४, ७.७.१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तत्रासीत् शाश्वतः कश्चिद् ग्रन्थो ब्रह्मणा निर्मितः श्लोकितः शतसहस्राध्यायात्मकः त्रिवर्गपरायणः । त्रयी, आन्विक्षिकी, वार्ता दण्डनीतिश्च विद्या निदर्शिताः[1] सन्ति । तत्र दण्डनीतौ निम्नाङ्किता विषया वर्णिताः सन्ति शान्तिपर्वणि ऊनषष्टा अध्याये —

अमात्यरक्षा-प्रणिधी राजपुत्रस्य रक्षणम् ।
चारश्च विविधोपायः प्रणिधिश्च पृथग्विधः ॥ ५९.३४
साम चोपप्रदानं च भेदो दण्डश्च पाण्डव ।
उपेक्षा पञ्चमी चात्र कात्स्न्र्येन समुदाहृता ॥ ५९.३५
मन्त्रश्च वर्णितः कृत्स्नस्तथा भेदार्थ एव च ।
विभ्रंशश्चैव मन्त्रस्य सिद्ध्यसिद्ध्योश्च यत् फलम् ॥
सन्धिश्च विविधाभिख्यो हीनो मध्यस्तथोत्तमः ।
भयसत्कार-वित्तारव्यः कात्स्न्र्येन परिवर्णितः ॥ ५९.३९
यात्राकालश्च चत्वारस्त्रिवर्गस्य च विस्तरः ।
विजयो धर्मयुक्तश्च तथार्थविजयश्च ह ॥ ५९.३८
आसुरश्चैव विजयस्तथा कात्स्न्र्येन वर्णितः ।
लक्षणं पञ्चवर्गस्य त्रिविधं चात्र वर्णितम् ॥ ५९.३९
प्रकाशश्चाप्रकाशश्च दण्डोऽथ परिशब्दितः ।
प्रकाशोऽष्टविधस्तत्र गुह्यस्तु बहुविस्तरः ॥ ५९.४०
रथा नागा हयाश्चैव पादाताश्चैव पाण्डव ।
विष्टिर्नावश्चराश्चैव देशिका इति चाष्टमम् ॥ ४१
अङ्गान्येतानि कौरव्य प्रकाशानि बलस्य तु ।
जङ्गमाजङ्गमाश्चोक्ताश्चूर्णयोगा विषादयः ॥
स्पर्शे चाभ्यवहार्ये चाप्युपांशुर्विविधः स्मृतः ।
अरिर्मित्रमुदासीन इत्येतेऽप्यनुवर्णितः ॥ ५९.४३
कृत्स्ना मार्गगुणाश्चैव तथा भूमिगुणाश्च ह ।
आत्मरक्षणमाश्वासः सर्गाणां चान्ववेक्षणम् ॥ ५९.४४
कल्पना विविधाश्चापि नृनागरथवाजिनाम् ।
व्यूहाश्च विविधाभिख्या विचित्रं युद्धकौशलम् ॥

---

१. ततोऽध्यायसहस्राणां शतं चक्रे स्वबुद्धिजम् ।
यत्र धर्मस्तथैवार्थः कामश्चैवानुवर्णितः ॥
त्रिवर्ग इति विख्यातो गण एष स्वयंभुवा ।
चतुर्थो मोक्ष इत्येव पृथगर्थः पृथग्गणः ॥ शान्ति० ५९.२१,३०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

उत्पाताश्च निपाताश्च सुयुद्धं सुपलायितम् ।
शस्त्राणां पालनं ज्ञानं तथैव भरतर्षभ ॥ ५९.४६

बलव्यसनमुक्तं च तथैव बलहर्षणम् ।
पीडनास्कन्दकालश्च भयकालश्च पाण्डव ॥ ४९.४७

तथा खातविधानं च योगसंचार एव च ।
चौराटव्यबलैश्चोग्रैः परराष्ट्रस्य पीडनम् ॥ ५९.४८

अग्निदैर्गरदैश्चैव प्रतिरूपकचारकैः ।
श्रेणिमुख्योपजापेन वीरुधश्छेदनेन च ॥ ५९.४९

दूषणेन च नागानामाशङ्काजननेन च ।
आरोधनेन भक्तस्य पथश्चोपार्जननेन च ॥ ५९.५०

सप्ताङ्गस्य च राज्यस्य ह्रासवृद्धिसमञ्जसम् ।
दूतसामर्थ्ययोगश्च राष्ट्रस्य च विवर्धनम् ॥ ५९.५१

अरिमध्यस्थमित्राणां सम्यक् चोक्तं प्रपञ्चनम् ।
अवमर्दः प्रतीघातस्तथैव च बलीयसाम् ॥ ५९.५२

व्यवहारः सुसूक्ष्मश्च तथा कण्टकशोधनम् ।
शमो व्यायामयोगश्च योगो द्रव्यस्य संचयः ॥५९.५३॥

अभृतानां च भरणं भृतानां चान्ववेक्षणम् ।
अर्थकाले प्रदानं च व्यसनेष्वप्रसङ्गिता ॥ ५९.५४॥

तथा राजगुणाश्चैव सेनापतिगुणाश्च ये ।
कारणस्य च कर्तुश्च गुणदोषास्तथैव च ॥५९.५५॥

दुष्टेङ्गितं च विविधं वृत्तिश्चैवानुजीविनाम् ।
शङ्कितत्वं च सर्वस्य प्रमादस्य च वर्जनम् ॥५९.५६

अलब्धलिप्सा लब्धस्य तथैव च विवर्धनम् ।
प्रदानं च विवृद्धस्य पात्रेभ्यो विधिवत्तथा ॥ ५९.५७

विमर्गोऽर्थस्य धर्मार्थमर्थार्थं कामहेतुना ।
चतुर्थो व्यसनाघाते तथैवात्रानुवर्णितः ॥ ५९.५८

क्रोधजानि तथोग्राणि कामजानि तथैव च ।
दशोक्तानि कुरुश्रेष्ठ व्यसनान्यत्र चैव ह ॥ ५९.५९

मृगयाक्षास्तथा पानं स्त्रियश्च भरतर्षभ ।
कामजान्याहुराचार्याः प्रोक्तानीह स्वयंभुवा ॥ ५९ ६०

वाक्पारुष्यं तथोग्रत्वं दण्डपारुष्यमेव च ।
आत्मनो निग्रहस्त्यागोऽथार्थदूषणमेव च ॥ ५९.६१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यन्त्राणि विविधान्येव क्रियास्तेषां च वर्णिताः ।
अवमर्दः प्रतीघातः केतनानां च भञ्जनम् ॥ ५९.६२
चैत्यद्रुमाणामामर्दो रोधः कर्मान्तनाशनम् ।
अपस्करोऽथ गमनं तथोपास्या च वर्णिता ॥ ५९.६३
पणवानकशंखानां भेरीणां च युधांवर ।
उपार्जनं च द्रव्याणां परमर्म च तानि षट् ॥ ५९.६४
लब्धस्य च प्रशमनं सतां चैव हि पूजनम् ।
विद्वद्भिरेकीभावश्च प्रातर्होमविधिज्ञता ॥ ५९.६५
मङ्गलालम्भनं चैव शरीरस्य प्रतिक्रिया ।
आहारयोजनं चैव नित्यमास्तिक्यमेव च ॥ ५९.६६
एकेन च यथोत्थेयं सत्यत्वं मधुरा गिरः ।
उत्सवानां समाजानां क्रियाः केतनजास्तथा ॥ ५९.६७
प्रत्यक्षा च परोक्षा च सर्वाधिकरणेषु च ।
वृत्तिर्भरतशार्दूल नित्यं चैवान्ववेक्षणम् ॥ ५९.६८
अदण्डयत्वं च विप्राणां युक्त्या दण्डनिपातनम् ।
अनुजीविस्वजातिभ्यो गुणेषु परिरक्षणम् ॥ ५९.६९
रक्षणं चैव पौराणां स्वराष्ट्रस्य विवर्धनम् ।
मण्डलस्था च या चिन्ता राजन् द्वादशराजिका ॥ ५९.७०
द्वासप्तति मतिश्चैव प्रोक्ता या च स्वयंभुवा ।
देशजातिकुलानां च धर्मः समनुवर्णितः ॥ ५९.७१
धर्मार्थश्च कामश्च मोक्षश्चात्रानुवर्णितः ।
उपायश्चार्थलिप्सा च विविधा भूरिदक्षिणाः ॥ ५९.७२
मूलकर्म क्रिया चात्र मायायोगश्च वर्णितः ।
दूषणं स्रोतसामत्र वर्णितं च स्थिराम्भसाम् ॥ ५९.७३
यैर्यैरुपायैर्लोकश्च न चलेदार्यवर्त्मनः ।
तत्सर्वं राजशार्दूल नीतिशास्त्रेऽनुवर्णितम् ॥ ५९ ७४

राज्ञा वेद-धर्मशास्त्र-वेदाङ्गोपवेद-पुराणानामध्ययनेन प्रजा-चारित्र्यविधानोपाया ज्ञातव्या आसन्[1] । पाणिनिः कतिपयाल्पज्ञाताध्ययनविषयानपि सङ्केतयति । ते सन्ति भिक्षुसूत्राणि, नटसूत्राणि च । पतञ्जलिरध्येयविषयाणां नामानि सूचयति—चत्वारो वेदाः साङ्गाः, सरहस्या बहुधा विभिन्ना एकशत-

१. गौतम धर्मसूत्रे ११.९ । संक्षोभस्य पूर्वजो महाराजः सुशर्मा चतुर्दशविद्यानामध्ययनेन परमसत्यमजानीदिति तद्विषयकस्वोत्कीर्णलेखेन ज्ञायते ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मध्वर्युशाखा ·····वाकोवाक्यमितिहासः पुराणं वैद्यकादीनि। याज्ञवल्क्यो नाराशंसी-गाथानां विद्यानां चाध्ययनमपि देवानां पितॄणां प्रीत्यर्थं निर्धारयति।[1] विद्यास्तु सन्ति चतुर्दश वेदवेदाङ्गादीनि।[2]

महाभारते संसर्ग-विद्येति महत्त्वपूर्णोपलब्धिः प्रतिभाति श्रैष्ठ्योपपन्नानां जनानाम्। तत्र बहूनां विद्यानां समाहारः संसर्गे लक्ष्यत इति 'संसर्गविद्यासु' इति पदेन स्पष्टम्। नारदः कौरवाश्च संसर्गविद्या-निष्णाता आसन्।[3] तद् यथा सोमसूरिणा व्यवहृतं संसर्ग-विद्या नाटच-नृत्यसंगीतादि-मनोरञ्जनात्मिकी प्रतिभाति।[4]

तक्षशिला-विश्वविद्यालये त्रय्या सह हस्तिसूत्रं धनुर्वेदोऽष्टादश शिल्पानि च शिक्ष्यन्ते स्म।[5] दीघनिकायानुसारेण वेदावेदाङ्गैः सह निघण्टु-कैटुभाक्षर-प्रभेद-शिक्षेतिहास-पदज्ञान-व्याकरण-लोकायत-महापुरुषलक्षणादिकं पाठ्यते स्म।[6]

गौतमबुद्धस्यानुयायिनः तस्य शिक्षोपदेशानशिक्षन्त। तस्योपदेशाः त्रिपिटकेषु संगृहीताः सन्ति। त्रिपिटकानां व्याख्यारूपेण परवर्तियुगे बहवो ग्रन्था विरचिताः। एतैः सह पाणिनि-व्याकरणस्य, वेदवेदान्त-सांख्यादीनामध्यापनं विहारेषु प्रचलति स्म।[7] भिक्षवो योगाभ्यासेन स्वचित्तवृत्तिं संयमयन्ति स्म।[8] यथा इत्सिङ्गः सूचयति पाणिनेरष्टाध्याय्या सह पतञ्जलेर्महाभाष्यमपि जिज्ञासुभिश्छात्रैरधीतं बौद्धविहारेषु। तत्र न्यायशास्त्रस्याध्ययनमपि लोककान्तमासीत्। नागार्जुनकृता ग्रन्थाः सादरमधीताः।[9]

जैन विद्यालयेषु महावीरस्य प्रवचनानां संग्रहाः — द्वादशाङ्गानि, चतुर्दश पूर्वाश्चाध्यापितानि। एतान्याश्रित्य विरचितः षट्खण्डागम इति सूत्रग्रन्थो

१. याज्ञवल्क्य १.४४-४५

२. चर्तुदश विद्याः — चत्वारो वेदा; षड् वेदाङ्गानि, पुराणम्, न्यायः, मीमांसा, धर्मशास्त्रं च। अतः परमपि चतस्रः विद्या उपवेदाः सन्ति। तत्र १८ विद्याः प्रख्याताः। नैतावत्य एव विद्या इत्यपरेषां मतम्।

३. आदि० १०८.१६; शान्ति० २२३.१८

४. यशस्तिलकचम्पू पृ० २०२

५. सुसीमजातकं, थुसजातकं च

६. दीघनिकाये १.३ अम्बट्ठ सुत्तं।

७. Beal. S Travels of Hiuen Tsang P. 112.

८. वरणजातकं ७१

९. I-tsing. tr, of Takakusu P. 170-180.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

जैनमतावलम्बिभिः सादरमनुशीलितः। काषायपाहुड इति प्राचीनग्रन्थस्तेषां पाठ्यक्रमे महत्त्वपूर्णं प्रतिष्ठितः। तदनन्तरं कुन्दकुन्दाचार्यस्य ग्रन्थत्रयं—समयसारः, प्रवचनसारः, पञ्चास्तिकायश्च प्राकृतभाषया विरचिता जैनदर्शन-धर्मयोः परिचयाय निकाममधीतम्। जैनसंस्कृतेर्ज्ञानाय महत्त्वपूर्णा सामग्री संस्कृत-प्राकृतापभ्रंशभाषाभी रचिताः, परवर्तियुगे जैनाम्नायप्रतिष्ठितानां लोकनायकानां चरितं समाश्रित्य बहुलीकृता च। एतस्या उपयोगो बहुजन-हिताय प्रावर्तत। जैनकथास्तत्र सुप्रतीता एव।

जैनसंस्थासु विशेषाध्यापनाय जैनमनीषिभिर्विरचिता धार्मिकविषय-बाह्या अपि ज्योतिषायुर्वेद-व्याकरण-कोशच्छन्दोऽलङ्कार-गणित-राजनीति-विषयका ग्रन्था बहुसंख्यका निर्धारिता आसन्। न केवलं संस्कृतेनापितु प्राकृतभाषाभिरपि तेषां बहवो ग्रन्थाश्छात्रोपयोगिनो बभूवुः।

कौटिल्यस्तु अर्थशास्त्रस्य विनयाधिकारे विद्यानां परिधिं परिभाषते स्म। तदनुसारेण तत्त्वार्थदृष्ट्या विद्याश्चतस्रः—आन्वीक्षिकी, त्रयी, वार्ता, दण्ड-नीतिश्च[1]। ताभिर्धर्मार्थौ यद्विद्यात्तद्विद्यानां विद्यात्वम्। कौटिल्य आन्वीक्षिकीं सर्वोपरि मन्यते, यतो हि नाम—

प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।
आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता॥ १.२.३

स विद्यया कामवर्गं नानुसज्जयति। बहवस्तत्र कला उपविद्याश्च काम-वर्गाधिकारिण्यः सन्ति।

वैदिकशिक्षणपद्धतौ वैदिककालानन्तरं सदैव धर्मशास्त्राणामध्ययनाध्या-पने सारभूते आस्ताम्। तत्र श्रौतसूत्रधर्मसूत्रगृह्यसूत्राणां, स्मृतीनां पुराणेति-हासानां चानन्यतमं स्थानमासीत्। एतैर्विषयैर्वर्णाश्रमसंस्थायाः संरचना विकासश्च समारब्धः।

उपवेदाः

महाभारतानुसारेणादौ—

गान्धर्वं नारदो वेद भरद्वाजो धनुर्ग्रहम्।
देवर्षिचरितं गार्ग्यः कृष्णात्रेयश्चिकित्सितम्॥ शा० २०३.१९

चत्वार उपवेदा—आयुर्वेदः, धनुर्वेदः, गान्धर्ववेदः, स्थापत्यशास्त्रवेदश्च-

---

1. आन्वीक्षिकी तु सांख्यं, योगः, लोकायतं (तर्कशास्त्रम्) च। सा लौकस्योप-रोति, व्यसनेऽभ्युदये च, बुद्धिमवस्थापयति, प्रज्ञावाक्यक्रियावैशारद्य च करोति। स्तुतः सर्वा दार्शनिकशाखा-प्रशाखा आन्वीक्षिकीपदेन गृह्यन्ते। धर्माधर्मौ त्रय्याम्। र्थानर्थौ वार्तायाम् नयापनयौ दण्डनीतौ। —अर्थशास्त्रे १. २. १०–१२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वेदादिभिः सहाध्यापिताः। पृथक् पृथक् संस्था एतेषां विशेषज्ञानाय बभूवुः। किन्तु बहुषु संस्थासु प्रधानत्वेन वेदा अध्यापितास्तत्रैव गौणस्थानमुपवेदानामध्यापनस्यापि सर्वेषां कृत आवश्यकमासीत्।

आयुर्वेदः

वैदिकयुगे प्रधानदेवानामपि चिकित्सा-विधानेऽधिकार आयुर्वेदस्य महत्त्वं द्योतयति। चिरजीवनं तु ऋषीणामभीप्सितमासीत्। एतदर्थं प्रथमं देवानां साह्यं प्रामुख्येण वर्णितम्। अश्विनौ, वरुणः, रुद्रश्च वैद्या अपि बभूवुः[1]। एतेषां ज्ञानं शिष्यपरम्परया प्राभवत्। तस्मिन् युगे जलचिकित्सा, सूर्यरश्मिचिकित्सा चापि प्रावर्तेताम्।[2] बहुभिरोषधिभी रोगा निवारिताः। तद्यथा—

याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः।
बृहस्पतिप्रसूतास्ता नो मुञ्चत्वंहसः॥ ऋग्वेदे १०.९७.९५

अथर्ववेदानुसारेण नैकविधायुर्वैदिकप्रयोगैर्ज्वर-विष-कुष्ठादीनामुपचारः, केशवर्धनम्, अस्थियोगः, कृमिनाशः, मशकनिवारणं च समभवन्। एतावता प्रतीयते यदायुर्वेदज्ञानां शिष्यपरम्परा सदैव सचेष्टा आसीत्। अथ चानुसन्धानप्रवृत्तिभिस्ते नित्यनूतनौषधानामाविष्कारं कुर्वन्ति स्म।

परवर्तियुगे चरकसुश्रुतयोः शिष्यपरम्परया औषधिविज्ञानं शल्यकर्म चानन्यतमप्रगतिं लेभाते। परिणामतो न केवलं भारतेऽपितु विदेशेष्वपि भारतीयायुर्वेदस्य वैद्यानां चोपयोगिता सम्प्रतिष्ठितासीत्। वैदिकसंहितावच्चरकसंहिता सुश्रुतसहिता च छात्रैरधीते। न केवलं मनुष्याणामपितु वृक्षाणां, पशु-पक्षिणामपि बहुविधचिकित्सा शिक्षिता।[3]

तक्षशिला-विश्वविद्यालये गौतमबुद्धस्य समकालिको जीवकः सप्तवर्षाणि चिकित्साशास्त्रमधीतवान्। तस्याद्भुतप्रक्रिया बौद्धसाहित्ये निर्दिष्टाः सन्ति।[4]

रसायन-विज्ञानं छात्रैरधीतम्। तत्र बहूनां द्रव्याणां शोधनप्रक्रिया प्राचरत्। रसायन-सिद्धिः सम्यगनुशीलितासीत्। तथाहि—

दीर्घमायुः स्मृतिं मेधामारोग्यं तरुणं वयः।
देहेन्द्रियबलं कान्तिं नरो विन्देद् रसायनात्॥

योगरत्नाकरे रसायनाधिकारः

---

१. ऋग्वेद १.११६.१६; १ २४.९; २.३३.४-७

२. ऋग्वेद १.२३.१९– २१; १.५०.११

३. वृक्षायुर्वेदोऽग्निपुराणे २८१ अध्याये, हंसजातक ५०२, कामनीतजातक २२८, शिबिजातक ४९९, असिलक्खणजातक १२६, लित्तजातक ९१

४. महावग्ग ६.१३.१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

धनुर्वेदः

धनुर्वेदस्तु सैन्यप्रशिक्षणं प्रामुख्येण द्योतयति । छान्दोग्योपनिषदि नारदेनाधीतासु विद्यासु क्षत्रविद्या परिगणिता । सा विद्या धनुर्वेदः । न केवलं राजानोऽपि तु ऋषयोऽपि क्षत्रविद्या-निष्णाता बभूवुः, यतो हि नाम तेषां शत्रुभिर्युद्धद्वारेण संघर्षस्य शमनं सूक्तेषु नैकशः परामृष्टम् । राजानः क्षत्रियाश्च रणकौशलवैदग्ध्यं गुरूणामन्तेवासित्वेनावापुः । वैदिकसंहितासु ब्राह्मणग्रन्थेषु च महायुद्धानामपि वर्णनं विद्यते ।

महाभारतकाले युद्धार्थिनां सैन्यप्रशिक्षणं भूयिष्ठं वर्णितम्[1] । परशुरामः, भरद्वाजः, द्रोणश्च वेदविद्यया सह क्षत्रविद्यां प्रकर्षेणाध्यापयन्ति स्म । द्रोणाचार्योऽर्जुनं धनुर्वेदं शिक्षयति स्मेति विवृतमधोविधं तत्र—

ततो द्रोणोऽर्जुनं भूयो रथेषु च गजेषु च ।
अश्वेषु भूमावपि च रणशिक्षामशिक्षयत् ॥
गदायुद्धेऽसिचर्यायां तोमरप्रासशक्तिषु ।
द्रोणः संकीर्णयुद्धेषु शिक्षयामास पाण्डवम् ॥

द्रोणः परशुरामाद् धनुर्वेदमशिक्षत । समग्रं, ससंहारं, सप्रयोगरहस्यं विद्याः सम्यक् तस्मै परशुरामः प्रादात् ।[2]

कर्णो द्रोणाचार्यात्, कृपाचार्यात्, परशुरामाच्च चतुर्विधमस्त्रग्रामं शिक्षित्वा परमेष्वास इत्युपाधिमर्जितवान् ।[3] युद्धविद्याया अङ्गानि—हस्तिसूत्राणि, अश्वसूत्राणि. रथसूत्राणि, धनुर्वेद-सूत्राणि च बभूवुः ।[4]

---

१. धृतराष्ट्र-पाण्डु-विदुराणां प्रशिक्षण-विषये महाभारते आदिपर्वणि अध्यायः १०२

संस्कारैः संस्कृतास्ते तु व्रताध्ययनसंयुताः ।
श्रमव्यायामकुशलाः समपद्यन्त यौवनम् ॥ १६
धनुर्वेदाश्वपृष्ठे च गदायुद्धेऽसिचर्मणि ।
तथैव गजशिक्षायां नीतिशास्त्रे च पारगाः ॥ १७
पाण्डुर्धनुषि विक्रान्तो नरेभ्योऽभ्यधिकोऽभवत् ॥ १९

२. सरहस्यव्रतं चैव धनुर्वेदमशेषतः ।
प्रतिगृह्य तु तत्सर्वं कृतास्त्रो द्विजसत्तमः ॥ आदिप० १२१.२२

३. द्रोणान् कृपाच्च रामाच्च सोऽस्त्रग्रामं चतुर्विधम् ।
लब्ध्वा लोकेऽभवत् ख्यातः परमेष्वासतां गतः ॥ आरण्यक० २९३.१७

४. सभापर्वणि ५. १०९, ११० । सोमदेवसूरिणा यशस्तिलकचम्पूनामके काव्ये गजाश्वविद्यायाः साङ्गोपाङ्गविवरणं संकेतितम्, पृ० ३०१-३१५ । कौटिल्यस्यार्थशास्त्रे प्रागेव सविस्तरं युद्धविद्याप्रकरण एते विषयाः प्रतिपादिताः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सप्तमशताब्द्या महाकविर्बाणो राजकुमारकृते धनुर्वेदप्रकरणं परशु-गदा-प्रभृतिषु सर्वेषु आयुधविशेषेषु, रथचर्यासु, गजपृष्ठेषु, यन्त्रप्रयोगे, विषापहरणे, सुरङ्गोपभेदे, तरणे, लंघने, प्लुतिषु च परं कौशलं निर्दिशति।[1]

वेदविद्यया सह युद्धविद्या-शिक्षणमुद्योतनसूरिणाष्टमशताब्दे वर्णितम्।[2] चतुर्दशशताब्देऽनन्तपुरे त्रिवेन्द्रस्थमहाविद्यालये वेदेन सह युद्धविद्याध्यापिता।[3]

गान्धर्वविद्या

महाभारतानुसारेण नारदस्य नैपुण्यं महितं वर्तते।[4] गान्धर्ववेदे गान्धर्वैः मुख्यतो गायनं शिक्ष्यते। गायनं कण्ठगीतं वाद्यगीतं च द्विविधं भवति। एतयोर्द्वयोर्नृत्येन नाट्येन च सम्बन्धः कलायाः सर्वाङ्गसिद्धये भवति।[5] एतच्चतुष्टयं संगीतकमित्युच्यते। तत्सर्वं मूलतो देवानां प्रीत्यर्थं भवितुमर्हति।

संगीत-साधना ब्राह्मणक्षत्रियादिभिः स्त्रीपुरुषैश्च समानरूपेण सम्पादिता। सामगाने ब्राह्मणा नैपुण्यमवापुः। अश्वमेधयागे तु वर्षं यावत् ब्राह्मणगायको यजमानस्य चरितगाथा वीणावादनसंगतौ चकार। क्षत्रिया यजमानस्य वीरचरितानि गाथाभिः श्रावयामासुः।

गन्धर्वाः किन्नराश्च आर्येतराः संगीतसाधनायां निष्णाता बभूवुः। तेषां नाम्ना गान्धर्वोपवेदः प्रतिष्ठापितः। महाभारतानुसारेणार्जुनश्चित्रसेनाद् गन्धर्वराजात् संगीतं नृत्यं चाशिक्षत। सोऽर्जुनो विराटराजस्य संगीतशालायाः प्रधानाचार्यो बभूव। तत्र राजकुमार्यो दास्यश्च संगीतमशिक्षन्त। रामायणानुसारेण स्वयं वाल्मीकिना लवकुशौ रामचरितगायने निपुणीकृतौ। अनेन गानेन रामचरितं प्रत्यक्षीकृतम्। रामस्य यज्ञे यजमानस्य रामस्य चरितस्य गायनं तस्य पुत्राभ्यां वाल्मीकेरनुज्ञया निष्पादितम्।

जातककाले दूरदूरतो विद्यार्थिनः संगीतं शिक्षितुं प्रसिद्धाचार्याणां समीपमागताः।

भरतस्य नाट्यशास्त्रे वैज्ञानिकविधिना रसस्वरादीनां परस्परसम्बन्धो बोधितः। तत्र संगीतप्रक्रियाः सूक्ष्मविवेचनपुरस्सरं निर्दिष्टा अभिनयविज्ञानं गान्धर्ववेदस्य परां काष्ठां द्योतयन्ति।

---

१. कादम्बरी पूर्वभागे, पृ० १६८-१६९।

२. कुवलयमालाकहा।

३. चतुर्दशशताब्दे अनन्तपुरवर्णनप्रसङ्गे वर्णितमेतत्। J.O.R.I. Baroda Vol. XIX p. 346-350।

४. शान्ति० २०३.१९।

५. दामोदरानुसारेण—गीतं वाद्यं नर्तनं च त्रयं संगीतमुच्यते।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भारतीयसंगीतस्य रामणीयकेन वैदेशिका अपि प्रभाविता आसन्। तस्य प्रसारो नैकदेशेषु परिलक्ष्यते।[1]

स्थापत्यशास्त्रम्

स्थापत्यशास्त्रस्य सर्वोच्चविकासः प्रागैतिहासिक-सिन्धुसभ्यताया वास्तुषु परिलक्ष्यते। तत्रत्यजना नैकविज्ञानानुसन्धानैः सौन्दर्य-स्वास्थ्यादिदृष्टिभिर्बहुविधभवनानि निर्ममिरे। नवकर्मिकाः स्थापत्यविशारदानां संगतौ विद्यामेतामधिगतवन्त इति निश्चितं प्रतिभाति।

वैदिकयुगेऽस्या विद्यायाः स्थूलरूपं न कल्पितुं शक्यते तात्कालिकभवनध्वंसानामप्यभावात्। किन्तु परवर्तिवास्तुविज्ञाने प्रतीकमूलं यत् कलासर्जनं तत्तु सविशेषमुत्कृष्टं पदं वैदिकयुगेऽवाप्नोत्।

भारतीया वास्तुकला विशेषतो मन्दिर-विहार-गुहास्तम्भादीनां निर्माणे चित्रमूर्त्तिबाहुल्येन सफलीकृता। अतएव स्थापत्यं नाम बहूनां शिल्पानां समायोगेन संवर्धितम्।

वैदिककाले यज्ञार्थे बहुविधवेदय इष्टकाभिर्निर्मिताः। स्थापत्यस्य प्रथमः पाठः पुरोहितानां कृत आवश्यक आसीत्।[2] अपरं चासीत् यज्ञवाटस्य यज्ञशरणस्य च निर्माणकला। तत्रासीत् प्रतीकानां भूयिष्ठप्रयोगः। सोमयज्ञेऽग्निचयनमिति याज्ञिकवेदिकानिर्माणविधेः प्रतीकानि अधोविधं वर्णितानि—

Hiraṇyagarbha or Prajāpati is the creator of the universe.[3] Creation, destruction and reconstruction of the universe are eternal, ever recurring processes going on from all time and will

---

1. In music the Hindus have exerted an immense influence on the West, perhaps through Greece and also on Asia, where the Indian quarter tones and subtle harmonies can be found every where as they may be found in Spain and other countries whither the Arabs carried them. A Pageant of India P. 126

२. हैवेल-महोदय एतां प्रवृतिमनुसन्दधानो निदर्शयति—The Temple was not an archaeological essay but a sermon is stone, suggesting by its symbolism the rhythm of the cosmos teaching the lessons of the universal life and recording the sacred traditions of the Indian people. A Study : Indo-Aryan Civilization. P. 180

३. ऋग्वेदे १०.१२१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

go on for all time.[1] Puruṣa himself becomes the sacrificial material and the year and seasons aided in the process of the recoustruction of the sacrificed and dismembered Puruṣa. Man, who is a child of this process, must also do his part in the recoustruction of the world. This he can do best by identifying Fire with Prajāpati[2] and regarding Fire as the highest divinity and source of all life and activity. The reconstructon of the world by Prajāpati a man can imitate by himself constructing an elaborate structure with bricks.[3] The tenth Kāṇḍa of the Śatapatha Brāhmaṇa is the Rahasya (the esoteric doctrine) of Cayana. Most of the acts done in the piling up of the altar are a symbolic representation of the process of recreation and reconstruction.[4]

स्थापत्येऽसुराणां विशेषवैदग्ध्यं प्रतीयते। महाभारतानुसारेण पाण्डवानां कृते सभामण्डपो मयनामकेन प्रख्यातासुरेण निर्मितः। स्थापत्यविज्ञान-प्रशिक्षणेऽसुराणां नैपुण्यं प्रधानमासीत्। असुरेषु मयो देवानां विश्वकर्मा प्रतिष्ठित आसीत्।[5]

---

१. धाता यथापूर्वमकल्पयत। ऋग्वेदे १०.१९०.३

२. शत० १०.४.१.१२

३. प्राजापत्यं वा एतत्कर्म। प्रजापतिं ह्येतेन कर्मणारभतेऽनिरुक्तो वै प्रजापतिः। शत० ६.२.२.२१

४. P. V. Kane quotes Prof. Eggeling in Hist. of Dharmaśāstra Vol. II part II p. 1236.

५. मयेन या सभा कृता तस्या विषये कृष्णेन सभा० प्रथमाध्याये निर्दिष्टमासीत्—

यां कृतां नानुकुर्युस्ते मानवाः प्रेक्ष्य विस्मिताः।
मनुष्यलोके कृत्स्नेऽस्मिंस्तादृशी कुरु वै सभाम्॥ १०
यत्र दिव्यानभिप्रायान् पश्येम विहितांस्त्वया।
आसुरान् मानुषांश्चैव तां सभां कुरु वै मय॥ ११
तस्मै युधिष्ठिरः पूजां यथार्हमकरोत्तदा।
स तु तां प्रतिजग्राह मयः सत्कृत्य सत्कृतः॥ १४

६. मयोऽर्जुनं प्रतिवक्ति—

अहं हि विश्वकर्मा वा दानवानां महाकविः। सभापर्वणि १.५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विश्वकर्मा त्वष्टा वा स्थापत्यस्योन्नायकः प्रथम ऋषिर्देवो वा। स यमाय यमसभां वरुणाय च जले वरुणसभां कृतवान्।[1] पुष्पकविमानस्तस्यैव कृतिः।[2] अर्जुनस्य रथस्य मायामयो ध्वजस्तेन निर्मितः। शिवस्य त्रिपुरदाहाय रथं विश्वकर्माकरोत्। एतावता प्रतिभाति यत् देवर्षीणामपि-प्रियमासीत् स्थापत्यविज्ञानम्, शास्त्रे चास्मिन् कारुकर्म देवेभ्यः समर्पित-मासीत्। कारुरिति विश्वकर्मणोऽपरं नाम।

परवर्तियुगे प्रणीतो मानसार इति विख्यातः स्थापत्यशास्त्रस्यानुत्तमो ग्रन्थः पारम्परिकं शिष्यानुवृत्तं तद्विषयकं विज्ञानं सम्यक् प्रवर्तयति।

औद्योगिकविद्याः शिल्पानि च

वैदिकयुगे परा विद्याः, अपरा विद्याश्चाध्यापिता आसन्। अपरं च लौकिकी व्यावसायिकी च विद्याभवत्, यया कश्चिज्जनो मुख्यतो जीविको-पार्जनमकरोत्। एतस्याः स्वरूपमुपनिषत्सु नारदादिभिरधीतेषु विषयेषु प्राङ्निर्दिष्टम्। जातकसाहित्यानुसारेण वेदवेदाङ्गैः सहाष्टदशशिल्पानां शिक्षा विद्यार्थिभिर्गृहीता। एतेषु शिल्पेषु धनुर्वेदगीतवाद्यनृत्यचित्रादिकैः सह व्यावसायिकविद्याः समाविष्टा आसन्।[3]

नालन्दा–विश्वविद्यालये बौद्धदर्शनेन सह कृषिः, आयुर्वेदः, पशुविज्ञानं, कलाः, शिल्पानि चाध्यापितानि। एतेषां कृते पृथग्विभागाः कृताः। तद्यथा ह्वेनसाङ्गेन दृष्टम्—तत्र प्रथमं सिद्धिरस्तु' इति पाठचक्रमेण विद्यार्थिनः पठनस्य योग्यता विकसिता। सप्तवर्षीयः सन् छात्रः पञ्चविद्या अधीतवान्। प्रथमा शब्दविद्या तु व्याकरणस्य ज्ञानायाभवत्। तदनु द्वितीया विद्या शिल्प-स्थानमिति विख्याता।[4] एतेन शिल्पानि, यन्त्र-निर्माण-विधिः, ज्योतिषं

१. सभापर्वणि ८.१; ९.२

२. आरण्यक० १५८.३५

३. तक्षशिला-विश्वविद्यालये शिल्पानां शिक्षा सविशेषमुपकल्पिता। असात-मन्तजातकानुसारेण षोडशवर्षीया ब्रह्मचारिणो वेदान् शिल्पानि चाध्येतुं तक्षशिलां प्रतस्थिरे। लाभगरहजातकानुसारेण कतिपयविद्यार्थिनः षोडशवर्षीया एव वेदत्रयमष्टा-दशशिल्पानि च सम्यगशिक्षन्त। चुल्लधनुग्गहजातकानुसारेण केचिद् ब्राह्मण-छात्राः सर्वाणि शिल्पान्यधीत्य धनुर्वेदे विशेषज्ञतामवापुः।

४. शिल्पनिष्णाता बौद्धा भिक्षव आचार्याश्च भारतीयशिल्पकलानां प्रचारं विदेशेषु चक्रिरे। अद्यापि तेषु तेषु देशेषु भारतीय-चित्र-मूर्ति-वास्तूनां प्राचीनादर्शानुवृत्ताः कृतयो वर्तन्ते, येषां दर्शनेन भारतीयातीतगौरवं भारताद् बहिरपि प्रमाणीभूतं साक्षात्कर्तुं शक्यते। चीन-हिन्दचीन-तिब्बत-पूर्वद्वीपसमूह-जापान-मध्येशियादिषु भारतीयशिल्पानि अक्षुण्णं निर्वर्तितानि।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तिथिपत्रं च शिक्षितानि। आयुर्वेदस्तृतीया विद्या। तत्र शरीर-रक्षा, गुप्त-मन्त्राः शल्यचिकित्सा, ओषधीनां प्रज्ञानं चाधीतानि। चतुर्थी हेतुविद्या न्यायदर्शनं, तर्कशास्त्रं चासीत्, येन सत्यासत्यविवेकोऽभवत्। अन्तिमा पञ्चमी विद्याध्यात्मिकी बभूव, यया बौद्धजीवनदर्शनस्य रहस्यानि विवृतानि।

राजकुमाराणां शिक्षा केवलं तेषां सुसंस्कृतये नाभूदपितु ते लौकिकव्यवसायेष्वपि प्रशिक्षिता आसन्। ते मूर्त्तिरचनां, व्यजन-निर्माणं, माला-गुम्फनं, पाचनादिकं चाशिक्षन्त।[२] बाणानुसारेण सप्तमशताब्दे राजकुमाराः सङ्गीत-नाट्य-चित्रकर्म पत्रच्छेद्य-दारुकर्म-स्थापत्य-काव्यादिषु प्रशिक्षिता बभूवुः। ब्राह्मणकुमारा अपि वेद-वेदाङ्गैः सह शिल्पादिषु निष्णाताः बभूवुः। बाणस्य पूर्वजा यथा स वर्णयति—नृत्यगीतवादित्रादिषु अबाह्या आसन्। हर्षस्य भगिनी राज्यश्रीः नृत्यगीतादिषु प्रवीणा बभूव।

अर्थशास्त्रानुसारेण षोडशवर्षं यावद् राजकुमारस्त्रयीं वार्तां (कृषि-पशुपालन-वाणिज्य-विज्ञानं) दण्डनीतिं चाशिक्षत। पश्चात् दिवसस्य प्रथमभागे स हस्त्यश्वरथचर्यादिभिः सहास्त्रशस्त्रादिविज्ञानमधीते स्म। सोऽर्थशास्त्रं सविशेषमशिक्षत।[२]

प्रथमशताब्दे राजकुमारः खारवेलो लेख-रूप[३]गणना-व्यवहार-विध्यादीनां शिक्षया सर्वविद्यावदातोऽभवत्[४]। अस्मिन्नेव युगे यथा मिलिन्दप्रश्ने नागसेनः सूचयति—शकुनज्ञानं, स्वप्नविचारः, धूमकेतुना भविष्य-विचारः, उल्कापातविचारः, भूकम्पः, आकाशीय-भविष्य-सूचनाः, चन्द्रग्रहणं, सूर्यग्रहण-मङ्कगणितं, पशु-पक्षिविचरणेन निमित्तज्ञानमिन्द्रजालं, काव्यरचनेति विषया अध्यापिताः।

वैश्यानां वार्ताश्रितजीवनाय मनुरधोलिखितविषयाणां ज्ञानं निर्दिशति—

मणिमुक्ता प्रवालानां लोहानां तान्तवस्य च।
गन्धानां च रसानां च विद्यादर्घबलाबलम्॥
बीजानामुप्तिविच्च स्यात् क्षेत्रदोषगुणस्य च।
मानयोगं च जानीयात्तुलायोगांश्च सर्वशः॥

---

१. कुसजातकम्, महाउम्मग्गजातकम्।
कलिंगस्य राजकुमारा नौकायानमशिक्षन्त। Hunter: Orissa Vol I. p. 197

२. प्रतिज्ञायौगन्धरायणे २.१२

३. रूपम्—वास्तुकला (काष्ठफलके भित्तौ च मूर्तिरचना)

४. हाथीगुम्फा-शिलालेखे।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सारासारं च भाण्डानां देशानां च गुणागुणान् ।
लाभालाभं च पण्यानां पशूनां परिवर्धनम् ॥
भृत्यानां च भृतिं विद्याद् भाषाश्च विविधा नृणाम् ।
द्रव्याणां स्थानयोगांश्च क्रयविक्रयमेव च ॥ ९.३२९-३३२

हीनविद्याः

भवन्तु नाम हीनविद्यास्तथापि ताः सन्ति परम्परया लोकाभिलक्षिता यथोपनिषत्सु परिगणिताः सन्ति । दीघनिकाये तासां नामावली वर्ततेऽधोविधा-अङ्गविद्या, उत्पादविद्या, स्वप्नविद्या, लक्षण-विद्या, मूषिकविद्या, वास्तु-विद्या, क्षेत्रविद्या, शिवविद्या, भूतविद्या, सर्पविद्या, विषविद्या, पक्षिविद्या, मणिलक्षणं, वस्त्रलक्षणं, दण्डलक्षणमसिलक्षणम्, स्त्रीपुरुषलक्षणं, हस्ति-लक्षणं, चन्द्र-सूर्य-नक्षत्र-ग्रहणम्, भूकम्पज्ञानं ग्रहाणामुदयज्ञानं, वृष्टिज्ञानं, हस्तरेखा-विद्या, कवितापाठश्च ।[1] अन्यच्चासीद् गान्धारी-विद्या ययेन्द्रजालं निष्पादितम् ।

कलाः

चतुष्षष्टिः कलाः सुप्रसिद्धाः सन्ति । तासु सर्वाः पूर्वोक्ता वेदोपवेदात्मक-विद्याः समाविष्टाः । चतुष्षष्टिकला ललित-विस्तरे कामशास्त्रे, शुक्रनीति-सारे, प्रबन्धकोशे शिवतत्त्वरत्नाकरे च नामग्राहं सविशेषं वा निर्दिष्टाः सन्ति ।[2] तासु सुप्रसिद्धा, लोकाभिलक्षिताश्चाधः संगृहीताः —१. लिपि-मुद्रा-गणना-संख्या-सालम्भधनुर्वेदाः २. तरणम् ३. हस्तिग्रीवा-हस्त्यारोहणम् ४. रथः, रथचर्यादिकम् ५. अश्वपृष्ठम् अश्वारोहणम्, ६. छेद्यम् छिद्रकरणे-नाकृतिनिर्माणम् ७. तरणम् (नौयानम्) ८. शब्दवेधित्वम् ९. द्यूतम् १०. रूपम्, रूपकर्म (चित्र-मूर्ति-वास्तुनिर्माणम्) ११. गीत-वाद्य-नृत्यम् १२. आख्यानम् १३. हास्यम् १४. नाट्यम् १५. विडम्बितम् व्यंग्येनानुकृतिः १६. माला-गुम्फनम् १७. संवाहनम् १८. वस्त्रागः १९. मायाकृतम् (इन्द्रजालम्) २०. स्वप्नाध्यायः २१. शकुनिरुतम् २२. स्त्री-पुरुषाश्वहस्ति-गोऽजादीनां लक्षणम् २३. क्रियाकल्पः (काव्यमलंकारश्च) २४. वैशिकम् (वेश्योपचारः) २५. अर्थविद्या (अर्थशास्त्रम्) २६. बार्हस्पत्यम् (आचार-शास्त्रम्) २७. आसुरम् (आसुरी मायात्मकविद्या) २८. मृगपक्षिरुतम्

---

१. दीघनिकाये १.१

२. ललितविस्तरे ८६, कामसूत्रे ६४, शुक्रनीतिसारे ६४, प्रबन्धकोषे च, ७२ शिवतत्त्वरत्नाकरे ६४। भागवतस्य श्रीधरीटीकायां १०.४५ अधिकृत्यापरविधाः कला अपि गणिताः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

२९. जतुयन्त्रम् २९. मधूच्छिष्टकृतम् ३०. सूचीकर्म ३१. पत्रच्छेद्यम् ३२. गन्धयुक्तिः (कस्यापि वस्तुनः सुगन्धियोगः) ३३. पुष्पास्तरणम् ३४. दशन-वसनाङ्गरागः ३५. शयनरचनम् ३६. उदकवाद्यम् ३७. उदकघातः ३८. नेपथ्यप्रयोगः ३९. हस्तलाघवम् ४०. पाकविज्ञानम् ४१. पानकासवादियोजनम् ४२. सूत्रक्रीडा (सूत्रेणाकृतिकरणम्) ४३. काव्यसमस्यापूरणम् ४४. पट्टिकादिविकल्पाः ४५. तक्षककर्माणि ४६. तक्षणम् ४७. वास्तुविद्या ४८. रूप्यरत्नरीक्षा ४९. धातुवादः ५० वृक्षायुर्वेदयोगः ५१. मेषकुक्कुटादियुद्धविधिः ५२. शुकसारिकाप्रलापनम् ५३. केशमर्दनकौशलम् ५४. अक्षरमुष्टिकाकथनम् ५५. देशभाषाविज्ञानम् ५६. पुष्पशकटिका ५७. यन्त्रमातृका ५८. मानसी कला ५९. वृक्षादिप्रसारोपपालनादिकृतिः ६०. काचपात्रादिकरणम् ६१. खेचरीकला ६२. चौरकर्म ६३. अदृश्यकरणी ६४. वाक्सिद्धिश्च ।

एतेषामपरेषां च श्लोकबद्धा सूची अधोविधं वर्तते—

अथेतिहासागमौ च काव्यालंकारनाटकम् ।
गायकत्वं कवित्वं च कामशास्त्रं दुरोदरम् ॥
देशभाषालिपिज्ञानं लिप्तिकर्म च वाचनम् ।
सर्वाणि चापदानानि सर्पशास्त्रं तु शाकुनम् ॥
सामुद्रिकं रत्नशास्त्रं रथाश्वगति-कौशलम् ।
मल्लशास्त्रं सूदकर्म भूरुहाणां च दोहदम् ॥
गन्धवादो धातुवादः खन्यावादो रसस्य च ।
जालवादोऽग्निसंस्तम्भः खड्गस्तम्भो जलस्य च ॥
वाचःस्तम्भो वयःस्तम्भो वश्याकर्षणमोहनम् ।
विद्वेषोच्चाटनं च मारणं कालवञ्चनम् ।
पयसि प्लवचातुर्यं पादुका निधिरेव च ॥
वाक्सिद्धिर्गुलिकासिद्धिरैन्द्रजालकमेव च ।
अञ्जनं परदृष्टेस्तु वञ्चनं स्वरवञ्चनम् ॥
मणिमन्त्रौषधानां च सिद्धयश्चौरकर्म च ।
चित्रलोहाश्ममृद्दारुवेणुचर्माम्बरक्रियाः ॥
अदृश्यकरणी दूतिकरणी मृगया-रतिः ।
वाणिज्यं पाशुपाल्यं च कृषिरासवकर्म च ॥
लावकुक्कुटमेषादि-युद्धकारणकौशलम् ।
चतुष्षष्टिकलाश्चैताः कलाविद्भिः प्रकीर्तिताः ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

केलदिश्रीवसवराजेन्द्रविरचिते शिवतत्त्वरत्नाकरे इमा एव विद्या परिगणिताः । संकल्पसूर्योदयस्य प्रभाविलासटीकाया ५.१ अधिकृत्य चेमा दृश्यन्ते । एताभिः कलाभिर्ज्ञानविज्ञानानि, औद्योगिकव्यवसायाः, भोगविलासाः, मनोरञ्जनानि, बौद्धिकोहापोहाः, रसात्मकसर्जनाः, यन्त्रमन्त्रोपलब्धयश्चातिशयमनोयोगेन विस्तारितानि । फलतः सर्वेषु पुरुषार्थेषु विपुलवैविध्यमतिशयोत्कर्षश्चानुमातुं शक्येते ।

कामसूत्रस्य टीकाकारो यशोधरो द्विविधा कला विभजति—कामशास्त्राङ्गभूता तन्त्रावापौपयिकी च । एतयोर्द्वयोः प्रत्येकं ६४ भेदाः सन्ति । कतिपयभेदा उभयनिष्ठाः सन्ति । तत्र कामशास्त्राङ्गभूतासु ६४ कलासु २४ कर्माश्रयाः २० द्यूताश्रयाः, १६ शयनोपचारिकाः, ४ उत्तरकलाश्च सन्ति । एतासां पुनर्भेदोपभेदा जनिताः । तेषां संख्या तु ५३८ वर्तते ।

रामायणानुसारेण-कृतविद्यस्य रामस्य विद्याविशेषा अधोविधाः सन्ति—सर्वविद्याव्रत-स्नातः, साङ्गवेदवित्, धनुर्वेद-विनिष्पन्नः, धर्मकामार्थतत्त्वज्ञः, लौकिके समयाचारे कृतकल्पो विशारदः, शास्त्रज्ञः, आयकर्मण्युपायज्ञः, सन्दृष्टव्ययकर्मवित्, अस्त्रप्रयोगनिष्णातः, व्यामिश्रकेषु दक्षः, विहारोचितशिल्पानां पटिष्ठः, वारणवाजिनां संयमनधृक्, धनुर्वेदविदां श्रेष्ठः, सेनानयविशारदश्च ।[1]

शिक्षण-संस्थाः

ऋषिकुलम्

प्राचीनतमशिक्षण-संस्था वैदिकयुगीया ऋषीणां वसतय ग्रामेषु आसन् ।[2] ग्रामान् परितो रम्याणि वनानि उच्छ्रयन्तेस्म । तत्राध्यापनं ब्राह्मणानां गृहे यज्ञरूपेण प्राचरत् ।[3] ऋषयस्तत्र स्वपुत्रकान् प्रतिवेशिनां शिशुभिः सहाध्यापितवन्तः । इयमाचार्य-वसतिः कल्पितुं शक्यते । आचार्या ऋषयो

१. अयोध्याकाण्डे १.२०-२९ । व्यामिश्रकं नैकभाषाभी रचिता ग्रन्थाः ।

२. तद्यथा आपस्तम्बे—समानग्रामे च वसतामन्येषामपि वृद्धतराणामभिवादमभिवादयीत । —आ० ध० सू० १.२.५.१ २–१३

३. अध्यापनं ब्रह्मोयज्ञः । मनु ३.७० । छन्दोग्यानुसारेण आचार्यकुलाद् वेदमधीत्य । ८.१५.१ । सत्यकामः प्राप्याचार्यकुलम् । ४.९.१ । ब्रह्मचारी आचार्यकुलवासी २.२३.१ । आरुणिः कथयति–काप्यस्य गृहेषु यज्ञमधीयाना अवसाम । बृहदारण्यके ३.७.१ । बाणभट्टो गुरुगृहाणि अधितिष्ठन् स्वकुलोचितां वैदुषीं प्रकृतिं प्रापत् । हर्षचरितस्य प्रथमोच्छ्वासे ।

इयं गुरुकुलशिक्षाप्रणाली आदिकालतोऽद्यावधि भारतीयसंस्कृत्यनुरूपं संजीवति ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

गोधना आसन्। ते गवार्थम्—

'उर्वीं गव्यूतिं महि शर्म सप्रथः।' ऋ० ९.८५. इति शाद्वलां दीर्घायामां वनभूमिमपेक्षन्ते स्म। पवित्रोऽयं भूभागो बभूव। तत्र ऋषयो वसन्ति स्म। यथा छन्दोग्योपनिषदि वर्णितम्—'कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो धार्मिकान् विदधन्' इत्यादि। अरण्यायनमित्याचक्षते ब्रह्मचर्यमेव।[1] अन्यच्च नदीतटः, संगमः, पर्वताधित्यकाश्च प्रतिभायाः प्रभवायालमिति ऋषीणामनुभवेन सम्मतम्।[2]

कतिपय आचार्याः शिष्यैः सह नैकदेशेषु परिचरन्तः स्वज्ञानं वितरन्ति स्म। ते चरणशीलाश्चरका इति विख्याता आसन्।[3] याज्ञवल्क्यो बृहदारण्यकानुसारेण चरन् वै शिक्षयति स्म।

ब्रह्मोद्य इति विख्याता संस्था सर्वोच्चमनीषिणां परस्परं शास्त्रार्थेन श्रोतृणामाध्यात्मिकज्ञानविज्ञान-विकासायोपनिषद्युगे प्रसिद्धासीत्।[4] तत्र विद्याप्राप्त्युपायः सन्निहित आसीत्।[5] बृहदारण्यकानुसारेण 'तत्र ह कुरुपञ्चालानां ब्राह्मणा अभिसमेता बभूवुः। कः स्विदेषां ब्राह्मणानामनूचानतम इति जनकस्य जिज्ञासायाः शमनार्थं ब्रह्मोद्यं प्राचरत्।[6] तत्रैकैकशः सभासदः

---

१. छा० उ० ८.१५.१; ८.५.३

२. उपह्वरे गिरीणां संगमे च नदीनाम्।
धिया विप्रो अजायत॥ ऋग्वेदे ८.६.२८

३. ईदृशानां गुरुशिष्याणां वर्णनं महाभारते—
अनुगम्यमानः शुशुभे शिष्यैरिव गुरुः प्रियैः। सभापर्व २.१७

A few notices show the real educators of thought. Wandering scholars went through the country and engaged in disputes and discussions in which (sometimes) a prize was staked by the disputants. बृहदारण्यके ३. ३. १; शतपथे १ १. ४. ११. Vide Vedic ndex Vol. II p. 87

४. तथा हि जनकेनायोजिते ब्रह्मोद्ये—
अथ ह वाचक्नव्युवाच—ब्राह्मणा भगवन्तो हन्ताहमिमं द्वौ प्रश्नौ प्रक्ष्यामि। तौ चेन्नो वक्ष्यति न जातु युष्माकमिमं कश्चिद् ब्रह्मोद्यं जेतेति।

५. शाङ्करभाष्ये तद्विषयकं विवरणं विद्यतेऽधोविधम्—अपि च तद्विद्यसंयोगस्तैश्च सहवादकरणं विद्या प्राप्त्युपायो न्यायविद्यायां दृष्टः। तच्चास्मिन्नध्याये प्राबल्येन प्रदर्श्यते। प्रत्यक्षा च विद्वत्संयोगे प्रज्ञावृद्धिः। बृहदारण्यके ३.१ भूमिका

६. बृहदारण्यके ३.१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पण्डिता याज्ञवल्क्यं प्रश्नानपृच्छन् । याज्ञवल्क्यः स्वोत्तरेण तान् परितोषयामास । अन्ते च याज्ञवल्क्य उवाच—ब्राह्मणा भगवन्तो यो वः कामयते स मा पृच्छतु । सर्वे वा मा पृच्छत । यो वः कामयते तं वः पृच्छामि । सर्वान् वा वः पृच्छामीति ।[1]

आश्रमः

वसिष्ठस्याश्रम आसीत्—

ब्रह्मलोकमिवापरं नानापुष्पलताद्रुमम् ।
नानामृगगणाकीर्णं सिद्धचारणसेवितम् ॥
प्रशान्तहरिणाकीर्णं द्विजसङ्घनिषेवितम् । अयो० ५१ सर्गतः

अगस्त्यस्याश्रमो दक्षिणभारतेऽशोभत । तत्रत्याश्रममण्डलेषु रामो दश संवत्सरान् रममाणो न्यवसत् ।[2] पश्चात् सोऽगस्त्यभ्रातुः सुतीक्ष्णस्याश्रमं गतवान्, यत्र

स्थलीप्रायवनोद्देशे पिप्पलीवनशोभिते ।
बहुपुष्पफले रम्ये नानाविहगनादिते ॥ ३८
पद्मिन्यो विविधास्तत्र प्रसन्नसलिलाशयाः ।
हंसकारण्डवाकीर्णाश्चक्रवाकोपशोभिताः ॥ ३९

अगस्त्यस्याश्रमः परिश्रान्तानां कृते श्रमापहो बभूव । तस्य विशेषाः सन्ति—प्रशान्तहरिणाकीर्णः, प्राज्यधूमाकुलवनः, प्रशान्तमृगयूथः, नानाशकुनिनादितः, विनीतमृगसेवितश्च । तत्र ब्रह्मणः, अग्नेः, विष्णोः, महेन्द्रस्य, विवस्वतः, सोमस्य, भगस्य, कुबेरस्य, धातुः, विधातुः, वायोः, वरुणस्य, गायत्र्याः, वसूनाम्, नागराजस्य, गरुडस्य, कार्तिकेयस्य च स्थानानि पृथक् पृथगवस्थितानि बभूवुः ।[3] अगस्त्यस्य शिष्याः परिवार-सदस्या इव विचेरुः ।[4]

रामायणे वाल्मीकेराश्रमस्योत्तरकाण्डे माहात्म्यं वर्णितम् । अयमाश्रमः तमसातीरमाश्रितो दिव्यसंकाश उपप्रयागमासीत् ।

महाभारतानुसारेण वेद इति प्रख्यात आचार्यः शिष्यत्रयं स्वगृह अध्यापयत् स (वेद) उपाध्यायेनानुज्ञातः समावृत्तस्तस्माद् गुरुकुलावासात् गृहाश्रमं प्रत्यपद्यत । तस्यापि स्वगृहे वसतस्त्रयः शिष्या बभूवुः । तस्मिन् युग उपाध्या-

१. बृहदारण्यके ३.९.२७
२. अरण्यकाण्डे एकादशे सर्गे ।
३. अरण्यकाण्डे १२.२; १७. २१
४. तत्रैव १२. २१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यस्य धौम्यस्यावाससन्निधौ शस्यमालिनी भूमिर्व्यराजत गोचरप्रदेशश्च शुशुभे ।[1]

महाभारते अनुमालिनीतीरं कण्वाश्रमस्य नैसर्गिकरमणीयता विस्तरेण वर्णिता । तद्यथा—

तच्चाप्यतीत्य नृपतिरुत्तमाश्रमसंयुतम् ।
मनःप्रह्लादजननं दृष्टिकान्तमतीव च
शीतमारुतसंयुक्तं जगामान्यन्महद् वनम् ॥ ३
पुष्पितैः पादपैः कीर्णमतीव सुखशाद्वलम् ।
विपुलं मधुरारावैर्नादितं विहगैस्तथा ॥ ४
प्रवृद्धविटपैर्वृक्षैः सुखच्छायैः समावृतम् ।
षट्पदाघूर्णितलतं लक्ष्म्या परमया युतम् ॥ ५
दिवस्पृशोऽथ संघुष्टाः पक्षिभिर्मधुरस्वरैः ।
रुवन्ति रावं विहगाः षट्पदैः सहिता मृदु ॥ १०
सुखशीतः सुगन्धी च पुष्परेणुवहोऽनिलः ।
परिक्रामन् वने वृक्षानुपैतीव रिरंसया ॥ १३
नानावृक्षसमाकीर्णं संप्रज्वलितपावकम् ।
यतिभिर्वालखिल्यैश्च वृतं मुनिगणान्वितम् ॥ १६
नदीमाश्रमसंश्लिष्टां पुण्यतोयां ददर्श सः ।
सर्वप्राणभृतां तत्र जननीमिव विष्टिताम्[2] ॥ २०

व्यासस्याश्रमो हिमालयेऽवस्थित आसीत् ।[3]

विविक्ते पर्वततटे पाराशर्यो महातपाः ।
वेदानध्यापयामास व्यासः शिष्यान् महातपाः ॥ शान्ति० ३१४.२३

वसिष्ठस्याश्रम उपमेरुगिरि आसीत् ।[4] महर्षेर्भरद्वाजस्याश्रमो गङ्गाद्वारे हरद्वार आसीत् । तत्रवेदवेदाङ्गैः सहास्त्रशस्त्रादीनि शिक्षितानि । तत्रैव द्रोणोऽशिक्षत धनुर्वेदम् ।[5] परशुरामस्याश्रमो महेन्द्रपर्वतेऽवस्थितः । तत्र प्रयोग-रहस्योपसंहारविधिभिः सहास्त्रशस्त्रादीनि प्रशिक्षितानि ।[6] शौनक-

---

१. महाभारत आदिपर्वणि तृतीयेऽध्याये आचार्यस्य शिष्याः कृषिकर्मणि तस्य साह्यमकुर्वन्, तस्य गाश्चारयन्ति स्म चेति वर्णितम् ।

२. महाभारत आदिपर्वणि चतुष्षष्टितमेऽध्याये ।

३. शान्ति० ३१४, ३१५ अध्याययोः ।

४. आ० ९३.६–११

५. आदिप० १२१.५–७

६. आदिप० १२१.२१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्याश्रमो गोमतीतटे नैमिषारण्य आसीत् । स कुलपतिर्बभूव ।[1]

प्रयागे भरद्वाजस्याश्रमो भरतमप्यरमयत् । तथाहि —

स ब्राह्मणस्याश्रममभ्युपेत्य महात्मनो देवपुरोहितस्य ।
ददर्श रम्योटजवृक्षदेशं महद्वनं विप्रवरस्य रम्यम् ॥

अयो० ८९.२३

तक्षशिला-विश्वविद्यालयः

तक्षशिलाविश्वविद्यालयो महाभारतकालतः सुप्रसिद्ध आसीत् । तक्षशिला-नगरं राजधानी बभूव ।[2] तत्र विद्यार्थिनः काशी-राजगृह-पञ्चाल-मिथिलोज्जयिनीतः समागताः ।[3] गौतमबुद्धस्य चिकित्सको जीवकस्तक्षशिलायामध्येतुं पाटलिपुत्राद् गतवानासीत् । तत्र विश्वविद्यालयस्य ध्वंसावशेषास्तस्य प्राक्तनगौरवगाथां दर्शयन्ति । विश्वविद्यालयस्य नैसर्गिकदृश्यं रमणीयमासीत् । समीपमेव तस्य नदीप्रवाहोऽशोभत । विद्यालय-भवनानि पर्वताधित्यकासु निर्मितानि बभूवुः ।

यथा जातकसाहित्यं निदर्शयति, तस्मिन्युगे नगरमध्येऽवस्थितेषु विद्यालयेषु शिक्षा सम्यङ् नाभवत् । वनमध्य एवाध्ययनाध्यापनयोः सौकर्यं सम्मतमासीत् । अरण्येषु मार्गतो नातिदूरं विद्यालयाः स्थापिता आसन् । शिष्याः स्वयमेव स्वस्य कृते पर्णशालां निर्मितवन्तः । तत्र तेषां सम्बन्धिनो भोज्यपदार्थान् प्रहितवन्तः । जनपदवासिन आचार्यप्रसिद्धिसमुपजातादरा भोज्यानि उपाहरन् । कान्तारपथयात्रिणोऽपि दानरूपेण सामग्रीमयच्छन् । केचिज्जानपदाः संस्थाया कृते गाः समर्पयन् ।[4]

शतशो नैष्ठिकब्रह्मचारिणो वेदेषु शिल्पेषु च निष्णाता ऋषिप्रव्रज्यां गृहीत्वा हिमालयप्रदेशे आचार्यवसतिं कृतवन्तः । तत्र शिष्या अवसन् । शिष्याणां संख्या पञ्चशतं यावद् बभूव । तेषां सङ्घेनार्चायाः पद्भ्यां देशभ्रमणं कुर्वन्ति स्म । यदा कदा ते काशीं यावत् पर्यटन्ति स्म ।[5] उत्खननेन तक्षशिलाया येऽवशेषा लब्धा तेषां शिलालेखादयः संग्रहालये सुरक्षिताः सन्ति ।

---

१. आदिप० ४.१

२. पंचगरुकजातकं

३. तिलमुट्ठिजातकं, पीठजातकं, दरीमुखजातकं, ब्रह्मदत्तजातकं च ।

४. तित्तिरजातक ४३८

५. केसवजातकानुसारेण काशिकः कल्पकुमारस्तक्षशिलायां शिक्षितः, प्रव्रजितः सन् हिमालयस्थस्य केशवस्य शिष्यो बभूव । केशवस्य शिष्याः पञ्चशतमासन् । फाह्यानस्तत्र पञ्चशतछात्राणां शिल्पाध्ययनरस्य चर्चां करोति । पृ० ७८-७९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तक्षशिलायाः स्नातकाः पर्यटन्तः सर्वेषां मतानां विद्या देश-व्यवहारांश्च शिक्षितुं ग्रामेषु नगरेषु च बहु परिगृहीतवन्तः ।[1]

काशीनगरी जातकयुगे विद्योपासनाभिर्विश्रुतासीत् । सौराष्ट्रतोऽपि छात्रा वेदादीनध्येतुं तत्र समागताः ।[2]

आचार्यकुलम्

पाणिनेर्जन्मभूमिः शालातुरी व्याकरणाचार्याणामध्ययनाध्यापनैः प्रसिद्धासीत् । यथा ह्वेनसांगः स्वदृष्टं वर्णयति—नगरेऽस्मिन् व्याकरणमनीषिता तत्र परम्परया प्रचरिता । तत्रत्या वैयाकरणा विश्वविश्रुता आसन् ।[3] ह्वेनसांगो वर्णयति--The children of this town, who are his disciples revere his eminent qualities and a statue erected to his memory still exists.[4]

यथा कनिङ्घममहोदयेनान्विष्टम्—यत्र पुरा शालतुरी स्थिता तत्रेदानीं लहुर इति ग्रामो वर्तते ।[5]

देवायतनम्

परवर्तियुगे महर्षीणामाचार्याणां चाश्रम-परिसरे तत्रत्ययाज्ञिकदेवानां कृते देवायतनानि मन्दिराणि वा निर्मितानि । वस्तुतस्त आश्रमास्तीर्थानीति विख्यातानि बभूवुः ।[6] आश्रमास्तु तीर्थानां पर्याया बभूवुः ।[7] एतेषु तीर्थेषु मन्दिरनिर्माणमतीव पुण्यावहं सम्मतम् । तद्यथाग्निपुराणे—

तीर्थे चायतने पुण्ये सिद्धक्षेत्रे तथाश्रमे ।
कर्तुरायतनं विष्णोर्यथोक्तात् त्रिगुणं फलम् ॥ ३८.१५

मन्दिरेषु न केवलं देवानामपि तु तत्र वासिनामाचार्याणां तेषां शिष्याणां

---

१. दरीमुखजातक ३७८

२. नंगलीसजातकं, कोसियजातकं ।

३. वाटर्स—ह्वेनसांग—प्रथमे भागे, पृ० २२३

४. Siyu ki 1.116

५. अयं ग्राम 'ओहिन्द' नगरात् क्रोशद्वयमुत्तरपश्चिमदिशि स्थितः, यत्र सिन्धुकाबुलयोः सङ्गमकोणो वर्तते । लहुरग्रामो मर्दान-ओहिन्दराजमार्गे स्थितः ।

६. सद्भिः समाश्रितो भूमिभागस्तीर्थतयोच्यते । स्कन्दपुराणे माहेश्वरकुमारिका-खण्डे ११.११

यदध्यासितमर्हद्भिस्तद्धि तीर्थं प्रचक्षते । कुमारसम्भवे ६.५६

'तीर्थं शस्त्राध्वरक्षेत्रोपायोपाध्यायमन्त्रिषु' इति विश्वः । तीर्थं सर्वविद्यावतारणाम् । कादम्बरी

७. महा० वनपर्व ८७.२, १९, २०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

च संस्थानमभवत्। अनेन प्रकारेण पुरा यानि तपोवनानि बभूवुस्तानि देव-मन्दिराणि विद्यालयरूपाणि विकसितानि। ह्वेनसांगस्तादृशानि सप्तम-शताब्दिकानि मन्दिराणि वर्णयति—

Besides the capital and close to the Ganges was the L-Lan-na mountain, the dark mists of which eclipsed sun and moon. On this an endless succession of Ṛṣis had always lodged and their teachings were still preserved in the Deva-temples.[1]

ब्रह्मदेयग्रामः

अपरविधाः शिक्षण-संस्था ब्रह्मदेयभूभागेषु अवस्थिता ग्रामा आसन्। तत्राचार्याणां शिष्याणां च कृते भोजनावासव्यवस्था समीचीनाभवत्। मगधप्रदेशे खाणमुतनामके ब्रह्मदेये ग्रामे कुटदन्ताचार्यः ३०० माणवकानध्या-पयामास। तत्र वेदविद्याशिष्या नानादेशेभ्यः समागताः। कोसलदेशे मनसाकट इति ब्राह्मणग्रामे पोक्खरसातिस्तारुक्षश्च माणवकानशिक्षयताम्।[2] यथा भाष्यकारः पतञ्जलिः सूचयति—ग्रामे ग्रामे काठकं कालापकं च प्रोच्यते।[3]

चरकः

बहवश्छात्राः परिव्रजितानामाचार्याणां सङ्गता इतस्ततः परिभ्रमन्तः शिक्षन्ते स्म। ते चरका इति ख्याताः। तत्र वैशम्पायनस्य ईदृशश्चरकः प्रख्यातः। तस्य शिष्याश्चरकाः परिभ्रमन्तो प्रतिदेशं वैविध्येन वैचित्र्येण च सह तत्रत्यज्ञान-विज्ञान-पारावारे निमज्जन्ति स्म।[4] छात्राणां वसतये मठाः प्रथमशताब्दीतः पारम्पर्यं भजन्ते।[5]

---

१. वाटर्स-ह्वेनसांग भाग १ पृ० २७२

२. दीघनिकाये १. ३. ४. ५

३. महाभाष्ये ४.३.१०१

४. The peripatetic scholar was called Caraka as distinct from the Māṇava and Antevāsin who were attached to their schools. Vaiśampāyana was called a Caraka obviously on the basis of his literary activities from place to place. His pupils following his footsteps were also known as Carakas. V. S. Agrawala : India As Known To Pāṇini P. 305.

५. बुद्धचरिते आश्रमवासिनां कृते मठस्योल्लेखोऽधोविधं वर्तते—
तपःप्रधानाः कृतबुद्धयोऽपि तं द्रष्टुमीयुर्न मठानभीयुः ७.४। महाभारते च शान्ति० १३९.२९।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रथमशताब्दे वैदिकशिक्षणपद्धतौ देवालयानां मठानां च स्थानं महत्त्वपूर्णं प्रतिभाति। तत्कालीनाश्रमस्य वर्णनमश्वघोषेण कृतमधोविधम्—

अभ्युद्धृतप्रज्वलनाग्निहोत्रं कृताभिषेकर्षिजनावकीर्णम्।
जाप्यस्वनाकूजितदेवकोष्ठं[1] धर्मस्य कर्मान्तमिव प्रवृत्तम् ॥ बु०च० ७.३३

सप्तमशताब्दे क्वचिद्राजकीयविद्यालया अपि बभूवुः। असमप्रदेशे कामरूपे भास्करवर्मणा राज्ञा महाविद्यालयः स्थापितो यत्र काशीकलिङ्गोज्जयिनीतः समागत्य विद्यार्थिनः पठन्ति स्म। कामरूपे राजा प्रजाश्च विद्याव्यसनिन आसन्।[2]

ह्वेनसांगो विविधनगरेषु विद्यालयरूपाणि देवमन्दिराणि वर्णयति। कुडचप्रदेशे शतप्रायेषु देवमन्दिरेषु विद्यार्थिनां दश सहस्रं शिक्षामलभत। ह्वेनसाङ्गस्य प्रयागागमनकाले प्रयागे नैकशतानि मन्दिराणि विहारद्वयं चासन्। काश्यां नैकतलमन्दिराणां विंशतिरासीत्। जालन्धरनगरे देवमन्दिरत्रये पञ्चशतप्राया पाशुपताः पठन्ति स्म। स्थाण्वीश्वरे शतप्रायाणि मन्दिराणि विद्यालयरूपाणि आसन्। स्रुघ्ने पञ्चाशन्मन्दिराणि, अहिच्छत्रायां च नवमन्दिराणि आसन्। अस्मिन् युगे मठेषु विद्याध्यापनं सम्यक् प्राचरत्। सुबन्धुरालोचयति—'प्रबुद्धाध्ययनकर्मठेषु मठेषु' इति।[3]

गुप्तयुगीयाः शिक्षणसंस्थाः काव्यसाहित्ये वर्णिताः सन्ति। वसिष्ठस्य शिष्याणां वसती रघुवंशे वर्णिता। आश्रमोऽयमुपवन-नीवारधान्याग्निहोत्रवेदघोषैर्लक्षित आसीत्। आश्रमेषु छात्रा वृक्षान् रोपयन्ति स्म। फाह्यानानुसारेण पाटलिपुत्रस्य विहारद्वये उपसप्तशतं छात्रा अधीतवन्तः[4]।

हर्षकालिकः सप्तमशताब्दस्य महाकविर्बाणः काव्यमाधुरी-सरस्वतीसिक्त-परिचयं कादम्बर्यां ब्राह्मणगृहकुलमधोविधं वर्णयति—

विवृण्वतो यस्य विसारि वाङ्मयं
दिने दिने शिष्यगणा नवा नवाः।
उषःसु लग्नाः श्रवणेऽधिकां श्रियं
प्रचक्रिरे चन्दनपल्लवा इव ॥ कथामुखे १४

गुरुकुलम्

स कविः स्वोदाहरणेन विद्यानां सार्वभौमविलासान् प्रतिफलयितुं कांचिद-

---

१. देवकोष्ठं तु मन्दिरम्।

२. वाटर्स—ह्वेनसांग द्वितीये भागे पृ० १८६

३. मठश्छात्रादिनिलयः। अमरकोषे २. २. ८

४. Fa-Hien p. 78-79

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नन्यसामान्यामेव ज्ञान-विज्ञान-सरणिं विद्योतयति । यथा—अथ शनैः शनैरत्युदारव्यवहृतिमनोहृन्ति बृहन्ति राजकुलानि वीक्षमाणः, निरवद्यविद्याविद्योतितानि च गुरुकुलानि सेवमानः, महार्हालापगम्भीरगुणवद्गोष्ठीश्चोपतिष्ठमानः, स्वभावगम्भीरधीधनानि विदग्धमण्डलानि च गाहमानः पुनरपि तामेव वैपश्चितीमात्मवंशोचितां प्रकृतिमभजत् ।[1]

अपरत्र बाणो वर्णयति स्वग्रामस्य गुरुकुलानि अधोविधम्—

अनवरताध्ययन-ध्वनि-मुखराणि, भस्मपुण्ड्रकपाण्डुललाटैः कपिलशिखाजालजटिलैः, कृशानुभिः इव क्रतुलोभागतैर्वटुभिरध्यास्यमानानि, सेकसुकुमारसोमकेदारिका-हरितायमानप्रघणानि कृष्णाजिनविकीर्णशिष्यत्पुरोडाशीयश्यामाकतण्डुलानि बालिकाविकीर्यमाणनीवारबलीनि, शुचिशिष्यशतानीयमानहरिकुशपूलीपलाशसमिन्धि, इन्धनगोमयपिण्डकूटसंकटानि, आमिक्षीयक्षीरक्षारिणीनामग्निहोत्रधेनूनां खुरवलयैः विलिखिताजिरवितर्दिकानि, कामण्डलव्यमृत्पिण्डमर्दनव्यग्रयतिजनानि वैतानवेदिशङ्कव्यानामौदुम्बरीणां शाखानां राशिभिः पवित्रितपर्यन्तानि वैश्वदेवपिण्डपङ्क्ति-पाण्डुरितप्रदेशानि हविर्धूमधूसरिताङ्गनविटपकिसलयानि वत्सीय-बालकलालितललत्तरलतर्णकानि, क्रीडत्कृष्णसारच्छागशावकानि, शुकशारिकारब्धाध्ययनदीयमानोपाध्यायविश्रान्तिसुखानि, साक्षात् त्रयीतपोवनानीव बान्धवानां भवनानि' इत्यादि ।[2]

बौद्धशासनरतानामाचार्याणां शिष्याः क्वचिदन्यधर्मावलम्बिभिः सह समाचारवृत्तिका एव शिक्षन्तेस्म । बाणभट्टानुसारेण विन्ध्याटव्यां कश्चिद् बौद्धाचार्यो दिवाकरमित्रो विविधसम्प्रदायानुगतिकान्--भागवतान्, काणादान्, कापिलान्, जैनान्, लोकायतिकान्, पौराणिकानपि शिक्षयति स्म ।[3] बाणस्तेषां जीवनविधिं निदर्शयति अधोविधविशेषणैः--तरूणां मध्ये नानादेशीयैः स्थानस्थानेषु स्थाणूनाश्रितैः शिलातलेषूपविष्टैः, लताभवनान्यध्यव सद्भिः, अरण्यानीनिकुञ्जेषु निलीनैः विटपच्छायासु निषण्णैः तरुमूलानि निषेवमाणैः, वीतरागैः' इत्यादि ।

सप्तमशताब्दस्याश्रमस्य स्वरूपं महाराजहर्षप्रणीते नाटके नागानन्देऽपि परिचीयते । तत्र मलयपर्वते कश्चिदाश्रमः प्रकल्पितः कविना । तस्य पारिसरे सरसवनस्निग्धचन्दनवनोत्सङ्गपरिमिलनमग्नबहुलपरिमल-सरसानि

१. हर्षचरितस्य प्रथमोच्छ्वासे ।
२. हर्षचरितस्य द्वितीयोच्छ्वासे ।
३. हर्षचरितस्याष्टमोच्छ्वासे ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

निर्झरोच्छलितशिशिरसीकरासारवाही मार्गपरिश्रममपनयन् रोमाञ्चयति मलयमारुतः ।

एतत् खलु सविशेषघनस्निग्धपादपविशोभितसुरभिहविर्गन्धगर्भितोद्दाम-धूमनिर्गममनुद्विग्नसुखनिषण्णश्वापदगणं तपोवनमिव लक्ष्यते ।

वासोऽर्थं दययेव नातिपृथवः कृत्तास्तरूणां त्वचो
भग्नालक्ष्यजरत्कमण्डलु नभःस्वच्छं पयो नैर्झरम् ।
दृश्यन्ते त्रटितोज्झिताश्च वटुभिर्मौञ्ज्यः क्वचिन्मेखला
नित्याकर्णनया शुकेन च पदं साम्नामिदं पठ्यते ॥ १.११

मुदितमुनिजनविचार्यमाणसन्दिग्धवेदवाक्यविस्तरस्य पठद्वटुच्छिद्यमानार्द्रार्द्रसमिधस्तापसकुमारिकापूर्यमाणबालवृक्षकालवालस्य प्रशान्तरमणीयता तपोवनस्य । इह हि –

मधुरमिव वदन्ति स्वागतं भृङ्गशब्दै-
र्नतिमिव फलनम्रैः कुर्वतेऽमी शिरोभिः ।
मम ददत इवार्घ्यं पुष्पवृष्टीः किरन्तः
कथमतिथिसपर्यां शिक्षिता शाखिनोऽपि ॥ नागा० १.१२

तत्र सन्निकटमेवासीद् गौरीदेवतायतनम् ।[1]

गुप्तयुगस्य विद्यालयरूपाणि मन्दिराणि तिगवा-भूमरा-नचनाकूथर-देवगढ-खोह-दहपर्वतिया-भीतरगाँवादिषु अद्यापि सुरक्षितानि वर्तन्ते ।[2] एतस्मिन् युगे परवर्तिकाले च पर्वतगर्भेषु गुहामन्दिराणि निर्मितानि । गुप्तयुगे विदिशासमीपं शेषशायिविष्णोर्मन्दिरं वराह-द्रंष्ट्राधृतपृथ्वीमन्दिरं च पूर्वोक्तं प्रयोजनं समपूरयताम् । अष्टमशताब्दे निर्मितं मध्यप्रदेशे मन्दसौरजनपदे धर्मराजेश्वर-स्थाने विष्णुमन्दिरं चतुर्दिग्भागेषु सप्तभिर्मन्दिरैः परिहितं वर्तते । तत्र भीमबाजार इति गुहायां चैत्यं च विहारश्च वर्तेते । तस्यां गुहायां बौद्धभिक्षूणामावासो लघुकक्षेष्वभवत् । अन्यासु गुहास्वपि भिक्षूणां वसतिरासीत् ।

---

१. अस्मिन्नायतने देवतामाराधयन्ती काचिद् दिव्या योषिदुपवीणयति ।

२. जबलपुरसमीपं तिगवाग्रामे विष्णोर्मन्दिरम्, नागोदसमीपं भूमराग्रामे शिव-मन्दिरम्, अजयगढसमीपं नचनाकूथरग्रामे पार्वतीमन्दिरम्, ललितपुरजनपदे देवगढ-भागे विष्णोर्दशावतारमन्दिरम्, नागोदसमीपं खोहग्रामे शिवमन्दिरम्, असमप्रदेशे दारंग-जनपदे दहपर्वतियाग्रामे शिवमन्दिरम्, कानपुरजनपदे भीतरगाँव इति ग्रामे विष्णुमन्दिरम् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सप्तमशताब्दे एलौरा-स्थाने दशावतार इति प्रसिद्धं गुहामन्दिरं निर्मितम्। अत्रैवाष्टमशताब्दे कैलासमन्दिरं विद्यालय एव निर्मितम। मुम्बय्याः क्रोशत्रय-दूरे द्वीपे एलिफैण्टा-नामके द्वीपे कतिपयगुहामन्दिराणि निर्मितानि राजन्ते।

परवर्तियुगे राज्ञां समाश्रयेण मन्दिराणि मठाश्च निर्मिताः। तत्र तत्संबद्धाः साम्प्रदायिकमहाविद्यालया आसन्। नवमशताब्द्यां शंकराचार्येण स्थापिता विश्वविद्यालया इव महामठा उत्तरदिशि बदरिकायां दक्षिणदिशि शृङ्गेरी-नगरे, पश्चिमदिशि द्वारकायां, पूर्वस्यां पुरीनगर्यांश्चाद्यावधि विलसन्ति। अद्वैतवेदान्तस्य प्रचारायैते मठाः संचारिताः। एतेषु शृङ्गेरीमठोऽनुतुङ्गभद्रं स्थापितः। शेषाः सर्वे प्राकृतिकसौन्दर्यमण्डितरमणीयतायां राजन्ते।

गुहामन्दिराणि दक्षिणभारते महाराष्ट्रे च सप्तमशताब्दीत उच्चकोटिक-शिक्षासंस्थानानि बभूवुः। विश्वविश्रुतानि सन्ति एलौराया गुहा-मन्दिराणि।

विद्यामन्दिरेषु शिक्षण-व्यवस्था-विधौ प्रगतिः परवर्तियुगेऽपि प्रावर्तत। नवमशताब्दस्य मध्यभागे काञ्चीको राजा नृपतुङ्गवर्मा वागूरस्य विद्यास्थान-स्याचार्याणां शिष्याणां च कृते विद्याभोगार्थं ग्रामत्रयं दत्तवान्।[1] दशम-शताब्दे महाराष्ट्रे बीजापुरजनपदस्य सलोत्गी-स्थिते मन्दिरे त्रयीपुरुषस्य स्थापना राष्ट्रकूटराजकृष्णतृतीयस्य मन्त्रिणा नारायणेन कृता। नैकजनपदानां छात्रास्तत्राध्येतुं समागताः। तेषामावासाय २७ छात्रावासा निर्मिता आसन्। मन्दिरस्य प्रधानकक्षे विद्यालयः प्रचरति स्म। एकादशशताब्दे विद्यालयभवनं ध्वस्तमभवत्, अनन्तरं निर्मितं च। एकादशशताब्दस्य प्रथमचरणे अर्काट-प्रदेशे एन्नारियम्-नगरे वैदिकविद्यालयः स्थापितः। तत्र ३४० छात्रा अध्य-यनरता आसन्। तेषु ७५ ऋग्वेदं, ७५ कृष्णयजुर्वेदं, ४० सामवेदं, २० शुक्लयजुर्वेदं, १० अथर्ववेदं, १० बौधायनधर्मसूत्रं, ४० रूपावतारं, २५ व्याकरणं ३५ प्रभाकर-मीमांसां, १० वेदान्तं चापठन्। तत्र षोडश प्राध्यापका आसन्। महान् विद्यालयोऽयं समीपवर्तिलोकानामर्थसाहाय्येन संचारितः।[2] वेङ्कटेश्वरमन्दिर एकादश शताब्द्यां चिंगलीपुटविद्यालयः स्थापितो बभूव। तत्र ६० छात्रा वेद-व्याकरण-पञ्चरात्रदर्शनशैवागमांश्चाधीतवन्तः। वान-प्रस्था मनीषिणः संन्यासिनश्च समीपमेव स्वाध्याययोगादिकर्मसु निरता आसन्।[3] दशमशताब्दे धारवाडजनपदे हब्बालनगरे भुजब्बेश्वरमन्दिरेण

---

१. वागूरपत्रलेख E. 1. Vol. XVIII.

२. Annual Reports of South Indian Eprigraphy, 1918 p. 145.

३. Epigraphia Indica Vol. XXI No 220.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सम्बद्धो महाविद्यालयः प्राचरत्।[1] हैदराबाद-समीपं नगई-नगरस्थ-विद्या-मन्दिरे वेदपाठिनः शतद्वयं, स्मृतिपाठिनश्च शतद्वयं, पुराणपाठिनः शतं, दर्शन-पाठिनश्च द्विपञ्चाशच्छात्रा आसन्। विद्यामन्दिरस्य पुस्तकालये षडध्यापका आसन्।[2] १०७५ ख्रीष्टाब्दे बीजापुरस्यैकस्मिन् मन्दिरे योगेश्वर इति प्रख्यात आचार्यो मीमांसा-दर्शनमपाठयत्।[3] तस्मिन् युगे बहूनि विद्यामन्दिराणि बीजापुर-जनपदे मनगोलीस्थाने कर्नाटकजनपदे बेलगमवे-नगरे, शिमोग-जनपदे तालगुण्डनगरे, तञ्जौर-जनपदे पुन्नबोयलस्थाने च प्रवर्तन्ते स्म।[4] एकादश शताब्दस्य पूर्वार्धे गुर्जरप्रदेशस्य राजा जयसिंहो जयराजो ज्योतिष-पुराण-न्यायदीनां महाविद्यालयान् संचालयामास।[5]

अग्रहारः

अग्रहारस्तु मूलतो ब्राह्मणानां भोजनोपायः क्षेत्रादिः।[6] तेन तेषां शाश्वती वृत्तिर्जायते निवृत्तभोजन-चिन्तास्ते ब्राह्मणाः स्वकर्मसु सम्यक् प्रवर्तेरन्निति राजादीनां सत्कृतिवर्धनाय वैदिककालादेव रीतिरासीत्। उपनिषदि जनकस्य याज्ञवल्क्याय यद् राज्यदानं समीहितं तत्तु वस्तुतोऽग्रहार एव। महाभारते भूमिदानस्य महती प्रशंसा वर्तते।[7] तदनुसृत्य अग्रहाररूपेण भूमिदानस्य विधानमभवत्। तद्यथा महाभारते बृहदश्वो वदति—

अग्रहारं च दास्यामि ग्रामं नगरसम्मितम्॥ आर० ६५.३

इदं तु साधारणं दानं सर्वसाधारण-ब्राह्मणेभ्यः। इतः परं दानं विद्यते ब्रह्मवादिनां कृते। तद्यथा द्रौपदी सत्यभामां न्यबोधयत्—

तान् सर्वानग्रहारेण ब्राह्मणान् ब्रह्मवादिनः।
यथार्हं पूजयामि स्म पानाच्छादनभोजनैः॥ आर० २२२.४३

---

१. Epigraphia Indica Vol. IV p. 355.

2. Hyderabad Archaeolgoical Survey No. 8 p. 7.

3. Indian Antiquary Vol. X pp 129-131.

4. Epigraphia Indica Vol. V p. 22; Eprigraphia Carnatica Vol. I. No. 45, Annual Reports of South Indian Eprigraphy 1913 pp. 109-110.

५. भार्गव : प्राचीन भारत का इतिहास, पृ० ३८८

६. अग्रं ब्राह्मणभोजनं तदर्थं ह्रियन्ते राजधनात् पृथक् क्रियन्ते ते क्षेत्रादय इति नीलकण्ठः।

७. अति दानानि सर्वाणि पृथिवीदानमुच्यते। अनु० ६१.२
भूमिदः सर्वभूतेषु शाश्वतीरेधते समाः। अनु० ६१.३
न भूमिदानादस्तीह परं किंचिद् युधिष्ठिर। अनु० ६१.४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ऋषीणां कृते धृतराष्ट्रो ब्रह्मदेयाग्रहारान् दत्तवान् ।
ब्रह्मदेयाग्रहारांश्च प्रददौ स कुरूद्वहः ॥ आश्रम० २.२

प्राग्बौद्धयुगस्य नैकशो ब्रह्मदेयग्रामाणामुल्लेखाः सन्ति ।[1] गौतमबुद्धस्य जीवनकाले परवर्तियुगेऽपि बौद्धसंधस्य कृते भूमि-भवनोद्यानानां विहार-प्रतिष्ठार्थं बहुशो यद्दानं प्रत्तं तत्तु अग्रहारस्य पूर्वरूपमेव । तत आरभ्य सदैव भूमिदानेन शिक्षण-संस्थानां स्थापनस्य रीतिः प्रावर्तत । अग्रहारवदन्याः संस्था ब्रह्मपुर्यः घटिकाश्चासन् ।

दशमशताब्दे कर्णाटकप्रदेशस्य धारवाडजनपदे राष्ट्रवंशीयै राजभिरग्रहारः स्थापितः । तत्र ब्राह्मणानां द्विशतं न्यवसत्, वेदोपवेदानां काव्यव्याकरण-तर्कपुराणनीतिशास्त्राणां चाध्यापनं तत्र प्रावर्तत । अग्रहारस्यायेन शिष्याणां भोजन-व्यवस्था कृता ।[2] महीशूरराज्यस्य हस्सनजनपदे सर्वज्ञपुरनामकेऽग्रहारे सर्वे ब्राह्मणाः सर्वज्ञा ब्रह्मकर्मपरायणाश्चासन् ।[3] तत्रैव वनवासीभूखण्डस्य राजधानी वेलगाँव आसीत् । तया समाश्रिता पुरत्रयं, मठपञ्चकं, सप्त ब्रह्मपुर्यः, विंशतिप्राया अग्रहाराः, बहुनि मन्दिराणि, विहाराश्चासन् । एतेषु सर्वेषु वेदवेदाङ्ग-दर्शन-स्मृतिपुराणकाव्यादीनां विषयाणां प्रशिक्षणं प्रावर्तत ।

परवर्तियुगेऽपि एतादृशीनां संस्थानां व्यवस्था राजभिः कृता । राजस्थाने जयपुराधीशा ब्रह्मपुरीः स्थापितवन्तः । जयसिंहोऽष्टादशे शतके जयपुर-समीपं ब्रह्मपुरीं स्थापयामास ।[4] स तु काश्यामपरां ब्रह्मपुरीं प्रावर्तयत् ।[5] ब्रह्मपुरीणां प्राग्भावेन काश्या अपरं नाम ब्रह्मपुरीति विश्रुतम् ।

उत्तरभारते कतिपयभूखण्डेषु टोल इति ख्याताः संस्था अग्रहारवद् ग्रामेषु स्थापिता आसन् । तत्र ग्रामाचार्या ग्राम्यबालान् प्राध्यापयन्ति स्म ।

कश्मीरप्रदेशे यथा कल्हणो वर्णयति—आचार्याणां गृहा विद्यालया बभूवुः । कतिपयमन्दिरेषु महाविद्यालयाः प्रवर्तन्ते स्म । तद्यथा महाराजा-वन्तिवर्मणो मन्त्रिणः शूरस्य महोदय-स्वामिनो मन्दिरे—

---

१. सोमदत्तजातक २११; नानाच्छन्दजातक २८९ ।
२. Eprigraphia Indica Vol. XIII p. 317.
३. Eprigraphia Carnatica Vol. V p 114.
४. ईश्वरविलासमहाकाव्ये २. २७–३० ।
५. प्रतापार्के काशीनगरस्य ब्रह्मपुरी वर्णिता—
येन क्षोणिपतिप्रपूजितपदाम्भोजेन काश्यां मुदा
दत्ता ब्रह्मपुरी विधिवद् भूमी सुरेभ्योऽचिरात् ॥ १.१०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

रामटाख्यमुपाध्यायं ख्यातव्याकरणश्रमम् ।
व्याख्यातृपदकं चक्रे स तस्मिन् सुरमन्दिरे ।। राज० ५.२९

विद्यार्थिनामावासा मठेषु क्वचिदभवन् । यशस्कर इति ख्यातो ब्राह्मणो राजा यन्मन्दिरं चकार तद्वर्णितं कल्हणेन—

भूभुजादानशौण्डेन पैतृके स्थण्डिले कृतः ।
छात्राणामार्यदेश्यानां तेन विद्यार्थिनां मठः ।।

पञ्चदशशताब्दे विजयनगरसाम्राज्ये मन्दिरैः सह महाविद्यालयाः पाठशालाश्च सम्बद्धा आसन् ।[1]

ब्रह्मपरायणानां किशोरकाणामपि प्रव्रज्याकृते केचिदपरविधा विद्यालया हिमालयप्रदेशे प्रादुरभवन् । प्रायः षोडश-वर्षीयः कश्चिद्विद्यार्थी ब्रह्मपरायणो गृहात् परिव्रज्य वनं गत्वा तत्राग्न्याधानं कुर्वाणो ब्रह्मगामी भवितुं यतते स्म[2] । सदृशमेव वर्तते ऋषिप्रव्रज्या-विधानं येन वटवः प्रव्रज्यां स्वीकृत्य बाल्यत एव हिमालये कस्यचिदाचार्यमहर्षेरधीनं जीवनं यापयन्ति स्म ।[3] ते परवर्ति-बौद्धभिक्षुका इव भोजनार्थं भिक्षन्ते स्म । राजोद्यानेऽपि तेषां वर्षावासोऽभवत् पर्णशालायाम् । इमे ऋषि-प्रव्रज्या-परायणा अग्न्याधानं नाकुर्वन् ।[4]

बौद्धविद्यालयः, विहारः

गौतमबुद्धः पूर्वोक्तस्य ऋषीणां संघीयशिक्षणव्यवस्थामंशतः स्वीकृत्य[5] स्वीयान् विहारान् न तु वनेऽपितु उपनगरं स्थापयामास । समकालिकराजाः समृद्धा नागरकाश्च भव्यभवनानि विहारार्थं निर्मापयामासुः । गौतमो न केवलं माणवकान् भिक्षूनपि तु नागरिकांश्च स्वजीवनदर्शनेन प्रकाशयितु-

---

१. A Forgotten Empire P. 80.

२. असातमन्तजातक ६१ नंगुट्ठजातक १४४ सन्थवजातक १६२ । एतत्तु नैष्ठिक-ब्रह्मचर्यविधानम् ।

३. एकपण्णजातक १४३, इन्दसमानगोत्तजातक १६१, सन्थवजातक १६२; उपसाढजातक १६६, समिद्धिजातक १६७, अरकजातक १६८, आदिच्चुपट्ठानजातक १७५, इन्दसमानगोत्तजातक १६१

४. एकपण्णजातक १४९, नंगुट्ठजातक १४४, सन्थवजातक १६२.

५. The whole idea of Buddhist Saṅgha, monasticism and so forth was modelled upon the Hindu practice of sending young students to an Āśrama of Guru or Ācārya to serve and study under him. H. D. Sankalia; The University of Nalanda P. 179.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मियेष ।[1]

गौतमेनानुमतं यद् भिक्षवः पञ्चप्रकारकेषु गृहेषु वसेयुः । ते सन्ति—विहारः, आढ्ययोगः, प्रासादः, हर्म्यं, गुहा च । भिक्षूणां मनीषिणां च निर्विघ्नवासाय ये जना विहारादीनकारयन्, ते वस्तुतः कल्याणभाजो मताः । त एव सुवासिता मनीषिणः समाजं सत्पथं दर्शयन्ति । सत्यमेव शोकमुन्मूलयति, सत्यं विज्ञाय मानवः पापं नाचरतीति च धारणा बभूव ।[2]

प्रारम्भिकयुगे बौद्धविहारा आश्रमपर्णशालावत् शरण्या एवासन् न तु सुश्रीकाः, परन्तु परवर्तियुगे बुद्धानुयायिनो गौतमस्य भिक्षुसंघानां सौकर्याय शोभावर्धनाय च राजप्रासादवद् विहारान् निर्मापितवन्तः । वैदिकशिक्षणसंस्थानं परितो वनान्यासन् । बौद्धविहारान् परित उपवनानि बभूवुः । अत एव त आरामा इति संज्ञिताः ।

जेतवनस्यारामोऽतीवदीर्घायाम आसीत् । तत्र १२० भवनानि, असंख्याश्च शाला आसन् । उपदेशाय, समाधये, भोजनाय च पृथक् पृथक् शाला आसन् । इतरत्र स्नानागाराः, औषधालयाः, पुस्तकालयाः, अध्ययनकक्षाश्चासन् । जलाशयान् परितो रमणीया छाया विलसति स्म । पुस्तकालयेषु वैदिकावैदिकसम्प्रदायानां ग्रन्थानां संग्रहोऽभवत् । विज्ञान-शिल्पशास्त्रविषयका ग्रन्थास्तत्र बहुलीकृताः शोभन्ते स्म । शुद्ध-शीतल-जलपूरा जलाशयाः पल्वलाः स्रोतांसि च विहारस्य नयनाभिरामतां वर्धयन्ति स्म । सर्वधर्माणामाचार्यास्तत्र समादृता एवावसन् ।[3]

गौतमबुद्धस्य जीवनकाले तेन सह पश्चादप्यन्यैराचार्यैश्च सह परिभ्रमतां भिक्षूणां संख्या समधिकाभूत् । गौतमो १२५० यावद् भिक्षुभिः सहेतस्ततः विचरति स्म । परियात्रासु गौतमो विविधस्थानावस्थितेषु विहारेषु आचार्यत्वं निर्व्यूढवान् ।[4] तस्य सहाचार्याः सारिपुत्त-मोग्गलान-महाकच्चानोपालि-राहुलानन्दादयोऽभवन् ।

सर्वे विहाराः सर्वेषां भिक्षूणामुपयोगाय बभूवुः । भिक्षवः पर्यटन्तः यथावश्यकं तत्र विश्रामावासादिमलभन्त । जेतवनस्य विहारस्य दानकालेऽनाथपिण्डिकः समकल्पिष्ट--अखिलविश्वस्य भिक्षूणामुपयोगाय दत्तोऽयं विहारः ।

---

१. चुल्लवग्ग ८.४.१ । ज्येष्ठभिक्षुर्भोजनान्तरं नागरकान् गृहस्थान् प्रवचनेन प्राबोधयत् । नागरकाः स्वयमेव विहारं गत्वा स्वजिज्ञासामशामयन्, संशयांश्च निराकुर्वन् ।

२. चुल्लवग्ग ६.१.५

३. Watters : On Yuan Chwang's Travel in India Vol. I p. 385.

४. महावग्ग ६.३६.१ तथा ६.३७.१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सर्वेऽत्रत्या भिक्षवो यात्रिकाश्चात्र सुखं वसेयुः।[1] अशोकेन ई० पू० तृतीय-शतकेऽसंख्यविहारान् कारयामास। ख्रीष्टाब्दात् पूर्वमेवाजन्तायां गुहा-विहाराणां निर्माणं कृतमासीत्। तत्राष्टमख्रीष्टाब्दं यावद् विहाराः कारिताः। प्राचीनयुगस्य गुहाविहाराणां वैपुल्यं कार्ले-कन्हेरी-भाजादिस्थानेष्वपि दरीदृश्यते।

यथा चीनदेशीयो यात्री फाह्यानो गुप्तकालिकविहारान् दृष्टवान्— कश्यपबुद्धस्य संघारामः पर्वतस्य कस्यचित्तक्षणेन कृतः। अयं पञ्चतल आसीत्। प्रथमतलो गजाकारः, द्वितीयः सिंहाकारः, तृतीयश्चाश्वाकार आसन्। एतेषु क्रमशः ५००, ४००, ३००, २००, १०० कुटयो[1]ऽवस्थिता आसन्। उपरितलात् स्रोत एकं सर्वांस्तलान् परिक्रामदेव नीचैरागत्यारामस्य पुरतः प्रावहत्। सर्वेषु गुहाकक्षेषु प्रकाशस्य व्यवस्था कृतासीत्। सोपानेन उपर्युपरि-गमनं व्यवस्थितमासीत्।

फाह्यानस्य भारतयात्रायाः काले सुवास्तुप्रदेशस्योद्यान-जनपदे ५०० संघारामा आसन्। पुरुषपुरे लोईप्रदेशे पोनाप्रदेशे च क्रमशः ६००, ३,००० ३००० भिक्षवोऽवसन्। उपमथुरं विंशतिविहारेषु ३,००० भिक्षवो न्यवसन्। फाह्यानः पाटलिपुत्रे वर्षत्रयं संस्कृतशिक्षणार्थं न्यवसत्। तत्र सर्वोत्तमविहार-द्वये उपसप्तशतं छात्रा आसन्। सप्तमशताब्दे हर्षस्य शासनकाले ह्वेनसाँगो भारतस्य यात्रां कृतवान्। तस्य लेखानुसारेण भारते उपषट्सहस्रं विहारा आसन्। तेषु सार्धद्विलक्षभिक्षवोऽधीतवन्तः।

नालन्दा-विश्वविद्यालयः

बौद्धशिक्षण-संस्थासु नालान्दा-विश्वविद्यालयः शिखरीभूतो विलसतिस्म। तत्र विद्यार्थिनां संख्या १०,००० प्रायासीत्।[2] ह्वेनसाङ्गस्तत्राधीत्य पण्डितोऽ[3]भवत्। तेनास्य विश्वविद्यालयस्य साङ्गोपाङ्गवर्णनं कृतम्।

---

१. चुल्लवग्ग ६.६.१; ६.९.१; ६.११.१; ६.१६.१

२. Hwui Li P. 112, डा० सङ्कालियामहोदयस्समीक्षते— We can say that the number of students was approximately 3,000 to 5,000. Moreover, this estimate comes very near the number mentioned by 1-Tsing. We might conclude, therefore, that the number of students at Nalanda was probalely 4,000. The University of Nalanda p. 195-196.

३. पण्डित इति कृतभूरिपरिश्रमाणां विद्वत्तमानामुपाधिः।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विश्वविद्यालयोऽयं न केवलं भारतेऽपित्वखिलविश्वमण्डले ललामभूतः श्रेष्ठपदमवाप्तवान् । एशियामहाद्वीपस्य नैकदेशेभ्यो विद्यार्थिनोऽत्र समायाता नैकवर्षाणि ज्ञान-विज्ञानयोर्बहुषु शाखा-प्रशाखासु विद्याचणाः संजाताः । अत्र पुस्तकागारेऽनुत्तमानि ग्रन्थरत्नानि सुरक्षितान्यासन्, येषां प्रतिलिपिं कर्तुं शतशो विद्वांसो नियुक्ता बभूवुः ।

यस्य कस्यापि यत्किंचिदपेक्षितमासीत्, तत्सर्वं विना मूल्यमेव तस्मै दत्तम् । रोगिभ्य औषधयः, वस्त्रहीनेभ्यः परिधानानि, बुभुक्षितेभ्यो भोजनमत्र दत्तानि । अशरणानां कृते नालन्दाविहारः शरण्यो बभूव ।

विश्वविद्यालयोऽयमुपसहस्रवर्षाणि भारतीयज्ञानविज्ञानयोर्ध्वजं विश्वमण्डले सर्वोच्चमुच्छ्रापितवान् ।[1]

मगधप्रदेशे राजगृहात् क्रोशत्रयं कस्याश्चिल्लघुनदीमनु स्थिताया नालन्दाया प्रसिद्धिः पुराणी वर्तते । तत्र जैन-तीर्थङ्करो महावीरो गोसालममिलत् । नैकशो गौतमबुद्धः स्वप्रियशिष्येणानन्देन सह तत्र पावारिकाम्रवणे विहारमन्वारेभे । गौतमशिष्यस्य सारिपुत्रस्य इयं जन्मभूमिरासीत् । अत्रैव स निर्वाणमध्यगच्छत् । अशोकेनात्र विहारो निर्मापितः ।[2] द्वितीये खीष्टशताब्दे ब्राह्मणेन सुविष्णुनामकेन महासत्त्वेनात्र १०८ विहारान् निर्मापयामास ।

कुमारगुप्तः प्रथमः शक्रादित्य इत्यपरनामा तत्र संघारामान् निर्मापितवान् । परतस्तस्य वंशजाश्च तत्र विहारादिनिर्माणेन समृद्धिं विहितवन्तः । दुर्भाग्यवशान्मिहिरकुलनामकेन हूणाक्रमणकारिणा संस्थेयं विनाशिता । परवर्तियुगे विविधवंशीयै राजभिः संस्थेयं पुनः संवर्धिता पोषिता च । ते राजानः सन्ति—गुप्त-वर्धन-मौखरि-पाल-सेनवंशीया, येषां सानुदानसुकृतेन नालन्दा-विश्वविद्यालयो भारतीय-ज्ञान-विज्ञान-राशिं निरन्तरं बहुलीकृत्य विश्वस्मै व्यतरत् । बालादित्येन कृतस्य महोच्छ्रितस्य विहारस्य विषय उत्कीर्णो लेखः सूचयति—Bālāditya erected as if with a view to seeing the Kailāsa mountain surpassed by a great and extraordinany

१. प्रो० सङ्कालिया समीक्षते—Nalanda was for greater than Monte Cassino and held a more important position in India than Cluny and Clairvaux in France. Races belonging to different climates habits and languages were drawn together not in the clash of arms, and not in the conflict of explanation, but in harmony of life, in amity and peace. The University of Nalanda P. 237.

2. Taranath : History of Buddhism in India, P. 72.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

temple (Prāsāda) of the illustrious son of Suddhodana here at Nalanda.[1]

अधोलिखिता राजानो नालन्दा-विश्वविद्यालयं विहारनिर्माणेन समवर्धयन्--शक्रादित्यः (कुमारगुप्तः प्रथमः ४१५-४५५ ई०), बुद्धगुप्तराजः (स्कन्दगुप्तः) ४६७ ई०, बालादित्यराजः (बालादित्यः, नरसिंहगुप्तश्च) ४७० ई०, वज्रः (कुमारगुप्तो द्वितीयः) ४७३ ई०, मध्यभारतराजः (हर्षवर्धनः) ६३०-६४५ ई०। अत्र राज्ञो मानसिंहस्य, शासनाधिकारिणां पशुपतिसिंह-देवसिंहादीनां दानमुद्राः प्राप्यन्ते । त एते संस्थायाः पोषकाः सर्वे बौद्धमतावलम्बिनो नासन्निति तेषां मुद्रालक्ष्मभिः लक्ष्मी-गणेश-लिङ्ग-दुर्गादिप्रतिकृतिभिरनुमातुं शक्यते ।

नालन्दा-विश्वविद्यालयस्य शतवर्षप्रायावस्थायां गोमिनामकेन भूभाररूपेणोपद्रविणा वैदेशिकाक्रमणकारिणा विहारा विध्वंसिता भिक्षु-वरेण्याश्च मारिताः । तदनन्तरं बुद्धपक्ष इति नामकेन राज्ञा तस्य पुत्रेण गम्भीरपक्षेण च स्तूपविहाराणां पुनर्निर्माणं कृतं जलाशयाः कूपाश्चोत्खाताः ।

ह्वेनसांगानुसारेण कान्यकुब्जराजो हर्षवर्धनस्तत्र विशालं संघारामं निर्मापितवान् । तेन पित्तलपट्टिकाभित्तिखचितविहारभवनानि परितः प्राकारश्च कृतः । प्रतिदिनं च चत्वारिंशत् पण्डितवरेभ्यः भोज्यानि दत्तानि । उत्कलप्रदेशे परिभ्रमन् हर्षस्तत्रत्यानां हीनयानविदुषां महायानसिद्धान्तविषयकापवादान् श्रुत्वा नालन्दाविश्वविद्यालयतस्तेषां निग्रहाय चतुरः पण्डितवरान् प्रेषयितुं निवेदितवान् ।

मौखरिवंशीयोऽन्तिमो राजा पूर्णवर्मा गौतमबुद्धस्य ५५ हस्तोच्छ्रयां ताम्रमूर्तिं नालन्दा-विश्वविद्यालयस्य प्राङ्गणे स्थापितवान् ।

महाराजस्य यशोवर्मणो मन्त्री मालादोऽष्टमशताब्दस्य द्वितीयचरणे नालन्दाविहारवास्तव्यानां भिक्षूणां भोजनव्यवस्थां सुचारु विधातुं बहु कृतवान् । नालन्दा-संस्थाया मूल्यं यावद् धनं चादात् ।

७५० ख्रीष्टाब्दतो बङ्गदेशीयानां पालनरेन्द्राणां समाश्रयेण नालन्दाविश्वविद्यालयस्योत्थानमनवच्छिन्नं दृश्यते । पालवंशीयो राजा देवपालः सुवर्णद्वीपस्य शैलेन्द्रवंशीयेन राज्ञा बलपुत्रदेवेन नालन्दाविश्वविद्यालयेभ्यः

---

1. Nalanda Stone Inscription of the reign of Yaśovarmā Ep. Ind. Vol. XX Jan. 1929 p. 27

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ग्रामाणां दानं कर्तुं प्रार्थितः।[1] अनेनोल्लेखेन विभाव्यते यद् भारताद् बहिः सुमात्रा-जावा-द्वीपमण्डलं यावन्नालन्दा-विश्वविद्यालयस्य प्रसिद्धिर्व्याप्तासीत्। देवपालेन सम्मानितः पाण्डित्यमहार्णवो वीरदेवो भिक्षुभिर्नालन्दा-विहाराणां संघनायको निर्वाचितः।

मगध-विजेता महीपालः प्रथमो नालन्दायां नैकध्वस्तान् स्तूपान् नवीकृतवान्।[2]

नालन्दाया राजभिः कृता उपाष्ट विहारा आसन्। ते सर्वे पंक्तिशो निर्मिता बभूवुः। एते सर्वे त्रितलाश्चतुस्तला वा बभूवुः। यशोवर्मदेवस्य शासन-कालस्योत्कीर्णलेखानुसारेण—

She (Nalanda) had a row of Vihāras the lines of whose tops touched the sky. Nalanda (was full of the) heaps of the rays of Caityas shining and bright like white clouds. Nalanda had temples which were brilliant on account of the net work of the rays of the various jewels set in them and was the pleasant abode of the learned and virtuous Saṅgha and resembled Sumeru the charming residence of the Vidyādharas.[3]

नालन्दाविश्वविद्यालयस्य पुस्तकालयो (धर्मगंजो) भवनत्रये स्थापित आसीत्। पुस्तकालय-भवनानि रत्नसागरः, रत्नोदधिः, रत्नरञ्जक इति प्रख्यातानि बभूवुः। तत्र रत्नोदधिर्नवतल आसीत्। तस्मिन् भवने विशेष-महत्त्वपूर्णा ग्रन्थाः सुरक्षिता आसन्।

ह्वेनसाँगेन नालन्दाभवनानि वर्णितानि सन्ति। स कथयति—The richly adorned towers, and the fairy-like turrets, like the pointed hill-tops are congregated together. The observatories seem to be

---

1. He (king Bālaputradeva of Suvarṇadvīpa) had requested king Devapāldeva through an ambassador of his Bālavarmā to grant villages towards the income for the Buddha for offerings, oblations, shelters, garments etc. of the assembly of the venerable Bhikkhus.....and for the upkeep and repair of the monastery when damaged. Ep. Ind. Vol. XVII p. 325 verses 33-37

2. H. C. I. P. Vol. IV p 26.

3. Nalanda Inscription of the Reign of yaśovarmadeve Ep. Ind. XX p. 45.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

lost in the vapour (of the morning) and the upper rooms tower above the sky. From the windows one may see how the winds and the clouds (produce new forms), and above the soaring eaves the conjunctions of the sun and moon (may be observed). All the outside courts, in which are the priests' chambers are of four stages. The stages haves dragon projections and coloured eaves, the pearl-red pillars carved and ornamented, the richly adorned and the roofs covered with tiles that reflect the light in a thousand shades. These things add beeauty to the place.[1]

नालन्दाविश्वविद्यालयः स्वीयेन सार्वभौमवैभवेन राजधानीवदासीत्।

नालन्दाविश्वविद्यालयेऽनन्यतममिति महायान-साहित्यं सानुसन्धानं सश्रद्धमध्यापितम्। महायानस्य सम्यग् बोधाय वैदिकसाहित्यं, हीनयान-साहित्यं च पूर्वमेवाधीते। वैदिकदर्शनं तु प्रधानविषयत्वेन शास्त्रार्थविनिर्णया-याधीतम्। अन्ये विषयाः —हेतुविद्या, शब्दविद्या, चिकित्साविद्या, अथर्ववेदः, सांख्यं च प्रसङ्गतः परिशीलिता बभूवुः।[2] ह्वेनसाङ्गो योगशास्त्रं, न्याया-नुशासन-शास्त्रं, शब्दविद्यां, महायान-साहित्य चाधीतवान्।[3]

तस्मिन् युगे धर्मदर्शनपरिधौ जीवनस्योद्देश्यं पुनर्जन्मनो विनिवृत्तिं च विचिकित्सन्तो विद्वांसः शिष्यभावेन स्पर्धाभावेन वा परस्पर-विवादप्रवणा आसन्। अस्यां स्थितौ तर्कशास्त्रस्य हेतु-विद्याया वा विशेषमहत्त्वमासीत्। ह्वेनसांगो निरूपयति—

Learned men from different cities, who desire quickly to acquire a renown in discussion, come here in multitudes to settle their doubts and the streams (of their wisdom) spread far and wide.[4]

---

1. Shaman Hwui Li : The Life of Hiuen Tsiang pp 111-112.
2. सङ्कालिया विशदयति—He was expected to defend the Buddhist system against others and this he could not do unless he knew the principles of other systems. The University of Nalanda II edition p. 84.
3. Hwui Li p. 121.
4. Ibid p. 170.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विश्वविद्यालयस्य द्वारपण्डिताः शास्त्रार्थशौण्डा आसन्। तैः सह विवादेन तेषां परितोषस्यानन्तरमेवोच्चतराध्ययनाय युवानः संस्थायामध्ययनाय प्रविष्टाः। बौद्धसम्प्रदायस्याष्टादशशाखा महायानधर्मश्च सर्वेषां कृतेऽपरिहार्योऽध्ययनविषय आसन्। महायानस्य शाखाद्वयं प्रावर्तत-शून्यवादो विज्ञानवादश्च। तत्रत्या आचार्या महायानस्य विशदीकरणाय बहुनि महत्त्वपूर्णपुस्तकानि प्रणिन्युः।[1]

नालन्दायां ज्योतिष-विद्यायाश्चाध्यापनं प्रावर्तत। तत्र नैका महोच्छ्रया वेधशाला आसन्।

नालन्दायामुद्भावितस्तन्त्राध्यायो विदेशेष्वपि विश्रुत आसीत्। निर्वाणप्राप्तयेऽनायासेनैव तन्त्रपथेनालौकिकशक्तिसाधनेन साधारणजनः प्रवर्तितः। साधुजीवनस्य तपोमयप्रतिबन्धास्तत्र शिथिला बभूवुः, साधनानि सिद्धयश्च तत्र प्रायश उदात्ता न प्रतिभान्ति। तथापि तिब्बत-जापानादिदेशेषु अत्रत्यास्तन्त्राचार्याः सम्मानिता बभूवुः। डा० संकालिया स्पष्टयति—The aim of the Tāntrikas varied from the highest and noblest conceptions of the human mind to the most debased one.[2]

एवलान महोदयेन प्रागेव निर्दिष्टम्—In all religions there is a mass religion suitable to the less developed minds of the majority of the community and the religion of the highly educated, the spiritually developed and sages. There is thus a high Philosophic Tantrism and that of the crowd, with its cruder beliefs.....The

---

१. स्थिरमतेर्महायानाभिधर्म-संयुक्त-संगीतिशास्त्रम्, नागार्जुनस्य प्रज्ञापारमितामनुसृत्य प्रतिपादयति यन्महायानं तु बोधिसत्त्वपिटकम्। तदनुसारेण पिटकेऽस्मिन् दिव्या धारणा पिहिता यया सर्वेषां कल्याणमुद्दिष्टम्। धर्मपालो विज्ञप्तिमात्र-सिद्धिशास्त्रं विरचितवान्। शीलभद्रः सर्वास्तिवादं, शून्यवादं, मध्यमां प्रतिपदां च व्याख्यातवान्। हीनयानस्य सर्वास्तिवादस्तु तेन न्यक्कृतः। शान्तिदेवः शिक्षासमुच्चये महायानस्य सर्वातिशायित्वं प्रादर्शयत्। ग्रन्थेऽस्मिन् महायानसूत्राणां संग्रहो विद्यते। तत्रात्मगुणानां विनयादीनां प्रतिष्ठा सन्निहिता। न केवलं बौद्धानामपितु विश्वमानवातायाः समुत्थानायानुपमोऽयं ग्रन्थः शान्तरक्षितेन तस्य शिष्येण कमलशीलेन च तत्त्वसंग्रहे विज्ञानवादो विस्फारितः। महापण्डितो दिङ्नागो न्यायद्वारं, न्यायप्रवेशं प्रमाण-समुच्चायं चेति ग्रन्थत्रयं न्यायशास्त्रस्य प्रमाणभूतं विरचितवान्। 'महानुसन्धाता दिङ्नागोऽयं न्यायदर्शनमपरविधं प्रवर्तयामास।

२. The University of Nalanda II Ed. P. 110.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

Tantras, whether Buddhistic or Indian, contain both a profound doctrine and a wonderfully conceived praxis.[1]

शिल्पशास्त्रस्याध्यायो नालन्दायां तन्त्राभियोगेन समवर्धत। बहवो मूर्तय-स्तन्त्रसम्प्रदाय-प्रकाशिकाः प्राप्यन्ते। तासां बाहुल्येन नालन्दा-शिल्पसम्प्र-दायः, पाल-कलासंप्रदायो वा वैशिष्ट्यमवाप।

गौतमबुद्धस्याचार्य-परम्पराया: परवर्तिविशुद्धरूपं नालन्दाविश्वविद्यालय-स्य पण्डित-प्रवरेषु लक्ष्यते। तेषु धर्मपालः, स्थिरमतिः, शीलभद्रः, ह्वेनसांग इत्यादयः प्रमुखाः सन्ति।

शीलभद्रस्य पिता पूर्वभारते समतटे राजासीत्, जात्या ब्राह्मणः। स गौतमबुद्धवद् राज्यं जातिं च परित्यज्य परिव्रज्य च जिज्ञासुरेव पर्यटन् नालन्दामागतो धर्मपालस्य शिष्योऽभवत्। स गुरुं प्रथममपृच्छत्—विष्व-ग्जगतः किमुद्देश्यं का च गतिरिति। त्रिंशद्वर्षीयः स प्रतिवादभयंकरं कञ्चिद्-दाक्षिणात्य-पण्डितप्रकाण्डं पराजित्य मगधराजादेकं नगरं पुरस्काररूपेणा-निच्छन्नपि स्वीकर्तुं प्रार्थितः। अनेन पुरस्कारराशिना स विहारमेकं निर्मा-पयामास। तदनन्तरं विश्रुतोऽयं मनीषी नालन्दा-विश्वविद्यालयस्य पण्डितो नियुक्तः। हर्षेण निवेदितः शीलभद्रो विद्वच्चतुष्टयमुत्कलस्य हीनयानधुर्यान् पराजेतुं प्रेषितवान्। शीलभद्रोऽयमार्यबुद्धभूमिनामकस्य ग्रन्थस्य प्रणेतास्ति। तस्यान्ये ग्रन्था नाम्नापि न ख्यापिताः सन्ति।

अपरः पण्डितो धर्मकीर्तिर्न्यायबिन्दुरिति ग्रन्थं विरचितवान्। शान्तिदेवः शिक्षासमुच्चयस्य प्रणेता बाल्ये राजकुमारो बभूव। मात्रा प्रणुदितः स सङ्घे भिक्षुकोऽभवत्। मञ्जुवज्रस्तस्य गुरुरासीत्। नालन्दायां स त्रिपिट-कमशिक्षत। शान्तिदेवो ग्रन्थत्रयं—सूत्रसमुच्चयः, शिक्षा-समुच्चयः बोधि-चर्यावतारश्चारचयत्। शान्तिदेवस्य प्रादुर्भावोऽष्टमशताब्दस्य पूर्वार्धेऽभवत्।

---

१. Tantric Texts. Foreword pp. V-VII

२. नालन्दायां सर्वश्रेष्ठाचार्यः पण्डित इत्यभिहितः। तेषां संख्या यौगपद्येन क्वचिद् बह्वी बभूव। डा० सङ्कालिया प्रमाणयति—

Nalanda was represented by no less than 1000 Pandits in the grand assembly convened by Śrīharṣa at kānyakubja to investigate the treatise of the Master of the law of China (Hiuen Tsiang). This fact alone is enough to speak of the importance of the University and the Pandits who had the honour to represent it. Sankalia: The University of Nalanda p. 148-149.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

शान्तिरक्षितः पद्मसम्भवश्चाष्टमशताब्दस्य मध्यभाग ओदन्तपुरी-विहार-सदृशं विहारं निर्मापयामासतुः । शान्तिरक्षितस्त्रयोदशवर्षाणि त्रिविष्टपे तत्रत्यराजेनाहूतो बौद्धधर्मस्य प्रचारं कृतवान् । ७६२ खीष्टाब्दे स पञ्चत्वं गतः । तस्य विरचितं पुस्तकद्वयं—तत्त्वसंग्रहः तत्त्वसिद्धिश्च सुप्रथितमेव ।

शान्तिरक्षितेन सह पद्मसम्भवस्त्रिविष्टपं गतवानासीत् । स इन्द्रबोधि-नामकस्य उदयनराजस्य पुत्र आसीत् । नालन्दाविश्वविद्यालये स योगाचार इति महायानसम्प्रदायस्य सर्वोपरि-प्राचार्यो बभूव । त्रिविष्टपे स लामा सम्प्रदायं प्रार्वतयत् । अत एव स बुद्ध एव सम्प्रतिष्ठितः । अभिचारादिभिः स त्रिविष्टपे तत्रत्यानां पैशाचीं बाधामपाकुर्वन् प्रतिष्ठापात्रं संजातः ।

अपरो नालन्दापण्डितः कमलशीलस्तन्त्राचार्यं आसीत् । स त्रिविष्टपे राज्ञाहूतः शान्तिरक्षितस्य पराभवितारं होशंगं पराजयत ।

नालन्दायां चन्द्रगोमीति विख्यातस्तन्त्राचार्योऽष्टमशतके उपषष्टि-पुस्तकानि विरचितवान् । अन्येषु विषयेषु-काव्य-व्याकरण-तर्कशास्त्र-ज्योतिष-संगीत-शिल्प-चिकित्सादिषु सोऽतिनैपुण्यमवाप ।

वीरदेव इति ख्यातः पण्डितो[1] ब्राह्मणोऽपि स्वविद्वत्तोत्कर्षेण महाराज-देवपालेन तत्र कुलपतिर्नियुक्तः । स वेदानां सर्वशास्त्राणां चाधीती वैदुष्या-भ्युपगमाय नालन्दामागतः । स विहारमालाभिर्नालन्दां विभूषितवानिति ख्यातिरासीत् । स इन्द्रशैले विहारद्वयं निर्मापयामास । दशमशताब्दं यावन्नालन्दा-विश्वविद्यालयो नित्यमभ्युदयपथगामी बभूवेति देवपालस्य महाराजस्य संरक्षणेन प्रतीयते ।

एकादशशताब्दस्य अन्तिमचरणे बुद्धकीर्तिर्नालन्दाया अन्तिमः पण्डितो बभूवेति प्रतिभाति । स विक्रमशिला-विश्वविद्यालयस्य प्राचार्यस्याभयंकरस्य समकालिको व्यराजत ।

महायानस्य प्रतिष्ठायै महापण्डिता अपि नालन्दाविश्वविद्यालयस्य यत्र तत्र सर्वत्र स्पर्धात्मकविवादेषु निग्रहपरायणा आसन् । अनेन तत्र विनयो न समादृतः इति स्पष्टमेव । 'विद्या विनयेन शोभते' इति सदाचारः तत्र न समादृतः । ज्ञानस्योद्देश्यं सर्वप्रथमं विवाद-पदे परमतावलम्बिना वैलक्ष्यस्य प्रदर्शनमासीत् । अपरं च—नालन्दाविश्वविद्यालयस्य छात्राः प्रामुख्येण महायानज्ञानार्णवे निष्णाता आसन् । तत्रैव तेषां जीवनसाफल्यं प्रतानित-

1. Nalanda seal having a Dharmacakra and two gazelles, which was very likely used for the purpose of honouring those persons who were appointed governors or Pandits of Nalanda. Sankalia : The University of Nalanda II ed. P. 147.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मासीत् । मानवजीवनस्य सामग्र्यं न तत्र दृष्टमासीत् । प्रशिक्षणं तत्र विष्वक्त्वमीषदेवाभजत । नात्र विस्मरणीयं यन्नालन्दाविश्वविद्यालयेऽन्ये बहवो विषया बौद्धधर्मदर्शनव्यतिरिक्ता अपि शिक्षिताः[1], तथापि सातिशयं महत्त्वं बौद्ध-धर्मदर्शनानुसन्धानसंवर्धनस्यासीत् । परवर्तियुगस्य वज्रयानस्य तन्त्रसाधना[2] बौद्धधर्मस्य विनाशायालमभवत् ।

बौद्धविहारेषु लब्धोपाधयो विद्वत्तमाः संस्थायाः संघाध्यक्षपदं चिकीर्षन्ति स्म । नासीत् तत्र किंचिद्वेतनमपेक्षितम् । तत्रासीत् सम्मानः तत्पदेन प्रापणीयः । तन्मात्रेण स आत्मानं मानवताया अभ्युत्थानाय समर्पितवान् ।[3] स गौतमबुद्धस्य चरितादर्शमात्मसादकरोत् ।

राजकीयपदाभिलाषिणस्तु राज्ञः परीक्षणाय प्रजाया अभ्युदयाय सर्वोत्तम-योजनाः प्रस्तुवन्ति स्म । तेषां राजनयवैचक्षण्येन प्रभावितो राजा यथा-योग्यपदप्रदानेन तान् पर्यतोषयत् । शेषा बहवः पण्डिताः स्वविवाद-प्रकर्षेणाग्रहारादिकं लब्धवन्तः । बहूनां चरमोत्कर्षपरायणानां नामानि संस्थायाः द्वार-स्तम्भेषूत्कीर्णानीति प्रतिष्ठास्पदं फलं भूयोऽभीष्टमासीद् विदुषाम् ।[4]

आसीदस्मिन् विश्वविद्यालये किंचिदाकर्षणं येन मोहिता इव छात्राश्चीन-जापान-त्रिविष्टप-सुमात्रा-जावादि-प्रदेशतोऽध्येतुं तत्र समागताः ।

ताम्रलिप्ति-विहारः

बङ्गप्रदेशस्य मेदिनीपुर-जनपदे रूपनारायणनदस्य सागर-सङ्गमपरिसरे

---

1. Nalanda imparted knowledge in all the heterogeneous arts and sciences, philosophies and religions. Hwui Li P. 112. If Buddhism was specially attended to, Vedantism etc. was not neglected. Likewlse a place was founded for the science of medicines in the curriculam. Sankalia : the University of Nalanda P. 196-197.

२. तन्त्रे तु प्रज्ञा स्त्री उपायश्च पुरुषः । अत एव शक्तिशिवौ तौ साधकानां रमणी-साहचर्यं प्रकल्पयतः । परिणामतः साधकेषु युवती-युवकयोश्चारित्र्यभ्रंशकं प्रकरणं घृणास्पदमपि तेषां सम्मतमासीत् ।

३. अस्मिन् प्रसङ्गे सङ्कालिया निर्वर्णयति—Unlike the European priest he was not given any pay or money in any shape and form. The University of Nalanad II Ed. p. 201.

4. Ibid p. 202.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्राचीना विश्वविश्रुता ताम्रलिप्ति-नामिका नगरी महान् पोताश्रय आसीत्। नैकबौद्धविद्याविशारदाः—फाह्यान - ह्वेनसांगेत्सिंग-महायानप्रदीप-होयेल्यून-ताओलिन-ह्यनकोईत्यादयस्ताम्रलिप्तिविषयकं बहु निर्वर्णयन्ति स्म।

अस्य विद्यापीठस्य स्थापना गुप्तकालात्प्रागेवाभूत् यतो हि नाम गुप्त-कालिकयात्रिफाह्यानानुसारेण तत्र २४ संघारामा विद्यापीठाधीनाः समुन्नता आसन्। फाह्यानस्तत्र वर्षद्वयमधीतवान्। तस्मिन् काले तत्र उपसहस्रद्वयं छात्राणामासीत्। ह्वेनसांगस्य काले तत्र दश विहाराः सहस्रं विद्यार्थिनश्चासन्।

इत्सिंगः ६७३ खीष्टवर्षे तत्रागतः। तत्र स ब्रह्मभाषां (संस्कृतम्) व्याकरणं चाधीतवान्। तत्र ह्वेनसांगस्य शिष्यः ता-चांग-तानः (महायान-प्रदीपः) उपगतः। स तत्र द्वादशवर्षाणि शिक्षते स्म, तदनन्तरमित्सिंगेन सह नालन्दामगच्छत्। होयेल्यून (प्रज्ञावर्मा) कोरियाप्रदेशादागत्य चिरमधीत-वान्। चीनदेशत आगत ताओ-लिन् (शीलप्रभः) तत्र वर्षत्रयमपठत्। स न्याय-(धर्मशास्त्र) विषयस्य पण्डितो बभूव। चीनदेशीयोऽपरो विद्यार्थी ह्यू-एन-कोई वर्षं यावद् व्याकरणमधीत्य ग्रन्थसम्भारैः सह चीनं प्रत्य-गच्छत्। तस्मिन् काले तत्र महायानप्रदीपस्तत्रासीत्।

विद्यापीठस्य शासनसूत्रं विद्यार्थिनां समित्या प्रवर्तितमासीत्।

इस्लामधर्मानुयायिनां भारतीय-संस्कृति-विनाशिनी नीतिरस्यविद्या-पीठस्य विनाशाय सफलमुपचक्रमे।[1]

वलभी-विश्वविद्यालयः

नालन्दा-विश्वविद्यालयस्य प्रायः समकालिक एव पश्चिमभारते काठिया-वाड-प्रदेशे वलभी-विश्वविद्यालयः प्रायशो मैत्रक-राजाश्रयेण षष्ठशताब्दस्य-मध्यकाले स्थापितः संवर्धितश्च। तत्रत्येन राज्ञा ध्रुवप्रथमस्य भागिनेयो दुद्दा प्रथमं विहारं कारयामास। तदनन्तरं वलभी-राजानस्तस्याः संस्थायाः संचरणाय ग्रामदानेन विहार-निर्माणेन च बहु कृतवन्तः।[2] तत्र शतप्राया विहारा आसन्। आचार्यस्थिरमतिस्तत्र सुप्रसिद्धं बप्पपादनामकं महाविहारं

१. भारतीबहन देशाई : 'ताम्रलिप्ति का प्राचीन विद्यापीठ' इति लेखो नानजी-कालि-दासमहेता-स्मृति-ग्रन्थे प्रकाशितः।

२. सप्तमशताब्दस्य प्रथमचरणे तत्र शीलादित्यो धर्मादित्यो राजासीत्। स बौद्धमन्दिर-मतीवसुन्दरं कारयामास। प्रतिवर्षं स धर्मसभामकरोत्, यत्राखिलभारतस्य बौद्धमनी-षिणो भागग्राहिणोऽभवन्। हर्षस्य महाराजस्य समकालिको ध्रुवभटस्तस्य जामाता बभूव। ध्रुवभटो ध्रुवसेनो द्वितीय इत्यभिधीयते।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

निर्मापयामास। ह्वेनसांगानुसारेण तत्र षट्सहस्राभिक्षव आसन्। वलभी-विश्वविद्यालयो नालन्दाविद्यालयेन समानं स्फीत इति इत्सिगः कथयति।

वलभी-विश्वविद्यालयस्य स्थितिरुपसमुद्रतटमासीत्। तत्र हीनयानस्य वैशिष्ट्यमधीतं, प्रवचन-विवादद्वारेण प्रचारितं च। तस्मिन् युगे हीनयान-महायानयोराचार्याणां परस्परविरोधः प्रोत्कट आसीत्। अष्टमशताब्दं यावद् विश्वविद्यालयस्य प्रगतिरवलोक्यते।

विक्रमशिला-विश्वविद्यालयः

अष्टमशताब्दे मगधप्रदेशे विक्रमशिला-नामकः प्रसिद्धो बौद्धविश्व-विद्यालयो मगधराजेन धर्मपालेन स्थापितः। कुत्रावस्थित आसीदयं विश्व-विद्यालय इति नानाविकल्पसन्दर्भैः सन्दिग्ध आसीद् दीर्घकालं यावत्[1]। प्राचीनसन्दर्भैर्ज्ञायते यदयं विश्वविद्यालय उपगङ्गं पर्वतिकायाः समस्थले निर्मित आसीत्। १९८२ ख्रीष्टाब्द उत्खनेन प्रसाधितं यदयं विश्वविद्यालयो-ऽनतिचकग्रामेऽवस्थित आसीत्। ग्रामोऽयं कहलगांवस्टेशनतः क्रोशचतुष्टय-मितं दूरं स्थितः।[2]

विश्वविद्यालयेऽस्मिन् षट्संघारामाः प्रत्येकं १०८ प्राचार्यैरधिष्ठिता आसन्। विश्वविद्यालयस्याग्रभित्तौ सर्वेषां दर्शनायोत्साहवर्धनाय चातीश-नागार्जुनयोः चित्रद्वयं निर्मितमासीत्।

विक्रमशिलाविश्वविद्यालयो नालन्दा-विश्वविद्यलयस्याङ्गीभूत इवा-ध्ययनाध्यापनदिशा प्रतीयते। किन्तु तान्त्रिकगवेषणायाः सर्वोच्चो विकासो-ऽत्रत्यानां पण्डितानां विश्रुतं कृतित्वं प्रतिभाति। अतीशो वा दीपङ्करः श्रीज्ञानो वा विक्रमशिलाया ललामभूतो भारते विदेशेषु च बौद्धज्ञानप्रकाशं प्रसारयामास।

---

१. अधोलिखितानि स्थानानि विद्वद्भिर्विक्रमशिलायै उपन्यस्तानि
(क) बड़ागाँवनिकटे शिलासाख्यो ग्राम इति कनिंघमः।
(ख) भागलपुरजनपदे सुल्तानगंज इति विद्याभूषणः।
(ग) उपगङ्गं पथरघाटपर्वतिकेति नन्दलाल डे।
(घ) हुलासगंजात् सार्धक्रोशदूरं केऊरग्राम इति बनर्जी।

2. The existence of this important centre of Buddhist learning in Bhagalpur district has been brought to light by Dr. R. S. Verma of the Archaeological Survey of India and Dr. B. P. Sinha of Patna University. The excavation amongst several important findings has brought to light a brick stūpa surrounded by 208 cells. The Times of India, dated July 1, 1982

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

९८० खीष्टाब्दे गौरराजकुले बङ्गदेशस्य विक्रमनिपुरे जातोऽतीशो महायान-हीनयान-तन्त्र-वैशेषिकदर्शनादिग्रन्थेषु भूयो निष्णातो राहुलगुप्ताद् बौद्धदर्शनस्य निगूढरहस्यात्मकतत्त्वानि अधीतवान् । एकत्रिंशद्-वर्षीयः स बोधिसत्त्वचर्यायै व्रती संजातः । नयपालेन स विक्रमशिलायाः प्रधानो नियुक्तः । स प्रव्रजितः सन्नपि नयपालस्य करुयराजेन सह सन्धिसंयोगे आत्म-प्रभावेण सौकर्यं समुत्पादितवान् ।

अतीशो सुवर्ण-(सुमात्रा-) द्वीपं गत्वा तत्रत्याचार्यवरिष्ठस्य पादेषु द्वादशवर्षाणि अधीत्य मगधं प्रत्यावृत्तो विक्रमशिला-संस्थायां सर्वोच्च-पदाधिष्ठितो धर्मपाल इति ख्यातिं लब्धवान् । १०३८ ई० वर्षे त्रिविष्टपं गतः स तत्रत्यबौद्धानां कृते सद्धर्मदर्शनं पञ्चदशवर्षाणि यावदुपादिशत् ।

त्रिविष्टपस्य राजदूतोऽतीशस्य प्रथमदर्शनेन चमत्कृतस्स्वभावानुद्-गिरति—'There came Lord Atīś'a, the venerable of venerables, in all his glory, at whose sight, the eyes felt no satiety. His graceful appearance and smiling face struck everyone of the assembly.. The Indians, Nepalese and Tibetans all looked at him and took him for a countryman of their own. There was brightness mixed with simplicity of expression on his face, which acted as a magic spell upon those who beheld him.[1]

पश्चाद् विक्रमशिलाविश्वविद्यालयस्य समुन्नतिः संजाता । तत्र षड्द्वार-पण्डिता विद्योपलब्धिकृतभूरिपरिश्रमा व्यराजन्त । तत्र १०८ प्राचार्याः प्राचार्याणां कार्यविधं पर्यालोचयन्तोऽभिनवोत्कर्षमयीं शिक्षणपद्धतिं निर्दि-शन्ति स्म । नालन्दा-विश्वविद्यालयस्य प्रगतिस्तैः प्रमुखप्राचार्यैरेव पर्य-वेक्षिता । तस्मिन् युगे विश्वविद्यालयद्वयं पालराजैः सम्पोष्यमाणमासीत् । राजा स्वयमेव तत्र सर्वोच्चोपाधिं पण्डित इति सर्वज्ञविद्वद्भ्यः प्रादात् ।

जगद्दलविद्यापीठम्

द्वादशखीष्टशतकस्य प्रथमचरणे पालवंशीयो राजा रामपाल उपगङ्गाकर-तोयासङ्गममुत्तरवङ्गे रामावती-नगरीं निर्मापयामास, तस्या अलंकरणाय च जगद्दलनामकं विहारं स्थापयामास । तत्र तिब्बतीयाश्छात्राः संस्कृतम-शिक्षन्त । तत्रत्या गुरवो न केवलं संस्कृतेऽपि तु तिब्बतीभाषायामपि निष्णाताः पण्डिता लेखकाश्चासन् । तेषु महापण्डितो विभूतिचन्द्रः ख्यातनामा बभूव । असौ १८ संस्कृतग्रन्थान् तिब्बती-भाषयानूदितवान्, षड् ग्रन्थांश्च संस्कृतेन विरचय्यानूदितवान् ।

1. Das, J. A. S. B. I Part I, 1891 P. 46-53.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अपरोऽनुत्तमो विद्वान् तत्र दानशील आसीत्। स यथाकालं पण्डित-महापण्डितोपाध्यायाचार्यपदवीकः ५४ संस्कृतग्रन्थान् तिब्बतीभाषयानूदित-वान्। स संस्कृतेन सद्धर्म-व्यवस्था-वृत्तिं विरचितवान्।

मोक्षाकरगुप्तो जगद्दले धर्माध्यक्षो महापण्डितोपाधिनालंकृत आसीत्। स तर्कशास्त्रेऽबाह्यो बभूव। तस्य तर्कभाषानामकं ग्रन्थं तिब्बतीभाषया स्थिरमतिरनूदितवान्। द्वादशशताब्दस्यान्तेऽस्य विहारस्य यथापूर्वं विध्वंसो विधर्मिभिर्निष्पादितः।

उदन्तपुरी-विद्यापीठम्

इदं विद्यापीठं नालन्दासमीपं क्रोशत्रयं दूरमवस्थितमासीत्। अस्य संस्थापको गोपालोऽष्टमशताब्दे मगधराजोऽभूत्। एकादशशतके तत्र अभयङ्करगुप्तो मगधभिक्षुसंघस्य प्रधानाचार्यो बभूव। तदा विद्यापीठे विद्यार्थिनः सहस्रमासन्। उदन्तपुरी-विद्यापीठस्य चैत्यभवनमन्यान्यपि विहार-भवनानि च सातिशयं भव्यानि बभूवुः। तेषामनुकरणेन त्रिविष्टपप्रदेशे विहारभवनानि निर्मितानि। उदन्तपुर्यामपरो विख्यात आचार्यो रत्नाकर-शान्तिर्बभूव। स बौद्धधर्मप्रचाराय सिंहलद्वीपं नवमशताब्दे गतवानासीत्। अपरस्तत्रत्याचार्यः प्रभाकरः सामुद्रिकव्यञ्जनानुवर्णननामकग्रन्थस्य तिब्बती-भाषयानुवादं कृतवान्।

जैनविद्यालयाः

तीर्थङ्कराणां विशेषतो महावीरस्य शिक्षण-व्यवस्थां जैनमतावलम्बिनो गणधराः सन्धारयन्तो शिष्यैर्नवानुयायिभिः सहानागारा एवेतस्ततो विचरन्तः सम्यक् ज्ञानस्य दर्शनस्य चारित्र्यस्य चोत्कर्षं स्वयमेव निष्ठापयन्तः शिष्यसात् कुर्वन्तिस्म। नैकशतवर्षाणि तेषु रीतिरियं साधु प्रचरिता। परवर्तिकाले श्वेताम्बरव्रतधारिणां जैनाचार्यमुनीनां च कृते गुहावासा मन्दिराणि च तीर्थ-क्षेत्रेषु प्रकल्पितानि। एतत्सर्वं तु वैदिकबौद्धशिक्षण-संस्थानकल्पमेव विकसितम्। तत्राष्ट-शताब्दं याक्च्चैत्यवासिनो दिगम्बरश्वेताम्बरमुनयः स्वैरं वर्धन्ते स्म।[1] तथापि नैष पन्थाः साधुरितिवनवासिनां पारम्परीणमुनीनां

---

१. जैनानां द्राविडसंघे तु

कच्छं खेत्तं वसहिं वाणिज्जं कारिऊण जीवंतो।
ण्हन्तो सीयलणीरे पावं पउरं ण संचेदि॥

—देवसेनः।

जैनसाधूनां कृते ग्रामादानादिकं शिलालेखेषु वर्णितमेव। तेषां संग्रहप्रवृत्ति-प्रदूषणस्य वर्णनं नाथूरामकृते जैनसाहित्य और इतिहास-ग्रन्थे पृ० ३५२-३५७ वर्तते।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मतमासीत् । चैत्यवासेन सह तत्रत्यानां शिथिलव्रताचारप्रवृत्तिः प्राभवत्[1] ।

भारते सा प्राचीनपरम्पराद्यापि महामनीषिणां कृतित्वे विलसत्येव । शान्तिनिकेतने रवीन्द्रनाथः ठक्कुरो वृक्षाणां शरणे माणवकानामध्यापनं कृतवान् । स विशालभवनानि नापैक्षत । वटवृक्षस्याधस्ताद् भूतल उपविश्य वैज्ञानिका अपि अनुसन्धानं कुर्वन्तु कारयन्तु चेति स विश्वविश्रुत-वैज्ञानिकं जगदीशवसुं पत्रेण संचेतयामास ।

सर्वोच्चविद्या स्वपितुर्वा स्वग्रामे वा नाध्येयेति रीतिरासीत् । ब्रह्मर्षेर्व्यास-स्य पुत्रः शुकः पितुः स्वाध्यायमधीत्य बृहस्पतेर्वेदान् सरहस्यान्, ससंग्रहान्, इतिहासं, राजशास्त्राणि चाशिक्षत । मोक्षशास्त्रं स जनकादध्यगीष्ट ।[2]

शिक्षण-विधिः

शिक्षायाः समारम्भः कस्यचित् शिशोर्मातुर्गर्भ एव भवतीति वैज्ञानिकानां सम्मतम् । लोकेऽस्मिन् जीवनस्य प्रथमक्षणादारभ्यान्तिमश्वासपर्यन्तं प्रति-क्षणं मानवः शिक्षत एव[3] । तथाप्यहं शिक्ष इति शिष्यभावोऽहं च शिक्षया-मीति गुरुभावो विद्यादानपथे शैशव एव प्रारभ्यते । पुरा भारते सुवयस्कानां जिज्ञासूनां शिक्ष्यमाणभावापन्नानां गृहस्थानामपि संख्या प्रचुरासीत्, ये विशेषज्ञान् सङ्गम्याविज्ञातं ज्ञातुमुपनीता अनुपनीता वा शिष्याः सन्तो ज्ञाना-मृतेनात्मतृप्तिमन्वभवन् ।

वैदिकशिक्षापद्धतौ गुरोर्जीवन-विधिं ज्ञान-निधिं चात्मसात्कर्तुं शिष्यः कश्चित्तस्यान्तेवासी बभूव । तदा शिक्षापद्धतिर्बाहुल्येन स्वाभाविकी बभूव । यथा कश्चित् पक्षी स्वशावकान् जीवनवृत्तिं शिक्षयितुमुत्पतति, तेन सह तस्य शावका अपि उत्पतन्ति भुञ्जिरे च, प्रतिपदमहर्निशं पितरं पक्षिण-मनुकुर्वाणा एव प्रतिदिनमभ्यस्यन्तोऽभीष्टजीवनविधौ निपुणा भवन्ति

---

१. आचार्यहरिभद्रः—संबोधप्रकरणस्य गुर्वधिकारः । तान् विगर्हयन् स कथयति—

कीवो न कुणइ लोयं लज्जइ पडिमाइ जल्लमुवणेई ।
सोवाहणो य हिंडइ बंधइ कटिपट्टयमकज्जे ॥ ३४ संबोधप्रकरणे, पृ० १४

(क्लीवो न करोति लुञ्चं लज्जते प्रतिमाया जल्यमुपनयति ।
सोपान्तकश्च हिण्डते बध्नाति कटिपट्टकमकार्ये ॥)

२. शान्तिपर्वणि ३११, ३१२ अध्यायतः ।

३. तथाहि—कौषीतकि-ब्राह्मणोपनिषदनुसारेणारुणिः समित्पाणिः स्वपुत्रेण श्वेतकेतुना सह राजानं चित्रमुपगतवान् प्रोवाच च उपायानीति । तं होवाच—ब्रह्मग्राह्यसि यो न मानमुपागा । एहि त्वा ज्ञपयिष्यामीति । १.१ । अत्र अन्यत्र च वयस्कानां प्रशिक्षणं दृश्यते ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तथैव शिष्या अपि पितुर्वा गुरोर्वा जीवनविधिं सर्वशोऽनुकुर्वाणा अभीष्ट-ब्रह्मचर्या-विधौ निपुणा भवन्ति स्म। अन्येषूद्योगेष्वपि एवमेव तस्य प्रगतिः समभवत्। अस्यां प्रक्रियायां शिक्षमाणस्य शिक्षकस्य च ज्ञानादान-प्रदानयो-रुत्कटाभिलाषो भूयिष्ठोऽभूत्। सोऽयमभिलाषस्तयोः प्रोत्साहकोऽभवत्।

शिष्योऽपश्यद् यन्मे गुरुर्ज्ञानेन सामर्थ्यवानस्ति, महानस्ति। अहमपि तज्ज्ञानमात्मसाकृत्य सामर्थ्यं माहात्म्यं च लप्स्य इति। प्रतिरूपो मे शिष्यो भवत्विति भूयो भूयः समीहमानो गुरुः स्वीयं सर्वस्वं ज्ञाननिधिं शिष्याय परि-ग्राहयन् परितोषमन्वभवत्। इदमासीत्तस्य जीवनस्य परमोद्देश्यं साफल्यं च। स्वज्ञानतन्तिं शाश्वतीकर्त्तुं गुरुरात्मसर्वस्वं ज्ञाननिधिं शिष्याय न्यासीकृतवान्।

गुरुर्वेदमन्त्रादीन् स्वस्मिन् प्रभविष्णुतमान् विधातुमुदैरयत्। शिष्य-स्ताननुब्रवीति स्म। तथा हि 'ऋग्वेदे अन्यो अन्यस्य वाचं शक्तस्येव वदति शिक्षमाणः। ७.१०३.५। अनुब्रुवाणोऽध्येति न स्वपन्। ५.४४.१३।

वैदिकी शिक्षा मौखिकी बभूव। मात्रास्वरयोर्ज्ञानं यथोच्चारणेन गृह्यते तथा लिखितस्य पाठेन न भवतीति सत्यमेव। स्वरपरिचयो हस्तमुद्राभिरपि गृहीतः।[1]

ऋग्वेदस्य कतिपयसूक्तानि ऋषीणां व्याख्यानान्येव सन्ति। एतेषु सूक्तेषु प्रथममण्डलस्य द्वात्रिंशसूक्तम् 'इन्द्रस्य नु वीर्याणि प्रवोचं यानि चकार प्रथमानि वज्री" इति सुप्रसिद्धम्।

वैदिकसूक्तानां कण्ठाग्रीकरणं तु महत्त्वपूर्णमासीदेव, किन्तु नैतन्मात्रं

---

१. स्तोत्राणि कथं वाच्यमिति ब्रह्मचारी अनुब्रुवन् शिक्षते स्म। तद्यथा ऋग्वेदे
उदप्रुतो न वयो रक्षमाणा वावदतो अभ्रियस्येव घोषाः।
गिरिभ्रजो नोर्मयो मदन्तो बृहस्पतिमभ्यर्का अनावन्॥ १०.६८.१
डा० पाण्डुरङ्गवामनो मौखिकशिक्षणस्य गुणवत्तां सनातनतां चाकलयन् लिखति—
Oral instruction was the cheapest and most aceurate method of imparting learning. In ancient times writing materials were not easily available and written texts could not be handled easily and would have been extremely costly··· Even in the twentieth century...there are hundreds of Brāhmaṇas who learn not only the whole of the Ṛgveda by heart but also commit to memory Pada text of the Ṛgveda, the Aitareya Brāhmaṇa and Āraṇyka also and the six Vedāṅgas. History of Dharmaśāstra Vol. II Part. I P.348.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पर्याप्तं सम्मतम् । अत एव तेषामर्थज्ञानमवश्यमेव सन्धारणीयमिति निरुक्ते सालंकृति प्रोक्तम्—

स्थाणुरयं भारहारः किलाभूद् अधीत्य वेदं न विजानाति योऽर्थम् ।
योऽर्थज्ञ इत् सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा ।।

यद् गृहीतमविज्ञातं निगदेनैव शब्द्यते
अनग्नाविव शुष्कैन्धो न तज्ज्वलति कर्हिचित्

मनुनापि प्रतिपादितम्—

अज्ञेभ्यो ग्रन्थिनः श्रेष्ठा ग्रन्थिभ्यो धारिणो वराः ।
धारिभ्यो ज्ञानिनः श्रेष्ठा ज्ञानिभ्यो व्यवसायिनः ।।

ऋग्वेदानुसारेण सर्वोच्चविदुषां परिषत्सु जिज्ञासवः स्वीयां विचिकित्सां समादीधपम् । तत्र कश्चिद्हरो जिज्ञासामधोविधं प्रकटति—

पाकः पृच्छामि मनसाविजानन् देवानामेना निहिता पदानि
वत्से वष्कयेऽधि सप्त तन्तून् वितत्निरे कवय ओतवा उ
अचिकित्वाञ्चिकितुषश्चिदत्र कवीन् पृच्छामि विद्मने न विद्वान् ।

ऋग्वेद १.१६४.५,६

पृच्छामि त्वा परमन्तं पृथिव्याः पृच्छामि यत्र भुवनस्य नाभिः ।
पृच्छामि त्वा वृष्णो अश्वस्य रेतः पृच्छामि वाचः परमं व्योम ।।
इयं वेदिः परो अन्तः पृथिव्या अयं यज्ञो भुवनस्य नाभिः ।
अयं सोमो वृष्णो अश्वस्य रेतो ब्रह्मायं वाचः परमं व्योम ।।

ऋग्वेदे १.१६४.३४,३५

ब्रह्मोद्ये शास्त्रार्थस्य विधानेन रहस्यात्मकविषयानधिकृत्य मनीषिणां व्याख्यानमभवत् । तथाहि—अश्वमेधयज्ञे यजमानस्याभिषेकात् प्रागेव होता प्रश्नमपृच्छत्—किं नाम वाचः परमं व्योम । ब्रह्मोत्तरं प्रायच्छत्—ब्रह्मैवाक्षरात्मिकाया वाचः परमं व्योम ।[1]

शतपथ ब्राह्मणे ब्रह्मोद्येन प्रशिक्षणस्य प्रकरणमधोविधं वर्तते—

शौचेयो हि प्राचीनयोग्यः । उद्दालकमारुणिमाजगाम ब्रह्मोद्यमग्निहोत्रं विविदिषिष्यामीति । तदनन्तरं स प्रश्नद्वात्रिंशत्कं साकल्येनापृच्छत्[2] । उद्दालक उत्तराणि क्रमशः प्रोक्तवान् ।[3] एकैकं प्रश्नोत्तरं श्रुत्वा शौचेयो ज्ञप्तो-

---

१. तैत्तिरीयसंहिता ७.४.१८
२. का तेऽग्निहोत्री । को वत्सः । किमुपस्रष्टेत्यादीनि ,
३. इडैव मे मानवी अग्निहोत्री । वायव्यो वत्स इत्यादीनि ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्मीति सूचितवान् । अन्ततः स उवाच—इमानि समित्काष्ठानि । उपायानि भगवन्तमिति । उद्दालक उवाच—यदेवं नावक्ष्यो मूर्धा ते व्यपतिष्यत् । एहि, एहीति । तथेति । तं ह उपनिन्ये । तस्मै हैतां शोकतरां व्याहृतिमुवाच—

यत् सत्यं तस्मादु सत्यमेव वदेत् । ११.५.३.१—१३ उद्धृतम् ।

अध्येयविषयस्य प्रगुणतां संश्राव्याचार्यः शिष्यं तस्मिन् विषये ध्यानावस्थितमकरोत् । कठोपनिषदि यमाचार्यः 'ओऽम्' इति पदस्य व्याख्यां कृत्वा नचिकेतसं प्रोवाच—

'एतद्ध्येवाक्षरं ब्रह्म एतदेवाक्षरं परम् ।
एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते ।।

शिक्षणस्य पूर्णत्वमाप्तुं सोपानपदानि छान्दोग्योपनिषदि निदर्शितानि । तद्यथा—(१) आचार्यदर्शनम् (२) उपदेशस्य श्रवणम् (३) तस्य मननम् (४) तस्य बोधः (५) तदनुसारेण कर्तृत्वम् (६) विज्ञानं च ।[1]

अस्यामुपनिषदि परतः सत्यं, विज्ञानं मतिः, श्रद्धा, निष्ठा, सुखं, भूमात्मा इत्यादयः क्रमशो ज्ञानस्य भूमयः प्रथिताः ।[2] अत्र सत्यं तु परमार्थसत्यम्, विज्ञानं नाम वास्तविकं ज्ञानम्, मतिर्हि मननम्, श्रद्धास्ति आस्तिक्यबुद्धिः, निष्ठा गुरुशुश्रूषादिरिति शाङ्करभाष्यम् । महाभारते श्रुतस्य चारित्र्योपेतत्वमनुशंसितम् ।[3]

प्रायः सर्वा उपनिषदो वयोतिगशिष्याणां प्रश्नस्य गुरूणामुत्तरस्य च संग्रहं प्रस्तावयन्ति । तद्यथा सुकेशादयो ब्रह्मान्वेषमाणाः समित्पाणयो भगवन्तं पिप्पलादमुपसन्नाः । पिप्पलादेन निर्दिष्टा वर्षमेकं तपसा, ब्रह्मचर्येण, श्रद्धया ते तत्र संवसन्ति स्म । तदनन्तरं सोऽधोलिखितानां प्रश्नानामुत्तराणि व्याख्यातवान्—

१. कुत इमाः प्रजा प्रजायन्त ।

---

१. छा० ७.८.१ । एतदधिकृत्य शङ्करो भाषते—आचार्यस्यान्यस्य चोपदेष्टुर्गुरोर्द्रष्टा भवति । ततस्तदुक्तस्य श्रोता भवति । तत एभिरिदमुक्तमेवमुपपद्यत इत्युपपत्तितो मन्ता भवति । मन्वानश्च बोद्धा भवति । एवमेवेदमिति । तत एवं निश्चित्य तदुक्तार्थस्य कर्तानुष्ठाता भवति । विज्ञातानुष्ठानस्यानुभविता भवति । छा० ७.९.१ श्रोता, मन्ता, बोद्धा, कर्ता, विज्ञाता चेत्यादि । २.७.१६.२५

२. बृहदारण्यकेऽपि—आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितं भवति । ४.५.६ ।

३. अभिन्नश्रुतचारित्रस्तस्मात् सर्वत्र पूज्यते । शान्तिपर्वणि २२३.५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

२. कति देवाः प्रजां विधारयन्ते, कतर एतत् प्रकाशयन्तो कः पुनरेषां वरिष्ठः ।

३. 'कुत एष प्राणो जायते' इत्यादि ।

४ 'एतस्मिन् पुरुषे कानि स्वपन्ति, कान्यस्मिन् जाग्रति' इत्यादि ।

५. आजीवनं स ओ३म्-ध्यायी कतमं लोकं जयति ।

६. क्वासौ षोडशकलः पुरुषः ।

परस्परं विवदमानाः पण्डिता अपि यदि कस्यचिद् मनीषिणो विशेषतरं ज्ञानमन्वभवन्, तर्हि तस्य प्रवचनेन तद्विशेषमधिगतवन्तः ।[1]

यज्ञसमारम्भेऽपि क्वचित् विशेषज्ञानां प्रवचनमायोजितम् । उषस्ति-चाक्रायणो यजमानेन राज्ञा नियुक्तोऽपरान् उदगातृ-प्रस्तोतृ-प्रतिहर्तृन-शिक्षयत ।[2]

महाशालाः महाश्रोत्रियाः सत्ययज्ञः, इन्द्रद्युम्नः, जनः, बुडिलश्च, को नु आत्मा किं ब्रह्मेति विषयमधिकृत्य समितौ मीमांसां चक्रुः । न खलु तेषां यदैकमतं बभूव, सर्वे ते सम्मिल्य जिज्ञासा-शमनायोद्दालकमभ्यगमन् । उद्दालकः स्वीयमसामर्थ्यं प्रतीत्य तान् तद्विषयकं परमज्ञमश्वपतिमभ्य-गमयत् । तेऽश्वपतिमूचुः[3]—आत्मानमेवेमं वैश्वानरं सम्प्रत्यध्येषि । (जानासि) तमेव नो ब्रूहीति । जिज्ञासूनामधोविधा प्रतिपत्तिरात्मविषयिणी बभूव —

प्राचीनशालस्य	द्यौरात्मा ।
सत्ययज्ञस्य	विश्वरूप (आदित्यः) आत्मा ।
इन्द्रद्युम्नस्य	वायुरात्मा ।
जनस्य	आकाश आत्मा ।
बुडिलस्य	आप आत्मा ।
उद्दालकस्य	पृथिवी आत्मा ।

तेषां धारणा सर्वथानवद्या नासीदिति अश्वपतिर्बभाषे—

'एते वै खलु यूयं पृथगिवेममात्मानं वैश्वानरं विद्वान्, सोऽन्नमात्थ । यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते, स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति इत्यादि ।[3]

'गुरुरेव शिष्यं पृच्छति, तस्योत्तरं श्रुत्वा तत्र त्रुटिं दर्शयित्वा सत्यमुत्तरं

---

१. छान्दोग्ये १.८ प्रवाहणस्य प्रवचनेन शिलको लाभान्वितो भवत्येवमेव ।

२. छान्दग्ये १.१०

३. छान्दोग्योपनिषदि ५.१७ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रकाशयति' इति पूर्वोक्तेन सन्दर्भेण प्रतीयते ।[1]

सत्यस्य ज्ञानं प्रत्यक्षदर्शनेन स्पष्टतरं भवतीति निगूढविषयाणां व्याख्यानं सोदाहरणं सप्रयोगं सरूपकं चोदाहृतम् ।[2] आरुणिः स्वपुत्रं श्वेतकेतुं तदुपदेष्टुं कल्पते—येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति । सोदाहरणं व्याख्यातं यथा—

इमाः सोम्य नद्यः पुरस्तात् प्राच्यः स्यन्दन्ते पश्चात् प्रतीच्यस्ताः समुद्रात् समुद्रमेवापि यन्ति । स समुद्र एव भवति । ता यथा तत्र न विदुरियमहमस्मीति। एवमेव खलु सोम्येमाः सर्वाः प्रजाः सत आगत्य न विदुः सत आगच्छामह इति । त इह व्याघ्रो वा सिंहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दंशो वा मशको वा यद् यद् भवन्ति तदा भवन्ति ।" नैकोदाहरणानि शिष्यस्य प्रबोधाय क्रमशो दीयन्ते स्म ।

तत्रासीत् सप्रयोग-व्याख्यानविधिः । यथा—न्यग्रोधफलमत आहरेति । इदं भगव इति भिन्धीति । भिन्नं भगव इति । किमत्र पश्यसीति । अण्व्य इवेमा धाना भगव इति । आसामङ्गैकां भिन्धीति । भिन्ना भगव इति किमत्र पश्यसीति । न किंचन भगव इति ।

तं होवाच—यं वै सोम्यैतमणिमानं न निभालयस एतस्य वै सोम्यैषोऽणिम्न एव महान् न्यग्रोधस्तिष्ठति । श्रद्धत्स्व सोम्येति । स य एषोऽणिमैतदात्म्यमिदं सर्वं तत् सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति ।

भूय एव मा भगवान् विज्ञापयत्विति । तथा सोम्येति होवाच ।

निदर्शनम्

बृहदारण्यकोपनिषदि महाराजोऽजातशत्रुर्बालाकिं नैकविधं शिक्षयन् निदर्शनमाश्रयते । तद्यथा—

यो ह वै शिशुं साधनं सप्रत्याधानं सस्थूणं सदामं वेद सप्त ह द्विषतो भातृव्यानवरुणद्धि, अयं वाव शिशुर्योऽयं मध्यमः प्राणस्तस्येदमेवाधानमिदं प्रत्याधानं प्राणः, स्थूणान्नं दाम । तमेताः सप्ताक्षितय उपतिष्ठन्ते, तद्या

---

१. अत्र आचार्यः शङ्करोऽनुसन्दधाति स्वभाष्ये—

नन्वयमन्याय आचार्यः सन् शिष्यं पृच्छतीति ।

नैष दोषः यद् वेत्थ तेन मोपसीद । ततस्त ऊर्ध्वं वक्ष्यामि' । छान्दोग्ये ७.१ । अन्यत्राप्याचार्यस्याप्रतिभानवति शिष्ये प्रतिभोत्पादनार्थः प्रश्नो दृष्टोऽजातशत्रोः — क्वैष तदाभूत् कुत एतदागात् इति ।

२. आरुणिः श्वेतकेतुमुपदिशति—सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः । स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यम् । स आत्मा तत्त्वमसि श्वेतकेतो ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

इमा अक्षन् लोहिन्यो राजयस्ताभिरेनं रुद्रोऽन्वायत्तः। इत्यादि २.२.१-२

महाभारते निदर्शनप्रयोगः समुदाहृतोऽधोविधं भीष्मेण युधिष्ठिरस्य प्रशिक्षणे—

निदर्शनानि सूक्ष्माणि शृणु मे भरतर्षभ।
अप्रमत्तो यथा धन्वी लक्ष्यं हन्ति समाहितः॥
युक्तः सम्यक् तथा योगी मोक्षं प्राप्नोत्यसंशयम्। शान्ति, २८९.३१

व्याख्यानम्

उपनिषद्युगे आचार्यस्य व्याख्यानमधोविधं क्वचिदभवत्—

कोऽयमात्मेति, वयमुपास्महे। कतरः स आत्मा? येन वा पश्यति, येन वा शृणोति, येन या गन्धानाजिघ्रति, येन वा वाचं व्याकरोति, येन वा स्वादु चास्वादु च विजानाति?

यदेतद् हृदयं मनश्चैतत्। संज्ञानमाज्ञानं विज्ञानं प्रज्ञानं मेधा दृष्टिर्धृतिर्मतिर्मनीषा जूतिः स्मृतिः, संकल्पः क्रतुरसुः कामो वश इति सर्वाण्येतानि प्रज्ञानस्य नामधेयानि भवन्ति।

एष ब्रह्मैष इन्द्र एष प्रजापतिरेते सर्वे देवा इमानि च पञ्च महाभूतानि पृथिवी वायुराकाश आपो ज्योतींषीत्येतानीमानि च क्षुद्रमिश्राणीव बीजानीतराणि चेतराणि चाण्डजानि च जारुजानि च स्वेदजानि चोद्भिज्जानि चाश्वा गावः पुरुषा हस्तिनो यत् किं चेदं प्राणिजङ्गमं च पतत्रि च यच्च स्थावरं सर्वं तत् प्रज्ञानेत्रम्। प्रज्ञाने प्रतिष्ठितं प्रज्ञानेत्रो लोकः। प्रज्ञा प्रतिष्ठा। प्रज्ञानं ब्रह्म।

स एतेन प्रज्ञेनात्मनास्माल्लोकादुत्क्रम्यामुष्मिन् स्वर्गे लोके सर्वान् कामानाप्त्वामृतः समभवत् समभवत्।[1]

बृहदारण्यके महर्षियाज्ञवल्क्यस्य स्वपत्नीं 'मैत्रेयीं' प्रति व्यख्यानमनुत्तममेव। तद्यथा—स होवाच याज्ञवल्क्यः—प्रिया बतारे नः सती प्रियं भाषस एह्यास्स्व व्याख्यास्यामि। ते व्याचक्षाणस्य तु मे निदिध्यास्वेति। स होवाच—'न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति।···न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रियं भवति। आत्मा वा अरे द्रष्टव्यः, श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम्।[2]

व्याख्याने यदि नाम शङ्का समुत्पद्येत, तर्हि तस्याः प्रश्नोत्तरेण समाधानं

---

१. ऐतरेयोपनिषद् ३.१—४

२. बृहदारण्यके २.४.५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

क्रियते स्म। तथा हि—पूर्वोक्तव्याख्यानमध्ये मैत्रेयी शङ्कां प्रकटयति—

प्रश्नः—अत्रैव मा भगवानमूमुहत् न प्रेत्यसंज्ञास्तीति।'

उत्तरम्—न वा अरेऽहं मोहं ब्रवीम्यलं वा अर इदं विज्ञानाय। यत्र हि द्वैतमिव भवति तदितर इतरं जिघ्रति, तदितर इतरं पश्यति. इतर इतरं शृणोति, तदितर इतरमभिवदति, तदितर इतरं मनुते तदितर इतरं विजानाति। यत्र वा अस्य सर्वमात्मैवाभूत्, तत्केन कं जिघ्रेत्, तत् केन कं पश्येत्, तत् केन कं शृणुयात्, तत् केन कमभिवदेत्, तत्केन कं मन्वीत, तत् केन कं विजानीयात्। येनेदं सर्वं विजानाति, तं केन विजानीयात्। विज्ञातारमरे केन विजानीयात्।[1]

अस्मिन् व्याख्याने स्पष्टं दृश्यते यत् संक्षेपेण कथनमभीष्टं न प्रतिभाति। यत् केवलमेकेन वाक्येन कथयितुं शक्यते तदेव वाक्यविंशत्या प्रोच्यते। अपरो विशेषो व्याख्यानस्यास्य संवादात्मकतास्ति।

अत्रैव वैदिकवाङ्मयस्य सर्वोत्कृष्टो विश्वहिताय सन्देशो मधुविद्येति ख्यातो विलसति।[2]

शब्दानां बाहुल्यं वाग्विस्तारो वा व्याख्यानेऽस्पष्टतां वितनोतीति सम्प्रतीतमासीत् वैदिकमनीषिणाम्। बृहदारण्यके निर्दिष्टमेतत्—

तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः।
नानुध्यायाद् बहुञ्छब्दान् वाचो विग्लापनं हि तत्॥ ४.४.२१

एतदेव समर्थितं भारद्वाज-श्रौतसूत्रे—

अधीयानो नान्या वाचो वदेत्। ११.१२.१७

औपनिषदशिक्षणं बौद्धिकव्यायाम इव शिष्याणां ज्ञानवर्धनाय, आध्यात्मिक-सन्देह-निवारणाय चाभवत्। महाभारतयुगे पुनः शिक्षण-विधिः कर्मसु प्रवृत्तिमुत्सेचयितुमुद्युक्तः। एतस्य सुविज्ञातमुदाहरणं श्रीमद्भगवद्गीता प्रस्तौति। तत्र कृष्ण आचार्यः, अर्जुनश्च शिष्यः, उपदेशस्थलं महाभारतीय-युद्धभूमिः, कालस्तूभयपक्षस्य सैन्ययोर्युद्धारम्भणम्। तात्कालिकोपयोगः कृष्णस्योपदेशस्यास्त्येव येनार्जुनो युद्धाय कृतनिश्चयो बभूव। अत्रापि सोपनिषद् ब्रह्मज्ञानधारा प्रवहति। यतो हि नाम कृष्णोऽर्जुनं स्मारयति—

'स हि धर्मः सुपर्याप्तो ब्रह्मणः पदवेदने।
परं हि ब्रह्म कथितं योगयुक्तेन तन्मया॥ आश्व० १६.११,१२

स्वोदाहरण-सम्पृक्तं संवादपरकशिक्षणं प्रवर्तते गीतायाम्। तथाहि—

---

१. बृहदारण्यके २.४.१३, १४

२. बृहदारण्यके २.५ मधुब्राह्मणम्।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अर्जुनः —कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसम्मूढचेताः ।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम् ॥
२.७
न योत्स्य इति गोविन्दमुक्त्वा तूष्णीं बभूव ह ॥ २.९
कृष्णः —कथं स पुरुषः पार्थ कं घातयति हन्ति कम् । २.२१
अर्जुनः —तत्किं कर्मणि घोरे मां नियोजयसि केशव । ३.१
तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम् । ३.२
कृष्णः —न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किंचन ।
नानवाप्तमवातव्यं वर्त एव च कर्मणि ॥ ३.२२
यदि ह्यहं न वर्तेयं जातु कर्मण्यतन्द्रितः ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥ ३.२३
उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम् ।
संकरस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः ॥

अन्योऽयं विशेष एतादृशस्य शिक्षणस्य यत् सार्वजनिकहिताहितपरिवेष्टितमिदं प्रवर्तते । किं भविष्यति लोकस्येदृशेनाचरणेनेति पदे पदे व्याकृतम् । ईदृशी शिक्षण-पद्धतिः प्रभावोत्कर्षिणी भवति ।

व्याख्यानस्य प्रभावमतिशाययितुं तस्य परम्परानुवृत्तिः पुराणपुरुषप्रसक्तिश्च प्रदर्शिता । तद्यथा—

इमं विवस्वते योगं प्रोक्तवानहमव्ययम् ।
विवस्वान् मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ॥ ४.१
एवं परम्पराप्राप्तमिमं राजर्षयो विदुः । ४.२
स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः । ४.३

वक्तुर्माहात्म्यं नैकशस्तस्य मुखेनैव वर्णनेन शास्तुः प्रकर्षेण व्याख्यानस्योत्तमतां प्रचुरयति । तद्यथा—

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् ।
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति ॥ ५.२३

अस्मादेव कारणादेकादशेऽध्याये कृष्ण आत्मन ऐश्वरं रूपं शिष्यायार्जुनाय दर्शयति ।

स्वभाषणेऽर्जुनः कृष्णेन पुनः पुनः नाम्ना सर्वनाम्ना च सम्बोध्यते । इदं तु तस्य शिष्यस्य ध्यानाकर्षणायालम् ।

फलश्रुतिवर्णनेन व्याख्यानस्य महिमा प्रतिबोधित इति स्पष्टं प्रतिभाति । तद्यथा—

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ ।
एतद् बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत ।। १५.२०

महाभारतयुगे कश्चित् शास्ता स्वीयं मतं द्रढिष्ठमिति प्रभावयितुकामः पूर्वेषां महत्तमानां मनीषिणां मतानि उदाहरत् । तथाहि—भीष्मः शान्ति-पर्वणि मनुमतमुदाहरति ।[1] अपरं च स शुक्राचार्यस्य मतमुदाहरति ।[2] स बार्हस्पत्यं चोद्धरति ।[3] स्ववक्तव्यस्य प्रवर्तकाः केवलं नाम्नापि पुरस्कृताः । यथा-बृहस्पतिः, विशालाक्षः, इन्द्रः, भरद्वाजः गौरशिराश्च ।[4]
दृष्टान्तनिर्भरं व्याख्यानं विषयस्य स्पष्टीकरणाय बभूव । तद्यथा—

यथा हि गर्भिणी हित्वा स्वं प्रियं मनसोऽनुगम् ।
गर्भस्य हितमाधत्ते तथा राज्ञाप्यसंशयम् ।। शा० ५६.४५

ऐतिहासिकवृत्तानामुद्धरणेन व्याख्यानं प्रभावोत्पादकं विहितम् ।[5] अलंकार-प्रणीता भाषा व्याख्याने प्रायोजि । तथा हि—

एतत्ते राजधर्माणां नवनीतं युधिष्ठिर । शा० ५८.१

शान्तिपर्वणि सप्तत्रिंशदधिकत्रिशततमेऽध्याये व्यासस्य सृष्टि-विषयकं व्याख्यानं संकलितम् । नारायणो नाभितो ब्रह्माणं पुत्रं ससृजे । एतद् व्याख्यानं संवादरूपकं रोचते यथास्थानमात्मकथात्मकमिदं व्याख्यानं नाटकीयतां क्वचिद् व्यनक्ति ।

यदा कश्चिज्जनोऽनर्हमाचरति विचरति वा तदा तस्मै प्रत्तं सुज्ञानं प्रभावि भवतीति धारणासीत् । महाभारते साध्वी ब्राह्मणं क्रोधसन्तप्तं तेजसा ज्वलन्तं दृष्ट्वा सान्त्वपूर्वं वचः (उपदेश-निधिं) प्रायच्छत् ।[6]

---

१. अद्भ्योऽग्निर्ब्रह्मतः क्षत्रमश्मनो लोहमुत्थितम् ।
तेषां सर्वत्रगं तेजः स्वासु योनिषु शाम्यति ।। ५६.२४
अयो हन्ति यदाश्मानमग्निना वारि हन्यते ।
ब्रह्म च क्षत्रियो द्वेष्टि तदा सीदन्ति ते त्रयः ।। ५६.२५

२. उद्यम्य शस्त्रमायान्तमपि वेदान्तगं रणे ।
निगृह्णीयात् स्वधर्मेण धर्मापेक्षी नराधिपः ।। ५६.२८

३. क्षममाणं नृपं नित्यं नीचः परिभवेज्जनः ।। ५६.३९

४. शान्ति ५८.१—३

५. राजा सगरः स्वतनयमसमञ्जसम्, ऋषिरुद्दालकः स्वपुत्रं श्वेतकेतुं च तयोर्दुर्वृत्तेन लोकान् रक्षितुं तत्यजथुः । शान्ति० ५७.९, १०

६. आरण्यकपर्वणि १९७.१९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वैदिकशिक्षणे ब्रह्मस्वरस्य विशेषोपयोगो लक्ष्यते। भाषणस्य स्पष्टता, सुबोधता, मञ्जुलता, श्रवणीयता, धाराप्रवाहशीलता, क्रमानुकूलता, गम्भीरता, उच्चता च ब्रह्मस्वरं प्रतीकयन्ति।[1]

यथा मनुर्निर्दिशति—

अहिंसयैव भूतानां कार्यं श्रेयोऽनुशासनम्।
वाक्चैव मधुरा श्लक्ष्णा प्रयोज्या धर्ममिच्छता॥ २.१५९

आध्यात्मिक-प्रशिक्षणस्य परा विभूतिर्निर्विकल्पकेन समाधिना प्रापणीयेति शङ्करो विवेकचूडामणौ स्थापयत्यधोविधम्—

श्रुतेः शतगुणं विद्यान्मननं मननादपि।
निदिध्यासं लक्षगुणमनन्तं निर्विकल्पकम्॥ ३६५

परवर्तियुगेऽपि प्रश्नोत्तरपद्धत्या प्रशिक्षणस्य विधिर्मिलिन्दप्रश्नानुसारेण सुविकसितः प्रतिभाति। तत्र प्रश्नवैचित्र्येण उत्तरवैचित्र्येण चाध्यापनमध्ययनं च मनोरञ्जकं सहजभावेन ग्राह्यं चास्ति।

गौतमबुद्धः कुशलशास्तासीत्। स तु प्रत्यक्षदर्शनेन, उदाहरणेन, कथाभिश्च स्वीयज्ञानस्रोतसि भिक्षूनवतार्य प्रवचनेन गभीरतमगूढविषयानशिक्षयत्।

जैनप्रशिक्षणस्य पञ्चाङ्गानि बभूवुः—वाचना, पृच्छना, अनुप्रेक्षा (अधीतविषयाणां मननम्), आम्नायः (आवृत्तिकरणम्, व्याहारश्च) धर्मोपदेशश्च।

विद्यार्थिनः सोत्साहं पठन्ति स्म। रात्रौ दीपस्य प्रकाशेन पठनस्य रीतिरासीत्। यदि नाम दीपे तैलाभावः स्यात्तर्हि करीषज्वालायाः प्रकाशेन विद्यार्थिनः पठन्ति स्म।[2]

बहूनां विषयाणां ज्ञानायाद्यापि विद्यार्थिनो नवकर्मिका भवन्ति। शिल्पकलादीनां शिक्षाग्रहणाय गुरोर्गृहे वसतां नवकर्मिकाणां प्रावीण्यं गुरोराध्यक्ष्ये समवर्धत।

याज्ञवल्क्यो निरूपयति—

विज्ञानमुच्यते शिल्पं हेमकुप्यादिसंस्कृतिः।
नृत्तादिकं च यत्प्राप्तुं कर्म कुर्याद् गुरोर्गृहे॥ २.१८४

भारतीयशिक्षणपद्धतेरौदात्त्यं वर्णयन् विवेकानन्दः पर्यालोचयत्—

Whatever India now holds as a proud possession, has been undeniably the result of such labour on the part of her worthy

१. दीर्घनिकाये जनवसभसुत्त २.१।

२. महाभाष्यं ३.१.२६ अधिकृत्य।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

sons in days gone by and the truth of this remark will become at once evident on comparing the depth and solidarity as well as the unselfishness and the earnestness of purpose of Indian ancient scholarship with the results obtained by our modern Universities.[1]

भारतीय-शिक्षण-विधिरारम्भिकयुगादेव सर्वाङ्गपूर्णो बभूव। तद्यथा दक्षो विज्ञापयति—

वेदस्वीकरणं पूर्वं विचारोऽभ्यसनं जपः।
तद्दानं चैव शिष्येभ्यो वेदाभ्यासो हि पञ्चधा॥ २.३४

अनुशासनम्

ब्रह्मचारिणो जीवनं सात्त्विकं सरलं नाति-व्ययसाध्यं चासीत्। गोपथ-ब्राह्मणानुसारेण तस्य जीवनपथस्तपोमय आसीत्। स धरातले शेते स्म। संगीतनृत्यपरिभ्रमणादिष्वनासक्तो बभूव। स ख्याति-निद्रा-क्रोधात्मप्रशंसादीनां रमणीय-सुगन्धिनानभिभूतः प्रावर्तत।[2]

ब्रह्मचर्यव्रतस्य निदर्शनमन्यत्रापि भवति। तस्मै सुरा विषमेव, नारी प्रपातः, लाभयशःसत्कारादयः पङ्क एव, मनुजेन्द्रः, शस्त्रधरः, ऐश्वर्यशाली जनश्चाशीविषाः। एते परित्याज्याः। स गोष्ठे, मद्यपस्थाने, दुष्टजनसभायां, स्वर्णरजतादिविक्रयस्थाने नावतिष्ठेत।[3]

बौद्धशासने भिक्षूणामनुशासनमासीदधोविधम्—प्राणातिपातादत्तादान-मृषावाद-सुरामैरेय - मद्यप्रमादस्थानविकालभोजन - नृत्यगीतवादितविशूकदर्शन-माला - गन्धविलेपनमण्डन-विभूषणोच्चाशयन-महाशयनजातरूप-रजतप्रतिग्रहणानि सर्वथा परित्याज्यानि। स्वीयेनोदात्ताचरणेन लोकेषु सत्कृतशीला भिक्षवः समाजस्य मार्गदर्शनक्षमा भवन्त्विति गौतमादेशो बभूव। फलतो भिक्षुसंघेषु चिरमेव जलाशयवन्नैर्मल्यं प्रशान्तिश्चाशोभेताम्।

विदुषां प्रतिष्ठा

'स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते।'

समाजे विदुषां महती प्रतिष्ठासीत्। वैदिकयुगे ते देवा इति सम्मानिताः। तथा हि –विद्वांसो हि देवाः।[4] ये ब्राह्मणाः शुश्रुवांसोऽनूचानास्ते मनुष्येषु

1. Complete Works Vol. IV p. 219
२. गोपथब्राह्मण २.५-७; २, १, ९। ३. चुल्लनारदजातक ४७७।
४. शतपथ० ३.७.३.१०।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

देवाः ।[1] एते देवा यत् प्रत्यक्षं ब्राह्मणाः ।[2] ऋग्वेदानुसारेण—दर्शनरहस्यज्ञः पितुरपि पितास्ति ।[3]

अपरं च (विदुषा) लोकः पच्यमानश्चतुर्भिधर्मैर्ब्राह्मणं भुनक्ति—अर्चया च दानेन चाज्येयतया चावध्यतया च ।[4]

महाभारतानुसारेण स एव ब्राह्मणः पूज्यो भवति, यो विद्यया तपसा जन्मना वा वृद्धो भवति ।[5] अन्यच्च—

यस्त्वेवं ब्रह्म तपसान्वेति विद्वां-
स्तेन श्रेष्ठो भवति जीवमानः ।। आर० १९०.६६

विद्वान् स्वविद्यया तपसा च भ्राजते ।[6] अन्यच्च—द्विजानामपि प्रज्ञावन्तः परा मताः ।[7]

भीष्मेण परमं सत्यमुद्घाटितम्—प्रज्ञा प्रतिष्ठा भूतानामिति । शान्ति० १७३.२

उपनिषत्सु विदुषां महती प्रतिष्ठा दृश्यते । तत्र प्रसिद्धोऽस्ति जनको यः स्वीयं सर्वस्वमेव याज्ञवल्क्यस्य ज्ञानवैदग्ध्येन प्रह्वीभूतस्तस्मै दातुमियेष । महाभारते विद्यार्णव-पारङ्गतस्य व्यासस्य पाण्डवानां मध्येऽनुत्तमप्रतिष्ठा दृश्यते । तथैव विदुरस्य धार्तराष्ट्रेषु पाण्डवेषु च प्रतिष्ठापदं वरीवर्ति । रामायणे वसिष्ठस्य राजगुरुत्वेन महानादरो लक्ष्यते ।

आचार्या ऋषयश्च विद्वांस आसन् । तान् सर्वान् रामः स्वयमेवार्चाविधानेन पूजयामास । तद्यथा रामायणस्यारण्यकाडे रामोऽगस्त्यं पूजयति—

एवमुक्त्वा महाबाहुरगस्त्यं सूर्यवर्चसम् ।
जग्राहापततस्तस्य पादौ च रघुनन्दनः ।। १२.२४

अभिवाद्य तु धर्मात्मा तस्थौ रामकृताञ्जलिः ।

अगस्त्योऽभिवदति

राम प्रीतोऽस्मि भद्रं ते परितुष्टोऽस्मि लक्ष्मण ।
अभिवादयितुं यन्मां प्राप्तौ स्थः सह सीतया ।। १३.१

कालिदासो विदुषां समादरस्योज्ज्वलतमं रूपं रघुवंशे चित्रयति । तत्र

---

१. शतपथ० २.२.२.६
२. तैत्तिरीय-संहिता ७.३.१
३. कविर्यः पुत्रः स ईमा चिकेत ।
यस्ता विजानात् स पितुष्पितासत् ।। १.१६४.१६
४. शतपथ० ११.५.७.१
५. आदि० ८४.२
६. आदि० ७२.२ ७. शान्ति० २८६.२१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्नातको वरतन्तुशिष्यः कौत्सो गुरुदक्षिणां याचितुं रघुमुपगच्छति । रघुस्तस्य स्वागतार्थं प्रत्युज्जगामेत्यादिकमधोविधं घटितम्—

स मृण्मये वीतहिरण्मयत्वात् पात्रे निधायार्घ्यमनर्घशीलः ।
श्रुतप्रकाशं यशसा प्रकाशः प्रत्युज्जगामातिथिमातिथेयः ॥ ५.२
तमर्चयित्वा विधिवद् विधिज्ञस्तपोधनं मानधनाग्रयायी ।
विशांपतिर्विष्टरभाजमारात् कृताञ्जलिः कृत्यविदित्युवाच ॥ ५.३
अप्यग्रणीर्मन्त्रकृतामृषीणां कुशाग्रबुद्धे कुशली गुरुस्ते ॥ ५.४
तवार्हतो नाभिगमेन तृप्तं मनोनियोगक्रिययोत्सुकं मे ॥ ५.११
तं भूपतिर्भासुरहेमराशिं लब्धुं कुबेरादभियास्यमानात् ।
दिदेश कौत्साय समस्तमेव शृङ्गं सुमेरोरिव वज्रभिन्नम् ॥ ५.३०
जनस्य साकेतनिवासिनस्तौ द्वावप्यभूतामभिनन्द्यसत्त्वौ ।
गुरुप्रदेयाधिकनिस्पृहोऽर्थी नृपोऽर्थिकामादधिकप्रदश्च ॥ ५.३१

मनू राजानमादिशति यत् स स्नातकानां पूजको भवेत्—

आवृत्तानां गुरुकुलाद् विप्राणां पूजको भवेत् ।
नृपाणामक्षयो ह्येष निधिर्ब्राह्मोऽभिधीयते ॥ ७.८२
तस्माद्राज्ञा निधातव्यो ब्राह्मणेष्वक्षयो निधिः ॥ ७.८३

ब्राह्मणेभ्यो दत्तं दानमनन्तफलदं भवति । तद्यथा—

सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे ।
प्राधीते शतसाहस्रमनन्तं वेदपारगे ॥ ७.८५

विद्वद्भ्यो दक्षिणाया रीती राजसु सदैव प्रचरन्ती बभूव । आचार्याणां कृतेऽग्रहारादीनां दानं वेतनरूपेण सदैव प्रावर्तत । 'पेशवा' इति ख्याता राजाधिकारिणश्चतुर्लक्षरूप्यकाणां दक्षिणां प्राददुः ।[1] इयं दक्षिणा तु पुरस्काररूपेण ग्राह्यासीत् ।

हर्षस्य विद्वद्भ्यः सादर-सौम्यसम्भावना विशेषमुल्लेखमर्हति । विद्वद्वर्येण दिवाकरमित्रेण तस्य विन्ध्याटव्यां समागमस्तयोः परस्परमभ्यर्हणं च तादृशां महात्मनामौदात्त्येन सम्भूतं भवेन्नाम । यदि राज्ञामीदृशी प्रतिपत्तिर्विदुषां कृत आसीत्तर्हि सामान्यलोके सा प्रभूततमासीदित्यनुमातुं शक्यते । हर्षयुगीनश्चीनदेशीयो महापण्डितो ह्वेनसांगो भारते नैकस्थलेषु राजभिरपि सादरं समाहूतः सपर्यापात्रं बभूव । भारतीया विद्वांसो न केवलं स्वदेशेऽपितु विदेशेष्वपि, स्वीयेन ज्ञानप्रकाशेन तत्रत्यानां भूयिष्ठं समादरं लेभिरे ।

महाभारतकालत एव राज्ञां संगतौ विषमेऽपि काले पण्डितानां साहचर्यं

1. History of Dharmaśastra Vol. II. Part I p. 361.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दृश्यते। नैकराजानां नवरत्नपरिषदो विदुषां ज्ञानज्योतिर्भिर्विभ्राजन्ते स्म। पण्डितानां भारतभुवि पर्यटनेन सर्वेषां प्रदेशानां राज्ञां प्रजानां च मध्ये समादरस्तेषां कृतिषु प्राशस्त्यपूर्वकं निबद्धः। प्रसिद्धा महापण्डिता राजभिर्निमन्त्रितास्तेषामेव राजधान्यां यावज्जीवमपि सादरं वसन्ति स्म।

सायणाचार्यः स्वविद्वत्तया विजयनगरे साम्राज्यधुरंधर इत्युपाधिना राज्ञा मण्डितः।

भोजप्रबन्धे भवन्तु नाम बहवः कल्पिताः कथास्तस्य महाराजभोजस्य विद्वत्प्रतिभोत्कर्षप्रणयिन्यः, तथापि ताः कथा विदुषां सार्वत्रिकं शाश्वतं महार्हणं प्रकटयन्त्येव।

राजशेखरः कवीनां च मनीषिणां च परिषदमायोजयितुं राज्ञः प्रेरयति, यत्र तेषामुद्भटगुणानां परस्परतारतम्यपरीक्षणेन पुरस्कारा वितीर्येरन्। पुरा तत्रासन् तादृशा वदान्यशौण्डा राजानो – वासुदेव-सातवाहन-शूद्रक-साहसाङ्कादयः। स पाटलिपुत्रे पाणिनि-व्याडि-वररुचि पतञ्जलि-पिङ्गलादि-शास्त्रकाराणाम्, उज्जयिन्यां च कालिदास-मेण्ठ-भारवि-हरिचन्द्रादिकवीनां परीक्षायोजनं सपुरस्कारवितरणं काव्यमीमांसायां वर्णयति।

राजतरङ्गिण्यां कश्मीरनरेशानां विद्वत्सम्माननं वर्णितम्। तेषु राजा जयसिंहो विदुषां कृते सौधान् निर्मापयामास[1]। राजा जयापीडो नैकप्रदेशेभ्यो विदुष आमन्त्र्य तेभ्य आश्रयं प्रादात्। तमधिकृत्य कल्हणो वर्णयति—

समग्रहीत्तथा राजा सोऽन्विष्य निखिलान् बुधान्।
विद्वद्दुर्भिक्षमभवत् यथान्यनृपमण्डले॥ राज० ४.४९३

अन्ये कश्मीरभुवो राजाधिकारिणो विदुषः प्रतिष्ठास्पदं विधातुं बहु कृतवन्तः। तथा हि—

राजदौवारिकः श्रीमाञ्शूरस्यासीन् महोदयः।
महोदयस्वामिनो यः प्रतिष्ठां समपादयत्॥
रामटाख्यमुपाध्यायं ख्यातव्याकरणश्रमम्।
व्याख्यातृपदकं चक्रे स तस्मिन् सुरमन्दिरे॥
विच्छिन्नप्रसरा विद्या भूयः शूरेण मन्त्रिणा।
सत्कृत्य विदुषः सभ्यान् देशेऽस्मिन्नवतारिताः॥
युग्यैः क्षितिभुजां योग्यैरुह्यमाना महद्धयः।
बुधाः प्रवृद्धसत्कारा विविशुर्भूपतेः सभाम्॥

---

१. विदुषां विततोत्सेधसौधास्तद् विहिता गृहाः।
व्यासाः सप्तर्षिभिर्द्रष्टुमुत्कर्षमिव मूर्धसु॥ राज० ८.२३९६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मुक्ताकणः शिवस्वामी कविरानन्दवर्धनः ॥
प्रथां रत्नाकरश्चागात् साम्राज्येऽवन्तिवर्मणः ॥
राजतरंगिणी ५.२८—३४

तत्र कवीनां राजकीयवृत्तिस्तेषां सौख्यसंवर्धनाय बभूव ।[1] कवीनां वेतनं निर्धारितमासीत् ।[2]

राजतरंगिण्यां कश्मीरकस्य बिल्हणस्य कर्णाटराजेन प्रतिष्ठा कृतेति वर्णितमधोविधम्—

कश्मीरेभ्यो विनिर्यान्तं राज्ये कलशभूपतेः ।
विद्यापतिं यं कर्णाटश्चक्रे पर्माडिभूपतिः ॥
प्रसर्पतः करटिभिः कर्णाटकटकान्तरे ।
राज्ञोऽग्रे ददृशे तुङ्गं यस्यैवातपवारणम् ॥
त्यागिनं हर्षदेवं स श्रुत्वा सुकविबान्धवम् ।
बिल्हणो वञ्चनां मेने विभूतिं तावतीमपि ॥ राजत० ७.९३५-९३७

स हर्षो वदान्यतम आसीत् यथा कल्हणो वर्णयति—

विद्वच्चूडामणिर्भूभृत् पण्डितान् रत्नमण्डितान् ।
चकार युग्यतुरगच्छत्रादिप्रक्रियाभृतः ॥ ७.९३४

गौतमानुसारेण विद्या तु सम्मानार्थं प्रथमस्थानीया । तत्रापि वेदज्ञानं सर्वोपरि वर्तते ।[3] तदनुसृत्य मनुस्मृतौ श्रेष्ठताया मानदण्डो ज्ञानमेव स्वीकृतम् । तथा हि—

वित्तं बन्धुर्वयः कर्म विद्या भवति पञ्चमी ।
एतानि मान्यस्थानानि गरीयो यद्यदुत्तरम् ॥ २.१३६
न हायनैर्न पलितैर्न वित्तेन न बन्धुभिः ।
ऋषयश्चक्रिरे धर्मं योऽनूचानः स नो महान् ॥ २.१५४
विप्राणां ज्ञानतो ज्यैष्ठ्यम् । २.१५५
यो वै युवाप्यधीयानस्तं देवाः स्थविरं विदुः ॥ २.१५६

मनुः स्पष्टयति—

---

१. आसेवन्तावरा वृत्तीः कवयो भल्लटादयः । राज० ५.२०४

२. राज० ५.२०५

३. वित्तबन्धुकर्मजाति-विद्यावयांसि मान्यानि परबलीयांसि । श्रुतं तु सर्वेभ्यो गरीयः । तन्मूलत्वादधर्मस्य श्रुतेश्च । गौतम० ६.१८–२० । एतन्मतं समर्थितं वसिष्ठधर्मसूत्रे १३.५६-५७ याज्ञवल्क्यस्मृतौ १.११६ । अर्थशास्त्रे ३.२० ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

राजस्नातकयोश्चैव स्नातको नृपमानभाक् । २.१३९

अन्यच्च स्नातको यदि वत्सरपर्यन्तेनागच्छेत् स हि मधुपर्कार्हो भवत्येव ।[1]

विष्णुपुराणानुसारेण—

ऋग्यजुस्सामसंज्ञेयं त्रयी वर्णावृतिर्द्विज ।
एतामुज्झति यो मोहात् स नग्नः पातकी द्विजः ।।
त्रयी समस्तवर्णानां द्विज संवरणं यतः ।
नग्नो भवत्युज्झितायामतस्तस्यां न संशयः ।। ३.१७.५-६
ज्ञानमेव परं ब्रह्म ज्ञानं बन्धाय चेष्यते ।
ज्ञानात्मकमिदं विश्वं न ज्ञानाद् विद्यते परम् ।। २.६.४८

शिक्षाधिकारी

सत्यं तु ज्ञानस्योत्तमो विषय इति उपनिषद्युगे सर्वसम्मतमासीन्मनीषिणाम् । तज्ज्ञानाय मतिरपेक्षितेति अवधारितम् ।[2] मतिस्तु श्रद्धाया जायते ।[3] सा श्रद्धा निष्ठाया उत्पद्यते ।[4] सा निष्ठा कृतेः फलम् ।[5] अत एव शिष्ये इन्द्रिय-संयमः गुरुशुश्रूषा, श्रद्धा, तर्कशक्तिरिति गुणचतुष्टयेन भवितव्यम् । एतत्सर्वं क्रमशः स्वीकरणीयं छात्रेण । प्रथमे चरणे तु कृतेर्विलसनाय सुखस्यावश्यकतामुपनिषत्कारः प्रतिपादयति । स स्पष्टयति—यदा वै सुखं लभतेऽथ करोति । नासुखं लब्ध्वा करोति ।[6] नैतत् सुखमाधिभौतिकमिति ततः परं सुखं परिभाषमाणः कविर्वर्णयति—

यो वै भूमा तत्सुखं नाल्पे सुखमस्ति । भूमैव सुखम् ।[7]

स भूमा ब्रह्मणो निरतिशयं बहु इति शंकरो व्याख्याति ।

उपनिषद्युगीन आचार्य इयेष—मम ब्रह्मचारिणोऽमायिनः सदसद्विवेकिनः प्रमायुक्ता, बाह्यवृत्तीनां निग्रहकारिणः शान्तिप्रवणाश्च भवेयु-

---

१. राजर्त्विक्स्नातकगुरून् प्रियश्वशुरमातुलान् ।
अर्हयेन्मधुपर्केण परिसंवत्सरात् पुनः ।। ३.११९

२. मत्वेव विजानाति । मतिस्त्वेव विजिज्ञासयितव्या । छान्दोग्ये ७.१८ ।
केयं मतिरिति शङ्कराचार्यो भाष्ये समादधाति—मतिर्मननम्, तर्कः, मन्तविषय आदरः । छा० ७.१८ अधिकृत्य ।

३. शाङ्करभाष्यानुसारेण—आस्तिक्यबुद्धिः श्रद्धाः । छा० ७.१९ अधिकृत्य ।

४. शङ्करो व्याख्याति—निष्ठा गुरुशुश्रूषादिः । तत्परत्वं च । छान्दोग्ये ७.२० अधिकृत्य।

५. शङ्करानुसारेण कृतिरिन्द्रियसंयमः, चित्तैकाग्रताकरणं च । छा० ७.२१ अधिकृत्य ।

६. छान्दोग्ये ७.२२ । ७. छान्दोग्ये ७.२३ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

रिति ।[1] सनत्कुमारो मृदितकषायाय नारदाय तमसः पारं दर्शयति ।[2]

राजानोऽपि तत्र शिष्या आसन् । तद्यथा जनको महर्षिं याज्ञवल्क्यं कूर्चादुपावसर्पन्नुवाच—नमस्तेऽस्तु याज्ञवल्क्य । अनु मा शाधीति । बृहदारण्यके ४.२.१

महाभारते भीष्मपर्वणि स्वयमर्जुनः शिष्यो यस्मै श्रीकृष्णो गीतामुपदिशति। शान्तिपर्वणि पुनरन्यराजैः सह सम्राड् युधिष्ठिरः शिष्यो गुरुश्च भीष्मः ।[3] कीदृशोऽयं शिष्यो युधिष्ठिर इति स्वयं भीष्मो वर्णयति—युधिष्ठिरे धृतिर्दमो-ब्रह्मचर्यं क्षमा धर्म ओजस्तेजश्च नित्यं वर्तन्ते । अन्ये च तस्य गुणाः सन्ति—सत्यं दानं तपः शौर्यं शान्तिर्दाक्ष्यं च । भीष्मः शिष्यरूपेण तं स्वीकृत्योवाच—

इज्याध्ययननित्यश्च धर्मे च निरतः सदा ।
क्षान्तः श्रुतरहस्यश्च स मां पृच्छतु पाण्डवः ।। शा० ५५.१०

बहवस्तत्र विद्या ज्येष्ठाय पुत्राय देया आसन् । तद्यथा छान्दोग्योपनिषदि—इदं वाव तज्ज्येष्ठाय पुत्राय पिता ब्रह्म प्रब्रूयात् प्रणाय्य वा अन्तेवासिने ।[4] महाभारतकारस्य स्पष्टं मतमस्ति—

एतं (इन्द्रिय-)ग्रामं जयेत् पूर्वं ततो ब्रह्म प्रकाशते ।। आश्व० ४२.१४ ।

व्यासस्तु कस्मै वेदविद्या प्रदेयेति प्रसङ्गे स्पष्टयति—

नापरीक्षितचारित्रे विद्या देया कथंचन ।। शान्ति ३१४.४२

अपरं च—नाशिष्ये सम्प्रदातव्यो नाव्रते नाकृतात्मनि । शान्ति ३१४.४१

जातिहीनाय विद्या न देयेति महाभारते निर्दिष्टम्—

उपदेशो न कर्तव्यो जातिहीनस्य कस्यचित् ।
उपदेशे महान् दोष उपाध्यायस्य भाष्यते ।। अनु० १०.४

महाभारतस्य शान्तिपर्वणि वसिष्ठ-करालजनकयोः संवादद्वारेण ब्रह्म-विद्या कस्मै प्रदेयेति सूचितम्—

नावेदनिष्ठस्य जनस्य राजन् प्रदेयमेतत् परमं त्वया भवेत् ।
विवित्समानाय विबोधकारकं प्रबोधहेतोः प्रणतस्य शासनम् ।। २९६.३१

---

१. विमायन्तु, दमायन्तु, शमायन्तु ब्रह्मचारिणः । तै० उ० १.४.१

२. छान्दोग्ये ७.२६.२ ।

३. राजानो हतशिष्टाश्च राजन्नभित आसते ।
धर्मानुययुक्षन्तस्तेभ्यः प्रब्रूहि भारत ।। शा० ५४.३३
तस्मात् पुत्रैश्च पौत्रैश्च धर्मान् पृष्टः सनातनान् ।
विद्वाञ्जिज्ञासमानैस्त्वं प्रब्रूहि भरतर्षभ ।। शा० ५४.३९

४. छा० ३.११.५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

न देयमेतच्च तथानृतात्मने शठाय क्लीबाय न जिह्मबुद्धये ।
न पण्डितज्ञानपरोपतापिने देयं त्वयेदं विनिबोध यादृशे ॥ २९६.३२
श्रद्धान्वितायाथ गुणान्विताय परापवादाद् विरताय नित्यम् ।
विशुद्धयोगाय बुधाय चैव क्रियावतेऽथ क्षमिणे हिताय ॥ २९६.३३
विविक्तशीलाय विधिप्रियाय विवादहीनाय बहुश्रुताय ।
विजानते चैव न चाहितक्षमे दमे च शक्ताय शमे च देहिनाम् । २९६.३४
एतैर्गुणैर्हीनतमेन देयमेतत्परं ब्रह्म विशुद्धमाहुः ।
न श्रेयसा योक्ष्यति तादृशे कृतं धर्मप्रवक्तारमपात्रदानात् ॥ २९६.३५
जितेन्द्रियायैतदसंशयं ते भवेत् प्रदेयं परमं नरेन्द्र ॥ २९६.३६

महाभारतेऽध्यात्मविद्या कस्मै न देयेति प्रकरणेऽयोग्यशिष्येषु तर्कशास्त्रदग्धस्य गणना वर्तते ।[1] अध्यात्मज्ञानाय ब्राह्मण उत्तमं पात्रमिति तत्रैव निगदितम्—

एतद्वै जन्मसामर्थ्यं ब्राह्मणस्य विशेषतः ॥ शा० २४१.१०

व्यावहारिकदृष्टचा प्रतीयते यत् तपसा ज्ञानोपलब्धये पात्रत्वं जायेतेति । तद्यथा व्यास आत्मवृत्तं निवेदयति—

मया हि सुमहत्तप्तं तपः परमदारुणम् ।
भूतं भव्यं भविष्यं च जानीयामिति सत्तमाः ॥ शा० ३२७.२१

एवमेव स त्रिकालज्ञोऽजायत ।

आद्या ऋषयो भगवतो व्याख्यानस्य पात्रत्वं प्रपत्तुं तपश्चक्रुः । तथाहि—

दिव्यं वर्षसहस्रं ते तपस्तप्त्वा तदुत्तमम् ।
शुश्रुवुर्मधुरां वाणीं वेदवेदाङ्गभूषिताम् ॥ शान्ति ३२७.४२

योग्यो विद्यार्थी मम भवत्विति स्वभावत आचार्याणां समीहितं भवतु, यथा कालिदासो व्याहरति—

विनेतुरद्रव्यपरिग्रहोऽपि बुद्धिलाघवं प्रकाशयति । विद्या पात्रेभ्यो दद्यादिति सालंकारं निर्दिष्टमधोविधम्—

विद्या ब्राह्मणमेत्याह शेवधिस्तेऽस्मि रक्ष माम् ।
असूयकाय मां मादास्तथा स्यां वीर्यवत्तमा ॥

---

१. न तर्कशास्त्रदग्धाय तथैव पिशुनाय च । शान्ति० २३८.१७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यमेव तु शुचिं विद्यान्नियतब्रह्मचारिणम् ।[1]
तस्मै मा ब्रूहि विप्राय निधिपायाप्रमादिने ।।
मनुस्मृतिः २.११४, ११५

अतएव मनुनादिष्ट एवाचार्यः —

विद्ययैव समं कामं मर्तव्यं ब्रह्मवादिना ।
आपद्यपि हि घोरायां न त्वेनामिरिणे वपेत् ।। २.११३

एतत्तु प्राक्कलितं निरुक्ते ।[2]

कस्मै ज्ञानं प्रदेयमिति मनुर्निर्धारयति—

आचार्यपुत्रः शुश्रूषुर्ज्ञानदो धार्मिकः शुचिः ।
आप्तः शक्तोऽर्थदः साधुः स्वोऽध्याप्या दश धर्मतः ।। २.१०९
धर्मार्थौ यत्र न स्यातां शुश्रूषा वापि तद्विधा ।
तत्र विद्या न वक्तव्या शुभं बीजमिवोषरे ।। २.११२

शिष्यस्तु आचार्याधीनः स्यादेव ।[3]

दुष्टः शिष्यो न स्वीकरणीयो यतो हि नाम स आचार्यात् प्राप्तां विद्यां तस्य हानय उपयोजयेत् ।[4]

उच्चतरशिक्षा कस्मै प्रदेयेति निर्धारणाय बौद्धसंघस्य सर्वेषां भिक्षूणां मतेन स्वीकृतिरावश्यकी बभूव । गौतमेन विधानं कृतमासीत्—मायावी, धृष्टः, धूर्तः, गृहस्थ-निन्दकश्च संघप्रवेशं नार्हन्ति ।[5] भिक्षुः स्पर्श-संचारिरोग-मुक्तः, ऋणमुक्तः, राजभृतिरहितः, मातापित्रनुमतः, विंशतिवर्षीयश्च भवेन्नाम ।[6]

---

१. नियतब्रह्मचारिणो लक्षणानि अधोविधं सन्ति—सत्यवादी, नित्यं प्रातःस्नायी, मधु-माध्वीक-मांस-सुगन्ध-नेत्राञ्जन-मालाभ्यो विरतः पदत्राण-छत्र-यानोपयोगरहितः, सङ्गीतक-द्यूत-समाजोत्सव-जलक्रीडादिभ्योऽतिदूरः, प्रसाधनसौख्यसाधनेषु अनासक्तः, वाग्वितण्डा-निन्दा-स्तुति-प्रमादोन्मादेषु विरक्तोऽभवत् ब्रह्मचारी । मनु २.९३, ८८-१००, १८०, १८१, १९८ । आ० ध० १.१.२.२१-३०; १.१.३. ११-२४ ।

२. असूयकायानृजवेऽयताय न मा ब्रूया वीर्यवती तथा स्याम् ।
यमेव विद्याः शुचिमप्रमत्तं मेधाविनं ब्रह्मचर्योपपन्नम् ।
यस्ते न द्रुह्येत् कतमच्चनाह तस्मै मा ब्रूया निधिपाय ब्रह्मन् ।। निरुक्ते २.४

३. आप० ध० १.१.२.१७

४. उपाहन-जातक २३१

५. सुत्तनिपाते चुन्द सुत्तं, धम्मियसुत्तं च । चुल्लवग्गे ९.१.४ ।

६. चुल्लवग्ग १०.१७.२.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कतिपयविहारेषु द्वारपण्डितैः परीक्षिताः सफला एव छात्राः प्रवेशाधिकृता आसन् ।[1]

जैन-संप्रदाये शिक्षाधिकारस्तेषामेवानुमतः ये उत्साहिनः, विद्यानुयोगिनः, मधुरभाषिणः, मधुरकर्माणश्चासन् ।[2]

स्त्रीणां शिक्षाधिकारः

वैदिकयुगे स्त्रीणां शिक्षा पुरुषैः समानैवासीदिति बहूनां तेषामृषिकर्मवैदग्ध्येन प्रमाणितं भवति । ऋग्वेदस्य मन्त्रद्रष्ट्र्य ऋषिका अधोविधाः सन्ति--

लोपामुद्रा १.१७९ सूक्तस्य, सूर्या १०.८५ सूक्तस्य, यमी १०.१५४ सूक्तस्य, श्रद्धा कामायनी १०.१५१, जुहू १०.१०९ सूक्तस्य, विश्ववारा ५ २८ सूक्तस्य, तद्गोत्रीयापाला ८.९१ सूक्तस्य, घोषाकाक्षीवती १०.३९, ४० सूक्तयोः ।

अथर्ववेदानुसारेण ब्रह्मचर्येण कन्या युवानं विन्दते पतिम्[3] । कौषीतकिब्राह्मणानुसारेण वेदविद्यापारंगता पथ्यास्वस्तिः वागिति उपाधिना समलङ्कृता ।

बृहदारण्यकोपनिषदि याज्ञवल्क्यस्य पत्नी मैत्रेयी स्वपतेर्ब्रह्मज्ञानमशिक्षत । ग्रन्थेऽस्मिन् गार्गी वाचक्नवी प्रश्ननिर्झरे याज्ञवल्क्यं निमज्जयति,[4] अपरतश्च तत्र पण्डिता कन्या कथं लभ्येतेति निर्दिष्टम् ।[5]

ऋषितर्पणे न केवलं पुरुषर्षीणामपितु ऋषिकाणां स्त्रीणां कृतेऽपि तर्पणविधानमस्ति । तर्पणीयाः सन्ति गार्गी वाचक्नवी, वडवाप्रातिथेयी, सुलभा मैत्रेयी च । अध्येत्री माणविका च छात्रीणां नामासीत् ।

स्त्रीणामध्यापनकर्म पाणिनि-पतञ्जलीत्यादिभिर्वैयाकरणैर्ज्ञातमासीत् । अत एव तत्र उपाध्याया आचार्या इति पदानां साधुत्वं विहितम् ।[6] तथैवापिशलेति नाम्नी ब्रह्मचारिणी आपिशलेर्व्याकरणमधीतवती । तथैव काशकृत्स्ना काशकृत्स्नस्य मीमांसाग्रन्थमधीतवती । महाभाष्ये कुमारश्रमणा, कुमारप्रव्रजिता, कुमाराध्यापिका. कुमारतापसी पण्डितेत्यादीनि पदानि-

१. वाटर्स—ह्वेनसांग द्वितीयभागे पृ० १६५

२. उत्तराध्ययने ११.१४

३. अथर्व० ९.५१.८

४. सा होवाच मैत्रेयी—येनाहं नामृता स्याम्, किमहं तेन कुर्यां यदेव भगवान् वेद मे ब्रूहीति । २.४. ३; ४.५.४

५. बृहदारण्यके ६.४.१७—अथ य इच्छेद् दुहिता मे पण्डिता जायेत इत्यादि ।

६. पणिनि० ४.१.५९; ४.३.२१ अधिकृत्य काशिका

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नारीशिक्षां प्रकटयन्ति ।

कामसूत्रे वात्स्यायनः कुमारीणां कृते कन्यकोचितकलानामध्ययनमावश्यकं मनुते ।[1]

पाणिनियुगे ऋग्वेदस्य बह्वृच्शाखाध्येत्रीणां नाम बह्वृची आसीत् । कठशाखाछात्रीणां नाम कठीवृन्दारिकासीत् । यथा पतञ्जलिर्निर्दिशति अस्त्रपरायणाः स्त्रिय आसन् । तासु शाक्तिकी शक्तिं चालयतिस्म ।

अभिज्ञानशाकुन्तले शकुन्तला दुष्यन्ताय प्रेमपत्रं लिखति । मालतीमाधवे नायकयोः पितरौ कामन्दक्या सहाध्यायिनौ भूतौ ।

ब्रह्मचर्यानन्तरं कन्यकानां समावर्तनमभवत् । तदनन्तरं ताः स्नातिका अभवन् ।[2] आपस्तम्बधर्मसूत्रे आचार्याः स्त्रियो विख्याताः सन्ति ।[3]

अर्थशास्त्रस्य गणिकाध्यक्षानुसारेण गणिकादासी-रङ्गोपजीविनीनां महिलानां नाना शिल्पकलादिषु प्रशिक्षणं राजकीयकार्यपरिधौ समाविष्टमासीत् ।[4]

महाभारतानुसारेण स्त्रियो बालाः स्वाध्यायं कुर्वन्ति स्म ।[5] रामायणे स्त्रीणां ब्रह्मचर्यमुल्लिखितम् । यथा सीता रामं प्रार्थयते बालकाण्डे—

शुश्रूषमाणा ते नित्यं नियता ब्रह्मचारिणी ।
सह रंस्ये त्वया वीर वनेषु मधुगन्धिषु । १३.२७

सुलभाया योगशास्त्रवैशारद्यं विदितचरमेव ।

गाथासप्तशत्यां स्त्रीणां रचिताः शतार्धं गाथाः सन्ति ।[6] परवर्तियुगे शीलभट्टारिका, देवी, विजयाङ्का, मधुरवाणी, अभिरामकामाक्षी, तिरुमलाम्बा, मनोरमा, कमला, सुन्दरी, प्रियंवदा, वैजयन्ती, लक्ष्मीराज्ञी, श्यामसुन्दरी, राजम्मा इत्यादय कवयित्र्यो विश्रुता बभूवुः । राजशेखरो महाकविर्नारीशिक्षाया द्रढीयान् समर्थको बभूव । स काव्यमीमांसायां कथयति—

---

१. धर्मार्थाङ्गविद्याकालानुपरोधयन् कामसूत्रं तदङ्गविद्याश्च पुरुषोऽधीयीत । प्राग्यौवनात् स्त्री । काम सू० १.२. १–३

२. आश्वलायनगृह्यसूत्र ३.८.११

३. आप १.७.२१.९

४. गीतवाद्यपाठ्यनृत्तनाट्याक्षरचित्रवीणावेणुमृदङ्ग - परचित्तज्ञानगन्धमाल्यसंयूहन-संपादन-संवाहन-वैशिककलाज्ञानानि गणिकादासीरङ्गोपजीविनीश्च ग्राहयतो राजमण्डलादाजीवं कुर्यात् । गणिकाध्यक्ष-प्रकरणात्

५. अपि चैतास्त्रियो बालाः स्वाध्यायमिव कुर्वते ।। आर० ३४.७९

६. पाहई १.७०; बद्धवही १.८६; रेवा १.८७, १.९० इति स्त्रीकवयः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

'पुरुषवत् स्त्रियोऽपि कवयित्र्यो भवेयुः। संस्कारो ह्यात्मनि समवैति। न स्त्रैणं पौरुषं वा विभागमपेक्षते। श्रूयन्ते दृश्यन्ते च महामात्यदुहितरो गणिकाः कौतुकिभार्याश्च शास्त्रप्रहतबुद्धयः कवयः।[1] शङ्करमण्डनयोर्विवादे मण्डनस्य पत्नी निर्णायिकासीत्।

कश्मीरे स्त्रीणां ज्ञान-विज्ञानप्रौढिरुत्कृष्टासीदिति प्रमाणितमेव। विक्रमाङ्कदेवचरितानुसारेण कश्मीराङ्गनाः सुशिक्षिता आसन्। ताः संस्कृत-प्राकृत-भाषणेऽतीव निपुणा बभूवुः।[2] कुट्टनीमतानुसारेण स्त्रीणां प्रशिक्षणं विविधकलासु, गार्हस्थ्यकर्मजातेषु, संगीतकेषु, चित्र-सूचिकर्मसु, धातुकर्मसु पाककलायां च बहुलीभूतम्।[3]

देशे यस्मिन् विद्याया अधिष्ठात्र्यो देव्यः पार्वती, सरस्वती दुर्गाश्च सन्ति, तत्र स्त्रीणां विद्याधिकारः प्रशस्यः स्यादेव। तथापि मौढ्यवशात् तासा-मध्ययनं परवर्तियुगेऽवहेलितमिति नात्र संशयः।

बौद्धानां विहारेषु स्त्रीणामध्यापनं सम्यग्रूपेण प्राचरत्। थेरीगाथासु भिक्षुणीनां कवयित्रीणां पञ्चाशत्प्राया--गाथास्तासां प्रतिभोत्कर्षं व्यञ्जन्ति।

सहशिक्षायाः स्थानं भारतीय-संस्कृतौ नासीत्। तत् तु भागवतवचनेन स्पष्टमेव—

नन्वग्निः प्रमदा नाम घृतकुम्भसमः पुमान्।
सुतामपि रहो जह्यात् यथा यावदर्थकृत्॥ ७.१२.९

शूद्राणां विद्याधिकारः

आर्या आर्येतराश्च लोकाः स्वव्यवसायभेदेन वर्णत्रय्यां न समावेशितास्ते शूद्रा इति परिगणिताः। सुनिश्चितमिदं प्राचीनसाहित्यानुसारेण यत्ते जनाः शिल्पादिषु कृषिकर्मणि च कृतश्रमा निपुणा आसन्। एतेषां विषयाणां तेषां प्रशिक्षणं तु सहजमेव पैत्रिकसाहचर्येणाभवत् अथवा नवकर्मिका एव ते बहुविधं व्यावसायिकविज्ञानमवापुः। सिन्धुसभ्यतोत्कर्षस्तेषां ज्ञान-विज्ञान-प्रगतिं परिचाययति।

वेदानामध्ययनं तु साधारणतो याज्ञिककर्मकलापेषु प्रयुक्तमासीत्। केवल-मार्यकुलानामभिजातनागरका एव वेदानामध्ययनेन स्वीयां वैदिकसंस्कृतिं शाश्वतयामासुः। अवैदिका आर्येतरा बहवो वेदविद्याविरता आसन्। नासीत्तेषां

१. काव्यमीमांसा-दशमाध्यायतः।
२. विक्रमाङ्कदेवचरिते १८.६
३. कुट्टनीमतम् १२२–१२४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वेदाध्ययनस्य प्रयोजनम् । तेषां धार्मिककार्यकलापा वैदिककार्यकलापेभ्यः पृथग्भूतास्तेषामेव भाषाकर्मकाण्डशास्त्रादिविधानैः सम्पादिताः । नैतदार्याणां क्रौर्यं यत् त आर्येतरा वैदिकशिक्षणाय नानुगृहीता यतोऽहि नाम नासीदार्येतराणां वेदज्ञानस्यावश्यकता । सुदूरप्राचीनकालत एव वेदज्ञानं तेभ्य एव प्रदेयमासीत् येषां वेदेषु वैदिकयज्ञादिकर्मकाण्डेषु आस्था प्रावर्तत ।

तथापि बहव आर्येतरजना आर्याणां सम्पर्केण तेषां सहायीभूता । तेषामध्ययनाध्यापनयोः कृते आर्यैरपि सुव्यवस्था कृतासीत् । याज्ञिकसाहित्यं विहायेति ह्यासपुराणोपपुराणादीनि तेषां शूद्राणां ज्ञानक्षेत्रं नितान्तविशदं, रञ्जकमभ्युत्थानदायकमलं प्रबभूवुः । तथा हि—आश्वलायनगृह्यसूत्रे शूद्राणामपि समावर्तनस्य विधानानि वर्तन्ते ।[1]

वेदाध्ययनमपि कतिपयशूद्रब्रह्मचारिभिः कृतमासीदिति व्यासस्याधोवचनेनासन्दिग्धमेव—

श्रावयेच्चतुरो वर्णान् कृत्वा ब्राह्मणमग्रतः ।
वेदस्याध्ययनं हीदं न च कार्यं महत्स्मृतम् ।।[2]

बौद्धजातकानुसारेण बहवस्तत्रोच्चकोटिकाः शिल्पाचार्याः, दार्शनिकाः विचारकाश्चासन् ये शूद्राश्चाण्डालाश्च बभूवुः । सुत्तनिपाते तत्र मातङ्ग इति नामधेयस्य चाण्डालस्य सविधे वर्णत्रयस्य शिक्षार्थिनः समागताः ।[3] महाभारते तु स्पष्टमेव वर्णचतुष्टयं सरस्वतीभागिति प्रशंसितम् । तथाहि—

इत्येते चतुरो वर्णा येषां ब्राह्मी सरस्वती ।
विहिता ब्रह्मणा पूर्वं लोभादज्ञानतां गताः ।। शा० १८१.१५

'शूद्रा वेदघोषं मा शृण्वन्तु' इति नियमो महाभारतकालं यावन्नासीत् । शङ्कराचार्यः पारम्परिकवास्तविकस्थितिमनुसन्धानपूर्वकं निर्धारयति—पुरुषमात्रसम्बन्धिभिर्जपोपवासदेवताराधनादिभिर्धर्मविशेषैरनुग्रहो विद्यायाः सम्भवति[4] । सांख्यदर्शने शूद्रा अपि सांख्यदर्शनज्ञानाधिकारिणः सम्मताः ।[5]

---

१. अनुलेपनेन प्राणी प्रलिप्य मुखमग्रे ब्राह्मणोऽनु लिम्पेत्, बाहू राजन्यः, उदरं वैश्यः ऊरुसरणजीविनः आ० ३.८

२. शान्ति प० ३१४.४५, ४६ । शूद्रा आश्रमपदेऽध्येतुं वस्तुं वा न प्रोत्साहिताः । अनु० १०.१५, १७–२५

३. सेतकेतु जातक ३७७ । शिल्पाचार्या सूची जातके, उपाहन जातके, दुब्बच जातके च वर्णिताः ।

४. ब्रह्मसूत्र ३.४.३८ अधिकृत्य भाष्यम् ।

५. राधाकृष्णन् Indian Philosophy. Vol. II p. 617

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मनुस्मृतौ शूद्रा गुरवो विज्ञाताः सन्ति । वर्णत्रयस्य गुरूणामभावे शूद्राणामाचार्यत्वं ग्रहणीयमेवेति मनुमतमस्ति । शिल्पकलादीनामाचार्यास्तु प्रायः शूद्रा आसन्नेव ।

कृतश्रमाः शूद्राः शुभां विद्यां दातुं समर्थाः सन्तीति मनुर्वक्ति—

श्रद्दधानः शुभां विद्यामाददीतावरादपि ।
अन्त्यादपि परं धर्मं स्त्रीरत्नं दुष्कुलादपि ।।[1] २.२३८
विविधानि च शिल्पानि समादेयानि सर्वतः ।। २.२४०

महाभारतानुसारेण अश्विद्वयं तु शूद्र एव । तेषामायुर्वेदज्ञानं प्रशस्यमासीत् । अश्विद्वयाय मधुविद्यां दध्यङ्ङाथर्वण उवाच ।[2] अनेन देववर्गे शूद्राणां शिष्यत्वे कदापि हानिर्न परिलक्षिता ।

पाकयज्ञं सम्पाद्य शूद्रा महतीं दक्षिणां ददुः ।[3] ते श्रद्धायज्ञं च सम्पादयन्ति स्म ।[4]

कतिपयशूद्राः शस्त्रभृत आसन्नित्यनेन[5] तेषां शस्त्रशिक्षाग्रहणं प्रतिपन्नमेव । एकलव्यस्य धनुर्विद्यानैपुण्यं तां दिशं विद्योतयति । एकलव्यस्य पुत्रोऽपि महास्त्रविदासीत् ।

बौद्धसंस्कृतौ शूद्रा हीनाः सन्तीति भावो नासीत् । शूद्रोऽपि संघशरणं गतो ब्राह्मणानामपि सम्मानास्पदमभवत् । तत्र विहारेषु तेषां सर्वोच्चशिक्षा समानमभवत् । गौतमबुद्धस्य बहवः शिष्याः शूद्रा आसन्[6] ।

जैनसंस्कृतौ चाण्डाला अपि सर्वोच्चदार्शनिकज्ञानविज्ञानमर्जित्वा महर्षयो बभूवुः ।

कल्हणो यथा राजतरंगिण्यां वर्णयति—डोम्बा उच्चकोटिका रङ्गाचार्याः संगीतनिपुणाश्च बभूवुः ।[7]

समावर्तनम्

प्रायो ब्रह्मचारिणो यथायोग्यमध्ययनं समाप्याचार्यगृहादाश्रमाद्वा पुनः

---

१. महाभारते शान्तिपर्वणि एतत् समर्थितम्—
प्राप्य ज्ञानं ब्राह्मणात् क्षत्रियाद्वा वैश्याच्छूद्रादपि नीचादभीक्ष्णम् । ३०६.८६ ।

२. बृहदा० २.५.१८ ।

३. शान्ति० ६०.३७, ३८ । स्वाहाकारनमस्कारौ मन्त्रः शूद्रे विधीयते ।। ६.३६

४. तत्रैव ६०.३९

५. उद्योग० ९४.७

६. चुल्लवग्ग ९.१४, महावग्ग ६.३७.१

७. राजत० ५.३५४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्वपित्रोर्गृहं समावर्तन्त । अध्ययनस्य पूर्णता वा गुरोरनुज्ञया प्रत्यावर्तनं वा समावर्तनम् ।[1] तत्र समावर्तने स्नानस्य महत्त्वमस्ति । यद्यपि ब्रह्मचारी प्रतिदिनं स्नानं करोति, किन्तु तत् स्नानं शरीरशोभावर्धनाय नाभवत् । ब्रह्मचर्यव्रतान्ते विशिष्टं स्नानं भवति ।[2] तदनन्तरं शरीरस्य प्रसाधनं सुवस्त्रालङ्कार-चूर्णादिभिः कृतम् । स्नातः स पुष्पमालाधारणमवश्यमेव करोति स्म । अत एव स पाणिनिना स्रग्वीति उपहितः ।

स्नातकस्तु कस्यापि समाजस्य श्रेष्ठोऽभिजनो भवति । अथर्ववेदे तस्य विश्वनागरिकतामपेक्ष्य कथितम्—

स स्नातो बभ्रुः पृथिव्यां बहुरोचते ।

तैत्तिरीयोपनिषदनुसारेण समावर्तनकाले स्नातकस्य भाविजीवनस्य साफल्यमाशंसमान आचार्योऽधोविधं सन्देशं साशीः प्रवक्ति—

सत्यं वद । धर्मं चर । स्वाध्यायान्मा प्रमदः । आचार्याय प्रियं धनमाहृत्य[3] प्रजातन्तुं मा व्यवच्छेत्सीः । सत्यान्न प्रमदितव्यं । धर्मान्न प्रमदितव्यम् । कुशलान्न प्रमदितव्यम् । भूत्यै न प्रमदितव्यम् । स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् । देवपितृकार्याभ्यां न प्रमदितव्यम् ।

मातृदेवो भव । पितृदेवो भव । आचार्यदेवो भव । अतिथिदेवो भव । यान्यनवद्यानि कर्माणि तानि सेवितव्यानि, नो इतराणि । यान्यस्माकं सुचरितानि, तानि त्वयोपास्यानि, नो इतराणि ।

ये के चास्मच्छ्रेयांसो ब्राह्मणास्तेषां त्वयासनेन प्रश्वसितव्यम् । श्रद्धया देयम् । अश्रद्धयादेयम् । श्रिया देयम् । ह्रिया देयम् । भिया देयम् । संविदा देयम् । अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात् ते तत्र ब्राह्मणाः सम्मर्शिनः, युक्ता आयुक्ताः, अलूक्षा धर्मकामाः स्युः । यथा ते तेषु वर्तेरन्, तथा तेषु वर्तेथाः । एष आदेशः । एष उपदेशः । एषा वेदोपनिषद् । एतदनु-

---

१. गुरोस्तु यः लब्धानुज्ञः समावृतः । अमरकोशे २.७.१० ।

२. ब्रह्मचर्यं तु यज्ञ एव । तत्र ब्रह्मचारी यजमानः । यथा यज्ञस्यान्ते यजमानस्यावभृथः सम्पाद्यते तथैव यज्ञरूपस्य ब्रह्मचर्यस्यान्ते स्नानं कार्यते । नित्यस्नानेन शरीरस्य बाह्यमलं प्रक्षाल्यते । समावर्तनकाले स्नानेनान्तरिकमलं प्रक्षाल्यते । मज्झिमनिकाय-सुत्तन्त १.१.७

३. कतिपयस्नातका आचार्याय धनमाहर्त्तुं राष्ट्रं निगमं राजधानीं च पर्यटन्तो गृहपतीन्, महाशालान् ब्राह्मणान् याचन्ते स्म । अन्यत्राप्राप्तधनास्ते राजानमयाचन्त । दूतजातक ४७८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

शासनम् । एवमु चैतदुपास्यम् ।[1]

बृहदारण्यकोपनिषदि समावर्तन-प्रवचनस्याधोविधं रूपं वर्तते—

त्रयः प्रजापतौ पितरि ब्रह्मचर्यमूषुर्देवा मनुष्या असुराः । उषित्वा ब्रह्मचर्यं देवा ऊचुः—ब्रवीतु नो भवानिति । तेभ्यो हैतदक्षरमुवाच—द इति । व्यज्ञासिष्टा इति । व्यज्ञासिष्मेति होचुर्दाम्यतेति न आत्थेति । ओमिति होवाच । व्यज्ञासिष्मेति ।[2]

महाभारते व्यासस्य स्वशिष्याणां प्रबोधाय समावर्तन-भाषणं विद्यते । तद्यथा—

ब्राह्मणाय सदा देयं ब्रह्म शुश्रूषवे भवेत् ।
ब्रह्मलोके निवासं यो ध्रुवं समभिकांक्षति ॥ ४०
भवन्तो बहुलाः सन्तु वेदो विस्तार्यतामयम् ।
नाशिष्ये संप्रदातव्यो नाव्रते नाकृतात्मनि ॥ ४१
एते शिष्यगुणाः सर्वे विज्ञातव्या यथार्थतः ।
नापरीक्षितचारित्रे विद्या देया कथंचन ॥ ४२
परीक्षेत तथा शिष्यानीक्षेत् कुलगुणादिभिः । ४३
न नियोज्याश्च वः शिष्या अनियोगे महाभये ।
यथामति यथापाठं तथा विद्या फलिष्यति ॥ ४४
सर्वस्तरतु दुर्गाणि सर्वो भद्राणि पश्यतु ।
श्रावयेच्चतुरो वर्णान् कृत्वा ब्राह्मणमग्रतः ॥ ४५
वेदस्याध्ययनं हीदं तच्चकार्यं महत् स्मृतम् ।
स्तुत्यर्थमिह देवानां वेदाः सृष्टाः स्वयंभुवा ॥ ४६
एतद्वः सर्वमाख्यातं स्वाध्यायस्य विधिं प्रति ।
उपकुर्याच्च शिष्याणामेतच्च हृदि वो भवेत् ॥ ४९

शान्तिपर्वणः ३१४ अध्याये

तदनन्तरं शिष्यैः प्रतिज्ञातम्—

उक्ताः स्मो यद् भगवता तदात्वायतिसंहितम् ।
तन्नो मनसि संरूढं करिष्यामस्तथा च तत् । २
शैलादस्मान्महीं गन्तुं कांक्षितं नो महामुने ।
वेदाननेकधा कर्तुं यदि ते रुचितं विभो । ४

---

१. शीक्षावल्ली अनुवाक एकादशः

२. बृहदा० ५.२.१ । अस्मिन् प्रकरणे मनुष्या दत्त इति असुरा दयध्वमिति 'द'—अक्षराद् गृहीतवन्तः । ५.२.२-३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

व्यासः प्रत्युवाच—

क्षितिं वा देवलोकं वा गम्यतां यदि रोचते ।
अप्रमादश्च वः कार्यो ब्रह्म हि प्रचुरच्छलम् ॥ ६
तेऽनुज्ञातास्ततः सर्वे गुरुणा सत्यवादिना ।
जग्मुः प्रदक्षिणं कृत्वा व्यासं मूर्ध्नाभिवाद्य च ॥ ७

स्नातकस्तु सर्वत्र सम्मानमर्हतीति भावेन सर्वप्रथममाचार्य एव मधुपर्केण तेभ्यः स्वस्तिवचनं व्याजहार ।

नैष्ठिकब्रह्मचर्यम्

यावज्जीवं यो ब्रह्मचर्यं धारयितुमियेण, स तु स्नातको नाभवत् । गार्हस्थ्यस्य तस्य का कथा । स ब्रह्मचारी नैष्ठिक[1] इति प्रोच्यते । एतादृशस्य ब्रह्मचारिणो वर्णनं छान्दोग्योपनिषदि प्राप्यते—

त्रयो धर्मस्कन्धा यज्ञोऽध्ययनं दानमिति प्रथमः । तप एव द्वितीयः । ब्रह्मचार्याचार्यकुलवासी तृतीयोऽत्यन्तमात्मानमाचार्यकुलेऽवसादयन् । सर्व एते पुण्यश्लोका भवन्ति । २.२३.१

अत्र त्रय आश्रमिणो यज्ञाध्ययनदानैर्गृहस्थः, तपसा वानप्रस्थः, आचार्यकुलवासेन च ब्रह्मचारी अभिप्रेताः सन्ति । तेषु तृतीय आचार्यकुलवासी यदि नामात्यन्तमात्मानमाचार्यकुलेऽवसादयति अर्थात् यावज्जीवं ब्रह्मचारीभूय ज्ञान-विज्ञानमर्जति, आचार्योपासनं च विदधाति, स नैष्ठिकब्रह्मचारीति परवर्ति युगेऽभिहितः । वसिष्ठः स्पष्टयति—ब्रह्मचारी आचार्यं परिचरेत् । आशरीरविमोक्षणात् । आचार्ये च प्रेतेऽग्निं परिचरेत् । विज्ञायते ह्यग्निराचार्यस्तवेति ।[2] मनुर्नैष्ठिकब्रह्मचर्यविषयकं सनातनविधानं[3] प्रवक्ति—

यदि त्वात्यन्तिकं वासं रोचयेत गुरोः कुले ।
युक्तः परिचरेदेनमाशरीरविमोक्षणात् ॥ २.२४३
आ समाप्तेः शरीरस्य यस्तु शुश्रूषते गुरुम् ।
स गच्छत्यञ्जसा विप्रो ब्रह्मणः सद्म शाश्वतम् ॥ २.२४४

---

१. अत्र निष्ठा तु कस्यचिदिहलौकिकलीला-समाप्तिरेव । आत्मानं निष्ठामुत्क्रान्तिकालं नयतीति नैष्ठिकः । याज्ञवल्क्यस्मृति १.४९ अधिकृत्य मिताक्षरा ।

निष्ठां चेद् गच्छेदाशरीर-निपातात् गुरावासीत । हारीतः ।
नैष्ठिको ब्रह्मचारी तु वसेदाचार्यसन्निधौ ॥ १.४९

२. वसिष्ठ ७.४-६

३. अन्यत्र नैष्ठिकब्रह्मचर्यविधानम् गौ० ध० सू० ३.४–८ । आप० ध० सू० १.१.४.२९ वर्णितम् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

आचार्ये तु खलु प्रेते गुरुपुत्रे गुणान्विते ।
गुरुदारे सपिण्डे वा गुरुवद् वृत्तिमाचरेत् ॥ २.२४७
एतेष्वविद्यमानेषु स्नानासनविहारवान् ।
प्रयुञ्जानोऽग्निशुश्रूषां साधयेद् देहमात्मनः ॥ २.२४८

एतत् सर्वं विष्णुस्मृतौ समर्थितम्—

वेदस्वीकरणे हृष्टो गुर्वधीनो गुरोर्हितः ।
निष्ठां तत्रैव यो गच्छेन् नैष्ठिकः स उदाहृतः ॥ १.२४

गरुडपुराणे च—

नैष्ठिको ब्रह्मचारी च वसेदाचार्यसन्निधौ ।
तदभावेऽस्य तनये पत्न्यां वैश्वानरेऽपि वा ॥
अनेन विधिना देहं साधयेद् विजितेन्द्रियः ।
ब्रह्मलोकमवाप्नोति न चेह जायते पुनः ॥

अभिज्ञानशाकुन्तले कालिदासेन वर्णितः कण्वः शाश्वते ब्रह्मणि स्थित[1] आसीत् । स तु नैष्ठिकब्रह्मचर्यकोटितो भिन्ने ब्रह्मसंस्थपदे[2] प्रतिष्ठित आसीदिति वानप्रस्थ-प्रकरणे द्रष्टव्यम् ।

नैष्ठिकब्रह्मचारिणो ज्ञानमर्जयन्तः गुरुसेवापरायणा जीवनं यापयन्ति स्म । नैते पुनर्वानप्रस्थाः संन्यासिनो वाभवन् । महाभारते शान्तिपर्वणि एतदधोविधं स्पष्टीकृतम्—

आचार्येणाभ्यनुज्ञातश्चतुर्णामेकमाश्रमम् ।
आ विमोक्षाच्छरीरस्य सोऽनुतिष्ठेद्यथाविधि ॥ २२६.४
प्रजासर्गेण दारैश्च ब्रह्मचर्येण वा पुनः ।
वने गुरुसकाशे वा यतिधर्मेण वा पुनः ॥ २२६.५

एतेषु नैष्ठिकब्रह्मचर्यं वर्णितमेव । वेदाध्ययनानन्तरं संन्यासो यतिचर्या वा शङ्कराचार्यस्य सुविदितैव । महाभारतानुसारेण महर्षिव्यासस्य पुत्रः शुकः समावर्तनान्तरं मोक्षधर्ममनुत्तमं मन्यमानः[3] पितुरनुज्ञया कापिलं मोक्षशास्त्रम-

---

१. राजा—भगवान् काश्यपः शाश्वते ब्रह्मणि स्थित इति प्रकाशः । इयं च वां सखी तदात्मजेति कथमेतत् । १,२२/२३

२. छान्दोग्योपनिषद् २.२३.१ अधिकृत्य शाङ्करभाष्यं द्रष्टव्यम् ।

३. न त्वस्य रमते बुद्धिराश्रमेषु नराधिप ।
त्रिषु गार्हस्थ्यमूलेषु मोक्षधर्मानुदर्शिनः । शा० ३११.२७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

धीत्य[1] निखिलं मोक्षशास्त्रमध्येतुं मिथिलेश्वरं जनकमुपजगाम ।[2]
ब्रह्मचर्याश्रम एवासाधारणसाधकः यतो हि नाम—

आसादयति शुद्धात्मा मोक्षं वै प्रथमाश्रमे ॥ शा० ३१३.२६

न तस्य शेषाश्रमाणां कार्यं विद्यते ।[3]

शैक्षणिकविशेषाः

प्राचीनशिक्षणपद्धतेः प्रमुखविशेषा अधोविधाः पूर्वोक्तविवेचनेन स्पष्टं प्रतिभान्ति—शिष्यस्यान्तेवासित्वम्, तस्य सरलं तपोनिष्ठं जीवनम्, मौखिकशिक्षणम्, अध्येयविषयाणां बाहुविध्यम्, सार्वभौमिकता, आचार्यस्य समादरणीयता, अध्यात्मविद्यानां प्राथमिकता, प्रकृतेः देवानां च सम्पृक्तिः, सामान्यजनानां राज्ञामपि च यथायोग्यं सहायत्वम् च । विद्यार्थिभ्यः शुल्कादिग्रहणस्य कथा तत्र विरलासीत् । इयं शिक्षा न केवलमात्महितार्थमभूदपितु समाजस्य विश्वस्य वा कल्याणायालमासीत् ।

---

१. पितुर्नियोगाज्जग्राह शुको धर्मभृतां वरः ।
योगशास्त्रं च निखिलं कापिलं चैव भारत ॥ शा० ३१२.४

२. शान्तिपर्वणि ३१२.६

३. तमासाद्य तु सूक्तस्य दृष्टार्थस्य विपश्चितः ।
त्रिष्वाश्रमेषु कोऽन्वर्थो भवेत् परमभीप्सितः ॥ शा० ३१२.२७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

गृहाश्रमः

वैदिका गृहा गृहस्थास्तेषां समृद्धिः संसृष्टिश्च भाव-निबद्धाः सन्ति ब्रह्मर्षिणाधोविधम्—

ऊर्जं बिभ्रद् वसुवनिः सुमेधा अधोरेण चक्षुषा मित्रियेण ।
गृहानैमि सुमना वन्दमानो रमध्वं मा बिभीत मत् ॥ १

इमे गृहा मयोभुव ऊर्जस्वन्तः पयस्वन्तः ।
पूर्णा वामेन तिष्ठन्तस्ते नो जानन्त्वायतः ॥ २
येषामध्येति प्रवसन् येषु सौमनसो बहुः ।
गृहानुप ह्वयामहे ते नो जानन्त्वायतः ॥ ३
उपहूता भूरिधनाः सखायः स्वादुसंमुदः ।
अक्षुध्या अतृष्या स्त गृहा मास्मद् विभीतन ॥ ४
उपहूता इह गाव उपहूता अजावयः ।
अथो अन्नस्य कीलाल उपहूतो गृहेषु नः ॥ ५
सूनृतावन्तः सुभगा इरावन्तो हसामुदाः ॥ ६
इहैव स्त मानु गात विश्वा रूपाणि पुष्यत ।
ऐष्यामि भद्रेणा सह भूयांसो भवता मया ॥ ७

अथर्ववेदे ७.६० सूक्तात्

समावृत्तानां सदाराणां सहधर्मचर्याफलार्थिनां गृहाश्रमो विधीयते । धर्मार्थकामावाप्तिर्ह्यत्र त्रिवर्गसाधनमवेक्ष्यागर्हितेन कर्मणा धनान्यादाय स्वाध्याय-प्रकर्षोपलब्धेन ब्रह्मर्षि-निर्मितेन वा अद्रिसारगतेन वा हव्य-नियमाभ्यास-दैवत-प्रसादोपलब्धेन धनेन गृहस्थो गार्हस्थ्यं प्रवर्तयेत् । तद्धि सर्वाश्रमाणां मूलमुदाहरन्ति । गुरुकुलवासिनः परिव्राजका ये चान्ये संकल्पितव्रत-नियमधर्मानुष्ठायिनस्तेषामप्यत एव भिक्षाबलिसंविभागाः ।

अपि चात्र माल्याभरण-वस्त्राभ्यङ्ग-गन्धोपभोगनृत्य-गीतवादित्रश्रुतिसुखनयनाभिरामसन्दर्शनानां प्राप्तिः, भक्ष्य-भोज्य-पेय-लेह्य-चोष्याणामभ्यवहार्याणां विविधानामुपभोगः, स्वदारविहार-सन्तोषः, कामसुखावाप्तिरिति ।

महाभारते शान्ति० १८४ अध्यायतः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सपत्नीकवृत्तिः

गार्हस्थ्योचितं शाश्वतविधानं प्रजापतिमुखेनाधीतविद्येभ्यः स्वपुत्रेभ्यो देवमनुष्यासुरेभ्यो दाम्यत, दत्त, दयध्वमिति पदैर्व्याहृतम् ।[1]

गार्हस्थ्यं तु परमात्मीयं विधानमिति सनातनसांस्कृतिकधारावगाहिनां समादरं भजते ।[2] यथा शंकराचार्यो व्याख्याति—एषा लोकस्थितिः । सो (आत्मा) ऽकामयत—जाया कर्माधिकारहेतुभूता मे कर्तुः स्यात् । तया विनाहमनधिकृत एव कर्मणि । अतः कर्माधिकार-सम्पत्तये भवेज्जाया । अथाहं प्रजायेय, प्रजारूपेणाहमेवोत्पद्येय । अथ वित्तं मे स्यात् कर्मसाधनं गवादि-लक्षणम् । अथाहमभ्युदयनिःश्रेयससाधनं कर्म कुर्वीय । जाया-पुत्र-वित्तकर्माणि साधनलक्षणैषणा । लोकाश्च त्रयो मनुष्यलोकः, पितृलोको देवलोक इति फलभूताः ।[3] तदेतदधिकृत्य महाभारते गार्हस्थ्य-विषयिणी शाश्वत-धारणा-द्वैविधं व्याख्याता—यद् गृहस्थाश्रमोऽयं कामभोगार्थमप्यवश्यमेव स्वी-करणीयः । यथा व्यासः शुकमुपदिशति—गार्हस्थ्यं सर्वथोपेक्ष्य तपश्चरणेऽभि-निवेशो निष्फल एव । तथाहि—

तपोवनेषु ये जातास्तत्रैव निधनं गताः ।
तेषामल्पतरो धर्मः कामभोगमजानताम् ॥ ८३
यस्तु भोगान् परित्यज्य शरीरेण तपश्चरेत् ।
न तेन किञ्चिन्न प्राप्तं तन्मे बहुमतं फलम् ॥ ८४
शान्तिपर्वणि अध्यायः ३०९

---

१. तदेतत् त्रयं शिक्षेत—दमं दानं दयामिति । बृहदा० ५.२.३

२. लोकहितमनुतिष्ठता धर्मसंरक्षणार्थमाश्रमाश्चत्वारोऽभिनिर्दिष्टाः । शान्ति० १८४.८

३. आत्मैवेदमग्र आसीदेक एव । सोऽकामयत—जाया मे स्यादथ प्रजायेय । अथ वित्तं मे स्यात् । अथ कर्म कुर्वीयेति । एतावान्वै कामो नेच्छंश्च नातो भूयो विन्देत्त-स्मादप्येतर्हि एकाकी कामयते जाया मे स्यात् । अथ प्रजायेय । अथ वित्तं मे स्यात् । अथ कर्म कुर्वीयेति । स यावदप्येतेषामेकैकं न प्राप्नोति अकृत्स्न एव तावन् मन्यते । बृहदारण्यक० १.४.१७ । एतदधिकृत्य शाङ्करभाष्यम् ।

पतिः गर्भाधानं स्वयं प्रजापतिरूपेण समारभतेति तत्रैव वर्णितम्—

विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु ।
आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते ।
गर्भं धेहि सिनीवालि गर्भं धेहि पृथुष्टुके ।
गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजौ ॥ ६.४.२२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ब्रह्मचर्यं त्यागस्य जीवनं भवति, गार्हस्थ्यं पुनः परिग्रहस्य। गार्हस्थ्ये पत्नी तु सर्वोत्तमो परिग्रहः।[1]

यथा ब्रह्मचर्यात्पूर्वमुपनयसंस्कारो भवति, तथैव गार्हपत्यात् प्राग् विवाह-संस्कारो भवति।[2] संस्कारेषु एतद् द्वयमनन्यतमम्। समावर्तनमनु विवाहात् पूर्वं स्नातकः, पश्चात् च गृहपतिर्गृहस्थो वा भवति।[3] विवाहो गार्हस्थ्यं चावश्यकमेव तेषां कृते, ये स्वजीवने धर्मार्थकाममोक्षाणामुपायान् तत्सम्बन्धिप्रतिपत्तीश्च सर्वतोभावेन प्रतिष्ठापयितुकामाः सन्ति।

न केवलं मानवलोकस्य सौष्ठवार्थमपितु देवानामपि सम्भावनार्थं पति-पत्नीयुग्मता प्रशस्येति सनातनी भारतीया धारणास्ति। तद्यथा ऋग्वेदे प्रथितम्।

अञ्जन्ति मित्रं सुधितं न गोभिर्यद् दम्पती समनसा कृणोषि। ५.३.२।
गृहान् गच्छ गृहपत्नी यथासो वशिनी त्वं विदथमा वदासि।
ऋ० १०.८५.२६।

पत्नी तु वस्तुतो गृहमेवेति ऋग्वेदे निगदितम्—

'जाये दस्तम्' इति ३.५३.४

समर्थितमेतद् महाभारते—

न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते।[4] इति।

विवाहानन्तरं पति-पत्नी-पुत्रादिशोभितं गृहमानन्दप्रदानेन स्वर्गोपमं कल्पितमथर्ववेदे—

इहैव स्तं मा वि यौष्टं विश्वमायुर्व्यश्नुतम्।
क्रीडन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्वस्तकौ॥ १४.१.२२

सुमङ्गलीरियं वधूः सौभाग्यमस्मै दत्त्वा इत्यादि ऋ० १०.८५.३६।

---

1. Man's best possession is a sympathetic wife. Euripides, Antigone.

२. उपायतः प्राप्तायाः कन्यायाः दारकरणार्थं संस्कारः सप्तर्षिदर्शनपर्यन्तः पाणि-ग्रहणलक्षणः। ऋग्वेदे व्याकृतमेतद्—

गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः।
भगोऽर्यमा सविता पुरंधिर्मह्यं त्वादुर्गार्हपत्याय देवाः॥ १०.८५.३६
अग्ने शर्ध महते सौभगाय तव द्युम्नान्युत्तमानि सन्तु।
सं जास्पत्यं सुयममा कृणुष्व शत्रूयतामभि तिष्ठा महांसि॥ ५.२८.३

३. आ जाया संगमात् स्नातका भवन्ति। अत ऊर्ध्वं गृहस्थाः।

४. शान्तिपर्वणि १४४.६ गीताप्रेस-संस्करणे।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सामाजिकसौष्ठवार्थं, भौतिकसुख-सम्पादना[1]र्थं चानुत्तमोपयोगो विवाह-द्वारेण पत्नीलाभस्यास्ति। इतोऽप्यधिकाः केचिदपरे लाभाः सन्ति। यथा पूर्णत्वप्राप्तिः। पत्नीं विना पुरुषोऽपूर्णो भवति।[2]

महाभारते पत्न्या माहात्म्यं भूयिष्ठं प्रगीतम्। तथा हि शान्तिपर्वणि—

अनुरक्ता हिता चैव स्निग्धा चैव पतिव्रता।
यस्य वै तादृशी भार्या धन्यः स मनुजो भुवि॥ १४२.७
भार्या हि परमो नाथः पुरुषस्येह पठ्यते।
असहायस्य लोकेऽस्मिँल्लोकयात्रा-सहायिनी॥ १४२.८
नास्ति भार्यासमो बन्धुर्नास्ति भार्यासमा गतिः।
नास्ति भार्यासमो लोके सहायो धर्मसाधनः॥ १४२.१०

एतत्सर्वं सुव्यक्तमेव कालिदासस्य वक्तव्ये—सा पत्नी गृहिणी सचिवः सखी तथा ललिते कलाविधौ प्रियशिष्या[3]।

धार्मिकविधानेषु पत्युः सहधर्मिणी सा भवेदेवेति नियमः। अत एव देवानां प्रीत्यर्थं यज्ञपूजापरायणे प्राचीनसमाजे पत्न्या आवश्यकतासीत्।

यतो हि नाम पुत्रविहीनानां पितॄणामपि सुगतिर्न भवति, तेऽपि स्वपुत्रान् सपत्नीकान्, सपुत्रांश्च विधातुं समीहन्ते। महाभारते महर्षेरगस्त्यस्य विवाहोद्यमस्याख्यानं विद्यते, यत्तस्य पितरो गर्ते लम्बमाना अधोमुखा आसन्। तेऽगस्त्यं तत्रागतं प्रोचुः—

गर्तमेवानुप्राप्ता लम्बामः प्रसवार्थिनः।
यदि नो जनयेथास्त्वमगस्त्यापत्यमुत्तमम्।

---

१. सुखानां परमा स्त्रियः। महाभारते शान्ति० १८३.१०।
सुखस्य स्त्रियो मूलम्। नाटचशा० २२.९४।

२. शिवस्यार्धनारीश्वररूपमेतस्य प्रत्यक्षं प्रमाणम्। अर्धो ह वा एष आत्मनो यज्जाया। तस्माद्यावज्जायां न विन्दते नैव तावत् प्रजायते। असर्वो हि तावद् भवति। अथ यदैव जायां विन्दतेऽथ प्रजायते। तर्हि हि सर्वो भवति। शतपथे ५.२.१.१०; ८.७.२.३। अर्धो वा एष आत्मनो यत् पत्नी। तै० सं० ६.१.८.५। तस्माज्जायां वित्त्वा कृत्स्नतरमिवात्मानं मन्यते। ऐ० आ० १.२.४.५। महाभारतेऽपि—अर्धं भार्या मनुष्यस्य भार्या श्रेष्ठतमः सखा॥ आदि० ७४.४०।

३. साधु समर्थित मार्टिन-लूथरेण—There is no more lovely friendly and charming relationship communion or company than a good marriage. Table talk.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्यान्नोऽस्मान्निरयान् मोक्षस्त्वं च पुत्राप्नुया गतिम् ।
पश्चादगस्त्यस्य कलत्राभिमुखी प्रवृत्तिः सञ्जाता ।

किं करणीयं किमकरणीयमिति विवेकशालिनीनां पत्नीनां पत्ये निवेदनं प्रशस्तिपदं भजते । रामायणे सीता रामं कथयति—व्यर्थं हिंसा न करणीया[1] तारा च वालिनं कथयति रामेण वैरं मा कार्षीरिति ।[2]

अत एव पुत्रं विना पारलौकिकी सुगतिर्न भवेदिति धारणा पत्न्याः साहचर्यमपरिहार्यं विदधाति ।[3]

स पुत्रस्तु पत्न्या विना न सम्भवति । पुत्र एव शिष्यो भूत्वा पितुर्ज्ञान-शरीरस्यामरत्वं साधयति पितॄणान् मोचयति च ।

ब्रह्मचर्येण कन्या युवानं विन्दते पति[4]मिति नियमेन कस्यचित् स्नातकस्य योग्यस्नातिकया सह विवाहोऽभवत् ।

साधारणतः स्नातको वा निवेशार्थी कश्चन योग्यां वधूं विवाहार्थं वृणोति स्म इति वरनाम्नः सार्थकतां द्योतयति । कन्या अपि योग्यपतिप्राप्त्यर्थं क्वचित् सचेष्टा दृश्यन्त इति तासां पतिंवरेति नाम्ना स्पष्टमेव ।

विदेशेऽपि वैवाहिक-सम्बन्धेन शाश्वतं किञ्चित्कल्याणं प्राप्तुं कन्याचयन-विषयको मानदण्डः प्राभवत् । तथाहि—In marriage do thou be wise,

---

१. अरण्यकाण्डे नवमे सर्गे ।

२. किष्किन्धाकाण्डे पञ्चदशसर्गे ।

३. ऐतरेय ब्राह्मणे नारदो निःसन्तानं हरिश्चन्द्रं बोधयति—

ऋणमस्मिन् संनयत्यमृतत्वं च गच्छति ।
पिता पुत्रस्य जातस्य पश्येच्चेज्जीवतो मुखम् ॥
यावन्तः पृथिव्यां भोगा यावन्तो जातवेदसि ।
यावन्तोऽप्सु प्राणिनां भूयात् पुत्रे पितुस्ततः ॥
शश्वत् पुत्रेण पितरोऽत्यायन् बहुलं तमः
आत्मा हि जज्ञे आत्मनः स इरावत्यतितारिणी ।
ज्योतिर्ह पुत्रः परमे व्योमन् ।
पतिर्जाया प्रविशति गर्भो भूत्वा स मातरं ।
तस्यां पुनर्नवो भूत्वा दशमे मासि जायते ॥
तज्जाया जाया भवति यदस्यां जायते पुनः ।
देवा मनुष्यानब्रुवन्नेषा वो जननी पुनः ॥
नापुत्रस्य लोकोऽस्तीति सर्वे पशवो विदुः ।
एष पन्या उरुगायः सुशेवो यं पुत्रिण आक्रमन्ते विशोकाः ॥ ऐ० ब्रा० ७.३.१

४. अथर्ववेदे ११.५.१८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

prefer the person before money, virtue before beauty, the mind before the body. Then thou hast a wife, a friend, a companion, a second self. William Penn : Some Fruits of Solitude.

केन कस्या विवाहो भवत्विति भागवते निर्दिष्टम्—

ययोरात्मसमं वित्तं जन्मैश्वर्याकृतिर्भवः ।
तयोर्विवाहो मैत्री च नोत्तमाधमयोः क्वचित् ।।

विवाहस्तु संस्कार एव जन्म-जन्मान्तरसम्बन्धोद्बोधकः । तत्र कन्याया रमणीयत्वं न केवलं शारीरिकमपितु मानसिकं, वाचिकं चारित्रिकं च विशेषतः परीक्षणीयमासीत् ।[1] भारद्वाजो निर्दिशति आपस्तम्बगृह्य[2] सूत्रमनुसृत्य—

यस्यां मनो नु रमते चक्षुश्च प्रतिपद्यते ।
तं विद्यात् पुण्यलक्ष्मीकां किं ज्ञानेन करिष्यति ।। १.११

महाभारतानुसारेण—

ययोरेव समं वित्तं ययोरेव समं श्रुतम् ।
तयोर्मैत्री विवाहश्च न तु पुष्टविपुष्टयोः ।। आदि ३१.१०

कामशास्त्रे वरेण्या कन्या प्राशस्त्येन वर्णिताधोविधम्—तस्मात् कन्यामभिजनोपेतां मातापितृमतीं त्रिवर्षात् प्रभृति-न्यूनवयसं श्लाघ्याचारे पक्षवति कुले, सम्बन्धिप्रिये, सम्बन्धिभिराकुले प्रसूतां, प्रभूतमातापितृपक्षां, रूपशीललक्षणसम्पन्नाम्, अन्यूनाधिकविनष्टदन्तनखकर्णकेशाक्षिस्तनीम् अरोगिप्रकृतिशरीरां तथाविध एव श्रुतवाञ् शीलयेत् । ३.१.२.

कामसूत्रे घोटकमुखस्य व्यावहारिकदृष्टचा सरलतमो लक्षणोपायोऽधोविधं निर्दिष्टः —

यां गृहीत्वा कृतिनमात्मानं मन्येत, न च समानैर्निन्द्येत, तस्यां प्रवृत्तिरिति । ३.१.३

मनुर्गभीरदर्शनेन प्रस्तावयति—

अव्यङ्गाङ्गीं सौम्यनाम्नीं हंसवारणगामिनीम् ।
तनुलोमकेशदशनां मृद्वङ्गीमुद्वहेत् स्त्रियम् ।। ३.१०

एतत्सर्वैः सुनिश्चितं प्रतिभाति यद् विवाहात् पूर्वं कन्यायाः सूक्ष्मदृष्टचा सम्यक्परीक्षणं शास्त्रकारैः विहितम् । कन्यायाः प्रज्ञा तु प्रधानो गुणो भार-

---

१. बुद्धिरूपशीललक्षणसम्पन्नां अरोगामुपयच्छेत । आश्व-गृ० १.५.३
शतपथे निर्दिष्टम्—एकमेव हि योषां प्रशंसन्ति पृथुश्रोणिं विमृष्टान्तरम् । सा मध्ये संग्राह्या । १.२.५.१६; आप० गृ० ३.२०

२. यस्यां मनश्चक्षुषोर्निबन्धस्तस्यामृद्धिर्नेतरत् । ३.२१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

द्वाजानुसारेण। सोऽवधारयति—चत्वारि विवाहकारणानि—वित्तं रूपं प्रज्ञा बान्धवमिति। अप्रज्ञया हि कथं संवासः। भा० गृ० सू० १.५

पुरा भारतेऽष्टविधविवाहाः प्रचलिता आसन्।[1] विशालेऽस्मिन् भारते विविधयोग्यता-प्रपन्ना जनाः स्वस्वप्रियङ्करतत्त्वाधिगमेन प्रेष्ठां प्रवृत्तिमनुशीलयन्तो विवाहविधिं प्राथम्येन स्वीचक्रुः। तद्यथा—

वर्गविशेषाः	प्रियङ्करतत्त्वानि (साधनरूपेण साध्यरूपेण च)	विवाहविधेर्नाम
ब्रह्मा[2] (ब्राह्मणः)	परा विद्या, ब्रह्मज्ञानम्	ब्राह्म
देवः	यज्ञः,[3] सर्वार्थसिद्धिः	दैवः
ऋषिः	गावः, होमः	आर्षः
मानवः	पत्नी, सन्तान-बाहुल्यम्[4], आत्मसातत्यम्	प्राजापत्यः मानवः,
असुरः	भौतिकसम्पदो विभवश्च	आसुरः
गन्धर्वः	कामः, रागरङ्गरञ्जनम्, भोगविलासः	गान्धर्वः
राक्षसः	सरम्भः, बलप्रयोगः, परेषां वस्तुग्रहणम्	राक्षसः
पिशाचः	छलं, चौर्यं, धौर्त्यं च परद्रव्याधिग्रहणम्	पैशाचः

पूर्वोक्तवर्गीया जनाः स्वजीवनस्येप्सिततमानि वस्तूनि स्वप्रियङ्करतत्त्वाधिगमेनालभन्त। तथा हि ब्रह्मा (ब्राह्मणः) स्वीयया परया विद्यया कन्यापितरं भावयित्वा तस्याः कन्यां पुरस्काररूपेण प्राप्नोत्।[5]

१. अत्र विवाहस्तु विवाहार्थं वरस्य वध्वा निर्णयनं प्राप्त्युपायो वा। पाण्डुरङ्ग-काणे समर्थयति—These were the means of securing wives and these are not really eight kinds of Vivahas. Hist. Dharmaśastra Vol. II pt. I p. 520

२. महाभारते भीमः कथयति—स्पृहयामि द्विजातीनां येषां ब्रह्म सनातनम्।
येषां स्वप्रत्ययः स्वर्गस्तपः स्वाध्यायसाधनः। अनु ८.३

३-४. यज्ञक्रियाभिर्देवताः प्रीयन्ते। महा० शा० १८४.१३। स्वयमपि देवा यजन्ते इति त्रीणि शता त्रीसहस्राण्यग्निं त्रिंशच्च देवा न चासपर्यन्। औक्षन् घृतैरस्तृणन् बर्हिरस्मा आदिद्धोतारं न्यसादयन्त॥ ऋ ३.९.९। अपत्योत्पादनेन प्रजापतिः प्रीयते।

५. आच्छाद्य चार्चयित्वा च श्रुतिशीलवते स्वयम्।
आहूयादानं कन्याया ब्राह्मो धर्मः प्रकीर्तितः॥ मनु० ३.२७
महाभारते वर्णितः ऋष्यशृङ्ग-विवाह एवं सम्पन्नः प्रतिभाति। आरण्यकपर्वणि ११२ अध्याये।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

देवः[1] (राजा) कस्यचिद् याज्ञिकस्य ऋषेर्यज्ञसम्पादन-नैपुण्येन परितुष्टो दक्षिणारूपेण तस्मै स्वकन्यां प्रादात्[2]।

ऋषयो मन्त्रद्रष्टारो यज्ञसम्पादनाय गोधना बभूवुः[3]। शिष्याणां

---

१. प्रायशो देवाः पुरातनयुगस्य भारतीयसमाजे प्रतिष्ठिता राजानो वा क्षत्रिया वा शासका बभूवुः। तेषां प्रधानं कर्तव्यमासीत् लोकरक्षणं स्वशस्त्रबलेन सैन्यबलेन कूट-नीतिभिश्च। अधोलिखितेन मन्त्रेण देवानामृषिभिः सह सान्निध्यं स्पष्टीभवति—
वसिष्ठं ह वरुणो नाव्याधादृषिं चकार स्वपामहोभिः। ऋ० ७.८८.४।

ऋषयस्तेषां सहायका अभवन्निति तयोः प्रत्यक्षं परस्परसम्बन्धं व्यनक्ति। वसिष्ठर्षिः देवस्य वरुणस्य ऋषिरासीदिति ज्ञातमेव।

धृतव्रताः क्षत्रिया यज्ञनिष्कृतो बृहद्दिवा अध्वराणामभिश्रियः। १०.६६.८
स्वान् नु क्षत्रियाँ अव आदित्यान् याचिषामहे। सुमृडीकाँ अभिष्टये। ऋग्वेदे ८.६७.१
ऋतावाना नि षेदतुः साम्राज्याय सुक्रतू।
धृतव्रता क्षत्रिया क्षत्रमाशतुः। ऋ० ८.२५.८

बृहदारण्यकानुसारेण—इन्द्रः, वरुणः, सोमः, रुद्रः, पर्जन्यः, यमः, मृत्युः, ईशानः क्षत्रियाः सन्ति। वसवः, रुद्राः, आदित्या, विश्वेदेवाः मरुतः वैश्याः। पूषा शूद्रः।

२. यज्ञे तु विततेसम्यगृत्विजे कर्म कुर्वते।
अलंकृत्य सुतादानं दैवं धर्मं प्रचक्षते॥ मनु० ३.२८

३. देवाँश्च याभिर्यजते ददाति च ज्योगित्ताभिः सचते गोपतिः सह। ऋ० ६.२८.३
गोप्रेमा ऋषीणां प्रकटति—गावो भगो गाव इन्द्रो मे अच्छान् गावः सोमस्य प्रथमस्य भक्षः। इच्छामीद् हृदा मनसा चिद् इन्द्रम्। ऋ० ६.२८.५
यूयं गावो मेदयथा कृशं चिदश्रीरं चित् कृणुथा सुप्रतीकम्।
भद्रं गृहं कृणुथ भद्रवाचो बृहद्वो वय उच्यते सभासु॥ ऋ० ६.२८.६
ऋग्वेद ऋषीणां गोधनत्वं ग्रथितम्। तथाहि—
आ गा वो अग्मन्नुत भद्रमक्रन्त्सीदन्तु गोष्ठे रमयन्त्वस्मे।
प्रजावतीः पुरुरूपा इह स्युरिन्द्राय पूर्वीरुषसो दुहानाः॥ ६.२८.१
ऋषीणां प्रिये विष्णुलोके
ता वां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः। ऋग्वेदे १.१५४.६।
ऋषिभिर्गोकामैर्देवा प्रार्थिताः। ऋ० ४.३३.१। इमं गावः प्रजया सं विशाथ।
अथर्व १४.१.३३
गावो ददाति वै होम्यमृषिभ्यः पुरुषर्षभ। महाभारते अनु० ७७.८।
अधुनापि प्रियवस्तूनि कन्यायै वरपक्षतः प्रदीयन्ते।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पोषणार्थमपि ते गोकामा आसन् । तेषां वैशिष्टचं गवां बहुसंख्यया प्रमाणितमासीत् । ते शुभ्रतमं गोमिथुनं कन्यापूजनार्थं कन्यापित्रे प्रदाय तस्य कन्याया ग्रहणाय स्वयोग्यतां प्रादर्शयन् । अयमार्षविवाह आसीत् ।[1] पाण्डुरंगकाने समीक्षते—The daily Agnihotra required the maintenance of at least two cows. Hist. of Dharmaśāstra Vol. II Pt. II P. 979.

मानवास्तु प्राजापत्या आसन् । मनुरस्ति प्रजापतिः । प्रजाकाभो वै. प्रजापतिः । प्रश्नोपनिषद् ४ । प्रजननं प्रजापतिः । शत० ५.१.३.१० तेषां वर्गे प्रचलितविवाहो मानवो वा प्राजापत्यो वाभिहितः । सन्तानोत्पत्तिः प्रधानमस्य विवाहस्योद्देश्यम् ।[2]

पूर्वोक्ताश्चत्वारो विवाहप्रकाराः, स्नातकोचिताः सम्मताः, अवशिष्टाश्चत्वार आसुरादयोऽब्रह्मचारिणां कृते निर्धारिता आसन् । अब्रह्मचारिणां संख्या सदैव सर्वाधिकासीत् ।

असुरास्तु धनधान्यपरायणा आसन् । तेषां देवानामिव सांस्कृतिकाभ्युत्थानमुच्चकोटिकं समभवत्[3] । तेषामाचार-विचार-संस्कृतिविषयेऽधोलिखितं श्रिया प्रोक्तं महाभारतीयं मतमस्ति—'हुताग्नयः, ब्रह्मण्याः, सत्यवादिनः, करुणवेदिनः, महाप्रसादाः, जितेन्द्रियाः, कृतज्ञाः, प्रियवादिनः, उपवासतपः —

---

१. एकं गोमिथुनं द्वे वा वरादादाय धर्मतः ।
कन्याप्रदानं विधिवदार्षो धर्मः स उच्यते ॥ मनु ३.२९

२. शतपथे १३.४.३.३,१४ । मनुरयं गृहस्थाश्रमस्य श्रेष्ठत्वमावश्यकत्वं च भूयो भूयः प्रत्यपादयत् । तथा हि प्रजनार्थं स्त्रियः सृष्टाः सन्तानार्थं च मानवाः । सहोभौ चरतां धर्ममिति वाचानुभाष्य च । कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधिः स्मृत ॥ महाभारतानुसारेण अपत्योत्पादनेन प्रजापतिः प्रीयते । शान्ति० १८४.१३

३. महाभारतानुसारेण—

असुराश्च देवाश्च दक्षस्यासन् प्रजापतेः ।
अपत्यं बहुलं तात तेऽस्पर्धन्त परस्परम् ॥ आश्व० ५.३

असुराः दैत्याः, दानवाः पूर्वदेवाश्च पर्यायवाचिन एव । कश्यपस्य पत्नीषु अदितिः, दितिश्चाभूताम् । अदितेरादित्या देवा जाताः । दितेः पुत्राः दैत्याः, दानवा असुरा वा सन्ति । हरिवंशानुसारेण इन्द्रस्य श्वसुरः पुलोमासुर आसीत् ।

पुलोमानं जघानाजौ जामाता सन् शतक्रतुः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

शीलाः, ब्रह्मवादिनः, ब्रह्मचारिणः, गुरुवृद्धोपसेविनः, आसन्निमेऽसुराः । कालान्तरे पुनस्तेषां गुणविपर्ययो जातो येन ते—

कृतघ्ना नास्तिकाः पापा गुरुदाराभिमर्शिनः ।
अभक्ष्यभक्षणरताः निर्मर्यादा हतत्विषः ॥ शान्ति० २२१.७८
तांश्चाहं चासुरांस्त्यक्त्वा युष्मद्विषयमागता ।
त्रिदशेषु निवत्स्यामो धर्मनिष्ठान्तरात्मसु ॥ शा० २२१.८३

वृत्रो, बलिः, हिरण्यकशिपुरित्यादयो विश्रुता एव महाधना असुराः । तेषु विवाहः कन्यायाः क्रयेण निर्णीत आसीत्[1] । अनेन विधिना तेषामासुरमहिमा प्रकटितः ।

स्त्रीकामा वै गन्धर्वाः ।[2] तीक्ष्णकामास्तु गन्धर्वाः[3] । यथा भवभूतिर्मालतीमाधवे निभालयति—गान्धर्वविवाहस्तु चौर्यविवाहः ।[4] गन्धर्वा विवाहविधौ वधूवरयोर्नृत्य-सङ्गीतादिभिः शरीरस्य प्रसाधनादिना चाकृष्टाः परस्परमेव विवाहमायोजयन्ति स्म[5] । पद्मपुराणानुसारेण—

गान्धर्वोऽन्योन्यमैत्रतः । ६.२३२.२६
वधूवरयोरिच्छयान्योऽन्यसंयोगो गान्धर्वः[5] ।

महाभारतेऽभिज्ञानशाकुन्तले च शकुन्तलाया विवाहो गान्धर्वेण विधिना सम्पद्यते । अत्र प्रश्नः समुदेति—किं नाम पित्रोरनुमतिं विना कन्या स्वविवाहं निष्पादयेत् ? रामायणानुसारेण सुकन्यानामभिमतमासीदधोविधम्—

माभूत् स कालो दुर्मेधः पितरं सत्यवादिनम् ।
अवमन्य स्वधर्मेण स्वयंवरमुपास्महे ॥ बाल० ३२.२१

---

१. ज्ञातिभ्यो द्रविणं दत्त्वा कन्यायै चैव शक्तितः ।
कन्याप्रदानं स्वाच्छन्द्यात् आसुरो धर्म उच्यते ॥ ३.३१

२. तै० सं० ६.१; ६.५–६

३. रामायणे किष्किन्धा० ५९.९

४. प्रथमाङ्कात् प्राग् विष्कम्भके । चौर्यविवाहस्तु पैशाचः । अत एव पैशाचगान्धर्वयोः समकक्षता निन्द्यत्वं चाभिप्रेते । अत्र चौर्यस्याभिप्रायः प्रच्छन्नव्यापारोऽस्ति । यथा चौरा अदृष्टा अज्ञाताश्च व्यापियन्ते, तथैव गन्धर्वाः प्रच्छन्ना एव पित्रोरनुमतिमनपेक्ष्यैव विवाहं निर्वहन्ति ।

५. धर्मसिन्धौ पूर्वार्धे तृतीयपरिच्छेदे विवाह-निर्णय-प्रकरणम् । मनुना प्रागेव निर्दिष्टम्—

इच्छयान्योन्यसंयोगः कन्यायाश्च वरस्य च ।
गान्धर्वः स तु विज्ञेयो मैथुन्यः कामसम्भवः ॥ ३.३२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पिता हि प्रभुरस्माकं दैवतं परमं च सः ।
यस्य नो दास्यति पिता स नो भर्ता भविष्यति ॥ ३२.२२

बलप्रयोगेण कन्यामपहृत्य विवाह-निर्णायनं राक्षसोचितम् ।[1] राक्षसा रामायणे महाभारते सुविदिताः सन्ति । रावणो राक्षसराजस्तेषां सांस्कृतिकमादर्शं प्रस्तौति । ते महाबलिष्ठा आसन्[2], बलप्रयोगेण च कन्यां प्राप्य तया सह विवाहमायोजयन् ।[3] अभिनवगुप्तो राक्षसानां विषये कथयति—शृङ्गारश्च तैः (राक्षसैः) प्रायशः प्रसभं सेव्यते । क्षत्रियास्तु राक्षसविवाहं प्रशस्यं मत्वा स्वीकुर्वन्ति स्म । महाभारते कृष्णोऽर्जुनं प्रोत्साहयति—

प्रसह्य हरणं चापि क्षत्रियाणां प्रशस्यते ।
विवाहहेतोः शूराणामिति धर्मविदो विदुः ॥ आदि० २११.२२

राक्षसविवाहस्यापरं नाम चौर्यविवाह इति प्रभवति ।[4] क्षत्रियेषु बलप्रयोगेण वीर्यविवाहस्य प्रचलनं सङ्केतयति यत् क्षत्रधारिणो राक्षसाः क्षत्रियवर्गे बहुशो विलीनाः ।

पिशाचानां कृते सुलभो बभूव पैशाचविवाहविधिर्यस्मिन् मन्वनुसारेण—

सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति ।
स पापिष्ठो विवाहानां पैशाचश्चाष्टमोऽधमः ॥

वैदिकयुग आर्यैः सह युध्यमानाः पिशाचाः परास्ता एव न केवलं समाजादपि तु सुसंस्कृतेरपि दूरं भूता रहोवासं वसन्ति स्म । तद्यथा ऋग्वेदे—

पिशङ्गभृष्टिमम्भृणं पिशाचिमिन्द्र सं मृण । सर्वं रक्षो निबर्हय । १.१३३.५

अथर्ववेदे च—

न पिशाचैः सं शक्नोमि न स्तेनैर्न वनर्गुभिः ।
पिशाचास्तस्मान्नश्यन्ति न मामुपजानते ॥ ४.३६.७

---

१. हत्वा छित्त्वा च भित्त्वा च क्रोशन्तीं रुदतीं गृहात् ।
प्रसह्य कन्याहरणं राक्षसो विधिरुच्यते ॥ मनु० ३.३३

२. महाभारते हिडिम्बस्य वकस्य च भीमेन युद्ध-प्रकरणं तत्प्रमाणयति । आदि प० अध्यायः १४१.१७-२४; १५९.१२-२४

३. राक्षासानां क्रोधः स्थायी भाव इति भरतः । रक्षोदानवास्तु स्वभावरौद्राः । तेषां ताडन-पाटन-पीडनच्छेदन-भेदन - प्रहरणाहरण-शस्त्रसम्पात-सम्प्रहार-रुधिराकर्षणाद्यानि कर्माणि इति ना० शा० ६.६३-६४ । एतदाश्रित्याभिनवगुप्तो व्याख्याति आधर्षणम्' । तत्तु दारादिखलीकरणम् ।

४. हरिवंशे विष्णुपर्वणि १२७.२१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वैदिककालतो विवाहार्थं स्वयंवरविधेः प्रचलनं दृश्यते।[1] अनेन विधिना सूर्याया विवाहः सोमेन सहाभूत्।[2] स्वयंवरे कस्मिंश्चिद् विशिष्टकार्योपक्रमे सर्वातिशायियोग्यताप्रदर्शनेन अन्यथा वा औदात्त्यप्रदर्शनेन वराय कन्या लभ्यासीत्। प्राचीनसाहित्ये क्षत्रियराजादीनां संगमे धनुर्वेदेऽनन्यतम-योग्यता प्रदर्शनेन अजस्य, रामस्य, अर्जुनस्य, नलस्य च विवाहा निष्पन्नाः।

स्वयंवर-विवाहो गान्धर्व-विवाहाद् भिन्न[3] एव, यतो हि नाम गान्धर्व-विवाहे वधूवरयोः कामातुरता प्रधाना भवति। कामोपशान्तयेऽस्ति गान्धर्व-विवाहः। स्वयंवरे तु वरस्य गुणवत्ताया आकर्षणं प्रधानं भवति। गान्धर्वे कामातुरता प्रेरकशक्तिर्भवति स्म। स्वयंवरे पुनः नैकाभ्यर्थिनां स्वस्व-भाग्यनिर्णयोऽपेक्षितः। गान्धर्वे च वधूवरौ स्वभोगविलास-प्रवणतां भाव-यित्वा वैवाहिककर्मकाण्डं विनापि स्वमनोरथं साधयतः। स्वयंवरे पुनर्बहूना-मभ्यर्थिनां समाजे प्रतियोगितायां साफल्येन वरः कन्यां लभते अथवा गुणाधिक्येन वधूमनो हरति।

नैकविधा स्वयंवरप्रक्रिया पुरा विकसिता। तथाहि प्रथमविधौ पित्रा-योजितवरेण्य-संगमात् कन्यया स्वेच्छं योग्यतमस्य वरणम्। यथा महाभारते दमयन्त्या नलस्य वरणम्।[4] द्वितीयविधौ योग्यतमस्य वरस्यावधारणाय पित्रा विवाहाभ्यर्थिनामौदात्त्य-परीक्षणमायोज्यते। रामायणानुसारेण जनकेना-योजिते धनुर्महे रामः शिवधनुषो मौर्वीमारोप्य सफलोऽभूत्। तदनन्तरं जनको विश्वामित्राय प्रत्यवदत्—

भगवन् दृष्टवीर्यो मे रामो दशरथात्मजः।

---

१. यथा ऋग्वेदे—

भद्रा वधूर्भवति यत्सुपेशाः स्वयं सा।
मित्रं वनुते जने चित्। १०.२७.१२

२. ऋग्वेदे १.११९.२,५; १०.९५.८,९

३. पाण्डुरङ्गकाने कथयति—The Svayamvara was practically the Gan-dharva" नैतत् प्रमाणितं शास्त्रेषु। अन्यच्च स्वयंवरस्य कामुकताऽभावः कामु-कतापूर्णगान्धर्वात्-भेदयतीति स्पष्टमेव।

४. ऐतिहासिकयुग एतादृशः स्वयंवरो दृश्यते। एकादशशतके विक्रमाङ्क-देवचरितस्य नवमाङ्के करहाटनृपतेः शिलाहारस्य कन्या चन्द्रलेखा चालुक्य-राजं विक्रमाङ्कं वृणोति। विवाहार्थं पृथ्वीराजस्य संयोगिताया वरणं स्वयंवरः। महाभारतानुसारेण रुक्मिणी कृष्णमवृणोत्।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मम सत्या प्रतिज्ञा सा वीर्यशुल्केति कौशिक ।[1]
सीता प्राणैर्बहुमता देया रामाय मे सुता ॥ बाल० २७.२४

महाभारतानुसारेण लक्ष्यवेधेनार्जुनो द्रौपदीमाप्नोत् । विवाह एतादृशः सानुबन्धो बभूव । य एतत्कर्तुं समर्थस्तेन विवाहो भवेदिति । अतएव विवाहेऽस्मिन् कन्यायाः स्वेच्छायाः प्रश्नो नासीत् । तृतीयविधौ पितुरनुमत्या चयनीयवरमन्वेष्टुं कन्या भ्रामं भ्रामं स्त्रीयेन मानदण्डेन यं कंचिद् योग्यतमं व्यजानात् तमवारीत् ।[2] पित्रा विवाहार्थमनुमोदनं कृतम् ।

विवाहस्य पूर्वोक्ता अष्टविधयस्तस्मिन् प्राचीनयुगे प्रकल्पिता यदा भारते आर्याणामार्येतराणां च विविध-सांस्कृतिक-समुदायाः परस्परं पार्थक्यं भजन्ते स्म । तदार्येषु वर्णचतुष्टयमपि समुदितं नासीत् । परवर्तियुगे यदार्याणां वर्णचतुष्टये कर्मानुसारेण विभाजनं संजातं तदार्येतरा अपि कर्मानुसारेण वर्णचतुष्टये विभक्ता बभूवुः ।[3] ततः प्रभृति तदनन्तरं ये वैदेशिका भारतं प्रविष्टा-

---

१. अत्र वीर्यशुल्केति विवाहस्यासुरत्वं व्यनक्ति ।

२. सावित्रीमधिकृत्य महाभारते कथा प्रचरति—

यौवनस्थां तु तां दृष्ट्वा स्वां सुतां देवरूपिणीम् ।
अयाच्यमानां च वरैर्नृपतिर्दुःखितोऽभवत् ।

राजा उवाच—

पुत्रि प्रदानकालस्ते न च कश्चिद् वृणोति माम् ।
स्वयमन्विच्छ भर्तारं गुणैः सदृशमात्मनः ॥
इदं मे वचनं श्रुत्वा भर्तुरन्वेषणे त्वर ।

तदनन्तरम्—

सा हैमं रथमास्थाय स्थविरैः सचिवैर्वृता ।
तपोवनानि रम्याणि राजर्षीणां जगाम ह ॥

अन्ते सा पितरमसूचयत्—

तस्य (द्युमत्सेनस्य) पुरे जातः संवृद्धश्च तपोवने ।
सत्यवाननुरूपो मे भर्तेति मनसा वृतः ।

आरण्यकपर्वणि २७७-२७८ अध्यायतः ।

३. गीतायां कृष्ण इदमैतिहासिकतथ्यं वर्णयति—

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ।

प्राग्वर्ति-देवासुरराक्षसादिस्थाने ब्राह्मणक्षत्रियादयोऽभिनव-विभाजनं कृष्णेन कृतमासीन्नवेत्यनुसन्धानविषयो भवेन्नाम किन्त्विदं तु परमं सत्यं यद्यस्य येषां वा कृते वर्णचतुष्टय-विभाजनं स तु बुद्धिवैभव-दृष्टया भारतस्य सामाजिक-प्रशान्तप्रगमनमवाप्तुमनुत्तममेव विधानमरचयत् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्तेऽपि प्रायशो वर्णचतुष्टये कर्मानुसारेण संविभक्ता बभूवुः। वर्णचतुष्टये संसृष्टेऽष्टविधविवाहा यथायोग्यं चतुर्षु वर्णेष्ववधारिताः।

मनुर्विशाले देशेऽस्मिन् महति च कालान्तराले वर्णचतुष्टये प्रचलितान् विवाहविधीनधोविधं प्रथयति—[1]

ब्राह्मणानां कृते—ब्राह्मदैवार्षप्राजापत्यासुरगान्धर्वाः।
क्षत्रियाणां कृते—आसुरगान्धर्व-राक्षस-पैशाचाः।
वैश्यानां शूद्राणां च कृते—आसुर-गान्धर्वपैशाचाः।

विशेष-प्रगत-समाजस्य कृते मनुर्विशेष-परिष्कृतमवधारणमस्मिन्प्रकरण उपन्यस्यति।[2] तद्यथा—

ब्राह्मणानां कृते—ब्राह्म-दैवार्ष-प्राजापत्याः
क्षत्रियाणां कृते—राक्षसः[2]।
वैश्यानां शूद्राणां च कृते—आसुरः।

सभ्यतमसमाजे गान्धर्व-पैशाचविवाहविधिर्न योग्य इति सुविचारितं मनुमतम्।[3] न सर्वे विवाहाः समानमानाः। 'पूर्वं चतुर्षु पूर्वः पूर्वः श्रेष्ठः। उत्तरेषु (चतुर्षु) उत्तरोत्तरो निन्द्यः[4]।'

मिश्रविवाहस्य यत्प्रकल्पनं मनुनान्वीक्षितं तत्तु वर्तमानयुगे न केवलं भारतेऽपितु विश्वस्मिन् बहु प्रचलितं दृश्यते। आधुनिकयुगे विवाहप्रक्रियायां ब्राह्म-प्राजापत्य-गान्धर्व-राक्षसानां विवाह-विधीनां सम्मिश्रणमादौ वा मध्ये वान्ते वास्ते। विवाहकाले सङ्गीतकं, वरवधूपरीक्षणं च गान्धर्वस्य गजाश्वैः प्रयाणं तु राक्षसविवाहस्य, भाविवधू-पूजनाय धनदानं तु आसुर-विवाहस्य, वैवाहिककर्मविधिस्तु ब्राह्म-विवाहस्य प्रतीकानि प्रवर्तन्ते।

वैवाहिकप्रक्रिया

प्राचीनतमरूपं वैवाहिकप्रक्रियाया ऋग्वेदे वर्तते।[5] सोऽयं विधिः

---

१. षडानुपूर्व्या विप्रस्य क्षत्रियस्य चतुरोऽवरान्।
विट्शूद्रयोश्च तानेव विद्याद् धर्मानराक्षसान्॥ ३.२३

२. 'चतुरो ब्राह्मणस्याद्यान्' प्रशस्तान् कवयो विदुः।
राक्षसं क्षत्रियस्यैकमासुरं वैश्यशूद्रयोः॥ ३.२४

३. मनु० ३.२५

४. धर्मसिन्धुः तृतीयपरिच्छेदे विवाह-प्रकरणम्।

५. सूक्त १०.८५। पाण्डुरङ्गकाने समीक्षते—The main outlines of the marriage Saṁskāra show a remarkable continuity for several thousand years from the times of the Ṛgveda down to modern times. Hist. of Dharmasāstra Vol. II Pt. I, P. 527

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सनातन एव देशकालभेदेन प्रभिन्नोऽधुनापि सारतो मूलमेवानुसरति। ऋग्वेदानुसारेण विवाहावसरे वरेण सह शोभायात्रा प्रागमत्। वधूरथः सविशेषं समलङ्कृत आसीत्। शोभायात्रायां सखायः सहाचरन्। नवविवाहितावधूर्गृहपत्नी बभूव। सा बुधसभायां सम्भाषणपाटवं दर्शयितुं निवेदिता। कन्यादानमनु पाणिग्रहणमभवत्।[1] विवाहविधेर्मध्ये वरोऽगायत्—

गृभ्णामि ते सौभगत्वाय हस्तं
मया पत्या जरदष्टिर्यथासः।
भगोऽर्यमा सविता पुरन्धि-
र्मह्यं त्वादुर्गार्हपत्याय देवाः॥ १०.८५.३६

विवाहस्य प्रयोजनानि श्लोकेऽस्मिन्नधोविधं निबद्धानि—

(१) गृहस्थाश्रमस्य धुरि दम्पती देवैर्नियुक्तौ। नैष विवाहसम्बन्धो मानुषविधानमपितु दैवविधानम्। सौष्ठवपूर्णो गृहस्थाश्रमो वर्धेतेत्यस्मिन् देवानामपि रुचिर्वर्तते।

(२) वैवाहिकसम्बन्धोऽयं सुदीर्घजीवनं यावत् परस्परसाहचेन संभवेत्।

(३) दम्पत्योः सौभाग्यमितरेतरोपकारेण संजायेत।

कल्याणमयी आशा, भाविजीवनपथ उत्साहजननं, एक्यभावेन गार्हस्थ्यकर्मनिर्वहणोद्यमो दम्पत्योर्वर्धेतेति ध्वन्यते। अस्मिन्नवसरे कामसुखे सन्तानसंवर्धनौत्सुक्यं सन्निविष्टमिति प्रथितम्।[2]

पत्युः पत्न्याश्च दीर्घायुर्वर्चस्विता च देवैरपि काम्येते।[3]

सा वधूर्बाल्ये पितृभ्यां सौम्येन पालिता, तदनन्तरं गान्धर्वे (नृत्यसंगीतादिषु) निष्ठापिता, अग्निहोत्रविधानेषु निपुणीकृता चाभवदिति मन्त्रेणाधोविधं प्रकाशितम्—

सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः।
तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः॥ ऋ० १०.८५.५०

---

१. कन्यादानकाले पितानुबध्नातिस्म—धर्मे चार्थे च कामे च नातिचरितव्यमिति। वरः प्रत्युवाच—नातिचरामि।

२. तत्र मन्त्रो विद्यते—

तुभ्यमग्रे पर्यवहन्त्सूर्यां वहतुना सह।
पुनः पतिभ्यो जायां दा अग्ने प्रजया सह॥ ऋ० १०.८५.३८

३. पुनः पत्नीमग्निरदादायुषा सह वर्चसा।
दीर्घायुरस्या यः पतिर्जीवाति शरदः शतम्॥ ऋ० १०.८५.३९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पत्न्या पतिगृहे रयिः (धनम्, अन्नम्) सन्तानश्च भवतः ।[1]

स्वगृहे सन्तानमध्ये मोदमानौ दम्पती चिरन्तनसाहचर्येण प्रसन्नौ पूर्णजीवन-प्रपन्नौ स्यातामित्यधोविधं निदर्शितम्—

इहैव स्तं मावि यौष्टं विश्वमायुर्व्यश्नुतम् ।
क्रीडन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्वे गृहे ॥ ऋ० १०.८५.४२

यत् प्रजापतेः कर्म तदेव दम्पत्योर्भर इति महता सौष्ठवेन ऋषिणा प्रगीतम्—

इमां त्वमिन्द्र मीढ्वः सुपुत्रां सुभगां कृणु ।
दशास्यां पुत्राना धेहि पतिमेकादशं कृधि ॥ ऋ० १०.८५.४५

मन्त्रेऽस्मिन्निन्द्रस्तु कुटुम्बे वीराणां जननाय प्रतीकत्वेन स्मृतः । पतिस्तु प्रजापतिं प्रतीकयति । स्वकुटुम्बे सर्वाधिकारेण लक्ष्मीवत् पत्न्याः प्रतिष्ठा काम्यते—

सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्र्वां भव ।
ननान्दरि सम्राज्ञी भव सम्राज्ञी अधिदेवृषु ॥ ऋ० १०.८५.४६

अर्थात् कौटुम्बिकजनानां कृते पत्नी राजयमाना स्वयमतिरोचते ।

अभिनवविधिष्वश्मारोहणं पत्नया व्रतेषु दाढर्यं धारयितुं महत्त्वपूर्णम् । आहुति-प्रतिष्ठितस्याग्नेः समक्षं सर्वं कार्यजातं सम्पाद्यते । पतिः कथयति—"इममश्मानमारोह । अश्मेव त्वं स्थिरा भव ।' अभितिष्ठ प्रतन्यतः सहस्व पृतनायतः ।"[2] पश्चादग्निमुदकुम्भं च त्रिः परिणयति । अनेन लोकत्रय्चा-मात्मव्याप्तिः प्रस्तुता ।

सप्तपदी-विधानं दम्पत्योर्विष्वग्जीवनादर्शं प्रतिमूर्तयति । वरो वधूं सप्तपद-क्रमणे क्रमशः इषे, ऊर्जे, रायष्पोषाय, मायोभव्याय, प्रजाभ्यः, ऋतुभ्यः, सख्यै च समाचरितुं सन्दिशति । सप्तलोकेषु स्वसाध्यसाधनान्वेषणं प्रति विक्रम-प्रदर्शनं समीहितमिति सप्तपदी ध्वनयति ।

पुत्रपौत्रार्थं परस्परमजस्रसौहार्दं नैकस्थलेषु पतिः पत्नी च प्रार्थयतः ।

गार्हपत्यम्

अभि नो नर्यं वसुवीरं प्रयतदक्षिणम् ।
वामं गृहपतिं नय ॥ ऋग्वेदे ६.५३.२

गुरोराश्रमात् स्नातकः पित्रोर्गृहं प्रतिगच्छति । अचिरमेव स कृतदारः

---

१. रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमाम् ॥ १०.८५.४१

२. अत्र क्षात्रधर्मः शिष्टः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सन् स्वजीवनस्याभिनवकार्यक्षेत्रं प्रत्युद्गच्छति। गुरोराश्रमे ये ज्ञानप्रकाशः विनयः, सदाचारश्च गृहीतास्ते साधनभूता गृहस्थाश्रमे तं धर्मार्थकामाधिगमाय सफलयन्ति। तेन तस्य जीवन-यात्रा प्रतिदिनमभ्युदयदिशि प्रवर्तते। तथापि नास्ति गृहस्थजीवनस्य कश्चिदेक एव मार्गः। यथा शास्त्रेषु, प्रतिपादितं, गृहस्थः प्रथमपदे द्विविधो भवति—शालीनः, यायावरश्च। 'तयोर्यायावरः प्रवरो याजनाध्यापन-प्रतिग्रह-रिक्थ-(धन) सञ्चयवर्जनात्। षट्कर्माधिष्ठितः प्रेष्यचतुष्पाद-गृह-ग्राम-धनधान्य-युक्तः शालीनो भवति।

वैखानसधर्मसूत्रे गृहस्थानां वर्गीकरणं जीविकासाधनमपेक्ष्य व्यापक-दृष्ट्या निष्पादितम्। तद्यथा—(१) वार्तावृत्तिः कृषि-गोरक्ष्य-वाणिज्योप-जीवी, (२) शालीनवृत्तिर्नियमैर्युतः पाकयज्ञैरिष्ट्वाग्नीनाधाय याजी, (३) यायावरः यजते, याजयति, अधीतेऽध्यापयति, ददाति प्रतिगृह्णाति षट् कर्मनिरतः, नित्यमग्निपरिचरणमतिथिभ्योऽभ्यागतेभ्योऽन्नाद्यं च कुरुते। (४) घोराचारिको नियमैर्युक्तो यजते न याजयति, अधीते नाध्या-पयति, ददाति न प्रतिगृह्णाति उञ्छवृत्तिमुपजीवति, नारायणपरायणः, सायं प्रातरग्निहोत्रं हुत्वा···अग्निपरिचरणं करोतीति।[1]

पूर्वोक्तैः प्रतीयते यद् ब्राह्मणगृहस्था बहवो तपोमयं जीवनं यापयन्तिस्म किन्तु बहवोऽपरे ब्राह्मणाः सौख्यसापेक्षमध्यमां प्रतिपदं स्वीकृत्य गार्हस्थ्य-जीवनं नातिदुःखेन यापयन्ति स्म। धन-धान्यसम्पन्ना अवहेलित-तपोवृत्तयो ब्राह्मणाः पुरापि प्रचुरसंख्यका आसन्।

वैदिकसूक्तानां द्रष्टारः प्रायशो ब्राह्मणा योगक्षेमपरायणा आसन्[2]। ते कृषका गोरक्षका, पुरोहिताश्च धनधान्य-सम्पन्ना बभूवुः। युद्धभूमौ ते युध्यमानाः शत्रूणां गवादिधनं प्राप्नुवन्ति स्म। पुरोहिता यजमानेभ्य आपरितोषं धनमवाप्नुवन्। उपनिषद्युगे महाशालब्राह्मणाः सर्वसम्पन्न-गृहस्था ब्रह्मविद्याकामा आसन्। बहवो ब्राह्मणा राजानः श्रेष्ठधनुर्धराश्चासन्।

इतरवर्णत्रयं शास्त्रविहितं व्यवसायं स्वीकुर्वद् यथायोग्यं जीविका-मर्जति स्म। सर्वेषां कृते जीवन-सौष्ठवं सालङ्कारं किर विनिवेदितम्—

शतहस्त संमाहर सहस्रहस्त सं किर। अथर्व० ३.२४.५

महाभारते सार्ववर्णिकगृहाश्रमस्योदात्तं स्वरूपं विश्वात्मकव्याप्ति-निदर्शनपुरस्सरं पुरस्कृतं युधिष्ठिरमुखेनाधोविधम्—

संविभागो हि भूतानां सर्वेषामेव शिष्यते।
तथैवापचमानेभ्यः प्रदेयं गृहमेधिना[3]॥ ५१

१. महाभारत आश्वमेधिकपर्वणि। ९३.७-२९

२. ऋग्वेदे ७.५४.३।

३. भूतयज्ञः।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता ।
सतामेतानि गेहेषु नोच्छिद्यन्ते कदाचन ॥ ५२

देयमार्तस्य शयनं स्थितश्रान्तस्य चासनम् ।
तृषितस्य च पानीयं क्षुधितस्य च भोजनम् ॥ ५३

चक्षुर्दद्यान् मनो दद्याद् वाचं दद्याच्च सूनृताम् ।
प्रत्युद्गम्याभिगमनं कुर्यान्न्यायेन चार्चनम्[1] ॥ ५४

अग्निहोत्र[2]मनड्वांश्च ज्ञातयोऽतिथिबान्धवाः ।
पुत्रदारभृताश्चैव निर्दहेयुरपूजिताः ॥ ५५

नात्मार्थं पाचयेदन्नं न वृथा घातयेत् पशून् ।
न च तत् स्वयमश्नीयाद् विधिवद् यन्न निर्वपेत्[3] ॥ ५६

श्वभ्यश्च श्वपचेभ्यश्च वयोभ्यश्चावपेद् भुवि ।
वैश्वदेवं हि नामैतत् सायं प्रातर्विधीयते ॥ ५७

विघसाशी भवेत्तस्मान्नित्यं चामृतभोजनः ।
विघसं भृत्यशेषं तु यज्ञशेषं तथामृतम् ॥ ५८

आरण्यकपर्वणि द्वितीयाध्यायतः

पञ्चमहायज्ञाः

पूर्वोक्त-महाभारतीयगृहाश्रम-विधानं संक्षेपेण पञ्चमहायज्ञान् विवृणोति। एते महायज्ञा मानवजीवनस्य दिव्यतां प्रतिष्ठापयन्तितमाम् । एतैः स्वस्वापतेयस्य संविभागः परमात्मदिव्यवर्मानुवर्तनेन प्रकल्पितम् । तद्यथा—यत् सप्तान्नानि मेधया तपसाजनयत्पिता । एकमस्य साधारणम् । द्वे देवानभाजयत् । त्रीण्यात्मनेऽकुरुत । पशुभ्य एकं प्रायच्छत् ।

तस्मिन् सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च न । बृहदारण्यक० १.५.१

सर्वेषां गृहस्थानां वानप्रस्थानां च कृते पञ्चमहायज्ञानां विधानमासीत् । ते सन्ति—ब्रह्मयज्ञः, देवयज्ञः, पितृयज्ञः, भूतयज्ञः, अतिथियज्ञश्च । एतैर्यज्ञैः कश्चिद् गृहस्थस्तेषां सर्वेषामुपकारिणां सहायकानां च ऋणाद् विमुक्तो भवितुमीहते स्म, येषामनुग्रहेण ब्रह्मचर्याश्रमे स विद्या अध्येतुं

---

१. अतिथियज्ञः । २. देवयज्ञः ।
३. पितृयज्ञः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

समर्थोऽभवत् । वैदिकसंहितासु पृथक्-पृथगेतेषां यज्ञानां विवरणमस्ति[1]। नित्यं प्रतिपादनीयं यज्ञविधानं शतपथ-ब्राह्मणेऽधोविधं लक्षितम्—

ब्रह्मयज्ञः —स्वाध्यायः ।
देवयज्ञः —अहरहः स्वाहा कुर्यादा काष्ठात्तथैतं देवयज्ञं समाप्नोति ।
पितृयज्ञः —अहरहः स्वधा कुर्यादोदपात्रात् तथैतं पितृयज्ञं समाप्नोति ।
मनुष्ययज्ञः —अहरहर्दद्यादोदपात्रात् तथैतं मनुष्ययज्ञं समाप्नोति ।
भूतयज्ञः —अहरहर्भूतेभ्यो बलिं हरेत् । तथैतं भूतयज्ञं समाप्नोति ।
११.५.६.१

बृहदारण्यकोपनिषदनुसारेण स यज्जुहोति यद् यजते, तेन देवानां लोकोऽथ यदनुब्रूते तेन ऋषीणामथ यत् पितृभ्यो निपृणाति यत् प्रजामिच्छते तेन पितृणामथ यन्मनुष्यान् वासयते यदेभ्योऽशनं ददाति, तेन मनुष्याणामथ यत् पशुभ्यस्तृणोदकं विन्दति तेन पशूनां यदस्य गृहेषु श्वापदा वयांसि आपिपीलिकाभ्य उपजीवन्ति तेन तेषां लोको यथा ह वै स्वाय लोकायारिष्टिमिच्छेदेवं हैवंविदे सर्वाणि भूतान्यरिष्टिमिच्छन्ति । १.४.१६

मानवसंस्कृतिदृष्टचा पञ्चमहायज्ञा अत्युच्चस्थानीयाः सन्ति, यतो हि नाम तैर्मानवस्य विश्वेषां प्रत्यक्षाप्रत्यक्षाणां जीवाजीवानां दिव्यादिव्यानां च भरण-पोषण-साधारणं शाश्वतमभीप्सिततममासीदिति प्रतीयते[2]। महायज्ञ-

---

१. तथाहि अथर्ववेदे

यन्मा हुतमहुतमाजगाम दत्तं पितृभिरनुमतं मनुष्यैः । ६.७१.२
यस्मान्मे मन उदिव रारजीत्यग्निष्टद्धोता सुहुतं कृणोतु ॥

बृहदारण्यकोपनिषदि हुतं तु देवानां कृते होमः, प्रहुतं च भूतानां कृते बलिरिति १.५.२ । मनुः प्राग्वचनं पुरस्करोति—

अहुतं च हुतं चैव तथा प्रहुतमेव च ।
ब्राह्मचं हुतं प्राशितं च पञ्चयज्ञान् प्रचक्षते ॥
जपोऽहुतो हुतो होमः प्रहुतो भौतिको बलिः ।
ब्राह्मचं हुतं द्विजाग्र्यार्चा प्राशितं पितृतर्पणम् ॥ ३.७३, ७४

२. अस्मिन् प्रसङ्गे मनुरेतद् व्रतमादर्शयत्यधोलिखितश्लोके —

"देवकर्मणि युक्तो हि बिभर्तीदं चराचरम् ।" ३.७५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विधानं किमप्यपूर्वं मानवस्याध्यात्मिकं सात्त्विकं च प्रगमनमस्ति, येन सोऽखिलप्रपञ्चात्मकं जगदात्मरूपमिव नित्यं भावयति ।[1]

ब्रह्मयज्ञः

किमिदं ब्रह्म ? आदिदेवो वा आदिस्रष्टा वा ब्रह्म । ब्रह्म प्रजापतिं प्रजापतिर्देवानसृजत् ।[2] तस्य ब्रह्मणो लोको[3] ब्रह्मलोकः ब्रह्मधाम वा । ब्रह्मोपासनेन ब्रह्मवान् भवति ।[4] ब्रह्मविदाप्नोति परम् ।[5] विज्ञानेनैव विजानाति ब्रह्मविद्याम् ।[6] ब्रह्मविद्या सर्वविद्या-प्रतिष्ठा[7] । ब्रह्मविद्वान् ब्रह्माभिप्रैति ।[8] ब्रह्मसंस्थोऽमृतत्वमेति ।[9] ब्रह्मा देवानां प्रथमः सम्बभूव ।[10] प्राचीनकाले ब्रह्मसंसदि ब्रह्मोद्ये च ब्रह्मविषयक-विचारणा समभवत् ।[11] ब्रह्मणा वर्णाः कर्मार्थं सृष्टाः ।[12] मनुमतेन ब्रह्मयज्ञस्तु ऋषियज्ञः ।[13] मूलतो ब्रह्माण ऋषय आसन् ।

यदधीतं तन्न विस्मर्तव्यम् । स्वज्ञाननिधिर्नित्यं संवर्धनीयः, न कदापि क्षपणीय इति प्रयोजयतो ब्रह्मयज्ञस्य माहात्म्यं प्रत्यक्षमेव । शतपथानुसारेण स्वाध्यायेन प्रीता देवा गृहस्थायाधोविधं प्रतिददति—

---

१. पाण्डुरङ्गकाने महायज्ञानधोविधं प्रशंसति—These feelings of devotion, gratitude, reverence, loving memory, kindliness and tolerance seem to have been the springs that prompted the Aryans of old to emphasise the importance of the five daily Yajñas and to have led Sūtra writers like Gautama and legislators like Manu to look upon them as Saṁskāras, as ennobling the soul by freeing it from mere selfishness and elevating the body to become a fit vehicle for higher things. Hist. of Dharmaśāstra Vol. II pt. I p. 698.

२. बृहदारण्यके ५.५.१ ।

३. ब्रह्मलोकं ब्रह्मचर्येणानुविन्दति । छा० ८.५.४ । स एको ब्रह्मलोक आनन्दः । बृहदा० ४.३.३३ ।

४. तै० उ० ३.१०.४ । ५. तै० उ० २, १.१ ।

६. छा० ७.७.१ । ७. मुण्ड० १, १.१ ।

८. कौषी० १.४ । ९. छान्दोग्य० २.२३.२ ।

१०. मुण्डक उ० १.१.१ ११. कठ० ३.१७, बृहदा० ३.८.१ ।

१२. बृहदा० १.४.१५ अधिकृत्य शाङ्करभाष्यम् ।

१३. मनु० ४.२१ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

य एनं तृप्तास्तर्पयन्ति योगक्षेमेण प्राणेन, रेतसा सर्वात्मना सर्वाभिः पुण्याभिः सम्पद्भिः घृतकुल्या, मधुकुल्या पितॄन् स्वधा अभिवहन्ति ।[1]

स्वाध्याये प्रामुख्येण चत्वारो वेदा अध्येयाः सन्ति । शतपथब्राह्मणे तेषामानुषङ्गिकविषयाः —अनुशासनानि (वेदाङ्गानि), विद्याः, वाकोवाक्यमितिहास-पुराणं गाथानाराशंसीश्चाप्यध्येयाः ।[2] एतेषां स्वाध्यायेन तृप्ता देवास्तस्मै ब्रह्मयज्ञपरायणाय आयुषा, तेजसा, वर्चसा, श्रिया, यशसा, ब्रह्मवर्चसेनान्नाद्येन च तर्पयन्ति ।[3]

ब्रह्मचर्यजीवनस्य प्रतीकरूपेण गृहीतोऽयं यज्ञः[4] । आधुनिकयुगे सन्ध्योपासनं ब्रह्मयज्ञस्थानीयं सञ्जातम् । मनुर्ब्रह्मयज्ञस्य सरलं स्वरूपं दर्शयति— 'अध्यापनं' ब्रह्मयज्ञ इति । अध्यापनं स्वाध्यायेन सम्पृक्तं भवत्येव ।

देवयज्ञः

देवपितृकार्याभ्यां न प्रमदितव्यमिति तैत्तिरीयोपनिषदि[5] वचनेन गृहाश्रमे देवयज्ञः सम्प्रतिष्ठितः प्रतिभाति । गीता प्रबोधयति —देवान् देवयजो यान्ति ।[6] प्रतिदिनमग्नौ समिधाधानं देवानां कृत आहुति-प्रदानं तेषां स्तुतिश्च[7] देवयज्ञस्य मूलस्वरूपं सन्ति । 'कस्मै देवाय हविषा विधेम' इति ऋग्वेदमन्त्रेणाग्नौ हविर्दानेनायं यज्ञो निष्पन्नो बभूवेति स्पष्टमेव । वैदिकसाहित्ये, पुराणेतिहासेषु च देवानां मानवेभ्यः कृतानि कार्याणि तेषां पराक्रमा औदात्त्यं च भूयसा वर्णितानि । मानवस्य नैकप्रगमनोपक्रमेषु आदर्शीकृतास्ते देवाः स्मरणमात्रेणापि सहायीभूता वर्णिताः । मानवः स्वभावतः स्वजीवने नित्यमेव यच्छक्ति सामर्थ्यादिकं स्वीयार्ति-नाशायाभ्युदयाय वापेक्षते तत् प्रार्थनया यज्ञेन पूजया वा देवान् परितोष्य यथा पूर्वजैः प्राप्तं तथा स्वयमपि प्राप्तुं यतते । तेषां प्रसादेन सर्वमनायासेन लभ्यमिति संकल्पेन नित्यं देवयज्ञः सम्पाद्यते ।

---

१. शतपथे ११.५.६.५–६ ।
योगक्षेमस्तु प्राप्तिस्तस्या रक्षणं च । प्राणो जीवनशक्तिः । रेतस् बीजम् ।
२. शतपथे ११.५.६.८ । ३. तै० आ० ११.१० ।
४. ब्रह्मयज्ञेन यक्ष्यमाणः प्राच्यां दिशि ग्रामादच्छर्दि दर्शः—उदित आदित्ये दक्षिणत उपवीयोपविश्य हस्तावनिज्य त्रिराचामेद द्विः परिमृज्य सकृदुपस्पृश्य·····दर्भाणां महदुपस्तीर्योपस्थं कृत्वा प्राङासीनः स्वाध्यायमधीयीत इत्यादि ।
५. तै० उ० १.११.२ । ६. गीता ७.२३ ।
७. शौनको महाभारते वाग्भिस्तर्पयति । आ०४.९ । रामायणे रामः सलिलैर्देवान् तर्पयति । स देवानां स्तुतिरपि तेषां प्रीतये सम्पादयति । अरण्यकाण्डे १६.४२ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सर्वव्यापिनः सन्ति देवाः सत्यरूपाः। आह्वानेन तेषामञ्जसा साहाय्यं प्राप्यते। पापान्निवारयन्ति सत्पथे च प्रवर्तयन्ति देवाः[1]। एतद्विधं नान्यः कर्तुं समुद्यतः। अत एव अनादिकालतो मानवो देवान् प्रति भक्तिभावं दर्शयति।[2] तेभ्यो जुह्वति च प्र च जुह्वति, अन्नाद्यं प्रयच्छति।[3]

देवोपासनायाः सहेतुकं महत्त्वं गीतायां सम्यक् प्रतिपादितम्। तथाहि—देवान् भावयतानेन ते देवा भावयन्तु वः। देवा दास्यन्ते यज्ञभाविताः। यान्ति देवव्रता देवान् यजन्ते[4] सात्त्विका देवान्' इति।

कांस्कान् देवान् यजेदित्यस्मिन् विषये साधारणप्रतिपत्तिर्विद्यते[5]। तद्यथा--आश्वलायनगृह्यसूत्रे—सूर्यः, अग्निः, प्रजापतिः, सोमवनस्पतिः, द्यावापृथिव्यौ, धन्वन्तरिः, इन्द्रः, विश्वेदेवाः, ब्रह्मा च।

शङ्कराचार्यः पञ्चायतनाभिधं देवपूजनं प्रवर्तयामास। तत्र पञ्च देवाः सन्ति—विष्णुः, शिवः, दुर्गा, गणेशः, सूर्यश्च।

भागवतानुसारेण देवपूजायास्त्रयो भेदा विकसिताः सन्ति—वैदिकी, तान्त्रिकी, मिश्रा च। एतासु तान्त्रिकी तु शूद्राणां कृते, वैदिकी तान्त्रिकी च वर्णत्रयस्य कृते ऽवधारिताः सन्ति।[6]

देवानां प्रीत्यर्थं सुमनसां दानं तोषकरं भवति। यथा महाभारते—

देवताभ्यः सुमनसो यो ददाति नरः शुचिः।
तस्मात् सुमनसः प्रोक्ता यस्मात् तुष्यन्ति देवताः॥ अनु० १०१.२०

पितृयज्ञः

के ते सन्ति पितरः? बहुषु दिव्यलोकेषु अन्यतमो वर्तते पितृलोको यत्र कृततपसो योद्धारश्च पूर्वजा निवसन्ति। स्वर्गवत् सर्वथा सुखदोऽयं लोकः। तत्रत्यानां पितॄणां विषय ऋग्वेदो निदर्शयति—

---

१. वैदिकर्षिः सवितृदेवस्य निदर्शनमत्र प्रस्थापयति—
अक्षैर्मादीव्यः कृषिमित् कृषस्व वित्ते रमस्व बहु मन्यमानः।
तत्र गावः कितव तत्र जाया तन्मे विचष्टे सवितायमर्यः॥ ऋ० १०.३४.१३

२. श्वेत० १.८.१७; ६.२३। ३. बृहदा० १.५.३।

४. गीता ३.११; ३.१२; ९.२५; १७.४।

५. आदित्यमम्बिकां विष्णुं गणनाथं महेश्वरम्।
पञ्चयज्ञपरो नित्यं गृहस्थः पञ्च पूजयेत्॥

६. वैदिकस्तान्त्रिको मिश्र इति वै त्रिविधो मखः।
त्रयाणामीप्सितेनैव विधिना मां समर्चयेत्॥ भागवते ११.२७.७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तपसा ये अनाधृष्यास्तपसा ये स्वर्ययुः
तपो ये चक्रिरे महस्ताँश्चिदेवापि गच्छतात् ॥ १०.१५४.२
ये युध्यन्ते प्रधनेषु शूरासो ये तनूत्यजः ।
ये वा सहस्रदक्षिणास्ताँश्चिदेवापि गच्छतात् ॥ १०.१५४.३
ये चित् पूर्व ऋतसाप ऋतावान ऋतावृधः ।
पितॄन् तपस्वतो यम ताँश्चिदेवापि गच्छतात् ॥ १०.१५४.४
सहस्रणीथा कवयो ये गोपायन्ति सूर्यम् ।
ऋषीन् तपस्वतो यम तपोजाँ अपि गच्छतात् ॥ १०.१५४.५

अर्थात् महातपस्विनो मनीषिणो मरणानन्तरं पितरो भवन्ति । इहलोके युद्धे शौर्यं प्रदर्शयन्तस्तत्रैव मृताः । ते भूरिदक्षिणा आसन् । ऋतोपासकास्ते स्वचारित्र्येण ऋतं समवर्धयन्त । इमे ऋषयस्तपोजाता परमनीतिज्ञा सूर्यमपि रक्षन्ति ।

सर्वप्रथमं पितृयज्ञ ऋग्वेदे वर्णितः —

तं (अग्निम्) हरामि पितृयज्ञाय देवम् ।
स धर्ममिन्वात् परमे सधस्थे ॥ १०.१६.१०

सामान्यदृष्टचा पितरो दिवंगता ऋषिपूर्वजाः सन्ति[1] । तेऽतिशयोदाराः सन्ति[2] । गतेऽपि पितरि तस्यास्तित्वं भावदृष्टचा वंशजानां सान्निध्ये भवत्येव । वंशजानां श्रद्धया दत्तमन्नाद्यं हविर्जलं च तैरुपभुज्यते ।[3]

---

१. पितरस्तु न केवलं पूर्वजाः । मनोः पुत्राः सप्तर्षयः सन्ति । तेभ्यः पितरः, पितृभ्यो-देवा, मानवाश्च जाताः । मनु० ३.१९४–२०१ ।
पितरस्तु देवा एवेति महाभारतेऽध्योविधं निगदितम्—
वेदोक्तेन विधानेन मयि यद्धूयते हविः ।
देवताः पितरश्चैव तेन तृप्ता भवन्ति वै ॥
देवताः पितरस्तस्मात् पितरश्चापि देवताः ।
एकीभूताश्च पूज्यन्ते पृथक्त्वेन च पर्वसु ॥
त्रिदशानां पितॄणां च मुखमेवमहं स्मृतः । महा० आदि० ७.७-१० ।
अन्यच्च यथा देवानां मन्दिराणि तथैव पितॄणां पितृसद्मानि निर्मितानि । अनु० ६८.१०.

२. अथा पितॄन् त्सुविदत्राँ उपेहि । ऋ० १०.१४.१०

३. अतएव पितृयज्ञस्यापरं नाम तर्पणमस्ति । मनु० ३.७० ।
हविषापि पितॄणामर्चनं भवति । शान्ति० १३४.५ ।
ऋग्वेदेऽपि पितरः सोमरसं हविष्यान्नं च गृह्णन्ति । १०.१५.३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पूर्वजानां साक्षाद्दर्शनं तु विरलमपीतिहासादिषु वर्णितम् । तथापि भावनामात्रमपि तेषां सान्निध्यं मानवस्यैकाकितां दूरीकृत्य प्रोत्साहनप्रदं सिध्यति । पूर्वजानामादर्शः कस्य पथप्रदर्शनं न करोति[1] । पितृभ्यः स्वधोच्चारणपूर्वकं जलमन्नाद्यं हविश्च प्रदीयते ब्राह्मणमाध्यमेन । पितृषु प्रथमस्तु भगवान् सूर्यः । सूर्यायार्घ्यं वस्तुतः पितृयज्ञ एव । पितृयज्ञस्य पारलौकिकप्रभावोऽस्त्येव । तेन कश्चिज्जनः स्वर्गं गच्छति ।[2]

महाभारतानुसारेण—

कुर्यादहरहः श्राद्धमन्नाद्येनोदकेन वा ।
पयोमूलफलैर्वापि पितॄणां प्रीतिमाहरन् ।। अनु० १००.८

भारतीयसंस्कृत्यनुसारेण पितरि उपरते पुत्रस्तस्य पैतृकीं धुरमुद्वहेत् ।[3]

स्ववंशजैरिह लोकेन सम्बन्धः पितृयज्ञद्वारेण सम्भाव्यत इत्याशावतां मानवानां देहान्तभयं क्षीयते ।

पितरस्तु प्रायोऽस्माकं पारिवारिकसदस्या एव स्वीयकृतित्वेनास्माकं प्रोत्साहनं पथप्रदर्शनं, रक्षणं च कर्तुं योग्यतमाः सन्ति ।[4]

धारणासीत् तत्र वैदिकयुगे यत् पितरो धनं सामर्थ्यं च ददति ।[5] आह्वानेन समागताः पितरोऽसंख्या एवेति ऋग्वेदेऽधोविधं वर्णितम्—

ये सत्यासो हविरदो हविष्पा इन्द्रेण देवैः सरथं दधानाः ।
आग्ने याहि सहस्रं देववन्दैः परैः पूर्वैः पितृभिर्धर्मसद्भिः ।। १०.१५.१०
अग्निष्वात्ताः पितर एह गच्छत सदःसदः सदत सुप्रणीतयः ।
अत्ता हवींषि प्रयतानि बर्हिष्यथा रयिं सर्ववीरं दधातन ।। १०.१५.११

---

१. ऋग्वेद एतत्प्राक्कलितम्—

मा नः पथः पित्र्यान्मानवादधिदूरं नैष्ट परावतः ।

अयमेव सनातनो धर्मो पितृयज्ञान्निष्कृष्टम् ।

२. पितृयज्ञेन सुवर्गं गमयति । तै० ब्रा० १.६.८ ।

३. दूताङ्गदे २३ ।

येषां वृद्धाश्च बालाश्च पितृपैतामहीं धुरीम् ।
उद्वहन्ति न सीदन्ति तेषां वै स्पृहयाम्यहम् ।। अनु० ८.४ ।

४. ते नोऽवन्तु पितरो हवेषु । ऋ० १०.१५.१ । अवन्तु नः पितरः सुप्रवाचनाः । ऋ० १.१०६.३

ते अवन्त्वस्मान् । ऋ० १०.१५.५ ।
रयिं धत्त दाशुषे मर्त्याय ।

५. पुत्रेभ्यः पितरस्तस्य वस्वः प्रयच्छत त इहोर्जं दधात । ऋ० १०.१५.७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ऋग्वेदानुसारेण द्विविधाः सन्ति पितरः—अग्निदग्धाः, अनग्निदग्धाश्च। ते स्वर्गलोके सुप्रसन्नं वसन्ति।[1]

भूतयज्ञः

बृहदारण्यकोपनिषदि परमात्मनो विश्वेभ्यो भूतेभ्यः पोषण-प्रवृत्तेर्दार्शनिकपृष्ठभूमिरधोविधं वर्णिता—अयं वा आत्मा सर्वेषां भूतानां लोकः।

भूतयज्ञेन सर्वचराचरभूतानां कृते बलिः प्रदीयत इति दैनन्दिनविधानम्। प्रकरणेऽस्मिन् भूतानि सन्ति प्राणिजातम्, अथापि मनुष्या दिव्या अप्राणिनश्चाखिला सृष्टिः चराचरावेव[2]। येषां प्रीत्यर्थं सन्धारणाय चान्यथा विधानं कृतमेव, तान् विहाय सर्वेषां कृत आत्मोचितभोज्यपदार्थेभ्यो भागो विविधविधिना समर्प्यते। अत्र भूतेषु विश्वेदेवाः प्राथम्यं भजन्ते। ते सन्ति—सोमः, अग्निः, त्वष्टा, इन्द्रः, रुद्रः, पूषा, विष्णुः, अश्विनौ, मित्रावरुणौ, अङ्गिरसः।[3]

स्वभोज्यात् कंचिदंशं पात्रे पृथङ् निधाय घृतं मिश्रयित्वा तत् त्रिधाकृत्यैकं भागमग्निमुखेन विश्वेदेवेभ्योऽर्पयन् गृहस्थो गायति—

श्रद्धां मेधां यशः प्रज्ञां विद्यां बुद्धिं श्रियं बलम्।
आयुष्यं तेज आरोग्यं देहि मे हव्यवाहन॥

---

१. अग्निदग्धा ये अनग्निदग्धा। मध्ये दिवः स्वधया मादयन्ते। ऋ० १०.१५.१४।

२. आपः ओषधयः, वनस्पतयः, गृहाः, गृहदेवताः, गृहभूमिदेवताः, इन्द्रः तस्य परिवारः, यमः तस्य परिवारः, वरुणः तस्य परिवारः, सोमः तस्य परिवारः, ब्रह्म तस्य परिवारः दिवसचराः, निशिचराः राक्षसाः, पितरः इत्येतेभ्यो बलिर्ह्रियते। आश्वलायन गृ० सू० १.२.३-११।

३. विश्वेदेवानां संक्षिप्तः परिचयो मैकडानलमहाभागेनाधोविधं प्रस्तुतः — A comprehensive group called Viśvedevāh or All-gods occupies an important position. It is an artificial sacrificial group intended to include all the gods in order that none should be left out in laudations meant for the whole pantheon. A Vedic Reader p. 147.

एतेषां देवानां सूची देशकालविश्लेषेण भिद्यत एव। तथा हि विष्णुधर्मसूत्रे ६७.१-३ विश्वेदेवाः सन्ति—वासुदेवः, संकर्षणः, अनिरुद्धः, पुरुषः, सत्यः, अच्युतः, अग्निः, सोमः, मित्रः, वरुणः, इन्द्रः; इन्द्राग्नी, प्रजापतिः, अनुमतिः, धन्वन्तरिः, वास्तोष्पतिः, स्विष्टकृत्।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्नाभावे फलं, फलाभावे मूलं, मूलाभावे जलमेवार्पणीयमासीत्। अनेन प्रकारेणाकिंचनानामप्ययं यज्ञः सुसाध्य आसीत्। मेधा यशः प्रज्ञा विद्या बुद्धिश्रीबलानां स्पृहणीयकामना गृहस्थस्याभ्युदयाय प्रभवति।

भूतयज्ञस्याङ्गमेव बलिवैश्वदेवो यस्मिन् पक्वान्नेन विश्वेभ्यो देवेभ्योऽग्नौ तदभावे जले वा स्थले वा बलिः प्रदीयते। बलिवैश्वदेवे पुनः सर्वे देवा उपस्थाप्यन्ते, देवयज्ञे तु कतिपयात्मादर्शानुरूपा एव देवा पूज्यन्ते।

वैष्णवप्रतिभादर्शनमधोविधमुच्छ्रितं वर्तते—

भूतानि सर्वाणि तथान्नमेतदहं च विष्णुर्न ततोऽन्यदस्ति।
तस्मादहं भूतनिकायभूतमन्नं प्रयच्छामि भवाय तेषाम्॥
चतुर्दशो भूतगणो य एष तत्र स्थिता येऽखिलभूतसंघाः।
तृप्त्यर्थमन्नं हि मया विसृष्टं तेषामिदं ते मुदिता भवन्तु॥

बृहदारण्यकोपनिषदि भूतयज्ञस्यास्थाभूमिः सम्यक् परिलक्ष्यते। तद्यथा—सोऽवेदहं वाव सृष्टिरस्मि। अहं हीदं सर्वमसृक्षीति। ततः सृष्टिरभवत्। सृष्ट्यां हास्यै तस्यां भवति य एवं वेद। १.४.५

शङ्कराचार्य एतद् व्याख्याति—सृष्ट्यां जगति, हास्यप्रजापतेरेतस्यामेतस्मिञ्जगति, स प्रजापतिवत् स्रष्टा भवति स्वात्मनोऽनन्यभूतस्य जगतः। कः? य एवं प्रजापतिवद्यथोक्तं—स्वात्मनोऽनन्यभूतं जगत् साध्यात्मादिदैवं जगदहमस्मीति वेद। अर्थात् यथा प्रजापतिः सर्वेषां चराचराणां पिता तथैव मानवोऽपि सर्वेषां पिता भवति। तथ्यमेतत् विजानन् स भूतयज्ञेन सर्वान् चराचरान् पाति।

अतिथियज्ञः

प्रियो विशामतिथिर्मानुषीणाम्। ऋ० ५.१.९

वैदिकयुगस्यातिथियज्ञस्य, विशदकल्पनाथर्ववेदे वर्णिता। तद्यथा—अतिथिदर्शनं तु देवयजनमेव।[1] तत्रातिथिना सह सम्भाषणं, तस्मै उदका-

---

१. यद्वा अतिथिपतिरतिथीन् प्रतिपश्यति देवयजनं प्रेक्षते। यदभिवदति दीक्षामुपैति। यदुदकं याचत्यपः प्रणयति। यत् तर्पणमाहरन्ति य एवाग्नीषोमीयः पशुर्बध्यते स एव सः। यदावसथान् कल्पयन्ति सदोहविधानान्येव तत् कल्पयन्ति। यदुपस्तृणन्ति बर्हिरेव तत्। यदा परिशयनमाहरन्ति स्वर्गमेव तेन लोकमवरुन्धे। यदाञ्जनाभ्यञ्जनमाहरन्त्याज्यमेव तत्।

यत् पुरा परिवेषात् खादमाहरन्ति पुरोडाशावेव तौ।
यदशनकृतं ह्वयन्ति हविष्कृतमेव तद्ध्वयन्ति॥ अथर्ववेदे ९.६.(१).३-१३ (सारभूतम्)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

र्पणम् आवसथ-प्रदानं, शयन-व्यवस्था च, अञ्जनाभ्यञ्जन-दानं, भोजन-समर्पणमित्यादीनि यज्ञकर्माङ्गानीति विहितम् । यदतिथिर्भुङ्क्ते तत्तु आत्मनि हवनम् । अतिथयोऽतिथिपतीन् स्वर्गं गमयन्ति । अतिथिर्यस्यान्नं भुङ्क्ते, तस्य पापानि नश्यन्ति । अन्यच्च—

प्राजापत्यो वा एतस्य यज्ञो विततो य उपहरति ।
प्रजापतेर्वा एष विक्रमाननुविक्रमते य उपहरति ॥

अथर्व ९.६ २८

अतिथिपतिरतिथेः प्राङ् नाश्नीयात्, अन्यथा स स्वीयेष्टापूर्तेभ्यो विहीनो भवति । तस्य गृहात् पयो रसो च निवर्तेते । ऊर्जां च वा स्फीतिं च गृहाणामश्नाति यः पूर्वोऽतिथेरश्नाति । तस्य प्रजा, पशुः कीर्तिर्यशः, श्रीः संविच्च तं त्यजन्त्येव ।[1]

अतिथये घृतमधुसम्पृक्तपदार्था भोजनाय समर्पणीया आसन् । अतः परं प्रोक्तमृषिणा—अतिथीन् प्रतिपश्यति हिं कृणोति अभिवदति प्रस्तौत्युदकं याचत्युद्गायति ।

उपहरति प्रतिहरत्युच्छिष्टं निधनम् ।
निधनं भूत्याः प्रजायाः पशूनां भवति य एवं वेद ॥

अथर्ववेदे ९.६.(५) ८-१०

ऐतरेयब्राह्मण आतिथ्यस्य महती प्रतिष्ठा विभायते । तदनुसारेण 'शिरो वा एतद् यज्ञस्य यदातिथ्यम्' ।[2]

तैत्तिरीय-ब्राह्मणानुसारेणातिथेः प्रथमपदे स्वागतं दीपदर्शनेनाक्रियत । पश्चात्तस्मै भोजनं प्रादीयत ।[3]

उपनिषद्युगेऽतिथिसत्कारः सौहार्देन निष्पादित आसीदिति कठोपनिषदि नाचिकेतस उपाख्यानेन प्रतीयते[4] । न कंचन वसतौ प्रत्याचक्षीतेति तैत्तिरीयोपनिषदि घोषितम् । ३.१० नैकशो राज्ञा ब्राह्मणातिथेः सम्यगतिथिसत्कारो वर्णितः । अतिथिसत्कारोऽनभीष्टजनानामपि कर्तव्य इति पराशरोऽधोविधमुपन्यस्यति—

---

१. अथर्ववेद ९.६. (३), १–७ ।

२. ऐ० ब्रा० १.२५ ।

३. अथो यथाविधि ज्योतिष्कृत्वा परिवेवेष्टि । २.१.३ ।
महाभारते ज्योतिर्दानं प्रशस्यते । अनु० १०१.४६ ।

४. वैश्वानरः प्रविशत्यतिथिर्ब्राह्मणो गृहान् ।
तस्यैतां शान्तिं कुर्वन्ति हर वैवस्वतोदकम् ॥ १.१.७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रियो वा यदि वा द्वेष्यो मूर्खः पण्डित एव वा ।
वैश्वदेवे तु सम्प्राप्तः सोऽतिथिः स्वर्गसंक्रमः[1] ।। १.४०

महाभारत आतिथ्यस्य माहात्म्यं भूयिष्ठं प्रवर्तितम् । तत्र शान्तिपर्वणि कपोतलुब्धकाख्याने कपोतो पत्नीग्राहकं व्याधमतिथिं मत्वा निवेदयति[2]—

सन्तापश्च न कर्तव्यः स्वगृहे वर्तते भवान् ।
शरणागतस्य कर्तव्यमातिथ्यमिह यत्नतः ।।

कपोतस्तस्य शैत्याद् रक्षणाय दूरतोऽग्निमानीय पर्णेषु सम्पात्यौष्ण्यं कृतवान् । पश्चात् तस्य बभुक्षां हर्तुं—

तमग्निभिः परिक्रम्य प्रविवेश महीपते ।

आश्वमेधिकपर्वणि नकुलोपाख्यान उञ्छवृत्तेर्ब्राह्मणस्यातिथ्यवृत्तेन प्रतीयते यन्न केवलं धनिकानामेवातिथिसत्कारः सम्भव आसीदपितु दरिद्राणामपि आतिथ्य-यज्ञो महामहिमशाली बभूव[3] । तथाहि—

उञ्छवृत्तिद्विजः कश्चित् कापोतिरभवत् पुरा । तस्य कुटुम्बे चत्वारः कुलावयवा आसन्—भार्या, पुत्रः, स्नुषा, वधूश्च । षष्ठे कालेऽकाले सति विप्रः[4] भार्यादिभिः सह भुङ्क्ते । एकदा ते षष्ठे काले सम्प्राप्ते उञ्छेन प्राप्तं सक्तुं षड्भागे विभज्य खादितुमुद्यताः, तदा कश्चिदतिथिरागतः । तदनु—

ते तं दृष्ट्वातिथिं तत्र प्रहृष्टमनसोऽभवन् ।
कुटीं प्रवेशयामासुः क्षुधार्तमतिथिं तदा ।। ९३.१४
इदमर्घ्यं च पाद्यं च बृसी चेयं तवानघ ।
शुचयः सक्तवश्चेमे नियमोपार्जिता प्रभो ।। ९३
प्रतिगृह्णीष्व भद्रं ते मया दत्ता द्विजोत्तम ।

अतिथिस्तु सर्वेषां तेषां सक्तुमादाय भुक्तवानुवाच च—

शुद्धेन तव दानेन न्यायोपात्तेन यत्नतः ।
यथाशक्तिविमुक्तेन प्रीतोऽस्मि द्विजसत्तम ।। ९३.५७

---

१. रामायणे समर्थितमेतत्—अतिथिः किल पूजार्हः प्राकृतोऽपि विजानता । सुन्दर० १.११९. इमर्सनः प्रमाणयति—Happy the man who never puts on a face, but receives every visitor with that countenance he has on. Journals.

२. १४१-१४५ अध्यायतः ।

३. धृतराष्ट्रो वानप्रस्थो युधिष्ठिरस्य आतिथ्यं कुर्वन् कथयति—
यदन्नो हि नरो राजंस्तदन्नोऽस्यातिथिः स्मृतः । आश्रमवासिकपर्व० ३३.३६.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

महाभारतानुसारेण गृहस्थस्य महिमशाली उपाधिरासीदतिथिप्रियः सर्वातिथिव्रती[1] च। महाजनानामातिथेयगृहमासीत्।[2]

राज्ञः सुदर्शनस्य व्रतमासीत्—

प्राणा हि मम दाराश्च यच्चान्यद् विद्यते वसु।
अतिथिभ्यो मया देयमिति मे व्रतमाहितम्॥ अनु० पर्व २.७०

पूर्वोक्तेषु यज्ञेषु सर्वेषु मानवस्यौदात्त्यसंवर्धनोपायाः सम्यक् प्रकल्पिता दृश्यन्ते। अतिथियज्ञे पुनरातिथेयः स्वीयेन स्वल्पश्रमेणाप्यर्जितभोज्यादिकं दत्त्वा विनिमयरूपं तस्मादतिथेस्तस्य सम्पूर्णजीवनस्य तपसा मननेन स्वाध्यायेन यद्वा देशदर्शनोपन्नेन सौन्दर्यनिदर्शकप्रवचनेन यद्वा महात्मनां संगतौ प्राप्तेन ज्ञानविज्ञानराशिना चोपक्रियते।[3] भारतीयसंस्कृतेर्दिग्दिगन्तप्रसारेण मनीषिणां विचरणसौख्यसम्पादनेन च यज्ञोऽयं भूयिष्ठं महत्त्वस्यैकायनम्। विद्वांसोऽतिथयो गृहस्थानामातिथेयानां जीवनरहस्यात्मकप्रश्नान् समाहितवन्तः।[4] अतिथीनां प्रज्ञान-प्रवचनेनातिथेयानां महान् लाभो वर्णनातीतो विषयः प्रागेव दिङ्मात्रं निदर्शितः।

मनुना सम्यक् प्रोक्तम्—

धन्यं यशस्यमायुष्यं स्वर्ग्यमतिथिपूजनम्॥ ३.१०६

मधुपर्कः

प्रत्युद्गमन-विधिना श्रेष्ठातिथीन् समानीय तेषां मधुपर्कविधिना स्वागतं

---

१. आदि० १५३.४ २. द्रोण० ८५.२२

३. उदाहरणार्थं महाभारते नारदो युधिष्ठिरमतिथीभूयाजगाम। युधिष्ठिरस्तमभ्यर्च्य प्रोवाच—

के देशाः परिदृष्टास्ते किं च कार्यं करोमि ते।
तद् ब्रूहि द्विजमुख्यस्त्वमस्माकं च प्रियोऽतिथिः॥

नारद उवाच—चिरदृष्टोऽसि मे राजन्नागतोऽस्मि तपोवनात्।
परिदृष्टानि तीर्थानि गङ्गा चैव मया नृप॥

आश्रमवासिकप० ४५.४, ५।

गौतमबुद्धस्यातिथेयानां कृते प्रवचनानि तेषु सत्त्वस्य प्रतिष्ठापनाय बभूवुः। यथा सुत्तनिपातस्य महामंगलसुत्ते १.८, आडवकसुत्ते महावग्गे ६.२८.४५।

जैनाचार्या गृहस्थेभ्यः सद्धर्मोपदेशान् अणुव्रतादीनि च शिक्षयन्ति स्म। तेषां कृतेऽतिथिसंविभागो वैदिकयज्ञवदभूत्। तत्त्वार्थसूत्रे ७.२२, ३७।

४. शान्ति० ३४३, ३४४ पर्वणः।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

निष्पादितम् । मधुपर्कार्हा आसन्—ऋत्विक्, आचार्यः, स्नातकः राजा, श्वशुरः, पितृव्यः, मातुलः, प्रियश्च । आश्वलायनगृह्यसूत्रानुसारेण दधिनि मध्वानीय विष्टरः[1], पाद्यमर्घ्य[2]माचमनीयं मधुपर्को गौरित्येतेषां त्रिस्त्रिरेकैकं वेदयन्ते । कानि-कानि वस्तूनि मधुपर्कविधावशनाय समर्पणीयानीति नैकतानतां समाधत्ते । प्रायेण मधुपर्कद्रव्येषु दधि, घृतं, जलं, यवचूर्णं च समाविष्टानि ।

आतिथ्यं न केवलं राजभिः ऋषिभिश्च[3] सुसम्पादितं दृश्यते ऽपितु सामान्यजनैरपि सुकृतमातिथ्यं भारतीयसंस्कृतिं सर्वोच्चशिखरं प्रापयति ।

जीवनदर्शनम्

वैदिकगृहस्थानां जीवनपरिदर्शनं सारमार्गणदिशाधोविधं वक्तुं शक्यते । ते सत्यपरायणा आसन्निति वसिष्ठस्याधोविधप्रार्थनया ज्ञायते—

प्रति यच्चष्टे अनृतमनेना अव द्विता वरुणो मायी नः सात् ॥ ऋ० ७.२८.४

अर्थात् वरुणः कविमनृताद्रक्षिष्यति ।

स्वजीवने आध्यात्मिकमाधिभौतिकं वैज्ञानिकं च प्रगमनं समीहमानास्ते यशस्विनो भवितुमप्रार्थयन्त । तद्यथा

महे नो अद्य सुविताय बोध्युषो महे सौभगाय प्र यन्धि ।
चित्रं रयिं यशसं धेह्यस्मे देवि मर्तेषु मानुषि श्रवस्युम् ॥ ऋ० ७.७५.२
न ऋते श्रान्तस्य सख्याय देवाः । ऋ० ५.३३.११

---

१. पंचविंशति-दर्भाणामासनम् ।

२. नैकविधोऽर्घः । तथाहि—
(क) गन्धमाल्यादिसंयुक्तमुदकमर्घ्यमुच्यते ।
(ख) आपः क्षीरं कुशाग्रं च दधि सर्पिः सतण्डुलम् ।
यवः सिद्धार्थकश्चैव अष्टाङ्गोऽर्घः प्रकीर्तितः ॥
(ग) रक्तविल्वाक्षतैः पुष्पैर्दधिदूर्वाङ्कुशैस्तिलैः ।
सामान्यः सर्वदेवानामर्घोऽयं परिकीर्तितः ॥
(घ) आपः क्षीरं कुशाग्राणि धृतं मधु तथा दधि ।
रक्तानि करवीराणि तथा रक्तं च चन्दनम् ॥

३. आश्रमेषु निवसन्त ऋषयो विश्वामित्र-भरतादीनां राज्ञामपि आतिथ्यं कुर्वन्तो दृश्यन्ते ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पश्येम शरदः शतम् । जीवेम शरदः शतम् ॥
बुध्येम[1] शरदः शतम् । रोहेम शरदः शतम् ॥
पूषेम शरदः शतम् । भवेम शरदः शतम् ॥
भूषेम शरदः शतम् । भूयसी शरदः शतात् ॥ अथर्व० १९.६७.२-८

यजुर्वेदे कथितम्—

अदीनाः स्याम शरदः शतम् । ३६.२४

अनेन स्पष्टं प्रतिभाति यद् वैदिकयुगे सुसंस्कृतजना आनन्दमनुभवन्तो नित्यकर्मण्याः स्वीयं पूर्णं जीवनं सामर्थ्य-सौन्दर्यसुरभितमकुर्वन् । सुकीर्तिस्तेषामभीष्टासीत् ।[2]

ऋषिर्वैदिकयुगे हृदयेन शरीरेण च दौर्बल्यं न प्रादर्शयत् । ऋग्वेदे स इन्द्रं संबोधयति—

अहमस्मि सपत्नहेन्द्र इवारिष्टो अक्षतः ।
अधः सपत्ना मे पदोरिमे सर्वे अभिष्ठिताः ॥ १०.१६६.२

अनेन तेषां युद्ध-प्रियत्वं विभायते[3] ।

देवानां पराक्रमस्य गानेन ऋषयस्तेभ्यो वीर्यप्राप्तिमाशंसन्त । तथाहि—अश्विद्वयात् सुवीर्याय जनास्तस्य पराक्रमान् सङ्कीर्तयन्ति—

'अनु यद्वां श्रवस्या सुदान्' । सुवीर्याय चर्षणयो मदन्ति ॥

कर्मनिष्ठा

वैदिकमनीषिणः स्वर्णिमगार्हस्थ्यजीवनमकामयन्तेति ऋग्वेदे तेषामग्नेः प्रार्थनया विभाति—

मा नो अग्नेऽवीरते परा दा दुर्वाससेऽमतये मा नो अस्यै ।
मा नः क्षुधे मा रक्षसे ऋता वो मा नो दमे मा वन आ जुहूर्थाः ॥ ७.१.१९

अर्थात् गृहस्थाः पुत्र-सुवसन-सुमति-भोजन-सदाचारादिभिः सुमनसो भवितुं यतन्ते स्म ।

वैदिकयुगे लोकानामाध्यात्मिक आधिभौतिको मानसिश्च यो महानभ्युदयोऽभवत्, तस्य दर्शनं तेषां संस्कृतौ प्रतिपदं भवति । तेषां तपोमय-

---

१. ऋग्वेदे गृहस्थः कविरात्मजिज्ञासां विवृणोति—
सं पूषन् विदुषा नय यो अञ्जसानुशासति । य एवेदमिति । ऋ० ६.५४.१ ।
२. सुकीर्तिं भिक्ष वरुणस्य भूरेः । ऋ० २.२० १ ।
३. अन्यत्रापि—ऋग्वेदे २.२३ सूक्ते ब्रह्मणस्पतिस्तु वस्तुतो ब्राह्मण एव कवीनां कविरिति सम्बोधनेन प्रमाण्यते । स शत्रूणां संहरणेऽतीव दक्षः । तत्रैव मन्त्रः १३ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

जीवनवृत्तिः साहसपूर्णमात्मरक्षणं, श्रमसाध्यो व्यवसायोद्योगोत्कर्षश्च सर्वतोभावेन तस्मिन् युगे मानवतां स्पृहणीयपदेऽस्थापयन्।

मूलमन्त्रो वैदिकानामासीत् सर्वेषां कल्याणाय सर्वेषां सात्त्विकवृत्त्या सम्मिलितभावेन सम्पत्ति-समृद्ध्यर्थमात्मयोगो विपत्तिनिवारणार्थं समुद्योगश्च। एतदर्थं यच्चारित्रिकसमुत्थानमावश्यकमासीत्, तत्तेषां परं समीहितं प्रेष्ठं च संकल्पितं बभूव।

वैदिकमानवो वेदेषु आत्मानं व्यक्तीकरोत्यधोविधम्—

कृधी न ऊर्ध्वान् चरथाय जीवसे। ऋ० १.३६.१४

अर्थात् वयमुदात्तजीवनं जीवेम।

विश्वदानीं सुमनसः स्याम पश्येम नु सूर्यमुच्चरन्तम्। ऋ० ६.५२.५

कृतं मे दक्षिणे हस्ते जयो मे सव्य आहितः। अथर्व० ७.५२.८

मदेम शतहिमाः सुवीराः। अथर्व० २०.६३.३

स देवान् प्रार्थयते—तेजः, वीर्यं, बलमोजो, मन्युं, सहः (साहसं) मयि धेहि।[1] बृहस्पतिं कविः प्रार्थयते—

त्वया वयं सुवृधा ब्रह्मणस्पते स्पार्हा वसु मनुष्याददीमहि। ऋ० २.२३.९

सम्पूर्णमेव जीवनं धर्मार्थकाममोक्षप्रवृत्तिभिरुदात्तीकृतमस्त्विति तेषां वैदिकमहामानवानां स्पृहणीयं प्रतिभाति। तद्यथा कक्षीवानात्मसमीहितं निरूपयति—

शिशीतमिन्द्रापर्वता युवं नस्तन्नो विश्वे वरिवस्यन्तु देवाः। ऋ० १.१२२.३

पतिः स्यां सुगवः सुवीरः।

उत पश्यन्नश्नुवन्, दीर्घमायुरस्तमिवेज्जरिमाणं जगम्याम्॥ ऋ० १.११६.२५

मा नः कामं महयन्तमा धुग्विश्वा ते अश्यां पर्यापं आयोः। ऋ० १ १७८.१

वैदिकगृहस्थविदुषां सामाजिकसहायशीलजीवनादर्शा अश्विनोश्चरितावलीमुपजीवन्ति स्म। अश्विद्वयस्यादर्शभूतानि चरितान्यधोविधानि विलसन्ति[2]—

१. जले परित्यक्तं भुज्युं तावुद्धृतवन्तौ। इदं परिलक्ष्य कविना गीतम्—

अनारम्भणे तदवीरयेथामनस्थाने अग्रभणे समुद्रे। ऋ० १.११६.५

---

१. यजुर्वेद १९.९। अन्यच्च—द्यावापृथिव्यौ निवेदिते—

ते नो गृणाने महिनी महि श्रवः क्षत्रं द्यावा-पृथिवी धासथो बृहत्।

येनाभिकृष्टीस्ततनाम विश्वहा पनाय्यमोजो अस्मे समन्वितम्॥ ऋ० १.१६०.५

२. द्रष्टव्यम्—ऋग्वेदे ७.६८.७१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

२. गोतमर्षेर्गोभ्यो जलं कूपादुद्धृतवन्तौ । यथा ऋषिर्वर्णयति—

परावतं नासत्यानुदेथामुच्चा बुध्नं चक्रथुर्जिह्मवारम् ।
क्षरन्नापो न पायनाय राये सहस्राय तृष्यते गोतमस्य ॥ १.११६.९

३. गर्ते पतितं वन्दनर्षिमुपरि कृतवन्तौ—

यद्विद्वांसा निधिमिवापगूढमुद्दर्शतादूपथुर्वन्दनाय । १.११६.११

४. अन्धाय कवये दृष्टिं प्रादाताम् । वृकदंष्ट्रात् पक्षिणमरक्षताम् । अश्विनौ पुरुभुजावास्ताम् ।

आस्नो वृकस्य वर्तिकामभीके युवं नरा नासत्यामुमुक्तम् ।
उतो कविं पुरुभुजा युवं ह कृपमाणमकृणुतं विचक्षे ॥ १.११६.१४

५. रेभ इति नामको ऋषिः शत्रुभिर्निगृहीतोऽप्स्वन्तो वन्दीकृतः । ततः सोऽश्विभ्यामुन्नीतः ।

दश रात्रीरशिवेना नव द्यूनवनद्धं श्नथितमप्स्वन्तः ।
विप्रुतं रेभमुदनि प्रवृक्तमुन्निन्यथुः सोममिव स्रुवेण ॥ १.११६.२४

कर्मण्यौ शरण्यौ चाश्विनौ कर्मण्यशरण्यलोकानां प्रशंसापदानि अर्हतः ।

ये गुणा आराध्यदेवेषु प्रशंसिता सन्ति तान् वैदिका आत्मसात्कर्तुं यतन्ते स्म । तद्यथाग्निमधिकृत्य कविना प्रगीतम्—

अस्य त्वेषा अजरा अस्य भा नवः सुसंदृशः सुप्रतीकस्य सुद्युतः ।
मात्वक्षसो अत्यक्तुर्न सिन्धवोऽग्ने रेजन्ते अससन्तो अजराः ॥
ऋ० १.१४३.३

अनेन जनानां सौन्दर्यं, तेजस्वितां, तैक्ष्ण्यमजर्यं सततश्रमं च प्रत्याकर्षणं प्रमाणितमेव । अन्यच्च—

शत्रुविनाशाय प्रतापप्रदर्शनं तु महान् गुणः स्पृहणीय एव । न केवलं क्षत्रिया अपितु वेदसूक्तानां रचयितार ऋषयोऽपि शत्रुधर्षणे कृतश्रमा आसन् ।[1]

तत्र बहवो रक्षका लोके आसन् । ते रक्षका दर्पान्धा बभूवुः । ते सततं जागरूका बभूवुः ।[2] रक्षकोऽयं देवो विष्णुः स्वविक्रमेण प्रथितः ।[3]

सांस्कृतिकदृष्ट्या विष्णोः परमं विशेषणमस्ति—

य उ त्रिधातु पृथिवीमुत द्याम् ।
एको दाधार भुवनानि विश्वा ॥ १.१५४.४

अत्र विष्णोस्त्रिलोकधारणं प्रथितम् । यथा विष्णुस्त्रिलोकं धारयति.

---

१. ऋ० १.१४३.५ । ऋग्वेद २.२३.३ अनुसारेण बृहस्पतिरमित्रान् राक्षसांश्च संहरति ।

२. ऋ० १.१४३.८; २.२३.५ । ब्रह्मणस्पतिः रक्षकः सुगोपा चास्ति ।

३. विचक्रमाणस्त्रेधोरुगायः । इति ऋ० १.१५४.१
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा । ऋ० १.१५४.२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तथैव जना भूतयज्ञेनातिथियज्ञेन च दिव्यादिव्यान् सर्वान् धारयन्ति स्म। न केवलं विष्णुरपितु बहवो देवा विश्वधारण-प्रवृत्तिभिर्विख्याताः सन्ति। तद्यथा द्यावापृथिवी भुवनानि रक्षतः।[1] इन्द्रः प्रसिद्ध एव ऋषीणां रक्षकः।

नरः कांस्कान् विशेषानात्मसात् करोत्विति अग्नेरनुकारेण वैदिका ब्राह्मणाः सम्यगजानन्। सोऽयमग्निस्तैर्नित्यं दृष्ट आसीत्। तद्यथा—

मन्थता नरः कविमद्वयन्तं प्रचेतसममृतं सुप्रतीकम्।
यज्ञस्य केतुं प्रथमं पुरस्तादग्निं नरो जनयता सुशेवम्। ऋ० ३.२९.५

वैदिकगृहस्थानां प्रारम्भिकयुगे वर्णचतुष्टयेन सम्यग्विभाजनं नासीत्। तथापि तेषां पुरतो देवानामादर्शचरितावली प्रावर्तत। देवेषु वर्ण-विषयक-वैशिष्ट्यस्य प्रतिभासस्तेषां विशिष्टप्रवृत्तिभिः संगच्छते। तथाहि वैदिक-साहित्येऽग्नौ बृहस्पतौ च ब्राह्मणवृत्तिः, इन्द्रे विष्णौ च क्षत्रियवृत्तिः, मरुत्सु, ऋभुषु अश्विद्वये च वैश्यशूद्रवृत्तिः[2] निसर्गतः। प्रवृत्तिविशेषे रुचिपरायणा वर्गाः परवर्तिवैदिकयुगे स्वस्वप्रवृत्त्यनुकूलं ब्राह्मणाः, क्षत्रियाः, वैश्याः, शूद्राश्च सञ्जाताः। पूर्वोक्तदेवानां चारित्रिक-विशेषानुसारेण विविध-वर्णस्य गृहस्थानां जीवन-विन्यासो विशदीकरणीयः। ऋषयस्तु प्रायो ब्राह्मणा एव। ते ऋषयः पूर्ववैदिकयुगे न केवलं ज्ञानमपितु क्षत्रबलमपि विषमस्थितावावश्यकं मत्वा स्वस्मिन् बहुलीकुर्वन्ति स्म।[3]

अपरं चाग्निर्युवा कविः, ऋतवान् लोकानां पालकश्चास्ति।[4] उपास्य-

---

१. ऋ० १.१६०.१,२

२. मित्रावरुणौ क्षत्रिया इति ऋग्वेदे ७.६२.२ तथा ८.२५.८। आदित्याः क्षत्रिया इति ऋग्वेदे ८.६७.१। विश्वेदेवाः क्षत्रिया इति ऋग्वेदे १०.६६.८। अग्निर्ब्राह्मण इति बृहदारण्यके १.४.१५। बृहस्पतिर्ब्राह्मणः इति बृहदा० १.३.२०। इन्द्रः वरुणः, सोमः, रुद्रः, पर्जन्यः, यमः मृत्युः ईशानश्च क्षत्रा इति बृहदारण्यकोपनिषदि १.४.११। महाभारतानुसारेण तु—

आदित्या क्षत्रियास्तेषां विशस्तु मरुतस्तथा।
अश्विनौ तु मतौ शूद्रौ तपस्युग्रे समाहितौ॥
स्मृतास्त्वाङ्गिरसा देवा ब्राह्मणा इति निश्चयः॥ शा० प० २०१.२२-२३

आङ्गिरसस्तु बृहस्पतिः।

३. ते नो गृणाने महिनी महि श्रवः क्षत्रं द्यावापृथिवी धासथो बृहत्।
येनाभि कृष्टीस्तत नाम विश्वहा पनाय्यमोजो अस्मे समिन्वतम्॥ ऋ० १.१६०.५

४. युवा कविः पुरुनिष्ठ ऋतावा। धर्ता कृष्टीनामुत मध्य इद्धः॥ ऋ० ५. १.६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

देवाग्निसदृशो भवितुं युवका यतेरन्निति प्रमातुं शक्यते। तेषां वैदिकानां प्रथमोऽतिथिरग्निरासीत्। तस्मै ते बलिं भरन्ति स्म।[1]

इमे वैदिकगार्हस्थ्यजीवनादर्शाः परवर्तियुगेऽपि शाश्वतमात्मसात्कृता लोकान् सत्पथमुन्नयन्ति स्म। तथा हि कादम्बर्यां विनिवेशितं समुच्चयेन विद्वज्जनोचितगार्हस्थ्यमधिकृत्य—'देवपितृमनुष्याणामानृण्यं गन्तव्यम्। पुत्र-पौत्रसन्तत्या प्रपा-प्रासाद-तडागारामादिभिः कीर्तनैरलंकरणीया मेदिनी। कल्पस्थायि दिशो यायि यशो विप्रकिरणीयम्। गुरवोऽनुवृत्त्या सुखं स्थापनीयाः। स्निग्धबन्धव उपकरणीयाः। प्रणयिनो निर्विशेषविभवतां नेयाः। साधवः परिवर्धनीयाः। अनुजीविनः संविभजनीयाः। अभ्यागता निस्तृषः करणीयाः। जीवलोकसुखान्यनुभव्यानि। पुरुषार्थसाधनानि धर्मार्थकामाः प्राप्याः।'[2]

वैदिकब्राह्मणा मुख्यतो ज्ञान-विज्ञानधारिणो वैषम्यनिवारका बभूवुः। तैः काव्य-दर्शनमेकान्तसाधना, प्रतिभा, दीर्घजीवनं मुखश्रीश्चेति स्पृहणीया विशेषा अर्जिताः। तथापि तेषामुपभोग-परायणता प्राभवदिति निम्नोक्त्या विभायते—

इह त्या पुरु भूतमा पुरू दंसांसि बिभ्रता।
वरस्या याम्यध्रिगू हुवे तुविष्टमा भुजे॥ ऋ० ५.७३.२

अन्यच्च—उत नो गोषणि धियमश्वसां वाजसामुत।
नृवत् कृणुहि वीतये॥ ऋ० ६.५३.१०

अत्र 'वीतये' इति सौख्यभोगाय।

अतएव सुखसुरभिर्वैदिकगृहस्थानां जीवन आसीदिति निश्चितमेव। यामायनो गार्हस्थ्यं विवृणोति—

प्राञ्चो अगाम नृतये हसाय
द्राघीय आयुः प्रतरं दधानाः। ऋ० १०.१८.३

अत्र नृतिर्हसश्चैहिकं सुखमानन्दं च निर्वर्णयतः।

गृहसुखं तु वैदिकानां पत्नीविषयक-पूजन-धारणयापि विभाति। यामायन ऋग्वेदे पत्नीनां सौभाग्यं वर्णयति—

इमा नारीरविधवा सुपत्नीराञ्जनेन सर्पिषा संविशन्तु। १०.१८.७

वैदिकयुगेऽपि कतिपय-गृहस्थनागरका विटा बभूवुः। तेषां वर्णना ऋग्वेदेऽधोविधं प्रकल्पिता। द्यूतकरः स्वपत्नीं वर्णयति—

---

१. तुभ्यं भरन्ति क्षितयो यविष्ठः। बलिमग्रे अन्तित ओत दूरात्॥ ऋ० ५.१.१०

२. कादम्बरी पृष्ठ २८० डा० परशुरामलक्ष्मणवैद्य-संस्करणात्।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

न मा मिमेथ न जिहील एषा शिवा सखिभ्य उत मह्यमासीत् ॥
अक्षस्याहमेकपरस्य हेतोरनुव्रतामप जायामरोधम् ॥ १०.३४.२

स तु समाजे बहिष्कृतो बभूव। तस्य दुर्गतिरभवत्। तस्य पत्नीरपि तत्कारणाद् दुःखिता बभूव।[1]

जाया तप्यते कितवस्य हीना माता पुत्रस्य चरतः क्व स्वित्।
ऋणावा बिभ्यद् धनमिच्छमानोऽन्येषामस्तमुप नक्तमेति ॥ १०.३४.१०
स्त्रियं दृष्ट्वाय कितवं ततापान्येषां जायां सुकृतं च योनिम्।
पूर्वाह्णे अश्वान् युयुजे हि बभ्रूनत्सो अग्नेरन्ते वृषलः पपाद ॥ ऋ० १०.३४.११

देवेष्वग्निर्ब्राह्मणः।[2] बृहस्पतिर्ब्रह्मणस्पतिर्वा ब्राह्मण एव। देवानां गुरुर्बृहस्पतिर्वेदयुगीनब्राह्मण-गृहस्थानां जीवनादर्शान् प्रतिष्ठापयति। ऋग्वेदे बृहस्पतिर्विप्राणामृषीणां च नेतास्तीति वर्णितमधोविधम्—

तं प्रत्नास ऋषयो दीध्यानाः पुरो विप्रा दधिरे मन्द्रजिह्वम्। ४.५०.१

नायं बृहस्पतिः स्वीयेन ज्ञान-विज्ञान-साकल्येनैवाग्रगण्योऽपितु तस्य पराक्रमा अपि प्रशस्या एव राजन्ते। तद्यथा—

(१) आङ्गिरसानां ऋषीणां साह्येनेन्द्रो बलमभिनत्,
गाश्चामोचयत्। ऋ० ४.५०.५; १०.६८.५.३-१२।

(२) स महान् धार्मिकः स्वयमेव धनदोऽस्ति। ऋ० ४.५०.१०।

वैदिकब्राह्मणानां सविधे गवामश्वानां रथानां सुवर्णादीनां च बाहुल्यमासीदिति श्यावाश्वस्याधोवाचा प्रमीयते—

गोमदश्वावद्रथवत् सुवीरं चन्द्रवद्राधो मरुतो ददानः ॥ ऋ० ५.५७.७

अथर्ववेदानुसारेणायं बृहस्पतिर्वास्तु-विद्या-विशारद आसीत्।[3]

सर्वविधासु समृद्धिषु गावो सर्वोत्तमा मताः, यतोहि नाम तासु मध्ये वैदिकर्षिः सर्वाधिकसुखमन्वभवत्। वसिष्ठ उषसं प्रार्थयते—देवि न आयुः प्रतिरन्ती, इयं दधती गोमदश्वावद् रथवच्च राधः (उपहारं) दधती अस्मे भाहि।[4] ऋ० ७.७७.५

---

१. ऋग्वेदे १०.३४.३–४

२. अग्निनैव देवेषु ब्रह्माभवद् ब्राह्मणः। बृहदा० १.४.१५ एष (प्राणः) उ एव बृहस्पतिर्वाग्वै बृहती। तस्या एष पतिः। तस्मादु बृहस्पतिः। एष उ एव ब्रह्मणस्पतिर्वाग् वै ब्रह्म तस्या एव पतिर्ब्रह्मणस्पतिः। बृहदारण्यक० १.३.२०, २१

३. इमां शालां बृहस्पतिर्निमिनोतु प्रजानन् ॥ ३.१२.५
महाभारते च ब्राह्मणस्थपतिरुल्लिखितः। अनु० १०७.१११; आश्व० ८६.२५

४. देवांश्च याभिर्यजते ददाति च। ज्योक्तिताभिः शचते गोपतिः सह ॥ ऋ० ६.२८.३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

हिरण्यस्तूपस्य च सोमं प्रति स्तुतिस्तत्समर्थयति—

भरा चन्द्राणि गृणते वसूनि । ऋ० ९.६९.१०

आ नः पवस्व वसुमद्धिरण्यवदश्वावद् गोमद् यवमत् सुवीर्यम् ।

ऋ० ९.६९.८

पूर्वोक्तेन विवरणेन ज्ञायते यद् ऋषयो यज्ञं सम्पादयन्तो यजमानेभ्यो भूयिष्ठं धनं प्राप्नुवन् ।[1] गोपालनेन तेषां भोजनसाधनं स्वास्थ्यप्रदं सुलभमेवासीत् ।[2] दानग्रहणेन तेषां समृद्धिर्भूयिष्ठा बभूव । यथावश्यकं ते स्वानुगृहीतै राजभिः सह युद्धभूमा उपस्थिताः सूक्तैस्तेषामुत्साहमवर्धयन्त ।[3]

ऋग्वेदे बृहस्पति[4]-पथमनुसरतां ब्राह्मणगृहस्थानां सर्वोत्तमं कर्माधोविधं वर्णितम्—

हृदा तष्टेषु मनसो जवेषु यद् ब्राह्मणाः संयजन्ते सखायः ।
अत्राह त्वं वि जहुर्वेद्याभिरोह ब्रह्माणो विचरन्त्यु त्वे ॥ १०.७१.८
सर्वे नन्दन्ति यशसागतेन सभासाहेन सख्या सखायः ।
किल्विषस्पृत् पितुषणिर्ह्येषामरं हितो भवति वाजिनाय ॥
ऋचां त्वः पोषमास्ते पुपुष्वान् गायत्रं त्वो गायति शक्वरीषु ।
ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां वि मिमीत उ त्वः ॥ १०.७१.११

नैके ब्राह्मणा ओषधीनुत्पादयन्ति स्म तैरोषधीभिश्च रोगान् चिकित्सन्ति स्म । ते बहुधनं स्वकार्यस्य पुरस्कारं प्राप्नुवन् ।[5] बृहस्पतिरोषधीनामधिष्ठाता देवोऽस्ति । तस्यानुरूपं ब्राह्मणानां भिषक्त्वं प्रवर्तते स्म ![6]

ऋषिर्भृगुवेनः समरे युध्यमानः सोमस्य प्रोत्साहनमाकांक्षति, सोमेन कृतं स्वशत्रूणां संहारमभीप्सति च । अस्मिन् प्रसङ्ग इन्द्रोऽपि स्वशत्रून् हन्तुं

---

१. ऋग्वेदे १.१८४.५ । २. ऋ० २.१२.४ ।

३. बहवो राजानो भरतकुलोत्पन्नं सैनिकानां नेतारं सुदासं पराजेतुमयुध्यन्त । सुदासस्य सेना स्वल्पापि वसिष्ठर्षेरिन्द्रस्तुतियोजनया बहुबलानपि शत्रुभूतान् राज्ञः पराजितवती । तत्र वसिष्ठाधिष्ठितर्षीणां गणस्तृत्सुनामकः सुदासस्य साह्यमकरोदिति वर्णितमधोविधम्—

दाशराज्ञे परियत्ताय विश्वतः सुदास इन्द्रावरुणावशिक्षतम् ।
शिवत्यञ्चो यत्र नमसा कपर्दिनो धिया धीवन्तो असपन्त तृत्सवः ॥ ऋ०७.८३.८

४. बृहस्पतिर्ब्राह्मण इति महाभारते शान्तिपर्वणि २०१.२३ ।

५. ऋ० १०.९७.५, ६,२२ । ६. ऋ० १०.९७.१५ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रार्थितः ।[1] वैभवपरायण आसीदयं कवि' ।[2]

ब्राह्मणैर्दानं दातव्यमासीत् । ऋग्वेदानुसारेण—

तमेव ऋषिं तमु ब्रह्माणमाहुर्यज्ञन्यं सामगामुक्थशासम् ।
स शुक्रस्य तन्वो वेद तिस्रो यः प्रथमो दक्षिणया रराध ।। १०.१०७.६

सशस्त्रा अपि केचन ब्राह्मणाः शत्रुसंहरणेन विख्याताः सन्ति । प्रत्यङ्गिरस आत्मनः समुद्यमं वर्णयन्नथर्ववेदे प्राह—

स्वायसा असयः सन्ति नो गृहे । १०.१.२०

अथर्ववेदानुसारेण कतिपये ब्राह्मणा ऋषयश्च व्यापारेण वाणिज्येनापि समृद्धिं गता आसन् । तथा हि—

नुदन्नरातिं परिपन्थिनं मृगं स ईशानो धनदा अस्तु मह्यम् ।
ये पन्थानो बहवो देवयाना अन्तरा द्यावापृथिवी संचरन्ति ।
ते मा जुषन्तां पयसा घृतेन यथा क्रीत्वा धनमाहराणि ।
इध्मेनाग्न इच्छमानो घृतेन जुहोमि हव्यं तरसे बलाय ।
यावदीशे ब्रह्मणा वन्दमान इमां धियं शतसेयाय देवीम् ।
येन धनेन प्रपणं चरामि धनेन देवा धनमिच्छमानः ।
तस्मिन् म इन्द्रो रुचिमादधातु प्रजापतिः सविता सोमोअग्निः ।

अथर्ववेदे ३.१५. १, २, ३,५

ब्राह्मण-गृहस्थस्य गृहम् (शाला) अथर्ववेदेऽधोविधं वर्णितम् —

ध्रुवा शालासीत् घृतपूर्णा सुरक्षिता बभूव । तत्र गृहस्थो नीरोगैः स्ववीरपुत्रैः सहावसत् । शाला अश्वैः, गोभिः शोभना सती सूनृतावती, ऊर्जस्वती, पयस्वती राजते स्म । सा शाला शरण्या तृणैराच्छादिता रमणीयासीत् ।[3]

ब्राह्मणगृहस्थजीवनस्यादर्शाभिव्यक्तिरधोलिखितोपनिषत्सूक्तिभिर्भवति—

१. आप्यायन्तु ममाङ्गनि, वाक्, प्राणश्चक्षुः श्रोत्रं बलमिन्द्रियाणि च सर्वाणि ।
२. माहं ब्रह्म निराकुर्याम्
३. मा मा ब्रह्म निराकरोत् ।
४. य उपनिषत्सु धर्मास्ते मयि सन्तु । छान्दोग्ये, केनोपनिषदि च ।

---

१. अस्मान्त्समर्ये पवमान चोदय दक्षो देवानामसि हि प्रियो मदः ।
जहि शत्रूंरभ्या भन्दनायतः पिबइन्द्र सोममव नो मृधो जहि ।। ऋ०९.८३.२

२. पवमानो अभ्यर्षा सुवीर्यमुर्वीं गव्यूतिं महि शर्म सुप्रथः ।
माकिर्नो अस्य परिषूतिरीशतेन्दो जयेम त्वया धनंधनम् ।। ऋ०९.८५.८

३. अथर्व० ३.१२.१,२,४,५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

५. तेजस्वि नावधीतमस्तु । कठोपनिषद्
६. भद्रं कर्णेभिः शृणुयाम, भद्रं पश्येमाक्षभिः ।
स्थिरैरङ्गैस्तुष्टुवांस्तनूभिर्व्यशेम देवहितं यदायुः ।।
स्वस्ति नो बृहस्पतिर्दधातु । प्रश्नोपनिषद्
७. अनेनाधीतेनाहोरात्रान् सन्दधामि । ऐतरेयोपनिषद्

एताभिः सूक्तिभिः प्रतीयते यदुपनिषद्युगीना ब्रह्मपरायणा ऋषयः पूर्णज्ञान-कर्मोपलब्धये शरीरस्य सम्यक् स्वास्थ्याय सचेष्टा आसन् । तेषामध्ययनं ज्ञानं च तेजस्वितां वर्धयितुमुद्दिष्टमासीत् । न केवलमात्मन्येव ते विलीना बभूवुः, अपितु चतुर्दिक्षु ते भद्रमेव श्रोतुं द्रष्टुं च सर्वतो भद्रं विधातुं प्रयत्नशीला बभूवुः । तेषां ज्ञानमनिशं सर्वेषां सदाचार-प्रतिष्ठापनेन सार्थकतां लेभे ।

वैदिकयुगे देवेषु ब्राह्मणपदं स्वयमेव ब्रह्मणा सर्वोपरि गृहीतमासीत् । सोऽयं ब्रह्मा न केवलं ज्ञान-विज्ञानेनापितु पराक्रमेणापि देवानामग्रणीर्बभूव[1] । अत एव ब्राह्मणा न केवलं ज्ञानेनापितु युद्धकौशलेनापि श्रेष्ठा भवन्तु नाम । उपनिषद्युगीयस्य कस्यचिद् ब्रह्मविद्याचार्यस्य गार्हस्थ्यजीवनं तस्य मुखेनाधोविधं दृश्यते—

यः खलु ब्राह्मीं संहितां विजानाति स स्वभावतः प्रजया, पशुभिः, ब्रह्मवर्चसेन, अन्नाद्येन, सुवर्गेण, लोकेन च सन्धीयते ।[2] न तेषां पुरागामिनां ब्रह्मविदां नैर्धन्यं विलसितमित्यनेन स्पष्टमेव ।[3] अपरत ऋषिणा विषयोऽयं सस्पृहं प्रकाशितः —

स मेन्द्रो मेधया स्पृणोतु । अमृतस्य देव धारणो भूयासम् । शरीरं मे विचर्षणम् । जिह्वा मे मधुमत्तमा । कर्णाभ्यां भूरि विश्रुवम् ।

कुर्वाणाचीरमात्मनो वासांसि मम गावश्च, अन्नपाने च सर्वदा । ततो मे

---

१. ब्रह्मा देवानामित्यादि ऋ० ९.९१.६ । ब्रह्म ह देवेभ्यो विजिग्ये । तस्य ह ब्रह्मणो विजये देवा अमहीयन्त । केनोपनिषद् ३.१ ।
वैदिकयुगीय आसीत् परशुरामो यस्य विषये महाभारते निगदितम्—
त्रेता द्वापरयोः सन्धौ रामः शस्त्रभृतां वरः ।
असकृत् पार्थिवं क्षत्रं जघानामर्षचोदितः ।। आदि० २.३
२. तैत्तिरीयोपनिषदि शीक्षावल्ली ३.४ ।
३. छान्दोग्ये सम्यक् समर्थितमेतत्—गोअश्वमिह महिमेत्याचक्षते । हस्तिहिरण्यं दासभार्यं क्षेत्राण्यायतनानीति । ७.२४.२ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्रियमावह। लोमशां पशुभिः सह स्वाहा। आमायन्तु ब्रह्मचारिणः। यशो जनेऽसानि। श्रेयान् वस्यसोऽसानि। यथापः प्रवता यन्ति, यथा मासा अहर्जरम् एवं मां ब्रह्मचारिणो धातरायान्तु सर्वतः। प्रतिवेशोऽसि। प्र मा भाहि। प्र मा पद्यस्व। तैत्तिरोयोपनिषदि शीक्षावल्ली ४.१-३

ब्रह्मविदो गृहस्थस्य ऋषेर्दैनन्दिनं कार्यजातमधोविधं भवति—ऋतं, सत्यं, तपः, दमः, शमः, अग्नयः अग्निहोत्रमतिथयः, मानुषं, प्रजा, प्रजनः, प्रजातिरित्येतैः सह नित्यं स्वाध्यायप्रवचने च।[1]

छान्दो० उ० शीक्षावल्ली १.९

स ऋषिर्गृहस्थाश्रमोन्मुखः स्वशिष्यं स्नातकं शिक्षयति—भूत्यै न प्रमदितव्यमित्यनेन गृहस्थस्य वैभवशालि जीवनं निर्दिष्टं विशेषलक्षणरूपेण।

तैत्तिरीयोपनिषदनुसारेण भार्गवी-वारुणी-विद्याध्यापिता। यथा—आनन्दो ब्रह्मेति। य एवं वेद प्रतितिष्ठति (ब्रह्मणि)। सोऽन्नवानन्नादो भवति। महान् भवति प्रजया, पशुभिः, ब्रह्मवर्चसेन। महान् कीर्त्या।[2] अपरं च—अन्नं न निन्द्यात्। अन्नं न परिचक्षीत। अन्नं बहु कुर्वीत। यया कया च विधया बह्वन्नं प्राप्नुयात्।[3] अस्मात् प्रकरणात् ब्राह्मणगृहस्थस्य कृषि-कर्म प्रशस्यमासीत्तस्मिन् युग इति निश्चप्रचम्।

ऐतरेयोनिषदि महत्त्वपूर्णमाख्यानं विद्यते वामदेव-विषयकम्। स आत्मवृत्तं घोषयति—

---

१. प्रकरणेऽस्मिन् ऋतमस्ति यथा शास्त्रं तथा कर्तव्यं बुद्धौ सुपरिनिश्चतोऽर्थः। तप इति इन्द्रियाणां विषयेषु अनासक्तिः। दमो बाह्यकरणोपशमः। शमोऽन्तःकरणोपशमः। अग्नय आधातव्याः। अग्निहोत्रं च होतव्यम्। अतिथयः पूज्याः। मानुषं लौकिक-संव्यवहारः। प्रजा सन्तानोत्पादनम्। प्रजनं पत्नीव्रतम्। प्रजातिः पौत्रोत्पत्तिः।

२. तैत्तिरीयोपनिषदि भृगुवल्ली षष्ठोऽनुवाकः।

३. तत्रैव सप्तमानुवाकतो दशमानुवाक-पर्यन्तम्।

शङ्करो व्याख्याति—यस्मादन्नवन्तो विद्वांसोऽभ्यागतायान्नार्थिनेऽराधि संसिद्धमस्मा अन्नमित्याचक्षते। न नास्तीति प्रत्याख्यानं कुर्वन्ति। तस्माच्च हेतोर्बह्वन्नं प्राप्नुयादिति। नारायणोपनिषदि समर्थितमेतत्—

यथा कूपः शतधारः सहस्रधारो अक्षितः।
एवा मे अस्तु धान्यं सहस्रधारमक्षितम्॥ ६७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

'गर्भे नु सन्नन्वेषामवेदमहं देवानां जनिमानि विश्वा। शतं मा पुर आयसीररक्षन्नधः श्येनो जवसा निरदीयमिति।'[1] २.१.५

स एवं विद्वानस्माच्छरीरभेदादूर्ध्वं उत्क्रम्यामुष्मिन्त्स्वर्गे लोके सर्वान् कामानाप्त्वामृतः समभवत्[2] ॥ २.१.६

इदं वामदेवाख्यानं दृष्टान्तरूपेण गृह्णन्तो गृहस्था आत्मज्ञानेनावान्तर-जन्मविनशनादधोभावादुत्क्रम्य परमात्मभावं प्राप्तुं यतन्तेस्मेति।

छान्दोग्योपनिषदि गृहस्थब्राह्मणस्य धर्माः संक्षेपेण प्रोक्ताः — यज्ञोऽध्ययनं दानमिति।[3] अपरं च गायत्र्याः सम्यग् ज्ञानेन ब्रह्मवित् पूर्णमप्रवर्तिनीं श्रियं लभते।[4] तत्र तस्य प्रसाधनीयं वैभवमपरथा वर्णितम्—स तेजस्वी अन्नादो भवति[5], श्रीमान् यशस्वी भवति।[6] कीर्तिमान् व्युष्टिमान् भवति[7] ओजस्वी, महस्वान् भवति।[8] अस्य कुले वीरो जायते।[9] चक्षुष्यः श्रुतो भवति।[10]

विद्वांसोऽपि कतिपयब्राह्मणा विषमस्थितौ भिक्षितुं विवशीकृताः। छान्दोग्योपनिषदि उषस्ति-चाक्रायणस्याख्यानं विद्यते। न केवलं स, तस्य लघुवयस्का पत्नी अपि भोजनार्थं भिक्षते।[11]

---

१. वामदेवो मातुर्गर्भाशय एवानुबुद्धवान् यत् संसारपाशनिर्गमनात् पूर्वं बहूनि मां पुरो लोहमयानीवाभेद्यानि शरीराणि अवरुन्धन्ति स्म। तदा श्येन इव जालं भित्त्वा जवसात्मज्ञानकृतसामर्थ्येन निर्गतोऽस्मि। शांकरभाष्यम्।

२. ऊर्ध्वः (परमात्मभूतः) सन्नधोभावात् संसारादुत्क्रम्य ज्ञानावद्योतितामल-सर्वात्म-भावमापन्नः सन् अमुष्मिन् अजरे, अमरे अमृते, अभये, सर्वज्ञे, अपूर्वे, अनपरे, अनन्तरेऽबाह्ये प्रज्ञानामृतैकरसे स्वर्गे लोके स्वस्मिन्नात्मनि स्वे स्वरूपेऽमृतः समभवत्। शांकरभाष्यम्।

३. छान्दोग्य० २.२३.१। एतदधिकृत्य शंकराचार्यो भाषते—यज्ञोऽग्निहोत्रादिः। अध्ययनं सनियमस्य ऋगादेरभ्यासः। दानं बहिर्वेदि यथाशक्ति द्रव्यसंविभागो भिक्षमाणेभ्यः। गृहस्थ-समवेतत्वात्तन्निर्वर्तकेन गृहस्थेन निर्दिश्यते। यज्ञेन दानेन तपसा लोकान् जयन्ति। बृहदा० ६.२.१६।

४. छान्दोग्ये ३.१२.९

५.–१० तत्रैव ३.१३. १–८। ज्ञानान्नाभ्यां श्रीत्वम्। ज्ञानान्नवतश्च यशः। यशस्तु स्वकरणसंवेद्यं विश्रुतत्वम्। आत्मपरोक्षं विश्रुतत्वं कीर्तिः। व्युष्टिः कान्तिर्देहगतं लावण्यम्। छा० ३.१३.४ अधिकृत्य शाङ्करभाष्यम्। तत्रैव ओजो बलम्। महत्त्वञ्च महः इति १३.५ अधिकृत्य

११. छान्दोग्ये १.१०. १–५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अपवाद एव भवतु नाम तत्र रैक्व आसीद् गृहस्थः। स तु जानश्रुते राज्ञो गवां सहस्रं निष्कमश्वतरीरथं जायां चोपहारित एव तस्मै संवर्ग-विद्यामुपदिदेश।[1]

वेदानधीत्यैव ब्राह्मणस्य ब्राह्मणत्वं सार्थकमस्तीति विजानन्तो ब्राह्मणाः स्वपुत्रस्य ब्रह्मचर्यव्रतपालनमावश्यकं मेनिरे। स्वगृहे कश्चिद् विद्यार्थी पितु-राचार्यत्वे ब्रह्मचारी भवितुं साधारणतः नानुमतः। तद्यथा छान्दोग्योपनिषदि आरुणिः स्वपुत्रं श्वेतकेतुमादिशति—

'श्वेतकेतो वस ब्रह्मचर्यम्। न वै सोम्यास्मत् कुलीनोऽननूच्य ब्रह्मबन्धुरिव भवति। ६.१.१ श्वेतकेतुर्वेदानध्येतुमन्यत्र गतः। स पुनर्ब्रह्मविद्यां स्व-पितुरेवावाप्तवान्।[2]

ब्राह्मण-गृहस्थोऽप्याचार्येण परां विद्यां शिक्षित आसीद्यत्—बलं वाव विज्ञानाद् भूयः। अपि ह शतं विज्ञानवतामेको बलवानाकम्पयते।[3]

तस्य महिमान्वितस्य ब्राह्मणस्यात्मतत्त्वं विज्ञातमेव। तद्यथा—अह-मेवाधस्तादहमुपरिष्टादहं पुरस्तादहं दक्षिणतोऽहमुत्तरतोऽहमेवेदं सर्वमिति। स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नात्मरति[4]रात्मक्रीड आत्ममिथुन आत्मानन्दः स स्वराड् भवति। तस्य सर्वेषु लोकेषु कामचारो भवति।[5] अपरं चात्मत एव प्राणः, आशा, स्मरः, आकाशः, तेजः, आपः, आविर्भाव-तिरोभावौ, अन्नं, बलं, विज्ञानं, ध्यानं, चित्तं, संकल्पः, मनः, वाक्, नाम,

---

१. छान्दोग्ये ४.२.१–५. तस्मै राज्ञे धनं दत्तवते ह किलोवाच विद्यां स रैक्वः। इति शाङ्करभाष्यम्।

रैक्वस्यायं क्रमो ब्राह्मणोचितो न प्रतिभाति। तत्रादर्शो राजते याज्ञवल्क्यस्य योऽस्यां स्थितौ जनकं प्रति वदति—पिता मेऽमन्यत नानुशिष्य हरेतेति। बृ० ४.१.२

२. पुत्रं ब्रह्मविद्यामुपदिश्य छान्दोग्ये पिता समापयति—तत् सत्यं स आत्मा। तत्त्वमसि श्वेतकेतो इति तद्धास्य विजज्ञाविति। छान्दो० ६.१६.३

३. अपरं च बली उत्थाता भवति। उत्तिष्ठन् परिचरिता भवति। परिचरन्नुपसत्ता। उपसीदन् द्रष्टा, श्रोता, मन्ता, बोद्धा, कर्ता, विज्ञाता च भवति। बलेन पृथ्वी तिष्ठति। अन्तरिक्षं द्यौः पर्वताः, देव-मनुष्याः, पशवः, वयांसि तृणवनस्पतयः, श्वापदानि आकीट-पतङ्गपिपीलकं लोकश्च तिष्ठन्ति। छान्दोग्य० ७.८.१

४. बृहदारण्यकोपनिषदि व्याख्यातम्—प्रियया स्त्रिया सम्परिष्वक्तो न बाह्यं किंचन वेद नान्तरम्। एवमेवायं पुरुषः प्राज्ञनात्मना संपरिष्वक्तो न बाह्यं किंचन इत्यादि ४.३.२१

५. छान्दोग्ये ७.२५.२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मन्त्रः, कर्मेत्यादीनि सर्वाणि भवन्ति ।[1] तद्यथा शंकराचार्यो व्याख्याति— सतात्मविज्ञाने तु स्वात्मत एव संवृत्तो तथा सर्वोऽप्यन्यो व्यवहार आत्मत एव विदुषः ।

यथा याज्ञवाल्क्यो बृहदारण्यके व्याख्याति—(गार्हस्थ्ये) तमात्मानं विदित्वा गृहस्थाश्रमं विहाय ब्राह्मणा भिक्षाचर्यं चरन्ति स्म ।[2]

छन्दोग्योपनिषदि ब्राह्मणगृहस्थस्य पारम्परीणा जीवनादर्शाः सार-रूपेणाधोविधं निदर्शिताः —

आचार्यकुलाद् वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो धार्मिकान् विदधतात्मनि सर्वेन्द्रियाणि सम्प्रतिष्ठाप्याहिंसन् सर्वभूतान्यन्यत्र तीर्थेभ्यः । स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसम्पद्यते, न च पुनरावर्तते ।[3] अनेन श्रेष्ठब्राह्मणानां स्वपुत्रस्या-न्येषां शिष्याणां चानुशासनमावश्यकं प्रतिभाति ।[4]

कौटुम्बिकजीवनं सुसंस्कृतसमाजे नितान्तं सौहार्दमयमौदार्योपपन्नं च प्रतिभाति । गृहपतिः सर्वं कुटुम्बं प्रति सुप्रियो बभूव, विशेषतः स्वपुत्रं प्रति । तद्यथा—

अथ प्रोष्यासन् पुत्रस्य मूर्धानमभिमृशति । अङ्गादङ्गात् सम्भवसि हृदयादधिजायसे । आत्मा वै पुत्र नामासि स जीव शरदः शतम् इत्यादि ।[5] इहलोकलीलां समापयन् पिता इन्द्रियैः पुत्रस्य इन्द्रियाणि संस्पृश्य वाचं, प्राणं, चक्षुः, श्रोत्रमन्नरसान्, कर्माणि, सुखदुःखे, आनन्दं, रतिं, प्रजातिम् (आचरणशक्तिम्) प्रज्ञां च त्वयि दधानीति प्रोवाच, पुत्रश्च प्रत्येकश एतत् सर्वमभिदधे' इति तं पितरं पर्यतोषयत् । अन्तिमाशीर्वचनं पितुरासीत् – यशो, ब्रह्मवर्चसं कीर्तिस्त्वा जुषताम् ।[6] तदनन्तरं पितेह लोक एव वर्तेत, स पुत्रस्यैश्वर्ये वसीत् परिव्रजेद् वा । पुत्रः पितरं देव इति समाद्रियते स्मेति पितृदेवो भवेति तैत्तिरीयोपनिषद्यादिष्टम् । तथैव मातृदेवो भवेति ।

---

१. छान्दोग्ये ७.२६.१ ।

२. बृ० ३.५.१ । भिक्षाचर्या तु पारिव्राज्यम् ।

३. छान्दो० ८.१५

४. बृहदारण्यके ६.२.१ । श्वेतकेतुः स्वपित्रानुशिष्ट आसीन्नवेति प्रश्नो राज्ञा प्रवाहणेन कृतः ।

५. कौषीतकि० २.११

६. कौषीतकि० २.१५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अपरं च कौटुम्बिक-सामञ्जस्यादर्शः छान्दोग्येऽधोविधं व्याख्यातः — प्राणो हि पिता, माता, भ्राता, स्वसा, आचार्यः, ब्राह्मणः। अथ च स यदि पितरं वा मातरं वा भ्रातरं वा, स्वसारं वाचार्यं वा ब्राह्मणं वा किंचिद् भृशमिव प्रत्याह धिक् त्वास्त्वत्येवैनमाहुः।[1] मरणानन्तरमपि तेषां साह्यं स्पृहणीयमिति तत्रैव निर्दिष्टम्।[2]

पत्न्याः प्रतिष्ठा तूपनिषदि पूर्ववदर्धाङ्गिनीव वर्त्तते। बृहदारण्यकानुसारेण आदौ प्रजापतिरेकाकी न रेमे। 'स इममेवात्मानं द्वेधापातयत्। ततः पतिश्च पत्नी चाभवताम्।[3] अपरथा समर्थितमेतत्— एतद् वामेऽक्षिणि पुरुषरूपमेषास्य पत्नी विराट्।[4] एतैरुदाहरणैः पत्न्याः सहभावः सम्प्रतिष्ठा च साधु व्याकृते।

गृहस्थस्य प्राजापत्यं व्रतं महत्त्वपूर्णमासीदुपनिषद्युगे। कीदृशो मम दीर्घायुः सन्तानो भवतु—शुक्रः, कपिलः पिङ्गलः, श्यामो लोहिताक्षः, द्विवेदस्त्रिवेदो पुत्रो वा पाण्डिता दुहिता वा पण्डितो विगीतः (ख्यातः), समितिंगमः, शुश्रुषितां वाचं भाषिता वा पुत्रो जायेतेत्यवधार्य स प्रत्येकशो विशिष्टं भोजनमेकैकस्मै कुर्यादिति। शिशोर्जन्म निर्विघ्नं सुखं भवेदिति उद्दिश्य स इन्द्रस्य स्तुतिमकरोत्। शिशौ जाते सोऽग्निमुपसमाधायाङ्क आधाय जातकर्मसंस्कारविधौ प्रार्थितवान्—

अस्मिन् सहस्रं पुष्यासमेधमानः स्वे गृहे। बृहदा० ६.४.२४

बृहदारण्यके संवासिनां वा सहचारिणां वा सम्भरणं मनीषिणामुत्तमं कर्तव्यमिति सम्मतम्।[5]

गार्हस्थ्ये कश्चिद् ब्राह्मणस्तमेतमात्मानं वेदानुवचनेन[6] विविदिषति।

---

१. छान्दोग्ये ७.१५.२

२. ,, ८.२.१–५,९

३. एतदधिकृत्य शंकराचार्यः प्रवदति— आत्मन एवार्धः पृथग्भूतो येयं स्त्री, तस्मादिदं शरीरमात्मनोऽर्धबृगलम्।

४. बृहद्० ४ २.३

५. अथ य एवैतमनुभवति यो वै तमनुभार्यान् बुभूषति। स हैवालं भार्येभ्यो भवति। बृहद्० १.३.१८। एतदनुसृत्य शंकरो भाषते— ज्ञातीनामाश्रयणीयो भवतीत्यभिप्रायः। स्वान्नेन भर्त्ता भवति।

६. वेदानुवचनं तु स्वाध्यायः।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यज्ञेन, दानेन, तपसानाशकेनै[1]तमेव (आत्मानं) विदित्वा मुनिर्भवति। अत्र शङ्कराचार्यस्य भाष्यानुसारेण 'मुनिस्तु योगी भवति। मननान्मुनिर्भवति जाग्रत्-स्वप्न-सुषुप्ताख्यं स्थानत्रयं हित्वा।'

बहवस्तत्र ब्राह्मणाः पुत्र-वित्तलोकांश्चोपेक्ष्य नैष्ठिकब्रह्मचारिणो योगिनो वा भवन्तु नाम। किन्तु तत्रासन् याज्ञवल्क्य-विदेहादिसदृशा महाविभूतयो ये यथाकालं पुत्रैषणादिकं सम्भजमाना गार्हस्थ्य एवात्मानं विदित्वान्ते मुनिर्भवितुं प्रव्रजिताः।

यथा बृहदारण्यके निर्दिष्टं तत्राद्या सत्तास्ति परब्रह्मणः परमेश्वरस्य परमात्मनो वा। स परमात्मा सर्वस्य वशी, सर्वस्येशानः, सर्वस्याधिपतिः। सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरणः (वर्णाश्रमादिव्यवस्थाया विधारयिता) एषां लोकानामसम्भेदाय (एषां भूरादीनां ब्रह्मलोकान्तानामसम्भिन्नमर्यादायै) प्रवर्तते।[2]

अत्र परमेश्वरस्य भूतपालनं लोकानामसम्भेदाय तेषां सेतुवद् विधरणं च कर्मयोगस्य शाश्वतपीठिकां ब्रह्मविदां कृते प्रस्तौति। भूयो भूयो व्याख्यातमेतत्तत्त्वदर्शनं याज्ञवल्क्येन जनकायाधोविधम्–

एष नित्यो महिमा ब्राह्मणस्य न वर्धते कर्मणा न कनीयान्। तस्यैव पदवित्तं विदित्वा न लिप्यते कर्मणा पावकेनेति। तस्मादेवं विच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्यति। सर्वमात्मानं पश्यति।···एष ब्रह्मलोकः। सम्राडेनं प्रापितोऽसि। बृ० ४.४.२३

महाभारतानुसारेण कतिपयब्राह्मणा[3] उपाध्यायवृत्तिं स्वीकृत्य स्वशिष्यान् गोचारणे कृषिकर्मणि वा न्ययोजयन्। समावर्तनकाले स्नातकेन किं ते प्रियमुपहरामीति भूयो भूयः प्रार्थितो गुरुस्तस्य पत्नी वा भृशमपि निधिमुपहर्तुमादिशत्।[4] अस्मिन्प्रकरणे क्षत्रियैरुपाध्यायस्य यज्ञकर्मसु नियोजनं वर्णितम्।

---

१. यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्। गीता १८.५। अनाशकस्तु आवश्यकमात्रं भोजनग्रहणम्। शाङ्करभाष्यानुसारेण।

२. बृहदा० ४.४.२२। मुनिस्तु परवर्तियुगे वानप्रस्थस्य ऋषेर्वा पर्यायो मूलतो यतिर्वा संन्यासी वासीत्।

३. वेद इति नामक उपाध्यायः शिष्यान्न किंचिदुवाच। कर्म वा क्रियतां गुरुशुश्रूषा वेति दुःखाभिज्ञो हि गुरुकुलवासस्य शिष्यान् परिक्लेशेन योजयितुं नेयेष। आदि० ३.८४।

४. तत्रैव ३.१००

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भूरिदक्षिणास्तत्रासन् यज्ञाः ।[1] सनातनगृहस्थोपनिषद् वार्णिता—

धर्मागतं प्राप्य धनं यजेत दद्यात् सदैवातिथीन् भोजयेच्च ।
अनाददानश्च परैरदत्तं सैषा गृहस्थोपनिषत् पुराणी ॥ आदि ८६.३

अन्यच्च—

तपो यज्ञस्तथा विद्या भैक्षमिन्द्रियनिग्रहः ।
ध्यानमेकान्तशीलत्वं तुष्टिर्दानं च शक्तितः ।
ब्राह्मणानां महाराज चेष्टाः, संसिद्धिकारिकाः ॥ शान्ति० २३.८,९

गृहस्थ - ब्राह्मणस्य सात्त्विकजीवनपथो महाभारते धर्मव्याधेन व्याख्यातोऽधोविधम्—

ब्रह्मचर्यं तपो मन्त्राः सत्यं च ब्राह्मणे सदा ।
—आरण्यकपर्वणि १९८.२४

महाभारते शान्तिपर्वणि गृहस्थाश्रमिणां सौष्ठवपूर्णं सनातनं जीवनदर्शनं सम्यग्विभावितमधोविधम्—

गृहस्थवृत्तयश्चैव चतस्रः कविभिः स्मृताः ।
कुसूलधान्यः प्रथमः कुम्भीधान्यस्त्वनन्तरम् ॥ २
अश्वस्तनोऽथ कापोतीमाश्रितो वृत्तिमाहरेत् ।[2]
तेषां परः परो ज्यायान् धर्मतो लोकजित्तमः ॥ ३
षट्कर्मा वर्तयत्येकस्त्रिभिरन्यः प्रवर्तते ।
द्वाभ्यामेकश्चतुर्थस्तु ब्रह्मसत्रे व्यवस्थितः ॥
गृहमेधि व्रतान्यत्र महान्तीह प्रचक्षते ॥ ४
संविभागोऽत्र भूतानां सर्वेषामेव शिष्यते ।
तथैवापचमानेभ्यः प्रदेयं गृहमेधिना ॥ १०
विघसाशी भवेन्नित्यं नित्यं चामृतभोजनः ।
अमृतं यज्ञशेषं स्याद् भोजनं हविषा समम् ॥
भृत्यशेषं तु योऽश्नाति तमाहुर्विघसाशिनम् ॥ ११
न चार्थबद्धः कर्माणि धर्मं वा कञ्चिदाचरेत् ।
गृहस्थवृत्तयस्तिस्रस्तासां निःश्रेयसं परम् ॥ २०
शान्तिपर्वणि २३५ अध्यायतः ।

---

१. वेदो जनमेजयेन पौष्येण च यज्ञसम्पादनार्थं वृतः । कीदृशं दानमिति महाभारते प्रोक्तम्—

अश्वान् गाश्चैव दासीश्च करेणूश्च स्वलंकृताः ।
ग्रामान् जनपदांश्चैव क्षेत्राणि च गृहाणि च । शान्ति० १२.२८

२. महाभारतानुसारेणैत्तादृशैर्ब्राह्मणै राष्ट्रमभिवर्धते । शान्ति० २३५.२२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सम्यग्गृहस्थव्रतेन कश्चित्पुरुषः स्वर्गलोके महीयत इति परमोद्देश्यमधोविधं विवृतं महाभारते—

स चक्रधरलोकानां सदृशीमाप्नुयाद् गतिम् ।
जितेन्द्रियाणामथवा गतिरेषा विधीयते ।। २६
ब्रह्मणा विहिता श्रेणिरेषा यस्माद् विधीयते ।
द्वितीयं क्रमशः प्राप्य स्वर्गलोके महीयते ।। २७

शान्तिपर्वणि २३५ अध्यायतः

गृहस्थस्य पर्यटक-वानप्रस्थानां सत्कारः सविशेषमासीत् ।[1]

ब्राह्मणस्य वृत्तिः सात्त्विकी स्यान्नतु प्रतिशोधात्मिकेति कौशिकाय ग्रामस्त्रिया निवेदितम् । तद्यथा—

हिंसितश्च न हिंसेत तं देवा ब्राह्मणं विदुः । आर० १९७.३२
यस्य चात्मसमो लोको धर्मज्ञस्य मनस्विनः ।
सर्वधर्मेषु च रतस्तं देवा ब्राह्मणं विदुः ।। आ० १९७.३५
धनं तु ब्राह्मणस्याहुः स्वाध्यायं दममार्जवम् । १९७.३८

ब्राह्मणधर्मोऽनुशासनपर्वणि महाभारते समाहृतोऽधोविधम्—

त्रैविद्यो ब्राह्मणो विद्वान् न चाध्ययनजीवनः ।
त्रिकर्मा[2] त्रिपरिक्रान्तो[3] मैत्र एष स्मृतो द्विजः ।। १२९.६
यजनं याजनं चैव तथा दान-प्रतिग्रहो ।
अध्यापनमधीतं च षट्कर्मा धर्मभाग् द्विजः ।। १२९.८
पञ्चयज्ञविशुद्धात्मा सत्यभागनुसूयकः ।
दाता ब्राह्मणसत्कर्ता सुसंमृष्ट[4]निवेशनः ।। १२९.११
अमानी च सदाजिह्मः स्निग्धवाणीप्रदस्तथा ।
अतिथ्यभ्यागतरतिः शेषान्नकृतभोजनः ।। १२९.१२
पाद्यमर्घ्यं यथान्यायमासनं शयनं तथा ।
दीपं प्रतिश्रयं[5] चापि यो ददाति स धार्मिकः ।। १२९.१३

---

१. एते साधवः साधुपथ्यदर्शनाः स्वाध्यायप्रसंगिनस्तीर्थाभिगमनदेशदर्शनार्थं पृथ्वीं पर्यटन्ति । तेषां प्रत्युत्थानाभिवादनानसूयावाक्प्रदानसौमुख्यशक्त्यासनशयनाभ्यवहारसत्क्रियाश्चेति । शान्तिप० १८४.११

२. त्रिकर्मा—दानधर्मयज्ञपरायणः ।

३. त्रिपरिक्रान्तः —परित्यक्त-कामक्रोधलोभः ।

४. सुसम्मृष्ट-निवेशनः —स्वच्छीकृतावासः, सम्मार्जितगृहः ।

५. प्रतिश्रयः —शरणम् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अस्मिन् प्रकरणे प्रतिग्रहो विवेचनमर्हति । महाभारतानुसारेण प्रतिग्रहस्य विशिष्टानि प्रयोजनानि निर्धारितानि सन्ति । तथाहि—

गृहमावसतो ह्यस्य नान्यत्तीर्थं प्रतिग्रहात् ।
देवर्षिपितृगुर्वर्थं वृद्धातुरबुभुक्षताम् ।। शा० २२६.१३

किं प्रदेयमासीत् प्रतिग्रहार्थं ब्राह्मणानामिति वैविध्येनैव विस्मयमावहति । तथाहि—'प्राणाः, अङ्गानि, औरसः पुत्रः, नेत्रे, स्वर्णच्छत्रम्, एकादशार्बुद-संख्याका गावः, कुण्डले, सर्वरत्नम्, रमण्यः, रम्य आवसथः, राष्ट्रम्, वसुन्धरा, राजकन्या, शङ्खनिधिः, प्रिया पत्नी, हिरण्मयवेश्म, राज्यम् इत्यादीनि ।[1]

संक्षेपेण सत्यमिदं प्रतिभाति—

अर्हतामनुरूपाणां नादेयं ह्यस्ति किञ्चन ।। शान्ति० २२६.१५

वैदिकसंहितायुगे ब्राह्मणानामृषीणां चाधिभौतिकविभूतिसम्पत्तिवृत्तिषु सम्यगास्थासीदिति पूर्वं यथास्थानं दर्शितम् । उपनिषद्युगे ब्राह्मणा मुख्यतः ब्रह्मविद्यापरायणा बभूवुः, किन्तु धनधान्यसम्पन्नगार्हस्थ्यमपि तेषां परमभीष्ट मासीत् । परवर्तिमहाभारतयुगे आयोदधौम्यादीनामुपाध्यायानां कृषिपशु-पालनादि-प्रवृत्तिर्दृश्यते । तदा ब्राह्मणानां पौरोहित्येन धनार्जनमपि प्रत्यपद्यत । तथापि यथा भीष्मेण ब्राह्मण-वृत्तिर्व्याख्याता—

दममेव महाराज धर्ममाहु पुरातनम् ।[2]
स्वध्यायोऽध्यापनं चैव तत्र कर्म समाप्यते ।।
तं चेत् वित्तमुपागच्छेद् वर्तमानं स्वकर्मणि ।
अकुर्वाणं विकर्माणि शान्तं प्रज्ञान-तर्पितम् ।।
कुर्वीतापत्यसंतानमथो दद्याद्यजेत च ।
संविभज्य हि भोक्तव्यं धनं सद्भिरितीष्यते ।।
परिनिष्ठितकार्यस्तु स्वाध्यायेनैव ब्राह्मणः ।
कुर्यादन्यन्न वा कुर्यान् मैत्रो ब्राह्मण उच्यते ।।

शान्तिप० ६० ९-१२

स्पृहयामि द्विजातीनां येषां ब्रह्म परं धनम् । अनुशासनप० ८.३
जायतां ब्रह्मवर्चस्वी राष्ट्रे वै ब्राह्मणः शुचिः । अनु० ३४.३
अधीत्य वेदान् कृतसर्वकृत्यः सन्तानमुत्पाद्य सुखानि भुक्त्वा ।
समाहितः प्रचरेद् दुश्चरं तं गार्हस्थ्यधर्मं मुनिधर्मदृष्टम् ।।

शा० प० ६१.१०

---

१. शान्तिपर्वणि २२६.१६-३६

२. 'ब्राह्मणे दममव्यग्रम्' इत्यादि सौप्तिक० ३.१९ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भिक्षाभुजो ब्राह्मणा महात्मान इति सम्बोधिताः सन्ति ।[1] इत्यनेन ब्राह्मणस्य गृहस्थस्य जीवनं साधुवत् प्रविभायते ।।

कपालं ब्राह्मणैर्वृतमिति उद्योगे ७०.३७ तदेव द्योतयति ।

अस्मिन् युगे ब्राह्मवृत्तौ प्रतिबन्धा ब्राह्मणैरेव संसृष्टाः । तद्यथा—

ज्याकर्षणं शत्रुनिबर्हणं च कृषिर्वाणिज्यापशुपालनं च ।
शुश्रूषणं चापि तथार्थहेतोरकार्यमेतत् परमं द्विजस्य ।।

शान्तिपर्वणि ६३.९

वस्तुतो यथा वसिष्ठो निवेदयति—ब्राह्मणानां क्षमाबलम् ।[2]

भीष्मः समर्थयति—

ऋजुर्मृदुरनृशंसः क्षमावान् स वै विप्रो नेतरः पापकर्मा । शा० ६३.८

ब्राह्मणेभ्यो भोजनदानेन देवाः, पितरः, सर्वभूतानि, आदित्यः, चन्द्रमाः, वायुर्भूमिरापोऽम्बरं दिशश्च परितुष्टानि भवन्ति, यतो हि नाम भीष्मानुसारेण—

सर्वे ब्राह्मणमाविश्य सदान्नमुपभुञ्जते । अनु० ३४.६

स ब्राह्मणः कीदृश आसीदित्यपि तत्रैव निर्दिष्टम्—

ब्राह्मणं जातिसम्पन्नं धर्मज्ञं संशितव्रतम् ।
वासयेत गृहे राजन्न तस्मात् परमस्ति वै ।। अनु० ३४.४

अनेन नैतदवधारणीयं यद् ब्राह्मणानां शस्त्रबलं नासीत् । महाभारतं शस्त्रधारिणां ब्राह्मणानां चरितगाथां नैकशः प्रस्तौति । तथाहि—

क्षत्रियाणां प्रतपतां तेजसा च बलेन च ।
ब्राह्मणेष्वेव शाम्यन्ति तेजांसि च बलानि च ।।
भृगवोऽजयंस्तालजंघान्नीपानङ्गिरसोऽजयन् ।
भरद्वाजो वैतहव्यानैलांश्च भरतर्षभ ।।
चित्रायुधांश्चाप्यजयन्नेते कृष्णाजिनध्वजाः ।
प्रक्षिप्याथ च कुम्भान् वै पारगामिनमारभेत् ।। अनु० ३४.१५-१७

ब्राह्मणानां कृते क्षत्रधर्मोऽनृशंस एव सम्मतः ।[3]

भवतु नामापवादरूपेण, यथावश्यकमनाहता अपि ब्राह्मणाः प्राक्सज्जां विनापि युद्धाय कृतनिश्चया दृश्यन्ते । ब्राह्मणरूपधारिणोऽर्जुनादयो यदा

---

१. ब्राह्मणः प्रचरेद् भैक्षम् आदिपर्वणि १.१०८ ।

२. आदि १६५.२८ । तथापि उद्योग० १३०.२८ ब्राह्मणः सर्वसाधकपर्याय आसीत्—

न च तद्विद्यते किंचित्कर्म लोकेषु यद् भवेत् ।
ब्राह्मणानामसाध्यं च त्रिषु संस्थानचारिषु ।। आदि १७९.११

३. शान्तिप० २२.६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्वयंवरे द्रौपदीमलभन्त तदा राजन्यास्तेषां विरोधेऽवस्थिताः । एतेषां राजन्यानां ब्राह्मणविरोधं दृष्ट्वा दर्शका ब्राह्मणा उद्ग्रीभूताः । तद्यथा—

अजिनानि विधुन्वन्तः करकांश्च द्विजर्षभाः ।
ऊचुस्तं भीर्न कर्तव्या वयं योत्स्यामहे परान् ।। आदि० १८१.१

अतएव क्षत्रियाणां सम्मतमासीत्—

ब्राह्मणार्थं हि नो राज्यं जीवितं च वसूनि च ।
पुत्रपौत्रं च यच्चान्यदस्माकं विद्यते धनम् ।। आदि० १८१.९

यथावश्यकं ब्राह्मणाः सहवसन्तो राज्ञे देशवर्णनं पूर्ववृत्तवर्णनं च श्रावयन्ति स्म ।[1]

महाभारते ब्राह्मणस्य महती प्रतिष्ठा क्षत्रमध्ये दृश्यते—

स तु 'ईश्वरः सर्वभूतानां धर्मकोशस्य गुप्तये ।' शान्ति० ७३.६

यथा देवा ऋषिभिः सङ्गताः साफल्यमवापुस्तथैव क्षत्रिया ब्राह्मणानां साहचर्येन[2], अङ्कुशेनापि च[3] यथायोग्यं प्रजापालने शत्रुमर्दने च सफला भवितुमर्हन्तीति धारणामूरीकृत्य राष्ट्राभ्युदयनियोगेषु तेषां परामर्शं यथाकालमवाप्तुं तान् वासयन्ति स्म ।[4]

राजानो ब्राह्मणानपालयन् । भीष्मानुसारेण—

भोगैरलंकारैरन्यैश्चैव किमिच्छकैः ।
सदा पूज्या नमस्कार्या रक्ष्याश्च पितृवन्नृपैः ।। अनु० ३४.२

राजानो ब्राह्मणानां कृत आवसथान् निर्मितवन्तः ।[5]

---

१. सन्निधौ धृतराष्ट्रस्य प्रोच्यमानं मया श्रुतम् ।
देशांश्च विविधांश्चित्रान् पूर्ववृत्तांश्च पार्थिवान् ।। कर्णप० ३०.८

२. वको दाल्भ्यो युधिष्ठिरमुपदिशति—
नाब्राह्मणं भूमिरियं सभूतिर्वर्णं द्वितीयं भजते चिराय
समुद्रनेमिर्नमते तु तस्मै यं ब्राह्मणः शास्ति नयैर्विनीतः ।। आर० २७.१४
एते चान्ये च बहवो ब्राह्मणाः संशितव्रताः
अजातशत्रुमानर्चुः पुरन्दरमिवर्षयः ।। आर० २७.२५

३. कुञ्जरस्येव संग्रामेऽपरिगृह्याङ्कुशग्रहम् ।
ब्राह्मणैर्विप्रहीणस्य क्षत्रस्य क्षीयते बलम् ।। आर० २७.१५

४. अलब्धलाभाय च लब्धवृद्धये यथार्हतीर्थप्रतिपादनाय ।
यशस्विनं वेदविदं विपश्चितं बहुश्रुतं ब्राह्मणमेव वासये ।। आर० २७.१९
अपरं च—ब्राह्मणं गृहे वासयेत् इति । अनु० ३४.४

५. आदिप० १३३.११

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भवतु नाम विरोधाभासः, ब्राह्मणस्तु वर्णत्रयस्य शासक एव, यथा कृष्णस्य ऋषीन् प्रत्यनुपृच्छा वर्तते—

ब्राह्मणानां त्रयो वर्णाः क्वचित्तिष्ठन्ति शासने ॥ उद्योग० ८१.६२

ब्राह्मणा विपथानुच्चकोटिकान् क्षत्रियान् राज्ञोऽपि स्वोपदेशैरैतिह्य-विश्लेषणैश्च सत्पथं दर्शयन्ति स्मेति नैकस्थलेष्विति महाभारते निगदितम्। उद्योगपर्वणि ब्राह्मणैर्दुर्योधनाय निगदिता दम्भोद्भवकथा निदर्शयत्येतत्तत्त्वम्[1]।

महाभारते द्विविधा ब्राह्मणाः स्मृताः—प्रवृत्ताः निवृत्ताश्च। प्रवृत्तास्तु दानग्राहिण आसन्, निवृत्ताः पुनः परिग्रहशीला बभूवुः।[2] वृत्तिवैविध्येनापि बहुविधा ब्राह्मणा दृश्यन्ते। तद्यथा भीष्मो युधिष्ठिरं बोधयति—

प्रसह्यकारिणः केचित् कार्पासमृदवोऽपरे।
सन्ति चैषामतिशठास्तथान्ये नटनर्तकाः।
सर्वकर्मसु दृश्यन्ते प्रशान्तेष्वितरेषु च।
विविधाचारयुक्ताश्च ब्राह्मणा भरतर्षभ ॥ अनु० ३३.१०,१२

त एव प्रातःस्मरणीया ब्राह्मणा भारतीयौदात्त्यस्य सर्वशो निर्मातारः सन्ति, येषां विषये पुरुषोत्तमेन कृष्णेन समीक्षितं गीतायाम्—

शमो दमस्तपः शौचं शान्तिरार्जवमेव च।
ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्मस्वभावजम् ॥ १८.४२

तैर्ब्राह्मणैः प्रवर्तितासु ज्ञान-विज्ञानास्तिक्यधारासु प्राचीनोदात्तसमाजोऽवगाहते स्म।

किंविधं राष्ट्रमभिवर्धत इति महाभारते प्रकाशितम्—

कुम्भीधान्यैरुञ्छशिलैः कापोतीं चास्थितैस्तथा
यस्मिंश्चैते वसन्त्यर्हास्तद् राष्ट्रमभिवर्धते ॥ शान्तिप० २३५.२२

मनुः साधारणतो ब्राह्मणगृहस्थस्याधिभौतिकदृष्टचा वैभवविहीनजीवनविन्यासं वर्णयति।[3] तद्यथा—

---

१. कुरुसंसदि ब्राह्मणा दुर्योधन-प्रबोधाय दम्भोद्भवस्य कथानकं व्याहरन्—कथंकारं दम्भोद्भवो नरनारायणाभ्यां तपस्विभ्यां विनीत इति। उद्योगप० ९४.५-३१

२. शान्तिप० १९२.३९

३. पंक्तिपावन-ब्राह्मणानां विषये मनुः सापवादं कथयति—

वेदार्थवित् प्रवक्ता च ब्रह्मचारी सहस्रदः।
शतायुश्चैव विज्ञेया ब्राह्मणाः पंक्तिपावनाः ॥ ३.१८६

इमे ब्राह्मणा महासमृद्धिशालिनो वैदिकपरम्परां सातिशयमनुवर्तन्ते स्म।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यात्रामात्रप्रसिद्धचर्थं स्वैः कर्मभिरगर्हितैः ।
अक्लेशेन शरीरस्य कुर्वीत धनसंचयम् ।। ४.३
ऋतामृताभ्यां जीवेत्तु मृतेन प्रमृतेन वा ।
सत्यामृताभ्यामपि वा न श्ववृत्त्या कदाचन[1] ।। ४.४

कियन्मात्रं धनं ब्राह्मणस्य भवेदित्यधोलिखितविधानेन मनुमतेनादर्शो[1] ब्राह्मण-गृहस्थः प्रायोऽकिञ्चन एवासीत्—

कुसूलधान्यको वा स्यात् कुम्भीधान्यक एव वा ।
त्र्यहैहिको वापि भवेदश्वस्तनिक एव वा ।। ४.७

एतेषु चतुर्विधेषु अश्वस्तनिक एव श्रेष्ठोऽभिप्रेतो मनुना ।[2] मनुमतेन—

षट्कर्मैको भवत्येषां त्रिभिरन्यैः प्रवर्तते ।
द्वाभ्यामेकश्चतुर्थस्तु ब्रह्मसत्रेण जीवति ।। ४.९
वर्तयंश्च शिलोञ्छाभ्यामग्निहोत्रपरायणः ।
इष्टीः पार्वायनान्तीया[3] केवला निर्वपेत् सदा ।। ४.१०
न लोकवृत्तं वर्तेत वृत्तिहेतोः कथञ्चन ।
अजिह्मामशठां शुद्धां जीवेद् ब्राह्मणजीविकाम् ।। ४.११

जीविकासाधनानि परिमितानीति निश्चित्य मनुर्ब्राह्मण-गृहस्थं तापसी-करोति कथयति च—

इन्द्रियार्थेषु सर्वेषु न प्रसज्येत कामतः ।
अतिप्रसक्तिं चैतेषां मनसा सन्निवर्तयेत् ।। ४.१६
सर्वान् परित्यजेदर्थान् स्वाध्यायस्य विरोधिनः ।
यथा तथाध्यापयंस्तु सा ह्यस्य कृतकृत्यता ।। ४.१७

गृहाश्रमे ब्राह्मणो नित्यमध्ययनपरायणो भवेत् । स शास्त्राणि, वैदिक-निगमांश्चावेक्षेत, अग्निहोत्रं च सन्ध्यायां जुहुयात् । यथाकालं स सस्येष्टिं,

---

१. ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितम् ।
मृतं तु याचितं भैक्षं प्रमृतं कर्षणं स्मृतम् ।।
सत्यानृतं तु वाणिज्यं तेन चैवापि जीव्यते ।
सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्जयेत् ।। मनु० ४.५,६
महाभारते समर्थितमेतन्मतम् । शान्ति० २३५.२-३

२. चतुर्णामपि चैतेषां द्विजानां गृहमेधिनाम् ।
ज्यायान् परः परो ज्ञेयो धर्मतो लोकजित्तमः ।। ४.८

३. दर्शपौर्णमास्यमाग्रहायणं च ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

चातुर्मास्यं, पशुबन्धयज्ञं च सम्पादयेत् । अतिथिसत्काराय समुचितसामग्रीकः स्याद् गृहस्थः ।

ब्राह्मणगृहस्थः स्वीयज्ञानधनाभ्यां ब्रह्मचारिणामुपकारको भवेत् । मनुः विस्पष्टयति—

शक्तितोऽपचमानेभ्यो दातव्यं गृहमेधिना ।
संविभागश्च भूतेभ्यः कर्तव्योऽनुपरोधतः ॥ ४.३२

दैन्याभिभूतो जीर्णशीर्णमलिनवासो गृहस्थो न दृश्येत । तथापि मनू राज्ञो दानग्रहणेन वैदिकाले महाभारतकाले च प्रचलितां ब्राह्मणवृत्तिं सर्वथाऽयोग्यां मत्वा भृशं निनिन्द ।[1] स निर्दिशति—

प्रतिग्रहसमर्थोऽपि प्रसङ्गं तत्र वर्जयेत् ।
प्रतिग्रहेण ह्यस्याशु ब्राह्मं तेजः प्रशाम्यति ॥ ४.१४६

अविद्वान् ब्राह्मणो हिरण्य-गोभूम्यश्वानां, वस्त्रतिलघृतानां प्रतिग्रहेण भस्मीभवति । केवलं तपस्वी अधीती च ब्राह्मणो दानं ग्रहीतुमधिकृतः ।[2] ब्रह्मबन्धुस्तु दानाधिकारी नास्त्येव । तस्मिन् युगेऽपि वैडालव्रतिका वकव्रतिका इति नृशंसा धूर्त्ता ब्राह्मणनामधारिण आसन् । तेभ्यो जलमपि न देयमिति मनुः स्पष्टं निर्दिशति । तेभ्यो दातारोऽपि पापभाजो भवन्ति । दाता प्रतिग्रहीता चोभौ नरकं यातः ।[3]

आर्जवविशिष्टं निष्कपटं ब्राह्मणजीवनं भवेदिति मनुः पौनःपुन्येन समर्थयति । स सद्ब्राह्मणकृते यमनियमयोरावश्यकं विधानं व्यवस्था-

---

१. न राज्ञः प्रतिगृह्णीयादराजन्यप्रसूतितः । मनु० ४.८४
दशवेशसमो नृपः । मनु० ४.८५
दशसूनासहस्राणि यो वाहयति सौनिकः ।
तेन तुल्यः स्मृतो राजा घोरस्तस्य प्रतिग्रहः ॥ मनु० ४.८६
अग्रेऽपि राजप्रतिग्रहो न ग्राह्य इति निर्णयति मनुः । अन्ततोगत्वा स समादधाति—
एतद् विदन्तो विद्वांसो ब्राह्मणा ब्रह्मवादिनः ।
न राज्ञः प्रतिगृह्णन्ति प्रेत्य श्रेयोऽभिकांक्षिणः ॥ मनु० ४.९१

२. अतपास्त्वनधीयानः प्रतिग्रहरुचिर्द्विजः ।
अम्भस्यश्मप्लवेनैव सह तेनैव मज्जति ॥ मनु० ४.१९०

३. मनुस्मृति ४.१९५–१९७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पयति ।[1] मनुस्मृता अभोज्यान्नानां बृहती सूची वर्तते ।

ब्राह्मणः कीदृशं भोजनं कुर्यादिति स्वास्थ्य-विज्ञानदृष्टचा, दातुः सच्चारित्र्यापेक्षया च मनुः सम्यग् विवेचयति ।[2] अन्नदाता पवित्रवृत्तिको भवेत् । स च श्रमेण यदर्जति तदेव ग्राह्यम् । स नियच्छति—

राजान्नं तेज आदत्ते शूद्रान्नं ब्रह्मवर्चसम् ।
आयुः सुवर्णकारान्नं यशश्चर्मावकर्तिनः ॥ ४.२१८

सर्वसाधारणकृते मनुर्नियच्छति दानस्य माहात्म्यम् । ब्राह्मणानां कृते स ब्रह्मदानस्य महत्त्वं निदर्शयति—

स्वकुलस्योत्कर्षो परं स्पृहणीयो भवेत् । तदर्थमुत्तमैर्जनैः सह सम्बन्धा आचरणीया इति स प्रमाणयति । अन्यथा कुर्वन् ब्राह्मणः शूद्रत्वं याति ।[3]

ब्राह्मणस्य दैनन्दिनं कार्यजातं मनुना निर्दिष्टम्—

ब्राह्मे मुहूर्ते बुध्येत धर्मार्थौ चानुचिन्तयेत् ।
कायक्लेशांश्च तन्मूलान् वेदतत्त्वार्थमेव च ॥
पूर्वां सन्ध्यां जपंस्तिष्ठेत् स्वकाले चापरां चिरम् ॥ ४.९२-९३

तस्य वार्षिकीं व्यापृतिं स वर्णयति—

श्रावण्यां प्रौष्ठपद्यां वाप्युपाकृत्य यथाविधि ।
युक्तश्छन्दांस्यधीयीत मासान् विप्रोऽर्धपञ्चमान् ॥
पुष्ये तु छन्दसां कुर्याद् बहिरुत्सर्जनं द्विजः ।
माघशुक्लस्य वा प्राप्ते पूर्वाह्णे प्रथमेऽहनि ॥ ४.९५-९६

उदात्तप्रवृत्तिभिरात्मानं संस्कारयितुं स ब्राह्मणगृहस्थः पर्वदिवसेषु श्रेष्ठोदारगुणमण्डितानां महाजनानां दर्शनं कुर्यादिति मनुवचनमधोविधं विलसति—

---

१. यमनियमास्तु बहुविधं व्याख्याताः । तद्यथा

ब्रह्मचर्यं दया क्षान्तिर्दानं सत्यमकल्कता ।
अहिंसाऽस्तेयमाधुर्यं दमश्चेति यमाः स्मृताः ॥
स्नानं मौनोपवासेज्यास्वाध्यायोपस्थनिग्रहाः ।
नियमा गुरुशुश्रूषा शौचाक्रोधप्रमादतः ॥ याज्ञवल्क्य० ३.३१२, ३१३

तत्राहिंसा-सत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः । शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः । योगसूत्रे २.३१,३२

२. मनु० ४.२०५–२२३

३. मनु० ४.२४४,२४५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दैवतान्यभिगच्छेत्तु धार्मिकांश्च द्विजोत्तमान् ।
ईश्वरं चैव रक्षार्थं गुरूनेव च पर्वसु ॥ ४.१५३

सर्वथा स्वातन्त्र्यं हि आत्मविकासाय नितान्तमावश्यकमिति मनुर्ब्राह्मण-गृहस्थं शिक्षयति—

यद्यत् परवशं कर्म तत्तद्यत्नेन वर्जयेत् ।
यद्यदात्मवशं तु स्यात्तत्तत्सेवेत यत्नतः ॥ ४.१५९

गृहस्थब्राह्मणाय सनातनधर्मं विनिर्णयत्यधोविधं मनुः —

येनास्य पितरो याता येन याताः पितामहाः ।
तेन यायात् सतां मार्गं तेन गच्छन्न रिष्यते ॥ ४.१७८

मनुः कौटुम्बिकसमाहारस्य परमधुर्यमिच्छति । कुटुम्बे स पित्रोः भ्रातृभगिन्योः, पुत्रकन्ययोर्दासवर्गस्य च सम्मानितप्रतिष्ठां व्यधात् ।[1]

लौकिकदृष्ट्या सम्प्रतिष्ठितस्य ब्राह्मण-गृहस्थस्य महागोविन्दस्यावाप्त-प्रकामवैपुल्यस्य जीवनक्रमस्य विशदविवरणं महापरिनिब्बाणसुत्तस्य महा-गोविन्दसुत्ते प्राप्यते । महागोविन्दो दिशांपतिराजस्य पुरोहितो बभूव । सोऽन्यमपि राजन्यषट्कमन्वशात् । स तेषां सहायकः, प्रियो मनआपोऽनुकूलश्च बभूव । अतोऽधिकतरं महत्त्वपूर्णमासीत् तस्य ब्राह्मणानां महाशालसप्तकस्य स्नातकसप्तशतस्य च त्रैविद्याध्यापनम् । तस्य गृहे चत्वारिंशत्पत्न्यो विल-सन्ति स्म । स चिरकालं गार्हस्थ्यं संसेव्य परतश्चतुर्मासं समाधिमास्थाय सनत्कुमारं महाब्रह्माणं साक्षात्कृत्य तस्योपदेशेन प्रव्रज्यां जग्राह ।

नैकरक्षकदेवानां मध्ये इन्द्रोऽनन्यतमः ।[2] स क्षत्रियादर्शं समक्षयति—

महे क्षत्राय शवसे हि जज्ञे ऽतूतुर्जि चित् तूतुजिरशिश्नत् । ऋ० ७.२८.३

सर्वोच्चादर्शो राज्ञां कृत इन्द्रः प्रस्तौति दिग्विजयस्य । यथा

अभिद्यां महिना भुवमभीमां पृथिवीं महीम् । ऋ० १०.११९.८
अयमग्निः सत्पतिर्वृद्धवृष्णो रथीव पत्तीनजनत् पुरोहितः ।
नाभा पृथिव्यां निहितो दविद्युतदधस्पदं कृणुतां ये पृतन्यवः ॥ अथर्व ७.६२

---

१. मनुस्मृतिः ४.१८२–१८५

२. सर्वे आदित्याः क्षत्रियाः सन्तीति महाभारते, शान्ति प० २०१.२२

तत्रान्ये रक्षकदेवाः सन्ति—मित्रावरुणौ । ऋ० ७.६१.३

तद्यथा शंकराचार्योऽनुसन्दधाति—इन्दो देवानां, वरुणो यादसां, सोमो ब्राह्मणानां, रुद्रः पशूनां, पर्जन्यो विद्युदादीनां, यमः पितृणां, मृत्युः रोगादीनां, ईशानो भासां राजा । बृहदारण्यके १.४.११ अधिकृत्य । यथा राजा तथा प्रजेति सिद्धान्तः । क्षत्रियाणां कर्मविशेषा एतेषां देवानां चरितवृत्तेभ्यो ग्रहणीयाः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

क्षत्रियाणां समृद्धिर्युद्धेषु विजयेन समभवत्। शत्रूणां धनसम्पत्तिग्रहणं तु देवानामपि वर्णितम्। कर्तव्य-पथेऽग्रसराः क्षत्रिया आत्मीयानामपि विरोधेनावश्यसाध्यं सम्पादयन्ति स्मेति ऋग्वेदस्येन्द्राख्यानेन स्पष्टमेव।[1] इन्द्रस्य सहायविहीनस्यापि सोत्साहं विक्रमप्रदर्शनं क्षत्रियाणामादर्शः प्रतिभाति।[2] आत्मीया अपि यदि विरोधेन तिष्ठन्ति तर्हि तैः सह योद्धव्यमेवेति देवैः सह इन्द्रस्य युद्धेन प्रमाणीकृतमेव।[3] इन्द्र उषसं सम्पिणदित्यनेनाततायिनीं स्त्रियमपि दण्डयितुं क्षत्रियाः समर्थाः।

आर्या आर्येतराश्च शत्रुभूता इन्द्रेण पराजिता इति तस्य शौर्यगाथा[4] क्षत्रियाणां व्यापृतिं प्रकाशयति। तथापि इन्द्रस्य लोकहितैषिता, सहायशीलता, उदारता च सर्वेषां कृतेऽनुकरणीया आसन्।

मरुद्गणः क्षत्रियाणामादर्शः शूरोचितवैभवेन दर्शयति। तद्यथा—

वाशीमन्त ऋष्टिमन्तो मनीषिणः
सुधन्वान इषुमन्तो निषङ्गिणः।
स्वश्वाः स्थ सुरथाः पृश्निमातरः
स्वायुधा मरुतो याथना शुभम्॥ ऋ० ५.५७.२

मरुद्गण ऋष्टिभिरोजसा बाहुबलेन सायुधरथेन च विशिष्टः।[5]

उपनिषद्युगे गृहस्थाश्रमिणो राज्ञो जानश्रुतेः प्रजापालनप्रवृत्तयः प्रशंसिताः सन्ति।[6] कतिपयराजा ब्राह्मणैरज्ञातान् दार्शनिकविषयान् तेभ्योऽशिक्षयन्त।[7] गृहस्थः सन् इन्द्रो ब्रह्मचर्यमुवास प्रजापतौ।[8] अनेन क्षत्रियाणामपि गार्हस्थ्ये ज्ञानार्जनप्रवृत्तिः प्रमाण्यते।

---

१. ऋग्वेदे ४.१८ सूक्तानुसारेणेन्द्रः स्वपितरं सोमाय संघर्षे व्यापादितवान्। तद्यथा—
अवर्त्या शुन आन्त्राणि पेचे न देवेषु विविदे मर्डितारम्।
अपश्यं जायाममहीयमानामधा मे श्येनो मध्वा जभार॥ ४.१८.१३

२. इन्द्रो देवैः परित्यक्तोऽपि एकाकी वृत्रं जघान।

३. ऋ० ४.१०.५

४. ऋग्वेदे ८.९६, ९७ सूक्तयोर्वर्णिता।

५. ऋ० ५.५७.६

६. जानश्रुतिः श्रद्धादेयो बहुदायी बहुपाक्य आस। स ह सर्वत आवसथान् मापयांचक्रे, सर्वत एव मेऽत्स्यन्तीति। ४.१.१

७. छान्दोग्य ५.३.७।

८. छान्दोग्य ८.७.३।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

उपनिषदनुसारेण युद्धेन पौरुषेण च क्षत्रिय इन्द्रलोकं भजते।[1] एतदपि परं सत्यं विद्यतेऽस्मिन् प्रकरणे यदयमिन्द्रः प्रतर्दनसदृशानां क्षत्रियाणामादर्शो बभूव। तत्र कानि कानि कारणानि सन्ति यदिन्द्रो मनुष्याय हिततमो विज्ञायेत। तद्यथा इन्द्रो वर्णयति—त्रिशीर्षाणं त्वाष्ट्रं स हतवान्, अरुन्मुखान् यतीन् शालावृकेभ्यः प्रायच्छत्, प्रह्लादीयानतृणत्, कालकाजांश्च।[2] क्षत्रियाणां राज्ञां यज्ञेषु ब्राह्मणपुरोहितैर्बहुधनं दक्षिणया प्राप्तम्।[3]

कौषीतकिब्राह्मणोपनिषदि प्रतिपादितं यत् क्षत्रियाणां कृतेऽपि आत्मज्ञानस्य पश्चादेव युद्धे साफल्यं लभ्यम्।[4] तथापि युद्धे मरणं तेभ्यः स्पृहणीयमिति महाभारते नैकशो निगदितम्। तद्यथा—

सुखं सांग्रामिको मृत्युः क्षत्रधर्मेण युध्यताम्।
जित्वेह सुखमाप्नोति हतः प्रेत्य महत्फलम्॥ शल्यपर्वणि १८.६०

गीतायां युद्धे मरणं तु प्रशस्यतममिति कृष्णेन पौनःपुन्येन निगदितम्। स्वभावानुरूपमेतादृशं क्षत्राणां कर्म। ते स्वभावतः सन्ति—

कामभोगप्रियास्तीक्ष्णाः क्रोधनाः प्रियसाहसाः। शान्ति० १८१.११

पारस्परिकस्नेहः कौटुम्बिकेष्वपि विरलमेव दृश्यते क्षत्रियसमाजे। स्वसम्बन्धिनामपि हननं स्वर्गफलं ददातीति कौटुम्बिकाः परस्परं युध्यन्ते। किन्तु ब्राह्मणत्राणे तु क्षत्रिया निकामं व्रतधरा बभूवुः।[5]

क्षत्रियगृहस्थस्तु राजधर्म-परिपालने सम्यग्रतो भवेदिति महाभारतीयं विधानम्। तद्यथा—प्रजापालनम्[6], दस्युवधे नित्योद्युक्तः, रणे पराक्रमः,

---

१-२. कौषीतकि उ० ३.१

३. जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेजे। बृहदा० ३.१.१। तत्र जनकस्य वैदेहस्य विजिज्ञासा बभूव—कः स्विदेषां ब्राह्मणानामनूचानतम इति स ह गवां सहस्रमवरुरोध दश दश पादा एकैकस्याः शृङ्गयोरावद्धा बभूवुः।

४. यावद्ह वा इन्द्र एतमात्मानं न विजज्ञे, तावदेनमसुरा अभिबभूवुः। स यदा विजज्ञेऽथ हत्वासुरान् विजित्य सर्वेषां च देवानां सर्वेषां च भूतानां श्रैष्ठ्यं स्वराज्यमाधिपत्यं पर्येत्। कौषीतकि० ४.२०

५. ब्राह्मणानां क्षतत्राणात् ततः क्षत्रिय उच्यते। शान्ति० ५९.१२८। अपरं च शान्ति० २९.१३० उद्योगपर्व १३०.२९। क्षत्रियो गोप्ता चातुर्वर्ण्यस्य। कर्णप० २३.३३

६. प्रजापालनं तु मूलतो वर्तते—

असतां प्रतिषेधश्च सतां च परिपालनम्।
एष राज्ञां परो धर्मः समरे चापलायनम्॥ शान्ति० १४.१६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

क्रतुभिरीजानः, श्रुतवान्, आहवजेता, वधधर्म इत्यादि-प्रवृत्तिभिः स मान्यतामार्हत् ।[1] रामायणे समर्थितमेतत् ।[2]

महाभारते क्षत्रोचितचेष्टाः संसिद्धिकारिकाः सामान्यत उदात्ताः प्रतिभान्ति । तद्यथा—

यज्ञो विद्या समुत्थानमसन्तोषः श्रियं प्रति ।
दण्डधारणमत्युग्रं प्रजानां परिपालनम् ॥
द्रविणोपार्जनं भूरि पात्रेषु प्रतिपादनम् ।
भूमिरेतौ निगिरति सर्पो बिलशयानिव ।
राजानं चाविरोद्धारं ब्राह्मणं चाप्रवासिनम् ॥ शान्ति २३.१०-१५

अन्तिमेन श्लोकेन प्रतीयते यत् क्षत्रिय-गृहस्थानां कृते युद्धव्यापृति[3]-ब्राह्मणगृहस्थानां कृते च नित्यभ्रमणेन नूतनज्ञानविज्ञानाध्ययनं प्रशिक्षणं च तेषां महते उत्कर्षायालमिति लोकोक्तिर्बभूव ।

क्षत्रियस्य साधारणकर्मासीत्—

शौर्यं तेजो[4] धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम् ।
दानमीश्वरभावश्च क्षत्रकर्मस्वभावजम् ॥ भीष्म० ४०.४३

न केवलं सिद्धान्तदृष्ट्यापितु व्यवहारेणापि क्षत्रियाः शौर्यं दर्शं दर्शं समाजमाततायिनां प्रतियोगेभ्योऽरक्षन् । तथा हि महाभारते कालेयानां हिंसया मुनयो न पीडिताः स्युरित्युद्दिश्य—

केचिदत्र महेष्वासाः शूराः परमदर्पिताः ।
मार्गमाणाः परं यत्नं दानवानां प्रचक्रिरे ॥
न चैतानधिजग्मुस्ते समुद्रं समुपाश्रितान् ।
श्रमं जग्मुश्च परममाजग्मुः क्षयमेव च ॥
आरण्यकपर्वणि १००.१०४,१०५

क्षत्रियगृहस्थानां तपस्विता सप्रयोजनं परिदृश्यते । उदाह्रियते तत्र विश्वामित्रस्य महादेवप्रसादात् वसिष्ठप्रशमनार्थमस्त्रशस्त्रावाप्तये महातपः[5]। वसिष्ठेन पराभूतो विश्वामित्रो ब्रह्मत्वकारणं तपोऽनुष्ठितवांश्च । तपःकाले

---

१. शान्ति प० ६०.१४–१७

२. यज्ञैर्बहुविधैरिष्टं प्रजा धर्मेण पालिताः ।
गुरवश्च महात्मानः शीलवृत्तेन तोषिताः ॥ बाल० ५८.२०, २१

३. नित्योद्युक्तो दस्युवधे रणे कुर्यात् पराक्रमम् । शान्ति० ६०.१४

४. 'क्षत्रिये तेज उत्तमम्' । सौप्तिकपर्वणि ३.१९

५. तपस्तेपे महातपाः । बाल० ५५.१२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तस्य चत्वारः पुत्रा अजायन्त ।[1] तपसा प्रीतो ब्रह्मा तमुवाच—

अनेन तपसा त्वं हि राजर्षिरिति विद्महे । बाल० ५७.६

मूलतो मानवा एव ऋभवः स्वदाक्ष्येण देवाः संजाताः ।[2] ते परवर्ति-वैश्योत्तमानां कार्यादर्शं प्रस्तुवन्ति । तथाहि ऋग्वेदे

१. संवत्सरं ते गामरक्षन् । ४.३३.४
२. त्वष्टुश्चमसं चतुरस्करेति । ४ ३३ ५; ४.३५.२
३. सुक्षेत्राणि चक्रुः, सिन्धूनयन्त, मरुभूमौ वनस्पतीरारोपयन् । आपो निम्नं प्रावाहयत् । ४ ३३ ७
४. सुवृतं रथं चक्रुः । ४.३३.८
५. ऋभवो गोमन्तः, वाजवन्तः, सुचीराः, वसुमन्तः सन्ति । ४.३०.१०
६. अश्वविदः सन्ति ऋभवः[3] ।। ४.३५.५
७. युद्धोपयोगिरथान् निर्मापयामासुः । ४.३६.२
८. गोपालने दाक्ष्यम् । १.१६१.१०

महाभारते वैश्यगृहस्थस्य कर्तव्यानि निर्दिष्टानि सन्ति । तद्यथा—

दानमध्ययनं यज्ञः शौचेन धनसंचयः ।
पितृवत् पालयेद् वैश्यो युक्तः सर्वपशूनिह ।
रक्षया स हि तेषां वै महत् सुखमवाप्नुयात् ।।
प्रजापतिर्हि वैश्याय सृष्ट्वा परिददे पशून् ।।[4]
गोषु वृत्तिं समाधाय पीताः कृष्युपजीविनः । शा० १८१.१२

अन्यत्र महाभारतानुसारेण वैश्ये दाक्ष्यं व्यवसाय-परायणता भूरि भवतु

---

१. फलमूलाशनो दान्तश्चचार परमं तपः ।
अथास्य जज्ञिरे पुत्राः सत्यधर्मपरायणाः ।। बाल० ५७.३

२. ऋभवो महाराजसुधन्वनः पुत्राः सन्ति । ऋ० १.१६१.२ । संक्षेपेण ते वर्णिताः सन्ति

तक्षन् रथं सुवृतं विद्मनापसस्तक्षन् हरी इन्द्रवाहा वृषण्वसू ।
तक्षन् पितृभ्यामृभवो युवद्वयस्तक्षन् वत्सायमातरं सचाभुवम् ।।

ऋग्वेदे १.१११.१, अपरं च ऋ० १.१६१.१

They are a deft handed trio who by their marvellous skill acquired the rank of deities. A. K Macdonell : A Vedic Reader for Students Introduction Page XXIII

३. शच्या हरी धनुतरावतष्टेन्द्रवाहावृभवो वाजरत्नाः । ऋग्वेदे ४.३५.५

४. शान्ति० ६०.२१-२३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नाम ।[1] अपरं च समर्थनं पूर्वेषां मतानामधोविधं वर्तते—

दानातिथ्यक्रियाधर्मैर्यान्ति वैश्याश्च सद्गतिम् ।। आर० १४९.५१

समाजस्य सांस्कृतिकाभ्युत्थानाय वैश्यस्य योगदानं महाभारतेऽधोविधं विहितम्—

वैश्योऽभिगम्य द्रव्याणि ब्रह्मकर्माणि[2] कारयेत् । विराट० ४५.५

'ब्राह्मणानां ज्ञान-विज्ञानास्तिक्यादिप्रवृत्तयः वर्धन्तेतमाम्' इति संवर्धनोपाया अनुष्ठेयाः सन्ति वैश्यैः । महानयं कर्मभार उद्दिष्टो वैश्यानां कृते महर्षिभिः ।

अपरेषां ब्राह्मणक्षत्रादीनां गा अरक्षद् वैश्यः । एतदर्थं महाभारते तस्य भृतिर्निर्धारितेति स्पष्टीकृतम् ।[3]

शूद्राणां कृते गीतायां निर्धारितं कर्माधोविधं वर्तते—

परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम् ।। १८.४४

अत्रावधेयं वर्तते यद् वर्णत्रयस्य परिचर्या[4] (दासभावेन सेवामात्रं) शूद्राणां कर्म नासीदपितु स्वीयशिल्पकलादिनैपुण्यनिर्मिति[5]भिर्भारतीयसमाजो यथा पुरा तथाद्यावधि तैरुपस्क्रियते । इयमुपस्कृतिः परिचर्या भवतु नाम शूद्राणाम् । अत एव गीतायां स्पष्टीकृतं शूद्राणां कर्म न केवलं परिचर्या, अपितु परिचर्यात्मकं कर्म येन समाजस्योपस्कार-सामग्री उपनीता तत् परिचर्यात्मकं कर्म ।

अपवादरूपेण भवतु नाम, कतिपयशूद्रा अध्यापनं कुर्वन्ति स्म महाभारतयुगे ।[6] तेषां शिष्या उच्चवर्गीया अपि बभूवुः । कतिपयशूद्रा राजानो बभूवुरिति मनुना निर्दिष्टम्—

न शूद्रराज्ये निवसेत्' ४.६१

---

१. सौप्तिक ३.१९ 'दाक्ष्यं वैश्ये' इति ।

२. ब्रह्मकर्माणि सन्ति

'शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च ।
ज्ञानविज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम् ।।' गीता १८.४२

३. शान्ति० ६०.२२-२५

४. परिचर्या नास्ति दासभावेन सेवा, अपितु कस्यचिदुच्चतरस्याभिजातस्य कर्तव्येषु स्वीयेन योगदानेनोपकार एवेति महाभारतस्याधःश्लोके स्पष्टीकृतम्—

ब्रह्म पर्यचरत् क्षत्रं विशः क्षत्रमनुव्रताः ।
ब्रह्मक्षत्रानुरक्ताश्च शूद्राः पर्यचरन् विशः ।। आदि० ९४.९

५. निर्मितिः Artistic production vide Dictionary, Apte

६. प्राप्य ज्ञानं ब्राह्मणात् क्षत्रियाद्वा ।
वैश्याच्छूद्रादपि नीचादभीक्ष्णम् । शान्ति ३०६.२५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

शूद्रगृहस्थानां महिमा प्रकल्पनीयः। मनुर्निर्दिशति 'न राज्ञः प्रतिगृह्णीयादराजन्यप्रसूतितः', ४.८५ इत्यनेन शूद्रराजानां सम्भावना व्यक्ता।

नैकस्थलेषु धार्मिकदृष्ट्या शूद्रगृहस्थस्य महाभारतीयविधानमविचारपूर्णं प्रतिभाति। तथापि तेषां कृते सनातनं यद् वृत्तिनिरूपणं प्रतिपादितं, तेन ज्ञायते यत् ते पाकयज्ञ-सम्पादनायानुमताः।[1] शूद्राणां वैदिकयुगीनस्थितिः महाभारतकाले केवलं श्रवणगोचरीभूतापि विज्ञापनमर्हति। तद्यथा—

शूद्रः पैजवनो नाम सहस्राणां शतं ददौ।
ऐन्द्राग्नेन विधानेन दक्षिणामिति नः श्रुतम्॥
शान्तिपर्वणि ६०.३७

सर्वेषां वर्णानां कृते श्रद्धायज्ञस्य विधानं महाभारते निरूपितम्।[2]

शूद्रवृत्तिस्तु—

हिंसानृतप्रिया लुब्धाः सर्वकर्मोपजीविनः[3]।
कृष्णाः शौचपरिभ्रष्टाः इत्यादि। शान्ति० १८२.१३

ते सर्वकर्मोपजीविनः सन्तीत्यनेन शूद्राणां नानाशिल्पकलापाटवं प्रमाणितमेव। अन्यच्च यानि कानिचित् कर्माणि स्वभावतो हीनानि, बहुलश्रमसाध्यानि चित्तापकर्षकाणि चासन्, तेषामपि लोकोपयोगितां परिलक्ष्य शूद्रैरेव निष्पादनं स्वीकृतमिति शूद्राणां सर्वकर्मोपजीवित्वं प्रत्यक्षमेव। न सर्वे शूद्राः सेवका आसन्निति निश्चप्रचम्।

महाभारते संग्रहेण शूद्रकर्म प्रोक्तम्—

सर्वातिथ्यं त्रिवर्गस्य यथाशक्तिदिवानिशम्।
शूद्रधर्मः समाख्यातस्त्रिवर्गपरिचारणम्॥ अनु० १२९.१५
स शूद्रः संशिततपाः सत्यसन्धो जितेन्द्रियः।
शुश्रूषन्नतिथिं प्राप्तं तपः संचिनुते महत्॥ १२८.५७
त्यक्तहिंसः शुभाचारो देवताद्विजपूजकः।
शूद्रो धर्मफलैरिष्टैः संप्रयुज्येत बुद्धिमान्॥ १२८.५८

सार्ववर्णिकसाधुवृत्तं समाहृतमनुशासनपर्वणि महाभारतेऽधोविधम्—

---

१. स्वाहाकारनमस्कारौ मन्त्रः शूद्रे विधीयते।
ताभ्यां शूद्रैः पाकयज्ञैर्यजेत व्रतवान् स्वयम्॥
पूर्णपात्रमयीमाहुः पाकयज्ञस्य दक्षिणाम्॥ शा० ६०.३६

२. अतो हि सर्ववर्णानां श्रद्धायज्ञो विधीयते।
तस्मात् सर्वेषु वर्णेषु श्रद्धायज्ञो विधीयते॥ शा० ६०.४७

३. शूद्राणां सर्वकर्मकरत्वं तत्रैव १८२.७ पद्येऽपि निदर्शितम्।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दातव्यमसकृच्छक्त्या यष्टव्यमसकृत् तथा ।
पुष्टिकर्मविधानं च कर्तव्यं भूतिमिच्छता ।। १२९.१७
धर्मेणार्थः समाहार्यो धर्मलब्धं त्रिधा धनम् ।
कर्तव्यं धर्मपरमं मानवेन प्रयत्नतः ।। १२९.१८
एकेनांशेन धर्मार्थश्चर्तव्यो भूतिमिच्छता ।
एकेनांशेन कामार्थमेकमंशं विवर्धयेत् ।। १२९.१९

पुण्योपार्जनाय गृहस्थाः शूद्रा वर्णत्रयवत् पुष्करादितीर्थेषु महाभारतयुगे स्नानं समाचरन्ति स्म ।[1]

सोमपानम्

वैदिकर्षीणां सोमपानं तेषां विशेषाधिकारः प्रतिभाति । अयं सोमः सुरातः प्रभिन्न एव यतो हि नाम सोमः पायिने सुविचारान्, सुखं, शक्तिं च प्रददाति ।[2] मधुर आसीत् सोमः ।[3] सोमो मनसः पापमपाकृत्य, असत्यं दूरीकृत्य, सत्यं संवर्धयति ।[4] सोमः संर्वविधं संरक्षक आसीत् ।[5]

बौद्धं गार्हस्थ्यम्

स्वयं गौतमबुद्धस्तस्य परवर्त्यनुयायिन आचार्याश्च गृहस्थान् तेषां स्वजीवनस्य सत्पथं प्रायः प्रवचनैर्व्याख्यातवन्तः ।[6] बहवो गृहस्था बौद्धविहारान् तेषां प्रवचनं श्रोतुं समाजग्मुः ।[7] बौद्धाचार्या गृहस्थैर्भोजनायामन्त्रितास्तान् प्रबोधयन्ति स्म । बौद्धाचार्याणां संगतौ न्युष्य गृहस्था उदात्तं जीवनं यापयितुं प्रशिक्षणं प्रापुः ।[8] सोत्साहं ते गृहस्था गौतमादीनां प्रवचने-

---

१. पुष्कर-वर्णनप्रसङ्गे लिखितं वर्तते—
ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा राजसत्तम ।
न वियोनिं व्रजन्त्येते स्नातास्तीर्थे महात्मनः ।। आर० ८०.५६

२. स्वादोरभक्षि वयसः सुमेधाः स्वाध्यो वरिवोवित्तरस्य । ऋ० ८.४८.१ स्वास्थ्यवर्धकः, रोगापहारी, वक्तृताशक्तिवर्धकः, दीर्घजीवनप्रदायश्चासीद्रसोऽयम् । ऋ० १०.७१.१०; ८.४८.३ ।
सोमाय सोमवल्लीरसः दुग्ध-दधि-यवादीनां सम्मिश्रणेन स्वादिष्ठः कृतः । ऋ० ५.२६.५ तथा ८.९१.२ गन्धः सोमस्य मनोहारी बभूव । ऋ० ९.९७.१९ तस्य रूपं श्रीः, रसः, प्रयः, नभः (सुवासः) च प्रशस्यानि आसन् । ऋ० ४.४१.८; ३.४८.१; ३.३०.१; ९.८३.५ अथर्व० ९.२५.४ ।

३. मधुमत्तम इति ऋ० १.४७.१ । शत० १२.८.२.१५ ।

४. Vedic Mythology p. 109 ५. ऋ० ८.४८.१५ ।

६-८ चुल्लवग्गो ४.४.६ । महावग्गो ६.२८.१; ६.२३.३; ५.१३.१ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नात्मकर्तव्यं प्रति सस्पृहं दृढनिष्ठा बभूवुः ।

गौतमबुद्धः स्वयमेव बहुषु पूर्वजन्मसु बोधिसत्त्व एव गृहस्थः सन्नादर्श-जीवनस्य व्यावहारिकस्वरूपं प्रत्यदर्शयत् ।

पाटलिपुत्रस्य गृहस्थोपासकानां समक्षं स प्रावोचत्—असदाचारस्य पञ्चविधा हानिर्भवति—(१) आलस्येन स दरिद्राति, (२) सर्वत्र स निन्द्यते, (३) महापुरुषमध्ये लज्जया तस्य शिरोऽवनमति, (४) मरणकाले स चिन्ता-ग्रस्तो भवति, (५) परलोके स नरकं याति । सदाचारस्य पञ्चलाभा भवन्तीति ।[1]

गौतमस्य महामङ्गलयोजना मानवताया उत्कर्षस्य परमं निकर्ष प्रस्तौति । तद्यथा—मूर्खाणां सङ्गत्यागः, सत्पण्डितानामुपासना, पूज्यानां पूजा, अनुकूलप्रदेशवासः, सत्पथे चित्तनिवेशः, विद्याकलादीनां ग्रहणम्, सद्व्यवहारः, सुभाषणम्, पित्रोः सेवा, कुटुम्बस्य रक्षणम्, सौष्ठवेन कार्य-सम्पादनम्, नम्रता-सन्तोष-कृतज्ञता-क्षमा-मधुरभाषण-सत्संग-तपः-ब्रह्मचर्यार्य-सत्यज्ञान-निर्वाणपद-बोधाश्च ।[2]

गौतमोऽनुयायिनः प्राबोधयत्—सदैव मानवतां सत्पथं प्रदर्शयन्तु । बहु-जनहिताय बहुजनसुखाय, मानवस्य कल्याणाय परिभ्रमणं कुर्वन्तु । तमेव धर्ममुपदिशन्तु य आदौ, मध्येऽन्ते च कल्याणप्रदः ।[3]

महायानानुसारेण गृहस्थोऽपि निर्वाणं लभेत यदि नाम स दयामैत्री-भावनोदारता-त्यागात्मबलिदानादीनि आत्मसात्करोति ।[4]

गृहे वसति संन्यासी

कौषीतक्युपनिषदि अन्तकाले स्वीयं सर्वस्वं पुत्राय यथाविधि समर्प्या-मरणस्थितौ यदि न प्रव्रजति तर्हि स पुत्रैश्वर्ये गृहे वसेदिति रीतिर्दृश्यते ।[5]

एतादृशी स्थितिर्मनुनापि प्रकल्पिता—

संन्यस्य सर्वकर्माणि कर्म दोषानपानुदन् ।
नियतो वेदमभ्यस्य पुत्रैश्वर्ये सुखं वसेत् ।। २.१५

---

१. महावग्गे ६.२८.४५
२. सुत्तनिपाते महामंगलसुत्त १-८
३. महावस्तु २.३६२-३७०
४. महायानसूत्रालङ्कारे द्वितीयभागे, पृ० १६ । मिलिन्दप्रश्ने ६.२.४
५. कौषीतकि० २.१५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कर्मयोगः

कर्मयोगस्य स्पष्टं मूलं यजुर्वेदस्याधोलिखितमन्त्रे दृश्यते—

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं शमाः ।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ॥

प्रसिद्धोऽयं मन्त्र ईशावास्योपनिषद्द्वारेण । कठोपनिषदि विषयोऽयं विवृतः । गृहस्थाश्रमेऽपि ध्यानयोगेन कश्चिन्मनीषी मोक्षं लब्धुं शक्नोतीति छान्दोग्योपनिषदि निदर्शितमधोविधम्—

'आचार्यकुलाद् वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो धार्मिकान् विदधदात्मनि सर्वेन्द्रियाणि सम्प्रतिष्ठाप्याहिंसन् सर्वभूतान्यन्यत्र तीर्थेभ्यः । स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसम्पद्यते, न च पुनरावर्तते ।' ८.१५.१ प्रवृत्तिमार्गोऽयं मोक्षकामानाम् । निवृत्तिमार्गे पुनः कर्मणां संन्यासः (त्यागः) क्रियते ।

इयं स्थितिश्चतुर्थाश्रमे ध्यानयोगेन सम्भवति संन्यासिनामित्यग्रे वर्णयिष्यते ।

कर्मयोगस्तु गृहाश्रमे गृहस्थानां वानप्रस्थे ऋषीणां संन्यासाश्रमे संन्यासयोगिनां दरीदृश्यते । मनुर्वैदिककर्म प्रशस्यमिति निर्दिश्य वैदिककर्मयोगं विवृण्वन्नाह—

सुखाभ्युदयिकं चैव नैःश्रेयसिकमेव च ।
प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकम् ॥ १२.८८
इह चामुत्र वा काम्यं प्रवृत्तं कर्म कीर्त्यते ।
निष्कामं ज्ञानपूर्वं तु निवृत्तमुपदिश्यते ॥ १२.८९

अत एव मन्वनुसारेण केवलं ब्रह्मज्ञा एव निष्कामकर्मणोऽधिकारिणः[1] । स परतः स्पष्टयति—

प्रवृत्तं कर्म संसेव्य देवानामेति साम्यताम् ।
निवृत्तं सेवमानस्तु भूतान्यत्येति पञ्च वै ॥ १२.९०

महाभारते गृहमुनिरिति कर्मयोगी सम्यङ् निदर्शितो जाजलेरुपाख्याने । अत्र तुलाधारो वैश्योऽस्ति जपतां वरश्च ।[2] स स्वधर्मं वर्णयति—

---

१. कीदृशाः सन्ति ब्रह्मज्ञा इति मनुर्विशदयति—

सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ।
समं पश्यन्नात्मयाजी स्वाराज्यमधिगच्छति ॥ १२.९१

२. शान्ति० २५४.१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अद्रोहेणैव भूतानामल्पद्रोहेण वा पुनः ।
या वृत्तिः स परो धर्मस्तेन जीवामि जाजले ।। ६
परिच्छिन्नैः काष्ठतृणैर्मयेदं शरणं कृतम् ।
अलक्तं पद्मकं तुङ्गं गन्धांश्चोच्चावचांस्तथा ।। ७
रसांश्च तांस्तान् विप्रर्षे मद्यवर्जानहं बहून् ।
क्रीत्वा वै प्रतिविक्रीणे परहस्तादमायया ।। ८
सर्वेषां यः सुहृन्नित्यं सर्वेषां च हिते रतः ।
कर्मणा मनसा वाचा स धर्मं वेद जाजले ।। ९
समोऽस्मि सर्वभूतेषु पश्य मे जाजले व्रतम् ।। ११
तुला मे सर्वभूतेषु समा तिष्ठति जाजले ।। १२
समं मतिमतां श्रेष्ठ समलोष्टाश्मकाञ्चनम् ।। १३
यथान्धबधिरोन्मत्ता उच्छ्वासपरमाः सदा ।
देवैरपिहितद्वाराः सोपमा पश्यतो मम ।। १४
यथा वृद्धातुरकृशा निःस्पृहा विषयान् प्रति ।
तथार्थकामभोगेषु ममापि विगतस्पृहा ।। १५
यदा न कुरुते भावं सर्वभूतेषु पापकम् ।
कर्मणा मनसा वाचा ब्रह्म सम्पद्यते तदा ।। १७
यथावद् वर्त्तमानानां वृद्धानां पुत्रपौत्रिणाम् ।
अनुवर्तामहे वृत्तमहिंस्राणां महात्मनाम् ।। २०

सोऽयं कर्मयोगपथो महाभारतीय-युद्धप्रकरणे कृष्णेन सम्यग् व्याख्यातः। अन्यत्र महाराजो जनकस्त्रिविधमोक्षज्ञोऽपि राज्यशासनभरं सम्यगुद्वढवान्।[1] महाभारतस्य धर्मव्याधो महान् कर्मयोगी विभायते।

मनुः केवलज्ञानात् कर्मयोगं श्रेष्ठतरं मन्यते। तथाहि—

अज्ञेभ्यो ग्रन्थिनः श्रेष्ठा ग्रन्थिभ्यो धारिणो वराः ।
धारिभ्यो ज्ञानिनः श्रेष्ठा ज्ञानिभ्यो व्यवसायिनः ।। १२.१०३

कर्मयोगस्याभ्यासार्थं या साम्यबुद्धिरपेक्षिता सा पातञ्जलयोगेन साधनीया। यथा लोकमान्यस्तिलकः प्रबोधयति—भवतु नामाल्पापि योग-सिद्धिः सा बुद्धिस्थैर्यं प्रददाति येन कर्मयोगप्रवृत्तयः साधु विकसन्ति।[2]

१. शान्ति० ३०८.२७
२. बालङ्गाधर-तिलकः श्रीमद्भगवद्गीतारहस्य अथवा कर्मयोगशास्त्र, पृष्ठ७०३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वनाश्रमः

वननित्यै-र्वनचरै-र्वनपै-र्वनगोचरैः ।
वनं गुरुमिवासाद्य वस्तव्यं वनजीविभिः ।।

महाभारते अनु० १३०.१३

वानप्रस्थाः खलु ऋषिधर्ममनुसरन्तः पुण्यानि तीर्थानि नदी-प्रस्रवणानि सुविविक्तेष्वरण्येषु मृग-महिष-वराह-सृमरगजाकीर्णेषु तपस्यन्तोऽनुसंचरति । त्यक्तग्राम्यवस्त्राहारोपभोगा वन्यौषधिमूल-फलपर्णपरिमित-विचित्रनियताहाराः स्थानासनिनो भूमिपाषाण-सिकताशर्करावालुकाभस्मशायिनः, काशकुशचर्मवल्कल-संवृताङ्गाः, केशश्मश्रुनखरोमधारिणो नियतकालोपस्पर्शना अस्कन्नहोमबलि-कालानुष्ठायिनः, समित्कुशकुसुमोपहारहोमार्जनलब्धविश्रामाः, शीतोष्ण-पवननिष्टप्तविभिन्नसर्वत्वचो विविधनियमयोगचर्या विहितधर्मानुष्ठानहृत-मांसशोणितास्त्वगस्थिभूता धृतिपराः सत्त्व-योगाच्छरीराण्युद्वहन्ति ।

यस्त्वेतां नियतश्चर्यां ब्रह्मर्षि-विहितां चरेत् ।
स दहेदग्निवद्दोषाञ्जयेल्लोकांश्च दुर्जयान् ।।

महाभारते शान्तिपर्वणि १८५.१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वानप्रस्थः

दैनन्दिनजीवनाद् बहिरपि कश्चित्स्वर्णिमजीवनपथ ऊरीकर्तुं पार्यत इतीमे वानप्रस्था लोकं परिदर्शयन्ति। अस्माकं लोकाद् भिन्न एव वानप्रस्थानामपर एव लोकः इति ते स्वीयादर्शेन, तपसा ज्ञानप्रकाशेन च पुरा विश्वमा लोकयन्ति स्म। आयंस्टीन महोदयः समर्थयति—I am happy because I do not want any thing from any body. तदेतन् महाभारते स्पष्टीकृतम्—

अर्थप्राप्तौ तु नरकः कृत्स्न एवोपपद्यते।
अर्थेप्सुता परं दुःखमर्थप्राप्तौ ततोऽधिकम्॥

आदिपर्वणि १४'१.२३, २४

वानप्रस्था भारतीयसमाजस्यैकं प्रमुखमङ्गमासन्, ये वर्गचतुष्टये काममर्थं च विहाय[1] तपसा संसिद्धिमुपालभन्त अथ च लोककल्याणं समपादयन्। प्राज्यदोषेऽपि वने निवसन्तस्ते[2] विज्ञानकृतसुलभानि शरीरसुखसाधनानि परित्यज्य प्रायः वनेषु सर्वतन्त्रस्वतन्त्रा वन्यं जीवनं यापयन्ति स्म। तीर्थाभिगमन-देशदर्शनार्थं ते पृथिवीं पर्यटन्ति स्म।[3] आधुनिकयुगे महात्मगान्धिमहाभागस्तेषां संस्कृतिमुरीकृत्य स्वतपसा यां शक्तिं राष्ट्रे समुत्थापयामास, तया भारतदेशः स्वातन्त्र्यं प्रापद्यत।

ऋग्वेदे वानप्रस्थस्य प्रथमदर्शनं देवमुनेः 'अरण्यानी' इति सूक्ते भवति। अस्य सूक्तस्य कविः स्वयमेव वानप्रस्थमुनिः तत्कालीनं वनजीवनं संक्षेपेण वर्णयति। तदनुसारेण तत्रारण्ये ग्रामीणा गाश्चारयन्ति स्म, इन्धनं च संगृह्णन्ति स्म। वानप्रस्थानां भोजनमारण्यकवृक्षैः प्रदत्तमासीत् स्वादिष्ठं फलमिति। वनदेव्योपकृतो मुनिः प्रगायति—

आञ्जनगन्धिं सुरभिं बह्वन्नामकृषीवलाम्।
प्राहं मृगाणां मातरमरण्यानिमशंसिषम्॥ ऋ० १०.१४६.६

अथर्ववेदे ब्रह्मदर्शनमृषीणामभीप्सितं बभूव। तेषां ब्रह्मविषयकमूहापोहनिदर्शनं परिप्रश्नश्च सूक्ष्मगवेषणां तेषां प्रमाणयति।[4]

---

१. वैदिकयुगे संस्कृतेः केन्द्रद्वयं प्रतिष्ठितमासीत्—ग्रामा अरण्यानि च। ऋषिकर्मोचितमासीदरण्यमिति अथर्ववेदस्य १२.१.५६ मन्त्रे दर्शितम्। वानप्रस्थानां द्रव्योपस्कारः। (उपस्कारो निषेधः) शान्ति प० १८.४.११

२. प्राज्यदोषं वनं-प्राप्तेत्यादि अगस्त्यो रामं प्रत्यवदत्। अरण्यकाण्डः १३.३

३. अत एव भारतदेशस्यैकराष्ट्रत्वं प्रसाधितम्।

४. उदाहरणार्थं विराड्विषयकं ८.९ सूक्तं द्रष्टव्यम्।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वैदिकयुगीया वैखानसा परवर्तियुगे वानप्रस्था इति धर्मशास्त्रेषु ख्याताः सन्ति । तेषां गाथा नैकब्राह्मणग्रन्थेषूपलभ्यते ।[1] ऋग्वेदेऽपि वैखानसः सुप्रष्ठितो विद्यते ।[2]

वानप्रस्थाः पुरा मूलतो द्विविधा आसन् । साधारणतो गृहस्था गार्हस्थ्यानन्तरं गृहं परित्यज्य वनमेव सर्वथा समाश्रित्य स्वजीवनस्य तृतीयं चरणमयापयन् । तदनन्तरं ते संन्यासिनो वा बभूवुः ।[3]

बहवोऽन्यादृशा वानप्रस्था ऋषयो महर्षयो वा ऋषिकुमारा एव प्रथमाश्रमानन्तरमेव पितृवत्तपोमयप्रवृत्तिषु व्यापृता यथावश्यकं निवेशार्थिनः पत्नीपुत्रादिसंयुता यावज्जीवं प्रायो वनमेव स्वचारित्रैरपावयन् । उभयविधा वानप्रस्थाः प्रकरणेऽस्मिन्नुपस्थापिताः । वनाद्बहिरेत्य ते राजादीनां यजमानानां यज्ञान् समपादयन् । नैतत्कृत्यमासीद् गार्हस्थ्यानन्तर-वानप्रस्थव्रतानाम् ।

महाभारतानुसारेण वानप्रस्था ऋषिधर्मं चरेयुः । कोऽयमृषिधर्म इति उमामहेश्वर-संवादेऽनुशासनपर्वणि निगदितम् ।[4] तथाहि—

ऋषिधर्मः सदा चीर्णो योऽन्यस्तमपि मे शृणु । १२९.४७
सर्वेष्वेव धर्मेषु जेय आत्मा जितेन्द्रियः ।
कामक्रोधौ[5] ततः पश्चाज्जेतव्याविति मे मतिः ॥ १२९.४८
अग्निहोत्रपरिस्पन्दो धर्मरात्रिसमासनम् ।
सोमयज्ञाभ्यनुज्ञानं पञ्चमी यज्ञदक्षिणा ॥ १२९.४९
नित्यं यज्ञक्रिया धर्मः पितृदेवार्चने रतिः ।
सर्वातिथ्यं च कर्तव्यमन्नेनोञ्छार्जितेन वै ॥ १२९.५०

---

१. मुनिमरणनामके स्थाने वैखानसा रहस्यु देवमलिम्लुग्भिर्हताः । पंचविंशब्राह्मणे १४.४.७ । तै० आ० १.२.३. । वैखानसपुरुहन्मन् इति पंचविंशब्राह्मणे १४.९.२९

२. ऋग्वेदे ९.८६ सूक्तस्य रचयिता वैखानसाः शतमिति वर्णितम् । सर्वानुक्रमणी ।

३. बहूनां कृते वानप्रस्थो नैष्ठिकं व्रतमासीत्, यतो हि नामामरणं ते वानप्रस्था एव भवन्ति स्म, न संन्यासिनः । तद्यथा महाभारते वर्णितं धृतराष्ट्रो विदुरश्चैतादृशेषु वानप्रस्थेष्वन्यतमौ ।

४. ऋषिप्रव्रज्या वानप्रस्थस्यापरं नाम ।

वानप्रस्थस्यारम्भो गार्हस्थ्यान्ते ऋषिप्रव्रज्याग्रहणेन भवति । पुत्रेण पत्न्यापि च सह कश्चिद् गृहस्थस्तापसजीवनं स्वीकर्तुं हिमालयप्रदेशमगच्छत् । कल्याणधम्म जातक १७१ । मक्कटजातकं १७३ ।

ऋषिधर्मो सदा चीर्णो सनातनो वायं ऋषिधर्मः ।

५. नित्यं क्रोधात्तपो रक्षेदिति महाभारते आर० २०३.४० ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

निवृत्तिरूपभोगस्य गोरसानां च वै रतिः ।
स्थण्डिले शयनं योगः शाकपर्णनिषेवणम् ।। १२९.५१
फलमूलाशनं वायुरापः शैवलभक्षणम् ।
ऋषीणां नियमा ह्येते यैर्जयन्त्यजितां गतिम् ।। १२९.५२
विधूमे न्यस्तमुसले व्यङ्गारे भुक्तवज्जने ।
अतीतपात्रसंचारे काले विगतभैक्षके ।। १३९.५३
अतिथिं कांक्षमाणो वै शेषान्नकृतभोजनः ।
सत्यधर्मरतिः क्षान्तो मुनिधर्मेण युज्यते ।। १२९.५४
न स्तम्भी न च मानी यो न प्रमत्तो न विस्मितः ।
मित्रामित्रसमो मैत्रो यः स धर्मविदुत्तमः ।। १२९.५५

गृहाश्रमे वर्गत्रयस्य धर्मार्थकामस्य सिद्धिः साधारण्येनाजायत । अत एव मोक्षार्थं प्रथमसोपानं तु वैराग्यमेवाभिमतम् ।[1] एतदर्थं गृहत्यागः प्रथमं पदमासीत् । गृहाश्रमे ग्राम्यजीवने साधारणतो ग्राम्यसुखानां कृते श्रमप्रपञ्चबहुलाः प्रवृत्तयोऽपरिहार्या आसन् सन्ति वा । विमर्शकारिणां लोकानां मानसे प्रायः प्रश्नोऽयं समुत्तिष्ठेत्—अल्पस्य ग्राम्यसुखस्य हेतोः कुतो वयमायासबहुल उद्वेगकारके गार्हस्थ्ये निगृहीता भवाम इति ।[2] अपरं च—भासेन स्वप्नवासवदत्तनामके नाटके वानप्रस्थ-विषये मनोवृत्तिः समुदाहृता—

नगरपरिभवान् विमोक्तुमेते वनमभिगम्य मनस्विनो वसन्ति । १.५

राजतरङ्गिण्यां महाराजस्य कुवलयापीडस्य वानप्रस्थस्पृहाधोविधं वर्णिता—

गच्छ भद्र वनायैव तपस्याधीयतां मनः ।
सापायाः क्षणभङ्गिन्य एवंप्राया विभूतयः ।। ४.३८८

वनाश्रमे तपसा तत्त्वज्ञानेन च या विरतिर्जन्यते सैव परवर्तिब्रह्माश्रमस्य शाश्वतप्रतिष्ठा भवति ।

---

१. त्यागवांश्च पुनः पापं नालं कर्तुमिति श्रुतिः । शान्ति० ७.३४
त्यागवाञ्जन्ममरणे नाप्नोतीति श्रुतिर्यदा ।
प्राप्तवर्त्मा कृतमतिर्ब्रह्म सम्पद्यते तदा ।। ७.३५
न हि कृत्स्नतमो धर्मः शक्यः प्राप्तुमिति श्रुतिः ।
परिग्रहवता तन्मे प्रत्यक्षमरिसूदन ।। ७.३७

२. इदं तु दुष्करं कर्म कुटुम्बमभिसंश्रितम् ।
दानमध्ययनं यज्ञः प्रजासन्तानमार्जवम् ।।
यद्येतदेवं कृत्वापि न विमोक्षोऽस्ति कस्यचित् ।
धिक् कर्तारं च कार्यं च श्रमश्चायं निरर्थकः ।। शान्ति० २६१.५८–५९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

जीवन-विधिः

गृहस्थाश्रमस्य सुखभोगानामस्थायित्वं, बहुविधप्रपञ्चसाध्यत्वं, मोक्षपथेऽनुपयोगित्वं[1] च यौवने विगते स्वयमेवाप्यनुभूय गृहावासं प्रति अनासक्तो बभूव वानप्रस्थाभिमुखः कश्चिद् वैराग्यप्रपन्नो विद्वान्। स पुनरपि तदेव ज्ञानसंस्थानं प्रति वनभूमौ समाकृष्यते स्म, यत्र ब्रह्मचर्यकाले गुरोरन्तेवासित्वाद् वेदादीनामध्ययनाच्च भौतिकसुखादुच्चतरस्याध्यात्मिकानन्दस्य प्रतिभासो गृहीत आसीत्। तदर्थं वनाय स प्रतिष्ठतेस्म। अयं समारम्भो वानप्रस्थस्य प्रथमपदम्। अरण्येऽध्ययनस्य सौकर्यं भवत्येवारण्यक-विषयाणाम्।

पुरा ऋषीणां नैकेष्वाश्रमेषु केवलं त एव गार्हस्थ्य-विरक्ता अध्यात्मपरायणा जिज्ञासवः प्रविष्टा बभूवुर्ये ब्रह्मिष्ठा भवितुमैच्छन्। तत्र तेषां कृतेऽध्यात्मप्रशिक्षणकेन्द्राणि बभूवुः।

प्रथमाश्रमं ब्रह्मचर्यं तपसा साध्यमासीत् किन्तु तत्र तपः नाति कठोरं समभवत्। वानप्रस्थाश्रमे नैष्ठिकं घोरतमतपोऽभ्यस्यते स्म, येन शरीरं मनश्च सर्वविधकामेभ्यो विरहितं भवतां साध्यं प्रति निश्चले युक्ते च स्याताम्।[1]

अरण्ये किंचिन्नान्यत्र सुलभमौदात्त्यप्रवर्तकं तत्त्वं गृह्यते, येन तपःसाधनार्थं मनीषिणो वनेषु समागताः। महाभारतानुसारेण नैमिषारण्यस्य तपस्विनः सूतस्य प्रवचनं श्रोतुं समागताः।

बहवो वानप्रस्थाः स्वाध्याय-प्रसङ्गेन आसन्। तथाहि—

यत्रारण्यकशास्त्राणि समधीत्य स धर्मवित्।
ऊर्ध्वरेताः प्रजायित्वा गच्छत्यक्षरसात्मताम्॥ शान्ति० ६१.५

महाभारतानुसारेण ते वानप्रस्थास्तीर्थाभिगमनदेशदर्शनार्थं पृथिवीं पर्यटन्ति। तेषां प्रत्युत्थानाभिवादनानसूयावाक्प्रदानसौमुख्यशक्त्यासनशयनाभ्यवहारसत्क्रियाश्चेति गृहस्थानां कर्तव्यमासीत्।[2]

महाभारते जाजलिरिति नामकस्य कस्यचिद् वानप्रस्थस्य जीवनविधिर्वर्णितः। सोऽग्निं पर्यचरत्। स्वाध्यायं चकार। वर्षास्वाकाशशायी, हेमन्ते

---

१. गार्हस्थ्येन केवलं स्वर्गः न तु मोक्षो लभ्यः। शान्ति २३५.२४–२६

२. शान्ति प० १८४.११। रामायणे विश्वामित्रस्य हिमालये यात्रोल्लिखिता। बाल० ३१.१५। अन्यत्र स दक्षिणदिशां परित्यज्य 'पश्चिमायां विशालायां पुष्करेषु सुखं तपश्चरितुं गतवान्' यतो हि नाम सुखं तद्धि तपोवनम्। बाल० ६१.२,३

गृहस्था यथाकालं वानप्रस्थानां मुनीनां सेवाशुश्रूषादिकमकुर्वन्निति रामायणेऽपि निगदितम्। अयोध्याकाण्डे ११६.६–१०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

जलसंश्रयः, ग्रीष्मे वातातपसहः, भूमौ दुःखशय्यः, वर्षाजलक्लिन्नग्रथित-जटाश्रितपक्षियुग्मः, कदाचिन्निराहारो वायुभक्षः, महातपाः काष्ठवत् स्थितः, स्थाणुभूतः निर्विचेष्टः कतिपयमासान् व्यतीत्यात्मानं सिद्धममन्यत ।[1]

लोमशर्षिः स्वविचरणवृत्तिं वर्णयति—

संचरन्नस्मि कौन्तेय सर्वान् लोकान् यदृच्छया ।। आरण्यकप० ८९.५

यस्त्वेतां नियतश्चर्यां ब्रह्मर्षिविहितां चरेत् ।
स दहेदग्निवद्दोषाञ्जयेल्लोकांश्च दुर्जयान् ।।

अनेन स्पष्टं विभायते यदृषीणां ब्रह्मर्षीणां च या जीवन-पद्धतिर्याविज्जीवं प्रावर्तत, तादृशी परित्यक्तगृहाणां वानप्रस्थाश्रमपदधारिणामपि किंचिद् बभूव ।[2]

वानप्रस्थस्य मूलम्

पूर्वोक्तसन्दर्भैर्विभाव्यते यद्वानप्रस्थस्य मूलमादिवैदिकसंस्कृता आसीदेव ।[3] ऋषीणामपरपर्यायो वैखानसो वैदिकसाहित्ये परवर्तिसाहित्येऽपि च दृश्यत एव ।[4] गौतमानुसारेण वैखानसस्तु वानप्रस्थाश्रम एव ।[5] बौधायनानुसारेण वानप्रस्थानां जीवनविधानं वैखानसशास्त्रमनुवर्तते[6] । कालिदासानुसारेण कण्वस्य शिष्यद्वयं शारद्वतः शार्ङ्गरवश्च वानप्रस्था ऋषय आसीत् ।

---

१. सिद्धोऽस्मीति मतिं चक्रे ततस्तं मान आविशत् । शा० २५२.३८

२. शान्तिपर्व १८५.१,२ । अत एव ऋष्याश्रमोऽयं वानप्रस्थः ।

३. वानप्रस्थस्य पर्यायो वैखानसः । ऋग्वेदानुसारेणेन्द्रो मुनीनां सखा । ऋ० ८.१७.१४ । असुरेषु यतयो मुनिवद् बभूवुः । तै० सं ६.२.७.५ । परवर्तियुगे मुनिर्यतिश्च पर्यायौ स्तः ।

यदरण्यायनमित्याचक्षते ब्रह्मचर्यमेव तत् । छा० उ० ८.५.३ खण्डे वर्णितम् । अरण्यायनं तु गृहत्यागिनां कृते भवेत् । आरण्यकसाहित्यमरण्ये पठनीयमिति अरण्यवासस्य प्रतिष्ठां वैदिकयुगे दर्शयत्येव ।

अरण्येऽनूच्यमानत्वादारण्यकम् ।
ये चेमेऽरण्ये श्रद्धा-तप इति उपासते । छा० उ० ५.१०.१ ।
ये चामी अरण्ये श्रद्धां सत्यमुपासते इत्यादि बृहदा० ६.२.१५ ।

४. ऋग्वेदस्य ९.६६ सूक्तस्य द्रष्टारो वैखानसा शतप्राया ऋषयः सन्ति ।
ऋग्वेदस्य १०.९९ सूक्तस्य द्रष्टा ऋषिः वम्रो वैखानसः ।

५. गौतम ३.२

६. वैखानसशास्त्रमत्र महाभारतीयमारण्यशास्त्राणि । आदि० ११०.३५ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वैखानसस्य तत्रैव शिष्यद्वयमपि वर्णितम् ।[1] मनुर्वैखानसं वर्णयति—

पुष्पमूलफलैर्[2]वापि केवलैर्वर्तयेत् सदा ।
कालपक्वैः स्वयंशीर्णैर्वैखानसमते[2] स्थितः ।। ६.२१

महाभारतेऽपि—

वैखानसानां वचनमृषीणां श्रूयते नृप । अनु० ९०.४६ शान्ति २०.६

महाभारतानुसारेण राजर्षिर्वानप्रस्थे वसन्नेव मृत्युमियात् । तद्यथा व्यासो धृतराष्ट्रविषये युधिष्ठिरं वदति आश्रमवासिकपर्वणि—

राजर्षीणां पुराणानामनुयातु गतिं नृपः ।
राजर्षीणां हि सर्वेषामन्ते वनमुपाश्रयः ।। ८.५
एष एव परो धर्मो राजर्षीणां युधिष्ठिर ।
समरे वा भवेन्मृत्युर्वने वा विधिपूर्वकम् ।। ८.१२

तत्र केकयराजस्य शतरूपस्याश्रम आसीत् । अयं राजा पुत्रे राज्यभरं निवेश्य वनमागत आश्रमं कृतवानासीत् यत्र व्यासाद् दीक्षां गृहीत्वा धृतराष्ट्रोऽवसत् ।[3] तत्र धृतराष्ट्रः, गान्धारी, कुन्ती च—

कर्मणा मनसा वाचा चक्षुषा चापि ते नृप ।
संनियम्येन्द्रियग्राममास्थिताः परमं तपः ।। आ० वा० २५.१६
त्वगस्थिभूतः परिशुष्कमांसो जटाजिनी वल्कलसंवृताङ्गः ।
स पार्थिवस्तत्र तपश्चचार महर्षिवत्तीव्रमपेतदोषः ।। २५.१७
तत्र समागता मुनिश्रेष्ठाः कुन्त्या पूजिता धर्म्याः कथाश्चक्रुः । वान-

---

१. प्रतीहारी—'ऋषयो देवं सभाजयितुमागता' इति तर्कयामि । एत एव ऋषय 'कण्वशिष्यौ' इति ततः प्रविशन्ति गौतमी सहितौ शकुन्तलां पुरस्कृत्य कण्वशिष्यौ' इत्यादि वाक्ये रङ्गनिर्देशेन बोधितौ । अभिज्ञानशाकुन्तलस्य पञ्चमाङ्के । वैखानसस्य ऋषेः शिष्या आसन्निति तत्रैव प्रथमाङ्के ततः प्रविशत्यात्मना तृतीयो वैखानसः । वैखानसो दुष्यन्तं सूचयति—साधयामस्तावत् (सशिष्यो निष्क्रान्तः ।)

२. 'विखनस्' 'ब्रह्मन्' इति पर्यायौ । भागवते निगदितम्—

न खलु गोपिकानन्दनो भवानखिलदेहिनामन्तरात्मदृक् ।
विखनसार्थितो विश्वगुप्तये सख उदेयिवान् सात्वतां कुले ।। १०.३१.४

विखनसं ब्रह्माणं वेत्ति तपसेति वैखानसः । शब्दकल्पद्रुमे वानप्रस्थो वैखानसोऽग्रहः । देवीभागवते च—

वैखानसा ये मुनयो मिताहारा जितव्रताः ।
तेऽपि मुह्यन्ति संसारे जानन्तोऽपि ह्यसत्यताम् ।। १.१९.१७

३. आ० वा० पर्व २५.१२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रस्थानामुत्साहवर्धनाय[1] पूर्वेषां वानप्रस्थोचिततपोभिः सद्गतिं प्राप्नुवतां महात्मनां रमणीयेतिवृत्तं नारदोऽश्रावयत् ।[2]

अपरं च महाभारतयुगे वानप्रस्थस्य तपःस्वरूपं विदुरस्योदाहरणेन परिचीयते । तत्र विदुरस्य वानप्रस्थस्य विशेषाः सन्ति—तपो घोरं समास्थितः, वायुभक्षः, निराहारः कृशः, धमनिसन्ततः, जटी, वीटामुखः, कृशः, दिग्वासा, मलदिग्धाङ्गः, वनरेणुसमुक्षित इति ।[3] रामायणयुगे ते योगसमाहिता अपि बभूवुः ।[4]

वानप्रस्थो धृतराष्ट्रः स्वीये गङ्गाद्वाराश्रम एतादृशं तपः समारब्धवान् । तद्यथा—

आतस्थे स तपस्तीव्रं पिता तव तपोधनः ।
वीटां मुखे समाधाय वायुभक्षोऽभवन्मुनिः ॥
त्वगस्थिमात्रशेषः स षण्मासान् भवन्नृपः ॥ ४५.१२

वने स मुनिभिः सर्वैः पूज्यमानो महातपाः ।
त्वगस्थिमात्रशेषः स षण्मासानभवन्नृपः ॥ ४५.१३

गान्धारी तु जलाहारा कुन्ती मासोपवासिनी ।
संजयः षष्ठभक्तेन वर्तयामास भारत ॥ ४५.१४

अनिकेतोऽथ राजा स बभूव वनगोचरः ।
ते चापि सहिते देव्यौ संजयश्च तमन्वयुः ॥ ४५.१६

वानप्रस्था धृतराष्ट्रो गान्धारी, कुन्ती च वने तस्मिन् दावाग्निना दग्धाः ।[5]

पाण्डुः स्वीयां वानप्रस्थवृत्तिमधोविधमन्वीक्षते—

त्यक्तग्रामसुखाचारस्तप्यमानो महत्तपः ।
वल्कली फलमूलाशी चरिष्यामि महावने ॥ ३०

---

१. नारदस्य वृत्ताख्यानं श्रुत्वा शतयूपो समीक्षते स्म—
अहो भगवता श्रद्धा कुरुराजस्य वर्धिता ।
सर्वस्य च जनस्यास्य मम चैव महाद्युते ॥ २७.२

२. आश्रमवासिकपर्वणि २६ अध्यायतः ।

३. आश्रम वा० ३३.१५–१७

४. अरण्यकाण्डे ६.६

५. आश्रम वा० ४५.१९–३१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अग्निं जुह्वन्नुभौ कालावुभौ कालावुपस्पृशन् ।
कृशः परिमिताहारश्चीरचर्मजटाधरः ॥ ३१

शीतवातातपसहः क्षुत्पिपासाश्रमान्वितः ।
तपसा दुश्चरेणेदं शरीरमुपशोषयन् ॥ ३२

एकान्तशीली विमृशन् पक्वापक्वेन वर्तयन् ।
पितॄन् देवांश्च वन्येन वाग्भिरद्भिश्च तर्पयन् ॥ ३३

वानप्रस्थजनस्यापि दर्शनं कुलवासिनाम् ।
नाप्रियाण्याचरञ्जातु किं पुनर्ग्रामवासिनाम् ॥ ३४

एवमारण्यशास्त्राणामुग्रमुग्रतरं विधिम् ।
काङ्क्षमाणोऽहमासिष्ये देहस्यास्य समापनम् ॥ ३५
आदिपर्वणि ११० अध्यायतः

पूर्वोक्तैः सन्दर्भैः स्पष्टं प्रतीयते यत् क्षत्राणां मध्येऽपि महाभारतयुगे वानप्रस्थाश्रमः सुप्रिय आसीत् । एतस्याश्रमस्य परम्परा विश्रुता प्रावर्तत ।

ब्राह्मणानामभिरुचिर्वानप्रस्थाय नासील्लघीयसीति महाभारते तेषां बृहत्तरसूच्या प्रमाण्यते । भीष्मो युधिष्ठिरं प्रत्यबोधयत् शान्तिपर्वणि षट्त्रिंशदधिकद्विशततमेऽध्याये—

अस्मिन्नेव युगे तात विप्रैः सर्वार्थदर्शिभिः ।
अगस्त्यः सप्त ऋषयो मधुच्छन्दोऽघमर्षणः ॥ १६ ॥
सांकृतिः सुदिवा तण्डिर्यवान्नोऽथ कृतश्रमः ।
अहोवीर्यस्तथा काव्यस्ताण्ड्यो मेधातिथिर्बुधः ॥ १७ ॥

शलो वाकश्च निर्वाकिः शून्यपालः कृतश्रमः ।
एवं धर्मेषु विद्वांसस्ततः स्वर्गमुपागमन् ॥ १८ ॥
तात प्रत्यक्षधर्माणस्तथा यायावरा गणाः ।
ऋषीणामुग्रतपसां धर्मनैपुणदर्शिनाम् ॥ १९ ॥

अवाच्यापरिमेयाश्च ब्राह्मणा वनमाश्रिताः ।
वैखानसा बालखिल्याः सिकताश्च तथा परे ॥ २० ॥

कर्मभिस्ते निरानन्दा धर्मनित्या जितेन्द्रियाः ।
गताः प्रत्यक्षधर्माणस्ते सर्वे वनमाश्रिताः ॥ २१ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

बहुविधा आसंस्ते वानप्रस्थाः—यायावराः, वैखानसाः, वालखिल्याः, सैकता इत्यादयः।[1] यथा शरीरस्य सुखकराणि साधनानि असंख्येयानि सन्ति, तथैव शरीरस्य यावज्जीवं शोषणप्रक्रिया अपि वैविध्यं भजते। शोषणप्रक्रियानुसारेण तत्र सम्प्रदाया विकसिताः। सेयं शरीरशोषण-प्रक्रिया तु तपः।

इमे बहुविधा अपि वानप्रस्था विपत्तौ एकीभूय स्वरक्षार्थमुपायान् समाचेरुः।[2] विश्वामित्रस्ताटकाघातैः स्वीयं सिद्धाश्रमं रक्षितुं दशरथं रामं ययाचे।

महाभारतेऽनुशासनपर्वणि वानप्रस्थानां साधारणधर्मा उमा-महेश्वर-संवादेऽधोविधं वर्णिताः सन्ति—

संसिद्धैर्नियतैः सद्भिर्वनवासमुपागतैः।
वानप्रस्थैरिदं कर्म कर्तव्यं शृणु यादृशम्॥ १३०.५
त्रिकालमभिषेकार्थः पितृदेवार्चनं क्रिया।
अग्निहोत्रपरिस्पन्द इष्टिर्होमविधिस्तथा॥ १३०.६
नीवारग्रहणं चैव फलमूलनिषेवणम्।
इङ्गुदैरण्डतैलानां स्नेहार्थं च निषेवणम्॥ १३०.७
योगचर्याकृतैः सिद्धैः कामक्रोधविवर्जनम्।
वीरशय्यामुपासद्भिर्वीरस्थानोपसेविभिः॥ १३०.८

---

१. वानप्रस्थानां बहवो भेदा एतस्याश्रमस्य सूत्रयुगे विशेषप्रचारं द्योतयन्ति। बौधायनानुसारेण वानप्रस्थाः सन्ति—पचमानका अपचमानका। उभौ पञ्चभिदौ स्तः। तत्र पञ्च पचमानकाः सन्ति—सर्वारण्यकाः, वैतुषिकाः इत्यादयः। सर्वारण्यका पुनर्द्विभिदौ—इन्द्रावसिक्ताः, रेतोवसिक्ताः। अपचमानकाः सन्ति—उन्मज्जकाः, प्रवृत्ताशिनः मुखेनादायिनः, तोयाहाराः, वायुभक्षाः। बौ० ध० सू० ३.३

बृहत्पाराशरानुसारेण वानप्रस्थाः चतुर्भिदाः सन्ति—वैखानसाः, उदुम्बराः, वालखिल्याः, वनवासिनश्च। एकादशाध्यायतः। वैखानसानुसारेण सपत्नीका वानप्रस्थाश्चतुर्विधाः सन्ति—औदुम्बराः, वैरिञ्चाः, वालखिल्याः, फेनपाश्च। वैखानस ८.७। रामायणानुसारेणेतोऽप्यधिकविधा वानप्रस्था आसन्। तद्यथा—वैखानसाः, बालखिल्याः, सम्प्रक्षालाः, मरीचिपाः, अश्मकुट्टाः, शीर्णपर्णाशिनाः, पत्राहाराः, तापसाः, दन्तोलूखलिनः, उन्मज्जकाः, गात्रशय्याः, अशय्याः, अनवकाशिकाः, मुनयः, सलिलाहाराः, वायुभक्षाः, आकाशनिलयाः, स्थण्डिलशायिनः। ऊर्ध्ववासिनः, दान्तो, आर्द्रपटवासाः सजपाः, तपोनिष्ठाः, पञ्चतपोन्विताः।

२. अरण्यकाण्डे षष्ठे सर्गे। ३. वीरशय्या—विशिष्टं योगासनम्।

४. वीरस्थानं तु वीरासनमेव—
एकं पादमथैकस्मिन् विन्यस्योरौ तु संस्थितम्।
इतरस्मिंस्तथैवोरुं वीरासनमिति स्मृतम्॥ घेरण्ड-संहिता

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

युक्तैर्योगवहैः सद्भिर्ग्रीष्मे पञ्चातपैस्तथा ।
मण्डूकयोगनियतैर्यथान्यायनिषेविभिः ॥ १३०.९

वीरासनगतैर्नित्यं स्थण्डिले शयनैस्तथा ।
शीतयोगोऽग्नियोगश्च चर्तव्यो धर्मबुद्धिभिः ॥ १३०.१०

अब्भक्षैर्वायुभक्षैश्च शैवालोत्तरभोजनैः ।
अश्मकुट्टैस्तथा दान्तैः सम्प्रक्षालैस्तथापरैः ॥ १३०.११

चीरवल्कल-संवीतैर्मृगचर्मनिवासिभिः ।
कार्या यात्रा यथाकालं यथाधर्मं यथाविधि ॥ १३०.१२

वननित्यैर्वनचरैर्वनपैर्वनगोचरैः ।
वनं गुरुमिवासाद्य वस्तव्यं वनजीविभिः ॥ १३०.१३

तेषां होमक्रिया धर्मः पञ्चयज्ञनिषेवणम् ।
नागपञ्चमयज्ञस्य वेदोक्तस्यानुपालनम् ॥ १३०.१४

रामायणयुगीयवानप्रस्थतपःस्वरूपस्य प्रतिभासो मतङ्गकुलस्य ऋषीणां वर्णनाद् भवति । तद्यथा शबरी निवेदयति—

इह ते भावितात्मानो गुरवो मे महाद्युते ।
जुहवांचक्रिरे नीडं मन्त्रवन्मन्त्रपूजितम् ॥
इयं प्रत्यक्स्थली वेदी यत्र ते मे सुसत्कृताः ।
पुष्पोपहारं कुर्वन्ति श्रमादुद्वेपिभिः करैः ॥
कृताभिषेकैस्तैर्न्यस्ता वल्कलाः पादपेष्विह ।
देवकार्याणि कुर्वद्भिर्यानीमानि कृतानि वै ।
पुष्पैः कुवलयैः सार्धं म्लानत्वं न तु यान्ति वै ॥[1]

प्रायश ऋषयो जीवनं परित्यक्तुमनसोऽग्निदाहेन शरीरं परित्यज्य स्वर्गवासिनो बभूवुः । शबरी तु एवमेवेह लोकमत्यजत् ।[2]

कठोरव्रतचारिण आसन् त उपकिष्किन्धं सप्तजनमुनयः । यथा सुग्रीवो रामाय वर्णयति किष्किन्धाकाण्डे—

अत्र सप्तजना नाम मुनयः संशितव्रताः ।
सप्तैवासन्नधःशीर्षा नियतं जलशायिनः ॥ १३.१८
सप्तरात्रे कृताहारा वायुनाचलवासिनः ।
दिवं वर्षशतैर्याताः सप्तभिः सकलेवराः ॥ १३.१९

---

१. अरण्यकाण्डे ८४.२२–२७

२. अरण्यकाण्डे ७४.३२–३४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नवोढां कन्यामपि स्वपत्नीं कश्चिद्ऋषिस्तपोव्रतचारिणीमकरोदिति महाभारतेऽगस्त्यस्योदाहरणेन विभायते।[1] यथा कश्चिद् गृहस्थो यथावश्यकं विशेषज्ञानार्जनायोपनयनेन कतिपयवर्षाणि ब्रह्मचारी बभूव तथैव कश्चिद्वानप्रस्थो यथावश्यकमुपयमेन गृहस्थो यथेच्छमभवत्। तथासीद् विवाहितो युवभूतश्च्यवनः।[2]

आत्मविकासाय नवा ऋषयो वरिष्ठानां महर्षीणामुपासनया यथायोग्यं शिक्षामलभन्त। महाभारतानुसारेण महर्षिरगस्त्य ऋषिभिरुपास्यमान आसीत्।[3] वसिष्ठो भीष्ममध्यापयामास।[4] अध्यापनपरायणा आसन् ऋषयः।[5]

तपश्चरणकालेऽवरजनैः सह सम्भाषणं निषिद्धमासीदिति महाभारतीया कथा ऋषभर्षिमधिकृत्य प्रकटयति।[6] अत एव दुर्गमस्थली तपश्चरणायाभिनन्दितासीत् कतिपयतपस्विनो ह्रदे तपश्चेरुः। महाभारतानुसारेण महर्षिर्विभाण्डकः —

महाह्रदं समासाद्य काश्यपस्तपसि स्थितः॥ आरण्यके ११.१३

ब्रह्मर्षयो मनीषिणां पुरुषाग्रणीनां सभासदो बभूवुः। तद्यथा महाभारते शान्तिपर्वणि —

यस्य ब्रह्मर्षयः पुण्या नित्यमासन् सभासदः।
यस्य नाविदितं किंचिज्ज्ञानज्ञेयेषु विद्यते॥ ३८.१५

कालिदासस्य महामुनिस्तपस्वी कश्यपोऽभिज्ञाने—

वाल्मीकाग्रनिमग्नमूर्तिरुरसा सन्दष्टसर्पत्वचा
कण्ठे जीर्णलताप्रतानवलये नात्यर्थसंपीडितः।

---

१. ततश्चीराणि जग्राह वल्कलान्यजिनानि च।
समानव्रतचर्या च बभूवायतलोचना॥ ९५.१५

२. सुकन्यया सहारण्ये विजहारानुरक्तया। आर० १२५.१०

३. तत्रापश्यन् महात्मानं वारुणिं दीप्ततेजसम्।
उपास्यमान ऋषिभिर्देवैरिव पितामहम्॥ आर० १०१.१२

४. वेदानधिजगे साङ्गान् वसिष्ठादेव वीर्यवान्। आदि० ९४.३२

५. महर्षिश्च्यवनोऽपि भीष्ममध्यापयामास। शान्ति० ३८.११। मारकण्डेयर्षिर्भीष्मस्य गुरुरासीत्। शान्ति० ३८.१३ अगस्त्योऽग्निवेशं धनुर्वेदं शिक्षयामास। आदि० १३८.९ (गीताप्रेस-संस्करणे)

६. आरण्यकपर्वणि १०९.६–१०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अंशव्यापि शकुन्तनीडनिचितं बिभ्रज्जटामण्डलं
यत्र स्थाणुरिवाचलो मुनिरसावभ्यर्कबिम्बं स्थितः ।।

अयं मुनिर्दाक्षायणीमुपदिशति स्म ।[1]

बाणः प्रातिभचक्षुषात्मदृष्टां महातपस्विनो जाबालेर्भाषां प्रस्तौति स्म। तद्यथा – महर्षौ रक्ताशोकतरोरधश्छायायामुपविष्ट आसीत् । तं परितो वैतानिकवह्नयः प्रजज्वलुः । तस्य चतुर्दिशं महर्षयः परिवृता आसन् । जटाभिरलङ्कृतस्तिलकेन शोभितः, भस्मधवलया धवलीकृतविग्रहः, अतिकृशः रुद्राक्षमालामावर्तयन्, वल्कलधारी स्फटिककमण्डलुना शोभमानः, अचलवत् स्थिरः, सागरवद् गम्भीरः, सूर्यवत् तेजस्वी, चन्द्रवत् सौम्यः प्रियसत्यव्रतः, दीनानाथशरणदः भस्मपाण्डुरोमाश्लिष्टशरीर आसीज्जाबालिः ।[2]

शास्त्रीय-विधानम्

वानप्रस्थानां जीवनविधिः सूत्र-स्मृति-ग्रन्थेषु विनिवेदितोऽस्ति । तद्यथा प्रथमं तावत् वानप्रस्थैर्गृहस्थवत् नित्यं पञ्चमहायज्ञाः सम्पादनीयाः । पत्नीं सहचरीं कृत्वा कश्चिद् वानप्रस्थस्तत्र वस्तुमनुमतः । विकल्पेन पुत्रस्य समाश्रये पत्नी रक्षणीया बभूव । तत्र यथासाध्यद्रव्यैः स नित्यं पञ्चमहायज्ञान् सम्पादयति स्म । तानि प्रयोज्यानि सर्वाणि द्रव्याणि एकान्ततो वनभूमित एव प्राप्याणि बभूवुः । वनप्रदेशाद् बहिर्गन्तुं स नानुमतः । नीवारादिवनजधान्यानि, पत्रपुष्पमूलफलानि च तस्यातिथि-देवपितृणामन्नं बभूवुः । स्वयमपि तान्येव सोऽभुक्त । स्वभोज्यार्थं स्वयमेव स लवणं निर्मितवान् ।[3]

प्रातः मध्याह्ने सायं स्नातः सोऽजिनपत्रवल्कलादयो शीर्णवस्त्राणि वा पर्यधात् । तस्य नखकेशादयो न कृत्ताः ।[4] स शरीरस्य सौन्दर्य-स्वास्थ्यादि-

---

१. दाक्षायण्या पतिव्रताधर्ममधिकृत्य पृष्टस्तस्यै महर्षिपत्नीसहितायै कथयति । अभिज्ञानशाकुन्तले ७.१२/१३

२. कादम्बरी पृ० ९०-९५ छाया ।

३. देवताभ्यस्तु तद्धुत्वा वन्यं मेध्यतरं हविः ।
शेषमात्मनि युञ्जीत लवणं च स्वयं कृतम् । मनु० ६.१२

४. वसीत चर्म चीरं वा सायं स्नायात् प्रगे तथा ।
जटाश्च बिभृयान्नित्यं श्मश्रुलोमनखानि च ।। मनु० ६.६
स्त्रीणां तेषां वानप्रस्थानां परिधानं भवतु नामापवादरूपं किन्तु सप्रसङ्गं प्रतिभाति महाभारते वर्णितम्—
मायूरजीर्णपर्णानां वस्त्रं तस्याश्च वर्णितम् ।। शान्ति० २६४.७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विषये सर्वथा निरपेक्षो लोकहितैकमानसः संयमधनो बभूव ।[1]

जीवनं प्रति नितान्तनिरपेक्षो वानप्रस्थः स्वभोजनं कालक्रमेण न्यूनाति-न्यूनतरं कुर्यात् कतिपयदिवसानन्तरं च खादेत् । अन्ततः स केवलं वायुना जलेन च प्राणधारणं कुर्यात् । द्रव्यसंग्रहं स्वल्पातिस्वल्पं कुर्यात् । एकदिनस्य द्विनद्वयस्य, मासस्य, वर्षस्य वावश्यकतार्थं स संगृहीतेन द्रव्येण कार्यजातं सम्पादयेत् । वर्षान्ते सर्वसंग्रहराशिं प्रक्षिप्याभिनवजीवनयात्रां प्रारभेत ।[2]

वानप्रस्थः किं किं न खादेदिति मनुना नियमितम्—

वर्जयेन्मधुमांसं च भीमानि कवकानि च ।
भूस्तृणं शिग्रुकं चैव श्लेष्मातकफलानि च ॥ ६.१४

स वर्षाग्रीष्मशिशिरादीनामृतूनां वैषम्यं प्रगुणीकृत्य सहेत ।[3] दुःखसहं हि स्वशरीरं तेन कर्तव्यमासीत् ।

आवासार्थं कुटीरं भवतु नाम पर्णादिभिः कृतं तपःसाधनायाः प्रारम्भिकावस्थायां किन्तु कालानन्तरं वृक्षाध एव वानप्रस्थो वसतिं कुर्यात् ।[4] रात्रौ स्थण्डिले शयीत, दिवा च योगाभ्याससमाधिभिरात्मक्रीडः स्यात् ।[5] वानप्रस्थस्य परा विद्या सर्वातिशयमभीष्टं भवति । एतदर्थं मनुना निर्दिष्टम्—विविधाश्चौपनिषदीरात्मसंसिद्धये श्रुतीः ।

वानप्रस्थानां भेदाः

महाभारते नैककोटिका ऋषयो लक्षिताः सन्ति । तथाहि फेनपाः —

उञ्छन्ति सततं तस्मिन् ब्राह्मं फेनोत्करं शुभम् ।
अमृतं ब्रह्मणा पीतं मधुरं प्रसृतं दिवि ॥ अनु० १२९.३६

वालखिल्याः —

वालखिल्यास्तपःसिद्धा मुनयः सूर्यमण्डले ।
उञ्छमुञ्छन्ति धर्मज्ञाः शाकुनीं वृत्तिमास्थिताः ॥ १२९.३९

---

१. स्वाध्याये नित्ययुक्तः स्याद्दान्तो मैत्रः समाहितः ।
दाता नित्यमनादाता सर्वभूतानुकम्पकः ॥ मनु ६.८

२. मनुस्मृति ६.१९, २१,३१; ६.१५

३. मनु० ६.२३, २४

४. वृक्षमूलनिकेतन ऊर्ध्वं षड्भ्यो मासेभ्योऽनग्निरनिकेतः । वसिष्ठ ९.११ ।

५. अप्रयत्नः सुखार्थेषु ब्रह्मचारी धराशयः ।
शरणेष्वममश्चैव वृक्षमूलनिकेतनः ॥ मनु० ६.२६ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मृगनिर्मोकवसनाश्चीरवल्कलवाससः ।
निर्द्वन्द्वाः सत्पथं प्राप्ता वालखिल्यास्तपोधनाः ॥ १२९.४०
अङ्गुष्ठपर्वमात्रास्ते स्वेष्वङ्गेषु व्यवस्थिताः ।
तपश्चरणमीहन्ते तेषां धर्मफलं महत् ॥ १२९.४१

चक्रचरादयः

ये त्वन्ये शुद्धमनसो दयाधर्मपरायणाः ।
पितृलोकसमीपस्थास्त उञ्छन्ति यथाविधि ॥
सम्प्रक्षालाश्मकुट्टाश्च दन्तोलूखलिनस्तथा ॥ १२९.४४
उञ्छन्ति ये समीपस्थाः स्वभावनियतेन्द्रियाः ॥ १२९.४५
तेषामग्निपरिष्यन्दः पितृदेवार्चनं तथा ।
यज्ञानां चापि पञ्चानां यजनं धर्म उच्यते ॥ १२९.४६

उदवासाः

उदासास्तपस्विनो नित्यं जले निमग्ना कठोरव्रतं साधयन्ति स्म । एतादृशेषु तपस्विषु च्यवनो विश्रुत एव । असाधारणं प्रतिभाति महामुनेश्च्यवनस्योदवासतपः । स महर्षिर्द्वादशवर्षाणि गङ्गा-यमुनयोर्मध्ये जलवासे धृतव्रतो बभूव —

अन्तर्जले स सुष्वाप काष्ठभूतो महामुनिः ।
ततश्चोर्ध्वस्थितो धीमानभवद् भरतर्षभ ॥
जलौकसां च सत्त्वानां बभूव प्रियदर्शनः ।
उपाजिघ्रन्त च तदा मत्स्यास्तं हृष्टमानसाः ॥

एकदा स मत्स्यग्राहिभिर्निषादैर्जाले मत्स्यैः सह गृहीतो जलाद् बहिष्कृतश्च । तस्य रूपं महाभारते वर्णितम् —

नदीशैवलदिग्धाङ्गं हरिश्मश्रुजटाधरम् ।
लग्नैः शङ्खगणैर्गात्रैः कोष्ठैश्चित्रैरिवावृतम् ॥ अनु० ५० १९

यज्ञो याजनं च

वानप्रस्था अपि ऋषयो स्वीयकर्तव्यमिति स्वयमेवात्मार्थं यज्ञमयजन्त,[1] अन्येषां राजादीनां कृतेऽपि तेऽयाजयन् । वैदिकसाहित्ये ऋषीणां यज्ञचर्या नैकश उल्लिखिता । रामायणे विश्वामित्रस्य यज्ञस्य राक्षसैर्विहतस्य रामेण संरक्षणं प्रसिद्धमेवाख्यानकम् । सोऽयं विश्वामित्रः त्रिशङ्कवेऽयाजयदिति रामायणस्य बालकाण्डे सविस्तरं वर्णितम् । महाभारतानुसारेण

१. आरण्यकपर्वणि १२९.१४; ११४.६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विश्वामित्र उत्प्लावने स्वपुत्रैः सहायजत ।[1] व्यासस्तु मिथिलेश्वरस्य जनकस्य याजको बभूव ।[2]

वसिष्ठः संवरणाय यज्ञद्वारेण सम्राट्पदं निर्जितवान् ।[3] अयमृषिर्मुचकुन्दस्य पुरोहितोऽभवत् ।[4] अगस्त्यो द्वादशवार्षिकं यज्ञं समाचरत् ।[5] च्यवनः शर्यातये याजयामास ।[6] ऋष्यश्रृङ्गो लोमपादायायाजयत् । महर्षिर्याज्ञवल्क्यः युधिष्ठिरस्य राजसूयेऽध्वर्युर्बभूव[7] । महाभारतानुसारेण दुर्वासाः श्वेतकयेऽयाजयत् ।[8]

महाभारतानुसारेणोपरिचर इति ख्यातो राजा बृहस्पतेः शिष्यो बभूव । तस्य महाराजस्याश्वमेधयज्ञे प्रजापतेः पुत्रा ऋषित्रयम्[9], षोडशान्ये ऋषयश्च सदस्या अभवन् ।[10]

प्रवृत्ति-निवृत्तिमार्गौ

प्रवृत्तिमार्गस्तु वैदिककर्मकाण्डफलप्राप्ताभ्युदयानां देवानां तेषामुपाश्रितानामृषीणां चास्ति । महाभारतानुसारेण—

याः क्रियाः प्रचरिष्यन्ति प्रवृत्तिफलसत्कृताः ।
ताभिराप्यायितबला-(देवा-) लोकान् वै धारयिष्यथ ।।
शान्तिप० ३२७.५७; ३४०.६४, ६५

प्रवृत्तिमार्गस्याधिष्ठातार आद्या ऋषयः सन्ति—मरीचिः, अङ्गिराः, अत्रिः, पुलस्त्यः, पुलहः, क्रतुः, वसिष्ठश्चः ।[11] तथाहि—

एते वेदविदो मुख्या वेदाचार्याश्च कल्पिताः ।
प्रवृत्तिधर्मिणश्चैव प्राजापत्येन कल्पिताः ।। शान्ति० ३२७.६२

---

१. याजकश्च महातेजा विश्वामित्रोऽभवत् कृती । ६०.९
विश्वामित्रेण बहवो यज्ञा अन्येषां कृते निष्पादिताः । स मतङ्गर्षेर्यज्ञं सम्पादितवान् । आदि० ७१.२७–२५

२. आर० ८७.१५

३. आदिप० ८९

४. शान्ति० ४७.५,६

५. आश्वमेधिकपर्व० ९५.५–१०

६. आर० प० १२४.४-८

७. सभा० ३०.३५

७. शान्तिप० ३१२.१०, ११; ३१३.१०

८. आदि० २२२.५३–६२ (गीताप्रेस संस्करणे)

९. एकतः, द्वितः, त्रितश्चेति महर्षयः । शा० ३२३.६

१०. एतेषु प्रमुखा रैभ्यः, मेधातिथिः, ताण्डचः, कपिलः, तैत्तिरिः, कण्वश्चासन् । शान्तिप० ३२३.७–९

११. शान्तिपर्व ३५७.६१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अपरथा सन्ति निवृत्तिमार्गस्य ऋषयः —

सनः, सनत्सुजातश्च सनकः ससनन्दनः ।
सनत्कुमारः कपिलः सप्तमश्च सनातनः ।। शा० ३२७.६४
त एते सप्त स्वयमागतविज्ञाना निवृत्तं धर्ममास्थिताः ।
एते योगविदो मुख्याः सांख्यधर्मविदस्तथा ।
आचार्या मोक्षशास्त्रे च मोक्षधर्मप्रवर्तकाः ।। शा० ३२७.६६,६७

एते मौलिकब्रह्मवादिन ऋषयो ब्राह्मणाः सन्ति येषां विषये नैकस्थलेषु प्राचीनसाहित्ये वर्णितमेव यत् ते परिव्राजकाः, श्रमणाः, योगिनश्च सन्ति ।[1]

एतेभ्यो बहुशो भिन्ना एव वैदिकसप्तर्षयः —भरद्वाजः, कश्यपः, गोतमः, अत्रिः, विश्वामित्रः, जमदग्निः, वसिष्ठश्च ऋग्वेदे १०.१३७ सूक्तस्य द्रष्टारः ।

एतेषां विषये लुडविग-महोदयो निर्दिशति—The seven Ṛṣis here are not the Aṅgiras but Bhāradvāja, Kaśyapa, Gotama, Atri, Vasiṣṭha, Viśvāmitra and Jamadagni. The knowledge of the ritual is derived from the divine priests.[2]

प्रवृत्तिमार्गीया ऋषयोऽथर्ववेदे विस्पष्टीकृताः सन्ति । अथर्वेति ख्यातो ब्रह्मवादी निवृत्तिमार्गीयो मुनिः स्वीयां ब्रह्मनिष्ठामधोविधं वर्णयति—

इन्द्रस्य गृहोऽसि । तं त्वा प्रपद्ये, तं त्वा प्रविशामि ।
सर्वगुः सर्वपूरुषः सर्वात्मा सर्वतनूः सह यन्मेऽस्ति तेन ।। ५.६.११

सोऽयमृषिरिन्द्रं प्रार्थयते—

तं त्वा प्रापद्ये तं त्वा प्रविशामि सर्वगुः सर्वपुरुषः ।
सर्वात्मा सर्व तनूः सह यन्मेऽस्ति तेन । अथर्व० ५.६.१४

कौटुम्बिकजीवनम्

सर्वस्वं परित्यज्यान्यत्र वासस्य रीतिर्वैदिकसंहितायुगे विरल-विरलं प्रचलिता बभूव । तद्यथाथर्ववेदे वर्णितम्—

ये त आसन् दश जाता देवा देवेभ्यः पुरा ।
पुत्रेभ्यो लोकं दत्त्वा कस्मिंस्ते लोक आसते ।। ११.८.१०

---

१. बृहदारण्यक० ३.५.१; महाभारते शा० ३०९.२२; २३७.११–१४, २२-२४; धम्मपदे २६.४; ३६.५; १३.३६; २६.३९ । सुत्तनिपाते ब्राह्मणधम्मिक सुत्ते १-१२ । दीधनिकाये २.६.४ महागोविन्दजातके सनत्कुमारो महाब्रह्मा स्वयं महागोविन्द-नामकं ब्राह्मणं संन्यास-पथमुपदिशति । कथं नामामृतो लोको प्राप्यत इति ।

2. Footnote P. 634 of the Hymns of the Ṛgveda by Griffith.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रथमस्तावद् वानप्रस्थो महातपस्वी कश्यप एव पत्न्या सह हेमकूटपर्वते ऽतपस्यत् । तद्यथा कालिदासेन निभालितम्—

स्वायंभुवान्मरीचेर्यः प्रबभूव प्रजापतिः ।
सुरासुरगुरुः सोऽत्र सपत्नीकः तपस्यति ॥ अभि० ७.९

वनवासिनां महर्षीणां कौटुम्बिकमपि जीवनमनाविलं तपःसाधनाफल-समायुक्तं च विलसत्येव । वसिष्ठः[१], अगस्त्यः[२], विश्वामित्रः[३], च्यवनः[४], जमदग्निः[५], ऋचीकः[६], अत्रिः[७], विभाण्डकः[८], ऋष्यशृङ्गः[९], कहोडः[१०], अष्टावक्रः[११],

---

१. वसिष्ठस्य पत्नी अरुन्धती बभूव । स इक्ष्वाकुवंशीयानां राज्ञां कुलपुरोहितो बभूव । पुरुवंशीय-संवरणं स स्वयज्ञोपस्थानेन सम्राट्पदेऽध्यासितवान् । आदि-प० ८९.३४–४१ । तस्य पुत्रवधूरदृश्यन्ती बभूव । वसिष्ठस्य शतपुत्रा आसन् । ते विश्वामित्रेण मारिताः । आदि० १६४.७–९ । रघुवंशे वसिष्ठाश्रमे ऋषिपत्नीनां मुनि-कन्यानां च वर्णनं १.५०, ५१ श्लोकयो रस्ति ।

२. अगस्त्यः पितॄणामुद्धारार्थं निवेशार्थी बभूव । आरण्यकप० ९५.१–२ ।

प्राप्य भार्यामगस्त्यस्तु लोपामुद्रामभाषत ।
महार्हाण्युत्सृजैतानि वासांस्याभरणानि च ॥ ९५.८
समानव्रतचर्या च बभूवायतलोचना ॥ ९५.१०
श्रिया रूपेण च प्रीतो मैथुनायाजुहाव ताम् ॥ ९५.१४

लोपामुद्रा तस्मै दृढस्युरिति ख्यातं पुत्ररत्नमजीजनत् । आरण्यकपर्वणि ९७.२३

३. विश्वामित्रो मेनकां गान्धर्वविवाहेनाभिगम्य शकुन्तलां जनयामास । माधवीगर्भात् सोऽष्टकनामकं पुत्रं लब्धवान् । विश्वामित्रस्य पुत्रशतं जातमिति महाभारते निगदितम्—विश्वामित्रात्मजाः सर्वे मुनयो ब्रह्मवादिनः । अनु० ४.५८

४-६. ऋषेः च्यवनस्य पत्नी सुकन्या प्रमतिं सुषुवे । आर० १२२.२०–२५
च्यवन-पुत्र ऋचीको निवेशार्थी गाधेः कन्यां सत्यवतीमूढवान् । आर० ११५.१७
तस्य पुत्रो जमदग्निः ऋषिस्तस्य पुत्रः परशुरामश्च बभूव । आर० ११६.४

७. रामायणस्यायोध्याकाण्डस्य ११७ सर्गेऽत्रेर्ऋषेः पत्नी अनसूया तपस्विनी बभूव ।

८-९. विभाण्डकर्षेः पुत्र ऋष्यशृङ्गः बभूव । अरण्यकाण्डे ११०.२३
स पित्रा सह न्यवसत् । वेश्यया प्रलोभितः ऋष्यश्रृङ्गः चम्पां गतो लोमपादराजकन्यया शान्तया पुत्रोत्पत्तिं यावत् सम्बद्ध आसीत् । अरण्य० ११३.६–२१

१०-११. कहोडो महर्षिर्बभूव । तस्य पुत्रोऽष्टावक्रो महर्षिः पत्नी सुजाता च कुटुम्बे न्यवसन् । आरण्यकपर्व १३२.७–९ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पुलस्त्यः[१], गोतमः[२], याज्ञवल्क्यः[३], विश्रवाः[४] इत्यादयो वनवासिनोऽपि मुनयः सपत्नीका आसन्। कतिपमुनयस्तपःसाधनाभिः सह कौटुम्बिक-संवर्धनं च कर्तुकामा राज्ञां कृते याजयन्ति स्म, तान् गार्हस्थ्यार्थं धनराशिं याचन्ते स्म अथच पत्नीं तपस्विनीं कृत्वा तस्याः परिचर्यया परितोषमलभन्त।

नृपतिर्मरुत्तोऽङ्गिरसे मदिराश्वो हिरण्याय च स्वकन्यका ददतुः।[५]

बाणभट्टानुसारेण जाबालिमहर्षेः कुमारो हारीतस्तस्याश्रमेऽवसत्। अन्येषामपि मुनीनां तत्र कुमारास्तापसाश्रमे प्रतिवसन्ति स्म।[६] इमे सर्वे मुनिकुमारका ब्रह्मचारिण आसन्। आश्रमे तस्मिन् मुनिकुमारिका अपि न्यवसन्।[७] अन्यत्र बाणभट्टो गृहधर्मिमुनीन् स्वसमकालिकान् वर्णयति।[८]

कुटुम्बवासिनां वानप्रस्थानां जीवनविधिर्महाभारत उमा-महेश्वर-संवादेऽधोविधं वर्णितः—

स्वैरिणस्तापसा देवि सर्वे दारविहारिणः।
तेषां मौण्ड्यं कषायश्च वासरात्रिश्च कारणम्॥ अनु० १३०.२२
ये च दम्पतिधर्माणः स्वदारनियतेन्द्रियाः।
चरन्ति विधिदृष्टं तदृतुकालाभिगामिनः॥ १३०.२५

रामायणे माण्डकर्णिर्महातपस्वी पञ्चाप्सरसां पतीभूय शाश्वतकामसुख-मनुबभूवेति वर्णितमधोविधम् —

तत्रैवाप्सरसः पञ्च निवसन्त्यो यथासुखम्।
रमयन्ति तपोयोगान्मुनिं यौवनमास्थितम्॥ अरण्य० ११.१८

---

१. पुलस्त्यस्य सन्ततिरस्ति राक्षसाः, वानराः, किन्नराः, यक्षादयश्च। तस्य पत्नी आसीत् गौरिति आदि० ६०.७। तस्य पुत्र आसीत् कुबेरः। विश्रवास्तस्य पुत्रो बभूव। आर० २७४.१२

२. गौतमस्य महर्षेः पत्नी अहल्या बभूव। तस्यान्यतमः पुत्रश्चिरकारी आसीत्। शान्तिपर्वणि २५८.७

३. याज्ञवल्क्यस्य पत्नीद्वयं मैत्रेयी, कात्यायनी च बभूवतुः। स संन्यासग्रहणात् प्राक् ताभ्यां स्वापतेयं संविभज्य गार्हस्थ्यबन्धनाद् विमुक्तोऽभवत्।

४. महर्षेर्विश्रवसो नव पत्नश्च आसन्। रावणादयः बहवस्तस्य सन्ततयः प्रसिद्धा एव।

५. शान्तिपर्वणि २२६.२८,३४।

६. तत्तनयश्च हारीतनामा मुनिकुमारकः सवयोभिरपरैस्तपोधनकुमारकैरनु-गम्यमानः। कादम्बरी, पृ० ७८

७. कादम्बरी, पृष्ठ ९०

८. तस्मादेव वंशाद् वात्स्यायना गृहधर्मिणो मुनयः समजायन्त। हर्षचरितस्य प्रथमोच्छ्वासे।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

परवर्तिवानप्रस्थाश्रमिणां पत्नीभिः सहवासः सन्ततिप्रचयश्च सर्वथा निषिद्धा इति धर्मशास्त्रस्मृतिषु नियमितम् ।

पर्णशाला

कतिपयवानप्रस्थानां पर्णशालास्तैः स्वयमेव कृता रमणीयवनप्रदेशे व्यराजन्त । एतादृशी पर्णशाला लक्ष्मणेन रामाय निर्मिता । तद्यथा—

पर्णशालां सुविपुलां तत्र संघातमृत्तिकाम् ।
सुस्तम्भां मरुकरैर्दीर्घैः कृतवंशां सुशोभनाम् ॥
शमीशाखाभिरास्तीर्यं दृढपाशावपाशिताम् ।
कुशकाशशरैः पर्णैः सुपरिच्छादितां तथा ॥
समीकृततलां रम्यां चकार सुमहाबलः ॥ अरण्य० १५.२१-२३

प्राय आश्रमा जनौघपरिहीन-शृङ्गोच्चयेषु रमणीयवन्यजनपदेषु नदी-तटसङ्गमावकाशेषु, पर्वतोपत्यकासु सुपर्णकुसुमफलसुरभिवृक्षलतासम्भृता-टवीषु पशुपक्षि-सञ्चारभूमिषु निरातङ्कनिरीतिजनान्तेषु कृताः शोभन्ते स्म । तत्र शारीरिकमानसिकबौद्धिकस्वास्थ्यं निसर्गेण प्रदत्तमासीदेव । सुभद्रवट उपसमुद्रं बहूनां वालखिल्यवैखानसादीनां शरणमेव संशोभते स्म ।

परवर्तियुगे तपस्यार्थं वनस्यावश्यकता नास्तीति मत्वा केचित्तपस्विनो मठादिषु वसन्ति स्म । ते मठास्तु क्वचित् राजप्रासादैस्तुल्या बभूवुः । कल्हणानुसारेण काश्मीराणां राज्ञोऽवन्तिवर्मणो मन्त्री शूरः तपस्विनां कृते स्वप्रासादसमानं मठं निर्मितवान् ।

तपःस्वरूपं योगश्च

ऋतं, सत्यं, श्रुतं, शान्तं, दमः, शमः, दानं, यज्ञः, ब्रह्मादीनि तपः ।[1]

१. तै० आ० १०.८ । तपो वैदिकसंस्कृतावादिकालतः सर्वविधसर्जनापेक्षितशक्ति-समुद्भवरूपेणाभ्यस्यतेस्म । तथाहि—तपसस्तन्महिनाजायतैकम् । ऋग्वेदे १०.१२९.३ । सप्तर्षयस्तपसे ये निषेदुः । ऋ० १०.१०९..४ । तपः पृथिवीं धारयतीति अथर्व० १२.१.१७ । तां वृहस्पतिराङ्गिरसोऽध्योक् । तां ब्रह्म च तपश्च सप्त ऋषय उपजीवन्ति । अथर्व० ८.१०.४,१६ । स आचार्यं तपसा पिपर्ति । सर्वान्त्स देवान् तपसा पिपर्ति । लोकांस्तपसा पिपर्ति । ब्रह्मचारी तपसोदतिष्ठत् । ते रक्षति तपसा ब्रह्मचारी ताना । तिष्ठति तपसा ब्रह्मचारी । तपसा राजा राष्ट्रं विरक्षति । अथर्व ११.५ । तपसा यज्ञेनेव सिद्धिर्लभ्या । अथर्व० १२.१.३९ । तपसा देवा मृत्युमुपाघ्नत । सलिलस्य पृष्ठे तपोऽतिष्ठत् तप्यमानः समुद्रे । अथर्व० ११.५ सूक्तात् । तपोभिरेव देवानां देवत्वं सिद्धम् । तै० ब्रा० ३.१२.१३.१ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मूलतस्तप इन्द्रियाणां मनसश्च तेषां विषयेभ्यो विनिवर्तनमेव, यथा महाभारते निदर्शितम्—

इन्द्रियाणीन्द्रियार्थेभ्यः प्रियेभ्यः सन्निवर्त्य सः ।
क्षुत्पिपासातपसहः कृशो धमनिसन्ततः ।

एतस्मात् सरलरूपात् प्राभवदुग्रं वा, दारुणं वा तपो यस्मिन् शरीरस्य दुस्सह-संतापनेन दुःस्थितिरभवदेव ।

तपसः सौम्यतमं दिव्यस्वरूपं योगेन सम्पृक्तं भवतीति कृष्णद्वैपायनस्याधोविधं निदर्शनेन प्रस्फुटति —

तत्र दिव्यं तपस्तेपे कृष्णद्वैपायनः प्रभुः ।
योगेनात्मानमाविश्य योगधर्मपरायणः
धारयन् स तपस्तेपे पुत्रार्थं कुरुसत्तम ।। शान्ति० ३१०.१३

अत्र तपोयोगयोः सन्निपातः काम्याभिप्राय-सिद्धयर्थं प्रकल्पितः ।

तथापि तपसो महत्तरो योग इत्यलर्कस्योदाहरणेन प्रस्फुटति । घोरतपसापीन्द्रियादीनां नियमनमसम्भवं विज्ञाय—

स एकाग्रं मनः कृत्वा निश्चलो योगमास्थितः ।
इन्द्रियाणि जघानाशु बाणेनैकेन वीर्यवान् ।
योगेनात्मानमाविश्य सिद्धिं परमिकां गतः ।। आश्व० ३०.२८

युधिष्ठिरोऽपि तपःसिद्धयर्थम्—

योगमास्थाय धर्मात्मा वायुभक्षी जितेन्द्रियः ।
गाङ्ग्यं वार्युपस्पृश्य प्राणायामेन तस्थिवान् ।। आर० ३.१४

अपरं च स्वस्वाधिकारनियोग-विचिकित्सूनां लोकहितार्थिनां पूर्वेषामृषीणां लोकतन्त्रपरिग्रह-जिज्ञासोर्ब्रह्मणश्च महानियम इति ख्याता तपश्चर्याधोविधा लोकसाक्षिणो भगवतो नारायणस्य सविधे प्रत्यपद्यत—

ते तपः समुपातिष्ठन् ब्रह्मोक्तं वेदकल्पितम् ।
स महानियमो नाम तपश्चर्या सुदारुणा ।। शा० ३८७.४०
ऊर्ध्वदृष्टिर्बाहवश्च एकाग्रं च मनोऽभवत् ।
एकपादस्थिताः सम्यक् काष्ठभूताः समाहिताः ।। ३८७.४१
दिव्यं वर्षसहस्रं ते तपस्तप्त्वा तदुत्तमम् ।
शुश्रुवुर्मधुरां वाणीं वेदवेदाङ्गभूषिताम् ।। शा० ३८७.४२

शङ्कराचार्यः कदाचन तपः सरलतरं विवृणोति । तथाहि—तपः स्वाश्रम-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विहितं कर्म ।[1]

ऋषीणां मनीषया तपः सीमातिगं परिकल्पितं प्रतिभाति । तथाहि व्याधिनापि तपः, प्रेतस्याहरणं तपः इत्यादि ।[2]

मनोर्महातपो महाभारते घोरमितिवर्णितमधोविधम्—

ऊर्ध्वबाहुर्विशालायां बदर्यां स नराधिपः ।
एकपादस्थितस्तीव्रं चचार सुमहत्तपः ॥
अवाक्शिरा[3]स्तथा चापि नेत्रैरनिमिषैर्दृढम् ।
सोऽतप्यत तपो घोरं वर्षाणामयुतं तदा ॥

आरण्यकपर्वणि १४५.४.५

तपस्तु नैकविधं समुद्दिष्टं दृश्यते पुराणेतिहासेषु । काम्यवृत्तिकमुग्रं घोरतरं तीव्रतमं च तपो भवतु नाम, किन्तु योगपथप्रवर्तकं तपस्तु इन्द्रियाणां सन्धारणं, नियमनं, निग्रहो वा भवति । विषयाणां प्रवाहे यस्य मन इन्द्रियाणि चापनीयन्ते, स तु भोगासक्तोऽधोऽधः पतति, व्यसनापन्नो भवति च । परब्रह्मणः स्वात्मनि दर्शनाय इन्द्रियाणां नितान्तावश्यकव्यापारो भवत्येव । महाभारत इन्द्रियाणामीदृशं प्रयोजनमधोविधं स्पष्टीकृतम्—

इन्द्रियाण्येव तत्सर्वं यत्स्वर्गनरकावुभौ ।
निगृहीतविसृष्टानि स्वर्गाय नरकाय च ॥
एष योगविधिः कृत्स्नो यावदिन्द्रियधारणम् ।
एतन्मूलं हि तपसः कृत्स्नस्य नरकस्य च ॥
इन्द्रियाणां प्रसङ्गेन दोषमृच्छत्यसंशयम् ।
संनियम्य तु तान्येव ततः सिद्धिमवाप्नुते ॥
रथः शरीरं पुरुषस्य दृष्ट —
मात्मा नियन्तेन्द्रियाण्याहुरश्वान् ।
तैरप्रमत्तः कुशली सदश्वै —
र्दान्तैः सुखं याति रथीव धीरः ॥

आरण्यकपर्वणि २०२.१७–१९,२१

---

१. मुण्डकोपनिषदि १.२.११ अधिकृत्य शाङ्करभाष्यम् । मनुरपि तपसः सरलं रूपम् निर्दिशति । तद्यथा—

ब्राह्मणस्य तपो ज्ञानं तपः क्षत्रस्य रक्षणम् ।
वैश्यस्य तपो वार्ता तपः शूद्रस्य सेवनम् ॥ १२.२३५

२. बृहदारण्यके ५.११.१

३. शिरोऽधोभूतं यथा स्यात्तथा । अन्यत्र—अधः शीर्षा इति अवाक्शिरसः । रामायणे किष्किन्धाकाण्डे १३.१८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तपस्तु पूर्वोक्तैः सन्दर्भैर्द्विविधं प्रतिभाति—उग्रम्, मृदु च[1]। उग्रं तपः शारीरिककष्टनिर्भरं दुःसहं प्रभवति,[2] मृदु च मानसिकवृत्तीनामिन्द्रियाणां च सम्यङ्नियमनप्रयासः सत्त्वोचितो मधुमत्तां व्यनक्ति।[3] गीतायां सात्त्विकं राजसं, तामसं च तपः समुदाहृतम्। एतस्मिन् त्रये तामसं तपस्तूग्रमिति वर्णितम्।[4]

अर्जुनस्य तपो मृदु प्रतिभाति। तद्यथारण्यकपर्वणि अर्जुनस्यात्मवृत्त-निदर्शने वर्णितम्—

ततोऽहं वचनात् तस्य गिरिमारुह्य शैशिरम्।
तपोऽतप्यं महाराज मासं मूलफलाशनः॥ १४
द्वितीयश्चापि मे मासो जलं भक्षयतो गतः।
निराहारस्तृतीयेऽथ मासे पाण्डवनन्दन॥ १५
ऊर्ध्वबाहुश्चतुर्थे तु माससमस्मि स्थितस्तदा।
न च मे हीयते प्राणस्तदद्भुतमिवाभवत्॥ १६

---

१. दारुणं तपोऽधिकफलप्रदमिति व्यासस्याधोवचनेन प्रमाण्यते।
मया हि सुमहत्तप्तं तपः परमदारुणम्। शान्ति० ३२७.३१

२. महाभारत आदिपर्वणि सुन्दोपसुन्दयोरुग्रं तपोऽधोविधं वर्णितम्—
कृत्वा दीक्षां गतौ विन्ध्यं तत्रोग्रं तेपतुस्तपः।
क्षुत्पिपासापरिश्रान्तौ जटावल्कलधारिणौ।
मलोपचितसर्वाङ्गौ वायुभक्षौ बभूवतुः॥ २०१.७
आत्ममांसानि जुह्वन्तौ पादाङ्गुष्ठाग्रधिष्ठितौ।
ऊर्ध्वबाहू चानिमिषौ दीर्घकालं धृतव्रतौ॥ २०१.८
ततो देवा भवन् भीता उग्रं दृष्ट्वा तयोस्तपः।

३. श्रीमद्भगवद्गीतायां त्रिविधं तपः—शारीरं, वाङ्मयं मानसं चाधोविधं वर्णितम्—
देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम्।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते॥ १७.१४
अनुद्वेगकरं वाक्यं सत्यं प्रियं हितं च यत्।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते॥ १७.१५
मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः।
भावसंशुद्धिरित्येतत् तपो मानसमुच्यते॥ १७.१६
एतानि मृदु तपः। एतानि सर्वथा सुखकराणि।

४. मूढग्राहेणात्मनो यत्पीडया क्रियते तपः।
परस्योत्सादनार्थं वा तत्तामसमुदाहृतम्॥ १७.२२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

किमीदृशं जीवनं कल्पनाकलितमुताहो वास्तविकमिति निम्नोक्तेन तथ्य-वर्णनेन निर्णेयम्--

Dr. Barbara Moore 56 Russian born dietician had been living on vegetable :and fruit juice for six or seven years. She says eventually I hope I will leave off fruit juice and live on air alone. I can do that now for two or three months at a time, if I live on the mountains.

तपसः प्रभावः

तपःपरिपूत एव पुरुषो भवति योग्यः कस्यचिदर्थस्य । ब्रह्मचारी, गृहस्थः, वानप्रस्थः, संन्यासी चैते सर्वे तपो विना पदमेकं सोत्कर्षं नोदयन्ते । तत्रापि वानप्रस्थानां प्रथमं लक्षणं तु तेषां तप एव ।

तपस्तु शक्तेरनुत्तमः प्रभवः ।[1] तपसा देवानां प्रसादो जायते । तदनु प्रीतास्ते तापसस्याभिलाषं पूरयन्ति ।[2] तपसः सर्वोच्चोपयोग इन्द्रियाणां प्रशमनार्थं भवति । इन्द्रियेषु प्रशान्तेषु साधकस्य निःश्रेयस-पथे प्रगमनस्य पात्रता समुदेति ।[3]

भवतु नाम तपो निष्कामं केषाञ्चिन्महामनीषिणां वानप्रस्थानां च, किन्तु साधारणतः किमपि पारलौकिकमिहलौकिकं वा नान्यथासाध्योद्देश्यमभि-लक्ष्यातितरां तपस्तप्यते । एतादृशं महत्त्वपूर्णं तपो यज्ञस्थानीयमपि संकल्पितम् । इन्द्रियार्थप्रपन्नाधिभौतिकसुखस्य सर्वथा निषेधः शारीरिक-

१. तथाहि तपसा सृष्टेः समारम्भ एकस्य (परमात्मतत्त्वस्य) ऋग्वेदे दर्शितः — तपसस्तन्महिनाजायतैकम् ।

ब्रह्मैनद् विद्यात्तपसा विपश्चित् । अथर्व० ८.९.३

सोऽकामयत—बहु स्याम, प्रजायेयेति । स तपोऽतप्यत । स तपस्तप्त्वा इदं सर्वमसृजत् ।। बृहदारण्यक २.६.१

२. महाभारतानुसारेण तपसार्जुनः शिवादीन् देवान् प्रीणयित्वा तेभ्योऽस्त्राणि समादात् । आरण्यकपर्वणि ३७.२८–३०

श्वेतकिस्तपस्तप्त्वा शिवं प्रसाद्य दुर्वाससं पुरोहितमवाप्तवान् ।
भगीरथस्तु मन्त्रिष्वाधाय तद्राज्यं गङ्गावतरणे रतः ।
तपो दीर्घं समातिष्ठद् गोकर्णे रघुनन्दन ।। वा०रा० बालका० ३१.१२

३. प्रजापतिस्तु सहस्रवर्षं तपस्तप्त्वात्मशुद्धिं विधाय मृत्युपाशाद् विमुक्तः । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति । तैत्तिरीय उ० ३.५.१ । सत्येन लभ्यस्तपसा ह्येष आत्मा । मुण्डक० ३.१.५ । तपसा चीयते ब्रह्म । मुण्डक० १.८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कष्टप्रदव्रतधारणं ध्यानोपासन-सम्पृक्तं च भवति तपः। न केवलं मानवानामपितु देवासुरगन्धर्वादीनामृषीणां पितॄणां च तपः समाम्नातं पुरा साहित्ये।

तपसो हि परं नास्ति तपसा विन्दते महत्।
नासाध्यं तपसः किंचिदिति बुद्धचस्व भारत॥

आरण्यकप० २४५.१६

कापि सर्वातिशायिनी उपलब्धिस्तपसोऽनुवर्तिनी भवतीति धारणा भारतीयसंस्कृतौ बद्धमूला प्रवर्तते।[1] तथा हि व्यासः स्वशिष्येभ्य आत्मवृत्तं प्रकाशयति—

मया हि सुमहत्तप्तं तपः परमदारुणम्।
भूतं भव्यं भविष्यच्च जानीयामिति सत्तमाः॥ शान्ति० ३८७.२१
तस्य मे तप्ततपसो निगृहीतेन्द्रियस्य च।
त्रैकालिकमिदं ज्ञानं प्रादुर्भूतं यथेप्सितम्॥

शान्ति० ३८७.२२,२३

मनुना सर्वाः प्रजाः स्रष्टव्या आसन्। तस्मिन् महत्तम उपक्रमे।
तपसा चातितीव्रेण प्रतिभास्य भविष्यति। आर० १८५.५०

इति प्रजापतिर्मत्स्यरूपेण प्रावोचत्। अस्मिन्नुपक्रमे मनुः—

प्रमूढोऽभूत् प्रजासर्गे तपस्तेपे महत्ततः।
तपसा महता युक्तः सोऽथ स्रष्टुं प्रचक्रमे॥ आर० १८५.५१

द्रोणाचार्यस्य सर्वातिशायियुद्धपराक्रमस्तपसैव समजायतेति महाभारतेऽधोविधं व्याख्यातम्—

ब्राह्मणेन तपो नूनं चरितं दुश्चरं महत्।
तथा हि युधि विक्रान्तो दहति क्षत्रियर्षभान्॥
धर्मो युद्धं क्षत्रियस्य ब्राह्मणस्य परं तपः।
तपस्वी कृतविद्यश्च प्रेक्षितेनापि निर्दहेत्॥

द्रोणपर्वणि १०१.५५,५६

तत्रासीद् ब्राह्मणानां तपसोपचिता विनाशशक्तिः। तथा हि—

तपसा दीप्यमानास्ते दहेयुः पृथिवीमपि।
पूज्याहि ज्ञानविज्ञानतपोयोगसमन्विताः॥ अनुशासन प० ५९.८

महाभारते तपसः प्रभावोऽधोविधं वर्णितः—

---

१. अथर्ववेदानुसारेण तपसा 'प्रियाः श्रुतस्य भूयास्म, आयुष्मन्तः, सुमेधसः। ७.६३.१। तपो ब्रह्मेति। तै० उ० ३.३.१। आत्मविद्या तपोमूलम्। श्वेत० ब्रह्म ३। तपसा प्राप्यते सत्त्वम्। मैत्री० ४.३। तपश्चास्मि तपस्विषु। गीता ७.९।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रजापतिरिदं सर्वं तपसैवासृजत् प्रभुः ।
तथैव वेदान् ऋषयस्तपसा प्रतिपेदिरे ॥
तपसश्चानुपूर्व्येण फलमूलाशिनस्तथा ।
त्रैलोक्यं तपसा सिद्धाः पश्यन्तीह समाहिताः ॥
औषधान्यगदादीनि नाना विद्याश्च सर्वशः ।
तपसैव प्रसिध्यन्ति तपोमूलं हि साधनम् ॥
यद्दुराप दुराम्नायं दुराधर्षं दुरन्वयम् ।
तत्सर्वं तपसा साध्यं तपो हि दूरतिक्रमम् ॥[1]

आश्वमेधिकपर्वणि ५०.१४-१७

किं बहुना—

'नातप्ततपसः पुत्र प्राप्नुवन्ति महत् सुखम्'[2]

इति व्यासो वनवासिनः पाण्डवानुपादिदेश ।

विश्वामित्रेण समर्थितमेतदधोविधम्—

तपसा तदवाप्यं हि यन्न शक्यं मनोरथैः ।
त्रैलोक्यराज्यादपि हि तप एव विशिष्यते ॥
अहो प्रभावो ब्रह्मर्षेश्च्यवनस्य महात्मनः ।
इच्छन्नेष तपो वीर्यादन्याँल्लोकान् सृजेदपि ॥

अनुशासनपर्वणि ५४.२५

तपसा प्रजानायापद उद्धरणमिति महाभारते युधिष्ठिर-वचनम्—

भीमेन कार्तवीर्येण वैन्येन नहुषेण च ।
तपोयोगसमाधिस्थैरुद्धृता ह्यापदः प्रजाः ॥[3]

सर्वसाधारणकृते महती लोकप्रिया चोपलब्धिस्तपसा यदवाप्यते तत्तु स्वर्गप्राप्तिर्यथा मनुना निगदितम्—

कीटाश्चाहिपतङ्गाश्च पशवश्च वयांसि च ।
स्थावराणि च भूतानि दिवं यान्ति तपोबलात् ॥ ११.२४०

---

१. इतोऽप्यधिकमेतत्प्रकरणं शान्तिपर्वणि १५५.१-१३ विवृतम् । यथा—
तपसा शक्यते प्राप्तुं देवत्वमिति निश्चयात् ॥ १५५.१३
एतत्सर्वं मनुना समर्थितम्—१२.२३५-२३८

२. आरण्यकपर्वणि २४५.१२

३. आरण्यकपर्वणि ३.११ । अन्यच्च—तपसा सिद्धिमन्विच्छ योगसिद्धिं च भारत । आर० २.७७
तपसा सिद्धिमन्विच्छ द्विजानां भरणाय च । आर० २.७८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अपरं च—तपसा प्रजापतिः शास्त्राणि व्यरचयत्, ऋषयो वेदान् प्रतिपेदिरे, ऋषयस्त्रैलोक्यं प्रपश्यन्ति ।[1]

महाभारतानुसारेण ऋषीणां तपसः प्रभावेण सत्ययुगेऽपि लोकानां सामान्यजीवने सौष्ठवं समुत्पादितमासीत् । तत्र न केवलं देवानामपितु असुराणामपि चिन्तनमासीद्यत्—

लोका हि सर्वे तपसा ध्रियन्ते । आरण्यकपर्वणि ९९.२०

तेऽसुरा समाज-सौष्ठवावरोधका बभूवुः ।[2] अतएव तेषां विचारणा बभूव—

तस्मात्त्वरध्वं तपसः क्षयाय । ये सन्ति केचिद्धि वसुन्धराया ।
तपस्विनो धर्मविदश्च तज्ज्ञाः ।
तेषां वधः क्रियतां क्षिप्रमेव तेषु प्रनष्टेषु जगत् प्रनष्टम् ॥ आर० ९९.२०

महर्षिच्यवनं वृद्धमपि युवानं कुर्वाणौ अश्विनौ तेन सोमपीथिनौ कृतौ ।[3]

महाभारतानुसारेण वानप्रस्थाश्रमधरस्तपसा स्वर्गं[4] लभते । संन्यासी ब्रह्मलोकं वा मुक्तिं वा लभते ।[5] वानप्रस्थः स्वशरीरमाश्रमेऽस्मिन् त्युक्तुमावश्यकानि अनुष्ठानानि समाचरति । तद्यथा व्यासेन प्रोक्तम्—

अतः परं परममुदारमाश्रमं तृतीयमाहुस्त्यजतां कलेवरम् ।
वनौकसां गृहपतिनामनुत्तमं शृणुष्वैतत् क्लिष्टमशरीरकारिणाम् ॥
शान्तिप० २३५.२७

इहलोके भावितात्मनो वानप्रस्थस्य लक्षणमासीद् यद् दीप्तमनलमिव तेषां स्वरूपं ब्राह्मश्रिया युक्तमभवत् ।[6]

---

१. मनुस्मृतौ ११.२३६—२४३

२. आधुनिकयुगे कापीदृशी स्थितिः समुपस्थिता, यद् देशोऽयं तपोमार्गं विहायासुरीं जीवनवृत्तिं स्वीकृत्य प्रणाशपथे सप्रमोदं प्रवर्तते । सत्ययुगे तेऽसुरा हताः । पुनरपि वैज्ञानिकप्रगमनस्य दुरभिनिवेशेन ते समुद्धता लोकं विनाशयितुं समुत्थिताः सन्ति । केवलं तपोधारिणामेवात्मबलेन लोकः सुपथं चरिष्यति । आत्मानं रक्षिष्यति च ।

३. आरण्यकपर्वणि १२३.२२

४. बृहद्रथो वानप्रस्थे तपसा स्वर्गं जगामेति । सपत्नीद्वयेनानुगतस्तपोवनरतोऽभवत् ।

अथ दीर्घस्य कालस्य तपोवनगतो नृपः ।
सभार्यः स्वर्गमगमत् तपस्तप्त्वा बृहद्रथः ॥ सभा० १७.२२-२४

५. संन्यासाश्रमस्तु मोक्षाश्रमः । शान्ति० १८५.६ । वानप्रस्थाश्रमस्तु ऋष्याश्रमः । शान्ति प० १८५.१ । रामायणानुसारेण वानप्रस्थो शरभङ्गो ब्रह्मलोकं तपसावाप्तवान् । अरण्यकका० ५.२८.३० । रामायणानुसारेण वानप्रस्थस्य सुतीक्ष्णस्य देवलोक एवाभीष्ट आसीत् । अरण्य० ७.९

६. रामायणेऽरण्यकाण्डे १३.९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नैमित्तिकतप ऋषीणामपि दृश्यते । भवतु नामापवाद एव, विश्वामित्रो ब्राह्मणत्वमवाप्तुं तपश्चचार ।[1]

विमानसेवा तेषां सदेहस्वर्गगमनायोपलब्धासीत् । मतङ्गवनवासिन ऋषयो विमानैर्दिवमारूढाः ।[2] रामोऽपि तापसशबर्या अतिथिर्बभूवेति किं भवेत्तपसः फलमतः परम् ।[3]

तपसः प्रभावस्तीर्थभूतासु स्थलीषु अपि प्रतिफलति । तथा हि— मतङ्गकुलस्य ऋषीणां प्रभावो रामेण वर्णितः —

दृष्टो मयाश्रमः सौम्य बह्वाश्चर्यः कृतात्मनाम् ।
विश्वस्तमृगशार्दूलो नानाविहगसेवितः ॥
सप्तानां च समुद्राणां तेषां तीर्थेषु लक्ष्मण ।
उपस्पृष्टं च विधिवत् पितरश्चापि तर्पिताः ॥
प्रणष्टमशुभं यन्नः कल्याणं समुपस्थितम् ।
तेन त्वेतत् प्रहृष्टं मे मनो लक्ष्मण सम्प्रति ।
हृदये मे नरव्याघ्र शुभमाविर्भविष्यति ॥

अरण्यकाण्डे ७५.३-६

महाभारतानुसारेण दधीचस्य तपोनिष्ठस्य शरीराद् दिवाकरसमद्युति-र्विच्छुरितासीत्—

तत्रापश्यन् दधीचं ते दिवाकरसमद्युतिम् ।
जाज्वल्यमानं वपुषा यथा लक्ष्म्या पितामहम् ॥

आरण्यकपर्वणि ९८.१८

विश्वामित्रस्तपसा भास्करसमद्युतिरभवत् ।[4]

कपिलं च महात्मानं तेजो राशिमनुत्तमम् ।
तेजसा दीप्यमानं तं ज्वालाभिरिव पावकम् ॥ आर० १०५.२५

अपरं च तपसैव दधीचास्थिषु अलौकिकी शक्तिः प्रादुरासीत् । तत्कृतेन वज्रेण वृत्रासुरोऽनन्यथासंहरणीय इन्द्रेण हतः ।[5]

---

१. एवमनेन ब्रह्मण्यं प्राप्तं राम महात्मना ॥ बाल० ६५.२८
२. अरण्य० ७४.१४
३. अरण्य० ७४.१५, १६
४. शल्यपर्व ३९.२६
५. तपसा ब्रह्मचर्येण रसायन-निषेवणात् ।
उदग्रसत्त्वा बलिनो भवन्ति चिरजीविनः ॥ आरण्यकपर्वणि ९८.९-११

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

लौकिकवैभव-साधनानि स्वकार्यार्थं परार्थं वा सुलभानि बभूवुः तपोव्ययेन । तद्यथा लोपामुद्रागस्त्ययोः संवादेन प्रतीयते महाभारत आरण्यकपर्वणि--

लोपामुद्रा—ईशोऽसि तपसा सर्वं समाहर्तुमिहेश्वर ।
क्षणेन जीवलोके यद्वसु किंचन विद्यते ।। ९५.२०

अगस्त्यः —एवमेतद्यथात्थ त्वं तपो व्ययकरं तु मे ।
यथा त् मे न नश्येत तपस्तन्मां प्रचोदय ।। ९५.२१
तपसा सिद्धि[1]मन्विच्छ योगसिद्धिं च भारत ।
सिद्धा हि यद्यदिच्छन्ति कुर्वते तदनुग्रहात् ।। आर० २.७०-७१

ऋषीणां मनीषया तपः सीमातिगं परिकल्पितं प्रतिभाति ।

तपसो जन्मान्तरफलम्

मरणानन्तरं यथेच्छं फलं लभन्ते तपस्विनः । यथा—

स्थण्डिले शयमानानां गृहाणि शयनानि च ।
चीरवल्कलसंवीते वासांस्याभरणानि च ।।
वाहनासनयानानि योगात्मनि तपोधने ।
अग्नीनुपशयानस्य राजपौरुषमुच्यते ।।
रसानां प्रतिसंहारे सौभाग्यमनुगच्छति ।
आमिषप्रतिसंहारे पशून् पुत्रांश्च विन्दति ।।

---

१. अणिमा महिमा चैव लघिमा प्राप्तिरेव च ।
प्राकाम्यं चेशित्वं च वशित्वं च तथापरम् ।।
यत्र कामावसायित्वं गुणानेतानथैवेश्वरान् ।
प्राप्नोत्यष्टौ नरव्याघ्र परनिर्वाणसूचकान् ।।
सूक्ष्मात् सूक्ष्मतरोऽणीयान् शीघ्रत्वाल्लघिमा गुणः ।
महिमाशेषपूज्यत्वात् प्राप्तिर्नाप्राप्यमस्य यत् ।।
प्राकाम्यमस्य व्यापित्वादीशित्वं चेश्वरो यतः ।
वशित्वाद् वशिता नाम योगिनः सप्तमो गुणः ।।
यत्रेच्छास्थानमप्युक्तं यत्र कामावसायिता ।
ऐश्वर्यं कारणैरेभिर्योगिनः प्रोक्तमष्टधा ।।
अन्यत्रैताभ्यो व्यतिरिक्ता दशान्याः सिद्धयो निर्दिष्टा अधोविधम्—
सर्वज्ञदूरश्रवणं परकायप्रवेशनम् ।
वाक्सिद्धिः कल्पवृक्षत्वं स्रष्टुं संहर्तुमीशता ।
अमरत्वं च सर्वाङ्गं सिद्धयोऽष्टादश स्मृताः ।।
ब्रह्मवैवर्ते १. ६. १८, १९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अवाक्शिरास्तु यो लम्बेदुदवासं च यो वसेत् ।
सततं चैकशायी यः स लभेतेप्सितां गतिम् ॥
अनुशासनपर्वणि ७.८–११

अन्यत्रापि प्रेत्यभावे तपसा स्वर्गः, यशः, दीर्घायुः, भोगाः, ज्ञानं, विज्ञानं, रूपं, सम्पत्, सौभाग्यं, धनं च लभ्यन्त इति सूचितम् ।[1] तपस्विभिः केन वस्तुना जीवनधारणेन प्रत्येकं स्वर्गः, धनं, विद्या, सन्ततिः, गौः, क्रतुः, दाक्ष्यं, वासांसि, आभरणानि च प्राप्यन्त इति च व्याख्यातम् ।[2]

वनप्रस्थस्य लोकप्रियता

रामायणानुसारेण न केवलं ब्राह्मणानां प्रीतमासीत् तपोवनमपि तु क्षत्रियराजा विशेषतो रघुवंशीया आत्मकल्याणाय वनवासममृतमित्याहुः ।[3] तपसा पुत्रप्राप्ती राज्ञामप्यभीप्सिता बभूव । इक्ष्वाकुवंशीयः सगरः पुत्रकामो महत्तपः कैलासशिखरमाश्रितोऽतप्यत ।[4]

गौतमबुद्धस्य तपःसमृद्धिः वने प्रादुर्बभूव । निर्वाणानन्तरमपि स विशुद्धभावेन वने विराजते स्म ।[5]

बौद्धसंस्कृतौ आत्मविकासार्थं वनस्य महत्त्वमासीत् । बौद्धेषु तेऽरण्यसंज्ञिनो बभूवुः, येषां चित्तानि वनशोभासौरभादिभिः समाकृष्यन्त । अङ्गुलिमालस्य चित्तं पर्वतानां वनानां च प्रशान्तावरमत । वनानां पुष्परञ्जितभूमावुपविश्य मुक्तिं बन्धनविहीनत्वं च भिक्षवो ध्यायन्ति स्म । स्थविर उसभस्तु शरदो वनश्रीसौरभाभ्यामात्मविकासस्य सन्देशमलभत । गौतमबुद्धेन घोषितम्—यावद्वनेषु शयनासनानामुपभोगं भिक्षवः कुर्वन्ति तावदेव तेषां वृद्धिर्भविष्यति ।[6] गौतमस्य भ्राता स्वयमेव योगाभ्यासं कर्तुं

१. अनु० ५७.७–१०
२. अनु० ५७.११–१५
३. इदमेवामृतं प्राहू राज्ञि राजर्षयः परे ।
वनवासं भवार्थाय प्रेत्य मे प्रपितामहाः ॥ अयो० ९४.१९
महाभारते समर्थितमेतत्–
पुत्रसंक्रामितश्रीस्तु वने वन्येन वर्तयन् ।
विधिना श्रामणेनैव कुर्यात् कालमतन्द्रितः ॥ शा० २१.१५
४. आर० प० १०४.९
५. द्रष्टव्यमत्र 'मुनिं वनस्मिं झायन्तं एहि पस्साम गोतमं ॥ सुत्तनिपात ९.१३ । अत्र गौतमो मुनिः, ध्यानी, वनप्रिय इति विशेषितः । एतत् सर्वं वैदिकवानप्रस्थसंन्यासानुरूपमेव ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वनमगमत्। स्वयमेव बुद्धो बहूनि दिनानि वनेषु न्यवसत्। परवर्तियुगे बौद्धभिक्षूणामावासाय विहारा वनपर्वतभूमिषु निर्मिताः।

वैदिकधर्मानुसारी यो वानप्रस्थाश्रमजीवन-विधिर्विकसितः स गौतम-बुद्धाय स्पृहणीयो न प्रतिभाति। स तपोमयं वानप्रस्थानां जीवनं कटु पर्यालोचयत।[1] तथा हि—

न मच्छमंसा न नासकत्तं न नग्गियं जल्लं खराजिनानि वा।
नाग्गिहुत्तस्सुपसेवना वा ये वापि लोके अमरा बहू तथा॥
न मन्ताहुती यञ्ञमुतूपसेवना सोधेन्ति मच्चं अवितिण्णकंखं।
सुत्तनिपात १४.११

राज्ञां वानप्रस्थग्रहणं महाभारते आश्रमवासिकपर्वणि निदर्शितम्। तथाहि—

सहस्रचित्य इत्युक्तः शतयूपपितामहः।
स पुत्रे राज्यमासज्य ज्येष्ठे परमधार्मिके।
सहस्रचित्यो धर्मात्मा प्रविवेश वनं नृपः॥ २६.७
स गत्वा तपसः पारं दीप्तस्य स नराधिपः।
पुरन्दरस्य संस्थानं प्रतिपेदे महामनाः॥ २६.८
दृष्टपूर्वः स बहुशो राजन् सम्पतता मया।
महेन्द्रसदने राजा तपसा दग्धकिल्विषः॥ २६.९
तथा शैलालयो राजा भगदत्त-पितामहः।
तपोबलेनैव नृपो महेन्द्रसदनं गतः॥ २६.१०
तथा पृषध्रो नामासीद्राजा वज्रधरोपमः।
स चापि तपसा लेभे नाकपृष्ठमितो गतः॥ २६.११
अस्मिन्नरण्ये नृपते मान्धातुरपि चात्मजः।
पुरुकुत्सो नृपः सिद्धिं महतीं समवाप्तवान्॥ २६.१२
सोऽस्मिन्नरण्ये नृपतिस्तपस्तप्त्वा दिवंगतः॥
शशलोमा च राजासीद्राजा परमधार्मिकः।
स चाप्यास्मिन्वने तप्त्वा तपो दिवमवाप्तवान्॥ २६.१४
द्वैपायनप्रसादाच्च त्वमपीदं तपोवनं।
राजन्नवाप्य दुष्प्रापां सिद्धिमग्र्यां गमिष्यसि॥ २६.१५

---

१. अन्यत्र गौतमबुद्धस्तपः प्रशंसति। तथाहि—
तपो च ब्रह्मचरियं च अरियसच्चान दस्सनं।
निब्बाणसच्छिकिरिया च एतं मंगलमुत्तमं॥ सुत्तनिपात १६.१०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पाण्डुः स्मरति नित्यं च बलहन्तुः समीपतः ।
त्वां सदैव महीपाल स त्वां श्रेयसि योक्ष्यति ॥ २६.१७

नारदो धृतराष्ट्रस्य वानप्रस्थकृततपःफलेन प्राप्तान् लोकानधोविधमाश्रमवासिकपर्वणि वर्णयति—

वर्षाणि त्रीणि शिष्टानि राज्ञोऽस्य परमायुषः ।
ततः कुबेरभवनं गान्धारी सहितो नृपः ।
विहर्ता धृतराष्ट्रोऽयं राजराजाभिपूजितः ॥ २७.११
कामगेन विमानेन दिव्याभरणभूषितः ।
ऋषिपुत्रो महाभागस्तपसा दग्धकिल्बिषः ॥ २७.१२
संचरिष्यति लोकांश्च देवगन्धर्वरक्षसाम् ।

पूर्वोक्तेन विवरणेन प्रतीयते यत् पुरा राजानो मरणानन्तरं स्वर्गलाभाय वानप्रस्थाश्रमं स्वीकृतवन्तः । आनुवंशिकं विधानमिदमूरीकृतं प्रतिभाति । इक्ष्वाकुवंशीयानां राज्ञां वानप्रस्थग्रहणं सुप्रथितमेव ।[1]

महाभारतानुसारेण महाराजो ययातिः पुत्रं राज्येऽभिषिच्य वानप्रस्थो मुनिरभवत् । स नैकवर्षाणि यथापूर्वं वर्णितं तापसजीवनं यापयित्वा स्वर्गं जगाम ।[2]

तपसोऽधिकारः

न केवलं द्विजातीनां पुरुषाणां कृतेऽवधारित आसीद् वानप्रस्थाश्रमोऽपितु शूद्राणां स्त्रीणां च कृतेऽपि वानप्रस्थस्य द्वारमपिहितमासीत् । विश्रुतमेव श्रवणकुमारस्यावदानं रामायणे । स वैश्येन श्रवणेन शूद्रायां जातो मुनिरासीत् ।[3] माता, पिता पुत्रश्च त्रयस्तपोधना ऋषयो बभूवुः ।[4] तेषामाश्रमः सरयूतटवर्तिवनेऽभवत् ।[5] पिता यथा स्वपुत्रं निर्वर्णयति, श्रवणकुमारो

१. भगीरथपिता दिलीपो वनमाश्रितः तपःसिद्धिसमायोगात् त्रिदिवं जगाम । आरण्यक० १०६.४० । भगीरथो पितृणामुद्धाराय हिमवत्पार्श्वे तपश्चकार । शान्ति० १०७.३–१६ ।

२. आदिपर्वणि ८१.१०–१६

३. शूद्रायामस्मि, वैश्येन जातो नरवराधिप । अयोध्या० ६३.५१

४. श्रवणकुमार आत्मविषयकं कथयति रामायणस्यायोध्याकाण्डे—

कथमस्मद्विधे शस्त्रं निपतेच्च तपस्विनि । ६३.२६
ऋषेर्हि न्यस्तदण्डस्य वने वन्येन जीवतः । ६३.२७
जटाभारधरस्यैव वल्कलाजिनवाससः ॥ ६३.२८
इयमेकपदी राजन् यतो मे पितुराश्रमः ॥ ६३.४४

५. अयोध्याकाण्ड ६३ तमे सर्गे

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ब्रह्मवादी वानप्रस्थो बभूव ।[1] यथा वाल्मीकिः सूचयति मरणानन्तरमृषिकुमारः स्वर्गे स्थानमवाप्तवान् ।[2]

वानप्रस्थेन सह तस्य पत्नी तद्व्रतपरायणा बभूवेति विषयेऽस्मिन्नास्ति शास्त्रकाराणां विप्रतिपत्तिः ।[3] बहवः स्त्रियः पतिहीना अपि वानप्रस्था बभूवुः । एतादृशीषु स्त्रीषु शूद्रायाः शबर्या नाम सर्वोपरि राजते । रामायणानुसारेण सा ऋषीणां परिचारिका बभूव, परतः तपसा सिद्धा च बभूव ।[4]

न केवलमार्या अपि तु आर्येतरा अपि वानप्रस्थव्रतपरायणास्तपोऽतप्यन्त । एतादृशो वर्णितो मारीचो रामायणे—

ददर्शाश्रममेकान्ते पुण्ये रम्ये वनान्तरे
तत्र कृष्णाजिनधरं जटामण्डलधारिणम् ।
ददर्श नियताहारं मारीचं नाम राक्षसम् ॥ अरण्ये ३५.३७, ३८

मारीचः स्वमुखेनात्मव्रतपरायणतां वर्णयति—

शरेण मुक्तो रामस्य कथंचित् प्राप्य जीवितम् ।
इह प्रव्राजितो युक्तस्तापसोऽहं समाहितः ॥ अर० ३९.१४

उच्चवर्णासु स्त्रीषु अनसूया तपस्विनीषु अनन्यतमा विभाति । रामायणे तस्याश्चरितगाथा मुनिना सस्पृहं चित्रिता । अन्या तत्र वर्तते मेरुसावर्णेः कन्या स्वयंप्रभा तपस्विनी समुद्रतटीयगुहायां व्रतचारिणी ।[5] सा वानरान् प्रति वदति—

तपसः सुप्रभावेण नियमोपार्जितेन च ।
सर्वानेव बिलादस्मात् तारयिष्यामि वानरान् ॥
किकिन्धा० ५२.२६,२७

महाभारतानुसारेण—

वानप्रस्थे द्विजातीनां त्रयाणामुपदिश्यते । आश्व० प० ३५.४३

राज्ञ्योऽपि वानप्रस्था बभूवुरिति

सत्यभामा तथैवान्या देव्यः कृष्णस्य सम्मताः ।
वनं प्रविविशू राजंस्तापस्ये कृतनिश्चयाः ॥ मौसल० ८.७२

गान्धारी धृतराष्ट्रेन सह तापसी बभूव वल्कलाजिनधारिणी । पाण्डोर्मृत्योरनन्तरं सत्यवती वने तपस्विनीभूय दिवंगता । तथा हि—

---

१. अयो० ६४.२३, २४ २. अयो० ६४.४७–४९

३. रामायणानुसारेणात्रिरनसूया चोभौ समं तपोऽतप्येताम् । अयोध्या० ११७ तमे सर्गे ।

४. अरण्य० ७४.१०

५. किष्किन्धाकाण्डे ५१, ५२ सर्गतः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सम्मूढां दुःखशोकार्तां व्यासो मातरमब्रवीत् ।
गच्छ त्वं त्यागमास्थाय युक्ता वस तपोवने ।।
तथेत्युक्ते अम्बिकया भीष्ममामन्त्र्य सुव्रता ।
वनं ययौ सत्यवती स्नुषाभ्यां सह भारत ।।
ताः सुघोरं तपः कृत्वा देव्यो भरतसत्तम ।
देहं त्यक्त्वा महाराज गतिमिष्टां ययुस्तदा ।।

आदिपर्वणि ११९.५–१२

ऐतिह्यासिकयुगे महाराजदर्शकस्य माता महादेवी आश्रमस्था बभूव ।[1]

देवा[2] असुरा ऋषयो मानवाश्चेति सर्वे तपसा स्वाभीष्टं साधयन्तः पुराणेतिहासादिषु श्रूयन्ते । स्वयं ब्रह्मादयो देवाः, विरोचनादयोऽसुराश्च नैष्ठिकव्रतचर्यया तपोऽतप्यन्त स्त्रीणामसुरीणामपि तपःसाधना विश्रुता । तथा हि महाभारते—

पुलोमा नाम दैतेयी कालका च महासुरी ।
दिव्यं वर्षसहस्रं ते चेरतुः परमं तपः ।। आर० १७०.६

पार्वत्यास्तपो विदितमेव । महाभारतेऽम्बाया भृशं तपो वर्णितम् । स्त्रीणामपि तपः कठोरमासीत् ।[3]

रावणादि-राक्षसपरिवारस्य ब्रह्मणः प्रीत्यर्थं घोरं तपः महाभारते वर्णितम् । तत्र रावणः स्वशिरांसि छित्त्वाग्नौ जुहोतिस्म । तथा हि—

पूर्णे वर्षसहस्रे तु शिरश्छित्त्वा दशाननः ।
जुहोत्यग्नौ दुराधर्षस्तेनातुष्यज्जगत्प्रभुः ।। आर० २५९.२०

न केवलं चतुर्वर्णा अपि तु पञ्चमवर्णोऽपि व्याधो मिथिलावासी गृहस्थाश्रमे तपस्वी बभूव । स तपस्वी सन् नित्यं मांसं व्यक्रीणात् । तद्यथा—

अपश्यत्तत्र गत्वा तं सूनामध्ये व्यवस्थितम् ।
मार्गमाहिषमांसानि विक्रीणन्तं तपस्विनम् ।। आर० १९८.१०

---

१. स्वप्नवासवदत्ते १.५/६

२. विष्णुस्तपति समुद्र इति महाभारतीयं वचोऽधोविधम्—
येन लोकास्त्रयस्सृष्टा दैत्याः सर्वाश्च देवताः ।
स एष भगवान् विष्णुः समुद्रे तप्यते तपः ।। अनु० ६.१८

३. अम्बायास्तपः—
'संवत्सरं तीव्रकोपा पादाङ्गुष्ठाग्रधिष्ठिता' इति विशेषेण वर्णितम् । उद्योगपर्वणि १८७.२१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ऋषयस्तु सपत्नीका गार्हस्थ्यधर्ममनुपालयन्तस्तपस्विनो बभूवुः। एतादृशेषु महर्षिषु जमदग्निः[1] अगस्त्यः, वसिष्ठः, विश्वामित्रः, याज्ञवल्क्यः, गौतमश्च प्रमुखाः सन्ति। किं बहुना, महाभारतं तु देवादेव-चराचरादीनां कृते सिद्धान्तरूपेण तपःसिद्धिकारणमिति प्रपञ्चयति। तथाहि शान्तिपर्वणि--

ऋषयः पितरो देवा मनुष्या मृगसत्तमाः।
यानि चान्यानि भूतानि स्थावराणि चराणि च॥
तपःपरायणाः सर्वे सिध्यन्ति तापसाश्च ते। शा० १५५.११, १२

तपोविभवेन लोकसेवा

तपोधनानां महर्षीणां तपसैव काचिदनुत्तमा शक्तिः संजाता यया यथावश्यकं तेऽनन्यथासाध्येषूपक्रमेषु देवादीनपि उपाकुर्वन्।[2] तद्यथा महर्षिर्दधीचः स्वास्थिदानेन देवानां परमशत्रोर्वृत्रासुरस्य वधाय वज्रनिर्माणे सहायीभूतः—

ततो दधीचः परमप्रतीतः सुरोत्तमांस्तानिदमभ्युवाच।
करोमि यद्वो हितमद्य देवाः स्वं चापि देहं त्वहमुत्सृजामि॥
(त्वष्टा) चकार वज्रं भृशमुग्ररूपं कृत्वा च शक्रं स उवाच हृष्टः।
अनेन वज्रप्रवरेण देव भस्मीकुरुष्वाद्य सुरारिमुग्रम्॥
आरण्यकपर्वणि ९८.२०, २३

ऋषीणां तपसाततायिनो विचारमात्रेणैव निहता भवन्ति।[3] अन्यथा च गविजातो मुनिश्च्यवनस्य मूल्यं विनिवेद्य संशयग्रस्तं तमुद्धरतिस्म।[4]

संवरणराजस्य प्रत्युत्थानार्थं वसिष्ठो याजयतिस्म। सूर्यात् तस्य कन्यां तपतीं तस्मै याचित्वा स राज्ञे प्रादात्।[5] वसिष्ठोऽवर्षणादकालपीडितां प्रजां

---

१. स वेदाध्ययने युक्तो जमदग्निर्महातपाः
स प्रसेनजितं राजन्नधिगम्य नराधिपम्।
रेणुकां वरयामास स च तस्मै ददौ नृपः॥ आर० ११६.१–२
आश्रमस्थस्तया सार्धं तपस्तेपेऽनुकूलया॥ ११६.३

२. हिमालये ऋषयो देवैः सह समायान्ति लोकस्य हितकाम्यया। शान्ति० ३१४.६

३. ऋग्वेदे १.११६.१३ ते (काकेयाः) पूर्वं तपसा दग्धा मुनिभिर्भावितात्मभिः।
यतमानाः परं शक्त्या त्रिदशैर्विनिषूदिताः॥ आर० पर्व १०३.१०
त्वत्तेजसा च निहताः कालेयाः क्रूरविक्रमाः॥ तत्रैव १०३.१४

४. अनुशासनपर्वणि ५१.१८–२५

५. ददौ संवरणस्यार्थे वसिष्ठाय महात्मने॥ आदि० १६३.५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

जीवयामासेति महाभारते निगदितम्—

अवर्षति च पर्जन्ये सर्वभूतानि चासकृत् ।
वसिष्ठो जीवयामास प्रजापतिरिव प्रजाः ॥ शान्ति० २२६.२७

ऋषिर्वसिष्ठो मानसरोवरसमीपं दानवान् निगृह्य देवानां यज्ञकर्मनिष्पत्तौ सहायकोऽभवत् ।[1]

महान् यन्त्रीव प्रतिभाति वसिष्ठो यतो हि नाम स
कैलासं प्रस्थितां चापि नदीं गङ्गां महातपाः ।
आनयत् तत् सरो दिव्यं तया भिन्नं च तत्सरः ॥ १४०.२३

पुरोहितो भूत्वेमे महर्षयो लोकशासने नृपतीन् प्रगल्भानकुर्वन् । इक्ष्वाकूणां साम्राज्यं महर्षिवसिष्ठस्य प्रभावेण समवर्धतेति रामायणीयं महाभारतीयं च सम्मतम् ।[2]

भीष्मस्य सभासदः कतिपयमहर्षय आसन् । तथाहि—शान्तिपर्वणि महाभारते—

यस्य ब्रह्मर्षयः पुण्या नित्यमासन् सभासदः ।
तेषां प्रभावेण यस्य नाविदितं किंचिज्ज्ञानज्ञेयेषु विद्यते ॥ ३८.१५

यथा वाल्मीकिर्निर्वर्णयतीमे तपोवनवासा 'महाभागाः सर्वभूतहिते रताः' सन्ति । अनसूयायास्तपःप्रभावो विस्मयकर एवासीत् । तथाहि—

दश वर्षाण्यनावृष्ट्या दग्धे लोके निरन्तरम् । ११७.९
यया मूलफले सृष्टे जाह्नवी च प्रवर्तिता ।
उग्रेण तपसा युक्ता नियमैश्चाप्यलंकृता ॥ ११७.१०
दशवर्षसहस्राणि यया तप्तं महत् तपः ।
अनसूयाव्रतैस्तात प्रत्यूहाश्च निबर्हिताः ॥ ११७.११
देवकार्यनिमित्तं च यया सन्त्वरमाणया ।
दशरात्रं कृता रात्रिः सेयं मातेव तेऽनघ ॥ ११७.१२

अनसूया सीतायै पातिव्रत्यमुपदिदेश ।[3]

---

१. देवानां कथं सहायभूत इति महाभारतेऽनुशासनपर्वणि वर्णितम्—

तदा तान् दुःखितान् ज्ञात्वा आनृशंस्यपरो मुनिः ।
अयत्नेनादहत् सर्वान् खलिनः स्वेन तेजसा ॥ १४०.२२

२. आदिप० १६४.९–११

३. अरण्यकाण्डे ११७ तमे सर्गे ।

अरण्यकाण्डे १.१५ आश्वमेधिकपर्वणि अगस्त्यः सर्वलोकहिते रत इति कथितम् । ९२.५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अपर ऋषिर्माण्डकर्णी पञ्चाप्सरो नाम सार्वकालिकं योजनायतं तटाकं निर्मितवान्। वानप्रस्थाः पञ्चमहायज्ञान् नित्यं सम्पादयन्ति स्म। तेषामतिथीनां संख्या सातिशयासीत्।[1] प्रायशो वानप्रस्था ऋषय एव पर्यटन्तः परस्परमतिथयो बभूवुः। भवतु नाम केवलमपवादो रामस्तु दण्डकारण्ये तत्रत्यानां वानप्रस्थानां दश वर्षाणि यावदतिथीभूय सानन्दं व्यतीतवान्।[2] बहवो मुनिजनाः स्वीय-पर्यटन-ज्ञान-बलेन रामं निर्दिशन्ति स्म यत् केन विधिना कुत्र गन्तव्यं कुत्र च शान्तिपूर्वकमवस्थातव्यमिति।[3] इन्द्रमरुतां सन्धिकारकोऽगस्त्यो वैदिकयुगे माहात्म्यं लेभे।[4] परतो विन्ध्योच्चमानमर्दकस्यागस्त्यस्य लोकसेवा प्रशस्यतमा वर्तते। तद्यथा रामेण रामायणे वर्णितम्—

निगृह्य तरसा मृत्युं लोकानां हितकाम्यया।
यस्य भ्रात्रा कृतेयं दिक् शरण्या पुण्यकर्मणा॥ अ० ११.५४
अगस्त्य इति विख्यातो लोके स्वेनैव कर्मणा।[5]
आश्रमो दृश्यते तस्य परिश्रान्तश्रमापहः॥ ११.७९
यदा प्रभृति चाक्रान्ता दिगियं पुण्यकर्मणा।
तदा प्रभृति निर्वैराः प्रशान्ता रजनीचराः॥ ११.८३

स ब्रह्महन्तारमिल्वलं जघान, विन्ध्यमनमयत्, समुद्रमशोषयच्च।[6] यथा रामो वर्णयति सोऽयमगस्त्यो 'हिते नित्यं रतः सताम्' आसीत्।[7] विद्वांसो वानप्रस्थाः शिष्यानध्यापयन्ति स्म। भारद्वाजस्यागस्त्यस्य च शिष्या रामायणे

---

१. भासेन सम्यक् पर्यालोचितम्—तपोवनानि नामातिथिजनस्य स्वगेहम्।

२. जगाम चाश्रमांस्तेषां पर्यायेण तपस्विनाम्।
क्वचित् परिदशान् मासानेकसंवत्सरं क्वचित्।
क्वचिच्चतुरो मासान् पञ्च षट् च परान् क्वचित्।
अपरत्राधिकान् मासानध्यर्धमधिकं क्वचित्।
त्रीन् मासानष्टमांसांश्च राघवो न्यवसत् सुखम्।
तत्र संवसतस्तस्य मुनीनामाश्रमेषु वै।
रमतश्चानुकूल्येन ययुः संवत्सरा दश॥
सुतीक्ष्णस्याश्रमपदं पुनरेवा जगाम ह। अरण्यकाण्डे ११.२३–२७

३. तद्यथा सुतीक्ष्णो राममाख्याति तस्यागस्त्यर्षेराश्रमपदमार्गम्। अरण्य० ११.३७-४१

४. ऋग्वेदे १.१६५, १७०, १७१ सूक्तानि

५. 'अगं पर्वतं 'स्तम्भयति' इति अगस्त्यः।

६. आरण्यकपर्वणि १०१, १०२, १०३ अध्यायाः।

७. अरण्य० ११.८७। वानप्रस्थधर्मेणागस्त्यो रामाय भोजनं ददौ। तत्रैव ११.२७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

निर्दिष्टाः सन्ति ।[1] व्यासो हिमालयेऽध्यापयत् ।[2]

अतिथिपूजा तु वानप्रस्थानां परमो धर्मो बभूव । अगस्त्यः स्वमुनिधर्मं वर्णयति—

अग्निं हुत्वा प्रदायार्घ्यमतिथीन् प्रतिपूजयेत् ।[3] अर० १२.२९

समाजे शान्तिं व्यवस्थापयितुं ते वानप्रस्थाः क्षत्रेभ्योऽस्त्रशस्त्रादिकं ददुः ।[4] अत्रोदाह्रियतेऽगस्त्योपहारो रामाय—

इदं दिव्यं महच्चापं हेमवज्रविभूषितम् ।
वैष्णवं पुरुषव्याघ्र निर्मितं विश्वकर्मणा ।।
अमोघः सूर्यसंकाशो ब्रह्मदत्तः शरोत्तमः ।
दत्तो मम महेन्द्रेण तूणी चाक्षय्यसायकौ ।।
सम्पूर्णौ निशितैर्बाणैर्ज्वलद्भिरिव पावकैः ।
महाराजतकोशोऽयमसिर्हेमविभूषितः ।।

सोऽयमगस्त्यः स्वीयब्रह्मबलेन ताटकापतिं सुन्दं हतवान्[5] । विश्वामित्रोऽपि-शत्रुसंहननेऽप्रतिरथो बभूव ।[6]

साधारणतो वानप्रस्था गृहस्थानां प्रबोधाय व्याख्यानादिप्रवृत्तिषु व्यापृता नासन्, किन्तु तेषां दर्शनेनात्मानमुत्थापयितुं समुत्सुका महाजनास्तैः समुपादानेनोपचारेण च वशीकृता इति रामस्य भरद्वाजागस्त्यादि-महामुनीनां सन्दर्शनप्रकरणेनाभिव्यज्यते ।

कतिपयवानप्रस्था मुनयस्त्रिकालदर्शिनः सम्भूय कस्यचित् पुरुषस्य

---

१. स प्रविश्याश्रमपदं लक्ष्मणो राघवानुजः ।
अगस्त्यशिष्यमासाद्य वाक्यमेतदुवाच ह ।। अरण्ये १२.१
ततः शिष्यैः परिवृतो मुनिरप्यभिनिष्पतत् ।। अरण्ये १२.२१ बालका० ५४.११

२. शान्तिप० ३१४.२३

३. स्वप्नवासवदत्ते तापसी कथयति—तपोवनानि नामातिथिजनस्य स्वगेहम् ।

४. अत एव ज्ञायते यन्न केवलं शास्त्रैरपितु शस्त्रैरपि संस्कृतिरक्षणे समुद्यता आसन् कतिपये ऋषयः ।

५. बालकाण्डे २५.१०

६. तेषां निग्रहणे शक्तः स्वयं च कुशिकात्मजः ।
तव पुत्रहितार्थाय त्वामुपेत्याभियाचते ।। बाल० २१.२१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

समाजस्य वाकाक्षां सम्पूरयितुं स्वप्रातिभज्ञानमुपायुक्षत ।[1] एवमेव ते महाराजानामपि महार्हसचिवा इव समाचरन्तो राष्ट्राभ्युदयाय तान् परामृश्य नियोजयन्ति स्म । एतादृशेषु महर्षिषु वसिष्ठस्य नाम विद्योततेतमाम् । स रघुवंशस्य राजनीतेर्धुर्य आसीत् ।[2]

रामे वने गते भरते चायोध्यामागते राजधान्यां सुशासनं व्यवस्थापयितुं महर्षिर्वसिष्ठः सभाभवने राज्याधिकारिणां सभामाहूतवान् भरतं च तत्र शासनभरमूरीकर्तुं समादिदेश ।

रामायणे वाल्मीकी राममुखेन तापसानां लोकप्रवणतां निदर्शयति—

धर्मे रताः सत्पुरुषैः समेतास्तेजस्विनो दानगुणप्रधानाः ।
अहिंसका वीतमलाश्च लोके भवन्ति पूज्या मुनयः प्रधानाः ॥
अयो० १०९.३६

भरतो वसिष्ठोपदेशेनाप्रभावित आसीत् । पुनश्चित्रकूटे वसिष्ठो सुदीर्घव्याख्यानेन राममयोध्याप्रत्यावर्तनाय व्यज्ञापयत् । रामोऽपि तस्य वचने पितरं प्रति श्रद्धालोपं प्रतीयाय । अस्मिन्नवसरे तत्र बहवो महर्षयः समुपेता आसन् । मुनय ऋषयश्च रामभरतौ प्रशशंसुः । तेषामृषिमुनिगणानामभिप्रेतमासीत्—समग्रजनस्थानमण्डले राक्षसानामुपद्रवसंहरणम् । तस्मै प्रयोजनाय रामस्य जनस्थानाभियानमधिकतरमावश्यकमासीत् । ते स्वमन्तव्यं सम्पूरयितुं भरतं प्रोचुः —

कुले जात महाप्राज्ञ महावृत्त महायशः ।
ग्राह्यं रामस्य वाक्यं ते पितरं यद्यवेक्षसे ॥ अयो० ११२.५

भरद्वाजस्यापि रामविषयिणी जिज्ञासा देशरक्षादिशायां तस्योत्कट-

---

१. निशाकरो नाम मुनिः सम्पातिं समग्रां रामकथामश्रावयत् । अस्यां कथायामावश्यकमासीत् लङ्कापतिना सीताहरणवृत्तम् । अनेन समाचारेण भविष्ये वानरा भूय उपकृताः ।

एष्यन्ति प्रेषितास्तत्र रामदूताः प्लवङ्गमाः ।
आख्येया राममहिषी त्वया तेभ्यो विहंगम ॥ किष्किन्धा० ६२.११

इत्येतत् वानरेभ्यो विज्ञापितं निशाकरेण ।

अगस्त्यो रामं प्रतिवदति

भवानपि सदाचारः शक्तश्च परिरक्षणे ।
अपि चात्र वसन् राम तापसान् पालयिष्यसि ॥ अरण्यकाण्डे १३.२०

२. इक्ष्वाकूणां हि सर्वेषां पुरोधाः परमा गतिः । बाल० ५७.२२

३. अयो० ११६.१९ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रवृत्तिं निदर्शयति। एतत्सर्वं प्रत्यावर्तनकाले भरतेन सह तस्य वार्तालापेन प्रतीयते।[1]

ऋषिकुलपती रामं तस्य भाविकर्तव्यविषयकोपदेशं निजगाद।[2] एतेन स्पष्टं प्रतिभाति यदनुभवप्रपन्नास्ते वानप्रस्था गृहस्थान् जीवनसौरभावाप्तयेऽनुगृह्णन्ति स्म। पद्मपुराणस्य निर्देशनं वर्तते—

प्राणिनामुपकाराय संस्थित उञ्छवृत्तिमान्। २.१.३–६

स्वीयतपसो बलेन ऋषयो मत्स्येभ्योऽपि स्वर्गं ददति। तत्र वर्तते च्यवनस्याधोविधमुदाहरणम्—

प्रतिगृह्णामि वो धेनुं कैवर्तामुक्तकिल्बिषाः।
दिवं गच्छत वै क्षिप्रं मत्स्यैर्जालोद्धृतैः सह॥ अनु० ५१.३९

कतिपयवानप्रस्था भारतीयसंस्कृति-रक्षार्थं कूटनीतिमपि अन्ववर्तन्त। तद्यथागस्त्यादय ऋषयो रामसमक्षं प्रकटयन्ति—

एतदर्थं महातेजा महेन्द्रः पाकशासनः।
शरभङ्गाश्रमं पुण्यमाजगाम पुरन्दरः॥
आनीतस्त्वमिमं देशमुपायेन महर्षिभिः।
एषां वधार्थं शत्रूणां रक्षसां पापकर्मणाम्।
तदिदं नः कृतं कार्यं त्वया दशरथात्मज॥ अरण्य० ३०.३४–३६

अलौकिकं दिव्यं चासीत् तपोवनानां प्रभावः प्रणतिभृतां कृते—

प्रणमन्ति हि ये तेषामृषीणां भावितात्मनाम्।
न तेषामशुभं किंचिच्छरीरे राम विद्यते॥
किष्कि० १३.३६

स्वयंप्रभानाम्नी तापसी विपत्त्यम्बुधौ निमग्नान् हनुमदादिवानरान् नियमोपार्जितेन तपसः सुप्रभावेण गुहातोऽतारयत्।[3]

दुष्काले ऋषीणां प्रभावेण जलं प्रावर्षत्।[4] वसिष्ठः प्रजारक्षणाय जलं प्रावर्षयत्। तद्यथा—

अवर्षति च पर्जन्ये सर्वभूतानि चासकृत्।
वसिष्ठो जीवयमास प्रजापतिरिव प्रजाः॥ शान्ति० २२६.२७

---

१. अयो० ११३.७–१७ २. अयोध्या० ११६.२१–२५
३. किष्किन्धा० ५२.२६, २७
४. महाभारते आरण्यकपर्वणि ११०.७। ऋष्यशृङ्गप्रभावात् जलवृष्टिर्बभूवानावृष्टिसंहाराय।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सप्तर्षिमण्डले प्रमुखोऽत्रिः स्वलोकसेवया प्रशस्यतमो विभायते। स पराशरस्य राक्षसयज्ञं न्यवारयत्।[1] स दिवा सूर्यो रात्रौ चन्द्रश्च भूत्वातिराजते स्म। स्वतेजसा पुना राक्षसान् भस्मीचकार सः। स सूर्यं तेजस्वितरं व्यधात्।[2]

वालखिल्या लोकार्थसाधकाः प्रतिभान्ति। तथाहि—

तेष्वेव हि निर्मलं सत्यं लोकार्थं तु प्रतिष्ठितम्।
लोकोऽयं धार्यते देवि तेषामेव तपोबलात्॥
महात्मनां तु तपसा सत्येन च शुचिस्मिते।
क्षमया च महाभागे भूतानां स स्थितिं विदुः॥
प्रजार्थमपि लोकार्थं महद्भिः क्रियते तपः।

अनु० १४२ अध्यायतः (गीताप्रेस-संस्करणे)

परोपकाराय तप इति अग्रभूमिस्तपस्विनाम्।

महाभारतीये युद्धे द्रोणाचार्यमधर्म-युद्धाद् विरमयितुं बहव ऋषयः समागताः।[3] ते तस्मै प्रोचुः—

अधर्मतः कृतं युद्धं समयो निधनस्य ते।
न्यस्यायुधं रणे द्रोण समीक्षास्मानवस्थितान्॥
नातः क्रूरतरं कर्म पुनः कर्तुमिहार्हसि॥ द्रोण० १६४.८९, ९०

सर्वान् राक्षसान् दाहयितुं पराशरो यं यज्ञं समारभत तं विरमयितुमत्रिः प्रयतते स्म।

ऋषीणां कृते नासीत् किञ्चित् कर्म क्षुद्रं प्राणिमात्रस्य सन्धारणाय। जाबालितनयो हारीतो घोषयति कादम्बर्याम्—अनाथपरिपालनं हि धर्मोऽस्मद्-विधानाम्। स शुकशावं नीवारकणनिकरेण फलरसेन चाजीवयत्।

ऋषीणां वरस्य शापस्य च प्रभावः प्रायशो लोकहिताय प्रवर्तते। दुष्कृत-परायणान् देवानपि ते शापभयेन कर्मणो विरमयन्तिस्म, सुजनांश्च सुकर्म-नियोगे प्रोत्साहयन्तिस्म। तथा हि महाभारत आदिपर्वणि—

ततः परमदुष्प्रापमन्यैर्ऋषिरुदारधीः।
समापिपयिषुः सत्रं तमत्रिः समुपागमत्॥ १७२.८

---

१. महाभारते आदि० १७२.८

२. अनु० १५६.९–१४ (गीताप्रेस)

३. ते महर्षय आसन्—विश्वामित्रः, जमदग्निः, भारद्वाजः, गौतमः, वसिष्ठः, कश्यपः, अत्रिः, सिकताः, गर्गाः, पृश्नयः, वालखिल्याः, मरीचिपाः, भृगवः, अङ्गिरसश्च। द्रोणपर्वणि १६४.८६–८८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

महाभारते नहुषस्य प्रकरणं विद्यते। स यज्ञे गवामालभनं चकार। तदनु—

ऋषयो यतयो ह्येतन्नहुषे प्रत्यवेदयन्।
भ्रूणहं नहुषं त्वाहुर्नते होष्यामहे हविः॥ शान्ति० २५४.४७

यथा महाभारतयुगे व्यास-विदुरादीनां रामायणायुगे वसिष्ठविश्वामित्रागस्त्यादीनां राजकीयप्रवृत्तिषु प्रभावः प्रावर्तत, तथैव परवर्ति युगेऽपि ऋषिकल्पानां महात्मनां प्रभावो राजकीय-प्रवृत्तिषु दृश्यते। तथा हि शिवाजी स्वामिना समर्थरामदासेन साशीर्वादं प्रोत्साहितो मुगलसम्राजः प्रतिद्वन्द्वीभूय हिन्दूसाम्राज्यं प्रतिष्ठापितवान् हिन्दूधर्मं चारक्षत्। उज्जयिनीपरिसरे तत्रासीत् स्वामी जदरूपो यस्य दर्शनं १६१७ ई० वत्सरे सम्राट् जहाँगीरो विषमामपि यात्रां सम्पाद्य दिवसद्वयं चकार।[1] सम्राडकबरो १६०१ ख्रीष्टाब्देऽसीरगढं विजित्योज्जयिनीं परावृत्य जदरूपस्य दर्शनं चकार। तस्य जदरूपस्य चित्रमेकमजयमेरु-(अजमेर) नगरे कृतमासीत् सम्राज आज्ञया। कुमारस्वामि-मतानुसारेण चित्रमिदं मुगलयुगस्य सर्वोत्तमा कलाकृतिरस्ति। सरटामसरो सूचयति यत् सम्राट् शासनविषयेषु यथा वश्यकं जदरूपस्य परामर्शं प्रार्थयते स्म।[2]

ऋषि-गणः

वैदिकर्षयस्तु यथावश्यकं युद्धपरायणा आसन्। तद्यथा कुत्स आङ्गिरस ऋग्वेद आत्मवृत्तं प्रथयति—

युष्माकं देवा अवसाहनि प्रिये३ऽभि तिष्ठेम पृत्सुतीरसुन्वताम्॥
१.११०.७
सातिं नो जैत्रीं सं महेत विश्वहा जामिमजामिं पृतनासु सक्षणिम॥
ऋ० १.१११.३

वानप्रस्थानां वैषम्याणि तैः संघीभूय राज्ञे निवेद्यापाकृतानि।[3] रामायणानुसारेण सर्वविधा वानप्रस्थाः, वैखानसाः, वालखिल्याः, तापसाः, मुनयः इत्यादयः

सर्वे ब्राह्म्या श्रिया युक्ता दृढयोग समाहिताः।
शरभङ्गाश्रमे राममभिजग्मुश्च तापसाः॥ अरण्ये ६.६

---

१. तुजक-जहाँगीरी नामके ग्रन्थे जहाँगीरस्य लेखः।
२. J. R. A. S. July. 1971.
३. रामायणेऽरण्यकाण्डे षष्ठसर्गतः।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ऊचुः परमधर्मज्ञमृषिसंघाः समागताः ।। ६.७
सोऽयं ब्राह्मणभूयिष्ठो वानप्रस्थगणो महान् ।
त्वन्नाथोऽनाथवद् राम राक्षसैर्हन्यते भृशम् ।। ६.१५

महाभारतस्यानुशासनपर्वणि मुनिसंघो वर्णितः —
यो धर्मो मुनिसंघस्य सिद्धिवादेषु तं वद ।। १३०.२०
परिपालय नः सर्वान् राक्षसेभ्यो नृपात्मज ।। अरण्ये ६.२०

पूर्वोक्तेन सन्दर्भेण ज्ञायते यद् ऋषयः पुरा सर्वथाहिंसिता नासन् । तेषां राक्षसेभ्यो रक्षणार्थं राजानः समुद्यता बभूवुः । रामायणेऽन्यत्रापि ऋषिगणस्य कृत एतादृशी राजकीयसहायता राक्षसेभ्य आत्मरक्षार्थं याचिता ।[1]

ऋषीणां गणानां प्रमुखः कुलपतिर्बभूव । कुलं तु गण एव ।[2] कतिपयगणा ब्राह्मणभूयिष्ठा आसन् । सुतीक्ष्णः कुलपतिरासीद् ऋषिसंघस्य ।[3] कतिपयऋषिसंघा भ्रमणशीला बभूवुः । तेषां भ्रमणं ज्ञानार्जनाय देशदर्शनाय च भवेन्नाम । सुतीक्ष्णः स्वाश्रमविषये सूचयति—

अयमेवाश्रमो राम गुणवान् रम्यतामिति ।
ऋषिसंघानुचरितः सदामूलफलैर्युतः ।। अरण्य० ७.१७

ऋषयः प्रायश संघे समूढास्तपश्चरन्ति स्म । विश्वामित्र ऋषिभिः सार्धं पुष्करतीर्थे तपोऽतप्यत ।[4] वसिष्ठ ऋषीणां गणैः सहायोध्यां समागत्य राज्यशासनं व्यवस्थापयितुमुपचक्रमे ।[5] दण्डकारण्ये मुनिसंघाः, ऋषिसंघाः, वानप्रस्थ-गणाश्चासन्[6] । महाभारते तपस्विनां, साध्यानां, देवानां, वसूनां, मरुतां च गणा विभाविताः ।[7]

---

१. अयोध्याकाण्डे ११६ तमसर्गतः ।
२. अभिनन्द्य समापृच्छ्य समाधाय च राघवम् ।
स जगामाश्रमं त्यक्त्वा कुलैः कुलपतिः सह ।। अयोध्या ११६.२४
३. अरण्यकाण्डे ७.१७
४. बालकाण्डे ६२.३
५. सभामिक्ष्वाकुनाथस्थ प्रविवेश महायशाः ।
सुधर्मामिव धर्मात्मा (वसिष्ठः) सगणः प्रत्यपद्यत ।। अयो० ८१.९,१०
ब्राह्मणान् क्षत्रियान् योधानमात्यान् गणवल्लभान् ।
क्षिप्रमानयताव्यग्राः कृत्यमत्ययिकं हि नः ।। ८१.१२
६. अरण्ये षष्ठसर्गे । वानप्रस्थगणा ब्राह्मण-भूयिष्ठा आसन् । ६.१५ ।
७. आरण्यक-पर्वणि १२५.१०–१३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

बौद्धजातकानुसारेण ऋषीणां समुदाया गणा इति प्रख्याता आसन्। कतिपयगणेषु ५०० ऋषय आसन्। प्रत्येकं गणस्य तत्र शास्तेति नामको निर्देशको बभूव।[1]

तपोवन-व्युष्टिः

वैदिककालत एव ऋषिमानसमरण्ये रममाणं दृश्यते। ऋग्वेदे कश्चिद् देवमुनिरण्ययानीं प्रीतमना वर्णयति—

वृषारवाय वदते यदुपावति चिच्चिकः।
आघाटिभिरिव धावयन्नरण्यानिर्महीयते ॥ २
उत गाव इवादन्त्युत वेश्मेव दृश्यते।
उत अरण्यानिः सायं शकटीरिव सर्जति ॥ ३
स्वादोः फलस्य जग्ध्वाय यथाकामं नि पद्यते ॥ ५
आञ्जनगन्धिं सुरभिं बह्वन्नामकृषीवलाम्।
प्राहं मृगाणां मातरमरण्यानिमशंसिषम् ॥ ६

दशममण्डले १४६ सूक्तम्

अथर्ववेदे हिमगिरिमरण्यं च प्रति रामणीयक आर्षभावः प्रकटितः। तद्यथा—

गिरयस्ते पर्वता हिमवन्तोऽरण्यं ते पृथिवि स्योनमस्तु। अथर्व० १२.१.११

एतेषु स्थलेषु तापसानामाश्रमाः प्रतिष्ठापिताः।

प्रशान्त-प्रदेशेषु प्रतिष्ठितानां वानप्रस्थाश्रमाणां चतुर्दिशं नैसर्गिकशान्तिः प्रगुणीकृता व्यराजत। तद्यथा महाभारते निरूपितम्—

ददर्श तत्र वेदीश्च संप्रज्वलितपावकाः।
कृताभिषेकैर्मुनिभिर्हुताग्निभिरुपस्थिताः ॥
वानेयपुष्पनिकरै - राज्यधूमोद्गमैरपि।
ब्राह्मेण वपुषा युक्ता युक्ता मुनिगणैश्च ताः ॥
मृगयूथैरनुद्विग्नैस्तत्र तत्र समाश्रितैः।
अशङ्कितैः पक्षिगणैः प्रगीतैरिव च प्रभो ॥
केकाभिर्नीलकण्ठानां दात्यूहानां च कूजितैः।
कोकिलानां च कुहरैः शुभैः श्रुतिमनोहरैः ॥
प्राधीतद्विजघोषैश्च क्वचित् क्वचिदलंकृतम्।
फलमूलसमुद्वाहैर्महद्भिश्चोपशोभितम् ॥

आश्रमवासिकप० ३४.७-११

---

१. ब्रह्मायुत्तजातक ३३६। परोसहजातक

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

धृतराष्ट्रस्य वानप्रस्थाश्रमः कुरुक्षेत्र आसीत् । पश्चात् स गङ्गाद्वारमगच्छत् ।[1]

रामायणानुसारेण दक्षिणभारते वानप्रस्थस्यागस्त्यस्याश्रमो रामेण दृष्टः । तद्यथा—

स्निग्धपत्रा यथा वृक्षा यथा क्षान्ता मृगद्विजाः ॥
आश्रमो नातिदूरस्थो महर्षेर्भावितात्मनः ॥ ११.७८
आश्रमो दृश्यते तस्य परिश्रान्तश्रमापहः ॥ ११.७९
प्राज्यधूमाकुलवनश्रीरमालापरिष्कृतः ।
प्रशान्तमृगयूथश्च नानाशकुनिनादितः ॥ ११.८०

ये वानप्रस्था ऋषय आश्रमं व्यवस्थाप्य शिष्यानध्यापयन्ति स्म, तेषामाश्रमेषु गावो व्यराजन्त ।[3]

सरस्वत्यास्तटे दधीचस्याश्रम आसीत्—

सरस्वत्याः परे पारे नानाद्रुमलतावृतम् ।
षट्पदोद्गीतनिनदैर्विघुष्टं सामगैरिव ।
पुंस्कोकिलरवोन्मिश्रं जीवंजीवकनादितम् ॥
सिंहव्याघ्रैर्महानादान्नदद्भिरनुनादितम् ।
अपरैश्चापि संलीनैर्गुहाकन्दरवासिभिः ॥
तेषु तेष्ववकाशेषु शोभितं सुमनोरमम् ।
त्रिविष्टपसमप्रख्यं दधीचाश्रममागमन् ॥

अरण्यक० ९८.१३-१७

सुभगस्थलेषु वानप्रस्थानां बहव आश्रमाः समुद्भूताः । ईदृशमासीत् दण्डकारण्यम्, यस्य विषये सुतीक्ष्णो रामं निवेदयति अरण्यकाण्डे—

पश्याश्रमपदं रम्यं दण्डकारण्यवासिनाम् ।
एषां तपस्विनां वीर तपसा भावितात्मनाम् ॥ ८.१२
सुप्राज्यफलमूलानि पुष्पितानि वनानि च ।
प्रशस्तमृगयूथानि शान्तपक्षिगणानि च ॥ ८.१३
फुल्लपङ्कजषण्डानि प्रसन्नसलिलानि च ।
कारण्डवविकीर्णानि तटानि सरांसि च ॥ ८.१४

---

१. कुरुक्षेत्रात् पिता तुभ्यं गङ्गाद्वारं ययौ नृप ॥ आश्रमवासिक प० ४५.७

२. अग्निं हुत्वा प्रदायार्घ्यमतिथीन् प्रतिपूज्य च
वानप्रस्थेन धर्मेण स तेषां भोजनं ददौ ॥ अरण्यकाण्डे १२.२७

३. शान्ति प० २३६.६ । वसिष्ठस्याश्रमे कामधेनुरासीत् । बालका० ५४ सर्गे ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

द्रक्ष्यसे दृष्टिरम्याणि गिरिप्रस्रवणानि च ।
रमणीयान्यरण्यानि मयूराभिरुतानि च ।। ८.१५

एतादृशे दण्डकारण्ये पुण्यशीलानामृषीणां कृत्स्नमाश्रममण्डलं द्रष्टुं रामः समुत्सुक आसीत् ।[१]

सुतीक्ष्णोऽगस्त्यभ्रातुराश्रमस्य परिसरं रामाय वर्णयति —

स्थलीप्रायवनोद्देशे पिप्पलीवनशोभिते ।
बहुपुष्पफले रम्ये नानाविहगनादिते ।।
पद्मिन्यो विविधास्तत्र प्रसन्नसलिलाशयाः ।
हंसकारण्डवाकीर्णाश्चक्रवाकोपशोभिताः ।।

अरण्यकाण्डे ११.३८, ३९

ऋषिसंघा इमे क्वचिदन्येषां राज्ञां, महर्षीणां देवादीनां चाभियोगेषु स्ववैचक्षण्यविशिष्टमाध्यस्थ्येन संघर्षप्रशमनं समादधुः ।[२]

परतो दण्डकारण्ये माण्डकर्णिमुनेराश्रम आसीत् । मतङ्गस्य ऋषिकुलं पम्पा-सरोवरस्य परमरमणीयेऽरण्यप्रदेशे मतङ्गवनेऽवस्थित आसीत् । तेषामृषीणां परिचारिणी श्रमणा शबरी रामदर्शनं यावत् तत्र चिरमावसथं चकार ।[३]

वसिष्ठो वानप्रस्थ-संस्थायाः कुलपतिर्बभूव । तस्य बहवः शिष्या आसन् ।[४] सोऽयमाश्रमो वाल्मीकिना रामायणे वर्णितः । तद्यथा —

वसिष्ठस्याश्रमपदं नानापुष्पलताद्रुमम् ।
नानामृगगणाकीर्णं सिद्धचारणसेवितम् ।।
देवदानवगन्धर्वैः किन्नरैरुपशोभितम् ।
प्रशान्तहरिणाकीर्णं द्विजसंघनिषेवितम् ।।
ब्रह्मर्षिगण-संकीर्णं देवर्षिगण-सेवितम् ।।
तपश्चरणसंसिद्धैरग्निकल्पैर्महात्मभिः ।।
सततं संकुलं श्रीमद्ब्रह्मकल्पैर्महात्मभिः ।
अब्भक्षैर्वायुभक्षैश्च शीर्णपर्णाशनैस्तथा ।।

---

१. अरण्यकाण्डे ८.६

२. बालकाण्डे ६०.१४–२४ । अत्र ऋषिसंघो विश्वामित्र-वसिष्ठ-देवादीनां संघर्षं समापयति ।

३. दृष्ट्वा देवोपमं राम स्वर्गलोकं गमिष्यति । अरण्य० ७३.१७
सा तपस्विनी 'विज्ञानेऽबहिष्कृतासीत् ।' अरण्य० ७४.१९

४. बालका० ५४.२३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

फलमूलाशनैर्दान्तैर्जितदोषैर्जितेन्द्रियैः ।
ऋषिभिर्वालखिल्यैश्च जपहोमपरायणैः ।।
अन्यैर्वैखानसैश्चैव समन्तादुपशोभितम् ।
बालकाण्डे ५१ सर्गतः

तत्रैका गौः कामधेनुरपरा च नन्दिनी आस्ताम् । तयोः संविधानेन विश्वामित्रस्य तस्य महासेनायाश्चातिथ्यं निष्पादितम् । मुनेर्जीवनाधारासीत् कामधेनुः । वसिष्ठो वर्णयति —

अस्यां हव्यं च कव्यं च प्राणयात्रा तथैव च ।
आयत्तमग्निहोत्रं च बलिहोमस्तथैव च ।
स्वाहाकारवषट्कारौ विद्याश्च विविधास्तथा । बाल० ५३ सर्गतः ।

हिमवत्पार्श्वे[1] तत्रासीद् भगीरथस्य तपोभूमिर्यत्र हिमालयस्य चारुतमा व्युष्टिः समुदितासीत्—

तद्यथा कविर्हिमवन्तं चित्रयति प्रसङ्गेऽस्मिन्—

शृङ्गैर्बहुविधाकारैर्धातुमद्भिरलंकृतम् ।
पवनालम्बिभिर्मेघैः परिष्वक्तं समन्ततः ।। ५
नदीकुञ्जनितम्बैश्च सोदकैरुपशोभितम् ।
गुहाकन्दरसंलीनैः सिंहव्याघ्रनिषेवितम् ।। ६
शकुनैश्च विचित्राङ्गैः कूजद्भिर्विविधा गिरः ।
भृङ्गराजैस्तथा हंसैर्दात्यूहैर्जलकुक्कुटैः ।। ७
मयूरैः शतपत्रैश्च कोकिलैर्जीवजीवकैः ।
चकोरैरसितापाङ्गैस्तथा पुत्रप्रियैरपि ।। ८
जलस्थानेषु रम्येषु पद्मिनीभिश्च सङ्कुलम् ।
सारसानां च मधुरैर्व्याहृतैः समलंकृतम् ।। ९
क्वचित्कनक-संकाशं क्वचिद्रजतसन्निभम् ।
क्वचिदञ्जनपुञ्जाभं हिमवन्तमुपागमत् ।। १०
आरण्यकपर्वणि १०७ अध्यायतः ।

---

१. मेरुपार्श्वेऽयमाश्रमः समुत्थित इति आदिपर्वणि ९३.६
तस्याश्रमपदं पुण्यं मृगपक्षिगणान्वितम् ।
मेरोः पार्श्वे नगेन्द्रस्य सर्वर्तुकुसुमावृतम् ।।
स वारुणिस्तपस्तेपे तस्मिन् भरत-सत्तम ।
वने पुण्यकृतां श्रेष्ठः स्वादुमूलफलोदके ।। ९३.७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

'वानप्रस्थाश्रमान् परितः सर्वं सुन्दरं सौम्यं सुखदं च भवतु' इत्येतदुद्दिश्य तापसैर्वनमेव स्वसंरक्षणेनोपवनीकृतम् । केन प्रकारेण तत्सर्वं निष्पादितमिति मतङ्गस्य कर्मयोगेन प्रकटीभवति । तेन दृष्टमासीद्यद् वाली दुन्दुभेः शवं तस्याश्रमे क्षिप्तवान् । एतादृशं बीभत्सं परिहर्त्तुं तेन घोषणाकृता—

क्षिपता पादपाश्चे मे सम्भग्नाश्चासुरीं तनुम् ।
समन्तादाश्रमं पूर्णं योजनं मामकं यदि ।
आगमिष्यति दुर्बुद्धिर्व्यक्तं स न भविष्यति ॥
वनेऽस्मिन् मामके नित्यं पुत्रवत् परिरक्षिते ।
पत्राङ्कुरविनाशाय फलमूलभवाय च ।
दिवसश्चाद्य मर्यादा यं द्रष्टा श्वोऽस्मि वानरम् ।
बहुवर्षसहस्राणि स वै शैलो भविष्यति ॥
किष्किन्धाकाण्डे ११.५४-५८

उपकिष्किन्धं सप्तजनाश्रमस्य परिवेशो रमणीयतामावहत् । तद्यथा द्रुमषण्डवनं दृष्ट्वा रामः सुग्रीवमब्रवीत्—

एष मेघ इवाकाशे वृक्षषण्डः प्रकाशते ।
मेघसंघात-विपुलः पर्यन्तकदलीवृतः ॥

सुग्रीव आचचक्षे—

एतद् राघव विस्तीर्णमाश्रमं श्रमनाशनम् ।
उद्यानवनसम्पन्नं स्वादुमूलफलोदकम् ॥
विभूषणरवाश्चात्र श्रूयन्ते सकलाक्षराः ।
तूर्यगीतस्वनश्चापि गन्धो दिव्यश्च राघव ॥
त्रेताग्नयोऽपि दीप्यन्ते धूमो ह्येष प्रदृश्यते ।
वेष्टयन्निव वृक्षाग्रान् कपोताङ्गारुणो घनः ॥
एते वृक्षाः प्रकाशन्ते सूर्यसंसक्तमस्तकाः ।
मेघजालप्रतिच्छन्ना वैडूर्यगिरयो यथा ॥[1]

बौद्धसाहित्यानुसारेण नैष्ठिकब्रह्मचारिणः सहस्रश ऋषिप्रवज्यां गृहीत्वा हिमालयप्रदेशे प्रतिवसन्ति स्म । महर्षयः शिष्यैर्ऋषिभिः सह काशीं यावत् पर्यटन्ति स्म ।[2]

---

१. किष्किन्धाकाण्डे १३.१४–२४

२. केसव-जातकानुसारेण काशीराष्ट्रवासी कल्पकुमारो ब्राह्मणः तक्षशिलायां सर्वविद्यासु पारङ्गतो हिमालये ऋषिप्रवज्यामनुवर्तमानो महर्षिकेशवस्य प्रधानशिष्यो बभूव । केशवस्य शिष्या ५०० प्राया आसन् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

रमते मानसं भासवर्णिततपोवने—

विश्रब्धं हरिणाश्चरन्त्यचकिता देशागतप्रत्यया
वृक्षाः पुष्पफलैः समृद्धविटपाः सर्वे दयारक्षिता ।
भूयिष्ठं कपिलानि गोकुलधनान्यक्षेत्रवत्यो दिशो
निःसन्दिग्धमिदं तपोवनमयं धूमो हि बह्वाश्रयः ।। स्वप्न० १.१२

शाकुन्तले वर्णितः कालिदासेनात्मदृष्टो मारीचाश्रमोऽदितिपरिवर्धित-मन्दारवृक्षः, स्वर्गादधिकतरं निर्वृति-स्थानम्, यत्र दर्शको राजापि अमृत-ह्रदेऽवगाहत इवः —

प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने
तोये काञ्चनपद्मरेणु-कपिशे पुण्याभिषेकक्रिया ।
ध्यानं शिल्पशिलातलेषु विबुधस्त्रीसन्निधौ संयमः
यत्काङ्क्षन्ति तपोभिरन्यमुनयस्तस्मिंस्तपस्यन्त्यमी ।। ७.१२

कादम्बर्यां महाकविर्बाणः स्वीयेनासाधारणप्रतिभोन्मिषितचक्षुषा दृष्टं वानप्रस्थानां पारम्परिकतपोवनं निर्वर्णयति । तदभिरामकं सर्वं संक्षेपेण प्रस्तूयते—

'सन्निहितकुसुमफलैः, उल्लसितचूतरेणुपटलैः संसक्तपादपैरुपगूढम्, दण्डकारण्यस्थलीभिरुपशोभितप्रान्तम्, आगृहीतसमित्कुशकुसुममृद्भिरध्ययनमुखरशिष्यानुगतैः सर्वतः प्रविशद्भिर्मुनिभिरशून्योपकण्ठम्, उत्कण्ठिशिखण्डिमण्डलश्रूयमाणजलकलशपूरणध्वानम्, आसन्नवर्तनीभिस्तपोधनसम्पर्कादिवापगतकालुष्याभिस्तरङ्गपरम्परासंक्रान्तरविबिम्बपंक्तिभिस्तापसदर्शनागतसप्तर्षिमालाविगाह्यमानाभिरिव विकचकुमुदवनम्, ऋषिजनमुपासितुमवतीर्णं ग्रहगणमिव निशासूद्वहन्तीभिर्दीर्घिकाभिः परिवृतम्, अनिलावनमितशिखराभिः प्रणम्यमानमिव वनलताभिः, अनवरतमुक्तकुसुमैरभ्यर्च्यमानमिव पादपैः, आबद्धपल्लवाञ्जलिभिरुपास्यमानमिव विटपैः उटजाजिरप्रकीर्णशुष्यच्छ्यामाकम् उपसंगृहीतामलक-लवली-कर्कन्धू-कदली-लकुच-चूत-पनसतालीफलम्, अध्ययन-मुखरवटुजनम्, अनेकसारिकोद्घुष्यमाणसुब्रह्मण्यम्, आसन्नवापीकलहंसपोतभुज्यमाननीवारवलिम्, परिचितशाखामृगकराकृष्टनिष्कास्यमानप्रवेश्यमानजरदन्धतापसम्, ऋषिजनार्थमेणकैर्विषाणशिखरोत्खन्यमानविविधकन्दमूलम्, अम्बुपूर्णपुष्करपुटैर्वनकरिभिरापूर्यमाणविटपालवालम्, उपजातपरिचयैः कलापिभिः पक्षपुटपवनसंधुक्ष्यमाणमुनिहोमहुताशनम्, उपचर्यमाणातिथिवर्गम्, पूज्यमानपितृदैवतम्, अर्च्यमानहरिहरपितामहम्, उद्दिश्यमानश्राद्धकल्पम्, व्याख्यायमानयज्ञविद्यम्, आलोच्यमान-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

धर्मशास्त्रम्, वाच्यमानविविधपुस्तकम्, विचार्यमाणसकलशास्त्रार्थम्, आरभ्यमाणपर्णशालम्, आबध्यमानध्यानम्, साध्यमानमन्त्रम्, अभ्यस्यमानयोगम्, उपह्रियमानवनदेवतावलिम्, निर्वर्त्यमानमौञ्जमेखलं, क्षाल्यमानवल्कलम्, उपसंगृह्यमाणसमिधम्, उपसंस्क्रियमाणकृष्णाजिनम्, सत्क्रियमाणपरिव्राजकम्, मातङ्गकुलाध्यासितमिव पवित्रम्, सदासन्निहिततरुगहनान्धकारम्, अतिरमणीयमपरमिव ब्रह्मलोकमाश्रममपश्यम् ।[1]

कथासरित्सागरानुसारेण क्वचिद् वानप्रस्थानां कृते सफलस्निग्धपादपा एवाश्रमा आसन् ।[2]

भारतंपृष्ठा आश्रमाः

प्राचीनकाले वानप्रस्थानामाश्रमाणां स्थितिर्भारत आ हिमालयात् समुद्रपर्यन्तं सर्वत्र दृश्यते । बौद्धजातक-कथानुसारेण बहवो जना ऋषिप्रव्रज्यां स्वीकृत्य प्रायः हिमालयप्रदेशेऽगच्छन् । तत्रासंख्या आश्रमा अवस्थिता बभूवुः । तेषु आश्रमेषु प्रधाना ऋषयः शिष्यैः सह न्यवसन् ।

हिमालये परमविख्यातो नरनारायणयोराश्रमो बदर्यामासीत् । सोऽयं पर्वतो वानप्रस्थानां तपोभिः शाश्वतं पावनतां विधत्ते ।[3] एतस्यां पर्वतभूमौ भगीरथः 'जगाम हिमवत्पार्श्वे तपस्तप्तुं नरेश्वर' । आर० १०७.३
तत्र वर्षसहस्रं तपसा गङ्गां प्रसाद्य पुनः तस्या धारणाय—

'कैलासं पर्वतं गत्वा तोषयामास शङ्करम्' । आर० १०७.२४

उपमेरु वसिष्ठस्याश्रम आसीत् ।[4]

हिमालयप्रदेशे नन्दातट ऋषभस्याद्भुतैव तपोभूमिरासीत् । तत्र देवानामृषीणां च वसतिर्व्यराजत ।[5] समीपवर्तिप्रदेशे तत्रासीत् कौशिक्यास्तटे विश्वामित्रस्य तपोभूमिः । नातिदूरमासीत् ऋष्यशृङ्गस्याश्रमः ।

महर्षिभिः सर्वत्राध्युषितं कश्मीरमण्डलं महापुण्यात्मकमासीत् । महाभारतानुसारेण—

अत्रोत्तराणां सर्वेषामृषीणां नाहुषस्य च ।
अग्नेश्चात्रैव संवादः काश्यपस्य च भारत ।। आर० १३०.११

---

१. कादम्बरी—जाबाल्याश्रमवर्णनम्, पृ० ८३–८९
२. कथा० ५.२.१३
३. 'तपस्विशरणो हिमालयः' इति किष्किन्धाकाण्डे ११.१७
४. आदि० ९३.६
५. स्वाध्यायघोषश्च तथा श्रूयते न च दृश्यते । आरण्यक० १०९.४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मानसरोवरमार्गे पर्वतोपत्यकायां परशुरामस्य साधनाभूमिर्व्यराजत।[1] परवर्ति-सरोवर उज्जानको वसिष्ठस्य साधना-स्थली बभूव।[2]

नर्मदामनु च्यवनस्याश्रमो व्यराजत।[3] वितस्तामनु महर्षीणां महती वसतिराबभूव।[4] अनुयमुनं जलोपजलयोर्मध्ये शिविप्रदेश उशीनरराज्ये मुनयो दृश्यन्ते स्म।

वाल्मीकिरामायणानुसारेण गङ्गातमसयोः सङ्गमे प्रयाग-समीपं वाल्मीकेराश्रम आसीत्। गङ्गायमुनयोः सङ्गमे भरद्वाजाश्रमो व्यराजत। गङ्गाया दक्षिणतटे काशीतः परं विश्वामित्रस्य सिद्धाश्रमोऽवस्थितः।[5] तदनन्तरं गङ्गासरयूमध्ये महादेवस्य पुण्याश्रम आसीत्।[6] वत्सभूमिरुपप्रयागं पुण्यशीलानां महात्मनां तापसानां सिद्धचारणसेविता बभूव।[7]

१-२. आरण्यके १३०.१२,१४

३. आरण्यकपर्वणि १२१.२१

४. वितस्तां पश्य राजेन्द्र सर्वपापप्रमोचनीम्।
महर्षिभिश्चाध्युषितां शीततोयां सुनिर्मलाम्॥ वन० ८२.८९ गीता प्रेस

५. इह राम महाबाहो विष्णुर्देवनमस्कृतः।
वर्षाणि सुबहूनीह यथायुगशतानि च॥
तपश्चरणयोगार्थमुवास सुमहातपाः।
एष पूर्वाश्रमो राम वामनस्य महात्मनः॥
सिद्धाश्रम इति ख्यातः सिद्धो ह्यत्र महातपाः।
मयापि भक्त्या तस्यैव वामनस्योपभुज्यते॥ बालकाण्ड २९ तमसर्गतः

तत्र बहवः सिद्धाश्रमनिवासिनो मुनयोऽवसन्। अनेन ज्ञायते यत् परम्परया नैकयुगावस्थ आसीदयमाश्रमः।

६. तौ प्रयान्तौ महावीर्यौ दिव्यां त्रिपथगां नदीम्।
ददृशाते ततस्तत्र सरय्वाः सङ्गमे शुभे।
तत्राश्रमपदं पुण्यमृषीणां भावितात्मनाम्।
बहुवर्षसहस्राणि तप्यतां परमं तपः॥
तस्या (शिवस्य) यमाश्रमः पुण्यस्तस्येमे मुनयः पुरा।
शिष्या धर्मपरा वीर तेषां पापं न विद्यते॥
न्यवसन् सुसुखं तत्र कामाश्रमपदे तथा। बालकाण्डे चतुर्विंशसर्गतः।

अयमाश्रमोऽतिप्राचीन आसीत् परम्परया तपोधनैरुपभुक्तः।

७. उद्योगप० १८७.२३। अम्बेति ख्याता तपस्विनी भारतस्य विविधभागेष्वस्थितेषु नन्दाश्रमे, उलूकाश्रमे, च्यवनाश्रमे, कौशिकाश्रमे, माण्डव्याश्रमे, दिलीपाश्रमे, रामह्रदे, गार्ग्याश्रमे च तीव्रतपसा गात्राणि आप्लावयत। उद्योगे १८७.२५–२८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

रामः प्रयागतश्चित्रकूटमगमत् । मार्गे बहूनामृषीणामाश्रमा अवस्थिता आसन् ।[1] चित्रकूटे पुनर्मुनीनां महती वसतिर्बभूव ।

मुनयश्च महात्मानो वसन्त्यस्मिञ्शिलोच्चये । अयो० ५६.१५

तदा वाल्मीकेराश्रमस्तत्रासीत् ।[2] भरतस्तापसानामाश्रमान् चित्रकूटे परिलक्ष्य शत्रुघ्नं दर्शयति—

तापसानां निवासोऽयं व्यक्तं स्वर्गपथोऽनघ ॥ अयो० ९३.१८

वनेऽग्निधूमं दृष्ट्वा जना भरतं सूचयन्ति—

अन्ये रामोपमाः सन्ति व्यक्तमत्र तपस्विनः ॥ अयो० ९३.२३

तत्र मन्दाकिनी ऋषीणामवगाहनाय प्रशस्यं प्रावहत् ।[3] इयं मन्दाकिनी विधूतकल्मषैः सिद्धैर्नित्यविक्षोभितजला शुशुभे ।

चित्रकूटस्थर्षीणां कश्चिन्महर्षिः कुलपतिर्बभूव ।[4] स राक्षसेभ्यस्त्रस्तः स्वकुलस्य ऋषिभिः सह नातिदूरमश्वमुनेराश्रमं प्रत्यगच्छत् ।[5]

चित्रकूटप्रदेशे मन्दाकिन्यास्तटेऽत्रेर्महर्षेराश्रमः पुराणेतिहासविश्रुतो रामाय स्वागताग्रभूमिर्विराजते स्म ।

यथाकाशे सूर्यमण्डलं विभाति तथैव दण्डकारण्ये परमर्षिभिरधिष्ठितं तापसाश्रममण्डलं चकासांचक्रे ।[6]

दण्डकारण्ये शरभङ्गस्य,[7] सुतीक्ष्णस्य[8], माण्डकर्णेः, अगस्त्यस्य च आश्रमा आसन् । तदन्तरं नैसर्गिकविभवमण्डिते समुद्रतटेऽद्वितीयमेवाश्रममण्डलं व्यराजत, यत्रात्यन्तनियताहाराः परमर्षयो वसन्ति स्म ।[9] सुभद्रवटस्याध-

---

१. पन्थानमृषिभिर्जुष्टं चित्रकूटस्य तं ययुः । अयो० ५६.४

२. अभिगम्याश्रमं सर्वे वाल्मीकिमभिवादयन् । ५६.१६

३. जटाजिनधराः काले वल्कलोत्तरवाससः ।
ऋषयस्त्ववगाहन्ते नदीं मन्दाकिनीं प्रिये ॥ अयो० ९५.६

४. अयो० ११६.४ । सोऽयं कुलपतिः 'जरया वृद्धस्तपसा च जरां गतः' इत्यनेन संन्यासस्यैतादृशानां कृते विकल्प एव प्रतिभाति रामायणयुगे ।

५. बहुमूलफलं चित्रमविदूरादितो वनम् ।
अश्वस्याश्रममेवाहं श्रयिष्ये सगणः पुनः ॥ ११६.२०
स जगामाश्रमं त्यक्त्वा कुलैः कुलपतिः सह । ११६.२४

६. अरण्यकाण्डे १.१–९ ७. अरण्यकाण्डे ५.४

८. अरण्यकाण्डे ५.३४

९. तत्र परमर्षिभिः सह सिद्धाः वैखानसाः, वालखिल्याश्च प्रतिवसन्ति स्म । अरण्यकाण्डे ३५ सर्गे

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्ताद् बहुविधवानप्रस्थाश्रमाणां शरणमासीत् ।[1] परतः समुद्रतटे मारीचस्याश्रम आसीत् ।[2]

महर्षिमतङ्गस्याश्रमः पम्पासरोवरतटमनु व्यराजत । तत्र स स्वशिष्यैर्ऋषिभिः सह न्यवसत् ।[3]

किष्किन्धातो नाति दूरमासीत् सप्तजनाश्रमः । अत्र सप्तजना नाम मुनयः संशितव्रता अतप्यन्त ।[4]

दक्षिणस्योदधेस्तीरे निशाकरमुनेराश्रम आसीत् ।[5] महर्षेर्दधीचस्याश्रमः सरस्वत्यास्तीरेऽवस्थितोऽभवत् । तत्र देवाः —

नारायणं पुरस्कृत्य दधीचस्याश्रमं ययुः ।
सरस्वत्याः परे पारे नानाद्रुमलतायुतम् ।। आरण्यक० ९८.१३

महाभारतनुसारेण दक्षिणदिशायां गोदावरी नदी तापसाचरिता बभूव । तथैव वेणा भीमरथी च नद्यौ तापसालयभूषिते आस्ताम् । तत्र माठरवनेऽगस्त्यस्याश्रमो बभूव । पिण्डारक-नामके स्थाने तापसास्तपोऽतप्यन्त । सुराष्ट्रे तत्रासीत् उज्जयन्तनामकं तपोवनं सत्वरफलदायकमिति विश्रुतम् । तापसानामरण्यानि प्रवेण्या उत्तरमार्गेऽवस्थिता आसन् । ताम्रपर्णी-समीपं देवानां तपोभूमिर्व्यराजत । तत्र गोकर्णतीर्थमासीत् ।[6]

उत्कल-प्रदेशे वैतरणी-नद्या गिरिशोभित उत्तरतीरे ऋषीणामाश्रमा आसन् ।[7] महेन्द्रपर्वते भृगुवसिष्ठकाश्यपकुलानां तापसा अवसन् ।[8]

वानप्रस्थानां पीडकास्तेषां पराभवश्च

विषमस्थितिष्विमे वानप्रस्था ब्रह्मर्षयो विवशीकृता अयुध्यन्त । तेषु वसिष्ठोऽग्रगण्यः । शत्रुभूतान् विश्वामित्र-पुत्रान् स हुङ्कारेण ददाह ।[9] किंचित् कालानन्तरं महादेवाद् धनुर्वेदं साङ्गोपाङ्गोपनिषदं सरहस्यं लब्ध्वा

१. अरण्यकाण्डे ३५.२७–३०
२. अरण्यकाण्डे ३५.३७–३८
३. अरण्यकाण्डे ७३.२३
४. किष्किन्धाकाण्डे १३.१८–२८
५. किष्किन्धाकाण्डे ६०.७,८
६. महाभारते आरण्यकपर्वणि ८६ अध्यायतः
७. आरण्यकपर्वणि ११४.४
८. आरण्यकप० ११५.२
९. दृष्ट्वा निषूदितं सैन्यं वसिष्ठेन महात्मना ।
विश्वामित्र-सुतानां तु शतं नानाविधायुधम् ।।
अभ्यधावत् सुसंक्रुद्धो वसिष्ठं जपतां वरम् ।
हुङ्कारेणैव तान् सर्वान् निर्ददाह महानृषिः ।। बाल० ५५.५६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विश्वामित्रो वसिष्ठस्याश्रमं भस्मीचकार। रोषाविष्टो वसिष्ठः स्वदण्डेन विश्वामित्रं परावर्तयत्।[1]

विश्वामित्रस्य वसिष्ठेन महायुद्धं कामधेन्वर्थं प्राचलत्। कामधेनोर्दिव्य-प्रभावेण परास्त एव विश्वामित्रः क्षत्रं परित्यज्य ब्राह्मणत्वं लब्धुं तपस्तेपे।[2] वसिष्ठस्य होमधेनुं प्राप्तुं द्योनामको वसुः प्रायतत। स तां चोरयामास। वसिष्ठेन शप्तः स देवलोकात् पतितो मानवलोकेऽवतरितो भीष्मो बभूव।[3]

वसिष्ठपौत्रस्य पराशरस्य राक्षसयज्ञो निशिचराणां विनाशाय सुप्रथितोऽस्ति। तद्यथा महाभारते—

ततो वृद्धांश्च बालांश्च राक्षसांश्च महामुनिः।
ददाह वितते यज्ञे शक्तेर्वधमनुस्मरन्॥ आदि० १७२.३

ईदृशी विषमा स्थितिर्नैकस्थलेषु दृश्यते यद् वानप्रस्थास्ताडिताः, पीडितास्तपःकर्मसु विहताश्च सन्ति। तथाहि महाभारतानुसारेण—

ते (कालेयाः) रात्रौ समभिक्रुद्धा भक्षयन्ति सदा मुनीन्।
आश्रमेषु च ये सन्ति पुण्येष्वायतनेषु च॥ आर० १००.२
वसिष्ठस्याश्रमे विप्रा भक्षितास्तैर्दुरात्मभिः।
अशीतिशतमष्टौ च नव चान्ये तपस्विनः॥ १००.३
च्यवनस्याश्रमं गत्वा पुण्यं द्विजनिषेवितम्।
फलमूलाशनानां हि मुनीनां भक्षितं शतम्॥ १००.४
भरद्वाजाश्रमे चैव नियता ब्रह्मचारिणः।
वाय्वाहाराम्बुभक्षाश्च विंशतिः सन्निपातिताः॥ १००.५
कलशैर्विप्रविद्धैश्च स्रुवैर्भग्नैस्तथैव च।
विकीर्णैरग्निहोत्रैश्च भूर्बभूव समावृता॥ १००.१०
निःस्वाध्यायवषट्कारं नष्टयज्ञोत्सवक्रियम्।
जगदासीन्निरुत्साहं कालेयभयपीडितम्॥ १००.११

---

१. आग्नेयास्त्रो विश्वामित्रो ब्रह्मदण्डधरश्च वसिष्ठो विवदेते।

वसिष्ठः —क्षत्रबन्धो स्थितोऽस्म्येष यद् बलं तद् विदर्शय।
क्व च ते क्षत्रिय-बलं क्व च ब्रह्मबलं महत्॥

विश्वामित्रस्य वारुण-रौद्रैन्द्र-पाशुपत-जृम्भणादि ब्रह्मास्त्रं यावत् शस्त्रास्त्राणि वसिष्ठस्य ब्रह्मदण्डेन ग्रस्तानि। वसिष्ठस्य विजयस्य घोषणा मुनिभिः कृता—

निगृहीतस्त्वया ब्रह्मन् विश्वामित्रो महाबलः।
अमोघं ते बलं श्रेष्ठ लोकाः सन्तु गतव्यथाः॥ बाल० ५६.२१

२. आदिपर्वणि १६५.२८–४४ ३. आदिप० ९३.९–४४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

न केवलमसुरा अपि तु नृपतयोऽपि क्वचिद् ऋषिभिः सह वैमनस्यमुदवहन्। तत्रासीत् पुरूरवा यो नैमिषेयर्षीणा कृते विश्वकर्मणा विरचितां स्वर्णमयीं यज्ञवेदिं ग्रहीतुमुदसहत। एवं प्रोत्तेजितैर्मुनिभिः स राजा कुशवज्रैर्हतः।[1]

कपिलः सगरस्य पुत्रैरनादृतस्तान् चक्षुस्तेजसा ददाहेति महाभारतीया कथा।[2] ऋषीणां हन्तासीत् कार्तवीर्यः। तस्योपद्रवोपघातिता ऋषयो विष्णव इदं प्रकरणं निवेदयामासुः।

च्यवनस्य पीडिका शर्यातेः कन्या बभूव। तया सहोद्वाहेनैव मुनेः प्रतिशोधः प्रतिपन्नः।[3] अस्मिन् प्रकरणे इन्द्रस्यापि तमृषिं प्रति दुर्व्यवहारः फलति स्म। इन्द्रस्य मन्तव्यं वज्रप्रहारचेष्टां च ऋषिणोत्पादिता कृत्या विफलीचकार।[4]

महापीडकौ ध्वंसकौ बभूवुर्महाभारतवर्णितदुर्णयौ सुन्दोपसुन्दौ—

आश्रमेष्वग्निहोत्राणि ऋषीणां भावितात्मनाम्।
गृहीत्वा प्रक्षिपन्त्यप्सु विश्रब्धाः सैनिकास्तयोः॥ १४
पृथिव्यां ये तपःसिद्धा दान्ताः शमपरायणाः।
तयोर्भयाद् दुद्रुवुस्ते वैनतेयादिवोरगाः॥ १७
सिंहौ भूत्वा पुनर्व्याघ्रौ पुनश्चान्तर्हितावुभौ।
तैस्तैरुपायैस्तौ क्रूरावृषीन् दृष्ट्वा निजघ्नतुः॥

आदिपर्वणि २०२ तमाध्यायतः।

अस्यां स्थितौ देवर्षयः, परमर्षयः, महर्षयश्च पितामहाय ब्रह्मणे सुन्दोपसुन्दयोः कर्म सर्वमेव शशंसिरे।[5] ब्रह्मणः कूटनीतिचक्रेण तिलोत्तमया मोहितौ तावन्योन्यमभिजघ्नतुः।

ऋषयः परपीडकाः

न सर्वथा ऋषिभिररिषड्वर्गो वशीकृत आसीत्। अकारणमपि कुत्रचित्तेषां हिंसा-प्रवृत्तिरुदजृम्भत इति स्खलनमेव प्रतिभाति तेषाम्। महाभारते च्यवनो कुशिकवंशविनाशार्थं भृशं यतत इति वर्णितम्। च्यवनो कापटिकवृत्त्या—

दग्धुकामः कुलं सर्वं कुशिकानां तपोधनः।
च्यवनः समनुप्राप्य कुशिकं वाक्यमब्रवीत्।
वस्तुमिच्छा समुत्पन्ना त्वया सह मयानघ॥ अनुशासन० ५२.९-१०

---

१. वायुपुराणे २.१४–२०
२. आरण्यकपर्वणि १०६.३
३. आरण्यकपर्वणि १२२.२५
४. आरण्यकप० १२४–१२५ अध्यायतः।
५. आदिपर्वणि २०४.२५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भवतु नाम परीक्षार्थं यन्महातपस्वी दुर्वासाः कृष्णस्यातिथिर्बभूव नैकविधिना स कृष्णं रुक्मिणीं चापीडयत् ।

वानप्रस्थानन्तरं गृहाश्रमानन्तरं वास्ति किमपि अवसेयमिति महाभारते जैगीषव्यासितदेवलयोराख्याने सरसं व्यावृत्तम् ।[1] तत्रासितदेवलो गृहाश्रम एव तपोधनो योगशक्तिमवाप्तवानासीत् । स जैगीषव्यस्य तपसो योगजं महाप्रभावं परिलक्ष्य तं च संन्यासयोगं विनानवाप्तव्यं ज्ञात्वा संन्यासदीक्षामुरीकर्त्तुं दृढनिश्चयो बभूव । प्रकरणेऽस्मिन् कविः संन्यासस्य त्रुटीरपि परिकल्पते । असितस्य संन्यास-ग्रहणाभिप्रायस्य पक्षविपक्षयोर्मार्मिकतत्त्वदर्शनं तेन समुत्थापितम् । तद्यथा व्यासो निदर्शयति —

संन्यासकृतबुद्धिं तं भूतानि पितृभिः सह ।
ततो दृष्ट्वा प्ररुरुदुः कोऽस्मान् संविभजिष्यति ॥ शल्य० ४९.५५

इदं श्रुत्वा देवलः संन्यास-प्रवृत्तिं व्यजहात् । किन्तु तदनन्तरं करुणतमं रोदनं तत्राश्रूयतौषधीनामधोविधम्—

पुष्पाण्योषधयश्चैव रोरूयन्ते सहस्रशः ।
पुनर्नो देवलः क्षुद्रो नूनं छेत्स्यति दुर्मतिः ॥

तत्र प्रश्न आसीदसितस्य समाधानाय—

मोक्षे गार्हस्थ्यधर्मे वा किं नु श्रेयस्करं भवेत् ।
त्यक्त्वा गार्हस्थ्यधर्मं स मोक्षधर्ममरोचयत् ॥

आधुनिकयुगे वानप्रस्थः

अद्यापि न केवलं भारतेऽपि तु विदेशेष्वपि वानप्रस्थजीवनस्योपयोगिता मनीषिभिरनुभूयते । जर्मनदेशस्य डा० ग्राफ-कार्लफ्रीड-डर्कहीमः पश्चिमजर्मनप्रदेशस्य ब्लैकफारेस्टे (कृष्णवने) विश्वविश्रुतं वानप्रस्थाश्रमं स्थापितवानस्ति ।[2] स तु प्रथमजर्मनमहायुद्धे सेनाचरो बभूव । पश्चाद्दर्शनशास्त्रं मनोविज्ञानं चाधीत्य कतिपय-विश्वविद्यालयेषु प्राचार्योऽभवत् । द्वितीयमहायुद्धानन्तरं पुनः जर्मनीदेशे विश्वविद्यालयेषु प्राध्यापकपदमस्वीकृत्य स्वजीवनस्य शेषकालमर्जितज्ञानानुरूपं वानप्रस्थचर्यं चरन् व्यतीयाय ।[3]

---

१. शल्यपर्वणि ४९ तमाध्यायतः ।

२. डर्कहीम महोदयो १९७४ ख्रीष्टाब्दे नवदिल्लीनगर्यां जवाहरलाल-स्मारकभाषणमालायां 'योरपस्याधुनिकाध्यात्मे भारतीयः प्रभावः' इति विषयमधिकृत्य प्रावोचत् ।

3. He subsequently returns to West Germany in order to pursue his own line of thought and develop his own Āśrama at Todmoos which has become a centre for men and women from all over the world who want to discover themselves.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

जम्बूकश्मीरराज्यस्य युवराजः कर्णसिंहो वानप्रस्थ-जीवनस्य भूयिष्ठमाकर्षणं मन्यमानः स्वमनीषां प्राकटयत्—I cherish a desire in the recess of my heart to one day build myself a small aśrama in such surroundings where with the body and mind made pure and free from the tentacles of desire and fear, ego and attachment, one can concentrate upon the unalloyed purity of nature and thereby perhaps achieve spiritual illumination. When I am able to fulfil my desire, I can think of no better spot than where I am now sitting overlooking this placid lake.[1]

एतत्सर्वं स मार्गस्थशेषनागकासारसमाश्रितस्य भक्तियोगनिषण्ण-ब्रह्म-विष्णु-शिवरूप-हिमगिरिशिखरत्रयस्य क्रोडे ध्यानावस्थितदिव्यतामनुभवन्नुदीरयति ।

नागरजीवनस्य ग्रामजीवनस्य वा भवति कश्चिन्मानदण्डो यस्य प्रतिपालनेन तत्रत्यसमाजे जनाः सुखं प्रतिष्ठां चार्हन्ति । लौकिकविभवेन साध्यस्य कामवर्गस्य प्रतिपत्तये तत्र प्रायशः समारम्भा विरच्यन्ते, अनुष्ठीयन्ते च । नैतावता शाश्वतपरानन्दं परिपश्यन् नागरिकं ग्रामिकं च जीवनपथं परित्यज्य विरक्तो विद्वान् कंचिदुत्तरपथं समीहमानो गृहं परित्यज्य गृहीतनिसर्गशरणान् आरण्यकान् मुनीन् समाश्रयते । आरण्यकमुनीनां वानप्रस्थानां वा जीवनविधिमात्मसात्कृत्य स सर्वतन्त्रस्वतन्त्रस्तपोज्ञान-योगप्रभावसंवर्धनेन प्रकृतिप्रदत्तसाधनैर्वनेषु प्रशान्त-जीवनं पुष्कलं यापयन् परलोकेऽपि परां निर्वृतिमनुवीक्षत इति धारणासीत् पुरासंख्यानां मनीषिणाम् ।

तदिदं वानप्रस्थजीवनं वैकल्पिकमेवासीत् प्रायशो भारतीयसंस्कृतौ । वैदिकयुगे बहव ऋषय आजीवनं गृहस्था एवाधितिष्ठन्ति स्म । मनुर्गृहाश्रमानन्तरमपि संन्यासाश्रमस्य विधानं स्पष्टयति ।[2] तदनन्तरं साधका ब्रह्मलोकं व्रजन्तिस्म । तद्यथाथर्ववेदे निदर्शितम्—

स्तुता मया वरदा वेदमाता प्रचोदयन्ती पावमानी द्विजानाम् ।
आयुः प्राणं प्रजां पशुं कीर्तिं द्रविणं ब्रह्मवर्चसं मह्यं दत्त्वा व्रजत ब्रह्मलोकम् ॥

---

1. Yuvarāja Karna Singh : The Glory Of Amaranath—A Pilgrimage to Shree Amaranatha, Kashmira, p. 24

२. मनुस्मृतिः ६.३६–३९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

संन्यासाश्रमः

ततः परं श्रेष्ठमतीव सद्गुणैरधिष्ठितं त्रीनधिवृत्तमुत्तमम् ।
चतुर्थमुक्तं परमाश्रमं शृणु प्रकीर्त्यमानं परमं परायणम् ॥
महाभारते शान्ति० २३६.३०

विमुच्याग्नि-धन-कलत्र-परिबर्हसङ्गान्, आत्मनः स्नेहपाशानवधूय परिव्रजन्ति समलोष्टाश्मकाञ्चनास्त्रिवर्गप्रवृत्तेष्वारम्भेष्वसक्तबुद्धयोऽरिमित्रोदासीनेषु तुल्यवृत्तयः स्थावरजरायुजाण्डजस्वेदजोद्भिज्जानां भूतानां वाङ्मनःकर्मभिरनभिद्रोहिणोऽनिकेताः पर्वतपुलिनवृक्षमूलदेवायतनान्यनुचरन्तो वासार्थमुपेयुर्नगरं ग्रामं वा । नगरे पञ्चरात्रिका ग्राम एकरात्रिकाः ।

प्रविश्य च प्राणधारणमात्रार्थं द्विजातीनां भवनान्यसंकीर्णकर्मणामुपतिष्ठेयुः पात्रपतितायाचितभैक्षाः, कामक्रोधदर्पमोहलोभकार्पण्यदम्भपरिवादाभिमानहिंसा-निवृत्ताः ।

अभयं सर्वभूतेभ्यो दत्त्वा चरति यो मुनिः ।
न तस्य सर्वभूतेभ्यो भयमुत्पद्यते क्वचित् ॥
कृत्वाग्निहोत्रं स्वशरीरसंस्थं शारीरमग्निं स्वमुखे जुहोति ।
यो भैक्षचर्योपगतैर्हविर्भिश्चिताग्निनां स व्यतियाति लोकान् ॥
मोक्षाश्रमं यः कुरुते यथोक्तं शुचिः सुसंकल्पित-बुद्धियुक्तः ।
अनिन्धनं ज्योतिरिव प्रशान्तं स ब्रह्मलोके श्रयते द्विजातिः ॥
महाभारते शान्तिपर्वणि १८५.३-६

कषायं पाचयित्वाशु श्रेणीस्थानेषु च त्रिषु ।
प्रव्रजेच्च परं स्थानं परिव्रज्यामनुत्तमाम् ॥ शान्ति० २३७.३

स वनेऽग्नीन् यथान्यायमात्मन्यारोप्य धर्मवित् ।
निर्द्वन्द्वो वीतरागात्मा ब्रह्माश्रमपदे वसेत् ॥ शान्ति० ३१३.१९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ब्रह्माश्रमः

ब्रह्माश्रमस्यादि-प्रतिष्ठापका त एव ब्रह्माणः सन्ति, ये जगत आदिकारणं ब्रह्म[1] योगदृष्टचा विभाव्य स्वानुभूतं वर्णनद्वारेण विश्वरूपमकुर्वन्। ब्रह्म-विषयक-विमर्श ऋग्वैदिकयुगेऽपि सम्यक् प्राचरत्। तथा हि—

ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषी मृगाणाम्।
अर्थात् ब्रह्मा देवेषु श्रेष्ठः। ऋ० ९.९६.६

ब्रह्मा वदति जातविद्याम्। ऋ० १०.७१.११
यदग्ने स्यामहं त्वं त्वं वा घा स्या अहम्। ऋ० ८.४४.२३
ब्रह्मचारी चरति वेविषद्विषः॥ ऋ० १०.१०९.५

यदा कश्चिन्मनीषी स्वज्ञानेन योगाभ्यासेन च ब्रह्मसंस्थो भवति, तदा स लोकव्यवहार-विनिर्मुक्तो ब्रह्मभावमाप्नोति, ब्रह्म भवति वेति यजुर्वेदे साधु निदर्शितम्—

परीत्य भूतानि परीत्य लोकान् परीत्य सर्वाः प्रदिशो दिशश्च॥ २३.१०
उपस्थाय प्रथमजामृतस्यात्मनात्मानमभि सं विवेश॥ ३२.११
ऋतस्य तन्तुं विततं विचृत्य तदपश्यत्तदभवत्तदासीत्॥ ३२.१२
युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः।
वि होत्रा दधे वयुनाविदेक इन्महो देवस्य सवितुः परिष्टुतिः॥ यजु० ३७.२

अत्र ब्रह्मणि मनसो धियश्च योगोऽभिप्रेतो मनीषिणः।

मानवजीवनस्य सर्वोच्चो हेतुर्मनीषिणां मतेन मोक्ष एव, येन कश्चित् पुरुषः शाश्वतमानन्दं प्राप्नुयात्। इयं सिद्धिस्तावन्मात्रं न सम्भवति यावन्मात्रं पाञ्चभौतिकशरीरं लौकिकसुखदुःखकारकं परिगृहीतं वर्तेत। जन्मना नवं नवं शरीरं तावद् गृह्णाति पुरुषो यावत्स मोक्षं न लभते। शरीरग्रहव्यावृत्तये वैदिकपरम्परानुसारेणेहजन्मनि तदनन्तरं चात्मनः परमात्मना ब्रह्मणा वा एकत्वमपेक्ष्यते।

---

१. (क) मूलतो ब्रह्म जीवनविधानमेव, येन कश्चित् साधकः सृष्टिविषयकं परं सत्यं विजानाति। तद्ब्रह्मपरायणो ब्रह्मेति संज्ञितम्। स तु वैदिकब्राह्मणः।

(ख) आदौ बहवो जनाः शैशवादेव ब्रह्मपरायणाः प्रभूय गृहावासमकल्पयन्तो यावज्जीवं ब्रह्माभिमुखा विचरन्तो ब्रह्मसंस्थाः, ब्रह्मनिष्ठाः, ब्रह्मज्येष्ठाः, ब्रह्मभूयं गताः, ब्रह्ममूर्तयः, ब्रह्मण्या इत्यादिनामभिः प्रसिद्धा बभूवुः। त एव मूलतो ब्राह्मणा ब्रह्मचारिणश्च।

(ग) ये केवलं शैशवेऽभ्यस्त-ब्राह्मविधयः, ते परवर्तियुगे ब्रह्मचारिण इति संज्ञिताः। ये यावज्जीवं ब्रह्मनिष्ठं जीवनं यापयन्ति स्म ते ब्रह्मनिष्ठा नैष्ठिकब्रह्मचारिणः प्रोक्ताः।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मोक्षस्तु साध्यम् ।[1] तस्य प्रमुखसाधनानि सन्ति —ब्रह्मविद्या, विरतिः, ध्यानयोगश्च ।[2] एतेषां साधनानां भूमिका वानप्रस्थोचिततपसा निर्मीयते ।

मोक्षपथस्य यात्रिका विविधोपाधिभिर्वैदिकयुगे लक्षिता आसन् । प्रथमं तावद् ब्रह्मा ब्राह्मणो[3] व्रतचारीति । स वैदिकब्राह्मणोऽधोविधं वर्णितः —

ब्रह्मचारी चरति वेविषद्विषः ।
स देवानां भवत्येकमङ्गम् ॥ ऋग्वेदे १०.१०९.५

ऋग्वेदानुसारेण विप्राः (ब्रह्मवादिनः) ध्यानयोगदिशा मनोधियश्च सवितरि युञ्जते ।[4]

अत्र सविता तु परमेश्वर इव विभवति यथास्य सूक्तस्य ऋषिः श्यावाश्वो मनुते—

उतेशिषे प्रसवस्य त्वमेक इदुत पूषा भवसि देव यामभिः ।
उतेदं विश्वं भुवनं वि राजसि । इत्यादि ऋग्वेदे ५.८१.५
आ विश्वदेवं सत्पतिं सूक्तैरद्या वृणीमहे । सत्यसवं सवितारम् ।
ऋ० ५.८२.७

योगपथ[5]स्तस्य ऋषेर्विदित आसीत् य ऋग्वेद आत्मानं विवृणोत्यधोविधम्—

किं स्विद्वनं क उ स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः । १०.८१.४

अत्र ब्रह्मणो विश्वकर्मस्वरूपं[6] ब्रह्मवादिना ऋषिणा मनोयोगेनान्विष्टं वर्णितं च ।

ऋषिसमुदाये तत्राभवदुदात्ततरो ब्रह्मवर्गः । ब्रह्माणो वैदिकसाहित्ये क्वचिन्मनीषिणः श्रेष्ठविचारका इति प्रथिताः । यथा ऋग्वेदे—

---

१. मोक्षस्य प्रथमचर्चा ऋग्वेदे १.१४०.४ मन्त्रेऽधोविधं वर्तते—
'मृमुक्ष्वो३मनवे मनवस्यते' इत्यादि ।
आत्मनः स्वत्वं परित्यज्य परमात्मनो भूमानं विगाहमानः कश्चिन्मोक्षानुगतो भवति ।

२. 'द्युमद्धेहि' इति अथर्व० ६.१.१ ध्यानं निदर्शयति । सिन्धु-सभ्यतायां योग-संस्कृतेरपि प्रकामं वैशिष्ट्यं सञ्जातमिति तत्कालीनपुरावशेषैः परिचीयते ।

३. अत्र जात्या ब्राह्मणो नाभिप्रेतोऽपितु ब्रह्मणा सायुज्यं प्राप्त इति ब्राह्मणो ब्रह्म-संस्थो वा । ब्रह्मसंस्थत्वं योगेन ध्यानेन चाधिगम्यते ।

४. युञ्जते मन उत युञ्जते धियो । विप्रा विप्रस्य बृहतो विपश्चितः ॥ ऋ० ५.८१,१

५. अस्मिन् सूक्ते ऋषिरग्रे समीहते—शं नः क्षेमे शमु योगे । ७.८६.८ ।
अत्र योग उद्योग इति व्याख्यातः ।

६. विश्वकर्मा तु विश्वचक्षा भूमिं जनयतीत्यादि विशेषैर्ब्रह्मैव ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मनीषिणो मनसा पृच्छतेदु तद् । यदध्यतिष्ठद् भुवनानि धारयन् ।। १०.८१.४ ते ब्रह्मदर्शने निपुणा बभूवुः । ब्रह्म अनड्वानिति अथर्ववेदे तस्य विशेषा निरूपिताः । तथाहि—अनड्वान् पृथिवीमन्तरिक्षं प्रदिशश्च दाधार, विश्वं भुवनमाविवेश । तं विजानन् यो नाश्नीयात् स न सर्षत् (भवबन्धने न परापतति) । स विश्वजित्, विश्वभृत्, विश्वकर्मा चास्ति । स विश्वा नरे-अक्रमत इत्यादि ।[1]

ऋषिरात्मवृत्तं ब्रूते—प्रातः, मध्याह्नं, सायं चाहं ब्रह्मणो रसमा-पिबामीति ।[2] तस्य प्रगमन-क्रमो वर्णितोऽथर्ववेदे —

पृष्ठात् पृथिव्वा रहमन्तरिक्षमारुहमन्तरिक्षाद्दिवमारुहम् ।
दिवो नाकस्य पृष्ठात् स्वर्ज्योतिरगामहम् ।। ४.१४.३

ऋग्वेदे मनीषिणो ब्राह्मणा योगशक्तिमन्तो निदर्शिताः । यथा—

चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।
ऋ० १.१६४.४५

'ईदृशो मनीषिणो योगिनः संन्यासिनश्चासन् प्रारम्भिकवैदिकयुगे' इति द्रढयितुमधोलिखितमन्त्रा मननीयाः —

एकः सुपर्णः स समुद्रमा विवेश स इदं विश्वं भुवनं वि चष्टे ।
तं पाकेन मनसापश्यमन्तितस्तं माता रेलिह स उ रेलिह मातरम् ।
ऋ० १०.११४.४

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषष्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभि चाकशीति ।।
ऋग्वेदे १.१६४.२० अथर्ववेदे ९.९.२० ।

प्रथमे मन्त्रे सुपर्णः परमात्मा विश्वव्यापी ध्येयः । द्वितीये मन्त्रेऽनश्नन् पक्षी संन्यासी योगी वास्ति । तथैवाधःश्लोकेऽपि वर्णितम् —

---

१. अथर्ववेदे ४.११.१
अन्यच्च—यद्यन्तरिक्षे यदि वात आस यदि वृक्षेषु यदि वोलपेषु ।
यदश्रवन् पशव उद्यमानं तद् ब्राह्मणं पुनरस्मानुपैतु ।। ७.६६.१

२. दुहे सायं दुहे प्रातर्दुहे मध्यंदिनं परि ।
दोहा ये अस्य संयन्ति तान् विद्मानुपदस्वतः ।। अथर्व० ४.११.१२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यस्मिन् वृक्षे मध्वदः सुपर्णा निविशन्ते सुवते चाधि विश्वे ।
तस्येदाहुः पिप्पलं स्वाद्वग्रे तन्नोन्नशद्यः पितरं न वेद ॥[1]
ऋग्वेदे १.१६४.२२ अथर्ववेदे ९.९.२१

योगस्य स्पष्टं रूपमधोमन्त्रे प्रकटति—

त्रिपाद् ब्रह्म पुरुरूपं वि तष्टे तेन जीवन्ति प्रदिशश्चतस्रः ।
अथर्व ९.१०.१९

ब्रह्मण इदं रूपं योगदृष्टचैव परिचेयम् ।

अन्यच्च—

पुण्डरीकं नवद्वारं त्रिभिर्गुणेभिरावृतम् ।
तस्मिन् यद् यक्षमात्मन्वत् तद्वै ब्रह्मविदो विदुः ॥
अकामो धीरो अमृतः स्वयम्भू रसेन तृप्तो न कुतश्चनोनः ।
तमेव विद्वान् न विभाय मृत्योरात्मानं धीरमजरं युवानम् ॥
अथर्व० १०.८.४३, ४४

अत्र ध्यानपथेन ब्रह्मसम्पृक्तो योगी परिभाषितः ।[2]

ऋग्वेदेऽध्यात्मं ध्यानयोगयोर्वैपश्चिती वर्णिता । तद्यथा—

अग्निरस्मि जन्मना जात वेदा घृतं मे चक्षुरमृतं म आसन् ।
हृदा मतिं ज्योतिरनु प्रजानन् । ३.२६.७
आदिद द्यावापृथिवी पर्यपश्यत् । ३.२६.८

अस्य सूक्तस्य देवता आत्मास्ति ।

मोक्षाश्रमे योगेन गगनविहरणं सिध्यति । तत्तु वर्णितमृग्वेदस्याधोमन्त्रे—

अन्तरिक्षेण पतति विश्वा रूपावचाकशत् ।
मुनिर्देवस्य देवस्य सौकृत्याय सखा हितः ॥ १०.१३६.४

यजुर्वेदेऽमृतत्वस्य या प्राप्तिरधोमन्त्रेषु वर्णिता, सा मोक्षाश्रमिणामेव सम्भवति—

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् ।
तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥ ३१.१८
आत्मनात्मानमभिसंविवेश । ३२.११
वेनस्तत् पश्यन्निहितं गुहा सत् । ३२.८

---

१. अपरथाभिव्यक्तोऽयं भाव ऋग्वेदे—
पतङ्गमक्तमसुरस्य मायया हृदा पश्यन्ति मनसा विपश्चितः ।
समुद्रे अन्तः कवयो वि चक्षते मरीचीनां पदमिच्छन्ति वेधसः ॥ १०.१७७.१

२. ऋषीणां ब्रह्मणा सायुज्यमभिप्रेतमिति 'येन ऋषयो बलमद्योतयन् युजा' अथर्ववेदे ४.२३.५ इति मन्त्रांशे वर्णितम् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

योगप्रवृत्तिः ऋषीणामन्यत्रापि ऋग्वेदे लक्ष्यते । यथा—

नाभा नाभिं न आ ददे चक्षुश्चित् सूर्ये सचा ।
कवेरपत्यमा दुहे ॥ ९.१०.८
यत्र ज्योतिरजस्रं यस्मिन् लोके स्वर्हितम् ।
तस्मिन् मा धेहि पवमाना अमृते लोके अक्षितः ॥ ९.११३.७
यत्रानन्दाश्च मोदाश्च मुदः प्रमुद आसते ।
कामस्य यत्राप्ताः कामास्तत्र मामृतं कृधि ॥ ९.११३.११

अयं लोको ब्रह्मलोकः साधारणतो योगिनामेव सिद्धः ।

ऋग्वेदे वातरशना मुनयोऽभिज्ञाताः सन्ति । यथा—

मुनयो वातरशनाः पिशङ्गा वसते मला ।
वातस्यानु ध्राजिं यन्ति यद्देवासो अविक्षत ॥ १०.१३६.२
उन्मदिता मौनेयेन वाताँ आ तस्थिमा वयम् ।
शरीरेदस्माकं यूयं मर्तासो अभिपश्यथ ॥ १०.१३६.३
अन्तरिक्षेण पतति विश्वा रूपावचाकशत् ।
मुनिर्देवस्य देवस्य सौकृत्याय सखा हितः ॥ १०.१३६.४

एतस्य सूक्तस्य कर्तारो वातरशना मुनयः सन्ति—जूतिः, वातजूतिः, विप्रजूतिः, वृषाणकः, करिक्रतः, एतशः, ऋष्यशृङ्गश्च ।

ऋग्वेदे वैदिकसंन्यासिनो भिक्षो[1]राङ्गिरसस्यात्मानुभूतमधोलिखिते सूक्ते विवृतम्—

न वा उ देवाः क्षुधमिद् वधं ददुरुताशितमुप गच्छन्ति मृत्यवः । १०.११७.१

स इद् भोजो यो गृहवे ददात्यन्नकामाय चरते कृशाय ।
अरमस्मै भवति यामहूताः । १०.११७.३
पृणीयादिन्नाधमानाय तव्यान् द्राघीयांसमनु पश्येत पन्थाम् ।
ओ हि वर्तन्ते रथ्येव चक्रा ऽन्यमन्यमुपतिष्ठन्त रायः ॥ १०.११७.५

इन्द्रेण यतयः सहायीकृताः ।[2] यतयो भृगुभिः सहेन्द्रस्य स्तुतिमकुर्वन्निति

---

१. भिक्षुः परिव्राट् कर्मन्दो पाराशर्योऽपि मस्करी । अमरे २.७.४१ । कर्मन्दः, पाराशर्यश्च भिक्षुसूत्रं विरचितवन्तौ इति पाणिनिः ।

२. यद्देवा यतयो यथा भुवनान्यपिन्वत । ऋ० १०.७२.७ । अत्र यतयो देवसदृशा लोकवर्धका इति वर्णितम् । येना यतिभ्यो भृगवे धने हिते इत्यादि ऋ० ८.३.९ Yatis are an ancient race of ascetics connected with the Bhṛgus. परवर्ति युगे चतुर्थाश्रमो यतिरिति ख्यातः । मनु० ६.८७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विशेषं काण्वो वत्स ऋग्वेदे समीक्षते।[1] अत एव ते ऋषिविशिष्टा विभवन्ति।

ब्रह्मा, ब्राह्मणश्चेति पदम् ऋग्वेदे नैकशो ब्रह्मतत्त्वदर्शिनं व्रतधरं महामानवं व्यनक्तीत्यधोमन्त्रेण स्पष्टं भवति।

दीर्घतमा मामतेयो जुजुर्वान् दशमे युगे।
अपामर्थं यतीनां ब्रह्मा भवति सारथिः॥ ऋ० १.१५८.६

अत्र यतयस्तु परवर्तियुगीयाः संन्यासिनः सन्ति। ब्रह्मा तु ब्रह्मज्ञानी ब्राह्मणो भिक्षुरेव।

ब्राह्मणा व्रतचारिणः। ऋग्वेद ७.१०३.१
ब्रह्मा त्वो वदति जातविद्याम्। १०.७१.११

ऋग्वेदस्य (१०.७१) परब्रह्मज्ञानविषयकस्य सूक्तस्य देवता ब्रह्मज्ञानम्, ऋषिश्च बृहस्पतिः स्तः। उभे परां विद्यां प्रकाशयतः। एतेषां संन्यासिब्राह्मणानां प्रबोधाय तत्रासीत् रहस्यगर्भो ज्ञाननिधिः, यस्य संकेतोऽधोलिखिते ऋङ्मन्त्रे विभायते—

अक्षण्वन्तः कर्णवन्तः सखायो मनोजवेष्वसमा बभूवुः।
आदध्नास उपकक्षास उ त्वे ह्रदा इव स्नात्वा उत्वे ददृशे॥ १०.७१.७

अपरश्च-सतो बन्धुमसति निरविन्दन् हृदि प्रतीष्या कवयो मनीषा। १०.१२९.४

परतः सूक्ते ऋषिः 'मनसा चक्षसा' पश्यति। इदं तु योगिनां सुसिद्धम्।[2] अत्र योगदृष्टचा समुत्पन्नं प्रातिभज्ञानं समुद्दिष्टम्, येन वैशिष्टचमवाप्तम्।

कतिपय-ब्रह्मपथगामिन ऋषयो वेना इति विख्याता दृश्यन्ते।[3] त उच्चकोटिका ब्रह्मज्ञाः प्रतिभान्तीति नैकसन्दर्भेषु प्रणिहितम्। अथर्ववेदे ते वर्णिताः सन्ति—

वेनस्तत्पश्यत् परमं गुहा यद्यत्र विश्वं भवत्येकरूपम्॥ २.१.१
ब्रह्मजज्ञानं प्रथमं पुरस्ताद् वि सीमतः सुरुचो वेन आवः। ५.६.१

अत्र परमं तु ब्रह्मैव। तद् वेनो ब्रह्मवित् पश्यति। अस्मिन् ब्रह्मणि प्रलयकाले विश्वमेकरूपं विलीयते।

वेन आत्मवृत्तं प्रवदति—

परि विश्वा भुवनान्यायमृतस्य तन्तुं विततं दृशेकम्।
यत्र देवा अमृतमानशानाः समाने योनावध्यैरयन्त॥ २.१.५

---

१. ये इन्द्रो यतयस्त्वा भृगवो ये च तुष्टुवुः। ८.६.१८

२. ऋग्वेदे १०.१३०.६

३. सायणानुसारेण—वेना महर्षयो बभूवुः। ऋ० ९.८५.१० अधिकृत्य। सूक्तेऽस्मिन् गन्धर्वस्तु तपस्वी पुण्यात्मास्ति। यजुर्वेदे स्थितिरियं परिदृष्टाधोविधम्—

'आत्मनात्मानं अभिसंविवेश', तदपश्यत्, तदभवत्, तदासीदिति ३२.११,१२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

संन्यासि-समा व्रात्या बभूवुः ।[1] अथर्ववेदानुसारेणातिथेया साधुभावेन तेषां शुश्रूषां दर्शनं च समीहन्ते स्म ।[2]

ब्राह्मणास्तु वैदिककालेन युगपत् स्वीयब्रह्मपरायणतया संन्यासवृत्त्या च प्राथम्यं प्रपेदिरे । बृहदारण्यकोपनिषदि तेषां ब्राह्मणानां स्पष्टतमं विवरणमधोविधं व्याकृतम्—

'एतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च, लोकैषणायाश्च व्युत्थाय भिक्षाचर्यं चरन्ति । ··· तस्माद् ब्राह्मणः, पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत् इत्यादि ।[3] एते ब्राह्मणाः संन्यासिन आसन्निति शङ्कराचार्यो भाष्ये व्याचष्टे—तस्मात् पूर्वे ब्राह्मणा ब्रह्मविदो व्युत्थाय कर्मभ्यः कर्मसाधनेभ्यश्च यज्ञोपवीतादिभ्यः, परमहंसपारिव्राज्यं प्रतिपद्य भिक्षाचर्यं चरन्ति ।[4]

योगपरायणाः कतिपयविशिष्टयतयो वैदिकर्षभिः परिज्ञाता आर्येतर-साधवः प्रतिभान्ति । ते सर्वथा लोकतो विमुखा आर्येतरैः समादृता आर्यैश्च प्रारम्भिकयुगे उपेक्षिता बभूवुः ।[5] किन्तु कालान्तरे सामाजिकसामञ्जस्यैषिणो विचारकास्तान् यतिधर्मचारिण आत्मनीनानकुर्वन् ।[6] त एव यतयो परवर्ति-

---

१. वैदिककोशस्य ५०३ पृष्ठे 'व्रात्यस्तु पर्यटकः संन्यासी, वृत्त्या समादरणीयोऽभवत् ।

२. अत्र व्रात्यो विद्वान् । अथर्व० १५.११.२ । ते व्रात्यगन्धर्वाप्सरसां समाजे प्रादुरभवन्निति गन्धर्वाप्सरोभ्यो व्रात्यमिति वाक्येन यजु० ३०.८ मन्त्रात् प्रतिभाति ।

३. बृहदारण्यक० ३.५.१

४. दीघनिकायस्य महागोविन्दसुत्ते २.६.१९ भागे वानप्रस्थ आमगन्धात् क्रोध-मिथ्याभाषण-वञ्चना-मित्रद्रोह-कार्पण्याभिमानेर्ष्या-तृष्णा-विचिकित्सा-परपीडा-लोभ-दोष-मद-मोहादिभ्यः) सर्वथा मुक्तो भवितुं वानप्रस्थं, गार्हस्थ्यं च त्यक्त्वा प्रव्रजन्ति । एतत्सर्वं वैदिकब्राह्मीं धारामनुसरति ।

५. कौषीतक्युपनिषदि इन्द्रो यतीन् शालावृकेभ्यः प्रायच्छतेति सूचितम् । ३.१
महाभारतनुसारेण—
अहो हि दुरनुष्ठेयो मोक्षधर्मः सनातनः ।
यं हित्वा देवताः सर्वा हव्यकव्यभुजोऽभवन् ।। शान्ति० ३२.७.७

६. मुण्डकोपनिषदि—यं पश्यन्ति यतयः क्षीणदोषाः । ३.१.५
संन्यासयोगाद् यतयः शुद्धसत्त्वाः । ३.२.६
गीतायाम्—यतयः संशितव्रताः । ४.२८ यतीनां यतचेतसाम् । ५.२६
विशन्ति यद्यतयो वीतरागाः । ८.११
ये निर्जितेन्द्रियग्रामा यतिनो यतयश्च ते । अमरे

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वैदिकसंस्कृतौ सूत्रस्मृति-पुराणयुगेषु संन्यासिन एव प्रतिष्ठापिताः। तत्र प्रथम आर्येतरोऽयं यतिर्योगी वा सिन्धु-संभ्यतामूर्तिकः ध्यानपरायण आदिसंन्यासी विभायते।

सामवेदे मन्त्रो दृश्यते—

पूर्वस्य यत्ते अद्रिवोंशुर्मदाय·· वशीहि शक्रो तन्नव्यं संन्यसे। ६.४८

अथर्ववेदे ब्रह्मवित्, अमृतत्वम्, अष्टचक्रा नवद्वारा देवानां पुरी, हिरण्यकोशः, शरीरादतिव्याप्तिरित्येषा संन्यासोचिता परा दृष्टिः मोक्षकामानां योगिनामेव सम्बभूवेति प्रतीयते।[1] अन्यच्चाथर्ववेदे—

यत्र देवा ब्रह्मविदो ब्रह्मज्येष्ठमुपासते।
यो वै तान् विद्यात् प्रत्यक्षं स ब्रह्मा वेदिता स्यात्॥ १०.७.२४
अकामो धीरो अमृतः स्वयंभू रसेन तृप्तो न कुतश्चन नोनः।
तमेव विद्वान् न विभाय मृत्योरात्मानं धीरमजरं युवानम्॥ १०.८.४
इयं वृत्तिर्ध्यानपरायणस्य योगस्य प्रकाशते।
तत्र मुनीनां केशश्चर्चितः। अथर्व ८.६.१७

अयं योगस्तैत्तिरीयोपनिषदि आत्मा युक्तिः समाधानं वेति शङ्करेण व्याख्यातम्।[2] समाधानं तु समाधिः। कठोपनिषदि २.३.११ योगः स्पष्टीकृतोऽधोविधम्—यदा पञ्चेन्द्रियाणि मनोबुद्धिश्च न विचेष्टन्ते तदा परमा गतिर्भवति। 'तां योगं मन्यन्ते स्थिरामिन्द्रियधारणाम्।[3]
उपनिषत्सु प्रव्रज्याक्रमः पुनः पुनर्वर्णितः। तथाहि—

१. तं हि पाणावभिपद्य प्रवव्राज। कौशितकि० ४.१९
२. शान्तहृदयौ प्रवव्रजतुः। छान्दोग्ये ८.८.३
३. शान्तहृदयः प्राव्राजीः। छान्दोग्ये ८.९.२; ८.१०.३, ८.११.२
४. शान्तहृदयः प्रवव्राज। छन्दोग्ये ८.११.१
५. एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति। बृहदारण्यके ४.४.२२
६. प्रव्रजिष्यन् वा अरेऽहम्। बृहदारण्यके ४.५.२

---

१. अथर्ववेदे १०.३२, १४, २८, ३१, ३२, ३३
२. तैत्तिरीययोपनिषदि २.४.१
३. The chief aim of Yoga philosophy is to teach the means by which the human soul may be completely united with the supreme spirit and thus secure absolution and deep abstract meditation is laid down as chief means for securing this end.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

एतैरुल्लखैः स्पष्टं प्रतीयते यदुपनिषद्युगतः प्रागेव संन्यासक्रमः सम्यक् प्रतिष्ठित आसीत्। संन्यासकामो याज्ञवल्क्यो स्वपत्नीं मैत्रेयीं प्रोवाच—उद्यास्यन्वा अरेऽहमस्मात् स्थानादस्मि। हन्त तेऽनया कात्यायन्यान्तं करवाणीति।[1] बृहदारण्यके भिक्षाचर्यं (मोक्षाश्रमः) अधोविधं वर्णितम्—एतं वै तमात्मानं विदित्वा ब्राह्मणः पुत्रैषणायाश्च वित्तैषणायश्च लोकैषणायाश्च व्युत्थाय भिक्षाचर्यं चरन्ति। नैनं कृताकृते तपतः।[2] अन्यत्रापि ब्रह्मचारिणां (संन्यासिनां) ब्रह्मलोक-प्रतिष्ठार्थं मोक्षमार्गो वर्णित उपनिषत्सु।[3]

छान्दोग्ये ब्रह्मसंस्थोऽमृत्वमेतीति संन्यासिलक्षणम्।[4]

महाभारतेऽपि ब्राह्मणाः संन्यासिनः

यः कश्चिदाध्यात्मयोगेन ब्रह्मभूयमध्यगच्छत्[5] स एव ब्राह्मणो ब्रह्मचारी ब्राह्मणसंन्यासी वा बभूवेति प्रथमः कल्पो महाभारते भूयिष्ठं स्मारितः। को ब्राह्मण इति प्रसङ्गे व्यासोऽब्रवीत् शान्तिपर्वणि—

ब्राह्मणस्य देहोऽयं न कामार्थाय जायते।
इह क्लेशाय तपसे प्रेत्य त्वनुपमं सुखम्॥ ३०९.२२
येन पूर्णमिवाकाशं भवत्येकेन सर्वदा।
शून्यं येन जनाकीर्णं तं देवा ब्राह्मणं विदुः॥ २३७.११
येन केनचिदाच्छन्नो येन केनचिदाशितः।
यत्र क्वचनशायी च तं देवा ब्राह्मणं विदुः॥ २३७.१२

---

१. बृहदारण्यकोपनिषदि २.४.१। शङ्कर एतदधिकृत्य व्याख्याति—उद्यास्यन्नूर्ध्वं यास्यन् पारिव्राज्याख्यमाश्रमान्तरं वै। अहमस्माद् गार्हस्थ्यादूर्ध्वं गन्तुमिच्छन्नस्मि।

२. बृ० ३.५.१; ४.४.२२

३. तथा हि—यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीमि।
एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते। कठ० १.२.१५ १५, १७
तमेवैकं जनीथ आत्मानमन्या वाचो विमुञ्चथ।
अमृतस्यैष सेतुः॥ मु० उ० २.२.५
ओमित्येवं ध्यायथ आत्मानं स्वस्ति वः।
पाराय तमसः परस्तात्॥ मु० उ० २.२.६
ब्रह्मचारी विभिक्षे। छा० उ० ४.३.५

४. छान्दोग्ये २.२३.२

५. ब्रह्मभूयं ब्रह्मत्वं ब्रह्मसायुज्यमित्यमरः। तथैव देवभूयादिकम्।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अहेरिव गणाद् भीतः सौहित्यान्नरकादिव ।
कुणपादिव च स्त्रीभ्यस्तं देवा ब्राह्मणं विदुः ।। २३७.१३

न क्रुध्येन्न प्रहृष्येच्च मानितोऽमानितश्च यः ।
सर्वभूतेष्वभयदस्तं देवा ब्राह्मणं विदुः ।। २३७.१४

विमुक्तं सर्वसङ्गेभ्यो मुनिमाकाशवत् स्थितम् ।
अस्वमेकचरं शान्तं तं देवा ब्राह्मणं विदुः ।। २३७.२२

जीवितं यस्य धर्मार्थं धर्मो रत्यर्थमेव च ।
अहोरात्रश्च पुण्यार्थं तं देवा ब्राह्मणं विदुः ।। २३७.२३

निराशिषमनारम्भं निर्नमस्कारमस्तुतिम् ।
अक्षीणं क्षीणकर्माणं तं देवा ब्राह्मणं विदुः ।। २३७.२४

ईदृशो मोक्षपथगामी ब्राह्मणो बौद्धसाहित्ये श्रमणस्य समकक्षोऽभवत् ।[1] सुत्तनिपातानुसारेण ब्रह्मा ब्राह्मणो वा संन्यासी एव। तद्यथा—

बाहेत्वा सब्बपापानि विमलो साधु समाहितो ठितत्तो ।
संसारमतीच्च केवली सो असितो तादि पवुच्चते स ब्रह्मा ।। ३२.१०

ब्राह्मणोपाधिकः संन्यासी धम्मपदेऽधोविधं वर्णितः —

झायिं विरजमासीनं कतकिच्चं अनासवं ।
उत्तमत्थं अनुप्पत्तं तमहं ब्रूमि ब्राह्मणं ।। २६.४

झायी तपति ब्राह्मणो । ३६.५

पंसुकूलधरं जन्तुं किसं धमनिसंथतं ।
एकं वनस्मिं झायन्तं तमहं ब्रूमि ब्राह्मणं ।। २६.१३

यस्स पुरे च पच्छा च मज्झे च नत्थि किंचनं ।
अकिंचनं अनादानं तमहं ब्रूमि ब्राह्मणं ।। २६.३९

उसभं पवरं वीरं महेसिं विजितावितं ।
अनेजं नहातकं बुद्धं तमहं ब्रूमि ब्राह्मणं ।।

---

१. सभियसूत्ते सभियो निर्दिष्ट आसीत्—यो ते सभिय समणो वा ब्रह्मणो वा इमे पञ्हे पुट्ठो व्याकरोति, तस्य सन्तिके ब्रह्मचरियं चरेय्यासि । सुत्तनिपात ३२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

आद्या ब्राह्मणास्तु संन्यासिनो बभूवुरिति प्रमाण्यते नैकविधैरन्यैरपि सन्दर्भैः ।[1]

प्रारम्भिकबौद्धसाहित्ये स पुराणो ब्राह्मणो नैकस्थलेषु लक्षितो यो वस्तुतो संन्यासी बभूव । तथाहि सुत्तनिपातस्य ब्राह्मणधम्मिकसूत्ते तात्कालिक-संन्यासिवृत्तिविहीना ब्राह्मणा वर्णिताः सन्ति । ते प्राचीनसंन्यासवृत्तिक-ब्राह्मणानां लक्षणं गौतमं पृच्छन्ति । गौतमस्तेषां पुराणब्राह्मणानां लक्षणानि कथयति ब्राह्मणधम्मिकसूत्ते—

इसयो पुब्बका आसुं सञ्ञतत्ता तपस्सिनो ।
पंचकामगुणे हित्वा अत्तदत्थमचारिसुं ॥ १

न पसू ब्राह्मणानांसु न हिरञ्ञं न धानियं ।
सज्झायधनधञ्ञासु ब्रह्मं निधिमपालयुं[2] ॥ २

न नेसं भतकं आसि द्वारभत्तं उपट्ठितं ।
सद्धापकतमेसानं दातवे तदमञ्ञिसुं ॥ ३

ब्रह्मचरियं च सीलं च अज्जवं मद्दवं तपः ।
सोरच्चं अविहिंसं च खन्तिं चापि अवण्णयुं ॥ ९

यो नेसं परमो आसि ब्रह्मा[3] ददपरक्कमो ।
स वापि मेथुनं धम्मं सुपिनन्तेन नागमा ॥ १०

ते मूलत ऋषयो ब्राह्मणा वा यजन्ते स्म किन्तु तेषां यज्ञेषु पशुवधो गोवधो वा न समाम्नातः । तण्डुल-घृतादिं हविष्यं कृत्वा तेऽयजन्त ।[4]

---

1. The Aṅguttara (IV. 35) mentions two classes of ascetics, whom it calls Parivrājakas, viz. (1) Brāhmaṇa and (2) Annatitthiya, i. e. other non Brahmanical ascetics. The Greek writers of Alxander's times also noticed these two classes of ascetics the Brāhmaṇas and Śramaṇas (Strabo, XV.1.59 M. Crindle, 1901, p. 65.) In the inscriptions of Aśoka the Brāhmaṇa and the Śramaṇa ascetics are separately mentioned as worthy of equal honours. V. S. Agrawala : India as known to Pāṇini. p. 386.

२. इमे ब्रह्मण उद्भूता सात्त्विकब्राह्मणा परवर्तियुगे संन्यासिनो योगिनो वा प्रथिताः ।

३. अयं ब्रह्मा ब्रह्मचर्यव्रतस्य तपोमयजीवनस्य ध्यानयोगयोश्च प्रतिष्ठापको महात्मा पुराणतमोऽनुसन्धेयः । तस्यानुयायिनः परवर्तियुगे वर्गद्वये विभक्ताः —निवृत्ति-मार्गीयाः, प्रवृत्तिमार्गीयाश्च । प्रवृत्तिमार्गान्निवृत्तिमार्गपरिवर्तनं सम्भवमासीत् ।

४. ब्राह्मणधम्मिकसुत्ते १२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

परवर्तियुगे तेषु ब्राह्मणेषु कतिपयलोलुपा जना यजमानराजानां सहायेन पशूनामालभनेन यज्ञं समपादयन् ।[1]

ब्रह्मणि ध्यानयोगेनाखिलं विश्वं ब्रह्मरूपं परिपश्यन् संन्यासी शाश्वत-ब्रह्मणि लीनो रमते । एतदर्थं केचिदायुषोऽन्तिमचरणे[2] वन्यजीवनादपि विरक्ताः सर्वविधं सर्वस्वं परित्यज्य[3] संन्यस्य वा केवलमात्मारामा एव निरन्तरं परिव्रजन्तो भिक्षित्वा प्राणधारणमात्रं भोज्यं गृह्णन्त इन्द्रियग्रामान् सम्यङ् नियम्य ब्रह्मैव ध्यायं ध्यायं जीवनान्ते ब्रह्मणि लीना अभवन् ।[4] संन्यस्यन्ति सर्वस्वमिति ते संन्यासिनः, परिव्रजन्ति निरन्तरमिति ते

---

१. ब्राह्मणधम्मिकसुत्ते २० अश्वमेधादीनां यज्ञानां सम्पादनं वर्णितम् ।

२. शतवार्षिकं जीवनम् । तस्य चत्वारश्चरणाः समानं प्रत्येकं ब्रह्मचर्यं, गार्हस्थ्यं वानप्रस्थं संन्यासनं च व्याप्नुवन्ति । बहवो गृहस्था अपि वानप्रस्थमनधिष्ठायैव संन्यासिनो भवन्तीति मनुना सूचितम्—

अधीत्य विधिवद् वेदान् पुत्रांश्चोत्पाद्य धर्मतः ।
इष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत् ॥ ६.३६
प्राजापत्यां निरूप्येष्टिं सर्ववेदसदक्षिणम् ।
आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद् गृहात् ॥ ६.३८

३. नारदः शुकमुपदिशति—

त्यज धर्ममधर्मं च तथा सत्यानृते त्यज ।
उभे सत्यानृते त्यक्त्वा येन त्यजसि तं त्यज ॥ शान्ति० ३१६.४०
त्यज धर्ममसंकल्पादधर्मं चाप्यहिंसया ।
उभे सत्यानृते बुद्ध्या बुद्धिं परं निश्चयात् ॥ शा० ३१६.४१

४. अत एव संन्यासी वानप्रस्थाद् भिन्न एव वानप्रस्थो वनाज्जीवनसाधनानि भोज्य-पेय-वासासनादिकं लभते । स सकुटुम्बमपि पर्णशालायां पञ्चमहायज्ञादिकं सम्पादयति यज्ञकर्मणि याजने दीर्घसत्रेऽपि व्यापृतो भवेत् । स स्वयं शिक्षतेऽन्यांश्च शिक्षयति वा । साधारणतः क्वापि स्थायी वासी भवति, विषमस्थिता एव भिक्षते । शंकराचार्यानुसारेण प्रथमाश्रमे कर्मानुबन्धः स्यादेव किन्तु चतुर्थाश्रमे कर्मणः सर्वथा विरतिर्भवति । छा० उ० ४.१ अधिकृत्य भाष्यम् ।

स्वतपसा वानप्रस्थ इह लोकलीलां समाप्य दिव्यलोकेषु स्वर्गादिषु प्रतिष्ठां लभते । अन्यथापि वानप्रस्थाः संन्यासिनो भिन्ना एवेत्यग्रे विवरिष्यते ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

परिव्राजकाः, भिक्षया जीवनं धारयन्तीति ते भिक्षवो यतेन्द्रिया यतयः[1], ब्रह्मणि एकश्चरन्तीति केवलिनः कथ्यन्ते । एवंविधो संन्यासो वानप्रस्थस्योपसंहार इव प्रतिभाति ।[2] तथापि एतयोर्द्वयोराश्रमयोर्महदन्तरं स्पष्टमेव यत् वानप्रस्थानां कार्यक्षेत्रं प्राज्यमासीत्, किन्तु संन्यासिनां तु कार्यमेकमेवासीत्—ब्रह्मसंलीनता योगपद्धत्या । वानप्रस्थानां गणो भवतु नाम, किन्तु संन्यासी नित्यमेकश्चरेत् ।[3]

---

१. यतयस्तु सर्वप्रथममृगवेद उल्लिखिताः सन्तिः । ऋ० ८.३.९; ८.६.१८;१०.७२.७ महाभारते च सभा० ४८.४०; आर० २६.२; २८.१६; १४५.३० शान्ति० ३८.१६८; ३०६.९३ इत्यादि । चतुर्थाश्रमिणः सन्ति यतय इति वसिष्ठधर्मसूत्रे ११.३४; बौधायन-धर्मसूत्रे २.६.१७ द्रष्टव्यम् । संन्यासो मुण्डकोपनिषदि ३.२.६ वर्णितः । संन्यासयोगाद्यतयः शुद्धसत्त्वाः । शंकरानुसारेण यतयो यतनशीलाः संन्यासिनः । कौषीतक्युपनिषदि पुत्रस्यैश्वर्ये पिता वसेत् परि वा व्रजेत् २.१५ । महाभारतानुसारेण वानप्रस्थानन्तरं विदुरो यतिधर्ममवाप्तवान् । आश्रमवा० ३३.३२

२. तथा हि गरुडपुराणे—

तपसा कर्शितोऽत्यर्थं यस्तु ध्यानपरो भवेत् ।
संन्यासी स हि विज्ञेयो वानप्रस्थाश्रमे स्थितः ॥ ४९.१३

वानप्रस्थाः संन्यासिनश्च उभये मुनयो भवन्तीति मनोर्मतम्—

अग्नीनात्मनि वैतानान् समारोप्य यथाविधि ।
अनग्निरनिकेतः स्यान्मुनिर्मूलफलाशनः ॥ ६.२५
अप्रयत्नः सुखार्थेषु ब्रह्मचारी धराशयः ।
शरणेष्वममश्चैव वृक्षमूलनिकेतनः ॥ ६.२६
तापसेष्वेव विप्रेषु यात्रिकं भैक्षमाहरेत् ।
गृहमेधिषु चान्येषु द्विजेषु वनवासिषु ॥ ६.२७
ग्रामादाहृत्य वाश्नीयादष्टौ ग्रासान् वने वसन् ।
प्रतिगृह्य पुटेनैव पाणिना शकलेन वा ॥ ६.२८
आसां महर्षिचर्याणां त्यक्त्वान्यतमया तनुम् ।
वीतशोकभयो विप्रो ब्रह्मलोके महीयते ॥

इयं महर्षिचर्या वानप्रस्थाश्रमस्यान्तिमे चरणे वस्तुतः संन्यास एव । एतत्तु मनोः संन्यासलक्षणेऽपि प्रतिपादितम्—

अनग्निरनिकेतः स्याद् ग्राममन्नार्थमाश्रयेत् ।
उपेक्षकोऽसंकुसुको मुनिर्भावसमाहितः ॥ ६.४३

महाभारतेऽपि 'पाण्डुः प्रव्रजितो वनम्' इति कल्पितम् । आदि० ११०.२४

३. एक एव चरेन् नित्यं सिद्ध्यर्थमसहायवान् । शान्ति० २३७.४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

गौतमबुद्धो द्विविधं ब्राह्मणं प्रतिजानीते—प्रथमं तावत्ते निवृत्तब्राह्मणा ये संन्यासिनः सन्ति। तेभ्य एव द्वितीयकोटिका यज्ञपरायणा भौतिकसुखा विरताः पृथग्भूताः सन्ति। प्रथमकोटिका ब्राह्मणा जागतिकव्यवहारशून्या योगपरायणा ब्रह्मसंस्था आसन्।[1] महाभारते एतेषां प्रतिनिधिः सनकः शुकश्च प्रसिद्धौ। द्वितीयकोटिकाः पुनः यज्ञपरायणाः, लोकोत्थानव्यापृता, तपः-सम्भृतविभूतयः प्रवृत्तमार्गीया ऋषयोऽभवन्। एतेषां प्रतिनिधिर्वसिष्ठो विश्रुत एव। त एव वैदिकसाहित्यस्य प्रणेतारः प्रसिद्धाः।

साध्याः प्राथमिका मोक्षाश्रमिणो देववर्गे प्रतिष्ठिता दृश्यन्ते। ऋग्वेदानुसारेण पुरुषेण सह देवाः, साध्याः, ऋषयोऽयजन्त।[2] स्वर्गलोके साध्या वसन्ति।[3] छान्दोग्योपनिषदि ब्रह्मणा सह तेषां सम्बन्धोऽधोविधं वर्णितः —

स य एतदेवममृतं वेदसाध्यानामेवैको भूत्वा ब्रह्मणैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति। स एतदेव रूपमभिसंविशति। एतस्माद्रूपादुदेति। ३.१०.३

एते साध्या अक्षरब्रह्मणो[4] देवानामनन्तरं प्रथमं जाता इति मुण्डकोपनिषदि वर्णितम्—

तस्माच्च देवा बहुधा सम्प्रसूताः।
साध्या मनुष्याः पशवो वयांसि॥ २.२.७

महाभारतानुसारेणेमे साध्या ब्रह्मसभायामुपतिष्ठन्ते।[4] तमुपासते च। दत्तात्रेयस्य हंसरूपस्य मुखादेतैर्ब्रह्मज्ञानं श्रुतम्। तद्यथोद्योगपर्वणि—

आक्रुश्यमानो नाक्रोशेन्मन्युरेव तितिक्षतः। ३६.५

यो हन्तुकामस्य न पापमिच्छेत् तस्मै देवाः स्पृहयन्त्यागताय॥ ३६.११

यतो यतो निवर्तते ततस्ततो विमुच्यते।
निवर्तनाद्धि सर्वतो न वेत्ति दुःखमण्वपि॥ ३६.१४

ग्रन्थि विनीय हृदयस्य सर्वं प्रियाप्रिये चात्मवशं नयीत॥ २६.११

अत्र संन्यासोचितो निवृत्तिमार्गस्तेभ्यो निर्दिष्टः। प्रजापतिर्हंसो भूत्वा साध्यानुपगम्य मोक्षधर्मं पृष्टस्तेभ्यो व्याख्यत्—

---

१. त एव निवृत्तिमार्गीया ऋषयो बभूवुः यथाग्रे दर्शितम्।

२. तेन देवाः अयजन्त साध्या ऋषयश्च ये। ऋ० १०.९०.७

ऋषयः साध्याश्च क्रमशः परवर्तियुगे वानप्रस्थानां तपस्विनां संन्यस्तानां योगिनां च पूर्वरूपं निदर्शयन्ति।

३. यत्र पूर्वे साध्याः सन्ति देवाः॥ ऋ० १०.९०.१६

४. सभापर्वणि ११.३०, ३१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

आक्रुश्यमानो न वदामि किंचित्, क्षमाम्ययं ताड्यमानश्च नित्यम् ।
श्रेष्ठं ह्येतत् क्षममप्याहुरार्याः सत्यं तथैवार्जवमानृशंस्यम् ॥
शान्ति० २८८.१२

वेदस्योपनिषत् सत्यं सत्यस्योपनिषद्दमः ।
दमस्योपनिषन् मोक्ष एतत्सर्वानुशासनम् ॥ शान्ति० २८८.१३

संन्यासस्य-प्रतिरोधकाः

आदौ संन्यासप्रतिरोधका देवाः प्रतिभान्ति । तद्यथा महाभारते वर्णितम्-

अहो हि दुरनुष्ठेयो मोक्षधर्मः सनातनः ।
यं हित्वा देवताः सर्वा हव्यकव्यभुजोऽभवन् ॥ शान्ति० ३२७.७

अयं मोक्षधर्मः संन्यासाश्रमः । तत्र संन्यासिनो यज्ञं न यजन्ते । अतएव देवैस्तेषां सम्बन्धो नास्त्येव । ते संन्यासिनो केवलं ब्रह्माश्रिता भवन्ति ।

आत्मोत्कर्षः संन्यासेन ब्रह्मसायुज्याभिमुखेन साध्यम् । ततः संन्यासस्य महती प्रतिष्ठा प्रकल्पिता ।

उद्देश्यम्

यथानाम मोक्षाश्रमोऽयं जीवनमरणबन्धनविमुक्तिं प्रददाति । छान्दोग्योपनिषदि निर्दर्शितम्—ब्रह्मसंस्थोऽमृतत्वमेति ।[1] अर्थात् परिव्राड् ब्रह्मसंस्थो ब्रह्मणि सम्यक् स्थितः सोऽमृतत्वं पुण्यलोक-विलक्षणम्, अमरणभावमात्यन्तिकमेति ।[2] छान्दोग्ये याज्ञवल्क्यो वाजश्रवाश्च कठोपनिषदि वानप्रस्थानन्तरं किञ्चिदुच्चतरं पदं प्राप्तुं यतमानौ दृश्येते । याज्ञवल्क्यस्य प्रव्रज्या तत्र वर्णिता । महाभारतानुसारेण शान्तिपर्वणि—

योगी स सर्वानभिभूय मर्त्यान् नारायणात्मा कुरुते महात्मा ॥ २८९.६२

अन्यच्च—

तस्य वेदविदः प्राज्ञाः श्रुत्वा तां साधुवृत्तताम् ।
लोकेषु स्पृहयन्त्यन्ये पुरुषाः पुरुषेश्वर ॥

अत्र धर्मध्वज इति विख्यातस्य संन्यासफलिकस्य चर्चा संवृत्ता ।

---

१. अमृतत्वस्य पर्यायाः सन्ति—मोक्षः, मुक्तिः, निःश्रेयसः, कैवल्यमपवर्गः, निर्वाणः ।

२. २.२३.१ । तदधिकृत्य शाङ्करभाष्यम् अमृतत्वस्य परिकल्पनाथर्ववेदेऽधोविधं लक्ष्यते—

को अस्मिन् यज्ञमधादेको देवोऽधिपूरुषे ।
को अस्मिन् सत्यं कोऽनृतं कुतो मृत्युः कुतोऽमृतम् ॥ १०.२.१४

इदममृतं संन्यासं विना न भवति ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

जीवन्मुक्तस्य तत्रैवमेव कल्पना बभूव। मनुः स्पष्टयति—

अभिपूजितलाभैश्च यतिर्मुक्तोऽपि बद्ध्यते ॥ ६.५८

वस्तुतो जीवन्मुक्त एव संन्यासी भवतीति[1] मनोरधोवचनेन स्पष्टमेव—

कपालं वृक्षमूलानि कुचेलमसहायता।
समता चैव सर्वस्मिन्नेतन्मुक्तस्य लक्षणम् ॥ ६.४४

परतोऽपि मनुर्जीवन्मुक्तं प्रतिष्ठापयत्यधोवचनेन—

वेदशास्त्रार्थतत्त्वज्ञो यत्र तत्राश्रमे वसन्।
इहैव लोके तिष्ठन् स ब्रह्मभूयाय कल्पते ॥ १२.२०२

बौद्धसंस्कृत्यनुसारेण—Nirvāṇa, there is no doubt, can be attained and normally is attained before the bodily death of the sage; it brings with it happiness of the highest order, and inspires the poetry of many of the stanzas of the Thera and Therīgāthās.[2]

प्राप्तनिर्वाणो मुनिः सुत्तनिपातेऽधोविधं लक्षितः—शान्तिपदद्रष्टा, जातिक्षयान्तदर्शी, पारगतः, सर्वाभिभूः, सर्ववित्, सुमेधाः, सर्वजहः, विमुक्तः, प्रज्ञाबलः, शीलव्रतोपपन्नः, समाहितः, ध्यानरतः, स्मृतिमान्, संगप्रमुक्तः, अखिलः, एकचरः, अप्रमत्तः, निद्राप्रशंसासु समः, अनासक्तः, अनन्यनेयः, वीतरागः, सुसमाहितेन्द्रियः, स्थितात्मा, ऋजुः, यतात्मा, परदत्तोपजीवी, परमार्थदर्शी, असितः, अममः, वने ध्यानरतश्च।[3]

संन्यासिनो जीवन-विधिः

संन्यासिनो जीवनस्य क्रमद्वयं भवति—(१) जीवन्मुक्तेः प्राक् (२) जीवन्मुक्तेरनन्तरं मरणं यावत्।

जागतिकजीवने तत्र सन्ति—जन्म-मृत्यु-जरादिभिः कृतानि दुःखानि। अन्यच्च व्याधिभिर्मानसग्लानिभिश्च परितप्यते जनः। अत एव 'जीवन-सरणिः शाश्वतमवरुध्येत' इति मनीषिणः प्रथमः कल्पो भवेत्। एतदर्थं महाभारते उपायो निर्दिष्टः—संन्यास इति।[4]

भिक्षया यत् किंचित्—कणकुल्माषपिण्याक-शाक-यावक-सक्तवः, मूल-

---

१. अन्यत्रापि मनुना संन्यासिनो जीवन्मुक्तिः समर्थिता। तथाहि—

अभिपूजितलाभैश्च यतिर्मुक्तोऽपि बध्यते ॥ ६.५८

२. A. B. Keith : Buddhist Philosophy p. 61

३. सुत्तनिपाते १२, मुनिसुत्तं।

४. वाङ्मनोभ्यां शरीरेण शुचिः स्यादनहंकृतः।
प्रशान्तो ज्ञानवान् भिक्षुर्निरपेक्षश्चरेत् सुखम् ॥ शान्ति० २०८.३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

फलादिकं प्राप्यन्ते तदेव योगी संन्यासी वोपयोजयेत् ।[1]

महभारते तत्त्वदर्शिनां प्रज्ञानमेव महत् तृप्तिकारणमिति विज्ञापितमधोविधम्—

यथा सर्वरसैस्तृप्तो नाभिनन्दति किंचन ।
तथा प्रज्ञानतृप्तस्य नित्यं तृप्तिः सुखोदया ।। शा० २५५.२०

जीवन्मुक्तो गुरुं ज्ञानं चोभयं त्यजेदिति महाभारतीयो निर्देशो जनकमुखेन विज्ञापितः । तथाहि—

गुरुः प्लावयिता तस्य ज्ञानं प्लव इहोच्यते ।
विज्ञाय कृतकृत्यस्तु तीर्णस्तदुभयं त्यजेत् ।। शान्ति० ३१३.२३

परस्पर-संवादेषु, दीक्षागुरूणां प्रवचनेषु बहु शिक्षितव्यमासीत् योगिनाम् । विशेषतो मोक्षशास्त्रं श्रवणीयमासीत् ।[2] सुलभात्म-विषयकं वदति—

विनीता मोक्षधर्मेषु चराम्येकं मुनिव्रतम् । शान्ति० ३०८.१८४

महाभारते संन्यासाश्रमस्य शीलं, सदाचारः, विद्याः, लक्ष्यं च ससारमधोविधं सङ्गृहीतानि शान्तिपर्वणि २६९तमेऽध्याये—

मोक्षधर्मेषु निरतो लघ्वाहारो जितेन्द्रियः ।
प्राप्नोति परमं स्थानं यत्परं प्रकृतेर्ध्रुवम् ।।
स्वगृहादभिनिःसृत्य लाभालाभे समो मुनिः ।
समुपोढेषु कामेषु निरपेक्षः परिव्रजेत् ।।
न चक्षुषा न मनसा न वाचा दूषयेदपि ।
न प्रत्यक्षं परोक्षं वा दूषणं व्याहरेत् क्वचित् ।।
न हिंस्यात् सर्वभूतानि मैत्रायणगतिश्चरेत् ।
नेदं जीवितमासाद्य वैरं कुर्वीत केनचित् ।।
अतिवादांस्तितिक्षेत नाभिमन्येत् कथंचन ।
क्रोध्यमानः प्रियं ब्रूयादाक्रुष्टः कुशलं वदेत् ।।
प्रदक्षिणं प्रसव्यं च ग्राममध्ये न चाचरेत् ।
भैक्षचर्यामनापन्नो न गच्छेत् पूर्वकेतितः ।।
अवकीर्णः सुगुप्तश्च न वाचा ह्यप्रियं वदेत् ।
मृदुः स्यादप्रतिक्रूरो विस्रब्धः स्यादरोषणः ।।

---

१. शान्ति० २०८.२२ । बौद्धसंस्कृतावपि—

दुग्गो मग्गोपधानाय दुक्करो दुरभिसंभवो ।। सुत्तनिपात २८.५

२. मोक्षः सोपायः, सोपनिषद्, सोपासङ्गः सनिश्चयो जनकेन पञ्चशिखात् शिक्षितः। शान्ति० ३०८.१६३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विधूमे न्यस्तमुसले व्यङ्गारे भुक्तवज्जने ।
अतीते पात्रसंचारे भिक्षां लिप्सेत वै मुनिः ॥
अनुयात्रिकमर्थस्य मात्रालाभेष्वनादृतः ।
अलाभे न विहन्येत लाभश्चैनं न हर्षयेत् ॥
लाभं साधारणं नेच्छेन्न भुञ्जीताभिपूजितः ।
अभिपूजितलाभं हि जुगुप्सेतैव तादृशः ॥
न चान्नदोषान्निन्देत न गुणानभिपूजयेत् ।
शय्यासने विविक्ते च नित्यमेवाभिपूजयेत् ॥
शून्यागारं वृक्षमूलमरण्यमथवा गुहाम् ।
अज्ञातचर्यां गत्वान्यां ततोऽन्यत्रैव संविशेत् ॥
अनुरोधविरोधाभ्यां समः स्यादचलो ध्रुवः ।
सुकृतं दुष्कृतं चोभे नानुरुध्येत कर्मणि ॥

वाचोवेगं मनसः क्रोधवेगं विवित्सावेगमुदरोपस्थवेगम् ।
एतान् वेगान् विनयेद् वै तपस्वी निन्दा चास्य हृदयं नोपहन्यात् ।

मध्यस्थ एव तिष्ठेत प्रशंसानिन्दयोः समः ।
एतत् पवित्रं परमं परिव्राजक आश्रमे ॥
महात्मा सुव्रतो दान्तः सर्वत्रैवानपाश्रितः ।
अपूर्वचारकः सौम्योऽनिकेतः समाहितः ॥
वानप्रस्थगृहस्थानां न संसृज्येत कर्हिचित् ।
अज्ञातलिप्सां लिप्सेत न चैनं हर्ष आविशेत् ॥
विजानता मोक्ष एष श्रमः, स्यादविजानताम् ।
मोक्षयानमिदं कृत्स्नं विदुषां हारितोऽब्रवीत् ॥
अभयं सर्वभूतेभ्यो दत्त्वा यः प्रव्रजेद् गृहात् ।
लोकास्तेजोमयास्तस्य तथानन्त्याय कल्पते ॥

महाभारतानुसारेण प्रवृत्तिधर्मोऽयं गृहस्थाश्रमः । तस्माद्विपरीत एव निवृत्तधर्मो मोक्षाश्रमोऽधोविधं समाहृतोऽनुशासन-पर्वणि १२९तमेऽध्याये—

सर्वभूतदया धर्मो न चैकग्रामवासिता ।
आशापाशविमोक्षश्च शस्यते मोक्षकांक्षिणाम् ॥
न कुण्डचां नोदके सङ्गो न वाससि न चासने ।
न त्रिदण्डे न शयने नाग्नौ न शरणालये ॥
अध्यात्मगतचित्तो यस्तन्मनास्तत्परायणः ।
युक्तो योगं प्रति सदा प्रतिसंख्यानमेव च ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वृक्षमूलाशयो नित्यं शून्यागारनिवेशनः ।
नदी-पुलिनशायी च नदीतीररतिश्च यः ॥
विमुक्तः सर्वसङ्गेषु स्नेहबन्धेषु च द्विजः ।
आत्मन्येवात्मनो भावं समासज्याटति द्विजः ॥
स्थाणुभूतो निराहारो मोक्षदृष्टेन कर्मणा ।
परिव्रजति यो युक्तस्तस्य धर्मः सनातनः ॥
न चैकत्र चिरासक्तो न चैकग्रामगोचरः ।
युक्तो ह्यटति निर्मुक्तो न चैकपुलिनेशयः ॥
एष मोक्षविदो धर्मो वेदोक्तः सत्पथः सताम् ।
यो मार्गमनुयातीमं पदं तस्य न विद्यते ॥

अश्वस्तन आसीत् संन्यासी ।[1] कतिपयसंन्यासिनो वर्षतौ चतुर्मासानेकस्थाने राजाश्रयेऽपि यापयन्तिस्म ।[2]

सुत्तनिपातस्य सभियसुत्तानुसारेण सभियः परिव्राजको नैकश्रमणब्राह्मणान् मोक्षविषयकप्रश्नानपृच्छत् । अन्ततो गौतमबुद्धेन भाषिताभिनन्दितविनीतप्रव्रज्यामगृह्णात् ।

महात्मा बुद्धो मुनिजीवनविधिं परिभाषते । तद्यथा—

अनिकेतमसंथवं एतं वे मुनिदस्सनं । १
अञ्ञाय सब्बानि निवेसनानि अनिकामयं अञ्ञतरंपि तेसं ।
सवे मुनी वीतगेधो अगिद्धो नायूहति पारगतो हि होति ॥ ४
सब्बाभिभुं सब्बविदुं सुमेधं सब्बेसु धम्मेसु अनूपलित्तं ।
सब्बंजहं तण्हखये विमुत्तं तं वापि धीरा मुनिं वेदयन्ति ॥ ५
पञ्ञाबलं शीलवतूपपन्नं समाहितं झानरतं सतीमं ।
संगा पमुत्तं अखिलं अनासवं तं वापि धीरा मुनिं वेदयन्ति ॥ ६
एकं चरन्तं मुनिं अप्पमत्तं निन्दापसंसासु अवेधमानं ।
सीहंव सद्देसु असन्तसन्तं वातंव जालम्हि असज्जमानं ।
पदुमं व तोयेन अलिप्पमानं नेतारमञ्ञेसमनञ्ञनेय्यं ।
तं वापि धीरा मुनिं वेदयन्ति । ७
यदग्गतो मज्झतो सेसतो वा पिण्डं लभेथ परदत्तोपजीवी ।
नालं थुतुं नोऽपि निपच्चवादी तं वापि धीरा मुनिं वेदयन्ति ॥ ११

---

१. अश्वस्तनविधानः स्यान्मुनिर्भावसमन्वितः ।
लघ्वाशी नियताहारः सकृदन्ननिषेविता ॥ शा० २३७.६

२. पंचशिखो जनकस्याश्रयेण चतुर्मासानयापयत् । शान्ति० ३०८.२६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

एवं गिही नानुकरोति भिक्खुनो ।
मुनिनो विवित्तस्य वनम्हि झायतो'ति ।। १५

सूत्तनिपास्य मुनिसुत्तात्

प्रकरणेऽस्मिन् मुनेः (संन्यासिनः) गृहत्यागः, अपरिग्रहः, अनासक्तिः, तृष्णाक्षयः, अस्वम्, समाधिः, ध्यानम्, स्मृतिः, निःसङ्गता, एकाकिविचरणम्, अप्रमादः, निन्दाप्रशंसासु समभावः, निर्लिप्तिः, परदत्तोपजीविका; विविक्तवास इति विशेषाः प्रामुख्येण समाहृताः ।

शास्त्रीयं जीवनविधानम्

पूर्वोक्ताः संन्यासिनां योगिनां च व्यावहारिकजीवनादर्शा अंशतः शास्त्रीयविधानैः समर्थिता दृश्यन्ते । तदनुसारेण कश्चित् पारिवारिको जनः स्वीयाश्रितानां सम्भरणस्योपायान् विधायैव परिव्रजेत् । यदि नाम नाभवत् तस्य कश्चिदाश्रितः स स्वीयं सर्वस्वं यज्ञद्वारेण व्यसृजत् ।[1] यदि नाम कश्चित् पुरुषः स्त्रीपुत्रादिभ्यो जीवनौपयिकमविधाय प्राव्रजत्, स तु दण्डनीयो बभूव ।[2]

संन्यासी ग्रामं केवलं दिवा सकृत् भिक्षार्थं प्रविशेत्, रात्रौ वृक्षाधो वा शून्यागारे वा वसतिं कुर्यात्, निरन्तरं दिव चरन्नेव एकाकी कालं यापयेत् । केवलं वर्षतौ एकस्थल आश्रयेत् ।[3]

मनुर्निर्धारयति—

कपालं वृक्षमूलानि कुचेलमसहायता ।
समता चैव सर्वस्मिन्नेतन्मुक्तस्य लक्षणम् ।। ६.४४

अत्र मुक्तस्येति परिव्राजकस्य संन्यस्तस्य वा ।

संन्यासी केषांचिदपि चराचराणां कृते दुःखदो न भवेत् । विकारहेतौ सत्यपि अविकृतचित्तः सर्वेषामपि शुभं कामयेत ।[4]

संन्यासी भिक्षया जीवति स्म । नैकस्मादेव गृहात् स आवश्यकान्नमगृह्णादपि तु सप्तगृहेभ्यो यदृच्छया समकल्पिष्ट । इयं मधुकरी वृत्तिः । लोकाचारानुसारेण संन्यासी, ब्रह्मचारी चान्द्रायणव्रती च सर्वप्रथमं भोजन-

---

१. प्राजापत्यां निरूप्येष्टिं सर्ववेदसदक्षिणम् ।
आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद् गृहात् ।। मनु० ६.३८

२. पुत्रदारमप्रतिविधाय प्रव्रजतः पूर्वः साहसदण्डः । अर्थ० २.१

३. ग्रामान्ते देवगृहे शून्यागारे वा वृक्षमूले वा । अरण्यनित्यः । वसिष्ठ १०.१२, १३, १५ । एक एव चरेन्नित्यं सिद्ध्यर्थमसहायवान् । मनु० ६.४२

४. अतिवादांस्तितिक्षेत नावमन्येत कञ्चन ।
न चेमं देहमाश्रित्य वैरं कुर्वीत केनचित् ।। मनु०६.४७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

महंतः ।[1] सायमेव सोऽभिक्षत यदा सर्वा भोजन-प्रक्रियाः समापिताः स्युः। प्राणयात्रिकमात्रं तस्य भोजनमभवत् ।[2] संन्यासी अष्टौ ग्रासान्, वानप्रस्थः षोडशग्रासान् गृहस्थश्च द्वात्रिंशद् ग्रासान् खादेयुः ।[3] स्वल्पभोजनेनेन्द्रियनिग्रहो भवति ।[4]

संन्यासिन उपकरणानि मनुना निर्दिष्टानि सन्ति—

कपालं वृक्षमूलानि कुचेलमसहायता । ६.४४

वस्त्रं तस्य तु गोप्याङ्गावरणार्थमासीत् । दिगम्बरत्वं तु शिवादेरादर्शानुरूपं प्रावर्तत । गैरिकरञ्जितवस्त्रं तु बौधायनानुसारेणोचितं तेषाम् ।[5] मनुः संन्यासिनः पात्राणि निर्दिशति—

अलाबुं दारुपात्रं च मृन्मयं वैदलं तथा ।
एतानि यतिपात्राणि मनुः स्वायंभुवोऽब्रवीत् ।। ६.५४

जीवन-मरणविषये निरकाङ्क्ष आसीत् संन्यासी । तद्यथा मनुस्तत्र तस्य निःस्पृहतां निभालयति—

नाभिनन्देत मरणं नाभिवन्देत जीवितम् ।
कालमेव प्रतीक्षेत निर्देशं भृतको यथा ।। ६.४५

संन्यासिनो मौनभावः प्रशस्त एव । केवलं वेदमन्त्राणां स्मरणार्थं स तेषामुच्चारणपूर्वकमावृत्तिं व्यधात् ।

संन्यासी सांसारिकजीवनस्य वैषभ्यं, शरीरस्य शारीरिकव्यापाराणां च घृणास्पदं निस्सारं क्षणिकं च स्वरूपं मनसि निरन्तरं भावयन् वैराग्यभावं प्रदीपयेत् । तद्यथा देहस्वरूपं मनुना संन्यासिवृत्त्याऽधोविधं वर्णितम्—

अस्थिस्थूणं स्नायुयुतं मांसशोणितलेपनम् ।
चर्मावनद्धं दुर्गन्धि पूर्णमूत्रपुरीषयोः ।।

---

१. अल्पान्नाभ्यवहारेण रहःस्थानासनेन च ।
ह्रियमाणानि विषयैरिन्द्रियाणि निवर्तयेत् ।। ६.५९
बौद्धसंस्कृतावपि समर्थितमेतदधोवचनेन बुद्धस्य—
मंसेसु खीयमानेसु भिय्यो चित्तं पसीदति ।
भिय्यो सति च पञ्ञा च समाधि मम तिट्ठति ।। सु० नि० २८.१०

२. पराशर १.५१

३. मनु० ६. ५६, ५७

४. आप० ध० सू० २.४. ९.१३; बौधायन ध० सू० २.१०.६८ ब्रह्मचारी तु यदृच्छया खादेदिति विधानमासीत् ।

५. बौ० ध० सू० २.६.२४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

जराशोकसमाविष्टं रोगायतनमातुरम् ।
रजस्वलमनित्यं च भूतावासमिमं त्यजेत्[1] ॥ ६.७६,७७

अश्वघोषः सौन्दरनन्दे भर्तृहरिर्वैराग्यशतकेऽन्ये च साधुकवयः स्वीयरचनासु इन्द्रियसम्प्रयोगान् भूयो भूयो भृशं निनिन्दुः । काव्यशास्त्रे बीभत्सरसस्य निर्वेदभावस्य संरचना संन्यासपथयात्रिणां कृते मननसामग्रीं प्रचुरं प्रबोधयति। तद्यथा भरतो नाट्यशास्त्रे—'अथ बीभत्सो नाम जुगुप्साभावात्मकः। स चाहृद्याप्रियाचोष्यानिष्टश्रवणदर्शनकीर्तनादिभिरुत्पद्यते । तस्य सर्वाङ्गसंहार-मुखविकूणनोल्लेखन-निष्ठीवनोद्वेजनादिभिरनुभावैरभिनयः प्रयोक्तव्यः। भावाश्चास्यापस्मारोद्वेग-मोहव्याधि-मरणादयः ।[2]

शान्तरसस्य निर्वेदभावस्य च काव्ये शास्त्रे च सम्प्रतिष्ठा वैराग्यस्य पोषणाय भवति । अत्रानुवंश्ये आर्ये स्तः —

इष्टजनविप्रयोगाद्दारिद्र्याद् व्याधितस्तथा दुःखात् ।
ऋद्धिं परस्य दृष्ट्वा निर्वेदो नाम सम्भवति ॥ ३०
वाष्पपरिप्लुतनयनः पुनश्च निःश्वासदीनमुखनेत्रः ।
योगीव ध्यानपरो भवति हि निर्वेदवान् पुरुषः ॥ ३१

बहवोऽन्येऽपि व्यभिचारिणो भावा वैराग्यजनने तीव्रं प्रभवन्ति । ते सन्ति ग्लानिः, शङ्का, असूया, दैन्यम्, चिन्ता, मोहः, व्रीडा, चपलता, आवेगः, जडता, विषादः, औत्सुक्यम्, अपस्मारः, उग्रता, व्याधिः, उन्मादः, मरणम्, त्रासश्च । प्रायशः सात्त्विका भावा निर्वेदमूला सन्ति ।[3]

बौद्धसंस्कृतावपि शरीरस्य घृणास्पदं रूपं निर्वृत्य तस्मादनासक्तिः प्रतिपादिता । तद्यथा—

---

१. प्रकरणेऽस्मिन् भरत आनुवंश्ये आर्ये उद्धरति—

अनभिमतदर्शनेन च गन्धरसस्पर्शशब्ददोषैश्च ।
उद्वेजनैश्च बहुभिर्बीभत्सः समुद्भवति ॥ ७३

अनभिमतदर्शनं तु रौद्र-करुण-भयानक-बीभत्सप्रकरणेषु प्रतीतमेव । एतै रसैर्वैराग्यं समुद्भवति ।

२. मनुरन्यत्रापि समर्थयति—

विप्रयोगं प्रियैश्चैव संयोगं च तथाप्रियैः ।
जरसा चाभिभवनं व्याधिभिश्चोपपीडनम् ॥ ६.६२
देहादुत्क्रमणं चास्मात् पुनर्गर्भे च सम्भवम् ।
योनिकोटिसहस्रेषु सृतीश्चास्यान्तरात्मनः ॥ ६.६३

३. स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभेदोऽथ वेपथुः ।
वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विका मताः ॥ ना० शा० ७.९५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथस्स नवहि सोतेहि असुचि सवति सव्वदा ।
अक्खिमा अक्खिगूथको कण्णम्हा कण्णगूथको ।। ५
सुभतो नं मञ्ञति बालो अविज्जाय पुरक्खतो ।। ७
यदा च सो मतो सेति उद्धमातो विनीलको ।
अपविद्धो सुसानस्मिं अनपेक्खा होन्ति ञातयो ।। ८
छन्दरागविरत्तो भिक्खु पञ्ञाणवा इध ।
अज्झगा अमतं सन्ति निब्बाणपदमच्चुतं ।। १२

सुत्तनिपात ११ सुत्तात्

अत्र शरीराद्विरतेर्निर्वाणः (मोक्षः) अमृतं शान्तिः अमरत्वम्) इत्यादि सम्भवन्तीति प्रकाशितम् ।

संन्यासिनां प्रभेदाः

महाभारतानुसारेण परवर्तियुगे चतुर्विधाः संन्यासिनो जीवनविधि-विचारेण वर्गीकृताः —

चतुर्विधा भिक्षवस्ते कुटीचरकृतोदकौ ।
हंसः परमहंसश्च यो यः पश्चात् स उत्तमः[1] ।।

अन्ये सन्ति त्रिदण्डिनः ।[2] अस्मिन् प्रसङ्गे दण्डस्तु नियमनमेव । स यतिरेवेति भागवते—

तल्लिप्सुः स यतिर्भूत्वा त्रिदण्डी द्वारकामगात् ।। १०.८६.३

त्रिदण्डी हयग्रीव एवं भगवतो नारायणस्याद्यस्वरूपं प्रतीकयति । तद्यथा महाभारते वर्णितम्—

तं (ब्रह्माणं) देवो (नारायणो) दर्शयामास कृत्वा हयशिरो महत् ।
साङ्गानावर्तयन् वेदान् कमण्डलु-त्रिदण्डधृक् ।। शान्ति० ३२७.८१

को भवति त्रिदण्डीति मनुना निदर्शितम्—

---

१. तत्र कुटीचरा गौतम-भरद्वाज-याज्ञवल्क्य-हारीतप्रभृतीनामाश्रमेषु अष्टौ ग्रासांश्चरन्तो योगमार्गतत्त्वज्ञा मोक्षमेव प्रार्थयन्ते । कृतोदकास्त्रिदण्डकमण्डलुकाषायधातुवस्त्रग्रहणवेषधारिणो ब्रह्मर्षिगृहेषु चान्येषु साधुवृत्तेषु मांसलवणपर्युषितान्नं वर्जयन्ते, सप्तागारेषु भैक्षं कृत्वा मोक्षमेव प्रार्थयन्ते । हंसा नाम ग्रामे चैकरात्रं नगरे पञ्चरात्रं वसन्तस्तदुपरि न वसन्तो गोमूत्रगोमयाहारिणो वा मासोपवासिनो वा नित्यचान्द्रायणव्रतिनो नित्यमुत्थानं प्रार्थयन्ते । परमहंसा नाम वृक्षैकमूले शून्यागारे श्मशाने वा वासिनः साम्बरा वा दिगम्बरा वा । न तेषां धर्माधर्मौ सत्यानृते शुद्धचशुद्धचादि द्वैतम् । सर्वसमा सर्वात्मानः समलोष्टकाञ्चनाः सर्ववर्णेषु तेभैक्षाचरणं कुर्वन्ति । वैखानस-सूत्र ८.९

२. शान्तिप० ३०८.८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वाग्दण्डोऽथ मनोदण्डः कायदण्डस्तथैव च ।
यस्यैते निहिता बुद्धौ त्रिदण्डीति स उच्यते ॥ १२.१०

संन्यासिनो यष्टिदण्डास्तु प्रतीकमात्रम् ।

महाभारते शान्तिपर्वणि आजगरवृत्तिकस्य मुनेरात्मकथाधोविधं वर्णिता—

सुमहान्तमपि ग्रासं ग्रसे लब्धं यदृच्छया ।
शये पुनरभुञ्जानो दिवसानि बहून्यपि ॥ १७२.९
भक्षये शालिमांसानि भक्षांश्चोच्चावचान् पुनः ।
शये कदाचित् पर्यङ्के भूमावपि पुनः शये ॥ १७२.२१, २२
प्रासादेऽपि च मे शय्या कदाचिदुपपद्यते ।
धारयामि च चीराणि शाणीं क्षौमाजिनानि च ।
महार्हाणि च वासांसि धारयाम्यहमेकदा ॥ १७२.२३
अनियतशयनासनः प्रकृत्या दमनियमव्रतसत्यशौचयुक्तः ।
अपगत फलसंचयः प्रहृष्टो व्रतमिदमाजगरं शुचिश्चरामि ॥
१७२.३२
अनवसितमनन्तदोषपारं नृषु विहरामि विनीतरोषतृष्णः ॥
१७२.३६

भीष्मः समीक्षते—

अजगरचरितं व्रतं महात्मा य इह नरोऽनुचरेद्विनीतरागः ।
अपगतभयमन्युलोभमोहः स खलु सुखी विहरेदिमं विहारम् ॥
शान्तिपर्वणि १७२.३७

मोक्षदिशि प्रगमनस्य विचारेणाधोविधाः क्रमाः पाणिनिना विवृताः सन्ति—शमी, दमी, योगी, विवेकी, त्यागी च ।[1]

प्रवृत्तिमार्गः

संन्यास्य द्वौ मार्गौ स्तः—प्रवृत्तिमार्गः, निवृत्तिमार्गश्च ।[2] तत्र प्रवृत्तिमार्गे केषुचिदिन्द्रियनिग्रहपरेषु कर्मसु प्रवृत्तिरवशिष्यते । तद्यथा महाभारतस्य शान्तिपर्वणि—

---

१. अष्टाध्यायी ३.२.१४२ ।
विवेकः पृथगात्मता । अर्थात् प्रकृति-पुरुषादिभेदज्ञानस्य । अमरकोषे २.७.३८ । दमीती दान्तः, तपः क्लेशसहः ।

२. द्विविधा ब्राह्मणा राजन् धर्मश्च द्विविधः स्मृतः ।
प्रवृत्तश्च निवृत्तश्च निवृत्तोऽस्मि परिग्रहात् ॥ शा० १९२.३९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मनः समाधिरत्रापि तथेन्द्रियजयः स्मृतः ।
सत्यमग्निपरीचारो विविक्तानां च सेवनम् ।
ध्यानं तपो दमः क्षान्तिरनसूया मिताशनम् ।। १८९.९

विषयप्रतिसंहारो मितजल्पस्तथा शमः ।
एष प्रवृत्तको धर्मः इत्यादि ।। १८९.१०

अनेन प्रवृत्तिपथेनामृतत्वं न प्राप्यते ।[1] लौकिकाभ्युदयः स्वर्गादिलोक-प्राप्तिश्च प्रवृत्तेनाधिगम्येते । अयमपि प्रवृत्तिमार्गः कर्मयोग एव ।

निवृत्तिमार्गः

निवृत्तिमार्गे पूर्वकर्मभ्यो निवृत्तिर्भवति ।[2] साधकस्य मार्गेऽस्मिन् क्रम-त्रयात्मिका साधना मोक्षपरायणा दृश्यते । तद्यथा महाभारते शान्तिपर्वणि—

कुशोच्चयनिषण्णः सन् कुशहस्तः कुशैः शिखी ।
चीरैः परिवृतस्तस्मिन् मध्ये छन्नः कुशैस्तथा ।। १८९.१२

विषयेभ्यो नमस्कुर्याद् विषयान्न च भावयेत् ।
साम्यमुत्पाद्य मनसो मनस्येव मनो दधत् ।। १८९.१३

तद्धिया ध्यायति ब्रह्म जपन् वै संहितां हिताम् ।
संन्यस्यत्यथ वा तां वै समाधौ पर्यवस्थितः ।। १८९ १४

ध्यानक्रियापरो युक्तो ध्यानवान् ध्याननिश्चयः ।
ध्याने समाधिमुत्पाद्य तदपि त्यजति क्रमात् ।। १८९.१८

स वै तस्यामवस्थायाः सर्वत्यागकृतः सुखी ।
निरीहस्त्यजति प्राणान् ब्राह्मीं संश्रयते तनुम् ।। १८९.१९

अथवा नेच्छते तत्र ब्रह्मकायनिषेवणम् ।
उत्क्रामति च मार्गस्थो नैव क्वचन जायते ।। १८९.२०

आत्मबुद्धिं समास्थाय शान्तीभूतो निरामयः ।
अमृतं विरजः शुद्धमात्मानं प्रतिपद्यते ।। १८९.२१

---

१. प्रवृत्तिलक्षणं धर्मं प्रजापतिरथाब्रवीत् ।
प्रवृत्तिः पुनरावृत्तिर्निवृत्तिः परमा गतिः ।। शान्ति० २१०.४

२. यथा निवर्तते कर्म जपतो ब्रह्मचारिणः । शान्ति० १८९.११
स त्वं निवृत्तबन्धस्तु निवृत्तश्चापि कर्मतः ।। शान्ति० ३१६.५८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

जपः

मरणानन्तरं जापकानामुत्तमा गतिः सम्भवति। [1]जप्यस्य महत्फलमासीत् कौशिकस्य धर्मानुसारेण —

जिता लोकास्त्वया सर्वे ये दिव्या ये च मानुषाः ।
देवानां निरयान् साधो सर्वानुत्क्रम्य यास्यसि ॥ शा० १९२.२०

स सदेहं स्वर्गवासमैच्छत्। श्रेष्ठजापकस्यान्तिमा गतिरासीत्—

निष्चेष्टाभ्यां शरीराभ्यां स्थिरदृष्टी समाहितौ ।
जितात्मानौ तथाधाय मूर्धन्यात्मानमेव च ॥ शा० १९३.१८

तालुदेशमथोद्दाल्य ब्राह्मणस्य महात्मनः ।
ज्योतिर्ज्वाला सुमहती जगाम त्रिदिवं तदा ॥ शा० १९३.१९

महाभारते संन्यासिनां कृते जप्यपरता निर्दिष्टा।[2] वैदिकयुगे जपः सुविदित आसीत्। शनैः शनैर्जपस्य महिमा समवर्धत।[3] तत्र गीतायां कृष्णः निर्दिशति —

'यज्ञानां जपयज्ञोऽस्मि'। १०.२५

मनुर्जपं सविशेषमुन्नमयति—

जप्येनैव तु संसिध्येद् ब्राह्मणो नात्र संशयः ।
कुर्यादन्यन्न वा कुर्यान् मैत्रो ब्राह्मण उच्यते ॥ २.८७

त्रिविधं जपयज्ञं विवृण्वन् मनुः प्राह —

विधियज्ञाद् जपयज्ञो विशिष्टो दशभिर्गुणैः ।
उपांशुः स्यात् शतगुणः साहस्रो मानसः स्मृतः ॥ २.८५

---

१. महाभारते शान्तिप० १९७.१। अन्यच्च—

प्रयाति संहिताध्यायी ब्रह्माणं परमेष्ठिनम् ।
अथवाग्निं समायाति सूर्यमाविशतेऽपि वा ॥ शा० १९२.११८
जापकैस्तुल्यफलता योगानां नात्र संशयः ॥ १९३.२२

२. अयं जपयज्ञो ब्राह्मणानां कृते निर्धारितः। क्षत्रिया वैश्याश्चालम्भनयज्ञं सम्पादयन्त्विति महाभारते शा० २३०.१२

३. ऋग्वेदे ८.११.५ अनुसारेण विद्वांसोऽग्निनाममननं कुर्वन्ति स्म।
बृहदारण्यके—स वै खलु प्रस्तोता साम प्रस्तौति स यत्र प्रस्तुयत्तदेतानि जपेत्—असतो मा सद गमय। तमसो मा ज्योतिर्गमय। मृत्योर्मामृतं गमयेति १.३.२८
अस्य जपकर्मणो नाम 'अभ्यारोहः' इति। याजमानं जपकर्म।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ये पाकयज्ञाश्चत्वारो विधियज्ञसमन्विताः ।
सर्वे ते जपयज्ञस्य कलां नार्हन्ति षोडशीम् ॥ २८६

सर्वेषामाश्रमिणां कृते जपस्य विधानमासीत्। ब्रह्मचारी गृहस्थाश्चाष्टोत्तरशतवारं वानप्रस्था यतयश्च सहस्राधिकवारं जपं कुर्वन्तु।[1]

योगो ध्यानं च

योगपथो वैदिकसंहितायुगेऽपि सुप्रथित आसीत्। यजुर्वेदेऽधोविधं निर्दिष्टम्—

योगाय योक्त्रमालभते । ३०.१४

ध्यानयोगेन शाश्वती सिद्धिरधिगम्यते। महाभारते शान्तिपर्वणि ध्यानयोगस्य स्वरूपं परिभाषितम्। तथा हि—

तत्र स्वाध्याय-संश्लिष्टमेकाग्रं धारयेन्मनः ।
पिण्डीकृत्येन्द्रियग्राममासीनः काष्ठवन्मुनिः ॥ १८७.५
ततो मनसि संसज्य पञ्चवर्गं विचक्षणः ।
समादध्यान्मनो भ्रान्तमिन्द्रियैः सह पञ्चभिः ॥ १८८.८
अनिर्वेदो गतक्लेशो गततन्द्रीरमत्सरः ।
समादध्यात् पुनश्चेतो ध्यानेन ध्यानयोगवित् ॥ १८८.१४
विचारश्च वितर्कश्च विवेकश्चोपजायते ।
मुनेः समादधानस्य प्रथमं ध्यानमादितः ॥ १८८.१५
स्वयमेव मनसश्चैव पञ्चवर्गश्च भारत ।
पूर्वं ध्यानपथं प्राप्य नित्ययोगेन शाम्यति ॥ १८८.२०
न तत्पुरुषकारेण न च दैवेन केनचित् ।
सुखमेष्यति तत्तस्य यदेवं संयतात्मनः ॥ १८८.२१
सुखेन तेन संयुक्तो रंस्यन्ते ध्यानकर्मणि ।
गच्छन्ति योगिनो ह्येवं निर्वाणं तन्निरामयम् ॥ १८८.२२

मनुः प्राणायामात् प्रारभ्य ध्यानं यावद् योगाङ्गानां पृथक् पृथगुपयोगं क्रमशो निर्दिशति—

तथेन्द्रियाणां दह्यन्ते दोषाः प्राणस्य निग्रहात् ।
प्राणायामैर्दहेद्दोषान् धारणाभिश्च किल्बिषम् ।
प्रत्याहारेण संसर्गान् ध्यानेनानीश्वरान् गुणान्[2] ॥ ६.७२

---

१. जपस्य प्रधानमुद्देश्यं यथामरकोशे वर्णितम्—
सर्वेनसामपध्वंसि जप्यं त्रिष्वघमर्षणम् ।

२. अनीश्वरगुणाः सन्ति काम-क्रोधादयः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

योगान्नास्ति परं सुखम् । महा० आश्व० ३०.२७

ज्योतिरात्मनि नान्यत्र रतं तत्रैव चैव तत् ।
स्वयं च शक्यं तद् द्रष्टुं सुसमाहितचेतसः ।। शान्तिपर्वणि ३१३.३२

न तु योगमृते शक्या प्राप्तुं सा परमागतिः ।
अवबन्धो हि बुद्धस्य कर्मभिर्नोपपद्यते ।। शान्ति० ३१८.५२

योगपथस्य प्रसिद्धिर्महाभारतानुसारेणादिकालतः प्रतीयते यतोऽसुराणां गुरुः शुक्राचार्यो योगी बभूव ।[1] अथकिम्—रुद्राः, साध्यास्तथादित्याः वसवोऽश्विनौ इत्येते योगैश्वर्येण प्रजा धारयन्ति । ध्यानेनात्मनः परमात्मना योगो भवतीति योगकृत्यम् ।[3] योगाभ्यासो मूलतो ध्यानमेव । ध्यानं द्विविधं भवति—मनस एकाग्रता, प्राणायामश्च । तदनुसृत्य महाभारते निगदितम्—

इन्द्रियाणीन्द्रियार्थेभ्यो निवर्त्य मनसा मुनिः ।
विमुक्तः सर्वसंगेभ्यो लध्वाहारो जितेन्द्रियः ।
पूर्वरात्रे परे चैव धारयेन् मन आत्मनि ।। शा० २९४.१३

स्थिरीकृत्येन्द्रियग्रामं मनसा मिथिलेश्वर ।
मनो बुद्धया स्थिरं कृत्वा पाषाण इव निश्चलः ।। २९४.१४

स्थाणुवच्चाप्यकम्पः स्याद् गिरिवच्चापि निश्चलः ।
बुधा विधिविधानज्ञास्तदा युक्तं प्रचक्षते ।। २९.४१५

न शृणोति न चाघ्राति न रस्यति न पश्यति ।
न च स्पर्शं विजानाति न संकल्पयते मनः ।। २९४.१६

न चाभिमन्यते किंचिन्न च बुध्यति काष्ठवत् ।
तदा प्रकृतिमापन्नं युक्तमाहुर्मनीषिणः ।। २९४.१७

एवंगुणो योगी परमात्मानं साक्षात्करोतीति—

योगमेतद्धि योगानां मन्ये योगस्य लक्षणम् ।
एवंपश्यं प्रपश्यन्ति आत्मानमजरं परम् ।। २९४.२५

अन्यच्च—योगैश्वर्येण संयुक्ता धारयन्ति प्रजा इमाः ।। आ० २.७६[2]

इत्यनेन गृहस्थानां कृतेऽपि योगस्य महत्त्वं निर्दिष्टम् ।

---

१. योगाचार्यो महाबुद्धिर्दैत्यानामभवद् गुरुः । आ० ६०.४२

२. आरण्यकप० २.७६

३. योगकृत्यं तु योगानां ध्यानमेव परं बलम् । शान्ति० २९४.७
अत्र योगानामिति योगिनाम् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कतिपयसंन्यासिनो योगपथेनाक्षरब्रह्मातिवर्तन्ते स्मेति महाभारतीयं मतम् ।[1] महाभारते शरीरस्थस्यात्मनो दर्शनं कथं स्यादिति निदर्शितम्—

अग्निर्दारुगतो यद्वद् भिन्ने दारौ न दृश्यते ।
तथैवात्मा शरीरस्थो यौगेनैवानुदृश्यते ।। शा० २०३.३९
वयोतीतो जरामृत्यू जित्वा ब्रह्मसनातनम् ।
अमृतं यदवाप्नोति यत् तदक्षरमव्ययम् ।। शा० २०८.२६

'योगी न कदापि शेते' इति महाभारतीय आदेशः —

निष्कल्मषं ब्रह्मचर्यमिच्छता चरितुं सदा ।
निद्रा सर्वात्मना त्याज्या स्वप्नदोषानवेक्षता ।। शा० २०९.१
विज्ञानाभिनिवेशात्तु जागरत्यनिशं सदा । शा० २०९.३

योगेन मन आत्मनि धार्यते । तत्कथमिति—

तत एतानि संयम्य मनसि स्थापयेत् यतिः ।
यथैवापोह्य संकल्पान्मनो ह्यात्मनि धारयेत् ।। शा० २३२.१६
पञ्च ज्ञानेन सन्धाय मनसि स्थापयेद्यतिः ।
यदैतान्यवतिष्ठन्ते मनः षष्ठानि चात्मनि ।
प्रसीदन्ति च संस्थाय तदा ब्रह्म प्रकाशते ।। शा० २३२.१७
एवं परिमितं कालमाचरन् संशितव्रतः ।
आसीनो हि रहस्येको गच्छेदक्षरसात्मताम् ।। शा०२३२.२२
शून्या गिरिगुहाश्चैव देवतायतनानि च ।
शून्यागाराणि चैकाग्रो निवासार्थमुपक्रमेत् ।। २३२.२६

योगेन ब्रह्मसायुज्यमवरवर्णानामपि सम्भवतीति महाभारतस्य योग-प्रभाव-वैशिष्टचकल्पनौदात्त्यपरायणं शश्वत् प्रकाशते । तथा हि—

अपि वर्णविकृष्टस्तु नारी वा धर्मकांक्षिणी ।
तावप्येतेन मार्गेण गच्छेतां परमां गतिम् ।। शा० २३२.३२

योगिनो जीवन-वृत्तिर्महाभारतेऽधोविधा वर्णिता—

कणानां भक्षणे युक्तः पिण्याकस्य च भक्षणे ।
स्नेहानां वर्जने युक्तो योगी बलमवाप्नुयात् ।। शा० २८९.४३
भुञ्जानो यावकं रूक्षं दीर्घकालमरिंदम ।
एकारामो विशुद्धात्मा योगी बलमवाप्नुयात् ।। २९३.४४

---

१. एवं सर्वात्मनः साधोः सर्वत्र समदर्शिनः ।
षण्मासान् नित्ययुक्तस्य शब्दब्रह्मातिवर्तते ।। शा० २३२.३०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पक्षान् मांसान् ऋतूंश्चित्रान् संचरंश्च गुहास्तथा ।
अपः पीत्वा पयोमिश्रा योगी बलमवाप्नुयात् ॥ २८९.४५
दीपयन्ति महात्मानः सूक्ष्ममात्मानमात्मना ।
वीतरागा महाप्राज्ञा ध्यानाध्ययन-सम्पदा ॥ २८९.४९
सुस्थेयं क्षुरधारासु निशितासु महीपते ।
धारणासु तु योगस्य दुःस्थेयमकृतात्मभिः ॥ २८९.५०

बौद्धसंस्कृतौ ध्यानयोगाभ्यां निर्वाण-पथ-यात्रा संसाधिता । तद्यथा सुत्तनिपाते वर्णितम्—

सव्वदा सीलसम्पन्नो पञ्ञवा सुसमाहितो ।
अज्झत्तचिन्ती सतिमा ओघं तरति दुत्तरं ॥ ९.२२
ते सन्ति-सोरच्च-समाधि-सण्ठिता ।
सुतस्स पञ्ञाय च सारमज्झगूति ॥ २१.८

योगविधिः

योगस्तु मूलत उपास्यस्यात्मनि प्रतिष्ठापनम् । तद्यथाथर्ववेदे वर्णितम्—

येन ऋषयो बलमद्योतयन् युजा । ४.२३.५

सांख्य-दर्शनस्य सम्यग्ज्ञानेन योगाभ्यास उपचीयते । महाभारते शुकस्य योगाभ्यासोऽधोविधो निदर्शितः —

गिरिपृष्ठं समारुह्य सुतो व्यासस्य भारत ।
समे देशे विविक्ते च निःशलाक उपाविशत् ॥ १
धारयामास चात्मानं यथाशास्त्रं महामुनिः ।
पादात् प्रभृति गात्रेषु क्रमेण क्रमयोगवित् ॥ २
ततः स प्राङ्मुखो विद्वानादित्ये न चिरोदिते ।
पाणिपादं समाधाय विनीतवदुपाविशत् ॥ ३
न तत्र पक्षिसंघातो न शब्दो नापि दर्शनम् ।
यत्र वैयासकिर्धीमान् योक्तुं समुपचक्रमे

व्यासपुत्रो महामुनिः शुकः स्वपितुर्मिथिलेश्वराज्जनकान्नारदाच्च निवृत्ति-दर्शनोपयोगिज्ञानमलभत । तथैव गीतायाम्—

शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः ।
नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् ॥ ६.११
तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः ।
उपविश्यासने युज्याद्योगमात्मविशुद्धये ॥ ६.१२

---

१. शान्तिपर्वणिः ३१०-३२० अध्यायाः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

समं कायशिरोग्रीवं धारयन्नचलं स्थिरः ।
सम्प्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् ।। ६.१३
प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः ।
मनः संयम्य मच्चित्तो युक्त आसीत मत्परः ।। ६.१४

सांख्याः

योगपरायणेन समं सांख्यपरायणानां जीवनवृत्तिर्भवतीति महाभारतीयं मतम् ।[1] सांख्यं तु ज्ञानवृत्तिः, योगस्तावदभ्यासवृत्तिः । योगाभ्यासेन बलम्, सांख्येन ज्ञानं च वर्धेते । तयोः परस्परं सन्निपातः स्वाभाविक एव ।[2]

योगसिद्धयः

बहुविधा अलौकिकप्रभावाः सिद्धयश्च प्रवर्तन्ते योगस्य । आत्मानं नैकधाकरणं योगात् सम्भवति । तद्यथा वर्णितं महाभारते—

योगेन बहुधात्मानं कृत्वा तिष्ठामि मूर्तिषु ।
अग्निहोत्रेषु सत्रेषु क्रियास्वथ मखेषु च ।।[3] आ० ७.६

सर्वत्र विचरणस्य शक्तिर्जायते योगेन । तथा हि—

बृहस्पतेस्तु भगिनी वरस्त्री ब्रह्मचारिणी ।
योगसिद्धा जगत्सर्वमसक्तं विचरत्युत ।।

अन्यच्च—आर्चीकपुत्रो योगैर्महीं व्यचरत् ।[4]

योगेनालौकिकविधिना पुत्रप्राप्तिरितिहास-प्रसिद्धा । तद्यथा—

यथा जिष्णुर्महेन्द्रस्य यथा वायोर्वृकोदरः ।
धर्मस्य त्वं यथा तात योगोत्पन्ननिजः सुतः ।। आर० १५९.१५

---

१. तुल्यं शौचं तयोर्युक्तं दया भूतेषु चानघ ।
व्रतानां धारणं तुल्यं दर्शनं न समं तयोः ।। शा० २८९.९

२. शान्ति ३०४.२–३

३. 'रुद्र आत्मानं कोटिशो विभजति' इति महाभारते आरण्यकपर्वणि ८०.१२३–१२७
ततो योगेश्वरेणापि योगमास्थाय भूपते ।
तेषां मन्युप्रणाशार्थमृषीणां भावितात्मनाम् ।।
सृष्टा कोटिस्तु रुद्राणामृषीणामग्रतः स्थिता ।
मया पूर्वतरं दृष्ट इति ते मेनिरे पृथक् ।। आर० ८०.१२६, १२७
स्कन्दो मात्रादीनां बहूनामभिप्रायं विज्ञाय—
युगपद्योगमास्थाय ससर्ज विविधास्तनूः । शल्य ४३.३६
कालिदासः कार्तवीर्यो, योगीति तस्य सहस्रबाहुत्वेन मन्यते । रघु० ६.३८

४. आर० १२९.७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

योगेन भगवान् ज्ञायत इति उद्योगपर्वणि निदर्शितम् । तद्यथा संजयो धृतराष्ट्रं प्रतिवदति—

मौनाद् ध्यानाच्च योगाच्च विद्धि भारत माधवम् । ६८.४

मरणकाले योगस्थितिः कल्याणदायिनीति महात्मभिरनुष्ठिता । तद्यथा

महोपनिषदं चैव योगमास्थाय वीर्यवान् ।
जपञ्शान्तनवो धीमान् कालकांक्षी स्थितोऽभवत् ॥भी० ११४.११२

अन्यच्च—द्रोणोऽपि शस्त्राण्युत्सृज्य परमं साम्यमास्थितः ।
तथोक्त्वा योगमास्थाय ज्योतिर्भूतो महातपाः ।
दिवमाक्रामदाचार्यः सद्भिः सह दुराक्रमम् ॥
द्रोण० १६५.३८, ३९

योगप्रभावेण कश्चिदनुत्तमो महामुनिर्न केवलं सर्वेषु लोकेषु अपितु ब्रह्मलोकेऽपि गतिमर्हतीति जैगीषव्यस्य महाभारतीयाख्यानेन प्रमाणितं भवति ।[1] एतत् खलु तपसो योगजः प्रभाव इति सिद्धानामपि मतिः । अवरलोकेषु साधारणयोगिनोऽसितदेवलस्यापि गतिरासीत् ।[2]

भक्तियोगः

महाभारते भीष्मादीनां भक्तियोगः प्रकिल्पतः । तद्यथा—

विदित्वा भक्तियोगं तु भीष्मस्य पुरुषोत्तमः ॥ श० ४७६८

भीष्मो वाग्यज्ञेन कृष्णमर्चयति, तद्गतमानसः कृष्णं प्रणमति च ।[3]

योगेन विस्मयजननम्—

संन्यास-योगेन विस्मयजननं निषिद्धमासीत् । तद्यथा नारदो जैगीषव्यस्यासिताय योगप्रभाव-प्रदर्शनं समीक्षते—

जैगीषव्ये तपो नास्ति विस्मापयति योऽसितम् ॥ शल्यप० ४९.६३

वानप्रस्थ-संन्यासयोः सन्निपातः

वानप्रस्थ-संन्यासाश्रमयोः क्वचित् सन्निपातो भवतीति स्पष्टतरं मुण्डकोपनिषद्यधोविधं परिलक्ष्यते—

तपः श्रद्धे ये ह्युपवसन्त्यरण्ये शान्ता विद्वांसो भैक्ष्यचर्यां चरन्तः ।
सूर्यद्वारेण ते विरजाः प्रयान्ति यत्रामृतः स पुरुषोऽव्ययात्मा ॥
१.२.११

---

१. न देवल गतिस्तत्र तव गन्तुं तपोधन ।
ब्रह्मणः सदनं विप्र जैगीषव्यो यदाप्तवान् ॥ शल्य० ४९.४८

२. ब्रह्मलोकमपि गन्तुं देवल इयेष किन्तु पपातेति महाभारतीयं वचनम् । शल्य० ४९.४७

३. शान्ति० ४७.६३, ६४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अत्र भैक्ष्यचर्येति-संन्यासिनां तपःश्रद्धे अरण्यवासश्चेति वानप्रस्थानां लक्षणमेकस्मिन् पुरुषे प्रतिष्ठितम् ।

तत्त्वदर्शी

मनुस्तत्त्वदर्शिनं व्याख्याति यत् स तर्केणानुसन्धत्ते । तद्यथा—

आर्षं धर्मोपदेशं च वेदशास्त्रविरोधिना ।
यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः ।। १२ १०६

ज्ञानमार्गेण कश्चित् साधकः तत्त्वदर्शी भवति । कथमिति महाभारते निर्दिष्टम्—

त्रिवर्गो यस्य विदितः प्राग्ज्योतिः स विमुच्यते ।
अन्विष्य मनसा युक्तस्तत्त्वदर्शी निरुत्सुकः ।। १८७ ५५

संन्यासिनां तत्त्वदर्शिनां कृते सर्वभूतहितपरायणता प्रशस्ता । महाभारते जैगीषव्य उपदिशति । प्रसङ्गेऽस्मिन् शान्तिपर्वणि—

सर्वतश्च प्रशान्ता ये सर्वभूतहिते रताः ।
न क्रुध्यन्ति न हृष्यन्ति नापराध्यन्ति कस्यचित् ।
विमुच्य हृदयग्रन्थीश्चङ्क्रम्यन्ते यथासुखम् ।। २२२.१५

अन्यच्च—

एवं सर्वेषु भूतेषु गूढ आत्मा न प्रकाशते ।
दृश्यते त्वग्रचया बुद्धचा सूक्ष्मया सूक्ष्मदर्शिभिः ।। शा० २३८.५

अन्यत्र बहुजनमानितां पुराणीमपि प्रवृत्तिं दोषावहां परिकल्प्य नूतनाचार-विचारान् प्रवर्तयति तत्त्वदर्शी । तथाहि—शान्तिपर्वणि वाराणसेयस्तुलाधारोऽनुत्तम एव तत्त्वदर्शी शिक्षयति—

ईदृशानशिवान् घोरानाचारानिह जाजले ।
केवलाचरितत्वात्तु निपुणान्नावबुध्यसे ।।
कारणाद् धर्ममन्विच्छेन्न लोकचरितं चरेत् ।। २५४.४९
एतदीदृशकं धर्मं प्रशंसन्ति मनीषिणः ।
उपपत्त्या हि सम्पन्नो यतिभिश्चैव सेव्यते ।
सततं धर्मशीलैश्च नैपुण्येनोपलक्षितः ।। २५४.५२

काशीदृशानां तत्त्वदर्शिविचारकाणां सनातनं जनिरेव । तत्र बभूवुः कदाचन पार्श्वनाथ-गौतमबुद्ध-कबीर-रविदासादयो महात्मानो महत्तमा तत्त्वदर्शिनः स्वयुगस्य ।[1]

---

१. प्रकरणेऽस्मिन् महाभारतस्य शान्तिपर्वणः पञ्चपञ्चाशदुत्तरद्विशततमोऽध्यायोऽनुशीलनमर्हति गवामालभने दोषं पश्यन्ति तत्त्वदर्शिनः । शा० २५४.४८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ज्ञानयोगेन तत्त्वदर्शिनामनुत्तमैव प्रतीतिः प्रीतिश्च जायेते । तथा हि—

सर्वभूतात्मभूतस्य सम्यग् भूतानि पश्यतः ।
देवा अपि मार्गे मुह्यन्ति अपदस्य पदैषिणः ।। शान्ति० २५४.३२

संन्यासयोगाधिकारिणः

न केवलमुच्चवर्णाः पुरुषा अपि तु स्त्रियः शूद्राश्च संन्यासाधिकारिणो बभूवुः । महाभारतानुसारेण राजर्षिकन्या सुलभा भिक्षुकी, योगिनी च बभूव[1]—

अथ धर्मयुगे तस्मिन् योगधर्ममनुष्ठिता ।
महीमुच्चचारैका सुलभा नाम भिक्षुकी ।। शान्ति० ३०८.७

योगविषये महाभारतस्य स्पष्टमेव मतं यत्—

परा हि सा गतिः पार्थ यत्तद् ब्रह्म सनातनम् ।
यत्रामृतत्वं प्राप्नोति त्यक्त्वा दुःखं सदा सुखी ।।
एवं हि धर्ममास्थाय येऽपि स्युः पापयोनयः ।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् ।।
आश्वमेधिकपर्वणि १९.५५,५६

अन्यच्च—

अपि वर्गावकृष्टस्तु नारी वा धर्मकांक्षिणी ।
तावप्येतेन मार्गेण गच्छेतां परमां गतिम् ।। शान्ति २३२.३२

शूद्रोऽपि योगेन ब्रह्मसायुज्यं लभत इति पौराणिकं मतम्[2] । बौद्धसंस्कृतावपि सुत्तनिपातानुसारेण—

नीचो कुलीनोपि मुनी धितीमा आजानियो होति हिरीनिषेधो । १३०.८

गौतमशिष्या बहवो भिक्षवोऽवरवर्णीया आसन् । क्वचित् स्त्री स्वपतौ गार्हस्थ्यभारं निक्षिप्य स्वयं प्रव्रजितेति वर्णितम् । कुम्भकारजातकानुसारेण पत्न्यां प्रव्रजितायां पतिः कर्हिचित् स्वसन्ततिं संवर्ध्य स्वयमपि प्रव्रज्यां ग्रहीतुमपत्यानि सम्बन्धिनां संरक्षणे समर्पितवान् ।[3] बौद्धसंस्कृतौ भिक्षुभिर्विरचिताः थेरीगाथाः प्रसिद्धाः सन्ति । पाणिनिः कुमारी श्रमणा इति

---

१. सुलभा जात्या क्षत्रियासीद् ब्रह्मचारिणी, योगिनी च । सा निवेदयति—
नास्मि वर्णोत्तमा जात्या न वैश्या नावरा तथा ।
तव राजन् सवर्णास्मि शुद्धयोनिरविप्लुता ।। शान्तिप० ३०८.१८१

२. स्कन्दपुराणे ब्राह्मखण्डे चातुर्मास्य-माहात्म्ये त्रिंशाध्याये ।

३. कुम्भकारजातक ४०८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

निरूपयति। ताः संन्यासिन्य एवाभिमताः।[1] श्रमणस्तु वैदिकसंस्कृतावपि संन्यासिनः।[2]

योगाधिकारः

गृहस्थानामपि ऋषीणां योगाधिकार आसीदेव। तद्यथा देवलः —

असितो देवलश्चैव तस्मिन्नेव महातपाः।
परमं योगमास्थाय ऋषिर्योगमवाप्तवान्॥ शल्य० ४८.२३
तस्मिन्नेव तु धर्मात्मा वसति स्म तपोधन।
गार्हस्थ्यं धर्ममास्थाय असितो देवलः पुरा॥ शल्य० ४९.१

जैनसंस्कृत्यनुसारेण पापपुण्य-विरहिता वीतरागाः साधकाः केवलज्ञानेन मोक्षं लभन्ते। मोक्षस्तु निर्वाणस्य पर्यायः। मोक्षप्राप्तिर्धर्मपथेन भवति। सम्यग्दर्शन-ज्ञान-चारित्राणीति रत्नत्रयं मोक्षमार्गः। अत्र दर्शनं तु रत्नत्रयं प्रति श्रद्धा एव। चारित्रं तु कर्मप्रवृत्तिः। दर्शनेन शरीराद् भिन्न एवात्मेति साधको विभावयति। केवलज्ञानेन जीवादीनां वास्तविकं स्वरूपमधिगतं भवति।

केवलं दर्शनज्ञानाभ्यां मोक्षो न लभ्यते। तदर्थं तु सम्यक्चारित्रस्यावश्यकता भवति। चारित्रस्याग्रविलासो मुनिधर्मे परिलक्ष्यते। दिगम्बरो भवति मुनिर्महाव्रतधारी। गमन-भाषणेन्द्रियकरणेषु तस्य संयमोऽपेक्षितः।

मुनीनां कृते बाह्यतपांसि सन्ति—अनशनम्, अवमौदर्यम्, रस-परित्यागः, विविक्ताशयनासनम्, कायक्लेश इत्यादीनि नाम्नैव परिभाषितानि। आभ्यन्तरतपांसि स्वाध्याय-विनय-व्युत्सर्ग-प्रायश्चित्त-वैयावृत्त्यादीनि सन्ति।[3]

---

१. अष्टाध्यायी २.१.७०। अत्रैव कुमारप्रव्रजिता कुमारतापसी च परिव्राजिकाः परिगणिताः।

२. बृहदारण्यके अ० ४.३.२२। बौधायनश्रौतसूत्रे १६.३०

३. विनयस्तु रत्नत्रयसाधना। मान्यजनानां, रुग्णादीनां परिचर्या तु वैयावृत्त्यतपो लोकसेवैव प्रतिभाति। परिग्रहाणां कामक्रोधादीनां च त्यागो व्युत्सर्गः। मुनिपथेन सर्वोच्चपदं यत्प्राप्यते तत् तु सिद्धिपदम्। संक्षेपेण क्रमिकविकासो मोक्षार्थिनामधोविधं कल्पितम्।

सम्यग्ज्ञानत्रयेण प्रविदित-निखिल-ज्ञेयतत्त्वप्रपञ्चाः
प्रोद्धूय ध्यानवातैः सकलमथरजःप्राप्तकैवल्यरूपाः।
कृत्वा सत्त्वोपकारं त्रिभुवनपतिभिर्दत्तयात्रोत्सवा ये
ते सिद्धाः सन्तु लोकत्रयशिखरपुरीवासिनः सिद्धये वः॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ध्यानम्

इन्द्रियाणां भावानां चानुरोधेन मनो न विक्रियेतेत्युद्दिश्य तस्य धार्मिक-चिन्तनेऽनुयोजनं ध्यानेन सम्भवति। मनो नियम्यते ध्यानेन। शुभचिन्तन-परायणेन ध्यानेन मनः शुभगामि भवति, मोक्षलाभे सहायश्च संजायते।

संन्यास-पदं प्राचीनयुगे गौरवास्पदमासीत्। तस्य प्राथमिकस्वरूपं तपो-ध्यानयोगविशिष्टं न केवलं संन्यासिनेऽपितु विश्वस्मै भारताय महिमानं समर्पयत्। शङ्कराचार्यस्य चत्वारो मठाः शृङ्गेरी-पुरी-द्वारका-बदरिकासु संस्थापिता नैकशताब्दीषु भारतीय-ज्ञानविज्ञान-प्रसारका बभूवुः। ग्रामे ग्रामे नगरे नगरे च तेषामादर्शानधिष्ठाय तादृश्यो लोकहितकारिण्यः संस्थाः समवर्धन्त। कालक्रमेण बहुसंख्यका मठा मौलिक-तपोमयप्रवृत्तीर्गौणीकृत्य विलासाडम्बरप्रवणा बभूवुः। दुःखदप्रसङ्गोयं यद् भारतस्याभ्युदयार्थ-माधुनियुगे मठानां तेषामधीशानां च किंचिदेव सुप्रभावः परिलक्ष्यते। तथापि संन्यासिनां भारतस्य निर्माण उदात्ता भूमिका वरीवर्ति। रामकृष्ण-विवेकानन्द-दयानन्द-रामतीर्थ-श्रद्धानन्दादयः पारतन्त्र्य-तिमिराच्छन्ने भारते विश्वालोका प्रकाशस्तम्भा इवाराजन्त। नित्यं प्रगच्छन्तो नित्यं चरन्तश्च संन्यासिनो महात्म्यमभजन्त किन्तु संग्रहभरेणाधुना विलुप्तप्रागभासमन्दश्रीका-स्ते सञ्जाताः। पुनरपि प्राक्तनपथस्योदयेनैव देशस्यास्य विश्वस्य वा प्राज्यं कल्याणं जनिष्यते।

लोकसेवा

संन्यासिनां लोकसेवा नैकविधा प्रावर्तत। प्रत्यक्षमेव तेषां लोकसंग्रहा-पेक्षया मानवमात्रस्योद्धरणोद्योगाः। महाभारते पञ्चशिख इति विश्रुतः संन्यासी जनकमुपदिशति।[२] परवर्तियुगे बौद्धजैनधर्मयोरुन्नायका गौतम-महावीरादयो यावज्जीवनं सद्धर्मं प्रचारयामासुः।

---

१. मध्ययुगे संन्यासिनां पराभूति-प्रतिकाराः, आत्मरक्षोपायाः, पतनाभिमुख-प्रवृत्तयश्च पाण्डुरङ्ग—वामनकाने-महोदयेन स्वोपज्ञे History of Dharma-s'astra नामके ग्रन्थे सानुसन्धानं विवृताः। द्रष्टव्यपृष्ठानि द्वितीये भागे ९४८–९५१। प्राचीनकालेऽपि धूर्ताः संन्यासिनः पाणिनिना निर्दिष्टाः सन्ति—अयःशूलिकाः दण्डाजिनिकाश्चे ५.२.७६। विप्लवकारिणः प्रतिभान्ति मक्खलि-गोसालादयो मस्करिण आजीविका इति उपहिताः संन्यासिनो ये नियतिवादिनः सन्तः कर्मण्यतामपवदन्ति स्म। पाणिनिः —अष्टाध्यायी ६.१.१५४

२. भिक्षोः पञ्चशिखस्येह संवादो जनकस्य च। शान्तिपर्वणि ३०७.३
वैदेहो जनको राजा महर्षिं वेदवित्तमम्।
पर्यपृच्छत् पञ्चशिखं छिन्नधर्मार्थसंशयम्॥ शा० ३०७.४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

शङ्कराचार्यस्य तस्यानुयायिनां च विभ्राड्लोकसेवापथः प्रागेव प्रकल्पितोऽस्मिन् ग्रन्थे ।[1] भवतु नाम सापवादं, कतिपयसंन्यासिनो राजानं प्रजापालनविधिं प्रशिक्षयन्ति स्म ।[2] स पञ्चशिखो जनकं राज्यशासन-परित्यागान्निषिषेध ।[3] निवृत्तिपथानुयायी संन्यासी अपि लोकस्य दुःखं दूरीकर्तुं प्रयतेत यदि नाम कश्चिदुपक्रमो दृश्येत ।[4]

भवतु नाम सर्वेषामाश्रमिणां कृतेऽपरिहार्यं दशविधधर्मसेवनमिति[5] संन्यासिनां प्रकरणे मनुना विवृतम् । अनेन समाजस्य चारित्रिकसम्प्रतिष्ठा बभूवेति महती लोकसेवा साधिता संन्यासिभिः ।

---

१. प्रकृते ग्रन्थे पृष्ठं ४८, ४९ अस्य विषयस्य सविशेषं निदर्शनम् ।

२. पञ्चशिखो जनकं मोक्षधर्मेण सह महीपालनविधिं शिक्षयामासेति महाभारते शान्तिपर्वणि—

सांख्यज्ञाने तथा योगे महीपालविधौ तथा ।
त्रिविधे मोक्षधर्मेऽस्मिन् गताध्वा छिन्नसंशयः । ३०८.२५

३. शान्तिपर्वणि ३०८.२७ न च राज्याद्विचालित इति ।

४. नारदो निवृत्तं शुकमुपदिशति—

न जानपदिकं दुःखमेकः शोचितुमर्हति ।
अशोचन् प्रतिकुर्वीत यदि पश्येदुपक्रमम् ।। शान्ति० ३१७.१५

अयं पञ्चशिखो जनकस्य गुरुर्बभूव । शान्ति० ३०८.२४

५. धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रिय-निग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ।। ६.९२

चतुर्भिरपि चैवेतैर्नित्यमाश्रमिभिर्द्विजैः ।
दशलक्षणको धर्मः सेवितव्यः प्रयत्नतः ।। ६.९१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सामाजिक-संरचना

चातुर्वर्ण्यं कर्मविशेषेण प्रकल्पितं दृश्यतेऽधोविधम्—
ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः ।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रोऽजायत ।।

अर्थात् समाजस्य सौष्ठवार्थं ब्राह्मणो मुखवद् वेदपाठेन प्रवचनेन च, राजन्यः क्षत्रियः बाहुवत् पराक्रमेण शस्त्राभ्यासयोगेन, वैश्योऽहर्निशं जङ्घावद्[1] यात्राश्रमसाधनेन शूद्रश्च तेस्ततः प्रेष्यभावेन पादवत् संचरणेनोद्युङ्क्ते ।

यद्यपि नात्र जन्मना ब्राह्मणत्वादिकं किन्तु सततं स्वधर्मस्य सम्यक् प्रतिपत्तये आनुवंशिकपारम्पर्येण स्वस्वकर्मनिरतिः सुतरां फलदायिनी भवत्येव । तत्र जन्म कर्म चोभे निसर्गतः संपृक्ते।

भारते वैदिकयुगस्यादिकालत एव वंशपरम्परानुबद्धाया वर्णव्यवस्थायाः सम्यक् प्रतिष्ठा दृश्यते । तदार्यवर्णा दासवर्णाश्च शत्रुभावापन्नाः परस्परं युध्यमानाः सांस्कृतिकदृष्ट्यापि भिन्ना आसन् । एतयोर्द्वयोर्वर्णयोः पारस्परिकविवाहादिसंसर्गो विरलमेवाभवत् । अपरश्च देवा मानवा ऋषयो गन्धर्वाः, असुराः, राक्षसाः, पिशाचाश्च सांस्कृतिकदृष्ट्या स्वीयां पृथक् सत्तां चिरं धारयाञ्चक्रुः । तेषु कतिपये परस्परं साह्यं विदधाना अपरे समानवृत्तिधारिभिः सह विरोधं वितन्वानाश्चिरं संजीवन्ति स्म । परस्परमावर्जयन्तस्ते सर्वे प्रशमितवैरविरोधभावाः, न्यक्कृतसमीकृतारयो वा सामाजिकसामञ्जस्यं स्वानुभवेन सर्वोपरि हितावहं मन्यमानाश्चातुर्वर्ण्यव्यवस्थायां संग्रथिताः सम्मिश्रिताश्चाभ्युदयं गताः ।

भारतीय-संस्कृति-विकासे मूलतो ब्रह्मणां देवानामृषीणां च कर्तृत्वं संघटनात्मकोत्साहश्चोभे प्रभविष्णु प्रावर्तेताम् । देवानां गिरिशिखरसन्निवेशा मानवजीवनस्य शिखरादर्शान् सार्वजनीनं प्रत्यस्थापयन् ।[2]

---

१. बहुश्रमेण जङ्घा पीना भवतीति कादम्बर्यां निगदितम् । अपरं च
ऊरुभ्यां दर्शयन् यात्रामस्राक्षीद् वणिजः प्रभुः ।
जलस्थलादियात्राभिस्तद्वृत्तिर्वार्तया यतः ।। महापुराणे १६.२४४

२. प्र तद् विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः । ऋ० १.१५४.२
प्र विष्णवे शूषमेतु मन्म गिरिक्षित उरुगायाय वृष्णे । ऋ० १.५४.२,३
सत्यश्रुतः कवयो युवानो बृहद्गिरयो बृहदुक्षमाणाः ।। ऋ० ५.५७.८
एतैः सन्दर्भैर्देवानां पर्वतप्रदेशवासः प्रमाण्यते ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वैदिकवर्णव्यवस्था

वैदिकसमाजे सांस्कृतिकदृष्ट्या परस्परं भिन्नं प्रमुखं वर्गद्वयमासीत्—आर्या आर्येतराश्च। द्वयमपि नैकजनसमुदाये स्वस्वसांस्कृतिकविशेषानुसारेण ब्राह्मणादिवर्गेषु विभक्तमासीत्।[1] आर्येषु प्रतिष्ठिततमा देवा बभूवुः।

देवाः

के ते सन्ति देवाः? धनधान्यसम्पन्ना ज्ञानविज्ञान-प्रवीणा महामहिम-शालिनः, प्रद्युम्ना अलौकिकलोकोत्थानकर्मनिष्पादका यज्ञप्रीतमानसा इमे देवाः स्वानुयायिनां कृते सौमनस्यमूर्तयो बभूवुः, अरीणां च कृते पराक्रम-बाहुल्येन परन्तपा आसन्[2]। भवन्तु नाम तेषु देवेषु नैके प्राकृतिक-विभूतयः,[3] भावा[4] वा, किन्तु बहवो देवा आदिपुरुषाः पारमेष्ठं प्राप्ताः साक्षाल्लोककर्मव्यापृता अभवन्। तादृशा देवाः समाज-संरचनापेक्षया भूयः प्रभविष्णवो राजन्ते।[5] ते सन्ति—ब्रह्मा, इन्द्रः, अश्विनौ, वरुणः, ऋभवः, यमश्च। विशेषत एतानादर्शभूतान् देवान्, साधारणतोऽन्यांश्च देवान् तेषा-मादर्शांश्चाश्रित्य मानव-समाज-संरचना कथं निर्व्यूढेति विशदीभवति।

देवसमाजे त्रिविधं श्रैष्ठ्यं सम्मतमासीत्—ज्ञानेन, पराक्रमेण, यज्ञेन च। त्रिविधं श्रैष्ठ्यम् ज्ञानेन तेषु ब्रह्मा (बृहस्पतिः, ब्रह्मणस्पतिर्वा) परमेष्ठो

---

१. काने महोदयो विशदयति— This shows that the composer of the hymn (Rg. X. 90.12) regarded the division of society into four classes to be very ancient and to be as natural and God-ordained as the sun and the moon. H. D. Vol II. Pt.1 Page 33.

२. इमे गुणाः सामग्र्येणेन्द्रमाश्रयन्ते। ऋ० २·२१ सूक्तं द्रष्टव्यम्।

३. अग्निः, अरण्यानी ऋ० १०.१४६.१–६, आपः, ओषधयः ऋ० ९.९७.१–३३; कृषिः ऋ० १०.३४.१३; गावः, चन्द्रमाः, नद्यः, रात्रिः वनस्पतिः, वायुः, श्येनः, सरस्वती, सूर्यः, पर्जन्यः, द्यावापृथिव्यौ च प्रत्यक्षदेवताः प्रकृतिविभूतयः।

४. अभिशापः ऋ० ३.५३.२१–२४, ऋतम् ऋ० ४.२३.८–१० ज्ञानम् ऋ० १०.७१.१–११; मृत्युः, श्रद्धा, इत्यादयो भावात्मकदेवताः।

५. सांस्कृतिकदृष्ट्या प्रथमस्थानीयाः सन्तीमे देवाः। ते प्राचीनतमा अभिज्ञाता। तद्यथा शतपथब्राह्मणे—प्राचीनप्रजनना वै देवाः। प्रतीचीनप्रजनना मनुष्याः। शत० ब्रा० ७.४.२.४०। द्राघीयो देवायुषं ह्रसीयो मनुष्यायुषम्। शत० ब्रा० ७.३.१.१०। देवेभ्यः पृथग्भूता मनुष्या देवानाश्रयन्ते। अत एव देवा अमरा मनुष्या मर्त्याः इति सम्मतम्।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

बभूव ।[1] ब्रह्मा ब्रह्मविद्यां जातविद्यां च व्याख्यात् ।[2] पराक्रमेण यज्ञेन चेन्द्रोऽग्रणीर्बभूव ।[3]

परस्परसहायाः

देवानां परस्पर-साह्यं प्रबभूव । तथा हि—इन्द्रस्य कृते त्वष्टा वज्रं निर्ममे । इन्द्रस्याश्विनोश्च रथा ऋभुभिः कृताः । बृहस्पतिना सहेन्द्रो वृत्रं जघान[4] । कतिपयदेवानां संघो विश्वेदेवा इति ख्यातः । ते प्रायशः सम्मिल्य यज्ञेषु सोमं पिबन्ति स्म ।[5] अग्निर्दूत इव यज्ञे भागं ग्रहीतुं देवानाह्वयत् । देवानां परस्परवैमत्यं तु विरलमेव दृश्यते । युद्धे मरुदादय इन्द्रस्य सहायाः प्रभवन्ति ।[6]

साधारणतो देवाः परस्परं साह्यमाचरन्ति । क्वचित्तेषां पारस्परिकं शात्रवमपि लक्ष्यते । तथाहि ऋग्वेदे इन्द्रत्वष्ट्रोः संघर्षः —

उग्रस्तुराषाडभिभूत्योजा यथावशं तन्वं चक्र एषः ।
त्वष्टारमिन्द्रो जनुषाभिभूयामुष्या सोममपिबच्चमूषु ॥ ३.४८.४

---

१. बृहस्पतिर्वै देवानां ब्रह्मा । शत० ब्रा० १.७.४.२१ । ऋग्वेदे--ब्रह्मा देवानां पदवीः कवीनां ऋषिः विप्राणामित्यादि ९.९६.६ । अतो ब्रह्मणो देवत्वं श्रेष्ठत्वं च विशदीभूतम् ।

२. ऋग्वेदे १०.१२५.५ । मुण्डकोपनिषदनुसारेण—
ब्रह्मा देवानां प्रथमः संबभूव विश्वस्य कर्ता भुवनस्य गोप्ता ।
स ब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राह ॥ १.१

३. Neither gods nor men have attained to the limit of his power. The attributes of Indra are chiefly those of physical superiority and rule over the physical world. He is energetic and violent in action an irresistable fighter, an inexhaustible lavisher of the highest goods on mankind. He is the god of battle who aids the victorious Aryans in overcoming their foes.
Macdonell : A Vedic Reader. pp. 41, 42, 44

४. प्रकरणेऽस्मिन् मरुद्गणः परमसहायको बभूव । अग्निः, सोमः, विष्णुश्च प्राय इन्द्रस्य सहायीभूताः ।

५. ऋग्वेदे ८.६९.१; ९.८१.४–५ ।

६. In this fight (against Vṛtra) the Maruts are his regular allies, but Agni, Soma and Viṣṇu also often assist him. Macdonell : A Vedic Reader. p. 43.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

बहूनां देवानां कुटुम्बानि बभूवुः। कुटुम्बे तेषां पत्नी, पुत्रादयः सहवसन्ति स्म।[1] बृहस्पतिर्देवानां पितेति ख्यातमेव। वरुणस्य पुत्रद्वयं वसिष्ठोऽगस्त्यश्च प्रसिद्धम्। रुद्रस्य पुत्रा मरुत आसन्।[2] देवपत्नयः इन्द्राणी (शची), अश्विनी, आग्नायी, वरुणानीत्यादयो वैदिकसंहितासु वर्णिताः। बृहस्पतिदेवस्य पत्नी पुनःपुनश्चर्चिता।[3] सोऽयं बृहस्पतिः ऋषेरङ्गिरसः पुत्रोऽस्ति। ऋ० १०.६७। बृहस्पतेः पुत्रा ऋषयः सन्ति।[4]

परिवार योजना

इन्द्रस्य पत्नी शची असुरकन्या बभूव। एतादृशैर्विवरणैर्देवानामन्यसांस्कृतिकसमुदायैरानुवंशिकसम्बन्धः संवर्धमानः प्रतीयते।

देवा मानुषान् ऋषींश्च रक्षन्ति।[5] यथा इन्द्रः सुदासे राज्ञेऽयुध्यत। इन्द्र आर्येभ्यो भूमिमदात्। ऋग्वेदे ४.२६.२।

मानवरक्षकाः

अन्यच्च—

त्वं राजेन्द्र ये च देवा रक्षा नृन् पाह्यसुर त्वमस्मान्।
त्वं सत्पतिर्मघवा नस्तरुत्रस्त्वं सत्यो वसवानः सहोदाः॥ १.१७४.१

त्वमस्माकमिन्द्र विश्वध स्या अवृकतमो नरां नृपाता।
स नो विश्वासां स्पृधां सहोदा विद्यामेषं वृजनं जीरदानुम्॥ १.१७४.१०

देवा मनुष्याश्च बृहस्पतिमाश्रृण्वन्ति। अर्थात् तस्य पथप्रदर्शनमाकांक्षन्ति।[6] ऋषिदेवयोः सख्यं प्रथितम्।[7]

देवा महासमृद्धिशालिन आसन्निति तेषां बृहदावासयोजनया प्रमाणितम्। तेषां गृहेषु सहस्रं यावद् द्वाराणि भवन्ति स्म।[8] अथर्ववेदे देवानां पुराणि वर्णितानि सन्ति। एकं पुरं हिरण्यमासीत्।[9] इन्द्रस्तु

समृद्धिः

---

१. ऋग्वेदे १०.१५९। अथर्ववेदे दशदेवानां दशपुत्राः प्रथिताः। ११.८.१०। इन्द्रस्य स्नुषा १०.२८.१।
२. ऋग्वेदे ६.६६.३
३. तेन जायामन्वविन्दद् बृहस्पतिः। ऋ० १०.१०९.५।
४. ऋग्वेदे ६.७३ सूक्तम्।
५. ऋग्वेदे ८.४७.१-१५।
देवा नो यथा सदमिद् वृधे असन्नप्रायुवो रक्षितारो दिवेदिवे।
अत्र देवा ऋषीणां संवर्धका॥ ऋग्वेदे १.८९.१।
६. गाथान्यः सुरुचो यस्य देवा आश्रृण्वन्ति नवमानस्य भर्ताः। ऋ० १.१९०.१
७. सखायस्त्वा ववृमहे देवं मर्तास ऊतये। ऋ० ३.९.१ तथा ऋ० १०.१४.३
८. यथा वरुणस्य गृहं वसिष्ठेन वर्णितम्—
बृहन्तं मानं वरुण स्वधावः सहस्रद्वारं जगमा गृहं ते। ऋग्वेदे ७.८८.५।
९. अथर्व० ४.८.६; ५.२८.९–११।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ऋग्वेदे राजन्निति सम्बोधितः ।[1] ऋषिभ्यो राजोचितमर्द्धिकदानं देवैर्नित्यं प्रदत्तमिति देवानां स्वापतेयस्य पुष्कलतां व्यनक्ति ।

अथर्ववेदानुसारेण देवानां महर्द्धिस्तु सुमतिर्वर्तते या ऋषिभ्यस्तैर्दातव्या ।[2]

देवा ऋषयो मानवाश्च समकालिकाः

ऋषीणामन्येषां लोकानां च ते देवाः समकालिकाः सहचारिणश्च बभूवुः ।[3] तथाहि ऋग्वेदे इन्द्र ऋषीणां कृते नमुचिं जघान ।[4]

यदिन्द्राग्नी यदुषु तुर्वशेषु यद् द्रुह्युष्वनुषु पुरुषु स्थः ।
अतः परि वृषणाया हि यातमथा सोमस्य पिबतं सुतस्य ॥ १.१०८.८

इत्यनेनेन्द्रस्य वैदिकराजन्यैः साह्यभावः प्रतीयते । अश्विद्वयस्य मानववर्गे ऋषिसमुदाये च साह्यप्रवृत्तयः प्रायशश्चर्चिताः । तथा हि—

युवं तासां दिव्यस्य प्रशासने विशां क्षयथो अमृतस्य मज्मना । ऋ० १.११२.३

अन्यच्च—सनुत्येन त्यजसा मर्त्यस्य वनुष्यतामपि शीर्षा ववृक्तम् ॥ ६.६२.१०

अत एव मानवानां शत्रवो देवैर्मर्दिता इति स्पष्टमेव ।[5]

देवानां मर्त्यानां च नियन्ता वरुणः । ऋ० २ २७.१०

बृहस्पतिर्देवानां पुरोहितः । मरुत इन्द्रमर्चन्ति ।[6]

देवानामृषीणां च परस्परसम्बन्धोऽधोविध ऋग्वेदे वर्णितः —

मा न इन्द्र परा वृणग्भवा नः सधमाद्यः ।
त्वं न ऊती त्वमिन्न आप्यं मा न इन्द्र परा वृणक् ॥ ८.९७.७

भवतु नाम अपवादरूपेण क्वचिद् ऋषयो देवैर्हताः । तद्यथा—

किं न इन्द्र जिघांससि, मा नः समरणे वधीः । ऋ०१.१७०.२

रुद्रं प्रति ऋषिः प्रार्थयते—

आरे ते गोघ्नमुत पुरुषघ्नं क्षयद्वीरसुम्नमस्मे ते अस्तु । ऋ० १.११४.१०

---

१. ऋ० ८.९७.१५ २. अथर्व० ४.२३.२

३. विश्वेदेवा महर्षेर्वसिष्ठस्य जनिं संभावयन्तीति प्रोक्तमृग्वेदे—

उतासि मैत्रावरुणो वसिष्ठोर्वश्या ब्रह्मन् मनसोऽधिजातः ।
द्रप्सं स्कन्नं ब्रह्मणा दैव्येन विश्वेदेवा पुष्करे त्वाददन्त ॥ ७.३३.११

४. ऋ० १०.७३.७ । इन्द्र ऋषीन् सिन्धुमपारयत् । ऋ० २.१५.५ । असुरान् पराजित्य तेषां धनानि ऋषिभ्योऽदात् । ऋ० ७.१९ । इन्द्रो मुनीनां सखेति ऋ० ८.१७.१९ । ऋषयो देवानां सहष्कृत इति यजु० ३३.८३ ।

५. दस्यून् हत्वी आर्यं वर्णं प्रावत् । ऋ० ३.३४.९

६. ऋग्वेदे ५.२९.१, ६; ५.३१.१० । वसवः सवितारं गृणन्ति । ऋ० ७.३८ । ३३३९ देवा अग्निमसपर्यन् । यजु० ३३.७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

देवानामृषीणां च दासैरसुरैः राक्षसैश्च वैरमासीत् । दासा राक्षसा असुरा वा याज्ञिकक्रियाकलापेषु बाधामुपास्थापयन् ।

बहुविधनियोगेषु देवा व्यापृता आसन् ।[1] ते देवा यज्ञपरायणा बभूवुः ।

देवानां व्यापृतिः तथाहि—

यज्ञेन यज्ञमयजन्त देवाः । ऋ० १.१६४.५०

यत् पुरुषेण हविषा देवा यज्ञमतन्वत । ऋ० १०.९०.६

तेन देवा अयजन्त साध्या ऋषयश्च ये । ऋ० १०.९०.७

इन्द्रादयो यज्ञविरोधिनां संहरणे निष्णाता बभूवुः ।[2] इन्द्रस्तु प्रजासु राजते ।[3] असुरैः सह देवानां स्पर्धा युद्धान्ता बभूव । असुराणां वैभवं धनं गवादिकं च हर्तुं देवा उद्युञ्जतेरे ।[4]

देवानां साह्येनार्याः स्वशत्रून् दासानार्यांश्च युद्धे पराभवन् ।[5] इन्द्र आर्येभ्य भूमिमदात् ।[6] अश्विद्वयस्य विषये ऋषिर्वर्णयति —

अयं वामह्वेऽवसे शचीवसू विशं विशं हि गच्छथः । ऋ० ७.७४.१

कतिपयदेवाः कृषिकर्मणि व्यापृता आसन् ।[7]

देवानां व्यापृतिं परिपश्यन्त ऋषयस्तेषां जातिं वर्णयन्ति । तथाहि मित्रो वरुणश्च क्षत्रियौ । ऋ० ७.६४.२; ८.२५.८ । आदित्या क्षत्रिया इति ऋ० ८.६७.१ । विश्वेदेवाः क्षत्रिया इति ऋ० १०.६६.८

संहिता-युगानन्तरं देवा स्पष्टतया वर्णेषु विभक्ता बभूवुः । यथा अग्निर्बृहस्पतिश्च ब्राह्मणौ; इन्द्रः, वरुणः, सोमः, यमः क्षत्रियाः; वसवः, रुद्राः, विश्वेदेवा, मरुतश्च विशः; पूषा शूद्रश्च ।[8]

---

१. इन्द्रस्तु विशः पतिः । ऋ० १०.१५२.२

इन्द्रो राजा कृष्टीनाम् । ऋ० ८.१३.९; ८.१६.१; ४.१७.५

इन्द्रस्य सुकृता महिना पुरुणि कर्म । ऋ० ३.३०.१३

२. रघू रघुवंश इन्द्रं सम्बोधयति—

त्रिलोकनाथेन सदा मखद्विषस्त्वया नियम्याः । रघु० ३.४५

३. त्वं (इन्द्रः) शश्वतीनां पती राजा विशामसि । ऋ० ८.९५.२

यो राजा चर्षणीनाम् इत्यादि । ऋ० ८.७०.१

४. ऋग्वेदे ८.९७

५. ऋग्वेदे ४.३०.१८; ७.८३.१

६. ऋग्वेदे ४.२६.२

७. ऋग्वेदे ८.२२.६

८. मैत्रायणी संहिता १.१०.१३ शतपथ० १४.४.२.२३-२५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पूर्वोक्तानुसारेण बहवो देवाः सम्यक् कर्मण्या बभूवुः । विष्णुविषये मेधातिथिर्निदर्शयति —

विष्णोः कर्माणि पश्यत । ऋ० १.२२.१९

देवा अन्येषां देवानामुपासका यथायोग्यं बभूवुः ।[1] तेऽन्येषां देवानां यश उद्गिरन्ति स्म ।[2] इन्द्रः परमदानशीलो बभूव । रुद्र ऋभवश्चेन्द्रं प्रास्तुवन् । यथा ऋग्वेदे—

परस्परोपासना

समीचीनास ऋभवः समस्वरन् रुद्रा गृणन्त पूर्व्यम् । ८.३.७

लोकानां दैनिककार्यकलापेषु साहचेन पूषाग्रणीः प्रतिभाति । तथाहि

लोकसेवा

(१) सं पूषन् विदुषा नय । ऋ० ६.५४.१

(२) पूषा गा अन्वेतु नः पूषा रक्षत्ववर्वतः ।
पूषा वाजं सनोतु नः । ऋ० ६.५४.५

(३) माकिनेशन्माकीं रिषन् माकीं सं शारि केवटे ।
अथारिष्टाभिरा गहि ।। ऋ० ६.५४.७

अन्येऽपि देवा लोकसेवकाः सन्ति । तथाहि ऋग्वेदे मरुतः —

असिञ्चन्नुत्सं गोतमाय तृष्णजे । १.८५.१.१

रुद्रविषये ऋग्वेदे—

त्वादत्तेभी रुद्र शंतमेभिः शतं हिमा अशीय भेषजेभिः ।
व्यस्मद्द्वेषो वितरं व्यंहो व्यमीवाश्चातयस्वा विषूचीः ।। २.३३.२
उन्नो वीरां अर्पय भेषजेभिः । भिषक्तमं त्वा भिषजां शृणोमि । २.३३.४

स तु राज्ञा समः शोभते—

स्थिरेभिरङ्गैः पुरुरूप उग्रो बभ्रुः शुक्रेभिः पिपिशे हिरण्यैः ।
ईशानादस्य भुवनस्य भूरेर्न वा उ योषद्रुद्रादसुर्यम् ।। २.३३.९

अश्विद्वयस्य वैविध्य-संचारिणी परोपकारिणी च प्रवृत्तिरतितमां विभाति । यथा ऋग्वेदे—

युवं च्यवानं जरसोऽमुमुक्तं नि पेदव ऊहथुराशुमश्वम् ।
निरंहसस्तमसः स्पर्तमत्रि नि जाहुषं शिथिरे धातमन्तः ।। ७.७१.५

तस्य कार्याणां बृहत्सूची ऋग्वेदे (१.१११; १०.३९.३–१३) वर्णिता ।

---

१. आर्यः स्तुषे तुविमघस्य दानम् । ऋ० ५.३३.६

२. ऋ० ८.२२.६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

देवानां श्रेष्ठता सर्वसम्मता प्रतिभाति । ऋषयो ब्रह्माणश्चेन्द्रादीन् सपर्यन्ति स्म ।[1]

अथर्ववेदे देवानामन्येषां महिष्ठसत्तानां च प्रार्थना ऋषेः स्वस्त्ययन-विधौवर्तते । यथा—

ब्रह्मा प्रजापतिर्धाता लोका वेदाः सप्त ऋषयोऽग्नयः ।
तैर्मे कृतं स्वस्त्ययनमिन्द्रो मे शर्म यच्छतु । ब्रह्मा मे शर्म यच्छतु ।
विश्वे मे देवाः शर्म यच्छतु । सर्वे मे देवाः शर्म यच्छतु ।। १९.९.१२

ऋषि-देवर्योर्विपर्ययः

ऋषिरुन्नमितः सन् देवो भवितुमर्हतीति भृगूणामृभूणां चोदाहरणेन स्पष्टं भवति ।[2] विश्वकर्मा ऋषिर्देवश्चास्तीति ऋग्वेदे १०.८२ सूक्तेन ज्ञायते ।[3] शची देवी इन्द्रस्य पत्नी ऋग्वेदे १०.९९ सूक्तस्य ऋषिकास्ति । इन्द्रोऽपि मरुतां कृते ऋषिः ।[4] वरुणो ब्रह्म कृणोति ।[5] बृहस्पतिर्ऋषिर्देवश्चास्ति ।[6] क्वचिद् देवा अपि ऋषयो भवन्ति । ऋग्वेदस्य दशममण्डले इन्द्रः ४७–५० सूक्तानां रचयिता ऋषिः ।

आचारप्रतिष्ठापकाः

यदा कदा देवा ऋषीणां कृत आचार-संहितां नियमयन्ति । ऋग्वेदे पूर्वे देवाः सप्त ऋषीनवदन्—

भीमा जाया ब्राह्मणस्योपनीता दुर्धां दधाति परमे व्योमन् ।। १०.१०९.४ ।
इन्द्र ऋषिभ्यो ज्ञानं ददाति ।[7]

गणा विश्वेदेवाश्च

देवानां सजात्येन (समानजनकत्वेन) गणसंज्ञा कृता विद्यते । तत्र प्रमुखगणा आसन्—द्वादश आदित्याः, अष्टौ वसवः,

---

१. ऋग्वेदे ८.६४.७; ८.९६.५

२. यज्ञैरथर्वा प्रथमो विधारयद्देवा दक्षैर्भृगवः सं चिकित्रिरे । ऋग्वेदे १०.९२.१०
'अग्नये ब्रह्म ऋभवस्ततक्षुः' इति देव ऋभुर्मूलत ऋषिः । ऋ० १०.८०.७

३. यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा ।
यो देवानां नामधा एक एव तं संप्रश्नं भुवना यन्त्यन्या ।। ऋ० १०.८२.३

४. त्वमेषामृषिरिन्द्रासि धीरः । ऋ०५.२९.१ । यः कश्चित् पथप्रदर्शकः स ऋषिरिति साधारणपरिभाषा ।

५. ऋ० १.१०५.१५–१७

६. ऋ० ४.५०.१ । ऋग्वेद १०.७१,७२ सूक्तयोर्ऋषिर्बृहस्पतिरेव । बृहस्पतिः कवीनां कविरिति । ऋ० २.२३.१;१.१०९;१,४०;१०.९८.२७

७. इन्द्र त्वदा कश्चन हि प्रकेतः । यजु० ३४.१८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

एकादश रुद्राः ।[1] एतैः सह द्यावा पृथिव्यौ द्वौ समीकृतौ ३३ संख्यकाः सन्ति ।[2] शनैः शनैर्देवानां संख्यावर्धत । ते ३३३९ संजाताः[3] । विश्वेदेवा इति मूलतः सर्वेषां देवानां समीकृता संज्ञा ।

ब्रह्मा (बृहस्पतिः, ब्रह्मणस्पतिः)[4]

ब्रह्मा देवानां प्रथमः सम्बभूव विश्वस्य कर्ता भुवनस्य गोप्ता । मुण्ड० उ० १.१ । वैदिकयुगे ब्रह्मचर्येण कश्चिद् ब्रह्माभवत् । स ब्रह्मचारी तत्कालीनदेवर्षिमानवगन्धर्वादीनां समाजे सर्वेषां भावी नेता बभूवेति वर्णितमधोविधम्—

ब्रह्मचारिणं पितरो देवजनाः पृथग्देवा अनुसंयन्ति सर्वे ।

गन्धर्वो एनमन्वायन् इत्यादि अथर्ववेदे ११.५.२

ब्रह्मा ब्रह्मणः (वैदिकज्ञानस्य) अधिष्ठाता अधिकारप्रपत्त्या एवंनामा बभूव ।[5] ब्रह्मा तु प्रथम ऋषिरस्ति । स तु आदिदेवोऽपि देवोचितगुणसम्पत्ति-

---

१. वर्तमानवैवस्वतमन्वन्तरे देवगणाः सन्ति—आङ्गिरसा १०, अश्विनौ २, आदित्याः १२, भृगवः १०, मरुतः ४९, रुद्राः ११, वसवः ८, विश्वेदेवा १०, साध्याः १२ । प्राचीनचरित्रकोश, पृ० ६०९ । छान्दोग्ये ३.६–१० पञ्च गणाः वसवः (अग्निप्रधानाः) रुद्राः (इन्द्रप्रधानाः), आदित्याः (वरुणप्रधानाः), मरुतः (सोम-प्रधानाः), साध्याः (ब्रह्मप्रधानाः) सन्ति ।

२. शत० ब्रा० ४.३.५.१ । प्रजापतिस्तत्र समीकृतः । अतएव ते ३४ संख्यकाः सन्ति । आदित्या अदितेः पुत्रा वरुणादयः सप्ताष्टौ वा सन्ति । वसुगणस्य प्रमुख-देवाः सन्ति आपः, सोमः अनिलः अनलः । साध्यगणे प्राणः, नरः, नारायणः, हंसः, प्रभुरित्यादयः गणिताः । रुद्रगणस्य प्रमुखः शंकर इति गीतायां १०.२३ ।

३. त्रीणि शता त्री सहस्राण्यग्निं त्रिंशच्च देवा नव चासपर्यन् । यजु० ३३.७

४. ब्रह्मा, बृहस्पतिः, ब्रह्मणस्पतिश्च बृंहधातोर्निष्पन्नाः । ब्रह्म ब्रह्माभवत् स्वयम् । तै० ब्रा० ३.१२.९.३ । ब्रह्मैव देवानां श्रेष्ठम् । श० ब्रा० ८.४.१.३ ।

५. यथा सूर्यमधिकृत्य कथ्यते—तेजोऽसि, तेजो मयि धेहि । एवमेव ब्रह्म (वेदराशिः) यस्यास्ति अधिकृतं स ब्रह्मा ।

६. प्रथमजा बृहस्पतिः । ऋ० ६.७३.१ । स तु अङ्गिरस ऋषेः पुत्रः । तत्रैव । स ऋषीणां पिता । बृहस्पतिर्देवानां पिता यथा—ब्रह्मणस्पतिरेता सं कर्मार इवाधमत् देवानां पूर्व्ये युगेऽसतः सदजायत ॥ ऋ० १०.७२.२ । ब्रह्मणस्पतिर्ऋषिरिति ऋग्वेदे १.४०.५ 'प्र नूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यम् इति ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वैभवेन प्रसिद्ध एव ।[1] ऋग्वेदे ब्रह्मा (बृहस्पतिः) ऋषिरूपेण देवरूपेण च समाम्नातः ।[2]

ब्रह्मणस्पतिर्देवानां पिता बभूव ।[3] तं प्रत्ना ऋषयो ध्यानपरायणा विप्राश्च पुरो दधिरे ।[4] स बुद्धेर्जागरणाय प्रार्थितः ।[5] ब्रह्मणस्पतिर्ज्येष्ठः सुशेवश्चास्ति ।[6] ब्रह्मणस्पतिर्लोकसंगमनाय समर्थ इति अथर्ववेदे—

सं वः पृच्यन्तां तन्वः सं मनांसि समु व्रता ।
सं वोऽयं ब्रह्मणस्पतिः । ६.७४.१

यजुर्वेदे १८.७६ मन्त्रे ब्रह्मा, इन्द्रः, बृहस्पतिः, विश्वदेवाः अग्नेः प्रतिष्ठायै आहूताः सन्ति ।

अयं ब्रह्मा बहस्पतिर्ब्रह्मणस्पतिर्वा ब्राह्मणानामादिसांस्कृतिकपिता ।[7]

ऋषयः

महत्तमपुराणपुरुषः पुरातत्त्वविद्भिरभिज्ञातो ब्रह्मा मानवसृष्टेरादि-प्रवर्तकः । स विष्वग्ज्ञानविज्ञानाधिष्ठातास्ति । तस्माद् विराडजायत[8] । तस्य पुत्रो मनुरासीत् ।[9] मनोः पुत्राः दश ऋषयो जाताः —मरीचिः अत्रिः, अङ्गिरसः, पुलस्त्यः, पुलहः, क्रतुः, प्रचेताः, वसिष्ठः, भृगुः नारदश्च ।

---

१. ब्रह्मणस्पतेर्महाराज्य-स्वरूपं ऋ० १.४०.८ मन्त्रेऽधोविधं वर्णितम्
उप क्षत्रं पृञ्चीत हन्ति राजभिर्भये चित् सुक्षितिं दधे ।
नास्य वर्ता न तरुता महाधने नार्भे अस्ति वज्रिणः ॥

२. ऋग्वेद-सर्वानुक्रमणी देवाः इति Indices p. 10 । ऋषिरिति सर्वानुक्रमणी Indices p. 73

३. देवानां यः पितरमाविवासति । ऋ० २.२६.३ । अन्यत्रापि ४.५०.६

४. ऋ० ४.५०.१

५. ऋ० ४.५०.११

६. ऋ० ७.९७.३

७. मनुविषये कथ्यते—Manu simply the first man, father of the race (मानव) and its guide in all matters, sacrificial and other. A. A. Macdonell and A. B. Keith : Vedic Index Vol II. p. 129
एवमेव ब्रह्मा प्रथमो ब्राह्मणः, ब्रह्मकोटिकानामृषीणां पिता तेषां पथप्रदर्शकः । यथा मनु-मानवौ पर्यायौ तथैव ब्रह्मब्राह्मणौ यथावश्यकं पर्यायौ । कालान्तरेण ब्रह्मादिदेवोऽभिज्ञातः । अत एव देवानामपि पिता ब्रह्मेति समाम्नातम् ।

८. सहस्रशीर्षा पुरुषः ऋ० १०.९०.१ । पुरुष एवेदं सर्वं यद् भूतं यच्च भव्यम् ।
ऋ० १०.९०.२ । तस्माद् (पुरुषात्) विराडजायत । १०.९०.५ ।

९. मनुर्वैवस्वतः स्वयमेव ऋषिः ऋग्वेदे ८.२७-३१ सूक्तानाम् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

इमे प्रजापतय इति प्रथितम् ।[1]

पूर्वोक्तसन्दर्भैः सृष्टेरादौ मनुर्मानवानामादिपुरुषोऽभिज्ञातः प्रतिभाति । सजात्या मानवा स प्रथमो मानवः । तद्यथा वैदिकसंहितासु निगदितम्—

(१) यानि मनुरवृणीता पिता नः । ऋ० २.३३.१३

(२) यत् किं चेदं वरुण दैव्ये जनेऽभिद्रोहं मनुष्याश्चरामसि । ऋ० ७.८९.१

(३) यस्य द्वारा मनुष्पिता देवेषु धिय आनजे । ऋ० ८.६३.१

अत्र वसिष्ठ ऋषिरात्मानं मनुष्य इति कथयति ॥

(४) चाक्लृप्ते तेन ऋषयो मनुष्या । ऋ० १०.१३०.६

कतिपय ऋषयः कर्मयोगप्रवृत्तिका आसन्नित्यथर्ववेदस्याधोलिखित—

कर्मयोगिन मन्त्रेण ज्ञायते—

अव्यसश्च व्यचसश्च बिलं विष्यामि मायया ।
ताभ्यामुद्धृत्य वेदमथ कर्माणि कृण्महै ॥ १९.६८.१

कतिपय ऋषय उच्चकोटिका ब्रह्मविद्या विशारदा बभूवुः[2] । वैदिक-

ब्रह्मज्ञा संहितासु नैकस्थलेषु तादृशा वेदान्त-विद्या-पारङ्गता ऋषयः स्वोपज्ञं ब्रह्मज्ञानं प्रकाशयन्ति । ऋषिभिः प्रणीतोऽथर्ववेदो ब्रह्मविद्याया महिमशाली कोशोऽस्ति ।[3] वसिष्ठो ब्रह्मन् (ब्राह्मण) इति सम्बोधितः ।

ऋषयः स्वबुद्धिवैभवेन सर्वोपरि प्रतिष्ठिता आसन् ।[4] मेधातिथिः

मेधाविनः प्रमाणयति ऋग्वेदे—सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् ।

---

१. मनु० १.३४,३५ । ऋषीणामभिज्ञापककर्मासीत् मन्त्ररचना । ते मन्त्रद्रष्टारो भवन्तु नाम किन्तु वैदिकसूक्तेषु कर्तृत्वेन तेषां नामानि वर्तन्त एव । कालिदासानुसारेण ऋषिर्मन्त्रकृद् भवति । रघुवंशे ५.४

२. तादृशा ऋषयो वेना इति संज्ञिताः । ऋ० ९.६४.२१
वेनस्तत्पश्यन् निहितमिति यजुर्वेदे ३२.८ । तदेव द्योतयति । वेना दुहन्त्युक्षणं गिरिष्ठाम् । ऋ० ९.८५.१०

३. अथर्ववेदे १०.२.२५–३३ मन्त्रा वेदान्तस्य निगूढतत्त्वानि उद्धरन्ति ।

४. ऋषिरिति ऋष्धातोर्निष्पन्नः । ऋष् दर्शने । आर्यभाषायाः प्राचीनतमकोशे धातुरयं संगृहीत आसीत् । तद्यथा मानियरविलियम्समहोदयेन स्वकोशे विवेचितम्—Perhaps from an obsolete √rṣ for √dṛś, to see of Hibernian arsan, 'a sage, a man old in wisdom. ऋषिः, विप्रः, मनीषी इति त्रयं समानार्थं बौद्धिकप्रकर्षं द्योतयति । ऋग्वेदे ३.३३.४; ३.१०.१; ७.२२.४, ९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सर्मि मेधामयासिषम् । १.१८.६ स धीनां योगमिन्वति । १.१८.७

न केवलं पुरुषाः स्त्रियोऽपि यथायोग्यं सूक्तानि विरच्य ऋषिका ऋषिकाः बभूवुः । तासु ऋषेरम्भृणः कन्या वाक् सातिशयं महत्त्वं भजते ।[1] तस्याः काव्यमधोविधं भूयः सुमनायते—

अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम् ।
तां मा देवा व्यदधुः पुरुत्रा भूरिस्थात्रां भूर्यावेशयन्तीम् ।।
यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तं ऋषिं तं सुमेधाम् ।
परो दिवा पर एना पृथिव्यैतावती महिना सं बभूव ।।

ऋग्वेदे १२५ सूक्तात् ।

भारतस्य प्राचीनतमा विज्ञाताः कवय ऋषय इति प्रथिताः सन्ति । तेषां काव्यं बहुधा देवानां चरितानि निबध्नाति, अपरतो यत्किञ्चिद् रोचनीयं लोकचरिते निभालितं तदपि तत्र सरसमनावृतम् । ऋग्वेदस्य प्रख्याता ऋषयः सन्ति—अगस्त्यः, अत्रिः, उशनाः, भारद्वाजः, ऋष्यशृङ्गः, कण्वः, कश्यपः, गृत्समदः, च्यवनः, जमदग्निः, देवापिः, बृहस्पतिः, भृगुः, मधुच्छन्दाः, मनुः, मेधातिथिः विश्वामित्रः । सप्तर्षयः प्रसिद्धास्तपोधना बभूवुः ।[2]

यद्यपि साधारणतो मनुवंशीयेषु मानवेष्वेव ऋषयः प्रादुर्भूता तथाप्यपवादरूपेण आर्येतरा अपि ऋषयः सन्ति—अर्बुदः सर्पः काद्रवेयः, जरत्कार्णश्च । मत्स्यपुराणानुसारेण[3] भलन्दकः, वासाश्वः, संकीलश्चवैश्याः सन्ति मन्त्रकृत ऋषयः । अतएव ऋषिरिति व्यवसायात्मिका संज्ञा प्रतिभाति । तथापि बाहुल्येनोच्चवर्गीया ब्रह्मसमाना एव ऋषिपदेन ग्रहणीयाः । ऋषीणामियं जातिर्व्यवसायेन पितृत्वेन चासिद्धचत् । ऋषीणामानुवंशिककर्मासीत् कण्ठाग्रविधिना, सूक्तानां संरक्षणम्, अभिनवसूक्तानां प्रणयनं च ।[4]

---

१. ऋग्वेदे अन्याः प्रसिद्धा ऋषिकाः सन्ति—अगस्त्यस्वसा (१०.६०), अदितिः (४.१८; १०.७२) अपाला ८.९१ शिखण्डिन्यौ काश्यप्यौ ९.१०४; इन्द्राणी (१०.१४५), जुहू (१०.१०९), दक्षिणा (१०.१०७) रात्रिः (१०.१२७); लोपामुद्रा १.१७९.१-२; वसुक्र-पत्नी इन्द्रस्नुषा (१०.२८.१); विश्ववारा (५.२८) श्रद्धा कामायनी (१०.१५१); सार्पराज्ञी (१०.१८९) सूर्या सावित्री (१०.८५)

२. ऋ० १०.१५४.५ । श्रमेण तपसारिषन् । तस्माद् ऋषयः । श० ब्रा० ६.१.१.१

३. मत्स्य० १४५.११६

४. ऋग्वेदे १.९६.२;३.३९.२;८.६.११,४३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

असहिष्णुता

ऋषीणां शत्रून् प्रत्यसहिष्णुता बहलासीत्[1]। तेषां शत्रवो यज्ञ-बाधका-राक्षसा आसन्। इन्द्रसाहचेन ते संहरणीया इति तेषां निश्चितं मतं बभूव। तथाहि ऋग्वेदे—

प्र सु विश्वान् रक्षसो धक्ष्यग्ने। ऋ० १.७६.३
ये नो द्वेष्टयधरः सस्पदीष्ट यमु द्विष्मस्तमु प्राणो जहातु॥
३.५३.२१

सं घोषः ऋण्वेऽवमैरमित्रैर्जहीं न्येष्वशनिं तपिष्ठाम्।
वृश्चेमधस्ताद् वि रुजा सहस्व जहि रक्षो मघवन् रन्धयस्व॥
उद् वृह रक्षः सहमूलमिन्द्र वृश्चामध्यं प्रत्यग्रं शृणीहि।
आ कीवतः सललूकं चकर्थ ब्रह्मद्विषे तपुषिं हेतिमस्य॥
३.३० १६.१७

पणयस्तेषां भृशमनभीप्सिता आसन्। तेषां सर्वथा विनाशायाधोविधं पूषा प्रार्थितः—

परि तृन्धि पणीनामारया हृदया कवे।
वि पूषन्नारया तुद पणेरिच्छ हृदि प्रियम्।
अथेमस्मभ्यं रन्धय। ऋ० ६.५३ सूक्तादुद्धृतम्।

न केवलं पणयोऽन्येऽपि धनिका यदि नाम दानविमुखा आसन् तर्हि तेषां धनराशिर्बलादपहृत्य सम्भजनीया आसीदिति तेषां प्रौढिवादः।[2]

दासान् समूलमुच्छेत्तुमृषयो दिवानिशं तत्परा आसन्। विमदः स्वाभिप्रायं प्रकटयति—

अव क्षणौमि दासस्य नाम चित्। ऋ० १०.२३.२

शत्रूणां विनाशाय ऋषीणां युद्धोद्योगः सोत्सवं निष्पादितः। इन्द्रस्य साहचेन तैर्विजयो लब्धः।[3] तेषां शत्रव आर्या वा दासा वा भवन्तु नाम।[4] ते सर्वेऽपासनीया आसन् तेषां मतेन।

---

१. तथा हि—येन विश्वा अति द्विषो अतारिम। ऋ० ८.१३.२१
वधान योऽस्मान् द्वेष्टि यं च वयं द्विष्मः। यजु० १.२५
यो अस्मभ्यमरातीयाद्यश्च नो द्वेषते जनः। निन्दाद्यो अस्मान् धिप्साच्च सर्वं तं भस्मसा कुरु।
क्षिणोमि ब्रह्मणामित्रान्। यजु० ११.८०–८२

२. ऋ० ८.८१.७

३. अस्मिन् न इन्द्र पृत्सुतौ यशस्वति शिमीवति क्रन्दसि प्राव सातये।
यत्र गोपाता धृषितेषु खादिषु विष्वक् पतन्ति दिद्यवो नृवाह्ये॥ ऋ० १०.३८.१

४. ऋ० १०.३८.३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्राक्तनयुगीना देवा ऋषयश्च सह वसन्ति स्म । तथाहि ऋग्वेदे—

त इद देवानां सधमाद आसन्नृतावानः कवयः पूर्व्यासः ।। ७.७६.४

देवैः सहवसतिः सहैव तेषां बहुविधानि कार्याणि संसाधितानि । तथाहि—

तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः ।
तेन देवा अयजन्त साध्या ऋषयश्च ये ।। ऋ० १०.९०.७

कतिपयऋषयो दमेऽवसन्, अपरे च वने वसन्ति स्म ।[1]

ते पुरुषा लोकोत्थानयोजनानुसन्धानपरायणा[3] विशिष्टयोग्यतापन्ना वेद-ऋषयो मानवा एव[2] वित्तमाः कवयश्च ऋषय इति संज्ञिताः । तथाहि—

(१) उतो घा ते पुरुष्या इदासन् ।
येषां पूर्वेषामश्रृणोर्ऋषीणाम् । ऋ० ७.२९.४

(२) मर्ता अमर्त्यस्य ते भूरि नाम मनामहे
विप्रासो जातवेदसः । ऋ० ८.११.५
विप्रं विप्रासोऽवसे देवं मर्तास ऊतये । ऋ० ८.११ ६

(३) कारुरहं ततो भिषगुपलप्रक्षिणी नना ।[4] ऋ० ९.११२.३

(४) चाक्लृप्ते तेन ऋषयो मनुष्या
यज्ञे जाते पितरो नः पुराणे ।। ऋ० १०.१३०.६

(५) अगस्त्यो नरां नृषु प्रशस्तः । १.१८०.८
ऋषिर्मानवेषु प्रशस्तोऽभवत् स्वावदानेन ।

(६) एवा नो अग्ने विक्ष्वा दशस्य । ७.४३.५
अर्यादृषिः विक्षु वसति ।

यद्यपि ब्रह्मधना आसन्नृषय तथापि तेषामाधिभौतिकदृष्ट्या प्रवृत्तयः वैभवम् परिग्रहपरायणाः प्रवर्तन्ते स्म । तथा हि ऋग्वेदे—

(१) स्वशास्त्वा सुरथा प्रजयेमास्मे क्षत्राणि धारयेरनु द्यून् । ४.४.८
अत्र ऋषिः क्षत्राणि कामयते ।[5]

---

१. ऋ० ७.१.१९

२. मानवः, मनुः ऋ० ८.२७.२१, मर्तः, मनुष्यः, मानुष इति पर्यायवाचिनः ।

३. नृन् पाह्यसुर त्वमस्मानिति अगस्त्य इन्द्रं प्रार्थयते । ऋ० १.१७४.१ ।

४. अत्र ऋषेः पिता माता च मानवौ स्त इति स्पष्टम् ।

५. अन्यत्रापि ऋषिः क्षत्रं कामयते । तद्यथा ऋग्वेदे ६.५०.३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(२) नू ष्टुत इन्द्र नू गृणान् इषं जरित्रे नद्यो न पीपेः।
अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः॥
४.१७.२१

अत्र ऋषिर्वामदेवो गौतम इषं, रथान्, दासांश्च कामयते।

(३) सूर्यस्येव वक्षथो ज्योतिरेषां समुद्रस्येव महिमा गभीरः।
वातस्ये प्रजवो नान्येन स्तोमो वसिष्ठा अन्वेतवे वः॥ ७.३३.८।

अत्र वसिष्ठकुलोत्पन्नानामृषीणां ज्योतिर्महिमा स्फूर्तिश्च सर्वोत्तमानीति निगदितम्।

(४) कदु प्रियाय धाम्ने मनामहे स्वक्षत्राय स्वयशसे महे वयम्। ५.४८.१
अत्र ऋषिः क्षत्रं यशः धाम (तेजः) च कामयते।

(५) दानेन ऋषयः पुष्कलं धनराशिं लभन्ते स्म। तथाहि
प्रस्तोक इन्नु राधसस्त इन्द्र दश कोशयीर्दश वाजिनोऽदात्।
दिवोदासादतिथिग्वस्य राधः शाम्बरं वसु प्रत्यग्रभीष्म।
दशाश्वान् दशकोशान् दश वस्त्राधिभोजना।
दशो हिरण्यपिण्डान् दिवोदासादसानिषम्॥
दश रथान् प्रष्टिमतः शतं गा अथर्वभ्यः। अश्वथः पायवेऽदात्।
महि राधो विश्वजन्यं दधानान् भरद्वाजान् त्साञ्र्जयो अभ्ययष्ट॥
ऋग्वेदे ६.४७.२२–२५

वशोऽश्व्यो नामको ऋषिः पृथुश्रवसः पुत्रात् कनीताल्लब्धं दानं वर्णयति ७०,००० अश्वाः, २,००० उष्ट्राः, १०,००० गावः, दश रथयुग्याः श्यामवर्णा अश्वाः, हिरण्ययो रथश्च।[1] सौभरेर्ऋषेर्वैभवमधोविधं वर्णितं तेन कविना—

आ नो अश्वावदश्विना वतिर्यसिष्टं मधुपातमा नरा।
गोमद् दस्रा हिरण्यवत्। ऋ० ८.२२.१७

अर्थात् तस्य गृहे अश्वाः, गावः, स्वर्णराशिश्च बहुलीभूताः।

काण्वः षष्टिसहस्रं गा दानेनावाप्तवान्। काण्वाय चेदिपुत्रः कशुः १०० उष्ट्रान् १०,००० गाश्चादात्।[2] पज्रः सामगानेन गवां दशसाहस्रीमश्वानां शतकत्रयं चाप्नोत्।[3]

(६) ऋषयो दानरूपेण गर्दभानाम्, आविकानां च शतं प्राप्नुवन्।
ऋ० ५६.३

---

१. ऋग्वेदे ८.४६.२१–२४ २. ऋग्वेदे ८.४.२०; ८.५.३१
३. ऋग्वेदे ८.६.४७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(७) वयं स्याम पतयो रयीणाम् । ८.४८.१३

अत्र काण्वः स्वधनाभिलाषं प्रकटयति ।

(८) ऋषीणां शोभनगृहा बभूवुः ।[1] वसिष्ठः पितरं निवेदयति—

मो षु वरुण मृन्मयं गृहं राजन्नहं गमम् । ऋ० ७.८९.१

अर्थात् तस्मै मृण्मयावासो न रोचते स्म ।

(९) आ नः पवस्व वसुमद्धिरण्यवदश्ववद् गोमद्यवमत् सुवीर्यम् ।

अत्र हिरण्यस्तूपो वसु, स्वर्णं, अश्वं, गावं, यवं, शौर्यं चाकांक्षति । ऋ० ९.६९.४

ऋषीणां जीवनविधिः सुश्रीकः, स्वस्थः, सुरक्षः, स्वच्छः आसीत् । तद्यथा ऋग्वेदे काण्वः सोमं प्रार्थयते—अस्मभ्यं पुनानं जलं स्वर्गीयं ज्योतिः, बृहत्क्षेत्रं, गाः, सन्ततिश्च देहि ।[2] स धीरो गम्भीरः कर्मण्यो भूत्वा स्वजीवनस्य सार्थकतामियेष ।[3] नृत्येन हास्येन जीवनावधिर्वर्धत इति तेषां धारणासीत् ।[4]

ऋग्वैदिकयुगे जमदग्निर्ऋषिर्महिमशालिजीवनस्यादर्शं प्रास्तौत् । पराशरस्तादृशं सौभाग्यमवाप्तुं समुत्सुकः सुवसनानि, धेनुः, स्वर्णिमकोशं, दिव्यानि वसूनीत्यादीनि याचते ।[5]

ऋषिः कियन्मात्रं महिमानमवाप्नुयादिति प्रजापतेः परमेष्ठिनो वचसा ज्ञेयं यत् सोऽधिराजो भवितुमर्हति ।[6] देवान् विहाय कस्याप्याधिपत्यं स प्रत्यरुणत् ।[7]

---

१. यत् त्वा यामि दद्धि तन्न इन्द्र वृहन्तं क्षयमसमं जनानाम् । ऋ० १०.४७.८
अत्र आङ्गिरस ऐश्वर्यद्योतनं गृहं प्रार्थयते ।

२. एषा पुनानो अपः स्वर्गा अस्मभ्यं तोका तनयानि भूरि ।
शं नः क्षेत्रमुरु ज्योतींषि ज्योङ् नः सूर्यं दृशये रिरीही ।। ९.९१.६ अग्निं न मा मथितं सन्दिदीपः प्रचक्ष य कृणु हि वस्यसो नः
रेवाँ इव प्रा चरा पुष्टिमच्छ । ऋ० ८.४८.६ । अपरं च—
इन्द्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्वमस्मे ।
पोषं रयीणामरिष्टिं तनूनां स्वाध्यानं वाचः सुदिनत्वमह्नाम् ।। ऋ० २.२१.६

३. मानो निद्रा ईशत मोत जल्पिः । सुवीरासो विदथमा वदेम । ऋ० ८.४८.१४

४. प्राञ्चो अगाम नृतये हसाय । द्राघीय आयुः प्रतरं दधानाः ।। ऋ० १०.१८.३

५. अभि वस्त्रा सुवसनान्यर्षाऽभि धेनूः सुदुघाः पूयमानः ।
अभी नो अर्ष दिव्या वसून्यभि विश्वा पार्थिवा पूयमानः ।
अभि येन द्रविणमश्नवामाभ्यार्षेयं जमदग्निवन्नः ।। ऋ० ९.९७.५०-५१

६. यजु० ३४.४६; ऋग्वेदे १०.१२८.९

७. मा नो अर्यो अनुकामं परा दाः । ऋ० ८.४८.८ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथर्ववेदे भृगुः कामयते—

उदुत्सं शतधारं सहस्रधारं भक्षितम् ।
एवास्मकेदं धान्यं सहस्रधारमक्षितम् ।। ३.२४.४

बहव ऋषय श्रमसाध्याजीवा आधिभौतिकसुखदृष्ट्या समृद्धिविमुखाः प्रतिभान्ति । ऋग्वेदस्य नवममण्डले शिशुराङ्गिरसः साधारणगृहस्थपरिवारे स्वजीवनं यापयति स्म ।[1] बहुविधवैभवाकांक्षी गोतमस्तत्र स्पष्टयति—

चक्रुत्यं मरुतः पृतसु दुष्टरं द्युमन्तं शुष्मं मघवत्सु धत्तन ।
धनस्पृतमुक्थ्यं विश्वचर्षणिं तोकं पुष्येम तनयं शतं हिमाः ।। १.६४.१४

ऋषिर्ब्रह्माणश्च ब्रह्मविषयक-प्रतिभोत्कर्षेण कश्चिदृषिर्ब्रह्मा बभूव । तथा हि

(१) तमेव ऋषिं तं ब्रह्माणमाहुः । ऋ० १०.१०७.६; ९.८१.४

(२) तं तं ऋषिं तं ब्रह्माणं तं सुमेधाम् । ऋ० १०.१२५.६

(३) इन्द्रो ब्रह्मा, इन्द्र ऋषिरित्यनेन ऋषिब्रह्मणोः साम्यमिव प्रतिफलति । ८.१६.७

(४) आङ्गिरसा ऋषय आसन् । अथ च तेषां ब्राह्मीविद्याविशेषेण 'सुब्रह्मण्याः' उपाधिरस्ति । ते ब्रह्माण इति ।[2]

(५) ऋषिभ्य उच्चतरो ब्रह्मा इन्द्रस्य संवर्धनं करोति ।[3]

ब्रह्मवादिन एव ब्राह्मणाः । अथर्ववेदे ब्रह्मवादिनो वर्णिताः ।[4]

व्यापृतिः

ऋषित्वाभिज्ञापकं शाश्वतकर्मासीत् भूयिष्ठं ज्ञान-विज्ञानार्जनं देवानां प्रीत्यर्थं यज्ञविधानं, स्तुतीः रचयित्वा तासां गानं च ।[5] एतस्मिन्नुपक्रमे पूर्णपरिष्क्रियार्थं तेषां वेदवेदाङ्गादीनां काव्योचितविषयाणामवगाहनं याज्ञिककर्मकाण्डस्याभ्यासश्च निपुणमधिकृतः । स्वकुलजेभ्योऽन्तेवासिभ्यश्च वैदिकनिधिदानाय ऋषीणां कृत आवश्यकमासीदध्यापनम् । स्वस्य कृतेऽन्तेवासिनां च कृते ऋषिः सवितारं प्रार्थयते स्म—

धियो यो नः प्रचोदयात् ।

---

१. स आत्मस्थितिं वर्णयति—

कारुरहं ततो भिषगुपल-प्रक्षिणी नना ।
नानाधियो वसुयवोऽनु गा इव तस्थिम । ९.११२.३ ।

२. सुब्रह्मण्यमङ्गिरसो वो अस्तु । ऋग्वेदे १०.६२.४

३. इत्था हि सोम इन्मदे ब्रह्मा चकार वर्धनम् । ऋ० १.८०.५

४. अथर्व ११.३.२६ ब्रह्मवादिनो वदन्तीत्यादि ।

५. सहस्तोमाः सहछन्दस आवृतः सह प्रमा ऋषयः सप्त दैव्याः । ऋ० १०.१३०.७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्यच्च—

धियं वनेम । ऋ० २.११.१२

धिया धीरो रक्षतु धर्ममेतम् । गोपथब्रा० १.५.२४

कतिपय ऋषयः कृषिकर्मणि गोपाल्ये च व्यापृता आसन् ।[1] ऋग्वेदे ऋषिर्वामदेवः क्षेत्रपतिं देवं प्रार्थयते—

क्षेत्रस्य पतिना वयं हितेनेव जयामसि ।
गामश्वं पोषयित्न्वा स नो मृडातीदृशे ।। ४.५७.१
अर्वाची सुभगे भव सीते वन्दामहे त्वा ।
यथा नः सुभगाससि यथा नः सुफलाससि ।। ४.५७.६
शुनं न फाला वि कृषन्तु भूमिं शुनं कीनाशा अभि यन्तु वाहैः ।
शुनं पर्जन्यो मधुना पयोभिः शुनासीरा शुनमस्मासु धत्तम् ।।
४.५७.८

अत्रेर्ऋषेः कन्यया कृषिः ऋग्वेदे ८.९१.५,६ वर्णिता । अन्यत्र बार्हस्पत्यो भारद्वाजो गवाश्ववाजादिकृते स्वधियं प्रेरयति ।[2] अत एव कृष्या सह ऋषीणां पशुपालनमृग्वैदिकयुगे सुप्रचलितं प्रतिभाति ।[3]

इन्द्रसंगतानामृषीणां युद्धपरायणता तेषां स्वातन्त्र्यप्रियतां सौम्यप्रवणतां च द्योतयति ।[4] तथा हि ऋग्वेदे गर्गो भारद्वाजो युद्धभूमौ स्ववीरान् श्रावयति—

आमूरज प्रत्यावर्तयेमाः केतुमद् दुन्दुभिर्वावदीति ।
समश्वपर्णांश्चरन्ति नो नरोऽस्माकमिन्द्र रथिनो जयन्तु ।। ६.४७.३१

यज्ञरक्षणार्थं युध्यमानास्ते विजयकामा दृश्यन्ते ।[5]

---

१. विश्वामित्रोऽथर्ववेदे भणति—गृहेषु गोषु मे मनः ६.४५.१

२. उत नो गोषणि धियमश्वसां वाजसामुत नृवत् कृणुहि वीतये । ऋ० ६.५३.१०

३. कृषेर्लोकप्रियता ऋग्वेदे १०.१०१.३–७ दृश्यते । ऋषयो गोपालका इति अथर्व० ४.२१ । अथर्ववेदे ३.१७ सूक्ते सीरा युञ्जन्ति कवयः इत्यादिना कृषिर्ऋषिकर्म प्रतीयते । अन्यत्रापि ऋषीणां कृषिकर्म वर्णितम् । यथा अथर्व० ६.५०.१–३;७.११.१ ।

४. तथाहि बृहस्पतिर्ऋषिर्युद्ध-व्यापारेऽपश्चिमः । ऋ० २.२४; ६.७३; १०.१०३; २.२३; १.४०

५. दीर्घप्रयुज्यमति यो वनुष्यति वयं जयेम पृतनासु दढचः ।
अस्माकमिन्द्रावरुणा भरेभरे पुरोयोधा भवतं कृष्टचौजसा । ऋग्वेदे ७.८२.१,९
ये नः सपत्ना अप ते भवन्त्विन्द्राग्निभ्यामव बाधामहे तान् ।।
वसवो रुद्रा आदित्या उपरिस्पृशं मोग्रं चेत्तारमधिराजमक्रन् ।। ऋ० १०.१२८.९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कण्व इन्द्रावरुणा ऋषीणां विजयायाधोविधं प्रार्थयते—

इन्द्रावरुण वामहं हुवे चित्राय राधसे अस्मान्त्सु जिग्युषस्कृतम् ॥

ऋग्वेदे १.१७.७

मधुच्छन्दा गायति—

इन्द्र त्वोतास आ वयं वज्रं धना ददीमहि ।

अपरे ऋषयः - जयेम सं युधि स्पृधः । ऋ० १.८.३

वामदेवः पृच्छति – युध्यै त्वेन सं त्वेन पृच्छै । ऋ० ४.१८.२

कुत्सः –युष्माकं देवा अवसाहनि प्रियेऽभि तिष्ठेम पृत्सुतीरसुन्वताम् ।

ऋग्वेदे १.११०.७

नोधा—पृत्सु दुष्टरम् । ऋ० १.६४.१४

ऋषीणां युद्धानि आर्यैर्दासैश्च बभूवुरिति अथर्ववेदेऽधोविधं वर्णितम्—

साह्याम दासमार्यं त्वया युजा वयं सहस्कृतेन सहसा सहस्वता ।

अथर्व० ४.३२.१

ऋषयः साधारणतो देवानां स्तुतिं व्यरचयन् ।[1] तस्या गानेन देवान् प्रीणयित्वा तेषां प्रसादेन धनपश्वादीनां दानेन च स्वजीवनस्य सौविध्यमन्वभवन् । अपरञ्च राज्ञां समृद्धिशालिनां च मानवानां कृतित्वं तेषां प्रीत्यर्थं तैर्वर्णितं स्तुतिरूपेण ।[2] तेषां कृते यज्ञसम्पादनं चक्रुः ।

साधारणतो यज्ञपरायणस्य ऋषेः प्रधानं बाह्यलक्षणमासीत् अघ्न्या (गौः) स्वधितिश्च । अघ्न्याया दुग्धघृतादि-हव्यानां प्राप्तिरभवत् । स्वधितिस्तु[3] समिधः प्राप्तय उपायुज्यत । तेषां यज्ञाः साधारणतो नित्यकर्मत्वेन, नैमित्तिककर्मत्वेन काम्यकर्मत्वेन च प्रसाधिताः । एतैर्यज्ञैस्तेऽखिलचराचराणां दिव्यादिव्यानां च संवर्धनाय मनसा वाचा कर्मणा च शाश्वतं प्रायतन्तेति वैदिकसूक्तेषु पदे पदे दृश्यते ।

कतिपयर्षयो वैद्या आसन्निति अथर्ववेदे—

त्वयापूर्वमथर्वाणो जग्धू रक्षांस्योषधे

त्वया जघान कश्यपस्त्वया कण्वोऽगस्त्यः ॥ ४.३७.१

---

१. ऋषयस्तु सूक्तानां न केवलं द्रष्टारोऽपितु रचयितारः सन्तीति कतिपयसूक्तेषु तेषां कर्तृरूपेणोल्लेखः प्रमाणयति । तथाहि ऋग्वेदे गौतमस्योक्तिः —ब्रह्म कृण्वन्तो गोतमासो अर्कैरूर्ध्वं नुनुद्र उत्सधि पिबध्यै १.८८.४ । सस्वर्हं यन्मरुतो गोतमो वः । १.८८.५

२. ऋग्वेदे ८.५.३८

३. न हि मे अस्त्यघ्न्या न स्वधितिर्न अथैतादृग्भरामि ते । ऋ० ८.१०२.१९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

लोकहिताय शाश्वतं तत्परा ऋषयः स्वकाव्यानां प्रचारेण समाजं वैदुष्यं प्रापयन्।[1] तेषां जागरणघोष आसीदथर्ववेदे—

ऋषी बोधप्रतीबोधा स्वप्नो यश्च जागृविः।
तौ ते प्राणस्य गोप्तारौ दिवानक्तं च जागृताम्॥ ५.३०.१०

लोकशिक्षणम्

ऋषिभिर्महापुरुषाणां पौरोहित्यं लोकसंग्रहहेतुना निष्पादितम्। कालिदासानुसारेण वैदिकर्षिर्वसिष्ठो दिलीपस्य गृहे तपोवनात् समायाति तस्य पुत्रस्य जातकर्मसंस्कारं निष्पादयति च।[2]

देवादर्शाननुसृत्य कतिपयर्षयो विश्वानि द्रष्टुं परिज्ञातुं च प्रायतन्त।[3] ते यशस्तमो भवितुं चेष्टन्ते स्म।[4] ब्रह्मविषयक-जिज्ञासाथर्ववेदे ऋषीणां प्रखरायते स्म। तथा हि—

षट् त्वा पृच्छाम ऋषय कश्यपेमे त्वं हि युक्तं युयुक्षे योग्यं च।
विराजमाहुर्ब्रह्मणः पितरं तां नो विधेहि यतिधा सखिभ्यः॥ ८.९.७

कतिपयर्षयो नित्यं नैकदिग्भ्रमणेन विश्वव्यापिसुखशान्तिं समभावयन्। तथा हि—

यास्ते (पृथिव्याः) प्राचीः प्रदिशो या उदीचीर्यास्ते भूमे अधराद् याश्च पश्चात्।
स्योनास्ता मह्यं चरते भवन्तु मा नि पप्तं भुवने शिश्रियाणः॥
अथर्व० १२.१.३१

यावज्जीवं पर्यटनमिति—

यावत्तेऽभि विपश्यामि भूमे सूर्येण मेदिनी।
तावन्मे चक्षुर्मा मेष्टोत्तरामुत्तरां समाम्॥ अथर्व० १२.१.३३

ब्रह्मोन्मुखानां बहूनामृषीणां प्रातिभसमुत्कर्षविलास एकान्तप्रदेशे समएकान्तवासिनो ग्रामवासिनः भवत्। तथा हि—
अरण्यवासिनः

उपह्वरे गिरीणां संगमे च नदीनाम्। धिया विप्रो अजायत। ऋ० ८.६.२८

ऋग्वेदस्य दशमे मण्डलेऽरण्यानी-सूक्तस्य द्रष्टा देवमुनिर्ऋषिरासीत्। देवमुनिः स्ववक्तव्येन परवर्तिवानप्रस्थमुनिना साम्यं बिभर्ति। यथा—

---

१. आ ते स्तोत्राण्युद्यतानि यन्त्वतन्तर्विश्वासु मानुषीषु दिक्षु।

२. स जातकर्मण्यखिले तपोवनादेत्य पुरोधसा कृते। रघु० ३.१८

३. देवादर्शो विद्यते—

यो विश्वाभि पश्यति भुवना सं च पश्यति।
स नः पर्षदति द्विषः। अथर्व० ६.३४.४

४. अथर्व० ६.३९.३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वसन्नरण्यान्यां सायमक्रुक्षदिति मन्यते ।
स्वादोः फलस्य जग्ध्वाय यथाकामं निपद्यते ।।
आञ्जनगन्धि सुरभि बह्वन्नामकृषीबलाम् ।। १०.१४६.४,५,६

ऋग्वेदस्याधोलिखितश्लोकेन तेषां ग्रामावासः प्रतीयात्--

इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः ।
यथा शमसद् द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामेऽस्मिन्ननातुरम् ।। १.१४.१

प्रथममण्डले च ऋग्वेदे—गोषु प्रशस्ति वनेषु धिये ।। १.७०.५

अर्थाद् ऋषि-वसतिधारिणी वनभूमिः प्रशस्या मता ।

कौटुम्बिक-व्यवस्था

कतिपयेषां ऋषीणां गृहेषु वीराः पुत्रा आसन् । तेषां भूयः संवर्धनाय पत्नी-सहभावस्तैः सम्पादितः । कतिपयर्षीणां पञ्चाशतप्राया वध्वः संश्रिता आसन् ।[1] ऋग्वेदे आङ्गिरसस्य ऋषेः कुटुम्बे तस्य माता उपलप्रक्षिणी बभूव, पिता भिषगासीत् । अत्र ऋषित्वं कर्मणोपपद्यत इति स्पष्टमेव ।[2] ऋषीणां कुटुम्बे जातो युवभूतः पुरुष ऋषिर्बभूव ।

ऋषीणां विश आसन्, यत्रासंख्यार्षकुटुम्बानां वसतिर्नक्षत्रवत् प्रकल्पिता ।[3]

ऋषीणां वसतिषु मानवा मानव-वसतिषु ऋषयो वा सुखं वसन्ति स्म ।[4]

ऋषीणां कुलानि सहैव याज्ञिकविधानं समपादयन् । उरुक्षयाणामृषिकुल-मृग्वेदे तादृशं वर्णितम्—

तं त्वा गीर्भिरुरुक्षया हव्यवाहं समीधिरे । यजिष्ठं मानुषे जने । १०.११८.९

कतिपयर्षीणां देवैः सख्यमासीत् । विमदो वैशद्येन वर्णयति—इन्द्रेण

देवर्षिमानवानां परस्परसम्बन्धः

सह मम सख्यं कदापि न हीयेत । आवयोः सख्यं सततं जायेत ।[5]

---

१. काण्व आत्मवृत्तं वर्णयति--
अदान्मे पौरुकुत्स्यः पञ्चाशतं त्रसदस्युर्वधूनाम् ।। ऋ० ८.१९.३६

२. ऋग्वेदे ९.११२.३

३. गुहा यदी कवीनां विशां नक्षत्रशवसाम् । १०.२२.१०

४. ऋग्वेदे १०.२६.५; १०.११८.९ ।

५. माकिर्नं एना सख्या वि योषु स्तव चेन्द्र विमदस्य च ऋषेः ।
विश्मा हि ते प्रमतिं देव जामिवदस्मे ते सन्तु सख्या शिवानि । ऋ० १०.२३.७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

देवा मानवयजमाना इव लब्धसान्निध्येभ्य ऋषिभ्यो बहुविधं दानं ददुः। तद्यथा ऋग्वेदे इन्द्रस्य दानं काण्वेन वर्णितम्—

शतं मे गर्दभानां शतमूर्णावतीनाम् शतं दासाँ अति स्रजः ॥ ८.५६.३

देवानां भ्रातरस्त ऋषय इति उशना काव्यः सूचयति—

विष्णो सजात्यानाम् अधि न इन्द्रैषां

प्र भ्रातृत्वं सुदानवोऽध द्विता समान्या मातुर्गर्भे भरामहे। ऋ० ८.८३.७

इन्द्रो देव ब्रह्मास्ति ऋषिश्चास्ति इत्यनेन ऋषिवर्गाद् देवाः, ब्रह्माणश्च सहोरभूता अपि पृथङ् न सन्तीति सिद्धम्।[1]

देवा ऋषीणां सम्माननीया ज्येष्ठाः, स्तुत्याः संरक्षकाः, पितृवद् याच्याश्चासन्।[2] ऋषिभिराहूता स्वयमेव तेषां यजमानानां च सहायभूता महदुपकुर्वन्ति स्म।

वैदिकयुगे ऋषीणां तपो विरलमिव दृश्यते। ऋग्वेदस्य दशममण्डले सप्तर्षीणां तपः वर्णितम्--सप्तर्षयस्तपसे ये निषेदुः। १०.१०९.४।

तपोधनाः सप्तर्षयः

इमे सप्तर्षय ऋग्वेदस्य सूक्तद्वयस्य द्रष्टारः।[3] अथर्ववेदानुसारेण सप्तर्षयो ब्रह्मविदो बभूवुः।

तेषां सप्तर्षीणां साधारण-ऋषिभ्यः कृतेन स्वस्त्ययनेन तेषां पूर्वपदं प्रतिभाति।[4] अपरं च

सा (विराट्) उदक्रामत् सा सप्त ऋषीनागच्छत्।
तां सप्त ऋषय उपाह्वयन्त ब्रह्मण्वत्येहीति ॥
तां बृहस्पतिराङ्गिरसोऽधोक् तां ब्रह्म च तपश्चाधोक् ॥

तद् ब्रह्म च तपश्च सप्त ऋषय उपजीवन्ति।

ब्रह्मवर्चस्युपजीवनीयो भवति य एवं वेद ॥ अथर्व० ८.१०.४.१३-१६

अनेन सप्तर्षीणां तपः प्रसिद्धम्।

---

१. इन्द्रो ब्रह्मेन्द्र ऋषिरिन्द्रः पुरु पुरुहूतः। ऋ० ८.१६.७

२. वयं तद्वः सम्राज आ वृणीमहे पुत्रो न बहुपाय्यम्।
अश्याम तदादित्या जुह्वतो हविर्येन वस्योऽनशामहे ॥ ऋ० ८.२७.२२

३. ऋग्वेद ९.१०७; १०.१३७.७
ते सप्तर्षयः सन्ति भरद्वाजः, कश्यपः, गोतमः, अत्रिः, विश्वामित्रः, जमदग्निः, वसिष्ठश्च।

४. अथर्व० १९.९.१२। सप्तर्षयस्तु ऋषीणां पितरः।
ऋग्वेदे ४.४२.८ इत्यनेन सप्तर्षय पूर्व्या मूल-ऋषयो विभान्ति।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विराजमाहुर्ब्रह्मणः पितरम् । अथर्व० ८.९.७ । अयं ब्रह्मा ऋग्वेदस्य पुरुष इत्यधोलिखितेन प्रतीतम्—

तस्माद् विराडजायत विराजो अधि पूरुषः । १०.९०.५

एतस्मात् पुरुषाद् ब्रह्मणो वा प्रागेव तत्रासन् देवाः, साध्याः, ऋषयश्च । एते देवा आद्याः सन्ति ।[1] परतो यज्ञात् चन्द्रमाः, सूर्यः, इन्द्रः, अग्निः, वायुश्च जाताः ।[2]

बृहस्पतिर्विराजो दोहनानन्तरमृषीणां कृते ब्रह्म च तपश्चाधोक् ।[3] अर्थात् ब्रह्मतपसोरधिष्ठाता । स ऋषिभ्यो ब्रह्म ज्ञानं तपश्चादात् ।

ब्रह्मज्ञो ब्राह्मणः (ब्रह्मन्)[4] ब्राह्मणस्तु मूलतो ज्ञानी, कविर्वा साधुर्वासीत् ।[5]

ऋग्वेदे ब्राह्मणः सोमयज्ञं करोति ।[6] ब्राह्मणस्य गावोऽभिज्ञानम् ।[7] अस्याधोलिखिता विशेषा विभान्ति—

(१) बौद्धिकप्रकर्षः । यथा—

चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचं मनुष्या वदन्ति ॥ १.१६४.४५

अत्र ब्राह्मणः योगीव परा, पश्यन्ती, मध्यमा च त्रिविधानि पदानि वेत्तीति साधारणमानुषाद् विशेषः ।

(२) ब्राह्मणा व्रतचारिणः । ऋ० ७.१०३.१

(३) ब्राह्मणासः पितरः सोम्यासः इत्यादि । ऋ० ६.७५.१०
अत्र ब्राह्मणा ऋषेरुच्चतरा वर्णिताः ।

(४) हृदा तष्टेषु मनसो जवेषु यद् ब्राह्मणाः संयजन्ते सखायः ।
अत्राह त्वं विजहुर्वेद्याभिरोहब्रह्माणो विचरन्त्युत्वे । ऋ० १०.७१.८

(५) पुण्डरीकं नवद्वारं त्रिभिर्गुणेभिरावृतम् ।
तस्मिन् यद्यक्षमात्मन्वत्तद्वै ब्रह्मविदो विदुः ॥ अथर्व १०.८.४३

---

१. ऋग्वेदे १०.९०.७ २. ऋग्वेदे १०.९०.१३

३. अथर्व० ८.१०.४.१५

४. ब्राह्मणस्तु ब्रह्मा एवेति अथर्व० २-७.२ । राक्षसाः ब्राह्मणानां द्विष आसन्निति ऋग्वेदे प्रोक्तम्—ब्रह्मद्विषे तपुषिं हेतिमस्य ॥ ३.३०.१७

५. सूर्यकान्तशास्त्री : वैदिककोशः पृ० ४६० । अथर्ववेदानुसारेण तत्रासन् पूर्व्या ब्राह्मणा अपूर्वज्ञानरक्षितारः । १९.३४.६

६. ऋ० १०.१०३.७

७. इन्द्रो ब्रह्मणे प्रथमो गा अविन्दन् । ऋ० १.१०१.५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अत्र ब्राह्मणः ब्रह्मभ्यो (पुरोहितेभ्यः) विशिष्ट एवेति दर्शितम् । ब्राह्मणः तेजसा, वर्चसा च ऋषिमतिशेत इत्यथर्ववेदस्य मन्त्रेण प्रमाणितम् ।[1] ब्राह्मणस्य पर्याय एव ब्रह्मा अथर्ववेदे १२.२.३४ मन्त्रे विद्यते—

प्रियं पितृभ्य आत्मने ब्रह्मभ्यः कृणुता प्रियम् ।
अत्र ब्रह्मा पितॄणां कोटौ उपस्थापितः ।

ब्रह्मदर्शिन आसन् बहव ऋषय येषामाध्यात्मिकदर्शनमथर्ववेदे भूयिष्ठं व्याख्यातम् ।[2]

मानववंशस्यादिपुरुषो मनुरस्ति । तस्य पर्यायाः सन्ति मानवः मानुषः, जनः, चर्षणिश्च ।

मानवः

वैदिकभारते याज्ञिकसंस्कृतेरनुयायिनः सर्वसाधारणजना मानवादिनामभिः सम्बोधिता आसन् ।[3] मानवादिषु देवा ऋषयो विशेषयोग्यतां प्रपन्नाः स्वीयप्रवृत्त्यनुरूपं प्रादुर्भूताः । एतेषां सामुदायिकसंज्ञा विट् (विशः) आसीत् ।

मानवा अग्रणीनामृषीणामनुयायिनो देवव्रता बभूवुः । तथा हि—

प्रपीतिमिष्टे हर्यश्व सृष्टोः सुषुम्नस्य पुरुरुचो जनासः ।
मंहिष्ठामूतिं वितिरे दधानाः स्तोतार इन्द्र तव सूनृताभिः । ऋ० १०.१०४.५

मनुष्याः प्रधानतः कृषिं च सस्यं चोपजीवन्ति स्म ।[4]

मानवसमाजस्यादिपुरुषो मनुरासीत् । वस्तुतो मनुरांग्लभाषाया 'मैन' (Man) अस्ति ।[5] मानवीविशः कर्मानुसारेण ब्रह्मा, ऋषिः, राजन्यः विडिति वर्गेषु विभक्ता आसन् । एतेषु राजन्या वैदिकसंस्कृतत्यनुसारेण प्रमुखतः शस्त्रधरा विशां (परवर्तिवैश्यानां) संरक्षणे संवर्धने च व्यापृता बभूवुः । न केवलं भारतेऽपितु संसारस्य नैकप्रदेशेषु शस्त्रधराणामीदृशी व्यवस्था पुरा प्राचलदिति चाइल्डमहोदयः प्रमाणयति—

राजन्याः, क्षत्रियाः, क्षत्रा वा

---

१. या त्विषिः (तेजः) ब्राह्मणे सा वर्चसा न ऐतु । अथर्व० ६.३८.१

२. तथा हि—अथर्व १०.८.१–४४

३. ऋग्वेदे 'मनवे शासदव्रतान् । १.१३०.८ प्रचेतसे मनवे वामं धत्थ । ऋ० ८.२७.२१ इत्यादिना मनुः मानुषस्य पर्यायः । चर्षणिरिन्द्रं संवर्धयति । ऋग्वेदे ८.१६.९ । मनुस्तु मानव इति ऋग्वेदे ८.२७.२१ ।

४. अथर्व० ८.१०.४.१२

5. Manu is the institutor of sacrifice. He presented the first offering with the seven priests to the gods. Rg. X. 63.7

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

A tribe of pastoralists may conquer the land of a peasant community. They will leave the peasants on the land and even protect them from other enemies, on condition that they pay a tribute of farm produce. The peasant is thereby obliged to exert himself to produce more than he needs for the support of his own household; he must provide a substantial share perhaps more than he retains himself, for his new "masters". These form a sort of landed "aristocracy", a class living off the tribute of peasants. The system is familiar; it survives in a very simple form in East Africa; it was a characteristic of mediaeval Europe and was widespread in antiquity.[1]

यजुर्वेदानुसारेण राजा स्वोद्योगविधिं सवितरग्निवाय्वादित्यचन्द्रर्तुमरुद्-बृहस्पतिमित्रवरुणेन्द्रविश्वेदेवेभ्यः परिचिनोति।[2] शत्रुं प्रति स उग्रो भीमो विजेताभियोक्ता च भवति।[3] तस्य पौरुषमग्न्यशनि-पशुपति-महादेवेशानादीनां धारणेन प्रमाण्यते।[4] क्षत्रियेण राष्ट्रं गुपितमासीत्।[5] राजन्यवर्गे तत्रासन् शूरा इषव्या, अतिव्याधयः, महारथाश्च।[6] क्षत्रस्य प्रजापालन-प्रवृत्तिर्यजुर्वेदेऽध्योविधं वर्णिता—

अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबाधमानः।
हस्तघ्नो विश्वा वयुनानि विद्वान् पुमान् पुमांसं परिपातु विश्वतः॥

वनस्पते वीड्वङ्गो हि भूया अस्मत्सखा प्रतरणः सुवीरः।
गोभिः सन्नद्धो असि वीडयस्वास्थाता ते जयतु जेत्वानि॥ २९.५१-५२

पुरोहितपदं धारयद्भिर्ब्राह्मणैः सह क्षत्रियाणां सम्बन्धो न केवलं परस्पर-हिताय अपितु लोकसंवर्धनाय प्रावर्तत। तथा हि - तस्माद् ब्राह्मणो राजन्यवानत्यन्यं ब्राह्मणम्। तस्माद्राजन्यो ब्राह्मणवानत्यन्यं राजन्यम्। तै० सं० ५.१.१०.३

---

१. Man Makes Himself p. 131.
एतादृशी स्थितिरथर्ववेदे निदर्शिता ४.३२ सूक्ते।
भूतो भूतेषु पय आ दधाति स भूतानामधिपतिर्बभूवेति च। ४.८.१

२. यजु० ३९.६
३. यजु० ३९.७
४. यजु० ३९.८
५. अथर्व० ५.१७.३
६. यजु० २२.२२
७. आयजिं त्वा मनवे जातवेदसम्। ऋग्वेदे ८.२३.१७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

परवर्तिराजसमो राजन्य ऋग्वेदे विरलमेव वर्तते किन्तु अथर्ववेदे नैकशः प्रयुक्तः।[1] क्षत्रस्तु शासकाभिप्रायेण ऋग्वेदे नैकशः प्रयुक्तः।[2] तथैव, क्षत्रियः।[3] क्षत्रः क्षत्रियश्च राजत्वविहीनौ केवलं योद्धारौ वास्ताम्। शूरा युद्धप्रिया वीराः प्रतिभान्ति ऋग्वेदे।[4]

ऋग्वैदिकयुगे तत्रासन् राजानः, राजकाश्चाधोविधं विशेषिताः —

चित्र इद् राजा राजका इदन्यके यके सरस्वतीमनु। ८.२१.१८

राजा चित्रो महावदान्य असीदित्यपरं निर्दिष्टम्—

पर्जन्यमिव ततनद्धि वृष्टया सहस्रमयुता ददत्॥ ऋ० ८.२१.१८

मित्रावरुणौ क्षत्रियौ क्षत्रयुक्ता इति।

ऋतावाना नि षेदतुः साम्राज्याय सुक्रतू।
धृतव्रता क्षत्रिया क्षत्रमाशतु॥ ८.२५.८

अत्र क्षत्रियः, क्षत्रश्च सम्राजः पर्यायौ।

वैदिकयुगे कतिपयराजका ब्रह्मविद्याया महापण्डिता ब्राह्मणानामपि शिक्षका बभूवुः।[5]

विशः (वैश्याः)

वैदिकयुगीनपूर्वतर-समाजे बहवो विशो बभूवुः —मानुषो विशः[6], मानुषी विशः[7] आर्याणां विशः[8], दैवीविशः[9], दासानां विशः[10]। तत्कालीनसमाजे सांस्कृतिकदृष्ट्या वैविध्यमादधाना एता विशो वर्णपर्याया ब्राह्मण-क्षत्रिय-वैश्य-शूद्रनामधेयाः प्रकल्पिताः। पूर्वोक्त-

---

१. ऋ० १०.९०.१२ अथर्व० ५.१७.९; ५.१८.२; ६.३८.४; १०.१०.१८; १२.४.३२; १५.८.१; १९.३२.८। अन्यत्रापि तै० सं० २.४.१३

२. क्षत्रं राजन्यः। ऐ० ब्रा० ८.६; ऋग्वेदे १.५७.२; ८.३.५१७। अन्यत्रापि अथर्ववेदे ४.२२.२; वा० सं १०.१७; तै० ब्रा० २.७.६.३।

३. ऋ० ४.१२.६; ४.४२.१; ५.६९.१; ७.६४.२; ८.२५.८; ८.५६.१; १०.१०९.३

४. ऋ० १.७०.११; १.१०१.६; १.४१.८; १.५८.३; २.१७.२; २.३०.१० इत्यादि। अथर्व० ८.८.१; ८.५.१।

५. याज्ञवल्क्यो जनकादशिक्षत। शत० ब्रा० ११.६.२१.५। बालाकिः गार्ग्यः काशिराजादजातशत्रोः (बृहदा० उ० २.१) श्वेतकेतुः प्रवाहणजैवलेः (छा० उ०) पञ्चमहाशालाश्च केकयराजाश्वपतेः (छ० उ० ५.११) ब्रह्मविद्यामधिगतवन्तः।

६. ऋ० ६.१४.२; ८.२३.१३। मानुषीषु विक्षु देवाः सविशेषं सम्मानिता बभूवुः। ऋ० ७.६७.७

७. ऋ० १०.८०.६ ८. ऋग्वेदे १.११.४

९. ऋग्वेदे ३.३४.२

१०. तत्रासीत् मरुतां गणः। ऋ० १.८७.४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मानुषार्यदेवादीनां विश आनुवंशिकक्रमेण नैकगणेष्वपि विभक्ता आसन्[1]। विशः कल्पना गणानां कल्पना च परवर्तिचातुर्वर्ण्यस्य जातिप्रजातीनां वर्गीकरणस्य पूर्वरूपम्।

विशो वैश्याश्च परवर्तिवैदिकयुगे प्रायः पशुपाला बभूवुः। ते पशुकामाः यजन्ते स्म।[2] वैश्याः समाजे बहुसंख्यका आसन् यतो हि नाम तेषामाधिभौतिकजीवनं सुसम्पन्नं सुखपूर्णं सामान्यत आसीदस्ति च।[3]

काणे महोदयः परिणामयति—Vaiśyas were entitled to sacrifice, reared cattle, were far more numerous than the other two classes. They had to bear the brunt of taxation. They lived apart from Brāhmaṇas and kṣatriyas and were obedient to them. H. D. Vol. II pt.I Page 42.

वैदिकसंहितासु विशः प्रयोगो नैकाभिप्रायेण दृश्यते। तत्र भूयः प्रभवन्ति मानवीविशः। वैदिकार्यसमुदाये साधारणाभिप्रायेण विट् सर्वेषां मनोः संस्कृतेरनुयायिनां नामासीत्।[4] तत्रापि ब्रह्माण ऋषयो राजन्या विशिष्टगुणोत्कर्षसंवलिता विशः पृथग्भूता इव दृश्यन्ते।[5] मानवीयादिव्यवसायं (वार्तादिकम्) समाश्रित्य बहवो जनाः साधारणविश इति प्रख्याता आसन्।[6] इमा विशो वार्ताव्यतिरिक्तशिल्पादिकर्मनिपुणा[7] विविधव्यवसाय-

१. अदेवीविशः। ऋग्वेदे ८.९६.१५। दासीविशः ऋग्वेदे ४.२८.४। काणे महोदयः प्रतिपादयति—इन्द्र क्षितीनामसि मानुषीणां विशां दैवीनामुत पूर्वयावा॥
Ṛgveda VIII. 63.7 shows that Viś means all the Āryan people. H. D. Vol II Pt. I p 33.

२. पशुकामः खलु वैश्यो यजते। तै० सं० २.५.१०.२

३. तस्माद् भूयांसोऽन्येभ्यः। तै० सं० ७.१.१५

४. In many passages of the Ṛgveda Viś has the sense of settlement or dwelling, in other passages, subject, people and elsewhere a subdivision of man or whole people. Vedic Index Pt. II P. 306

५. In the later period the sense of Viś is restricted to denote the people or classmen (वैश्य) as opposed to the noble (क्षत्र, क्षत्रिय) and the priests (ब्रह्मन्, ब्राह्मण), Vedic Index Pt. II P. 307.

६. ऋग्वेदे वप्ता १०.१४२.४; तष्टा १.६१.४; त्वष्टा ८.१०२.८; भिषक् ९.११२.१; कर्मारः १०.७२.२; चर्मम्नः ८.५.३८।

७. एते वैदिकव्यवसाया यजुर्वेदे एकत्र परिगणिताः ३० तमेऽध्याये द्रष्टव्याः। कतिपयप्रमुखव्यवसाया आसन्—नृत्य-गीत-हास्यादिकरणम्, गृहनिर्माण-धातुकर्म, मृत्पात्रनिर्माणम्, वस्त्रादिवयनम्, रत्नालङ्काराभूषणप्रसाधनम्, खाद्यपेयसंस्करणम्।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

परायणा बभूवुः। परवर्तियुगे शतशो व्यवसायेषु युक्ता लोकाः स्वस्वव्यवसायानुरूपनाम्ना प्रसिद्धा बभूवुः। तत्र व्यवसायानुरूपिणः विभक्तविशः— मणिकारः, कर्मारः, कुलालः, इषुकारः, धनुष्कारः, ज्याकारः, गोपालः, अजापालः, सुराकारः, चर्मम्नः, वनपः। स्त्रीणामपि व्यवसायानुरूपिण्यो जातयः प्रसिद्धा आसन्—विदलीकारी, कण्टकीकारी, पेशस्कारी, रजयित्री अंजनीकारी, कोशकारी च।[1]

शूद्राः

आर्याणां विक्षु ये जना वैदिकदेवानामृषीणां च यज्ञादीनां प्रपञ्चेषु ईषद्रचिका आसन्[2] अपि च प्रायशः सेवाकर्मणि व्यापृताः, शिल्पकारिणो बभूवुः, त एव परवर्तियुगे शूद्रा इति पृथग्वर्गीयाः बभूवुः। एतैः शूद्रैः समवृत्तिका जना असुर-दास-राक्षसादीनामार्येतराणां विक्षु बभूवुः। तेऽप्यार्यैः प्रभाविताः सङ्गमिताश्च शूद्रा बभूवुः। अत एव शूद्रवर्गे आर्याणामार्येतराणां च प्रथमं महत्त्वपूर्णं सम्मिश्रणं सञ्जातम्। परवर्तियुगेऽपि ब्राह्मणादयस्त्रिवर्गीया जनाः स्वस्वकर्मसु पराङ्मुखा वा, शिथिला वा शूद्रा इति संज्ञिताः। शूद्रवर्गे दासानां सम्मिश्रणेन तेषामेव बाहुल्यं समवर्तत।

शूद्राणामार्यीकरणस्य ऋषीणां प्रवृत्तितैत्तिरीयसंहितायामधोविधं प्रचीयते—

रुचं नो धेहि ब्राह्मणेषु रुचं राजसु नः कृधि।
रुचं विश्वेषु शूद्रेषु मयि धेहि रुचा रुचम्॥ ५.७.६.३, ४

अर्थात् चतुर्षु वर्णेषु भेदभावं विनाकृत्य दिव्यः प्रकाशः संवेशनीयः।

निस्सन्देहमन्ये बहवः शास्त्रकाराः शूद्राणां परमात्मनः सृष्टिमात्मदृशा प्रत्येतुमसमर्थाः प्रतिभान्ति, तथापि तस्मिन् पुरायुगेऽपि विचक्षणा मनीषिणः शूद्रान् भारतीयसमाजस्य महत्तममङ्गं प्रतिजानन्ति स्म। आर्यगृहेषु तेषां प्रवेशः पाचकनियुक्त्यापि निश्चीयते।[3]

---

१. यजु० ३० तमेऽध्याये

२. आर्यस्तु वैश्य इति अथर्व० १९.३२.८; यजुर्वेदे २६.२
यज्ञियकार्यकलापेषु तेषां साक्षाद् भागग्राहिता ताण्डचमहाब्राह्मणेऽधोविधं प्ररोचिता—
शूद्रायौ चर्मणि व्यायच्छेते तयोरार्यवर्णमुज्जापयन्ति। ५.५.१४

३. आपस्तम्बे २.२.३.१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

असुराः

भारतीयसामाजिकव्यवस्थायाः प्राथमिकविभाजनं कस्मिंश्चित् प्रदेशे विकसितं देवानाम्, असुराणां च विश्लेषकरं प्राभवत्। पूर्वं येऽसुरा आसन् त एव वर्गद्वये विभक्ता देवासुराः संजाताः, समसांस्कृतिका अप्यादौ परवर्तियुगे संस्कृतिभेदेन वर्गद्वये असुरा देवाश्च लक्षिताः।[1] एतेभ्यो भिन्ना आसन् मानवीविशो राक्षसाः पिशाचाश्च। ऋषयः, राजन्याः, वैश्याः शूद्राश्च मानवा एव। तेषु ऋषयो मन्त्ररचनया यज्ञेन च, राजन्याः क्षत्रबेलन प्रजारक्षणेन च, वैश्याः कृषि-पशुपाल्याभ्यां शूद्राः शिल्पकरणेन च परस्परं सहायत्वेन समाजस्याभ्युत्थाने निरता बभूवुः।

प्राथमिकयुगे देवानां प्रधानशत्रुभूता इमेऽसुरा तेषां ज्येष्ठभ्रातरः प्रतिभान्ति ऋग्वेदेऽवेस्तासाहित्ये च।[2] मैकडानलमहोदयस्तान् विशेषयति—

In the Ṛgveda the word Asura is predominantly a designation, of gods, and in the Avesta Ahura (Asura) is the name of the highest god. Thus the sense of god is clearly the older.[3]

मैकडानलोऽसुरशब्दस्यान्यथार्थमधोविधं विश्लेषयति—

An attempt has been made to explain the transition from this meaning to that of devil from national conflicts in consequence of which the Asuras or gods of extra-Vedic tribes has become demon to the Vedic Indian....Asura as compared with Deva has in its older sense a peculiar shade of meaning. It is specially applied to Varuṇa or Mitrā-Varuṇa whose Māyā or occult power is particularly dwelt upon....Towards the end of the Ṛgvedic

---

१. यथा देवा तथासुरा अपि यज्ञपरायणा आसन्। असुराणां पुरोहितो मर्कः शण्डश्चास्ताम्। काठकसंहिता ४.४। परवर्तियुगे शुक्रस्तेषां पुरोहितो बभूव।

२. शूद्रास्तु दासीकृता आर्येतराः सन्तीति निःसन्दिग्धं न प्रतिभाति। आर्येतराणामेको वर्गो दास आसीत्। आर्यैर्दासीकृता दासा आर्यसमुदाये गृहीता दासा बभूवुर्न तु शूद्रा इति निश्चप्रचम्।

3. Vedic Mythology P. 146

एतदनुसृत्यासुरस्य पर्यायः पूर्वंदेव इति कोशेषु दृश्यते। महाभारते देवा असुराश्च भ्रातर इति कथितम्। शान्ति० १३०.५०,५१

असुराश्चैव देवाश्च दक्षस्यासन् प्रजापतेः।
अपत्यं बहुलं तात तेऽस्पर्धन्त परस्परम्॥ महाभारत आश्वमेधिकपर्वणि ५.३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

period the application of the word to the gods began to fall into disuse.

असुराः क्वचिद्देवाः, अनायुधाश्च वर्णिताः।[1] असुराणामपि वर्ण-विभाजनमासीत्।[2]

कतिपयासुरैः सह देवानां शात्रवं प्रगीतम्।[3] इन्द्रः पिप्रुनामकस्यासुरस्य-दृढदुर्गान् प्राध्वंसयत्।[4] इन्द्रो विष्णुश्च वर्चिनो लक्षवीरान् जघ्नतुः, शम्बरस्य च ९९ पुरो व्यनाशयताम्।[5]

देवैः सहासुराणां युद्धं चिरं प्राचरत्। असुरा नैकशो युद्धे देवान् पराजयन्, किन्तु देवाः स्वयाज्ञिकप्रभविष्णुतयासुरान् शाश्वतं पराजयन्।

छान्दोग्योपनिषदि आसुर-संस्कृतिरधोविधं वर्णिता—

तस्मादप्यद्येहाददानमश्रद्धधानमयजमानमाहुरासुरो बतेत्यसुराणां ह्येषोपनिषत्। प्रेतस्य शरीरं भिक्षया वसनेनालङ्कारेणेति संस्कुर्वन्ति। एतेन ह्यमुं लोकं जेष्यन्तो मन्यन्ते। ८.८.५

परवर्ति-भारतीय-साहित्येऽसुराणां प्रगल्भा चरितगाथा प्रवर्तते। प्रह्लादस्य नामासुरश्रेष्ठ्यां सर्वोपरि राजते।

दासो दस्यवो वा

भारतीय-समाजस्य प्रथमं स्वरूपं स्पष्टविवरणयुतं वैदिकसंहितासु दृश्यते। तदनुसारेण द्वौ वर्णौ—आर्यो दासश्चास्ताम्।[6] तौ सांस्कृतिकदृष्ट्या

१. ऋग्वेदे ८.९६.९

२. तथाहि—ते देवाः पराजिग्याना असुराणां वैश्यमुपायन्। तै० सं० २.३.७.१

३. इन्द्रः, अग्निः, सूर्यश्चासुरहेत्युपाधिना विशेषिताः। ऋ० ६.२२.४; ७.१३.१; १०.१७०,२।

४. ऋग्वेदे १०.१३८.३

५. इन्द्राविष्णूदृंहिताः शम्बरस्य नव पुरो नवतिं च श्नथिष्टम्।
शतं वर्चिनः सहस्रं च साकं हथो अप्रत्यसुरस्य वीरान्॥ ऋ० ७.९९.५

६. पाण्डुरङ्गवामनः परिणमति—In the times of the Ṛgveda there were two antagonistic camps of the Āryas and Dāsas or Dasyus, They differed in the colour of their skins and also in worship, speed and bodily appearance. Hist. of Dharmaśastra Vol. II, Pt. II Page 21.
प्रसङ्गेऽस्मिन् दासास्तु सर्वे आर्येतरा जना अथवा तेषां संघाः सन्ति।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दौ भिन्नौ जनसमुदायौ बभूवतुः। आदौ तयोः पृथक् पृथङ्निवेशा आसन्।[1] स्वीयं स्वार्थमभिनिविश्य तौ स्पर्धेते स्म। तद्यथा ऋग्वेदे वर्णितम्—

यो दासं वर्णमधरं गुहाकः। २.१२.४

दासा गुहावासिन आसन्। इमे दासा असुर्यवर्णा आर्याश्च दैव्यवर्णा इति वर्णितम्।[2] दासौ दस्युश्च पर्यायौ।[3] क्वचिदसुरोऽपि तयोः पर्यायः।[4]

दासानां संस्कृतिर्ऋग्वेदादीषदेव परिचीयते। अक्रतवः, ग्रथिनः (मृषावादिनः) मृध्रवाचः (परुषभाषिणः) पणयः, अश्रद्धाः अशिष्टाः, अयज्ञाश्च तेऽकर्माणः, अमन्तवः, अन्यव्रताः, अव्रताः, अमानुषा इति विशेषणैः परिलक्षिताः[5]। दासा मूलतो धनिका आसन्।[6]

ऋग्वेद-युगे बहवो दासास्तु सेवका बभूवुः। तदा आर्या अपि दासीकृताः।[7] आर्येषु आर्यवर्गीयाः सेवकाः शिल्पकारिणश्चासन्, ते शूद्रा इति प्रथितम्। एतेषु आर्यशूद्रेषु तेषां दासवर्गीयसेवकानामन्तर्भावः सञ्जातः। वैदिकसाहित्ये शूद्रान् प्रति दुर्भावना यत्र तत्र दृश्यते एव, किन्तु परमं सत्यमिदमेव यत् 'शूद्राः समाजस्याभिन्नाङ्गं सन्तस्तस्मिन् युगे समादृता आसन्। अस्यां स्थितावेवेदं सम्भावितमासीद् यत् पूषा अश्विनौ च शूद्रवर्गे प्रतिष्ठिताः।[8]

---

१. दासीः पुरः। ऋग्वेदे १.१०३.३

२. दैव्यो वर्णो ब्राह्मणः, असूर्यः शूद्रः। तै० ब्रा० ५.२.६
असुर्यं वर्णं नि रिणीते अस्यतम्।। ऋ० ९.७१.२
त्वचं कृष्णमरन्धयत्। ऋ० १.१३०.८
पञ्चाशत् कृष्णा नि वपः सहस्रा। ऋ० ४.१६.१३
घ्नन्तः कृष्णामप त्वचम्। ऋ० ९.४१.१

३. ऋग्वेदे १०.२२.८ मन्त्रे दासः दस्युश्च एकमेव शत्रुं बोधयतः।

४. शम्बरः ऋग्वेदे ६.३१.४ दस्युर्दासो वा कथितः। स एव ६.२६.५ मन्त्रे असुरः प्रोक्तः। ऋग्वेदे ८.३२.२ मन्त्रे दासः। तथैव वर्चिन्नपि दासोऽसुरः प्रोक्तः।

५. न्यक्रतून् ग्रथिनो मृध्रवाचः पणीरँश्रद्धाँ अवृधाँ अयज्ञान्। प्रप तान् दस्यून् इत्यादि ऋ० ७.६.३
अकर्मा दस्युरभि नो अमन्तुरन्यव्रतो अमानुषः। ऋ० १०.२२.८। अव्रता इति ऋ० ९.४१.२
अत्र व्रतं तु आचार-विधानमेव। तद्यथा तव व्रते निक्रिशन्ते जनासः। अथर्व० ४.२५.३

६. ऋग्वेदे १.३३.४ ७. यस्यायं विश्व आर्यो दासः। यजु० ३३.८२

८. बृहदारण्यके १.४.१३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ऋषीणां शत्रुभूता इन्द्रेण दमनीया[1] इमे दासाः सातिशयं समृद्धिशालिन आसन्। तेषां नेता वृत्र इन्द्रेण हतः। नैके दस्यव इन्द्रेण हताः। अत एव स दस्युहन्निति प्रतिष्ठितः।[2]

आर्यैर्युद्धे जिताः पुन निगृहीताश्च ये बहवो दासा विजेतॄणां भृत्या बभूवुः। दासप्रथाया इदं प्राचीनस्वरूपम्।

मूलतो दासाः समृद्धिशालिनो बलवन्तश्च बभूवुरिति वृत्रस्य तेषां नेतृत्वेन प्रमाणितमेव। अपरे दासप्रमुखा आसन् नमुचिः, शम्बरः, पिप्रुः, चुमुरिः, धुनिः, वर्चीत्यादयः। एतेषु कतिपयेऽसुरा इति संज्ञिताः। एतैः प्रकरणैः प्रतिभाति यदसुरा दासाश्च सम्मिश्रिताः प्राचीनकाले भारतीय-समाजे चिरं पृथक् सत्तां निर्वोढुं समर्था बभूवुः। दासोऽसुरश्च पर्यायभूतौ तयोर्मिश्रणं व्यङ्क्तः।[3]

परवर्तियुगे दस्युसमुदायानां सुसंस्कृतिः क्वचित् समुदितासीदिति महाभारतस्य शान्तिपर्वणि कापव्यनामकदस्योर्ग्रामणीभावेनाचारिक-मर्यादाविधानेन प्रकटितमेव।[4]

ये केचित् सांस्कृतिकसमुदाया आर्याणां वैरिभूतास्ते सर्वे प्रसङ्गवशादसुरा इति प्रोक्तम्, यतो हि नामासुरा देवानां वैरिणो बभूवुः। न केवलं दासा अपितु राक्षसा अपि असुरा इति रामायणमहाभारतानुसारेण प्रकटति।[5]

---

१. ऋग्वेदे १.१५८.५; १.१७५.३

2. Indra sent to sleep 30,000 Dāsas, bound a thousand Dasyus or won cowstalls from Dasyus for Dadhyaṇc and Mātariśvan. Vedic Mythology p. 157.

3. Varcin is called an Asura (Ṛg. VII. 99.5) but he and Śambara together are termed Dāsas. (Ṛg. VI. 47.21)

४. स्वानुयायिनां कृते तेन विहितमासीत्—
स्त्रीशिशवो न हन्तव्याः। गोब्राह्मणा रक्षणीयाः।
ये पुनर्धर्मशास्त्रेण वर्तेरन्निह दस्यवः।
अपि ते दस्यवो भूत्वा क्षिप्रं सिद्धिमवाप्नुयुः॥ शान्ति० १३३.१३,१४,२२।

५. रामायणेऽरण्यकाण्डे ४.३० अनुसारेणविराधोऽसुरः। अन्यत्र स राक्षसः। अरण्यकाण्डस्य ११ सर्गे वातापिरसुरः, रक्षः, निशाचर इति प्रोक्तम्। महाभारते आदिपर्वणि बकः राक्षसोऽसुर इति वर्णितम्। १४८.३,४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

राक्षसाः, यातुधानाः यातवो वा

आर्याणां याज्ञिकक्रियाकलापेषु[1] अन्येषूपक्रमेषु चोपद्रवकारिणो राक्षसाः स्वीयकापटिककूटव्यवहारेण पुरा भारते धर्मपरायणलोकानां देवानां च परमशत्रवो बभूवुः। ऋषयस्तेभ्य आत्मरक्षार्थं देवान् स्तुतिभिराह्वयन्। इन्द्रस्तेषां पराशरः।[2]

राक्षसानां स्वरूपवर्णने वैदिककवीनां काव्यकलनात्मकी प्रतिभा प्राभवत्ते कुक्कुरगृध्रोलूकादीनां रूपं धारयित्वा प्रावर्तन्त।[3] कस्या अपि स्त्रियः पतिभ्रातृ-कान्तादीनां रूपं धारयित्वा तस्याः सन्तर्तिं ते व्यनाशयन्। ऋषीणां तैः कृतो विघात आर्याणां जागरणं प्रेरयति स्म। यथा—

प्रति चक्ष्व वि चक्ष्वेन्द्रश्च सोम जागृतम्।
रक्षोभ्यो वधमस्यतमशनिं यातु मद्भ्यः॥ ऋ० ७.१०४.२५

पुरा पिशिताशना आसन् ते राक्षसाः।[4] अथर्ववेदे तेषां नर्तनमयी लोकोद्वेगकारिणी लीला वर्णिता।[5] तेषां निशि चरणं प्रज्ञातमेव।

ऋग्वेदानुसारेण राक्षसानां विशेषा आसन् तमोवृधः, अचितः, अत्रिणः (७.१०४.१) अघशंसाः, ब्रह्मद्विषः, क्रव्यादः, घोरचक्षसः किमीदिनः (७.१०४.२) दुष्कृतः, यातुधानाः अध्वरे रिपो दधिरे (७.१०४.१८),

१. गृभायत रक्षसः सं पिनष्टन्। ऋ० ७.१०४.१८। ये (राक्षसाः) वा रिपो दधिरे देवे अध्वरे। ऋ० ७.१०४.१८
The sacrifice is peculiarly exposed to their attack. They are haters of prayer (Rg. X. 182.3). Vedic Mythology p. 163.

२. मानो रक्षो अभिनट्। ऋ० ७.१०४.२३
इन्द्र जहि पुमांसं यातुधानमुत स्त्रियं मायया शाशदानम्।
विग्रीवासो मूरदेवा ऋदन्तु मा ते दृशन्त्सूर्यमुच्चरन्तम्। ऋ० ७.१२४.२४
इन्द्रो यातूनामभवत् पराशरो हविर्मथीनामभ्या विवासिताम्।
अभीदु शक्रः परशुर्यथा वनं पात्रेव भिन्दन्त्सत एति रक्षसः। ७.१०४.२१।

३. एत उ त्ये पतयन्ति श्वयातव इन्द्रे दिप्सन्ति दिप्सवोऽदाभ्यम्।
शिशीते शक्रः पिशुनेभ्यो वधं नूनं सृजदशनिं यातुमद्भ्यः॥ ऋ० ७.१०४.२०

४. ऋग्वेदे १०.८७.१६,१७। महाभारते आदि० १५१ तमेऽध्याये पुरुषादको राक्षसो वर्णितः।

५. अथर्व० ८.६.१०,११,१४।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पिशुनाः (७.१०४.२०), हविर्मथिनः, (७.१०४.२१), उलूकयातवः, शुशुलूकयातवः, श्वयातव, गृध्रयातवः (७.१०४.२२), मूरदेवा (७.१०४.२४) मायिनः (८.२३.१४)। राक्षसानां स्त्रियोऽधोविधं विशेषिताः —मायया शाशदानाः (७.१०४.२४)।

रामायणयुगे शक्तिधनैश्वर्यप्रमत्तानां रावणादिराक्षसानामनाचार ऋषीन् प्रति तेषां दुर्व्यवहारश्च विदित एव। एतदेव महाभारतेऽपि समर्थितमधोविधं ब्राह्मणगीतायाम्—

रक्षोभिर्वध्यमानेषु दृश्यद्रव्येषु कर्मसु।
आत्मस्थमात्मना तेन दृष्टमायतनं मया॥ आश्व० २०.९

गन्धर्वाः

विश्वावसुरिति नामको गन्धर्व ऋग्वेदे चर्चितः।[1] गन्धर्वाणां परिचयोऽधोविधमथर्ववेदे वर्तते—

जाया इद्वो अप्सरसो गन्धर्वाः पतयो यूयम्।
अप धावतामर्त्या मर्त्यान् मा सचध्वम्॥ ४.३७.१२

अनेन स्पष्टं प्रतिभाति यत् साधारणतस्ते मानवानां परिपन्थिन आसन्। तेषां व्यवहारे श्वान-वानरादीनां दर्शनं कविः करोति।[2] सौन्दर्येण ते स्त्रीणां पाशका बभूवुः।[3] ते गन्धर्वा अप्सरोभिः, किमीदिभिः, पिशाचैः, रक्षोभिश्च समीकृताः। एते सर्वे दूरतः प्रणम्या आसन् ऋषीणां कृते।[4]

क्वचिद राक्षस-पिशाचैरसदृशा गन्धर्वा देवानां रक्षकाः सन्ति।[5] ते सोमपायिनो भवन्ति। गन्धर्वाः सोमदेशीयाः प्रतिभान्ति। ते सुरभिवस्त्राणि धारयन्ति।

पिशाचाः

आर्याणां शत्रुभूताः पिशाचा न सन्ति प्रभूतशक्तिका योधना वा। इन्द्रो रक्षःपिशाच-विध्वंसक इति ऋग्वेदे चर्चितम्[6]। क्रव्यादाः सन्ति पिशाचा इत्यथर्ववेदे सूचितम्।[7]

---

१. ऋ० १०.१३९.१४ २. अथर्व० ४.३७.११

३. प्रियो दृश इव भूत्वा गन्धर्वः सचते स्त्रियः। ४.३७.११
अप्सरसो गन्धर्वाणां प्रणयिन्यः सन्ति। ऋग्वेदे १०.१२३.५

४. ये गन्धर्वा अप्सरसो ये चारायाः किमीदिनः।
पिशाचान्त्सर्वान् रक्षांसि तानस्मद् भूमे यावय॥ अथर्व० १२.१.५०

५. पाति देवानां जनिमान्यद्भुतः। ऋ० ९.८३.४

६. ऋ० १.१३३.५ ७. अथर्व० ५.२९.९; ५.२९.५; ८.२.१२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ऋषयः पिशाचानां प्रतिकारे समर्था बभूवुः, यथा चातननामक ऋषिर्वर्णयति—

तपनो अस्मि पिशाचानाम् ।
श्वानः सिंहमिव दृष्ट्वा ते (पिशाचाः) न विन्दते न्यञ्चनम् ।
न पिशाचैः सं शक्नोमि । न स्तेनैर्न वनर्गुभिः ।
पिशाचास्तस्मान्नश्यन्ति यमहं ग्राममाविशे । अथर्व० ४.३६.६-८

अत्र पिशाचास्तु स्तेनै राक्षसैर्यातुधानैश्च सह समीकृताः ।[1] ते चौरवत् गुप्तजीवनविधिमयापयन्त ।[2] नभस्युत्पतनस्य शक्तिस्तेषामासीत् ।[3] तान् पिशाचान् ऋषयः पराभवन् ।[4] ते गन्धर्वैरप्सरोभिः किमीदिभिः, समीकृताः ।[5]

वैदिकसंहितासु आर्यलोकानां विचारसरणिरिदंप्रथमतया परिदृश्यते । तत्राधोनिर्दिष्टतत्त्वानि सांस्कृतिकदृष्ट्या मूलभूतानि प्रतीयन्ते—

'यत्किञ्च जगत्यां जगत्' तत्र प्राकृतिकं दिव्यं च परस्परोपकारभावं सर्वत्र, सर्वदा सर्वथा पश्यन्त आर्यधुरीणा तदादर्शीकृत्यात्मानं परितः सर्वविधप्रयत्नैः शान्तिसौरभं माधुर्यं च प्रकामं प्रतिष्ठापयितुं प्राक्रमन्त ।[6] वनेषु परमरमणीया प्राकृतिकविभूतिरेतस्य परं निदर्शनं प्रस्तावयति । तत्र लतावृक्ष-वनस्पतयः शशक-मृग-मतङ्गजाः पिकशुकमयूराः, निर्झर-नद-सरोवराः, तुहिन-सीकर-हिमसंहतय इत्यादयो मिश्रभावेन चराचरं विलोभयन्ति परिपावयन्ति च । इतोऽपि लोकसंस्कार-दृष्ट्या विशेष-माहात्म्यमापन्नाः सन्ति अग्निः, वायुः, आपः, पृथ्वी, द्यौः, सूर्यः चन्द्रः, उषाः, रात्रिरित्यादयः । एते वैभवसमृद्ध्या, वदान्यतया, ज्ञान-विज्ञान-सम्पत्त्या च प्रभुत्वशालिनः स्वस्वविशेषैर्लोकं स्वानुरूपादर्शान् प्रति समाकर्षन्ति । एतेभ्योऽपि विशेषगुणापन्ना देवाः सन्ति इन्द्रः, वरुणः, सविता, अश्विनौ, रुद्रः, सोमश्च । सर्वे नो मधु भवन्तु ।[7] देवाः परस्परं मैत्रीभावेन सहचरन्ति ।[8]

समाज-रचनात्मिकी मनीषा

आर्यमनीषा राष्ट्रनिर्माणाय भारतीयसमाजरचनासौष्ठवं सहजभावेन

---

१. अथर्व ४.२०.६; ८.२.१२
२. अथर्व ४.२०.७
३. अथर्व ४.२०.९
४. अथर्व ४.३६.६; ४.३७.१०
५. अथर्व १२.१.५०
६–७. ऋग्वेद १.९०.५ ।
८. Vedic Mythology देव

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

संस्कुरुत इति ऋषीणां पदे-पदे संज्ञानपरकहृदयोद्गारेण प्रतीयते ।[1] तस्य प्रथम-प्रतिफलनं तेषां सहास्तित्वाभिलाषेण परेष्वात्मदर्शनेन च भवति। अनेनापरेषामपि सुखशान्तिवैभवाभ्युदयैरात्मनः परितोषो जायेत । तथाहि—

त्वं ह्यग्ने अग्निना विप्रो विप्रेण सन्त्सता सखा सख्या समिध्यसे ।
ऋ० ८.४३.१४

अथर्ववेदे साम्मनस्यमिति सूक्तमधोविधं विलसति ।

सं जानीध्वं सं वो मनांसि जानताम् ।
समानं चेतो अभि सं विशध्वम् ।
समानी व आकूतीः समाना हृदयानि वः ।
समानमस्तु वो मनो यथा वः सुसहासति ॥ ६.६४

ऋग्वेदस्य संज्ञान-देवताविषयकं १०.९१ सूक्तमधिकांशत उद्धृतमथर्ववेदीये पूर्वोक्ते सूक्ते । प्रागेव विशदं प्रतिपादितोऽयं विषयोऽथर्वदे ३.८ सूक्ते ।

अथर्ववेदेऽथर्वा भृगुं प्रार्थयते—प्र नृभिनृवन्तः स्याम । ३.१६.३

अर्थाद् बहुजनसमुदायो मां परितः शोभेत । लोकसंवर्धनदिशा ऋषिभिः प्रकृतौ दृष्टः सहयोगः समाजे परस्परोपस्क्रियां वर्धयति । तथाहि—
वर्षस्य सर्गा महयन्तु भूमिं पृथग्जायन्तां वीरुधो विश्वरूपाः । अथर्व० ४.१५.३

समानमूलमस्ति सर्वेषामिति धारणा पृथग्भूतेष्वपि जातियोनिगणादिषु परस्परं समभाव ऋग्वेदस्य पुरुषसूक्तेन (१०.१२१) प्रकटति ।[2] तत्र पुरुषसूक्ते ब्राह्मणादीनां चतुर्वणानां पुरुषस्य मुखादिचतुर्भागेभ्य उत्पत्तिर्वर्णिता । यथा नः सर्व इज्जनोऽनमीवः संगमे सुमना असत्' इति ।

यजुर्वेदे ब्रह्मकल्पनया परावरविभेदाः सम्यगपास्ताः दृश्यन्ते । आत्मरूपमेव यत्किञ्चजगत्यां सर्वमिति शाश्वतशिक्षा । ३२.१–१६

पृथ्वी लोके न केवलं मानवादीनामपितु सर्वेषां चराचराणामपि माता

---

१. अथर्ववेदे ३.८.१ मन्त्रेऽथर्वा कथयति—
अस्मभ्यं बृहद्वाष्ट्रं संवेश्यं दधातु ।
वेदेऽस्मिन्नरिभिरपि संज्ञानमनुमतमधोविधम्—
संज्ञानं नः स्वेभिः संज्ञानमरणेभिः ।
संज्ञानमश्विना युवामिहास्मासु नि यच्छतम् ॥ ७.५२.१

२. पुरुष एवेदं सर्वं यद् भूतं यच्च भव्यम् । ऋ० १०.९०.२
अर्थात् पुरुषश्चराचराणां पितृरूपेण तेषां भ्रातृभावं प्रकटयति ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अस्ति ।[1] अनेनापि सर्वेषां परस्परभ्रातृभावः संकलनीयः ।

पापीयसीं 'महतीं श्रियमवाप्तुं कश्चिद् वर्गोऽन्यवर्गस्य स्वमधिकर्तुं यदा यतते, तदा समाजे परस्परविरोधो जायते इति सन्धार्य कतिपयवैदिकर्षयो कुलक्ष्म्याः पतनकारिणीं प्रवृत्तिं सम्बोधयन्ति—

या मा लक्ष्मीः पतयालूरजुष्टामभिचस्कन्द वन्दनेव वृक्षम् ।
अन्यत्रास्मत् सवितस्तामितो धा हिरण्यहस्तो वसु नो रराणः ॥
एकशतं लक्ष्म्यो मर्त्यस्य साकं तन्वा, जनुषोऽधि जाताः ।
तासां पापिष्ठा निरितः प्र हिण्मः शिवा अस्मभ्यं जातवेदो नि यच्छ ।
अथर्व० ७.११५.२, ३ ।

रमन्तां पुण्या लक्ष्मीर्या पापीस्ता अनीनशम् । ७.७५.४

परस्परमैत्रीभावस्य समुदयोऽधोविधं विकसितः —

दृते दृंह मा मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम्
मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे ।
मित्रस्य चक्षुषा समीक्षामहे । यजु० ३६.१८
यांश्च पश्यामि यांश्च न तेषु मा सुमतिं कृधि ॥ अथर्व० १७.१.७

सर्वप्रियत्वमासीदभीष्टमृषीणामिति ब्रह्मा नामक ऋषिरुदाहरति—

प्रियं मा कृणु देवेषु प्रियं राजसु मा कृणु ।
प्रियं सर्वस्य पश्यत उत शूद्र उतार्ये ॥

---

१. ऋग्वेदे 'माता पृथिवी महीयम्' इति १.११२.६
अथर्ववेदस्य पृथिवीसूक्ते (१२.१)

सा नो भूमिर्विसृजतां माता पुत्राय मे पयः ।
माता भूमिः पुत्रोऽहं पृथिव्याः ।
त्वज्जातास्त्वयि चरन्ति मर्त्याः ।
विश्वस्वं मातरमोषधीनां ध्रुवां भूमिं पृथिवीं धर्मणा धृताम् ।
भूमे मातर्निधेहि मा भद्रया सुप्रतिष्ठितम् ।
त्वयीदं सर्वं जायतां यद् भूतं यच्च भव्यम् । अथर्व० १२.१.५४

जनं बिभ्रती बहुधा विवाचसं नानाधर्माणं पृथिवी यथौकसम् । अथर्व० १२.१.४५
अन्यत्रापि—तन्माता पृथिवी । तै० ब्रा० ३.८.९.१; २.७.१६.३ । इयं वै देवी अदिति-र्विश्वरूपी । तै० ब्रा० १.७.६.७ । इयं वै सत्या चर्षणीधृत् । ऐ० ब्रा० ३.१८ । इयं वा इदमन्नाद्यमुपयच्छति पशुभ्यः, मनुष्येभ्यः, वनस्पतिभ्यः । शत० ब्रा० ४.१.२.८ । इयं वै प्रतिष्ठा जनूरासां प्रजानाम् । शत० ब्रा० ३.९.३.२ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तथैव विश्वामित्र ऋभूणां मनसा बन्धुतां प्रदर्शयति ।[1] इयं बन्धुता उपासकस्य तस्य प्रियकर्मभिः प्रीतस्योपास्यस्य च मध्ये जायते ।

'विश्वं पुष्टं ग्रामेऽस्मिन्ननातुरम्' ।

अर्थान्न केवलं स्वीयमपितु समग्रग्रामस्य कल्याणमन्वीक्षितं जनैः । अथ च

नाकस्य पृष्ठे अधितिष्ठति श्रितो यः पृणाति । ऋ० १.१२५.५

अर्थादाश्रितो जनः सम्मोदनीयः ।

आ नो इलाभिर्विदथे सुशास्ति विश्वानरः सविता देव एतु ।
अपि यथा युवानो मत्सथा नो विश्वं जगदभिपित्वे मनीषा ।।
ऋ० १.१८६.१

अत्र सर्वे सुखिनो भवन्त्वित्यभिप्रेतम् । अथ च यजुर्वेदे—

मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे । ३६.१८
मा गृधः कस्य स्विद् धनम् । ४०.१
ये समानाः समनसो जीवा जीवेषु मामकाः ।
तेषां श्रीर्मयि कल्पतामस्मिल्लोके शतं समाः ।। १९.४६
रुचं नो धेहि ब्राह्मणेषु रुचं राजसु नस्कृधि ।
रुचं विश्वेषु शूद्रेषु मयि धेहि रुचा रुचम् ।। १८.४८

ऋग्वेदे सुजातानामग्निसविधे समासनं सस्पृहं वर्णितमधोविधम्—

यत्रा नरः समासते सुजाताः । ७.१.४

अथर्ववेदे साम्मनस्यं सम्यक्तमं प्रतिपादितम्[2] । यथा

सहृदयं साम्मनस्यमविद्वेषं कृष्णोमि वः ।
अन्योऽन्यमभि हर्यत वत्सं जातमिवाघ्न्याः ।। ३.३०.१
अनुव्रतः पितुः पुत्रो मात्रा भवतु संमनाः ।
जाया पत्ये मधुमतीं वाचं वदतु शन्तिवाम् ।। ३.३०.२
मा भ्राता भ्रातरं द्विक्षन् मा स्वसारमुत स्वसा ।
सम्यञ्चः सव्रता भूत्वा वाचं वदत भद्रया ।। ३.३०.३
तत् कृण्मो ब्रह्म वो गृहे संज्ञानं पुरुषेभ्यः ।। ३.३०.४

---

१. इहेह वो मनसा बन्धुता नर इत्यादि ऋ० ३.६०.१ ।

२. सं वः पृच्यन्तां तन्वः सं मनांसि समु व्रता ।
सं यो यं ब्रह्मणस्पतिर्भगः सं वो अजीगमत् ।।
संज्ञपनं वो मनसो थो संज्ञपनं हृदः ।
अथो भगस्य यच्छ्रान्तं तेन संज्ञपयामि वः ।।
इमान् जनान्त्संमनस्कृधीह ।। ६.७४.१–३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्योऽन्यस्मै वल्गु वदन्त एव सध्रीचीनान् वः संमनसः कृणोमि ।
समानी प्रपा सह वोऽन्नभागः समाने योक्त्रे सह वो युनज्मि ।
सायं प्रातः सौमनसो वो अस्तु ।। ३.३०.७
शतहस्त समाहर सहस्रहस्त सं किर । ३.२४.५
स्वस्ति जगते पुरुषेभ्यः विश्वं सुभूतम् । १.३१.४
प्रियं मा दर्भं कृणु ब्रह्म राजन्याभ्यां शूद्राय चार्याय च ।

अत्र सर्वप्रियत्वमभीष्टमिति निर्दिष्टम् ।

विश्वकल्याणम्

'सर्वे सुखिनः सन्तु' इति ऋषीणां शाश्वताकांक्षावर्धत । तथाहि—

अपि यथा युवानो मत्सथा नो विश्वं जगदभिषित्वे मनीषा । ऋ० १.१४६.१

अत्र विश्वे देवा विश्वस्य मानवस्य कल्याणं विधातुं प्रार्थिताः । विश्वात्मकता सम्यक् प्रतिसंहितासीत्तेषां समाजसंरचना-प्रकल्पने । तद्यथा

अदितिर्माता स पिता स पुत्रः ।
विश्वे देवा अदितिः पञ्चजना अदितिः ।
जातमदितिर्जनित्वम् । अथर्व० ७.७.१
प्रजापतिर्जनयति प्रजाः ।[1]

एतादृशी सर्वसन्धा सुमतिरन्यत्रापि सुव्यक्ता दृश्यते वैदिकसंहितासु । तथाहि

वैश्वानरो ज्योतिर्भूयासम् । यजु० २०.२३
यो भूतानामधिपतिर्यस्मिंल्लोका अधिश्रिता,
य ईशे महतो महाँस्तेन गृह्णामि त्वामहम् ।
मयि गृह्णामि त्वामहम् । ।। यजु० २०.३२

अनेन परापरभावना मृगमरीचिकेवापास्ता ।

न खलु केनचिदेकेनैव सद्वस्तुनो ग्रहणं योग्यमपितु सर्वेषां कृते तस्य संविभागः साधुरिति ।[2]

---

१. अदितेः प्रजापतेश्च जनकत्वेन सर्वेषां लोकानां भ्रातृत्वं सिद्ध्यति । अयं भावो मन्त्रस्योत्तरार्धे प्रस्फोटितः—संजानानाः संमनसः सयोनयो मयि पुष्टं पुष्टपतिर्दधातु । ७.२०.१

२. यजु० २६.२ । अत्र मनुष्यलोकाय, सर्वेभ्यो लोकेभ्यः कल्याणभावना ऋषिमानसे वभूवेति यजु० ३०.१२ मन्त्रे द्रष्टव्यम् । यजु० ३०.१७ मन्त्रे विश्वेभ्यो भूतेभ्यः इति संदर्शितम् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथर्ववेदस्य पृथ्वीसूक्ते 'पृथिवी यथौकस'[1] मित्यनेन विश्वस्मिन् सर्वान् प्रति कुटुम्बिभावना जागर्ति। अयं भावः स्निग्धतमं गृहीतो यजुर्वेदेऽधोवचनेषु—

वेनस्तत्पश्यन्निहितं गुहा सद्यत्र विश्वं भवत्येकनीडम्।
तस्मिन्निदं सं च वि चैति सर्वं स ओतः प्रोतश्च विभूः प्रजासु। ३२.८

अपरं च सन्दिष्टम्—

राष्ट्रेण वर्धताम्। अथर्व० ६.७८.२

अर्थाद् राष्ट्रेण पुरुषस्यैकात्म्यं भवतु।

अतः परमपि तैर्विश्वात्मकता प्रकल्पितासीत्। यथा

भूमिर्मातादितिर्नो जनित्रं भ्रातान्तरिक्षमभिशस्त्या नः। द्यौर्नः पिता। अथर्व० ६.१२०.२

अत्र लोकानां परस्पर-सम्बन्धिभावः परमुत्तालितः। अनेन परात्परं समुपैति मानवः।

ऋषीणां भावगम्यमासीद् देवानां परस्परैक्यम्। उच्चावचा विविधप्रवृत्तिधारिणोऽपि देवा एकीभूय स्ववर्गस्याभ्युदय-सम्पादने निष्णाताः सन्ति। वयमपि तथैव भूयास्मेति स्वभाविकः प्रतिभाति ऋषीणां संकल्पः।[2]

---

१. मन्त्रोऽयमधोविधं विलसति—

जनं बिभ्रती बहुधा विवाचसं नाना धर्माणं पृथिवी यथौकसम्।
सहस्रं धारा द्रविणस्य मे दुहां ध्रुवेव धेनुरनपस्फुरन्ती॥

यवनोऽलक्षेन्द्रोऽपि विश्वमानवतामेकीकर्तुमियेष। तद्यथा केम्बिज-हिस्ट्री आव इण्डिया प्रथमभागे—

Alexander had come to feel himself, one gathers, a man raised above distinctions of race, an emperor of the world, beneath whom all mankind was to be levelled and made one. Page 359.

अलक्षेन्द्रो विश्व-साम्राज्यस्य भौराज्यमैच्छत्, शस्त्रबलेन न तु धर्मबलेन यथाशोकः प्रायः समकालिकः प्रावर्तत। तत्रैव पृष्ठं ३६८।

२. देवानां समाजरचनात्मकविचारा मानवैरात्मसात्करणीया इति प्रचरन्ति वैदिकसंहितासु। तथाहि—

(क) विष्णुर्दाधार विश्वानि भुवनानि।

(ख) ओमासश्चर्षणीधृतः। यजु० ३३.४७।

(ग) यत्र ब्रह्म च क्षत्रं च सम्यञ्चौ चरतः सह।
तं लोकं पुण्यं प्रज्ञेयं यत्र देवाः सहाग्निना॥ यजु० २०.२५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ऋषीणां लोकावर्जका आत्मगुणाः समुदिता आसन् । तथाहि—

सत्येनोत्तभिता भूमिः । ऋ० १०.८५.१
वाचः सत्यमशीय । यजु० ३९.३
सत्यं तातान सूर्यः । ऋ० १.१०५.१२
न ऋते श्रान्तस्य सख्याय देवाः । ऋ० ४.३३.१२
निन्दितारो निन्द्यासो भवन्तु । ऋ० ५.२.६।
नमो दाधार पृथिवीमुत द्याम् । ऋ० ६.५१.८
अस्ति रत्नमनागसः । ऋ० ८.६७.७
केवलाघो भवति केवलादी । ऋ० १०.११७.६
भूत्यै जागरणम् । यजु० ३०.१७
विश्वं जगदभिषित्वे मनीषा । ऋ० १.१८६.१
स्वस्ति जगते पुरुषेभ्यः । विश्वं सुभूतम् । अथर्व १.३१.४
रमन्तां पुण्या लक्ष्मीर्या पापीस्ता अनीनशम् । अथर्व० ७.७५.४

सर्वेषां प्रियो भवेदिति अथर्ववेदे—

प्रियं मा दर्भ कृणु ब्रह्मराजन्याभ्यां शूद्राय चार्याय च ।
यस्मै च कामयामहे सर्वस्मै च विपश्यते ॥ १९.३२.८
प्रियं मा कृणु देवेषु प्रियं राजसु मा कृणु ।
प्रियं सर्वस्य पश्यत उत शूद्र उतार्ये ॥ १९.६२.१

प्रत्युपकारस्तु अवश्यमेव करणीय इति महाभारतस्योपदेशोऽधोविधः —

एतावान् पुरुषस्तात कृतं यस्मिन् न नश्यति ।
यावच्च कुर्यादन्योऽस्य कुर्यादभ्यधिकं ततः ॥ आदि० १५६.१४

उच्चतरकर्मनिष्पादनेन कस्यचिदुच्चतरं स्थानं सम्मतमासीत् । ऋभवः स्वीयेन कर्मदाक्ष्येण देवत्वं प्रापिता इति ऋग्वेदेऽधोविधं वर्णितम्—

अभजन्त सुकृत्यया । भागं देवेषु यज्ञियम् । ऋ० १.२०.८

अन्यच्च जनानां सदयरक्षकाणां जीवन-सौष्ठवं प्रभवतीति ऋग्वेदे—

प्र ये ययुरवृकासो रथा इव नृपातारो जनानाम् ।
उत स्वेन शवसा शूशुवुर्नर उत क्षियन्ति सुक्षितिम् ॥ ७.७४.६

ऋग्वैदिकमनीषिणां चराचरस्य विश्वस्य कल्याणं समीहितमासीत् । यथा—

स नः पवस्व शं गवे शं जनाय शमर्वते शं राजन्नोषधीभ्यः । ९.११.३

यजुर्वेदानुसारेण ऋषिश्चतुर्दिशं सर्वेषु चराचरेषु मधुमत्त्वमैच्छत् ।[1] स प्रार्थयते—

---

१. यजु० १३.२७.२९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

एधोऽस्येधिषीमहि समिदसि तेजोऽसि तेजो मयि धेहि ।
समाववर्ति पृथिवी समुषाः समु सूर्यः । समु विश्वमिदं जगत् ।
वैश्वानर-ज्योतिर्भूयासं विभून् कामान् व्यश्नवै भूः स्वाहा । २०.२३

ऋषयो महामहिम्नां कर्मण्यौदात्त्येनोच्छ्राय-व्युत्पन्ननां गौरवमाधातुमिव तेषां कृत उपाधिविशेषेण सम्मानं प्रादर्शयन् । तथाहि—ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणाम्' इत्यादि । ऋग्वेद० ९.९६.६ । अत्र ब्रह्मा, पदवीः, ऋषिरित्युपाधयः पूर्वतरसमुदायेऽभिनवविशिष्टसमुदायस्य प्रकल्पनं द्योतयन्ति । अर्थात् देवेषु कतिपये ब्रह्माणः (ब्राह्मणाः) कविषु पदवीः, विप्रेषु ऋषय ईषत्पृथग्जाताः । पृथग्भूता अपि कालान्तरेण तेषां परस्परं विलयोऽभवत् । यथा विप्राणां ऋषीणां च विलयो विदित एव ।

अपरवर्गीय-देवादीनां स्वीकरणम्

तत्र क्वचिद् व्रात्याः शिवोपासका आर्यैः सत्कृता एव तैः सहैकीभूताः । व्रात्यस्तौमैस्तेषां स्वीकरणं व्यधीयत । पौराणिकशिव एतेषां व्रात्यानां वैदिकरुद्रस्य प्रतिनिधेरेव समाम्नातः ।

ये विव्रता आसन् तैः सह साम्मनस्यं सर्जनीयमित्यभिलक्षितं मनीषिभिः ।[1]

भिक्षुकोऽपि भरणीयः

न खलु देवैः कृतं दुर्भिक्षमपितु मानवकृतमेतदिति वैदिकमनीषिणः प्रचोदयन्ति ।[2] औदार्येण समृद्धिशालिनो भिक्षुकान् सम्भरन्त्विति कविना निर्दिष्टम्—

स इद् भोजो यो गृहवे ददात्यन्नकामाय चरते कृशाय ।
अरमस्मै भवति यामहूता उतापरीषु कृणुते सखायम् ।। ऋ १०.११७.३

समाज-सौष्ठवं विधातुं सम्यग्विचारणया मनीषिणो धनिकान् प्रबोधयन्ति दूरदृष्ट्यापि यत्ते दरिद्रान् भरन्तु । नेदं धनं कमपि शश्वतं समाश्रयते[3] । किं वा—केवलाघो भवति केवलादी । ऋ० १०.११७.६

संघीभावः

उद्बुध्यध्वं समनसः सखायः । समग्निमिन्ध्वं बहवः सनीडाः ।। ऋ० १०.१०१.१

---

१. अथर्ववेदे ६.९४.१

२. न वा उ देवाः क्षुधमिद् वधं ददुः । ऋ० १०.११७.१

३. पृणीयादिन्नाधमानाय तव्यान् द्राघीयांसमनु पश्येत पन्थाम् ।
ओ हि वर्तन्ते रथ्येव चक्राऽन्यमन्यमुप तिष्ठन्त रायः ।। ऋ० १०.११७.५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अश्मन्वती रीयते सं रमध्वमुत्तिष्ठत प्रतरता सखायः ।
अत्राजहीत ये असन् दुरेवा अनमीवानुत्तरेमाभिवाजान् ॥
ऋ० १०.५३.८; अथर्व० १२.२.२६

मानवोचितस्वातन्त्र्यं जीवनस्य परमं सुखं मन्यमाना वैदिकर्षयोऽगायन्—
'माकिर्नो अघशंस ईशत' । ऋ० ६.७५.१०

अर्थात् ते महर्षयो दुर्वृत्तानां शासनमपाकर्त्तुं सहशक्तिं प्रायोजयन् । अन्यच्च—
सहस्रवल्शा वयं रुहेम[1] । ऋ० ३.८.११

स्वजनैः सह प्रसङ्गो विभाति ऋषीणाम् । यथा—
'अयुतोऽहमयुतो म आत्मा' इत्यादि । अथर्व० १८.५१.१

अथर्ववेदे प्राचेतसोऽङ्गिराः प्रवक्ति—
आयुष्मन्तः सहभक्षाः स्याम । ६.४७.१

अर्थाद् बहवो जना एकत्र सह भोजनमायोजयन्तु ।

यजुर्वेदेऽपि—सग्धिश्च मे सपीतिश्च मे ।१८.९ तदर्थमभिव्यनक्ति ।

अपरं च—उन्नयामि स्वानहम् । यजुर्वेद ११.८२

ऋग्वेदे संघीभावः प्रचुरायते । तत्र वसिष्ठः प्रणयति—
समान ऊर्वे अधि संगतासः सं जानाते न यतन्ते मिथस्ते ।
ते देवानां न मिनन्ति व्रतान्यमर्धन्तो वसुभिर्यादमानाः ॥ ७.७६.५

तदादर्शः संघीभावस्याधोविधं प्रकटितः—
त्वमग्ने अग्निना विप्रो विप्रेण सन्त्सता ।
सखा सख्या समिध्यसे । ऋग्वेदे ८.४३.१४
विशो न युक्ता उषसो यतन्ते । ऋ० ७.७९.२

नैकदेवाः सर्वेषां मानवानां मातापितर इति प्रकल्पितम् । ऋग्वेदेऽग्निस्तु-
'पिता माता सदमिन्मानुषाणाम्' ६.१.५

अथर्ववेदे (३.८.५) एकस्य गोः समाश्रयेण सर्वेषां तदानीन्तनलोकानां साम्यभावना सांधिकादर्शपरिव्याप्ता नैकविधं विभाति । यथा—गोर्विश्वरूपे तत्र सन्ति प्रजापतिः, इन्द्रः, बृहस्पतिः, ब्राह्मणाः, क्षत्रियाः गन्धर्वाः, देवजनाः, मनुष्याः, राक्षसाः, इतरजना इत्यादि । एतद्वै विश्वरूपं सर्वरूपं गोरूपम् । ९.७

अथर्ववेदे ऋषिरथर्वा राष्ट्रेण वर्धतामिति आशीर्वदति कस्यचित् पुरुषस्य

---

१. अर्थादेकस्मान्मूलाद्यथा सहस्रं शाखाः विकसन्ति, तथैव बहूनां मानवानामृषीणां चैकमेव मूलम् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सौभगाय[1]। ये लोका परमतानुयायिनो बभूवुस्तानपि सम्मनस्कान् कर्तुं तेऽकामयन्।[2] समाजे प्रेष्ठं स्थानं मे भवत्विति अथर्वा हृदयोद्गारं प्रकटयति—

सजातानां मध्यमेष्ठा यथासानि ॥ अथर्व० ३.८.२

सजातस्य सजात्यस्यसनाभेश्च संभावना

सजाता[3] इति सहजन्मानः कस्यचिदेकस्य पुरुषस्य नैक सन्ततयो भवन्ति। अयमभिधार्थः शनैः शनैरेकवंशीयजनानां समुदायस्यार्थे प्रायुज्यत। कालान्तरे सजातः सहव्यवसायिनामर्थेऽपि प्रायुज्यत। मैकडानलमहोदयानुसारेण सजातपदेन जातिशब्दस्याभिव्यक्तिर्न भवति।[4] किन्तु यथास्माभिः प्रतीयते शब्देऽस्मिन् परवर्तिजाति संस्थाया बीजं वर्तत एव। एतदन्वभावयन्नथर्ववेदेऽधोविधप्रयोगाः सजातस्यार्थं संकेतयन्ति—

(१) सजातानां मध्यमेष्ठा। २.६.४
(२) इमं सजाता अभिसंविशध्वम्। ३.३.४
(३) सजातो यश्च निष्टयः। ३.३.६
(४) सजातानां मध्यमेष्ठा यथासानि। ३.८.२
(५) सजातानां वशी असत्। ६.५.२
(६) सजातांस्ते बलिहृतः कृणोतु। ११.१.६

सजात्य-शब्दस्य प्रयोगो यजुर्वेदे जातेरभिव्यक्तिं करोति। तद्यथा—न एषां सजात्यानामधि आ इत। ३३.४७। ऋग्वेदे सनाभिशब्दोऽपि तत्समो विद्यते। तथाहि—

यो न इन्द्राभिदासति सनाभिर्यश्च निष्टयः। १०.१३३.५

अत्र सनाभिः सजातस्य पर्यायः।

देवादर्शन लोकोपकार-भावना

देवा मनुष्यशरीरे विराजन्ते—सूर्यश्चक्षुः, वायुः प्राणः, अन्तरिक्षमात्मा, पृथिवी शरीरम्[5]। यथा लोकाय प्रकाशं, प्राणं, शरीरं च दातुं सूर्यादयो

---

१. अथर्व० ६.७८.२। बृहद्राष्ट्रं संवेश्यं दधातु। अथर्व० ३.८.१

२. अमी ये विव्रता स्थन तान् वः सं नमयामसि। अथर्व० ६.९४.१; ३.८.५।

३. ऋग्वेदे १.१०९.१

४. Sajāta (born together). The word must clearly mean a relative and then more widely a man of the same position or rank. But there is no clear reference to caste as in the later Sajāti (man of the same caste). Vedic Index p. 418.

५. अथर्ववेदे ब्रह्मर्षिः कथयति—
सूर्यो मे चक्षुर्वातः प्राणोऽन्तरिक्षमात्मा पृथिवी शरीरम्। ५.९.७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विभवन्ति तथा ऋषिरात्मनश्चक्षुः प्राणमात्मानं शरीरं च लोकहिताय ज्ञान-प्राणादि-प्रदानेनोपयुञ्जीत ।

अन्यच्च पृथिवी जगद् धारयति ।[1] तां मातरं मन्यमाना जना जगतो धारणं यथा स्यात्तथा विधातुं यतेरन् ।

वैदिकयुगे आर्यस्तु यज्ञकारिणः पर्याय आसीत् ।[2] अयज्ञा आर्येतरा अभवन् । आर्येतरेषु ये जना यज्ञविधानमुरीकृतवन्तः, तेऽप्यार्या बभूवुः ।[3]

सुदूरप्राचीनकालेऽपि आर्याणामार्येतरैर्भारतीयैर्विदेशेभ्यो देशेऽस्मिन्नागतैश्च लोकैः सह सौम्यव्यवहारः सदाशयव्युत्पन्न आसीदि[4]तीतिहासोपचितं सत्यम् ।

---

१. यथेयं पृथिवी मही दाधार विष्ठितं जगत् । अथर्व० ६.१७.४

2. आर्यो यजमानः श्रेष्ठ इति ऋग्वेदे १.१३०.८ । इन्द्रः समत्सु यजमानमार्यं प्रावत् ।

3. But the Aryans were not non-proselytisers. Many members of the non-Aryan tribes or raees espoused the Manu cult and were merged into the Aryan race. Some Aspects of Ancient Indian Culture p. 9. इन्द्रस्यार्यीकरणं विदितम् । अथर्व० २०.३६.१०

४. योरपीया अमेरिकास्ट्रेलियाफ्रीकामहाद्वीपेषु, गतास्तत्रत्यानामादिवासिनां सहरणाय तान् मारयन्ति पीडयन्ति चेति हृदयविदारिणी गाथा । प्रमाणस्वरूपमधोलिखिता वार्ता प्रस्तूयते—Geneva, Feb. 9 (Reuter)—An American Indian (Amerindian) spokesman yesterday accused the United States before the United Nations Human Rights Commission of genocide, sterilising Amerindian women and deprlving the Amerindians in the US of their land at the rate of 45000 acres (18,000 hectares) a year.

Mr I. M. Durham of the International Indian Treaty Council said 'the US Government was guilty of genocide under a UN convention–which Washington had not signed—through a systematic policy of child stealing'.

Some 25 to 30 per cent of Amerindian children were rcmoved from their homes and placed with non Amerindians to be brought up, a practice condemned as genocide under the UN convention, Mr Durham said.

The US Government had, over the past five years, sterilised at least 30 per cent of Amerindian women, he told the 32 State Commission. Publlshed in Hindustan Times. dated Fcb. 10, 1978

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तेषु आर्येतरेषु ये केचिच्चातुर्वर्ण्यव्यवस्थायां यथायोग्यं स्थानमवाप्तुमैच्छन् ते निर्बाधं समीकृताः । तद्यथा महाभारते निगदितम्—

दृश्यन्ते मानुषे लोके सर्ववर्णेषु दस्यवः ।
लिङ्गान्तरे वर्तमाना आश्रमेषु चतुर्ष्वपि ।। शान्तिपर्वणि ६५.२३

अपरं च दस्यूनामपि सांस्कृतिकजीवनस्य योजनार्यमनीषिभिरुपस्कृता । तथाहि महाभारते—

मातापित्रोर्हि कर्तव्या शुश्रूषा सर्वदस्युभिः ।
आचार्यगुरुशुश्रूषा तथैवाश्रमवासिनाम् ।।
वेदधर्मक्रियाश्चैव तेषां धर्मो विधीयते ।
पितृयज्ञास्तथा कूपाः प्रपाश्च शयनानि च ।।
दानानि च यथाकालं द्विजेषु दद्युरेव ते ।।
अहिंसा सत्यमक्रोधो वृत्तिदायानुपालनम् ।
भरणं पुत्रदाराणां शौचमद्रोह एव च ।।
पाकयज्ञा महार्हाश्च कर्तव्याः सर्वदस्युभिः ।।

शान्तिपर्वणि ६५.१७-२१

वदेशिकानामात्मसात्करणम्

आर्येतराणमार्यीकरणार्थं बहुविधप्रयासाः सौम्यतया सफलीकृताः ।[1] एवमेव विदेशतो भारते समागतानां यवन-शक-पल्लवादीनामपि आर्यीकरणं समभवत् ।[2]

न केवलं भारतीया आर्येतरा अपितु वैदेशिका अपि भारत आगता आर्यसंस्कृतौ दीक्षिता बभूवुः । अधुनापि ग्रीकराजदूतस्य हेलिओदोरमहाभागस्य विदिशासमीपं गरुडस्तम्भस्तस्योत्कीर्णलेखश्च विद्यते । तस्य राजदूतस्योपाधिना भागवतपदेन स्पष्टं भवति यद् वैष्णवसम्प्रदायस्य द्वारं विदेशिजनेभ्योऽप्यनावृतमासीत् । परवर्तियुगे ये केचिद् गुर्जर-मग-शकाभीर-कुशन-हूणादयो जना विदेशतो भारतमागत्य निवसन्ति स्म ते सर्वेपि शनैः शनैरार्यसंस्कृतौ दीक्षिता आसन् ।

खीष्टस्य पश्चाच्चतुर्थशतके बहवो वैदेशिकजातयः—गूर्जर-चाहमान-मैत्रकादय आगताः । ताः सर्वाः शनैः शनैः भारतीयार्यसमाजे समीकृताः ।

काने महाभागो निदर्शयति—If a person though of foreign ancestory, conformed to Hindu social usages in outward behavlour,

---

१. प्राचीन भारतीय साहित्य की सांस्कृतिक भूमिका पृ० ४१-४६

२. तत्रैव पृ० ४६-४८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

in course of time his descendants became absorbed into the vast Hindu community. This process has gone on for at least two thousand years.[1]

वर्णव्यवस्थायाः प्रक्रमः

भारते सामाजिकसंरचनाया यदादिस्वरूपमृग्वेदे परीक्ष्यते तदनुसारेणार्या दासाश्च रङ्गाधारेण संस्कृत्याधारेण च वर्णद्वयमासुः। पुरातनतमकालेऽप्यार्याणां सन्ततिरार्या बभूवुर्दासानां च सन्ततयो दासा आसन्। तेषामार्याणां पाण्डित्यपरायणानां मन्त्रकृतां मनीषिणामेकः प्रभविष्णुर्वर्ग ऋषिरिति प्रस्फुटितः। तेषां विषये योरपीया अपि भारतीय-विद्याविशारदा वदन्ति यत्ते पितृभिः कृतानि सूक्तानि कण्ठाग्रीकरणेनागण्यवर्षाणि यावद् युगान्तरेषु रक्षितवन्तः। आनुवंशिकपरम्परया नित्यनूतनानि सूक्तानि ते प्राचीनसूक्तिनिधौ संयोजयामासुः।[2] ऋषीणामीदृशी प्रवृत्तिरधोविधं वर्णिता मैकडानलेन—

The hymns which have survived in the Ṛgveda were almost exclusively composed by a hereditary priesthood. They were handed down in different families by memory. A Vedic Reader, Introduction. p. XII.

न केवलमृषिसमुदायेऽपित्वपरेष्वपि समुदायेषु विष्वगियं प्रवृत्तिर्निभाल्यते यत् पुत्रः पितुर्व्यवसायादीन् परिगृह्य संवर्धते। इयं प्रवृत्तिः स्वाभाविकी सनातनी च। तां विहाय यदि नाम कश्चिज्जनोऽपरसमुदायस्य व्यवसायादिकं परिगृह्य संवर्धते, तर्हि तस्येयं सांस्कृतिकी प्रवृत्तिः प्रमाण्यते। यथा ऋग्वेदेऽर्बुदादयोऽपि मन्त्रकृतोऽभवन्, तथैव कस्यचित् पुरोहितस्य पुत्रेषु कश्चिद् ब्राह्मणो वा क्षत्रियो वा वैश्यो वा शूद्रो वा यथेच्छ भवितुमार्हत्।[3]

पूर्वोक्तामैतिहासिकीं लोकवृत्तिं प्रत्यक्षीकुर्वाणोऽपि वामनपाण्डुरङ्गकाणेऽसदाग्रहेण सिद्धान्तयति यदार्येषु ऋग्वैदिकसंस्कृतेः प्रथमचरणे पुत्रपौत्रा-

---

१. H. D. Vol II Pt. I Page 386. स महाभारते सन्निविष्टां वैदेशिकानां भारतीयराष्ट्रियतां विधातुं योजनामुद्धरति येन ते भारतीय-संस्कृतावनुरक्ता भवेयुः। शान्तिपर्वणि ६५ अध्यायतः।

२. तथाहि-अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत स देवानेह वक्षति। ऋ० १.१.२

3. Śyaparṇa Sāyakāyana is represented as speking of his offisprings as if they could have become the nobles, priests and commons etc. Vedic Index Vol, II p. 263

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नुसारिणी वर्णव्यवस्था जातिव्यवस्था वा नाभवत् ।[1]

काणेमहोदयोऽपि एवमेव स्पष्टतयान्यत्र स्वीकरोति—

It appears, therefore, that the Brāhmaṇas were a distinct group even in the earliest period of the Ṛgveda.[2]

---

१. वर्णव्यवस्था जातिव्यवस्था वा Caste system इति काणेमहोदयेन विकास-दृष्टचा विशदीकृताधोविधम्—

These verses may be conceded as pointing to the existence of three groups (Brāhmaṇas, Kṣatriyas and Viśah) but there is nothing in them to show that these three had crystallised into somewhat like the castes of later times. History of Dharma-śāstrā Vol. II. Pt. I Page 25.

अस्मिन् प्रकरणे काणेमहोदयेन पुरस्कृतानि प्रमाणानि सुसंगतानि न प्रतिभान्ति। मैकडानलस्य पूर्वोक्तंमृषिविषयकं प्रमाणं वर्णव्यवस्थाया आदिवैदिककालतः सत्तां सम्यक् प्रतिष्ठास्पदं कुरुते ।

अन्यत्रापि परम्परया ज्ञानसातत्यं प्रचितमेव । यथा गीतायाम्—

इमं विवस्वते योगं प्रोक्तवानहमव्ययम् ।
विवस्वान् मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ।
एवं परम्पराप्राप्तमिमं राजर्षयो विदुः ॥ ४.१,२

२. History of Dharmaśāstra Vol. II pt. I p. 21. काणेऽग्रे स्वमतं निदधाति—

Whether they were hereditary is certainly not clear. That Brāhmaṇas in the Ṛgveda were a class by themselves may be conceded, but whether they had become a caste by birth is a matter of opinion dependent on the connotation given to the word caste.

काणेमहोदयस्य पूर्वोक्तं वैदिकवर्णविषयकं मतं मैकडानल-कीथमहोदयाभ्यां समर्थितं प्रतिभाति । तौ मन्वाते—

The matter may be to some extent simplified by recognising at once, that the caste system is one that has progressively developed, and that it is not legitimate to see in the Ṛgveda the full caste system, even of the Yajurveda but at the same time it is difficult to doubt that the system was already well on its way to general aeceptance, Vedic Index Vol. II p. 250.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

आर्या आर्येतराश्चादौ विक्षु विभक्ता आसन्। इमा विशो जातिसंस्थायाः पूर्वरूपम्।

वर्णव्यवस्थाया[1] किंचन स्वरूपमादिवैदिकयुग आसीदेव। तथा हि ऋग्वेदे—

दस्यून् हत्वी प्रार्यं वर्णं प्रावत्। ३.३४.९
यो दासं वर्णमधरं गुहाकः। २.१२.४

अनेन मूलवैदिकसमाजे वर्णशब्द आर्यदासयोर्विभेदक आसीदेव। भवतु नाम भेदोऽयं सविशेषं रङ्गाधारेण किन्तु रङ्गोऽस्मिन् प्रसङ्ग आर्याणां दासानां च संस्कृत्या सम्पृक्तो बभूव। अत एवार्यवर्ण आर्यसांस्कृतिको दासवर्णो दाससांस्कृतिकः पर्यायः प्रतीकश्चाभवत्। इयं स्थितिर्ऋग्वेदस्य प्रारम्भिकयुगेऽभवत्। कालान्तरे वर्णशब्दः स्वीयं रङ्गाभिप्रायं लोपयित्वा-संस्कृतिपरकाभिप्रायं सम्यग् जग्राह।[2]

वैदिकयुगे ब्राह्मणादीनां चतुर्वर्णानां समाजसंरचनायां समानं महत्त्वपूर्णा भूमिका नैकस्थलेषु परिकीर्तिता। तथाहि यजुर्वेदे ऋग्वेदस्य ब्राह्मणोऽस्य मुखमासीदिति वचनस्य व्याख्या, प्रतिभाति—'यशो मुखम्। बाहू बलम्। जंघाभ्यां पद्भ्यां धर्मः'२०.५-९। अनेन धर्मस्य प्रतिष्ठायै वैश्यशूद्रयोर्नितान्त-महिमावधार्यते। एतौ विना धर्मो न विकसति। अतएव तयोरुच्चस्थानम-सन्दिग्धमेव सुसम्मतमासीत्।

एकस्मादेव समानरूपपुरुषाद् यच्चातुर्वर्ण्यं विकसितमिति वर्णितं, तेन चातुर्वर्ण्ये प्रत्येकं शेषवर्णत्रयस्य विशेषप्रवृत्तिरपि संयुतमिति कल्पितुं शक्यते।[3]

---

१. ऋग्वेदे वर्णस्तु पर्याय एव रङ्गस्य नैकस्थलेषु। यथा १.७३.७; १.९६.५; १.११३.२; ४.५.१३; ९.९७.१५; ९.१०४.४; ९.१०५.१; १०.३.३

२. ऋग्वेदस्यान्तिममण्डले—
ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रोऽजायत॥ १०.९०.१०
इत्यत्र कर्मणा ब्राह्मणादयः परवर्ति-वर्णव्यवस्थाया द्योतकनामानि, यथा शतपथ-ब्राह्मणे—
चत्वारो वै वर्णाः। ब्राह्मणो, राजन्यो, वैश्यः, शूद्रः। ५.५.४.९। द्रष्टव्यम् ६.४.४.१३

३. तद्यथा चतुरीकरणेन ब्राह्मणः = $\frac{1}{2}$ ब्राह्मणः + $\frac{1}{2}$ (क्षत्रियः + वैश्यः + शूद्रः) इति। अत एव सर्वेषु वर्णेषु चातुर्वर्ण्यं—गुणविशेषाणां समाधानं प्रधानगौणवृत्त्या दृश्यत एव।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अपरं च ब्राह्मणो मुखप्रतीकेन ज्ञानविज्ञान-समृद्ध्या, क्षत्रियो बाहुप्रतीकेन क्षत्रबल-समृद्ध्या वैश्य ऊरूप्रयी केन भौतिकैश्वर्यसमृद्ध्या, शूद्रः पदप्रतीकेन सामाजिकजीवनयात्रा-सौष्ठव-साधन-समृद्धया पुरुषरूपं पार्थिवलोकं साह्य-भावेन संचारयन्ति इति भावः।

ऋग्वेदे ब्राह्मण-क्षत्रिय-वैश्याः स्पष्टमेवाधोविधं न केवलं दशममण्डलेऽ-पितु अष्टममण्डलेऽपि चर्चिताः —

ब्रह्म जिन्वतमुत जिन्वतं धियः। ८.३५.१६
क्षत्रं जिन्वतमुत जिन्वतं नृन्। ८.३५.१७
धेनूर्जिन्वतमुत जिन्वतं विशः। ८.३५.१८

अत्र वर्णत्रयं स्वस्वकर्म विशेषैर्लक्षितम्। ब्राह्मणो धिया, क्षत्रियो वीर-साह्येन, वैश्यः पशुपाल्या च वर्धेरन्निति ऋषिरश्विद्वयं प्रार्थयते।

ब्राह्मण-क्षत्रिय-वैश्यादीनामानुवंशिक-विशिष्ट-कृतिपरकं विभाजनमा-सीदेवेति पाश्चात्त्यविदुषां मतं समीचीनं प्रतिभाति। तथा हि—

(i) Nor is it possible to maintain that Brahman in the Ṛgveda merely meaus a poet or sage. In serveral passages it must mean a hereditary profession.

(ii) The Kṣatriyas were no doubt a hereditary body; monarchy was already heredltary. it is admitted that the Śūdras were a separate body. Thus all the elements of the caste system were already in existince. Vedic Index Vol. II p. 250,251

सारोऽयं प्रतिफलति यत्साधारणतो जन्मना वर्ण-निर्धारिणे सत्यपि कस्यचि त्पुरुषस्य कर्मणापि पैतृकजाति-भिन्ना नवीना जातिः प्रसिद्धा बभूव। इयं रीतिः कृष्णयजुर्वेदे साधु प्रस्फोटिता—

किं ब्राह्मणस्य पितरं किमु पृच्छसि मातरम्।
श्रुतं वेदस्मिन् वेद्यं स पिता स पितामहः॥ ३०.१

यदि कस्यचिन्मातापितरावज्ञातौ तस्य वर्णोऽभिभावकस्य वर्णेनाभिज्ञात-मिति महाभारतीयं मतं कर्मणा वर्णव्यवस्थां समर्थयति।

पूर्वोक्ता जातिसंस्था वैदिकयुगे सम्प्रबभूव तथापि वैदिकसाहित्ये जातिशब्दो न विद्यते।[1]

---

१. Vedic Index p. 28। प्रथमतमं जातिः कुटुम्बार्थे कात्यायनश्रौतसूत्रे कुल-गोत्राद्यर्थे प्रयुक्ता।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

जातिः

तत्र सजात्य-शब्दो जातेः पर्यायरूपेणापि प्राचरत् ।[1] परवर्तियुगे सवर्णः सजातश्च प्रायः समानार्थौ ।[2] मूलतो बन्धव एव सहजाः, सहजाता इति पर्यायाः । तेषां जन्मदृष्टया एकमूलता भवति । अष्टाध्याय्या ब्रह्म-जातीयाः, क्षत्रिय-जातीयाः, वैश्यजातीया वा सिध्यन्ति । अत्र जातिस्तु वर्णः तथापि वर्णाश्चिवारो जातय उपजातयश्च जन्मना कर्मणा चोभयथा सम्प्रतिपन्ना बहुलाः परिगणिताः । महाभारते बौद्धसाहित्ये परवर्तिकाव्यादिषु च वर्णो जातिश्च ब्राह्मण-क्षत्रिय-वैश्य-शूद्रार्थे प्रायुज्येताम् । अनेन प्रकारेण वर्णशब्दस्य मूलाभिप्रायो रङ्गभेदको विलुप्त एव ।

रामायणयुगीया वर्णव्यवस्था

रामायण-युगीया वर्णव्यवस्था वैदिककाल-महाभारतकालयोर्मध्ये प्रावर्तत । तत्र ऋग्वैदिकी चातुवर्ण्यव्यवस्थार्याणां कृते स्पष्टतो दृश्यते एव । आर्येतराः —असुरा राक्षसाः सम्मिश्रिता राक्षसा इति संज्ञिताः सन्ति । निषादाः प्रभूतं स्वातन्त्र्यसुखमनुभवन्तीति ।

रामायणयुगे शूद्राः सम्मानिता आसन् ।[3] वेदाध्ययने तेषामधिकारो वर्जित आसीत् ।[4]

महाभारतयुगीया वर्णव्यवस्था

महाभारतीया प्राक्तनी समकालिकी च सामाजिकी संरचना यथास्थानं सप्रसङ्गं निभालिता । तथाहि—ब्रह्मा प्रजापतिः निर्ममे देवदानवगन्धर्व-दैत्यासुरमहोरगान्, यक्षराक्षसनागान्, पिशाचान्, मनुजान्, ब्राह्मण-क्षत्रिय-वैश्यशूद्रांश्च । त एते ऋग्वेदस्यान्तिममण्डले यथायोगं कर्मानुसारेण परस्परं सम्मिश्रिताश्चातुर्वर्ण्ये समाश्रिताः । शान्तिपर्वणि १८१.३,४ । भगवद्गीतायां

---

१. ऋग्वेदेऽथर्ववेदे ब्राह्मणसाहित्ये च सजातः, सजात्यश्च नैकशः प्रयुक्तौ । वैदिककोशे पृ० ५३८ । Vedic Index p. 418. The word most clearly means relative. The Sajatas of a king are of course princes, of an ordinary man, Vaiśyas, of a military man, kṣatriya. अनेन स्पष्टं प्रतीयते यज्जातिशब्दो मूलतः सजातादभिन्न एव ।

२. मानियर-विलियममहोदयस्य कोशो द्रष्टव्यः ।

३. दशरथस्याश्वमेध-यज्ञे सहस्रशः शूद्रा निमन्त्रिता आसन् । बाल० १३.२० ।

४. सुन्दरकाण्डे २८.५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कृष्णेन व्याख्यातम्—चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः।[1] अनेन निःसन्दिग्धं प्रतिभाति यद् युगेऽस्मिन् भारतीयसमाजे सर्वसाधारणकृते प्रत्येकवर्णस्य गुणकर्मविधानमासीदेव। तदनुसारेण च लोकानां जीवनविधिः प्रवर्तते स्म। अपरतो वर्णानां कर्म वर्णितमधोविधम्[2]—

ब्राह्मणस्य—अध्ययनं, यजनं, दानं, तीर्थयात्रा,[3] अध्यापनं, याजनं, दानग्रहणं च।

क्षत्रियस्य—प्रजारक्षणं, दानं, यजनं, वेदाध्ययनं पुण्यकरणं च।

वैश्यस्य—अध्ययनं, कृषिगोरक्षपण्यैर्धनार्जनं, ब्राह्मण-क्षत्रियाणां प्रियकरणं, पुण्यकरणं च।

शूद्रस्य—ब्राह्मणानां परिचर्या, वन्दनं च, भूतये नित्योत्थानं च।

राज्ञः कर्तव्यमासीत्—सर्ववर्णानां स्वधर्मे नियोजनम्। ब्राह्मणः स्वीयधर्मकोशेन, क्षत्रियः स्वदण्डबलेन विज्ञान-बलेन च, वैश्यः स्वधनधान्येन, शूद्रश्च स्वपरिचर्यया सर्वेभ्यो वर्णेभ्यः सर्वभूतेभ्यश्च सुख-शान्ति-सौरभादिकं वितन्वन्तिस्म।[4]

विधानमिदं सर्वेषां वर्णानां कृते परस्परोपस्कार-परं सामञ्जस्याधायकं च विभाति।

महाभारते देवानां वर्णव्यवस्थाद्योविधं वर्णिता—

आदित्याः क्षत्रियास्तेषां विशस्तु मरुतस्तथा
अश्विनौ तु मतौ शूद्रौ तपस्युग्रे समाहितौ॥
स्मृतास्त्वङ्गिरसो देवा ब्राह्मणा इति निश्चयः।
इत्येतत्सर्वदेवानां चातुर्वर्ण्यं प्रकीर्तितम्॥ शान्ति प० २०१.२३

वैदिकयुगे ब्राह्मणा देववर्गे समाम्नाताः। तत्रान्तिमचरणे ऋषयोऽपि ब्राह्मणवर्गस्याङ्गीभूताः।

महाभारतीयमान्यतानुसारेण परमात्मरूपधरी चातुर्वर्ण्यव्यवस्था प्रणतिपुरस्सरं समादरमर्हति।[5]

---

१. कर्मभिर्वर्णतां गतमिति शा० १८१.१०।
महाभारते रङ्गभेदेन वर्णव्यवस्था वर्णनं (शान्ति १८१.५) निराधारमेव।

२. उद्योगपर्वणि २९.२१-२५

३. शान्ति प० ७३.६-८; १३०.३,६

४. अप्रवासीभूय ब्राह्मणो दुष्यते, पृथिव्या निगीर्यते इति अनु० ३६.१५-१७

५. ब्रह्म वक्त्रं भुजौ क्षत्रं कृत्स्नमूरूदरं विशः।
पादौ यस्याश्रिताः शूद्रास्तस्मै वर्णात्मने नमः॥ शान्ति० ४३.४७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कानेमहोदयः संक्षेपेण ब्राह्मणानां सात्त्विकजीवनं वर्णयति। तद्यथा— In the first place, the ideal set before Brāhmaṇas was one poverty, of plain living and high thinking, of forsaking the active pursuit of riches and cherishing cultural preservasion and advancement.[1]

वैदिकर्षि-जीवनविधानं केवलमन्तिममुद्देश्यं विहायान्यप्रकारकमेवासीदिति प्रागेव दर्शितम्।

ब्राह्मण-लक्षणम्

ब्राह्मण्यं दुर्लभं लोके राज्यं हि सुलभं नरैः। अनुशासनपर्वणि ५४.२९

वेदवेदाङ्गविद् ब्राह्मणः स्वभावतः सौम्योऽभवत् सर्वभूताभयप्रदश्च।[2] मानवेषु श्रेष्ठःसोऽवध्योऽभवत्।[3] ब्राह्मणानां गुणा आसन् क्षमा (आदि प० १२८.८) दमः (शान्ति० १५४.७) क्रोध-मोह-हिंसा-कामादिभ्यो विरतिः (आर० १९७.३१-३४)।[4]

तपोमयजीवनमासीद् ब्राह्मणानाम्। तथाहि—

अब्भक्षा वायुभक्षाश्च फलाहारा दृढव्रताः। आदि० १८९.१२

बहवो ब्राह्मणा रौरवाजिनवासिन आसन्।[5] अपरं च—

तपस्विनः सत्यशीलाः शतशः संशितव्रताः। आर० २५.१५

मधुपिङ्गो नाम ब्राह्मणस्तु तिग्मतेजा महाप्रांशुः श्मश्रुदण्डजटाधरोऽनवद्याङ्गः, तेजसा प्रज्वलन्, मधुरवाक्, तपःस्वाध्यायभूषण आसीत्।[6]

ब्राह्मणस्तु शासकानामपि शासकोऽभवत्। तद्यथा आरण्यकपर्वणि—

---

१. H. D. Vol. II Pt. I. P. 110। रालिन्सन महोदयः समर्थयति—He (The Brahmaṇa) lives in the mountains or by the Ganges as a solitary recluse and devotes his time to solitary meditation and the service of gods. Intercourse Between India & Western World. p.114.

२. आदि० ११. १३; ब्रह्म धारयतां नित्यमित्यादि शा० १८१.१६

३. आदि० २४.३; ६८.५६

४. सद्ब्राह्मणस्य लक्षणमासीत् कुलशीलवयोरूपैर्विद्ययाभिजनेन च। अनु० ९०.४

५. आदि १८१.३५

६. आर० २८७.४,५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

समुद्रनेमिर्नमते तु तस्मै
यं ब्राह्मणः शास्ति नयैर्विनीतः ॥ आर० २७.१४

विशुद्धाचरणा ब्राह्मणाः पंक्तिपावना इति महाभारतेऽनुशासनपर्वणि अधोविधमभिलक्षिताम्—

त्रिणाचिकेतः पञ्चाग्निस्त्रिसुपर्णः षडङ्गवित् ।
ब्रह्मदेयानुसन्तानश्छन्दोगो ज्येष्ठसामगः ॥ ९०.२०
मातापित्रोर्यश्च वश्यः श्रोत्रियो दशपूरुषः ।
वेदविद्याव्रतस्नातो विप्रः पंक्तिं पुनात्युत ॥ ९०.२१
अथर्वशिरसोऽध्येता ब्रह्मचारी यतव्रतः ।
सत्यवादी धर्मशीलः स्वकर्मनिरतश्च यः ॥ ९०.२२
ये च पुण्येषु तीर्थेषु अभिषेककृतश्रमः ।
मखेषु च समन्त्रेषु भवन्त्यवभृथाप्लुतः ॥ ९०.२३
अक्रोधना अचपलाः क्षान्ता दान्ता जितेन्द्रियाः ।
सर्वभूतहिता ये च श्राद्धेष्वेतान्निमन्त्रयेत् ॥ ९०.२४
यतयो मोक्षधर्मज्ञा योगाः सुचरितव्रताः ।
ये चेतिहासं प्रयताः श्रावयन्ति द्विजोत्तमान् ।
ये च भाष्यविदः केचिद्ये च व्याकरणे रताः ॥ ९०.२६
अधीयते पुराणं ये धर्मशास्त्राण्यथापि च ।
अधीत्य च यथान्यायं विधिवत्तस्य कारिणः ॥ ९०.२७
उपपन्नो गुरुकुले सत्यवादी सहस्रदः ।
अग्र्यः सर्वेषु वेदेषु सर्वप्रवचनेषु च ॥ ९०.२८
यावदेते प्रपश्यन्ति पंक्त्यास्तावत्पुनन्त्युत ।
ततो हि पावनात् पंक्त्याः पंक्तिपावन उच्यते ॥ ९०.२९

ब्राह्मणानां कृते राज्ञा प्रजाभिश्चावसथाः कृता, यथा परवर्ति-बौद्ध-संस्कृतौ भिक्षूणां कृते विहारा निर्मिताः।[1]

साधारणतो ब्राह्मणा भिक्षुका आसन्, किन्तु प्रवृत्तिमार्गीया लोकपरायणा ब्राह्मणाः समृद्धिशालिनो बभूवुः।[2]

---

१. आदिप० १०२.११

२. अत्र मनुमतं प्रमाणम्। स निर्दिशति यत् सापराधो ब्राह्मणो भृशं दण्डनीयः सहस्रमुद्रां यावत्। ८.३७८, ३८५। अनेन तस्य सम्पन्नताभिव्यज्यते। बौद्ध-जातककथासु सुसमृद्धानां नैकब्राह्मणानां चरितगाथा वर्णिताः।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ऋषयो यथा देवराजं तथैव ब्राह्मणा युधिष्ठिरमानर्चुरिति तेषां स्थितिः प्रदर्शिता महाभारते। एतेषु प्रमुखा आसन् द्वैपायनः, नारदः, जामदग्न्यः, काश्यपः, हारीतः, अग्निवेशश्च। अपरं च—

एते चान्ये च बहवो ब्राह्मणाः संशितव्रताः।
अजातशत्रुमानर्चुः पुरन्दरमिवर्षयः॥ आर० २७.२५

ब्राह्मणानां पोषणं राजभिः कृतमासीत्।[1]

महाभारतानुसारेण सर्ववर्णानां सङ्करत्वेन जातिर्दुष्परीक्ष्यास्ति यतो हि नाम—

सर्वे सर्वास्वपत्यानि जनयन्ति यदा नराः। आर० १७८.२७

अत एव शीलं संस्कृतवृत्तं च ब्राह्मणादिजातिनिर्धारणं कुरुतः।[2]

विशुद्धवृत्तिको महाभारतेऽधोविधो वर्तते—

जटी, चीराजिनधरः स्वाध्यायपरमः शुचिः।
विनीतो नियताहारो ब्रह्मण्यो वेदपारगः।
स ब्रह्मचारी इत्यादि शान्ति प० १६२, ३८, ३९।

परवर्तिधर्मशास्त्रकाराणां[3] मतमवहेल्यापि अविरला ब्राह्मणाः शस्त्राजीवा बभूवुः। विषमस्थितौ ब्राह्मणः शास्त्रेणात्मरक्षां विदध्यादिति बहूनां मतमासीदेव।[4] तथा हि मनुः—

शस्त्रं द्विजातिभिर्ग्राह्यं धर्मो यत्रोपरुध्यते।
द्विजातीनां च वर्णानां विप्लवे कालकारिते॥ ८.३४८

आत्मनश्च परित्राणे दक्षिणानां च सङ्गरे।
स्त्रीविप्राभ्युपपत्तौ च घ्नन्धर्मेण न दुष्यति॥ ८.३४९
आततायिनमायान्तं हन्यादेवाविचारयन्॥ ८.३५०

महाभारते द्रोणः, अश्वत्थामा, कृपाचार्यश्च महान्तो ब्राह्मणाः पराक्रमपरायणाः सेनानायका बभूवुः। शल्यपर्वणि निगदितमधोविधम्—

---

१. ब्राह्मणानां जीवनवृत्ती राज्ञा कार्या। आर० २३८.२४। तथाहि—
ब्राह्मणानां सहस्राणि स्नातकानां महात्मनाम्।
दशमोक्षविदां तद्वद्यान् बिभर्ति युधिष्ठिरः। आर० ४७.६
कुरुभिर्ब्राह्मणावसथाः कृता आसन्। आदिप० १०२.११

२. आर० १७८.२८,३२। अनु० ९०.४

३. आपस्तम्बानुसारेण परीक्षार्थमपि ब्राह्मण आयुधं नाददीत्। १.१०.२९.७

४. गौतम० ७.६; ७.२५; बौ० ध० सू० २.२.८०; मनु० ८.३३८, ३४९।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

राज्ञो नियोगाद् योद्धव्यं ब्राह्मणेन विशेषतः ।
वर्तता क्षत्रधर्मेण हत्येवं धर्मविदो विदुः ॥ ६५.४२

भारतीयेतिहासेऽधोविधं ब्राह्मणजातीयानां राज्ञां वर्णना परिचीयते—

(१) पुष्यमित्रः शुङ्गवंशीयो मौर्यसेनापतिः मौर्यराजस्य पराभवानन्तरं स्वयं राजा बभूव १८४ ई० पू० ।

(२) कदम्बवंशीयो राजा मयूरशर्मा ब्राह्मण आसीत् ।

(३) महाराष्ट्र-राजवंशीयानां महामन्त्रिणः पेशवेतिख्याताः सेनापतयोऽपि बभूवुः ।

कल्हणेन परिच्युतसनातनादर्शानां ब्राह्मणानां सपरिहासं वर्णना कृता। तेषां विशेषाः सन्ति—स्थूल-कम्बलवाहिनः, अश्रृङ्गोक्षनिभाः, धूमनिर्दग्धकूर्चा इत्यादि ।[1] धनेन क्रीता तेऽयोग्य-व्यापारपरायणा बभूवुः ।[2] कल्हणानुसारेण पापिष्ठराजैः प्रदत्तोऽग्रहारो न ग्रहणीयः ।[3]

हीनवृत्तिका ब्राह्मणाः

हीनब्राह्मणाः कर्मणा कितवः, पशुपालः, ग्रामप्रेष्यः, वार्धुषिकः, गायनः, सर्वविक्रयी, अगारदाही, गरदः, कुण्डाशी, सोमविक्रयी, सामुद्रिकः, राजभृत्यः, तैलिकः, कूटकारकः, स्तेनः शिल्पाजीवः, पर्वकारः, सूची, काण्डपृष्ठः, सकुक्करः, कुशीलवः, देवलकः, नक्षत्रजीवी च बभूवुः । एतादृशा ब्राह्मणा नामधारिणोऽश्रद्धेया आसन् । परवर्तियुगे यद्यपि समाजे जातिविभाजने प्रादुर्भूते बहूनां तेषां व्यवसायानुरूपिणी जातिः समभवत्, तथापि बहवो हीनवृत्तिका जना हीनव्यवसायेषु रताः पूर्वजानामुच्चवर्णजाति-गोत्रादीनामभिख्यां मिथ्या स्वाभिज्ञानाय स्वीचक्रुः ।[4] काने महोदयो विशदयति—

---

१. राजतरंगिणी ५.४६०-४६२

२. राजत० ६.२२४

३. ततोऽपि पापिनोऽभूवन् केऽपि तस्मिन् क्षणे द्विजाः ।
तस्मादप्यग्रहारान् ये जगृहुर्गृहभोजिनः ॥ राजत० ५.४०२

४. तथाहि स्थितिमिमां मनुः स्पष्टयति—
गोरक्षकान् वाणिजकांस्तथा कारुकुशीलवान् ।
प्रेष्यान् वार्धुषिकांश्चैव विप्रान् शूद्रवदाचरेत् ॥ ८.१०२
अर्थात् वर्णेन ब्राह्मणाभिख्या तेषामप्यासीत् ये व्यवसायेन शूद्रा बभूवुः । आधुनिकयुगेऽपि सा स्थितिः प्रवर्तते । महाभाष्ये समर्थितमेतदधःश्लोके—
तपः श्रुतं च योनिश्चैतद् ब्राह्मणकारकम् ।
तपःश्रुताभ्यां यो हीनो जातिब्राह्मण एव सः २.२.६ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

Even in ancient times Brāhmaṇas followed so many occupations almost as in modern times that the list of Brāhmaṇas who can not be invited at Śrāddhas because they follow occupations other than those prescribed for them is rather very formidable.

हीनवृत्तिका ब्राह्मणा व्यावसायिकसङ्करताया निदर्शनं प्रस्तुवन्ति।

जातककथासु नैकोच्चवर्णानां हीनवर्णोचितकार्य-स्वीकरणस्योदाहरणानि वर्तन्ते। तथाहि—

(१) राजकुमारो राजत्वं परित्यज्य वणिग् भवति। जातक ४.८४
(२) ब्राह्मणो व्यापाराय विदेशं गच्छति। १.१४५
(३) दानाय धनं प्राप्तुं कश्चिद् ब्राह्मणो वणिग् भवति। जातक० ४.१५
(४) द्वौ ब्राह्मणौ व्यापारिणौ बभूवतुः। जातक ५.२२
(५) कश्चिद् ब्राह्मणो धनुर्धरस्य सहायको भवति। जा० ५.१२७
(६) ब्राह्मण आखेटको भवति। जा० २.२००। कृषको ब्राह्मणो गा अजाश्च चारयति।
(७) कश्चिद् ब्राह्मणः स्वपुत्रेण बोधिसत्त्वेन सह मौक्तिकवाणिज्यार्थं—मितस्ततः परिभ्रमति। जा० २.१५६

तत्र क्षत्रिया वैश्या अपि शूद्रोचितशिल्पव्यवसाये निरता दृश्यन्ते।[1] कतिपयब्राह्मणा दासा अपि बभूवुः।[2]

सुविदिता एव विदूषका नाट्ये हास्यकारकाः जात्या ब्राह्मणा वृत्त्या ब्राह्मणत्वविगर्हणा हीनवृत्तेः निदर्शना आसन्।

ब्राह्मणानां योग्यता वृत्तिश्च

ब्राह्मणस्तु स्वब्रह्मज्ञानेन ब्राह्मणत्वं प्रसाधयति, किन्तु न केवलमेतेन तस्य महिमा व्यज्यते। ते देशज्ञा पूर्ववृत्तज्ञाश्चाभवन्। एतादृशा ब्राह्मणा यथाकालं स्वव्याख्यानै राजभ्यः सुज्ञानं व्यदधुः।[3]

साधारणब्राह्मणानां चतुराश्रम-जीवन-पद्धतिर्महाभारतेऽधोविधं वर्णिता—

कृतोपनयनस्तात भवेद् वेदपरायणः।[4]
तपसा, गुरुवृत्त्या च ब्रह्मचर्येण चाभिभो।
देवतानां पितॄणां चाप्यनृणश्चानसूयकः॥

---

१. जातक ५२.९०; ६.७२
२. Buddhist India p. 40
३. कर्ण० ३०.७-९
४. यो नाधीतवान् स तु निराकृतिरित्युपहितो निन्दनीयः समाम्नातः। अनुशासन-पर्वणि ९६.५२।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

समावृत्तस्तु गार्हस्थ्ये सदारो नियतो वसेत् ।
अनसूयुर्यथान्यायमाहिताग्निस्तथैव च ।
उत्पाद्य पुत्रपौत्रं तु वन्याश्रमे वसेत् ।
स वनेऽग्नीन् यथान्यायमात्मन्यारोप्य धर्मवित् ।
निर्द्वन्द्वो वीतरागात्मा ब्रह्माश्रमपदे वसेत् ॥
शान्ति० ३१३.१४-१९ तः

ब्राह्मणेन जीवनयात्रा भिक्षयापि सम्पादनीया । भिक्षमाणोऽपि इन्द्रिय-निग्रहेण, ध्यानेन, एकान्तशीलत्वेन, तुष्टया, दानेन च स संसिद्धिं लभते ।[1] अपरं च—यत्किञ्चित् साधारणलोको नैकविधकर्मप्रपञ्चेन प्राप्नोति, तद् ब्राह्मणस्तपसा स्वाध्यायेन च लभते—

यच्चैव मानुषे लोके यच्च देवेषु किञ्चन ।
सर्वं तत्तपसा साध्यं ज्ञानेन विनयेन च ॥ अनु० ३५.११

श्रीश्च बुद्धिश्च तेजश्च विभूतिश्च प्रतापिनी ।
स्वाध्यायेनैव माहात्म्यं विमलं प्रतिपत्स्यथ ॥ अनु० ३५.८

दमस्वाध्याय-निरताः सर्वान् कामानवाप्स्यथ ॥
ब्रह्मगीता—अनु० ३५.१०

शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च ।
ज्ञानविज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम् ॥ भीष्म० ४०.४२

ब्रह्मवर्चस्विनो ब्राह्मणा धृष्या नासन् । महाभारते स्पष्टं घोषितम्—

दुर्जया ब्राह्मणा भुवि ।[2] न ब्राह्मणविरोधेन शक्या शास्तुं वसुन्धरा ।
अनु० ३५.२०, २१

स ब्राह्मणस्तु सर्वतो मुक्त एकचरो भवेत् ।[3]

---

१. शान्ति० २३.८ । ब्राह्मणः प्रचरेद् भैक्षम् । उद्योग० १३०.२८ ब्राह्मणभिक्षवः । उद्योग० ३०.८

२. भुजवीर्या हि राजानो वागस्त्राश्च द्विजातयः । अनु० ३६.१३
अन्यत्र सेनां सेनापतिं च वृत्वा ब्राह्मणाः कर्तव्यविमुखान् क्षत्रियानजयन्निति—
ततस्ते ब्राह्मणाश्चक्रुरेकं सेनापतिं द्विजम् ।
नयेषु कुशलं शूरमजयन् क्षत्रियांस्ततः ॥ उद्योग० १५३.९

३. गुणागुणमनासङ्गमेकचर्यमनन्तरम् ।
एतद् ब्राह्मणतो वृत्तमाहुरेकपदं सुखम् ॥ आश्व० ४२.४४,४५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

एतादृशा ब्राह्मणा महाभाष्ये शिष्टा इति प्रोक्ताः। ते कुम्भीधान्याः अलोलुपाः, अगृह्यमानकारणाः, विद्यार्णव-पारङ्गता आसन्।[1] यदि ब्राह्मणः सुवृत्तो न स्यात् तर्हि स शूद्रसमो भवति।[2]

महाभारतस्य स्पष्टं मतं विद्यते यत् ब्राह्मणश्चिकित्सां, कृषिं, राजभृति-मध्यापनवृत्तिं, राजपौरोहित्यं, ग्रामाधिकारं च न स्वीकुर्यात्।[3]

यद्यपि क्षेत्रपरायणाः सैन्यधर्मानुयायिनो प्रभूता ब्राह्मणा व्यवसायेन-क्षत्रियवद् युद्धार्थिनो बभूवुः[4], किन्तु तेषां प्रतिष्ठा ब्राह्मण-वर्गे नासीदिति निश्चप्रचम्। मनुमतेन सर्वे वर्णा ब्राह्मणा अपि क्षत्रियवच्छस्त्रधरा भवेयुर्येन त आत्मरक्षाविधाने सफलाः स्युः।[5]

भागवते समकालिकी चतुर्विधा ब्राह्मणवृत्तिर्वर्णिता

वार्ता विचित्रा शालीनयायावरशिलोञ्छनम्।[6]
विप्रवृत्तिश्चतुर्धेयं श्रेयसी चोत्तरोत्तरा॥ ७.११.१६

---

१. महा० ६.३.१०९

२. आर० २०६.११। नैके ब्राह्मणा विविधव्यवसायेषु निपुणा आसन्। तेषां स्थापत्यविज्ञानमनुशासनपर्वणि १०७.११ निगदितम्। गोस्वामिन आसन् गार्हस्थ्ये ब्राह्मणा इति शान्तिपर्वणि ६० तमेऽध्याये वर्णितम् तेषां। गा वैश्या अपालयन्, भृतिं चालभन्तेति।

३. महाभारतेऽनुशासनपर्वणि ९६ तमेऽध्याये।

४. From very ancient times Brāhmaṇas appear to have followed the profession of arms. P. V. Kane : Hist. of Dharmaśāstra Vol. III. p. 122

यथा पाणिनिः सूचयति यद् ब्राह्मणकजनपदे ब्राह्मणाः क्षत्रव्यवसायिन आसन्।

५. शस्त्रं द्विजातिभिर्ग्राह्यं धर्मो यत्रोपरुध्यते।
द्विजातीनां च वर्णानां विप्लवे कालकारिते॥ ८.३४८
आत्मनश्च परित्राणे दक्षिणानां च संगरे।
स्त्रीविप्राभ्युपपत्तौ च घ्नन् धर्मेण न दुष्यति॥ ८.३४९
महाभारतेऽपि समर्थितमेतत्॥ शान्ति० ७८.१८

६. मनुना प्रागेव प्रतिपादिता ब्राह्मणवृत्तिर्भागवते वर्णिता।
मनु० ३.१०० ४.३–१०; १०.११२
अत्र वार्ता कृषिरेव। शालीना वृत्तिः स्वगृहेऽयाचितप्राप्तं भोज्यम्। यायावर-वृत्तिस्तु भिक्षाटनेन सिध्यति। क्षेत्रपतिना समाहारितेऽपि शस्ये क्षेत्रेऽवशिष्टेन तण्डुलकणादिना शिलवृत्तिर्जायते। अन्नापणे दैनन्दिनविक्रयानन्तरमितस्ततः संकीर्ण-तण्डुलकणादिनोञ्छवृत्तिः सम्भवति।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अत्र ब्राह्मणस्य निरपेक्षता स्वावलम्बने च श्रैष्ट्यं विभावितम्। विष्णु-पुराणे ब्राह्मणवृतिः सुकरा प्रतिवेदिता—

वृत्त्यर्थं याजयेच्चान्यानध्यापयेत्तथा।
कुर्यात् प्रतिग्रहादानं शुक्लार्थान् न्यायतो द्विजः॥ ३.८.२३

ब्राह्मणोऽग्रहारं पापेभ्यो राजभ्यो न स्वीकरोत्विति कल्हणो राज्ञश्चक्र-वर्मणः प्रकरणे विवृणोति—

ततोऽपि पापिनोऽभूवन् केऽपि तस्मिन् क्षणे द्विजाः।
तस्मादप्यग्रहारान् ये जगृहुर्गृहभोजिनः॥ राजत० ५.४०

ब्राह्मणस्य लोके प्रशान्तिस्थापनप्रभावं समीक्षमाणः स प्राह—

कालेऽस्मिन् धर्मदौर्बल्ये कलुषेऽपि कलेः किल।
प्रभावो भूमिदेवानां द्योततेऽद्याप्यभङ्गुरः॥
ब्राह्मणैरपरिक्षीणपूर्णपुण्यो न कश्चन।
धैर्यमारभते भ्रष्टदुष्टोत्पाटन-पाटवैः॥ राजत० ८ २२३८, ३९

बहूनां ब्राह्मणानां जीवनवृत्तिर्गृहस्थाश्रमे कृषिकर्मणाभवत्। भवतु नामैदृशी वृत्तिस्तेषां कृते व्यवसायसाङ्कर्यकारिणी दोषावहा च, किन्तु वैदिककालतो गृहस्था ऋषयो ब्राह्मणा वा कृषिं सादरं स्वावलम्बनदृष्ट्यानुपमां मन्यमानाः स्वीचक्रुः। बौद्धसाहित्ये कृषिपरायणमहाशालानां ब्राह्मणानां नैकजातककथासु वर्णनं लभ्यते।[1]

भागवते निवृत्तिमार्गीयो ब्राह्मणो वर्णितोऽधोविधम्—

ब्राह्मणस्य हि देहोऽयं क्षुद्रकामायं नेष्यते।
कृच्छ्राय तपसे चेह प्रेत्यानन्त्यसुखाय च॥
शिलोञ्छवृत्त्या परितुष्टचित्तो धर्मं महान्तं विरजं जुषाणः।
मय्यर्पितात्मा गृह एव तिष्ठन् नाति प्रसक्तः समुपैत्ति शान्तिम्॥
११.१७.४२,४३

महाभारते भीष्मो युधिष्ठिरं प्रतिबोधयति—

न मे त्वत्तः प्रियतरो लोकेऽस्मिन् पाण्डुनन्दन।
त्वत्तश्च मे प्रियतरा ब्राह्मणा भरतर्षभ॥ अनु० ८.१२
येषां वृद्धाश्च बालाश्च पितृपैतामहीं धुरम्।
उद्वहन्ति न सीदन्ति तेषां वै स्पृहयाम्यहम्॥ ८.४
संसत्सु वदतां येषां हंसानामिव संघशः।
मङ्गल्यरूपा रुचिरा दिव्यजीमूतनिःस्वना॥ ८.६

---

१. कश्चिद् ब्राह्मणः सहस्रकरीषं यावत् क्षेत्रं चकर्ष। सुवण्णकटकजातक ३८९।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ब्राह्मणेषु ते प्रतिष्ठिततमा आसन् ये त्रय्या, तपसा, श्रुतेन, योन्या चाग्रगण्या ववृतिरे ।[1]

ब्राह्मणाः पूज्याः, रक्ष्याः, नमस्कार्याः । श्रेष्ठं ब्राह्मणं गृहे वासयेत् । आदित्यादयो देवा ब्राह्मणमाविश्य सदान्नमुपभुञ्जते । हविषा ब्राह्मणास्तर्पणीया इति धारणासीत् । अन्यच्च—

ये ब्राह्मणमुखात् प्राप्तं प्रतिगृह्णन्ति वै वचः ।
कृतात्मानो महात्मानस्ते न यान्ति पराभवम् ॥
अतो भूतिरतः कीर्तिरतो बुद्धिः प्रजायते ।
अपरेषां परेषां च परेभ्यश्चैव ये परे ॥
इच्छन् भूतिं च कीर्तिं च लोकांश्च मधुसूदन ।
ब्राह्मणानुमते तिष्ठेत् पुरुषः शुचिरात्मवान् ॥

अनुशासनपर्वणि ३४ अध्यायतः ।

सूत्रस्मृतिग्रन्थेषु ब्राह्मणानां प्रतिष्ठा संक्षेपेणाधोविधं प्रतिष्ठापिता—

ब्राह्मणैर्लोका धार्यन्ते । ब्राह्मणाभिहितं वाक्यं न मिथ्या जायते क्वचित् । विष्णुधर्मसूत्रे १९.२०-२२

ब्राह्मणा यानि भाषन्ते भाषन्ते तानि देवताः ।
सर्वदेवमया विप्रा न तद्ववचनमन्यथा ॥ पराशर ६.५३

कानेमहोदयः परिणमयति—The Brahmaṇas were the creators and custodians of the vast literature that had grown up, they were the guardians of the culture of ages, they were expected to shoulder the burden of teaching and preserving the vast literature on such gifts as were voluntarily made. ... ... The ideal before Brāhmaṇas was to lead a life of comparative poverty. They were forbidden to follow many worldly pursuits.

ब्राह्मणस्य, प्रतिष्ठा तस्य निस्पृहभावेन समाजस्योदात्तपथप्रदर्शनेन, विश्वशान्तियोगेन, स्वतपसोपार्जितज्ञानविज्ञाननिधेः सर्वेभ्यो वर्णेभ्यो निःशुल्कप्रदानेन च समभवत् । तस्यैवोच्चादर्शाः स्यन्दमाना न केवलं सर्वान्

१. तपः श्रुतं च योनिश्चाप्येतद् ब्राह्मणकारणम् ।
त्रिभिः गुणैः समुदितस्ततो भवति वै द्विजः ॥ अनु० १२२.७
ये योनिशुद्धाः सततं तपस्याभिरता भृशम् ।
दानाध्ययनसम्पन्नास्ते वै पूज्यतमाः मताः ॥ अनु० १२२.१५
तथापि जन्मना ब्राह्मणत्वमिति अनु० ३५.१ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भारतीयानपरवर्णानपितु जगतो विश्वजनान् समुद्धर्तुं प्रावर्तन्त । तस्य कृतित्वेन निसर्गतो नमसीभूताः सर्वलोका उपकारेण स्वसाहाय्येन च तं शिरसि निधायाशोभन्त ।

न केवलं विद्वांसो ब्राह्मणा अपितु, 'असंस्कृतमतयोऽपि जात्यैव द्विजन्मानो माननीया' इति महाकविबाणस्याभिमतम् ।[1]

ब्राह्मणानां प्रतिष्ठाधोविधमपि प्रकाशिता—

नमस्यः सर्वभूतानामतिथिः प्रसृताग्रभुक् । अनु० ३५.१

वैदिकसंस्कृतेः प्रतिष्ठापयितारो ब्राह्मणाः स्वपथप्रर्शनेनार्येतराणामपि आर्यीकरणेन वर्णव्यवस्थायाः शान्तिमयीं भूमिकामुपाहरन् । कुपरिणामो ब्राह्मणानामुपेक्षाया साधुवर्णितो महाभारते—

मेकला द्रमिडाः काशाः पौण्ड्राः कोल्लगिरास्तथा ।
शौण्डिका दरदा दर्वाश्चौराः शबरबर्बराः ।।
किराता यवनाश्चैव तास्ताः क्षत्रियजातयः ।
वृषलत्वमनुप्राप्ता ब्राह्मणानामदर्शनात् ।। अनु० ३५.१७,१८

अर्थाद् वर्णव्यवस्थानुसारेण पूर्वं क्षत्रीकृता इमेऽनार्या बभूवुः ।

वैदेशिका अपि ब्राह्मणानां सच्चारित्र्यं राजभिरपि कृतं तेषां समादरं च पुरावर्णयन् । तथाहि ह्वेनसांगः —

Brāhmaṇas and Śramaṇas are held in such high esteem that the king himself will come and ask for their prayers and their counsel in times of emergency and danger.

एतादृशानां महात्मनां विषये साधारणधारणासीत्—

येऽनसूयानृतदम्भेर्ष्याहिंसामानविवर्जिताः ।
न तेषां सत्यशीलानामाशिषो विफलाः कृताः ।। भागवत १०.७.१३

अतएव कश्चिद् ब्राह्मणोऽपरवर्णस्य व्यवसायं स्वीकुर्वाण आत्मनो मन्दभाग्यमेव मेने । तत्र महाभारतेऽश्वत्थाम्न उदाहरणं प्रमाणम्—

सोऽस्मि जातः कुले श्रेष्ठे ब्राह्मणानां सुपूजिते ।
मन्दभाग्यतयास्म्येतं क्षत्रधर्ममनुष्ठितः ।। सौप्तिकप० ३.२१

अन्यत्रापि स युधिष्ठिरेण तस्य व्यावसायिकसांकर्यमभिव्यज्योपहसितः —

ब्राह्मणेन तपः कार्यं दानमध्ययनं तथा ।
क्षत्रियेण धनुर्नाम्यं स भवान् ब्राह्मणब्रुवः ।।

अश्वत्थामा 'युक्तत्वं तच्च संचिन्त्य नोत्तरं किंचिदब्रवीत्' ।

कर्ण० ३९.३२–३४

---

१. हर्षचरित पृ० १८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ब्राह्मणानामकार्यम्

वैदिकर्षीणां यत्कार्यमासीत् तदपि महाभारतीयब्राह्मणनामकार्यमिति-शान्तिपर्वणि—

ज्याकर्षणं शत्रुनिबर्हणं च कृषिर्वणिज्या पशुपालनं च ।
शुश्रूषणं चापि यथार्थहेतोरकार्यमेतत्परमं द्विजस्य ॥ ६३.१
राजप्रैष्यं कृषिधनं जीवनं च वणिज्यया ।
कौटिल्यं कौलटेयं च कुसीदं च विवर्जयेत् ॥

विषमस्थितौ ब्राह्मणो युद्धेन धर्मं रक्षेदाततायिनं हन्यात्, आत्मानं स्त्रीः विप्रांश्च रक्षेदिति मनुमतम् । ८.३४८, ३४९

सदसत्प्रवृत्तिका ब्राह्मणा महाभारते युगपत् परिभाषिताः । तथाहि—

कूपा इव तृणच्छन्ना विशुद्धा द्यौरिवापरे ।
प्रसह्यकारिणः केचित् कार्पासमृदवोऽपरे ॥
कृषिगोरक्ष्यमप्यन्ये भैक्षमन्येप्यनुष्ठिताः ।
चोराश्चान्येऽनृताश्चान्ये तथान्ये नटनर्तकाः ॥
सर्वकर्मसु दृश्यन्ते प्रशान्तेष्वितरेषु च ।
पितॄणां देवतानां च मनुष्योरगरक्षसाम् ।
पुरोहिता महाभागा ब्राह्मणा वै नराधिप ॥
अनुशासनपर्वणि ३३.९–१४

ब्राह्मणैश्चिकित्सा न करणीया—अनु० ९६.२२ । ब्राह्मणः क्षत्रियत्वं हि याति शस्त्रसमुद्यमात् । उद्योग १८०.२५ । शौद्रं हि कुर्वतः कर्म धर्मः समुपरुध्यते । अनु० ३५.७ ।

पौरोहित्यं वैदिकयुगे समीचीना वृत्तिः सम्मता किन्तु मनुना 'पौरोहित्यं विगर्हितमिति प्रोक्तम् ।[1]

राजसेवा न कर्तव्येति महाभारते ब्राह्मणानां कृतेऽवधारितम् । अनु० ९६.२४

महाभारतस्य स्पष्टं मतं विद्यते यद् ब्राह्मणेन स्वकर्मैव, कर्तव्यम्, यतो हि नाम—

स्वमेव कुर्वतां कर्म श्रीर्वो ब्राह्मी भविष्यति । अनु० ३५.६

ब्राह्मणो दानग्राही न भवेत् ।[2] यद्यपि दान-ग्रहणं ब्राह्मणस्य षट्सु कर्मसु परिगणितं तथापि मनुस्तारस्वरेण प्रवक्ति—

---

१. मनुस्मृतिः १०.१०९; ३.१५१, १६४; महाभारते आदि० ७३.३०-३४; भागवते च ६.७.३३-३६

२. मनुस्मृतिः ४.१८८-१९०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रतिग्रहसमर्थेऽपि प्रसङ्गस्तत्र वर्जयेत् ।
प्रतिग्रहेण ह्यस्याशु ब्राह्मं तेजः प्रशाम्यति ।। ४.१८६

इतिहासे प्रचुरप्रमाणाः सन्ति ब्राह्मणानामुदात्तशीलस्य । तथा हि—

The Brahmaṇas thought it below dignity to serve under a Muslim ruler. फिरिश्ता भाग १ पृ० २७८ ।

अकार्यरतानां ब्राह्मणानां संख्या कदापि नाति स्वल्पा बभूव । याज्ञवल्क्यानुसारेण तत्रासनायुधजीविनो ब्राह्मणाः ।[1]

ब्राह्मण-भेदाः

ब्राह्मणानां मौलिकभेदस्तेषां दानस्य ग्रहणेनाग्रहणेन च समभवत् । कौशिकाभिधो ब्राह्मणः स्वविशेषं निभालयति—

द्विविधा ब्राह्मणा राजन् धर्मश्च द्विविधः स्मृतः ।
प्रवृत्तश्च निवृत्तश्च निवृत्तोऽस्मि प्रतिग्रहात् ।।
तेभ्यः प्रयच्छ दानानि ये प्रवृत्ता नराधिप ।
अहं न प्रतिगृह्णामि' इत्यादि शान्ति० १९२.३९, ४०
निवृत्तं मां चिरं राजन् विप्रं लोभयसे कथम् ।
तपःस्वाध्यायशीलोऽहं निवृत्तश्च प्रतिग्रहात् ।। १९२.७९

महाभारते ब्राह्मणानामपरेऽपि भेदाः प्रकीर्तिताः[2]—

ब्रह्मसमः —विद्वान्, आम्नायदर्शी ।
देवसमः —ऋत्विक्, आचार्यः, स्वकर्मस्थितः ।
क्षत्रसमः —ऋत्विक्, पुरोहितः, मन्त्री, दूतः, अर्थानुशासकः ।
वैश्यसमः —अश्वारोहः, गजारोहः, रथी, पदातिः ।
शूद्रसमः —जन्मकर्मविहीनः, कदर्यः, ब्रह्मबन्धुः ।
ब्राह्मणचाण्डालः —आह्वयकः, देवलकः, ग्रामयाजकः ।[3]

---

१. याज्ञवल्क्यस्मृति २.१०८ । २. शान्ति ७७.२-८ ।

३. परवर्तियुगे ब्राह्मणोचितोच्चवृत्तिं परित्यज्य ये हीनवृत्तिका ब्राह्मणेतरवर्णोचितवृत्तिपरा अभवन् ते वर्णसङ्करा इति अत्रिणावधारितम् । ३७५-३८३ दसब्राह्मणजातके (१) चिकित्सकः (२) घोषक-सन्देशवाहकः सेवकः (३) कमण्डलु-वक्रदण्डधारी करग्राहकः निग्राहकः (४) असंस्कृतदेहो मलिननखदन्तो याचकः (५) हरडामलविक्रेता वाणिजिकः (६) कृषकः (७) अण्डच्छेदक-पुरोहितः, पशुमारकः (८) सार्थस्य पथदर्शकः (९) लुब्धकः (१०) सोमयज्ञमंचाधःशयः । इमे दशनाम्ना ब्राह्मणा अपि पतिता एव व्यावसायिकसांकर्यं निदर्शयन्ति ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अनेन प्रतीयते यन्नामधारिणो वा ब्रह्मबन्धवो वा ब्राह्मणेतरवर्णानां कर्माणि हीनकर्माणि वा अब्राह्मणोचितकर्माणि वा जीविकार्थं स्वीकुर्वन्ति-स्म। अन्यत्र ब्राह्मणानां वैविध्यं तेषां वृत्त्यनुरूपं प्रकल्पितम्। तथा हि भीष्मेण युधिष्ठिरः प्रतिबोधितः —

भूयस्तेषां बलं मन्ये यथा राज्ञस्तपस्विनः।
दुरासदाश्च चण्डाश्च रभसाः क्षिप्रकारिणः॥
सन्त्येषां सिंहसत्त्वाश्च व्याघ्रसत्त्वास्तथापरे।
वराहमृगसत्त्वाश्च गजसत्त्वास्तथापरे॥
कर्पासमृदवः केचित् तथान्ये मकरस्पृशः।
विभाष्यघातिनः केचित्तथा चक्षुर्हणोऽपरे॥
सन्ति चाशीविषनिभाः सन्ति मन्दास्तथापरे।
विविधानीह वृत्तानि ब्राह्मणानां युधिष्ठिर॥ अनु० ३५.१३-१६

क्षत्रियः (क्षत्रः, राजन्यः)

क्षत्रस्य समक्षमिन्द्रस्य वैदिकादर्श आसीत् विश्वजिद् भवेयमिति।[1]
क्षताच्च नस्त्रायतीति स तस्मात् क्षत्रियः स्मृतः॥ शा० २९.१३०

ऋग्वेदस्य राजन्यो महाभारते क्षत्रियनाम्ना प्रायशोऽभिज्ञातः। अत्र युद्धस्य विशेषेण क्षत्रकर्मास्ति—

शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्।
दानमीश्वरभावश्च क्षत्रकर्म स्वभावजम्॥ भीष्म प० ४०.४३

सुखः सांग्रामिको मृत्युः क्षत्रधर्मेण युध्यताम्।
जित्वेह सुखमाप्नोति हतः प्रेत्य महत्फलम्॥ शल्य० १८.६०
न युद्धधर्माच्छ्रेयान् वै पन्थाः स्वर्गस्य कौरवाः।
अचिरेण जितांल्लोकान् हतो युद्धे समश्नुते[2]॥ शल्य० १८.६१

तस्मिन् प्राचीनयुगे आततायिनां साहसात् प्रजा विशेषतो वैश्या रक्ष्या-

१. त्वमिन्द्रासि विश्वजित् सर्ववित्। अथर्व० १७.१.११

२. अपरत्रापि—युद्धाय क्षत्रियः सृष्टः क्रूराय कर्मणे नित्यं प्रजानां परिपालने।
जयन् वा वध्यमानो वा प्राप्नोतीन्द्रसलोकताम्॥ उद्योग १३३.११
क्षत्रियाणां महाराज संग्रामे निधनं स्मृतम्।
क्षत्रियाणां च विहितं संग्रामे निधनं विभो। शान्ति० २२.३,४
क्षत्रधर्मो महारौद्रः शस्त्रनित्य इति स्मृतः।
वधश्च भरतश्रेष्ठ काले शस्त्रेण संयुगे॥ शा० २३.५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

इति क्षत्रियाणां शस्त्रादेर्युद्धकर्मणि भूयिष्ठं प्रशस्तोपयोग आसीदिति मनुना तेषां सार्थकता वर्णिता—

शस्त्रेण वैश्यान् रक्षित्वा धर्ममाहरयेद् बलिम् ।। १०.११९

अपरथा लोके प्रशान्तजीवन-सौरभं क्षात्र-धर्माश्रितं संवर्धत इति मान्धातृ-वचनमधोविधम्—

आत्मत्यागः सर्वभूतानुकम्पा लोकज्ञानं मोक्षणं पालनं च ।
विषण्णानां मोक्षणं पीडितानां क्षात्रे धर्मे विद्यते पार्थिवानाम् ।। शा. ६४.२६

क्षत्रियवृत्तिः

क्षत्रिया युद्धप्रिया आसन्, यतो हि नाम—

'क्षत्रियाणां महाराज संग्रामे निधनं स्मृतम्' । शान्ति० २२.३

राष्ट्रे क्षत्रियाणां प्रयत्नेन सद्वृत्तिर्जागर्ति । तथाहि—

असतां प्रतिषेधश्च सतां च परिपालनम् ।
एष राज्ञां परो धर्मः समरे चापलायनम् ।। शान्ति० १४.१६

अन्यच्च—यज्ञः, विद्या, समुत्थानम्, श्रियं प्रत्यसन्तोषः, उग्रं दण्ड-धारणम्, प्रजानां परिपालनम्, वेदज्ञानं, तपः, द्रविणोपार्जनम्, पात्रेषु प्रतिपादनमित्येतानि राज्ञः कर्माणि । शान्ति० २३.१०-१२

क्षत्रियः कथं जीवन-यात्रां सम्पादयेत् ? महाभारतानुसारेण—क्षत्रियो यदोजसा लभते तदेवाश्नुते[1] । ब्राह्मणोचितभिक्षा वैश्योचित-कृषिश्चानर्हे-क्षत्रियकृत इति विहितमेव यथा कुन्ती वासुदेवाय निवेदयति युधिष्ठिराय तस्य भाविजीवनोपक्रमनिर्धारणप्रसङ्गे—

भैक्षं विप्रतिषिद्धं ते कृषिर्नैवोपपद्यते ।
क्षत्रियोऽसि क्षतात् त्राता बाहुवीर्योपजीविता ।। शा० १३०.२९

क्षत्रियाः पशूनां स्वामिन आसन् । तेषां पशुभ्यो महती सुख-सम्पत्ति-र्बभूवेति महाभारते वर्णितम् ।[2] विराटपर्वणि कौरवविराटराजयोर्महती पशु-समृद्धिर्वर्णिता ।

---

१. उद्योग० ७३.२३ । महाभारतयुगे वर्णचतुष्टयस्यादर्शजीविकाधोविधं परिगणिता—

ब्राह्मणः प्रचरेद् भैक्षं क्षत्रियः परिपालयेन् ।
वैश्यो धनार्जनं कुर्याच्छूद्रः परिचरेच्च तान् । उद्योग० १३०.२८

अत्र शूद्राणां परिचरणं तु तेषां शिल्पव्यवसायोऽस्ति ।

२. प्रजापतिर्हि वैश्याय सृष्ट्वा परिददे पशून् ।
ब्राह्मणाय च राज्ञे च सर्वाः परिददे प्रजाः । २३
षण्णामेकां पिबेद् धेनुं शताच्च मिथुनं हरेत् ।। २४
सस्यस्य सर्वबीजानामेषा सांवत्सरी भृतिः ।। २५ शान्ति० ६० अध्यायतः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

क्षत्रधर्मस्य श्रेष्ठता

महाभारतानुसारेण लोकहितमेव क्षात्रधर्मः प्रशस्यतमो वर्तते[1]। यतो हि नाम—

आत्मत्यागः सर्वभूतानुकम्पा लोकज्ञानं पालनं मोक्षणं च ।
विषण्णानां मोक्षणं पीडितानां क्षात्रे धर्मे विद्यते पार्थिवानाम् ॥
शान्ति० ६४.२०

क्षात्रो धर्मो ह्यादिदेवात् प्रवृत्तः पश्चादन्ये शेषभूताश्च धर्माः ।
अस्मिन् धर्मे सर्वधर्माः प्रविष्टास्तस्माद् धर्मं श्रेष्ठमिमं वदन्ति ॥
शान्ति० ६४.२०,२१

महाश्रयं बहुकल्याणरूपं क्षात्रं धर्मं नेतरं प्राहुरार्याः । शान्ति० ६३.२६

सर्वत्यागा राजधर्मेषु दृष्टाः सर्वा दीक्षा राजधर्मेषु चोक्ताः ।
सर्वे योगा राजधर्मेषु चोक्ताः सर्वे लोका राजधर्मान् प्रविष्टाः ॥
शान्ति० ६४.२९

प्रत्यक्षसुखभूयिष्ठमात्मसाक्षिकमच्छलम् ।
सर्वलोकहितं धर्मं क्षत्रियेषु प्रतिष्ठितम् ॥ शान्ति० ६४.५
लोकज्येष्ठं क्षत्रधर्मं वदन्ति शान्ति० ६४.२५

महाभारतयुगे कतिपयश्रेष्ठराजाः प्रजापालका नीतिज्ञाः, महापराक्रमशालिनो धनुर्धराश्च प्रादुर्भूताः किन्तु समाजे तेषां प्रभावो नासीत् प्रशस्यतमः। परस्परं युध्यमानास्ते राष्ट्रनिर्माण-प्रवृत्तिभिरस्पृष्टा इव प्रतिभान्ति। द्रोणादयः कतिपयब्राह्मणा अपि क्षत्रोपेतं जीवनविधिं चरन्त औदात्त्यं नाभजन्त।

परवर्तियुगे ह्वेनसांगेन दृष्टमासीत्—The second order is that of Kṣatriyas, the race of Kings. The order has held sovereignty for many generation and its aims are benevolence and mercy. Watters Vol. I p. 158.

क्षत्रियाणां कार्याकार्याणि

भारतीयसंस्कृतौ चातुर्वर्ण्य-विधानस्य स्थापनं पालनं च क्षत्रियस्य समाजोपयोगिकर्म प्रशस्तमेव।[2] चतुर्वर्णाद् बहिरासन्—यवन-किरात-गान्धार-

१. क्षत्रियस्य लोकहितं महाभारते भीमकृतबकासुरवधेन प्रमाणीभूतम् । आदिपर्वणि १५२.१७

२. चातुर्वर्ण्यस्थापनात् पालनाच्च शान्ति० ६५.५
चातुर्वर्ण्यस्य 'गोप्तारः संग्रहीतारो दातारः क्षत्रियाः स्मृताः। कर्ण० २३.३३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

चीन-शबर-बर्बर-शक-तुषार-कङ्क-पल्लवान्ध्र-मद्रकौङ्र-पुलिन्द-रमठ-काच-म्लेच्छादयः । एतेषां धर्म-निर्धारणं धर्मपथे नियोगश्च क्षत्रियराजानां कर्मासीत् ।[1]

आत्मार्थं क्षत्रियेण कर्तव्यमासीत्—

यज्ञो विद्या[2] समुत्थानमसन्तोषः श्रियं प्रति ।
दण्डधारणमत्युग्रं प्रजानां परिपालनम् ॥
वेदज्ञानं तथा कृत्स्नं तपः सुचरितं तथा ।
द्रविणोपार्जनं भूरि पात्रेषु प्रतिपादनम् ॥ शान्ति० २३.१०,११

महाभारते सत्क्षत्रियस्य लक्षणं—धनुर्वेदो यज्ञश्च निभालितम् ।[3]

सामाजिक-प्रतिष्ठा

महाभारतीय-समाजे स्वोदात्तचारित्र्येण क्षत्रियाणां साधारणतो महती प्रतिष्ठासीदेव, किन्तु बहूनां तेषां दुर्वृत्तानि समालोच्य पूजनीमुखेन लोकः शिक्षित आसीद्यत्—

क्षत्रिये संगतं नास्ति न प्रीतिर्न च सौहृदम् ।
कारणे सम्भजन्तीह कृतार्थाः सन्त्यजन्ति च ॥
क्षत्रियेषु न विश्वासः कार्यः सर्वोपघातिषु ।
अपकृत्यापि सततं सान्त्वयन्ति निरर्थकम् ॥ शान्ति० १३७.१३,१४

विदुरोऽपि समर्थयति महाभारते सभापर्वणि—

राज्ञां हि चित्तानि परिप्लुतानि सान्त्वं दत्त्वा मुसलैर्घातयन्ति । ५७.१३

महाभाष्यानुसारेण क्षत्रियाणां सामाजिकप्रतिष्ठा ब्राह्मणेभ्यः स्वल्पमेव हीनतरासीत् ।[4] ते ब्राह्मणसदृशा इति प्रोक्तम् ।[5]

वैश्यः

शरीररूप-समाजस्य नाभिरेव वैश्यः ।[6] आर्यसंस्कृतौ प्रमुखो धर्मो यज्ञ-स्तत्र महत्त्वपूर्णं आसीत् ।

---

१. शान्ति० ६५.१३-१५
वेदधर्मक्रियाश्चैव तेषां धर्मो विधीयते ।

२. क्षत्रियाणां विद्या द्विविधासीत्—(क) वेदाध्ययनम् (ख) धनुर्वेदश्च (अस्त्र-शस्त्र-प्रयोगः) । आदि० २१३.८१,८२

३. इष्वस्त्रमेषां देवत्वं यज्ञ एषां सतामिव । आरण्यक० २९७.३३

४. महाभाष्ये १.१.१४

५. अब्राह्मणमानयेत्युक्ते ब्राह्मण-सदृशं क्षत्रियमानयति । महाभाष्ये ६.१.१३५

६. ब्रह्मणो नाभ्या वैश्याः संप्रसूता इति शान्ति० ३०६.८७ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वैश्यानां यज्ञ-संवृत्तिरातिथेय-समन्विता ।
शान्तिपर्वणि ३४७.६

वैश्यस्य जीवनवृत्तिः स्वदाक्ष्येण समभवत् ।[1] वाणिज्य-कृषि-संपृक्तं पशुपालनं तेषां प्रथमकर्मासीत् ।[2] अतएव

कृषिगोरक्ष्य-वाणिज्यं यो विशत्यनिशं शुचिः ।
वेदाध्ययन-सम्पन्नः स वैश्य इति संज्ञितः ॥ शा० १८२.६

वैश्यः कलाविद् प्रकलाविच्चाभवत् ।[3]

भारते वैश्यानां संख्या वैदिककाले सर्वाधिकाभवत् ।[4] ते वैश्याः समाजे सर्वेषामुपभोगाय धनधान्यान्युत्पादयन्ति स्म । तेषामुत्पादितधनस्य सर्वभोग्यत्वमपि प्रतिपादितम् ।[5] मनुना तु निर्दिष्टम्–वैश्यः सर्वभूतेभ्योऽन्नं यत्नतो दद्यात् । निःसन्देहं वैश्यानां कर्मविधिरत्यन्तं कठिन एव । तेषां सत्प्रयत्नेन हि वैदिकजैनबौद्धसंस्कृतीनां प्रवर्तका उन्नायका अनुयायिनश्च जीवन-विन्यास-स्यावश्यकवस्तूनि सम्प्राप्य सर्वेषामभ्युदयायाध्यात्मकर्मणि प्रयुक्ता अभवन् ।

वार्तात्रयं समस्तं वैश्यो न करोति स्म । केवलं कृषिं वा पशुपालनं वा एतेषु एकं वा द्वयं वा त्रयं वा कुर्वन् कश्चित् पुरुषो वैश्योऽभवत् ।

वैश्यानां प्रशस्यं कर्मासीद् दानातिथ्य-क्रियाधर्माः । अपरं च—दानमध्ययनं यज्ञः शौचेन धनसंचयः । शान्ति० ६०.२१ । एतैस्तेषां सद्गतिः सम्मता ।[6]

कालान्तरे क्वचिद् वैश्यानां शास्त्रोचितव्युत्पत्तिशैथिल्येन तेषां शूद्रेभ्यो विशेषो लुप्तप्राय एव संजातः । तेषु बहवः शिल्पकलानैपुण्यं शूद्रवत् प्रतिपन्ना आसन् । तौ द्वौ वर्णौ आनन्तर्यं सम्प्रधार्य प्रतिवेशिवत् ग्रामेषु, नगरेषु च सहवासिनौ बभूवतुः ।[7]

कतिपयवैश्या लौकिकाभ्युत्थान-दिशि स्वस्वोद्योगविशेषेण न केवलं स्वीयोत्पादनवार्ता-वाणिज्यादिभिः समाजस्य कुशलक्षेमविधायका आसन्नपितु

---

१. सौ० ३.१९
२. पितृवत् पालयेद्वैश्यो युक्तः सर्वपशूनिह ।
रक्षया स हि तेषां वै महत्सुखमवाप्नुयात् ॥
प्रजापतिर्हि वैश्याय सृष्ट्वा परिददे पशून् ॥ शा० ६०.२२-२३
३. निरुक्त ६.६ । कलास्ति मानोन्मानम् । प्रकलाश्च गणितं, रत्नपरीक्षा इत्यादि ।
४. तैत्तिरीय संहिता ५.१.१०.३
५. तत्रैव ७.१.१.५
६. आरण्यकपर्व १४९.५१
७. जयशङ्कर मिश्रः —ग्यारहवीं शती का भारत पृ० ११६-११७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

शासनव्यवहार-कौशलेनापश्चिमास्ते भारतीयेतिहासेऽविस्मरणीयाः प्रभवन्ति स्म। वैश्यराजेषु सम्राड्जो हर्षवर्धनस्य महिमा प्रशस्यतमः प्रवेको वर्तते।

शूद्रः

महाभारते सर्वोच्चमनीषिणां सम्मतमासीत्—

सर्वे वर्णा ब्राह्मणा ब्रह्मजाश्च सर्वे नित्यं व्याहरन्ते च ब्रह्म।
तत्त्वं शास्त्रं ब्रह्मबुद्ध्या ब्रवीमि सर्वं विश्वं ब्रह्म चैतत्समस्तम्॥
शान्ति० ३०६. ८७

महाभाष्यानुसारेण द्विविधाः शूद्रा आसन् जन्मना कर्मणा च। श्रेष्ठवर्णा अपि जनाः स्वकर्तव्यविमुखाः सन्तः शूद्रोचितकर्मसु व्यापृताः कर्मशूद्राः प्रोक्ताः। शूद्रेषूच्चवर्गीया महाशूद्रा आसन्।[1] यथाभीराः।

भृतिधारिणो कर्मकराः शूद्रा इति प्रसिद्धमेव। अन्ये शूद्रा धीवराः, रथकाराः, तन्तुवायाः, कुम्भकाराः, नापिताः, त्वष्टारः, कर्मारः, अयस्कारः, रजकाः, चर्मकाराः, कटकारा इत्यादयः सन्तिः। एते सर्वे शिल्पकाराः, शूद्रा अनिरवसिता इति संज्ञिताः। ते अस्पृष्टा नासन्। निरवसिताश्चाण्डालाः, मृतपाश्चास्पृश्या आसन्। ते ग्रामाद् बहिर्वासिताः।[2]

शूद्रवदासन् वृषलाः। वैदेशिका ओण्ड्रदरद-खश-यवन-शकादयः प्रथमं क्षत्रीकृताः पश्चात् सत्पथच्युता वृषलत्वमवापुः।[3] समाजे तेषामनादरः सविशेषमासीत्।[4]

सर्वे शिल्पकाराः परिचारकाश्च शूद्रा आसन्। अपरं चार्यसमुदायेन संगता हीना लोकाः शूद्रवर्गे परिगणिताः। महाभारतस्य स्पष्टं मतं विद्यते—

सर्वभक्षरतिर्नित्यं सर्वकर्मकरोऽशुचिः।
त्यक्तवेदस्त्वनाचारः स वै शूद्र इति स्मृतः॥ शा० १८२.७

अर्थाद् वर्णव्यवस्थाया बहिर्नासीत् कश्चिज्जनः।

आत्मविकासः

कतिपयशूद्रा उच्चकोटिका दार्शनिका विचारकाश्चासन्। गीतायां कृष्णस्तेषां मोक्षाधिकारं दर्शयति। तथाहि—

मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम्॥ ९.३२

---

१. महाशूद्रशब्दो ह्याभीरजातिवचनः। काशिका ४.१.४। महाभाष्ये १.२.७२
२. महाभाष्ये १.१.३६; २.४.१०
३. महाभाष्ये ५.३.६६
४. महाभाष्ये १.३.२८; ३.१.१०७; १.१.५०; २.३.५४; २.३.२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

चाण्डाला अपि ऋषयो भवितुमर्हन्तीति वृत्तं प्रथितमासीत्।[1] ब्रह्म-पुराणानुसारेण ।

यस्तु शूद्रः स्वधर्मेण ज्ञान-विज्ञानवाञ्शुचिः ।
धर्मज्ञो धर्मनिरतः स धर्मफलमश्नुते ॥ २२३.२१

महाभारते धर्मव्याधस्य ज्ञानार्णवः ऋषियोग्यो विभाति[2] । कतिपयशूद्रा यज्ञार्थं दीक्षिता बभूवुर्दक्षिणां च प्रददति स्म ।[3]

कथं कश्चिच्छूद्रो ब्राह्मणादिवर्णत्रयमधिगन्तुं शक्नोतीति महाभारते धर्म-व्याधमुखेन निदर्शितम्—

शूद्रयोनौ हि जातस्य स्वगुणानुपतिष्ठतः ।
वैश्यत्वं भवति ब्रह्मन् क्षत्रियत्वं तथैव च ॥
आर्जवे वर्तमानस्य ब्राह्मण्यमभिजायते ॥ आर० २०३.११,१२

शूद्रा महायशस्विनो भवितुमर्हन्तीति हरिवंशेऽधोविधं निगदितम्—

शूद्रस्तु सेवते विप्राञ्छ्रद्धया नावमन्यते ।
यशः परमवाप्नोति ध्यात्वा नारायणं विभुम् ॥ ८.८

शूद्राणामाजीवः

आदिकालत एव बहवः शूद्राः परिचारका दासाश्च बभूवुः । सकुटुम्बं तेषां स्वामिभिर्भरण-पोषणं कृतमासीत्[4] । अपरे भूयिष्ठाः शूद्राः यदृच्छया शिल्पकाराः, कलाविदश्चासन् । स्वस्वव्यवसायैस्तैः पर्याप्तं धनद्रव्यादिकं लब्धम् । शस्त्रभृतः शूद्रा महाभारते न विरलाः प्रतिभान्ति । तथा हि दम्भोद्भवनामको राजा शूद्र-वैश्य-क्षत्रिय-ब्राह्मणवर्गेषु कंचिच्छस्त्रभृत-

१. कथासरित्सागरे ६.१.१२३-१३१ । हरिकेसबलः श्वपाकोऽपि ऋषिः प्रभूयात्म-गुणैर्भण्डित आसीत् । उत्तराध्ययने १२.१ । शंकरः शूद्रानपि स्वमठे दीक्षा-ग्रहणायाधिकृतवान् । बौद्धधर्मे शूद्रा अपि निर्वाणमधिगमयितुं स्वीकृताः । राधा-कृष्णन् Indian Philosophy. Vol II pt. । 319,438 । शाङ्करभाष्ये व्याख्यातम्—कस्यापि वर्णस्य मानवः सर्वोच्चं ज्ञानं प्राप्तुं शक्नोतीति ।

२. आर० अध्याय २००-२०४

३. शान्ति प० ६०.३८-४०

४. अवश्यंभरणीयः शूद्र इति शान्ति० ६०.३१ । अत्रावधेयं यद्वैज्ञानिकदृष्टया पर्या-लोचनेन द्विविधाः शूद्रा दृश्यन्ते (क) शिल्प प्रवीणाः (Skilled labour) हस्तकौशिलिका वा (ख) व्रातम् (Manual labour) । यथाधुनिकयुगे तथैव प्राचीनकालेऽपि व्रातानां संख्या समधिकासीत् । हस्तकौशलिकाः स्वल्पसंख्यका अपि महिमशालिन आसन् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मन्वेषयति स्म येन द्वन्द्वेन स्वयुद्धकौशलस्य विशेषं साधयतु[1]। शूद्राणां पुरतोऽश्विद्वयस्यादर्श आसीदेव। तौ देवेषु शूद्रौ तथापि नैकविधोद्योग-निष्णातौ सहायपरायणौ सम्भृतौ बभूवतुः।[2]

यद्यपि शास्त्रविधानानुसारेण बहवः शूद्रा निर्धना भवेयुः, तथापि सुसमृद्धिकाः शूद्रा अविरलमासन्नेव।[3]

हस्तकौशलिकाः शूद्रा शनैः शनैर्धर्मशास्त्रानुसारेण प्रतिष्ठापन्ना बभूवुः[4]। तद्यथा—

(१) शिल्पाजीवं भृतिं चैव शूद्राणां व्यदधात् प्रभुः। वायुपु० १७१, १६३

(२) शूद्रस्य द्विजशुश्रूषा सर्वशिल्पानि चाप्यथ।
शङ्खस्मृतिः १.५; मनुस्मृतिः १०.९९,१००

(३) विषमस्थितौ शूद्रः शिल्पेन जीवेत्। याज्ञ० १.१२०

(४) वाणिज्यं पशुपाल्यं च तथा शिल्पोपजीवनम्।
शूद्रस्यापि विधीयन्ते यदा वृत्तिर्न जायते॥ शान्तिप० २९५.४

(५) वैश्यः शूद्रस्तथा कुर्यात् कृषिवाणिज्यशिल्पकम्। पराशरस्मृति २.१९

(६) शूद्रधर्मो द्विजातिशुश्रूषा कर्षणपशुपालन-पण्यव्यवहारचित्रकर्म-नृत्य-गीत-वेणु-वीणा-मुरज-मृदङ्गवादनादीनि। याज्ञ० १.१२० आश्रित्य मिताक्षरायां देवलवचनम्।

(७) शूद्रो लाक्षा-लवण-कुसुम्भ-क्षीर-घृत-मधु-मांसादि-विक्रयं कुर्यात्।
अत्रि० ३७७

(८) शूद्रविषये भोजः समराङ्गणसूत्रधारे निदर्शयति—
कलारम्भोपजीवित्वं शिल्पिता पशुपोषणम्।
वर्णत्रितय-शुश्रूषा धर्मस्तेषामुदाहृतः॥ ७.१५,१६

(९) अग्निपुराणे—शूद्रस्य द्विजशुश्रूषा सर्वशिल्पानि वाप्यथ। १५१.९

(१०) शूद्रो वाणिज्येन जीवेदिति बृहत्पाराशरी। १४.७४

शूद्रधर्माः

धार्मिकदृष्ट्या शूद्राणां कृते द्विजधर्मस्य विधानानां सरलीकरणं समुद्-

---

१. अस्ति कश्चिद् विशिष्टो वा मद्विधो वा भवेद् युधि।
शूद्रो वैश्यः क्षत्रियो वा ब्राह्मणो वापि शस्त्रभृत्॥ उद्योगे ९४.७

२. शान्ति० २०१.२३ ३. अनुशासनपर्वणि ११८.१८

४. वैदिकयुगे हस्तकौशलिका ऋभवो मानवा देवैः स्ववर्गे स्वीकृता देवाः संजाताश्च। अनेन शूद्रकर्मिणां शिल्पज्ञत्वेन समाजे महती प्रतिष्ठा प्रतिभाति। ऋग्वेदे १.११ १.१; १.१६१.२; ४.३३.८; ४.३६.२।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भावितम् ।[1] तथाहि—श्राद्धकर्मणि शूद्रो देवानां ध्यानमात्रं कृत्वा तारस्वरेण नम इत्युच्चरेत् । सोऽग्नये स्वाहेति न वदेत् किन्तु अग्निं ध्यात्वा नम इत्युच्चरेत् । मनुः स्पष्टमेव निर्धारयति—यच्छूद्रः सर्वान् धार्मिककार्य-कलापान् मन्त्रोच्चारं विना करोतु ।[2] स स्वीयधर्मानुष्ठानेन स्वर्गं लब्धुं समर्थः ।[3]

कतिपयशूद्राः पाकयज्ञशालिन आसन् । तथाहि—

स्वाहाकारनमस्कारौ मन्त्रः शूद्रे विधीयते ।
ताभ्यां शूद्रः पाकयज्ञैर्यजेत व्रतवान् स्वयम् ।
पूर्णपात्रमयीमाहुः पाकयज्ञस्य दक्षिणाम् ।।
शूद्रः पैजवनो नाम सहस्राणां शतं ददौ ।
ऐन्द्राग्नेन विधानेन दक्षिणामिति नः श्रुतम् ।।
अतो हि सर्ववर्णानां श्रद्धा-यज्ञो विधीयते ।। शा० प० ६०.३६-३९

अपरश्चोचितः शूद्राणां कृते सान्त्वप्रदः पन्था यद् धर्मविधानानामना-चरणेऽपि तेषां दोषस्तावन्मात्रं न जायते यावद् द्विजातीनाम् ।[4]

षडक्षरशिवमन्त्रस्य स्थाने शूद्राणां शिवमन्त्रः पञ्चाक्षर आसीत् । त्रयो-दशाक्षरो राममन्त्रः सर्ववर्णानां कृते सर्वोच्चफलदायकः समाम्नातः ।[5]

काने महोदयः परवर्तिधर्मशास्त्रकाराणामभिनवशूद्रोचितधर्मोपलब्धि-मौदार्यशालिनीं वर्णयति—

In Śūdrakamalākara passages of Varāha, Vāmana and Bhaviṣya Purāṇas are cited to show that Śūdras are entitled to learn and repeat Mantras of Viṣṇu from the Pāñcarātra texts and of Śiva, the Sun, Śakti and Vināyaka. The Varāha Purāṇa describes the initiation (दीक्षा) of a Śūdra as a devotee of Viṣṇu

---

१. शूद्राणां कृते नैकयज्ञानां विधानं वैदिकयुगे आसीदेव । एतेषु यज्ञेषु सोमयागः प्रथमस्थानीयः । Hist. Dharm. Vol. II. pt. I. page. 157 नैत्यिक-पञ्चमहायज्ञसम्पादनस्य तस्याधिकारः निर्विवादः । तत्रैव पृ० १५८

२. मनु० १०.१२७

३. मनु० १०.१२८

४. नास्याधिकारो धर्मेऽस्ति न धर्मात् प्रतिषेधनम् ।। मनु० १०.१२६

५. श्रीराम जयराम जय जय राम इति राममन्त्रः । शिव-मन्त्रोऽस्ति 'ओ३म् नमः शिवाय ।'

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(as a Bhāgavata). Śūdras are entitled to perform Vratas, fasts, Mahadānas, and Prāyaścittas but without Homa and Japa.[1]

अन्यच्च—

श्रवणात् कीर्तनाद् ध्यानात् पूयन्तेऽन्तेवासिनः । भागवते १०.७०.४३
चतुर्वर्णैस्तथा विष्णुः प्रतिष्ठाप्यः सुखार्थिभिः ।
भैरवोऽपि चतुर्वर्णैरन्त्यजानां तथा मतः ॥
निर्णयसिन्धु-देवप्रतिष्ठाप्रकरणे ।

पूर्वोक्तोदारनीतिर्मनुना प्रागेवाधोविधं निदर्शिता—

धर्मेप्सवस्तु धर्मज्ञाः सतां वृत्तमनुष्ठिताः ।
मन्त्रवर्ज्यं न दुष्यन्ति प्रशंसां प्राप्नुवन्ति च ॥ १०.१२७
यथा यथा हि सद्वृत्तमातिष्ठत्यनसूयकः ।
तथा तथेमं चामुं च लोकं प्राप्नोत्यनिन्दितः ॥ १०.१२८

शूद्रायापि स्वर्गद्वारमपावृतमासीदिति मनुमतम् ।[2] मिताक्षरानुसारेण 'स्त्री-शूद्रयोः प्रतिलोमजानां च त्रैवर्णिकवद् व्रताधिकारः ।

देवालय-दर्शनम्

मन्दिरेषु देवदर्शन-पूजनादिषु सर्वे वर्णास्तथाकथिता अस्पृश्या जनाश्च कतिपयधर्मशास्त्रकारैरधिकृता दृश्यन्ते । तथाहि—

विष्ण्वालयसमीपस्थान् विष्णुसेवार्थमागतान् ।
चाण्डालपुक्कसान् वापि स्पृष्ट्वा न स्नानमाचरेत् ॥
नित्यचारपद्धता उद्धृतम् पृ० १३०

देवयात्रा-यज्ञप्रकरणोत्सव-तीर्थादिषु तथाकथिता अस्पृश्या अपि समगतिका बभूवुरिति प्रागेव दर्शितम् ।

तीर्थस्थानम्

पुष्करे शूद्रो ब्राह्मणवत् स्नात्वा मुक्तो भवति ।[3] ब्रह्मपुराणानुसारेण विष्णुमन्दिरे चाण्डालः प्रविश्य देवपूजां विधातुमधिकृतः । तदर्थं स वन-पुष्पाणि संगृह्णातु ।[4] महाभारते शूद्रोऽपि यज्ञवहनेऽधिकृतः ।[5]

१. History of Dharmaśāstra. Vol II pt. I. p 158.
२. मनुस्मृति १०.१२२
३. महा० आर० ८०.५१
४. ब्रह्मपुराणे अ० २२७
५. चतुष्टयं ब्राह्मणानां निकेतं । चत्वारो युक्ता यज्ञमिमं वहन्ति ॥ आर० १३४.१०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सामाजिकप्रतिष्ठा

वैदिकयुगे पूषा नामको देवता ऋष्यादिभिर्यज्ञेऽभ्यर्हित आसीदित्यनेन शूद्रस्य योग्यतयोच्चस्थानं सुसिद्धं प्रतिभाति। कतिपयशूद्राः स्वीयप्रज्ञानोत्कर्षेणाचार्या उपदेशकाश्चासन्।[1] धर्मज्ञाः शूद्राः पूजिता आसन्।[2]

महाभारतानुसारेण शूद्राय दण्डो नासीदपराधास्तस्य स्युर्नाम।[3] आर्यजनानां संगत्या शूद्राः साधारणतोऽभोज्यान्ना अपि भोज्यान्ना बभूवुर्ब्राह्मणानां कृतेऽपि।[4] शूद्रा ब्राह्मणगृहेषु पाचका अपि बभूवुः।[5]

अन्धदृष्ट्या ते धर्मशास्त्राणि निर्वचन्ति ये वदन्ति—सर्वे शूद्रा अस्पृश्या इति। "अस्पृश्याः सन्तः कथं ते परिचर्यां करिष्यन्ति' इति ते मुग्धधिया द्रष्टुमसमर्थाः। त एव शूद्रा अस्पृश्या आसन् येषां जात्यनुसारेण कार्यक्षेत्रं घृणास्पदं विगर्हितं नृशंसं वाभूत्।[6] काने समर्थयत्यधोविधम्—So there could have been no ban against a Śūdra touching a Brahmaṇa.

शूद्राणां संघस्य प्रेमा महत्त्वपूर्णो विलसति स्म।[7] ते राजानोऽपि बभूवुरिति मनुः पुरावृत्तं स्मारयति।[8] अपराधिनां दण्डप्रकरणे शूद्राणामन्त्यजानां च सम्पन्नतायाः प्रमाणं विद्यत एव। तत्र चाण्डालो मुद्राशतं दातुं दण्डितोभवेत्। याज्ञ० २.२३४।

षोडशे सप्तदशे च शताब्दे दक्षिणभारते राणावंशीया राजानश्चतुर्थवर्णा आसन्। वंशेऽस्मिन् तिम्मः प्रथम आसीत्। ततः परं बहवो महिमशालिनो

---

१. प्राप्य ज्ञानं ब्राह्मणात् क्षत्रियाद्वा वैश्याच्छूद्रादपि नीचादभीक्ष्णम्।
शान्ति० ३०६.८५

२. अपि शूद्रं तु सद्वृत्तं धर्मज्ञमभिपूजयेत्' इति। अनु० ४८.४७

३. निर्दण्डः शूद्र उच्यते। शान्ति० १५.९

४. गौतमधर्मसूत्रे १७.६; मनुस्मृतौ ४.२५३; विष्णुधर्मसूत्र ५७.१६; याज्ञवल्क्यस्मृतिः १.१६६; पराशरस्मृतिः ९.१७। पशुपालक्षेत्रकर्षककुलसंगतकारयितृभोज्यान्ना इत्यादीनि।

५. आर्याधिष्ठिता वा शूद्राः संस्कर्तारः स्युः। आप० ध० सू० २.२.३.४

६. ईदृशाः शूद्रा हीनकोटिकनिरवसिता इति शास्त्रीयं मतम्।
P. V. Kane : Hist. Dharmaśāstra Vol. II pt. I Page 162.

७. आश्रमवासिकपर्वणि ३.११। शूद्राणामाभीराणां च महाभारते गणाः सभा० २९.९ चर्चिताः।

८. मनु० ४.६१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

राजानो विजय-धुरन्धराः समभवन् ।[1]

काव्यकलादिषु शूद्रा अपि क्वचिदपश्चिमा बभूवुः । तत्रासीद् धोयीति विख्यातः कविप्रवरो जात्या रजकः । स लक्ष्मणसेनस्य राजकविरासीत् ।[2]

स्ववृत्तीनामुच्चावचत्वाच्छूद्रा अनिर्वसिता, निर्वसिता इति वर्गद्वये भोज्यान्ना अभोज्यान्ना इति विभक्ता प्रदर्श्यन्ते स्मृतिकारैः ।[3] समानमपरमपि वर्गीकरणं सच्छूद्रानसच्छूद्रान् तेषामाचारविचारदृष्टया विभाजयति ।[4]

कौटिल्यः शूद्राणां सेनामुल्लेखयति ।[5] महाभारतानुसारेण चतुर्वर्णानां सेना बभूवुः । उद्योग० १५३.५, ६ । तदा राजकीयन्यायसभासु चत्वारो ब्राह्मणाः, अष्टौ क्षत्रियाः, एकविंशतिर्वैश्याः, त्रयः शूद्राश्च सदस्या बभूवुः ।[6]

काने महोदयः, शूद्राणां स्थितिं सम्यङ् निभालयत्यधोविधम्—

---

1. Ekāmranātha came to the court of Immadi Aṅkuśa of Rāna family of Śūdras in the 16-17th century. Timma was the first of the distinguished royal family. Jagadeka Raya or Pedda jagadeka Raya is said to have fought with the ruler of Burana Nagari (the city of Burhan), Nizamshah and defcating him, to have captured innumerable horses and elephants. His son Jagadeka Raya is said to have captured as prisoner a Muhammadan chief Chittakhan, defeated the troops of Nuru Khan and Murtija Khan and killed the chief Sujata Khan. Sources of Vizianagar History, Madras. p. 227-36.
२. नीहाररञ्जनराय-बङ्गलौर का इतिहास पृ० ३१३ । सुकुमारसेनः प्राचीन-बांगला पृ० १९
३. याज्ञ० १.१६६ । निर्वसिताः, अभोज्यान्नाश्च वस्तुतोऽन्त्यजाः सन्ति—
रजकश्चर्मकारश्च नटो बुरुड एव च ।
कैवर्तमेदभिल्लाश्च सप्तैतेऽन्त्यजाः स्मृताः ॥ यमस्मृति ३३
एतेभ्यो भिन्नोऽस्ति चण्डालः (श्वपाकः) वृत्त्या निर्घृणाः ।
४. भविष्यपुराणे ब्राह्मखण्डे ४४.३२
५. अर्थशास्त्रे ९.२
६. शान्तिपर्वणि ८६ तमाध्यायतः । वैदिककाले रत्निपरिषदि वर्णचतुष्टयस्य सदस्या आसन् । शतपथे ५.३.१.१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(१) ब्राह्मणा आरक्षितानि कर्माणि परित्यज्य केषुचिद् व्यवसायेषु स्वेच्छया युक्ता भवन्तु नाम ।

(२) स्वसंस्कृते रक्षार्थं ब्राह्मणानां सेनापि व्यवस्थापिता ।

(३) कतिपयशूद्रराजा इतिहासे विख्याता एव ।

(४) पाश्चात्त्या भारतीयवर्णव्यवस्था-निन्दकाः स्वेषु उपनिवेशेषु श्वेततरैः सह कीदृशं नृशंसं व्यवहरन्ति अधुनापि इति मानवताया कलङ्ककारिणी गाथा ।[1] न तथा भारते कदाप्यभवत् ।

वस्तुतो यः समाजो गलितपदवच्छूद्र इति सन्धारयति सोऽधःपतितोऽभवत्, भवति, भविष्यति च । समाजे प्रौढस्थिति-सम्पादनाय शूद्रो यथाप्रतिष्ठास्पदं सम्माननीयः ।[2]

वस्तुस्थितिं न मनागपि जानन्तो ये धर्मशास्त्रकाराः शूद्राणां वेदमन्त्रश्रवणं निषेधन्ति कथं न तेषां श्रवणे व्यासवचनं प्रविष्टं यत्—

शुकेन सह पुत्रेण वेदाभ्यासमथाकरोत् ।
स्वरेणोच्चैः स शैक्षेण लोकानापूरयन्निव ।। शान्ति० ३१५.२३

लोकेषु तदापि शूद्रा अपिहितकर्णा आसन् । अन्यच्च—युधिष्ठिरस्य राजसूययज्ञे शूद्रा अपि दर्शका आसन् । किं ते तत्र पिहितकर्णाः कृता येन ते वेदमन्त्रान्नाशृण्वन् ।

वैदिककालत एव शूद्राणां सामञ्जस्यपूर्णा गतिरभवत् । तेषां यशःप्राप्तये ब्रह्मर्षिभी रचिता मन्त्राः सन्ति ।[3] शूद्राणामपि प्रियो भवितुं मन्त्रा विद्यन्ते ।[4] बृहदारण्यकानुसारेण शूद्राः पोषका एव सर्वेषाम् । तद्यथा—स शौद्रं वर्णमसृजत् । पूषणमियं वै पूषेयेयं हीदं सर्वं पुष्यति यदिदं किंच ।[5] 'शूद्रास्तु सेवका इति धर्मशास्त्रेषु प्रमाणितम् । अस्मिन् प्रकरणे सेवया तानि शिल्पकर्माण्यपि व्यक्तानि, यैस्ते वर्णा आवश्यकवस्तूनि प्राप्नुवन्ति । तद्यथा मनुः —

---

१. Hist. Dharmaśāstra Vol II pt. I, p. 164.

२. जिसके पैर उखड़ गये, वह गिरता हैं । जिस समाज में शूद्र की प्रतिष्ठा नहीं, वह गिरा है और गिरेगा । रामजी उपाध्यायः ।

३. तै० सं० ५.७.६.४ । काठक सं० ४०.१३ । मै० सं० ३.४.८ । वाज० सं० १८.४८ ।

४. अथर्ववेदे १९.३२.८ । १९.६२.१ । वाज० सं० २६.२

५. बृहदारण्यके १.४.१३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यैः कर्मभिः प्रचरितैः शुश्रूष्यन्ते द्विजातयः ।
तानि कारुककर्माणि शिल्पानि विविधानि च ।। १०.१००

मनुः शूद्राणां सद्वृत्तं, धर्मज्ञानं, धर्मेप्सुतां च समर्थयन्नाह—

तथा तथेमं चामुं च लोकं प्राप्नोत्यनिन्दितः ।। १०.१२८

अनेन तेषां मोक्षमार्गः प्रदर्शितः ।

शूद्राः सेवकाः परिचारका वा बभूवुरिति सत्यमेव किन्त्वनेन सत्येन सम्पृक्तं महासत्यमपि विद्यते यत् क्षत्रिया वैश्याश्चापि परिचारका बभूवुः ।[1] क्षत्रियो ब्राह्मणं परिचरेत्, वैश्यश्च ब्राह्मणक्षत्रियौ परिचरेदिति । शूद्रवर्णानां गेहेऽपि परमहंसा अभिक्षन्त । वैखानससूत्रे ८.९

प्रो० राधाकृष्णन् शूद्राधिकारमनुशास्त्रमधोविधं प्रतिपादयति—

Sāṅkhya does not exclude the Śūdras from higher studies. Indian Philosophy. p. 319.

अपरं च—Śaṅkara holds that any man of any caste can attain the highest knowledge. Ibid. p. 616.

शंकराचार्यः प्रवदति—पुरुषमात्र-सम्बन्धिभिर्जपोपवासदेवताराधनादिभिर्धर्मविशेषैरनुग्रहो विद्यायाः सम्भवति । ब्रह्मसूत्र-शाङ्करभाष्यं ३.४.३८ अधिकृत्य ।

दारिद्र्यं शूद्राणां नास्ति सहजातम् । महाभारतानुसारेण लक्ष्मीः सर्ववर्णान् समानरूपेणाश्रयते ।[2]

चाण्डालादयः

कश्चिन्नृशंस एव जीवनविधिरासीच्चाण्डालानाम् । संस्कृतेः प्रथमपदे स्थितास्ते शौचाचारविहीनाः पापपुण्यस्वर्गनरकादिकममन्यमानाः पतित-

---

१. विष्णुस्मृति ११२

२. स्वाध्यायनित्येषु सदा द्विजेषु क्षत्रे च धर्माभिरते सदैव ।
वैश्ये च कृष्याभिरते वसामि शूद्रे च शुश्रूषणनित्ययुक्ते ।। अनु० ११.१८

प्रकरणेऽस्मिन् ज्ञेय यत् केवलं धनवृद्धिरेव लक्ष्मीवासं न द्योतयति, अपितु यथा लक्ष्म्या प्रोक्तम्—

यस्मिंस्तु भावेन वसामि पुंसि संवर्धते धर्मयशोऽर्थकामैः ।। अनु० ११.२०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

जीवनवृत्तिकाः सर्वतः स्वतन्त्रास्ते वन्यजीवनं यापयन्तिस्म ।[1] बहुविधास्ते विविधप्रदेशेषु श्वपाकाः चाण्डालाः, पुल्कसाश्च प्रसिद्धाः ।[2] ते किरातादयो वन्या आर्याणामसुराणां वा जीवन-सौष्ठवं नाचरन्ति स्म । तेषां साधारण-कर्मासीन्नगरसम्मार्जनम् ।

शनैः शनैरुच्चवर्णानां संगमनेन क्वचन शूद्राणां समाजोत्थाने प्रगल्भं प्रतिसमासनं दृश्यते । कल्हणानुसारेणोरशावासी चाण्डालः स्वग्रामवासिनां पक्षधरो विप्रतिकर्तारं राजानं शङ्करवर्माणं बाणेन मरणान्तं गले निचखान ।[3] श्रीदेवनामको ग्रामचाण्डालः क्षेपणीयाश्मना प्रजापीडकं जज्जं जघान ।[4]

कथासरित्सागरानुसारेण चाण्डाला अपि तपोमयजीवनं यापयन्नाध्यात्मिकाभ्युदयमवाप्य पुनर्जन्मनि राजपदं लब्धुं समर्था आसन् ।[5]

एका तत्रासीन्मानवतानुग्राहिणी चाण्डाली, यस्याः सत्त्वशालिवात्सल्यमधोविधं महिमान्वितं चकार महामनीषी कल्हणो राजतरङ्गिण्याम्—

पुरा रथ्यारजःपुञ्जं संमार्जन्ती पिधानवत् ।
सुय्याभिधाना चण्डाली मृद्भाण्डं प्राप नूतनम् ॥
तस्मिन् पिधानमुद्धृत्य सापश्यन्मध्यशायिनम् ।
बालं कमलपत्राक्षं धयन्तं स्वकराङ्गुलीः ॥

---

१. तद्यथा महाभारते शान्तिपर्वणि चाण्डालानां निवेशनं वर्णितम्—

विभिन्नकलशाकीर्णं श्वचर्माच्छादनायुतम् ।
वराहस्वरभग्नास्थिकपालघटसंकुलम् ॥
मृतचेलपरिस्तीर्णं निर्माल्यकृतभूषणम् ।
सर्पनिर्मोकमालाभिः कृतचिह्नकुटीमठम् ।
उलूकपक्षध्वजिभिर्देवतायतनैर्वृतम् ।
लोहघण्टापरिष्कारं श्वयूथपरिवारितम् ॥ १३९.२८-३०

रामायणे चाण्डालभूतस्त्रिशंकुर्वर्णितः —

नीलवस्त्रधरो नीलः पुरुषो ध्वस्तमूर्धजः ।
चित्यमाल्याङ्गरागश्च आयसाभरणोऽभवत् । बाल० ५८.१०

२. तै० ब्रा० ३.४.१४; ३.४.१७; छान्दो० उ० ५.१०.७ । ते सूकरश्वानवत् सम्मिताः ।

३. राजत० ५.२१७, २१८

४. राजत० ४.४७७

५. कथा० ६.१.१२३-१३१ । ब्रह्मपुराणानुसारेण भक्तश्चाण्डालोऽपि 'अभिमत-सिद्धिं लभते । १७८.१८६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मात्रा कयापि त्यक्तोऽसौ सुन्दरो मन्दभाग्यया ।
अथेति चिन्तयन्त्यासीत् सा स्नेहात् प्रस्नुतस्तनी ।।
प्रदूषयन्त्या स्पर्शेन धात्र्याः शूद्रस्त्रियो गृहे ।
तया विहितवृत्तिः स शिशुवृद्धिमनीयत ।।
स सुय्यनामा मतिमान् प्रबुद्धः शिक्षिताक्षरः ।
कस्याप्यासीद् गृहपतेरर्भकाध्यापको गृहे ।। ५.७४-७८

निरर्थोऽपि स राज्ञो यथेष्टं धनं सम्प्राप्यानन्यसाध्यं वितस्तातटमर्दिनीं जलधारां नियन्तुं बन्धं निर्माय स्वीयबुद्धिलाघवातिशयं प्रसाधयामास । तेन कृते सिन्धुवितस्ता-सङ्गमे—

योगशायी हृषीकेशः सुय्यस्याभ्यर्चितस्तटे । ५.१००

अथ च

न कश्यपेनोपकृतं न यत् संकर्षणेन वा ।
हेलया मण्डलेऽमुष्मिंस्तत् सुय्येन सुकर्मणा ।। ५.११३

दस्यूनां विशेषाः

पूर्वोत्तर-पर्वतजातीया वनवासिनो[1] विभान्ति महाभारतीया दस्यवः ।[2] पूर्वं दस्यूनां व्रतमासीत्—आर्याणां स्वस्मिन् प्रदेशे प्रवेशो माभूदिति ।[3] एते दस्यव आर्यसंस्कृतेर्विदूरं वस्तुं प्रयासपरा आसन् । ते वर्णाश्रमधर्मं व्यभिचरन्ति स्म ।[4] तथापि स्वमध्ये ये तापसा अवसन् तान् प्रति तेषां सद्व्यवहारः समुदितः प्रतिभाति ।[5] तत्रासन् सुशीला दस्यव येषां कृते सद्वृत्तिवर्धनाय विधानं कृतमासीत्—

---

१. आर्येतराः सन्ति यवनाः, किराताः, गान्धाराः, चीनाः, शबराः, बर्बराः, शकाः, तुषाराः, कङ्काः, पल्लवाः, अन्ध्राः, मद्रकाः, ओड्राः, पुलिन्दाः, रमठाः, काचाः, म्लेच्छाश्च । एतेभ्यो बहवोऽन्ये च दस्यव इति महाभारते शान्ति० ६५.१४,१५

२. प्रागुत्तरां दिशं ये च वसन्त्याश्रित्य दस्यवः । सभा० २४.२३
मध्यदेशे दस्युग्रामे ब्राह्मणा अप्यवसन् । शान्ति० १६२.४४
दस्योः पर्यायः शवरः इति शा० १६१.३४

३. सभा० २५.१५ ४. शान्ति० ६५.२३

५. तापसेषु हि विश्वासमपि कुर्वन्ति दस्यवः । शान्ति० ८७.२८
पुरा येऽभवन् राक्षसाः पिशाचाः, असुराश्च, तेषु बहवो दस्यवो बभूवुः । अशुचिजीवनवृत्तिका दस्यव इति सम्माननीयम् । सैन्यशक्तिसंघटनेन दस्यूनां महती शक्तिः लोकानामुद्वेजनाय प्राभवदिति शान्तिपर्वणि १३१.१० । दस्यूनां सुलभा सेना रौद्रकर्मसु भारत इति वाक्येन स्पष्टमेव । अन्यच्च—
धनमस्येति पुरुषं पुरा निघ्नन्ति दस्ववः । शान्ति० १७१.३६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मातापित्रोर्हि कर्तव्या शुश्रूषा सर्वदस्युभिः ।
आचार्यगुरुशुश्रूषा तथैवाश्रमवासिनाम् ।। शा० ६५.१७
भूमिपालानां च शुश्रूषा कर्तव्या सर्वदस्युभिः ।
वेदधर्मक्रियाश्चैव तेषां धर्मो विधीयते ।। शा० ६५.१८
पितृयज्ञास्तथा कूपाः प्रपाश्च शयनानि च ।
दानानि च यथाकालं द्विजेषु दद्युरेव ते ।। शा० ६५.१९
अहिंसा सत्यमक्रोधो वृत्तिदायानुपालनम् ।
भरणं पुत्रदाराणां शौचमद्रोह एव च ।। शा० ६५.२०
दक्षिणा सर्वयज्ञानां दातव्या भूतिमिच्छता ।
पाकयज्ञा महार्हाश्च कर्तव्या सर्वदस्युभिः ।।
सर्वलोकस्य कर्माणि कर्तव्यानीह पार्थिव ।। शा० ६५.२२

सर्ववर्णेषु दस्युप्रवृत्तिका लोका आसन् ।[1] तेषां दुष्प्रवृत्तिभिः प्रजानां दुखं न भवेदिति राजधर्मस्य मूलम् । ये मौलिकदस्यवस्तेभ्यः सत्पथ-प्रदर्शनाय राजा प्रायतत । शान्ति० १३१.१०

कतिपयदस्यवश्चौरा आसन्निति शान्तिपर्वणि विवृतमधोविधम्—

धनमस्येति पुरुषं पुरा निघ्नन्ति दस्यवः । १७१.३६

केचन दस्यवो राक्षससमाः पुरुषादा आसन् ।[2]

प्रशस्या दस्यवः

अनूना आसन् प्रशस्या अपि दस्यवः । ते ग्रामेष्ववसन् । दस्युबहुले ग्रामे ब्राह्मणा अपि न्यवसन्त । तत्रासीत् मध्यदेशीयो दस्युविशेषो यः सर्ववर्ण-विशेषवित्, ब्रह्मण्यः, सत्यसन्धः, दानशौण्ड श्च बभूव । स गौतमाभिधाय ब्राह्मणायावासार्थं गृहं, भिक्षां वार्षिकीं वृत्तिं चादात् ।[3]

दस्यूत्थानम्

दस्यूनामार्यीकरणस्य प्रवृत्तयोऽवलोक्यन्ते पुरावृत्ते । तेषामभ्युत्थानाय बहवः प्रयत्नाः कृता आसन् । तेषु परमश्लाघ्यं प्रतिभाति कापव्यस्य कृतित्वम् । स महासत्त्वः स्वयमेव दस्युरासीद् दस्युराजः । प्रकृत्या स समुदा-

---

१. दृश्यन्ते मानवा लोके सर्ववर्णेषु दस्यवः ।
लिङ्गान्तरे वर्तमाना आश्रमेषु चतुर्ष्वपि ।। शा० ६५.२३
महाभारते शान्तिपर्वणि गौतमो दस्युभावं गत आसीत् । १६२.४४ । स उच्चकुले जातोऽपि अवेदविदासीत् ।

२. शान्ति प० १६६.१८-२२ ३. शान्ति० १६२.३०-३२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

चारनिष्ठो बभूव ।[1] स स्वप्रजा आदिशत्—

ये ये नो न प्रदास्यन्ति तांस्तान् सेनाभियास्यति ।
शिष्टयर्थं विहितो दण्डो न वधार्थं विनिश्चयः ।
ये च शिष्टान् प्रबाधन्ते धर्मस्तेषां वधः स्मृतः ॥ शा० १३३.२०
ये हि राष्ट्रोपरोधेन वृत्तिं कुर्वन्ति केचन ।
तदेव तेऽनुमीयन्ते कुणपे कृमयो यथा ॥ शा० १३३.२१
ये पुनर्धर्मशास्त्रेण वर्तेरन्निह दस्यवः ।
अपि ते दस्यवो भूत्वा क्षिप्रं सिद्धिमवाप्नुयुः ॥ शा० १३३.२२

परिणामतो महाभारतानुसारेण—

अनुरज्यन्ति भूतानि समर्यादेषु दस्युषु । शा० १३१.१४

कीदृशी सा मर्यादा दस्युभिः परिपालनीया—

अयुध्यमानस्य वधो दारामर्शः कृतघ्नता ।
स्त्रियो मोषः परिस्थानं दस्युष्वेतद्विगर्हितम् ॥ शा० १३१.१५
तस्मात् सशेषं कर्तव्यं स्वाधीनमपि दस्युभिः ।
न बलस्थोऽहमस्मीति नृशंसानि समाचरेत् ॥ १३१.१७

पूर्वोक्तैः सन्दर्भैः प्रतिभाति यद् दस्यवः क्वचित् परसम्पत्तिहरणेऽपि निष्णाता आसन् । अपरविधा आसन्निषादा वन्याजीवाः ।

निषादाः

वैदिककाले आर्येतरजनानामेका संज्ञासीत् 'निषादः' इति ।[2] त आर्यव्रतानि न स्वीचक्रुः । चतुर्वर्णेभ्यः पृथगेव ते वनवासिन आसन् । महीधरानुसारेण निषादा भिल्ला (भीलाः) आसन् । तेषां ग्रामावासोऽप्यभवत् ।

---

१. स वृद्धान्धपितरावपूजयत् । शान्ति० १३३.६ । आरण्यकान् प्रव्रजितान् ब्राह्मणानपालयत् । शान्ति० १३३.८ । दस्यूनां कृते तस्यानुशासनमासीत्—स्त्रियं भीरुं, शिशुं तपस्विनं च मा वधीः । अयुध्यमानो न हन्तव्यः । स्त्रियो बलान्न ग्राह्याः । गोब्राह्मणानां स्वस्तये तदर्थं नित्यं योद्धव्यम् । शा० १३३.१३, १४ । सस्यं न अपहन्तव्यम् । सीरविघ्नं मा कृथाः । सर्वस्वेनापि ब्राह्मणानामुपचितिः (पूजार्चना) कार्या ।

२. The name might easily be applied to the whole body of aborgines outside the Aryan organisation. Vedic Index.

रामायणे निषादाः सन्ति दासा (शा) इति अयो० ८४.१६, ८५.६
ते क्वचित् समुद्रद्वीपाद् भारते कदाचिदागता इति महाभाते आदि पर्वणि २४.२ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

क्वचिन्निषादा स्थपतयो (शासकाः) बभूवुः ।[1] निषादैः सहार्याणां सहभावो विरलोऽपि प्रतिष्ठास्पदमवर्तत । विश्वजिद्यज्ञे यजमानो राजा निषादपल्ल्यां कञ्चित्कालं निनाय ।[2]

निषादानां प्रथमपुरुषस्तेषां सम्भवश्च महाभारतेऽधोविधं वर्णितः शान्ति-पर्वणि—

ततोऽस्य विकृतं जज्ञे ह्रस्वाङ्गः पुरुषो भुवि । ५९.१०१
दग्धस्थाणु-प्रतीकाशो रक्ताक्षः कृष्णमूर्धजः ॥ ५९.१०२
तस्मान्निषादाः सम्भूताः क्रूराः शैलवनाश्रयाः ।
ये चान्ये विन्ध्यनिलया म्लेच्छाः शतसहस्रशः ॥ ५९.१०३

निषादानां राजा महाभारतीये युगे दशार्णसीमान्त एकलव्य आसीत् । तत्र निषादानां महती सैन्यशक्तिरवर्तत यतो हि नामार्जुनेन तेषां भीषणं युद्धं प्रावर्तत[3] । तदा दक्षिणभारत उपसमुद्रं द्रविडाः, अन्ध्राः, माहिषकाः कोल्लाश्चासन् ।[4] निषादा दस्युसमा इति महाभारतस्य सम्मतम् ।[5] यत्र सरस्वती नदी पृथ्वीं प्रविष्टा तत्र निषादराष्ट्रस्य द्वारम् ।[6]

रामायणे निषादानामपरविधेतिहासो वर्तते । वाल्मीकेरधःश्लोकेन तेषां प्रतिष्ठा हीना प्रतिपादिता—

मा निषाद प्रतिष्ठां त्वं गमः शाश्वतीः समाः ।
यत्क्रौञ्च-मिथुनादेकमवधीः काममोहितम् ॥

रामायणानुसारेण गङ्गातटे तत्रासीन्निषादराजस्य गुहस्य राष्ट्रम् । अत्र निषादस्तु जातिनाम ।[7] गुहस्य बहवोऽमात्या आसन् । तेन कृतेन रामातिथ्येन अर्घ्यादिसमर्पणेन तस्य सांस्कृतिकोत्कर्षः सिध्यति ।[8] रामोऽपि तं भुजाभ्यां साधुवृत्ताभ्यां पीडयन् वार्तां चकार । रामस्तस्य कुशलं वनविषयकमपि पृच्छतिस्म । अनेन निषादानां वन्यजीविका प्रमुखा प्रतिभाति ।[9] गुहो 'मत्स्यमांसमधूनि' संगृह्य भरतायोपायनं चक्रे ।[10] निषादानामर्जितमासीत्—

---

१. कात्यायन-श्रौतसूत्रे प्रोक्तम् । १.१.१२
२. कौषीतकिब्राह्मणे २५.१५
३. आश्व० ८४.७-१०
४. आश्व० ८४.११
५. शान्ति० ३.१०
६. आर० १३०.१४
७. तत्र राजा गुहो नाम रामस्यात्मसमः सखा ।
निषादजात्या बलवान् स्थपतिश्चेति विश्रुतः ॥ अयो० ५०.३३
८. स रामेण सख्यमवासवानासीत् । अयो० ८४.६,१२ ।
९. अपि ते कुशलं राष्ट्रे मित्रेषु च वनेषु च । अयो० ५०.४२
निषादराजस्यामात्याः, सचिवाः, महती समृद्धिश्चासन्निति प्रसङ्गेऽस्मिन् वर्णितम् ।
१०. अयो० ८३.१०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

आर्द्रं शुष्कं तथा मांसं वन्यं चोच्चावचं तथा ।। अयो० ८४.१७

जैमिनिर्निषादस्थपति-न्यायोल्लेखेन तेषां राजपदं प्रकटयति ।[1]

महाभारत एकलव्य इति प्रख्यातधनुर्धरस्योदात्तचरितगाथा वर्तते ।[2] स धनुर्वेदैकनिष्ठः, द्रोणाचार्यमृत्प्रतिमागृहीतास्त्रभ्यासः, अद्वितीय-सत्यव्रतः, दत्ताचार्यदक्षिणहस्ताङ्गुष्ठः, दक्षिणः,[3] सर्वतोऽजेयः, श्रीकृष्णायोजितस्वर्ग-साधनः[4], अपरपरशुराम[5] एवासीत् । महाभारतानुसारेण एकलव्यस्तु विशिष्ट एवाधोविधम्—

एकलव्यं हि साङ्गुष्ठमशक्ता देवदानवाः ।
सराक्षसोरगाः पार्थ विजेतुं युधि कर्हिचित् ।। द्रोण० १५६.१९
किमु मानुषमात्रेण शक्यः स्यात् प्रतिवीक्षितुम् ।
त्वद्धितार्थं तु स मया हतः संग्राममूर्धनि ।। द्रोण० १५६.२१

एकलव्यस्य पुत्रोऽपि अश्वमेधप्रकरणेऽर्जुनेन रोमहर्षणमयुध्यत ।[6]

सर्ववर्णानामभ्युदय-योजना

विश्वेषां या कल्याणयोजना वैदिकयुगे प्रवर्तिता सा सनातनीभूतैव राजते ।[7] महाभारते सार्ववर्णिकं सामाजिकसौष्ठवमभिप्रेतमस्ति । तद्यथा—

अक्रोधः सत्यवचनं संविभागः क्षमा तथा ।
प्रजनः स्वेषु दारेषु शौचमद्रोह एव च ।।
आर्जवं भृत्यभरणं नवैते सार्ववर्णिकाः ।। शा० ६०.७

पारस्परिकसाह्येन चातुर्वण्यं वर्धत इति महाभारते प्रोक्तम्—

लोका ह्येवं विवर्धन्ते ह्यन्योऽन्यं समुपाश्रिताः ।। वनपर्व १०३.२

परान्नभोजका लोकाः समादृता नासन् । तद्यथाङ्गिरा विहितवान्—

ब्राह्मणान्नेन दरिद्रत्वं क्षत्रियान्नेन पशुस्तथा ।
वैश्यान्नेन तु शूद्रत्वं शूद्रान्नेन नरकं ध्रुवम् ।। ५६

---

१. जैमिनिसूत्र ६.१.५१-५२
२. आदिपर्वणि १२३.१०-३८
३. द्रोण० १८.१ १७
४. उद्योगपर्वणि ३७.७१; मुसल० ७.१०
५. अस्यन्नेको वनचरो बभौ राम इवापर । द्रोण १५६.१८
६. आश्व० ८४.८
७. देवानां पारस्परिकसन्नतिं प्रगायन् लब्धसंज्ञानो महर्षिर्जनेभ्यः सामाजिकसौष्ठवस्य मूलमन्त्रं संज्ञानं वर्णयति—
यथेमां वाचं कल्याणीमावदानि जनेभ्यः ब्रह्मराजन्याभ्यां शूद्राय चार्याय च स्वाय चारणाय च ।। यजु० २६.२
अर्थात् सर्वे जनाः परस्परं सन्नतिं (आदरभावं) संवर्धयन्तु । अयमेव पन्था येन सर्वप्रियत्वं समाप्नुयात् । अयमेव शान्तिपथः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्वीयश्रमेणोत्पादितमन्नमेव भोज्यमिति साध्वाचारः। परेषां शोषणस्य निरोधायेयमाचारिकयोजना संप्रवर्तितासीत्।

तपआश्रिता दानधर्माग्निना शुद्धा शूद्रा अपि स्वर्गं यान्ति।[1] अपरथा वासुदेवोक्त्या प्रमाणिता शूद्राणां परा गतिः —

एवं हि धर्ममास्थाय येऽपि स्युः पापयोनयः।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम्। आ० १९.५६

पुण्याधिगमेन स्वर्गो मुक्तिश्च शूद्रेभ्योऽपि सुलभौ। तथा हि—

ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा राजसत्तम।
न वियोनिं व्रजन्त्येते स्नातास्तीर्थे महात्मनः। आर० ८०.५१

तपसि निरताः केचित् शूद्रा अश्विद्वयस्यानुगामिनोऽभवन्। महाभारतानुसारेण—

अश्विनौ तु मतौ शूद्रौ तपस्युग्रे समाहितौ॥ शान्ति० २०१.२३

यद्यपि महाभारतेऽवरवर्णेभ्य उपदेश-याजनादिकं निषिद्धं तथापि क्वचिदुपेक्षितोऽपि शूद्रो विशुद्धजीवन-बलि-हविर्धान-देवातिथिपूजनादिभिर्मरणानन्तरं राजवंशे जन्मलाभस्य नास्त्यनर्हः।[2]

अन्यच्च वृत्तमहिम्ना तु
शूद्रो वैश्यत्वं क्षत्रियत्वं च वैश्यः।
वृत्तश्लाघी क्षत्रियो ब्राह्मणत्वं
स्वर्गं पुण्यं ब्राह्मणः साधुवृत्तः॥ अनु० ११९.२३

पौराणिकविधानानुसारेण ब्राह्मणो वा शूद्रो वा म्लेच्छो वा पापात्मा वा यदि शिवदीक्षां गृहीत्वा षडक्षरमन्त्रेण शिवलिङ्गमेकेनापि पुष्पेण भक्त्यार्चति स तामेव सद्गतिं लभते या महायज्ञकर्तृणां सुलभा।[3]

प्रो० राधाकृष्णन् चाण्डालानामपि 'आध्यात्मिकदृष्टि-प्रपत्ति निदर्शयति[4]—He (Śaṅkara) was willing to regard all who possess spiritual insight as his gurus, whether they were Brahmins or Pariahs. "He who has learned to look upon the phenomenal world in the light of non-dualism is my true teacher, be he a Caṇḍāla (Pariah) or a dvija (twice born). This is my conviction. मनीषपञ्चक।

राजशेखरानुसारेण चाण्डालोऽपि मातङ्गो महाराजहर्षस्य कविगोष्ठी-

---

१. आश्वमेधिकपर्वणि ९४.३४ २. अनुशासनपर्वणि १०.१७-३१
३. स्कन्दपुराणे पृ० ९४२ गीताप्रेस-संक्षिप्त-हिन्दी-अनुवाद
४. Indian Philosphy. Vol. II Page 617

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सदस्यो बाणमयूरादिभिः सह व्यराजत।[1] अहो गुणग्राहिता पूर्वेषां सभ्यानाम्।

वर्णसंकरता

पुरा वर्णसाङ्कर्यं भृशमभवत्। आर्या आर्येतराश्च परसंस्कृतिस्वीकरणेन असवर्ण-विवाहविधिना सङ्गमनेन च परस्परं सम्मिश्रिता बभूवुः। महाभारतस्यारण्यकपर्वणि वर्णसांकर्यस्य भूयस्त्वं परिलक्ष्य निगदितम्—

जातिरत्र महासर्प मनुष्यत्वे महामते।
सङ्करात् सर्ववर्णानां दुष्परीक्ष्येति मे मतिः॥

वैदिककालादेव वर्णसङ्करता द्विविधा प्रावर्तत—(१) वर्णानामनुलोग-प्रतिलोमविधिना समागमात् सन्तति-प्रजनेन (२) स्ववर्णोचितकर्मानुष्ठाने वैषम्यमनुभवतामवरवर्णानां कर्मणां व्यवसायानां स्वीकरणम्। उभयविधे ते कामवृत्तिवशीभूते प्रावर्तताम्। मनुः शनकैरेतत्समर्थयति।[2]

महाभारते वर्णसंङ्करजातिप्रजातीनां साङ्गोपाङ्गवर्णना प्ररोचिता। वैदिकयुगेऽवरवर्णीयाभ्यः स्त्रीभ्यः समुत्पादिता सन्ततिः पितृवर्णीयाभवत्। न तथा महाभारतीये युगे विदुरो दास्या पुत्रो बभूव। तस्य पिता व्यास ऋषिर्वा ब्राह्मणो वासीत्। तस्य पिता पराशरः ऋषिरासीत् माता च सत्यवती क्षत्रियासीत्। महाभारतीये युगे अवरवर्णीयस्त्रीभ्यः संसर्गेण प्रजातं सन्ततिबाहुल्यं प्रतीयते। समाजे तेषां प्रतिष्ठापनमधोविधं निष्पादितम्—

पतिः	स्त्री	सन्ततेर्वर्णः
१. ब्राह्मणः	क्षत्रिया	ब्राह्मणः
२. ब्राह्मणः	वैश्या	वैश्यः
३. ब्राह्मणः	शूद्रा	शूद्रः, पारशवः
४. क्षत्रियः	वैश्या	क्षत्रियः
५. क्षत्रियः	शूद्रा	शूद्रः
६. वैश्यः	शूद्रा	वैश्यः
७. क्षत्रियः	ब्राह्मणी	सूतः
८. वैश्यः	ब्राह्मणी	वैदेहकः
९. शूद्रः	ब्राह्मणी	चाण्डालः
१०. वैश्यः	क्षत्रिया	वन्दी, मागधः
११. शूद्रः	क्षत्रिया	निषादः
१२. शूद्रः	वैश्या	आयोगवः

---

१. अहो प्रभावो वाग्देव्या यन्मातंग-दिवाकरः।
श्रीहर्षस्याभवत् सभ्यः समो बाणमयूरयोः॥

२. तद्यथा—कन्यारत्नं दुष्कुलादपि।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पूर्वोक्तेषु समागमेषु प्रथमषडवर्गोऽनुलोमः शेषषड्वर्गः प्रतिलोम इति प्रथितम् । अस्मिन् प्रकरणे विधानमासीत्—

यथा चतुर्षु वर्णेषु द्वयोरात्मास्य जायते ।
आनन्तर्यात् प्रजायन्ते तथा बाह्याः प्रधानतः ।। अनु० ४०.१५

वर्णसङ्करताया इयत्ता नासीत् । वर्णसंकरवर्गीयाः श्रेष्ठवर्णैः, हीनवर्णैः, वर्णसङ्करैर्वा समागमेनापरवर्णसङ्कराणां जनका बभूवुः । शुद्धवर्णा जना अपि वर्णसंकरवर्गीयैः समागता बहुविधान् मिश्रवर्णसङ्करानुदपादयन् ।[1]

एतेषां वर्णसङ्कराणां जीविका कथं प्रचरेदिति समाजशास्त्रविद्भिरबधारितमासीत् । तथा हि

वर्णसंकरः	व्यवसायः
पारशवः	कुलसेवा
सूतः	स्तुतिश्रावणम्
वैदेहकः	अन्तःपुररक्षणम्
चाण्डालः	वधः
वन्दी	वाक्यजीवनः
निषादः	मत्स्यघाती
आयोगवः	तक्षा
मैरेयकः	माधुकः
मद्गुरः	नाविकः
श्वपाकः	मृतपः
कारावरः	चर्मकारः
पाण्डुसौपाकः	त्वक्सारव्यवहारवान्

महाभारतानुसारेण बहुविधा इमे वर्णसङ्करा जात्या प्रच्छन्नाः, प्रकाशा वा भवन्तु नाम । ते सर्वे स्वकर्मभिरभिज्ञाता भवन्ति ।[2] चतुर्वर्णस्य कर्माकर्मादीनि निर्धारितानि सन्ति किन्तु वर्णसङ्कराणां प्रायशो विगर्हितानि कर्माणि स्वेच्छयापि स्वीकृतानि दृश्यन्ते ।[3]

---

१. अनुशासन पर्वणि ४०.१६-२८

२. कर्मभिः सज्जनाचीर्णैर्विज्ञेया योनिशुद्धता । अनु० ४८.३९
आर्यरूपसमाचारं चरन्तं कृतके पथि ।
स्ववर्णमन्यवर्णं वा स्वशीलं शास्ति निश्चये ।। अनु० ४८.४४

३. अनुशासन पर्वणि ४०.२९-३१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्राचीनयुगेऽनुलोमविवाहेनानन्तर-संयोगेन जाताः प्रायः, पितृजातीया बभूवुः। वैदिकसाहित्ये, पुराणेतिहासे च बहूनां ब्राह्मणानां ऋषीणां राज्ञां च विवाहो वर्णेतराभिः कन्यकाभिरभवत्। ततः समुत्पन्नाः सन्ततयः पितृवर्णीया समाम्नाताः। कन्यायाः का जातिर्वर्णो वर्गो वेति प्रश्नो विरलमेवोच्च-वर्गीयेषु विचारणीयः समभवत्। मनुर्व्यावहारिकदृष्टचा प्राक्तनरीति-मुदाहरति—

यादृग्गुणेन भर्त्रा स्त्री संयुज्येत यथाविधि।
तादृग्गुणा सा भवति समुद्रेणैव निम्नगा॥ ९.२२
अक्षमाला वसिष्ठेन संयुक्ताधमयोनिजा।
शारङ्गी मन्दपालेन जगामाभ्यर्हणीयताम्॥ ९.२३
एताश्चान्याश्च लोकेऽस्मिन्नपकृष्टप्रसूतयः।
उत्कर्षं योषितः प्राप्ताः स्वैः स्वैर्भर्तृगुणैः शुभैः॥ ९.२४

इन्द्रः पुलोमदैत्यस्य कन्यां शचीमुदूढवान्। हारीतर्षि-वंशे ऐतरेय-ब्राह्मणस्य कर्ता इतराया दास्याः पुत्रो माण्डूकिः ऋषिः। सत्यकामो दास्या पुत्रो ब्राह्मणास्पदं लेभे। अगस्त्यस्य पत्नी लोपामुद्रा विदर्भराजस्य कन्यासीत्। महर्षिच्यवनस्य पत्नी सुकन्या महाराजशर्यातेः पुत्री बभूव। च्यवनस्य पुत्र ऋचीको महाराजगाधेः कन्यां सत्यवतीमुदूढवान्। महर्षि-जमदग्नेः पत्नी रेणुका महाराजस्य प्रसेनजितः कन्यकासीत्। ऋष्यशृङ्गस्य पत्नी राजकुमारी बभूव। एतेषु विवाहबन्धेषु कन्याया अवरवर्णीयत्वेन तस्याः सन्ततेरवरवर्णत्वं न प्राभवत्। परतो विश्रवा इति प्रख्यात ऋषिः, यस्य सन्ततौ राक्षसकुलोद्भवपत्नीभ्यो राक्षसादय सञ्जाताः। विश्रवसः पत्नी केकसी सुमालिनो राक्षसस्य कन्यासीत्। तस्याः सन्ततिः क्रमशो रावणः, कुम्भकर्णः शूर्पणखा विभीषणश्चासीत्। ते सर्वे राक्षसा मातृवर्गानुरूपाः।

महाभारतानुसारेण धृतराष्ट्रस्य पुत्रो युयुत्सुर्वैश्यायां जातस्तस्य पुत्रेषु द्वितीयसंख्याको गणितः।[1] स तु सर्वत्र क्षत्रोचितसंभावनां लेभे। स द्रौपद्याः स्वयंवरे स्पर्धालुरासीत्। द्रोणपर्वानुसारेण स धनुष्मतां वरः, शूरः, सत्य-सन्धः, महाबल आसीत्।[2] स पाण्डवानामनुपस्थितौ हस्तिनापुर-रक्षको नियुक्त आसीद् युधिष्ठिरेण। परीक्षितः शैशवे पाण्डवराज्यशासनधुरं निर्वहुति स्म।[3] धृतराष्ट्राय जलाञ्जलिः पाण्डवैर्युयुत्सुमग्रेसरं कृत्वा प्रादीयत।

---

१. आदिपर्वणि १०७.३६; १०८.२
२. द्रोणपर्वणि ९.५५
३. ततो युयुत्सुमानाय्य प्रव्रज्यन् धर्मकाम्यया।
राज्यं परिददौ सर्वं वैश्यापुत्रे युधिष्ठिरः॥ महाप्रास्थानिकपर्व १.६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

हीनकन्ययोढो जनो हीनभावमात्मनो मेने। महाभारतानुसारेण कृष्णेन प्रेरितोऽपि कर्णः पाण्डवान् मिलितुं नागच्छत्। तेन प्रोक्तम्—सूतकन्याभिरुढोऽहमयोग्योऽस्मि एतदर्थस्य। यथा पूर्वोक्तमधमवर्णापि कन्या श्रेष्ठवर्णैर्विवाहिना पूज्या बभूव। मनुर्दृष्टान्तयति—वसिष्ठस्य मन्दपालस्य च ऋषिद्वयस्य पत्न्यौ अधमवर्णीया अपि पूज्ये बभूवतुः। परवर्तियुगेऽनुलोमविवाहानां बहूनि उदाहरणानि कथासरित्सागरे निदर्शितानि।[1]

ऐतिहासिकयुगेऽपि वर्णसङ्करता-दोषस्तु केवलं साधारण-जनानां नियमनाय प्रयुज्यमानो दृश्यते। धनिका राजानो वा 'कन्या रत्नं दुष्कुलादपि' इति मनुविधानं स्मरन्तो यस्मात् कस्मादपि वर्णाद् विवाहार्थं कन्यां परिजगृहुः। विवाह-विषये वधूवरयोरुभयपक्षयोर्वर्णविचारस्तु सामान्यजनानां कृते आसीत्। कतिपयोदाहरणानि राजादीनां तद्विषयक-स्वेच्छाचार-प्रदर्शनाय पर्याप्तानि

वरः	कन्या
अग्निमित्रनामा ब्राह्मणः	मालविका क्षत्रिया
गुप्तवंशीयो राजा वैश्यः	कम्बराजकन्या ब्राह्मणी
हरिचन्द्रः प्रतिहारवंशीयः क्षत्रियः	ब्राह्मणी, क्षत्रिया च

महाकवि बाणस्य माता ब्राह्मणी बभूव, किन्तु तस्य विमाता शूद्रासीत्। स चासौ शूद्रा तस्यापत्यानि चैकस्मिन् कुटुम्बे न्यवसन्। राजशेखरो ब्राह्मणः क्षत्रियामुदूढवान्।

खीष्टाब्दद्वादशशतकं यावदन्तर्वर्णविवाहविधिरनादृतो नाभवत्। पश्चात् स्वजातावेव विवाहस्य रीतिः साधारणतः प्राचरत्।

व्यवसाय-संकरता

निस्सन्दिग्धमिदं यत् प्राचीनभारते वर्णसङ्करतेव व्यवसाय-संकरतापि आसीदेव। तथाहि—वैश्योचितकृषिर्वा पशुपालनं वा जीवनवृत्तिरनतिश्रमेण बहुफला स्वतन्त्रव्यवसायः सर्वैः स्वीकृता। ईदृशा गोकामा ब्राह्मणा वा क्षत्रिया वा शूद्रा वा बाहुल्येन समभवन्।

प्राणसंशयकारी क्षत्रव्यवसायो ब्राह्मणैरपि वैदिकयुगे परवर्तिकालेऽपि स्वीकृतः। बहवो वैदिकर्षयः श्रेष्ठा योद्धारो बभूवुः। ब्राह्मणानां सेनापि स्वतन्त्रं विहिता यथा कौटिल्येन सूचितम्।[2] ब्राह्मणा बाहुल्येन क्षत्र-

१. कथासरित्सागरे ३.४.३२२; ३.१.७२; ३.४.२०२ ३.४.३८६; ४.१.५९; ५.१.५३ इत्यादीनि।

२. अर्थशास्त्रे ९.२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वृत्ति-समाश्रिता बभूवुः । एतादृशानां जनपदो ब्राह्मणक इति पाणिनिर्निर्दिशति ।[1] ब्राह्मणानां सेना कल्हणेन राजतरंगिण्यां वर्णिता । (७.१४८०, ८.१०१३,१०७१ । ते सेनाधिकारिणोऽपि बभूवुः ।

यथा वर्णसंकरता तथैव व्यवसाय-संकरतापि शास्त्रकारैर्निन्दिता ।[2] केवलं स्वरक्षार्थं गवार्थं च शस्त्रधारणं सम्मतं ब्राह्मणानां कृते बहुभिः शास्त्रकारैः ।[3] ब्राह्मणसेनानां ब्राह्मणसेनानायकानां च श्रेष्ठपराक्रमगाथा इतिहासे भूरिशः श्रूयन्ते । वैश्यानामपि शस्त्रधारणमसाधारणस्थितावेवानुमतम् । महाभारतानुसारेण—

राज्ञो नियोगाद् योद्धव्यं ब्राह्मणेन विशेषतः । शल्य० ६५.४५

व्यावसायिक-सङ्करता यथाधुना तथा प्राचीनयुगे मध्ययुगेऽपि च विशेषमनर्हा न सम्मता । शास्त्रविहितजीविकोपार्जनं तत्र दुष्करमनुभूय स्वकार्येण सहापरवर्णानां कार्यं कुर्वाणा बहुसंख्यका जना दृश्यन्ते । आधिभौतिकैश्वर्याल्लौकिकसम्मानाधिकरणं जायते । तत्र च स्वाभाविकी स्पृहा मानवतां सर्वत्र शाश्वतं निगृह्णाति । अस्यां स्थितौ सर्वे वर्णाः श्रैष्ठ्यसूचकं राजपदं प्राप्तुं; क्षात्रधर्मानुसरणमविगर्हितं मन्यन्ते स्म, यद्यपि तत्रासीद् व्यावसायिकवर्णसंकरताभयम् ।[4] महाभारतस्य दिग्विजय-प्रकरणे बहवो शूद्रराजाश्चर्चिताः[5] । रामायणे गुहनामको निषादराजो रामस्य सखा सुप्रथितः । तस्य राज्यं गङ्गा-तटादयोध्यां यावत् विस्तृतमासीत् । षष्ठशताब्दे हरिश्चन्द्र-नामको चाहमान-ब्राह्मणो जोधपुरप्रदेशे राजासीत् प्रतिहारवंश-प्रतिष्ठापकः । दशमशताब्दे मेवाडप्रदेशे गुहिलोतवंशीया राजानो ब्राह्मणा बभूवुः ।[6] परमारवंशप्रतिष्ठापको ब्राह्मणो राजा प्रसिद्ध एव ।[7]

---

१. अष्टाध्यायी ५.२.७१

२. आपस्तम्बः—परीक्षार्थोऽपि ब्राह्मण आयुधं नाददीत । १.१०.२९.७

३. प्राणसंशये ब्राह्मणोऽपि शस्त्रमाददीत । गौतम ७.२५

गवार्थे ब्राह्मणार्थे वा वर्णानां वापि सङ्करे ।
गृह्णीयातां विप्रविशौ शस्त्रं धर्मव्यपेक्षया ।। बौ० ध० २.२.८०

४. ह्वेनसांगानुसारेण तत्कालीनाः खजुराहो-प्रदेशस्य, सिन्धु-प्रदेशस्य उज्जयिन्याः, चित्तौरस्य, महेश्वरपुरस्य च राजानो ब्राह्मणा आसन् । मतिपुरस्य राजा शूद्र आसीत् । क्षत्रियेतराणां राजपदग्रहणस्य बृहत्तरसूची 'History of Dharmaśāstra. Vol. III. p. 39' द्रष्टव्या ।

५. सभापर्व २४.१५; २७.९,१०,२५

६. भार्गव—प्राचीन भारत का इतिहास पृष्ठ ३३४

७. K. M. Munshi; Glory That Was Gurjardesa p. 198.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मध्यप्रदेशे कोटगढस्य राजा देवराजो वैश्य आसीत्। तस्य वंशीया नैकराजकुलानां शासनाधिकारिणो बभूवुः।[1] दशमशताब्दे पञ्चनदप्रदेशे ब्राह्मणानां राज्यमासीत्। तेषां राजधानी काबुलनगरे बभूव काबुलतः सतलजपर्यन्तं शासनाय।[2] दशमशताब्दे कश्मीराणां राजा यशस्करनामको ब्राह्मणो बभूव।[3]

नवमशताब्दे काबुल-गान्धार पञ्चनद-प्रदेशानां ब्राह्मणो राजा कल्लरो लल्लियो वा नवराजवंशं हिन्दूशाहीति ख्यातं स्थापयामास। वंशेस्मिन् कमलुक-भीमदेव-जयपालानन्दपाल-त्रिलोचनपाल-भीमपालाश्च राजानो गजनवी-महमूदस्य तस्य पितुः सुबुक्तगीनस्य चाक्रमणैर्विहन्यमाना अस्तं गताः।

स्वयोग्यतया हीनवर्णा अपि जना उच्चवर्णोचित-व्यवसायं लब्धुं समर्था आसन्। तद्यथा कल्हणो वर्णयति—कश्मीरे क्षेम इति ख्यातो नापितोऽनन्त-देवस्य राजमन्त्री बभूव। जात्या वैश्यो हलधरः सर्वाधिकारी, सेनापतिः प्रधानमन्त्री चोच्चोच्चतरपदेन समवर्धत।[4]

व्यावसायिक-सङ्करताया उदाहरणं विषमस्थित्यापन्नानां सविशेषं परिचीयते। तथा हि—भागवतनुसारेणानन्तरद्वयवर्णयोः व्यवसायाः स्वीकरणीयाः।[5] मनुर्ब्राह्मणानां कृतेऽवधारयति वैपत्तिकवृत्तीः—

विद्या शिल्पं भृतिः सेवा गोरक्ष्यं विपणिः कृषिः।
धृतिर्भैक्ष्यं कुसीदं च दश जीवनहेतवः॥ १०.११६

याज्ञवल्क्योऽपि उपरिविधं समर्थयति।[6]

गृहीतव्यावसायिकसाङ्कर्या अपि ब्राह्मणाः प्रायः सत्त्वशीलं व्यवहरन्तो दृश्यन्त इति प्रमाणयति मार्कोपोलो त्रयोदशशतकस्य भ्रमणयात्री—You must know that these Brahmins are the best merchants in the world and the most truthful, for they would not tell a lie for any thing on earth.

Marco Polo Ed. H. Yule Vol II p. 350.

---

१. श्री हीरालाल—मध्य प्रदेश का इतिहास पृष्ठ ५७
२. मथुरालाल शर्मा -भारतीय संस्कृति का विकास पृष्ठ २९७
३. पुरुषोत्तमलाल भार्गव—प्राचीन भारत का इतिहास पृष्ठ २६७
४. राजतरंगिणी ७.२०२, २१०, २२१
५. भागवत ११.७१.४७-४९
६. याज्ञ० ३.४२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वर्णसङ्कराणां कृतेऽपि आत्मोद्धारयोजना मनीषिभिः कृता दृश्यते। तेऽपि स्वीयोदारवृत्त्या सिद्धिं लभन्ते।[1] वर्णसङ्करताया नियन्त्रणाय विहितमासीत्—बुद्धिमान् नरो विचार्य प्रजायेत, यतो हि नाम वर्णसङ्करसन्ततिर्भवसागरात् तारयितुमक्षमा भवति।[2] विपश्चितः प्रमदासु न प्रसज्जेत।[3] आदिशति भीष्मो महाभारते—

योनिष्वेतासु सर्वासु संकीर्णास्वितरासु च।
यत्रात्मानं न जनयेद् बुधस्ता परिवर्जयेत्॥ अनु० ४८.४९

वर्णसंकरलोकानां जात्युत्कर्षापकर्षौ समभवताम्। तद्यथा गौतमः सूचयति—

वर्णान्तरगमनमुत्कर्षापकर्षाभ्यां सप्तमे पञ्चमे वाचार्याः। सृष्टचन्तरजातानां च। ४.१८-१९

रामायणमहाभारतादीनां समकालिके पाणिनेरष्टाध्यायी पतञ्जलेर्महाभाष्यं च पूर्वोक्तवर्ण-व्यवस्थां समर्थयतः, अथ च लोकानां व्यवसायानुरूपिणीं जातिव्यवस्थामिदंप्रथमतया स्पष्टं निदर्शयतः।[4] उचितकार्मणव्यवसायात्मक-व्यापृतिभिः स्वजातिः सार्थकीभवति। केषांचिद्वर्णानां विशेषतो वैश्यशूद्रयोर्लोकाः प्रायशः स्वपितृणां वा संघानां वा गणानां वा व्यवसायं परम्परया स्वभावतोऽनुकुर्वन्ति स्म।[5] अस्यां स्थितौ तेषां संघगणादीनां स्वस्वविशेषान्धारयन्ती जातिर्व्यवसायानुरूपं[6] प्रवर्तिता

---

१. गोब्राह्मणार्थे साहाय्य कुर्वाणा वै न संशयः।
आनृशंस्यमनुक्रोशः सत्यवाक्यमथ क्षमा॥
स्वशरीरैः परित्राणं बाह्यानां सिद्धिकारकम्॥ अनु० ४८.३३,३४

२. निहीनयोनिर्हि सुतोऽवसादयेत्। अनु० ४८.३५ ३. अनु० ४८.३७

४. महाभारते वर्णो जातेर्भिन्नार्थे प्रयुक्तोऽधःश्लोके—
दोषैरेतैः कुलघ्नानां वर्णसंकरकारकैः।
उत्साद्यन्ते जातिधर्माः कुलधर्माश्च शाश्वताः॥ भीष्म० २३.४३
उपदेशो न कर्तव्यो जातिहीनस्य कस्यचित्। अनु० १०.४

५. एवं विधानेन ब्राह्मणानां गोत्रचरणाः संविमक्ताः।

६. एकस्मिन् जीवने यद् यद् व्यवसितं तज्जातिरिति महाभारते—
जातिं स्मराम्यहं ब्रह्मन्नवधानेन मे शृणु॥ अनु० १०.४८
जातिस्मरश्च भविता स्वर्गं चैव गमिष्यसि। आर० २०६.५
उष्ट्रस्य सुमहद्वृत्तं तन्निबोध युधिष्ठिर।
जातिस्मरो महानुष्ट्रः प्राजापत्ययुगोद्भवः॥ शा० ११३.३
ईदृशी जातिस्तु गौरवास्पदमिति—
'लभेत जातिस्मरतां सदा नरः।' आर० ३.३२ इति वाक्येन प्रमीयते। अत एव तदा लोकेषु व्यवसायाभिमानोऽपि प्रतीयते।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

बभूव । व्यवसायेभ्यो नामिता जातिः शनैः शनैः जननेन प्राप्यत इति प्रमाणभूतम्[1] । वस्तुतो जातिस्तु गुणधर्मानुसारिणी प्रादुरासीत् । येषां जनानां गुणा धर्माश्च समाना आसन्, ते समजातीया बभूवुः ।[2]

शिल्पकारास्तेषां जातयः

वैदिकयुगे शतशो व्यावसायिकशिल्पकर्मव्यापृता जना स्वशिल्पाभिज्ञाता आसन् ।[3] रामायणयुगे तत्रासन् मणिकाराः, कुम्भकाराः, सूत्रकर्मकराः, शस्त्रोपजीविनः, मायूरकाः[4], क्राकचिकाः, वेधकाः, रोचकाः, दन्तकाराः, सुधाकाराः, गन्धोपजीविनः, सुवर्णकाराः, कम्बलकारकाः, स्नापकाः, वैद्याः, धूपकाः, शौण्डिकाः, रजकाः, तुन्नवायाः, ग्रामघोषमहत्तराः, शैलूषाः, कैवर्तका इति । एतेषु बहवः परवर्तिजातिविशेषं सूचयन्ति ।

पाणिनेरष्टाध्यायी पताञ्जलेर्महाभाष्यं च भारतीय-सामाजिक-प्राचीन-जीवने सनातन-व्यवसायव्यापृतानां लोकानामुदाहरणं सविस्तरमधोविधं कुरुतः —कुलालः कुम्भकारो वा, तक्षा (वर्धकिः), मूर्तिकारः, सुवर्णकारः, खनकः, रजकः, तन्तुवायः, चर्मकारः, रज्जुकारः ।

एते चान्ये च वर्गाः स्वभावतः स्वस्वव्यवसायमानुवंशिकं कर्तुं स्वाधिकारं मन्यमाना इव गणीभूय संघीभूय च समाजे सुप्रतिष्ठिताः[5] समानगुणधर्म-योगेन जातिकारका बभूवुः ।[6]

---

१. जननेन या प्राप्यते सा जातिः । महाभाष्ये ५.३.५५ न तु व्यवसायेनेति स्पष्टमेवात्र । जन्मना जातिः ।

२. अमरकोशे ३. यजुर्वेदे ३०.५-२० परिगणिताः ।

४. मयूरग्राहिणो वा मयूरपिच्छालङ्कारकारिणः ।

५. शिल्पमजानतां जीवनं कष्टमयं भवति । पदकुसलमाणव-जातक ।
किच्छावुत्ति असिप्पस्स । जनसन्धजातक ४६८
काने महोदयः प्रमाणयति—That the professional castes were wealthy and well organised follows from the Dharmaśāstra works and epigraphic records. In this connection the words श्रेणि, पूग, गण, व्रात and संघ deserve to be carefully studied. All these were called समूह (group, or वर्ग according to Kātyāyana. Hsit. of Dharmaśāstra Vol. II pt I page 66

६. अन्यत्रापि हंसा इव श्रेणिशो यतन्ते । ऋ० १.१६३.१०
पूगो वै रुद्रः । कौषी० ब्रा० १६७ । व्रातेन जीवति । पाणिनि० ५.२.२१
नानाजातीया अनियतवृत्तय उत्सेध-जीविनः संघा व्रातः । तेषां कर्म व्रातं तेन कर्मणा जीवतीतिव्रातीनः । महाभाष्य ५.२.२१ अष्टाध्यायी ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पाणिनि-पतञ्जल्यादि-वैयाकरणंमन्यमानानां मनीषिणां मतेन जातेरर्थो धात्वर्थेन संसृष्ट एव जननाज्जातिरिति। किन्तु व्यवहारे समानवृत्तिकानां समव्यवसायानां चैकजातिः स्वाभाविकी सती बहुसंख्यकानां पृथग्जनानां मध्ये शाखा-प्रशाखा-तन्तु-सन्ततिभिः प्राचीनकालादद्यावधि समाजं प्रगृह्णन्ती शनकैः प्रचरत्येव।

वर्णानां सम्भूय समुत्थानम्

क्षत्रं ब्रह्ममुखं चासीद् वैश्याः क्षत्रमनुव्रताः।
शूद्राः स्वकर्म-निरतांस्त्रीन् वर्णानुपचारयन्॥ बालकाण्डे ६.१९

सामाजिक-व्यवस्थायाः साहित्य-सौरभं वर्धयितुं मनीषिणः पारलौकिकमप्यभ्युपायान् लोकसमक्षं निदर्शयन्ति स्म। यथा—

यो ब्राह्मणस्य साहाय्यं कुर्यादर्थेषु कर्हिचित्।
क्षत्रियः स शुभाँल्लोकान् प्राप्नुयादिति मे श्रुतम्॥
क्षत्रियः क्षत्रियस्यैव कुर्वाणो वधमोक्षणम्।
विपुलां कीर्तिमाप्नोति लोकेऽस्मिन् परत्र च॥
वैश्यस्यैव तु साहाय्यं कुर्वाणः क्षत्रियो युधि।
स सर्वेषु लोकेषु प्रजा रञ्जयते ध्रुवम्॥
शूद्रं तु मोक्षयन् राजा शरणार्थिनमागतम्।
प्राप्नोतीह सत्कुले जन्म सद्रव्ये राजसत्कृते॥

आदिप० १५०.२१-२४

सर्वेषामभ्युदयायाधोविधं निर्धारणं प्रभवति—

ब्राह्मणे दममव्यग्रं क्षत्रिये तेज उत्तमम्।
दाक्ष्यं वैश्ये च शूद्रे च सर्ववर्णानुकूलताम्॥
प्रजापतिः प्रजाः सृष्ट्वा कर्म तासु विधाय च।
वर्णे वर्णे समाधत्त एकैकं गुणवत्तरम्॥

सौप्तिक० ३.१९, १८

अत एव परस्परं साहचं नितान्तमपेक्षितमासीत्।

यज्ञे सर्वे वर्णाः परितर्पिताः।[1]
सर्वभूतपरित्राणं क्षत्रधर्म इहोच्यते। शान्ति० ३४७.६
वैश्योऽधिगम्य द्रव्याणि ब्रह्मकर्माणि कारयेत्॥ विराट० ४५.५

---

१. ततृपुः सर्ववर्णाश्च तस्मिन् यज्ञे मुदान्विताः। सभा० ३२.१८। कतिपययज्ञप्रक्रियासु शूद्रस्य कर्तृत्वमावश्यकमङ्गं बभूव। यथा गवामयनस्य महाव्रते। अनेन प्रकारेण यज्ञस्य सङ्गतिकरणमित्युद्देश्यं सम्बभूव। तै० सं० ७.५.९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

रामायणमहाभारतयोः सर्वश्रेष्ठचरितनायकाश्चतुर्वार्णिकाः शोभन्ते । भारतीयसंस्कृतेरुत्थानाय चतुर्वर्णानां योगदानं महत्त्वपूर्णमिति सुप्रथितम् ।

परस्पर-साहाय्यस्यापरथा निदर्शनमधोविधं प्रावर्तत—

ब्रह्म पर्यचरत् क्षत्रं विशः क्षत्रमनुव्रताः ।
ब्रह्मक्षत्रानुरक्ताश्च शूद्राः पर्यचरन् विशः ।। आदि० ९४.९

इतोप्यधिकं प्रशस्तपदं भजते ब्राह्मणानां चतुर्वर्णस्योद्धारणम् । तत्र वर्तते व्यासस्योदाहरणम्—

श्रावयेच्चतुरो वर्णान् कृत्वा ब्राह्मणमग्रतः । शा० ३१४.४५

अन्यत्रापि—सर्वाभ्युदयकृत् हि सः (ब्राह्मणः) ।

युज्यते ब्राह्मणः कुर्वन् विश्वमेतद्बिभर्ति हि । कात्या० स्मृति१२.४,५

तपसो ज्ञानाग्निना लोकं प्रकाशयितुं ब्राह्मणः प्रायतत । सोऽयं ब्राह्मणस्यादर्शः क्षत्रियमपि देशरक्षार्थं प्राणपणं प्रयतितुं प्रैरयत् । महाभारते निगदितम्—क्षत्रियश्चातुर्वर्ण्यस्य रक्षणे वर्तते । सभा प० ५.११६ ।

रामायणे सर्ववर्णानां भ्रातृत्वं प्रकाशितम्—

मनुर्मनुष्याञ्जनयत् कश्यपस्य महात्मनः ।
ब्राह्मणान् क्षत्रियान् वैश्यान् शूद्रांश्च मनुजर्षभ ।। अरण्य० १४.२९

चतुर्वर्णानां सहचारः समेषामभ्युत्थानाय बभूव । तथा हि वारणावतमुपगम्य पाण्डवाश्चतुर्वर्णानां गृहान् गत्वा लोकानमिलन् । कौरवपाण्डवानामस्त्रकौशलप्रदर्शनं द्रष्टुं चातुर्वर्ण्यं समागतम् ।

राष्ट्ररक्षणप्रयासा ब्राह्मणानामुदात्ततमा दृश्यन्ते । अलेक्जेन्डरस्य भारताक्रमणे सति ब्राह्मणानां तेन युद्धं प्रशस्यतमं पदं भजते भारतीयेतिहासे ।

चतुर्वर्णलोकाः सम्मिल्य ब्रह्ममहमन्वस्थापयन् । तद्यथा महाभारते—

ततस्ते ब्राह्मणाः सर्वे क्षत्रियाश्च सुविस्मिताः ।
वैश्याः शूद्राश्च मुदिताश्चक्रुर्ब्रह्ममहं तदा ।।
आदिपर्वणि १५२.१८

महाभारतयुगे कस्यापि ब्राह्मणस्यापूर्वकार्यसिद्धिं विलक्ष्य प्रभूतप्रशंसालोका आनन्दनिर्भरास्तस्य सम्मानं ब्रह्ममहेन कुर्वन्ति स्म । ब्रह्मपुराणे ब्राह्मणो न केवलं सर्वेषां मानवानामपितु समस्तभूतानां हितं कुर्यादिति प्ररोचितमधोविधम्—

सर्वलोकहितं कुर्यान्नाहितं कस्यचिद् द्विजः ।
मैत्री समस्तभूतेषु ब्राह्मणस्योत्तमं धनम् ।। २२५.५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भागवतेऽपि समर्थितम्—

वयं हि ब्राह्मणास्तात क्षमयार्हणतां गताः । ९.१५.३९
क्षमया रोचते लक्ष्मीर्ब्राह्मी सौरी यथा प्रभा ॥ ९.१५.४०

मनुर्ब्राह्मणस्य चातुर्वर्ण्यसेवां निदर्शयति—

क्षत्रियं चैव वैश्यं च ब्राह्मणो वृत्तिकर्शितौ ।
बिभृयादानृशंस्येन स्वानि कर्माणि कारयेत् ॥ ८.४११

प्रजापीडकं राजानं च्यावयितुं ब्राह्मणाः क्वचन प्रायोपवेशं समाचरन्ति स्म । तत्र विफलीभूतास्तेऽग्नौ निपत्य प्राणान् विजहुः ।[1]

यज्ञ-समाजोत्सवादिषु लोकरञ्जककार्यक्रमेषु च चतुर्वर्णानां दर्शका-निर्विशेष सहभाजो बभूवुः । चतुर्वर्णा जनाः पाण्डवकौरवाणां राज-कुमाराणामस्त्रकौशलं द्रष्टुं समागताः ।[2] महाभारते सर्वसामान्यरङ्गस्य परिकल्पना वर्तते, यत्र राजानस्तेषां प्रजाश्च समानं सभाजयन्ति स्म ।[3] नगरशोभा चतुर्वर्णानां समानसंयोगेन समादृता । तत्र विशेषणमासीत् 'चातुर्वण्यजनाकुलम् ।'[4]

समानमानदण्डेन चातुर्वर्ण्यसहभावापेक्षिणो गुणाः प्रकाशिताः । तथा हि विष्णुराणे—

दया समस्तभूतेषु तितिक्षा नातिमानिता ।
सत्यं शौचमनायासो मङ्गल प्रियवादिता ॥
मैत्र्यस्पृहा तथा तद्वदकार्पण्यं नरेश्वर ।
अनसूया च सामान्यवर्णानां कथिता गुणाः ॥ ३.८.३६, ३७

ब्राह्मणानां ज्ञानेन क्षत्राणां शस्त्रधारणेन वैश्यानामन्नोत्पादनेन शूद्राणां शिल्परचनया च सर्वे वर्णाः सर्वेषामुपकारपरायणा भवन्त्विति शास्त्रीयं विधानम् ।

वर्णपरिवर्तनम्

वर्णव्यवस्था यावन्निरूढाधुनादृश्यते तावन्मात्रं पुरा नासीत् । तथा हि—

---

१. अत्रान्तरे चित्ररथं संवृद्धायासदुर्ग्रहम् ।
अनिच्छन्तोऽवन्तिपुरे प्रायं चक्रुर्द्विजातयः ॥
उपेक्ष्यमाणास्ते दर्पात्तेनागणितभूभुजा ।
ज्वालिते ज्वलने देहान् बहवो जुहुवुः शुचा ॥ राजतरंगिणी ८.२२२४,२५

२. आदि प० १२४.१५ ३. आदि० १२६.१९

४. सभापर्व १९.१३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१. ब्राह्मण आसुरभाषा-प्रयोगेण, अशुद्धभाषणेन वा म्लेच्छोऽसुरो वा भवति। शत० ३.२.१.२४

२. कस्यापि वर्णस्य पुरोहितः ब्राह्मणो भवति।

३. संस्कार-विहीनाः पतित-सावित्रीका व्रात्या भवन्ति।
आश्व० गृ० १.१९, ५.७।

४. धर्माचरणेनाब्राह्मणोऽपि ब्राह्मणो भवति। अधर्माचरणेन ब्राह्मणोऽपि अब्राह्मणो भवति।[1]

५. अन्यवर्णोचितकर्माचरणेन ब्राह्मणः शूद्रो जायते।[2] इदं व्यावसायिक-सांकर्यस्य निदर्शनम्।

६. ब्राह्मणोचितगुणा यदि शूद्रे वर्तन्ते, स ब्राह्मणोऽस्ति। शूद्रोचितगुणा यदि ब्राह्मणे भवन्ति स शूद्रो भवति।[3]

७ गुणचरित्राचारादिभिर्ब्राह्मणत्वं, न तु जन्मना।[4]

८. शनकैस्तु क्रियालोपादिमाः क्षत्रियजातयः।
वृषलत्वं गता लोके ब्राह्मणादर्शनेन च। मनु० १०.४३
वेदमपठन् स्वजीवनकाले वंशजैः सह शूद्रो जायते। मनु० २.१६८

९. ब्राह्मणेतरा ब्रह्मकर्म-प्रतिपालनेन ब्राह्मणा भवन्ति। शुभाचरणैः शूद्रोऽपि ब्राह्मणो जायते। ब्रह्मपुराणे २२.३३.१४, ६२ तथा ३७.४०। भागवतेऽपि पूर्वोक्तमतस्य समर्थनं दृश्यते।[5]

१०. गौतमबुद्धः कर्मणा जातिं सम्भावयति[6] न तु जन्मना।

---

१. धर्मचर्यया जघन्यो वर्णः पूर्वं पूर्वं वर्णमापद्यते जातिपरिवृत्तौ। अधर्मचर्यया पूर्वो वर्णो जघन्यं जघन्यं वर्णमापद्यते जातिपरिवृत्तौ। आपस्तम्बः।

२. बौ० ध० सूत्रे १.५. ९५।

३. महाभारते शान्तिपर्वणि १८२.८।
कारणं हि द्विजत्वे च वृत्तमेव न संशयः। वनपर्वणि ३१३.१०८
वृत्ते स्थितस्तु शूद्रोऽपि ब्राह्मणत्वं नियच्छति। अनुशासनपर्वणि १४३.५१
महाभारतेऽन्यत्रापि—आरण्यकपर्व २०६.१०; अनु० १४४.२६, ४६, ७७

४. शान्ति० १८१, १८२ अध्यायेषु भृगुवचनम्।
युधिष्ठिरस्यापि वन० १०८.७१-७६

५. यस्य यल्लक्षणं प्रोक्तं पुंसो वर्णाभिव्यञ्जकम्।
यदन्यत्रापि दृश्येत तत्तेनैव विनिर्दिशेत्॥

६. कम्मुना वसलो होदि कम्मुना होदि ब्राह्मणो।
इत्यादि। अय्यो हुत्वा दासो होति, दासो हुत्वा अय्यो होति। मज्झिमनिकाये।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

केवलं जात्यापि ब्राह्मणः स्वेच्छयावरवर्णीयां जातिं स्वीकरोति स्म, अन्यथा वा पतितब्राह्मणो जातिब्राह्मणो वाभवत्।[1]

जातिपरिवर्तनस्यैतिहासकानि पौराणिकानि च निदर्शनानि सन्त्येव। महात्मनामाशीर्वचसा कश्चिज्जनो जातिपरिवर्तनमवाप। भृगोर्वचनेन वंशजैः सह वीतहव्यो ब्राह्मणोऽभवत्।[2] जन्मना वैश्यस्य नाभारिष्टस्य पुत्रद्वयं ब्राह्मणत्वमवाप।[3] शुनकस्य वंशजा चातुर्वर्णिका अभवन्।[4] विष्णपुराणानुसारेण गुरुगोघातकः पृषध्रः शूद्रो बभूव।[5]

भागवतानुसारेण ऋषभदेवस्य पुत्रशतके ८१ पुत्रा ब्राह्मण-शौण्डा बभूवुः। वायुपुराणनुसारेण राज्ञो नहुषस्य पुत्रः संयातिस्तपसा ब्राह्मणो बभूव,[6] नाभागो वृष्टिश्च क्षत्रियौ बभूवतुः। तयोः सन्ततयो वैश्या आसन्। वलिनामकक्षत्रियराजवंशाद्वालेयाः क्षत्रिया ब्राह्मणाश्च संजाताः।[7]

ऐतिहासिकराजवंशा अपि जातिपरिवर्त्तनस्य महत्त्वपूर्ण-निदर्शनं प्रकटयन्ति। तथाहि—कदम्बवंशीयो ब्राह्मणो मयूरशर्मा राजासीत्। तस्य वंशजाः क्षत्रोचितवर्मोपाधिनालंकृताः।[8] पूर्वोक्तं सर्वं सारसमाहितमधोविधम्—

Instances might be multiplied, but what has been adduced is enough to show that caste was an elastic feature of the ancient Hindu social structure and that a Hindu was raised to a higher or degraded to a lower caste in accordance with his deeds.

S. C. Sarkar : Some Aspects of the Earliesr Social History of India. pp. 58, 59.

स्वजीवने वारंवारं पूर्वोक्तेन विधिना जातिपरिवर्त्तनं शक्यमासीत्। महाभारतानुसारेण वाह्लीकदेशे

तत्रैव ब्राह्मणो भूत्वा ततो भवति क्षत्रियः।
वैश्यः शूद्रश्च वाह्लीकस्ततो भवति नापितः॥ कर्ण० ३०.५३

---

१. तपःश्रुताभ्यां यो हीनो जातिब्राह्मण एव सः। महाभाष्ये २.२.६
२. भृगोर्वचनमात्रेण स च ब्रह्मर्षितां गतः। महा० अनु० ३१.५४
३. हरि० ११.६५८। विष्णु पु० ४१.१६।
४. हरि० २९.१५१९; विष्णु० ४, ८.१।
५. 'भाग'० ५.४.१३
६. 'वायु यु०' ९७.१४।
७. ब्रह्मपुराण ७.२६।
८. एपिग्राफिका इण्डिका अष्टमे भागे पृ० २४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नापितश्च ततो भूत्वा पुनर्भवति ब्राह्मणः।
द्विजो भूत्वा च तत्रैव पुनर्दासोऽपि जायते ।। कर्ण० ३०.५४

अस्पृश्यता

वैदिकयुगे भारते नासीच्चाण्डालान् प्रत्यपि अस्पृश्यताभाव इति काने महोदयः सप्रमाणं साधयति।[1] परवर्तियुगे यदास्पृश्यताभावः प्रावर्तत, तदापि स्पृष्टिदोषापवादः सांस्कृतिकसहिष्णुतां प्रमाणयति।[2] तथाहि

(१) देवयात्राविवाहेषु यज्ञप्रकरणेषु च।
उत्सवेषु च सर्वेषु स्पष्टास्पृष्टिर्न विद्यते ।। अत्रि २४९

(२) ग्रामे तु यत्र संस्पृष्टिर्यात्रायां कलहादिषु।
ग्रामसंदूषणे चैव स्पृष्टिदोषो न विद्यते ।।
स्मृतिचन्द्रिकायां शातातपमतमुद्धृतम्।

(३) संग्रामे हट्टमार्गे च यात्रादेवगृहेषु च।
उत्सवक्रतुतीर्थेषु विप्लवे ग्रामदेशयोः ।।
महाजलसमीपेषु महाजनवरेषुच।
अग्न्युत्पाते महापत्सु स्पृष्टास्पृष्टिर्न विद्यते ।।
प्राप्यकारीन्द्रियं स्पृष्टमस्पृष्टिस्त्वतरेन्द्रियम्।
तयोश्च विषयं प्राहुः स्पृष्टास्पृष्टचभिधानतः ।।
स्मृत्यर्थसारे पृष्ठ ७९

महत्सु तटाकादिषु चाण्डालसम्बन्धोऽपि नास्ति कश्चिद्दोषः। भागक्ते विषयोऽयमुदारदृष्ट्या समाहितः। तथाहि

श्रवणात् कीर्तनाद् ध्यानात् पूयन्तेऽन्तेवसायिनः।
तव ब्रह्ममयस्येश किमुतेक्षाभिमर्शिनः ।। १०.७०.४३

अस्पृश्यतायाः कतिपयकारणानि मनोविज्ञानानुवृत्त्या काने महोदयेन साधु दर्शितानि।[3] तथाहि—(१) निर्घृणव्यवसायः (२) प्रतिलोमजनिः।

---

1. History of Dharmaśāstra Vol. II Pt. I P. 165-7
मनुमतेन जात्या केवलं चाण्डाला एवास्पृश्याः। परवर्तियुगेऽस्पृश्यानां संख्या समवर्धत। तत्रैव पृ० १७२।

२. अनुदारमतयः शास्त्रीयोक्तीः संकीर्णाभिप्राय-संगतं व्याख्यान्ति। तेषां प्राथमिकी भूमिका वर्तते—'यदि स्पर्शो भवति अज्ञानवशादिति।' अत्र अज्ञानवशादिति पदं तेषां बुद्धिविपर्ययं व्यनक्ति।

3. The ancient Hindus had a horror of uncleanliness and they desired to segregate those who followed unclean professions like those of sweepers, workers in hide, tanners, guardians of cemeteries etc.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

गुप्तकालीन-वर्णव्यवस्था

ब्राह्मणाः

वैदिकयुगे महाभारतकाले चोत्कृष्टा ब्राह्मणा बहवः संन्यासिनो बभूवुः। ब्राह्मणस्तु संन्यासिनः पर्याय एव समाम्नात आसीत। गुप्तयुगे ब्राह्मणस्य सा मौलिकी मर्यादा दृश्यते। अमरकोशानुसारेण—असौ षट्कर्मा यागादिभिर्युतः। तत्र षट् कर्माणि सन्ति—

इज्याध्ययनदानानि याजनाध्यापने यथा।
प्रतिग्रहश्च तैर्युक्तः षटकर्मा विप्र उच्यते॥

तेऽध्यापका, उपाध्याया, आचार्याश्चासन्। यज्ञे सर्वस्वं दक्षिणया दत्त्वा कश्चिद् ब्राह्मणः सर्ववेदा बभूवु।[1] यज्ञानन्तरं यदवशिष्टं हविर्भवति तत्तु 'अमृतमिति कल्पितम्। अतिथियज्ञानन्तरमवशिष्टमन्नं विघस इति। एतद् द्वयं यजमानस्य कृते प्रेष्ठमेव।[2] तत्सम्बन्धे ब्राह्मणैर्नित्यं परिभ्रमणं कर्तव्यमिति तेषां व्रज्या, अटाट्या, पर्यटनेन प्रतीयते। विशेषतो ब्रह्मणानां कृते ये परम्परां भजमाना आजन्मनो ब्रह्मपरायणा बभूवुः।[3] तेषां कृते मौनं, व्रतमुपवासः विवेकः, ब्रह्मवर्चसं, ध्यानं योगासनं चावश्यकानि सम्मतानि। ब्राह्मणेषु पञ्चविधाः संन्यासिन आसन्।[4] वाचंयमो मुनिर्ब्राह्मणः।[5] त एव ब्राह्मणा विशेषिताः—

ये निर्जितेन्द्रियग्रामा यतिनो यतयश्चते।
अथ विरजस्तमसः स्युर्द्वयातिगाः॥ अमर० २.७.४४

ब्राह्मणजीवनस्य परमोद्देश्यं निदर्शितम्—

स्याद् ब्रह्मभूयं ब्रह्मत्वं ब्रह्मयुज्यमित्यपि।
देवभूयादिकं तद्वत् कृच्छ्रं सान्तपनादिकम्॥
संन्यासवत्यनशने पुमान् प्रायः॥ अमर २.७.५.२

बहवो ब्राह्मणा वेदादीनां स्वाध्यायं नाकुर्वन्। तेषां संज्ञासीत्—अस्वाध्यायः, निराकृतिश्च।[6] तेभ्योऽपि निम्नतरा आसन्—धर्मध्वजिनो लिङ्गवृत्तयश्च।

---

१. सर्ववेदाः स येनेष्टो यागः सर्वस्वदक्षिणः॥ अमर० २.७.९
२. अमरकोषे २.७.२८
३. तत्रैव २.७.३५। चर्या त्वीर्यापथस्थितिः।
४. भिक्षुः, परिव्राट्, कर्मन्दी, पाराशरी, मस्करी च संन्यासिनः। अमरे २.७.४१
५. अमर २.७.४२ ६. अमरे २.७.५३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

क्षत्रियाः

क्षत्रियस्तु राजवाचकः शासको वा ।[1] राज्याधिकारमहिम्ना सोऽधीश्वरः, चक्रवर्ती, मण्डलेश्वरः, सम्राट् चाभवत् ।[2] साधारणक्षत्रियस्य-परिवेशस्तस्याधोविधविशेषैः स्फुटीबभूव—शस्त्राजीवः, काण्डपृष्ठः, आयुधीयः सुप्रयोगविशिखः, अच्युतशायकः, धनुर्धरः, शाक्तीकः, याष्टीकः पारश्वधिकः, नैस्त्रिंशिकः, प्रासिकः, फलकपाणिश्च ।[3]

श्रेष्ठक्षत्रियस्यानुचरा बभूवुः । पताकी वैजयन्तिको वा हस्तगृहीतपताकया तस्य महिमानं प्रकटयति स्म । तस्य कार्यार्थेषु क्षिप्रकारिता प्रशस्यासीत् । अत एवातिजवाः, तरस्विनश्च जनास्तस्य सहचरिता बभूवुः । एते सर्वे समष्टि-शस्तं जैत्रं कुर्वन्ति, यतो हि नाम विद्विषतः प्रति ऊर्जातिशयान्वितोऽलम-गच्छत् सः । शूरो वीरो च विक्रान्तः सांयुगीनः क्षत्रियो विजयते स्म ।[4]

क्षत्रियः सैन्येन सार्थत्वमध्यगच्छत् । तस्य प्रयोगायाक्षौहिणी सेना प्रकल्पितासीत् । सेना सम्पत्ति-संग्रहेणैव संसाध्यासीत्[5]। क्षत्रप्रवरो नृपो नीराजनाप्रियो बभूव । तस्य पारिव्रज्यमिवाभादरावभिगमनं दिक्चक्रग्रहणाय । तत्र वैतालिक-घाण्टिक-मागध-वन्दीत्यादयः प्रयुक्ताः ।[6] विजयपथे प्राण-त्यागोऽपि वर इति निश्चयो बभूव श्रेष्ठक्षत्रियाणाम् ।[7] तेषां कृते तु युद्धभूमि-र्वीराशंसनमभवत् ।[8] तत्राहंपूर्वमहंपूर्वमित्यहंपूर्विकावृत्तिस्तेषां प्रशस्या मता । आहोपुरुषिका, संयुगे तेषां प्रवृत्तिरासीत् । युद्धस्थले तेषां सिंहनादो योधसंरावः, विस्फारश्च प्रोत्साहनं प्रादर्शयन् । मरण-मारणप्रवणाः क्षत्रियाः स्वयुद्धान्तमधोविधं प्रस्फोरयन्तिस्म—

प्रमापणं निर्वहणं निकारणं विशारणम् ।
प्रवासनं परासनं निषूदनं निर्हिंसनम् ॥
निर्वासनं संज्ञपनं निर्ग्रन्थनमपासनम् ।
निस्तर्हणं निहननं क्षणनं परिवर्जनम् ॥
निर्वापणं विशसनं मारणं प्रतिघातनम् ।

---

१. मूर्धाभिषिक्तो राजन्यो बाहुजः क्षत्रियो विराट् । अमरे २.८.१
२. तत्र २.८.२
३. तत्र २.८.६७-७०
४. तत्र २.८.७१-७७
५. तत्र २.८.७८-८२
६. तत्र २.८.९४-९७
७. तत्र २.८.९८
८. सा वीराशंसनं युद्धभूमिर्याति भयप्रदा । अमर० २.८.१००

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

उद्वासन-प्रमथन-क्रथनोज्जासनानि च ।
आलम्भ-पिञ्जविशरघातोन्माथवधा अपि ।।
अमर० २.८. ११२-११५

वैश्याः

यथा पूर्वं दृष्टं ब्राह्मणः स्वजीवनस्य परमाभीष्टं ब्रह्मलोकं, क्षत्रियश्च स्वर्गलोकं[1] संसाधयितुं प्रायतेताम् । वैश्यः पुनरिह भूमिलोके विभवं लब्धुं यततेस्म । इहलौकिकं विभवादिसंग्रहणं तस्य परमोद्देश्यम् । अत एव अमरकोशे कथितम् वैश्यस्तु 'भूमिस्पृक्' इति । वैश्यस्य जीविका कृषि-पशुपाल्य-वाणिज्यैरभवत् ।[2] वैदिकालतोऽद्यावधि न केवलं वैश्या अपितु ब्राह्मणाः क्षत्रियाः शूद्राश्च कृषिं पशुपालनं च कुर्वाणाः स्वजीविकामर्जन्तो दृश्यन्ते । एतावदंशेन वैश्यानां तत्र वैशिष्ट्ये सत्यपि शेषवर्णानां वैश्यवृत्तिः स्वीकृता प्रतिभात्येव । अनेन सर्वेषां वर्णानां समानवृत्तिवर्तनत्वाद् व्यवहारव्यपेक्षया परस्पर-साम्यभावो समुदेति । यथामरकोशाद् ज्ञायते शाकानामुत्पादनं वैश्यकर्मपरिधेर्बाह्यमासीत् ।

न केवलमन्नोत्पादनमपितु बहुविधसामग्रीणां सम्मिश्रपाकेन आपूपिकैः, कान्दविकैः, भक्षकारैश्च भक्ष्याणि विनिर्मितानि । पाकस्थानस्याध्यक्षः पौरोगव इति ख्यातः । अन्ये सूपकाराः, बल्लवाः, आरालिकाः, सूदाः, औदनिका विविधभोज्यपदार्थान् संस्कर्तुं नियुक्ता अभवन् । गव्यादाज्यं दधि, द्रप्सं, घृतं, नवनीतं, तक्रं उदश्वित्मथितं, मस्तु इत्यादीनि तैः कृतानि ।

वैश्या गोमहिषादिकं साधारणतः पालयन्तिस्म । तैः पालिता अन्ये पशवः--क्रमेलकः, अजा, मेषः, गर्दभश्चासन् ।

वाणिज्येन न केवलं पूर्वोक्तानामेव क्रयविक्रयादिकं निष्पन्नमपितु बहुमूल्य-रत्न-मणि-मुक्ता-प्रवाल-सुवर्ण-रजतादीनां भूषणानां चापणो व्यवह्रियते स्म ।

---

१. साम्राज्यं वै स्वर्गो लोकः । तै० ब्रा० ३.६.२४
यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम् ।
सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम् ।। गीता २.३२
हतो वा प्राप्स्यसि स्वर्गम् । गीता २.३७

२. वैश्यानां कृषिपशुपालनयोर्वैशिष्ट्यं बभूव यतो हि नाम ते न केवलं स्वीयाजीविकार्थमपितु व्यवसाय-क्रय-विक्रय-निष्पादनार्थं कृष्यादिकमकुर्वन् । ब्राह्मणास्तु भिक्षया क्षत्रिया वा शस्त्रबलेन जीविकामर्जयन्तु नाम, किन्तु वैश्यो भिक्षाकवृत्त्या शास्त्रधारणेन वा जीविकां नैच्छत् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स पित्तल-ताम्रक-लोह-काचपारदादिधातूनां प्रयोगेणालंकारान् संस्कृतवान्। अञ्जन-निर्माणाय सौवीर-तुत्थ-गन्धक-हरितालादीनां संग्रहणं व्यधात्। शिलाजतु-गन्धरस-फेन-सिन्दूर-सीसक-रङ्गादिधातूनां व्यवहारमकरोत्। कर्पासोर्णादीनां प्रयोगेण वैश्यो वस्त्र-कम्बलादीनवयत्।

वैश्य आपणे मधु-सिक्थ-मनःशिला-यवक्षारस्वर्जिकाक्षार-वंशरोचना-श्वेतमरिच-मोरट-पिप्पलीमूल - गोलोमी - रक्तचन्दन - त्रिकटु - त्रिफलादीनां व्यापारं साधयामास। संक्षेपेणेदमेव प्रकाशयितुं शक्यते यत् भोजन-वस्त्र-प्रसाधनौषधादीनां कृतेऽपेक्षितं सर्वं प्रायो वैश्येन कृतं, क्रीतं, विक्रीतञ्च।

शूद्राः

बहुविधसंस्कृतिधारावगाहिनां लोकसमुदायानां गणना शूद्रवर्गे भवति। पूर्वोक्ते ब्राह्मणादिवर्गत्रये विशुद्धिदृष्ट्या मूलापेक्षयाच ये लोका न समाविष्टास्ते सर्वे शूद्रा इति ख्याता[1]। शूद्रेषु परिगणितास्तथापि तेभ्यो भिन्ना अवरवर्णा वृषला जघन्याश्चासन्।[2]

शूद्रस्तु द्विजादीनां त्रिवर्णानां सेवको बभूवेति धारणा बहुभिः शास्त्रकारैः पौनःपुन्येन लोके दृढीकृता। किन्तु स्थितिसमीक्षया सा धारणा निराधारेव प्रतिभाति, यतो हि नाम द्विजातिकृते निर्दिष्टान् व्यवसायान् विहायोच्चावचाः सर्वे व्यवसायाः शूद्राधिष्ठिता आसन्। एतत्समीक्ष्यामरकोशकारः शूद्रचर्चाया आरम्भ एव निगदतिस्म।

कारुः शिल्पी संहतैस्तैर्द्वयोः श्रेणिः सजातिभि॥ २.१०.५

अर्थात् ते शिल्पिन आसन्, तेषां श्रेणी (संघः) बभूव। अमर० २.१०.१

अतः परं कोषेऽस्मिन् शिल्पिनो व्यवसायदृष्ट्या अधोविधं परिगणिताः — मालाकारः, कुम्भकारः, लेपकः, तन्तुवायः, सौचिकः, शस्त्रमार्जः, पादकृत्, लोहकारकः, स्वर्णकारः, शाङ्खिकः, तक्षा, वर्धकिः, रथकारः नापितः, रजकः, शौण्डिक, अजाजीवः, मायाकारः शैलूषः, कुशीलवः, मार्दङ्गिकः, वैणिकश्च। शूद्रो दक्षः, चतुरः, पेशलः, पटुश्च भवेत्।[3]

मनोरञ्जन-विधायकाः कलाविदः शूद्राः परिगणिताः सन्ति —मायाकारः, शैलूषः, चारणः, वाद्यविशारदः।

हिंसकवृत्तिकास्तु शूद्रा एव—शाकुनिकः, जालिकः मांसिकः, व्याधश्च। घोरवनवृत्तिकाः सन्ति व्याधाः, ये मृगवधाजीवा इति ख्याताः।

---

१. आचाण्डालात्तु संकीर्णा अम्बष्ठकरणादय। अमर० २.१०.१ संकीर्णः। वर्णसङ्करः।

२. शूद्राश्चावरवर्णाश्चवृषलाश्च जघन्यजाः॥ अमर० २.१०.१

३. अमरकोशे २.१०.१९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

शारीरश्रमिकाः सन्ति शूद्राः—भारवाहः, वार्तावहः, भृतकः, कर्मकरः, भृत्यश्च ।

हिंस्रवनेचराः—अस्पृष्टसंस्कृतिका आजीवव्यवसायानुसारेणानेकनामधारिणश्चाण्डालः, मातङ्गः, निषादः श्वपचः, पुक्कसश्च । म्लेच्छजातयः सन्ति किरातः, शबरः, पुलिन्दश्च । अस्पृष्टसंस्कृतिका म्लेच्छजातयः सन्ति किरातः, शबरः, पुलिन्दश्च । दूरचराः प्रतिभान्तीमाः । शूद्रवर्गीया एव परिगणिताः चौर्यकर्मरता जनाः ।

शूद्रोचितव्यवसाया आसन्—वन्यपशु-ग्रहणं, सलिलोद्वाहनं, वयनं, पुस्तरचनं, लेपनं, वस्त्रदन्तादिभिः पुत्तलिकानिर्माणम्, पिटक-मञ्जूषा-निर्माणं, पादुकानिर्माणं च ।

स्वर्णरजतादीनां धातूनां रत्नानां च परिष्करणं शोधनं शूद्राधीनमासीत् ।[1] शूद्रा एवालंकारोपयोगिधातूनामापणिका बभूवुः ।

पाषाण-काष्ठ-धात्वादिभिर्मूर्तिनिर्माणे कतिपयशूद्रवर्गीया व्यापृता बभूवुः ।[2] शिल्पकलादिकं शूद्राणां स्पृहणीयं लोकाभिलक्षं कर्म प्रतिभाति ।[3]

सुराकरणे शूद्राणां दाक्ष्यमासीत् । पानावदंशस्तैः कृतः । ते मदस्थानस्य व्यवस्थापका बभूवुः ।

मदिराप्रसक्ता भवति अक्षदेवी । शौण्डिको द्यूतक्रीडायाः प्रसिद्धः साधको बभूव । द्यूतकारकाः सभिका इति ख्याता आसन् । प्राणिद्यूतं, समाह्वयमित्यादिकं मनोरञ्जनं शूद्रैर्व्यवस्थापितमासीत् ।

पूर्वोक्तैः सन्दर्भैः स्पष्टं भवति यत् पुरा कस्यचित् समाजस्याधिभौतिकं कलात्मकं च गौरवं शूद्राणां कर्मवैपुल्येन प्राजायत । विशेषतः सामाजिकसुखमनोरञ्जनालङ्करण-प्रसाधन-सुवसनादीनां कर्तृत्वेन शूद्रा लोकं सामान्यगतिकं चारयन्तश्चरणा एव मानवाभ्युदस्य । अत एव ऋग्वेदे कथितम्—पद्भ्यां शूद्रोऽजायत । अर्थाद्यथा पद्भ्यां कश्चिज्जनो विचरति तथैव शूद्रैर्जनता प्रसाधितधर्मार्थकामा विधीयते । तेषां प्रवृत्तिर्न केवलं महतां

---

१. नाराची स्यादेषणिका शाणस्तु निकषः कषः ।
व्रश्चनः पत्र–परशुः एषिका तूलिका समे ॥
तेजसावर्तनी मूषा भस्त्रा चर्मप्रसेविका ।
आस्फोटनी वेदनिका कृपाणी कर्तनी समे ॥
इति स्वर्णकारादीनामुपकरणानि

२. अमर० २.१०.३२ ३४-३५ ३. शिल्पकर्म कलादिकम् । शूद्रवर्गे २.१०.३५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कृतेऽपितु भूमिस्पृशां कृतेऽपि समाना समवर्धत । अपरं चाधुनिकसमाजे बहवः प्राचीनशूद्रोचितव्यवसाया स्तथाकथितसर्वश्रेष्ठवर्गेऽपि नितरां स्पृहणीयाः संजाताः । यथा नटकर्माद्यभिनेतृणां महत्त्वं प्रगुणयति ।

स्वीयेषु सङ्घेषु श्रेणीषु वा सुरक्षिताः सर्वतन्त्रस्वतन्त्राः शूद्रा निसर्गक्रोडे परिपालिताः स्वल्पमिच्छन्तोऽनन्तः उद्दिशन्तश्च विश्वकं चाकचक्यं विहाय नितरां परितृप्ता आसन्निति प्रतिभाति निश्च प्रचम् । तेषां सांस्कृतिक जगत् स्वस्मिन्नेव पूर्णमस्माकमविचारितमानदण्डैर्दोषगुणावगाहनं नार्हति ।

दासो दासीच

वैदिकयुगे दास इति स्वामिभक्तजनानामुपाधिः प्राशस्त्यपदं भजते स्म । तदार्या अपि दासपदेनार्हत्वं मेने ।[1] वैदिके महाभारतीये च युगे स्त्रियः पुरुषा वा दानरूपेण पशुवद् देया बभूवुः ।[2] ऐतरेयब्राह्मणे १०,०००दासीनां पुरोहिताय दानस्य चर्चा विद्यते[3] । तदा कतिपय दास्यो नृत्यविशारदा आसन् ।[4] तासां गुणैर्लुब्धा नागरकास्ताः क्रीणन्ति स्म । कचित् शत्रुभूताः पराजिता आर्या अपि दासा भवितुमर्हन्तिस्म ।

याज्ञवल्क्यस्य गुरुदक्षिणाधिकारेण जनकरस्तस्य दासो भवितुमैच्छत् ।[5] परवर्तियुगे ब्राह्मणानामपि दास्यं समीहितम् । कस्यचिज्जीवने दासाः साहचर्येण सौरस्यं तावन्मात्रमापादयितुं समर्था मन्यन्ते स्म यथा दाम्पत्ये सुयोग्यः पतिरासीत्[6] । मृच्छकटिके मदनिका वसन्तसेनाया दासी तस्याः सखीवत् प्रतिभाति ।[7] प्रतिमानाटकेऽपि दासी-दास-चेटचेटीनामहीना स्थितिसीर्दृश्यते । भवतु नामैषा स्थितिरपवादभूता । शर्विलको ब्राह्मणो दासीं काम-

---

१. यस्यायं विश्व आर्यो दासः । यजु० ३३.८२

२. शतं दासा अति स्रजः । ऋ० ८.५६.३
सुभद्राविवाहे कृष्णबलरामाभ्यां स्त्रीणां सहस्रमर्जुनाय दत्तम् । आदि० २१३.४४

३. ऐतरेय ब्राह्मण ३९.८

४. उदकुम्भानधिनिधाय दास्यो मार्जालीयं परिनृत्यन्ति पदो निघ्नतीरिदं मधु गायन्त्यो मृधु वै देवानां परममन्नाद्यम् । तै० सं० ७.५.१०.१

५. बृहदारण्यक उ० ४.४.२३

६. कालिदासस्याधोनिदर्शनमेतदेवादर्शं परिपुष्णाति
अद्यप्रभृत्यवनताङ्गि तवास्मि दासः क्रीतस्तपोभिरिति वादिनि चन्द्रमौलौ ।
कुमार० ५.८६

७. अविमारके तादृश्यः सन्ति विलासिनी मागधिका नलिनिकेति कुरंग्याश्चेटचो-दास्यौ वा ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यते । अत एव योग्यतया दास्यः स्वामिनो गेहे समादरणीया बभूवुः । तथापि धर्माचार्याणां मतेनान्ये कर्मकराः केवलं शुचि कर्म कर्तुं नियोज्यन्ते किन्तु दासास्तु अशुचिकर्मस्वपि नियोज्याः ।[1]

महाभारते राजकुलोचितपरिचारकाणां दास्यमधोविधं रमणीयं दाक्ष्य-निष्पन्नं च प्रकीर्तितम् ।

स्नापनोत्सादने चैव सुयुक्तं वयसान्वितम् ।
स्त्रीणां सहस्रं गौरीणां सुवेषाणां सुवर्चसाम् ॥
सुवर्णशतकण्ठीनामरोगाणां सुवाससाम् ।
परिचर्यासु दक्षाणां प्रददौ पुष्करेक्षणः ॥ आदि० २१३.४४,४५

राजकीयकुटुम्बेष्वसंख्यदासीदासानां समाहार आसीत् । तेषां जीवन-विन्यासः प्रायो विलासपूर्णः सुखमयश्चाभूत् ।[2] युधिष्ठिरस्य दासानां वर्णनं महाभारते लभ्यतेऽधोविधम्--

शतं दाससहस्राणि तरुण्यो मे प्रभद्रिकाः ।
कम्बुकेयूरधारिण्यो निष्ककण्ठ्यः स्वलंकृताः ॥
महार्हमाल्याभरणा सुवस्त्राश्चन्दनोक्षिताः ।
मणीन् हेम च बिभ्रत्यश्चतुःषष्टिविशारदाः ।
अनुसेवां चरन्तीमाः कुशला नृत्यसामसु ॥ सभापर्वणि ५४.१२

दासा अपि—

प्रदक्षिणानुलोमाश्च प्रावारवसनाः सदा ।
प्राज्ञा मेधाविनो दासा युवानो मृष्टकुण्डलाः ।
पात्रीहस्ता दिवारात्रमतिथीन् भोजयन्त्युत ॥ ५४.१६

दासैः सह स्वामिनां सम्बन्धो वस्तुतो रक्षणभावशुद्ध आसीत् ।[3] दासस्तु स्वामिनो दयादाक्षिण्ययोः स्नेहमयं पात्रमासीत् । स तु कुटुम्बस्य सदस्य इव स्वामिन उपकारपरायणो बभूव । धर्मशास्त्रानुसारेण कुटुम्बस्यान्ये सदस्या अभावग्रस्ता विषमस्थितौ भवेयुर्नाम तथापि दासस्तु समाश्रयेण पोषणी-योऽभवत् ।[4]

---

१. नारदः अभ्युदयचन्द्रिका ६,७

२. महाभारतानुसारेण स्वयमर्जुनो विराटनगरे राजदासी ललितकला अक्षिक्षयत् । अर्थशास्त्रेऽपि राजदासीनां शिक्षणस्य राजकीयव्यवस्था वर्णिता ।

३. तुलसीदासः, कालिदासः, कुमारदासः इत्यादीनि नामानि व्यञ्जन्ति स्वामिनो, दासस्य च मध्ये भावशुद्धं सम्बन्धम् । यः सम्बन्धो भक्तस्याराध्यदेवेन सह भवति स एव सम्बन्धो दासस्य स्वामिना सह स्यादिति आदेशः ।

४. काममात्मानं भार्यां पुत्रं वोपरुन्ध्यान्नत्वेव दासकर्मकरम् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अशोको दासेन सह दयया व्यवहर्तुं शिक्षयति।[1] यदि कश्चित् स्वामी दासेन सहायोग्यमशोभनं दूषितं वा व्यवहारमकरोत्, स दासस्तु स्वतन्त्रो मतः।

'कथं दासत्वं जायते' इत्यस्मिन् विषये मनुमतं सनातनविधानं निर्दिशति—

ध्वजाहृतो भक्तदासो गृहजः क्रीतदत्रिमौ।
पैत्रिको दण्डदासश्च सप्तैते दासयोनयः॥ ८.४१५

नारदः पञ्चदशप्रकारान् दासान् गणयति। यथा (१) गृहजः (२) दानादिविधिना प्राप्तः (३) उत्तराधिकारेण प्राप्तः, (४) अकाले रक्षितप्राणः (५) स्वामिनानुबद्धः (६) ऋणाद् विमुक्तः (७) ध्वजहृतः (९) द्यूतजितः (१०) स्वप्रतिज्ञया दासभूतः (११) सम्प्रदायच्युतः (१२) कंचित्कालं स्वीकृतो दासभूतः (१३) भक्तदासः (१४) दासीप्रणयार्जितः (१५) आत्मविक्रेता च। नाम्नैव व्याख्याता एते।

यथा मनुर्निर्दिशति दासतां प्रपन्ना जना दासभावाद् विमुक्ता न भवन्ति।[2] अन्ये कतिपयधर्माचार्या मनुं न समर्थयन्ति। नारदो याज्ञवल्क्यश्च समाम्नातः—यदि कश्चिद्दासः स्वामिनः प्राणान् रक्षेत्तर्हि स सत्वरमदासो भवति, स स्वामिनः सम्पत्तौ पुत्रसमो भागं लभते च। अकालेन पीडितो दासो भूतः गोयुग्मप्रदानेन दास्यान् मुच्यते। भक्तदासस्तु भक्तानादानेन मुक्तो भवेत्।

दासत्वविधाने वर्णविचारः समाश्रयणीय आसीत्। ब्राह्मणस्य दासा अनुलोमविधिना वर्णत्रयस्य जना भवन्तु नाम। क्षत्रियस्य दासा वैश्या शूद्राश्च भवितुमर्हाः। वैश्यस्य दासा केवलं शूद्रा एवाभवन्।[3]

यदि कश्चिद् ब्राह्मणः स्वेच्छया दासो भवत्येव स शुचिकर्मण्येव नियोज्योऽभूत्।[4] कौटिल्यो नियमयति—यदि कश्चित् प्रभुर्दास्याः पुत्रं जनयेत्, तर्हि मात्रा सह शिशुः सत्वरं दास्याद् विमुच्यते।[5]

सोपचारं दासो दास्याद् विमुक्तः। यथा नारदो विदधाति-स्वामी दासस्य स्कन्धप्रदेशात् पूर्णकलशं गृहीत्वा तमभिदत्। सोऽक्षतपुष्पसम्मिश्रं

१. नवमशिलालेखः। विश्वव्यापिनी दासप्रथा विदेशेषु सर्वत्र निर्घृणास।
२. न स्वामिना निसृष्टोऽपि शूद्रो दास्याद् विमुच्यते।
निसर्गजं हि तत्तस्य कस्तस्मादपोहति॥ ८.४१४
३. त्रिषु वर्णेषु विज्ञेयं दास्यं विप्रस्य न क्वचित्।
वर्णानामानुलोम्येन दास्येन प्रतिलोमतः॥
४. तत्रापि नाशुभं किंचित् प्रकुर्वीत द्विजोत्तम।
५. कौटिल्यार्थशास्त्रे ३.१३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

जलं तस्य शिरसि प्रोक्षति वक्ति च त्रिः—अतः परं नासि दास इति। पूर्वाभिमुखः स गन्तुमारेभे।

सर्वेषां वर्णानां लोका यथास्थिति दासत्वं स्वीचक्रुः। महाभारते युधिष्ठिरस्य द्यूतक्रीडया द्रौपदी दासीपदं समवाप।

पूर्वविवेचनेन स्पष्टं दृश्यते यद् दासा बहुविधा आसन्। अमरकोशे दास-शब्दस्य पर्यायाः सन्ति—

भृत्ये दासेयदासेरदसगोप्यकचेटकाः।
नियोज्यकिंकरप्रैष्यभुजिष्यपरिचारकाः॥

इत्येतैः कर्मविभागशः तेषां वैविध्यं प्रतीयते।

दासीनां राजान्तःपुरे महत्त्वपूर्णं परिजनवर्गो बभूव। कतिवयदास्यः शिल्पकारिका आसन्। दास्यस्तत्राभिजातमहिलानां सखीवत् व्यवहरन्त्यो दृश्यन्ते।[1]

अस्पृश्यता

भारतीयसमाजो वैदिकयुगेऽस्पृश्यतारोगेणाविहत आसीत् यद्यपि क्वचित् कारणवशात् स्थितिवशाद् वा बहवो जनाः कञ्चित्कालमस्पृश्या बभूवुः। नैतादृशीनामस्पृश्यतात्र विचारणीया। ये जना बीभत्सकर्मकारिणस्ते शाश्वत-मस्पृश्याः। तेषां मध्ये चाण्डाला[2] म्लेच्छाश्च[3] प्रसिद्धाः सन्ति। अन्य उच्च-वर्णा अपि जनाः कुत्सितकर्मप्रवृत्तिभिरस्पृश्या भवन्ति। विरुद्धसाम्प्रदायिका जैन-बौद्ध-पाशुपत-लोकायतिक-नास्तिकविकर्मस्थद्विजादयश्चास्पृश्याः सन्तीति प्राचां मतम्। कतिपयशूद्रा अस्पृश्याः सन्ति। अस्पृश्यस्पर्शेन द्विजाः स्वयमेवास्पृश्या जाताः। प्रायश्चित्तेन तेषां शुद्धिरभूत्। तथाहि—

यस्तु छायां श्वपाकस्य ब्राह्मणो ह्यधिरोहति।
तत्र स्नानं प्रकुर्वीत घृतं प्राश्य विशुध्यति॥ अत्रि० २८८-२९९

अत्र छायया स्पर्शेनापि चाण्डालो दूषयितुं समर्थ इति शास्त्रकाराणां पार्थक्य-गर्भा कल्पनाधोमुखी एव प्रतिभाति।

---

१. 'शिल्पकारिका-भूयिष्ठं परिजनम्' इत्यादि मालविकाग्निमित्रस्य पञ्चमाङ्कस्य प्रवेशके। अस्मिन् नाटके परिजनभूता मालविका महादेव्याः प्रतिनिधित्वं करोति अशोकदोहदप्रदानमहोत्सवे।

२. चाण्डालानां वैविध्यममरकोशे प्रदर्शितम्—
चाण्डालप्लवमातङ्गदिवाकीर्तिर्जङ्गमाः।
निषादश्वपचावन्तेवासि-चाण्डालपुक्कसाः॥ २.१०.१९,२०

३. म्लेछाः सन्ति किरातशबरपुलिन्दाः। अमरको० २.१०.२०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अस्पृश्यानां कृते घोरदण्डविधानमासीत् । तथाहि—कामकारेणास्पृश्यस्त्रैवर्णिकं स्पृशन् वध्यः । विष्णु ध० सू० ५.१०४

याज्ञवल्क्यस्तु अस्यां स्थितौ । शतपणदण्डं विशेषयति ।[1] कुतस्ते दण्डं दातुं समर्था आसन् इति प्रश्नः समुदेति ।

परवर्तियुगीनास्पृश्यानां शैल्पिकनैपुण्यं सान्निध्यवहामुपयोगितां तेषां प्रकटयति । हस्तकलाकौशलव्यपेक्षाणि नित्योपयोगिवस्तूनि, वस्त्र-कम्बल-पात्राणि, युद्धरतानां कृते गोधा-मौर्वी-तूणीरफलकाः नागरकाणां कृते नृत्य-गीतवादित्र-नाट्यानि च विविध-कोटिकैरस्पृश्यजनैः सम्भृतानि ।[2]

अत्र महर्षेरत्रेर्मतमुदाहरणमर्हति—

देवयात्रा-विवाहेषु यज्ञ प्रकरणेषु च ।
उत्सवेषु च सर्वेषु स्पृष्टास्पृष्टं न विद्यते ॥ २४७

प्राचीनभारते समदर्शिनामभिमतं समाजसौष्टवं विधातुं प्रशस्यं प्रतिभाति । तद्यथा गीतायाम्—

विद्याविनय-सम्पन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥

एतमेवादर्शं पद्मपुराणमनुसरति, यत्र विष्णुदासो ब्राह्मणचाण्डालरूपधरं विष्णुमतिथिरिति सत्करोति ।

अस्पृश्या अपि समाजस्याङ्गभूता ग्रामसभानिर्णयं स्वहस्ताक्षरेणाङ्कयन्ति स्मेति महाराष्ट्रप्रदेशलेखैर्निष्पद्यते ।[3]

वर्णव्यवस्थायाः समर्थनम्

नैकपक्षधारिणीयं वर्णव्यवस्था नैकान्तिकदृष्ट्या पर्यालोचनमर्हति । गुणावगुणसंतोलनेन गुणानां यदि नाम विशेषस्तत्र स्यात्, तर्हि सा प्रथा विगर्हणं नार्हति । न केवलं भारतीया अपितु वैदेशिका अपि समाजशास्त्र-पण्डिता वर्णव्यस्थामधिकृत्य तस्याः सम्यग्विवेचनं पुरस्कृतवन्तः । अत्र तेषामेव मतानि निष्पक्षत्वात् संगृह्य प्रस्तूयन्ते ।

There is no doubt that it is the main cause of the fundamental stability and contentment by which Indian society has been braced up for centuries against the shocks of politics and cataclysms of Nature. It provides every man with his place, his career, his

१. याज्ञ० २.२३४
२. जयशंकर मिश्रः ग्यारहवीं शती का भारत पृ० १२१-१२६
३. ऐतिहासिक लेखसंग्रह १६ पृ० ५५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

occupation, his circle of friends. It makes him at the outset a member of a corporate body, it protects him through life from the canker of social jealousy and unfulfilled aspirations. The caste organisation is to the Hindu his Club, his trade union, his benefit society, his philanthropic society. There are no work-houses in India and none are as yet needed.

Sidney Low : Vision of India pp. 262-263.

The institution of castes among the Hindu nations is the happiest effort of their legislation. If the people of India never sunk into a state of barbarism when almost all Europe was plunged in that dreary gulf, India kept up her head, preserved and extended the sciences, the arts and civilisation, it is wholly to the distinction of castes that she is indebted for that high celebrity. Abbe Dubois : Character, Manners and Customs of the People of India, page 14.

उदात्तकर्मणोच्चतरा जातिरधिगम्यत इति भावना मानवतायाः समुद्धाराय भारते परमोत्कर्षधारिणी बभूव ।

वर्णव्यवस्थाया विरोधः

जातिप्रथायाः केवलं जन्मना निर्धारणमवैज्ञानिकमिति सम्प्रधार्य इदं-प्रथमतया महात्मा गौतमबुद्धो लोकान् प्राबोधयत् । जातिवर्णौ व्यतिरिच्य गौतमः शीलं प्रत्यस्थापयत् । तथाहि—

मोघा जाति च वण्णो च सीलमेव किरुत्तमं ।
सीलेन अनुपेतस्स सुतेन अत्थो न विज्जति ॥

सीलवीमंसजातक ३६२

न जच्चा वसलो होदि न जच्चा होदि बम्हणो ।
कम्मुना वसलो होदि कम्मुना होदि बह्मणो ॥

गौतमस्य संघे नासीत् जन्मना जातेः सत्ता । संघे जन्मना केवलं मानव-जातिरासीत् । नापितोऽपि संघे प्रथमं प्रव्रजितः पश्चात्प्रव्रजितानां क्षत्रियाणामपि वन्द्योऽभवत् । शाक्याः संघे समाविष्टाः सन्तः शाक्यत्वविहीना बभूवुः । गौतमानुमार्गेण जाति-कुल-गोत्रादीनि संघे तथैव विलीयन्ताम्, यथा नदीनदाः समुद्रे विलयं यान्ति ।[1]

१. चुल्लवग्गे ७.१.४;९.१.४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

बौद्धजैनधर्मयोरुन्नायका जातिप्रथां न विरोधयन्ति, किन्तु ते जन्मना जातिं न समर्थयन्ति, कर्मणा जातिर्भवेन्नाम। जन्मना जातिस्तु मृषावादः। कर्मणैव ब्राह्मणादयो जातयो भवन्तीति जैनाचार्याणामपि सम्मतम्।[1]

अपरेऽपि भारतीयसंस्कृतेरुन्नायका अनुयायिनां जातिविहीनत्वमेव व्यवस्थितवन्तः। शङ्कराचार्य-रामानुज-रामानन्द-चैतन्यादयो जन्मना जातेर्निसारत्वं प्रदर्शितवन्तः। तेषामनुयायिनः सर्वेभ्यो वर्णेभ्यः समागता दीक्षिताः सन्तः समाना बभूवुः।[2] लिङ्गायता वर्णजातिभेदं न स्वीकुर्वन्ति।

भारतस्यैक्यसम्पादने राजनीतिकसंघटने वा जातिव्यापि उच्चावचत्वं स्पृश्यास्पृश्यत्वं च बाधकं बभूव। भारतीयराजानां पारस्परिको भेदभावः पृथक्त्वं च प्रायशो जातिवर्णाधारितमासीत्।[3]

---

१. Radhakrishanan, Indian Philosophy Vol. I Page 328.
धर्मपरीक्षा परिच्छेदे १७। प्रमेयकमलमार्तण्डे आचार्यः प्रभाचन्द्रः पद्मपुराणे रविषेणाचार्यश्च जन्मना जातिं विरोधयन्ति। आदिपुराणानुसारेण मनुष्यजातिस्तु एकैव, वृत्तिभेदाच्चत्वारो भेदाः संजाताः। ३८.४५.४६

२. राधाकृष्णन् महोदय इमां प्रवृत्तिं परिलक्ष्य लिखति--The distinctions of caste do not touch the nature of the soul. At least they belong to the bodies and determine the duties which different individuals owe to society but caste has nothing to do with the qualities of soul. Some of the Alwars worshipped by the Brahmins were Śūdras. Rāmanuja allows that no distinctions should be made among the lovers of God.....Rāmānuja preaches equality in worship and proclaims that Bhakta transcends all caste distinctions. He admitted the pariahs to the temple at Melkote
Indian Poilosophy Vol. II p. 708.

Śaṅkara ignored caste distinctions in the monistic order, he founded. Ibid. p. 438.

३. तद्यथाधोलिखितेन वृत्तेन प्रमाणितम्—Jayasingh of Jaipur wrote to Aurangzeb in later days that his family would be polluted even by interdining with the Bhonslas, as they were far below him in social rank and status and belonged to an inferior caste. N. K. Behre : The Background of Maratha Renaissance in the Seventeenth Century. Page 150.

CC-0. Gurukul Kangri University Haridwar Collection, Digitized by S3 Foundation USA

भागवतानुसारेण विष्णुभक्तश्चाण्डालोऽपि विष्णु-विमुखब्राह्मणादुच्चतरः।[1]

विदेशेषु वर्णव्यवस्था

न केवलं भारतेऽपितु विदेशेष्वपि वर्णव्यवस्था सामाजिकसंरचनायां महत्त्वं लेभे। प्रकरणेऽस्मिन् प्रभुमहोदयस्यानुसन्धानमुल्लेखमर्हति। स निदर्शयति—

Modern students of social institutions have been recently pointing out that some sort of social classification has always been present and is found to exist in any society, ancient or modern, which is not too crude or primitive. R. M. Mac Iver : 'Community' pages 124-125. C. H. Cooley : Social Organisation Pt. IV Social Classes. Ward pointed out how social classes similar to castes in India were in existence in European society. "The four so called Estates of European History, so clearly recognised in the 18th century correspond so well to the four great castes of India". (L. F. Ward : Social Classes and Sociological Theory" in American Jovrnal of Sociology Vol. XIII p. 617-27) cf. also Ralf Linton : The Study of Man" pp. 127-128. Appleton Century, 1936). Thus the First Estate which consisted of the clergy, the second Estate consisting of the warriors or ruling class-the nobility, the Third State consisting of the merchants and the business class and the Fourth State consisting of the commons of England or the bourgeoisie of France—the labourers and artisans, correspond to the Brāhmaṇa, Kṣatriya, Vaiśya and Śūdra Varṇas of India. According to Ward in Greece, Rome, Polynesia and other countries the social organisation has been as shown above. Small opines similarly. Mac Iver and Cooley opine that in West wealth is a determinant of Social Calsses as against birth in India.

Hindu Social Organisation, Third Ed. 1958.

ईरान-रोम-जापानादिदेशेषु पुरा व्यवसायेन जन्मना वा समाजस्य वर्गीकरणं बभूव किन्तु तत्र जातिव्यवस्था सर्वतः स्पर्शिनी जटिलविभेदकरी च नाभवद्यथा भारते। अथ च तद्वर्गीकरणं शाश्वतं न स्वीकृतं तत्रत्यलोकैः।[2]

स्वधर्मे प्रत्यावर्तनम्

यदि नाम कश्चिज्जनः परतन्त्रीकृतः स्वधर्ममत्यजत्, स पुनः पूर्वधर्मे प्रत्यावर्तेतेति स्मृतिविधानं व्यवहारपथे पुरा प्रावर्तत। तथाहि—

---

१. भागवते ७.९.१०

2. P. V. Kane : Hindu Dharmaśastra Vol. II pt. I page 33.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

हरिहर बुक्कौ मुस्लिमसैनिकैः पूर्वं निगडीकृतौ मुहम्मदबिन-तुगलकेन धर्मपरिवर्तनाय विवशीकृतौ। मुस्लिमीभूतौ तौ मुहम्मदेन कम्पिले प्रदेशाधिकारिणौ नियुक्तौ। पुनर्यदा सोमेश्वररेण कम्पिल-विजयोऽकारि तौ महासाधु-विद्यारण्यस्य प्रभावेण ब्राह्मणौ बभूवतुः। तौ द्वौ विजयनगर-साम्राज्यस्य संस्थापकौ प्रसिद्धौ।[1]

सामाजिकसात्त्विकता

प्रकृतेरौदार्येण प्रशिक्षितो वा महामनीषिणां शीलेन सहानुभूतिपूर्णसमुदाचारेण परिष्कृतो वा भारतीयसमाजः पुरा प्रशस्यतमं सांस्कृतिकशिखरं यदवाप तस्य प्रमाणपुरस्सरः परिचयो वैदेशिक-समीक्षकाणां लेखनीप्रसूतवाक्यैर्ग्रहीतुं शक्यते।[2] तद्यथा—

ह्वेनसांगः[3] —Though the Indians are of a light temperament they are distinguished by the straightforwardness and honesty of their character. With regard to riches, they never take any thing unjustly; with regard to justice, they make even excessive concessions. Straightforwardness is the distinguishing feature of their administration.

एरियन[4]—No Indian is accused of lying.

मेगस्थनीज—People honoured truth and virtue.

इद्रीसी[5]—The Indians are naturally inclined to justice, and never depart from it in their actions. Their good faith, honesty and fidelity to their engagements are so famous for their qualities that people flock to their country from every side.

शमसुद्दीन अबू अब्दुल्लाह[6]—Indians are free from all deceipt and violence. They fear neither death nor life.

वृद्धानां समादरः

वैदिकसाहित्ये स्वकुलस्य पितरः, पितामहाः, प्रपितामहाश्च पुण्यकारणमिति सम्मतम्।[7] अतएव स्वकुलस्य ते सर्वे वृद्धाः समादृता आसन्निति प्रमाण्यते।

---

१. बलराम श्रीवास्तवः दक्षिणभारत का इतिहास पृ० १८०

2. Max Muller : India, What Can it Teach Us. page 55.

३. सप्तमशताब्दीकः। ४. ई० पू० द्वितीयशताब्दीकः।

५. द्वादशशताब्दीकः। ६. त्रयोशशताब्दीकः।

७. पुनन्तु मा पितरः, पितामहाः, प्रपितामहाः इत्यादि यजुर्वेदे १९.३७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

रामायणे रामो भरतं परिपृच्छति—

वृद्धांश्च तात वैद्यांश्च ब्राह्मणांश्चाभिमन्यसे ।। अयो० १००.१३ ।

इत्यनेन राज्ञोऽपि वृद्धान् प्रति समादरः प्रशस्य आसीदिति दृश्यते ।[1] महाभारतानुसारेण राजा वृद्धानामुपासिता भवेत् । शान्ति० ५७.२० । कतिपयगणराज्येषु समिता ऐकमत्याभावे वृद्धानां सम्मत्यान्तिमो निर्णयः सम्पन्न आसीत् ।[2]

अर्थशास्त्रे 'विद्यावृद्धसंयोगो राज्ञामपि कर्तव्यमिति' निगदितम् ।[3] तस्मिन् युगे ग्रामवृद्धानामेकं महत्त्वपूर्णकार्यमासीत्—बालद्रव्य-संवर्धनम् । अर्थात्तेऽल्पवयस्कानां सम्पत्तिरक्षण-संवर्धनयोर्व्यापृता आसन् ।[4] ते वृद्धा राजसंभरणीया इति कौटिल्यमतम् ।[5] राज्ञः कृते वृद्धदर्शीति आभिगामिक-गुणः, वृद्धोपदेशाचार इति आत्मसम्पत् कौटिल्येन प्रकाशितौ ।[6] राजा वृद्ध-सेवी जितेन्द्रियः स्यादिति अर्थशास्त्रे निगदितम् । ८.३.७१ ।

केषाञ्चिद् वर्णानां वर्षिष्ठा जना महाराजेनाशोकेनापि समादृता इति तेन स्वीयेऽष्टमशिलालेखे लेखितम् । यथा राजा तथा प्रजेति न्यायेन समाजे सर्वत्र वृद्धानां समादरस्तं बहु शोभयति । अत्र महाभारतमेव प्रमाणम् । नारदो युधिष्ठिरं प्रबोधयति—

कच्चिच्छृणोषि वृद्धानां धर्मार्थसहिता गिरः । सभा० ५.१०५

अन्यत्र प्रह्लादः शक्रं प्रचोदयति—

वृद्धशुश्रूषया शक्र पुरुषो लभते महत् । शान्ति० । २१५.३४

पुनश्च महाभारते वृद्धोपासनाया लाभो दृष्ट एव—

बुद्धिमान् वृद्धसेवयेति । आरण्यक० २९७.२९

दानेन भोगी भवति मेधावी वृद्धसेवया । अनु० १४९.११

वृद्धेभ्य एवेह मतिं स्म बाला गृह्णन्ति कालेन भवन्ति वृद्धाः ।

आदि १३३.१०

---

१. मनुः समर्थयति—

श्रोत्रियं व्याधितार्तौ च बालवृद्धावकिंचनम् ।

महाकुलीनमार्यं च राजा संपूजयेत् सदा ।। ८.३९५

प्रसङ्गेऽस्मिन् पूजा तु जीवनौपयिकानामुपहारः ।

२. अलटेकरः प्राचीन भारतीय शासन-पद्धति पृ० ८५

३. अर्थ १.५.११

४,५ अर्थ २.१.३०,३२

६. अर्थ० ६.१.३,६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अपरं च महाभारतानुसारेण—

यो विद्यया तपसा जन्मना वा वृद्धः स पूज्यो भवति द्विजानाम् ॥

आदि ८४.२

ज्ञानवृद्धः, आगमवृद्धः धर्मवृद्ध इत्येतानि पदानि साधारणवृद्धस्य समाजे सम्प्रतिष्ठां द्योतयन्ति । एतदेव द्योत्यते वृद्ध इति ऋषिः । भारते भीष्मपितामहस्य धृतराष्ट्रस्य च वृद्धयोः पदे पदे महती प्रतिष्ठा कविना चित्रिता ।

विदेशेषु यथाधुना तथैव प्राचीनकालेऽपि वृद्धानां समादरः स्तोकं दृश्यते, यद्यपि बाइबिलनामके ग्रन्थे स्पष्टमेव निर्दिष्टम्—

With the ancient is wisdom and in length of days, understanding.

Job : 12.12

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वंश-कुल-कुटुम्बानि

अनु त्वा माता मन्यतामनु पितानु भ्राता सगर्भ्योऽनु सखा सयूथ्यः।
यजु० ४.२०

ईदृशी जागर्ति कौटुम्बिकसंहतिः। भारतीयसंस्कृता आर्यवंशोद्भवानां पैतृकपरम्पराधिगतव्रतानुपालनं स्वजीवनस्याभीष्टतमं कर्तव्यमासीत्। तत्र कुलजानां महात्मनां कृते काचन समुदाचार-संहिता केतनभूता तेषां कार्याकार्यनिर्णयं परम्परया शाश्वतं विदधाना सर्वातिशायि राजते स्म। तद्यथाथर्ववेदे गृहमधिकृत्य दर्शितम्—

अनुव्रतः पितुः पुत्रो मात्रा भवतु सम्मनाः।
जाया पत्ये मधुमतीं वाचं वदतु शन्तिवाम्॥ ३.३०.२
मा भ्राता भ्रातरं द्विक्षन् मा स्वसारमुत स्वसा।
सम्यञ्चः सव्रता भूत्वा वाचं वदतु भद्रया॥ ३.३०.३
ज्यायस्वन्तश्चित्तिनो मा वि यौष्ट संराधयन्तः सधुराश्चरन्तः।
अन्यो अन्यस्मै वल्गु वदन्त एत सध्रीचीनान्वः संमनसस्कृणोमि॥
अथर्व० ३.३०.५

अर्थात् कुटुम्बे वयोवृद्धानां समादरो भजनीयः। परस्परमैक्यं प्रतिष्ठापयेन्न पार्थक्यम्। स्नेहातिशयो मनसा वाचा कर्मणा संसाधनीयः। पुरा स्वीयेन समुदाचारेणावदानेन च किंचित्कुलं महाकुलमित्यभ्यधीयत।[1]

जीवनस्योद्देश्येषु वंशवृद्धिस्तु उत्कृष्टासीत्। मनुः सूचयति—

पुत्रेण लोकाञ्जयति पौत्रेणानन्त्यमश्नुते।
अथ पुत्रस्य पौत्रेण ब्रघ्नस्याप्नोति विष्टपम्॥ ९.१३७

कुलानां समवायेन समाजः सम्पद्यते। तत्रैकपूर्वजान्वितानां लोकानां समवायेन कुलं भवति। कस्मिंश्चिद् गृहे स्वपूर्वजानुबन्धेन नित्यं ते सहवासिन

---

१. अष्टाध्यायी ४.१.१४१। मनुस्मृतौ समर्थितमेतत्—

कुविवाहैः क्रियालोपैर्वेदानध्ययनेन च।
कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण च॥ ३.६३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

आध्यात्मिकाधिभौतिकदृष्टचाभ्युदयाय सुखाय च परस्पर-व्यपेक्षं प्रवर्तन्ते।[1] अत एव तेषां कुटुम्बं भवति[2]। विश्वतोभावेन तेषां कृते सर्वविधप्रगमनोपायान् विदधमानं कुटुम्बमनुत्तमं स्पृहणीयं च महत्त्वं भजते। अत एव लोकोक्तिः प्रचरति—'वसुधैव कुटुम्बकम्'।

अर्थादस्य जगतः स्पृहणीयतमा स्थितिस्तदा भवेद् यदा लोके सर्वत्र जनाः स्वकुटुम्बे सुखतमं वसन्त इव सुखसौरभमनुभवेयुः। प्राणिमात्र इयं कौटुम्बिकसद्भावना स्वाभाविकी सतीषद् वा विशेषं वा विलसति। कुटुम्बस्य प्रधानः पिता भवति। तस्यानुपस्थितौ कुटुम्बस्य ज्येष्ठः पुरुषस्तत्स्थानीयो वर्तते।

वैदिकसाहित्ये कुटुम्बस्य पर्यायः कुलमासीत्। तदा कुले कुटुम्बवन्नै-

---

१. तद्यथाशोकश्चतुर्थशिलालेखे स्वाभिमतमलेखयत् —

वर्धिष्यति चैव देवानां प्रियः प्रियदर्शी राजा धर्मचरणम्। पुत्राश्च नप्तारश्च प्रनप्तारश्च देवानां प्रियस्य प्रियदर्शिनो राज्ञः प्रवर्धयिष्यन्ति चैव धर्मचरणमिदं यावत्कल्पं, धर्मे शीले च तिष्ठन्तो धर्ममनुशासिष्यन्ति।

कालिदासः शाश्वतीं तदर्थिनीं वाग्धारां रघुवंश उद्घोषयति—

सोऽहमाजन्मशुद्धानामाफलोदयकर्मणाम्।
आ समुद्रक्षितीशानामानाकरथवर्त्मनाम्॥

यथाविधिहुताग्नीनानां यथाकामार्चितार्थिनाम्।
यथापराधदण्डानां यथाकालप्रबोधिनाम्॥

त्यागाय सम्भृतार्थानां सत्याय मितभाषिणाम्।
यशसे विजिगीषूणां प्रजायै गृहमेधिनाम्॥

शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्।
वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्॥
रघूणामन्वयं वक्ष्ये : १.५-९

२. कश्चिदेकः प्रसिद्धः पूर्वजो भवति। तस्मात् कालान्तरेण बहुलीभूता लोकास्तस्य वंशोद्भवाः कथ्यन्ते। यथा इक्ष्वाकुवंशोद्भवा राजानो रामादयः। कस्यचित् पूर्वपुरुषस्यावदानेन तद्वंशीयानां परवर्तिजनानां गौरवं व्यज्यते, वंशोचितस्तेषां समुदाचारः शीलं लोकसंग्रहभावश्चोन्नीयन्ते। यथा वंशशब्देनातीतकालस्य पूर्वपुरुषा अभिज्ञायन्ते तथैव कुटुम्बशब्देन तद्वंशीयानां वर्त्तमानजनानां बोधो भवति। वंश एव कुलम्। यथा रघुवंशः, रघुकुलमित्यत्र दृश्यते।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कसदस्याः पितुर्ज्येष्ठभ्रातुर्वाध्यक्ष्ये एकस्मिन् गृहे वसन्तिस्म ।[1]

आदर्शकुटुम्बस्य विशदवर्णनमथर्ववेदे विद्यते । तथा हि—कस्मिंश्चिद् गृहे[2] सर्वे सदस्याः परस्परं सहृदयं साम्मनस्यमविद्वेषं व्यवहरन्तु, परस्परं प्रेम प्रदर्शयन्तु । पुत्रः पितुरनुव्रतो भवतु, मात्रा संमना भवतु च । पत्नी पत्ये मधुरं वदतु । ज्येष्ठेभ्योऽपृथग्भूय नाभा अराविव ते कौटुम्बिकसाफल्याय सम्मिल्य प्रयतन्ताम्[3] । सर्वेषां सयोक्तृणां कौटुम्बिकानां कर्मभूमिः, भोगभूमिः, पानस्थली च समाना भवतु ।

गृहे सह वसन्तस्तत्रासन् पितरः, भ्रातरः स्वसारः, स्नुषा, दम्पती, शिशवश्च ।[4] एतेषां परिपालनं तु महामङ्गलमिति गौतमबुद्धः प्रथयति सुत्तनिपाते—

मातापितु उपट्ठानं पुत्तदारस्स संगहो ।
अनाकुला च कम्मन्ता एतं मंगलमुत्तमं ।। १६.८

अपरं च—गृहे सहवासिनः सर्वे सदस्याः परस्परमपृथग्भूताः, संहतिभावेन स्वप्रयत्नैः कर्मफलभाजः, प्रीतिमयवाचा प्रीणयन्तः समानमनसः सम्भूयसमुत्थानं सङ्कल्पन्ताम् ।[5]

आर्षमनीषा सारसंग्रहेण कौटुम्बिकसौरभमधोविधं प्रकरोति—

सध्रीचीनान्वः संमनसस्कृणोम्येकश्नुष्टीन् संवननेन सर्वान् ।
देवा इवामृतं रक्षमाणाः सायंप्रातः सौमनसो वो अस्तु ।
अथर्व० ३.३०.७

कतिपययज्ञेषु कुटुम्बस्य सर्वे सदस्याः सहभागिनो बभूवुः । तथाहि—अग्निष्टोमे यजमानस्य पत्नी, पुत्राः, भ्रातरः स्पर्शानुस्पर्शनाभ्यां सह भजन्ते ।[6]

'कुलं तस्य परम्पराः, सांस्कृतिकनिधिं, गौरवं च रक्षितुं जातोऽस्मि' इति व्रतं कस्यचित् सत्पुरुषस्य सदाचारानुष्ठानाय असन्निवृत्तये च प्रकाश-

---

१. Kula denotes the 'home' or 'house of the family' and by metonymy the family itself, as connected with the home. The Kulapa (lit. houseprotector), or chief of the family is mentioned in the Ṛgveda (10.179.2) Vedic Index p. 171.
कुलस्य यो भाग एकस्मिन् गृहे सह वसति, स कुटुम्बम् ।

२. तत्कृण्मो ब्रह्म वो गृहे संज्ञानं पुरुषेभ्यः । ३.३०.४
अत्र गृहं तु कौटुम्बिकजनसमुदायस्य पर्याय एव ।

३. अथर्व० ३.३०.१-५

४. अथर्व० १४.१.४४

५. अथर्व ३.३०.५

६. Hist. of Dharma. Vol II pt II p. 1158.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दीप इव यावज्जीवं पथप्रदर्शनं विदधाति स्म । कुलस्य महामहिमानं कुलाङ्कुरः, कुलाङ्गना, कुलान्वितः, कुलाभिमानः, कुलाचारः, कुलकर्म, कुलधर्मः, कुलाधारकः, कुलापीडः, कुलशेखरः, कुलोत्कटः, कुलकन्या, कुलगरिमा, कुलगृहम्, कुलजातः, कुलजनः, कुलजाया, कुलतिलकः, कुलदीपः, कुलधनः, कुलधर्म[1]ः, कुलधुर्यः कुलनन्दनः, कुलनारी, कुलपतिः, कुलपालिः, कुलभरः, कुलभार्या, कुलमर्यादा, कुलमार्गः, कुलवधूः, कुललक्षणम्, कुलविद्या, कुलवृद्धः, कुलव्रतः, कुलशीलम्, कुलश्रेष्ठी, कुलसम्भवः, कुलस्त्री, कुलस्थिरिति उपाधयः सम्यग् व्यञ्जयन्ति ।

कौटुम्बिकसदस्याः

विवाहानन्तरं कापि ज्येष्ठवधूर्गृहपत्नी तस्याः पतिश्च गृहपतिर्भवतः । यदि नाम गृहे श्वशुराः श्वश्रूवो वा भवन्ति तर्हि समुदाचारेण प्रथमस्थानीयो गृहपतिः श्वशुरो भवति, द्वितीयस्थानीयो गृहपतिस्तस्य पुत्रो भवति ।[2] कस्मिंश्चिद् गृहे प्रथमस्थानीयो गृहपतिः गृहपत्नी वा स्वपुत्रैः पौत्रैः प्रपौत्रैश्च सह मोदत इति ऋग्वेदेऽद्योविधं वर्णितम्--

क्रीडन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्वे गृहे ॥ १०.८५.४२

अर्थात् कुटम्बे शतवार्षिकः प्रपितामहोऽङ्कशायी प्रपौत्रः शिशुश्च विराजेते स्म ।

कस्याश्चित्स्त्रिया दश पुत्रा[3] इति आशीष्फलम् । अनेन पुत्रादीनां संख्याबाहुल्यं निर्विण्णतायाः कारणं न प्रतिभाति वैदिकयुगे । अपरेऽपि कौटुम्बिकसदस्याः कुटुम्बं समपूरयन् । ते आसन्--ननान्दारो देवरश्च ।

वसुधैव कुटुम्बकमिति भावनया लोकहितस्य संक्षिप्तं कार्यरूपं कुटुम्बपालनेन सह प्राभवत्, यतोहि नाम कुटुम्बे सहवासिनो बभूवुः —वृद्धो

---

१. One whose wealth is the preservation of the good name of the family. V. S. Apte; Sanskrit English Dictionary.

२. जरदष्टिर्यथासः । ऋ० १०.८५.३६
अत्र पिता, पितामहादिः कुलरीत्या नाममात्रमेव गृहाधिकारिण आसन् । युवभूतो ज्येष्ठपुत्रः कार्याधिकारी । अपरं च युक्तमेव दृश्यतेऽथर्ववेदे—
यन्मे माता यन्मे पिता भ्रातरो यच्च मे स्वा यदेनश्चकृमा वयम् ।
ततो नो वारयिष्यतेऽयं देवो वनस्पतिः ॥ १०.३.८
पिता, पुत्रः, पौत्रः, पितामहः, जाया, मातान्ये च प्रियाः समुपाहवनीया बभूवुः ।
अथर्व० ९.५.३०

३. दशास्यां पुत्रानाधेहि पतिमेकादशं कृधि । ऋ० १०.८५.४५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ज्ञातिः, अवसन्नः कुलीनः, दरिद्र-सखा, अनपत्या भगिनी च[1]। एते जना मूलतः कौटुम्बिक-सदस्य-परिधेर्व्यतिरिक्ताः सन्ति।

कुटुम्बस्य सर्वविधाकांक्षापूर्त्यर्थं साधनभूता पुत्रोत्पत्तिर्दम्पतीनां सर्वप्रथमं चिकीर्षितं वारं वारं भारतीयसाहित्ये आशंसिता। तद्यथा ऋग्वेदे—

इह प्रियं प्रजया ते समृध्यताम्। ऋ० १०.८५.२७

आदिकालतः कुटुम्बस्य शाश्वती भूयिष्ठोपयोगिता बालादीनां पितृपैतामहे मार्गे नियोजनं प्रबभूव।[2] पितृपैतामही धूराचरितव्येति।

सर्वेषां कौटुम्बिकसदस्यानां विमर्शार्हे पदे स्वस्वमतं प्रकाशनानन्तरमेव सर्वजनहिताय स्वस्थो निर्णयः समपद्यत।[3] तद्यथा पाण्डवानां पितृविहीने कुटुम्बे माता कुन्ती गृहस्वामिनी बभूव।[4] कुटुम्बेऽस्मिन् न केवलं तस्याः पुत्रा अपितु सपत्न्या माद्र्यः पुत्रा अपि सहचरन्तिस्म। सर्वे त एकचक्रायामभिक्षन्त। भैक्षं कुन्त्यै निवेदयन्ति स्म। विभक्तान् भागांस्ते भुञ्जते स्म।[5] तस्या आज्ञया द्रौपदी पञ्चानां पाण्डवानां समानं महिषी बभूव।[6]

दाम्पत्यस्य भरः

आधिभौतिकदृष्ट्यापि कुटुम्बसौरभ-संवर्धनं दम्पत्योः सम्मिलितभरोऽथर्ववेदेऽधोविधं वर्णितः —

१) प्राचीं प्राचीं प्रदिशमारभेथाम्। १२.३.७

अर्थाद् दम्पती नित्यमभ्युदयपथं प्रचरेताम्।

---

१. चत्वारि ते तात गृहे वसन्तु श्रियाभिजुष्टस्य गृहस्थधर्मे।
वृद्धो ज्ञातिरवसन्नः कुलीनः सखा दरिद्रो भगिनी चानपत्या। उद्योगे ३३.७०

२. तदिन्मे छन्त्सद्वपुषो वपुष्टरं। पुत्रं यज्ज्ञानं पित्रोरधीयति॥ ऋ० १०.३२.२
कथं तव कुलस्यैकामिमां बालामसंस्कृताम्। पितृपैतामहे मार्गे नियोक्तुमहमुत्सहे॥
कथं शक्ष्यामि बालेऽस्मिन् गुणानाधातुमीप्सितान्। आदिपर्वणि १४६.१४,१५
एतदेव रघुवंशे कालिदासेन राजप्रजादर्शेन निदर्शितम्—
रेखामात्रमपि क्षुण्णादामनोर्वर्त्मनः परम्।
न व्यतीयुः प्रजास्तस्य नियन्तुर्नेमिवृत्तयः॥ १.१७

३. आदिपर्वणि १४६ अध्याये

४. तस्मिन् युगे स्वाभिज्ञानाय मातुरपि विशेषता परमं प्रभविष्णु। व्यासस्य जन्म सत्यवत्या बभूव। परतस्तस्याः पुत्रौ चित्रविचित्रवीर्यश्चास्ताम्। पौत्रः प्रपौत्रश्च धृतराष्ट्रः पाण्डवाश्च बभूवतुः। मातामही-सम्बन्धेन पाण्डवा व्यासं पितामहं प्रवदन्ति। महाभारते आदिपर्वणि १४४.५

५. आदिपर्वणि १४५.५ ६. आदि १८७.२२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(२) क्रीडन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्वस्तकौ । १४.१.२२
अर्थात् गृह एव वसन्तौ दम्पती पुत्रपौत्रादिभिः सह सुप्रसन्नौ भवताम् ।
(३) युवं भगं संभरतं समृद्धमृतं वदन्तावृतोद्येषु । १४.१.३१
अर्थात् दम्पती कुटुम्बे सौभाग्यं बिभृताम् ।
(४) इह पुष्यतं रयिम् । १४.२.३७ अर्थात् समृद्धिं कुर्याताम् ।
(५) अभ्युदयपथे इहेमाविन्द्र संनुद ।
चक्रवाकेव दम्पतीति सुष्ठु प्रोक्तमथर्ववेदे । १४.२.६४
(६) तथापि पत्नचाः पोषणं पत्या करणीयमेवेति सूर्या वदति—
ममेयमस्तु पोष्या । १४.१.५२

गृहपतिः

प्राचीनकालादेव भारते गृहस्य महिमा राजमाना आस्ते । गृहस्य महत्तमः सदस्यो[1] गृहपतिर्बभूव यस्य नेतृत्वेनापरेषां सदस्यानामपि सर्वविधप्रवृत्तयोऽवर्धन्त । तस्यैव भर आसीत् सर्वेषां सहवासिनां धार्मिकाध्यात्मिकाधिभौतिकाभ्युदयोपायानामायोजनम् । न केवलं कुटुम्बार्थमपितु लोकार्थं स भद्रं व्यवहरति स्म ।[2]

कुटुम्बस्यार्थे सर्वस्वत्यागकाले गृहपतिगृहपत्नी च प्रथमस्थानीया आस्ताम्, यद्यपि सर्वे कौटुम्बिकसदस्याः स्वकुटुम्बस्य रक्षार्थमात्मनो बलिदानाय त्यागाय च स्पृहयन्ति स्म । एतन्महाभारतस्यादिपर्वणि बकासुरस्याख्यानेन स्पष्टीभवति, यत्र ब्राह्मणपरिवारस्य सर्वे सदस्याः प्रत्येकं सर्वेषां रक्षणार्थमात्मबलिदानं कर्तुमुद्यताः सन्ति ।

कौटुम्बिकसदस्यानां परस्परस्नेहप्रवृत्तिं प्रगुणयितुं कस्यचिदेकस्यापरः सदस्यो नैकसम्बन्धेनाभ्युपगतः । तथा हि—

पितेव पालयेत् पुत्रान् ज्येष्ठो भ्रातॄन् यवीयसः ।
पुत्रवच्चापि वर्तेरन् ज्येष्ठे भ्रातरि सर्वतः ॥ मनु० ९.१०८
भ्राता ज्येष्ठः समः पित्रा भार्या पुत्रः स्वकाः तनुः ॥
शान्ति० ३५.१८

---

१. गृहपतेरादर्शा अग्नेः प्रस्नुवन्ति । स देव ऋग्वेदे पुनः पुनर्गृहपतिरिति सम्बोधितः । अथर्ववेदानुसारेण पत्नी तु गृहमेव । अत एव प्रोक्तम्—
पत्नी त्वमसि धर्मणाहं गृहपतिस्तव । १४.१.५१
विश्पतिरस्ति गृहपतिः पिता च । विशि (ग्रामे, राज्ये वा) यथा राजा भवति, तथैव कुटुम्बे पिता विश्पतिराध्यक्ष्येण नामितः । ऋग्वेदे १०.१३५.१

२. भद्राय गृहपमिति यजु० ३०.११ । अर्थात् गृहपतिर्मूर्तिमान् भद्र आसीत् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

रामायणे समर्थितम्—

ज्येष्ठो भ्राता पिता वापि यश्च विद्यां प्रयच्छति।
त्रयस्ते पितरो ज्ञेया धर्मे च पथि वर्तिनः॥
यवीयानात्मनः पुत्रः शिष्यश्चापि गुणोदितः।
पुत्रवत्ते त्रयश्चिन्त्या धर्मश्च वात्रकारणम्॥

किष्किन्धाकाण्डे १८.१३,१४

गृहपत्नी

सर्वप्रथमं कर्तव्यं गृहपत्न्या आसीत् कुल-देव-पितॄणां प्रतिष्ठापनम्। तद्यथाथर्ववेदे निगदितम्—

यदा गार्हत्यमसपर्यैत पूर्वमग्निं वधूरियम्।
अधा सरस्वत्यै नारि पितृभ्यश्च नमस्कुरु॥ १४.२.२०

समग्रकुटुम्बस्य पालनाद् धारणाद् वा कुटुम्बिनी भवति गृहपत्नी।[1] सैव पुरन्ध्री।[2] कुलस्त्री कुलपा कुलपालिका च कथ्यते।[3] गृहमेव कुटुम्बम्। गृहिणी गृहमुच्यते इत्यनेन गृहपत्न्याः कुटुम्बस्य सर्वेषां वा संरक्षण-भरण-पोषणादिर्महान् भरः प्रतीयते। भार्याविषयक-शाश्वतविश्वात्मकगुणा महाभारते निगदिताः सन्ति यत् सा गृहे दक्षा, प्रजावती, पतिप्राणा, पतिव्रता, पत्युरर्धं, तस्य श्रेष्ठतमः सखा, त्रिवर्गस्य मूलं चास्ति। भार्यावन्तः क्रिया-कुशलाः, गृहमेधिनः, प्रमोदवन्तः, श्रीयुताश्च भवन्ति।[4] अथवा किमधिकेन। सा भार्या तु—

पितरो धर्मकार्यस्य भवन्त्यार्तस्य मातरः।
कान्तारेष्वपि विश्रामो नरस्याध्वनिकस्य वै।
यः सदारः स विश्वास्यस्तस्माद्दाराः परागतिः॥

आदि० ६८.४२-४३

कुटुम्बस्त्री

गृहकार्येषु यथायोग्यं सहयोगेन पत्नी सर्वनिष्ठया पत्युः सहधर्मचारिणी बभूव। धर्मप्रधाने भारतीय-समाजे देवानां प्रीत्यर्थं यज्ञादिकर्मसु नित्यमेव

---

१. नित्यं धर्मपरा या तु गृहकार्यकरी तथा।
श्वश्रूश्वशुरयोश्चैव पादवन्दनतत्परा॥
ज्येष्ठदेवरयोश्चापि ह्यनुवृत्तिपरायणा। प्राप्नोति सद्गतिं कीर्तिमिहलोके परत्र च॥

जैमिनीयाश्वमेधपर्वणि ८.१४,१५

२. अमरकोशे, २.६६-७। अत्र पुरं तु गृहमेव। पुरं नपुंसके गेहे।
३. कुलपा अथर्ववेदे १.१४.३ ४. आदि० ६८.२९-४१।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पतिपत्नी-साहचर्येणार्याणां जीवनस्य सार्थकता सम्बभूव[1] । अपत्नीकस्य यज्ञो नास्ति । यज्ञार्थं दम्पत्योरेकत्वं परिणमितं मनसा वाचा कर्मणा च । अस्यां स्थितौ तयोः समुदितं संज्ञानं नित्यमेव समवर्धत । परिणामतस्तयोः सत्त्वं माधुर्यैकनिष्ठमाविर्भूतम् ।[2] तौ न केवलं स्वकुलस्यापितु 'विश्वजनस्य छाया' इति यजुर्वेदे निगदितम् । ५.२८

ऋणत्रयाद्विमुक्तये कस्यचित्पुरुषस्य पुत्र आवश्यक एव पत्नीं विना न सम्भवति ।[3] इयं धारणा पत्न्या महत्त्वं पत्युर्मानसे प्रगुणयति । अतएव स्वभावतः स तस्या भरणं पोषणं च सौष्ठवेनाकरोत् ।[4]

कस्यचिद् गृहं पत्नयाः सावधानप्रयासेन समृद्धं सुदर्शनं च जायते । मनुर्निगदति पत्नीमधिकृत्य—

सदा प्रहृष्टया भाव्यं गृहकार्येषु दक्षया ।
सुसंस्कृतोपस्करया[5] व्यये चामुक्तहस्तया ।। ५.१५०

शास्त्रकारैर्दाम्पत्यस्यौदात्त्यं द्वयोः साम्मनस्यं सहचारितां च सम्यक् सम्पादयितुमधोविधं लौकिकं पारलौकिकं च विधानं निदर्शितम्—

द्वाविन्द्राग्नी चरतो वै सखायौ द्वौ देवर्षी नारदः पर्वतश्च ।
द्वावश्विनौ द्वे च रथस्य चक्रे भार्यापती द्वौ विहितौ विधात्रा ।।
आरण्यकपर्वणि १३४.८

भार्याः पतिकृतांल्लोकानाप्नुवन्तीति नः श्रुतम् । आश्व० २०.४

---

१. मनुर्दम्पत्योर्द्वयतामनन्यमानो निर्णयति—
यो भर्ता सा स्मृताङ्गना ।। ९.४५
अर्थात् दम्पती न द्विवचनमपि तु एकवचनम् ।

२. दाम्पत्य-निष्ठाधोविधं प्रकटीभूता—
संजानाना उपसीदन्नभिज्ञु पत्नीवन्तो नमस्यं नमस्यन् । ऋ० १.७२.५
सपत्नी पत्या सुकृतेन गच्छताम्, यज्ञस्य युक्तौ धुर्यावभूताम् ।
संजानाना विजहतामरातीः दिवि ज्योतिरजरमारभेताम् ।। तै० ब्रा० ३.७५
अतएव पाणिनिः पत्नीं निर्वक्ति—पत्युर्नो यज्ञसंयोगे । ४.१.३३ ।
अपरं च समर्थनं प्रकृते ग्रन्थे पृष्ठानि १३४-१३६ ।

३. जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते । ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः, प्रजया पितृभ्यः । एष वा अनृणो यः पुत्री यज्वा ब्रह्मचारिवासी । तै० सं० ६.३.१०.५ ।

४. मनु ९.९५ ।

५. महाभारतनुसारेण सत्स्त्री सुसंमृष्टनिवेशना भवेत् । अनु० १२४.१९ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तस्मात्ते सुभगे नास्ति परलोककृतं भयम् ।
मद्भावनिरता ममैवात्मानमेष्यसि ।। आश्व० ३३.८

पत्नी पत्युर्जीविने माङ्गल्यविधायिनीति सुमङ्गली संज्ञिता ।

प्रो० अलटेकर-महाभागः पत्नी-पति-सम्बन्धस्य आदर्शमधोविधं निष्कृषति—

The normal relations between the husband and the wife were determined by the principle that there should be an absolute identity in their aesthetic, material and moral interests, that they would invariably cooperate with each other in the realisation of their aims and ambitions in the sphere of life, wealth and spirituality.[1]

कामसूत्रानुसारेण पत्नी प्रखरबुद्धया गृहस्यायं प्रसमीक्ष्य व्ययं कुर्यात् ।[2]

पतिव्रतायाः कृत इह लोके प्रतिष्ठा परलोके च स्वर्गवासो निश्चित एव । तद्यथा मनुः सूचयति—

पतिं या नाभिचरति मनोवाग्देहसंयता ।
सा भर्तृलोकमाप्नोति सद्भिः साध्वीति चोच्यते ।। ५.१६

प्रतिव्रतानामादर्शाः सावित्री-सीतादीनामाख्यानेषु महर्षिवचनैः पुराणेतिहासादिषु च प्रकामं प्रपञ्चिताः सन्ति ।

शास्त्रकाराः स्त्रीणां कृते पतिं प्रति कठोरव्रतनिष्ठां निर्दिशन्ति । स्त्रिया रक्षणं, भरणं, पोषणं, सम्माननं च प्रत्युरवश्यं कर्तव्यानीति तत्रादेशः । कारणवशादपि यदि स स्त्रियं परित्यजति तदा तस्या भरणपोषण-व्यवस्था तु करणीयैवेति याज्ञवल्क्य-वचनम् ।[3]

स्वगार्हस्थ्याभिमुखहृदया पत्नी कर्तव्या, यतो हि बहिर्मुखी पत्नी असत्प्रवृत्तिका जायेत । एतत् सम्प्रधार्य पत्न्याः कृते गृहकार्याणि नैकविधानि प्रस्ताविताने मनुना ।[4] तथा हि—

---

१. Position of Women in Hindu Civilisation. p. 95.

२. सांवत्सरिकमायं संख्याय तदनुरूपं व्ययं कुर्यात् । ४.१.३२

३. याज्ञ० १.७६

४. स्त्रियो बलात् सत्पथप्रवृत्तिकाः कर्तुं न शक्या इति मनुः स्पष्टं प्रवदति—
न कश्चिद् योषितः शक्तः प्रसह्य परिरक्षितुम् ।
एतैरुपाययोगैस्तु शक्यास्ताः परिरक्षितुम् ।। ९.१०
आत्मानमात्मना यास्तु रक्षेयुस्ताः सुरक्षिताः ।। ९.१२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अर्थस्य संग्रहे चैनां व्यये चैव नियोजयेत् ।
शौचे धर्मेऽन्नपक्त्यां च पारिणाह्यस्य वेक्षणे ॥ ९.११

असतीमपि स्त्रीं न गृहान्निसारयेत् । पृथगेव तस्या आवासं विधाय भरण-पोषण-व्यवस्थां कृत्वा प्रायश्चित्तादिना तस्याः परिशोधनमनुष्ठेयम् ।[1] अत्र मनोर्मध्यममार्गनिर्देशः समाजस्य रक्षणेन विभाति । स कथयति—

विप्रदुष्टां स्त्रियं भर्ता निरुध्यादेकवेश्मनि ।
यत्पुंसः परदारेषु तच्चैनां चारयेद् व्रतम् ॥ ११.१७६

महाभारतानुसारेण

अर्धं भार्या मनुष्यस्य भार्या श्रेष्ठतमः सखा ।[2]
भार्यामूलं त्रिवर्गस्य भार्या मित्रं मरिष्यतः ॥ आदि० ६८.४०

तथापि सत्सिद्धान्तान्वयः दुर्बलचरित्राणां द्यूतप्रनष्टौदात्त्यवृत्तीनां युधिष्ठिरादीनां कार्यपद्धतौ न दृश्यते । युधिष्ठिरेण स्वपत्नी पणीकृतेति महत्तमं कलङ्ककलमषं महाभारतयुगस्य । ततोऽप्यधमपापिष्ठानां दुर्योधनादीनां द्रौपदी-सतीत्व-विनाशायायोजनं धिगदवार्हम् ।

पत्नीप्रशंसा

वैदिकयुगीनार्याः पत्नीं भूयिष्ठं सम्भावयन्ति स्मेति निम्नोक्तिभिर्विशदीभवति—जायेदस्तम् । ऋ० ३.५३.४

अर्धो ह वा एष आत्मनो यज्जाया ।... ... .
यावज्जायां न विन्दते असर्वो हि तावद्भवति । शतपथ० ५.२.१.१०
पुरुषो जायां वित्त्वा कृत्स्नतरमिवात्मानं मन्यते ।
ऐतरेयारण्यके १.३.५
सुपत्नी पत्या प्रजया प्रजावत्या त्वाऽऽगन् । यज्ञः प्रति कुम्भं गृभाय ॥
अथर्व० ११.१.१४

चतुर्वर्गेषु पत्नी एव धर्मस्य कामस्य च मूलसाधनमिति शास्त्रीयवचनं तस्याः प्रतिष्ठां महिमानं च शतगुणं विधत्ते ।[3] पतिः पत्न्या रक्षणं

१. गौतम २२.३५; याज्ञ० १.७०-७२; वेदव्यास २.४९, ५०
२. इदं शकुन्तलाया वचनम् । साग्रे कथयति—
संसरन्तमपि प्रेतं विषमेष्वेकपातिनम् ।
भार्यैवान्वेति भर्तारं सततं या पतिव्रता ॥
प्रथमं संस्थिता भार्या पतिं प्रेत्य प्रतीक्षते ।
पूर्वं मृत च भर्तारं पश्चात् साध्वनुगच्छति ॥ आदि० ६८.४४,४५
३. भार्या मूलं त्रिवर्गस्य भार्या मूलं तरिष्यतः । आदि प० ७४.४०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

करोत्विति नैकत्र पठ्यते धर्मशास्त्रादिषु, किन्तु पत्नीकृते महाव्रत-मासीत्—

एतद्धि परमं नार्याः कार्यं लोके सनातनम् ।
प्राणानपि परित्यज्य यद् भर्तृहितमाचरेत[1] ।। आदि० १४६.४

पत्न्याः श्रेयस्करता पतिमुखेन महाभारते वर्णिताधोविधा—

सहधर्मचरीं दान्तां नित्यं मातृसमां मम ।
सखायं विहितां देवैर्नित्यं परमिकां गतिम् ।।
मात्रा पित्रा च विहितां सदा गार्हस्थ्यभागिनीम् ।
वरयित्वा यथान्यायं मन्त्रवत्परिणीय च ।।
कुलीनां शीलसम्पन्नामपत्यजननीं मम ।
त्वामहं जीवितस्यार्थे साध्वीमनपकारिणीम् ।
परित्यक्तुं न शक्ष्यामि भार्यां नित्यमनुव्रताम् ।।

आदि० १४६.३१-३३

महाभारते कतिपयश्रेष्ठपत्नीनामादर्शो विस्तारेण वर्णितः । तासु सावित्री, दमयन्ती, द्रौपदी, गान्धारी च नामस्मरणेनापि मानवतां पावयन्ति ।

आदर्शभार्या

महाभारते नैक स्थलेष्वादर्शभार्या वर्णिता । तथा हि—शान्तिपर्वणि पतिमुखेन—

पत्नीं विना जीवितेन मे न कार्यम् । तया विरहितं ममेदं गृहं शून्यम् । सा साध्वी प्राणेभ्योऽपि गरीयसी । सा तपस्विनी श्रान्तं क्षुधार्तं च मां जानीते ।

अनुरक्ता हिता चैव स्निग्धा चैव पतिव्रता ।
यस्य वै तादृशी भार्या धन्यः स मनुजो भुवि ।।
भार्या हि परमो नाथः पुरुषस्येह पठ्यते ।
असहायस्य लोकेऽस्मिन् लोकयात्रासहायिनी ।।
नास्ति भार्या समं किंचिन्नरस्यार्तस्य भेषजम् । १४२.४-१०

अर्थाद् भार्यासमो बन्धुः, सहायः, धर्मसाधको वा नास्ति ।

कुटुम्बे नागरकस्य गेहिनी कथं वर्तेत इति जैमिनीयाश्वमेधपर्वणि निगदितम्—

शुद्धस्थानं च ताम्बूलं चन्दनं चासनानि च ।
इच्छाभोज्यं तथा पेयं पत्युरिच्छाविहारिणी ।।

---

१. उपकारः प्रत्युपकारमर्हतीति न्यायेन पत्युरपि पत्नीं प्रति समभावः सद्व्यवहारश्च स्वाभाविक एव ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नित्यं धर्मपरा या तु गृहकार्यकरी तथा ।
श्वश्रूश्वशुरयोश्चैव पादवन्दनतत्परा ॥
ज्येष्ठदेवरयोश्चापि ह्यनुवृत्तिपरायणा ।
आप्नोति सद्गतिं कीर्तिमिहलोके परत्र च ॥ ८.१३-१५

प्रेमादर्शः

दम्पत्योः परस्परं प्रेमादर्शः स्पृहणीय एवेति अथर्ववेदे प्रोक्तम्—

सामाहमस्मि ऋक्त्वम् । द्यौरहं पृथ्वी त्वम् । १४.२.७१ ।

अनेनाविच्छेद्यः सम्बन्धो द्वयोर्विशदीकृतः । तदनुसारेण सौहार्दस्य मात्रा सातिशयं विराजते स्म गृहे गृहे यत्र तयोः प्रतिश्रुतिरासीत्—

अक्ष्यौ नौ मधुसंकाशे, अन्तःकृणुध्वं मां हृदि, मन इनौ सहासति ।
अथर्व ७.३६.१

अर्थात् सप्रेम परस्परावलोकनं परस्परहृदयावस्थानं परस्परविचारासारसंसृष्टिरभिप्रेता ।

महाभारते प्रियायाः समादरस्योच्चादर्शा दृश्यन्ते । तत्रासीद् रुरुर्यः पद्मकिञ्जल्कसप्रभायां प्रियायां सर्पदंशेन मृतायां विलपन्नब्रवीत्—यदि मया दत्तं, तपः तप्तं, गुरवः सम्यक् आराधितास्तेन मम प्रिया संजीवतु । स तु देवदूतेन निर्दिष्टस्तां पुनः प्राणवतीं कर्तुं स्वायुषोऽर्धं ददौ ।[1] अपरमुदाहरणं दुःषन्तस्य शकुन्तलास्वीकरणप्रसङ्गेऽधोविधं वर्तते—

'सर्वं राज्यं तवाद्यास्तु भार्या मे भव शोभने ।' आदि० ६७.३

भार्यया मैत्रीपदं तु राजोचितमेव सम्मतं, न तु साधारणलोकानां कृते । पतनमेव मानवस्य तस्मादिति दर्शितम् ।[2]

दम्पत्योः परस्परं रक्षणम्

प्राणपणेनापि भार्या रक्षणीयेति महाभारतीयं मतम् । स्वभावतो दुर्बला अपि भार्यां रक्षन्ति । भार्यायां रक्ष्यमाणायां सन्ततौ रक्षिता भवति । तत आत्मा रक्ष्यते । यतो हि नाम—

आत्मा हि जायते तस्यां तस्माज्जाया भवत्युत ।
भर्ता च भार्यया रक्ष्यः कथं जायान्ममोदरे ॥ आरक० १३.६२
न च भार्यासमं किंचिद् विद्यते भिषजां मतम् ।
औषधं सर्वदुःखेषु सत्यमेतद् ब्रवीमि ते ॥ आरक० ५८.२७

---

१. आदि० ९.११,१४,१५

२. भार्यामित्राश्च पुरुषा भविष्यन्ति युगक्षये । आर० १८८.२०
अत्र महाभारतीयं वाक्यं 'भार्या दैवकृतः सखा' आर० २९७.५१ अनुध्येयम् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पत्नी तु पतिं हृदये रक्षत्विति सालंकृति अथर्ववेदे निदर्शितम्—

अक्ष्यौ नौ मधुसंकाशे अनीकं नौ समञ्जनम् ।
अन्तःकृणुष्व मां हृदि मन इन्नौ सहासति ।। ७.३६.१

कुलस्त्री

स्त्रीणां प्रतिष्ठाया अवबोधाय प्रथमपदे तेषां द्विधा विभाजनं कर्तव्यम्—कुलस्त्रियः साधारणस्त्रियश्च । कुलस्त्रियः कस्मिंश्चित् कुटुम्बे माता, पत्नी, भगिनी, पुत्री, पुत्रवधूरित्यादिपदेनावतिष्ठन्ति । एतासु माता शिखरिणी एव शिखायते । कुलस्त्रियः पर्याय आसीद् धर्म्यस्त्रियः सत्स्त्रियश्च महाभारते ।[1]

माता

मातृप्रतिष्ठा न केवलं स्वशिशूनां कृते सर्वस्वोत्सर्गेणापि परिपालनोज्ज्वलतमा सम्भवति अपितु तस्याः पूजा लोकमातृपदेन शाश्वतीभूता । तथाहि चाण्डाली सुय्या परित्यक्तं नवजातशिशुं दृष्टवा प्रस्नुतस्तनी बभूव, तं च विहितवृत्तिं विधाय संवर्धितवती ।[2]

महाभारतीया मातानन्यपूज्यतमा वर्तते । अस्मिन् विषये भीष्मो युधिष्ठिरं प्रबोधयति—

दशाचार्यानुपाध्याय उपाध्यायान् पिता दश ।
दश चैव पितॄन् माता सर्वां वा पृथिवीमपि ।।
गौरवेणाभिभवति नास्ति मातृसमो गुरुः ।
माता गरीयसी यच्च तेनैतां मन्यते जनः ।।
अनु० १०४.१४,१५

प्रीणाति मातरं येन पृथिवी तेन पूजिता । शान्ति० १०.९.२२
नास्ति मातृसमो गुरुः । अनु० ६१.४९

देवेभ्योऽपि पूज्यतमौ मातापितराविति धर्मव्याधः शिक्षयति ।[3]

यद् भारतीयं मातृत्वं वात्सल्य-गङ्गामृतेन सुय्यं वर्धयामास तत्तु स्त्रीप्रतिष्ठामनुपममुच्छ्रापयति । प्रसङ्गेस्मिन् कल्हणस्तु चाण्डालीं प्रति पूज्य-

---

१. धर्म्याः स्त्रियः सभां पूर्वं न नयन्तीति नः श्रुतम् । सभा० ६२.९
ता अधिकृत्य कामसूत्रे ४.१.५५ निदर्शितम्—
धर्ममर्थं तथा कामं लभन्ते स्थानमेव च ।
निःसपत्नं च भर्तारं नार्यः सद्वृत्तमाश्रिताः ।।

२. राजतरंगिणी ५.७६, ७७

३. एतौ पुष्पैः फलैः रत्नैस्तोषयामि सदा द्विज । आर० २०६.२०
युधिष्ठिरः समर्थयति—माता गुरुतरा भूमेः । आर० २९७.४१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भावनिर्भर-प्रशस्योद्गारेण कश्मीरेतिहासं स्वर्णाक्षरेण परिशोभयति। तथा हि—मात्रा परित्यक्तं शिशुं दृष्ट्वा स्नेहात् प्रस्नुतस्तनी सुय्यानाम्नी चाण्डाली तं विहितवृत्तिं कृत्वा धात्र्या पालयामास।[1] स तु स्वीयेन दिव्यज्ञानोद्योगेन कश्मीरं नदी-जलमातृकं विधाय, अन्यत्र च जलौघमपसार्याकालपीडितानपि जनान् सुखसमृद्धांश्चकार।

मातापितरौ

मातृपदेन स्त्रीजातेः प्रतिष्ठा शिखरीभूता मातृदेवो भवेति। तद्यथा गुरुर्नानकः प्रबोधयति—मातर एवावतारानपि जनयन्ति। एता देशे, समाजे, गृहे च सर्वत्र समादरणीयाः।

ऋग्वेदे मातृपदेन सुप्रतिष्ठापिता पृथिवी राजते। तत्र सा भूयिष्ठं दयालुः प्रसादमयी च वर्णिता।[2] अन्यत्र वेदेऽस्मिन् ममतामयी माता वृत्र-प्रकरणे वर्णिता। वृत्रस्य माता तस्य रक्षार्थमिन्द्रेण युद्धेऽङ्गरक्षिका बभूव। तस्या अमरं विभ्राण्मातृस्वरूपं हिरण्यस्तूपनामक ऋषिर्वर्णयति—

नीचावया अभवद् वृत्रपुत्रेन्द्रो अस्या अव वधर्जभार।
उत्तरा सूरधरः पुत्र आसीद्दानुः शये सहवत्सा न धेनुः॥
ऋग्वेदे १.३२.९

एकेनैवानेन श्लोकेन सुकृतं मातुर्गौरवं शाश्वतमविस्मरणीयं स्त्रीप्रतिष्ठा-प्रकरणे। यजुर्वेदेऽभिषेककाले पित्रा सह मातुर्नाम श्रावितमासीत्।[3]

अथर्ववेदानुसारेण—माता भूमिः पुत्रोऽहं पृथिव्याः। १२.१.१२
अर्थात् मातुः साह्येन पुत्रो महिमानमनुभवति। स मातुः पयः स्मरति।[4] पृथिव्याः सर्वे गुणा मातरमाश्रयन्ते। तस्याः स्वपुत्राय प्रदेयमासीद् वर्चः, शक्तिः, पवित्रता, संवर्धनम्, शत्रु-प्रणाशः, वाचो मधु, प्रकाशः, सुरभिः, स्वस्तिः, धनम्, निधिः, वसु, मणिः, हिरण्यमित्यादीनि।[5]

अशोकेन लेखितम्—मातापितरौ शुश्रूषितव्यौ ज्ञातिकेषु च कुले यथार्ह-प्रवर्तितव्यम्। एषा पुराणी प्रकृतिः दीर्घायुषे च।

ब्रह्मगिरौ द्वितीयः शिलालेखः।

---

१. राजतरंगिणी ५.७३।
२. उरुव्यचसं सुशर्वां पृथिवीम् ऋ० १०.१८.१०
३. यजुर्वेदे ९.४०।
४. माता पुत्राय मे पयः। अथर्ववेदे १२.१.१०
५. अथर्व० १२.१ वर्चः ७, ९; शक्तिः ८; पवित्रता १२; संवर्धनम् १३; शत्रुप्रणाशः १४; वाचो मधु १६; प्रकाशः २१; सुरभिः २३; स्वस्तिः ३२; धनम् ४०; निधिः ४४।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

बौद्धसंस्कृतौ पितरौ समादृतौ । सुत्तनिपातानुसारेण महामंगलं यत् पुत्रः पितरौ सेवेत ।[1] यदि नाम कश्चित् पुरुषो वृद्धपितरौ न पालयति, स तु चाण्डाल एव ।[2]

पुत्रः

मनुष्यलोकः पुत्रेणैव जय्यो नान्येन कर्मणा । बृहदारण्यके १.५.१६

कीदृशः पुत्रो विभवेदिति यजुर्वेदे निदर्शितम्—

सोमो वीरं कर्मण्यं ददाति ।
सादन्यं विदथ्यं सभेयं पितृश्रवणं यो ददाशदस्मै । ३४.२१
मम पुत्राः शत्रुहणाः । ऋ० १०.१५९.३

नैकाशाकेन्द्रं पुत्रः कुटुम्बिनां सम्बन्धिनां च परं प्रमोदं स्वजन्मना जीवनेन च सृजतीति शाश्वतधारणा गार्हस्थ्यं निकामं रमणीयं विदधाति ।[3] मातुः कुक्षित एव तस्य श्रेष्ठतमविकासोऽभीष्ट आसीन्मातापित्रोर्येन स न केवलं स्वस्य स्वकुटुम्बस्य च कल्याणविधाने समर्थो भवेदपितुसमाजस्य विश्वेषां देवर्षिपितृणां सर्वभूतानां च स्वयोग्यतया परितोषं प्रकुर्यात् ।

पुत्रो गुणसम्पन्नो भवत्विति वैदिकालीनपित्रोः कामना शिशोर्जन्म कालेऽधोविधं प्रकटति—तेजस्वी, अन्नादः, इन्द्रियावी पशुमांश्च । तै० सं० २.२.५.४ । एतदर्थं यज्ञोऽनुष्ठितः । स शिशोर्मुखे दधिमधुघृतानि प्राशयन्नमन्त्रयत्—भूस्ते दधामि, भुवस्ते दधामि स्वस्ते दधामि । सर्वं त्वयि दधामि ।[4]

'पुत्रो मे शुक्लो जायेत, वेदमनुब्रवीतु, सर्वमायुरियात्, पण्डितो विगीतः, समिति गमः, शुश्रूषितां वाचं भाषिता जायेत' इति पितुरिच्छा बृहदारण्यके निगदिता ।[5]

---

१. सुत्तनिपात १६.५ २. सुत्तनिपाते वसलसुत्ते ७

३. (क) सुतैरियं तनुर्ब्राह्मीक्रियते । मनु० २.२८
(ख) उभयाविनं पुत्रं ते अदुः । अथर्व० ५.२५.९
अर्थात् पुत्रो मातापित्रो रक्षको जायते ।
(ग) विन्दस्व त्वं पुत्रं नारि यस्तुभ्यं शमसच्छमु तस्मै त्वं भव ।
अर्थात् पुत्रो मात्रे माता च पुत्राय कल्याणं विदधाति ।
(घ) उप नः सूनवो गिरः शृण्वन्त्वमृतस्य ये ।
सुमृडीका भवन्तु नः ॥ यजुर्वेद० ३३.७७

४. भूर्भुवः स्वरिति व्याहृतयः । एतासामभिप्रायो ग्रन्थेऽस्मिन् ३९ पृष्ठे द्रष्टव्यः ।

५. बृ० ६.४.१४-१८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पुत्रेण जातेन तस्य मातुर्महिमावर्धत । बृहदारण्यकानुसारेण पिता स्वपुत्रस्य मातरं समबोधयत्—इलासि वीरे वीरमजीजनत् । सा त्वं वीरवती भव यास्मान् वीरवतोऽकरोत् ।

अन्ये सम्मान्या ऊचूराशीरधोविधम्—अतिपिता बताभूरतिपितामहो बताभूः । परमां बत काष्ठां प्रापच्छ्रिया, यशसा ब्रह्मवर्चसेन ।

कस्मात् कारणात् पितुर्मानसे पुत्रस्य पूर्वोक्तदिशा समादरो बभूव । अनादिकालतः संगृह्यमाणज्ञानविज्ञानादिसांस्कृतिकनिधिरानुवंशिकपरम्परया पितरि राशीकृतः । तं पैतृकनिधिं शाश्वतीकर्तुं पुत्र एव परमं निधानमिति विचार्य पिता स्वपुत्रस्य जन्मनि, वर्धने, ज्ञानार्जने च समृद्धोत्साहो बभूव ।

वैदिकयुगे पुत्रेण पिता पूर्वजानामृणान्मुक्तो भवतीति धारणासीत् ।[1] महाभारते च

परं पुत्रान्न विद्यते । आर० १०.४ । न सुताद् विद्यते परम् । आर० १०.५

गृहपतिना आदर्शपथे सम्भृतः स्वभावतः समुदाचारमनुवर्तमानः पुत्रः पितरौ तयोर्वार्धक्येऽरक्षत् । तद्यथा शतपथब्राह्मणे वस्तुष्ठितिर्निगदिता—

तस्मात् पूर्ववयसे पुत्राः पितरमुपजीवन्ति । उत्तरवयसे पुत्रान् पितोपजीवति ।[2]

महाभारते समर्थितम्—

इह वा तारयेद्दुर्गादुत वा प्रेत्य तारयेत् ।
सर्वथा तारयेत् पुत्रः पुत्र इत्युच्यते बुधैः ।। आदि० १४७.५

कुटुम्बे पुत्रः शुश्रूषुः प्रेष्यः प्रियकारी च भवेदिति समुदाचार आशंसनीयो बभूव महाभारतयुगे ।[3] प्राणपणमयुध्यत क्षत्रियपुत्रो बान्धवान् तारयितुमिति महाभारते द्रोणपर्वणि प्रचोदितम् ।[4]

मन्वनुसारेण पुत्रेणार्जितं धनं पित्राधिकृतं स्यात् ।[5]

काव्यसरणिमवलम्ब्य कालिदासेन पितापुत्रसमादरभावः सम्यक् कल्पितोऽभिज्ञानशाकुन्तले दुष्यन्तमुखेन—

---

१. यदापि पेषमातरं पुत्रः प्रमुदितो धयन् ।
एतत्तदग्रे अनृणो भवाम्यहतो पितरौ मर्या । यजु० १९.११

२. शतपथ० १२.२.३.४ । पाश्चात्त्येष्वेषा रीति विरलं दृश्यते ।

३. आदि० ५६.२२

४. द्रो० १४८.४८-६२

५. मनुस्मृति ८.४१६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

आलक्ष्यदन्तमुकुलाननिमित्तहासैरव्यक्तवर्णरमणीयवचःप्रवृत्तीन् ।
अङ्काश्रयप्रणयिनस्तनयान् वहन्तो धन्यास्तदङ्गरजसा मलिनीभवन्ति ॥
अनेन कस्यापि कुलाङ्कुरेण स्पृष्टस्य गात्रस्य सुखं ममैवम् ।
कां निर्वृतिं चेतसि तस्य कुर्याद् यस्यायमङ्कात् कृतिनः प्ररूढः ॥

महाभारतेऽगस्त्यस्य, रामायणे दशरथस्य, रघुवंशे दिलीपस्य, उत्तर-रामचरिते रामस्य च पुत्रैषणा कस्य न मनोहरति ।

भ्राता

वैदिकयुगीनकुटुम्बे भ्रातॄणां स्थानं सुप्रतिष्ठितं प्रतिभाति । तथाहि—

तं (अग्निं) पत्नीभिरनुगच्छेम देवाः
पुत्रैर्भ्रातृभिरुत वा हिरण्यैः । यजु० १५.५०

अर्थात् सर्वे भ्रातरः सहैवाग्निमुपासन्ते । अपरं च मा भ्राता भ्रातरं द्विक्षन् । अथर्व० ३.३०.३ । अर्थाद् भ्रातरः परस्परं मैत्रीभावं सम्पादयन्तु ।

पितुर्जीवनकाले सर्वे भ्रातरः सह वसन्त्विति शाश्वती धारणा महाभारते द्वढं मूलिता वर्तते । पितुरनन्तरमपि भ्रातॄणामेककुटुम्बवासः समर्थितः ।[1] यथा प्रागेव प्रोक्तं मनुर्लघुभ्रातॄणां पुत्रवत् परिपालनं निर्दिशति । तथैव प्रोक्तं रामायणेऽपि । रामायण-महाभारतकाले बृहत्तमकुटुम्बस्य सौष्ठवं सुसम्मतमासीत् । तत्र दशरथस्य कुटुम्बे तस्य महिषीत्रयं, चत्वारो पुत्रास्तेषां वध्वश्चासन् । महाभारते धृतराष्ट्रस्य बृहत्तम-कुटुम्बे तस्य महिषी, पुत्रशतकं, एका कन्या च विरूढा । पाण्डोः कुटुम्बे पत्नीद्वयं कुन्ती माद्री च, तयोः पञ्च पाण्डवाश्च पुत्रा आसन् ।

उत्तमभ्रातरः स्वार्थं परित्यज्यापि कुटुम्बस्यान्यतमेभ्यः प्राणान् त्यक्तुं समुद्यता दृश्यन्ते । तथाहि महाभारते दुर्योधनमतानुसारेण—

अनर्जुनायां च भुवि मुहूर्तमपि मानद ।
जीवितुं नोत्सहेरन् वै भ्रातरोऽस्य सहानुगाः ॥ द्रो० १२०.१४

ज्येष्ठकनिष्ठ भ्रात्रोः परस्पर-सम्बन्धो महाभारते निदर्शितः । तद्यथा भीष्मवचनानुसारेणानुशासन-पर्वणि—

---

१. विभागं बहवो मोहात् कर्तुमिच्छन्ति नित्यदा ।
ततो विभक्ता अन्योऽन्यं नाद्रियन्तेऽर्थमोहिताः ॥
ततः स्वार्थपरान् मूढान् पृथग्भूतान् स्वकैर्धनैः ।
विदित्वा भेदयन्त्येतानमित्रा मित्ररूपिणः ॥
विदित्वा चापरे भिन्नानन्तरेषु पतन्त्यथ ।
भिन्नानामतुलो नाशः क्षिप्रमेव प्रवर्तते ॥ आदि प० २५.१२-१४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ज्येष्ठो भ्राता पितृसमो मृते पितरि भारत ।
न ह्येषां वृत्तिदाता स्यात् स चैतान् परिपालयेत् ॥
कनिष्ठास्तं नमस्येरन् सर्वे छन्दानुवर्तिनः ।
तमेव चोपजीवेरन् यथैव पितरं तथा ॥ १०८.१६,१७

स्वर्गद्वारे युधिष्ठिरः कथयति महाप्रास्थानिकपर्वणि—

गन्तुमिच्छामि तत्राहं यत्र मे भ्रातरो गताः ।
तैर्विना नोत्सहे वस्तुमिह दैत्यनिबर्हण ॥ ३.३५

किमधिकेन प्रसङ्गेऽस्मिन् कुटुम्ब-सौष्ठवनिर्वर्णनेन यत्र

मातरं पितर चैव शुश्रूषन्ति जितेन्द्रियाः ।
भ्रातृणां चैव सस्नेहास्ते नराः स्वर्गगामिनः ॥
कुटुम्बानां च दातारस्ते नराः स्वर्गगामिनः ॥ अनु० २४.८९,९१

निस्सन्देहं भ्रातृणां सहयोगः सहवासश्च कौटुम्बिक-सुख-शान्ति-समृद्धिभ्यः प्रावर्तत पुरा । तेन समाजस्याभ्युदय आसीदेव ।

पोष्यवर्गः

कुटुम्बे न केवलं स्वीयसदस्या अपित्वन्येऽपि दुर्बलाशा जना वासयितव्या आसन् । यथा महाभारते निगदितम्—

वृद्धो ज्ञातिस्तथा मित्रं दरिद्रो यो भवेदपि ।
गृहे वासयितव्यास्ते धन्यमायुष्यमेव च ॥ अनु० १०७.१०५

गृहत्यागः

यथा भारते विशेषतो बौद्धजैनसंस्कृत्योर्विचारकाणां कृते कुटुम्बं तु परिहरणीयमेव महिमशालिजीवनपथे तथैव पाश्चात्त्यदेशेष्वपि मनीषिभिः कुटुम्बं न नितान्तं ग्रहणीयमिति निगदितम् । तथा हि—

He that hath wife and children hath given hostages to fortune for they are impediments to great enterprises. Francis Bacon : Of Marriage and Single life.

A family is but too often a commonwealth of malignants. Alexander Pope : Thoughts on Various Subjects.

The family ! Home of all social evils a charitable institution for indolent women, a prison, workshop for the slaving bread-winner and a hell for children. August Strindberg : The Son of a Servant.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नारी-प्रतिष्ठा

वैदिकनारी

स्त्रीणां वेदविद्यावैदुषी प्रागेव वर्णिता।[1] मन्त्रकर्त्र्य आसन् कतिपय-स्त्रियः। ऋषितर्पणे प्रतिदिनं गार्गी-वाचक्नवी, वडवा-प्रातिथेयी, सुलभा, मैत्रेयी चाचार्या इति तर्प्यन्ते।

स्त्रियाः शाश्वतमहत्त्वं तस्याः सन्तानप्रदातृत्वेन सम्प्रतिष्ठितम्। तद्यथा अथर्ववेदे सम्पुटितम्—

महान्तो अस्यां महिमानो अन्तर्वधूर्जिगाय नवगज्जनित्री। ८.९.११

वैदिकदेवीनां विशेषाः समकालीनस्त्रीणां स्थितिं विभावयन्ति। तदानीन्तनसाहित्ये देवानां चरितं विशेषतरं वर्णितम्, न तावन्मात्रं देवीनां विषये प्ररोचितम्। तत्र देवीषु प्रथमस्थानीयादिती राजते। सादित्याभिधानां प्रमुख-देवानां माता तैः सह चर्चिता। तस्या मानवमात्रस्य मातृत्वं समुदितमेव।[2]

ऋग्वेदे अदितेर्विशेषाः सन्ति धारयत्क्षितिः (१.१३६.३), ज्योतिष्मती (१.१३६.३), विश्वजन्या (७.१८.४) सुपुत्रा, (३.४.११), उग्रपुत्रा (८.५६.११)। तस्याः सान्निध्यं प्रतिदिनं प्रातर्हवनेन प्राप्तव्यमासीत्।[3]

अथर्ववेदे अदितेर्भद्रतमं विश्वमातृत्वमघोविधं प्रसाधितम्—अदितिर्माता स पिता स पुत्रः, सुव्रतानां माता च।

सुप्रणीतिः, उरूची, सुशर्मा, सुत्रामा इत्यादि। कविरदितिं प्रार्थयते—

दैवीं नावं स्वरित्रामनागसो अस्रवन्तीमा रुहेमा स्वस्तये। अथर्व, ७.६.३

सा शूरपुत्रास्ति। ११.१.११

मातृत्वेन अदितिः पर्यायः पृथिव्याः।[4]

---

१. The wife was looked upon as half of the husband, composed hymans, learnt the Vedas and cooperated with their husbands in all religious acts. P. V. kane : History of Dharmaśāstra Vol II Pt. 1 p. 574

२. Her Aditi's motherhood is an essential and characteristic trait. Vedic Mythology p. 121. ऋग्वेदे १.८९.१०। Yāska defines Aditi as the mighty mother of the gods. Ibid. 123.

३. प्रातर्देवीमदितिं जोहवीमि। ऋ० ५.६९.३

४. ऋग्वेदे १.७२.९, अथर्व० १३.१.२। नैघण्टुके च। शतपथे, तैत्तिरीयसंहितायां च। Vedic Mythology p. 121.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अदितेः पूर्वोक्तं शाश्वतं मातृत्वं स्वामिना विवेकान्देन निदर्शित-मधोविधम्—

Even in this poverty a Brahmin's wife never allows a poor man to pass through the village without giving him something to eat.[1] That is considerd as the highest duty of the mother. It is her duty to be served last. She must see that everyone is served before her. That is why mother is regarded as goddess in India. Complete Works of Vivekanand Vol. IV. p. 157.

पत्नीरूपेण काचित्स्त्री प्रशस्यतमा सम्मानिता, नान्यथेति ऋग्वेदेऽग्ने-रनवद्यतां द्रढयितुं कविः कथयति—

'अनवद्या पतिजुष्टेव नारी'। १.७३.३

मनुः कुटुम्बे नारीप्रतिष्ठां समन्वयति—

पितृभिर्भ्रातृभिश्चैताः पतिभिर्देवरैस्तथा।
पूज्या भूषयितव्याश्च बहुकल्याणमीप्सुभिः॥

महाभारतीया नारी

महाभारतीया नारी विदुलामुखेन प्रवदति—

अहं महाकुले जाता ह्रदाद्ध्रदमिवागता।
ईश्वरी सर्वकल्याणी भर्त्रा परमपूजिता॥ उद्योगे १३२.१४

स्वावदानेन महायशस्का नार्यो वस्तुतः पूज्याः सन्ति। महमूदस्या-क्रमणेभ्यो भारतं रक्षितुमपेक्षित-धनसंग्रहाय भारतीया महिलाः स्वशरीरे-भ्योऽलंकारानपनीय समर्पयन्।[2] महाभारतस्य स्पष्टं मतं विद्यत आरण्यकपर्वणि—

वैषम्यमपि सम्प्राप्ता गोपायन्ति कुलस्त्रियः।
आत्मानमात्मना सत्यो जितः स्वर्गो न संशयः॥ ७२.२५

अत एव हरिवंशे निर्दिष्टम्—

ग्राह्या लालयितव्याश्च पूज्याश्च सततं बुधैः।
शीलवत्यो नमस्कार्याः पूज्याः श्रिय इव स्त्रियः॥ ५.४०

---

१. विवेकानन्दोऽत्र महाभारते प्रोक्तं मतमुद्धरन्निव प्रकाशयते। तद्यथा—
स्त्रियः साध्व्यो महाभागाः सम्मता लोकमातरः।
धारयन्ति महीं राजन्निमां संवनकाननाम्॥ अनु० ४३.१९

२. Majumdar : Ancient India p. 326.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सोमदेवः कथासरित्सागरे क्वचन स्त्रीणां मानवलोकभूषणतामापादयति। तद्यथा—

तास्तु काश्चन सद्वंशजाता मुक्ता इवाङ्गनाः ।
याः सुवृत्ताच्छहृदया यान्ति भूषणतां भुवि ॥ ४.१.९८

कुटुम्बाधिकारे स्त्रीणां महत्त्वमासीदेव। महाभारते स्थाने-स्थाने कुन्ती द्रौपद्योस्तद्विषयिणी चरितगाथा वर्तते। यथा वकासुरवधे युधिष्ठिरस्य वैमत्ये सत्यपि कुन्ती ब्राह्मणकुल-रक्षणाय राक्षसं हन्तुं भीमं प्रेषयति।[1] रामायणे आदिकविः प्राथम्येन सीतायाश्चरितं वर्णितवान्।[2]

न केवलं भारतेऽपितु जगति विश्वतो स्त्रीवर्गस्य महती सम्माननावमानना च भूरिशः साहित्यकारैश्चिन्तकैश्च प्रकटिते। स्त्रीविषयकविवेचनं तदुदाहरणेन सम्यक्त्वमर्हति।[3] तद्यथा प्रशंसा—

A beautiful woman is a practical poet, Emerson.

Women are equal because they are not different any more. Erich Fromm Jose Morti.

Women are poets by just being women There is in every true woman's heart a spark of heavenly fire, which lies dormant in the broad day light of prosperity, but which kindles up and beams and blazes in the dark hour of adversity. Washington Irving

निन्दा

There is no other purgatory but a woman. Beaumont and Fletcher.

As a jewel of gold in a swine's snout, so is a fair woman which is without discretion. Bible

Alas the love of women. It is known to be lovely and a fearful thing. Byron.

Women, like flames, have a destroying power. Never to be quenched till they themselves devour. William Concreve

Neither earth nor ocean preduces a creature as savage and monstrous as woman. Euripides

Woman's normal occupation in general runs counter to creative life or contemplative life or saintly life. Anne Morrow

---

१. आदिपर्वणि १५० तमे अध्याये

२. काव्यं रामायणं कृत्स्नं सीतायाश्चरितं महत्। बाल० ४.७

३. अन्यान्युदाहरणानि भूयिष्ठान्येव International Thesaurus of Quotations नामके ग्रन्थे Women शीर्षकेण द्रष्टव्यानि।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सुदूरप्राचीनकालतो बहुविधजीवनस्तरं स्वीकुर्वाणा लोका देशस्य विविधाञ्चलेषु ध्रियमाणा आसन्निति समाज-रचना-प्रकरणे विवेचितम्। पृथग्पृथग्वर्गेषु तेषु स्त्रीणां स्थितिः साम्यवैषम्यचित्रिता प्रत्येकशः पृथग्भावेन पर्यालोचनीया। स्त्रीणां स्थितेः समीक्षणाय तासां स्थितिर्वैभिन्न्यं प्रस्तूयते। सामान्यनियम आसीद् रामायणानुसारेण—

यथात्मनस्तथान्येषां दारा रक्ष्या विपश्चिता।

साधारणतो रमणीरूपमेव स्त्रियाः प्रागल्भ्यं प्रकरोति[1]। तदेवादर्शनीयमासीदध्यात्मपथ-भ्रंशभयाद् वानप्रस्थ-संन्यासाश्रमिणां कृते। गृहस्थोऽपि सावधानधिया परस्त्रीदर्शनं परिहरेत्। अयमासीत् परात्परो धर्मः सनातनः। ईदृशे विधिनिषेधनिगृहीते सुसंस्कृतसमाजे स्त्रियः प्रति उपेक्षाभावस्योद्दीपनं वैदिककालादारभ्य सदैव प्रावर्तत। तासां स्वभावचाञ्चल्यानृतव्यवहार[3]-सख्यभङ्गुरता[4]-नृशंसवृत्ति[5]-मायाचार[6]-स्वैरतादिकमधिकृत्य[7] प्रखरनिन्दाभूरिशः कृता। शास्त्रकारैस्तासां स्वातन्त्र्यं जलौघादपि विशेषतरं-विनाशकारि सम्मतम्।[8] तथापि तत्र बहवस्तत्त्वदर्शिन आचार्या मनीषिणश्च पुरापि बभूवुर्येषां मतेन स्त्रीनिन्दानुचितव्याहरणमेव। तेषु वराहभिहिरः सर्वोत्कृष्टं समादृतः। सोऽवधारयत्यधोविधम्—

येऽप्यङ्गनानां प्रवदन्ति दोषान् वैराग्यमार्गेण गुणान् विहाय।
ते दुर्जना मे मनसो वितर्कः सद्भाववाक्यानि न तानि तेषाम्॥
प्रब्रूत सत्यं कतरोऽङ्गनानां दोषस्तु यो नाचरितो मनुष्यैः।[9]
धार्ष्ट्येन पुंभिः प्रमदा निरस्ता गुणाधिकास्ता मनुनात्र चोक्तम्॥

---

१. रूपयौवनसौभाग्यं स्त्रीणां बलमनुत्तमम्। शान्ति प० ३०८.७३
अन्यत्र सत्त्वशीलगुणोपेता गुणकेशी विश्रुतेति अर्थवादः। उद्योगे १०२.५
२. स्त्रिया अशास्यं मनः। ऋ० ८.३३.१७
३. शतपथ० १४.१.१.३१
४. न वै स्त्रैणानि सख्यानि सन्ति। ऋ० १०.९५.१५
५. महाभारते आरण्यकपर्वणि २९.१-१०
६. आरण्यकपर्वणि ३९.५
७. सभापर्वणि २८.२३
८. प्रजापतिमतं ह्येतन्न स्त्री स्वातन्त्र्यमर्हति। अनु० २०.१४
९. अत्र वराहमिहिरो महाभारतमनुवदति। महाभारते प्रोक्तम्—
उत्सृष्टमामिषं भूमौ प्रार्थयन्ति यथा खगाः।
प्रार्थयन्ति जनाः सर्वे वीरहीनां तथा स्त्रियम्॥ आदि० १४६.१२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

जाया वा स्याज्जनित्री वा स्यात् सम्भवः स्त्रीकृतो नृणाम् ।
हे कृतघ्नास्तयोर्निन्दां कुर्वतां वः कुतः सुखम् ॥
अहो धार्ष्ट्यमसाधूनां निन्दतामनघाः स्त्रियः ।
मुष्णतामिव चौराणां तिष्ठ चौरेति जल्पताम् ॥
पुरुषश्चटुलानि कामिनीनां कुरुते यानि रहो न तानि पश्चात् ।
सुकृतज्ञतयाङ्गना गतासूनवगुह्य प्रविशन्ति सप्तजिह्वम् ॥
बृहत्संहिता ७४.५.६, ११, १५, १६

एकस्या अपि स्त्रिया दोषेण सर्वा नारीजातिरेव कविभिर्निन्द्यत इति राजतरङ्गिण्यां ७.७२५-७२८ कथ्यामधिकृत्योदाहरणेनावधारणीयम् । अन्यत्र स एव कल्हणः प्रतिवेदयति—

इति परिणतौ प्रेम्ण्युच्चावचे परिचिन्तिते ।
क्वचन नियमान्निन्द्या वन्द्या न वा सुधिया स्त्रियः ॥ राजत० ७.८५६

यद्यपि मनुरन्तरान्तरं स्त्रीनिन्दापरम्परां सन्तनोति तथापि तत्त्वदर्शी-स स्त्रीगौरवं सत्यं प्रतिपादयति । तथाहि—

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः । ३.५६
शोचन्ति जामयो यत्र विनश्यत्याशु तत्कुलम् ।
न शोचन्ति तु यत्रैता वर्धते तद्धि सर्वथा ॥ ३.५७
प्रजनार्थं महाभागा पूजार्हा गृहदीप्तयः ।
स्त्रियश्च श्रियश्च गेहेषु न विशेषोऽस्ति कश्चन । ९.२६
तस्मादेताः सदा पूज्या भूषणाच्छादनाशनैः ।
भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु च ॥ ३.५९
यदि हि स्त्री न रोचेत पुमांसं न प्रमोदयेत् ।
अप्रमोदात्पुनः पुंसः प्रजनं न प्रवर्तते ॥ ३.६१
उत्पादनमपत्यस्य जातस्य परिपालनम् ।
प्रत्यहं लोकयात्रायाः प्रत्यक्षं स्त्रीनिबन्धनम् ॥ ९.२७
अपत्यं धर्मकार्याणि शुश्रूषा रतिरुत्तमा ।
दाराधीनस्तथा स्वर्गः पितृणामात्मनश्च ह ॥ ९.२८

अपरं च कुललनायाः शाश्वतलक्षणमासीत्—

शिरो यदवगुण्ठितं सहजरूढलज्जाननं
गतं च परिमन्थरं चरणकोटिलक्ष्ये दृशौ ।
वचः परिमितं च यन्मधुरमन्दाक्षरं निजं
तदियमङ्गना वदति नूनमुच्चैःकुलम् ॥ चण्डकौशिके ३.२०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्त्रीपुरुषयोः साम्यं लिङ्गायतैः सर्वेषु सामाजिकव्यवहारेषु स्वीकृतम् ।

भारते कौटुम्बिकनारी केवलं भोग्यवस्तु नाभवत् । महाभारते कुन्ती, द्रौपदी च, रामायणे सीता, मन्दोदरी, तारा च पत्युः कर्तव्यनिर्धारणदिशि ससारं परामर्शं पुरस्कुर्वन्ति स्म । उच्चावचेषु सर्वेषु कुटुम्बेषु इयं प्रवृत्तिः प्रायः सदैव प्रावर्तत ।

जैनबौद्धसंस्कृता अपि नारीनिन्दा सातिशयं प्रचुरायते, यतो हि नाम स्त्रिय एव संन्यासोपक्रमे महतीं बाधामुपस्थापयन्ति स्मेति स्वानुभूतमेवासीत् साधूनाम् । स्त्रीचरित्र-चित्रणं तत्रातिरञ्जितं प्रतिभाति ।

स्त्री यथानाम सृष्टि-जननीति[1] समाजे महत्त्वपूर्णपदमधितिष्ठति । तथा हि—

श्रुतं द्रष्टं स्पृष्टं स्मृतमपि नृणां ह्लादजननम्,
न रत्नं स्त्रीभ्योऽन्यत् क्वचिदपि कृतं लोकपतिना ।
तदर्थं धर्मार्थौ विभवरंसौख्यानि च ततो,
गृहे लक्ष्म्यो मान्याः सततमबला मानविभवैः ।।सुभाषितरत्नावली
कार्येषु मन्त्री करणेषु दासी भोज्येषु माता शयनेषु रम्भा ।
धर्मानुकूला क्षमया धरित्री भार्या च षाड्गुण्यवतीह दुर्लभा ।।
नित्यं स्नाता सुगन्धा च नित्यं च प्रियवादिनी ।
अल्पभुङ् मितवक्त्री च देवता सा न मानुषी ।।
अभ्युत्थानमुपागते गृहपतौ तद्भाषणे नम्रता ।
तत्पादार्पितदृष्टिरासनविधिस्तस्योपचर्या स्वयम् ।
सुप्ते तत्र शयीत तत्प्रथमतो जह्याच्च शय्यामिति
प्राच्यैः पुत्रि निवेदितः कुलवधूसिद्धान्तधर्मागमः ।।
रूपसपन्नमग्राम्यं प्रेमप्रेष्यं प्रियंवदम् ।
कुलीनमनुकूलं च कलत्रं कुत्र लभ्यते ।। सुभाषितरत्नाकरे कुलस्त्रीचरित्ररक्षणाय अर्थशास्त्रे विहितं यद् दूषको राज्ञा वध्यः । २.३६.५३

आर्येतरेष्वपि स्त्रीकवयः प्रागलभ्यमवापुः । पेरियालवारस्य पुत्री आण्डाल दक्षिणभारतस्य भक्तकवयित्रीषु स्मरणीया वर्तते ।[2]

पारलौकिक सद्गतिः

स्त्रीणामपि स्वर्गप्राप्तिर्भगवद्भक्त्यापि सम्भवतीति गीतायां कृष्णवचनम्—

स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् । १९.५६

---

१. स्त्यायत्यस्यां गर्भ इति स्त्री । महाभाष्ये ४.१३

२. प्रो० भार्गव : प्राचीन भारत का इतिहास पृ० ३०३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्त्रीणां कृते वानप्रस्थस्य संन्यासस्य च विधानमासीत्। महाभाष्ये श्रमणा, तापसी, प्रव्रजितेति संज्ञिता वानप्रस्थाः स्त्रियश्चर्चिताः। कुमार-श्रमणादि पदानि तत्र तापसीं द्योतयन्ति।[1]

पत्नीव्रतं बहुभार्यत्वं च

वैवाहिकदृष्ट्या स्त्रीणां स्थितिः पुरा शोचनीया आसीत्। तेषां सापत्न्यभयं भृशं प्राभवत् यतो हि नाम रुष्टो वा दुष्टो वा कामशण्डो वा पूर्वतो वर्त्तमानानां पत्नीनां नवनवपत्नीयोगान्महद्भयमुदपादयत्। यथा विवाहप्रकरणे दृष्टमेव पत्नीप्राप्तये धनेन, युद्धेन, चौर्येण गान्धर्वविद्योपचारेण चापि योजनाः कार्यान्विता आसन्। सपत्न्या विनाशाय, तस्याः पतिभेदाय, पत्युः प्रीतेः सम्यगावर्जनाय, तस्य वशीकरणाय च मन्त्राभिचारप्रयोगा वैदिककालत एव प्रायुज्यन्त। ऋग्वेदे इन्द्रस्य पत्नी अस्मै प्रयोजनाय स्वकृतार्थतां प्रवदति—

अहं तद्विद्वला पतिमभ्यसाक्षि विषासहिः। १०.१५९.१
ममेदनु क्रतुं पतिः सेहानाया उपाचरेत्॥ १०.१५९.२
इदं तदक्रि देवा असपत्ना किलाभुवम्॥ १०.१५९.४
असपत्ना सपत्नघ्नी जयन्त्यभिभूवरी॥ १०.१५९.५
समजैषमिमा अहं सपत्नीरभिभूवरी।
यथाहमस्य वीरस्य विराजानि जनस्य च॥ १०.१५९.६

गृहे पत्नीनां समाहारो गृहपतेः समृद्धिं प्रकटयतीति वैदिकमतं तेषां लक्ष्मीस्वरूपं विवृणोति।[2] हरिश्चन्द्रो राजा पत्नीशतकेनालंकृत आसीत्। महाभाष्यानुसारेण कश्चित् पतिरष्टभार्यो भवितुमार्हत्।[3] पतिं बिभर्तीति भार्या।[4]

इभ्या, इभ्यतरा, इभ्यतमा, आढ्या आढ्यतरा, आढ्यतमेति मनोहारित्वाद् बहुपत्नीत्वं सन्निधापयति।[5]

पूर्वोक्तं बहुपत्नीवं लोकरुचिं व्यनक्ति। परवर्तिधर्मशास्त्रं क्वचित् सापत्न्यकृताममर्षप्रवृत्तिं विरोधयत्येव। तथा हि—सहधर्मिणी पुत्रवती च भार्या

---

१. श्रमणादिगण २.१.७०
२. श्रियमेवास्मिंस्तद्दधति। तै० ब्रा० ३.८.४; शतपथ० १३.२.६.७
३. महाभाष्ये ७.१.२१ ४. महाभाष्ये ६.३.२८
५. महाभाष्ये २.१.६९। नित्यं नवनवसुवासोभिः पतिप्रहर्षणं पत्न्याः सौभाग्यमासीत्।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भवेत्तर्हि अपरः परिग्रहो दण्डनीय एव। निर्दोषपत्नीत्यागी गर्दभचर्मधृत् षण्मासान् भिक्षेतेति आपस्तम्बादेशः।[1] नारदानुसारेण—

अनुकूलामवारदुष्टां दक्षां साध्वीं प्रजावतीम्।
त्यजन् भार्यामवस्थाप्यो राज्ञा दण्डेन भूयसा॥ स्त्रीपुंस ९५

'पुत्रेऽसति अष्टवर्षानन्तरमेवापरो विवाहः कर्तव्य' इति कौटिल्यस्य नियमनमर्थशास्त्रे। दुर्वृत्तयो नार्योऽपरविवाहेनास्वीकरणीयाः।[2]

राज्ञां समृद्धिशालिनां च महासंख्यकपरिग्रहः समाजे बहुविवाहप्रवृत्तिं निर्बाधं प्रवर्धयतिस्म इति शोच्यम्। कृष्णस्य १६००० पत्नच्य आसन्। ऐतिहासिकराजानां शतसंख्यकाः पत्नच्यो बभूवुरित्येतादृशानि वृत्तानि लोकसमक्षं पुरस्करणं नार्हन्ति। महाभारतीयबहुभार्यस्तु पुण्योदयप्रतीकोपाधिर्वच्चनैवास्मादृशानां मतेन।।[3] अत्रापि एकपत्नी भवेद्राज्ञामपीति जनमेजयस्य व्रतेनाधोविधं प्रतीयते—

स चापि तां प्राप्य मुदा युतोऽभवत् न चान्यनारीषु मनो दधे क्वचित्॥
आदि० ४०.९

कश्मीरराजो हर्षस्य ३६० राज्य आसन्। कल्हणोऽस्मात् कारणात् तं मूढमतिरिति विशेषयति।[4]

तथापि 'न चाप्यधर्मः कल्याण बहुपत्नीकता नृणाम्' आदि० १४६.३४ इति पुरुषाणां बहुभार्यत्वमनभीष्टमपि पुरा कदापि सर्वथा न निषिद्धः, यद्यपि बहुपत्नीत्वस्य दोषाः पूर्वपुरुषाणां समक्षमासीदेव। रामायणानुसारेणासितस्य पत्नीद्वयमासीत्। तत्रेर्ष्यया गर्भहीना पत्नी गर्भवत्यै विषं ददौ।[5] द्वितीयोद्वाहेन ब्राह्मणो ब्रह्मघ्नो भवेदिति कात्यायनमतमधोविधं विलसति—

द्वितीयां चैव यः पत्नीं वहेद्वैतानिकाग्निभिः।
जीवत्यां प्रथमायां तु ब्रह्मघ्नेन समं हि तत्॥

---

१. खराजिनं बहिर्लोमपरिधाय दारव्यतिक्रमिणे भिक्षामिति सप्तागाराणि चरेत्। सा वृत्तिः षण्मासान्।१.१०.२८.१९

२. नारीदोषा अस्मिन् प्रकरणे परिगणिताः —मद्यपानम्, निदानेनाप्यचिकित्स्यो रोगः, धौर्त्यम्, बहुव्ययवृत्तिः, कटुभाषणम्, कन्याया एव जननम्। मनु० ५.८०

३. कार्तिकं तु नरो मासं यः कुर्यादेकभोजनम्।
शूरश्च बहुभार्यश्च कीर्तिमांश्चैव जायते। अनु० १०९.२९

४. राजत० ७.९६३

५. बालकाण्डे ७०.३१। विषप्रभावविनिर्मुक्तायास्तस्याः पुत्रः सगरोऽजायत।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्त्रीणां कन्यकानां च दानं बहुभार्यत्वस्य कारणेष्वन्यतमम् ।[1] कुतो राजानः समृद्धिशालिनो जनाश्च दानार्थं कन्यालक्षं प्राप्तुं समर्था बभूवुरिति प्रश्नः तासां विक्रयं प्रकटयति । नारीणां हीनत्वस्येदं परमं प्रमाणमेव पुरा भारतीय-समाजस्यासद्दृष्टिं द्योतयति ।

विश्वस्य नैकदेशेषु पुरा स्त्रीविक्रयस्य प्रचलनमगर्हितमासीत् । तथाहि—

The weird custom of selling a wife was common among the Anglo-Saxons. It was a common belief in England for a great many centuries that a husband could legally sell his wife at a public auction. It is intriguing to know that in England the custom was seldom considered sordid or inhuman.....The sale of a wife is the incident on which Thomas Hardy based his novel The Mayor of Casterbridge. Among the English peasantry the "Horn Market was well established. The procedure was for the husband to lead his wife flamboyantly to the public market on full market day with a halter around her neck. She was then tied to a cattle ring and made to stand in the market square while her husband lifted his voice making lavish bows to the prospective buyers. After the highest bid had been reached a bill of sale would be made out and the deal completed. Subash Rele.

एकभार्यत्वम्

कस्यचित् पुरुषस्यैकैव भार्येति आदर्शः सदैव प्राभवत् । तथापि राज्ञामृषीणां च बहुभार्यत्वमविरलं प्रतिभाति ।

परवर्तिशास्त्रकारा एकपत्नीत्वं शंसन्ति । तथाहि आपस्तम्बधर्मसूत्रे—धर्मप्रजासम्पन्ने दारे नान्यां कुर्वीत । अन्यतराभावे कार्या प्रागग्न्याधेयात् । २.५.११.१२, १३ ।

यदि प्रथमपत्न्या पुत्रो न भवेत्तर्हि द्वितीयो विवाहः कार्यः । कौटिल्यः सम्यङ् निदर्शयति—विवाहस्य पञ्चादष्टवर्षं यावत् पुत्रोत्पत्तये प्रतीक्ष्यैव द्वितीया पत्नी परिणेया ।

---

१. सुदर्शननामकस्य महाराजस्य दानशालायां कन्यका ब्राह्मणेभ्यः प्रदत्ताः । दीघनिकाये २४ महासुदस्सनसुत्त । राजसूययज्ञे युधिष्ठिरो लक्षाधिककन्यकाः ब्राह्मणेभ्यः प्रायच्छत । सभा० ३०.५१ । शान्ति० २९.५८ । आरण्यक० २९४.३ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मुगलमहाराजोऽकबरो विहितवान्—No one was to marry more than one wife, except in case of barrenness. One gold one wife was the rule.
आईन-अकबरी पृष्ठ २१४

वैदिककालादेव परस्त्रीगमनं महापापमत एव दुर्गतिकारकमिति समाम्नातम् । अथर्ववेदे निगदितम्—

नास्य धेनुः कल्याणी नानड्वान् सहते ध्रुवम् ।
विजानिर्यत्र ब्राह्मणो रात्रिं वसति पापया ॥ ५.१७.१८

विवाहावस्था

वैदिकयुगीन-विवाहसन्दर्भैः स्पष्टं प्रतीयते यद् युवभूतयोर्वधूवरयोर्विवाहः समपद्यत । रामायणे महाभारते च वर्णिता विवाहाः सुवयस्कानां वधूवराणामेव दृश्यते । तत्रावधारितं वयः पतिसंयोगसुलभमिति विशेषितं रामायणे ।[1] परवर्तियुगे विवाहावस्था लब्धवीकृतापि कन्याया प्रजननयोग्यतामपेक्षते ।[2] दाम्पत्यधर्मोचिता कन्या पितृगृहे मा वसत्विति परवर्तिधर्मशास्त्रकाराणां प्रौढवादः ।[3] परतः स्मृतिकारा दशवर्षान्न्यूनैव कन्या परिणेयेति प्रतिपादितवन्तः ।[4]

यथा अलबरूनी लिखति द्वादश-ख्रीष्ट-शताब्दे—ब्राह्मणकन्याविवाहो प्रायः द्वादशे वर्षेऽभूत् । शनैः शनैर्विवाहावस्था न्यूनतरा संजाता । दशवर्षाभ्यधिका कन्या पितृगृहेऽपवादेनैवोवास । मातुरङ्केऽपि कन्या मध्ययुगे क्वचिदूढासीत् ।

आधुनिकयुगे विशेषतः स्वातन्त्र्ये सम्प्राप्ते कन्यानां विवाहावस्था वर्धमानैव विंशतिवर्षं यावद् वर्तते । कन्यानां शिक्षाव्यवस्थौचित्येन तासां वैवाहिकावस्था-मर्यादावश्यकतानुसारेण स्वत एव समवर्धत । तथापि गार्हस्थ्यस्य सुदृढभूमिकामभिलक्ष्य कन्याविवाहस्य दीर्घविलम्बनं न समर्थनीयम् ।

---

१. रामायणे अयोध्याकाण्डे ११९.३४

२. त्रीणि वर्षाण्युदीक्षेत कुमारी ऋतुमती सती ।
ऊर्ध्वं तु कालादेतस्माद् विन्देत सदृशं पतिम् ॥ मनु० ९.९०

३. अप्रयच्छन् समाप्नोति भ्रूणहत्यामृतौ ऋतौ ॥ याज्ञ० १.१३

४. तस्माद्उद्वाहयेत् कन्यां यावन्नर्तुमती भवेत् ।
अष्टवर्षीया कन्या गौरी एव विवाहोत्तमेति सम्मतम् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

न केवलं भारतेऽपितु योरपीयदेशेष्वपि मध्ययुगे कन्याविवाहावस्था दश वा द्वादश वा वर्षं यावदासीत् ।[1] प्रो० अलटेकरः सूचयति—

In the age of chivalry girls were often married at the age of 5, simply because marriage was a matter of military tactics and territorial alliances.[2]

कन्या

यशःस्वरूपिणी कन्येति अथर्ववेदे (१०.३.२०) निगदितम् । कन्यायाः प्रशस्य-स्वरूपं विकासक्रमेण ऋग्वेदेऽधोविधं निदर्शितम्—

कन्येव तन्वा शाशदानाँ एषि देवि देवमियक्षमाणम् । १.१२३.१०

अर्थान्निसर्गतः सौन्दर्यमण्डिता सा पतिंवरा बभूव । सौन्दर्यशालिता तस्या अभिज्ञानं बभूव । अत्रोषसा उपमा भूयिष्ठं तस्याश्चारुतां प्रमाणयति । अन्यच्च—

अनन्यमासीत् किंचिद् वर्चः (virtue) कन्यायाः ।[3]

वर्चस्विनीति सा प्रगुणवती सम्मता । यथा वृक्षः पुष्पादिभिराकर्षति तथैव कन्या वर्चसा भगेन च वरेण्या भवति ।[4] यथा युवा कश्चिद् ब्रह्मचर्येण योग्यतामवाप्नोति तथैव कन्यापि ब्रह्मचर्येण योग्यतमा भवति ।[5] एतैः सन्दर्भैः प्रतीयते यदवयस्कानां कन्यानां विवाहस्य रीतिर्नासीत् ।[6]

महाभारतानुसारेण कतिपयपितरः पुत्रकन्यौ उभौ समौ इति विचारयन्ति स्म ।[7] तदा समृद्धिशालिनां विनोदायालंकृतकन्याभिरुपासनमायोजितमासीत् ।[8]

---

१. Muller Family p. 260.

२. Position of Women in Hindu Civilisation p. 64.

३. योऽश्वेषु वीरेषु यो मृगेषु हस्तिषु । कन्यायां वर्चो यद् भूमे । अथर्व० १२.१.२५

४. भगमस्या वर्च आदिष्यधि वृक्षादिव स्रजम् । अथर्व० १.१४.१

५. ब्रह्मचर्येण कन्या युवानं विन्दते पतिम् । अथर्व० ५.११.१८
महाभारतानुसारेण श्रैष्ठ्यमासीत् कन्याप्रदानं चरितब्रह्मचर्ये । अनु० ९६.४४ । अन्यत्र कुलीना रूपवती, नाथवती च कन्या कुलाभ्युदयाय ग्रहणीयेति सम्मतम् । आदि० १०३.६

६. भद्रा वधूर्भवति यत्सुपेशा स्वयं सा मित्रं वनुते जने चित् । ऋग्वेदे १०.२७.१२

७. मम तुल्यावुभौ मतौ । आदि० १.१४५.३६ ।

८. आर० २२९.८ । जनार्दनं द्रष्टुं कल्याण्यः कन्या अनावृताः गमिष्यन्ति इति उद्योगे ८४.१६ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

राजकर्मणि नियोज्या आसन् राजकुमार्यो यदि नाम कस्यचित् राज्ञः कुमारो नाभवदिति द्वैपायनो युधिष्ठिरं प्रबोधयामास।[1]

पतञ्जल्यनुसारेण विवाहात् पूर्वं कन्या भवति, पश्चात् सा वधूर्भवति। योग्यतमाय वराय पाणिग्रहणविधानेन कन्या प्रदेयेति तस्या अभिभावकानां चिन्ता बभूव।[2] महाभाष्यानुसारेण केन कन्याया विवाहो भवत्वित्यस्मिन् विषये तस्या मतमपि महत्त्वपूर्णमासीत्।[3]

कन्यानां यथार्हजीवनयोगाय तासां विवाहप्रसङ्गे विक्रयः शुल्कग्रहणं च निषिद्धमासीत्।[4] समग्रजीवने सम्बन्धिभिः पूज्या लालयितव्या च कन्या बभूवेति भीष्म एवं वदति—

पितृभिर्भ्रातृभिश्चैव श्वशुरैरथदेवरैः।
पूज्या लालयितव्याश्च बहुकल्याणमीप्सुभिः॥ अनु० ४६.३

महाभाष्यानुसारेण कतिपयाः कन्या आजीवनमनूढा अभवन्। अत एव ता वृद्धकुमार्यः, जरत्कुमार्यश्चाभिहिताः।[5] अध्ययनपरायणा नैष्ठिकब्रह्मचारिण्यः श्रमणाः प्रव्रजिता वा ख्याता आसन्।[6] बहवः कन्यका वैदुष्यपथे कठ-कालाप-बह्वृचशाखाः शिक्षन्ते स्म। ता अध्यापनेऽपि व्यापृता आसन्।[7]

रामायणानुसारेणाभिजातकुलेषु कन्याया विवाहानन्तरं जीवनं सुखमयं भवेदिति भृशं चिन्ताविषय आसीत्।[8] अनेन स्पष्टं प्रतिभाति यत् कन्याविषये लोका उदासीना नाभवन्। प्रकणेऽस्मिन् सीता-विवाह-विषये महाराज-जनकस्य चिन्तावधानमर्हति।[9] कन्याप्राप्त्या पितुः महती प्रीतिः समजायतेति रामायणे—

अवाप्तो विपुलामृद्धिं मामवाप्य नराधिपः। अयो.११८.३२
ममेयं तनयेत्युक्त्वा स्नेहो मयि निपातितः। अयो.११८.३०

---

१. कुमारो नास्ति येषां च कन्यास्तत्राभिषेचय। शान्ति० ३४.३३
२. अभिरूपाय कन्या देयेति न चानभिरूपे प्रवृत्तिरस्ति। तत्राभिरूपतमायेति गम्यते। महाभाष्ये १.४.४२
३. महाभाष्ये ३.२.४६
४. महाभारतेऽनुशासनपर्वणि २.३१; ४५.१९-२१ ९६.३१; आर० ११५.१२
५. महाभाष्ये ६.२.९५
६. महा० २.१.७०। एवमेवाध्यापिका, तापस्यः, पण्डिताश्चा।
७. महा० ७.३.४५। नारीशिक्षाधिकारः प्रकृतग्रन्थस्य १२३ पृष्ठे द्रष्टव्यः।
८. कन्यापितृत्वं दुःखं हि सर्वेषां मानकांक्षिणाम्।
न ज्ञायते च कः कन्यां वरयेदिति कन्यके॥ उत्तर० ९.९
९. चिन्तामभ्यगमद् दीनो (जनकः) वित्तनाशादिवाधनः। अयो० ११८.३४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कन्यायै मातुः स्नेहस्तु शाश्वत एवेति रामायणे निदर्शितः —

तया सम्भाविता चास्मि स्निग्धया मातृसौहृदात् ॥ अयो.११८.३३

कन्यानां माङ्गलिकता रामायणे प्रशस्या वर्तते । मङ्गलायोजनेषु तासां पुरस्सरत्वं रमणीयमित्यावश्यकमासीत् ।[1]

परदर्शनम् , अवगुण्ठनं च

लोकानां वर्ज्यं ग्राम्यधर्मं नियन्तुमनावश्यकप्रेमप्रपञ्च-पाशात् स्त्रियं वा पुरुषं वा रक्षितुं च प्राचीनकाले मनीषिभिर्ये उपाया अवधारितास्तेष्व-गुण्ठनं प्रथमस्थानीयमेव ।[2] अवगुण्ठनेन शारीरिक-सौन्दर्यकाम-चेष्टादि-गोपनं क्रियते ।[3] तत्तु न केवलं स्त्रीणामपितु पुरुषाणामपि कृतम् । स्त्रीणाम-वगुण्ठनं तु प्रतीतमेव प्रायो भारतीयनारी-सुलभलज्जाविशेषप्रतीकम् ।[4] वैदिकबौद्धजैनसाधु-ब्रह्मचारिणामपि शारीरिक-सौन्दर्यं नारीमनसि काम-विकारान् न जनयेदित्युद्दिश्य तेषां प्रावरण-प्रसाधनादिविषयकविधानं विशेषतश्चार्याकालिकं सम्प्रकल्पितम् । नारीणामन्तःपुरवासोऽपि पूर्वोक्ता-भिप्रायेण पुरा भृशं प्रवर्तितमासीत् । न केवलं धनिका अपितु साधारण-ब्राह्मणाः स्त्रीणां कृतेऽन्तःपुरवासं प्रबन्धयामासुः ।[5]

यथा स्त्रियस्तथैव पुरुषा अपि यथासम्भवमात्मनो रूपं संयतविधिना प्रदर्शयन्तु यत् तान् दृष्ट्वा स्त्रियः कामपीडिता मा भवन्तु । कामवृत्ते-र्नियन्त्रणायेदृशं वर्त्तनं सनातनोपयोगमर्हति । कामपाशनिवृत्तये मनुना ब्रह्मचारिणः कृतेऽभ्यङ्गमञ्जनमुपानच्छत्रादिकं वर्जितवान् ।[6] तत्र कारणं प्रतिभाति यदेतेषामुपयोगेन स कस्या अपि नार्यः प्रणयपाशे बद्धो न भवेत् ।

---

१. युद्धकाण्डे १२८.३८,६२, अयोध्याकाण्डे १४.३६

२. न तु सुन्दरी पत्नी प्रदर्शनीया, यतो हि नाम कामान्धास्तामपाहरिष्यन् । सौन्दर्यवशीभूतो वरुण उतथ्यपत्नीं भद्रामपाहरत् । अनु० १३९.९–२८ । अन्य उपायाः सन्ति (१) गृहाभ्यन्तरवासः, (२) यात्रायां स्वीययानस्य कञ्चुकावरणं च (३) परपुरुषदर्शनं सर्वथा परिहर्तुं कञ्चुकधारणम् ।

३. एतदनुसृत्य मृच्छकटिके चेटी वसन्तसेनां निवेदयति—त्वरमाणमण्डना गृहीता-वगुण्ठना गच्छतु । चारुदत्ते चतुर्थाङ्के च ।

४. पश्येष्टदारदारांस्ते भ्रष्टलज्जावगुण्ठनान् ॥ रामायणे युद्ध० १११.६२ उत्सृष्टसत्पुरुषोचितलज्जावगुण्ठनानाम् । वेणीसंहारे । अवगुण्ठन-संवीता कुलजा भिसरेद्यदि । साहित्यदर्पणे ।

५. ब्राह्मणस्यान्तः पुरमिति आदिपर्व० १४५.१८ ।

६. मनुस्मृतौ २.१७८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

इदं तु स्वभाविकमेव। तस्य ब्रह्मचारिणो नैसर्गिक सरलरूपं स्त्रीणामाकर्षणाय न भवति। तथैव वानप्रस्थानां संन्यासिनामपि वर्तनं स्त्रीणामाकर्षणाय न भवेदिति जैनबौद्धसंस्कृतावपि विहितम्।[1] अत्र प्रश्नः समुदेति यत् कीदृशं स्त्रीणां वर्तनं भवेद् यत् तासां लोकसमक्षं कामविलासकः प्रभावो न भवेत्। स्त्रियस्तु अत्र प्रकरणे वयस्काः कन्यकाः, योषितो रामाश्चाभिप्रेता न तु जरत्यः।

महाभारतानुसारेण गुरुजनानां समक्षं शिष्टाचार-दृष्ट्या स्त्रीणामवगुण्ठनं समीहितमासीत्।[2] महावीरचरिते रामः सीतां प्रबोधयति—एते गुरवः। तदपसृत्य कृतावगुण्ठना भव।[3]

ऋग्वेदे स्त्रीणां प्रतिष्ठास्पदं स्थानं पुरुषेण साम्यं बिभर्ति। तथापि ऋषिभिर्दृष्टमासीत्—

स्त्रिया अशास्यं मनः। ऋ० ८.३३.१७

अत एव ब्राह्मणकुलाङ्गनानां कृते तेषामादेश आसीत्—

अधः पश्यस्व मोपरि संतरां पादकौ हर।
मा ते कशप्लकौ दृशन् स्त्री हि ब्रह्मा बभूविथ। ८.३३.१९

अर्थाद् गृहाद् बहिर्गमनकाले केवलं पादसरणिरेव द्रष्टव्या नो इतस्ततः सा पश्येत्। आवरणीयाङ्गं शरीरस्य कोऽपि नेक्षेत। ईदृशमवगुण्ठनविधानं ब्राह्मण-स्त्रीकृतेऽवधारितमासीत्। क्षत्रीयोषितां विषये तदेवाधोलिखिते ऋग्वेदमन्त्रे प्रकटति—

मिम्यक्ष येषु सुधिता घृताची हिरण्यनिर्णिगु परा न ऋष्टिः।
गुहा चरन्ती मनुषो न योषा सभावती विदथ्येव सं वाक्॥ १.१६७.३

अनेन विभायते यद् यथा ऋष्टिः साधारणतः कोशे निधानमर्हति, आवश्यकतानुसारेण बहिष्कृष्टा विद्युदिव चञ्चला चकास्ति, तथैव योषा साधारणतो लोकदृष्टिपरे गृहे संविशन्ती सभामागत्य वागिव सुप्रकाशा भवति। अनेन तासां वैदिकयुगीन-क्षत्रीणां गृहान्तर-संवास-मर्यादा प्रकटीभवति। भवतु नाम पुरुषवत्तासां सभासु भृशं भाषणम्।

प्रगततमसमाजे यूनोः परस्परं प्रेमाकर्षणं जुगुप्सितं पुरा नासीत्। तथाहि—

---

१. नखश्मश्रुमलदिग्धानां वानप्रस्थानां संन्यासिनां श्रमणानां भिक्षाव्रतानामप्येवमेवानाकर्षको जटाजूटो वल्कलमजिनं च प्रभवन्ति।

२. व्रीडां जग्मुः पुरा याः स्म सखीनामपि योषितः।
ता एकवस्त्रा निर्लज्जाः श्वश्रूणां पुरतोऽभवन्॥ स्त्री० ९.१५

३. महावीरचरिते २.२६/२७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

एवेद्यूने युवतयो नमन्त यदीमुशन्नुशतीरेत्यच्छ ।
सं जानते मनसा सं चिकित्रे । ऋ० १०.३०.६

समाजेऽवगुण्ठनस्य प्रथा शनैः शनैः समवर्धत । तत्र यथा यथा साधारण-स्त्रीणां दासीनां च संख्या नात्यधिका बभूव तथा तथा कामुकैः कुलस्त्रीणां बलाद् धर्षणं वीक्ष्य (१) तासां कार्यपरिधिः गृहे एव सीमितः (२) गृहाद् बहिस्तासामवगुण्ठनं विधाय दर्शनादिकं व्यवहितम् (३) सम्बन्धि-जनान् विहायापरजनैः सम्भाषणादिको व्यवहारो नियमितः । अपरं च तत्रासन् ब्रह्मचारिणो वानप्रस्थाः संन्यासिनश्च । रमणीनां रूपसौन्दर्य-विलासादिभिस्तेषां व्रतविरतिर्न भवेदित्युद्दिश्यावगुण्ठन-विधानं दृढं नियोजितम् ।[1] सौन्दर्य-विमुखानामेतेषां तपोधनानां बौद्धजैनश्रमणानां च संख्या-बाहुल्यं खीष्टाब्दतः प्राक् षष्ठशताब्दे दृश्यते यदा स्त्रीणामवगुण्ठनस्य प्रथमस्पष्टोल्लेखो महाभारते वर्तते—

नगरादपि याः काश्चिद् गमिष्यन्ति जनार्दनम् ।
द्रष्टुं कन्याश्च कल्याण्यस्ताश्च यास्यन्त्यनावृताः ॥ उ० प० ८४.१६
अदृष्टपूर्वा या नार्यः पुरा देवगणैरपि ।
पृथग्जनेन दृश्यन्त तास्तदा निहतेश्वराः ॥ स्त्री० ९.९
अदृष्टपूर्वा या नार्यो भास्करेणापि वेश्मसु ।
ददृशुस्ता महाराज जना यान्तीः पुरं प्रति ॥ शल्य० २८.७१

परित्यक्तदमयन्ती-विषय आरण्यकपर्वणि कथितम्—

सा वै यथा समादिष्टा तत्रास्ते त्वत्प्रतीक्षिणी ।
दह्यमाना भृशं बाला वस्त्रार्धेनाभिसंवृता ॥ आर० ६७.१०

इत्यनेन द्वितीयवस्त्रस्य प्रथमप्रयोजनं संवरणं वावगुण्ठनं वा बभूवेति स्पष्टम् ।

एतैः सन्दर्भैः स्पष्टं प्रतिभाति यत्सर्वसाधारणस्त्रीवर्गेऽवगुण्ठनं महाभारत-युगे प्राचलत् ।[2] तत्र सौन्दर्यनिगूहनं तु परमं प्रयोजनमासीत् । अथ च लज्जया शिष्टाचारदृष्ट्यापि अवगुण्ठनं धारितमासीत् । तथा हि—

---

१. Let the woman be entirely covered, unless she happens to be at home. She will not invite another to fall into a sin by uncovering her face. Clement of Alexandria quoted by Darres in A Short History of Women.

२. काने महोदयो लिखति महाभारतीयनारीणां विषये—Ordinarily women did not wear any veil. H. D. Vol. II p. 598. नैतत्प्रामाणिकं वचनं प्रतिभाति । पूर्वोक्तमहाभारतीयश्लोकास्तेन न दृष्टाः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

व्रीडां जग्मुः पुरा याः स्म सखीनामपि योषितः ।
एकवस्त्रा निर्लज्जाः श्वश्रूणां पुरतोऽभवन् ।। स्त्री० ९.१५

हरिवंशानुसारेण सर्वाः कुलीनाः स्त्रियो मस्तके चैलं धारयन्तिस्म। केवलं वेश्या एवाचैलमस्तका बभूवुः।[1] रामायणे राक्षसेषु दृश्यतेऽवगुठनम्। युद्ध० १११.६१-६३

षष्ठख्रीष्टशताब्दे विरचिते किरातार्जुनीये भारविः सूचयति यद् नववध्वा मुखश्रीरंशुकेन संवृता बभूव।[2] सप्तमख्रीष्टशताब्दे विरचिते शिशुपालवधे माघो निभालयति यत् साधारणतो लज्जावत्यो मुखवसनं (अवगुण्ठनं) धारयन्ति स्म।[3]

अवगुण्ठनं लज्जार्थम्

पूर्वोक्तैः सन्दर्भैः स्पष्टं प्रतिभाति यद्वगुण्ठनं नासीत् स्त्रीणां प्रतिबन्धन-रूपं यथा बहवोऽवगुण्ठनहीन-प्रदेशीया विद्वांसो भ्रान्ति-वशान्मन्यन्ते, अपि तु अवगुण्ठनस्य सनातनं शाश्वतञ्च परम प्रयोजनं पुरापि बभूव लज्जा-शीलार्जनम्। एषा वस्तुष्ठितिरैतरेयब्राह्मणेऽधोविधं निदर्शिता—

'तद्यथैवादः स्नुषा श्वशुराल्लज्जमाना निलीयमानैत्येवमेव। १२.११

स्वाभाविकी भवति लज्जा युवतीनाम्। अत एव लज्जाकारणादव-गुण्ठनं सहजोपायो विहितः। अत्र न विस्मरणीयं यदवगुण्ठनस्यापराण्यापि प्रयोजनानि बभूवुः। तानि प्रागेव पुरस्कृतानि।

अवगुण्ठनस्य परिहारोऽपवादस्थितौ बभूवेत्यनेन तस्य भृशं प्रचलनं प्रमाण्यते। तत्र परिहारो रामायणे युद्धकाण्डे—

व्यसनेषु च कृच्छ्रेषु नो युद्धे न स्वयंवरे।
न क्रतौ न विवाहे च दर्शनं दुष्यति स्त्रियः।। ११६.२८

कालिदासानुसारेण मुखाक्गुण्ठनं वक्त्राभरणमेव।[4]

---

१. अचैलं मस्तकं स्वं तु हासं च कुरुते वृथा।
ईदृशी या भवेन्नारी विज्ञेया बन्धकी नरैः।। ८.२७

२. उद्गतेन्दुमविभिन्नतमिस्रां पश्यतिस्म रजनीमवितृप्तः।
व्यंशुकस्फुटमुखीमतिजिह्मां व्रीडया नववधूमिव लोकः।। ९.२४

३. मदरुचिमरुणेनोद्गच्छता लम्भितस्य त्यजत इव चिराय स्थायिनीमाशुलज्जाम्।
वसनमिवमुखस्य स्रंसते सम्प्रतीदं सितकरकरजालं वासवाशायुवत्यः।।
११.१६

४. रसातलादादिभवेन पुंसा भुवः प्रयुक्तोद्वहनक्रियायाः।
अस्याच्छमम्भः प्रलयप्रवृद्धं मुहूर्तं वक्त्राभरणं बभूव।। रघु० १३.८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

इस्लामधर्मानुयायिनां समाजेऽवगुण्ठनं सविशेषमासीत् । तेषामनुकरणेन प्रभावेण च भारतीयानां समाजेऽवगुण्ठनरीतिः सर्वसाधारणं स्वीकृतेत्यर्धमेव सत्यम् ।[1]

कुलीनरमणीनां विशेषतो यौवनेऽवगुण्ठनं तु रक्षणाय भवतीति प्राचीनलोकानां मतिः प्रतिभाति। प्रकरणेऽस्मिन् कश्मीरराजस्य हर्षस्य वृत्तमुदाहरणमर्हति । स कर्णाटकदेशीयराज्ञश्चित्रं निरीक्ष्य तां प्राप्तुं भृशमुदग्रोऽभवत् ।[2] अन्यच्च—राजदृष्टा रत्नप्रभाख्या श्रेष्ठिनी पत्या त्याजिता देवदासीकृता च राजमहिषी कारिता ।[3] चित्तौडराजस्य पत्नीं पद्मिनीं काचान्तरालेन दृष्ट्वा-लाउद्दीनो द्विगुणोत्साहेन तामपहर्तुं युद्धे, चित्तौडराजं जघान । तत्रासीद् विजयनगरस्य महाराजो हरिहरो द्वितीयः (१३७९–१४०४) ई० । तस्य १२,००० स्त्रियो भोग्या बभूवुः । तथापि मुडकुल-नगरस्य कस्याश्चित् सुन्दर्या अभिरामतां श्रुत्वैतां प्राप्तुं युद्धे स्वान् प्राणान् तत्याज ।[4] बहूनि युद्धानि रमणीनां रूपसौन्दर्यसम्भावितानि बभूवुः । अत एव तस्याः प्रावरणमेव वरमिति प्राचां मतं समीचीनं प्रतिभाति ।

रमण्यः पुरुषाकर्षणे प्रभावहीना भवेयुरित्युद्दिश्य तासां रूपस्य संवरणायावगुण्ठनमावश्यकमिति विहितम्, यतो हि नाम तेषां पुरुषाणां कामवृत्तेरुज्जृम्भणेन वैयक्तिकं समष्टिगतं सामाजिकं च चारित्रिकपतनं परिणमयिष्यति । अत एव मनुना नियमितं यत् स्त्री-प्रेक्षणं ब्रह्मचारी वर्जयेत् । तत् त्ववगुण्ठनेन स्त्रीणां सरलमासीत् ।

वैदिकयुगे रूपसौन्दर्याभिनिवेशहृदयानां कतिपयर्षीणां कृते रमणीनामाङ्गिकविलासो नोपेक्षणीयो बभूव ।[5] ईदृशी मानसिकस्थिती रूपसंवरणहेतुमवगुण्ठनं न समर्थयति । ऋषिपत्न्यो यज्ञेऽर्धाङ्गिन्य आसन् । दम्पती-युगलस्य परस्परसाम्ये सति अवगुण्ठनस्यावकाशो नातितरामासीत् । रूपगुणोदारा पत्नी दर्शकानां सभ्यानां प्रशंसास्पदं भवत्विति क्वचित् पत्युः कामना दृश्यते ।

---

१. द्रष्टव्यम्—Position of Women in Hindu Civilization p. 175.

२. कर्णाटभर्तुः परमार्डेः सुन्दरीं चन्दलाभिधाम् ।
आलेख्यलिखितां वीक्ष्य सोऽभूत् पुष्पायुधक्षतः ।। राजत० ७.१११९

३. राजतरङ्गिणी ४.३६, ३७

४. मुद्राराक्षसानुसारेण कस्याश्चित् सुन्दर्या रूपेणाकृष्टो जनो मरणमेव वृणुते तस्या अप्राप्तौ । अलभ्यमनुरक्तवान् किमयमन्यथा नारीजनम् ।। ६.१६ इत्यनेन ज्ञायते ।

५. देवानां प्रणयिन्योऽप्सरसः, ऋषीणां पत्न्यः यज्ञे सहभागिन्यः, साधारणजनानां विशां भार्याः स्वस्वकार्ययोगेन प्रागल्भ्यं लेभिरे ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विदेशेष्वगुण्ठनम्

पुरा स्त्रीणां पृथगेव चर्या वैदेशिकैरपि समीप्सिता दृश्यते। तथा हि—

(1) A bridegroom could not see his bride before marriage in the cultural capital of ancient Greece owing to the strict conventions under which women lived. Encyclopaedia of Religion and Ethics.

(2) In ancient Assyria veil was worn by all married women.

(3) 'Women should not speak in public at the church. If they had any difficulty they were to ask their husbands at home, for it is a shame for women to speak in the curch'. Bible

(4) For a virgin of virtuous habits every public appearance wlth an unveiled face was equivalent to suffering a rape. Muller-Lyer : Family P. 229

(5) In Russia in sixteenth century wives and daughters could not be seen, even by their own brothers and other near relations. Halle : Women in Soviet Russia, P. 11.

स्त्रीस्वातन्त्र्यम्

पुरुषस्तु साधारणतः स्वतन्त्रः किन्तु स्त्रीस्वातन्त्र्यमसाधारणमेवेति महाभारतीयं मतम्।[1] स्त्रीमुखेनैव प्रतिपादितम्—

न स्वतन्त्रा हि योषितः। आदि० १६१.१६

प्रकरणानुसारेणेयं स्थितिस्तु विवाहार्थमवधारितासीत्।

स्त्रीणां दानं तु भवतु नाम साधारण-स्त्रीणां विषये[2], किन्तु अनेन प्रकरणेन ज्ञायते यद् दासीरूपाणां तासां सुरक्षायाः प्रश्नोऽस्यां स्थितावेव समुपस्थितः।[3] यथावश्यकमवरवर्णीयाः स्त्रियः पुरापि यथाधुना स्वीय-स्वतन्त्रोद्योगेन स्वाधीनवृत्तिका बभूवुः।

---

१. अष्टावकः प्रवदति महाभारते—

नास्ति स्वतन्त्रता स्त्रीणामस्वतन्त्रा हि योषितः। अनु० २१.१२

नास्ति त्रिलोके स्त्री काचिद् या वै स्वातन्त्र्यमर्हति।

पिता रक्षति कौमारे भर्ता रक्षति यौवने।

पुत्राश्च स्थाविरे काले नास्ति स्त्रीणां स्वतन्त्रता॥ अनु० २१.१८, १९

२. सुभद्राया विवाह-प्रकरणे—

स्नापनोत्सादने चैव सुयुक्तं वयसान्वितम्।

स्त्रीणां सहस्रं गौरीणां सुवेषाणां सुवर्चसाम्॥ आदि० २१३.४४

३. कश्चित्ताश्च सुरक्षिताः। सभा० ५.७३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अस्मिन् प्रकरणे धर्म्यस्त्रीणामेको विशेषाधिकारो ध्यानमर्हति। न ताः सभां नेयाः सन्तीति द्रौपदी वचनम्।[1] अपरतोऽपराधे सत्यपि स्त्री हन्तव्या-नासीत्।[2] विधवानां धनं तु हरणीयं नासीत्।[3]

रामायणेन तत्कालीनं स्त्रीणां सामान्यजन-जीवनमप्रतिषेधितं विभाति। ता नगरमहोत्सवेषु सम्मिलिता बभूवुः। रामस्याभिषेकदिवसे—

हर्म्यवातायनस्थाभिर्भूषिताभिः समन्ततः।
कीर्यमाणः सुपुष्पौघैर्ययौ स्त्रीभिररिन्दमः॥
रामं सर्वानवद्याङ्ग्यो रामपिप्रीषया ततः।
वचोभिरग्र्यैर्हर्म्यस्थाः क्षितिस्थाश्च ववन्दिरे॥ अयो० १६.३७,३८

नन्दिग्रामे भरतेन राम-मिलनं द्रष्टुं पुरुषवत् स्त्रियोऽपि समाजग्मुः।[4] दशरथस्य यज्ञे तु स्त्रियोऽसंख्यशोऽन्यैः सहभोजिताः।[5] रामस्य गोमतीतटीया-श्वमेधे ऋषयो ब्राह्मणाश्च सदाराः समागताः।

आवश्यकतानुसारेण स्त्रियः स्वतन्त्ररूपेण कार्यार्थिन्यो न्यायालय-मगमन्।[6]

गृहकार्याणि

गृहाभ्यन्तरे बहूनि नैत्यिककार्याणि साधारण-परिवारेषु प्रायः सर्वशः सदैव स्त्रीभिः कृतानि सन्तीति ब्राह्मणानां यज्ञार्थं तैः सामग्रीयोजनं यथोचितं कृतम्। प्रायो वैश्यशूद्रपरिवारेषु ता नैकविधकुटीरोद्योगेषु[7] पुरुषवन्निष्णाता प्रगाढरुचिकाश्च सहकर्मिण्यो बभूवुः। तासां कुशलसहयोगेन कस्यचिद् गृहस्य सौष्ठवं समवर्धत, अर्थोपार्जनं समभवत्, गार्हस्थ्यं च तासां समुचितावधानेन सुश्रीकं समजायत। माङ्गलिकसौन्दर्य-सर्जनं स्त्रीणामवदानेषु सविशेषं विभाति स्म। बहवो ग्राम्योद्योगाः पुरुषेभ्योऽप्यधिकतरं नारीभिरेव प्रवर्तिता बभूवुः।

---

१. धर्म्याः स्त्रियः सभां पूर्वं न नयन्तीति नः श्रुतम्। सभा० ६२.९
२. सर्वथा स्त्री न हन्तव्या सर्वसत्त्वेषु युध्यता। शा० १३३.१४
अवध्या स्त्रियः। आदि १४६.२९; २०९.४; आर० १९७.४२
३. आरण्यक पर्वणि १८८.३०। दशरथस्य विधवास्त्रीणां वैभवमासीदेव। युद्धकाण्डे १२३.५
४. युद्ध० १२७.३४
५. बाल० १४.१३
६. उत्तर० ५३.५
७. यथा वस्त्रसूत्रादिनिर्माणमर्थववेदे वर्णितम्—
'या अकृन्तन्नवयन् याश्च तत्निरे' १४.१.४५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

गृहाद् बहिरपि कार्यक्षेत्रम्

वैदिकयुगे वृत्रमातुर्युद्धभूमौ पुत्ररक्षण-प्रयासः प्रथितः एव। सा दास-कुलजा बभूव। तदा उच्चवर्गीयाः स्त्रियोऽपि गृहाद् बहिः पत्या सहोद्योगेषु व्यापृता दृश्यन्ते। तथा हि ऋग्वेदानुसारेण मुद्गलस्य ऋषेः पत्नी मुद्गलानी दस्युभ्यो गोरक्षणे रथीभूय पत्या सहगामिनी बभूव।[1] सा गवेष्टिक्रमेण गा अजयत्।

वैदिकसमाजे वधूनां परिषत्सु स्वपक्षप्रतिपादनात्मकं भाषणं सस्पृहं सम्मानितमासीत्।[2]

उच्चकुलीनमहिषीणां निजसम्पत्तिस्तस्या विनियोगाधिकारश्च रामायणे वर्णितौ। ता आश्रितानां याचकानां चावश्यकताः पूरयितुं समर्था आसन्।[3]

महाभारते स्त्रीसंघस्य चर्चा विद्यते।[4] यद्यपि निश्चितनयेन नैतत् ज्ञातं यत् कीदृशी कार्यप्रवृत्तिः स्त्रीसंघेन स्वीकृतासीत् किन्तु सम्भूयसमुत्थानं तत्र संघस्योद्देश्यं भवेन्नाम।

राजकीयभृतौ बहवः शिल्पकलानृत्य - संगीतपरिचर्यानिपुणाः स्त्रियो नियुक्ता आसन्। सभापर्वणि युधिष्ठिरो वेदयति—

शतं दासी सहस्राणि तरुण्यो मे प्रभद्रिकाः।
कम्बुकेयूरधारिण्यो निष्ककण्ठ्यः स्वलंकृताः॥
महार्हमाल्याभरणाः सुवस्त्राश्चन्दनोक्षिताः।
मणीन् हेम च बिभ्रत्यः सर्वा वै सूक्ष्मवाससः॥
अनुसेवां चरन्तीमाः कुशला नृत्यसामसु।
स्नातकानाममात्यानां राज्ञां च मम शासनात्॥ ५४.१२-१४

राजादीनां समृद्धानामन्तःपुरे शिल्पकारिकाणां कलाव्यापृतिर्वर्णितार्थशास्त्रे।[5]

महाभारते स्त्रीणां गृहाद् बहिः विविधं कार्यजातं परिलक्ष्यते। नाट्य-नृत्य-गीत-वाद्येषु तासां स्वाभाविकी दक्षताभिरुचिश्च शोभेते। राजकुलेषु कुमारीणां तेषु विषयेषु प्रशिक्षणं समीप्सितमासीत्।

---

१. उत् स्म वातो वहति वासो अस्या अधिरथं यदजयत् सहस्रं
रथीरभून्मुद्गलानी गविष्टौ मरे कृतं व्यचेदिन्द्रसेना।
ककर्दवे वृषभो युक्त आसीदवाचीत् सारथिरस्य केशी।
दुधेर्युक्तस्य द्रवतः सहानस ऋच्छन्तीष्मा निष्पदे मुद्गलानीम्॥ १०.१०२.२,६

२. वशिनी त्व विदथमावदासि। ऋ० १०.८५.२६

३. अयोध्याकाण्डे ३१.२२; ३२.२२ ४. आदिप० ११७.११

५. अर्थ० १.१२.१४, २३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

आवश्यकतानुसारेण देशान्तरमपि गत्वा काचित् स्त्री स्वविद्याभिर्जीविकां प्राप्नुयात् ।[1] कतिपयगृहपत्नयः ६४ कलासु निपुणा बभूवुः ।[2] नृत्य-नाट्यादिकलासु स्त्रियः पुरुषेभ्योऽपि निपुणतरा बभूवुः ।

राजनये प्रवीण्यम्

क्वचन स्त्रियो युद्धार्थिन्यो बभूवुः[3] । सिन्धुप्रदेशस्य महाराजदाहरस्य पत्नी युद्धे पत्यौ मृते सति अरबदेशीयशत्रुभिः स्त्रीसेनया सङ्गतायुध्यत । तस्मिन् युद्धे भोजने समाप्ते सति सान्याभिः स्त्रीभिः सहाग्नौ प्राणांस्त्यक्तवती ।

पत्यौ मन्दे सति कतिपयराज्ञयः शासनभरं दाक्ष्येणोद्वहन्ति स्म । कल्हणो राजतरङ्गिण्यामेतादृशीषु राज्ञीषु श्रेष्ठतमां सूर्यमतीं वर्णयति—

स्वकोशसंचयं दत्त्वा देवी सूर्यमती ततः ।
पद्मराजोद्भवां देशस्याव्यवस्थां न्यवारयत् ॥ ७.१९७
ततः प्रभृति राज्ञेव राजकार्योद्यताभवत् ।
तस्थौ शौर्यकथां त्यक्त्वा राजा कार्यकरः पुनः ॥ ७.१९९
भर्तुर्नारीविधेयत्वं तस्या भर्तृजयस्तथा ।
निष्कलङ्केन शीलेन नान्योन्यं गर्ह्यतामगात् ॥ ७.२००

कल्हणो दक्षिणापथस्य रट्टाख्यां कर्णाटीं राज्ञीं सप्रशंसं वर्णयति—

विन्ध्याद्रिमार्गाः पर्याप्ता निष्पर्यन्तप्रभावया ।
दुर्गयेव तया देव्या कृता निहतकण्टकाः ॥ राजत० ४.१५३

कश्मीरेषु सुगन्धेति ख्याता राज्ञी प्रजार्थनया स्वयं राज्यं विदधे ।[4] चाहमानराज्ञी जल्हणदेवी, हरिराजस्य पत्नी प्रतापदेवी, गहडवाडनरेशस्य जयचन्द्रस्य पत्नी च स्वतन्त्ररूपेण शासनसंचालनमकुर्वन् ।[5]

अपरा नैका राजमहिष्यः पत्युरकालमरणे राजकुमाराणामल्पे वयसि शासनभरं सफलं निर्वाहयामासुः । तासु सातवाहनवंशीया नयनिका (ख्रीष्टपूर्वं प्रथमशतके), वाकाटकवंशीया प्रभावतीगुप्ता (चतुर्थख्रीष्टशतके) चालुक्यवंशीया विजयभट्टारिका (सप्तमख्रीष्टशतके) कश्मीरे

१. तथा पति वियोगे च व्यसनं दारुणं गता ।
देशान्तरेऽपि विद्याभिः सा सुखेनैव जीवति ॥ कामसूत्रे १.३.२३

२. कामसूत्रे १.३.२२

३. 'स्त्रियोऽपि यस्यां युध्येयुः' इत्यादि सभा० १३.५१ कुशस्थलीपुर्या वर्णनम् ।

४. राजत० ५.२४३

५. Alberuni's India Vol. I. p. 181; Epigraphia Indica Vol. XI 51-52. Vol XX. 62 Vol. X. 99

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सुगन्धा दिद्दा च (ख्रीष्टदशमशताब्दे) अग्रगण्या बभूवुः। कश्मीरे विजय-मल्लस्य पत्नी पत्या सह युद्धस्थलेऽपि तं नात्यजत्।[1]

कतिपय राज्ञीनां धर्मबधनकार्याणि महत्त्वपूर्णानि प्रतीयन्ते। तथाहि कश्मीरराज्ञो रङ्गा बहुभिः प्रतिष्ठाभिर्जीर्णोद्धारैश्च सर्वोपरि प्रगुण्या बभूव।[2]

राजशेखरेण काव्यमीमांसायां साधु पर्यालोचितम्—पुरुषवद् योषितोऽपि कवीभवेयुः। श्रूयन्ते दृश्यन्ते च राजपुत्र्यो महामात्रदुहितरो गणिकाः कौटुम्बिकभार्याश्च शास्त्रप्रहितबुद्धयः कवयश्च।

चालुक्यवंशीया नायकीदेवी ११७८ ख्रीष्टाब्दे स्वाङ्के पुत्रं मूलराजं निधाय सैन्यसञ्चालनं कृत्वाक्रमणकारिणं मुइजुद्दीन-मुहम्मदगोरीमाबूपर्वतपादे गदरघट्टस्थाने पराजित्य गुर्जर-गौरवं ररक्ष।[3]

स्ववैदुष्येणापि स्त्रियोऽमन्दं शोभन्ते। तञ्जौर राजसभायां सप्त-दशशताब्दे कवयित्र्यो लेखिकाश्च व्यराजन्त।[4] तासु मधुरवाणीतिरु ख्याता कवयित्री रामायणस्य लावण्यमयी चतुर्दशीति कथारचनया सहृदयान् वशीकरोति।

वैदिककालत एव कतिपयस्त्रिय उच्चकोटिकशिक्षिका बभूवुः।[5]

अरबी भाषायां 'रूसा' इति प्रख्याता आयुर्वेदपण्डितया विरचित आयुर्वेदग्रन्थोऽष्टमख्रीष्टशतके खलीफा-हाँरूकृतेऽनूदितश्च।[6]

प्रसङ्गेऽस्मिन् महाभारतीया सुलभा अविस्मरणीया वर्तते। सात्मानं वर्णयति शान्तिपर्वणि जनकं प्रति—

साहं तस्मिन् कुले जाता भर्तर्यसति मद्विधे।
विनीता मोक्षधर्मेषु चराम्येका मुनिव्रतम्॥ ३०८.१८४
मोक्षे ते भावितां बुद्धिं श्रुत्वाहं कुशलैषिणी।
तव मोक्षस्य चाप्यस्य जिज्ञासार्थमिहागता॥ ३०८.१८७

जनकः सुलभां स्वकोटिकीं प्रशस्यतमां मनीषिणीं व्यजानात्।[7]

---

१. राजत० ७.९०९

२. राजत० ८.३३८८। रत्नादेवी गोकुलस्थापनया मन्दिरमठप्रतिष्ठया, विहार-निर्माणेन, पुररचनया चात्माननमरीचकार। राजत० ८.२४३३-२४४२

३. D. C. Ganguly : Struggle for Empire, p. 78.

४. मधुरवाणी रघुनाथनायक इति राज्ञः सभायाः प्रधानकवियित्री बभूव। राजा-भिलाषमनुवर्तमाना सा तस्य कृते तेलगुभाषीयं रामायणं संस्कृतेन संचकार।

५. विशेषविवरणं पुस्तकेऽस्मिन् १२३ पृष्ठे द्रष्टव्यम्।

६. नदवी—अरब और भारत के सम्बन्ध पृ० १२२।

७. श्रुत्वा नाधिजगौ राजा किञ्चिदन्यदतः परम्॥ शान्ति० ३०८.१९१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

राजनीतिज्ञता सनिकप्रशिक्षणं च

वैदिकयुगे ग्रामशासनपरिषदः सदस्याः स्त्रियोऽप्यासन् । तत्र तासां परामर्शसरणिः प्रभावशालिनी प्रबभूव ।

वैदिककालत एव स्त्रीणां युद्धकलावैशारद्यं प्रख्यातम् । ऋग्वेदानुसारेण संग्रामे खेलस्य पत्नी विश्पलाश्विद्वयस्य साह्येन विजयिनी बभूव ।[1]

मुद्गलानी युद्धे मुद्गलस्य रथचारिणी गोसहस्रं विजयेन लब्धवती ।[2]

ऋग्वेदे नारीणां यौद्धिकपराक्रमो वर्णितः —

मम पुत्राः शत्रुहणोऽथो मे दुहिता विराट् ।
उताहमस्मि संजया पत्यौ मे श्लोक उत्तमः ॥ १०.१५९.३

अत्र संजयेति युद्धविजयिनी ।

महाभारते विदुरोपाख्याने राज्ञ्या विदुरायाः सम्मानप्रदा राजनीतिज्ञतानुत्तमा चकास्ति । उद्योगपर्वणि अध्यायः १३१-१३४

अर्थशास्त्रानुसारेण तत्रासन् स्त्रियो धनुर्धराः । ताभिः परिवृतो राजा सुरक्षितो बभूव ।[3] महाभाष्ये प्राप्त-सैनिकप्रशिक्षणाः शाक्तीकाः याष्टीकाश्च स्त्रियो निभालिताः । ताः क्रमशः शक्तिप्रयोगे, यष्टिप्रयोगे च निष्णाता बभूवुः ।[4]

अशोकस्य राजनीतिस्तु धर्मप्रवर्तिनी बभूव । तेन स्त्रीषु सद्धर्मप्रचारार्थं स्त्रीमहामात्रा नियुक्ता आसन्निति द्वादशशिलालेखे वर्णितम् ।

रामायणानुसारेण सीता 'अभिज्ञा राजधर्माणाम्' आसीत् ।[5] रामस्याभिषेकविधौ सीता तेन सह सिंहासनमधिष्ठितवती ।[6] रामवनगमनानन्तरं सीता रामस्य प्रतिनिधीभूय शासनं करिष्यतीति वसिष्ठस्य प्रस्तावो राज्ञीनां राज्यशासनपाटवं व्यनक्ति । तद्यथा—

अनुष्ठास्यति रामस्य सीता प्रकृतमासनम् ।
आत्मेयमिति रामस्य पालयिष्यति मेदिनीम् ॥ अयो० ३७.१३

'स्त्रियोऽपि यस्यां युध्येयुः' इत्यनेन स्थलीपुर्याः स्त्रीणां योधनकुशलता महाभारते वर्णिता ।

---

१. याभिर्विश्पला धनसामथर्व्यं सहस्रमीळ्ह आजावजिन्वतम् । १.११२.१०
प्रति जङ्घां विश्पलाया अधत्तम् । १.११८.८

२. उत स्म वातो वहति वासो अस्या अधिरथं यदजयत् सहस्रम् ।
रथीरभून्मुद्गलानी गविष्टौ मरे कृतं यचेदिन्द्रसेना ॥ १०.१०२.२

३. शयनादुत्थितः स्त्रीगणैर्धन्विभिः परिगृह्येत । १.२०.१

४. महा० ४.१.१५ ।

५. अयो० २६.४ ६. युद्धकाण्डे १२८.५१-६१; ४८.६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नैकावतारेष्वादिशक्तिर्देवी देवानामपि दुर्लभमसुर-विजयं वारंवारं कृतवती । तस्याः सैनान्यस्वरूपं दुर्गा-महिषासुरमर्दिनीमहालक्ष्मी-चामुण्डा-कालिकावतारेषु प्रकटति ।[1] अनेन पौराणिकप्रकरणेन स्त्रीणां सैनिक-प्रशिक्षणं प्रतिभाति ।

जैमिनीयाश्वमेधपर्वणि स्त्रीमण्डलस्य शासिका स्त्री प्रमीला दृश्यते । तस्या लक्षाधिकयुवतीनां शस्त्रास्त्रसज्जितानां वृन्दं सेना बभूव । अर्जुनोऽपि तां प्रतियोद्धुमसमर्थ आसीत् । स्वकार्यार्थं स तां पत्नीत्वेन वरयामास ।[2] रामायणानुसारेणाजौ शस्त्रप्रहारैः नष्टचेतनस्य दशरथस्य रथं दूरमपवाह्य कैकेयी पतिप्राणानरक्षत् ।

पूर्वोक्तैः प्रमाण्यते यद् भारतस्य विशालप्राङ्गणे तदा स्त्रीणां पुरुषवत् सैन्यबलं क्वचिदासीदेव ।

परवर्तियुगे स्त्रीबलानां सेनानायकत्वं प्रागेव वर्णितम् ।[3] राजस्थानस्य राजमहिषीणां सैन्यसंचारणं विशेषोल्लेखमर्हति । सामसमरसीनृपतेर्महिषी कूर्मादेवी पत्या इहलोकलीलासमाप्तौ स्वप्रदेशस्य केवलं शासनभरमेव न निरवहदपितु कुतुबुद्दीननामकस्येस्लामराजस्याक्रमणानि विफलीचकार । सङ्गामहाराजस्य महिषी जवाहरदेवी स्वसैन्यस्य नायकत्वमधितिष्ठन्ती चित्तौरं रक्षन्ती युद्धस्थले स्वर्गं लेभे । एतादृशीनां राजस्थानवीराङ्गणानां विरुदगाथा विपुलं शोभन्ते ।

महाराष्ट्रीया वीराङ्गणा अपि सैन्यनेतृत्वेन राजनयेन च यशस्विन्यो बभूवुः । तासु विश्रुतास्ति कोल्हापुरराज्यस्याधिष्ठात्री राज्ञी ताराबाई । सा स्वयमेव स्वराज्यं स्थापयामास । मध्यप्रदेशे गौडवाना-प्रदेशस्य रानी-दुर्गावती अकब्बरस्य सम्राजः सेनाधिपस्यासफखानस्य सैन्यबलं प्रत्यरुणत् ।[4]

---

१. दुर्गा-रूपेण दुर्गमनामकं राक्षसं, महिषासुमर्दिनीरूपेण महिषनामकमसुरं चामुण्डा-रूपेण चण्डमुण्ड-शुम्भ-निशुम्भरक्तबीजनाम्नोऽसुरान् कालिकारूपेण दारुकदैत्यं च सा जघान ।

२. जैमिनीयाश्वमेध० द्वाविंशोऽध्यायः ।

३. अस्य ग्रन्थस्य पृष्ठं ४४८ द्रष्टव्यम् । तत्रासन् महाराजदाहरस्य पत्नी, रट्टा, सुगन्धेति ख्याताः महिष्यः प्राप्तसैनिकप्रशिक्षणाः ।

४. Durgavati, the noble queen of Gondwana who so gallantly resisted the unprovoked aggression of Akabar's general, Asaf khan in 1564 was a Chandel princess. The Oxford History of India Ed. 1958 p. 203.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रकरणेऽस्मिन् झाँसी राज्यस्य वीराङ्गणा लक्ष्मीबाई १८५७ खीष्टाब्दे आङ्गलानां सेनाभिर्युद्धे प्रतियोगेनाविस्मरणीया चकास्ति। सा युध्यमानैव प्राणानत्यजत्।

शासनसूत्रधारिण्य इतिहासविदिता राज्ञो भारतश्रियं नैकशो विदधुः। शातकर्णिवंशीया नयनिका (१५० ई० पू०) वाकाटकवंशीया प्रभावतीगुप्ता (३९० ई०) राजकुमारस्याल्पवयसि राज्यं शशासतुः। खीष्टसप्तम-शताब्दे चालुक्यवंशीया महाराजचन्द्रादित्यमहिषी दक्षिणभारताञ्चलं शशास। अष्टम-शताब्दे राष्ट्रकूटवंशीया शीलामहादेवी महाराजध्रुवस्य महिषी भूमिदानपत्रं स्वाधिकारेणादात्। राष्ट्रकूटवंशीयमहाराजामोघवर्षस्य कन्या रेवकनामदि-र्नवमशताब्दे एदातोर जनपदस्य शासिका बभूव। एकादशतके मलिलादेवी चालुक्यवंशीया वनवासीनामकं विशालजनपदं शशास। अन्या शासिका तत्र बभूव होयसलवंशीया बम्मलदेवी द्वादशशतके। काकातीयवंशीया रुद्राम्बा त्रयोदशशतके शशास। एकादशशतके जयसिंहस्य तृतीयस्य ज्येष्ठस्वसा 'अक्कादेवी' किनसुदनामकं जनपदं शशास।

आधुनिकयुगे मंगलोरमुप 'उल्लाल'पुरस्य राज्ञी अब्बा पुर्तगालशासकानां प्रतियोगिनी बभूव। सा रोमारब-पारसदेशैर्भारतीयव्यापारं वर्धयामास। कालीकटस्य राज्ञा सन्धिं योजयित्वा स्वशक्तिं सा वर्धयामास। सा मंगलो-राधिपस्याक्रमणकारिणो नौसेनामग्निगोलकान् प्रक्षेप्य पराजितवती। तस्याः स्मारक उल्लालपुर्यामद्यापि दर्शनीयः।

स्त्रीणां राजनीतिनैपुण्यं सिन्धप्रदेशस्य राज्ञो दाहरस्य कन्यके—सूर्यादेवी प्रमलादेवी च स्वकार्योद्योगेन प्रमाणयतः। दाहरं परास्य कासिमनामकः सेनानायक उपहाररूपेण ते बगदादनगरस्य खलीफा-सविधे प्रैषयत्। तत्रा-ल्पवयस्के अपि ते कन्यके कूटनीत्या खलीफां न्यवेदयताम्—दिवसत्रयमावां कासिमेन समागमादपवित्रे संजाते। ततः क्रुद्धः खलीफा कासिमं हत्वा तस्य शवं त्वरितं चर्मकोश आनेतुं समादिशत्। तस्य शवे समायाते कन्यके तं पुनः प्रोचतुः—मिथ्यैव कासिमेनास्माकं दूषणवार्ता। एतच्छ्रुत्वा भृशं क्रुद्धः खलीफा द्वयमेव कस्यांश्चिद् भित्तौ परिवेष्टुमादिदेश।[1] अन्यच्च

स्वन्त्रतासंग्राम के आरम्भ की बात है। दक्षिण भारत में बिठूर नामक एक छोठा-सा राज्य था। अकस्मात् उस राज्य का राजा मर गया। उसका कोई पुत्र नहीं था और न ही कोई शासन करने योग्य सम्बन्धी था। इस कारण उसकी रानी चेनम्माने गद्दी सम्भाली। यह राज्य अभीतक अंग्रेजों

१. Al Bilaudari in Elliot and Dowson, Vol. I pp 210-2.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

से अछूता था किन्तु यह अधिक समय तक उनकी नजर से छिपा न रहा और विलियम चैप्लिन ने रानी से कहा कि आप पेंशन लेकर अलग हों ।

रानी चेनम्माने इसे अस्वीकार कर दिया। विलियम ने बिट्टूर को मटियामेट कर देने की धमकी दी। इस पर रानी चेनम्मा ने अपने मन्त्रियों, और अन्य विशिष्ट व्यक्तियों से विचार-विमर्श किया। सभी ने एक स्वर से अंग्रेजों के समक्ष न झुकने और एकजुट होकर मुकाबला करने की बात कही। अब क्या था, बिट्टूर में हथियार बनने लगे। स्वस्थ नवयुवक सेना में भरती होने लगे। देखते ही देखते चेनम्मा की सेना दुगुनी हो गयी।

१३ जुलाई १८३० को अंग्रेजों ने बिट्टूर पर हमला करने के उद्देश्य से बाहर मैदान में पहुँच कर युद्ध का बिगुल बजा दिया। देखते ही देखते रानी चेनम्मा ने दुर्ग पर सभी स्थानों पर तोपें लगवा दीं और सेना को तैयार कर स्वयं उसका नेतृत्व सम्भाला।

चेनम्मा पहली (दक्षिण) भारतीय महिला थी, जिन्होंने शत्रु के विरोध में आह्वान किया और जम कर लड़ी। उनके साहस एवं सूझबूझ को देख कर अनेक भारतीय महिलाएं अंग्रेजों के विरोध में आजादी की लड़ाई में कूद पडीं।

कश्मीरराजस्योच्चलस्य पत्नी जयमतिः पत्युः सिंहासनस्यार्धभागिनी नित्यमेव बभूव।[1]

मनोरञ्जनम्

रमणीनां कृते वैदिककालो मनोरञ्जनदिशा स्पृहणीयः प्रतिभाति। समननामक-महोत्सवं स्त्रिय उपतिष्ठन्ति स्म।[2] याज्ञवल्क्यानुसारेण स्त्रीणां क्रीडा समाजोत्सवदर्शनं, हास्यं, परगृहयानं च साधारणतो मनोरञ्नार्थं भवन्ति।[3]

दृश्यमनोरञ्जनानि स्त्रीपुरुषयोः कृते सामान्यमेवासन्। नाटच-नृत्य-गीतवाद्यानि स्त्रीणां विशेषमनोरञ्जनानि बभूवुः। कन्दुकक्रीडा कन्यकानां

---

१. लब्ध्वा तदर्धाध्यारोहं भर्तुः प्रेम्णातिदुर्लभम्।
सामान्ययापि देवीत्वं जयमत्या न दूषितम्॥ राजत्० ८.८२

२. समनगा व्राः। ऋ० १.१२४.८ अभि प्रवन्त समनेव योषाः कल्याण्यः स्मयमाना सो अग्निम्। ऋ० ४.५८.८। एनं गच्छन्ति समनं न योषा। ऋ० १०.१६८.२

३. याज्ञवल्क्यस्मृति ८४।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मनोरञ्जनं वर्णिता ।[1] महाभारते कुन्ती कन्दुकक्रीडारुचिकास्ति ।[2] रामायणानुसारेण स्वर्णालंकृता कुमार्यः सन्ध्या-समय उद्यानेषु क्रीडन्ति स्म ।[3] जलक्रीडायां युवत्यो नायकैः सह विचित्रं खेलन्ति स्म ।[4] कामसूत्रानुसारेण कन्यकाः पृथगेव व्यायच्छमाना नानाविधं क्रीडन्ति स्म ।[5] सप्तम-शताब्दस्य रत्नावल्यां स्त्रीणां सामूहिकी वासन्तिकरङ्गलीला नागराणामपि विनोदाय वर्णिता[6] । स्त्रीणां दोलाक्रीडा सर्वसाधारणं प्रचलितासीत् । नवम-ख्रीष्टाब्दे कर्पूरमञ्जर्यां नायिकाया दोलाक्रीडा सरसं वर्णिता । यथा—

मनोऽधिकं चात्र विलासलास्ये प्रेंखासु दोलासु च सुन्दरीणाम् ।
गीते च गौरीचरितावतंसे पूजाप्रपञ्चे च मनोभवस्य ।।
काव्यमीमांसा १७ अध्याये

एकदशख्रीष्टशतके भोजेन सरस्वती-कण्ठाभरणे नैकविधपार्वणक्रीडा वर्णिताः । तथाहि—

वसन्ते—

(१) चूतभञ्जिका—यत्राङ्गनाभिश्चूतमञ्जर्योऽवरुज्यानङ्गाय बाणत्वेन दायं दायमवतंस्यन्ते ।

(२) पुष्पावचायिका—यत्र युवतयो मदिरागण्डूषदोहदेन वकुलं विकास्य तत्पुष्पाण्यवचिन्वन्ति ।

(३) चूतलतिका—यत्र कस्ते प्रियतम इति पृच्छ्यते ।

ग्रीष्मे—

जलक्रीडा, पलाशादिनवलताभिः प्रियजनो हन्यतेन । अत्र देवरो भ्रातृजायां प्रहरति ।

प्रावृषि—

नवपत्रिका—प्रथमवर्षणेन प्ररूढनवपत्रासु वनस्थलीषु क्रीडाभवत् ।

कदम्बयुद्धम्—कदम्बनीपहारिद्रकादिकुसुमैः प्रहरणभूतैर्द्विधा वनं विभज्य कामिनीनां क्रीडा ।

बिसखादिका—अभिनवबिसाङ्कुरोद्भेदाभिरामं सरः समाश्रित्य कामिमिथुनानां क्रीडा मृणालखादनेन सह ।

---

१. महाभारत उद्योगपर्वणि ८८.६२ । स्वप्नवासवदत्ते द्वितीयाङ्के, दशकुमारचरिते च ।

२. बालां मामार्यकस्तुभ्यं क्रीडन्तीं कन्दुहस्तकाम् ।
अददात् कुन्तिभोजाय सखा सख्ये महात्मने ।। उद्योगे ८८.६२
इति कुन्ती कथयति ।

३. अयोध्या० ६७.१३

४. रघुवंशे १४.७०

५. कामसू० ३.३

६. रत्नावल्यां प्रथमाङ्के

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

शरदि —

पौर्णमास्यां कौमुदी - महोत्सवः । विवाहावसरेऽकालकौमुदी-महोत्सव आयोजितः ।[1] कौमुदी-महोत्सवे सन्ध्यागमे नागरकदम्पती गृहाद् बहिर्गतौ रात्रिपर्यन्तं विविधक्रीडासु व्यापृतौ बभूवतुः । तत्र वेशनारीणां सविशेषं योगदानमासीदेव ।[2] इक्षुभक्षिकायां प्रियतमाय सदन्तपवनमिक्षुदानं कृतम् ।

हेमन्ते—

अभ्यूष-खादिका—गोधूमचणकादिनवान्नमग्निज्वालायां पाचयित्वा भोजनम् ।

साधारण-स्त्रियः

स्त्रीपुरुषयोर्ग्राम्यसुखानुबन्धस्तयोर्दाम्पत्येन भवेदिति धर्म्या रीतिः । सा तु धार्मिकलोकानां प्रशस्यो मार्गः, किन्तु नैतेन परितुष्टा अतृप्तकामा स्त्रियः पुरुषाश्चैन्द्रियकसुखार्थं दाम्पत्यपरिधेर्बहिरपि जनान् परिचिन्वन्ति । इदं मानवस्वभावदौर्बल्यं पुरुषयशो न तावत् क्षिणोति यावत् स्त्रीयश इति गौरवग्रन्थेष्वपि प्रकीर्णं वर्णितमेव । दाम्पत्यमवहेल्य परपुरुष-कामुका बन्धकी, वेश्या, गणिका, स्वैरिणी, अभिसारिका, पुंश्चली, असती, कुलटा, इत्वरी, पांशुला इत्यसंख्यनामाभिहितास्ति । सा साधारणस्त्री, स्वतन्त्रस्त्री,[3] अधर्म्यस्त्री वा किंचित् कर्तुमकर्तुमन्यथा कर्तुं वा समर्थासीत् ।

साधारणस्त्रीणां दासीरूपेण राजादीनां समृद्धिशालिनामन्तःपुरेऽतिथि-शालायां च नियुक्तिर्विविधोपचारार्थं कृतासीत् ।[4]

गणिका वेश्याश्च

प्राचीनयुग आदिवैदिककालतो वेश्या वा सर्वभोग्या वा नार्यो नाना रूपेण समाजे विलसन्ति स्म । तथा हि ऋग्वेदे—

परा शुभ्रा अयासो यव्या साधारण्येव मरुतो मिमिक्षुः । १.१६७.४

अत्र साधारणीति सर्वभोग्या । ततः परं समाजस्य विशेषतो नागरक-संस्कृतिपरायणस्य वेश्यादयो वारयोषितोऽभिन्नमङ्गं बभूवुः । राजाश्रयेण तासां बाहुल्यं निर्बाधं समजायत ।

रामायणानुसारेण यौवराज्याभिषेकादिषु राजकीय-महोत्सवेषु पूज्यानां महतां स्वागत-विधौ, सेना-सम्मर्देषु च सप्रतिष्ठं गणिकाः पुरस्कृता आसन् ।

अयो० ३.१८; १४.३८; युद्ध० १५७.५

---

१. मालतीमाधवे षष्ठ-सप्तमाङ्कमध्ये प्रवेशके ।

२. मुद्राराक्षसे ३.१०; ४.९

३. स्वतन्त्रास्मीत्युवाचर्षि न धर्मच्छलमस्ति ते । महाभारतेऽनुशासनपर्वणि २१.११

४. प्रकृते ग्रन्थे दासीदास-प्रकरणं पृष्ठं ३९७ द्रष्टव्यम् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अर्थशास्त्रानुसारेण शासनाधिकारेण राजभृतिप्रपन्नानां गणिकानां वर्तनं नियमितमासीत्।[1] तथा हि—राज्ञा नियुक्तो गणिकाध्यक्षो गणिकावंशावतंसिका[2] गणिकापदे नियोजयामास। स उत्तममध्यमजघन्यकोटिकीनां गणिकानां वेतनं तासां सौभाग्यालंकारवर्धनार्थं यथोचितं निर्धारयतिस्म। सौन्दर्य-विलासिन्यो रमण्यो यावत् सौभाग्यं गणिका भवेयुरनन्तरं गणिकामातर इति पदे नियोजनीया आसन्। शासकीयनियुक्तेर्मुक्तिरपि यथानियमं मुद्राप्रदानेन समभवत्।

गणिकासु सुन्दर्यश्छत्र-भृङ्गारव्यजनशिविका-पीठिकारथोपयोगिव्यवस्थाकारिण्य आसन्। वयोगतास्ता महानसे कर्म कुर्युरिति रीतिरासीत्। गणिकाभ्यो राजकीयायोऽपि बभूव। तासामायव्ययपरीक्षणं गणिकाध्यक्षोऽकरोत्।

गणिकानां सुरक्षायास्तासां नैकशिल्पचर्यासु पारंगमितायाश्च राजा यथोचितव्यवस्थां व्यदधात्।[3]

परवर्तियुगेऽपि प्रायः सदैव गणिकावेश्यादीनां पालनेन राजानः समृद्धिशालिनो नागरकाश्च, नृत्य-नाट्य-संगीतादि-कलासंवर्धनं स्वीयविलासवैपुल्यार्थं चक्रुः। राजधानी तासां कलाविभवेन चमत्कारोत्कर्षं लेभे। प्रो० अलटेकरः सारभूतं निदर्शयति प्रकरणेऽस्मिन्—

In the royal courts of the ancient and mediaeval periods a large member of singing girls were engaged as chauri-bearers, betel-carriers, and fan servants. Besides the nominal duties indicated by their names most of these women used to sing, dance and even stage dramas at the court.[4]

साधारणस्त्रीषु गणिका प्राचीनसमाजे सर्वोच्चप्रतिष्ठां भजते स्म।[5] कामसूत्रानुसारेण 'शीलरूप-गुणान्विता गणिकाश्चतुष्षष्टिकलासु सुनिपुणा

---

१. गणिकाध्यक्षप्रकरणादुद्धृतम्।

२. रूपयौवनशिल्पसम्पन्ना भवेद् गणिकेत्यवेक्षणीयमासीत्।

३. अर्थशास्त्रे गणिकाध्यक्षप्रकरणे।

४. Position of Women in Hindu Civilization P. 182.

५. यथा मृच्छकटिके गणिका वसन्तसेना वर्णिता—

द्वावेव पूजनीयावत्र नगर्या तिलकभूतौ च।
आर्या वसन्तसेना धर्मनिधिश्चारुदत्तश्च॥ ६.४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

बभूवुः ।[1] ता राज्ञा पूजिता गुणवद्भिश्च संस्तुताः । अत्र गणिकाया रूपद्वयं विभाव्यते—सारस्वतयोग्यतया मूर्तिमती कला द्वितीयं च सौन्दर्यनिपानेन कामाभिरामता । कुलाङ्गनातः प्रभिन्ना सा पुराङ्गणा सर्वेषां पुरवासिनां दर्शनेन श्रवणेन; स्मरणेनापि मनोरञ्जिका बभूव । महाभारतानुसारेण अधोलिखितविवरणे सा नगरस्य प्रहास इव समाम्नाता—

तूर्याणि गणिकावारास्तथैव नटनर्तकाः ।
उपानृत्यञ्जगुश्चैव वृद्धं कुरुपितामहम् ।। भीष्म० ११६.४
कुमाराः समलंकृत्य पर्यागच्छन्तु मे पुरात् ।
वादित्राणि च सर्वाणि गणिकाश्च स्वलंकृताः ।। विराट० ३२.४९

विशेषनैपुण्यं गणिकादीनामासीन्मनोरञ्जनकलासु ।

रामायणानुसारेण श्रेष्ठगणिकाभिर्नगरस्य शोभा समवर्धत ।[2]

महाभाष्यानुसारेण समाजे गणिकानां सुघटितसाह्यमासीत् । गणिकानां समूहो गाणिक्यमिति प्रथित आसीत् ।[3] पारम्पर्येण साधारणतस्तासां कुलानि स्वीयव्यवसायेषु व्यापृतानि बभूवुः । अन्यथा कापि दुर्भाग्यग्रस्ता कुलाङ्गना स्वीयगार्हस्थ्यं विहायासतीधर्मं स्वैरं स्वीकरोतिस्म ।

गुणगणगणनाधिक्येन कापि वेश्या गणिकाभवत् ।[4] वेश्यानां वसतिर्वेश आसीत् । समवेतभावेन वेशाः, पानागाराणि, कुशीलवाः, कितवाश्च राष्ट्रस्योपघातका इति धारणासीत् ।[5] नानारूपधरा नार्यः कामुकानामुच्चावच-

---

१. काम० १.३.२०,२१ २. अयोध्याकाण्डे १५०.२१

३. महा० ४.२.४० । परवर्तियुगीनगणिकानामाकर्षणं सम्प्रदायवैभवं चाधोविधं वर्णितम्—There are in India such concubines also who cost 20,000 tankas or even more.....The reason was the grace of her deportment and refinement of her manners. Many of them know the Quran by heart, can write, recite verses, relate stories and play on sitar.....Their good education and training and attainments are their additional distinctions. Words cannot describe their attraction and other qualities. A Fourteenth Century Arab Account of India Under Sultan Muhammad Bin Tughluq p. 51, 52.

तथैव समृद्धानामप्यधीने वेशपरिग्रह आसीत् ।

गम्या अपि हि नोपेया यत्ताः परपरिग्रहा ।। नारद, स्त्रीपुंस ७९

४. कामसूत्रे १.३.२० ५. शान्तिप० ८९.१३,१४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

लोकानां धनं हर्त्तुं तान् क्रीडनकायन्तेस्म । तासां प्रथितवर्गा आसन्—नर्तकी, गणिका, सामान्या, रूपाजीवा, वेश्या, देवदासी च । नागराणां प्रचरितविलास-भूमिर्नगरशोभालंकार इवासीद् वेशवासः । महाभारतनुसारेण सेनासन्नि-वेश-मध्येऽपि तेषां महत्त्वपूर्णं स्थानमासीत् ।[1] तदा राजाधीनं वेश्याकुलं समवर्धत । यथा कौरवणाम्—

अलंकृता वस्त्रवत्यः सुगन्धा अबीभत्साः सुखिता भोगवत्यः ।
लघु यासां दर्शनं वाक् च लघ्वी वेशस्त्रियः कुलं तात पृच्छेः ।।
उद्योगे ३०.३६

ताः कृष्णस्य स्वागतार्थं प्रेषिता आसन् ।[2] भवतु नामाश्चर्यकरं पुरा वर्ण-व्यवस्था तु वेशपरिधा अपि प्राभवत् ।[3]

पूर्वोक्तेन स्पष्टं यद्यपि वेश्या प्रशस्यीकृतासीत्तथापि धर्मशास्त्रानुसारेण पापमेव वेश्यागमनं प्राजापत्य-प्रायश्चित्तेन निरोध्यम्[4] । नागरकेषु विटेषु च पुरा तासां महती प्रतिष्ठा प्रत्यक्षमेव प्रतिभाति ।

अनन्यभुक्ता वेश्या अवरुद्धा वा भुजिष्या वा स्वामिनो मृत्योरनन्तरं तस्य सम्पत्तेः स्वजीविकानिर्वाहार्थं धनं प्राप्तुमधिकृताः ।[5]

देवदासी

देवलोकेऽप्सरसः सन्ति स्वर्वेश्या इति प्रख्यातास्ता देवानां प्रीत्यर्थं प्रभवन्ति च, तथैव मानवलोकेऽपि देवालयेषु लब्धप्राणप्रतिष्ठानां देवानां नृत्यसंगीत-वाद्यादिभिः प्रीतिं जनयितुं या वेश्या नियुक्तास्ता देवाधिष्ठित-त्वाद् देवदास्यः संकीर्तिताः । यथा वैदिकयुगे महाव्रतादियज्ञेषु गानवाद्यनृत्यानि

---

१. वणिजो गणिका वारा ये चैव प्रेक्षका जनाः ।
सर्वांस्तान् कौरवो राजा विधिवत् प्रत्यवैक्षत ।। उद्योगे १९६.१९
शकटापण-वेशाश्च । उद्योगे १४९.५३

२. स्वलंकृताश्च कल्याण्यः पादैरेव सहस्रशः ।
वारमुख्या महाभागं प्रत्युद्यास्यन्ति केशवम् ।। उद्योगे ८४.१५

३. नारदो नियमयति—
स्वैरिणी ब्राह्मणी वेश्या दासी निष्कासिनी च या ।
गम्याः स्युरानुलोम्येन स्त्रियो न प्रतिलोमतः ।। स्त्रीपुंस ७८

४. याज्ञ० १.८१, अत्रि ५.२७१

५. नारदस्मृति ५२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

देवानां परितोषायायोजितानि[1], तथैव परवर्तियुगे देवालयेषु देवपूजाविधौ नर्तकीनां नृत्यादिकमायोजितम् । तासामेव सुव्यवस्थितसंस्था देवदासी-प्रगल्भिता समवर्धत । देवेभ्यो लोकैः समर्पिताः कन्यका वा राजभिः समर्पितं वेश्याकदम्बकं वा देवालयसमाश्रितं तथैव सर्वभोग्यं बभूव यथा देवेभ्यः समर्पितमन्यत् किञ्चिद् वस्तु प्रसादरूपेण सर्वसाधारणं भुज्यते ।

मन्दिरे वेश्यानृत्यस्य प्रथमपरिचयो मेघदूतेऽधोबिधं वर्तते—

पादन्यासैः क्वणितरशनास्तत्र लीलावधूतै
रत्नच्छायाखचितवलिभिश्चामरैः कान्तहस्ताः ।
वेश्यास्त्वत्तो नखपदसुखान् प्राप्यवर्षाग्रबिन्दू—
नामोक्ष्यन्ते त्वयि मधुकरश्रेणिदीर्घान् कटाक्षान् ॥ १.३५

देवानां प्रीत्यर्थं कतिपयपितरो मन्दिरे स्वकन्यकामल्पवयस्येव समर्पयन्ति स्म ।[1] अन्ये च बहवः समृद्धजनाः कन्याः क्रीत्वा समर्पितवन्तः ।[2] अपरे च स्वाधिष्ठितवेश्याकदम्कं समर्पितवन्तः । देवाश्रितास्त्रिविधा देवदास्यो देवपूजनकाले नृत्यगीताभिनयादीन् प्रस्तुवन्ति स्म । तेषां वसतिरुपदेवालय-मवस्थिता वेशवासा इव प्रावर्तत ।

राज्ञोऽधिकार एवासीद्यत् स देवदासीषु अनुत्तमां रूपश्रियं स्वान्तःपुरायो-दवहत् ।[3]

देवालयाश्रितानां वेश्यानां बाहुल्यं तत्कालीननागरकाणां भोगाभिरुचे-र्भृशतामेव निदर्शयति । न कवीनां न च तत्त्वदर्शिनां वा देवदासीप्रथाया विरोधः श्रूयते । यतो हि नाम विरोधकाः शासनेन दण्डचा आसन्नित्यपि कारणं भवेत् ।[4]

---

१. Childless parents would often vow to dedicate their first born child to a temple. Thus increasing the nnmber of temple girls. Ancient Account of China and India p. 88.

२. क्रीता देवाय दातव्या धीरेणाक्लिष्टकर्मणा ।
कल्पकालं भवेत् स्वर्गो नृपो वासौ महाधनी ॥ पद्मपुराणे सृष्टिखण्डे ५२.९७
वेश्याकदम्बकं यस्तु दद्यात् सूर्याय भक्तितः ।
स गच्छेत् परमं स्थानं यत्र तिष्ठति भानुमान् ॥ भविष्यपुराणे १.९३.६७

३. तथा हि राजतरङ्गिण्यां नोणनामको वैश्यः स्वपत्नीं रत्नप्रभां देवालयाय दत्त्वा राज्ञा प्रतापादित्येन परिग्राह्यांचकार । ४.३६-३७ । तत्रैव सहजा देवदासी उत्कर्षेण राज्ञा राजवधूकृता । राजत० ७.८५८

४. Epigraphia Indica Vol. XI p. 26

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रायशो राजाधिष्ठतदेवालयसंश्रिता देवदास्यो गणनातीता बभूवुः। सोमनाथमन्दिरेण सम्बद्धाः पञ्चशतं तञ्जौर नगरे राजराजस्य मन्दिरेण सम्बद्धाः चतुःशतं च वेश्या आसन्। गुर्जरप्रदेशस्य चतुःसहस्रमन्दिरेषु विंशति-सहस्राधिका वेश्या अवसन्। भारते प्रायः सर्वेषु प्रदेशेषु राजभिः समृद्धि-शालिभिश्च कृतेषु मन्दिरेषु तैः समर्पिता लोकैर्दत्ताश्च वेश्या बहुलायन्ते स्म मध्ययुगे।

उप मन्दिरं वेशवासो देवानां प्रीत्यर्थं न केवलं भारतेऽपि तु नैकेषु देशान्तरेष्वपि प्राभवत्। तद्यथा प्रो० अलटेकर महाभागो निष्कृषति—The association of dancing girls with temples was fairly common in several countries in ancient time. In Egypt temples of Osiris and Isis were crowded with dancing girls. At Corinth in Greece thousands of women used to dedicate. themselves to Venus and sell their bodies for the benefit of the temple. The custom was prevalent among the Hebrews and Babylonions as well.

The Position of Women in Hindu Civilisation p. 184.

क्वचिद् देवदास्यः कुमारिका एव भवितुमर्हन्ति। विवाहयोग्यास्ता विवाहार्थं बहिष्कृताः। तद्यथा त्रयोदश-शताब्दीको वैदेशिकयात्री मार्कोपोलो निगदति—लड़कियाँ तभी तक इन मन्दिरों में रहती हैं, जब तक वे कुआँरी होती हैं और व्याहने योग्य नहीं हो जातीं। लड़कियों का जीवन शुद्ध और तपस्यापूर्ण होता है। ऐसी लड़कियाँ देवदासी कहलाती हैं। मार्कोपोलो का यात्राविवरण पृ० १६३

गृहदासी

महाभाष्यानुसारेण समृद्धिशालिनां कुटुम्बेषु दासीनां स्थितिः सदस्यवद् बभूव। तासामापत्यानि दासेरा इति संज्ञितानि।[1] दासेरा अपि गृहदासा बभूवुः। दासीवद् वृषली बभूव।

ऋग्वेदे तत्र दासा युद्धे परतन्त्रीकृता नैकशो वर्णिताः सन्ति। ते कुटुम्बेषु सेवका नियुक्ताः। अथर्ववेदे दासीनां नैकशश्चर्चास्ति।[2] बृहदारण्यके

१. महा० २.१.१। परवर्तियुगेऽपि दासी समृद्धकामुकानां तृप्तयेऽपि बभूव। तथाहि चतुर्दशशताब्दे दिल्लीनगरे The slave girls who are fit for both service and cohabitation cost fifteen tankas. But in other cities they are still cheaper. A Fourteenth ceutury Arab Account of India Under Sultan Muhammad Bin Tughluq p. 51.

२. अथर्व० ५.२२.६; १२.३.१३; १२.४.९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दासी मनुष्यस्य सम्पत्तिरिव गणिता। गौतमः सूचयति—'गोऽश्वानां दासीनां प्रवाराणाम्' इत्यादि।

महाभारतानुसारेण वृषपर्वणो दासीसहस्रं देवयानी लब्धवती।[1] विवाहावसरे राजकन्या दासीशतेन सह पतिगृहमगच्छत्।[2] सभापर्वणि युधिष्ठरो दासीनां स्वामी सन् स्वीयदासीसहस्रं द्यूते पणीकरोति। तद्यथा—

शतं दासी-सहस्राणि तरुण्यो मे प्रभद्रिकाः।
कम्बुकेयूरधारिण्यो निष्ककण्ठ्याः स्वलंकृताः॥
महार्हमाल्याभरणाः सुवस्त्राश्चन्दनोक्षिताः।
मणीन् हेम च बिभ्रत्यः सर्वा वै सूक्ष्मवाससः॥
अनु सेवां चरन्तीमाः कुशला नृत्यसामसु।
स्नातकानाममात्यानां राज्ञां च मम शासनात्॥

सभापर्वणि ५४.१२-१४

महाभारते द्रौपदी दासीकृतास्ति युधिष्ठिरस्य। द्यूतप्रसङ्गेन दासी तु सर्वथा वश्या भवेद् दुर्वृत्तानां स्वामिनामिति प्रकरणे तस्मिन्ननावृतम्।[3]

स्त्रीनिन्दा

महाभारते स्त्रीणां स्वभावस्य निन्दापरः पक्षः सर्वतोभावेन निदर्शित एकत्रैव भीष्मेण युधिष्ठिरस्य प्रबोधाय।[4] अत्र साधारणस्त्रीणां दोषाः कुल-स्त्रीणामपि भाग उत्थापिताः।[5] अनुद्धरणीयमेतत्सर्वं वैयर्थ्यात्। प्रकरणेऽस्मिन् भीष्म-युधिष्ठिरयोरुभयोः सम्मितं मतं विद्यते यत्—

न शक्या रक्षितुं नार्यस्ता हि नित्यमसंयताः॥ अनु० ४०.१४

भीष्मानुसारेण—

मानवानां प्रमोहार्थं कृत्या नार्योऽसृजत् प्रभुः। अनु० ४०.७

एकमेव शुभ्रं लक्षणं भीष्मस्य स्त्रीविषयक-प्रवचनस्य विद्यते यत्—

---

१. आदिप० ७५.१९, २०
२. आदि १९०.१६
३. सभापर्वणि ६० तमाध्यायतः।
४. अनु० ३८ अध्यायतः
५. 'स्त्रियो हि मूलं दोषाणाम्' अनु० ३८.१ इत्यारभ्य
कुलीना रूपवत्यश्च नाथवत्यश्च योषितः।
मर्यादासु न तिष्ठन्ति स दोषः स्त्रीषु नारद॥ अनु० ३८.११
इति निदर्शयन् कविरन्ते परिणमयति—
नान्यः शक्तस्त्रिलोकेऽस्मिन् रक्षितुं नृप योषितम्। अनु० ४३.२६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पूर्वसर्गे तु कौन्तेय साध्व्यो नार्य इहाभवन् ।
असाध्व्यस्तु समुत्पन्नाः कृत्या-सर्गात् प्रजापतेः ॥[1] अनु०४०.८

अन्यत्र भीष्मः स्त्रीविषये सुविचारितं मतं प्रतिपादयति ।

स्त्रियः साध्व्यो महाभागाः सम्मता लोकमातरः ।
धारयन्ति महीं राजन्निमां सवनकाननाम् ।
असाध्व्यश्चापि दुर्वृत्ताः कुलघ्न्यः पापनिश्चयाः ॥
अनु० ४३.१९,२०

अत्र स न केवलं भूतकालेऽपितु वर्त्तमानयुगे अथवा सदैव साध्वी असाध्वी च नारीणां दैविध्यं निदर्शयति ।

स्त्रीणां क्रयी दानं च

आसुरविवाहे कन्या विवाहार्थं धनेन क्रीतासीत् । भवतु नाम प्रतिष्ठास्पदं कन्यायै अधिकाधिकधनप्राप्तिः अथवा कुलरीति[2]र्देशरीतिर्वा, आसुरविवाहस्तु धर्मशास्त्रकारैर्भृशं विगर्हितः ।[3] स्त्रीविक्रेतारस्तु जातिबहिष्कारिताः । दारिद्र्योपहता जना विवशं कन्याविक्रयेणात्मानं विगर्हयन्तिस्म ।

प्राचीनसाहित्ये राजभिः सहस्रसंख्यकाः कन्या दान-दक्षिणाविधिना पुरस्काररूपेण वोपायनीकृताः ।[4] ताः कन्यका विजयेन क्रयेण वा प्राप्ता आसन्निति साधारणोपायस्तासामुपलब्धेः । साधारणतो दासीभूतास्ताः कन्याः पुनर्विक्रेया बभूवुरथवा, यत्र कुत्रचित् गृहे दासीभूता भुजिष्यतां प्रापुः । रामायणानुसारेण रामाय रूपवतीनां दासीनां तस्य प्रियकामार्थमुपहारं

---

१. एतत् सर्वं देवानां सुखार्थं कृतमिति तत्रैव सूचितम् । देवसंस्कृतेरपवादोऽयं निराकरणीयो भाविसाहित्यकारैः । अनु० ४०.५.६ । आश्वमेधिकपर्वणि एवमेव प्रकटितम्—न चैतदिष्टं देवानां मर्त्यरूपनिवर्तनम् । १९.५४

२. महाभारतानुसारेण राजपुत्र्या माद्र्या पाण्डोर्विवाह आसुरविधिना समपद्यत ।

३. बौधायनो निर्णयति—

क्रीता द्रव्येण या नारी सा न पत्नी विधीयते ।
सा न दैवे न सा पित्र्ये दासीं तां कवयो विदुः ॥
शुल्केन ये प्रयच्छन्ति स्वसुतां लोभमोहिताः ।
पतन्ति नरके घोरे घ्नन्ति चासप्तमात्कुलम् ॥ १.११.२०

पद्मपुराणानुसारेण —

कन्याविक्रयिणां ब्रह्मन्न पश्येद्वदनं बुधः । ब्रह्मकाण्डे २४.२६

४. ब्राह्मणेभ्यो दासीनां दानम् । अयो० ७७.३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नृपा ददुः ।[1] भरतो हनुमते १६ कन्यका भार्यार्थं ददौ ।[2] वनप्रस्थानावसरे रामो दासीनां दानमकारयत् ।[3]

इमा दास्य उच्चकुलीना अप्यासन्निति रामायणे—सर्वाभरण-सम्पन्नाः सम्पन्नाः कुलजातिभिः[4] इति वचनेन ज्ञायते ।

शैलूषादीनां हीनलोकानां मध्ये स्त्रीणां परसङ्गमः पत्यानुमत इव निरुढः प्रतिभाति ।[5]

यथा पुरुषाणां तथैव स्त्रीणामपि क्रयविक्रयौ न केवलं भारतेऽपितु सर्वत्र विश्वप्राङ्गणे प्राचरताम् । ऐतरेयब्राह्मणे हरिश्चन्द्रो बलिमाहर्तुं ब्राह्मणपुत्रं क्रीणाति । महाभारते निगदितमेव—

न च विद्यते वित्तं संक्रेतुं पुरुषं क्वचित् । आदि १४८.५

अत्र राक्षसभोजनं विधातुं क्रीतो मानुषोऽभिप्रेतः ।

सतीत्वानुष्ठानम्

न केवलं भारतेऽपितु नैकदेशेषु प्राचीनयुगे विधवायाः पत्यनुमरणं सम्मानितरीतिरासीत् ।[6] इयं रीतिर्विदेशेषु प्राचीनयुग एव पुनर्विवाहद्वारेणास्तं गता, भारतेऽपि वैदिकयुग एव समाप्तप्राया[7] पुनरेव रामायण-महाभारतयुगे

१. उत्तर० ३९.८.१०

२. सकुण्डलाः शुभाचारो भार्याः कन्यास्तु षोडश ।। युद्ध० १२५.४४

३. अयो० ५२.१६ ४. युद्ध० १२५.४५ ५. रामायणे अयो० ३०.८

६. The custom of the sacrifice of the widow at the funeral of her husband was widely prevailing in ancient times. It was practised among the Gauls, the Norwegians, the Celts, the Slaves and the Thracians. It was quite common among the Scythians. In China if a widow killed herself in order to follow her husband to heaven, her corpse was taken out in a great procession. A. S. Altekar. The Position of Women in Hindu Civilisation p. 116.

७. ऋग्वेद १०.१८.८ अनुसारेणानुमरणरीतिर्नासीत् ।

अथर्ववेदानुसारेण—इयं नारी पतिलोकं वृणाना निपद्यते उप त्वा मर्त्य प्रेतम् ।

धर्मं पुराणमनुपालयन्तो तस्य प्रजां द्रविणं चेह धत्त ।। अथर्व० १८.२.१

इत्यनेन पत्युश्चितायां कंचित् कालं शयित्वा विधवा वहिर्भूय लोके सप्रजं पर्याप्तं जीवनं यापयति स्म । तैत्तिरीयारण्यकेऽपि विधवाया सुश्रीकं जीवनमधोविधं वर्णितम्—

धनुर्हस्तादाददाना मृतस्य श्रियै ब्रह्मणे तेजसे बलाय ।
अत्रैव त्वमिह वयं सुसेवा विश्वाः स्पृधोऽभिजातीर्जयेम ।। ६.१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

समृद्धिशालिलोके विरलं प्रचरन्तीवावलोक्यते ।[1]

महाभारतयुगे क्वचन स्त्रीणां धारणा बभूव यत् सहमरणेन परलोके दम्पत्योः संगमः सम्भवति, तत्र च दम्पत्योरतृप्तवासनानां पूर्तये पत्न्याः सहयोगोऽपेक्षितः स्यात् । तद्यथा पत्युर्मरणमनु माद्री कुन्तीं कथयति—

अहमेवानुयास्यामि भर्तारमपलायिनम् ।
न हि तृप्तास्मि कामानां तज्ज्येष्ठा अनुमन्यताम् ॥
मां चाभिगम्य क्षीणोऽयं कामाद् भरतसत्तमः ।
तमुच्छिन्द्यामस्य कामं कथं नु यमसादने ॥

आदि० ११६.२५,२६

इत्युक्त्वा तं चिताग्निस्थं धर्मपत्नी नरर्षभम् ।
मद्रराजात्मजा तूर्णमन्वारोहद्यशस्विनी ॥ ११६.३१

रामायणेऽपि विधवानामुल्लेखो नैकशो दृश्यते । किन्तु भर्तरि मृतेऽनुमरणं नास्त्येव । सुन्दर० २६, २५, २६; युद्ध० १११.६४, उत्तर० २४.८, १९ ।

सूत्रसाहित्ये प्राचीनस्मृतिषु च विधवानां चितामरणं न श्रूयते, अपि तु तासां तत्र कर्तव्यादिकं निदर्शितम् ।

प्रो० अलटेकर-महोदयस्य मतेन यद्यपि ई० पू० चतुर्थ-पञ्चम-खीष्ट शतकेऽपि राज्ञीनामनुमरणमितिहासग्रन्थे चर्चितं[2] तथापि तदनन्तरं सहस्राब्दं यावत् सा रीतिर्विरलमेव प्रवर्तिता ।

पञ्चमशतकात् प्रभृति पत्न्याश्चितामरणरीतिः क्रमश उपचीयमाना दृश्यते ।[3] एतस्या उल्लेखा वात्स्यायन-भास-कालिदास-शूद्रकादीनां कृतिषु वर्तन्ते । कालिदासः सहमरणस्य मानसिक-भूमिकां वर्णयति—

---

१. महाभारतयुद्धान्ते मृतानां राज्ञामपि पत्न्योऽनुमरणं न स्वीचक्रुरिति स्त्रीपर्वणि स्पष्टमेव । रामायणेऽपि दशरथपत्न्यो नानुम्रियन्ते । अपवादरूपेण माद्री, कृष्णपत्नयश्च चितामारुह्य भस्मीभूताः ।

२. The earliest historical instance of Sati is that of the wife of the Hindu general Keteus, who died in 316 B. C. while fighting against Antigonus. Altekar : Position of Women in Hindu Civilisation p. 122

प्रथमशताब्दस्य सौन्दरनन्दमित्याख्ये महाकाव्ये ८.४२ सतीप्रथा चर्चिता—
प्रवेशयन्त्यपि हि स्त्रियश्चितामिति ।

३. The custom (सतीप्रथा) began to become gradually popular from c. 400 A. D. Altekar : Position of Women in Hindu Civilisation p. 123.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अनपायिनि संश्रयद्रुमे गजभग्ने पतनाय वल्लरी ।
शशिना सह याति कौमुदी सहमेघेन तडित्प्रलीयते ।
प्रमदाः पतिवर्त्मगा इति प्रतिपन्नं हि विचेतनैरपि ।।
कुमार० ४.३१,३३

परवर्तिस्मृतिषु विधवानां कृते संन्यास एव प्रशस्यपदमिति सम्मतम् । ततो हीनमेव चितायां सहमरणम् ।[1] तथापि सप्तमशताब्दीत एव स्त्रीणां सहमरणं मनीषिभिस्तारस्वरेण तर्कसङ्गतविधिना नैकशः प्रतिबाधितम् । कादम्बर्यां बाणो निदर्शयति—

यदेतदनुमरणं नाम तदतिनिष्फलम् । अविद्वज्जनचरित एष मार्गः । मोहविलसितमेतद् रभसाचरितमिदं यदुपरते पितरि भर्तरि भ्रातरि वा प्राणाः परित्यज्यन्ते । स्वयं चेन्न जहति न परित्याज्याः । उपरतस्य तु न कमपि गुणमावहति । न तावदस्यायं शुभलोकोपार्जनहेतुः । न निरयपातप्रतिकारः । न परस्परसमागमनिमित्तम् । असावपि आत्मघातिनः केवलं मनसा संयुज्यते । जीवंस्तु जलाञ्जलिदानादिना बहूपकरोत्युपरतस्यात्मनश्च । मृतस्तु नोभयस्यापि । नारदपुराणे स्वल्पवयस्कानां, पुत्रवतीनां, गर्भवतीनां रजस्वलानामपुष्पवतीनां चितारोहणं निषिद्धम् ।

महानिर्वाणतन्त्रानुसारेण मोहाद् भर्तुश्चितारोहाद् भवेन्निरयगामिनी ।[2]

बाणस्य सहमरण-विरोधो[3] धर्माचार्याणां दुर्धिया लोकाभिलक्षितो नाभवत् । ते विधवायाः सहमरणं भूयिष्ठं प्रशशंसुः स्वर्गे तस्याः पत्युश्च स्वर्गलाभहेतुना । यथा बाणेन वर्णितं न केवलं पत्न्योऽपित्वन्येऽपि प्रणयिजनाः — मन्त्रिणः, वैद्याः, राजकर्मचारिणश्च सहमरणं स्वीचक्रुः । तत्र प्रणयाधारस्य प्रणाशेऽसह्यहृदयोद्वेगो जीवनं क्षणभङ्गुरमिति चापि सहमरणस्य प्रत्यक्षकारणमभविष्यताम् ।

---

१. पराशरस्मृतौ ४.२६.८, अग्निपुराणे २२१.२३

२. महा० १०.८०

३. परवर्तियुगेऽन्येऽपि तत्त्वदर्शिनः सतीव्रतस्य विरोधे प्रायतन्त । तृतीय-सिक्खगुरुः (१५५२-१५७४ ई०) सतीरीतिं भृशं निनिन्द । किन्तु सिक्खधर्मानुयायिनो राजानः सतीरीतिं स्वीयप्रतिष्ठावर्धनमिति विनिश्चित्य तां न तत्यजुः । रणजीतसिंहस्य तस्योत्तराधिकारिणां राज्ञां च महिष्यो भुजिष्याश्च सतीपथमन्वगच्छन् । यथा राजा तथा प्रजेति व्यवहारेण जघन्यजा अपि सहमरणं वव्रिरे ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रथममुत्तरभारते पश्चाद्दक्षिणभारतेऽपि प्रथमं राजन्येषु पश्चाद् ब्राह्मणेषु अवरवर्णेष्वपि सहमरणानुष्ठानं प्रसृतम् । पूर्वद्वीपसमूहे— जावा-सुमात्रा-बालिषु हिन्दूसम्प्रदाये सतीमरणधर्मः प्रावर्तत । यद्यपि जैनधर्मे विधवानां यथार्हजीवनं भिक्षुणीभूय शक्यमासीत्तथापि कतिपयविधवाः सहमरणेनेहलोकलीलां समाप्नुवन् । मध्ययुगीनराजस्थाने क्वचन शतशः सहस्रशश्चापि स्त्रियो राज्ञो मरणमनु चितायां भस्मीभूताः श्रूयन्ते । युद्धे पराजयमाशङ्कमाना वीराङ्गनाः शत्रुहस्ते पतनादात्मानं रक्षितुमग्निशरणं ययुः ।[1]

यथा प्रो० अलेटकर उपसंहरति—

(१) सतीरीतिर्मध्ययुगे समवर्धत ।

(२) प्रायशः सहमरणाभिनिवेशा विधवा पूज्यमाना शोभायात्रासंगता सहर्षं चितारोहणमकरोत् ।[2]

(३) नैकशो लोकाश्चिताग्निज्वलनात् पलायितुकामां विधवां बलाद् न्यरुधन् ।

(४) चिताज्वलनात् कथं कथमपि आत्मरक्षिणी विधवा जातिबहिष्कृतान्त्यजेव तिरस्कृता ।

(५) नैकशः प्रणयिजनैरनुरुद्धापि विधवा सहमरणव्रतात् स्खलिता नाभवत् ।

(६) वाग्दत्तापि बाला सहमरणव्रतं क्वचिदियेष ।

(७) प्रायश उदात्तमहिलानां संकल्प आसीद् यत् सहमरणमेव पतिव्रताधर्मस्य सर्वोच्चनिकषः ।

(८) साधारणलोकेषु सहस्रविधवासु एकैव सहमरणमियेष ।

(९) वङ्गदेशे सतीधर्मः सविशेषं प्रचलति स्म ।

---

१. तत्र पद्मिनीकथा निदर्शनम् । कश्मीरे सिकन्दरः सतीमरणं निषेधितवान् । कालान्तरे जैनुलाब्दीनः पुनः प्रवर्तितवान् । पश्चादकब्बरः पुनः निषेधितवान् ।

२. Pietro della Valle was also impressed by the courage of the average Sati. 'If I know (of a lady about to become a Sati), I will not fail to go and see her and honour by my presence her funeral with that compassionate affection which such a great conjugal fidelity and love seem to deserve. Travels, II p. 266. Position of Women in Hindu Civilisation p. 136. विधवानामग्निदाहस्य षोडशशताब्दस्य विस्तृतवर्णनं सीवेल महाभागेन A Forgotten Empire (p. 372) नामके ग्रन्थे कृतम् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पत्युरकृतकार्याणि सम्पादयितुं, स्वशिशून् पालयितुं शत्रून् पराजेतुं चोत्तमाङ्गना वैधव्येऽपि धीरा मरणं न स्वीचक्रुरिति तथ्यं प्रतिभातीतिहासान्वीक्षणेन ।[1]

शास्त्रवचनैर्निषेधिता बहवो विधवाः सहमरणोद्योगमत्यजन् । तथा हि—

१. बालापत्याश्च गर्भिण्योऽदृष्टऋतवस्तथा ।
रजस्वला राजसुते नारोहन्ति चितां शुभे ।। नारदीयपुराणे

२. बालसंवर्धनं त्यक्त्वा बालापत्या न गच्छति ।
रजस्वला सूतिका च रक्षेद् गर्भं च गर्भिणी ।। बृहस्पतिः

सहमरणोद्यताः स्त्रियः प्रायशः स्वसम्बन्धिभिः प्रार्थिता मरणाभिनिवेशं त्यजन्ति स्म ।

आधुनिकयुगे विरलमासीत् सतीनां ज्वालाज्वलनदृश्यमिति कोलब्रुकमहोदयः १७९५ खीष्टाब्देऽलिखत्—

Happily the martyrs of this superstition have never been numerous. It is certain that the instance of the widow sacrifices are now rare. Colebrooke's Miscellaneous Essays Vol. I p. 122.

आत्मदाहस्य बहुप्रचारयुगे न केवलं पत्युः कृतेऽपितु पुत्रकृतेऽपि स्त्रियोऽनुमरणं व्यदधुः । तद्यथा वेणीसंहारे वर्णितं चतुर्थाङ्के 'एषा वीरमाता समर-विनिहतपुत्रं श्रुत्वा रक्तांशुक-निवसनया समग्रभूषणया वध्वा सहानुम्रियते ।'

या विधवा सहमरणे गुणं नापश्यत्, तस्याः कृते औशनस-स्मृतौ विधानं विद्यते—

मासमारोहणं कुर्यात् भर्तृचित्यां पतिव्रता ।
तन्मृताहनि सम्प्राप्ते पृथक् पिण्डे नियोजयेत् ।।

मरणमनिच्छन्ती विधवा क्वचन धूर्तैः प्रणोदिता बलाज्ज्वलनशरणं प्रापितेति सत्यमेव, किन्तु प्रायः प्रेमप्रकर्षवशात् पत्युर्मरणानन्तरं जीवनमसार्थकं मन्यमाना एव स्त्रियः सतीभूता इति वस्तुष्ठितिर्निस्सन्दिग्धमेवाव

१. काचिद् ब्राह्मणी पतिमृत्यु-प्रतिशोधहेतुना सहमरणं न स्वीचकार । राजत० ४.९८ । जैसलमेरस्य रावल-छड़सी सरोवरं कारयन्नेव शत्रुभिर्निहतः । तस्य राज्ञी विमलादेवी तं सरोवरं षण्मासेन निष्पाद्य सतीत्वं जगाम । Tod's Annals of Rajsthan p. 573. Hindi Translation

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

धारणीया। न केवलं स्त्री अपितु पुरुषोऽपि पत्नीप्रेमहानौ जीवनं प्रति निरकांक्षो भवेदिति वाल्मीकिवचनं रामविषये प्रमाणमेव।[1] मदालसाचम्प्वां पत्नीमरणानन्तरं पत्युरनुमरणस्य वृत्तं निदर्शितम्।[2] पुत्रस्य वियोगेन जीवनं धारयितुमसमर्थो बभूव दशरथः। तत्र रामायणे श्रवणः पुत्रवियोगेन सपत्नीकं मृत इति वर्णितम्। राज्ञो मरणानन्तरं तस्यामात्यादयोऽपि केचन पुराम्रियन्त।[3]

सहमरणे भवतु नाम क्वचिल्लोकरीतिप्रभावः किन्तु नेदं वितथं यत् प्रेमवल्ली संश्रयाभावे शुष्यति। प्रेमपात्रं पतिः, पिता, पुत्रः, पत्नी, राजा यो वा को वा भवेत्।

विधवा

पतिमरणानन्तरं प्राचीनयुगे पुनर्विवाहस्य, नियोगस्य, साध्वी-जीवनस्य च विकल्प उच्चवर्गीयाणामस्वीकृतसतीव्रतानां स्त्रीणां कृते धर्मशास्त्रकृद्भिर्निर्दिष्टः। तद्यथा अलटेकर-महाभागः समीक्षते—भारतीयसमाजस्य ८० प्रतिशतजनसंख्या अवरवर्णीयास्ति यासु स्वेच्छया निर्बाधमेव विधवानां पुनर्विवाहस्य प्रचलनं यथाधुना तथैव पुरापि क्वचिद् धर्मशास्त्रवचनमनादृत्यापि समभवत्। अवशिष्टा ये द्विजादयः सन्ति तेषु त्रिविधा विधवाः—

(१) पुत्ररहिता (२) पुत्रसहिता (३) पतिसङ्गममनवाप्यैव वैधव्यं गता च। गलितविभवा एताः कथं सुदीर्घजीवनयात्रां पारयेयुरित्यस्मिन् विषये धर्मशास्त्रकाराणां मतानि क्वचित् प्रशस्यानि शोभन्ते, अन्यत्र स्त्रीणां कृते दुर्वहभारं प्रस्तुवन्ति। परिणामतः क्वचित् समाजोऽपि दुष्कृतभाजनं जायते।

महाभारतयुगे पतिविहीनानां स्त्रीणामिहलौकिकं जीवनं दुर्वहमेव प्रतीतमासीत्।[4] तद्यथा सन्ततीनां परिपालनं, कन्याया दुर्जनेभ्यो रक्षणं,

---

१. सीतापहरणानन्तरं रामो लक्ष्मणं प्रति वदति—
संवृत्ता यदि वृत्ता सा प्राणांस्त्यक्ष्यामि लक्ष्मण।
यदि मामाश्रमगतं वैदेही नाभिभाषते।
पुरः प्रहसिता सीता विनशिष्यामि लक्ष्मण॥ अरण्यकाण्डे ५८.९, १०

२. मदालसाचम्पूः ४.१११

३. मार्को पोलो का यात्राविवरण पृ० १५८

४. कापि ब्राह्मणी एकवाक्येन पतिं बोधयन्ती प्रमाणयति—
कथं हि विधवानाथा बालपुत्रा विना त्वया।
मिथुनं जीवयिष्यामि स्थिता साधुगते पथि॥ आदिपर्वणि १४६.१०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दुर्वृत्तेभ्यः कामुकेभ्य आत्मरक्षणं, सतीपथस्वीकरणं, पुत्रस्य गुणाधानं, कन्याया योग्यवरेण विवाह इत्यादीनि ।[1] अन्यथा सुविमृष्टं मतमासीत्—

व्युष्टिरेषा परा स्त्रीणां पूर्वं भर्तुः परा गतिः ।। आदिप० १४६.२२

नियोगः

पुत्रार्थिन्यः सन्तानरहिता युवत्यो मान्यजनैरनुमतास्तेषां नियुक्तैर्योग्यपुरुषैः सन्तानोत्पत्तिं पत्यर्थमिहलोकपरलोकोचितं कार्यजातं सम्पादयितुं कुर्वन्ति स्म । इयं रीतिर्नियोगो वा पूर्वं गौतमधर्मसूत्रे स्पष्टं स्वीकृतः[2] । ईदृशं जातमपत्यं विधवाया भर्तुः समाम्नातम् । मनुनापि निर्दिष्टम्—

देवराद् वा सपिण्डाद्वा स्त्रिया सम्यङ् नियुक्तया ।
प्रजेप्सिताधिगन्तव्या सन्तानस्य परिक्षये ।। ९.५९

तदनुसारेणायमापद्धर्मोऽनापदि नाचरणीयः । अनेन विधिना केवलमेक एव पुत्रो जननीयः ।

नियोगस्तु विवाहो नास्तीति मनोर्वचोऽसन्दिग्धमेव ।[3] परवर्तियुगे नियोगे लुप्ते सति तत्स्थानीयः पुनर्विवाहोऽभवत् ।

बहवो धर्मशास्त्रकारा नियोगं दृढं वर्जयन्ति । आपस्तम्बस्तत्र नरकभयं प्रकल्पयति ।[4] तथापि महाभारतयुगे सन्तानरहितानां पुत्रप्राप्तिरीतिः पर्याप्तं प्रचलिता प्रतिभाति ।[5] अर्थशास्त्रं पुत्रहीनस्य राज्ञो मातृबन्धुसामन्तेभ्योऽपि पुत्रार्थं नियोगं समर्थयति । १.१७.५३

वैदिकयुगे नियोगो नासीत्, किन्तु विधवा-विवाहः प्राचलत् । विदेशेष्वपि पुरा नियोगवद् रीतिः प्रावर्तत ।[6] खीष्टाब्दस्य प्रारम्भात् रीतिरियं भारते विलुप्तप्राया प्रतिभाति ।

कौटिल्यस्तु राज्ञां कृतेऽयोग्यसन्ताने सत्यपि नियोगं समर्थयति ।
अर्थ० १.१७.५३

---

१. आदिपर्वणि १४६ अध्यायतः ।
२. गौतमधर्मसूत्रे १८.४-१४ । गौतमानुसारेण तत्तु क्षेत्रजमपत्यं भवति । २८.३२ । वसिष्ठः (१७.५६-६५) बौधायनः (२.२.१७) गौतमं प्रायः समर्थयतः ।
३. नोद्वाहिकेषु मन्त्रेषु नियोगः कीर्त्यते क्वचित् । मनु० ९.६५
४. आप० धर्म० २.१०.२७.५-७
५. Kane : Hist. of Dharm. Vol II pt. I p. 603-4
६. The practice of raising issue from the widow of one's brother or marrying her was a widespread one. Ibid. p 606

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विधवानां पुनर्विवाहः

ऋग्वेदे नियोगेन पुत्रप्राप्तेश्चर्चा नास्ति। तत्र पतिवियुक्तानां महिलानां पुनर्विवाहो समभवदिति मुद्गलानीसूक्तेन स्पष्टमेव।[1] अथर्ववेदे पुनरूढाया विवरणं लभ्यते।[2] ईदृशी पत्नी पुनर्भूरिति संज्ञिता। परवर्तियुगेऽपि विधवानां देव्रा सह विवाहः क्वचिच्छास्त्र-सम्मतः समाजेऽनुमतश्च प्रतीयते। महाभारतानुसारेण मृतभर्तृकाया देव्रा सह विवाहोऽभवत्। तथा हि 'नारी तु पत्यभावे देवरं कुरुते पतिम्।' अनु० ८.२१। अयं विवाहो नियोगसमः। मनुस्तु विधवाविवाहं नानुमनुते।[3] कतिपयशास्त्रकारास्तं समर्थयन्ति, अन्येऽन्यथा वदन्ति। यद्यपि विधवा-विवाह-विषय ऐकमत्यं न बभूव, तथापि मनुमतमन्ततो गत्वा सर्वाधिकं समादृतम्। समाजस्य दैवदुर्विपाकात् साधुजीवनं व्यत्येतुमसमर्थाश्चारित्रिकभ्रंश - प्रवणयौवनानादृत - शास्त्रवचना विधवा भवन्तीति दुष्परिणामान् प्रत्यक्षीकुर्वाणा मनीषिणो वस्तुष्ठिति-विषयेऽनवधानादविमृश्यकारिणः प्रतिभान्ति। क्वचित् साध्वीभूतापि विधवा स्वां प्रति सम्बन्धिनां दुर्व्यवहारोद्विग्ना वेशपथं गन्तुं विवशीभूता।[4] तत्र एकैव सौभाग्यरेखा दृश्यते यत् केवलं तथाकथित-कुलीनेषु प्रायो द्विजातिष्वेव विधवाविवाहनिषेधः सर्वथोरीकृतः।[5]

सपुत्रा विधवा मातृत्वपरायणा पुत्रहितकाम्यया न सती बभूव, न च पुनर्विवाहमैच्छदिति शाश्वती रीतिर्विभाति।

---

१. पतिवृक्तेव पतिविद्यमानट्। ऋ० १०.१०२.११
काने महोदयो निर्णयति—But it must be admitted that remarriage of women was not prohibited in the times of the Atharvaveda. In Taittirīyasaṁhitā III. 2.4.4 दैधिषव्य (widow's son) occurs.

२. अथर्ववेदे ९.५.२७,२८

३. कामं तु क्षपयेद्देहं पुष्पमूलफलैः शुभैः।
न तु नामापि गृह्णीयात् पत्यौ प्रेते परस्य तु॥ ५.१५७
अन्यत्रापि मनुरेवमेव विदधाति—५.१६२; ९.६५ ८.२२६;९.४७

४. पद्मपुराणे क्रियायोगसारखण्डे २०.२३-२९

५. प्रोफेसर अलटेकरो निर्णयति—This prohibition became operative only in the fighter section of the Hindu society. As far as its lower strata were concerned and they form more than eighty percent of the community remarriage continued to be current among them. Position of Women etc. p 156.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विधवायाः पत्युः सम्पत्तौ भागो वैदिकयुगे न प्रकल्पितः। तदा नियोगेन पुनर्विवाहेन च विधवा सधवेव बभूव। पुत्रवती सा विधवा स्वपुत्रस्य सम्पत्तौ पुत्रस्य भागेन सुखिनी बभूव। ततः परं मनुरपि नियोगेन पुत्रप्राप्तिमनुमन्यते।[1] अतएव मनुं यावद् विधवायाः पतिसम्पत्तिग्रहणस्य प्रश्नो नासीत्। पुत्रद्वारेण सा सम्पत्तिस्तस्या उपयोगाय बभूव। यदि नाम काचित् पुत्रहीना विधवा नियोगेन पुनर्विवाहेन वा पुत्रकामा नाभवत्, तर्हि तस्याः समक्षं श्रेष्ठो मार्ग आसीत् वैराग्यजीवनम्।[2] एतादृशीनां संन्यासिनीनां जैनबौद्धसंस्कृतौ प्रतिष्ठास्पदं स्थानमासीत्। ब्राह्मण-संस्कृतौ संन्यासिनीकृते समुचितव्यवस्था न दृश्यते।

विधवाविवाहे विरलीभूते विधवानामुत्तराधिकारः सहानुभूतिदृष्ट्या विष्णुस्मृतौ याज्ञवल्क्यस्मृतौ च निर्णीतो दृश्यते। तथाहि—

(१) अपुत्रस्य धनं पत्न्यभिगामि। तदभावे दुहितृगामि। विष्णुस्मृतिः १७.४३

(२) पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा।
तत्सुता गोत्रजा बन्धु-शिष्य-सब्रह्मचारिणः॥
एषामभावे पूर्वस्य धनभागुत्तरोत्तरः।
स्वर्यातस्य ह्यपुत्रस्य सर्ववर्णेष्वयं विधिः॥ २.१३५,१३६

बहूनां शास्त्रकाराणां विरोधे सत्यपि विधवानां पतिसम्पत्त्यधिकारः सातत्यं लेभे यतो हि नाम तत्त्वदर्शिनो मनीषिण उचितोऽयमिति समर्थितवन्तः। बृहस्पतिः स्त्रीयोत्कृष्टवाचस्पत्येन विधवानामुत्तराधिकारमन्वमन्यताधोविधम्—

आम्नाये स्मृतितन्त्रे च पूर्वाचार्यैश्च सूरिभिः।
शरीरार्धं स्मृता भार्या पुण्यापुण्यफले स्मृता॥

---

१. देवराद्वा सपिण्डाद्वा स्त्रिया सम्यङ् नियुक्तया।
प्रजेप्सिताधिगन्तव्या सन्तानस्य परिक्षये॥ ९.५९

२. तस्या तापसी-जीवनविधिर्जैमिनीयाश्वमेध-पर्वणि वर्णितोऽधोविधम्—
कृच्छ्रातिकृच्छ्रपाराकैः परं शोषयते तनुम्।
विधवा सा सुखं जीवेत् परलोके च मोदते॥
न व्रजेत्तीर्थयात्रां हि न कदाचिच्छुभव्रतम्।
करोति विधवा नारी सा गच्छेन्नरकं ध्रुवम्॥
कर्तव्यं तु तया राजञ्छरीरपरिशोषणम्।
उपवासादिभिर्नित्यं शमः कार्यो न संशयः॥ ८.२१-२३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यस्य नोपरता भार्या देहार्धं तस्य जीवति ।
जीवत्यर्धशरीरे तु कथमन्यः स्वमाप्नुयात् ।।

दायभागे उद्धृतम् एकादशप्रकरणे

विधवामातैकांशं कुटुम्बस्य सम्पत्तेः प्राप्नोत् । पत्न्याः सम्पत्तिः पत्युरधिकारपरिधेर्बहिरासीत् ।

सांस्कृतिकेतिहासेऽस्मिन् युगे (५००-१८०० ई०) विधवानामार्थिकदृष्ट्या स्थितिः पतिसम्पत्तिप्राप्त्या सुष्ठुतरा सञ्जाता । अन्यथा स्त्रीणां स्थितिः शोचनीया बभूव । तद्यथा—

(१) स्त्री शूद्रवत् परिगणिता ।
(२) विवाहावस्था ८ वर्ष यावत् स्वल्पीकृता ।
(३) विधवानां पुनर्विवाहः सर्वथा निषिद्धः ।
(४) सतीरीतिः समवर्धत ।
(५) स्त्रीशिक्षा न्यूनातिन्यूना संजाता ।
(६) स्त्रीणां कृतेऽवगुण्ठनं विशेषत उत्तरभारते दृढतरं निगडभूतम् ।
(७) उपेक्षिता नार्यो विशेषतो विधवा हिन्दुत्वं विहातुं विवशीभूताः ।
(८) तारुण्ये विधवानां स्थितिः शोचनीयासीदिति क्षेमेन्द्र-समीक्षास्मिन् ।

विषयेऽधोविधं प्रकाशिता—

ययुः शुकमृगापाते कलमक्षेत्रपंक्तयः ।
विधवा इव तारुण्ये कृच्छ्रसंरक्षणीयताम् ।। दशावतार० ५ ९१

पुत्रादीन् प्रति उत्तरदायित्वम्

विधवानां स्वतनुजानां परिपालनस्य महान् भरो बभूव । तेषां रक्षणं पोषणं सच्चारित्र्य-निबन्धनं च साधारणतो यानि पित्र्य-कर्माणि, तानि सर्वाणि पितुरसामयिकमृत्युना तस्य पत्नीभरो भवत्येव । महाभारते एकचक्राग्रामस्य ब्राह्मणी वैधव्यप्रचितकौटुम्बिकभरं वर्णयति—

कथं हि विधवानाथा बालपुत्रा विना त्वया ।
मिथुनं जीवयिष्यामि स्थिता साधुगते पथि ।।

सा प्रथयति विधवाभरम्—कन्यायाः पितृपैतामहे मार्गे नियोजनम्, पुत्रस्य गुणवर्धनम् इत्यादि ।[1]

विधवायाः श्रेष्ठं धनमासीत्तस्याः प्राप्ता विद्या । स्वविद्याभिः सा जीवनवृत्तिं सुचारु व्यवस्थापयितुं समर्था बभूव ।[2]

---

१. आदिपर्वणि १४६ तमेऽध्याये ।

२. तया पतिवियोगे च व्यसनं दारुणं गता ।
देशान्तरेऽपि विद्याभिः सा सुखेनैव जीवति ।। कामसूत्रे १.३.२३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्त्रीधनम्

भार्या तु भारतीयसंस्कृतौ गृहेश्वरी भवति ।[1] वैदिकयुगे पतिः पत्नी च संयुक्तरूपेण गृहस्वापतेयमभुञ्जाताम् । पितुः सम्पत्तिस्तस्य दौहित्रेणाधिकृता यदि नाम स पुत्ररहित आसीत् ।[2] उपनिषद्युगे याज्ञवल्क्यः स्वापतेयं पत्नीद्वयाय विसृष्टुमियेष ।[3] वैदिककालानन्तरं प्रमुखाचार्याः स्त्रियमुत्तराधिकारिणीं नामन्यन्तेति तेषां विधानस्य व्यावहारिकप्रतिपत्त्या प्रतिफलति । तद्यथा पुत्राभावे यः प्रत्यासन्नः सपिण्डः तदभावे आचार्यः । आचार्याभावे अन्तेवासी । हृत्वा धर्मकृत्येषु योजयेत् । दुहिता वा ।

आपस्तम्बधर्मसूत्रे २.१४.२,४

तथापि महाभारतेऽर्थशास्त्रे याज्ञवल्क्यस्मृतौ च पुत्रेऽसति दुहितुरुत्तराधिकारः समादृतः ।[4] यथा पुत्र आत्मजस्तथैव पुत्री आत्मजा । तस्या उत्तराधिकार उचित एवेति बृहस्पति-नारदादीनां मतम् ।[5]

भ्रातृयुतस्त्रीणां पितुः सम्पत्तौ अधिकारः क्वचनैव शास्त्रकारैः समादृतः । शुक्राचार्यादयः स्वल्पांशमेव स्त्रियै निर्दिशन्ति ।[6]

पत्युः दुष्प्रवृत्तिकारणाद्यदि साध्वी स्त्री पार्थक्यं भजते सा तस्य सम्पत्तेस्तृतीयांशं लभेतेति याज्ञवल्क्यो निर्णयति ।[7]

पितुः सम्पत्तौ विवाहितकन्याया अधिकारो नाभिज्ञात आसीत् ।

स्त्रीणामाभूषणानि निर्विवादमेव शाश्वतं स्त्रीधनं वर्तन्ते । तेषां विभाजनं पार्थक्यकाले नानुमतम् । मनुर्निगदति—

पत्यौ जीवति यः स्त्रीभिरलंकारो धृतो भवेत् ।
न तं भजेरन् दायादा भजमाना पतन्ति ते ॥ ९.२००

---

१. भागवते १०.६०.५१ ।

२. ऋ० १.१२४.७

३. बृहदारण्यक० २.४.१

४. महाभारतेऽनुशासनपर्वणि ८०.११; ८८.२२ अर्थशास्त्रे ३.५; याज्ञवल्क्यस्मृतौ २.१३५ ।

५. बृहस्पतिस्मृति २५.५५; । नारदस्मृति १३.५०

६. समानभागा वै कार्याः पुत्राः स्वस्य च वै स्त्रियः ।
स्वभागार्धहरा कन्या दौहित्रस्तु तदर्धभाक् ॥ ४.५.२९९

७. याज्ञ० १.७६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अधिकाधिकालङ्कारधारणविधिना स्त्रीणां स्वत्वं स्वभावतो वर्धत एव। एतैरलङ्कारैः क्वचिद्विपत्तिग्रस्तनारीणां महती सहायता समजायत। प्राचीनकाले स्त्रीणामाकेशात् पादाङ्गुलिपर्यन्तं शरीरस्य सर्वेषां भागानामावरणं रत्नस्वर्णरजतादीनां मणिरत्नहीरकादीनां च विविधरूपैरलंकरणं च सौभाग्यचिह्नमेवोरीकृतमिति योजना प्रशस्यासीत्।

स्त्रीणां सम्पत्त्यधिकार आसीत्। विवाहकाले कन्यायाः पिता यत्किंचित् पुत्र्यै अदात्, तत्सर्वं तु तस्या एव बभूव। मन्वनुसारेण षड्विधं[1] स्त्रीधनं भवति—

अध्यग्न्यध्यावाहनिकं दत्तं च प्रीतिकर्मणि।
भ्रातृ-मातृ-पितृ-प्राप्तं षड्विधं स्त्रीधनं स्मृतम्॥ ९.१९४

भारते चतुर्विधानां लोकानां क्रमशो, धर्मार्थकाममोक्षपरायणानां स्वस्वाभीष्टतमकार्यार्थिनां सम्पत्तये नारीविषयका धारणाः सिद्धान्तरूपेण व्यवहाररूपेण च यथाकालं प्रवर्तिताः। अतएव परस्परविरोधिन्यो व्यवहारप्रवृत्तयस्तासां विषये स्वाभाविक्यः सन्ति। विशालेऽस्मिन् देशे विविधप्रान्तस्य सांस्कृतिकस्तरस्योच्चावचपदान्यधिष्ठितानां लोकानामपि स्त्रीविषय उच्चावचमतानि साहित्यधर्मशास्त्रादिग्रन्थेषु निर्व्याजभावेन प्रकाशितानि। अस्यां स्थितौ सर्वा विप्रतिपत्तीर्निष्पक्षभावेन समाकलय्य स्त्रीपदं समीक्षणीयम्।

स्त्रीदूषणं शुद्धीकरणं च

वैदिकयुगे क्वचन जारसम्बन्धेनापि स्त्री नादुष्यत इति प्रतिभाति।[2] अप्सरसस्तु नैकेषां भोग्या दूषिता न मताः तासां गन्धर्वपत्नीत्वं विश्रुतमेव।

महाभारते परपुरुषसम्बन्धेन स्त्रियो दूषणं क्वचिदवाञ्छितमपि नातिविगर्हणीयं मतम्। शान्तिपर्वणि स्पष्टमेव प्रोक्तम्—

भिक्षिते पारदार्यं च न तद्धर्मस्य दूषकम्। ३५.२७

---

१. अग्निसाक्षित्वकाले, कन्यायाः पतिगृहाय प्रस्थानकाले च सम्बन्धिभिर्दत्तम्, प्रेमसमुदाचारे पत्या दत्तम्, भ्रात्रा, मात्रा पित्रा च दत्तम्।

२. इन्द्रस्तु अहल्याया जारो बभूव। बृहस्पतिपत्नचा चन्द्रस्य जारजपुत्रो बभूव। वरुणप्रघासे पृष्टा सती यजमानपत्नी स्वजारस्य प्रकाशनमकरोत् तथापि सा यज्ञकर्मसाह्यान्न वंचिता बभूव। तै० ब्रा० १.६.५; शतपथब्राह्मणे २.५.२.२०। 'असौ मे जार इति निर्दिशति।'

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्यच्च—

स्त्रियस्तेन विशुध्यन्ति इति धर्मविदो विदुः । शान्ति० ३६.२६
रजसा ता विशुध्यन्ते भस्मना भाजनं यथा ॥ ३६.२७
स्त्रियस्तथापचारिण्यो निष्कृतिः स्याददूषिका ।
अपि सा पूयते तेन न तु भर्ता प्रदुष्यते ॥ ३५.३०
भानोः प्रभा शिखा बह्वेर्वेदी होत्रे तथाहुतिः ।
परामृष्टाप्यसंसक्ता नोपदुष्यन्ति योषितः ॥ हरिवंशे ५.३९

महाभारतानुसारेण वरुणेनापहृतां मर्दितां च भद्रामुतथ्यो महामुनिः शुद्धिकरणप्रक्रियां विनापि स्वपत्नीं पुनः स्वीचकार ।[1]

कामाविष्टानां दुर्वृत्तानामाक्रमणकारिणां वा बलात्कारेण त्याजितसतीवृत्तानां नारीणां स्वीकरणस्य योजना वसिष्ठात्रिदेवलादिभिस्तत्त्वदर्शिभिः प्रस्तावित सम्यगनुष्ठिता च क्वचन लोकरक्षणार्थम् । तथाहि—

स्वयं विप्रतिपन्ना वा यदि वा विप्रवासिता
बलात्कारोपभुक्ता वा चोरहस्तगतापि वा ।
न त्याज्या दूषिता नारी नास्यास्त्यागो विधीयते ।
पुष्पकालमुपासीत ऋतुकालेन शुध्यति ।
वसिष्ठधर्मसूत्रे २८.२,३

असवर्णैस्तु यो गर्भः स्त्रीणां योनौ निषिच्येते ।
अशुद्धा सा भवेन्नारी यावद् गर्भं न मुञ्चति ॥
विमुक्ते तु ततः शल्ये रजश्चापि प्रदृश्यते ।
तदा सा शुध्यते नारी विमलं काञ्चनं यथा ॥
अत्रिस्मृतौ १९५, १९६ देवलस्मृतौ ५०, ५१ ।

बलान्नारी प्रभुक्ता वा चौरभुक्ता तथापि वा ।
न त्याज्या दूषिता नारी न कामोऽस्या विधीयते ॥
ऋतुकाल उपासीत पुष्पकालेन शुध्यति ॥ १९७,८
सकृद् भुक्ता तु या नारी म्लेच्छैर्वा पापकर्मिभिः ।
प्राजापत्येन शुध्येत ऋतुप्रस्रवणेन च ॥
अत्रिस्मृतिः ५.३५

---

१. तस्मिन् संचूर्णिते देशे भद्रामादाय वारिपः ।
अददाच्छरणं गत्वा भार्यामाङ्गिरसाय वै ॥
प्रतिगृह्य तु तां भार्यामुतथ्यः सुमनाभवत् ।
मुमोच च जगद् दुःखाद् वरुणं चैव हैहय ॥ अनु० १३९.२७,२८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पराशरस्तत्समर्थयति १०.२६.७ । महाभारतानुसारेण स्त्रीदूषणे व्यभिचारी पुरुष एव दोषभाक् । शान्ति० २६८.३६,३७,४७ ।

बलात्कारदूषिता नारी न सदोषा । तत्रापराधी पुरुष एव मृत्युदण्डमर्हति इति मत्स्यपुराणे निगदितम् । २२७.१२६

परपुरुषेणात्यन्तदूषितापि नारी न त्याज्या । तस्याः शुद्धिर्यथाविधानं सम्पादनीयेति बृहस्पतिमतम् । अशौचाध्याये ५३, ५४ । बलात्कारेण गर्भवती भूतापि स्त्री जननानन्तरं शुद्धा जायत इति देवलमतम् । यथा स निर्दिशति—एवं जातापत्यमन्यस्मै देयम् । देवलस्मृतौ ५०.२ ।

नैतत्पूर्वोक्तं वचनं शास्त्रपुटपाकमात्रमर्हति, अपि तु यथा पुरा तथाद्यापि भारतीयसंस्कृतिपरायणानां संख्या धर्मान्धानां प्रमादेन ह्रासंगता पुनः संवर्धनीया ।[1]

काने महोदयः ससारं शास्त्रमतं निगदति—पुरा व्यभिचारदूषिता नारी परित्यागं नार्हत् । तस्या उपपातकमिति मत्वा प्रायश्चित्तेन सा शुद्धा कृता । शूद्रेण सह व्यभिचारेण सा महापातकिनी बभूव । तस्या अपि प्रायश्चित्तेन शोधनमभवद्यद्यपि सा धार्मिककार्यकलापेषु सहधर्मचारिणीरूपेण न स्वीकरणीया मता । तस्या भोजनावासादिव्यवस्था पृथक् करणीयासीत् ।[2]

सतीत्वविमुखीकृतानां स्त्रीणां शुद्धीकरणेन स्वसमाजे कुटुम्बे च पुनर्ग्रहणयोजना परवर्तियुगे विस्मृता परित्यक्ता च ।

प्रो० अलटेकर महोदयः सम्यगालोचयति—

This changed attitude produced a disastrous consequence on the strength and solidarity of Hindu society. Out of the thousands of women that were forcibly carried into captivity by Muslim invaders from the 11th century onwards almost all would have liked to come back to their old homes and society. But they knew that their fate was sealed once for ever, the moment they had fallen into the hands of the enemy no return was possible.

Position of Women etc. P. 310.

---

1. The liberal views of Atri and Devala were accepted by Hindu society down to about the ninth century A D. During the first half of the 8th century thousands of men and women were taken into captivity by the Muslim invaders of Sindh. Those of them who could effect their escape were accepted back in their families and society. Elliot and DowSon : History of India etc. Part I p. 126.

2. History of Dharmaśastra Vol. II Part I Page 573

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

Had the views of Atri and Devala ultimately prevailed, were the doors always kept open for women overtaken by misfortune to return to their families and society, the Muslim population in the once undilvided India would not have risen to nine crorcs. Hindu Society has paid heavily for its narrow orthodoxy etc. Ibid p. 311

भारते नारीणां सर्वोच्चप्रतिष्ठा

प्राचीनविश्वस्य नारीणामुच्चावचस्थितिं सम्यक् सम्प्रधार्य मिलमहोदयो निर्णयति—

And it may be confidently asserted that in no nation of antiquity were women held in so much esteem as amongst the Hindus. History of India, Vol. II, p. 51

स्त्रीविषये भारतीयशास्त्रविधिः क्वचिदनुदारः प्रतिभाति। अवश्यमेवैतत् पूर्वपुरुषाणां वैषम्यं यदकारणमेव तैः स्त्रीणामवरता प्रतिपादिता, अथवा तासां प्रगमनपथे बाधाः समुपस्थापिताः, अथवा तासां जीवन-सौष्ठवमपहृतम्। किन्तु नैतेन कारणेनास्यां दिशि भारतीया संस्कृतिर्विश्वसंस्कृतेर्न्यक्करणीया। प्राचीनयुगे क्वापि विदेशेषु स्त्रीणां स्थितिः स्वत्वं वा पुरुषैः समं प्रतिष्ठितं नासीत्।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

राजनीतिकप्रवृत्तयः

मानवसृष्टेरादिकालतो मनुष्याणां परस्परसहयोगापेक्षि सामाजिकजीवनं स्वभावतः प्रादुरभवत् । समाजस्य लघुतमरूपं कुटुम्बं भवति । तस्य बृहत्तमरूपं राज्यं, साम्राज्यं, विश्वराज्यं च कल्पितम् । यथा स्वजनानां रक्षार्थं संवर्धनार्थं च कुटुम्बस्य स्वामी गृहपतिर्भवति, तथैव राज्यस्य स्वामी राजा प्रवर्तते । पितेव राजा प्रजाः पाति ।[1] अर्थशास्त्रे समर्थितम्—सर्वत्र चोपहतान् पितेव राजानुगृह्णीयात् ।[2]

शनैः शनै राज्यस्य सप्ताङ्गानि (प्रकृतयः) विकसितानि[3]— स्वामी (राजा); अमात्यः (मन्त्री), जनपदः (राष्ट्रम्), दुर्गं (राजधानी, पुरम्), कोशः (धनधान्य-रत्नादि-सम्पत्तिः), दण्डः (सेना), मित्रं (सुहृद्भूता राजानः) च । एतेषु राजा कूटस्थः सर्वातिशायी प्रभवति, यतो हि नाम शेषाणि षडङ्गानि प्रत्येकं सौष्ठवार्थं राजानमेव संश्रयन्ते । यदि राजा शुभ्र-चरितो भवति तर्हि तानि सत्त्वं सम्पद्यन्ते ।[4]

एतानि सप्ताङ्गानि, प्रत्येकशो निजसौष्ठवेन कञ्चिद् भूप्रदेशं तथैव विभूषयन्ति यथा शरीरस्याङ्गानि निजसौष्ठवेन मानवं विभूषयन्ति । प्रकरणेऽस्मिन् राजा प्रथमस्थानीयः ।

---

१. प्रो० अलटेकरो निष्कर्षति—प्रागैतिहासिक काल में संयुक्त कुटुम्ब से ही शासन-संस्था का विकास हुआ । कुटुम्ब के गृहपति का मान और आदर स्वाभाविक था । ग्राम के मुखिया और पति भी इसी परम्परागत सम्मान के भाजन हुए और कालान्तर में ये ही सरदारों और राजाओं के पद पर प्रतिष्ठित हुए ।
प्राचीन भारतीय शासन-पद्धति पृष्ठ ३ ।

२. अर्थशास्त्रे ४.३.५४

३. अथर्ववेदे सप्ताङ्गस्य मूलधारणा सङ्केतितास्ति । तत्र गृहपतिः, सभा, समितिः, आमन्त्रणं (मन्त्रिपरिषद्) च समाजव्यवस्थाधिकारिणः क्रमशो बृहत्तरा वर्णिताः । अथर्व० ८.१०.१ । 'सप्ताङ्गं राज्यमुच्यते' इति मनु० ९.२९४ । महाभारत शान्ति प० ६९.६२,६३

४. क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे । कौटिल्यः स्पष्टयति–सम्पादयत्य-सम्पन्नाः प्रकृतीरात्मवान् नृपः । ६.१.१६ । स्वयं यच्छीलस्तच्छीलाः प्रकृतयः । ८.१.१६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

राजा

राजा को भवेदिति प्रश्नः प्राचीनभारते विविधस्थितिषु विविधप्रकारैः समाहितः। स्वयोग्यतया प्रांशुसत्त्वेन पराक्रमेण च स्वत एव बहवो राजानः स्वराजवंशस्य प्रतिष्ठापका बभूवुः। अन्यत्रोत्तराधिकारविधानेन कस्यचिद्राज्ञो ज्येष्ठपुत्रो वा पत्नी वा भ्राता वा राज्यस्य अमात्यादिभिर्महत्तमैर्जनैर्वृतः प्रजाभिरनुमोदितः राजपदं स्वीचकार।[1] अयोग्यः कश्चिज्जनः कूटवृत्त्या राजपदं प्राप्नोतु किन्तु स्वीयदुर्णयात् सोऽचिरेण परावृतः।

साधारणातः क्षत्रिया राजानो बभूवुः, किन्तु वैदिककालतोऽक्षत्रिया बहव आर्येतराश्चापि राजानो प्रबभूवुरिति तत्रेतिहास एव प्रमाणम्।[2] तन्त्रवार्तिकानुसारेण—

तच्च राज्यमविशेषेण चत्वारोऽपि वर्णाः कुर्वाणा दृश्यन्ते। तस्मात् सर्वे राजानः। पृष्ठ ५८०। अयज्यवो दश राजानो वर्णिताः। ऋ० ७.८३.७।

सर्वेषां वर्णानां राजानः काणेमहाभागेन संगृहीताः। तद्यथा शुङ्गाधिपः पुष्यमित्रः, शुङ्गवंशमनु काण्वायनाः, वाकाटक-कदम्बवंशीया राजानो ब्राह्मणा बभूवुः। बङ्गदेशे पालवंशीया राजानः शूद्रा आसन्। खीष्टसप्तमशताब्दस्य पूर्वार्धे सिन्धुप्रदेशस्य राजा शूद्रोऽभवत्।[3]

स्त्रीणां राजपदाधिकारो विरलोऽपि भारतीयसांस्कृतिकेतिहासं प्रद्योतयत्येव।[4]

राज्ञः कल्याणगुणाः

राजत्वस्य ध्रुवीकरणाय ये गुणा आवश्यकास्तेषामर्जनं राजकुमारः कुर्यादिति सर्वेषां शास्त्रकाराणां राजनीति-विशारदानां चैकमतं दृश्यते। तेषां गुणानामर्जनाय स नैकशिक्षण-संस्थासु तत्तद्विषयाणामाचार्यपादानुपासते स्म। संक्षेपेण राजत्वोचितविद्याः सन्ति ज्ञान-विज्ञान-शास्त्र-शस्त्राणि।

---

१. दशपुरुषं राज्यं (शत० १२.९.३.१-३ दीर्घकालीनामेकवंशीयां राज्यपरम्परां द्योतयति। योग्यमेव स्वपुत्रं राजा राजपदे स्थापयेत्। अन्यथा स्वपुत्र्या पुत्रं, नियोगपुत्रं वा राजपदे नियोजयेत्। न तु अविनीतं पुत्रं राज्ये स्थापयेत्। अर्थशास्त्रे १.१७.५३

2. ऋग्वेदे विप्रराज्यस्योल्लेखो वर्तते। ८.३.४। वृत्रादय आर्येतरा राजान आसन्। आर्या वार्येतरा वा ये केचित् प्रजापालन-तत्परा आसन् ते सर्वे क्षत्रिया राजानो राजन्यश्चाभिहिताः।

३. History of Dharmaśāstra P. 39-40.

४. प्रकृतग्रन्थे पृ० ४५० द्रष्टव्यम्।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तत्र वेदोपवेदवेदाङ्गानां सर्वेषां कला-शिल्पानां वार्तानां दण्डनीते राजनीतेश्च समावेशो भवति ।[1] राजा धर्माध्यक्षोऽप्यासीत् । ऋ० ८.४३.२४

पूर्वोक्तेभ्योऽपि प्रशस्या राजकुमाराणां कृते कल्याणगुणाः, सत्त्वगुणा वा सन्त्येव शास्त्रेषु पुराणेतिहासादिषु वर्णिताः । वाल्मीकिरामायणे युवराज-पदेऽभिषेचनात् प्राग्रामस्य कल्याणगुणा अधोविधं संज्ञिताः —

दिव्यैर्गुणैः शक्रसमः, सत्यपराक्रमः, सत्यपरायणः, चन्द्रवत्प्रजा-सुखकरः, क्षमया वसुधासमः, बुद्ध्या बृहस्पतितुल्यः, वीर्येणेन्द्र एव, धर्मज्ञः, शीलवान्, अननसूयकः, कृतज्ञः, विजितेन्द्रियः, मृदुः, स्थिरचित्तः, प्रियवादी, वृद्धब्राह्मणानामुपासिता, महामतिः प्रजानां व्यसनेषु दुःखितः, स्मितपूर्वाभि-भाषी, धर्माश्रितवक्ता वाचस्पतिर्यथा, न रागोपहतेन्द्रियः, लोकपालोपमः, सर्वशत्रुनिबर्हणः, सर्वस्यलोकस्य हिते निविष्टः[2] । अयोध्याकाण्डस्य द्वितीयसर्गात्

ऋग्वेदानुसारेण—

त्वं नृणां नृपते जायसे शुचिः । २.१.१
क्षेति क्षितीः सुभगो नाम पुष्यन् । ५.३७.४

अर्थात् राजा पवित्रात्मा भवति । स प्रजाः पुष्यति ।

राजा ध्रुवो भवेत्, यथा द्यौः पृथिवी, पर्वतो वा ध्रुवो भवति ।[3] अयं राजा स्वभावतो महातेजस्वी (उग्रो) बभूव ।[4] स वर्चसाभ्युदयं गतः[5] । प्रजानां कृते स उपसद्यः (अभिगम्यो) बभूव ।[5] शत्रूणां कृते स सिंह-व्याघ्रोपमितो विजयी बभूव ।[6]

---

१. धर्मकामार्थशास्त्राणि धनुर्वेदं च शिक्षयेत् ।
रथे च कुजरे चैव व्यायामं कारयेत् सदा । मनुस्मृति ७.४३
शिल्पानि शिक्षये चैनं । अग्निपुराणे २२०.२-३

२. ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वता इमे ।
ध्रुवं विश्वमिदं जगद् ध्रुवो राजा विशामयम् ॥ ऋग्वेदे १०.१७३.४
विश्पती राजा । अथर्व० ३.४.१; ४.२२.३

३. अथर्व ३.४.२ । उग्रस्तु शक्तिशाली वावदानशीलः ।

४. वर्चसा सह उदिहि । अथर्व ३.४.१.

५. रामायणेऽयोध्याकाण्डे १००.५१ । महाभारते सभापर्वणि ५.७६ राज्ञः प्रति-दिनं प्रजादर्शनमपेक्षितम् ।

६. अथर्व ३.४.१; ४.२२.७; ४.८.७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

इन्द्रो वरुणश्च सम्राजौ । तयोर्विशेषा मानवराजान् सम्यक् स्पृशन्ति स्म आदर्शरूपेण ।[1] इन्द्रस्य चातुर्दिग्विजयः परवर्तिमहारथानां दिग्विजयस्यादर्शं प्रस्तौति ।[2] नैकदिव्यसत्तानामात्मनि न्यासेन राजासीमशक्तिमान् बभूव ।[3] विविधैर्गुणैः स जीवन-संग्रामे प्रजापालनार्थं नानाविधं पराक्रमत ।[4]

राजा ऋषयश्च पारस्परिकापेक्षाः समवर्तन्त । न केवलं यज्ञसम्पादनार्थं ब्रह्मविमर्शार्थमेव वापितु कर्तव्यपथविज्ञापनेनापि ऋषयो राजभिः सम्पृक्ता बभूवुः[5] । प्रायशो राजानो महावदान्या आसन् । कतिपये ब्रह्मविद्याया महापण्डिता महाब्राह्मणानपि ब्रह्मविद्यां शिक्षयन्ति स्म । विपन्नानां लोकानामिन्द्रोऽपि सहायो बभूव ।[6]

ऋग्वेदानुसारेण विशां पालको राजा भवति ।[7] अर्थात् कतिपयजनसमुदायानां कश्चिद् राजा भवति । इन्द्रः सुप्रसिद्धो विशस्पतिरस्ति ।[8] स राजा स्वोत्कृष्टयोग्यतया प्रभाविताभिः प्रजाभिर्वृतोऽभिनन्दितो भवति ।[9] तथाहि अथर्ववेदे —

आ त्वा गन्राष्ट्रं सह वर्चसोदिहि
प्राङ् विशां पतिरेकराट् त्वं विराज ।
सर्वास्त्वा राजन् प्रदिशो ह्वयन्तूपसद्यो नमस्यो भवेह ।। ३.४.१
त्वां विशो वृणता राज्याय ।

---

१. राजा त्रसदस्युरात्मविषयकं वदति --
राजामि कृष्टेरुपमस्य वन्नेः । ऋ० ४.४२.१ । यजु० ८.३७ अहमिन्द्रो वरुणः । ४.४२.३ । इन्द्र प्र राजसि क्षितीः ८.६.२६ । धर्तारा चर्षणीनाम् । ऋ० १.१७.२

२. उप प्रेत कुशिकाश्चेतयध्वमश्वं राये प्रमुञ्चता सुदासः
राजा वृत्रं जंघनत् प्रागपागुद ग्रथा यजाते वर आ पृथिव्याः । ऋ० ३.५३.१ ।

३. यजुर्वेद २२.८ ४. यजुर्वेद २२.९

५. राज्ञो विशि क्षेमम् । अथर्व ३.३.५ अस्य पुस्तकस्य पृ० ३१७

६. अनु द्वा जहिता नयोऽन्धं श्रोणं च वृत्रहन् । ऋ० ४.३०.१९ ।

७. ऋ० ३.१३.५, ७.३९.२; १०.१७३.४; अथर्व० ३.४.१
अतएव सर्वे क्षत्रिया राजानोऽभिधीयन्ते । अथर्व० १८.४८
परवर्तियुगेऽपि विशांपती राज्ञो पर्यायः । अयोध्याकाण्डे २.२८ ।

८. ऋ० १०.१५२.२

९. अथर्व० ३.४ । त्वां (राजानम्) विशो वृणतां राज्याय । अथर्व० ३.४.२ ।
स विशां सर्वश्रेष्ठो बलिष्ठोऽभूदिति विशामेकवृषं कृणु त्वमिति अथर्व० ४.२२.१ प्रमाणयति ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वर्ष्मन् राष्ट्रस्य ककुदि श्रयस्व । ३.४.२
अयमस्तु धनपतिर्धनानामयं विशां विश्पतिरस्तु राजा । अथर्व० ४.२२.३
राज्ञः श्रेष्ठजनैः सह तादात्म्यमभीप्सितमासीत् ।[1]

राज्ञो लोकाभिरुचिरपेक्षितासीत् । स 'भूयात् प्रियो गवामोषधीनां पशूनाम्' इति अथर्व० ४.२३.४ वचनेन प्रमाण्यते । स विजयी भवेदेव ।[2] क्वचिद् योद्धा क्षत्रिय एव राजेत्यभिहितः ।[3]

ऋग्वेदादिषु राजपदस्य कतिपय पर्याया राज्ञो विशेषं प्रकटयन्ति । यथा नृपतिः प्रजापालक इति[4] । नृपतिः प्रायशोऽग्निनोपमीयते । अनेन नृपतौ आग्नेयगुणाः तेजस्वितादयो विभाव्यन्ते ।[5] एवमेवेन्द्रगुणसम्पन्नो भवति बलप्रदो राजा ।[6] अश्विगुणसंजातमहिमा राजाधोविधं वर्णितः —

'इषां वोढा नृपतिर्वाजिनीवान्' । ऋग्वेदे ७.६९.१

राजभ्य उच्चतरः सम्राडुच्चकोटिको नरपतिर्बभूव । इन्द्रोऽपि तेनोपमितः । यथा ऋग्वेदे—

यस्य क्रतुविदथ्यो न सम्राट् साह्वान् तरुत्रो अभ्यस्तिकृष्टीः । ४.२१.२
प्र सम्राजं चर्षणीनाम् । ऋ० ८.१६.१
स वज्रभृद् दस्युहा भीम उग्रः सहस्रचेताः शतनीथ ऋभ्वा ।
चभ्रीषो न शवसा पाञ्चजन्यो मरुत्वान् नो भवत्विन्द्र ऊती ।।[7]

वैदिकयुगीने भारते नैकसम्राजः सहैवापि व्यराजन्त । तेष्वेकः पृथुवंशीयोऽभ्यावर्तीति ख्यातः ।[8] पुरुदेशीयः त्रसदस्युः, दशराजानां विजेतासीत् ।

---

१. अथर्व ३.५.२ । अहं राष्ट्रस्याभी वर्गे निजो भूयासमुत्तमः इति ।
अर्थशास्त्रे समर्थितमेतत्—
प्रजासुखे सुखं राज्ञः प्रजानां च हिते हितम् । १.१९
२. जिगीवांनिति अथर्व० ४.२२.६ वचनेन प्रकाशितम् ।
३. ऋ० १०.४३.१०
४. पा रक्षणे । पातेर्डति अतएव नृपतिः प्रजारक्षकः
५. त्वामग्ने दम आ विश्पतिं विशस्त्वां राजानं सुविदत्रमृञ्जते ।
त्वं विश्वानि स्वनीक पत्यसे त्वं सहस्राणि शता दश प्रति ।। ऋ० २.१.८
६. ऋग्वेदे ४.२०.१ । अहमिन्द्रो वरुणः । ऋ० ४.४२.३
इन्द्रः कृष्टीनां राजा । ऋ० १.१७७.१; ८.१३.९
इन्द्रः नरां नृपाता । ऋ० १.१७४.१०
'सर्वे इन्द्रगुणा राज्ञि उपपद्यन्ते' इति लोकदृष्टं सत्यम् ।
७. ऋग्वेदे १.१००.१२ । ८. ऋ० ६.२७.८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यजुर्वेदे ससारं प्रोक्तो राजगुणः—क्षत्रस्य योनिरसि क्षत्रस्य नाभिरसि । २०.१

अर्थाद्राज्यस्य सर्वविधाभ्युदयानां बीजं राजनि विद्येत ।

आर्याणां प्रथमसम्राडिन्द्रो बभूव ।[1] प्रजाभी राजपदे चयनं तस्य प्राक्सिद्धप्रजापालनयोग्यतया सम्भावितम्, यतो हि नाम राजपदधिषणास्तस्य पराक्रमान् प्रजासंवर्धनक्षमान् परिपश्यन्तः स्वयमेव परस्परं विमृश्येन्द्रं राजपदमधिष्ठापयितुं निवेदयामासुः[2] । शतपथब्राह्मणे राजा वरुण इव धर्मपतिरिति निगदितम् ।[3]

कतिपयप्रेष्ठराजा मनीषिणां शुभकामनामर्हन्ति स्म । यथा राजा ध्रुवोऽचलः, सर्वविशां वाञ्छितः, राष्ट्रस्य शाश्वताधिष्ठाता, इन्द्र इव ध्रुवः, राष्ट्रधारकः, पृथिवी-पर्वत-ध्रुवदेवधारितराष्ट्रश्च भवेदिति ।[4]

तद्यथा यजुर्वेदेऽभिषेकेण कश्चिद्राजा तेजोब्रह्मवर्चस - वीर्येन्द्रियबल-श्रीयश आदिभिः प्रपन्नो बभूव ।[5] अन्ये राज्ञो विशेषाः सन्ति—सत्यराजः, सुश्लोकः सुमङ्गलश्च ।[6] सम्राजः सत्प्रवृत्ति-प्रेरणास्रोतो धृतव्रतः सुक्रतुर्वरुणो बभूव ।[7]

तादात्म्यं दृश्यते राजप्रजयोर्यजुर्वेदे । तद्यथा—प्रतितिष्ठामि राष्ट्रे । २०.१० विशि राजा प्रतिष्ठितः । २०.९

प्रत्यङ्गं राजा प्रजासारं बिभर्ति । तथाहि—'मे पृष्ठी राष्ट्रम् । उदरमंसौ ग्रीवा, श्रोणी, ऊरू इत्यादयः विशः सन्ति । देवैः सह राज्ञस्तादात्म्यं

---

१. राजा कृष्टीनां पुरुहूत इन्द्रः । ऋ० ४.१७.५

२. तद्यथैतरेयब्राह्मणे—'ते देवा अब्रुवन् सप्रजापतिकाः—अयं वै देवानामोजिष्ठो बलिष्ठः सहिष्ठः सत्तमः पारयिष्णुतमः । इमम् (इन्द्रम्) एवाभिषिञ्चामहै इति ।' विश्वेदेवैरस्मिन्नवसर इन्द्रः प्रतिज्ञापितः—क्षत्रमजनि क्षत्रियोऽजनि, विशामत्ताजनि, असुराणां हन्ताजनि ब्रह्मणो गोप्ताजनि, धर्मस्य गोप्ताजनीति । ८.३.१ । राज्ञ इदं नानारूपं परीक्ष्याथर्ववेदे प्रोक्तम्—'आ विश्वरूपो अमृतानि तस्थै' । ८.४.३

३. शतपथ० ५.३.३.९

४. विशस्त्वा सर्वा वाञ्छन्तु । मा त्वद्राष्ट्रमधि भ्रशत् । पर्वत इवाविचाचलिः । इन्द्र इव ध्रुवस्तिष्ठ । इह राष्ट्रमुपधारय । देवप्रसादघृतस्थैर्यः' इत्यादि ऋ० १०.१७३

५. सोमस्य त्वा द्युम्नेनाभिषिञ्चामि, अग्नेर्भ्राजिसा सूर्यस्य वर्चसा इन्द्रस्येन्द्रियेण-क्षत्राणां क्षत्रपतिरेध्यति । यजु० १०.१७; २०.३

६. यजु० २०.४ ७. यजु० २०.२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तेनानुभूतम् ।[1] विनयेन शोभते राजेति प्रयतमानस्य तस्य धारणासीत् ।

ऋग्वेदानुसारेण तत्र कतिपयसम्राजां वंशपरम्परा समुच्छ्रितासीत् । भरतवंशीया राजानः सुप्रथिता बभूवुः ।[3]

देवादर्शं स्वीकुर्वाणा राजानः कथमाचरन्ति स्मेति ऋग्वेदे राजमितस्य मित्रस्य[4] चारुचरिताख्यानेन कल्पयितुं शक्यते ।

वैदिकसंहितासु राजा शब्दः सम्राजः एकराजस्य, महाराजस्य वा पर्यायवाचीकृत्य प्रायशः प्रयुक्तो दृश्यते ।[5] अपरथा कस्यचित् क्षत्रियस्याप्युपाधी राजा बभूव ।

ऐतरेय ब्राह्मणानुसारेण राज्ञो जीवन-सर्वस्वमासीत् परमार्थेन प्रजाहितसाधनम् । एतदेव तस्य जीवनस्योद्देश्यम् । एतद्विना स आत्मानं तृणीभूतमन्यत ।

राजकुमारस्य शिक्षा सम्यक् कथं प्रभवेदिति मनुर्दिशति—

त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिं च शाश्वतीम् ।
आन्वीक्षकीं चात्मविद्यां वार्तारम्भांश्च लोकतः ।। ७.४३

चतुराश्रमिणां चतुर्वर्णानां च निष्टप्तमविकलं च विकासं साधयितुं राज्ञः पूर्वोक्तदिशा सुशिक्षावश्यकी मता । सुशिक्षितोऽयं राजा इन्द्रियजयी, निर्लोभश्च कामक्रोधाप्रसक्तो भवेत् ।[6]

---

१. यजु० २०.८ । देवा देवैरवन्तु मा । यजु० २०.११

२. यजु० २०.१३

३. भरतानां नाम्ना भारतं जनमासीत् । ऋ० ३.५३.१२

४. अयं मित्रो नमस्यः सुशेवो राजा सुक्षत्र इत्यादि ऋ० ३.५९.४ । चर्षणीधृतो देवस्य मित्रस्य । ऋ० ३.५९.६। पृथिवीं दाधार । ३.५९.१ यातयज्जनः । ऋ०३.५९.५ ।

५. इमे शब्दाः क्रमश उच्चतरं पदं निर्दिशन्ति । महाराजस्य सम्राजश्चाधीना बहवो राजान आसन् । एकराड् एकछत्राधिपत्यं बोधयति । एतेभ्यः परतम आसीत् चक्रवर्ती । विश्वस्य समकालिकराजसमुदायस्याधिष्ठाता स बभूव । कौटिल्यानुसारेण—देशः पृथ्वी तस्यां हिमवत्समुद्रान्तरमुदीचीनं योजनसहस्रपरिमाणमतिर्यक् चक्रावर्ति-क्षेत्रम् । ९.१

महाभारतानुसारेण पुरावृत्ते पञ्च सम्राजो गण्यमानाः सन्ति—यौवनाश्वः, भगीरथः, कार्तवीर्यः, भरतः, मरुत्तश्च । सभापर्वणि १४.११

६. मृगयाक्षो दिवास्वापः परिवादः स्त्रियो मदः ।
तौर्यत्रिकं वृथाट्या च कामजो दशको गणः ।। ७.४७
पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम् ।
वाग्दण्डजं च पारुष्यं क्रोधजोऽपि गणोऽष्टकः ।। ७.४८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

महाभारते राज्ञः कल्याणगुणाः संक्षेपेणाधोविधं वर्णिताः—

आत्मा जेयः सदा राज्ञा ततो जेयाश्च शत्रवः ।
अजितात्मा नरपतिर्विजयेत कथं रिपून् ॥
एतावानात्मविजयः पञ्चवर्ग-विनिग्रहः ।
जितेन्द्रियो नरपतिर्विजयेत कथं रिपून् ॥ शान्ति० ६९.४,५
यथा पुत्रास्तथा पौरा द्रष्टव्यास्ते न संशयः ।
भक्तिश्चैषां प्रकर्तव्या व्यवहारे प्रदर्शिते ॥ ६९.२६
वेदवेदाङ्गवित् प्राज्ञः सुतपस्वी नृपो भवेत् ।
दानशीलश्च सततं यज्ञशीलश्च भारत ॥ ६९.३०
धर्मश्चार्थश्च कामश्च सेवितव्योऽथ कालतः ।
धर्मेण हि महीपालश्चिरं पालयते महीम् ॥ ६९.६८
नित्योद्युक्तेन वै राज्ञा भवितव्यं युधिष्ठिर । ५७.१
लोकरञ्जनमेवात्र राज्ञां धर्मः सनातनः ।
सत्यस्य रक्षणं चैव व्यवहारस्य चार्जवम् ॥ ५७.११
अभृतानां भवेद् भर्ता भृतानां चान्ववेक्षकः ।
नृपतिः सुमुखश्च स्यात् स्मितपूर्वाभिभाषिता ॥ ५७.१९
उपासिता च वृद्धानां जिततन्द्रीरलोलुपः ।
सतां वृत्ते स्थितमतिः सन्तो ह्याचारदर्शिनः ॥ ५७.२०
शुचिस्तु पृथिवीपालो लोकचित्तग्रहे रतः । ५७.२८
अक्रोधनोऽथाव्यसनी मृदुदण्डो जितेन्द्रियः ।
राजा भवति भूतानां विश्वास्यो हिमवानिव ॥ ५७.२९
क्षिप्रकारी जितक्रोधः सुप्रसादो महामनाः । ५७.३१
पुत्रा इव पितुर्गेहे विषये यस्य मानवाः ।
निर्भया विचरिष्यन्ति स राजा राजसत्तमः ॥ ५७.३३
यः सत्करोति ज्ञानानि नेयः पौरहिते रतः ।
सतां धर्मानुगस्त्यागी स राजा राज्यमर्हति ॥ ५७.३९
तद्राजन् राजसिंहानां नान्यो धर्मः सनातनः ।
ऋते रक्षां सुविस्पष्टां रक्षा लोकस्य धारणम् ॥ ५७.४२

अर्थशास्त्रानुसारेण

विद्याविनीतो राजा हि प्रजानां विनये रतः ।
अनन्यां पृथिवीं भुङ्क्ते सर्वभूतहिते रतः ॥ १.५.१८
षड्वर्गमुत्सृज्य जामदग्न्यो जितेन्द्रियः ।
अम्बरीषश्च नाभागो बुभुजाते चिरं महीम् ॥ १.६.१५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वृद्धसंयोगेन प्रज्ञां, चारेण चक्षुः, उत्थानेन योगक्षेमसाधनं, कार्यानुशासनेन स्वधर्मस्थापनं, विनयं विद्योपदेशेन, लोकप्रियत्वमर्थसंयोगेन हितेन राजा वृत्तिं कुर्यात् । १.७.२

अन्यत्रापि कौटिल्यस्त्रिविधान् राजगुणान् विवृणोति[1]—

आभिगामिकगुणाः—महाकुलीनः, दैवबुद्धिः, सत्त्वसम्पन्नः, वृद्धदर्शी, धार्मिकः, सत्यवाक्, विसंवादकः, कृतज्ञः, स्थूललक्षः, (उपायापायज्ञः), महोत्साहः, अदीर्घसूत्रः, शक्यसामन्तः, दृढबुद्धिः, अक्षुद्रः परिषत्कः, विनयकामश्च ।

प्रज्ञागुणाः—शुश्रूषा-श्रवण-ग्रहण-धारण-विज्ञानोहापोहतत्त्वाभिनिवेशाः ।

उत्साहगुणाः—शौर्यम्, अमर्षः, शीघ्रता, दाक्ष्यं च ।

राज्ञ आत्मसम्पदन्यैव । तद्यथा—वाग्मी, प्रगल्भः, स्मृतिमतिबलवानुदग्रः, स्ववग्रहः, कृतशिल्पव्यसनः, दण्डनायी, उपकारापकारयोर्दृष्टप्रतीकारी, ह्रीमान्, आपत्प्रकृत्योर्विनियोक्ता, दीर्घदूरदर्शी, देशकालपुरुषकार्यप्रधानः, सन्धिविक्रमत्याग-संयमपणपरच्छिद्र-विभागी, संवृतः, अदीनाभिहास्यजिह्मभ्रुकुटीक्षणः, कामक्रोधलोभस्तम्भ - चापलोपतापपैशुन्यहीनः, शकलः (मधुरभाषी), स्मितोदग्राभिभाषी, वृद्धोपदेशाचारश्च ।

विजयाय राज्ञः प्रभावो विशेषमहत्त्वगर्भित इति कौटिल्यदर्शनम् ।[3]

भारतीयराजगुणा रामस्य चरिते चरित्रे च प्रतिफलन्ति । हनुमान् वथादृष्टं रामायणे वर्णयति सुन्दरकाण्डे पञ्चत्रिंशसर्गे—

तेजसादित्यसंकाशः क्षमया पृथिवीसमः ।
बृहस्पतिसमो बुद्ध्या यशसा वासवोपमः ॥ ९
रक्षिता जीवलोकस्य स्वजनस्य च रक्षिता ।
रक्षिता स्वस्य वृत्तस्य धर्मस्य च परंतपः ॥ १०
रामो भामिनि लोकस्य चातुर्वर्ण्यस्य रक्षिता ।
मर्यादानां च लोकस्य कर्ता कारयिता च सः ॥ ११
अर्चिष्मानर्चितोऽत्यर्थं ब्रह्मचर्यव्रते स्थितः ।
साधूनामुपकारज्ञः प्रचारज्ञश्च कर्मणाम् ॥ १२
राजनीत्यां विनीतश्च ब्राह्मणानामुपासकः ।
ज्ञानवाञ्शीलसम्पन्नो विनीतश्च परंतपः ॥ १३
यजुर्वेदविनीतश्च वेदविद्भिः सुपूजितः ।

---

१. अर्थ० ६.१.३–५

२. अर्थ० ६.१.६

३. प्रभाववन्त उत्साहवतो जित्वा पृथ्वीं जिग्युः । अर्थ ९.१.९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

धनुर्वेदे च वेदे च वेदाङ्गेषु च निष्ठितः ॥ १४
सत्यधर्मरतः श्रीमान् संग्रहानुग्रहे रतः ।
देशकालविभागज्ञः सर्वलोकप्रियंवदः ॥ २१

रामायणेऽन्यत्रापि राज्ञ एतादृशा गुणा वर्णिताः सन्ति ।[1] तत्र दशरथः स्वशासनपद्धतिविशेषान् वर्णयति—

विदितं भवतामेतद् यथा मे राज्यमुत्तमम् ।
पूर्वकैर्मम राजेन्द्रैः सुतवत् प्रतिपालितम् ॥ ४
श्रेयसा योक्तुमिच्छामि सुखार्हमखिलं जगत् ॥ ५
इदं शरीरं कृत्स्नस्य लोकस्य चरता हितम् ।[2]
पाण्डुरस्यातपत्रस्यच्छायायां जरितं मया ॥ ७
परिश्रान्तोऽस्मि लोकस्य गुर्वीं धर्मधुरं वहन् । ९

अयोध्याकाण्डस्य द्वितीये सर्गे

दुष्टराजाः स्वाधिकाराच्च्यावितां इति वैदिकयुगेऽपि समभवत् ।[3] नित्यमेव प्रजाहितचिन्तको राजा देववत् सम्माननीय आसीत्, किन्तु यदि राजा विपथगामी बभूव, स धर्मशास्त्रानुसारेण स्वभावतो भ्रश्यतेस्म । स तु राक्षसो, न देवः[4] । मनुर्निर्दिशति—

मोहाद राजा स्वराष्ट्रं यः कर्षत्यनवेक्षया ।
सोऽचिराद्भ्रश्यते राज्याज्जीविताच्च सबान्धवः ।
धर्माद् विचलितं हन्ति नृपमेव सबान्धवम् ॥ ७.१११;७.२८

महाभारतं स्पष्टतरं मनुं समर्थयति । तथा हि—

अरक्षितारं हर्तारं विलोप्तारमदायकम् ।
तं स्म राजकलिं हन्युः प्रजाः संभूय निर्घृणम् ॥
अहं वो रक्षितेत्युक्त्वा यो न रक्षति भूमिपः ।
तं संहत्य निहन्तव्यः श्वेव सोन्माद आतुरः ॥ अनु० ६०.१९,२०

---

१. बालकाण्डे १.८—२०; अयोध्याकाण्डे १०० तमे सर्गे ।

२. भवभूतिरनुरोधयति राममधिकृत्योत्तररामचरिते—

स्नेहं दयां च सौख्यं च यदि वा जानकीमपि ।
आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा ॥

३. तै० सं० २.३.१ । शतपथे १२.९.३.१,३

४. यो हि धर्मपरो राजा देवांशोऽन्यश्च रक्षसाम् । शुक्रनीति १.७० । अपरं च—

गुणनीतिबलद्वेषी कुलभूतोऽप्यधार्मिकः ।
नृपो यदि भवेत्तं तु त्यजेद् राष्ट्रविनाशकम् ॥ २.२७४
कुत्सितराजानां परमविरोधका ब्राह्मणा आसन् ।
यथा शुक्रो मनुते । शुक्रनीतिसार ४.७.३३२, ३३३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

युधिष्ठिरो लोककल्याणकृतन्महाराजो बभूव । महाभारतानुसारेण स युधिष्ठिरः —

किं हितं सर्वलोकानां भवेदिति मनो दधे ।
अनुगृह्णन् प्रजाः सर्वधर्मविदां वरः ।
अविशेषेण सर्वेषां हितं चक्रे युधिष्ठिरः ॥
एवं गते ततस्तस्मिन् पितरीवाश्वंसज्जनाः ।
न तस्य विद्यते द्वेष्टा ततोऽस्याजातशत्रुता ॥ सभा० १२.६-८

स युधिष्ठिरः ८८ सहस्राणि स्नातकानामुपाजीवयत्, वृद्धाननाथान्, व्यङ्गान्, पङ्गूंश्च पुत्रवत् पालयामास च । स महाप्रसादः, ब्रह्मण्यः, सत्यवादी च सविशेषमासीत् ।[1]

मनुर्नृपस्यात्मत्यागवृत्तिं प्रवर्तयन्नाह—

तस्माद्यम इव स्वामी स्वयं हित्वा प्रियाप्रिये ।
वर्तेत याम्यया वृत्त्या जितक्रोधो जितेन्द्रियः ॥ ८.१७३
कामक्रोधौ च संयम्य योऽर्थान् धर्मेण पश्यति ।
प्रजास्तमनुवर्तन्ते समुद्रमिव सिन्धवः ॥ ८.१७५

'प्रजाभावेन राजा धार्मिको भवत्यधार्मिको वा । धार्मिकः सदाशयः प्रजासुखे नैजसुखं मनुते' इति कौटिल्यः । अर्थ० ९.४.२० स राजानमधिकृत्य चिन्त्यदुर्गुणं निदर्शयन्नाह—स्त्रीव्यसनमवश्यमेव त्याज्यम् । तस्माद् राज्ञोऽदर्शनं भवति कार्य-निर्वेदश्च । कालातिपातादनर्थधर्मलोपश्च । ततस्तन्त्रदौर्बल्यं जायते । स्त्रीव्यसनी भवत्येव पानानुषक्तः ।[2]

राजा नक्षत्रवशो न भवेत् । कर्तव्यपथसंचरणं नक्षत्रगुणान् नापेक्षते । उद्योगेन पूर्वार्जितवैभवेन च पारमार्थिकपरतरमैश्वर्यं लभ्यमिति कौटिल्यः प्रबोधयति—

नक्षत्रमतिपृच्छन्तं बालमर्थोऽतिवर्तते ।
अर्थो ह्यर्थस्य नक्षत्रं किं करिष्यन्ति तारकाः ॥ ९.४.३

राज्ञो जीवनं सात्त्विकं विधातुं मनुर्नियमयतिस्म—

पानमक्षाः स्त्रियश्चैव मृगया च यथाक्रमम् ।
एतत् कष्टतमं विद्याच्चतुष्कं कामजे गणे ॥ मनु० ७.५०

सप्तसैन्धव-राजाः

ऋग्वेदे नैके राजवंशा निर्दिष्टाः सन्ति । तेषां संस्थापका मनुपुत्रा इति

---

१. विराट प० ६५.१६–१८

२. अर्थशास्त्रे ७.३.५८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

इक्ष्वाकुः[1], प्रांशु,[2] सुद्युम्नः, शर्यातिश्चासन्। तेषु शर्यातिर्विश्रुतकीर्तिर्बभूव। स बहूनामार्येतरराजानां पराभवेन स्वनाम सार्थकं चकार। सुद्युम्नस्य पुत्रः पुरूरवा महान् विजेता लोकप्रियश्चासीत्। तस्य प्रपौत्रो ययातिर्यमुनां यावद्राज्यसीमां समवर्धयत्। सरस्वतीमनु तस्य राज्यविषये ऋग्वेदेऽधोविधा कीर्तिगाथा प्रचलितासीत्—

एका चेतत् सरस्वती नदीना शुचिर्यती गिरिभ्य आसमुद्रात्।
रायश्चेतन्तो भुवनस्य भूरेर्घृतं पयो दुदुहे नाहुषाय। ७.९५.२

अर्थात् तस्य राज्ये घृतं दुग्धं च भूयिष्ठं प्राभवत्।

ययाते राजवंशकारका पञ्चपुत्रा ऋग्वेदे प्रथिताः सन्ति—यदुः, तुर्वशः द्रुह्युः, अनुः, पुरुश्च। ते सप्तसिन्धु-प्रदेशे पञ्चराज्यानि शशासुः। तत्र सरस्वतीमनु पुरो राज्यं प्रसिद्धतमम्। प्रायः पञ्चशतवर्षानन्तरं सप्तसिन्धु-प्रदेशे प्रांशुवंशे मरुत्तः तदनन्तरम्—

इक्ष्वाकुवंशे मान्धाता च विजयश्रिया समलङ्कृतौ। मरुत्तः स्वयज्ञैरति-ख्यातिं लेभे।

पुरुवंशीयो दुष्यन्तपुत्रो भरतो वैदिकभारतस्यानुत्तमः सम्राड् बभूव। स्वदिग्विजय-पराक्रमेण स गङ्गा-यमुना-सरस्वत्यादिनदीनां तटेष्वनुपमयज्ञान-कल्पिष्ट। तस्य नाम्नाप्यस्माकं देशो भारतमिति ख्यातिं लेभे।

परवर्तियुगे पुरूणां तृत्सुशाखाया उन्नायको दिवोदासो महान् सम्राड् बभूव। स दश राज्ञः पराभूय सरस्वतीतः काशीं यावद्राज्यं विस्तारयामास। स तु शम्बरनामकं दासं पराभूय महतीमार्यश्रियं प्रतिष्ठापयामास। तस्य पौत्रः सुदा दासानां संघं विदारयामास।

आयोध्यका इक्ष्वाकुवंशीया राजानः क्रमशस्त्र्यरुणः, त्रिशङ्कुः, हरिश्चन्द्रश्च प्रसिद्धिं लेभिरे। हरिश्चन्द्रोऽयं सत्यसन्धो महावदान्यश्च भूयिष्ठं शाश्वतं राजते।

उद्दण्डा अपि राजानो वैदिकयुगे बभूवुः। तेषु सप्तसैन्धवो हैहय-वंशीयोऽर्जुनः सहस्रबाहुः परमतां लेभे। स जमदग्निना ऋषिणा कृतवैरः तस्य पुत्रेण परशुरामेण पञ्चत्वं प्रापितः।

कतिपयभारतीयराजवंशा वैदिकयुगे दिग्विजय-प्रसक्त्या भारताद्बहिः सुदूरं विजयपताकमुच्छ्रपयामासुः। द्रुह्युवंशीया राजान एशिया-माइनरं यावत् विजितवन्तः।

---

१. इक्ष्वाकुवंशीयाः परवर्तिनो मान्धाता, रघुः, दशरथः, रामचन्द्र इत्यादयः सन्ति।

२. वैदिकयुगे मरुत्तः प्रांशुवंशीयो महराजो बभूव। स सप्तसिन्धुप्रदेशं विजित्य तत्र चिरं शशास।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

रामायणयुगे रामो महाभारतयुगे युधिष्ठिरश्च भारतीयराजत्वस्यादर्शं शाश्वतीकुर्वन्ति। महाभारतानुसारेण स्थिति-विपर्यासाद् राज्ञः पञ्चरूपाणि भवन्ति। तथा हि—

कुरुते पञ्चरूपाणि कालयुक्तानि यः सदा।
भवत्यग्निस्तथादित्यो मृत्युर्वैश्रवणोपमः॥ शान्ति ६८.४१

तत्र सप्तदिवसावधिकं शेषजीवनं विज्ञायापि मरणक्षणं यावत् परीक्षितो दैनन्दिनराजकार्येषु व्यापृतो बभूव।[1]

इक्ष्वाकुवंशीयः पुरुकुत्सः तस्य पुत्रः त्रसदस्युश्च ख्यातश्रवसौ बभूवतुः।[2] ऋग्वेदे उभौ प्रायश्चर्चितौ। त्रसदस्युर्दस्यूनां भयकारको बभूव। तस्य समकालिकः सुदा इति नामकः प्रतापशाली राजासीत्। सोऽयं त्रसदस्युः नैकराजैर्वर्गीकृतः महायाजक इति स्मृतः।[3]

अन्तर्वेदीया राजानः

सुहोत्रस्य पुत्रो भरतवंशीयो जह्नुर्गङ्गां-यावद् राज्यं विस्तारयामास। तस्य नाम्ना गङ्गा जाह्नवीति कृताभिधा। स कान्यकुब्जं प्रदेशं शशास। तस्य भ्राता काशः काशीराज्यं स्थापयामास। तस्य नाम्ना काशीनगरी ख्याता।

परवर्तियुगे कालान्तरे यदानुवंशीयो महावदान्यः शिबिः सप्तसिन्धुप्रदेशे राजासीत् तदाकान्यकुब्जे कुशिकः काश्यां च प्रतर्दनो राजानौ बभूवतुः। कुशिकस्य पौत्रो विश्वामित्रो राज्यं परित्यज्य ऋषित्वकामस्तपस्वी बभूव। अस्मिन् युगे काशिराजोऽलर्क आक्रमणकारिणो राक्षसान् विजित्य पराङ्-मुखानकरोत्। एतद्राजद्वयं क्रमशः कान्यकुब्जस्य काश्याश्च गौरवं वर्धयामास।

पूर्वोक्ताः प्रसिद्धराजाः स्वकृतिभिः प्रजापालननैपुण्येन च भारतीय-प्राचीनसाहित्ये कृतप्रतिष्ठाः सन्ति। तेषां जीवनावधिः कालक्रमेणानाक्रान्त इवानिर्णीतः। प्रथमो महानैतिहासिको राजा बिम्बसारः ५२२-४९४ ई० पू० संवत्सरान्तराले मगधप्रदेशे राजगृहे कृतराजधानीकः शशासेति पुराविद्भि-र्निर्णीतम्। प्रायः समग्रोत्तरभारते तस्य प्रभावः प्रेक्ष्यते। गान्धार-राजेन

---

१. आदिप० ३९.३०

२. ऋग्वेदे ५.३३.८; ७.१९.३इत्यादि

3. Trasadasyu Paurukutsa appears in several Brahmaṇas a famous sacrificer of ancient times together with some anciens great kings, (पूर्वे महाराजाः; जैमिनीय उपनिषद् ब्राह्मण २.६.११ Vedic Index Trasadasyu.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सह तस्य राजनयिकसम्बन्धः प्रस्फुरितः । तस्य शासनसूत्रं मन्त्रित्रयेण प्रपञ्चितमासीत् । विदुषां समाश्रयो बिम्बसारस्तेषां समायोगेन विद्यालतां सुविपुलं प्रसारयामास । महात्मा गौतमबुद्धो महावीरस्वामी च तेन सम्पृक्तौ तस्य शासनकाले भारतं सांस्कृतिकदृष्टया समुन्नेतुं भूयिष्ठं प्रायतताम् । तस्य राजसभा प्रख्यातेनायुर्वेदाचार्येण जीवकेन समलङ्कृतासीत् । स तं राजवैद्यम-परेषां दूरस्थरोगिणां चिकित्सार्थं सुदूरमपि प्राहिणोत् ।

बिम्बसारस्य पुत्रोऽजातशत्रुः (४९४-४६९ ई० पू०) परं योधनशीलो महान् विजेता च बभूव । बौद्ध-जैनधर्मौ प्रति तस्य समादर आसीत् । स बुद्धावशेषस्यैकभागं गृहीत्वा तस्योपरि स्तूपं कारयामास । बुद्धस्य महापरि-निर्वाणानन्तरं स महाकश्यपस्य सभापतित्वे बौद्धप्रथमसंगीतिं व्यवस्थापया-मास । अजातशत्रुर्बुद्धोपदेशेन स्वचारित्र्यं शोधितवान् ।

बौद्धसाहित्ये राजकुमाराणामन्यैः साधारणच्छात्रैः सह सुदूरस्थेषु विद्या-केन्द्रेष्वध्ययनस्योल्लेखा वर्तन्ते । मल्ल-लिच्छवि-कोसलादीनां राज्यानां राजकुमारास्तक्षशिलायां सहाध्ययिनो बभूवुः ।[1]

मौर्यवंशीयश्चन्द्रगुप्तो (३१७-२९३ ई० पू०) भारतीयैतिहासिकसम्राट्सु सर्वप्रथमस्थानीयो विश्वविश्रुतो राजते । तस्यैश्वर्याकांक्षा भूयिष्ठा प्रबभूव । स्वयमेव स तदानीन्तन-वैदेशिकान् भारतीयांश्च प्रचण्डानपि राज्ञः पराभूया-त्माधीनं विशालं साम्राज्यं निर्मापयामास । भारताद् बहिः पारसीकदेशा-न्मगधं यावत् एरिया-(हिरात)-गान्धार-काबुल-विलोचिस्तान-प्रदेशाः समग्र-मुत्तरभारतं च तस्याधीनं बभूव ।[2] दक्षिणभारतेऽपि तमिलकलिंगान्ध्र-प्रदेशान् विहाय शेषभूभागास्तेन विजिताः ।

प्रो० भार्गवश्चन्द्रगुप्तस्य चारित्रिकविशेषान् राजकर्मसौष्ठवं च निरूप-यति—'अपनी अपूर्व प्रतिभा और चाणक्य जैसे कुशल राजनीतिज्ञकी सहायता से उसने कई दिशाओं में अद्भुत सफलता प्राप्त की । उसमें अटल संकल्प, अदम्य साहस, अपूर्व युद्ध कौशल और अनुपम संगठन-शक्ति का असाधारण सम्मिश्रण था । उसने अपने देशवासियों को विदेशियों के पञ्जे से छुड़ाया और महान् साम्राज्य का निर्माण किया । उसने उत्तम शासन से प्रजा को शान्ति और समृद्धि प्रदान की ।[3]

भारतीयराजत्वस्य सात्त्विकता प्रथमवारमैतिहासिकराजेषु महाराजा-शोके शिखरायते ।

---

1. Hindu Civilization p. 200
२. भार्गव —प्राचीन भारत पृ० १७८-१७९
३. भार्गव—प्राचीन भारत पृ० १८६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अशोकः न केवलं मानुषाणामपितु पशुपक्षिणामपि सुखमयजीवनस्याकांक्षां मनसि शाश्वतं सन्धार्यानुपमोऽयं सम्राडशोको (२६८-२३२ ई० पू०) केवलं तत्कालीनं भारतमपितु विश्वमपि दयादाक्षिण्योपदेश-परमार्थनिर्देशनेन प्रकाशयांचक्रे। न केवलं शिलालेखेन धर्माधिकारिणामुद्योगेन च स लोकान् प्रबोधयामासापितु स्वस्य माहात्म्येनानवरत-प्रजाकार्यनुसन्धानेनोद्योगेन च विश्वमानवतां शमयितुं स भृशमुपचक्रमे। तस्य गुणास्तस्य वचनैर्यथायोग्यं प्रमातुं शक्यन्ते। तथा हि —

(१) इह न कश्चिज्जीव आलभ्यः प्रहोतव्यः। चतुर्थशिलालेखात्।

(२) द्वे चिकित्से कृते —मनुष्य-चिकित्सा, पशु-चिकित्सा च। औषधानि मनुष्योपगानि च पशूपयोगानि च यत्र-यत्र न सन्ति सर्वत्र हारितानि च रोपितानि च। मार्गेषु वृक्षाः रोपिता उदपानानि च खानितानि प्रतिभोगाय पशुमनुष्याणाम्। द्वितीयशिलालेखात्

(३) साधुः मातापित्रोः शुश्रूषा। मित्रसंस्तुतज्ञातीनां च ब्राह्मण-श्रमणानां च साधु दानम्। प्राणानामनालम्भः साधुः। अल्पव्ययता अल्पभाण्डता साधुः। तृतीयःशिलालेखात्

(४) अनालम्भः प्राणानामविहिंसा भूतानां, ज्ञातिषु सम्प्रतिपत्तिः, ब्राह्मणश्रमणानां संप्रतिपत्तिः, मातापित्रोः शुश्रूषा। एतच्चान्यच्च बहुविधं धर्मचरणं वर्धितम्। चतुर्थशिलालेखात्

(५) सर्वकाल अदतो मेऽवरोधने, गर्भागारे, वर्चसि, विनीते, उद्याने सर्वत्र प्रतिवेदकाः स्थिता अर्थं जनस्य प्रतिवेदयन्तु मे। सर्वत्र जनस्यार्थं करिष्यामि। नास्ति हि मे तोष उत्थानेऽर्थसन्तरणाय। कर्तव्यं हि मे सर्वलोक-हितम्। नास्ति हि कर्मान्तिरं लोकहितात्। यच्च किंचित् पराक्रमेऽहं किमिति भूतानामानृण्यमियाम्। मे पुत्रदारं पौत्राः प्रपौत्राः च पराक्रमन्तां सर्वलोकहिताय। षष्ठशिलालेखात्

(६) देवानां प्रियः प्रियदर्शी राजा सर्वान् पाषण्डान्[1] प्रव्रजितान्, गृहस्थान् वा पूजयति दानेन विविधया च पूजया। सारवृद्धिः स्यात् सर्व-पाषण्डानाम्। समवाय एव साधुः। सर्वे पाषण्डा बहुश्रुताश्च कल्याणागमाश्च भवेयुः। द्वादशशिलालेखात्

(७) इच्छति हि देवानां प्रियः सर्वभूतानामक्षतिं, संयमं समचर्यां मार्दवम्। एष च मुख्यतमो विजयो देवानां प्रियस्य यो धर्मविजयः यश्च

१. धार्मिकसम्प्रदायान्।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

लब्ध एतावता भवति सर्वत्र विजयः प्रीतिरसः सः। सर्वा च निरतिर्भवतु या श्रमरतिः। त्रयोदशशिलालेखात्

(८) सर्वे मनुष्याः प्रजा मम। यथा प्रजायै तथा मनुष्येष्वपि इच्छामि अहम्। एतस्य सर्वस्य मूलं श्रमः, त्वरा च नित्यम्। एवं कुर्वन्त उद्गच्छत। संचरितव्यम्। व्रजितव्यम्। एतव्यम् वा नगरजनस्याकस्मात् परिबाधा वाकस्मात् परिक्लेशो वा न स्यात्।

एतस्मै चार्थायाहं धर्मतः पञ्चसु पञ्चसु वर्षेषु निष्क्रमयिष्यामि (कर्मचारिणः)। प्रथमकलिङ्गशिलालेखात्।

(९) यथा पिता एवं नो राजा। यथात्मानमनुकम्पते, एवमस्मासु अनुकम्पते। यथा प्रजा एवं वयं राज्ञः।[1] द्वितीयकलिंगलेखात्

(१०) एष हि विधिः येयं धर्मेण पालना, धर्मेण विधानं धर्मेण सौख्यम्। धर्मेण गुप्तिः। प्रथमस्तम्भलेखात्

(११) कियांस्तु धर्म इति ? अपास्रवः[2] बहुकल्याणं, दया, दानं शौचम्। द्वितीयस्तम्भलेखात्

(१२) यथा हि प्रजां विदितायै धात्र्यै निसृज्य स्वस्थो भवति "विदिता धात्री चेष्टते मे प्रजायै सुखं परिदातुमिति"। एवं मम रज्जुकाः कृता जानपदस्य हितसुखाय।

(१३) षड्विंशति-वर्षाभिषिक्तेन मया पञ्चविंशतिः बन्धनमोक्षाः कृताः। पञ्चमस्तम्भलेखात्

(१४) केन खलु जनेऽनुरूपा धर्मवृद्धिः वर्धनीया ? राजा एवमाह—

धर्मश्रवणानि श्रावयामि। धर्मानुशिष्टीः अनुशास्मि। मार्गेषु मया न्यग्रोधा रोपिताः छायोपगा भविष्यन्ति पशुमनुष्याणाम्। आम्रवाटिका रोपिता। आर्धक्रोशकीयानि मया उदपानानि खानितानि। निषद्याश्च कारिताः। आपानानि मया ··· ··· ··· ··· प्रतिभोगाय पशुमनुष्याणाम्[3]। विविधैर्हि सुखैः पूर्वैरपि राजभिः मया च सुखितः लोकः।

राजा एवमाह—यानि हि कानिचिन्मया साधूनि कृतानि तानि लोकोऽनुप्रतिपन्नस्तानि चानुविदधाति।

---

१. महाभारते समर्थितमेतत्—
पिता हि राजा लोकस्य प्रजानां योऽनुकम्पितः॥ शान्ति० १०३.१०५
रामायणेऽपि राजा पितृवत् परिपालयेदिति निगदितम्। अयोध्याकाण्डे २.३९

२. अपास्रवः—पापान्निवृत्तिः

३. ऋग्वेदानुसारेण राजा पशूनामपि पालको भवति। १.१२.१५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रो० भार्गवोऽशोकस्यौदात्त्यं निदर्शयति—

यथार्थ में अशोक ने युद्ध में होने वाली जनधन की हानि को बचाकर अपनी शक्ति का लोकोपकार के कार्यों में प्रशंसनीय उपयोग किया।[1] काणे महोदयस्तस्य कार्याणि परिगणयति—Constructed wells on roads and planted mango and banyan trees established hospitals for men and beasts inscribed on stones virtues he most prized.[2]

खालवेलः खीष्टपूर्वप्रथमशताब्दे कलिङ्गदेशे खारवेल इति प्रख्यातविजेता सम्राड् बभूव। न केवलं सैन्यबलेन प्रायः समग्रभारतविजयेन चापितु लोकरञ्जनलोकहित-साधुसमाश्रयादिकार्यवैपुल्येन स समकालिक-राजमण्डलमतिशिश्ये। शैशवे तेन गणित-व्यवहार-संगीत-शिल्पादीनि सम्यग-भ्यस्य प्रजानामाध्यात्मिकाधिभौतिकदिशि प्रगमनाय महदचेष्टत। जैन-धर्मानुयायी खारवेलोऽन्यसम्प्रदायानपि समवर्धयत।

कनिष्कः खीष्टाब्दस्य प्रारम्भिकयुगे वैदेशिकोऽपि भारतीयः संजातो महान् सम्राट् कनिष्कः कश्मीर-सिन्धु-प्रदेशं यावदुत्तरभारतं भारताद् बहिश्च अफगानिस्तान-विलोचिस्तान - बैक्ट्रिया - काशगर - खोतान-यारकन्दं यावत् विजय-प्रकरणेन साम्राज्यं विस्तारयामास। पराक्रम-कलाप्रवृत्ति-धर्मप्रचारनगर-स्तूप-विहारनिर्माणादिसुकृतिभिः स तत्कालीन भारतमलंकार-यामास। तस्य राजसभामलङ्कुर्वाणाः पार्श्व-वसुमित्राश्वघोषादयो महा-पण्डिताः, नागार्जुन-संघरक्षादयो बौद्धाचार्याः, वैद्यराजश्चरकः, माठरश्च राजनीतिज्ञस्तस्य विद्वज्जनाराधनं तेषां साह्येन प्रजाभ्युदयतत्परतां च निगमयन्ति। कनिष्को बौद्धधर्मानुयायी सन्नपि तत्कालीनसर्वधर्माणामभ्यु-दयाय प्रावर्तत।

यज्ञश्रीः आन्ध्रप्रदेशे सातवाहनवंशीयो यज्ञश्रीः शातकर्णिः (१७५-२०४ ई०) सम्राट् प्रबभूव। वंशेऽस्मिन् नैकशतवर्षावधौ महाप्रतापशालिनो राजानः प्रावर्तन्त। यज्ञश्रियो राज्यविस्तारः पूर्वापरसमुद्रौ यगाहा बृहद् बभूव। तस्य मुद्रासु मत्स्य-शंखकूपकाश्चाङ्किताः। तैर्ज्ञायते यत् यज्ञश्रियः सामुद्रिकपराक्रमा व्यापारावश्च समृद्धा बभूवुः।

---

१. प्राचीन भारत का इतिहास पृष्ठ २०९

२. History of Dharmaśastra Voly II P. 1285.

३. कुषाणराजानां पूर्वजाः चीनदेशस्य कानसू-जनपदस्व मूलनिवासिन आसन्। बहुशाखास्ते कुषाणनामधारिणो भारते सुप्रतिष्ठिता बभूवुः।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

समुद्रगुप्तः तृतीयखीष्टाब्दानन्तरं वैदिकराजत्व[1]परम्परानुगामिनो गुप्तवंशस्य प्रतिष्ठा पाटलिपुत्रे समजायत। वंशेऽस्मिन्नपूर्वख्यातिप्रपन्नः समुद्रगुप्तः प्रबभूव। तस्य दिग्विजय-वर्णनं गङ्गा-यमुना-संगमेऽशोकस्य धर्मविजय-लेखाङ्कित-स्तम्भस्य शेषभाग उत्कीर्णम्।

समुद्रगुप्तो न केवलं भारतस्य नरपतीन् जयेन वा नयेन वा वशीकृतवान-पितु श्रीलङ्कं मलयद्वीपं च यावत् तस्य प्रभुता महनीयतां प्रपन्ना। स पराक्रमप्रियो यज्ञाधिष्ठाता महाकविर्देवानुग्रहकांक्षश्च बभूव।[2] हरिषेणस्तं विशेषयति—निशित-विदग्धमतिगान्धर्वललितैर्व्रीडितत्रिदशपतिगुरुतुम्बरु-नारदादेर्विद्वज्जनोपजीव्यानेककाव्यक्रियाभिः प्रतिष्ठितकविराजशब्दस्य।[3]

वैदेशिकसमीक्षकाः समुद्रगुप्तस्य गुणवत्तां प्रवदन्ति।[4] तद्यथा कीथः—

That such princes should favour poetry and fine arts was inevitable. Samudragupta was proud of his skill with lute, and a coin depicts him playing that instrument. Harisena (300 A. D.) assures us that his patron had a poetic style which was worth study and wrote poems which increased the poets spiritual treasure and again that his title of king of poets, kaviraja, was well grounded through his composition of many poems deserving imitation by others. He delighted also in the society of the learned students of literature, was interested in the explanation and defence of holy scripture, and devoted to music.

A Hist. of Sanskrit lit. p. 76.

परवर्तियुगेऽपि बहवो राजानः काव्यविधाने परं निष्णाताः प्रादुरभवन्। तथाहि—

ग्रन्थः	रचयिता राजा
सेतुबन्धं प्राकृतमहाकाव्यम्	प्रवरसेनः
नागानन्दादिनाटकत्रयम्	हर्षवर्धनः

१. समुद्रगुप्तस्य विशेषस्तस्य वंशानुगैश्चिरोत्सन्नाश्वमेधाहर्ता' इति वर्णितः।

२. अभिलेखेषु स पराक्रमाङ्कः, अप्रतिरथः, अश्वमेधपराक्रमः, व्याघ्रपराक्रमः, कृतान्तपरशुः, सर्वराजोच्छेत्तादिभिरुपाधिभिः प्रशंसितः।

3. Fleet : Gupta Inscription No. 12.

४. विन्सेण्टस्मिथः समुद्रगुप्तस्य गुणोपलब्धि भूयश एवमेव प्रशंसति। The Oxford Hist. of India p. 167

मृच्छकटिकं नाटकम्	शूद्रकः
मत्तविलास-प्रहसनम्	महेन्द्रविक्रमवर्मा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

रामाभ्युदय-नाटकम्	यशोवर्मा
उदात्तराघवम्	मायुराजः
शृङ्गारप्रकाशादिग्रन्थत्रिंशत्कम्	भोजः
हरकेलिनाटकम्	विक्रमराजदेवः
कविराजमार्गः	अमोघवर्ष
मानसोल्लासः	सोमेश्वरः

चन्द्रगुप्तो विक्रमादित्यः गुप्तवंशीयः सम्राट्सु चन्द्रगुप्तो विक्रमादित्यः (३८०-४१५ ई०) प्रशस्यतमं विभाति । कालिदासादिविद्वद्वर्याणां पुरस्कर्ता विविधायोजनैर्भारतमुन्नमयन्नयं सम्राट् विक्रमाङ्कः, सिंहविक्रमः, नरेन्द्रचन्द्रः, सिंहचन्द्रः, नरेन्द्रसिंह इत्यादिभिरुपाधिभिः समलङ्कृतो बभूव ।[1] विंसेण्टस्मिथ-महोदयः समर्थयति—

The ascertained facts of his career prove that he was a strong and vigorous ruler, well qualified to govern and augment an extensive empire. He loved sounding titles which proclaimed his martial powers and was fond of depicting himself on his coins as engaged in the sport of kings, personal combat with a lion.

The Oxford Hist. of India p. 169

प्रवरसेनः वाकाटकवंशीयः प्रवरसेन द्वितीयः (४१० ई०—) सेतुबन्धनामक-महाकाव्यं महाराष्ट्रीप्राकृतेनारचयत् । बाणो हर्षचरिते प्रवरसेनं प्रशंसति—

कीर्तिः प्रवरसेनस्य प्रयाता कुमुदोज्ज्वला ।
सागरस्य परंपारं कपिसेनेव सेतुना ॥

हर्षवर्धनः प्राचीनभारतस्यान्तिमः सम्राट् हर्षः (६०६–६४६ ई०) नैकविध-प्रपन्नोपलब्धिः प्रजोन्नयनेनाप्रतिमो विभाति । दिग्विजयेन स उत्तर-

---

१. प्रो० भार्गवोऽनुसन्दधाति—चन्द्रगुप्त द्वितीय महान् पिता का महान् पुत्र था। उसका शासनकाल भारतीय इतिहास के सर्वश्रेष्ठ युगों में है। उसने अपने बाहुबल से विदेशी शकों का उन्मूलन करके गुप्त-साम्राज्य का विस्तार पश्चिमी समुद्र से पूर्वी समुद्र तक फैला दिया। उसके सुव्यवस्थित और सभ्य शासन की विदेशी यात्री फाह्यान ने भी भूरि-भूरि प्रशंसा की है। उसके समय में देश वैभव, विद्या और कला से सम्पन्न हो गया। वह पक्का वैष्णव होते हुए भी अन्य धर्मों के प्रति सहिष्णु था।

प्राचीन भारत का इतिहास पृ० ३०२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भारतं स्वक्षत्राधीनं कृतवान्, नाटकत्रयं विरच्य साहित्यविद्याधीतिनां पथ-प्रदर्शनं कृतवान्, बाणभट्टह्वेनसाङ्गादिमहापण्डितान् संगृह्यात्मानं प्रजाजनं च नित्यं प्रबोधितवांश्च । विसेण्ट स्मिथस्तं विशेषयति—

King Harsh, who was in camp in Bengal when he first met the Master organised in his honour a splendid assembly at Kanauj the capital which was attended by twenty tributary Rajas. After the close of the proceedings at Kanauj, Harsha carried his honoured guest with him to Prayaga (Allahabad), where another crowded assembly was held and royal treasures were distributed to thousands of the holy men of all the Indian religions Brahmanical, Jain and Buddhist. On the first day the image of the Buddha received honours of the highest class, the effigies of the Sun and Śiva being worshipped respectively on the second and third day.[1]

प्रो० वेणीप्रसादस्तत्कालीनलेखानुपजीव्य हर्षं विशेषयति—

'उसने राज्य की सभी बड़ी सड़कों पर औषधालय बनवाकर वैद्य नियुक्त किये और यात्रियों तथा दीन-हीन व्यक्तियों को निःशुल्क भोजन, वस्त्र तथा औषधि देने की व्यवस्था की'[2] ।

प्रो० पुरुषोत्तम लाल भार्गवो निदर्शयति—

'हर्ष ने कश्मीर से बुद्ध का दाँत बलपूर्वक स्वायत्त करके कन्नौज के संघाराममें सुरक्षित किया । वह बौद्ध भिक्षुओं और ब्राह्मणों को समान रूप से दान देता था ।'[3]

हर्षचरिते महाकविर्बाणस्तं विशेषयति—

'सर्वविद्यासंगीतकगृहमिव सरस्वत्याः कन्यान्तःपुरमिव कलानाम् ।'

हर्षवर्धनो मधुवनताम्रपत्रे स्वविशेषं निदर्शयति —मनसा वाचा कर्तव्यं प्राणिभिर्हितम् ।

ह्वेनसांगस्य लेखमनुसृत्य रायचौधरी निदर्शयति—It appears from the records of the Chinese pilgrim that Harsha showed a strong

---

१. The Oxford History of India p. 183. अत्र मासं यावत् दरिद्रा-नाथाश्च दानैः परितोषिताः ।

२. हिन्दुस्तान की पुरानी सभ्यता पृ० ३७४, ३७५ ।

३. प्राचीन भारत का इतिहास पृ० ३४५ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

predilection for Buddhism, though he does not seem to have discarded altogether the Śaivism of his earlier years. He caused the use of animal food to cease throughout his dominions and prohibited the taking of life. He built rest-houses and monasteries and practised charity on an extensive secales.

An Advanced History of India. Pt I p.159.

चीनाधिपेन सह हर्षस्य दौत्यसम्बन्धः प्रावर्तत। तस्य समकालीनस्य दक्षिणापथनृपतेः पुलकेशिद्वितीयस्य पारसीकराजस्य खुसरुद्वितीयेन सह मैत्र्यं समवर्तत। तयोर्दौत्यसम्बन्धस्य परिचयोऽजन्ताचित्रैरपि ज्ञायते। स महामानवः प्रबभूव।[1] प्रजाकार्य-सम्पादने सोऽविश्रान्त आसीत्।

महेन्द्रवर्मा प्रथमः

दक्षिणापथे हर्षस्यापरः समकालीनः काञ्ची-राजधानीकः पल्लवराजवंशावतंसो महेन्द्रवर्मेति विख्यातो विजेता, कला-संग्राहको महाराजः प्रादुरभवत्। तेन निर्मितानि मन्दिराणि कालंजयानि अधुनापि तिरुचिरपल्लीवल्लभ-महेन्द्रवाडी-स्थानेषु राजन्ते। तस्य मन्दिर-निर्माणरुचिनिदर्शक उपाधिर्वैचित्र्योपपन्नकलापाटवेन विचित्रचित्त इति लोके विश्रुतोऽभवत्।

महेन्द्रवर्मा मनोरञ्जनकलासु पाटवं लेभे। स गीत-नृत्य-नाट्येषु स्वयं निष्णातस्तानि वर्धयामास। तस्य मत्तविलास--प्रहसनंमनुपमाद्या च कृतिः संस्कृतसाहित्यस्य हास्यप्रवणतां परिचाययति। वंशेऽस्मिन्नष्टमशताब्दस्य प्रथमचरणे नरसिंहवर्मा द्वितीथो विद्याकला - वर्धनैकरुचिः काञ्च्यां कैलाशनाथ-मन्दिरमैरावतेश्वर-मन्दिरं महाबलिपुरान्तिके समुद्रतटे गङ्गा-वतरणमन्दिरं च निर्ममे। चीनदेशेन सह तस्य दौत्यसम्बन्धो बभूव।

कर्णाटके गङ्गवंशीयो दुर्विनीतो नामको राजा षष्ठशताब्दे पराक्रमेण सहाननन्यपाण्डित्येन शुशुभे। विदुषां कवीनां च स समाश्रयः प्रसिद्ध आसीत्। स व्याकरण-साहित्यादिनैकविषयाणां पारङ्गतो ग्रन्थान् रचयामास।

---

१. प्रो० भार्गवः समर्थयति—चालुक्यवंशीय पुलकेशी द्वितीय भारतीय इतिहास के महान नरेशों में सर्वथा गिने जाने योग्य हैं। ह्वेनसांग के अनुसार उसकी योजनाओं का क्षेत्र सुविस्तृत था और उसके हितकारी कार्यों का दूर-दूर तक प्रभाव था। वह सब धर्मों का संरक्षण करता था। उसने भारत में ही नहीं, विदेशों में भी सम्बन्ध करके अपनी कीर्ति फैलाई। प्राचीन भारत का इतिहास पृ० ३५०।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

काश्मीरका राजानः

कश्मीरे चन्द्रापीडवत् प्रशस्याचरणाः, तारापीडवद्हीनाचरणा जयापीडवत् प्रारम्भे उत्तमाचरणाः किन्तु अन्ते नृशंसा इति त्रिविधा राजानः स्वकोटेरुदाहरणं प्रस्तुवन्ति । तथाहि

चित्रं द्विपाः पूतमूर्तयः कीर्तिनिर्झरैः ।
भवन्ति व्यसनासक्तिपांशुस्नानमलीमसाः ।। राजत० ५.१६३

ललितादित्यः कश्मीरस्यानुत्तमो महाराजो ललितादित्योऽष्टमशताब्दस्य प्रथमचरणे शासनसूत्रं धारयामास । स त्रिविष्टपान् पराजयामास, चीनसम्राजा दौत्यसम्बन्धं चकार, कान्यकुब्जेश्वरं यशोवर्माणमरीभूतं पराभवत्, दिग्विजय-विधानेनाखिलभारतं स्वक्षत्राधीनं विनयतिस्म च। विजयानन्तरं स स्वराज्यं भवन-मठ-मन्दिरादिभिः शोभयामास । अद्यापि तेन निर्मितं मार्तण्ड-मन्दिरं राजते ।

विनयादित्यः ललितादित्य-पौत्रो विनयादित्यः कवीनां समाश्रयो बभूव । उद्भटो वामनो दामोदरगुप्त इत्यादयो मनीषिणस्तस्य राजसभां समलंचक्रुः ।

अवन्तिवर्मा अवन्तिवर्मा ८५५ खीष्टाब्दे कश्मीराधिपत्यं जग्राह । तस्य मन्त्री सूय्यः स्वीयविज्ञानाधिकारेण तत्रत्यजलौघनिस्तारणं संचार्य कृशीभूतां कृषिं शस्यशालिनीं प्राकरोत् । तस्य राजसभामानन्दवर्धन-रत्नाकरादिविद्वद्वर्यैः साधु समलङ्कृतासीत् ।

कल्हणस्य लेखिनी राज्ञांश्चरित्रस्य चित्रणे नितरां पट्वी दृश्यते । स वर्णयति—

(१) महाराज उच्चलः प्रतिदिनं प्रातःकालादारभ्य सायं पर्यन्तं प्रजास्थितिमवेक्षितुमभ्रमत् । अपह्नुतः सोऽश्वपृष्ठे भ्रमन्नपश्यद्यतु कथं नाम प्रजाः सम्यक् परिपालनीयाः । राजत० ८.४५.५०, ५५

(२) यदा कश्मीरदेशोऽकालग्रस्तो बभूव तदातुज्जीनः सपत्नीको निजैः कोशैः संचयैर्मन्त्रिणामपि । क्रीतान्नो दिवारात्रं प्राणिनः समजीवयत् ।।" २.२२८

(३) शङ्करवर्णणः पिता तं वनमार्गेषु नग्नपादमचारयद्येन स विजानीयात्-कथं नाम सेवकाः प्रेष्यकर्मणि व्यापन्ना भवन्ति । राजत० ५.१९५-२००

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(४) तत्रासीन्महाराजो जयापीडो[1] व्याकरणाधीती क्षीरस्वामिनः, यो विद्वद्भिः शास्त्रचर्चां विदधानः पाण्डित्यमेव परमेऽचं मेने। राजत० ४.४९०

(५) रणादित्य आरोग्यशालां कारयामास। राजत० ३.४६१

(६) महाराजो हर्षः पम्पानामकं महासरोवरं कारयामास।[2] राजत० ७.९४०

(७) कल्हणस्य समकालिको जयसिंहः प्रतापार्णवो बभूव। तस्य विषये राजतरङ्गिणी सूचयति—

गुणाँल्लोकोत्तराञ्शृण्वन्नस्यानुभवगोचरान्।
भविता पूर्वभूपालकृत्ये सप्रत्ययो जनः॥ ८.१५५७

मध्यभारतीया राजानः

यशोवर्मा

मध्यप्रदेशस्य बुन्देलखण्डभूभागे दशमख्रीष्टशताब्दे चन्देलवंशीयानां राज्ञां प्रतिष्ठापदं खर्जूरवाहक (खजुराहो) इत्याख्यं नगरं बभूव। तत्र यशोवर्मा प्रथमो महान् विजेतासीत्। परमवैष्णवो महाराजाधिराज-पदवीको यशोवर्मा तत्र स्वनिर्मिते मन्दिरे विष्णुमूर्तिं प्रत्यस्थापयत् दीर्घायामं सरोवरं च कारथामास।

धङ्गः

यशोवर्मणः पुत्रो धङ्गः ९५४ ख्रीष्टाब्दे लब्धश्रीकः प्रायः पञ्चाशत-वर्षाणि विजययात्रां सम्पादितवान्। कालञ्जरकृतराजधानीकः स सुबुक्तगीनस्यावरोधकानां राज्ञां सङ्घे सम्मिलितो बभूव। तस्याश्रयेण कलासाहित्यादीनामुन्नतिः समजायत। स नैकमन्दिराणां निर्माता बभूव।

वाक्पतिः मुञ्जः

परमारवंशीयो धाराधिपो मुञ्जो माहाराज्याधिष्ठाता ९७३ ख्रीष्टाब्दे शासनसूत्रं जग्राह। निरन्तरं स युद्धपरम्परया

---

१. उत्पत्तिभूमौ देशेऽस्मिन् दूरदूरतिरोहिता।
कश्यपेन वितस्तेव तेन विद्यावतारिता॥ राजत० ४.४८६
वचो मूर्खोऽयमित्येव कस्मैचिद्वदते स्फुटम्।
सर्वज्ञानान् ददच्चक्रे सर्वान् विद्याभियोगिनः॥ राजत० ४.४८७
देशान्तरादागमय्य व्याचक्षाणान् क्षमापतिः।
प्रावर्तयत विच्छिन्नं महाभाष्यं स्वमण्डले॥ राजत० ४.४८८
क्षीराभिधाच्छब्दविद्योपाध्यायात् संभृतश्रुतः।
बुधैः सह **ययौ** वृद्धिं स जयापीडपण्डितः॥ राजत० ४.४८९

२. महापुण्यमिदं कर्म यत् तडागस्य रचन-संस्करणादिकम्। सौराष्ट्रप्रदेशे सुदर्शन-तडागस्य रचन-संस्करणादिपराक्रमैः चन्द्रगुप्तमौर्याशोकरुद्रदामस्कन्दगुप्तादिराजा **यशो** लेभिरे।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विजयश्रियं महतीं लेभे। स पूर्तानां निर्माता कवीनां समाश्रयश्चासीत्।[1]

भोजः मुञ्जस्य वंशे तस्य पौत्रो भोजो (१०००–१०५५ ई०) न केवलं राजत्वेनापितु ज्ञान-विज्ञानोन्नायकत्वेनापि माहात्म्यं लेभे। यावज्जीवं स दिग्विजयरीत्या वा शत्रूणां दमनाय वायुध्यत। भारते नैकस्थलेषु युद्ध-कर्मणि व्यापृतोऽपि स महमूदं परासितुं तस्यावरोधकस्य शाहिन आनन्दपालं-स्य सहायार्थं महतीं सेनां प्राहिणोत्। उत्तराभिमुखः स मुसलमानहस्त-गतानि हांसी-थानेश्वरनागरकोटानि च विजितवान्।

भोजस्य विरचिता त्रिंशतिप्रायग्रन्था आसन्। तेषु शृङ्गार-प्रकाशः, सरस्वतीकण्ठाभरणम्, समराङ्गणसूत्रधारम्, आयुर्वेदसर्वस्वं, व्यवहार-सम्मुच्चयश्च महत्त्वपूर्णाः सन्ति, स्व-स्वविषयस्य ज्ञानपरिधिं वर्धयन्ति च। तेन प्रतिष्ठापितः सरस्वती-महाविद्यालयो धारायामद्यापि भोजशालेति प्रथितो मुस्लिमशासकैर्मस्जिदरूपेण विरूपितोऽवलोक्यते। भोजेन भोपाल-राजधानीतो दक्षिणस्यां नदीमवरुध्य कृषिसेचनाय महाकासारो निर्मितः। परमशैवः स शिवमन्दिराणि नैकस्थललेषु निर्मापयामास। कविर्भोजः कविशतकस्योन्नायको बभूव।

दाक्षिणात्या राजानः

राष्ट्रकूटनृपाः ७४१ ख्रीष्टाब्दे दन्तिदुर्गनामा विजेता राष्ट्रकूटराजवशं मान्य-खेटराजधानीकं स्थापयामास। कांची-कलिंग-कोशल-श्रीशैल-मालव-लाट-लंकादिदेशान् विजित्योज्जयिन्यां स हिरण्यगर्भयज्ञमन्वतिष्ठत्। विजयमनु स परमभट्टारकमहाराजाधिराज-परमेश्वर इत्युपाधिनालंकृतः।

दन्तिदुर्गस्य पितृव्यः कृष्णो महान् विजेता मन्दिराणां निर्माता च बभूव। एलोरागुहामन्दिरेषु प्रसिद्धतमः कैलास-शिवालयः तस्य निर्माणाभिरुचिं प्रद्योतयति। इदं मन्दिरमद्वितीयमेव राजते।

कृष्णस्य पुत्रो ध्रुवः (७८०–७९३ ई०) स्वविजयेनोत्तरभारतमपि चमत्करोतिस्म। गङ्गायमुनयोः सम्पर्कमनुस्मर्तुं तेन स्वराज्यलाञ्छने तयोः प्रतिकृतिं निवेशयामास। समग्रं भारतं तस्य प्रभावेण शान्तिं लेभे।

---

१. दशरूपकप्रणेता धनञ्जयः, अभिधानरत्नमालाया लेखको भट्टो हलायुध इत्यादय तस्य राजसभामलंचकुः।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

राष्ट्रकूटवंशेऽमोघवर्षो नवमशताब्दे कवीनां समाश्रयः कविराजमार्गस्य लेखको मान्यखेटराजधानीकृदिति त्रिधा प्रसिद्धिं गतः।[1]

राष्ट्रकूटराजा न केवलं माहाराज्येनापितु तत्र ज्ञानविज्ञान-शिल्पादीनामभ्युदयेनापि गौरवं भजन्ते स्म।

कलिङ्गस्थ राजानः

कलिङ्गे गङ्गवंशीया राजानः प्राभवन्। तेषु एकादशशताब्दे (१०७८–११५० ई०) अनन्त वर्मेति प्रख्यातो राजा बभूव। गङ्गातो गोदावरीं यावत् तस्य राज्यं विस्तृतमासीत्। तेन पुरीस्थं जगन्नाथमन्दिरं कारितम्। वंशेऽस्मिन् द्वादशशतके महाराजो नरसिंहः कोणार्के सूर्यमन्दिरमुपसमुद्रं निर्मापयामास। परवर्तियुगे षोडशशताब्दे गजपतिप्रतापरुद्रः स्वराजकविं गोदावरमिश्रं श्वेतच्छत्रेण स्वर्णिमसिंहमण्डितेन, कविपुङ्गव-पण्डितराजोपाधिध्यां विभूषयामास।

देवगिरेर्यादवाः

यादववंशीयः सिंघणो (१२०० ई०) महाप्रतापशाली बभूव। तस्य समाश्रयेण शार्ङ्गधरः संगीतरत्नाकरं विरचितवान्। अपरो राजासीद् वंशेऽस्मिन् रामचन्द्रो यस्य शासनकाले सन्तज्ञानेश्वरो भगवद्गीतामधिकृत्य ज्ञानेश्वरीं रचयामास।

वारंगलस्य काकतीयराजाः

त्रयोदशशताब्दे काकतीयो राजा प्रतापरुद्रो बभूव। तस्य राजसभायां विद्यानाथो महापण्डित आसीत्। तेन प्रतापरुद्रयशोभूषणं विरचितम्।

भारतीयराजाः कविभिर्वैदेशिकैर्यात्रिभिः पर्यटकैश्च भूरि प्रशंसिताः सन्ति। एतेषां समीक्षापरिधिः संकुचित प्रतिभाति, यतो हि नाम तेषु राजसु विरलविरला एवाशोकवद् दृढाबद्धनिष्ठा आसन् यः सर्वं विहाय न केवल स्वप्रजानामपितु समस्तमानवतायाः कल्याणं परं कर्तव्यं मेने। कारणे सति अथवाऽकारणमपि दिग्विजयहेतुना रागद्वेषग्रस्तास्ते परस्परं युध्यमानाः प्रजानां लोकानां च महतीं हानिं प्रायः समपादयन्। युद्धप्रिया भूयो भूयो राजानः प्रजाभ्युदययोजना मनसि

---

१. अरबयात्री सुलेमान ८५१ ई० ने अमोधवर्ष के विषय में लिखा है—अमोधवर्ष संसार के चार महान् सम्राटों में से है, जिनमें अन्य तीन बगदाद का खलीफा, कुस्तुनतुनिया का सम्राट् और चीन के सम्राट् हैं। असलम ऊदी के अनुसार राष्ट्रकूट सम्राट बड़े उदार थे और मुसलमानों के साथ भी उनका व्यवहार बड़ा अच्छा था। भार्गवः प्राचीन भारत का इतिहास पृ० ४०३।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विचारयितुमपि सामर्थ्यं समयं कोशं च विनियोक्तुमक्षमा बभूवुः। युद्धे स्वयं मरणेन परजन्मनि सुगतिं लप्स्येऽरींश्च मारयित्वा तेषां स्वर्गपथं निर्बाधं करिष्यामीति कतिपयधर्मशास्त्रकाराणां प्रतिपत्त्या भ्रान्ता इव बहुशो राजानः स्वप्रदेशमखिलं भारतं च जर्जरं कुर्वाणा असंहताश्च वैदेशिकाक्रमणकारिणां प्रतिरोधेऽसमर्थाः संजाताः। अशान्ते देशे धर्मार्थादीनामीषदपि प्ररोहो दुर्लभो भवति। कालिदासेन यद् राजरूपं निर्दर्शितं तदासीत्—

प्रजानां विनयाधानाद् रक्षणाद् भरणादपि।
स पिता पितरस्तासां केवलं जन्मे हेतवः॥

अयमादर्शो विस्मृत एवासीत् प्रायः पुरा राज्ञाम्।

देशोद्धारणसांघिकपराक्रमाः

प्रशस्याः खलु ते दाक्षिणात्या राजानो ये संघीभूयेस्लामाक्रमकारिणां मध्ययुगे विरोधं प्राणपणेनाकुर्वन्। देवगिरिश्चिरं समृद्धं राज्यमभूत्। तत्रत्यराजो रामदेवो भग्नक्षत्रव्रतोऽलाउद्दीन-मलिककाफरयोः प्रभुत्वं स्वीचकार। चतुर्दशतकस्य प्रथमचरणे तस्य पुत्रः सङ्गमोऽलाउद्दीनस्य परमशत्रुः समभूत्। तस्य पार्श्ववर्ती राजा होयसलवंशी बल्लाल-तृतीयो बहूनां समीपवर्तिराजानां संघमेकं विरच्येस्लामशक्तेः प्रतिरोधमायोजयामास। तेषां बृहत्तमसफलप्रयास आसीद्यत् पञ्चसप्ततिराजानां सङ्घो निरमीयत। मदुरायाः कापयस्तेषां नायकोऽभूत्। स होयसलनृपेण बल्लालतृतीयेनापि संघीभूतः स्वप्रयोजनसिद्ध्यर्थमुपचक्रमे। तत्र विधर्मिणामत्याचारस्य निरोध एव कारणमासीत्। तेषां सफलप्रयासेनान्ध्रप्रदेशः पुनः स्वतन्त्रोऽभवत्।[1]

राज्ञः प्रशिक्षणम्

यौवराज्ये राज्ञः प्रशिक्षणं प्रायः सर्वाङ्गीणं कृतम्। स न केवलं ज्ञान-विज्ञान-कला-शिल्पेषु निष्णातोऽकारि, अपितु लौकिक-दैनन्दिन-व्यवसायेषु तस्य पाटवमपेक्षितमिति सुसम्मतमासीत्। व्यवहारनये लोकानां विनयाधाने च तस्य योग्यताचार्याणामनुशासनेन भूयो भूयो समवर्धत।[2]

---

१. बलरामश्रीवास्तवः दक्षिणभारत का इतिहास पृ० १७४–१७९

२. Pre Buddhist India p. 80, 116
राजा वेदेषु आन्वीक्षिक्यां च प्रवीणो भवेदिति गौ० ध० सू० ११.३। मनुः वार्तादण्डनीति-विषये तस्य प्रशिक्षणमावश्यकं मनुते। मनुस्मृति ७.४३ महाभारतेऽर्थशास्त्रे च राजकुमाराणां युद्धविद्याभ्यासस्यावश्यकता प्रतिपादिता। खारवेलः पञ्चदशवर्षतः चतुर्विंशतिवर्षं यावत् ज्ञानविज्ञानयोर्नैकशाखासु प्रावीण्यमवापेति तेन शिलालेख उट्टंकितम्।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

राज्ञः सच्चारित्र्यं तस्य प्रतिष्ठायै भवतीति महाभारते तारस्वरेण वारंवारमुद्घोषितम्। तद्यथा—

क्षमा तितिक्षा दम आर्जवं च सत्यव्रतत्वं श्रुतमप्रमादः ।
भूतानुकम्पा ह्यनुशासनं च युधिष्ठिरे राजगुणाः समस्ता ॥ उ० १४७.३३

नास्मिन् कुले जातु बभूव राजा। यो न प्रजानां हितकृत् प्रियश्च ॥
आदि० ४५.१७

असुखानामनाथानां तिर्यग्योनिषु वर्तताम् ।
स एव राजा भूतानां सर्वेषामभवत् पिता ॥ आदि ९४.१६

रञ्जिताश्च प्रजाः सर्वास्तेन राजेति शब्द्यते ॥ शा० ५९.१२७

राजकुमारो महेष्वासः, राजधर्मार्थकोविदश्च यथास्यात्तथा प्रशिक्षणीयः।[1]

मनुश्चान्द्रव्रतिकं नृपं लक्षयति—

परिपूर्णं यथा चन्द्रं दृष्ट्वा हृष्यन्ति मानवाः ।
तथा प्रकृतयो यस्मिन् स चान्द्रव्रतिको नृपः ॥

कल्हणो एतादृशं राजानमनन्तदेवं तस्य पत्नीं च राज्यत्यागकाले प्रजास्नेहाश्रुसिक्तं वर्णयति—

प्रतिमोक्तुं पुरे ताभ्यां दत्तपुष्पाञ्जलौ जनः ।
बाष्पबिन्दुमिषादौज्झीद्दीर्घानर्घकणानिव ॥
हा मातर्हा पितः क्वेत्थं गच्छतः परिदेवितात् ।
इत्यस्मादपरः शब्दो मार्गेषु न तदा श्रुतः ॥ राजत ७.३४९,३५०

राजात्मानं वेततभोगिनं मन्येत। स प्रजां रक्षेत् पालयेच्च। तदनुरूपं सेवावृत्तिः प्रतिमुच्यते करद्वारेण।[2]

केन्द्रीय-शासनतन्त्रम्

रत्निनः

वैदिकयुगे राजकीयेषु दैनन्दिनगृहकार्येषु शासन-प्रवृत्तिषु च राज्ञः सन्निधिं गताः कतिपयप्रधानपुरुषा अधोविधं संज्ञिता आसन्—

ब्रह्मन् (पुरोहितः), राजन्यः (राजकुमारः) महिषी (महाराज्ञी देवी वा), वावाता (प्रियमहिषी), सेनानीः (सेनापतिः) सूतः

---

१. आदि० ९४.३६

२. बौ० ध० सू० १.१०.१; शुक्रनीति १.१८८; महाभारते शान्तिपर्वणि ७२.१० श्लोकेवर्णितम्—

शास्त्रनीतेन लिप्सेथा वेतनेन धनागमम् ।

अर्थशास्त्रानुसारेण युद्धार्थं प्रजां प्रोत्साहयितुं राजा प्रबोधयेत्—तुल्यवेतनोऽस्मि। भवद्भिः सहभोग्यमिदं राज्यम्। इत्यादि १०.३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(रथवाहः) ग्रामणीः (ग्रामप्रधानः), क्षत्ता (राजरक्षकः) संग्रहीता (कोशाध्यक्षः), अक्षावापः (द्यूतकर[1]) । इमे राजसान्निध्येनामात्या बभूवुः । एतेषां वैदिकोपाधी रत्नी(रत्नं वा) प्रख्यातः ।

रत्निनो नियुक्तिः स्वयं राज्ञा कृता । तस्य स्थान आनुवंशिकत्वाद् विश्वासपात्रत्वेन रत्निनः पुत्रो रत्नी बभूव । मन्त्रिपदेऽपि परवर्तिकाले राज्ञो नियोगेनाथवानुवंशिकपरम्परया मन्त्रिणो नियुक्ता बभूवुः[2] ।

किं ते रत्निनो मन्त्रिण आसन् ? नास्य प्रश्नस्य समाधानं सुकरं किन्तु सान्निध्यत्वात्, विश्वासपात्रत्वाच्च रत्निनां स्वभावतः परामर्शविधानं नैत्यिकं कर्मासीत् स्वीयकार्यक्षेत्रेषु । परवर्तियुगे रत्निस्थानीयानां मन्त्रिणां कार्यविधिः सुव्यवस्थितः संजातः ।

अमात्यो मन्त्रिपरिषच्च

प्रजा-सन्धारणाय बहुविधवैषम्यनिवारणाय च राज्यकार्यवैविध्यं प्रत्यक्षमेव । तत्र बहुलेषु राजकर्मसु कतिपयानि महत्त्वपूर्णानि भवन्ति । तेषां सुसम्पादनं राजा एकाकी एव विधातुमसमर्थो भवति ।[3] अन्यच्च किं कार्यं

---

१. तै० सं० १.८.९.१ तै० ब्रा० १.७.३.१; शतपथ० ५.३.१.१० मै० सं० २.६.५; ४.३.८

२. अमात्या मूलतः सन्निधिं प्राप्ता जना आसन् । अमा, सह समीपे च । अमा सह समीपे वा भवः । अमा+त्यप्=अमात्यः । ते कौटुम्बिका आसन् न केवलं भारतेऽपितु विदेशेष्वपीति द्रष्टव्यम् । Vedic Index Vol II p. 200 Fn. 7

३. मनुः प्रथयति एवमेव—

अपि यत् सुकरं कर्म तदप्येकेन दुष्करम् ।
विशेषतोऽसहायेन किन्तु राज्यं महोदयम् ॥ ७.५५

मत्स्यपुराणेऽपि २१५.२
शुक्रेणेयं स्थितिः सम्यग्वर्णिता—

पुरुषे पुरुषे भिन्नं दृश्यते बुद्धिवैभवम् ।
न हि तत्सकलं ज्ञातुं नरेणैकेन शक्यते ।
अतः सहायान् वरयेद् राजा राज्याभिवृद्धये ।
विना प्रकृति-सम्मन्त्र्याद् राज्यनाशो भवेद् ध्रुवम् ।
रोधनं न भवेत्तस्माद् राज्ञस्ते स्युः सुमन्त्रिणः ॥ २.८१

अर्थशास्त्रे निगदितम्—

सहायसाध्यं राजत्वं चक्रमेकं न वर्तते । कुर्वीत सचिवाँस्तस्मात्तेषां च शृणुयान्मतम् । अन्यच्च—अमात्यमूलाः सर्वारम्भाः । जनपदस्य कर्मसिद्धयः स्वतः परतश्च योगक्षेमसाधनं, व्यसनप्रतीकारः, शून्यनिवेशोपचयौ दण्डकरानुग्रहश्चेति । ८.१.२३, २४ इति कौटिल्यमतम् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

किमकार्यम्, कदा कस्मिन् देशे च कार्यम्, कार्यसाधनायापेक्षितसाधन-संग्रहणार्थं के ते सन्ति उपाया इति विप्रतिपत्तीनां समाधानाय राजा नीति-शास्त्रादिग्रन्थनिचयेभ्यः पथप्रदर्शनं प्राप्नोतु इति प्रथमपदं तेषां नित्यत्वात्, शाश्वतप्रतिष्ठापन्नत्वाच्च सिद्धमेव, किन्तु दैनन्दिनकार्यजातस्य सम्यङ्-निर्वहणाय सोऽसंख्यजनानां साह्यमेपक्षते । तेषु प्रथमस्थानीयास्तस्य स्थायिनः परामर्शदातारोऽमात्याः, (मन्त्रिणः सचिवाश्च) प्रभवन्ति । त एकैकशो वा राज्ञ आध्यक्ष्ये मुख्यामात्यनियोगेन स्वमतं तं प्रबोधयन्ति, प्रोत्साहयन्ति, उत्पथान्निवारयन्ति च ।

राज्ञां कृते परामर्शदातॄणां चतुर्दिशसमाहारः स्वभावत आदिकालत एव प्रावर्तत । तेष्वमात्यपदवीका राजसन्निधिं गता ऋग्वेदे संकेताः[1] । तथापि तेषां सुनियोजितपरम्परा स्पष्टत आपस्तम्बधर्मसूत्रे प्राप्यते—राजा गुरुनमात्याँश्च नातिजीवेत् । २.१०.२५.१०

किं गुणोऽमात्यो भवेदिति कौटिल्योऽर्थशास्त्रे संक्षेपेण विवृणोति । तद्यथा-जानपदः, अभिजातः, स्ववग्रहः, कृतशिल्पः, चक्षुष्मान्, प्राज्ञः, धारयिष्णुः, दक्षः, वाग्मी, प्रगल्भः, प्रतिपत्तिमान्, उत्साह-प्रभावयुक्तः, क्लेशसहः, शुचिः, मैत्रः, दृढभक्तिः, शीलबलारोग्यसत्त्वसंयुक्तः, स्तम्भचापल्यवर्जितः, सम्प्रियः, वैराणामकर्ता च । (१.९.१) । श्रुतशास्त्रार्थ एव मन्त्रिपदयोग्यः ।

अर्थ० १.१५,६६

अमात्यानां योग्यपुत्रा उत्तराधिकारेण मन्त्रिपदं लब्धवन्त इति नैक-धर्मग्रन्थेषु विहितम् ।

महाभारते राजकीयसफलताया मूलं क्वचिन्मन्त्री भवेदिति निगदितम्—

एकोऽप्यमात्यो मेधावी शूरो दान्तो विचक्षणः ।
राजानं राजपुत्रं वा प्रापयेन्महतीं श्रियम् ॥ सभा० ५.२६

महाभारतानुसारेण चतुर्वर्णानां प्रतिनिधिरूपा महाजना अमात्यपदमलम कुर्वन् । तथा हि—

चतुरो ब्राह्मणान् वैद्यान् प्रगल्भान् सात्त्विकान् शुचीन् ।
क्षत्रियांश्च तथा चाष्टौ बलिनः शस्त्रपाणिनः ।
वैश्यान् वित्तेन सम्पन्नानेकविंशति संख्यया ।
त्रींश्चशूद्रान् विनीतांश्च शुचीन् कर्मणि पूर्वके ।
अष्टाभिश्च गुणैर्युक्तं सूतं पौराणिकं चरेत् ।
पञ्चाशद्वर्षवयसं प्रगल्भमनुसूयकम् ॥[2]

---

१. ऋग्वेदे ४.४.१

२. शान्ति० ८६.७–९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

'मन्त्रिपरिषदि कार्यार्थं कति अमात्या सह परामृशन्तु' इत्यस्मिन् विषये द्वादश, षोडश, विंशतिर्वा संख्या निर्धारिता। कौटिल्यानुसारेण प्रयोजनापेक्षयामात्यानां संख्या मन्त्रिपरिषदि भवेत्।[1]

मन्त्रिणामन्येषां च बहूनामभिजनानां परामर्शेन राजा युधिष्ठिरो राजसूययज्ञस्य समारम्भमायोजयामास।[2]

कल्हणेन कश्मीरदेशस्य बहूनां राजमन्त्रिणां कार्यादिकं वर्णितम्। अनेन वृत्तेन कतिपयमन्त्रिणामुच्चादर्शाः प्रतिफलन्ति। तथाहि जयापीडस्य मन्त्री देवशर्मा नेपालदेशे स्वामिनि वन्दीभूते आत्महत्यां कृत्वा तस्य विमोचनं समभावयत्। अवन्तिवर्मा तस्य मंत्री शूरश्च परस्परं भृत्यवदाज्ञाकारिणौ बभूवतुः। यदा जयसिंहस्य मन्त्री धन्यो रुग्णोऽभवत्, राजा क्षणमपि तस्य रोगशय्यातो दूरो नाभवत्। कतिपयमन्त्रिणो राज्ञां प्रजापीडनपरां दुष्प्रवृत्तिं नियन्त्रितवन्तः। प्रजासुखाय तैर्बहुकृतं कारितञ्च।[3]

राजा साधारणतः परिषदि सर्वेषां मन्त्रिणामैकमत्येन महत्त्वपूर्णकार्यपद्धतिं निर्णीतवान्। मन्त्रिपरिषद आध्यक्ष्यं राजाकरोत्। यदा कदा स विशेषविषयमधिकृत्य विशिष्टेन मन्त्रिणा रहोऽमन्त्रयत्। मनुः समर्थयति—

तेषां स्वं स्वमभिप्रायमुपलभ्य पृथक् पृथक्।
समस्तानां च कार्येषु विदध्याद्धितमात्मन॥ ७.५९

शुक्रस्तु मन्त्रिणां निर्भयधिया मतं ज्ञातुं तेषां पत्राचारपद्धतिर्निर्दिष्टा।[4] मन्त्रित्रयेण चतुष्टयेन वा मन्त्रणा विदध्यादितिकौटिल्यः।[5]

अशोकस्य शिलालेखैः प्रमाण्यते यत् स मन्त्रिणां मते स्वमतविपरीते सति तत्र पुनर्विचारमन्वतिष्ठत्। शुङ्गवंशीययुवराजानां मन्त्रिपरिषद् बभूव

शुक्रो मन्त्रिणां विभाग-विपर्ययं परामृशति। स्वकर्तव्यनिष्ठासौष्ठवेन तेषां कृत उच्चतरविभागे नियुक्तिः सम्भाव्यते स्म। नैकविभागानामेक एव मन्त्री क्वचिद् दृश्यते।

१. 'यथासामर्थ्यमिति कौटिल्यः। अर्थशास्त्रे १.१५.५६

२. न केवलं मन्त्रिणोऽपितु भ्रातरः सुहृद ऋत्विज ऋषयो युधिष्ठिरेण राजसूयप्रकरणे परिपृष्टाः। अन्ततो युधिष्ठिरः कृष्णं सम्मन्त्रयामास। सभा० १२ अध्यायतः। कृष्णोऽपि मन्त्रीति महाभारतस्य सम्मतम्—येषां मन्त्री जनार्दनः। आदि १९७.२० यस्य परामर्शेन कल्याणमभ्युदयश्च, स एव मन्त्रीति परमार्थः।

३. राजतरङ्गिणी ४.५६९–५७७; ५.३; ७.२१२–२१४।

४. शुक्रनीतिसार १.३६३.४।

५. अर्थशास्त्रे १.१५ अध्यायतः।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मन्त्रिणां कार्यसारं कौटिल्येन निगदितम्—(१) कर्मणामारम्भोपायः (२) पुरुषद्रव्यसम्पत् (३) देशकालविभागः (४) विनिपातप्रतीकारः (५) कार्यसिद्धिरिति पञ्चाङ्गमन्त्रः। तानेकैकशः पृच्छेत्, समस्ताश्च।

महामन्त्री

राज्ञो महामन्त्री वा मुख्यमन्त्री वा राज्ञः प्रधानपरामर्शदाताभूत्। स तु राज्ञोऽङ्गरूपमिति ब्राह्मण-मिश्रो राजेति पदैः प्रमीयते। मनुः समर्थयति—

सर्वेषां तु विशिष्टेन ब्राह्मणेन विपश्चिता।
मन्त्रयेत् परमं मन्त्रं राजा षाड्गुण्यसंयुतम्॥ ७.५८

यथा मनुर्निर्दिशति स ब्राह्मणः सर्वकार्याकार्यविधाता बभूव—

नित्यं तस्मिन् समाश्वस्तः सर्वकार्याणि निःक्षिपेत्।
तेन सार्धं विनिश्चित्य ततः कर्म समारभेत्॥ ७.५९

वासुदेवशरणोऽग्रवालो ब्राह्मणमहामन्त्रिणः सानुसन्धानमुल्लिखत्यधोऽविधम्—

राजा	तस्य महामन्त्री
जातशत्रुः	वर्षकारः
विडूडभः	दीर्घचारायणः
उदयनः	यौगन्धरायणः
चन्द्रगुप्त-बिन्दुसारौ	चाणक्यः
अशोकः	राधगुप्तः
पालकः	पिशुनः
चण्डप्रद्योतः	भरतरोहकः
अंशुमान्	आचार्यघोटमुखः
परन्तपः	कणिकभारद्वाजः
ब्रह्मदत्तः	बाभ्रव्यः

डा० अग्रवाल एतेषां महामन्त्रिणां महान्तं भरं वर्णयति—

All these ministers occupied position of the highest responsibility in the administration and were bound by constitutional ties to the king whose policies they directed so completely.

India As known to Pāṇini p. 404

1. The agreement of a king with a Brāhmaṇa in accordance with the oath of loyalty to the constitution was a feature of Hindu polity. V. S. Agrawala; India As known to Pāṇini p.403

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नैकविदुषां संयोगेन राजा तेषु प्रकरणेषु साफल्यमियाद् यत्रामात्यसाह्यं न प्रभवति। कौटिल्यानुसारेण मन्त्रशक्तिहीनः प्राज्ञपुरुषोपचयं विद्यावृद्धसंयोगं वा कुर्वीत। तथा हि सद्यः श्रेयः प्राप्नोति। अर्थ० ७.१४.३

न केवलं मन्त्रणैवात्मात्यानां कार्यमासीदपितु राज्ञा नियुक्तास्ते राजस्थानीया एव तस्यावशिष्टानि प्रजाकार्याणि सम्पादयन्ति स्म। मनुमुख्यामात्यं विशेषयन्नाह—

अमात्यमुख्यं धर्मज्ञं प्राज्ञं दान्तं कुलोद्गतम्।
स्थापयेदासने तस्मिन् खिन्नः कार्येक्षणे नृणाम्॥ ७.१४१

सेनापतिस्तु मन्त्री बभूव। स स्वतन्त्र एव राज्ञे विजयपराक्रमशीलोऽभवत्।

अमात्याः स्वचारित्र्येण राज्ञो गुरुश्च सुहृच्चेति सम्मानिता आसन्। कामन्दकः सूचयति कामन्दकीयनीतिसारे ४.४१.४२

सज्जमानमकार्येषु निरुन्ध्युर्मन्त्रिणो नृपम्।
गुरूणामिव चैतेषां शृणुयाद् वचनं नृपः॥

नृपस्य ते हि सुहृदस्त एव गुरवो मताः।
य एनमुत्पथगतं वारयन्त्यनिवारिताः॥

मन्त्रिपदस्य सार्थकतां विशदयन् शुक्र आह-राष्ट्रस्य, प्रजानां, सेनायाः, कोशस्य, सुशासनस्य च यथायोग्यं योगक्षेमविधायका मन्त्रिणो भवन्ति। शत्रूणां संक्षयाय प्रभवन्तीमे सात्त्विका अमात्याः[1]। शुक्रनीतिसारे २.८२,८३

राजानं प्रति साह्यभावेन मन्त्रिण आचरन्ति स्म। तेषां कार्यं बहुविधं प्रकल्पितम्। यथा (१) राज्ञोऽवशिष्टकार्यस्य पूरणम् (२) राज्ञो निर्देशेनावश्यककार्याणां सम्पादनम्। (३) राज्ञा निर्दिष्टोऽध्यक्षीभूयकार्याणामवे-

१. अन्यत्रापि—
मन्त्रो मन्त्रफलावाप्तिः कार्यानुष्ठानमायतिः। आयव्ययौ दण्डनीतिरमित्रप्रतिषेधनम्॥
व्यसनस्य प्रतीकारो राजराज्याभिरक्षणम्। इत्थममात्यस्य कर्मेदं हन्ति स व्यसनान्वितः।
कामन्दकीयनीतिसारे १३.२३,२४। अग्नि० २४१.१६-१८

नीति वाक्यामृते च
आयो व्ययः स्वामिरक्षा तन्त्रपोषणं चामात्यानामधिकारः। पृ० १८५
कौटिल्यानुसारेणार्थशास्त्रविन्मन्त्री राजानमितिहासपुराणाभ्यां बोधयेत्।
अर्थ० ५.६.६०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

क्षणम्। (४) विपत्तौ राज्ञे पथप्रदर्शनम्।[1]

कच्चिन्नोग्रेण दण्डेन भृशमुद्वेजितप्रजाः।
राष्ट्रं तवानुशासन्ति मन्त्रिणो भरतर्षभ॥ सभा० ५.३४

तत्र साधारणतः (१) प्रधानमन्त्री सर्वेषां मन्त्रिणां नेतासीत्। तस्य नियोगेन मन्त्रिणः कार्यगौरवं निर्वहन्ति स्म। (२) सैन्यमन्त्री युद्धकार्यार्थं निरन्तरंसर्वविधसज्जाकरणेन सर्वोपाय-संघटनेन च विजयपथं प्रणिनाय (३) विदेशमन्त्री महासान्धिविग्रहिको वा राज्यरक्षानिमित्तमरिमण्डलं व्यभिनच्च। (४) प्राड्विवाकः प्रधानन्यायाधिकारी बभूव। (५) कोषाध्यक्षः राजकीयकोशसंवर्धनोपायान् विदधे।

वस्तुतो मन्त्रिणो राष्ट्रमनुशासतीति महाभारते निगदितम्—

राज्ञो राष्ट्रस्य च रक्षणे[2] अभ्युदयपथ-नियोजने च प्राणपणेन मन्त्रिण उद्योगिनो बभूवुरिति नैकैतिहासिकप्रमाणै समुदितं भवति। यादववंशीय-राजस्य मन्त्रिविषये वर्णितम्—

राष्ट्रस्य पुष्टिः स्वजनस्य तुष्टिर्धर्मस्य वृद्धिः सकलार्थसिद्धिः।
नन्दन्ति सन्तः प्रसरन्ति लक्ष्म्यः श्रीचङ्गदेवे सति सत्प्रधाने॥
एतादृशा मन्त्रिणो राजभिः प्रजाज्नैश्च समादरणीया आसन्। इण्डिका ८.४

भारद्वाजानुसारेण 'मन्त्रो, मन्त्रफलावाप्तिः, कर्मानुष्ठानम्, आय-व्ययकर्म, दण्डप्रणयनम्, अमित्राटवीप्रतिषेधः, राज्यरक्षणं, व्यसनप्रतीकारः, कुमार-रक्षणम् 'अभिषेकश्च कुमाराणाम्' आयत्तममात्येषु। अत्र मन्त्रिणो महत्त्वपूर्णकार्याणि निदर्शितानि।[3] अन्यच्च कौटिल्यानुसारेण विजथपथे राज्ञां कृतोत्साहप्रभावाभ्यामधिकतरोपयोगो मन्त्रशक्तेरेवास्ति।[4]

---

१. परिक्षित् सप्तमेऽह्नि सर्पदंशेन स्वमृत्युमपि श्रुत्वा मन्त्रिभिर्मन्त्रयामास सह संविग्नमानसः॥ आदि० ३८.२७

२. यदि अरिभी राज्ञो मरणवाधा समुपस्थापिता भवेत् तर्हि वृद्धमन्त्री नानाविध-मायात्मकोपायैस्तां रक्षेत्। राज्ञि निस्सन्ताने सति, युवराजे चाल्पवसस्के सति योग्यशासनस्थापनायनु स बहु कृतवानिति अर्थशास्त्रे ५,६ अध्याये निदर्शितम्।

३. अर्थशास्त्रे ८.१.८

४. अर्थशास्त्रे ९.१.१४–१६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वैदिककालानन्तरं कतिपयप्रधानराजकर्मचारिणामुपाधिस्तीर्थमित्यासीत् ।[1] अशोकस्य शिलालेखेषु तस्य प्रधानकर्मचारिणो महामात्रा इति संज्ञिताः, ततोऽवरा युक्ता, राजुकाः प्रादेशिकाश्चासन् ।

राज्ये कर्मचारिणः पुरुषाः सद्वृत्ता भवेयुरिति शास्त्रीयं मतम् । तेषां श्रेष्ठानामपि चारित्रिकपरीक्षणं राजा गुप्तचरैः[2] कारयेदिति विधानमप्रसुप्तमासीत् । लोभग्रस्ता राजपुरुषा गृध्रा एव, सद्वृत्तिकाः पुनर्हंसा इति शङ्खमतमधोविधम्—

'न हंसो गृध्रपरिवारः । कामं तु गृध्रो हंसपरिवारः स्यात् । पञ्चतन्त्रे समर्थितमेतत्—

गृध्राकारोऽपि सेव्यः स्याद्धंसाकारैः सभासदैः ।
हंसाकारोऽपि संत्याज्यो गृध्राकारैः स तैर्नृपः ॥ १.३०२

दुर्वृत्ता राजकर्मचारिणो राजानं हिंसन्तीति सर्वैः सम्मतमासीत् । शुक्रानुसारेण तत्र प्रतिश्रुतिरासीत्—

आपद्गतं सुभर्तारं कदापि न परित्यजेत् । २.२४६

गरुडपुराणानुसारेण परीक्षानन्तरमेव राजकर्मचारी स्वपदे नियोजनीयः ।[3]

---

१. रामायणेऽयोध्याकाण्डे १००.३६ । कौटिल्योऽष्टादशतीर्थानां नामानि सूचयति—मन्त्रि—पुरोहित—सेनापति—युवराज-दौवारिकान्तर्वंशिक-प्रशास्तृ-समाहर्तृ-संनिधातृ-प्रदेष्टृ-नायक-पौरव्यावहारिक—कार्मान्तिक—मन्त्रि-परिषदध्यक्ष—दण्डदुर्गान्तपालाटविकाः । १.१२.८ । तत्र दौवारिको राजप्रासाद-रक्षक इति । आन्तर्वंशिकोऽन्तःपुररक्षकः इति । कार्मान्तिकः खनिजाध्यक्षः राजकीयोत्पादनिदेशकश्चेति । दण्डपालः सेनाध्यक्ष इति । अन्तपालः सीमारक्षक इति । आटविको वनानां वनवासिनाँ च रक्षक इति । प्रशास्ता प्रधानन्यायाधीश इति । सन्निधाता करसंग्रहाध्यक्ष इति । प्रदेष्टा राजकीयनिर्णयस्य प्रकाशक इति । पौरव्यावहारिको राजधान्या न्यायाध्यक्षः ।

२. गुप्तचरा (गूढपुरुषाः) नवविधा नियुक्ता आसन्—कापलिकः, उदास्थितः, गृहपतिकः, वैदेहकः, तापसः, सत्री, तीक्ष्णः रसदः भिक्षुकी च । कापलिकः छात्र आसीत् । उदास्थितः साधुवेशो बभूव । तेन सह गुप्तचरसंघः शिष्यरूपेण व्यचरत् । गृहपतिकः कर्षकः सन् कृषकान् राजभक्तानकरोत् । वैदेहको वैश्येष्वेवमेव समाचरत् । कपटरूपस्तापसो बभूव ।
सत्रिणोऽङ्गविद्या-जम्भकविद्यादिनिपुणा आसन् । तीक्ष्णास्ते हस्ति-व्यालादिभिः सह युध्यन्तेस्म धनार्थम् । रसदाः क्रूराचरणा बन्धुष्वपि निःस्नेहाः ।
अर्थ० १.११-१२

३. भृत्तकः परीक्ष्यते श्रुतेन शीलेन कुलेन कर्मणा । ११२.३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

न केवलं पुरुषाः स्त्रियोऽपि-परिव्राजिका, ब्राह्मण्योः गुप्तचर्यायै नियुक्ता आसन्।[1]

गुप्तचरा न केवलं साधारणजनानामपराधान् राज्ञे निवेदयितुं नियुक्ता आसन्, अपितु ते मन्त्रि-पुरोहित-सेनापति-युवराज-दौवारिकान्तर्वंशिक-प्रशास्तृ-समाहर्तृ-संनिधातृ-प्रदेष्टृ-नायक-पुरव्यवहारिक-कार्तान्तिक-मन्त्रि-परिषदध्यक्ष-दण्डदुर्गान्तपालाटविकेषु परिभ्रमन्तस्तेषां गुणदोषान् संगृह्य राजसात् कुर्वन्ति स्म।[2]

नानावेषव्यवसायानात्मसात्कृत्य रसदाः स्त्रियश्च राज्ञा मन्त्रिणामपि रहोभेदान् सूचयितुं नियुज्यन्ते स्म।[3]

नैके गुप्तचराः कस्यचित् स्वामिनो भृतौ नियुक्तोऽरिभावस्थस्य राज्ञोऽपि-भृतिमुपलभ्य तस्य मन्त्रिणो भेदान् गूढभावेन स्वमूलस्वामिने सूचयन्तिस्म।[4]

गुप्तचरा अपि स्वकर्तव्यच्युता राज्ञा दण्डिता आसन्।[5] लोकयात्राविदः सात्त्विकवृत्तिकाश्च जना राजाश्रयमर्हन्तीति कौटिल्यमतम्।[6]

क्वचिद् गुप्तचराः प्रतिग्रहभूतान् कुमारादीन् शत्रुराजस्य बन्धनाद् विमोचयन्ति स्म। एतस्मिन् पराक्रमे राजकुमारस्य नानारूपधराणां गुप्त-चराणां च विविधप्रयोजनसाधयित्री भूमिका पांशुवध-बुद्धिकौशल-प्रयुत्पन्न-मति साहसकपटकूटधौर्य-सम्मिश्रा तेषां राजकार्यार्थमात्मबलिदानभावनां व्यनक्ति।[7]

पुरोहितः

वैदिकयुगे पुरोहितो राष्ट्रहितचिन्तकः स्वभावत आसीदेव। यथा—

राष्ट्रे जागृयाम पुरोहिताः। यजु० ९.२३

यत्र ब्रह्म च क्षत्रं च सम्यञ्चौ चरतः सह।
तल्लोकं पुण्यं प्रज्ञेयं यत्र देवाः सहाग्निना॥ यजु० २०.२५

पूर्वस्मिन् युगे वस्तुतो ब्रह्मैवाधिक्षत्रो प्रबभूव। प्रकरणेऽस्मिन् तस्य विशेषा अथर्ववेदे लक्षणीयाः। तद्यथा— परमेष्ठी, ब्रह्म, देवाननुक्षियति, सत्क्षत्रम्,

---

१. अर्थ० १.१२.५–७

२. अर्थशास्त्रे १.१२.८

३. सूदारालिकस्नापकसंवाहकास्तरककल्पकप्रसाधकोदकपरिचारका रसदाः कुब्ज-वामनकिरातमूकबधिरजडान्धच्छद्मानो नटनर्तकगायनवादक वाग्जीवनकुशीलवाः स्त्रियश्चाभ्यन्तरं चारं विद्युः॥ अर्थशास्त्रे १.१२.११

४. अर्थशास्त्रे १.१२.१८–२०

५. अर्थशास्त्रे १.१२.१८

६. अर्थ० ५.४.१,२

७. अर्थशास्त्रे ७.१७.४२–७२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रभाजमानां हरिणीं यशसा संपरीवृताम् ।
पुरं हिरण्ययीं ब्रह्मा विवेशापराजिताम् ॥ अथर्व० १०.२.२१–३३

एतत्सर्वमादौ ब्रह्मैव सर्वोच्चशासनिकसत्तामध्यकरोदिति संकेतयति ।

स इत् क्षेति सुधित ओकसि स्वे तस्मा इलां पिन्वते विश्वदानीम् ।
तस्मै विशः स्वयमेव नमन्ते यस्मिन् ब्रह्मा राजनि पूर्व एति ॥

ऋ० ४.५०.८

राज्यस्य सम्यक् पालनाय राजा प्राथम्येन पुरोहितस्य साह्यं वैदिककालादेव गृह्णन्नास्ते । ऐतरेयब्राह्मणानुसारेण पुरोहितो राज्ञोऽर्ध आत्मा एव ।[1] विद्वान् ब्राह्मणो राष्ट्रगोपः पुरोहितः । स स्वज्ञानेन, आभिजात्येन, प्रवचनेन रूप-वयःशीलैर्न्यायवृत्तेन, तपसा चानुत्तम एव महापुरुषो विभाति स्म ।[2] स राजानं पराक्रमानुष्ठानदिशि युद्धाय समभावयत्[3] । पुरोहितो राजराष्ट्रभृदिति शुक्रः । २.७४ । एतस्यैतिहासिकमुदाहरणमृग्वेदेऽधोविधं वर्तते—

विश्वामित्रस्य रक्षति ब्रह्मेदं भारतं जनम् । ३.५३.१२

विश्वामित्रो भरतानां पुरोहितो बभूव । स स्वयमेव राज्ञा सहाजौ जगाम । ऋ० ६.७५.१७

याज्ञवल्क्यानुसारेण सर्वैर्मन्त्रिभिर्मन्त्रयित्वा यं निर्णयं राजाधिगच्छति, तं पुरोहितं परामृश्यान्तिमेत्थं जगाम । याज्ञ० १.३१२

परवर्तियुगेऽपि पुरोहितस्यावदानं राजकर्म-सम्पादनदिशि अनल्पं दृश्यते । तथाहि—In historical times he represented the real power of kingship and may safely be deemed to have exercised great influence in all public affairs, such as the administration of justice and the kings conduct of business.[4]

युद्धात् प्रागपि पुरोहितस्य सविशेषं महत्त्वं लक्ष्यते । अथर्ववेदानुसारेण पुरोहितो युद्धे स्वपक्षस्यायुधात्मकं मानसिकं च बलं प्रोत्तेजयति स्म । स कथयति ।

'अहं हविषा शत्रूणां बाहून् वृश्चामि । ३.१९.२
क्षिणामि ब्रह्मणामित्रानुन्नयामि स्वानहम् । ३.१९.३

---

१. अर्धात्मो ह वा एव क्षत्रियस्य यत्पुरोहितः । ऐ० ब्रा० ३४.८।८.२५
२. ब्राह्मणं च पुरोदधीत विद्याभिजनवाग्रूपवयःशीलसम्पन्नं न्यायवृत्तं तपस्विनम् । गौतम० ११.१२,१३ । आपस्तम्बेन समर्थितमेतत् । २.५.१०
३. आश्व० गृह्ये ३.१२
4. Vedic Index Vol. II p. 8

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

एषामहमायुधा सं स्याम्येषां राष्ट्रं सुवीरं वर्धयामि ।
एषां क्षत्रमजरमस्तु जिष्णवेषां चित्तं विश्वेऽवन्तु देवाः । ३.१९.५
प्रेता जयता नर उग्रा वः सन्तु बाहवः । अथर्व० ३.१९.७

पुरोहिताधिकारो राजनियामको बभूव । महासम्मानितोऽयं विद्वान् पुरोहितस्तु राज्ञा नियुक्तस्तस्मै मन्त्रिवत् सत्पथप्रदर्शनमकरोत् ।[1] स गुरुरूपेण राजसंस्थायां राज्याभ्युदयस्य प्रजानां सुखशान्तिविधायिव्यवस्थायाः सम्पत्तौ च विपत्तौ च राज्ञः प्रजायाश्च कृते कल्याणयोजनायाश्च शुद्ध-सात्त्विकवृत्त्या प्रवर्तक आसीत् । पुरोहितस्य कार्यजाते विरलातिविरलमेव नृशंसं प्रतिभाति । वसिष्ठादीनां पौरोहित्यं शाश्वतादर्शं प्रस्तौति । रामायणानुसारेणोपाध्यायः, पुरोहित ऋषयश्च राज्ञो नेतृत्वं निर्वहन्ति स्म ।

दूतः

दूतस्य पदं वैदिकयुगे सविशेषं प्रतिष्ठास्पदं प्रतिभाति । मानवीविशां दैवीविशां दौत्यं भजमानोऽग्निः सर्वोच्चदेवेष्वन्यतमः साधकः ।[2] स दूतो मानव-समाजे संवसन् देवहितार्थं यजमानप्रवृत्तिं संवर्धयन्नास्ते ।[3]

वैदिकयुगे दूतस्तु क्वचिद् राज्ञा नियुक्तः प्रजावेक्षणाय गुप्तचर इव प्रवर्तते ।[4] इन्द्रस्य दूती सरमा तस्य प्रतिनिधित्वमाचरति, युगपदेव गुप्तचर एव पणिभिश्चोरितानां गवां कृते गवेषणां विदधाति ।[5]

राजकीयदूतस्य प्रथमस्पष्टपरिचयो महाभारतरामायणमहाकाव्ययोः प्राप्यते । महाभारते कृष्णस्य रामायणे च हनुमल्लक्ष्मणाङ्गदादीनां दौत्यं प्रख्यातमेव । अनेन प्रमाण्यते यत् प्राचीनकाले राजदूता अभिजाताः, नितान्तविश्वसनीयाश्च महत्तमा महाजना बभूवुः । महाभारते दूतस्य गुणा वर्णिताः । तथा हि —

अस्तब्धमक्लीबमदीर्घसूत्रं सानुक्रोशं श्लक्ष्णमहार्यमन्यैः ।
अरोगजातीयमुदारवाक्यं दूतं वदन्त्यष्टगुणोपपन्नम् ॥
उद्योग० ३७.२५

---

१. अर्थशास्त्रे प्रोक्तम्—आचार्यः (पुरोहितः) राजानमपायस्थानेभ्यो वारयेत् । १.७.१३ पुरोहितमुदितोदितकुलशीलं षडङ्गवेदे दैवे निमित्ते दण्डनीत्यां चाभिविनीतापदां दैवमानुषीणां अथर्वाभिरुपायैश्च प्रतिकारं कुर्यात् । १.९.१५

२. बालकाण्डे ६८.११; ६९.४

३. ऋग्वेदे १.१.१–३, यजुर्वेदे २२.१७ ।

४. अन्तर्द्वतो रोदसी दस्म इयते होता निषत्तो मनुषः पुरोहितः ।
क्षयं बृहन्तं परिभूषति द्युभिर्देवेभिरग्निरिषितो धियावसुः ॥ ऋ० ३.३.२

५. ऋ० १०.१४.१२ ६. ऋ० ४.१६.८; १०.१०.८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कुलीनः शीलसम्पन्नो वाग्मी दक्षः प्रियंवदः ।
यथोक्तवादी स्मृतिमान् दूतः स्यात् सप्तभिर्गुणैः ।। शान्ति० ८६.२७

मन्वनुसारेण दूतो सर्वशास्त्रविशारदः, इङ्गिताकारचेष्टज्ञः, शुचिः, दक्षः, कुलीनः, अनुरक्तः, स्मृतिमान्, देशकालवित्, वपुष्मान्, निर्भयः, वक्ता च स्यात् । ७.६३, ६४ । अन्यच्च दूतः सन्धि-विग्रहकारको भवति[1] । कौटिल्यो दूतस्य नानाविधराजहितकार्यं वर्णयति—

प्रेषणं सन्धिपालत्वं प्रतापो मित्रसंग्रहः ।
उपजापः सुहृद्भेदो गूढदण्डातिसारणम् ।।
बन्धुरत्नापहरणं चारज्ञानं पराक्रमः ।
समाधिमोक्षो दूतस्य कर्मयोगस्य चाश्रयः ।। १.१६.४९,५०

पूर्वोक्तैः प्रसङ्गैर्दूतानां परराष्ट्रनीतिविषये सविशेषं महत्त्वं विभाति । परराष्ट्रेषु प्रागेव नियोजिता गुप्तचरा दूतस्य साह्यं कुर्वन्ति स्म । ते दूतस्यचक्षुर्भूता दूतायापेक्षितशत्रुविजयभूतार्थं सूचयन्ति स्म । दूतः साधारणतो मन्त्रिणा समः सुप्रतिष्ठितो बभूव । कौटिल्यानुसारेण स 'सुप्रतिविहित-यान-वाहन-पुरुष-परिवापः प्रतिष्ठेत[2] ।' परराष्ट्रं गतो दूतस्तत्रत्ययुद्धविधान-सामग्र्यं, दुर्गराष्ट्र-रहस्यं चानुसन्दधानाक्रमणद्वाराणि जानीयादिति तस्य प्रथमं कार्यम् । स स्वामिनो वचनं परराष्ट्राधिपाय निर्भीकं सत्यमेव ब्रूयात् ।

दूतस्योत्तरदायित्व-निर्वहणाय तस्य संयतजीवनविधिर्निर्दिष्टः । तथा हि (१) दूतो स्त्रियं पानं च परिवर्जयेत् । (२) एकः शयीत । (३) किमपि तद्वचनं न वदेत् येन स्वामिनो रहस्यं शत्रुर्जानीयात् ।[3] स आत्मविषयकं शत्रोर्निरोधावरोधयोः कार्याकार्यादिकं विश्लेषयेत् ।[4]

स्वामिनो हितं मनसि निधाय दूतः शत्रुराजस्यापकारवृत्तिं शंकमान एव तस्य दुर्गे वसेत् ।

पूर्वोक्तप्रयोजनानि साधयितुं नैकदूताः परराष्ट्रेषु प्रेषिताः ।

राजकीयभृतौ विशेषतः सर्वोच्चाधिकारिणां कृते सौष्ठवसारगर्भमनु-शासनं कौटिल्येन निर्दिष्टम् । तस्य दिङ्मात्रपरिचयोऽधोविधः[5]—

(१) मतिकर्मसु पृष्टः धर्मार्थसंयुक्तं समर्थं प्रवीणवत् अपरिषद्भीरुः कथयेत् ।

---

१. दूते सन्धि-विपर्ययौ । ७.६५
२. अर्थ० १.१६.५
३. अर्थ० १.१६.२३,२४,३२,३३
४. अर्थ० १.१६.३४–४४
५. अर्थ० ५.४ अध्यायतः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(२) विगृह्य कथनमसभ्यमप्रत्यक्षमश्रद्धेयमनृतं च वाक्यं न वदेत् ।

(३) अनर्मणि हासं न कुर्यात् ।

(४) मिथः कथनं, द्वन्द्वकथनं, भ्रुकुटीकर्म, वाक्यापक्षेपणं संघातं च वर्जयेत् ।

(५) पृष्टः प्रियहितं ब्रूयान्न ब्रूयादहितं प्रियम् ।
अप्रियं वा हितं ब्रूयाच्छृण्वतोऽनुमतो मिथः ।।

कौटिल्यो राजानुजीविनः प्रति सदुपदिशति—

आत्मरक्षा हि सततं पूर्वं कार्या विजानता ।
अग्नाविव हि सम्प्रोक्ता वृत्ती राजोपजीविनाम् ।।
एकदेहं दहेदग्निः शरीरं वा परं गतः ।
सपुत्रदारं राजा तु घातयेत वर्धयेत वा ।। ५.४.२२,२३

राष्ट्रम्

पुरुषवद्धि राज्यम् । अर्थशास्त्रे ७.११.३२ ।

वैदिककाले राज्ञा साक्षात् प्रशासितो लघुर्वा बृहद्वा भूभागो राष्ट्रमित्यभिहितः ।[1] वरुणो राजा राष्ट्राणाम्' इत्यनेन क्वचिद् राष्ट्रं त्वाधुनिकप्रदेशपदस्य पर्यायः प्रतिभाति । राष्ट्रमिति तत्रत्यलोकानां प्रतीकभूतममन्यत वैदिकयुगे, यतो हि नाम पृथ्वीमाता राष्ट्राय त्विषिं बलं च ददातीति धारणोद्घोषितासीत् ।[2] कस्मिन् प्रदेशे राजा राष्ट्रं विदधात्विति बहुषु ग्रन्थेषू लिखितम् । ततः सारं निस्सरति यत् सौन्दर्यबाहुल्ययुते प्रदेशे राष्ट्रं प्रतिष्ठितं भवेत् ।

ऋषीणां महिमा राष्ट्रनिर्माणेन प्रशस्यं विभाति । तद्यथाथर्ववेदे वर्णितम्—

भद्रमिच्छन्त ऋषयः स्वर्विदस्तपोदीक्षामुपसेदुरग्रे ।
ततो राष्ट्रं बलमोजश्च जातं तदस्मै देवा उपसन्नमन्तु ।। १९.४१.१

---

१. मम द्विता राष्ट्रं क्षत्रियस्य । ऋ० ४.४२.१ । राजा राष्ट्राणाम् । ऋ० ७.३४.११ युवो राष्ट्रं बृहत् । ऋ० ७.८.४.२ । तथा राष्ट्रं गुपितं क्षत्रियस्य । ऋ० १०.१०९.३ स मे राष्ट्रं च क्षत्रं चेत्यादि । अथर्व० १०.३.१२ । सा नो राष्ट्रे दधातूत्तमे । अथर्व० १२.१.८ । राष्ट्रं रोह । राष्ट्रं दधात् सुमनस्यमानः । अथर्व० १३.३४,३५ पुरोहिता वयं राष्ट्रे जागृयाम । यजु० ९.२३ ।

परवर्तियुगेऽपि लघुराज्यानामुल्लेखाः प्राप्यन्ते । युधिष्ठिरो महाभारते तेषां विषये सूचयति—'गृहे गृहे हि राजानः स्वस्य स्वस्य प्रियंकराः ।' अत्र राजा क्षत्रियस्य पर्याय एव । सभापर्वणि १४.२

२. अथर्व० १२.१.८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अर्थाद् ऋषीणां वसतिं परितो राष्ट्रमुद्भिन्नम् ।

साम्राज्यम्, महाराज्यम्

राज्याधिपती राजा भवति । साम्राज्याधिपतिः सम्राड् भवति, महाराज्याधिपतिस्तु महाराजो भवतीति वैदिकोल्लेखैः स्पष्टं प्रतिभाति । राज्यं विस्तारापेक्षया महाराज्यात् साम्राज्यात् च लघुतरं बभूव ।[1] सम्राट् तु राजसूययज्ञानन्तरमभिषेचितो नैकराज्यानां सामन्तानां प्रभुसम्मितो बभूव[2] । अश्वमेधयज्ञस्य यजमानो सम्राट्पदवीयोग्यता नैक राष्ट्राणां संश्रयेणैव प्राप्ताभविष्यत् ।[3] यजुर्वेदानुसारेण सहस्रजित् साम्राज्येनाभिषिच्यते स्म ।[4]

बृहत्तमराष्ट्रस्य परिचयोऽधोविधं लभ्यते—

भुवः सम्राडिन्द्र सत्ययोनिः । ऋ० ४.१९.३

अर्थादिन्द्रः समग्रभूमेः सम्राडस्ति ।

युध्मस्य ते वृषभस्य स्वराज । ऋ० ३.४६.१

अर्थादिन्द्रः सर्वतन्त्रस्वतन्त्रो राजास्ति । वातोऽस्य विश्वस्य भुवनस्य राजेति ऋग्वेदे वर्णितम् । मनुः प्रतिपादयति

जाङ्गलं सस्यसम्पन्नमार्यप्रायमनाविलम् ।
रम्यमानतसामन्तं स्वाजीव्यं देशमावसेत् ॥ ७.६९

विट् वा ग्रामो वा लघुतमं राष्ट्रमासीत् । बृहद्राष्ट्रं तत्र प्रकल्पितमासीदेव । ऋ० ७.८४.२

---

१. राजसूयेन राजा भवति । वाजपेयेन सम्राट् भवति । ऐतरेयब्राह्मणे ५.१.१.१३ । साम्राज्योल्लेखो वर्तते – साम्राज्येनाभिषिञ्चामि । यजुर्वेदे ९.६०

२. मैकडानल-महोदयोऽनुसन्दधाति—Neither the birds as they fly nor the rivers as they flow can reach the limits of his (Varuṇa's) dominions. Vedic Reader P. 184.

प्रो० काणे ऋग्वेद-युगे साम्राज्यस्य स्वरूपं विशदयन्नाह—These passages are sufficient to establish that the idea of suzerainty extending over many kingdoms was known in the times of the Ṛgveda and had been fully developed before the composition of the Aitareya and Śatapatha Brāhmaṇas. Hist of Dharmaśāstra Vol. III page 65.

३. ऋग्वेदे ५.२७.४–६

४. यजु० ९.२८,३०

५. ऋ० १०.१६८.२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

राष्ट्रस्य शासको राजा वा राष्ट्रपतिर्बभूव। नैक राष्ट्राणामपि क्वचिदेक एव राजा बभूव। शनैः शनैः कस्यचिद् राष्ट्रस्य क्षेत्र-विस्तारः समवर्धत। महाभारतकालेऽपि भारतं बहुषु राष्ट्रेषु (राज्येषु) विभक्तमासीत्। सभा० ४२.३७,३९। तेषां सर्वेषां राजानो युधिष्ठिरस्य प्रभुत्वं मेनिरे इति सभा पर्वणि युधिष्ठिर-सन्निधि-गतानां तेषां नियोगेन स्पष्टम्। अशोकस्य राज्ये प्रायः समग्रमाधुनिकभारतं ततोऽप्यधिकमपि आयत्तमासीदेव। परराष्ट्रं विजित्यापि न तत् स्वराज्ये सन्निधेयमिति मनुमतम्। ७.२०२

तत्रादर्शराष्ट्रस्य किं स्वरूपं भवेदिति रामस्य भरतं प्रति परिप्रश्नेन कल्पितुं शक्यते। तद्यथा—

कच्चिच्चैत्यशतैर्जुष्टः सुनिविष्टजनाकुलः।
देवस्थानैः प्रपाभिश्च तटाकैश्चोपशोभितः॥
प्रहृष्टनरनारीकः समाजोत्सवशोभितः।
सुकृष्टसीमापशुमान् हिंसाभिरभिवर्जितः॥
अदेवमातृको रम्यः श्वापदैः परिवर्जितः।
परित्यक्तो भयैः सर्वैः खनिभिश्चोपशोभितः॥
विवर्जितो नरैः पापैर्मम पूर्वैः सुरक्षितः।
कच्चिज्जनपदः स्फीतः सुखं वसति राघव॥

अयोध्याकाण्डे १००.४३–४६

रामायणे बृहद्राज्यं समग्रं भारतमिक्ष्वाकूणां बभूव। अयो० ८२.८

जनपदः

पूर्वोक्तो जनपदस्तु राष्ट्रस्य पर्यायः। महाभारतेऽपि जनपदश्च देशश्च राष्ट्रस्य पर्याय एव।[1] देशस्य विभागा राजधानीतो दूरस्था ग्रामवनप्राय-भूभागाः प्रदेश इति प्रथिताः।[2]

वैदिकयुगेऽपि जनपदो राष्ट्रस्य पर्याय इति तैत्तिरीयब्राह्मणे (२.३.९.९) बृहदारण्यके २.१.२० दृश्यते।

महाभारत आदर्शराष्ट्रं प्रायः रामायणवच्चित्रितम्। तत्र भूमेः शस्य-पुष्पफल-पशुपक्षिभिः समृद्धिः, शूराणां विदुषां सतां च सुखं, प्रजानां संप्रियता,

१. तत्र कुरुराज्यविषये—

तस्मिन् जनपदे रम्ये बहवः कुरुभिः कृताः। आदि० १०२.११
स देशः परराष्ट्राणि प्रतिगृह्याभिवर्धितः॥ आ० १०२.१२

युधिष्ठिरस्य राज्यं जनपद इति सभापर्वणि ३०.२ द्रष्टव्यम्

२. प्रदेशेष्वपि राष्ट्राणां कृतं युगमवर्तत। आ० १०२.५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

परस्परसहायेन संवर्धनं च भूरिशः प्रावर्तन्त ।[1] किमधिकं वक्तव्यम्—

कूपारामसभावाप्यो ब्राह्मणावसथास्तथा ।
तस्मिञ्जनपदे रम्ये बहवः कुरुभिः कृताः ॥ आदि० १०२.११

विराटपर्वणि युधिष्ठिरप्रभावेण पौरजानपदस्थितेर्विशेषा रामराज्यवदासन्निति भीष्मो प्रवक्ति ।[2] तथा हि—

गुणवन्ति च पानानि भोज्यानि रसवन्ति च ।
तत्र देशे भविष्यन्ति यत्र राजा युधिष्ठिरः ॥ २७.१९

कौटिल्यमतेन जनपदस्य सौष्ठवमधोविधविशेषणैः संजायते—सुरक्षितः आजीविकासम्पन्नश्च, शत्रुद्वेषी, समर्थसामन्तयुतः, हिंस्रजन्तुहीनः रमणीयः, शस्यसमृद्धः, खनिजपदार्थ-निर्भरः, हस्तिवनयुतः, गोधनः, पशुमान्, देवमातृकः, जलस्थलभागैः सेतुसम्बद्धः, पुण्यवान्, दण्डकरसहः, कर्मण्यकृषकैः पूर्णः, चरित्रनिष्ठजनवासः ।[3] स पुनर्विशेषयति—जनपदमूला दुर्गकोशदण्डसेतुवार्ताऽरम्भाः । शौर्यं स्थैर्यं दाक्ष्यं बाहुल्यं जानपदेषु ।[4] विशालाक्षमतेनापि—कोशो दण्डः ।

कुप्यं, विष्टिर्वाहनं निचयाश्च जनपदादुत्तिष्ठन्ते । अर्थशास्त्रे ८.१.२०

पुराभारते कस्यचिद् राष्ट्रस्यैकान्तिकसीमा निर्धारिता नासीत्[5] । समग्रंभारतमेकराष्ट्रमिति राष्ट्रभक्तिः समुदिता नाभवत् । काणे महोदयो निर्दिशति विषयेऽस्मिन्—

One element of modern Nationhood viz. being under the same government was wanting. But must be noted that from very ancict times there was always the aspiration among the great kings and the people to bring the whole Bhāratavarṣa "under one umbrella." Even in the west the sentiment of nationality practically arose after the partition of Poland, and as a consequence of the French Revolution and of the Industrial

१. आदि० १०२.२-७ २. विराट० २७.१३-२४

३. अर्थ० ६.१.८ । अन्यत्रकौटिल्यः 'सम्पन्ना नित्यमित्रा श्रेयसी भूमिरिति राष्ट्रनिर्माणधिया निर्दिशति । ७.१०.१३ । तत्रामित्राणि सन्ति—चोर-म्लेच्छाटवीवासाः । ७.१०.२०

४. अर्थशास्त्रे ८.१.२८

५. विश्वानि भुवनानि नियन्तुं मनीषा ऋग्वेदे जागर्ति । ८.१२.२८ । अनेन विश्वबन्धुत्वं वसुधैव कुटुम्बकम्, विश्वराज्यमित्यादर्शाः समजायन्त । कौटिल्यः समर्थयति—नयज्ञः पृथिवीं कृत्स्नां जयत्येव न हीयते । अर्थ० ६.१.१८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

revolution, which led manufacturing countries to search for markets and to exploit backward and less developed peoples. Vide Laski's Grammar of Politics Chap. VI.

प्रजाया उत्तरदायित्वं बभूव यद् देशभङ्गो न भवेत्। तथाहि गरुडपुराणे–

धन्यास्ते ये न पश्यन्ति देशभङ्गं कुलक्षयम्॥ १.११५.३

राज्यस्य भागाः

बृहद्राज्येषु शासनतन्त्रं सौष्ठवेन प्रवर्तयितुं तस्य भागाः प्रान्तेषु कृता आसन्।[1] प्रान्तानां सर्वोपरिशासका युवराजा उपराजा आधुनिकराज्यपालवद् बभूवुः। तेषां मन्त्रिमण्डलं, सेना, रक्षाकर्मचारिण इत्यादयः केन्द्रीयशासनव्यवस्थामनुहरन्ति स्म।

परराष्ट्रम्, वैदेशिकनीतिश्च

राष्ट्रप्रसङ्गे परराष्ट्रं चिन्तनीयमेव। कस्यचिद् राष्ट्रस्य सीमान्ते परराष्ट्रमिति साधारणकल्पना। परराष्ट्रममित्रमिति कूटनीतेः प्रथमोपदेशः।[2] साम-दान[3]-भेद-दण्डैश्च उपायानन्तरं परराष्ट्रं प्रतिग्रहणीयमिति महाभारतीयं मतम्।[4] शत्रुराज्यं विपत्तिग्रस्तं कार्यान्तरे व्यापृतं दृष्टवाक्रम्य निग्रहणीयम्।[5] परराष्ट्रे गुप्तचरादयो राजपुरुषाः स्वकार्यार्थं नियुक्ता बभूवुः।[6]

---

१. शासन-परिधिदृष्ट्या राज्यस्य प्रान्ताः, प्रदेशाः, विषयाः, भुक्तयश्चोत्तरोत्तरं लघुतरा विभागाः कृताः। प्रान्तानां विभाजनं प्रदेशेष्वभवत्। प्रान्ता आधुनिकस्टेट (State) समाः प्रदेशाश्च डिवीजन (Division) समा आसन्। प्रदेशानां विभाजनमाधुनिक-डिस्ट्रिक्ट (District) समा विषया इत्यभिहिता आसन्। तेषां विभाजनं भुक्तिष्वभवत्। भुक्तिषु ग्रामा समन्विता बभूवुः। अलटेकरः प्राचीन भारतीयशासनपद्धति पृ० १५३। पूर्वोक्तानि नामानि परस्परं पर्यायाणि कालान्तरे देशान्तरे च गृह्णन्ति स्म।

२. अथर्ववेदे निर्दिष्टम्--अन्नित्राणां सेना अभिघत्तमर्बुदे। ११.९.३

अथ च—अनयं मित्रादभयममित्रात्। १९.५.६

३. कच्चिच्च बलमुख्येभ्य परराष्ट्रे परन्तप।

उपच्छन्नानि रत्नानि प्रयच्छसि यथार्हतः॥ सभा० ५.४९

अत एव ते दिग्विजय-विभीषिकां न प्रत्यगुः, देशस्य जर्जरीकरणे तेषां प्रयासा अशंसनीया एव।

४. स देशः परराष्ट्राणि प्रतिगृह्याभिवर्धितः। आदि० १०२.१२

कच्चित्ते यास्यतः शत्रून् पूर्वं यान्ति स्वनुष्ठिताः।

साम दानं च भेदश्च दण्डश्च विधिवद्गुणाः॥ सभा० ५.५१

५. सभा० ५.५४

६. सभा० ५.५५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

शत्रुभूतपरराष्ट्रविनाशो यथा स्यात्, तथा प्रयतनीय इति महाभारते संकेतितम्—

वधेन च मनुष्याणां मार्गाणां दूषणेन च ।
आकराणां विनाशैश्च परराष्ट्रं विनाशयेत् ॥ शा० १३८.६१

वैदिकयुगे राज्ञो नीतिरासीत्—गुप्ताः सन्तु नो मित्राणि । अथर्व० ११.९.२ । तदनुसृत्य परवर्ति युगे मनुना यो नयः (परराष्ट्रनीतिः) समुद्भावितस्तेन सार्वलौकिककल्याणं विधीयमानं दृश्यते । स प्रथयति—

हिरण्यभूमिसम्प्राप्त्या पार्थिवो न तथैधते ।
यथा मित्रं ध्रुवं लब्ध्वा कृशमप्यायतिक्षमम् ॥ ८.२०८
धर्मज्ञं च कृतज्ञं च तुष्टप्रकृतिमेव च ।
अनुरक्तं स्थिरारम्भं लघु मित्रं प्रशस्यते ॥ ८.२०९

व्यवहारदृष्ट्या परराष्ट्रनीतिः परवर्तियुगे भारतीयराजानां परस्परवैमनस्यं प्राभावयत् । ते वैदेशिकाक्रमण कारिणां विरोधेऽपि क्वचिदेव संहिता बभूवुः, परं च क्वचिद् वैदेशिकानां सहाया भूत्वा भारतीयराजमपि स्वशत्रुभूतं विनाशयितुं समुद्यता आसन् । परराष्ट्रनीतेरयं पक्षो वैदेशिकानां भारते पदावधारणस्य विशेषकारणं बभूव ।[1]

परराष्ट्रैः सह सन्धिर्युद्धात् पूर्वं पश्चाद्वा क्वचिद् बभूव । अर्थशास्त्रानुसारेण त्रयोदशविधाः सन्धयो भवन्ति—आत्मामिषः, पुरुषान्तरः, आत्मरक्षणः, दण्डोपनतः, उपग्रहापग्रहौ स्वर्णः, कपालः, कोशोपनतः, आदिष्टः, उच्छिन्नः, परिदूषणः, देशोपनतश्च ।[2] कौटिल्यो दुर्बलराजानुपदिशति—

---

१. प्रो० काणे निष्कृषति—It cannot, however, be gainsaid that ever after experiencing the constant plundering expeditions and religious persecutions of Scythian, Hun and Moslem invaders from the first to the eleventh and the following centuries the able thinkers, warriors and statesmen of India did not enlarge their limited horizon and find means to consolidate and weld together into a united block the numerous small states that were scattered allover India.

२. एतेषां सन्धीनां विवरणमर्थशास्त्रे ७.३ अध्याये वर्तते । तत्र स्वर्णसन्धिरधोविधोऽस्ति—

विषह्य दानादायत्यां क्षमः स्त्रीबन्धनादपि ।
सुवर्णसन्धिर्विश्वासादेकीभावगतो भवेत् ॥ ७.३.३०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सन्धेयतामात्मनः परस्य चोपलभ्यः सन्दधीत विपर्यये विक्रमेण सिद्धिमपसारं वा लिप्सेत् । अर्थशास्त्रे ७.१५.३५,३६ ।

परराष्ट्राक्रमणादात्मानं रक्षितुं क्वचिद् विशेषसेना नियुक्ता बभूव । तथा हि प्रतिहार - साम्राज्ये राष्ट्रकूट-पाल-मुसलमानेभ्यो रक्षितुं क्रमशो दक्षिण-पूर्व-पश्चिम-सेना नियुक्ता बभूवुः ।

सन्धिः स्यायी भवेदित्यर्थं सशपथं सन्धीयते स्म । अन्यत्र प्रतिभूदानेन सन्धिरनुष्ठितः । संहिता स्म इति सत्यसन्धाः पूर्वं राजानः सत्येन सन्दधिरे ।[1]

मन्वनुसारेण परराष्ट्रीयराजास्त्रिविधा भवन्ति—शत्रवः, मित्राणि, उदासीनाश्च[2] । एतैः सर्वैः सह साम-दान-दण्ड-भेदोपपन्नोपायैर्वर्तेत ।[3] अस्मिन्प्रकरणे राज्ञा किं कर्तव्यमिति मनुनोद्घाटितम्—

सन्धिं विग्रहं चैव यानमासनमेव च ।
द्वैधीभावं संश्रयं च षडगुणांश्चिन्तयेत् सदा ।। ७.१६०

मित्रराजो धर्मज्ञः कृतज्ञः, तुष्टप्रकृतिकोऽनुरक्तः, स्थिरारम्भश्च श्लाघनीयः । मनु० ७.२०९

परराष्ट्रीया राजानस्तेषां मन्त्रिणो दूता वा राज्ञा समदृताः । प्रायो राजकीयमहोत्सवेषु अन्यथा आहूता वा विविधोपायनप्रदानेन ते मैत्रीभावं प्राकटयन् । अशोको विदेशेषु भारतीयचिकित्साविज्ञानानुसंहितौषधभैषज्यानि नैकदेशेषु प्रैषयत् । भारतीयसंस्कृतिं सर्वलोकहिताय विदेशेषु प्रसारयितुं नैकराजास्तेषां कुटुम्बिनो वा राजपदं परित्यज्यापि साधुपथं स्वीकृत्य बहु कृतवन्तः ।

---

१. अर्थ० ७.१७.३–८

२. मनुः राज्ञः परामृशति यत् शत्रुमित्रोदासीनराजानां संख्याधिका न भवेत् । तद्यथा—

सर्वोपायैस्तथा कुर्यान्नीतिज्ञः पृथिवीपतिः ।
यथास्याधिकं न स्युर्मित्रोदासीनशत्रवः ।। ७.१७७

एते त्रयो न विप्रलभन्ते इति राज्ञा प्रयतनीयम् । ७.१८०

३. साम्ना दानेन भेदेन समस्तैरथवा पृथक् ।
विजेतुं प्रयतेतारीन् न युद्धेन कदाचन ।। ७.१९८

अत्र युद्धाद् राजा विरजेदिति मनुः शिक्षयति ।

अन्यच्चापि — तस्माद्युद्धं विवर्जयेत् । ७.१९९

सामदानाभ्यां दुर्बलान् भेद-दण्डाभ्यां बलवत्तरानुपनमयेदिति कौटिल्यः । अर्थ० ७.१६.३–४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

परराष्ट्रनीदिशा महत्त्वपूर्णा अपि दूता विरलमेव स्थायिरूपेण नियुक्ता दृश्यन्ते ।

परराष्ट्रनीतिः सन्धि-विग्रहादिषड्गुणानधिकरोति । तत्रोच्चतरशक्ति-सम्पन्नेन सन्धिः, अल्पशक्तिसम्पन्नेन विग्रहः[1] (वैरभावाद् युद्धम्), समान-शक्तिकेन आसनम् (उपेक्षा), कृतविजय-निश्चयः शत्रुंप्रयाणमेव यानम्, संश्रयः सामन्तभावः, द्वैधीभावस्तु काले-काले मित्रभावः, शत्रुभावो वा भवति ।[2]

त्रिविधा आक्रमणकारिणो भवन्ति धर्मविजयी, लोभविजयी, आसुर-विजयी च । तत्र धर्मविजयी आक्रान्तस्य विनयावनते सति युद्धं समापयति । आक्रमणानन्तरं विजयेन भूमिं द्रव्यं च लब्ध्वा लोभविजयी तुष्यति । भूमि-द्रव्यपुत्रदारप्राणहरणेनासुरविजयी विश्रामं लभते । अर्थ १२.१.१२–१७

परराष्ट्राणां प्रवृत्तीनां ज्ञानाय गृहकपोतं नियोजिता भवेयुः ।[3]

दुर्वहभारविधायिनी परराष्ट्रनीतिरपरिमेयापि कौटिल्येनाधोविधं संक्षिप्तं व्याख्याता—

तेषां शत्रुविरोधे यन्मित्रमेकार्थतां व्रजेत् ।
शक्त्या तदनुगृह्णीयाद् विषहेत यया परम् ॥
प्रसाध्य शत्रुं यन्मित्रं वृद्धं गच्छेदवश्यताम् ।
सामन्तैकान्तराभ्यां तत् प्रकृतिभ्यां विरोधयेत् ॥
तत्कुलीनावरुद्धाभ्यां भूमिं वा तस्य हारयेत् ।
यथा वानुग्रहापेक्षं वश्यं तिष्ठेत्तथा चरेत् ॥
नोपकुर्यादमित्रं वा गच्छेद्यदतिकर्शितम् ।
तदहीनमवृद्धं च स्थापयेन्मित्रमर्थवत् ॥
अर्थयुक्त्या चलं मित्रं सन्धिं यदुपगच्छति ।
तस्यापगमने हेतुं विहन्यान्न चलेद्यथा ॥
अरिसाधारणं यद्वा तिष्ठेत्तदरितः शठम् ।
भेदयेद् भिन्नभुच्छिन्द्यात् ततः शत्रुमनन्तरम् ।
उदासीनं च यत्तिष्ठेत् सामन्तस्तद् विरोधयेत् ।
ततो विग्रहं सन्तप्तमुपकारे निवेशयेत् ॥

---

१. अपकारो विग्रहः । अर्थ० ७.१.७

२. द्वैधीभावस्त्वन्यथापि परिभाषितः । तथा हि स्वसैन्यबलं द्विभागे विभज्य नैकदिशासु शत्रुमुद्विजयेत् ।

३. अर्थशास्त्रे १३.१.७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अमित्रं विजगीषुं च यत्संचरति दुर्बलम् ।
तद्बलेनानुगृह्णीयाद् यथा स्यान्न पराङ्मुखम् ।।
अपनीय ततोऽन्यस्यां भूमौ वा सन्निवेशयेत् ।
निवेश्य पूर्वं तत्रान्यद्दण्डानुग्रहहेतुना ।।
अपकुर्यात् समर्थं वा नोपकुर्याद् यदापदि ।
उच्छिन्द्यादेव तन्मित्रं विश्वस्याङ्कमुपस्थितम् ।।
मित्रव्यसनतो वारिरुत्तिष्ठेद्योऽनवग्रहः ।
मित्रेणैव भवेत् साध्यश्छादितव्यसनेन सः ।।
अमित्रव्यसनान्मित्रमुत्थितं यद्विरज्यति ।
अरिव्यसनसिद्ध्या तच्छत्रुणैव प्रसिद्ध्यति ।।
वृद्धिं क्षयं च स्थानं च कर्शनोच्छेदनं तथा ।
सर्वोपायान् समादध्यादेतान् यश्चार्थशास्त्रवित् ।।
एवमन्योन्यसंचारं षाडगुण्यं योऽनुपश्यति ।
स बुद्धिनिगडैर्बद्धैरिष्टं क्रीडति पार्थिवैः ।।

अर्थशास्त्रे ७.१८.३५–४८

कौटिल्यः पर्राष्ट्रनीति-प्रकरणे मन्त्रयुद्धस्य[1] नानाविधकपट-छल-छद्म-कैतव-माया-जाल-कूट-वञ्चनप्रबन्धान् निदर्शयति येषां घोरप्रयोगेण दुर्बलोऽपि राजा सबलं शत्रुराजं प्रध्वंसयेत् । एतेषु सर्वेषु कूटविधानेषु सेनायाः स्वल्पोपयोग आसीत् । तत्र प्रत्यक्षयुद्धस्यावसरः क्वचिदेव बभूव किन्तु गूढपुरुषाणां विषप्रयोग-मारण-दहन-भेदनोपाया भृशं भूयिष्ठं प्रयुक्ता आसन् । अत्र कौटिल्यः किमपि 'अकरणीयम्' न प्रतिजानाति । पर्राष्ट्रनीतेः परिधि-र्भारताद् बहिरपि बहुलीभूतो वैदिकार्यराजाः पश्चिमोत्तरस्थल-मार्गैर्निर्गम्य पारस-(ईरान) देशं वंशीकृतवन्तः । ततः परं 'एशियामाइनर' प्रदेशं जग्मुः । तत्र तैर्लेखितो बोगजकोई'-नामक उत्कीर्णलेखोऽसन्दिग्धं तेषां प्रसारणं प्रमाणयति । लेखेऽस्मिन् केवलं भारते स्तुता इन्द्र-वरुण-मित्र-नासत्यादयो देवा वर्णिताः । सम्भवतस्ते द्रुह्युवंशीया राजान आसन् येषां पूर्वोक्तमार्गेण भारताद्बहिर्गमनं म्लेच्छेषु राज्यस्थापनं च पुराणेषु प्रथितम् । पारसीकार्यै-र्भारतानां राजनीतिकसम्बन्धः प्रगाढ आसीत् । पारसीकराजस्य क्षयार्षस्य

---

१. मन्त्रयुद्धं संक्षेपेणार्थशास्त्रेऽधोविधं वर्णितम्—
एकं हन्यान्न वा हन्यादिषुः क्षिप्तो धनुष्मता ।
प्राज्ञेन तु मतिः क्षिप्ता हन्याद् गर्भगतानपि ।। १०.६.५३

२. विस्तृतविवरणमर्थशास्त्रे द्वादशेऽधिकरणे द्वितीयाध्यायतः पञ्चमाध्यायं यावत् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सेनायामेका भारतवासिनामनीकिनी बभूव या तस्य यूनानाक्रमणे साह्यं समाचरत् ।

भारतीयसम्राट् चन्द्रगुप्तमौर्यो वङ्गदेशात् पारसीक-देशं यावत् साम्राज्यं विस्तारितवान् । स सीरियादेशस्य सम्राजं सिल्यूकसं पराजित्य तस्य कन्यां विवाहोपायनं जग्राह । द्वयोः सम्राजोः दौत्यसम्बन्धश्चिरकालं निर्व्यूढो बभूव । मेगस्थनीजस्तस्य प्रथमदूतो पाटलिपुत्रस्य राजसभां समलंचकार । बिन्दुसारसविधे सीरियातो डायमेक्सनामको राजदूतः समागमत् । अशोकस्य राज्ये तुषास्फ इति ख्यातो यवनः सौराष्ट्रस्य राष्ट्रिय-पदे नियुक्त आसीत् ।

अशोको वैदेशिकराज्येषु-सीरिया-मेसीडोनिया-एपिरस-मिस्र-काइरीनादि यवनराज्येषु चिकित्साव्यवस्थां बहुलीचकार । २६ ई० पू० ख्रीष्टाब्दे कश्चित् पाण्ड्यराजो रोमसम्राज आगस्टसस्य सविधे दूतमण्डलं प्रेषयमास ।

चीनदेशस्य सम्राट् बू मगधनरेशं बौद्धपण्डितमेकमयाचत । स ५४६ ई० वर्षे महाराजानुरोधेन चीनमध्यगच्छत् ।

लङ्का-(सिंहलः, श्रीलङ्कः) नामको देशो विजय इति ख्यातेन भारतीय-राजकुमारेण स्वायत्तीकृतो भारतीयभाषासंस्कृतिसन्दर्भैरभ्युदयं प्रापितः । भारतेन सम्बन्धं द्रढयितुं स मदुरास्थपाण्ड्य-राजकन्यामुदूढवान् । तस्य राजधानी ताम्रपर्णीनगर्यामासीत् । तत्रत्यराजस्तिष्योऽशोकस्य समकालिक-स्तस्मै बहुविधोपायनैः सह दूतमण्डलं प्रेषयामास । अशोकः स्ववंशीयं महेन्द्रं बौद्धधर्मस्य सिंहलद्वीपे प्रचाराय प्रेषयामास । तस्योपदेशैः प्रभाविता तत्रत्या जनता बौद्धधर्मावलम्बिनी संजाता । महेन्द्रस्य स्वसा संघमित्रा बोधिवृक्षशाखामुपनीय कालान्तरे स्वभ्रातुर्धर्मप्रचारप्रवृत्तिं योजयितुं लङ्कां गतवती । सा शाखानुराधपुरे प्रत्यारोपिताद्यापि सिंहलवासिभ्यो बौद्धच्छायां समर्पयति । भारतीयतमिलराजो यदा कदा सिंहलमाक्रम्य स्वराज्यं स्थापयामास । कालान्तरे सिंहलराजो मेघवर्णो गुप्तवंशीयभारतसम्राजे समुद्रगुप्ताय बहुमूल्योपहारादीन् प्रेषयामास । स पुनः समुद्रगुप्ताद् बोधगया-स्थले विहारनिर्माणायानुज्ञां लेभे । चोलपाण्ड्याधिपतीनां सिंहलराजैर्यदा कदा युद्धानि समभवन् । ख्रीष्टस्यैकादशशतके राजराज इति ख्यातश्चोल-विजेता सिंहलस्योत्तरभागे तस्य पुत्रो राजेन्द्रचोलः सम्पूर्णसिंहल-देशे च स्वशासनं प्रवर्तयामासतुः ।

कम्बुज (आधुनिक कम्बोडिया) देशस्य दक्षिणभागः फूनान इति ख्यातिं लेभे । तत्र कौण्डिन्यनामको ब्राह्मणः ख्रीष्टस्य प्रथमशतके राज्यं स्थापितवान् । तस्य वंशो वर्षशतं तत्र शशास । तदनन्तरं तत्रत्यो राजा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

फंचन इतिनामा राजा बभूव। स भारते दूतमण्डलं खीष्ट-तृतीयशतकस्य प्रथमपादे प्रेषयामास। कम्बुजप्रदेशस्य राजा ईशानवर्मा सप्तमशतकस्य तृतीयचरणे भारतेन दौत्य-सम्बन्धं चकार।

मलयप्रायद्वीपस्य सुमात्रा-जावा-बाली-बोर्नियो - द्वीपानां चाधिपतयो मूलतः कलिङ्गवासिनः शैलेन्द्रवंशीयाः प्रसिद्धतमा राजन्ते स्म। तत्रत्यः सम्राड् बालपुत्रदेवः खीष्टनवमशतकस्य मध्यभागे नालन्दायां विहारमेकं निर्मापयामास। तस्य सम्भरणार्थं पञ्चग्रामान् वङ्गाधिपं देवपालं प्रार्थयामास। देवपालः प्रार्थनास्वीकरणं ताम्रपत्र उट्टङ्कितवान्। शैलेन्द्राणां विभूतिस्तत्कालीनजगति अनुत्तमं विभाति। तस्य दैनिकायः २०० मन स्वर्ण आसीत्। भारतेऽपि तादृशः समृद्धः कश्चिद्राजानाभूत्।

एकादशे खीष्टशतके शैलेन्द्रराजस्य चूडामणिवर्मणश्चोलराजैर्मैत्री संजाता। स नागपट्टने (आधुनिकनेगापटमे) विहारमेकं रचयामास। राजराजचोलः प्रयोजनेऽस्मिन् ग्राममेकं प्रादात् किन्तु राजराजस्योत्तराधिकारी राजेन्द्रचोलः शैलेन्द्रसाम्राज्यं ध्वंसयामासेति गर्हिता गाथा।

दुर्गः (राजधानी)

राष्ट्रपरिधौ बहवो दुर्गाः कृताः। तेष्वेकस्मिन् प्रमुखतो राजवसतिः (राजधानी) बभूव। राज्ञां कृते वैदिककालेऽपि दुर्गा बभूवुः। बृहद्दुर्गा महापुर इति विख्याताः। पुरस्तु सम्भवतः लघुदुर्गा आसन्। (तैत्ति० सं० ६.२.३.१; काठक० १४.१०; मै० सं० ३.८.१। ऐ० ब्रा० १.२३.२)

दुर्गस्य परं प्रयोजनमासीदात्मरक्षार्थं शत्रोर्विनाशाय वाक्श्यकवस्तूनां सैन्य-सामग्रीणां च सम्भृतिः[1], राज्ञो राजकर्मकराणां सेनायश्च सन्निवेशनम्। दुर्गसंश्रितो राजाक्रमकाणां निरोधं सोपधि कर्तुं समर्थो भवति। मनुर्निगदति —

तथारयो न हिंसन्ति नृपं दुर्गसमाश्रितम्। ७.७३
एकः शतं योधयति प्राकारस्थो धनुर्धरः।
शतं दशसहस्राणि तस्माद् दुर्गं विधीयते॥ ७.७४

---

१. कच्चिद् दुर्गाणि सर्वाणि धनधान्यायुधोदकैः।
यन्त्रैश्च परिपूर्णानि तथा शिल्पिधनुर्धरैः॥ सभा ५.२५
तेषां बृहत्सूची शान्तिपर्वणि दुर्गकर्म प्रकरणे ८७.३-१४ द्रष्टव्या। अर्थशास्त्रे दुर्गनिवेश-प्रकरणे राजधानीवास्तव्यानामावश्यकतापूरणार्थं संग्रहणीयवस्तुजातानां गणना कृता वर्तते।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ऋग्वेद आर्येतराणां दुर्गा वर्णिताः सन्ति ।[1] महाभारतानुसारेण युद्धक्षेत्रे सहभाविनां राज्ञां कृतेऽपि शतशोऽथ सहस्रशो दुर्गाणि कारितानि ।[2] तत्र षडविधानि दुर्गाणि यथावश्यकं विनिर्मितानि ।[3] दुर्गं यथानाम शत्रूणां कृते प्राकृतिकसंबाधैर्दुर्गम्यं बभूव । तस्य दुर्गमविधानाय परितो वप्राः परिखाश्च कृताः ।

दुर्गेषु प्रत्येकं कोटपालो दुर्गाध्यक्षो वा तस्य रक्षार्थं नियुक्तोऽभवत् । राष्ट्रस्य सीमान्तरक्षको दुर्गाध्यक्षः द्वारपालः, दुर्गपालो मर्यादाधुर्यो वा विख्यातः । दुर्गो माहात्म्यकारणमिति कौटिल्यो प्रोक्तवान्—दुर्ग-मित्र-प्रतिस्तब्धो हि स्वेषां परेषां च पूज्यो भवति । अर्थ० ७.१४.२८ ।

पराशरानुसारेण दुर्गे हि कोशदण्डोत्पत्तिरापदि स्थानं च जनपदस्य, शक्तिमत्तराश्च पौरजानपदेभ्यो नित्याश्चापदि सहाया राज्ञः ।[4] कौटिल्यः संवदति—दुर्गार्पणः कोशो दण्डस्तूष्णींयुद्धं स्वपक्षनिग्रहो दण्डबलव्यवहार आसारप्रतिग्रहः परचक्राटवीप्रतिषेधश्च ।[5]

आक्रमणे सति कीदृशो दुर्गो राज्ञाश्रयणीय इति कौटिल्येन निर्दिष्टम्—यत्रामित्रः प्रभूतसैन्योऽपि भक्तयवसेन्धनोदकोपरोधं न कुर्यात् । स्वयं च क्षयव्ययाभ्यां युज्येत । निचयापसारतो विशेषः । अर्थशास्त्रे ७.१५.९–१२

कोशः, आयः, व्ययश्च

पुरा प्रजासु यः कश्चिदधिकतमशक्ति-सामर्थ्यसाधन-सम्पन्नो बभूव स राजपदमध्यतिष्ठत् । आदिकालतो राज्ञः स्वीयसम्पत्तिः शस्यश्यामला, वनोपवन-निर्भरा, आकर-खनि-मण्डिता च धरित्री तस्योपयोगाय, उपभोगाय च बभूव । अन्यच्च राज्ञः स्वापतेयमावश्यकतानुसारेण तस्य स्वीयवार्ता-

१. ऋग्वेदे ५.३४.७; ७.२५.२ २. उद्योग० १९६.१४

३. धन्वदुर्गं महीदुर्गं गिरिदुर्गं तथैव च ।
मनुष्यदुर्गमब्दुर्गं वनदुर्गं च तानि षट् ॥ शान्ति० ८७.५

धन्वदुर्गं परितः पञ्चयोजनायते निर्जलप्रदेशे कृतम् । महीदुर्गमष्टहस्तोच्छ्रित प्राकारेण चतुर्दिशं रक्षितं बभूव । गिरिदुर्गं पर्वतश्रेणीभिर्मेखलितं बभूव । अब्दुर्गं परिखाभिः परिवृतमासीत् । वनदुर्गं दुर्गमवृक्षलताजालैर्योजनपर्यन्तं संवृतं कृतम् । नृदुर्गं चतुरंगिणीभिः सेनाभिः रक्षितमासीत् । शुक्रनीतिसगरे ४.६ । मानसोल्लासे नवविधदुर्गा वर्णिताः । परशुरामप्रतापेऽष्टविधा दुर्गा निर्दिष्टाः सन्ति ।

४. अर्थशास्त्रे ८.१.२६

५. अर्थशास्त्रे ८.१.३७ । दुर्गविशेषं कौटिल्यः पुनर्निर्दिशति—दुर्गाभावे च कोशः परेषाम् । दृश्यते हि दुर्गवतामनुच्छित्तिः । अर्थशास्त्रे ८.१.३८, ३९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रवृत्तिभिः प्राभवत् । राज्ञः कृषि-पशुपालनवाणिज्यादिभिः प्रारम्भिकयुगे महती समृद्धिः सर्वतोभावेन संसाधिता । नैकशिल्पोद्योगप्रवर्तनेन तस्य राजकोशे बहुविधभोग्यवस्तूनां संग्रहालयः समजायत ।

प्रजापालनप्रवृत्तीनां शनैः शनैः वैपुल्यं समजायत । तासां सम्यक् फलोन्मुखीकरणायाधिकाधिकधनस्यापेक्षा त्रिविधधनसंग्रहोपायान् संविधत्ते स्म । यथा —(१) प्रजाभ्यः बलिहरणेन । (२) उपायन-ग्रहणेन (३) युद्धावसाने पराजितशत्रोश्चलसम्पत्तेरधिग्रहणेन । ऋ० ७.१८.१९; ३.४८.५ । देवानां प्रीत्यर्थं बलिर्वैदिकयुगे प्रचलितो दृश्यते[1] । राजा देवरूपो भवतीतिधारणया तस्मै बलिस्तदा प्रादीयत[2] । राज्ञे बलिरयं परवर्तियुगे समाम्नातः कररूप एव प्रतिभाति ।[3] अथर्ववेदे करस्य प्राचीनतमं रूपमधोविधं वर्णितम्—

एमं भज ग्रामे अश्वेषु गोषु । ४.२२.२

अर्थात् प्रजानां गोषु अश्वेषु च भागो राज्ञां कृते निर्धारित आसीत् ।

सिंहप्रतीको विशो अद्धि सर्वा । ४.२२.७

अर्थात् सर्वाः प्रजाः स्वधनस्य भागं राजोपयोगायादुः ।

एतत्सर्वं यथा सूक्तेऽस्मिन् सूचितं राज्ञो राजत्व-प्रतिष्ठा-संवर्धनार्थं कृतमासीत् । औपनिषदिकबलिस्तु श्रद्धया देयः प्रतिभाति ।[4]

कौटिल्यः कोशं वर्णयति —धर्माधिगतः पूर्वैः स्वयं वा हेमरूप्यप्रायश्चित्रस्थूलरत्नहिरण्यो दीर्घामप्यापदमनायतिं सहेत । अर्थ० ६.१.१०

कौटिल्यो राजकोशस्य महत्त्वं विशदयन्नाह—कोशमूलाः कोशपूर्वाः सर्वारम्भाः । तस्मात् पूर्वं (राजा) कोशमवेक्षेत । अर्थशास्त्रे २.२

सर्वे राजवृत्तदर्शिनो नैकविधकोशनिचयं राज्ञे आवश्यकं निर्वर्णयन्ति । तद्यथा मनुः —नृपतौ कोशराष्ट्रे । ७.६५

---

१. ऋग्वेदे १.७०.९; ५.१.१०; ८.१००.९

२. ऋग्वेदे ७.६.५; १०.१७३.६ । 'वैश्यो बलिकृत्' इति ऐतरेयब्राह्मणे ३५.३

३. अमरकोशे

४. तदेतत् कौषीतकिब्राह्मणोपनिषदि स्पष्टीकृतम्—ब्रह्मणे एताः सर्वा देवता अयाचमाना बलिं हरन्ति । तथो एवास्मै सर्वाणि भूतान्ययाचमानायैव बलिं हरन्ति । २.१,२ । छान्दोग्ये 'सर्वा दिशो बलिमस्मै हरन्ति । २.२१.४ । अर्थात् सर्वदिक्स्था बलिं भोगं प्रापयन्ति । बृहदारण्यके १.५.३ । सर्वेऽस्मै देवा बलिमाहरन्ति । प्रश्नोपनिषदि—प्रजास्त्विमा बलिं हरन्ति । २.२.७ तदेव द्योतयति ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

राजकोशस्य संवर्धनोपाय इदंप्रथमतया करादानमस्ति। 'लोकाः करं सप्रणयं ददतु' इति विधातुं करस्य मात्रा नाधिका भवेदिति सुराजस्य चिन्ता बभूव। तद्यथा महाभारते---

यथा मधु समादत्ते रक्षन् पुष्पाणि षट्पदः।
तद्वदर्थान् मनुष्येभ्य आदद्यादविहिंसया॥ उद्योगे ३४.१७
पुष्पं पुष्पं विचिन्वीत मूलच्छेदं न कारयेत्।
मालाकार इवारामे न यथाङ्गारकारकः। उद्योगे ३४.१८

मनुः समर्थयति --- यथाल्पाल्पमदन्त्याद्यं वार्योकोवत्सषट्पदाः।
तथाल्पो ग्रहीतव्यो राष्ट्राद्राज्ञाब्दिकः करः॥ ७.१२९

राजपदं ध्रुवं करोमि अथ च राजकार्येऽहं सह भवामीति चावधारयन् सुप्रसन्नो लोकः साह्यभूतो राजकरं दद्यादिति महाभारतवचनमधोविधम्—

यथा राजा च कर्ता च स्यातां कर्मणि भागिनौ।
संवेक्ष्य तु तथा राज्ञा प्रणेयाः सततं कराः॥
नोच्छिन्द्यादात्मनो मूलं परेषां वापि तृष्णया।
ईहाद्वाराणि संरुध्य राजा संप्रीतदर्शनः॥
वत्सौपम्येन दोग्धव्यं राष्ट्रमक्षीणबुद्धिना।
भृतो वत्सो जातबलः पीडां सहति भारत॥ शान्ति ८८.१६-१८

प्रजासमृद्धौ राज्ञः समृद्धिः। प्रजानां प्रयत्नैः संगृहीतस्य निधेर्भागग्राही राजा भवति। इदमवधार्य स्वीयोद्योगेन राजा प्रजानां समृद्धिं प्रगुणीकर्तुमचेष्टत। इयमासीत् पुरा राजर्षीणां करनीतिः। कालिदासस्तां निर्वर्णयन्नाह–

प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः। रघुवंशे १.१८

करं विहाय बहून्यन्यानि स्रोतांसि तत्रासन् राजकोशस्य सम्भृतये। राजा स्वीयक्षात्रोत्कर्षेण परराष्ट्राधिष्ठातॄन् पराभूय तेभ्यो नैकविधानि रत्नमणिमाणिक्यस्वर्णादीनि च लब्धवा राजकोशं बिभर्तिस्म[1]। राज्ञः स्वीयवार्ताप्रवृत्तिभ्योऽन्न-पशु-मौक्तिक-खनिजादीनां संग्रहः प्रबभूव। शिल्पिनां सहयोगेन तस्य कलाकृतीनां सम्भारः समग्रराष्ट्रस्य गौरवं बभार। एतत्सर्वं सविस्तरं विवृतं कौटिल्यस्यार्थशास्त्रे।

---

१. परराजान् विजित्य तेभ्यः कोशनिधिं प्रापुरिति उद्योगपर्वणि १.१७। महीपालेभ्यः करसमाहरणं युधिष्ठिरस्य विराटपर्वणि ६५.१५ वर्णितम्। अर्थशास्त्रे ७.१०.१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रवृत्तिभिः प्राभवत् । राज्ञः कृषि-पशुपालनवाणिज्यादिभिः प्रारम्भिकयुगे महती समृद्धिः सर्वतोभावेन संसाधिता । नैकशिल्पोद्योगप्रवर्तनेन तस्य राजकोशे बहुविधभोग्यवस्तूनां संग्रहालयः समजायत ।

प्रजापालनप्रवृत्तीनां शनैः शनैः वैपुल्यं समजायत । तासां सम्यक् फलोन्मुखीकरणायाधिकाधिकधनस्यापेक्षा त्रिविधधनसंग्रहोपायान् संविधत्ते स्म । यथा —(१) प्रजाभ्यः बलिहरणेन । (२) उपायन-ग्रहणेन (३) युद्धावसाने पराजितशत्रोश्चलसम्पत्तेरधिग्रहणेन । ऋ० ७.१८.१९; ३.४८.५ । दवानां प्रीत्यर्थं बलिर्वैदिकयुगे प्रचलितो दृश्यते[1] । राजा देवरूपो भवतीतिधारणया तस्मै बलिस्तदा प्रादीयत[2] । राज्ञे बलिरयं परवर्तियुगे समाम्नातः कररूप एव प्रतिभाति ।[3] अथर्ववेदे करस्य प्राचीनतमं रूपमधोविधं वर्णितम्—

एमं भज ग्रामे अश्वेषु गोषु । ४.२२.२

अर्थात् प्रजानां गोषु अश्वेषु च भागो राज्ञां कृते निर्धारित आसीत् ।

सिंहप्रतीको विशो अद्धि सर्वा । ४.२२.७

अर्थात् सर्वाः प्रजाः स्वधनस्य भागं राजोपयोगायादुः ।

एतत्सर्वं यथा सूक्तेऽस्मिन् सूचितं राज्ञो राजत्व-प्रतिष्ठा-संवर्धनार्थं कृतमासीत् । औपनिषदिकबलिस्तु श्रद्धया देयः प्रतिभाति ।[4]

कौटिल्यः कोशं वर्णयति —धर्माधिगतः पूर्वैः स्वयं वा हेमरूप्यप्रायश्चित्रस्थूलरत्नहिरण्यो दीर्घामप्यापदमनायतिं सहेत । अर्थ० ६.१.१०

कौटिल्यो राजकोशस्य महत्त्वं विशदयन्नाह—कोशमूलाः कोशपूर्वाः सर्वारम्भाः । तस्मात् पूर्वं (राजा) कोशमवेक्षेत । अर्थशास्त्रे २.२

सर्वे राजवृत्तदर्शिनो नैकविधकोशनिचयं राज्ञे आवश्यकं निर्वर्णयन्ति । तद्यथा मनुः —नृपतौ कोशराष्ट्रे । ७.६५

---

१. ऋग्वेदे १.७०.९; ५.१.१०; ८.१००.९

२. ऋग्वेदे ७.६.५; १०.१७३.६ । 'वैश्यो बलिकृत्' इति ऐतरेयब्राह्मणे ३५.३

३. अमरकोशे

४. तदेतत् कौषीतकिब्राह्मणोपनिषदि स्पष्टीकृतम्—ब्रह्मणे एताः सर्वा देवता अयाचमाना बलिं हरन्ति । तथो एवास्मै सर्वाणि भूतान्ययाचमानायैव बलिं हरन्ति । २.१,२ । छान्दोग्ये 'सर्वा दिशो बलिमस्मै हरन्ति । २.२१.४ । अर्थात् सर्वदिक्स्था बलिं भोगं प्रापयन्ति । बृहदारण्यके १.५.३ । सर्वेऽस्मै देवा बलिमाहरन्ति । प्रश्नोपनिषदि—प्रजास्त्विमा बलिं हरन्ति । २.२.७ तदेव द्योतयति ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

राजकोशस्य संवर्धनोपाय इदंप्रथमतया करादानमस्ति। 'लोकाः करं सप्रणयं ददतु' इति विधातुं करस्य मात्रा नाधिका भवेदिति सुराजस्य चिन्ता बभूव। तद्यथा महाभारते---

यथा मधु समादत्ते रक्षन् पुष्पाणि षट्पदः।
तद्वदर्थान् मनुष्येभ्य आदद्यादविहिंसया॥ उद्योगे ३४.१७
पुष्पं पुष्पं विचिन्वीत मूलच्छेदं न कारयेत्।
मालाकार इवारामे न यथाङ्गारकारकः। उद्योगे ३४.१८

मनुः समर्थयति --- यथाल्पाल्पमदन्त्याद्यं वार्योकोवत्सषट्पदाः।
तथाल्पो ग्रहीतव्यो राष्ट्राद्राज्ञाब्दिकः करः॥ ७.१२९

राजपदं ध्रुवं करोमि अथ च राजकार्येऽहं सह भवामीति चावधारयन् सुप्रसन्नो लोकः साह्यभूतो राजकरं दद्यादिति महाभारतवचनमधोविधम्—

यथा राजा च कर्ता च स्यातां कर्मणि भागिनौ।
संवेक्ष्य तु तथा राज्ञा प्रणेयाः सततं कराः॥
नोच्छिन्द्यादात्मनो मूलं परेषां चापि तृष्णया।
ईहाद्वाराणि संरुध्य राजा संप्रीतदर्शनः॥
वत्सौपम्येन दोग्धव्यं राष्ट्रमक्षीणबुद्धिना।
भृतो वत्सो जातबलः पीडां सहति भारत॥ शान्ति ८८.१६-१८

प्रजासमृद्धौ राज्ञः समृद्धिः। प्रजानां प्रयत्नैः संगृहीतस्य निधेर्भागग्राही राजा भवति। इदमवधार्य स्वीयोद्योगेन राजा प्रजानां समृद्धिं प्रगुणीकर्तुमचेष्टत। इयमासीत् पुरा राजर्षीणां करनीतिः। कालिदासस्तां निर्वर्णयन्नाह–

प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः। रघुवंशे १.१८

करं विहाय बहून्यन्यानि स्रोतांसि तत्रासन् राजकोशस्य सम्भृतये। राजा स्वीयक्षात्रोत्कर्षेण परराष्ट्राधिष्ठातॄन् पराभूय तेभ्यो नैकविधानि रत्नमणिमाणिक्यस्वर्णादीनि च लब्धवा राजकोशं बिभर्तिस्म[1]। राज्ञः स्वीयवार्ताप्रवृत्तिभ्योऽन्न-पशु-मौक्तिक-खनिजादीनां संग्रहः प्रबभूव। शिल्पिनां सहयोगेन तस्य कलाकृतीनां सम्भारः समग्रराष्ट्रस्य गौरवं बभार। एतत्सर्वं सविस्तरं विवृतं कौटिल्यस्यार्थशास्त्रे।

---

१. परराजान् विजित्य तेभ्यः कोशनिधिं प्रापुरिति उद्योगपर्वणि १.१७। महीपालेभ्यः करसमाहरणं युधिष्ठिरस्य विराटपर्वणि ६५.१५ वर्णितम्। अर्थशास्त्रे ७.१०.१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कूटपथेनासद्वृत्तिकान् समृद्धपुरुषान् घातयित्वा तेषां सर्वस्वं राजकोशे बिभृयादिति कौटिल्यस्य कुटिला नीतिरर्थशास्त्रे वर्णिता ।[1]

पौरजानपदान् लौकिकदृश्यमैन्द्रजालिकविधिना मायया वा प्रदर्श्य तेभ्यो धनमाहरेदिति ।[2]

राज्यस्य रक्षणाय संवर्धनाय च नैकविधवस्तूनामावश्यकताः पूरयितुं नानाविधमायमुखं कौटिल्येन निदर्शितम् ।[3]

१. शुल्क-दण्ड-पौतव-सुरा-सूना-सूत्र-तैल-घृत-क्षार-सौवर्णि-पण्यसंस्था-वेश्या-द्यूत-वास्तुकादि-व्यवहारकृद्भ्यः ।
२. सीताभागः (कृषिजषड्भागः), बलिः, करः, वाणिज्यं, नौकागमनं, पट्टनोपयोगः, विवीतं वर्तनी च ।
३. सुवर्ण-रजतवज्रमणि-मुक्ताप्रवालशंखलोहलवण-भूमि-प्रस्तररस-धातवः ।
४. पुष्प-फल-वाट-षण्ड-केदार-मूलादिभ्यः ।
५. पशुमृगद्रव्य-हस्तिवनादिभ्यः ।
६. जलस्थल-पथेभ्यः ।
७. मूलभागव्याजीपरिघ-क्लृप्त-रूपिकात्ययेभ्यः ।

एतत्सर्वं तु स्वराष्ट्रीय-प्रजाभ्यः तासामुत्पादेभ्यः प्राप्यमासीत् । समाहर्ता नामकोऽध्यक्ष आयवर्धनाय सचेष्टो बभूव । स व्ययं न्यूनीकर्तुं नियुक्त आसीत् ।[4]

भागदुघः संग्रहीता च वैदिकयुगे प्रजाभ्यो राजकीयभागमगृह्णन् । संग्रहीता कोशाध्यक्ष आसीत् ।[5] तस्य स्थानीयः परवर्तियुगे समाहर्ता बभूव ।

राज्ञः कोशव्ययप्रणाली समुचिता सती राष्ट्राभ्युदयमुपनयति भृत्यादीन् परितोषयति च । यथाधुना तथा पुरापि सदैव राष्ट्ररक्षणाय सेनाया महत्त्वं सातिशयं प्रतिभाति । राजकीयसेनाविभागस्य स्वभावतः कोशव्ययः सविशेषमासीत्, विशेषतो युद्धकाले[6] ।

वैदिकयुगे राष्ट्रस्य संवर्धनाय विपत्तिनिवारणाय च यज्ञादिधर्मकृत्य-कलापानां प्रयोजनं साधिष्ठमिति लोकाभिमतमासीत् । राजानः राजसूयादि-यज्ञान् महतो सम्भारेण बहुव्ययेनान्वतिष्ठन् ।

---

१. अर्थ० ५.२.५१–८१
२. अर्थ० ५.२.५०
३. अर्थशास्त्रे २.६.१–१०
४. एवं कुर्यात् समुदयं वृद्धिं चायस्य दर्शयेत् । ह्रासं व्ययस्य च प्राज्ञः साधयेच्च विपर्ययम् ।। अर्थशास्त्रे २.६.२८
५. Vedic Index रत्नी ।
६. कोशमूलो हि दुर्गसंस्कारो दुर्गरक्षणं च । दुर्गः कोशादुपजाप्यः परेषाम् । ८.१.३२,३३ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सर्वे वर्णाः सर्वे आश्रमाश्च स्वस्ववृत्तिषु मनुविहितपथेनाक्षुण्णं सुश्लिष्टं च संवर्धन्तामित्यर्थं परोलक्षजनानां कृते वृत्ती राजकोशात् प्रादीयत् ।

राजकर्मचारिणां बह्वी संख्या बभूव ।[1] न केवलं भृत्यादीनां वार्षिकवेतनं निर्धारितमासीदपितु युवराजो राजमाता राजमहिष्योऽपि कौटिल्यानुसारेणाष्टचत्वारिंशत्सहस्रमुद्रा वार्षिकवेतनं प्राप्नुवन् ।[2]

कौटिल्यो नैत्यिकं राजकीयं व्ययशरीरं वर्णयति । तदनुसारेण देवपितृपूजादानमन्तःपुरपाकशाला, दौत्यप्रचारणं, राष्ट्रियसम्पत्ति-शस्त्रास्त्र-पण्यादिसंग्रहो युद्धपयोगि-हस्तिरथाश्वपत्तीनां समृद्धिः पशु-मृग-पक्षिव्याल-वाट-प्रदर्शनी काष्ठतृणवाटा इत्यादयो राजकोशव्ययमपेक्षन्ते ।[3]

राजकीयव्ययस्योज्ज्वलपक्ष आसीदिष्टापूर्तदानदक्षिणादयः । प्रकरणेऽस्मिन् राजसूयप्रसङ्गेन निःशेषविश्राणितकोशजातो राजा लक्षितः ।[4]

राजकोशव्ययेन लोकसेवामधिकृत्य बहुविध-निर्माण-कार्याणि प्रचरन्ति स्म । तेषु प्रमुखाणि आसन् राजमार्गाः, मठाः, विहाराः, सेतु-बन्धाः, तडागाः, मठाः, स्तूप-चैत्यविहार-मन्दिराणि, धर्मशालाः, सत्रशालाः, चिकित्सालयाश्च ।

पूर्वोक्तैः स्पष्टं प्रतीयते यद् राज्यस्य सप्ताङ्गेषु कोशः सातिशयं महत्त्वं भजते यतो हि नाम शेषाणि षडङ्गानि कोशमेव भूयिष्ठं समाश्रित्य प्रतिष्ठामर्हन्ति ।

कौटिल्यः कोशं प्रशंसति—कोशमूलो हि दण्डः (सेना) । कोशाभावे दण्डः परं गच्छति । स्वामिनं वा हन्ति । सर्वाभियोगकरश्च । कोशो धर्मकामहेतुः । देशकालकार्यवशेन तु कोशदण्डयोरन्यतरः प्रमाणीभवति । सर्वद्रव्यप्रयोजकत्वात् कोशव्यसनं गरीयः । अर्थशास्त्रे ८.१.४७–५५

ई० पू० प्रथमशताब्दे कलिङ्गाधिपतिः खारवेलो हाथीगुम्फालेखानुसारेण दुर्गस्य नवीकरणाय, युद्धार्थं सैन्यसंचारणाय, कृषिसंवर्धनोपयोगि-प्रणाली-निर्माणाय, प्रजामनोरंजनार्थं समाजनृत्यादियोजनाय निर्वाणपथिकाश्रयगुहा-निर्माणाय, विहारमन्दिर-निर्माणाय च महद् व्ययं चकार ।

द्वितीयशताब्दे सौराष्ट्राधिपती रुद्रदामा सुदर्शनसरोवरस्य नवीकरणार्थं स्वकोषादेव प्रचुरधनराशिमुदश्चत्, न तु राजकोशात् ।

१-२. एतेषां बृहत्सूची अर्थशास्त्रे ५.३.५—२६

३. अर्थशास्त्रे २.६.११

४. रघुवंशे ५.१; शरीरमात्रेण नरेन्द्र तिष्ठन् ५.१५; तीर्थप्रतिपादितर्द्धिः, अकिंचनत्वं मखजं व्यनक्ति १५.१६ । राजा भूमि-द्रव्यदान-परिहारान् कारयेत् । अर्थशास्त्रे १३.५.१५ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यथा फाह्यानः सूचयति गुप्तवंशीया राजानो विदुषां ब्राह्मणानां, ब्रह्मचारिणां धार्मिकसंस्थानां च प्रगमनार्थं बहुधनं व्ययीकृतवन्तः। तेषां दानशाला दीन-निर्धन-क्षीणशक्तिसाधन - जनानां सहायार्थं[1] प्राचरत्। नैकतडाग-जलाशय-मन्दिर-सूर्तयश्च तैः कारिताः। समुद्रगुप्तस्य प्रयागस्तम्भ-लेखानुसारेण स कवीनां कलाविदां चाश्रयसम्भरणं पुरस्कारहेतुना विपुलधन-निचयं प्रादात्। सोऽयं सम्राट् महाराजानामैश्वर्यं सुप्रभं चकार।

ह्वेनसाङ्गस्य लेखानुसारेण महाराजहर्षवर्धनस्य चत्वारो व्ययाधिकारा आसन्। तद्यथा (१) राजकीयधार्मिक-पूजाविधानम् (२) राजकीय-कर्मचारिणां वेतनदानम् (३) विदुषां पुरस्कारार्पणम् (४) विविधसम्प्रदायानां संवर्धनार्थं च। विहारमन्दिरेषु शिक्षाप्रदानार्थं हर्षो बहुव्ययीकृतवान्। प्रमुखराजमार्गेषु तेनौषधालया यात्रिगृहा दीनहीनानां कृते भोजन-वस्त्र-वितरणं च व्यवस्थापितानि।

एवमेव कश्मीरकराजानां मठ-मन्दिरादि-निर्माणं कृषिसेचनाय प्रणाली-वाहखननं वेदवेदाङ्गादीनां प्रशिक्षणायाचार्याणां पुरस्करणं च प्राग्भावं लभन्ते स्म।

संग्रहेणेदमेव वचनं कोशव्ययदिशा विशदयति यत् प्रजाया धर्मार्थ-काममोक्षप्रवृत्तीनां सम्यक् संवर्धनाय वर्णाश्रमधर्मपथिकानां जीवनयात्रां सौष्ठवमयीं विधातुं प्रजानामैहलौकिकपारलौकिकाकांक्षाः पूरयितुं च श्रेष्ठ-राजाः सर्वस्वं व्ययीकृतवन्तः। विषमस्थितिषु प्रजानां प्राणरक्षणार्थं ससैन्यं त आत्मानमपि धनधान्योपेतमुपयोजयितुमुदग्रयन्ति स्म।

महाभारतानुसारेण राजा

दीनान्धकृपणानां च गृहाच्छादन-भोजनैः।
आनृशंस्यपरो राजा चकारानुग्रहं प्रभुः॥

याश्च तत्र स्त्रियः काश्चिद् हतवीरा हतात्मजाः।
सर्वास्ताः कौरवो राजा सम्पूज्यापालयद् घृणी। शान्ति० ४२.११,१०

मित्रम्

'सर्वा आशा मम मित्रं भवन्तु' इति अथर्ववेदे १९.१५.६ आदर्शवाक्यम्।

'आ तिष्ठ मित्रवर्धन' 'यथासो मित्रवर्धनस्तथा त्वा सविता करत्।' अथर्ववेदे ४.८.२,६। सवितुरादर्शेन राजा मित्रराष्ट्रं संवर्धयेत्।

---

१. ईदृशी सहायता मुगल-सम्राडकबरेण विहितासीदिति आइन-अकबरी-नामके ग्रन्थे वर्णितम्—Again by the order of the His Majesty a person of known integrity keeps in the public audience hall some gold and silver for the needy who have their wants relieved without delay. p. 14.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

राज्ञां पारस्परिकमैत्रशात्रवयोः प्रतिफलं परराष्ट्रनीतिरूपेण विकसति। ते यथापूर्वं दर्शितं बहवो राजानः सम्मिल्य शत्रोः विनाशं कुर्वन्तिस्म। ऋग्वेदानुसारेण दाशराज्ञ-महायुद्धं बभूव, यस्मिन् सुदा विजयी बभूव।[1] प्रकरणेऽस्मिन् दशराजानां मण्डलं स्वपरित्राणाय कृतमासीत्। इदं परराष्ट्रनीतिः सम्भूय समुत्थानं द्योतयति।

रामायणमहाभारतयोर्युद्धकाले मित्रराजा एकीभूय शत्रोर्विनाशाय पराक्रमन्ते स्म। रामो वालिनं युद्धे हत्वा, सुग्रीवमभिषिच्य तेन मैत्रीं सम्पाद्य विभीषणेन सन्धिं विधाय च स्वशत्रुं रावणं निगृहीतवान्। महाभारते कुरुक्षेत्रस्य महायुद्धे पाण्डवाः कौरवाश्च, मित्रराजैस्तेषां सेनाभिः सहभूयायुध्यन्त[2]।

मित्राणां शत्रूणां चाभिज्ञानाय दिग्विजययात्रा-प्रयाणं महाराजाः प्राकर्तयन्। क्वचिद्राजा युद्धे विफलीभूतो मित्रत्वमप्रार्थयत्। अन्यत्र स हृदये शात्रवं संवर्धयमानोऽरीभूतोऽन्यैररिभिः सह महाराजे संकटापन्ने सति युयोध।

कौटिल्यो नैकप्रकारेण मित्राणि विभजते। प्रथमं तावत् नित्यवश्यमनित्यवश्यं च। तयोरनित्यवश्यमेव श्रेयः। यावदुपकरोति तावन्मित्रं भवति। उपकारलक्षणं मित्रमिति। अर्थ० ७.९.१२-१४। वश्यमित्रं द्विविधं भवति -महाभोगमनित्यम्, अल्पभोगं नित्यम्। तयोर्नित्यमल्पभोगं श्रेयः। नित्यमल्पभोगः सातत्यादल्पमुपकुर्वन् महता कालेन महदुपकरोति। अर्थ० ७.९.१९,२२।

कौटिल्यो मित्रं प्रकारान्तरेण द्विविधं मन्यते- गुरुसमुत्थं महन्मित्रं लघुसमुत्थमल्पमित्रं च। तयोर्लघुसमुत्थमल्पमित्रं श्रेयः, यत् कार्यकालं नातिपातयति, दौर्बल्याच्च यथेष्टभोग्यं भवति नेतरत् प्रकृष्टभौमम्। ७.९.२७,२८

अन्यच्च, द्विविधं मित्रमर्थशास्त्रे परिकल्पितं हिरण्यभोगं भूमिभोगं च। एतयोर्द्वयोर्भूमिभोगं मित्रमेव कौटिल्यो मन्यते श्रेयो, यतो हि नाम भूमिलाभान्मित्रं हिरण्यं च भवतः। ७.९.४२-४६

कौटिल्यो युद्धेन मित्रलाभं भूमि-हिरण्यलाभाद् वरं मन्यते। ७.९.२

अर्थशास्त्रे मित्रं कीदृशं भवेदिति वर्णितमधोविधम्—

'पितृपैतामहं नित्यं वश्यमद्वैध्यं महल्लघुसमुत्थमिति। अन्यत्र विपत्ति-

१. ऋ० ७.३३.२,५;७.८३.८ अर्थववेदे १०१२८.१२

२. तत्र राज्ञां संघा निर्मिता आसन्निति उद्योगे—

बालास्त्विमे तैर्विविधैरुपायैः सम्प्रार्थिता हन्तुममित्रसाहाः। १.१८

३. अर्थ० ६.१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ग्रस्तस्य साह्यं प्रगाढमैत्रीकारणं प्रोक्तम् ।[1] कौटिल्येन मित्रमण्डलं विजगीषोर्नृपस्य संकेतितम् । तद्यथा—मित्राणि, मित्राणां मित्राणि, शत्रूणां शत्रवश्च ।[2]

निस्सन्देहं पूर्वोक्तमित्रामित्रनिर्णयो बहुशोऽकारणोद्भूतो दुर्णय एव भारतीयराजानां पारस्परिकशात्रवं जनयन् तेषां संघीभावे, छिद्रमिव भारतीयसाम्राज्यभावं शिथिरं चकार ।

कौटिल्यः कूटमित्रभावं निदर्शयति । तदनुसारेण शत्रुणा सह कपटमैत्रीभावं सम्पोष्य तं विजयेच्छुराजो घातयेत् ।

मित्रभूतः सपत्नानां हत्वा हत्वा च संवृतः । अर्थ० ७.१३.४६

यदा कश्चिद् राजा शत्रुणाक्रान्तोऽभवत् तदा मित्राणां साह्यभावेन स आत्मानमरक्षत् । सबलमित्रकारणात् कस्यचिद् राज्ञः प्रतापः समवर्तते । परिणामतः शत्रवस्तस्मात् पराङ्मुखा बभूवुः । मित्रदिशातो राजा निश्चिन्तमात्मानमन्वभवत् । मित्रेभ्यो राजा यथावश्यकं भूमि-हिरण्य-सैन्यबलानि नानाविधोपायनानि च प्राप्नोत् । अतएव प्रत्येकशो मित्रं तु समृद्धिकारणमेव मित्रमण्डलस्य प्रभावमक्षुण्णं चकार ।

युद्धकाले समुपस्थिते मित्रेण सह कथं व्यवहर्तव्यमिति कौटिल्येनार्थशास्त्रे मित्रव्यसनवर्गे विवेचितम् । तदनुसारेण—

(१) स्वार्थसिद्ध्यर्थं मित्रं न त्यजेत् ।
(२) मित्रं परित्यज्यान्यत्रागमनं द्वैधीभाव आत्मविक्रयश्च परिहार्यः ।
(३) युद्धकाले मित्रं न विस्मरणीयम् ।
(४) व्यसनापन्नं मित्रं रक्षेत् ।
(५) मित्रं नावमाननीयम् ।
(६) मित्रं भेदितं न स्यादिति यतनीयम् ।[3]

सामन्तराज्यम्

कस्यचिन्महाराजस्य स्वराष्ट्रस्य प्रत्यन्तराज्यानि सामन्तराज्यानि संज्ञितानि यदि नाम तत्रत्यशासका आत्महिताय स्वेच्छया महाराजस्याधिपत्यं स्वीकृत्य करदीभवन्ति अथ च तस्यैश्वर्य-संवर्धनयोजनासु स्वयं वा

---

१. आपद्धि सौहृदस्थैर्यमुत्पादयति । अर्थ० ७.९.८

२. स्वराज्यं परितः राज्यानि शत्रुराज्यानि । तानि परितो मित्रराज्यानि । तानि परितः शत्रुराज्यानि । एवं विधानि समुद्रान्तं शत्रुमित्रादिराज्यानि परम्परया प्रसृतानि भवन्ति । अर्थ० ६.२.१७ ।

३. अर्थशास्त्रे ८.५.२२–३०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रतिनिधिद्वारेण वा साह्यमाचरन्ति।[1] कश्चिद महाराजः सम्राडिति पदवीमधिष्ठातुं सर्वासु दिक्षु दूरं दूरमपि राज्यानि विजित्य तत्रत्यराजान् तेषां पुत्रान् वा स्वाधिपत्यं ग्राहयित्वा तान् सामन्तपदे स्थापितवान्।[2]

सामन्तराज्य-शासनस्य प्रायः सर्वाधिकारो राज्ञ इव सामन्तस्यैवासीत्। सम्राड् वा महाराजो वा तत्र विशेषकार्यजातेषु प्रजाभ्युदयोपायेषु वा परस्परोपस्कारभावं प्रादर्शयत्।

वैदिकसाहित्ये वरुणस्य नैकराष्ट्राणामाधिपत्यं प्रागेव दर्शितम्। स्वराज्यं व्यतिरिच्य तत्रान्यानि राज्यानि राष्ट्राणि सामन्तराज्यानि प्रतिभान्ति, यद्यपि तत्र सामन्तपदस्य प्रयोगो न दृश्यते।

रामायणे सामन्तानां विवरणं नैकस्थलेषु वर्तते। तथा हि—

(१) सामन्तराजसंघैश्च बलिकर्मभिरावृताम्। बाल० ५.१४

(२) दशरथः 'नतसामन्त आसीत्'। बाल० ७.२२

(३) विश्वामित्रो दशरथं पृच्छति—'अपि ते सन्नताः सर्वे सामन्तरिपवो जिताः। बाल० १८.४६

सम्राजो नियुक्तिस्तेषां सामन्तराजानां स्वीकरणेन समभवत्।[3]

मौर्य-गुप्त-हर्ष-साम्राज्येषु बहूनि सामन्तराज्यानि बभूवुः। सामन्तानां सम्राड्भिः सह प्रगाढं साह्यं विशेषतो युद्ध-भूमौ विभातिस्म। दक्षिणभारते सातवाहन-चालुक्य-राष्ट्रकूट-यादवानां सम्राजां बहवः स्वायत्ताः सामन्ता आसन्। पराजिता अपि ते आन्तरिकस्वायत्ततामभुञ्जन्। वस्तुतस्तेऽर्ध-स्वतन्त्रा आसन्।

अर्थशास्त्रानुसारेण सामन्ता सदैव मित्रभावापन्ना भवन्तु न तु शत्रु-भावापन्ना इति मन्त्रिणां प्रयासेन समभवत्। ५.६.१२–१७

---

१. माहाराज्यं साम्राज्यं प्रभुराज्यं च पर्यायाणि सन्ति Soveregin State इत्यर्थे। सामन्तराज्यमाश्रितराज्यं च Feudatory State स्तः। अर्थशास्त्रे तद्वश्यराज्यं प्रोक्तम्। ७.९.९–२२

२. अथर्ववेदे इन्द्रस्याधिराज्यमधोविधं वर्णितम्—
इन्द्रो जयाति न परा जयाता अधिराजो राजसु राजयातै॥ अथर्ववेदे ६.९८.२
अत्र 'राजसु राजयातै' इति सामन्तवाचकम् यथा रघुवंशे च।
गृहीतप्रतिमुक्तस्य स धर्मविजयी नृपः।
श्रियं महेन्द्रनाथस्य जहार न तु मेदिनीम्॥ ४.४३

३. अयोध्याकाण्डे १.४६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

संघः श्रेणी च

अर्थशास्त्रानुसारेण कस्यचिद् राज्यस्य सन्निधौ यत्र तत्र संघप्रदेशाः, श्रेणी-प्रदेशा आटविक-प्रदेशा वा स्वायत्तशासनं प्रवर्तयन्ति स्म । एतेषु प्रदेशेषु क्रमशः संघमुख्यः श्रेणीमुख्यः, आटविकमुख्यो वा तत्रत्यानामनुमोदनेन नेतृत्वं बुभुजे । कस्यचिद् महाराजस्य प्रतिपदं यतितव्यमासीद् यत्ते परस्परं सम्मिल्यापि महतीं शक्तिं न सम्पद्येरन् । राजा यथाकालं तेषां सहचारमपेक्षते स्म ।[1]

संघेषु परस्परविरोधबीजवपनाय समीपवर्ती राजा सत्रि-गुप्तचर- तीक्ष्णादीन्[2] नियोजयामास । यथावश्यकं तेषां शमनाय दुर्बलपक्षेण सहभूतः बलप्रयोगं विधत्ते स्म ।

संघा राज्ञां कूटयोजना विज्ञायात्मरक्षार्थं सावधानं यथायोग्यं प्रवर्तन्तेस्म ।[3]

सामन्तवत् श्रेणीमुख्यस्य राजनीतिकमहत्त्वं पर्याप्तमासीदिति कौटिल्येनार्थशास्त्रे निदर्शितम् ।[4]

राजरक्षोपायः

ऐतिहासिकयुगेऽपि राज्ञां शासनं विरलं न दृश्यते । शत्रुभूता अमात्याः, कुटुम्बिनोऽन्ये वा वैरिणो बहुविधप्रयोगैः कस्यचिद्राज्ञो जीवनान्तं कर्त्तुमनसो स्वव्यापारचेष्टासु विफलीकरणीया आसन् । स्वजीवनं संशयग्रस्तं विलोक्य स्वयं राजा तस्य कर्मचारिणश्च प्राणरक्षोपायानन्वतिष्ठन्त ।

विशेषसावधानविधिना राज्ञः प्राणहरणाय शत्रुकृतप्रयोगा निराक्रियन्ते स्म । अर्थशास्त्रो राज्ञ आत्मरक्षाप्रकरणमधोविधं विशदीकृतम्—

(१) शयनकक्षे धनुर्धारिस्त्रीगणैः, द्वितीय-तृतीय-चतुर्थकक्षे क्रमशो नपुंसकाभ्यागारिकैः, कुब्जवामन - किरातैः, मन्त्रि-सम्बन्धि-दौवारिकैश्च परिगृहीतोऽभवत् ।

(२) अन्तर्वंशिकसैन्येन राजान्तःपुरं च रक्षितम् ।

---

१. संघलाभो दण्डमित्रलाभानामुत्तमः । अर्थ० ११.१ । संघा हि संहतत्वादधृष्याः परेषाम् । ११.१.२ ।

२. वेश्या-प्लवक-नट-नर्तक-सौभिका प्रणिहिताः स्त्रीभिः संघमुख्यानुन्मादयेयुः । अर्थ० ११.१.४१ । कुलटास्त्रीणां भूमिका संघभेदने निकामं योगवती प्रतिभाति ।

३. संघेष्वेवमेकराजो वर्तेत । संघाश्चाप्येवमेकराजादेतेभ्योऽतिसन्धानेभ्यो रक्षयेयुः । अर्थशास्त्रे ११.१.७६,७७ ।

४. अर्थ० १३.३.१–५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(३) राज्ञो भोजने पाने प्रसाधने, औषधे च विषं सम्मिश्रच शत्रुर्न दद्यात् इत्यर्थं पूर्वमग्नये पक्षिभ्यश्च बलिं दद्यात् । अन्यैश्च नानालक्षणैर्भोजने विषविकारः परिलक्ष्यते स्म । विषान्नसविधे क्षुद्रजन्तवो म्रियन्त इति द्रष्टव्यमासीत् ।

(४) नित्यं जाङ्गुलीविदो भिषजश्चासन्नाः स्युः ।

(५) स्नानानुलेपनप्रघर्षचूर्णवासस्नानीयानि वस्त्रमाल्यं च स्ववक्षोबाहुषु विश्वस्तजनसाध्यमेनैव गृह्णीयात् ।

(६) नर्तकादयः शस्त्राग्निरसवर्जकं नर्मयेयुः ।

(७) पूर्वपरीक्षितयान-वाहन-नौकादिकमेव राजारोहेत् ।

(८) जलाशयोद्यानमृगयारण्यादिकं पूर्वं परीक्ष्य संसेवेत ।

(९) सैन्ययोगे सर्वतो रक्षितः सन्नद्धो भवेत् ।

(१०) राज्ञा निर्याणेऽभियाने च मार्गं उभयतः कृतारक्षो भवेत् ।

(११) जनसम्मर्दे न प्रविशेत् ।

(१२) दशपुरुषै रक्षितो यात्रा-समाजोत्सवादिकं द्रष्टुं गच्छेत् ।

(१३) सन्दिग्धानपि राजद्रोहकारिणो हन्तुं राजा नृशंसं कूटकपटव्यवहारं प्रवर्तयेत ।[1] तद्यथा —

स्वपक्षे परपक्षे वा तूष्णीं दण्डं प्रयोजयेत् ५.२.६७ । मिथ्याभियोगेन स्वरक्षार्थं निर्दोषा अपि महामात्रादयः प्रत्यक्षं विषप्रयोगेण वा मारिताः । मृगमरीचिकावत् प्रलोभनेन सम्बन्धिनं विलोभ्य तेनोच्चपदाधीशं स्वशत्रुं घातयेत् । सम्बन्धिनमपि 'अयं घातकः' इत्युद्घुष्याघातयेत् ।

(१४) सैनिकानां विद्रोहं निराकर्तुं नैकविधचरास्तेषां भावशुद्धिं सूचयितुं नियुक्ता भवेयुः । ५.३

(१'१) सन्दिग्धचरित्राणां मुण्डानां, जटिलानां स्थानिकानां, सिद्ध-व्यञ्जनानां, योगिनां मोहिनीनां स्त्रीणां मृत्युपाशाद् राजात्मानं रक्षेदिति विस्तरेणार्थशास्त्रे व्यख्यातम् ।[2]

अचिरविजितराज्येषु राजकार्यपरिधा औदार्यं प्रतिफलतीति स्वाभाविक-मेव कौटिल्यः सन्दर्भयति —

---

१. राज्योपघातिनस्तु वल्लभाः संहता वा ये मुख्याः प्रकाशमशक्याः प्रतिषेद्धुं दूष्यास्तेषु धर्मरुचिरुपांशु दण्डं प्रयुञ्जीत । ५.१.४
अनेनोपायेन महामात्रा अन्ये वा राज्याधिकारिणो घातिता अस्मै प्रयोजनाय तीक्ष्णाः, रसदाः, भिक्षुक्यश्च नियुक्ता आसन् ।

२. अर्थशास्त्र १३.२.३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(१) परदोषान् स्वगुणैश्छादयेत् ।
(२) स्वधर्म-कर्मानुग्रह-परिहार-दान-मान-कर्मभिश्च प्रकृतिप्रियहितानि अनुवर्तेत ।
(३) समानशील-वेष-भाषाचारतामुपगच्छेत् ।
(४) देश-दैवत-समाजोत्सव-विहारेषु च भक्तिमनुवर्तेत ।
(५) प्रचारकैः स्वराजनीतिकोपक्रमाणां प्रजासु प्रशंसनं कारयेत् । अनेन प्रसंगेन राज्ञो माहाभाग्यं, भक्तिश्च सुविदिता स्यात् ।
(६) भूमिद्रव्यदानपरिहारान् कारयेत् ।
(७) दीनानाथव्याधितान् प्रति अनुग्रहं चरेत् ।
(८) येन गुणेनोपावृत्तस्तं तीव्रीकुर्यात् ।[1]

राजकार्य-परिधिः

राजा राज्यस्य पूर्वोक्तानि सर्वाण्यङ्गानि सम्यक् प्रसाधयेदिति प्रथमकल्पः ।

संस्कृतेरादिकालतो मानवजीवनस्य सुष्ठु प्रचरणार्थं कस्यचित् पुरुषस्यात्मार्थं परार्थं च कार्याणि न्यूनाधिकं प्रभवन्त्येव । स तु स्वसम्बन्धिनां, कुटुम्बिनां स्वग्रामवासिनां च हितायैकाकी वान्यैः सह बहूपस्करोति । किन्तु नैतावद्भिस्तस्य जीवनयात्रा सम्यक्तया प्रसाध्यते । कस्यचिद्देशस्य समाजस्य वा सर्वे जना एकीभूय सर्वेभ्यः शाश्वतसुखसाधनानि प्रापयितुं उद्यञ्जते । सर्वेषां जनानामैक्यरूपं प्रतीकत्वेन प्रतिनिधित्वेन, नायकत्वेन च राजा प्रभवति । स समाजं, देशं वा एकमुखं कृत्वा प्रजानां समष्टिसंस्पृष्टं कार्यजातं कारयति करोति च । 'तस्माद्राज्ञा मनुष्या विधृता इति । तै० ब्रा० २.६.२.२ ।

वैदिकयुग इन्द्रवरुणादीनां देवानां प्रजापालनप्रवृत्तयः समकालिकराजानामादर्शा इव स्वीकृता विभान्ति[2] । तद्यथा वरुणस्यादर्शोपलब्धयः सन्ति —

(१) लोकविषयिणी सर्वज्ञतावाप्यते[3]
(२) मानवतां सात्त्विकवृत्ति-संवर्धनेन यशस्विनीं करोति ।[4]

---

१. अर्थशास्त्रे १३.५ ६–३३
२. ऋग्वेदे १.२५.१,२०;४.४२.१; शतपथ ५ ४.४.१०–१२
सहस्राक्षेण राजा हि सर्व एवोपमीयते । शान्ति० ९२.४१
एतद्वृत्तं वासवस्य यमस्य वरुणस्य च ।
तत्कुरुष्व महाराज वृत्तं राजर्षिसेवितम् ।। शान्ति ९२.५
३. चिकित्वाँ अभि पश्यति । कृतानि या च कर्त्वा । ऋ० १.२५.१५
४. उत यो मानुषेष्वा यशश्चक्रे असाम्या । ऋ० १.२५.१५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(३) साम्राज्य-संरक्षणम्।[1] शान्ति-स्थापनम्।

(४) लोकानां प्रगमनार्थं सुपथान् कारयति।[2]

सोऽयं वरुणः समाजे प्रधानतया न्यायव्यवहारस्याधिष्ठातासीत्। इन्द्रः स्वपराक्रमेण समाजरक्षणाय स्वराष्ट्रस्य पर राष्ट्रस्य चोपद्रवकारिणोऽदमयत्।

आदौ प्रजाया रक्षणं राज्ञः प्रमुखं कर्म आसीत्। तद्यथाथर्ववेदे—ब्रह्मचर्येण तपसा राजा राष्ट्रं वि रक्षति। ११.५.१७

एतदर्थं प्रजासु यथायोग्यमुपभोग्यवस्तूनां विभाजनं स व्यदधात्।[3] राजकार्याणि प्रजापालनं वा राज्ञोऽसंख्योद्योगान् स्वपरिधौ धारयतीति यजुर्वेदे देवानामौपम्येन सम्यग्दर्शितम्।[4]

यद्यपि राजा प्रजानामुन्नायको बभूव, तथापि स स्वेच्छाचारो मा भवत्विति राजधर्मविचारकैर्मनीषिभिः समीक्षितम्। मनू राज्ञो दैनिकसमुदाचारं प्रवर्तयत्यधोविधम्—

ब्राह्मणान् पर्युपासीत प्रातरुत्थाय पार्थिवः।
त्रैविद्यवृद्धान् विदुषस्तिष्ठेत्तेषां च शासने॥ ७.३७

तस्य नित्यसंस्कारोऽनेन विधिना जायेत। स नित्यमेव शिक्षते—

त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिं च शाश्वतीम्।
आन्वीक्षिकीं चात्मविद्यां वार्तारम्भांश्च लोकतः॥ ७.४३

स्वयमपि सुशासितो राजा प्रजाः सम्यक् शास्ति। इन्द्रादर्शेन राजा 'व्याघ्रप्रतीको अवबाधस्व शत्रूनिति प्रोक्तमथर्ववेदे।[5] एतदुद्दिश्य अस्मिन्निन्द्र मयि वर्चांसि धेहि इति निर्दिष्टमथर्ववेदे। ४.२२.३

इन्द्रादर्शो राज्ञां युद्धौत्सुक्यं निदर्शयति। युद्धं दुर्दान्तेभ्यः प्रजारक्षणार्थं, शत्रु-सम्पत्तिहरणार्थं धर्म-संस्थापनार्थं चाभवत्। राजा स्वयमेव सेनानी

---

१. धृतव्रतो वरुणः साम्राज्याय सुक्रतुः। ऋ० १.२५.१०। शत० ९.३.३.११

२. स आदित्यः सुपथा करत्। ऋ० १.२५.१२
कृष्णै त्वा रय्यै त्वा। पोषाय त्वा। वाज० ९.२२

३. अथर्व० ३.४.२। ततो न उग्रो वि भजा वसूनि इति।

४. यजुर्वेद ३७.१३,१६; ३८.८,९,१४,१९,२२,२७,२८।

५. अथर्व० ४.२२.७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

बभूव ।

मनुः स्पष्टयति—

आहवेषु मिथोऽन्योन्यं जिघांसन्तो महीक्षितः ।
युध्यमानाः परं शक्त्या स्वर्गं यान्त्यपराङ्मुखाः ।। ७.८९

अपरं च न्यायाधिकारो राज्ञां प्रशस्तं कर्मासीत् ।

ऐतरेयब्राह्मणानुसारेण राजा ब्रह्मणः (आध्यात्मिकज्ञानस्य), धर्मस्य च गोप्ता जातः । परवर्तियुगेऽशोकः सर्वेषां प्राणिनां हिताय समाचरत् । ऐतरेय-ब्राह्मणे राजा विश्वस्य भूतस्याधिपतिर्बभूवेति तस्य पूर्वतरा शिक्षा ।[3]

प्राथम्येन महाभारतयुगे सनातनराजकर्म निर्दर्शितम् —

शत्रूञ्जहि प्रजा रक्ष यजस्व क्रतुभिर्नृप ।
युध्यस्व समरे वीरो भूत्वा कौरवनन्दन ।। शान्ति० ९०.९

युद्धानन्तरं महाभारतानुसारेण लोकहितं राज्ञां परमं साध्यमस्ति । तथाहि भीष्ममुखेन —

यथा हि गर्भिणी हित्वा स्वं प्रियं मनसोऽनुगम् ।
गर्भस्य हितमाधत्ते तथा राज्ञाप्यसंशयम् ।
स्वं प्रियं समभित्यज्य यद् यल्लोकहितं भवेत् ।।
शान्ति० १६.४४.४६

---

१. कौटिल्यानुसारेण (अर्थशास्त्रे १०.३) युद्धभूमौ राजा न केवलं युध्येतापितु सर्वान् सैनिकान् यथाकालं प्रतिबोधयेच्च । भवतां युद्धेनेह लोके विजयश्रीर्हस्तगता भवेत् । यदि नाम युद्धे मरणं भवेत्तर्हि स्वर्गलाभः । The king no doubt fought in person; so Pratardana met death in war according to the kauṣītaki upanisad III. 1. Vedic Index P. 212 Pt. II

कृणोम्यार्जि मघवाहमिन्द्रः । ऋ० ४.४२.५

२. ब्रह्मणो गोप्तात्रनि । धर्मस्य गोप्तात्रनि । ८.१२

शतपथे समर्थितमेतत्—तदेनं (राजानं) वरुण एव धर्मपतिं धर्मस्य पतिं करोति । ५.३.३.९ । राजा चतुरो वर्णान् स्वधर्मे प्रतिष्ठापयेत् । वसिष्ठधर्मसूत्रे १९.४ । विदेशेष्वपि राजकीय-व्यवस्था धर्मसंस्थिता बभूव । Greek state was a religious institution. Millett : The Art of Drama P. 20.

अर्थशास्त्रे स्पष्टीकृतमेतत्—राजा कृतवर्णाश्रमस्थितिः । तस्मात् स्वधर्मं भूतानां राजा न व्यभिचारयेत् इति १३.१६, १७ ।

चतुर्वर्णाश्रमो लोको राज्ञा दण्डेन पालितः ।
स्वधर्मकर्माभिरतो वर्तते स्वेषु वर्त्मसु ।। १.४.१९

३. ऐ० ब्रा० ८.१२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

एवं त्वया कुरुश्रेष्ठ वर्तितव्यं प्रजाहितम् । आश्रम० १२.२०

प्रजापालनाय राजा देवैर्नियुक्त इति धारणासीत् ।
अन्यच्च राजा—

कृपणानाथवृद्धानां विधवानां च योषिताम् ।
योगक्षेमं च वृत्तिं च नित्यमेव प्रकल्पयेत् ॥ ८७.२४

'अभृतानां भवेद् भर्ता । शान्ति० ५४.२९

न केवलं मनुष्या अपितु सर्वे जीवजन्तवः क्षुधिताः सन्तो राज्ञा तर्पणीयाः ।

नैकविधं राजा प्रजाः सेवेत । स संप्रसादेन माता, पिता, गुरुः, गोप्तादिर्भूत्वा सम्यगाचरति ।[1] अतएव चोर-लम्पट-धूर्त-व्यभिचारिणां हृदये राजा दण्डभयेन पापाद्विरतिं जनयेदिति महाभारतीयो निर्देशः । यदि नाम चौर्यादिहिंसाकर्मा भवेत्तर्हि घोरदण्डविधानं पापानां कृते राज्ञः कर्तव्यमासीत् । राजपदं निष्कण्टकं सुरक्षितुं राज्ये सर्वथा शान्तिं च प्रतिष्ठापयितुं महाभारते वैज्ञानिकी शासन-पद्धतिर्विकसिता दृश्यते ।[2]

प्रजानामार्तित्राणाय राज्ञा बहुविधा सज्जा करणीयासीद्यतो हि नाम नारदो युधिष्ठिरं पृच्छति—

कच्चिदग्निभयाच्चैव सर्पव्यालभयात्तथा ।
रोगरक्षोभयाच्चैव राष्ट्रं त्वं परिरक्षसि ॥ सभा ५.११२

राजान्धमूकपङ्गून् व्यङ्गानबान्धवान् । सभा० ५१.१३

---

१. स (राजा) विष्णुना च देवेने शक्रेण विबुधैः सह ।
ऋषिभिश्च प्रजापाल्ये ब्रह्मणा चाभिषेचितः ॥ शा० ५९.१२०

२. उद्योग १३०.२६ ३. शान्ति० १३७.९९-१०२

४. तथा हि—(१) ग्रामाधिपतिः कार्यः । ११०,२०,१००,१००० ग्रामाणां उच्चोच्चतराधिपतयो नियोजनीयाः । (२) नगरे सर्वार्थचिन्तको नियोक्तव्यः । (३) करनिर्धारणं मार्दवेन कुर्यात् (४) आपदर्थं धनसंचयं कुर्यात् । (५) राष्ट्रबाधां प्रजाभ्यो बोधयेत् । (६) गोमिषु (वार्ता-व्यापृतेषु जनेषु) सौहार्दं वर्तयेत् । (७) जीविकार्जनवृत्तिषु लोका अवि श्रान्ताः करणीया । (८) धनिनः सत्करणीयाः यानाच्छादनभोजनैः । महाभारते शान्तिपर्वणि ८८-८९ अध्यायतः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पितेव पासि धर्मेण तथा प्रव्रजितानपि ।[1]

चतुर्वार्णिकजनेषु भेदभावलोपेन राज्ञः सुखं कल्प्यते स्म ।

राजकर्मसारं शान्तिपर्वणि वर्णितम्—

यज्ञो विद्या समुत्थानमसन्तोषः श्रियं प्रति ।
दण्डधारणमत्युग्रं प्रजानां परिपालनम् ।।
वेदज्ञानं तथा कृत्स्नं तपः सुचरितं तथा ।
द्रविणोपार्जनं भूरि पात्रेषु प्रतिपादनम् ।।
एतानि राज्ञां कर्माणि सुकृतानि विशां पते ।। २३.१०-१२

महाभारतानुसारेण महाराजः परीक्षित्—

विधवानाथकृपणान् विकलांश्च बभार सः ।
सुदर्शः सर्वभूतानामासीत् सोम इवापरः ।। आ० ४५.१०

इमे तु दयापात्रं सन्ति । अपरे ब्राह्मणादिचत्वारो वर्णाः शास्त्रविहितानि स्वयोग्यानि कर्माणि कुर्वन्त्विति राज्ञा प्रयतनीयमासीत् ।[2]

संक्षेपतो राजकार्यं महाभारतेऽस्ति—

राज्ञां वृत्तं च कोशश्च कोशसंजननं महत् ।
अमात्यगुणवृद्धिश्च प्रकृतीनां च वर्धनम् ।। शा० १०८.२

प्रजासु चारित्रिकसात्त्विकता-संवर्धनाय तासां कार्याकार्ययोर्बृहत्सूची यथावश्यकं राजभिर्घोषिता प्रकाशिता च बभूव । समाजे लोकानां परस्पर-सहायशीलतां सौहार्दं समादरं च यथायोग्यं संवर्धयितुं राज्ञः शासनानि वर्णाश्रमधर्मस्य सूक्ष्मातिसूक्ष्मदिशा निर्मितानि सावधानं प्रबोधितानि च ।[3] अशोकस्य शिलालेखास्तत्रोदाहरणं प्रस्तुवन्ति ।

---

१. समर्थितमेतत् शान्तिपर्वणि—

दीनान्धकृपणानां च गृहाच्छादनभोजनैः ।
आनृशंस्यपरो राजा चकारानुग्रहं प्रभुः ।। ४२.११

अर्थशास्त्रे च—बालवृद्धव्याधितव्यसन्यनाथांश्च राजा बिभृयात् । २.१ । काणे निर्दिशति—Kautilya provides for pensions and gratuities. He says 'the sons and wives of those that die on duty shall get subsistence and wages. Young children, aged persons and ailing persons related to the dead officers shall be shown favour Hist. Dharma-śāstra Vol. III p. 152.

२. आदि० ७५.७,९

३. शुक्रनीतिसारे १.२९२-३११ श्लोकेषु महत्त्वपूर्णानुशासनानि संगृहीतानि ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

रामायणानुसारेण राज्ञो दैनन्दिनकार्यजातमासीत्—जनपद-पुरवासिनां सुखशान्तिसंरक्षणभरणादिव्यवस्था । एतदर्थं तस्य नैके सहाया आसन् । तैः सह परामर्शेन शासकीयपद्धतिर्निर्व्यूढासीत् । तत्र गुप्तचरा राष्ट्रस्य विपत्सम्पदौ तयोर्निकार-पुरस्कारदिशां निवेदयन्तिस्म ।[1]

राज्ञः कार्यपरिधौ तस्य स्वयमेव धर्मप्रोत्साहनमुल्लेखनीयं वर्तते । धर्मस्त्वत्र न यायव्यवस्थामपि द्योतयति । एतदर्थं मौर्ययुगे धर्ममहामात्रः, सातवाहनयुगे श्रवणमहामात्रः, गुप्तयुगे विनयस्थितिस्थापकः, राष्ट्रकूटयुगे धर्माङ्कुश इति ख्याता मन्त्रिणो नियुक्ता बभूवुः । अपरं च ते सर्वेषां धर्माणां वर्धनाय प्रायतन्त । ब्राह्मण-बौद्ध-जैन-सम्प्रदायानां साधुभ्यो दानेन संरक्षणेन च स राष्ट्रस्य धर्मप्रवृत्तिं वर्धयामास । एतैः साधुभिर्न केवलं ब्रह्मचारिणोऽपितु गृहस्था अपि विद्या-विनय-सम्पन्नाः कृताः । चिकित्सा-संस्था आर्तशरणानि च तैः संचारितानि प्रत्यक्षमप्रत्यक्षं वा तेषां दानेन ।[2]

स्वराष्ट्रे न्याय-व्यवस्थायाः सञ्चालनं राज्ञ एव प्रवर्तते ।[3] राजा क्वचित् स्वहस्तेनैवापराधिनं ताडयित्वा दण्डाधानेन तं शोधयति स्म । गौतमानुशारेण मनुर्विशदयति—

राजा स्तेनेन गन्तव्यो मुक्तकेशेन धावता ।
आचक्षाणेन तत्स्तेयमेवं कर्मास्मि शाधि माम् ।
गृहीत्वा मुसलं राजा सकृद् हन्यात्तु तं स्वयम् ।
वधेन शुध्यते स्तेनो ब्राह्मणस्तपसैव वा ॥ ८.३१४,२२

स न्यायाधीशानां निर्णयस्य विरोधे प्रार्थनापत्रं विचारयति स्म, वादस्य समीचीनतमं समाधानं कृतवांश्च ।[4]

कौटिल्यो राज्ञः स्वयमेव परराष्ट्रप्रसंगेन षाड्गुण्यप्रयोगप्रवर्तनमावश्यकं मनुते ।[5] मनुः समर्थयति—राजा षड्गुणांश्चिन्तयेत् सदा । ७.१६० । इदं षड्गुणप्रकरणस्य चिन्तनं निर्धारणं तदनुसारेण कार्यान्वयनं च राज्ञः कार्यपरिधिं निस्सीमं करोतीति अर्थशास्त्रे तस्य विवरणेन प्रयोगदिशा

---

१. उत्तरकाण्डे अध्याय सप्तत्रिंशः, ५३.४-६ ४२.२७,३६; ४३.१

२. अलटेकर—प्राचीन भारतीय शासन-पद्धति पृ० १५० ।

३. काणे महोदयोऽनुसन्दधाति—Justice was to be summarily disposed by the king. He was an original court as well as an appellate tribunal. History of Dharmaśāstra Vol. III P. 268

४. राजतरंगिणी ६.१४-६९; ४.८२-१०८

५. एवं षड्भिर्गुणैरेतैः स्थितः प्रकृतिमण्डले ।
पर्येषेत क्षयात् स्थानं स्थानाद् वृद्धिं च कर्मसु ॥ ७.१.६४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

चावगन्तव्यम् ।[1]

युद्धकाले विशेषतोऽन्यथा वापि स्वपक्षे जाता अनर्थोऽसन्तोषोऽसहयोग-भावना च शमनीया इति राज्ञः प्रधानावेक्षणविषयेषु अन्यतम आसीत् । कौटिल्यानुसारेण सूचीमुखा ह्यनर्थाः ।[2] अर्थादादौ स्वल्पोऽप्यन्यर्थोऽचिरमेव भीषणो भवेत् अभ्यन्तरकोपे सति । अस्यां स्थितौ मन्त्रि-पुरोहित-सेनापति-युवराजादयो निगृहीता भवन्तु नाम ।[3] स्वपक्षस्य कस्यचिदुच्चाधिकारिणः शत्रु-सम्बन्धो न सम्भवेदिति राज्ञा प्रयतनीयमासीत् ।[4] दुष्टाधिकारिणां शाठ्यं प्रतिबन्धनीयमासीत् ।[5]

अर्थशास्त्रे नैत्यिक - राजकीयशासनभरस्य विशदविवरणं लभ्यते । तदनुसारेणासंख्यकर्मचारिणां नियोगेन राजा प्रजानां व्यक्तिशः समष्टिशश्चाभ्युदयोपायान्, संरक्षणं, विपत्तिनिवारणं, चारित्रिकसमुत्थानं प्रजाकार्यजाते सोपस्कारं सुखाधानं च व्यदधात् । अनेन विधिना सर्ववर्णानामाश्रमाणां च निर्बाधं प्रगमनं राष्ट्रस्याभ्युन्नतिश्चाभीष्टमासीत् । कौटिल्यो राजचक्रप्रवर्तनं चातुर्वर्ण्यरक्षार्थं मनुते । अर्थ० १४.१.१

राजपदस्य गौरवादर्शधियैतेषां कतिपयेषां परिचयः प्रस्तूयते—

(१) राज्ञा तथा प्रयतनीयं यथा कश्चिज्जनः स्वधर्मं न व्यभिचरेत् । १.३.१६

(२) स यथार्हदण्डो भवेत् । १.४.१३

(३) भूतपूर्वमभूतपूर्वं वा जनपदं ग्रामसंवासेन निवेशयेत । २.१.२ तत्र धान्य पशुहिरण्यादिनिविशमानाय दद्यात् । ५.२.४

(४) बालवृद्धव्याधितव्यसन्यनाथांश्च राजा बिभृयात् । २.१.३०।१३.५–१६

(५) नटनर्तकगायकवादकवारजीवन - कुशीलवास्तस्यावधाने न कर्मविघ्नं कुर्युः । २.१.४२

(६) उपहतां कृषिं गोव्रजांश्च राजा रक्षेत् । २.१.४५

(७) हस्तिवनं सेतुबन्धनं वणिक्पथमाकरांश्च राजा सौष्ठवपूर्णं कुर्यात् । २.१.४७; ७.१४.३५–४४

(८) अकृष्यायां भूमौ पशुभ्यो गोचरान् रक्षेत् । राजा ब्राह्मणेभ्यो ब्रह्मसोमारण्यानि, तपस्विभ्यो तपोवनानि च कुर्यात् । २.२.२

---

१. अर्थशास्त्रे ७.१-१४
२. अर्थशास्त्रे ९.३.६
३ अर्थशास्त्रे ९.३.१३
४. अर्थ० ९.३.२७-३९
५. अर्थ० ९.३.५४-६६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(९) नैकस्थलेषु यथावश्यं दुर्गाणि निर्माय तत्र युद्धोचितवस्तूनां समाहरणं प्रकामं कुर्यात् ।[1] २.३.१–४०

(१०) धर्मप्रवर्तनम् । सर्वेषु ब्राह्मणादि - वर्णेषु सर्वेषु ब्रह्मचर्याद्याश्रमेषु च आत्महितस्य परहितस्य च परिपूर्तये सर्वभूतरक्षायै च कर्तव्या-कर्तव्यानां प्रवृत्ति-प्रवर्धनम् । एतेन सर्वभूतानां दुःखनिवारणमपि परिचेयम् ।[2]

(११) राज्ञा प्रजायै आकस्मिकविपत्तिनिवारणम् । ४.३ अग्निरुदकं, व्याधिः, दुर्भिक्षं, मूषिकाः, व्यालाः, सर्पा इत्यादयो लोकानां दुःखविपत्ति-प्रणशनानि न्यूनातिन्यूनानि कुर्युरिति प्राणपणेनायोज्यम् । ४.३.१–५४

(१२) अन्यायपथगामिनां दुर्वृत्तानां कार्यकलापान् गुप्तचरैर्विज्ञाय तेषां स्वराष्ट्रान्निर्वासनं कारयेत् । ४.४.१–३१ । एते पापिनो गूढाजीवा इति ख्याताः । गुप्तापराधान् गुप्तोपायैर्निग्रहणीयाः । तेषां कार्यजातं वैविध्यं भजते ।

(१३) असाधारण-व्यवहारगत्यादि - लक्षणैरभिज्ञातानां सन्दिग्धचरित्राणां सम्यग्विवरणसहितां सूचीं कुर्यात् । चतुर्थाधिकरणे चतुर्थाध्यायात् षष्ठाध्यायं यावत् ।

(१४) गणिका-नियोगेन राजा शत्रुराजस्य गुप्तचरादीनां प्रवृत्तिं जानीयात् ।[3]

(१५) स्वराष्ट्रस्यायुधीयाः (सैनिकादयः) शुद्धभावेनाचरन्ति, अथवाशुद्ध-भावेनेति सत्रि-वेश्या-कारु-कुशीलवादीनां माध्यमेन जानीयात् । ५.३.५०

(१६) प्रतिदिनं सूर्योदये पत्त्यश्वरथद्विपा बहिः शिल्पयोग्या विधेयाः । तत्र राजा नित्ययुक्तः स्यादभीक्ष्णं चैषां शिल्प - (व्यायामादि-) दर्शनं कुर्यात् । ५.३.३८,३९

(१७) नित्यमायव्ययदर्शनेन कोशव्यसनं परिहरेत् । ५.३.४९

(१८) विद्यावाक्यधर्मशूरपुरुषाणां भूमि-द्रव्यदान-परिहारान् कारयेत् । अर्थ० १३.५.१५

---

१. तासुं पाषाणकुद्दालकुठारीकाण्ड कल्पनाः । भुशुण्डीमुद्गरा दण्ड-चक्रयन्त्रशतघ्नयः ॥
कार्याः कार्मारिकाः शूला वेधनाग्राश्च वेणवः ।
उष्ट्रग्रीव्योऽग्निसंयोगाः कुप्यकल्पे च यो विधिः ॥ २.३.४१,४२

२. चतुर्वर्णाश्रमस्यायं लोकस्याचार-रक्षणात् ।
नश्यतां सर्वधर्माणां राजा धर्मप्रवर्तकः ॥ अर्थ० ३.१.५०

३. संज्ञाभाषान्तरज्ञाश्च स्त्रियस्तेषामनात्मसु ।
चारघातप्रमादार्थं प्रयोज्या बन्धुवाहनाः ॥ २.२७,४२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मनुर्नृपस्य दैनन्दिनं कार्यमधोविधं वर्णयति—

अलंकृतश्च संपश्येदायुधीयं पुनर्जनम् ।
वाहनानि च सर्वाणि शस्त्राण्याभरणानि च ॥ ७.२२२
सन्ध्यां चोपास्य शृणुयादन्तर्वेश्मनि शस्त्रभृत् ।
रहस्याख्यायिनां चैव प्रणिधीनां च चेष्टितम् ॥ ७.२२३

स्वयमेव राज्ञो व्यवहार-निर्णयो महत्त्वपूर्णकार्यमादिकालतो निदर्शित एव । मनुः समर्थयति—

तत्रासीनः स्थितो वापि पाणिमुद्यम्य दक्षिणम् ।
विनीतवेषाभरणः पश्येत्कार्याणि कार्यिणाम् ॥ ८.२

राजा बालदायादिकं रिक्थमनुपालयेदिति विधानमासीत् । अनाथस्त्रीणां धनं तेन रक्षणीयमासीत् ।

अन्यच्च—जातिजानपदाधर्माञ्श्रेणीधर्माश्च धर्मवित् ।
समीक्ष्य कुलधर्माश्च स्वधर्मं प्रतिपादयेत् ॥ ८.४१

राजा केवलं निर्णायको नाभवत् । स निर्णयानुसारिपरकार्यण्यपि प्रासाधयत् ।[1]

प्रतिदिनं राजा राष्ट्रियायव्ययं निरीक्षेतेति मनुर्निदर्शयति—

अहन्यहन्यवेक्षेत कर्मान्तान् वाहनानि च ।
आयव्ययौ च नियतावाकरान् कोशमेव च ॥ ८.४१९

निःसन्देहं स्वीयसात्त्विकवर्तनेन राजा परमाविश्रान्तगतिको राजते स्म ।[2]

"न केवलं राजापितु तस्य सर्वे शासनाधिकारिणः सम्यङ् मनोयोगेन स्वनियोगं प्रतिपालयन्तु" । एतदर्थं राज्ञो व्यवहारस्तान् प्रति, तेषां

१. मनुस्मृतिः ८.४७–५१

२. सारसंग्रहेण प्रो० अलटेकरो निष्कर्षति—सभी धार्मिक मतों को अपने-अपने पथ पर चलने की पूरी सुविधा दे । सत्य, धर्म तथा सदाचार का संवर्धन करे । समाज को उन्नति-पथ पर ले चले । विद्वानों तथा कलाकारों को मदद दे । शिक्षा संस्थाओं की सहायता द्वारा ज्ञान - विज्ञान और कला का संवर्धन करे । धर्मशाला, चिकित्सालय, पौसरे आदि बनवाये । आधि-व्याधि-जन्य दुःखों को दूर करे । नई वसतियाँ बसाये और जनसंख्या का नियोजन करे । प्राकृतिक सम्पत्ति और साधन का विकास करे । वर्षा की पूर्ति के लिए बाँध और नहरें बनवाये । उद्योग-व्यवसाय को प्रोत्साहन दे । व्यापारियों की अधिक धन-लिप्सा से प्रजा को बचाये । प्रजा में अनीति न बढ़ने दे । प्राचीन भारतीय शासनपद्धति पृ० ३४–३५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वेतनस्य वैपुल्यं च महत्कारणमासीदेव ।[1]

सारसंग्रहेण निदर्शयति कौटिल्यः —

परे परेभ्यः स्वे स्वेभ्यः स्वे परेभ्यः स्वतः परे ।
रक्ष्याः स्वेभ्यः परेभ्यश्च नित्यमात्मा विपश्चिता ।। अर्थ० ९.३.७१

यथा मनुर्निभालयति स्वराज्ये मानवा दीर्घजीविनो भवेयुरिति राज्ञा-वेक्षणीयमासीत् । ९.२४६

सभा समितिश्च

अथर्ववेदानुसारेण शासनाधिकार उपर्युपरि गृहपतिः, सभा, समितिः, आमन्त्रणं मन्त्रिमण्डलं च संस्था यथाक्रमं वृहत्तरक्षेत्रस्य योगक्षेमं विधातुं बभूवुः[2] । अन्यच्च तत्र

सभा च मां समितिश्चावतां प्रजापतेर्दुहितरौ संविदाने । अथर्ववेदे ७.१२.१

अन्यत्रापि दृश्यते यद् वैदिककाले राजा सभा-समितीति संसदोः साह्येन स्वीयं पदं प्रत्यस्थापयत् । अथर्व० ६.८८.३

अभिजातलोकाः सभायां भाविराजस्य वरणं कृतवन्त इति प्रथा प्राचीनकाले प्राचरत् । एतदधिकृत्याथर्ववेदे राज्ञः शाश्वताकांक्षाद्योतिधं प्रकटिता —

अहं राष्ट्रस्याभीवर्गे निजो भूयासमुत्तमः । ३.५.२

समिती राजपदं प्रतिष्ठितमरक्षदिति अथर्ववेदे 'ध्रुवाय ते समितिः कल्पयताम्' ८.८८.३ । अन्यच्च—

त्वां (राजानम्) विशो वृणतां राज्याय । ३.४.२

पूर्वोक्तैः स्पष्टं प्रतिभाति यत् विशः (सर्वसाधारणजनाः) राज्ञो वरणं कृतवन्तः । स्वभावतो राजानं वरितुं त एकत्रभूताः परस्परवार्तयैवं

---

१ वेतनप्रकरणं साङ्गोपाङ्गमर्थशास्त्रे ५.३ अध्याये द्रष्टव्यम् ।

२. अथर्व० १०.८.१ । विशदविवेचनं प्रासंगिकप्रकरणस्य भाष्यकारेण श्रीपाद-दामोदरसातवलेकर-महाभागेन 'अथर्ववेद का सुबोधभाष्य' नामके ग्रन्थे कृत-मस्ति । तृतीयभागे ११६–११७ पृष्ठद्वयम् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

निर्णीतवन्तः। प्रकरणेऽस्मिन् एकत्रभूतानां जनानां सभा,[1] तेषां कार्यस्थलं भवनं वा सभेति संज्ञितम्। प्रायः प्रतिग्रामं ग्रामसभाः, समग्रराज्य-राष्ट्र-जनपदादिकृते च राजसभास्तत्रत्यानां सर्वविधसामुदायिक-वैयक्तिक-कार्यार्थ-सम्पत्तये उपचिताः। इयं रीतिः पुरा सदैव प्राचरत्। विंसेण्ट स्मिथमहोदयो हर्षविषये कथयति—

According to Hiuen Tsang Harsha was invited to accept the throne of Kanauj by a great meeting of nobles and dignitaries of the kingdom.

वैदिककाले तत्रासन् परम्पराचारविचार-विनिमयप्रधानाः संस्था ग्रामे-ग्रामे नगरे-नगरे। आधुनिकप्रजातन्त्रात्मकशासनस्य पूर्वतमरूपं वैदिक-सभा-समिति संस्थासु लक्ष्यते। तत्र सभापतिः[4], सभाचरः[5], सभापाकः[6], सभासद,[7] सभेयः[8] सभास्थाणु श्चेति पदानि स्पष्टयन्ति। बहुविधाः सभा आसन् बहुप्रयोजनाश्च। सभा-समितीनां रचना कथमभवदित्यस्मिन् विषये काणे महोदयस्याधोविधं मतं समीचीनमस्ति—सभा-समित्योर्निर्माणं कथं कृतमित्यनुसन्धानं निष्फलमेव। तत्र सभ्या आसन् राजा, विद्वांसः, अपरे चावश्यक-समाज-व्यवहाराणां सफल-व्याख्यातारः। तत्र सभ्या निर्वाचिता एव बभूवुरिति नास्त्यसन्दिग्धम्।[10]

---

1. Sabhā is the name of an assembly of the Vedic Indians as well of the hall where they met in assembly. Rg. VI. 28.6; VIII. 4.9;X.71.10 The hall also served as a meeting place for social intercourse and general conversation about cows and so forth possibly for debates and verbal contests. Well born (sujāta) men were there in session. Rg. VII. 1,4 Vide Vedic Index Sabhā

सभेति सह भान्ति अभीष्टनिश्चयार्थमेकत्र यत्र गृहे। वाचस्पत्यम्।

२. ऋग्वेदे १०.३४.६। वाज० सं० १६.२४। अथर्व० १५.९.२; ७.१२.१

३. ऋग्वेदे १०.१९१.३। अथर्ववेदे ५.१९.१५

४. ऋग्वेदे २.२४.१३। वाज० सं० १६.२४

५. वाज० सं० ३०.६ ६. तै० ब्रा० ३.७४.

७. अथर्व० ३.२९.१; ७.१२.२; १९.५५.६।

८. ऋ० २.२४.१३ ९. वाज० सं० ३०.१८

१०. Probably it was an ad hoc assembly of such people as cared to be present, History of Dharmaśāsra Vol. III p. 92

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

रामायण-महाभारतकाले सभा सम्यक् प्रावर्तत ।[1] महाभारतानुसारेण समितिः संसद् च समाने इति प्रतिभाति । आदि० १८७.३२; सभा० ३५.८; ३३.३२ शल्य० ३०.१९ । कार्यार्थं समागता राजानोऽपि समितिंगमाः । राजसभायाः सदस्या अमात्याः, मन्त्रिणः, सेनापतयः, अधीनस्थनृपसामन्ताः, पुरजनपद-प्रतिनिधिभूता महत्तराश्च बभूवुः । सभासदां सम्मत्या शासनभरः केन धारणीय इति निर्धारितमासीत् । दशरथस्योत्तराधिकारिवरणाय वसिष्ठेन ते समाहूताः । वृद्धो दशरथो रामस्य युवराजपदे नियोगाय, दशरथस्य मृत्योरनन्तरं नवराजस्य वरणाय च, दशरथस्यान्त्येष्टयनन्तरं भरतस्य राजसिंहासनग्रहणस्वीकृतये च सभाया अधिवेशनं समायोजितम् । लङ्कायां रावणराजत्वे सभायाः प्रकल्पनं महत्त्वपूर्णं दृश्यते ।

महाभारते राज्ञः सभाया महत्त्वं सविशेषं दृश्यते । पाण्डवानां कृते मयासुरेण यत्सभाभवनं निर्मितं तत्तु स्वयुगस्यालौकिकी रचना बभूव ।

महाभारतानुसारेण राजसभायां मन्त्रि-द्विज-सूत-विशोऽन्येऽपि सदस्याश्च राजभिः सह परिषदं निर्मान्ति स्म । विचारणीयविषयानुसारेण यथेच्छं महत्त्वपूर्ण-सम्बन्धिनः सदस्या अभवन् ।

गणराज्यानां सभादिपर्वणि वर्णिता । अत्र सभेति सभाभवनम्, तस्य रक्षाधिकारी सभापालोऽहर्निशं कार्यव्यापृतो बभूव । यदा सुभद्रार्जुनेनापहृता स सैनिकैः सूचितः सांनाहिकीं भेरीं नादयामास । सपदि सर्वे भोजवृष्ण्यन्धकाः समवेताः सभापालेनाकस्मिकीं स्थितिं प्रतिबोधिताः । अनन्तरं ते सर्वे बलरामेण प्रशान्तमनसा कार्यपद्धतिरवधारणीयेति सम्बोधिता यत् कृष्णस्य मतं विज्ञायाग्र आचरणीयमिति । तदनन्तरं कृष्णस्तान् किं करणीयमिति प्रबोधयामास । अनेन प्रकरणेन सभायाः कार्यविधिर्ज्ञायते ।[3]

विराटपर्वणि पाण्डवानामज्ञातवासस्य कथा वर्तन्ते । तत्र दुर्योधनस्य चराः पाण्डवानां मार्गणाय प्रहिता विफला एव निवर्तिताः सभामध्ये

---

१. अयोध्याकाण्डे २.६७.२ । राज्ञां साधारणतः स्वराज्यस्य कार्यार्थं महत्त्वपूर्णोपयोगिनां जनानां सम्बन्धिनां च सभाभवनेऽधिवेशनं समाकारितम् । युधिष्ठिरस्य सभाभवनं तत्रत्यजातानि कार्याणि च सभापर्वणि विषयमिमं प्रकाशयन्ति । यथा ऋग्वैदिकसभायां ऋ० १०.३४.६ द्यूतमासीत्, तथैव महाभारतीयसभापर्वणि-युधिष्ठिरादीनां द्यूतं समायोजितं दृश्यते । द्यूतप्रियो वैदिकराजासीत् । ऋ० १०.३४.८

२. विराटपर्वणि ६.४

३. आदि० २१२.१०–२४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तद्विषयकवार्तामुदाहरन्ति । सभायां दुर्योधनो द्रोण-कर्णकृपभीष्मैर्भ्रातृभिस्त्रिगर्तैश्च सहास । तस्मिन्नवसरे सभायाः पुरतो विचारणीयविषयो दुर्योधनेन समुपस्थापितोऽधोविधम्—

तस्मात् सर्वे उदीक्षध्वं क्व नु स्युः पाण्डवा गताः ।

कर्णः, दुःशासनः, द्रोणः, भीष्मः, त्रिगर्तराजः, सुशर्मा च स्वस्वविचारान् प्रकटयामासुः । तत्र सुशर्मणो मतेन ते विराटराजमाक्रमितुं सन्नद्धा बभूवुः ।

सभापर्वानुसारेण सभ्या विवाद - निर्णयमपि कुर्वन्ति स्म । तत्रासीद् द्रौपद्याः प्रश्नो विवादास्पदम् ।[1] यस्य कस्यापि आर्तस्य प्रशमनं तत्रावश्यकमासीत् ।[2] तत्र प्रश्नस्योत्तरं तु आवश्यकमासीत् ।[3] सभायां द्रौपदी-कर्षण-दृश्यमपि सभासद्भिः सोढम् । भीष्मो दण्डरूपं स्वनिर्णयं ब्रूते ।

नूनमन्तः कुलस्यास्य भविता न चिरादिव । सभा० ६२.१७

भीमश्च—

अहं दुर्योधनं हन्ता कर्णं हन्ता धनंजयः ।। सभा० ६८.२६

विराटराजः सभायां नित्यं राज्यकार्याणि कर्तुमागच्छत् ।[4] विशेषकार्यार्थं तत्र विशिष्टाः सदस्याः स्वयोग्यतानुरूपेषु आसनेषु उपाविशन् । सभाया ईदृशमधिवेशनमुद्योगपर्वणि प्रथमाध्याये वर्णितं यत्र विराटः, द्रुपदः पित्रा सह बलरामः कृष्णश्च, सात्यकिः, युधिष्ठिरः, द्रुपदस्य पुत्राः, पाण्डवाः, प्रद्युम्नः, साम्बः, विराटपुत्राः अभिमन्युः, द्रौपदीपुत्राश्च क्रमशो गृहीतासना आसन् । एते राजानः कृष्णेन पाण्डवानां पुना राज्यप्राप्तये योजनां विधातुं संघट्टिता आसन् ।[5] दुर्भाग्यमिदं यत् परवर्तियुगे वैदेशिकानामाक्रमकारिणां पराभवाय भारतीयराजैरीदृशं संघट्टनं विरलतरमेव विरचितम् ।

गणराज्येषु शासननीतिप्रवर्तका राजानो वा राजन्या वाभिहिताः । तेषां सभाया अध्यक्षाः सभापतय आसन् । अभिजात-क्षत्रिय-कुटुम्बस्य गृहपतिः गण-संघ-सभायाः सदस्योऽभवत् ।[6]

---

१. द्रौपदी प्रश्नमुक्त्वैवं रोरवीति ह्यनाथवत् ।
न च विब्रूत तं प्रश्नं सभ्या धर्मोऽत्र पीड्यते ।। ६१.५२

२. सभा० ६१.५३

३. सभा० ६१.६७–७६

४. विराटः पृथिवीपतिः 'आजगाम सभां कर्तुं राजकार्याणि सर्वशः । सभाप० ६५.७

५. उद्योगप० १.९

६. सर्वे क्षत्रिया राजन्या राजानो वा नाभिहिताः । केवलं सम्मानितक्षत्रिया एव राजान इति संज्ञिताः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मन्वनुसारेण न्यायसभायां त्रयो वेदविदो ब्राह्मणास्तेषामध्यक्षो राज्ञा नियुक्तो विद्वान् ब्राह्मणश्च निषीदन्ति स्म । ८.११ । सभायां मन्त्रिणो राज्ञा सह महत्त्वपूर्णकार्यार्थं समागता इति कल्पनीयम् ।[1]

वैदिककालत एव कतिपयसभासु लोकानां द्यूतादिमनोरञ्जन-स्थली, अतिथिशाला, यज्ञशालेत्यादयः समाविष्टाः ।[2] वैदिकोल्लेखानुसारेण सभा प्रायः ग्रामसंस्था बभूव, यत्र समाजविषयका राजनीति-विषयकाश्च प्रश्ना विवादपरिधा उपस्थापिताः ।[3]

आदर्श-राज्यम्

ब्रह्मतेजोमयं दण्डमसृजत् पूर्वमीश्वरः ।। मनु० ७.१४

अयमादर्शोऽशोकस्य धर्मचक्राधिष्ठित-सिंहमूर्तिस्तम्भे शाश्वतीकृतम् । वरुणादिदेवानामादित्यानां प्रजापालनादर्शो वर्णित ऋग्वेदे—

मदन्तीन्द्रगोपा मदन्ति देवगोपाः । ८.४६.१२
पक्षा वयो यथोपरि व्यस्मे शर्म यच्छत । ८.४७.२
युष्मे देवा अपि ष्मसि । युध्यन्त इव वर्मसु ।
यूयं महो न एनसो यूयमर्भादुरुष्यत ।। ८.४७.८
तद्देवाः शर्म शरणं यद् भद्रं यदनातुरम् । ८.४७.१०

यजुर्वेदे आदर्शराष्ट्रमधोविधं चित्रितम्—आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायताम् । राष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी महारथो जायताम् । दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायताम् । निकामेन पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्ताम् । २२.२२

अथ न इन्द्र इद्विशोऽसपत्नाः समनस्करत् । यजु० ७.२५ ।

अथर्ववेदे रास्ट्रे धृतस्य दुग्धस्य चाधिक्यं प्ररोचितम् ।[4]

आदर्शराज्यं तु रामराज्यं सुप्रतिष्ठितमेव । तस्य वाल्मीकिकृतं वर्णनमधोविधं विज्ञेयम्—

---

१. व्यवहारान् दिदृक्षुस्तु ब्राह्मणैः सह पार्थिवः ।
मन्त्रज्ञैर्मन्त्रिभिश्चैव विनीतः प्रविशेत् सभाम् ।। मनु० ८.१

२. सभा० ४३ अध्याये ।

३. अलटेकरः —प्राचीन भारतीय शासनपद्धतिः पृ० ९४

४. सं ते राष्ट्रमनक्तु पयसा घृतेन । १३.१.८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

न पर्यदेवयन् विधवा न च व्यालकृतं भयम् ।
न व्याधिजं भयं वासीद् रामे राज्यं प्रशासति ।। ९८
निर्दस्युरभवल्लोको नानर्थं कश्चिदस्पृशत् ।
न च स्म वृद्धा बालानां प्रेतकार्याणि कुर्वते ।। ९९
सर्वं मुदितमेवासीत् सर्वो धर्मपरोऽभवत् ।
राममेवानुपश्यन्तो नाभ्यहिंसन् परस्परम् ।। १००
रामभूतं जगदभूद् रामे राज्यं प्रशासति ।। १०२
ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा लोभविवर्जिताः ।
स्वकर्मसु प्रवर्तन्ते तुष्टाः स्वैरेवकर्मभिः ।। १०४
आसन् प्रजा धर्मवरा रामे शासति नानृताः ।
सर्वे लक्षणसम्पन्नाः सर्वे धर्मपरायणाः ।। १०५

युद्धकाण्डे १२८ सर्गतः

महाभारते युधिष्ठिरस्यादर्शराज्यमधोविधं वर्णितम्—

रक्षणाद् धर्मराजस्य सत्यस्य परिपालनात् ।
शत्रूणां क्षपणाच्चैव स्वकर्मनिरताः प्रजाः ।।
बलीनां सम्यगादानाद् धर्मतश्चानुशासनात् ।
निकामवर्षी पर्जन्यः स्फीतो जनपदोऽभवत् ।।
सर्वारम्भाः सुप्रवृत्ता गोरक्षं कर्षणं वणिक् ।
विशेषात् सर्वमेवैतत् संजज्ञे राजकर्मणः ।।
धर्म्यैर्धनागमैस्तस्य ववृधे निचयो महान् ।
कर्तुं यस्य न शक्येत क्षयो वर्षशतैरपि ।।

सभाप० ३०.१-२,७

सिद्धान्तरूपेण महाभारते सुराज्यस्य लक्षणानि भीष्मो युधिष्ठिरं श्रावयति—

अगूढविभवा यस्य पौरा राष्ट्रनिवासिनः ।
स्वकर्मनिरता यस्य जना विषय-वासिनः ।
असंघातरता दान्ताः पाल्यमाना यथाविधि ।
वश्या नेया विनीताश्च न च संघर्षशीलिनः ।
विषये दानरुचयो नरा यस्य स पार्थिवः ।
न यस्य कूटकपटं न माया न च मत्सरः ।
विषये भूमिपालस्य तस्य धर्मः सनातनः ।

शान्ति० ५७.३४—३८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्राज्ञः शूरो धनस्थश्च स्वामी धार्मिक एव च ।
तपस्वी सत्यवादी च बुद्धिमांश्चाभिरक्षति ॥ शान्ति० ८९.२७

प्रजा वर्णोचितकर्मसु व्यापृतो भवेदिति राजा प्रयतेत ।[1]

काणे महोदयो राज्ञो दीनदुःखितेभ्यो भोजन-पान-वस्त्रौषधिदानैः परिरक्षणं साधुवादेन समीक्षते—There provisions for the old, the blind, the widows, orphans and helpless persons and for the relief of unemployed kṣatriyas, Vaiśyas and Śūdras strike one as rather modern in tone.[2]

सोऽशोक-खारवेल-रुद्रदामादीनां पूर्वोक्तवृत्तिधरान् स्मरत्यस्मिन् प्रकरणे ॥ मत्स्यपुराणे प्रजाराजयोः सम्बन्धो रूपायितोऽधोविधम्—

'राजा तु मूलम् । प्रजास्तु वृक्षः । राज्ञः संरक्षणेन सर्वं राज्यं प्रगतिपथे प्रचरति । अत एव सर्वाः प्रजाः प्रत्येकं राजरक्षणाय प्रयतेरन् ।[3]

शुक्रो राजकर्मणो व्यावहारिकस्वरूपं स्पष्टयति । तदनुसारेण राजा (१) स्वयमेव ग्रामनगरं जनपदं च प्रतिवर्षं निरीक्षेत । (२) प्रजा राजपुरुषैः परितोष्यन्ते अथवा पीडयन्ते इति परीक्षेत (३) प्रजापक्षं सौहार्देन गृह्णन् प्रजाद्रोहिणं राजपुरुषं दण्डयेत् । (४) प्रजाः प्रति अन्यायसमारम्भान् राजपुरुषाणां निरुध्यात् ।

अशोकस्य राज्यादर्शास्तेन लेखितैः शिलालेखैः समग्रीभूताः प्राग्भावेन[4] शोभन्तेतमाम् । ततः परं नैकैतिहासिकराजानां प्रजापालनादर्शाः परवर्तिकविभिः प्रकल्पिता रोचन्ते । गुप्तवंशीयानां विक्रमादित्यादिसम्राजामादर्शा रघुवंशानुगता अधोविधं वर्णिताः—

रेखामात्रमपि क्षुण्णादामनोर्वर्त्मनः परम् ।
न व्यतीयुः प्रजास्तस्य नियन्तुर्नेमिवृत्तयः ॥
प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत् ।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ॥

---

१. नियुञ्ज्यात् प्रयत्नेन सर्ववर्णान् स्वकर्मसु ॥ शान्ति० ८७.१८
विशेषतः कृषकाणां विषये निगदितम्—
कच्चित् कृषिकरा राष्ट्रं न जहत्यतिपीडिताः ।
ये वहन्ति धुरं राज्ञां संभरन्तीतरानपि ॥ शान्ति० ९०.२२

२. Hist. of Dharmaśāstra Vol. III. p. 59,60

३. मत्स्यपुराणे २१९.३४

४. एतदर्थं प्रकृतग्रन्थस्य १६–१८ पृष्ठेषु शिलालेखसारो द्रष्टव्यः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सेना परिच्छदस्तस्य द्वयमेवार्थसाधनम् ।
शास्त्रे च व्यापृता बुद्धिर्मौर्वी धनुषि चातता ।।
जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरम् ।
अगृध्नुराददे सोऽर्थानसक्तः सुखमन्वभूत् ।।
प्रजानां विनयाधानाद्रक्षणाद् भरणादपि ।
स पिता पितरस्तासां केवलं जन्महेतवः ।।
द्वेष्योऽपि सम्मतः शिष्टस्तस्यार्तस्य यथौषधम् ।
त्याज्यो दुष्टः प्रियोऽप्यासीदङ्गुलीवोरगक्षता ।।
तथाहि सर्वे तस्यासन् परार्थैकफला गुणाः ।।[1]

'यथा राजा तथा प्रजा' इति न्यायेन राज्यस्य आधिभौतिकाध्यात्मिक-प्रवृद्धिः प्रतिभात्येव ।

पौराणिकयुगे कुराज्यस्य लक्षणमपि प्रतीतमेवासीत् । तथाहि—

धर्मः प्रव्रजितस्तपः प्रचलितं सत्यं च दूरं गतम् ।
पृथिवी वन्ध्यफला जनाः कपटिनो लौल्ये स्थिता ब्राह्मणाः ।।
मर्त्या स्त्रीवशगाः स्त्रियश्च चपला नीचा जना उन्नताः ।
हा कष्टं खलु जीवितं कलियुगे धन्या जना ये मृताः ।।
गरुड० १.११५.२

राज्ञोऽकार्यम्

अर्थशास्त्रे राज्ञे नीतिदृष्ट्या अकार्याणि अधोविधं परिगणितानि—

अवक्षेपेण हि सतामसतां प्रग्रहेण च ।
अभूतानां च हिंसानामधर्म्याणां प्रवर्तनैः ।।
उचितानां चरित्राणां धर्मिष्ठानां निवर्तनैः ।
अधर्मस्य प्रसङ्गेन धर्मस्यावग्रहेण च ।।
अकार्याणां च करणैः कार्याणां च प्रणाशनैः ।
अप्रदानैश्च देयानामदेयानां च साधनैः ।।
अदण्डनैश्च दण्ड्यानामदण्ड्यानां च दण्डनैः ।
अग्राह्याणामुपग्राहैर्ग्राह्याणां चानभिग्रहैः ।।
अनर्थ्यानां च करणैरर्थ्यानां च विघातनैः ।
अरक्षणैश्च चोरेभ्यः स्वयं च परिमोषणैः ।।
पातैः पुरुषकाराणां कर्मणां गुणदूषणैः ।
आघातैः प्रधानानां मान्यानां चावमाननैः ।।

१. रघु० १.१७–२९ तः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विरोधनैश्च वृद्धानां वैषम्येणानृतेन च ।
कृतस्याप्रतिकारेण स्थितस्याकरणेन च ॥
राज्ञः प्रमादालस्याभ्यां योगक्षेमवधेन च ।
प्रकृतीनां क्षयो लोभो वैराग्यं चोपजायते ॥ ७.५.३१–३८

गणराज्यम्

भारतेऽधुना यद् गणराज्यं वर्तते तस्य मूलस्वरूपमुग्वेदेऽधोविधं परिचीयते—

यो वः सेनानीर्महतो गणस्य राजा व्रातस्य प्रथमो बभूव[1] । १०.३४.१२

अर्थाद् गणस्य सर्वश्रेष्ठो नायकस्तथैव सेनानीरभवत् यथा व्रातस्य राजा ।

भयन्ते विश्वा भुवनः मरुद्भ्यः ।
राजान इव त्वेषसंदृशो नरः ॥ ऋ० १.८५.८

अथ चाथर्ववेदेऽनुसंहितम्—

तिग्ममनीकं विदितं सहस्वन् मारुतं शर्धः पृतनासूग्रम् ।[2] ४.२७.७

कस्यचित् क्षत्रियवंशस्य सर्वेऽभिजातजनाः सम्मिलितरूपेण स्वीयमन्येषां च शासनं कुर्वाणा गणराज्यं विदधति । ते सर्वे राजानः । अत्र गणस्त्वेकवांशिकजनसमुदायः । तथैव समानव्यवसायपराः सजातयो वा गणाभिख्यां लभन्ते । सभापर्वणि २९.९ । वैदिकभारते गणराज्यस्य बीजं मरुद्गणानुशासनेऽपि निक्षिप्तं प्रतिभाति ।[3] ऋग्वेदस्य प्रथममण्डलस्य पञ्चाशीतितमे सूक्ते ते मरुतो बहवोऽपि समवेतभावेन स्वीयमेकत्वं निदर्शयन्ति । तेषामुपाधिः राजास्ति । ते सहैव पराक्रमन्ते । मरुतां वासः पर्वतप्रदेशे बभूव । ऋ० ५.५७.८; ८.९४.१२ । तेषां संख्या १८० अथवा २१ अस्ति ।[4] ते सर्वे समाः

१. गणतन्त्रस्यान्येऽपि प्रसङ्गा वैदिक साहित्ये लभ्यन्ते । तेषां चर्चाग्रे करिष्यते । तथापि प्रो० अलटेकरः कथयति—ऋग्वेदकाल में गणतन्त्र का अस्तित्व सिद्ध नहीं होता । प्राचीन भारतीय शासन पद्धति–पृ० ७३ । तस्य मतं साधु न प्रतिभाति ।

२. ह्विटनेऽनुवदति—A sharp front known (as) powerful (is) the troop (शर्धः) of Maruts. इमे मरुतः परवर्तिगणराजा इव प्रचुरबलाः प्रभवन्तीति निश्चप्रचम् ।

३. नैकदेवानां तत्र गणा आसन् । यथा—आदित्यगणाः, वसुगणाः साध्यगणाः, रुद्रगणाः । Mon. Williams : Sanskrit English Dictionary. See गणदेवता बृहद० १.४.१२

४. ऋ० ८.८५; अथर्व० १३.१
ते रुद्रस्य पुत्राः सन्ति । ऋ० ५.५७ । रुद्रस्य पुत्रास्ते रुद्रियगणा इति कथ्यन्ते ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

समावासाः, समानजन्मभूमयश्च सन्ति ।[1] ऐतिहासिकयुगे मरुतां मानव-जातिसंघो वैशालीनगरीत उत्तरस्यां दिशि पर्वतेषु वसतिस्म ।[2] मरुतां गणत्वं परवर्तिवैदिकसाहित्येऽधोविधं वर्णितम्—

(१) गणशो हि मरुतः । तै० ब्रा० १९.१४.२

(२) मरुतो गणानां पतयः । तै० ब्रा० ३.११.४.२

(३) सप्त हि मारुतो गणाः । शत० ब्रा० ५.४.३.१७[3]

ऋग्वेदे नैकगणानां संघस्य प्रकल्पनमधोविधमपि वर्तते —

गणानां त्वा गणपतिं हवामहे । २.२३.१

अत्र ब्राह्मणानां गणस्य तस्याधिपतेर्ब्रह्मणस्पतेश्च वर्णनं विद्यते । ब्रह्मणस्पतिर्ब्रह्मा 'आदिदेवः, ब्राह्मणानां राजा ।

गणराज्यसंचालकास्ते मरुतः सुजाताः रुक्मवक्षसः, ऋष्टिधारिणः, ओजस्विनः, बाहुबलाः, रथायुधाश्च सन्ति । तेषां तनुषु श्रीः शोभते ।[4]

यजुर्वेदे गणश्रिये स्वाहा । गणपतये स्वाहा । अभिभुवे स्वाहा । अधिपतये स्वाहा । २२.३० । अत्र गणशब्दो वस्तुतः परवर्तिगणराज्यं समक्षयति ।[5]

उपनिषद्युगे गणेन संहतिः स्पृह्णीया समाम्नाता ।[6] महाभारते गण-राज्यानां विषये प्रकीर्तितं विद्यतेऽधोविधं शान्तिपर्वणि—

चारमन्त्रबलादानैः सामदानविभेदनैः ।
क्षयव्ययभयोपायैः कर्शयन्तीतरेतरम् ॥ १०८.१२

---

१. ऋ० ५.५९; १.१६५; ५.५३

२. प्राचीनचरित्रकोशः पृ० ६२४ ।
प्रो० अलटेकरो निष्कर्षति — सम्भवतः इससे सामन्त अथवा (वैदिक) गणराज्य का अभिप्राय हो, जिसमें सारा अधिकार उच्च वर्ग या सरदारों की परिषद् के साथ रहता है। उसके सब सभासद् राजा कहे जाते थे और ये ही राज्य के सर्वोच्च अधिकारी को चुनते थे और वह भी राजा की ही उपाधि से सम्बन्धित होता था। देश के कुछ हिस्सों में इस प्रकार के राज्यों का ईसवी पूर्व छठीं शती तक अस्तित्व था। प्राचीन भारतीय शासन-पद्धति पृ० २० अन्यत्रापि पृ० ७२। यस्मै वै राजानो राज्यमनुमन्यन्ते स राजा भवति। शत० ब्रा० ९.३.२.५

३. ऋग्वेदे ५.५७.५,६ ।

४. प्रो० अलटेकरो वैदिकयुगे गणतन्त्रस्यास्तित्वं सन्दिहति । नैतत्प्रमाणपुरस्सरम् । द्रष्टव्यं तस्य पुस्तकं प्राचीन भारतीयशासनपद्धति पृ० ७३ ।

५. नास्माद् गणश्छिद्यते । बृहद० २.१.११

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अर्था ह्येवाधिगम्यन्ते संघातबलपौरुषात् ।
बाह्याश्च मैत्रीं कुर्वन्ति तेषु संघातवृत्तिषु ।। १०८.१५
धर्मिष्ठान् व्यवहारांश्च स्थापयन्तः शास्त्रतः ।
यथावत् संप्रवर्तन्तो विवर्धन्ते गणोत्तमाः ।। १०८.१७

अन्यच्च —गणमुख्याः मानयितव्याः, तैः सम्भूय गणहितं कार्यम् । गणाद् भिन्नस्यानर्था भवन्ति । गणेन उभयविधमाभ्यन्तरं बाह्यं च भयं निवारणीयमेव । सर्वे गणसदस्या जात्या कुलेन च समा एव । गणानाँ महच्छरणं संघातमेव ।

महाभारतानुसारेण कृष्णः संघमुख्य आसीत् ।[1] नैकगणानां सङ्घो गणसंघ इति ख्यातः सर्वोच्च-शासन-नीति-निदर्शको बभूव । संघे प्रत्येकं आत्मरक्षणशक्तिः संवर्तते ।[3] नैकसंघानां साहित्येन तेषां दृढता समीहितासीत् ।[4]

रामायणे शिल्पिनां गणा उल्लिखिताः सन्ति[5], किन्तु गणतन्त्रात्मकशासनपद्धतेश्चर्चा तत्र न विद्यते ।

महाभारते नेकविध - संघानामुल्लेखोऽधोविधं दृश्यते—भूतविशेष-संघः, महर्षि-सिद्धसंघः, गन्धर्वयक्षासुरसंघः, अवनिपालसंघश्च ।[6]

अर्थशास्त्रे कस्यचिदेकपुरुषस्य राज्यात् कुलस्य राज्यं कुलसंघ इति वा प्रतिपत्तिं प्रापितम् । तद्यथा—

कुलस्य वा भवेद् राज्यं कुलसंघो हि दुर्जयः ।
अराजव्यसनाबाधः शश्वदावसति क्षितिम् ।। १.१७.५५

अयं कुलसंघो गणराज्यस्य विधाता ।

अन्यच्च — काम्बोज-सुराष्ट्र-क्षत्रिय-श्रेण्यादयो वार्ताशस्त्रोपजीविनः । लिच्छिविक-वज्रिक-मल्लक-मद्रक-कुकुर-पाञ्चालादयो राजशब्दोपजीविनः । अर्थ० ११.१.५,६

---

१. शान्तिप० १०८ अध्यायतः ।
२. शान्तिप० ८२.२५
३. अथ ये सहिता वृक्षाः संघशः सुप्रतिष्ठिताः ।
ते हि शीघ्रतमान् वातान् सहन्तेऽन्योन्यसंश्रयात् ।। उद्योग० ३६.६१
४. शान्ति० ८२.२५
५. अयोध्या० १४.४०; ८१.१२
६. श्रीमद्भगवद्गीतायाम्—११.१५,२१,२२,२६,३६ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

संघानां शासनव्यवस्था सुष्ठु भवेदिति कौटिल्यो निगदति—

संघमुख्यश्च संघेषु न्यायवृत्तिहितः प्रियः ।
दान्तो युक्तजनस्तिष्ठेत् सर्वचित्तानुवर्तकः ।। अर्थशास्त्रे ११.१.७८

ऐतिहासिकयुगे प्रसिद्धगणराज्यान्यधोविधं प्रबभूवुः —

सिन्धु-पञ्चनदप्रदेशे

तत्र वृक-दामणि-पार्श्व-कम्बुज-गणराज्यान्यधुना पाणिनीय-व्याकरणे नाममात्रं चर्चितानि ५०० ई० पूर्वतः ४०० ई० यावत् प्रकीर्णानि बभूवुः । तत्र त्रिगर्तषष्ठनामके गणसंघे कौडोपरथः, दण्डकिः, कौष्ठकिः, जालमानिः, ब्राह्मगुप्तः, जानकिरित्येते गणाः संघोपेता जालन्धर-परिसरे आसन् । त एव सम्भवतः कुणिन्दोपनामानो बभूवुः । तेषां प्रवर्तिता बहवो मुद्रा लब्धाः सन्ति । यौधेयानां कुशाणप्रध्वंसने कुणिन्दानामवदानमुल्लेखनीयमेव । ते द्वितीय-शतीं यावत् शासनाधिकारिण आसन् ।

आगरा-जयपुर-प्रदेशे २०० ई० पूर्वत आरभ्य ४०० ईसवीशतीं यावदर्जुनायन-गणः प्रबभूव । तेषां मुद्रायाम् 'अर्जुनायनानां जयः इत्यङ्कितमस्ति । अर्जुनात् प्रादुर्भावं मन्यमानास्ते युधिष्ठिरोद्भवानां यौधेयानां मैत्रीभावं प्रपन्ना आसन् ।

गणत्रयस्य संघ आसीत् यौधेयानाम् । तेषां राज्य-परिधिः सहारनपुरतः पश्चिमदिशि भावलपुरं यावदुत्तरपश्चिमदिशि च लुधियानां यावद् दक्षिण-पूर्वदिशि दिल्लीं यावद् विस्तृत आसीत् । इमे यौधेया धौरेया आसन् । तेषां शौर्यगाथां श्रुत्वा सिकन्दरस्तान् प्रतियोद्धुं विमुखो बभूव । ३५० ई० शतीं यावद् यौधेयानां भारतीयेतिहासे विश्रुत-कृतित्वं राजते ।

आधुनिक स्यालकोटस्य परिसरे मद्राणां गणराज्यमासीत् । तेषां साहसिक-युद्धं सिकन्दरेणाभूत् । यावज्जीवं ते शत्रुभिरयुध्यन्त । मद्राणां गण-राज्यं ई० चतुर्थशतीं यावदासीत् ।

चेनाब-रावीनद्योर्मध्ये मालवानां तेषां दक्षिणदिशि क्षुद्रकाणां च मैत्री-भावापन्नं सशक्तं गणराज्यद्वयं सिकन्दरं प्रतियुयुधे । मालवानां सैन्यबलं लक्षमेकं सिकन्दरेण साहसपूर्वकं युध्यमानं पराजितमभवत् । परतो मालव-क्षुद्रकयो राज्यसंघो नैकशताब्दं यावत् प्रतिष्ठितो बभूव । अन्ततो क्षुद्रका मालवेषु विलीनाः ।

मालवगणस्य दक्षिणदिशि प्रगमनं क्रमद्वयेन प्रपन्नं दृश्यते । प्रथमं मालवाः १०० ई० पू० संवत्सरे अजमेर चित्तौड़-टोंक-प्रदेशानधिवसन्ति स्म । ततोऽपि पुनराधुनिकमालव-प्रदेशमाजग्मुः । मालवानां ताम्रमुद्राः 'मालवानां जयः इति लेखोत्कीर्णा बहुशो लभ्यन्ते ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अम्बष्ठानां गणतन्त्रं पूर्वोक्तक्षुद्रकाणामुपकण्ठं प्रबभूव । तेषां प्रजातन्त्रात्मकस्वरूपं यवनलेखकैर्वर्णितम् । तेषां सेनायां ६०,००० पदातयः, ९,००० अश्ववाराः, ५०० रथाश्चासन् । ते सिकन्दरस्य समकालिकास्तस्य प्रभुत्वं स्वीचक्रुः ।

द्वारकामुपान्धकवृष्णीनां गणतन्त्रद्वयं चिरं प्रबभूव । महाभारतकाले कृष्णस्तत्र गणमुख्य आसीत् ।

गौतमबुद्धस्य समकालिकानि गणराज्यान्यधोविधं निर्दिष्टानि सन्ति—

गणः	राजधानी
शाक्यः	कपिलबस्तु आधुनिकनैपालप्रदेशे । अत्रैव गौतमबुद्धो जातः । राज्यं गोरखपुरेऽवस्थितम् ।
बुलिः	अल्लकप्प—आधुनिकछपरा-गोरखपुर - जनपदयोरवस्थितः ।
भग्गः	सुंसुमारपर्वतः ।
कोलियः	रामग्रामः ।
कालामः	केसपुत्तः ।
मल्लः	कुशिनगरम् । गोरखपुरतः दक्षिणपूर्वभागेऽवस्थितः ।
मल्लः	पावा
मोरियः	पिप्पलिवनम्—हिमालयप्रदेशेऽवस्थितः ।
विदेहः	मिथिला आधुनिकमिथिलाप्रदेशः ।
लिच्छविः	वैशाली ।

एतेषु मल्ल-लिच्छवि-विदेहानां गणराज्यानि बृहत्तराणि शेषाणां च लघुराज्यानि बभूवुः । कतिपयगणराज्यानां यदा कदा सङ्घो निर्मितो येन शत्रुभ्यो भयं दूरीकृतम् । मल्ला लिच्छवयः विदेहाश्च परस्परं द्वयोः संघविधानेन मगधानां नृपतन्त्रात्मकविस्तारनीतेरात्मानं ररक्षुः ।

केन्द्रीय-समितिः

गणतन्त्रशासने केन्द्रीयसमितेः सर्वोच्चप्रभुत्वमासीत् ।[1] यौधेयानां समितौ ५,००० लिच्छवीनां च समितौ ७७०७ सदस्या आसन् । एतेषामुपाधी राजासीत् ।

केन्द्रीया समितेर्मन्त्रिमण्डलस्य, सेनान्यश्च निर्वाचनं यथाकालं समभवत् । परराष्ट्र-विषयकाः सर्वेऽर्थास्तया निर्णीता बभूवुः । समितेः सदस्याः सन्धि-

१. इयं संस्थाधुनिकलोकसभेव रराज । अलतेकरः —प्राचीन भारतीय शासन-पद्धति पृष्ठ ९१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विग्रहमनुसन्धातुं स्वयमेव पररराजमभिलन् । वस्तुतः केन्द्रीयसमितेर्महत्तमः शासनाधिकारो बभूव । सर्वोच्चशासनाधिकारिणस्तया नियोज्या आसन् । सभागृह एकत्रभूताः समितेः सदस्या न केवलं राजनीतिकमपितु सामाजिक-धार्मिक-लोकसंग्रहात्मक-प्रस्तावान् विमर्शयामासुः ।

समितीनां कार्यपद्धतिर्विरलमेव परिचीयते । कोसलानामाक्रमणे सति शाक्यानां समितिरात्मसमर्पणाय विनिश्चयामासेति सदस्यानां मतबाहुल्येन परिणतम् । लिच्छवीनां समितौ कदाचिदैकमत्याभावे वृद्धानामेव सम्मति-रङ्गीकृता ।[1]

प्राचीनकाले गणराज्यानां लोकहितप्रवर्तनदिशि विशेषमहिमा परि-लक्ष्यते । तत्र सदस्या अहमहमिकया प्रजानां सम्पत्तिसंवर्धनाय विपत्ति-निवारणाय च सहस्राक्ष इव समाचरन्तः सफला आसन् । सिकन्दरस्याक्रमणं प्रतिरोद्धुं तैर्यादृशं पराक्रान्तं तादृशं नृपतन्त्रराजैर्न सम्भावितम् । सर्वाः प्रजा राज्योत्कर्षसमारम्भेषु भूयिष्ठं दत्तरुचयो बभूवुः । तासां सर्वतन्त्र-स्वतन्त्रप्रतिभा ज्ञान-विज्ञानशिखरं समवाप । तदानीन्तनसिन्धुप्रदेशाः पौर्वाणि शाक्यादिगणराज्यानि च दार्शनिकचिन्तनेन विश्वविश्रुतं यशो लेभिरे । आधुनिकयुगेऽपि प्राचीनगणतन्त्रस्यच्छाया कतिपयप्रदेशाश्चलेषु प्रसरति ।[2]

मन्त्रि-मण्डलम्

लघुगणराज्येषु मन्त्रिणां संख्या नाधिकासीद्यथा बृहद्राज्येषु । मल्लानां गणे चत्वार एव लिच्छवीनां गणे पुनः नव मन्त्रिणो गौतमबुद्धस्य

---

१. अलटेकरः —प्राचीन भारतीय शासनपद्धति पृ० ८५

२. भारतीय गणतन्त्र का प्राचीन आदर्श अपने हजारों वर्ष के पुराने रूप को बनाये हुए हिमाचल प्रदेश के मलाना गाँव में आज भी अमर है । वहाँ मलाना गणतन्त्र के दो सदन हैं—ज्येष्ठाङ्ग और कनिष्ठाङ्ग । ज्येष्ठाङ्ग के ११ सदस्य हैं, जिनमें तीन पैत्रिक हैं—कारदार, पुजारी और गुर । गुरदेवता द्वारा मनोनीत होता है । देवता गुर के माध्यम से लोगों से बात करता है । शेष आठ सदस्य चार घरानों से चुने जाते हैं । ज्येष्ठाङ्ग के सदस्य मन्दिर के सामने चबूतरे पर बैठकर निर्णय करते हैं कनिष्ठाङ्ग में प्रत्येक घर का एक सदस्य होता है । चबूतरे के नीचे बैठते हैं । वादी चबूतरे के पास लकड़ी जला कर धुआँ कर देता है । उसे देखते ही ज्येष्ठ आ जुटते हैं । कनिष्ठाङ्गों को बुलाया जाता है । कनिष्ठाङ्गों का निर्णय ज्येष्ठाङ्गों के पास जाता है । दोनों में बहस होती है । यदि दोनों की सहमति न हुई तो अन्तिम निर्णय गुर का होता है । धर्मयुगे २४ फरवरी १९८०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

समकालिका आसन् । लिच्छवि-विदेह-गणसंघे मन्त्रिणां संख्या १८ आसीत् । गणाध्यक्षो मन्त्रिमण्डलस्य प्रधानोऽभवत् । स गणस्य शाश्वतस्थितये सदस्यानां परस्पर-विरोधो न स्यादिति सचेष्टो बभूव । मन्त्रिणां बहवो विभागा आसन् । यथा—पररा‌ष्ट्रियः, कोशः, न्यायः, दण्डः ।

नगरपरिषदः, ग्रामपरिषदश्च

गणराज्येषु नगरशासनाय स्वायत्तपरिषदो नियुक्ता आसन् । तथैव ग्रामशासनं बहुविधव्यावसायिकजनप्रमुखैर्निष्पादितमासीत् ।

व्यवहार-विधिः (न्यायः)

धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः । मनु ८.१५

प्रजानां शासन-विषये प्रतिपदं विधिव्यवस्था दण्डनीतिश्चावश्यिकी भवति । एतयोरवधारणं वैदिकयुगे तदानीन्तन-संहितानां निदर्शनेन बभूव । तथापि तत्र शाश्वतैकरूपता न परिलक्ष्यते । विभिन्नयुगेषु विरचितेषु पुरासाहित्येषु विविधरूपा विधि-व्यवस्था दण्डनीतिश्च प्ररूपिता दृश्यत इत्यनेन स्पष्टं भवति यत् प्रजानां मध्ये स्वत एव यानि विधानानि यद्-रूपाणि लोकरीतिमनुसृत्य विकसितानि, तानि धर्मशास्त्रेषु संगृहीतानि राज्ञां कृते विधेयतामनुप्रापुः । राजाथवा तस्य मन्त्रिमण्डलं वा राजपुरुषा वा विधि-निर्माण-प्रवर्तन-प्रक्रियाणां कर्तारो न सन्ति ।

राज्ञां विधि-व्यवस्थापनमपवादरूपेण तत्र प्रावर्तत, यत्र पूर्वतो विधि-धर्मशास्त्रस्मृत्यादिषु नाभवत् । अस्यां स्थितावपि धर्मज्ञानां साह्येन राजा विमर्शपूर्वकं किंचित्परिवर्तनं वा नवीनविधिविधानं प्रवर्तयेतेति साधुपथः ।

प्रजाशासन-प्रसङ्गे राज्ञः परं कर्तव्यं निर्धारयन् मनुः कण्टकशोधन-मावश्यकं मेने ।

प्रारम्भिकयुगे कौटुम्बिकन्याय-व्यवहारः क्वचित् प्रावर्तत । मनुर्वर्णयति-

भार्या पुत्रश्च दासश्च शिष्यो भ्राता सहोदरः ।
प्राप्तापराधास्ताड्याः स्यू रज्ज्वा वेणुदलेन वा ॥ ८.२९९

न्यायिकदण्डविधानम्

अपराधे सति असद्व्यवहारे, भ्रष्टाचारे च सति राजदण्ड आवश्यक इति प्रजासु शान्तिव्यवस्थापनाय शाश्वतरीतिर्वरुणादर्शमनुहरति । एतेष्व-पराधादिषु नैके पापकोटिका सन्ति येषामपाकृतये धर्मशास्त्रविद्भिः पण्डितैः प्रायश्चित्त-दान-तपआदिविधानानुष्ठानं निर्दिष्टम् । स्वयमेव पापिनोऽनु-शोचन्तः क्वचित् शास्त्रानुसारेणात्मविशुद्धये धर्मशास्त्रज्ञमुपागच्छन् । ततः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

परमपि राजद्वारं दण्डनिर्णयाय बभूव ।[1]

वैदिकयुगे न्यायपथे वरुणस्यादर्शः प्रत्यभात् । तस्याधिकारे दण्डविधानं प्रायश्चित्तविधानं चोभे प्रावर्तेताम् । तत्रासीत् प्रश्नविवाकः परवर्तिप्राड्-विवाक-समः ।[2] शतपथब्राह्मणानुसारेण राजा स्वयमदण्ड्यः । सोऽपराधिनमदण्डयत् ।[3] अन्योपायैरपराधिनिर्णयेऽसम्भवे सति दिव्यपरीक्षा क्वचिदायोजिता ।[4] सूत्रयुगे चौर्यं भीषणापराधो गण्यते स्म । चौरो मृत्युदण्डभागासीत् ।[5]

मनुरष्टादश विवादप्रकरणानि विज्ञापयति । तद्यथा—

तेषामाद्यमृणादानं निक्षेपोऽस्वामिविक्रयः ।
सम्भूय च समुत्थानं दत्तस्यानपकर्म च ॥ मनु० ८.४
वेतनस्यैव चादानं संविदश्च व्यतिक्रमः ।
क्रय-विक्रयानुशयो विवादः स्वामिपालयोः ॥ ८.५
सीमाविवादधर्मश्च पारुष्ये दण्डवाचिके ।
स्तेयं च साहसं चैव स्त्रीसंग्रहणमेव च ॥ ८.६
स्त्रीपुंधर्मो विभागश्च द्यूतमाह्वय एव च । ८.७

मनुः प्रकरणेऽस्मिन्नपराधप्रवृत्तिकान् लोकान् कण्टक इति परिभाषते। कण्टकाः शतविधा भवन्ति । प्रत्यक्षमप्रत्यक्षं वा ते लोकं क्षाययन्ति, वञ्चयन्ति वा ।

अर्थशास्त्रानुसारेण न्यायालयो धर्मस्थीयो यस्तत्र न्यायाधिकारिणो धर्मस्था इति ख्याताः । अर्थ० ३.१ । साधारणतः प्रधानन्यायाधिकारी राजाभूत् ।

---

१. अकुर्वाणा एव तु प्रायश्चित्तं राज्ञा वध्याः । गौतमधर्मसूत्र ३.१.१ अधिकृत्यमिताक्षरावृत्तिः । मनुस्मृति ९.२३६ । राजापि स्वपदोचितौदात्त्य-विहीनो राजपदात् प्रजाभिश्चावितः । मन्वनुसारेणान्यथाकरणेऽमात्याः प्राड्विवाको राजा वा दण्ड्यः । तद्यथा—

अमात्याः प्राड्विवाको वा यत्कुर्युः कार्यमन्यथा ।
तत्स्वयं नृपतिः कुर्यात्तान् सहस्रं च दण्डयेत् ॥ ९.२३८
कार्षापणं भवेद्दण्ड्यो यत्रान्यः प्राकृतो जनः ।
तत्र राजा भवेद्दण्ड्यः सहस्रमिति धारणा ॥ ८.३३६

२. वाजसनेयिसंहिता ३०.१० । अत्र प्रश्नी, अभिप्रश्नी च वादी, प्रतिवादी स्तः ।

३. शतपथ० ५.४.४.७

४. दिव्यपरीक्षा पञ्चविंशब्राह्मणे १४.६.६; छान्दोग्योपनिषदि ६.१६

५. गौतम० १२.४३ । आपस्तम्बे १.९.२५.४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कार्यभारेऽतिशयिते स श्रेष्ठब्राह्मणं न्यायाधीशपदे नियुक्तवान् । स न्याय-सभया स्वकार्यं समपादयत् । न्याय-सभायां कौठिल्यानुसारेण त्रयो धर्मस्थास्त्रयोऽमात्याश्च कार्यविनिर्णयं कुर्वन्तिस्म । मनू राजानं ब्राह्मणत्रयं मन्त्रिणश्च न्याय-सभायां विज्ञापयति । यदि नाम राजा तत्रानुपस्थितोऽभवत्, न्याय-सभाया अध्यक्षपदं कश्चित् श्रेष्ठविद्वान् ब्राह्मणोऽगृह्णात् । स एव प्राड्विवाक इति नाटचशास्त्रे प्रसिद्धम् । प्राड्विवाकस्य अपरनामानि धर्माध्यक्षः, धर्मप्रवक्ता, धर्माधिकारी च सन्ति ।[२] वैदिकयुगे प्रश्नविवाक इति ख्यातो न्यायाधीश आसीत् ।

नाटचशास्त्रानुसारेण प्राड्विवाकस्य विशेषा उद्भाविताः सन्ति— बुद्धिमान्, नीति-सम्पन्नः, निरलसः, प्रियंवदः, पररन्ध्र-विधिज्ञः, अर्थशास्त्रार्थ-कुशलः, अनुरक्तः, कुलोद्भवः, देशकालवित्, व्यवहारार्थतत्त्वज्ञः, बहुश्रुतः, मध्यस्थः, धार्मिकः, धीरः, कार्याकार्यविवेकी, क्षान्तः, दान्तः, जितक्रोधः, समदर्शी, उत्थितः, अप्रमत्तः, जितश्रमः, स्निग्धः, विनीतः, निपुणः, नयज्ञः, ऊहापोहविचक्षणः, सर्वशास्त्रार्थसम्पन्नश्च ।[४]

सभ्याः सच्चरित्रा भवेयुरिति धर्मशास्त्रकाराणां मतम् । यदि नाम राजा क्वचिदन्यायप्रवृत्तः प्रत्यगात् सभ्यैः स न्यायपथे प्रवर्तितः ।[५] ब्राह्मणास्तत्र धर्मशास्त्रीयं सम्मतं प्राकाशयन् ।

---

१. को न्यायाधीशपदयोग्य इति विनिर्णये आपस्तम्बः ----

विवादे विद्याभिजनसम्पन्ना वृद्धा मेधाविनो धर्मेष्वनिपातितः ।

धर्मसूत्रे २.२.२९.५

न्यायाधीशस्य गुणाः काव्यायत्ता अधोविधं वर्णिता मृच्छकटिके—

शास्त्रज्ञः कपटानुसारकुशलो वक्ता न च क्रोधनः—
स्तुल्यो मित्रपरस्वकेषु चरितं दृष्टैव दत्तोत्तरः ।
क्लीबान् पालयिता शठान् व्यथयिता धर्म्यो न लोभान्वितो
द्वार्भावे परतत्त्वबद्धहृदयो राज्ञश्च कोपापहः ।। ९.५

२. राजनीतिरत्नाकर पृ० १८ । मनुस्मृति ८.२० ।
प्राड्विवाकः गौतमधर्मसूत्रे १३.२६, २७, ३१ वर्णितः ।

३. वाजसनेयिसंहिता ३०.१० । तैत्तिरीयब्राह्मण ३.४.६.१ । अत्र वादी, प्रतिवादी च क्रमशः प्रश्नी, अभिप्रश्नी च संज्ञितौ ।

४. नाटचशास्त्रे २४.८२–८८ ।

५. अधर्माय यदा राजा नियुञ्जीत विवादिनाम् ।
विज्ञाप्य नृपतिं सभ्यस्तदाकार्यं निवर्तयेत् ।। राज० र० पृ० २४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सभ्या न्यायाधीशाश्चान्ये वा यदि न्यायपथं परित्यज्यान्यायमकुर्वन्नकारयन्वा, तेऽपि दण्ड्या आसन्निति केषाञ्चिद् धर्मशास्त्रकाराणां मतम्। अथ चान्यायस्तु पापमेव। तस्य फलं प्रतिवादी, न्यायाधीशः, साक्षी, सभ्याश्च भजन्ते।[२]

कौटिल्य उत्कोचग्राहिणो धर्मस्थस्य निग्रहार्थं नियमयत्यधोविधम्—

धर्मस्थं विश्वासोपगतं सत्री (गुप्तचरः) ब्रूयात्—'असौ मे बन्धुरभियुक्तः। तस्यायमनर्थः। प्रतिक्रियताम्। अयं चार्थः प्रतिगृह्यताम्। स चेत् तथा कुर्यात्, उपदाग्राहक इति प्रवास्येत्। अर्थशास्त्रे ४.४.२। स आदर्शधर्मस्थान् परिभाषतेऽर्थशास्त्रे—

समाः सर्वेषु भावेषु विश्वास्या लोकसम्प्रियाः। ३.२०.३१

न्यायालयो धर्माधिकरणम्, अधिकरणम्, धर्मस्थानं धर्मासनं चेति। वैदिकयुगे राजधान्यां स्वप्रासादे सभायां वा राजा न्यायमकरोत्। तदा ग्रामणीः ग्रामसभायां विवादानां समाधानं व्याकरोत्। परवर्तियुगे चतुर्विधा न्यायालया यथावश्यकं विकसिताः —प्रतिष्ठिता, अप्रतिष्ठिता, मुद्रिता तथा शासिता (शास्त्रिता)।[३]

राजाधिष्ठतन्यायालयास्तु यथा, बृहस्पतिर्वर्णयति,
माल्यधूपासनोपेतोबीजरत्नसमन्विताः स्युः।
प्रतिमालेख्यदेवैश्च युक्तोऽन्यम्बुना तथा। राजधर्मकाण्डे पृ० २० उद्धृतम्

न्यायमधिकर्तुं श्रेणीनां,[४] पूगानां[५] च स्वतन्त्रव्यवस्था तयोः प्रतिनिधिभिः

---

१. विष्णुधर्मसूत्र ५.१८०। पराशरमाधवीये ३.३५। स्मृतिचन्द्रिका द्वितीयभागे पृ० २२ शुक्रनीतिसारे ४.५.६३.६४, ९३, २८२।

२. बौधायनधर्मसूत्र १.१०.३०, ३१। मनुस्मृति ८.१८, १९

३. राजधान्यां नगरेषु वा सर्वजनसुलभस्थले आरोपिताभवत्। अप्रतिष्ठिता यथावश्यके ग्रामे ग्रामे भ्रान्ता बभूव। मुद्रितायां राज्ञा नियुक्तो न्यायाधीशो व्यवहारनिर्णयं समपादयत्। तस्य शासनादिकं राजमुद्रयाङ्कितं बभूव। शासितायां राजा स्वयमेव न्यायाधीशो बभूव इति बृहस्पतिरपरार्केणोद्धृतः।

४. समानव्यवसायव्यापृतानां लोकानां समवायः।
कारुः शिल्पी संहतैर्द्वेयोः श्रेणिः सजातिभिः॥ अमरकोशे ४.१०.५

५. पूगो लोकानां वृन्दः। अमरकोशे ३.३.२०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सम्पादितासीत् ।[1] न्यायार्थवादिप्रतिवादिनां दूरगमनगनपेक्षितमासीत् । वस्तुतो देशकालविभागेन बहुविधानि न्यायस्थानानि प्रचरितानि बभूवुः । तेषु भृगुर्दशविधानि नामयति—

आरण्यकास्तु स्वकैर्कुर्युः सार्थिकाः सार्थिकैस्तथा ।

सैनिकाः सैनिकैरेव ग्रामेऽप्युभयवासिनः ।
उभयानुमतं चैव गृह्यते स्थानमीप्सितम् ।।

कुलिकाः सार्थमुख्याश्च पुरग्रामनिवासिनः ।
ग्रामपौरगणश्रेण्यश्चातुर्विध्यश्च वर्णिताः ।।

कुलानि कुलिकाश्चैव नियुक्तो नृपतिस्तथा ।

एतेषु कुलिका वादिप्रतिवादिपक्षयोर्ज्येष्ठमहाजना आसन् ।

'वेदा विभिन्नाः स्मृतयो विभिन्नाः' इति समालोच्य दण्डादिनिर्धारणे

---

१. राज्ञां ये विदिताः सम्यक् कुलश्रेणिगणादयः ।

साहसन्यायवर्ज्यानि कुर्युः कार्याणि ते नृणाम् ।। शुक्रनीतिसारे ४.५.३०

व्यासः समर्थयति—

वणिक्शिल्पिप्रभृतिषु कृषिरङ्गोपजीविषु ।
अशक्यो निर्णयो ह्यन्यैस्तदीयैरेव कारयेत् ।।

बृहस्पतिः शुक्रश्च—

कीनाशाः कारुकाः शिल्पि-कुमीदि-श्रेणिनर्तकाः । लिङ्गिनस्तस्कराः कुर्युः स्वेन धर्मेण निर्णयम् ।

गौतमेन प्रागेव निदर्शितम्—

कर्षक-वणिक्पशुपाल-कुसीदिकारवः स्वे स्वे वर्गे । तेभ्यो यथाधिकारमर्थान् प्रत्यवहृत्य धर्मव्यस्था । ११.२१, २२

मनुः समर्थयति—

जातिजानपदान् धर्मान् श्रेणीधर्माश्च धर्मवित् ।
समीक्ष्य कुलधर्माश्च स्वधर्मं प्रतिपादयेत् ।। ८.४१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विरोधे सति स्वतर्कबुद्ध्या यथायोग्यमवधारणीयम्[1]। अत्र पुराणपुरुषाणामभिप्रायः प्रमाणमिति धारणा स्वीकृता।

ब्राह्मणैः कृता न्यायालया धर्मविषयकनिर्णयान् साधयन्ति स्म। तद्यथा मनुः प्रथयति—

दशावरा वा परिषद् यं धर्मं परिकल्पयेत्।
त्र्यवरा वापि वृत्तस्था तं धर्मं न विचालयेत्॥ १२.११०

व्यवहार-विधाः

त्रिविधा व्यवहाराः परीक्षिता आसन्—हिंसामूला[2] (अपराधजाताः) धनमूलाः (सम्पत्ति-जाताः), राजाश्रिताश्च। राजाश्रिता व्यवहारा नारदेन प्रकीर्णका इति व्याख्याताः। तत्र राजा स्वयमेव वादीभूय व्यवहारमुद्भावयति। राजाज्ञा-प्रतीघातः, राजकर्मकरणं, पुरप्रदानं, प्रकृतीनां सम्भेदः, पाखण्डिनैगम–श्रेणी-गणधर्मविपर्ययः, पितापुत्रविवादः, प्रायश्चित्तव्यतिक्रमः, प्रतिग्रहविलोपः आश्रमिणां कोपः, वर्णसंकरदोषः, तद्वृत्तिनियमश्चेति न्यायव्यवहारविषयाः।

दाण्डिकविशेषाः

मनुर्दण्डस्वरूपं सारसंग्रहेण ब्रवीति

अधार्मिकं त्रिभिन्यार्यैर्निगृह्णीयात् प्रयत्नतः।
निरोधनेन बन्धेन विविधेन वधेन च॥ ८.३१०

---

१. न्यायमधिकृत्य पुरा सूत्रस्मृतिकोटिकं विपुलं साहित्यं विरचितम्। तत्र मनुना विरचिता स्मृतिः प्रामुख्यं भजते। अन्ये प्रमुखग्रन्था अधोविधा विद्यन्ते—

स्मृतयः— याज्ञवल्क्यस्मृतिः नारदस्मृतिः, बृहस्पतिस्मृतिः, शुक्रनीतिसारः, स्मृतिचन्द्रिका, स्मृतिमुक्ताफलम्, कात्यायनस्मृतिसारोद्धारः, कामन्दकीयनीतिसारः।

धर्मसूत्राणि—आपस्तम्बधर्मसूत्रम्, गौतमधर्मसूत्रम्, बौधायनधर्मसूत्रम्, वसिष्ठधर्मसूत्रम्।

अन्ये ग्रन्थाः—महाभारतम्, अर्थशास्त्रम्, विवादचिन्तामणिः, विवादरत्नाकरः, व्यवहारतत्त्वम्, व्यवहारनिर्णयः, व्यवहारमयूखः, व्यवहारमातृका, व्यवहारसारः, दण्डविवेकः, राजनीतिप्रकाशः, पराशरमाधवीयम्, दीपकलिका, मानसोल्लासः, सरस्वतीविलासः, राजनीतिरत्नाकरः अपरार्कचन्द्रिका।

२. हिंसामूला व्यवहारा चतुर्भिद आसन्—वाक्पारुष्यं, दण्डपारुष्यं (शारीरिकक्षतिः), साहसं (हत्यादिकानि घोरकर्माणि), स्त्रीसंग्रहः (परस्त्रीसमागमः) धनमूला व्यवहारा चतुर्दशभिद आसन्।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अत्र वधस्तु अङ्गभञ्जनच्छेदनकशाप्रहारादिरपि भवति ।[1] निष्पक्ष-न्यायस्य निदर्शनं मनुस्मृतावधोविधं पुरस्कृतम्—

पिताचार्यः सुहृन्माता भार्या पुत्रः पुरोहितः ।
नादण्ड्या नाम राज्ञोऽस्ति यः स्वधर्मे न तिष्ठति ॥ ८.३३५

न्यायपथे राजा कदापि क्रोधं न कुर्यात् यद्यपि । कार्यार्थिनो बाला वृद्धा आतुरास्तमधिक्षिपेयुः, तस्य क्षमाभाव एव प्रशस्यः ।[2]

येन केन प्रकारेण कश्चौर इति ज्ञेयमासीत् । यदि सोऽदण्डितो भवति तर्हि राजा पापभाग्भवति । सन्देहपदेन चौरादीनां पापानां विमुक्तिर्नासीदिति मनुमतम् ।[3]

कस्यचिदपराधस्य न केवलं कर्तैव दण्डार्हो भवति अपितु तत्र सम्बद्धा अपि जना पापभाजः सन्तीति मनुर्निदर्शयति—

अन्नादे भ्रूणहा मार्ष्टि पत्यौ भार्यापचारिणी ।
गुरौ शिष्यश्च याज्यश्च स्तेनो राजनि किल्बिषम् ॥ ८.३१७

यत् किंचित् चोरितं नाशितं वा तत् स्वामिने चौरेण प्रदेयमासीत् । दण्डोऽपरिहार्य आसीदेव ।[4]

चोरितवस्तुनो मूल्यं महत्त्वं च विचार्य चौर्यस्य देशकालादिकं चावधार्य दण्डस्य मात्रावधारणीया ।[5] तथैवापराधस्यानर्थभावस्य मात्रा विचारणीयासीत् दण्डविधाने ।[6] कः कस्य कियन्मात्रं हानिमाचरति प्रसभमप्रसभं वेति दण्डस्य मात्राप्रकारादिनिर्धारणेऽवश्यमेव भावयितव्यम् ।

---

१. तथाहि—कार्योऽर्धपादिकः । मनु० ८.३२५
येन येन यथाङ्गेन स्तेनो नृषु विचेष्टते ।
तत्तदेव हरेत्तस्य प्रत्यादेशाय पार्थिवः ॥ मनु० ८.३३४
२. मनु० ८.३१२, ३१३
३. मनु० ८.३१६ । तथापि सन्देहपदे दण्डं न कुर्यादिति आपस्तम्बः २.५.११-१२
४. मनु० ८.३१९–३२०
५. मनु० ८.३२४, ३२६–३२९
६. मनु० ८.३२२–३३३
क्वचिच्चोरितमप्यचौर्यं भवतीति मनुर्निर्दिशति—
वानस्पत्यं मूलफलं दावंग्न्यर्थं तथैव च ।
तृणं च गोभ्यो ग्रासार्थमस्तेयं मनुरब्रवीत् ॥ ८.३३९
द्विजोऽध्वगः क्षीणवृत्तिर्द्वाविक्षू द्वे च मूलके ।
आददानः परक्षेत्रान्न दण्डं दातुमर्हति ॥ ८.३४१ ३.५ अन्यच्च ८.३१७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

उत्तरोत्तराभिजात्येन क्वचिद् दण्डस्य मात्रा वर्धनीयेति मनुः स्पष्टयति—

अष्टापाद्यं तु शूद्रस्य स्तेये भवति किल्विषम् ।
षोडशैव तु वैश्यस्य द्वात्रिंशत्क्षत्रियस्य च ॥ ८.३३७
ब्राह्मणस्य चतुःषष्टिपूर्णं वापि शतं भवेत् ।
द्विगुणा वा चतुःषष्टिस्तद्दोषगुणविद्धि सः ॥ ८.३३८

अपराधिनां पापानां वा बहिष्कारो दण्डस्य विरलमपि स्वरूपं महत्त्वपूर्णं प्रतिभाति । तद्यथा—

योऽदत्तादायिनो हस्तालिप्सेत ब्राह्मणो धनम् ।
याजनाध्यापनेनापि यथा स्तेनस्तथैव सः ॥ ८.३४०

दण्डस्तु शीघ्रातिशीघ्रमवसेयमासीदिति मनुमतं साधुवादमर्हति । तथाहि—

'नोपेक्षेत क्षणमपि राजा साहसिकं नरम् ॥' ८.३४४

शासनतन्त्रं धनादानाय साहसिकान् न समुत्सृजेत् । ८.३४७

'नाततायिवधे दोषः' इति निर्धार्य (८.३५१) क्वचिद् विषमस्थिता अपवादरूपेण ब्राह्मणानां कृतेऽपि वधोऽवधो भवतीति मनुर्विस्पष्टयति—

शस्त्रं द्विजातिभिर्ग्राह्यं धर्मो यत्रोपरुध्यते ।
द्विजातीनां च वर्णानां विप्लवे कालकारिते ॥ ८.३४८
आत्मनश्च परित्राणे दक्षिणानां च संगरे ।
स्त्रीविप्राभ्युपपत्तौ च घ्नन् धर्मेण न दुष्यति ॥ ८ ३४९
गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतम् ।
आततायिनमायान्तं हन्यादेवाविचारयन् ॥ ८.३५०

मनुरराजकतां वारयितुं समाजे शान्तिं व्यवस्थापयितुं च प्रसभकारिणोऽविलम्बं दण्डनीया इति निर्दिशति ।[1] तथा हि—

न मित्रकारणाद्राजा विपुलाद् वा धनागमात् ।
समुत्सृजेत् साहसिकान् सर्वभूतभयावहान् ॥ ८.३४७

परस्त्रीदूषकः क्वचिन्मरणान्तकं दण्डमर्हतीति मनुर्मनुते । नायं नियमः सर्वसाधारणस्त्रीणां विषये आसीदिति स स्पष्टमेव निर्दिशति । सत्स्त्रीभ्रंशात्मक प्रेमप्रक्रियाः स आदित एव दण्डभयं समुत्पाद्य विवर्जयति ।[2] अत्र वर्णसंकरतां समाजे चारित्रिकोच्छृंखलतां च बाधितुं शाश्वतप्रयासा एव तेन स्मारिता इति प्रतिभाति ।

---

१. साहसे वर्तमानं तु यो मर्षयति पार्थिवः ।
स विनाशं व्रजत्याशु विद्वेषं चाधिगच्छति ॥ ८.३४६

२. मनु० ८.३५२–३७०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विरलो भवेत् खरोद्वाहन-नामको दण्डःकिन्तु सामाजिकचरित्र-संरक्षणदिशि तस्य महत्त्वं विशिष्टमेव ।[1] अपरे विचित्रदण्डाः श्वभिः खादनं, तप्तायसशयने दाहनं, मूत्रेण मौण्डचकरणं, कटाग्निना दहनं, राष्ट्राद् बहिष्करणं चासन् ।[2]

न्यायविधौ समानदेशपत्तन-गोष्ठपुरग्रामवासिनां कृते दण्डः स्वसमयै-र्निधारितोऽभवत् । असमानस्थितौ धर्मशास्त्रानुसारिनिर्णयोऽभवदित्यनेन समयस्य महत्त्वं प्रतिभाति ।[3]

पुनर्विचारप्रार्थनाधिकारी सर्वोच्चो राजा बभूव । तेन नियुक्तोऽधिकार-मण्डप आधुनिकमुख्यन्यायालय–(Highcourt) समोऽवर्तत । राज्ञो निर्णयस्य विरोधे तत्र नासीत् पुनर्विचारप्रश्नः ।[4]

मृतकाभियोगे क्वचित् 'आशुमृतकं परीक्षेत' इति विधानमर्थशास्त्रे निर्दिष्टम् ।[5]

अर्थशास्त्रानुसारेण न्यायाधिकारिणोऽपि नियमविरुद्धाचरणप्रसङ्गेन दण्डचो बभूव । तद्यथा —

देयं देशं न पृच्छति । अदेयं देशं पृच्छति । कार्यमदेशेनातिवाहयति, छलेनातिहरति, कालहरणेनाश्रान्तमपवाहयति, मार्गापन्नं वाक्यमुत्क्रामयति मतिसाहाय्यं साक्षिभयं ददाति, तारितानुशिष्टं कार्यं पुनरपि गृह्णाति, उत्तममस्मै साहसदण्डं कुर्यात् । ४.९.३८

राजापि यदि नाम किंचिदयोग्यं कर्माकरोत् स भृशं दण्डनीयो बभूव । तद्यथार्थशास्त्रे प्रोक्तम्

अदण्डचदण्डने राज्ञो दण्डस्त्रिंशद्गुणोऽम्भसि ।
वरुणाय प्रदातव्यो ब्राह्मणेभ्यस्ततः परम् ॥ ४.१३.५८

क्वचित् कारागारे निगृहीता वन्दिनो राजानन्दमहोत्सवावसरे विमुक्ताः कृताः ।[6]

---

१. मनु० ८.३७०
२. मनु० ८.३७१, ३७२, ३७५, ३७७, ३८०.
३. देशपत्तनगोष्ठेषु पुरग्रामेषु वादिनाम् ।
तेषां स्वसमयैर्धर्मशास्त्रतोऽन्येषु तैः सह ॥
४. कुलादिभ्योऽधिकाः सभ्यास्तेभ्योऽध्यक्षोऽधिकः कृतः ।
सर्वेषामधिको राजा धर्मो यत्नेन निश्चितः ॥ इति शुक्र० ४.५.३२
५. कण्टकशोधने चतुर्थेऽधिकरणे 'आशुमृतकपरीक्षेति सप्तमोऽध्यायो नैकविधप्रयत्नै-र्गुप्तहत्याया अपराधिनमन्वेष्टुं न्यायाधीशस्तत्पर आसीदिति प्रकटयति ।
६. अर्थशास्त्रे २.३६ । रघुवंशे १७.१९,२० ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

न खलु सूत्र-स्मृत्यादिग्रन्था अक्षरशः परिपालनीया व्यवहारदर्शनेऽपितु यत्र यत्र तेषां प्रतिपादनमसमञ्जसं नितान्तमयोग्यं च प्रतिभाति, तत्र तत्र न्यायाधीशस्तर्कोद्भावितपद्धत्या निर्णयेत् । काणे महोदयो निदर्शयति—

All courts in ancient and mediaeval India were required to administer the law of the text tempered by common sense and reason as laid down by Bṛhaspāti : "a decision should not be given by merely relying on the text of the śāstra. When consideration of a matter is divorced from reason and common sense, loss of dharma results. (quoted by Apārārka p. 599),

History of Dharmaśāstra Vol. III p. 259.

अत एव व्यवहार-निर्णयस्तु धर्मपदम् । मनुर्निर्दिशति—

तीरितं चानुशिष्टं च यत्र क्वचन यद् भवेत् ।
कृतं तद्धर्मतो विद्यान्न तद्भूयो निवर्तयेत् ।।
अमात्याः प्राड्विवाको वा यत्कुर्युः कार्यमन्यथा ।
तत्स्वयं नृपतिः कुर्यात् तान् सहस्रं च दण्डयेत् ।। ९.२३४

शारीरिकदण्डभेदाः

प्राणान्तकवधः हस्तपादाजिह्वादिच्छेदः योगाञ्जनेनान्धत्वम् ४.१० अध्यायतः । कष्टरहितवधः कष्टपूर्वकवधः, शूलारोहणेन वधः, त्वक्छिरः प्रादीपिकघातः ।

तमःप्रवेशः (आजीवनकालकक्षे वासः) अप्सु निमज्जनम्, अग्निना दाहनम्, परिभाषणम्, जिह्वोत्पाटनम्, कृतकबन्धाङ्कनिर्वासनम् । ४.११–१३ अध्यायतः ।

क्वचित्सर्वतन्त्रस्वतन्त्रा राजानश्चित्रविचित्रमभूतपूर्वं वा दण्डविधानं प्रवर्तयन्ति स्म । मनोरञ्जकान्येव सन्ति कश्मीरराजस्य उच्चलस्य दण्डस्वरूपाणि । कल्हणो राजतरङ्गिण्यां वर्णयति—८.९५.९६ ।

वधस्थानं नीयमानस्यापराधिनो वेशभूषादिकं विद्रावकं वीभत्सं चाभवत् । तद्यथा प्रबुद्धरौहिणेये वर्णितम्—

चूर्णेनाप्रपदीनभूषिततनुः कृष्णाम्बुलिप्तानन:
प्रेंखतकेशभरः कुकाहलरवाहूतप्रजावेष्टितः ।
आरूढखरमेषरक्तकुसुमस्रक्छोभितोरःस्थिति—
र्जातस्तत्खलु कालरात्रिवनिताभिष्वङ्गरङ्गोत्सुकः ।। ५.१५.१

निर्दयं दण्डप्रक्रियाफलं मृच्छकटिके दृश्यते ।[1]

---

१. मृच्छ० १०.५४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

न्यायप्रक्रिया (व्यवहारदर्शनम्)

न्यायप्रक्रिया क्रमशश्चतुर्भागेषु प्रपञ्च्यते—आगमः व्यवहारपदम्, चिकित्सा, निर्णयश्च ।[1] तत्रागमेऽधिकर्णिकेन वादस्य ग्रहणं भवति । व्यवहारपदेऽधिकर्णिको वादस्याष्टादशकोटिषु कुत्र पदमिति निर्धारयति । चिकित्सायामुभयपक्षयोर्वाद-प्रतिवाद-श्रवणं क्रियते । तत्रैव साक्ष्यप्रमाणादीनि अवधार्यन्ते । एतत् सर्वं लिखितं भवति संस्कृतेन प्राकृतेन वा मूर्खाणामबोधाय ।

वादिप्रतिवादिनां प्रतिनिधिभूता विशेषज्ञाः स्वव्याख्याभिर्विवादविषयकस्पष्टीकरणाय क्वचिन्नियुक्ता बभूवुः ।[2] ते विशेषज्ञाः आधुनिक-'वकीलवत् शुल्कमपि गृहीतवन्तः ।

वादमनु प्रतिवादिने आसेधो रोपितो यत् स स्वस्थानं परित्यज्य दूरं न गच्छेत् अथवा वादविरोधे स न प्रतियतेत स्वोपक्रमैः ।[3]

नैकाकी कश्चिन्महाप्रज्ञो राजा वा निर्णयं कुर्यादिति प्राचां सम्मतम् । तस्य निर्णयोऽसत्यं भवेदिति शङ्का निभालिता बभूव । नैके न्यायविदः सम्भूय यन्निर्णयं कुर्वन्ति स एव सम्यक् ।[4]

नैकान्ते व्यवहारदर्शनं सुष्ठु भवति । न्यायालये सर्वसाधारण-समक्षं न्यायः करणीयः ।[5]

साक्ष्यस्य महत्त्वं सविशेषमासीत् । न्यूनातिन्यूनं त्रयः साक्षिण अपेक्षिता आसन् । नैकसाक्षी पर्याप्त इत्यधुना विश्वव्यापिनियमः पुरा भारते साधारणतः सम्मत आसीत् ।[6] नैकं पृच्छेत् कदाचन इति लोकोक्तिः प्रचारिता । प्रमाणदृष्ट्याधोलिखितानां साक्ष्यं सुष्ठु सन्धारितम्—स्वकर्मसु

---

१. आगमः प्रथमं कार्यो व्यवहारपदं ततः ।
चिकित्सा निर्णयश्चैव दर्शनं स्याच्चतुर्विधम् ।। नारदस्मतौ १.३६

२. शुक्रनीतिसारे ४.५.१११–११७

३. नारदस्मृतौ १.४७–५४

४. कालिदासः प्रथयति—सर्वज्ञस्याप्येकाकिनो निर्णयाभ्युपगमो दोषाय । मालविकाग्निमित्रे १.१७।१८

स धर्मस्थसखः शश्वदर्थिप्रत्यर्थिनां स्वयम् ।
ददर्श संशयच्छेद्यान् व्यवहारानतन्द्रितः ।। रघु० १७.३९

५. शुक्रनीतिसारे ४.५.६–७

६. विष्णुधर्मसूत्रे ८.५ । परिगणितस्थितिषु एकस्य साक्ष्यं सत्यनिर्धारणाय पर्याप्तमासीत् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अनिन्दितः, प्रात्ययिकः, शुचिः, कुलजः, वृत्तवृत्तिसम्पन्नः, यज्वा, तपस्वी, पुत्री, धर्मज्ञः, अधीयानः, सत्यवान्, त्रैविद्यवृद्धः, लोभमोहविवर्जितश्च।[1] बहुविधा जनाः साक्ष्यायायोग्या निर्धारिताः। तथा—रागद्वेषादिग्रस्ताः, वादविषयकलाभार्थिनः, सम्बन्धिनः, सहभागिनः, मिथ्यासाक्ष्याः, पापाः, दासाः, दोषज्ञाः धर्मरहिताः, अतिवृद्धाः, बालः, स्त्री, तैलिकः, प्रमत्ताः, उन्मत्ताः, अनवधानपराः, आर्ताः, द्यूतकाराः, ग्रामपुरोहिताः, सामुद्रिकसार्थवाहाः, रुग्णाः, संन्यासिनः, अङ्गभङ्गविकृताः, श्रोत्रियाः, नपुंसकाः, अभिनेतारः, मल्लयोद्धारः, व्रात्याः, परित्यक्तकलत्राः, अग्निहोत्रविमुखाः, अरिचराः गुप्तचराः, विषविक्रेतारः, बन्दीकृताः, सर्पग्राहाः, श्रान्ताः, साहसिकाः, परित्यक्तपत्नीकाः, यज्ञाधिकारविरहितानां पुरोहिताः, पाचनपात्रे भोजकाः, दाहकाः अपरिग्रहाः, कुजीवाः, ब्रह्मचारिणः, बुद्धिहीनाः, तैलविक्रेतारः, मूलविक्रेतारः, दारिद्र्याभिभूताः, मूढाः, भूतप्रेताविष्टाः, राजद्रुग्धाः अस्पृश्याः, भाविऋतुसूचकाः, दैवज्ञाः, पापघोषकाः, अल्पाङ्गाः, पत्नीजीविका कुनखाः, कृष्णदन्ताः, मित्रद्रोहिणः, मद्यविक्रेतारः, ऐन्द्रजालिकाः, लुब्धाः, भयङ्कराः, गणश्रेणीविरोधकाः, पशुघ्नाः, चर्मकाराः, बहिष्कृताः, दस्यवः, राजभृत्याः, वर्णसंकराः, नीचानां भृत्याः, पितृद्रोहिणः, मनुष्य-पशु-मांसास्थि-मधु-दुग्ध-जल-घृत-विक्रेतारो ब्राह्मणाः, कुसीदिनस्त्रयो वर्णाः, वैतालिकाः, कलहोद्भावकाश्च।

साक्ष्यनिषेधस्य नैककारणानि प्रतिभान्ति। तद्यथा—

(१) मत्ताः, प्रमत्ताः, मूढा ये वादविषयं न बोधयन्ति।

(२) परम्परागतदुर्भावना। यथा स्त्रीविषये मनुर्मन्यते—

एकोऽलुब्धस्तु साक्षी स्यात् बह्वृचः शुच्योऽपि न स्त्रियः।
स्त्रीबुद्धेरस्थिरत्वात्तु दोषैश्चान्येऽपि ये वृताः॥ ८.७७

(३) वादिनः प्रतिवादिनो वा पक्षधरः।

(४) चरित्रहीनता दुर्व्यवसायिता च।

(५) शत्रुता मित्रता वा।

(६) महात्मनां लोकव्यवहारवैमुख्यम्।

(७) सम्प्रतिष्ठा यथा राजा।

पूर्वोक्तेषु बहूनां सत्यशीलतैव सन्दिग्धा। बृहस्पतिः साक्षिणोऽनुशासनं निदर्शयति—

विहायोपानदुष्णीषं दक्षिणं बाहुमुद्धरेत्।
हिरण्यगोशकृद्दर्भान् समादाय ऋतं वदेत्॥

---

१. गौ० ध० सू० १३.२; विष्णु० ८.८ : मनु० ८.६२–६३।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सत्यमेव वदेन्न्यायालये नासत्यमिति प्रायः सर्वेषां शास्त्रकाराणां सम्मत-मेव। यतो हि नाम न स्वीयमपितु पूर्वजानामपि साक्षिणः सत्यवचनेन सुगतिरसत्यभाषणेनदुर्गतिश्च सम्भाव्यते।

शपथः दिव्यपरीक्षा च

यदि नाम साक्ष्याभावेऽन्यविधप्रमाणाभावे च वस्तुस्थितेः सत्यभावो न प्रतिभायात् तर्हि शपथेन सत्यं विजानीयात्। मनु ८.१०९। बृहस्पतिः समर्थयति—

लिखिते साक्षिवादे च सन्दिग्धिर्यत्र जायते।
अनुमाने च सम्भ्रान्ते तत्र दिव्यं विशोधनम्॥

न्याय-प्रक्रिया पुरा प्रपञ्च-विहीना, अजटिला, नाति व्ययसाध्या च व्यति-रिक्तविलम्बि बभूवेति काणे महोदयोऽनुसन्दधाति।[1] नैकन्यायकृतां मतमासीत्—

न कालहरणं कार्यं राज्ञा साधनदर्शने।

महान् दोषो भवेत् कालाद्, धर्मव्यापत्तिलक्षणम्। शुक्रनीतिसारे ४.५.१६७

दिव्यपरीक्षायाः प्रचलनमृग्वैदिककालत आसीदिति सम्भावना सत्या भवेन्नाम।[2] पञ्चविंशब्राह्मणेऽग्निपरीक्षायाः स्पष्टं विवरणमुपलभ्यते। तद्यथा—

वत्सश्च वै मेधातिथिश्च काण्वाः। तं वत्सं मेधातिथिराक्रोशत्—अब्राह्मणोऽसि शूद्रापुत्र इति। सोऽब्रवीत्—ऋतेनाग्नि व्ययाव। यतरो नौ ब्रह्मीयानिति। वात्सेन वत्सो व्यैत्। मेधातिथेन मेधातिथिस्तस्य न लोभ च नौषत्। १४.६.६। छान्दोग्योपनिषदि वर्णितं यत् अस्तेय तप्तपरशुना न दह्यते। यदि दह्यते स स्तेन इति हन्यते ६.१६.१।

नैकविधा दिव्यपरीक्षाः कालान्तरेऽन्विष्टाः। तद्यथा अग्निजलतुला-विष-कोशपरीक्षाः। परवर्तियुगे तप्तमाष-तण्डुलपरीक्षाद्वयं विकसितम्। म्लेच्छे घटसर्पनाम्नी परीक्षा प्रचलितासीत्।[3]

---

1. Therefore it may be said that in ancient times Indian litigants had an easy time, while in modern times litigation is often ruinous, what with the heavy court fees to be paid in several courts, the fees of legal practitioners and the expenses of witnesses and the delay of years. History of Dharmaśāstra Vol. III p. 395.

२. तद्यथाग्निपरीक्षा सम्भवेत् ऋग्वेदे १.१५८.४, ५; ३.५३.२२; अथर्ववेदे २.१२।

३. घटे सर्पो धारितः। पश्चादपराधिना हस्तेन तस्मात् मुद्रा निष्कासनीयासीत्। यदि स सर्पेण न दष्ठोऽथवा दष्टोऽपि विषेणाप्रभावित आसीत्, स निरपराधोऽगण्यत। व्यवहारतत्त्वे पृ० ५७९।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सर्वासां दिव्यपरीक्षाणां समारम्भो याज्ञिककार्यकलापेन विच्छुरितोऽवर्तत। कस्यचित् प्राड्विवाकस्याध्यक्ष्ये तत् सर्वं समापन्नम्। प्राड्विवाकः शोध्यश्चोभौ ऋतंभरदेवानां सान्निध्यं मनोवचष्कर्मभिरवापतुः। तौ परीक्षादिवस उपावसताम्। तौ प्रातरस्नाताम्। संगीतनिर्भरे दिगन्तरे प्राड्विवाको देवानावाह्य पुष्पचन्दनगन्धान् तेभ्यः समर्प्य पूर्वाभिमुखः सन् धर्मदेवमाहूय चतुर्दिक्षु इन्द्रयमवरुणकुबेरान् क्रमशः समवस्थापयत्, अष्टदिगधीश्वराणां ध्यानमकरोच्च। अपरेऽपि देवा आहूता यथास्थानं प्रतिष्ठापिताः। दुर्गा तत्र प्रमुखासीत्। तत्र पुरोहितोऽतःपरमग्नौ हविषाजुहोत। स एकस्मिन् पत्रे परीक्षा-विषयं लिखित्वा तच्छोध्यस्य शिरसि अधोलिखितमन्त्रेण निहितवान्—

आदित्यचन्द्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदये यमश्च।
अहश्च रात्रिश्चोभे च सन्ध्ये धर्मोऽपि जानाति नरस्य वृत्तम्॥

तुलापरीक्षा

तुलापरीक्षायै वैज्ञानिकविधिना धर्मतुला कृता। शोध्यस्य भारो द्विस्तोलितः। यदि प्रथमवारस्य निर्णीतपरिमाणं लघुतरमभूत् तदा शोध्यो निर्दोष इत्यभिनन्दितः। यदि नाम परिमाणमधिकतरं बभूव, स पाप इति निर्णीतम् उभयवारं समाने परिमाणे सति पुनस्तोलनप्रक्रिया समारब्धा। यदि नाम तोलनप्रक्रियामध्येऽकारणं तुला भग्नासीत्, शोध्यः पापीति घोषितम्।

अग्निपरीक्षा

गोमयेन पृथिवीतले १६ अङ्गुलपरिधिपरिमाणानि नववृत्तानि उत्तरोत्तरं १६ अङ्गुलदूराणि कृतानि। तेषामुपरि कुशा आस्तीर्णाः। तदनन्तरमयस्कारः ५० पलपरिमाणमष्टाङ्गुलायतं लौहपिण्डं दन्दह्य स्फुलिङ्गवत् कृतवान्। पिण्डाग्निरधोलिखितमन्त्रेणाहूतः —

त्वमग्ने सर्वभूतानामन्तश्चरसि पावक।
साक्षिवत् पुण्यपापेभ्यो ब्रूहि सत्यं कवे मम॥ याज्ञवल्क्य २.१०४

शोध्यस्य हस्ते सप्तपर्णान्यश्वत्थस्य निधाय तेषामुपरि तण्डुल-दधि प्रस्तार्य सूत्रेण तानि बध्नातिस्म। प्राड्विवाकः कङ्कमुखेन तप्तायसपिण्डं शोध्यस्य हस्तेऽधारयत्। तं पिण्डं गृहीत्वा शोध्यो चलित्वाऽष्टवृत्तानि क्रमशो मन्दं चलित्वा नवमे वृत्ते पिण्डं न्यधात्। यदि नाम तस्य हस्तावक्षतौ तर्हि निर्दोषः सोऽभिनन्दितः। अशुद्धाचरणे पुनः परीक्षाभवत्। अत्र परीक्षासहकारी देवोऽग्निर्मन्यते। सीताया अग्निपरीक्षा सुविदिता।

जलपरीक्षा

जलपरीक्षायां प्राड्विवाकः कस्यचित् जलाशयस्य तटे तोरणं कारयित्वा ततः १५० हस्तदूरं शरसन्धानाय लक्ष्यं निर्मातिस्म। जलाशयकेन्द्रे स्थापितं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दण्डं परिगृह्य पूर्वाभिमुखः कश्चिन्निष्पक्षद्विजोऽतिष्ठत् । शोध्यो जलेऽतिष्ठत् । तदनु कश्चिदायुधजीवी ब्राह्मणो वा क्षत्रियो वा तोरणसमीपं तिष्ठन् क्रमशो बाणत्रयं लक्ष्यं प्रत्यमुञ्चत् । द्वितीयो बाणो यत्र न्यपतत् तत्र शरपातस्थाने कश्चित् सत्वरधावकः शरं धृत्वातिष्ठत् । अन्यः सत्वरधावकस्तोरणपादसमीपमतिष्ठत् । प्राड्विवाकस्य निर्देशेन तोरणस्थधावकः शरपातस्थानं प्रत्यधावत् । यदा स तत्रस्थधावकममिलत् तदा स स्वस्थानात् तोरणं प्रत्यधावत् । उभयोर्धावनावधिकालान्तराले शोध्यो जलाशयकेन्द्रवर्तिपुरुषस्य जंघां गृहीत्वात्मानं जले निगूहितवान् । निगूहनकाले यदि स न दृश्येत, अथवा तस्य शिरसः पश्चभागमात्रं दृश्येत स निर्दोषो घोषितः, अन्यथा स पाप इति दण्ड्यो बभूव । अत्र परीक्षासहकर्मा देवो वरुणः ।

विषपरीक्षा

विषपरीक्षायां ब्रह्मणः पुत्र इति विषः सहकारी देवः । शोध्यः शिवमपूजयत् । शिवस्य मूर्तेः समक्षं धृतं विषं त्रिंशद्गुणघृतेन सम्मिश्रञ्च निशाया अन्तिमयामे शोध्यो विषस्तुतिपुरस्सरमपिबत् । यदि नाम दिवसं यावत् स विषेणाप्रभावित आसीत्, स निर्दोष इति घोषितम् ।

कोशपरीक्षा

कोशस्तु प्रकरणेऽस्मिन् पानभाजनम् । तत्र निहितं दुर्गा-रुद्रादित्यादिदेवेषु कस्यचिन्मूर्तेरभिषेकजलं शोध्योऽपिबत् पञ्चप्रसृतिमात्रं प्राड्विवाकस्य निर्देशेन । यदि नाम स कतिपयदिवसावधौ स्वयं वा तस्य परिवारस्य कश्चित् सदस्यो वा महारोगविपत्तिग्रस्तो नाभवत् तर्हि स निर्दोष इति घोषितम् । रुग्णे विपन्ने वा सति स पाप इति दण्ड्यो निर्धारितः ।

तण्डुलपरीक्षा

सूर्याभिषेकेण प्राप्तेन जलेन तण्डुलान् परिषिच्य प्राड्विवाकः शोध्यं प्रातःकाले मुष्टित्रयमखादयत् । तदनन्तरं पिप्पलपत्रे वर्चपत्रे वा स ष्ठीवनं चकार । यदि नाम ष्ठीवने रक्तबिन्दव आसन् स पापोऽन्यथा निर्दोष इति निर्णीतम् ।

तप्तमाष-परीक्षा

तप्तमाषपरीक्षायां प्राड्विवाक उत्क्वथनं यावत् कस्मिंश्चित् पात्रे घृतमतपत् । तस्मिन् स्वर्णभाषको मुद्रा वा निक्षिप्ता । शोध्यो यदि नामाङ्गुलित्रयेण तमुद्धरेत् तर्हि स निर्दोषोऽन्यथा दण्डय इति निश्चितम् ।

फालपरीक्षा

फालपरीक्षायां १२ फलभारोऽष्टाङ्गुलिलम्बः, चतुरङ्गुलिपृथुः फालः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तापेन रक्ताभः कृतः। शोध्यो जिह्वया तं लिलेह। यदि जिह्वा न दग्धा तर्हि निर्दोषोऽन्यथा सदोषो घोषितः।

धर्मपरीक्षा

धर्मपरीक्षायां धर्मस्य अधर्मस्य च क्रमश आयसीं राजतीं च मूर्तिं कारयित्वा तस्योपरि पञ्चगव्यमभिषिच्य देवद्वयं क्रमशः श्वेतैः कृष्णैश्च पुष्पैः पूजयित्वा मूर्तिद्वयं गोमयस्य पिण्डद्वये निगूह्य तद् नवमृन्मयपात्रे धारणीयम्। तत्पात्रं देवमूर्तीनां ब्राह्मणानां समक्षं गोमयसम्भारे धृत्वा शोध्येन सशपथमेकः पिण्डः स्वहस्तेन गृहीत्वा निष्कासनीयः। यदि नाम धर्मपिण्डं निष्कासितवान् तर्हि निर्दोष इति ख्यापितम्।

दिव्यपरीक्षा विश्वस्य नैकदेशेषु पुरा प्रचलिता आसन्। तथाहि—आंग्लदेशे तप्तायस-परीक्षा, क्वथज्जल-परीक्षा च सर्वाधिकप्रचलितासीत्। जलपरीक्षापि तत्रासीत् निमज्जनोन्मज्जनेन दोषादोषौ प्रत्यायन्ती। भारते दिव्यपरीक्षाणां प्रचलनं खीष्टादशशताब्दं यावदासीत्। नैकदिव्यपरीक्षाणामैतिहासिकविवरणं काणे महाभागेनोद्धृतम्।[1] आधुनिकयुगे दिव्यपरीक्षाणां विरलं प्रचलनं दृश्यते।

राजकीयशासन-पत्र-संग्रहाः

प्राचीनकाले राज्ञां शासकीयपत्राणां शासनादेशानां च सम्यक् संकलनस्य संरक्षणस्य यथाकालं तेषां परीक्षणस्य प्रचारस्य च व्यवस्था सावधानविधिना समाहिता। लेखका वृक्षपर्णेषु, धातुपत्रेषु, शिलापट्टेषु वा राजादेशादीन् विलिख्य राजकीय-संग्रहालयेषु रक्षितवन्तः। अपरं चाशोकादीनां महाराजानां चतुर्वर्गानुध्यायिनः सार्वलौकिकोपयोगानुसारिणः सन्देशा विजयश्री-संस्तवाश्च स्तम्भादिष्वमरी कृताः।

शासनाधिकारिणां परिभ्रमणम्

राज्ञामन्येषां चोच्चशासनाधिकारिणां नगरेषु, ग्रामेषु, अटवीषु च परिभ्रमणेन तत्रत्यप्रजादुःखनिवारणमभ्युदयोपायानां कार्यान्वयनं च समीहितमासीत्। प्रजापीडकराजकर्मचारिभ्यः प्रजानां रक्षणं तेषां निलम्बनं नियोगखण्डनं च परिभ्रमतां राज्ञां कृते सुकरमासीत्।[2] अशोकहर्षादीनामेतद्विधं परिभ्रमणमितिहासनिबद्धमेव।

---

1. History of Dharmaśastra Vol. III p. 375–378.
इस्लामधर्मानुयायिनो सम्राजोऽपि दिव्यपरीक्षाणां सार्थकतां मेनिरे। अकबरः लौह-तप्तघृत-जलादिपरीक्षाणां स्वीकृतिममन्यत। आइन-अकबरी पृ० २१५

२. मनुस्मृति ७.१२२,१११। शुक्रस्मृति १.३७४,३७५।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भारते दण्डविधानं तावन्मात्रं कठोरं नासीद्यावन्मात्रं विदेशेष्वभवत्। तत्र कारणं विश्लेषयन् काणे महाभागः कल्पयति—

Persons guilty of these (crimes) were also liable to undergo Prāyaścittas. It is probably due to this double liability that punishments for crimes in ancient and mediaeval India were light as compared with the heavy punishments for even trifling crimes inflicted in western countries only a century or two ago.

Hist. of Dharm. Vol IV. p. 68.

तत्र नैककुकृत्यानि पापानि सन्ति धर्मशास्त्रविधानेन प्रायश्चित्तार्हाणि। तान्येवापराधा भवन्ति राजदण्डेनापि परिशोधार्हा। उभयविधप्रक्रिया सममेव प्राचरत् पुरा।

शासन-व्यवस्था

सिन्धुसभ्यतायाः शासन-व्यवस्था न सम्यग् विज्ञाता यतो हि नाम तस्याः समकालिकं साहित्यमनवाप्तमेव। यत्किंचिन्नागरेयकमवशिष्टं वर्तते, तस्य परीक्षणेन निश्चितं ज्ञायते यत् तत्कालीननागरैर्लोकोत्थानकरी शासन-व्यवस्था विकासितासीत्। एतत् सर्वं तेषां व्यवसाय-वाणिज्य-वार्ता-शिल्प-प्रसाधनाकल्प-वसति-विन्यास-धर्म-मनोरञ्जनादीनां परमोदात्त-सौष्ठवेन स्पष्टं विभाति। प्रशान्तप्रगल्भ-व्रतानुबन्धि शासनं विना तादृशं नागरक-जीवन-सौष्ठवं नाभविष्यत्। तत्र नगरपालिका-प्रबन्धेन सार्वजनिकागारं, राजमार्गाणां सुरूपं, रात्रौ प्रकाशः, नागरक-स्वास्थ्य-रक्षणमित्यादीनि प्रचुरं सम्भावितानि बभूवुः।

वैदिकार्याणां ग्रामवसतिः शोभनासीत्। प्रतिग्रामं ग्रामसमवायेषु वा तदा यो प्रजारक्षको बभूव, स ग्रामपतिः, ग्रामणीः, विश्पतिर्वा प्रजानां सर्वासु योगक्षेमप्रवृत्तिषु वैषम्यनिवारणयोजनासु च कुटुम्बे गृहपतिरिव सोत्साहं साह्यं समाचरत्। नैके जनाः प्रायो निस्स्वार्थमेव स्वेच्छया ग्रामणीनेतृत्वे प्राणपणेन ग्रामाभ्युदयं शान्ति-संरक्षणादीनि व्यदधुः। 'सर्वे कथं सुखिनः सन्तु' इत्यर्थं परोपकारभावना ऋषीणां वचनेषु देव-चरितकाव्येषु समुदीयमाना विश्वव्यापिनी समुदजृम्भत।

पुरा लघुतमावसतिर्ब्राह्मणानामपि घोष इति ख्याता। बृहत्तरवसति-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

बहूनां गृहाणां सामवायिकसन्निवेशेन ग्रामोऽभवत् भवति[1] च। यथा गृहकार्य-सञ्चालने गृहपतेर्महत्त्वपूर्णभूमिकासीत् तथैव ग्रामकार्यसंचालने समग्रभारते ग्रामण्या महत्त्वं बभूव।[2] स तु ग्रामपतिरेव सर्वाणि ग्रामशासनकार्याणि तत्रत्यसामाजिककार्याणि च समपादयत्।[3] बृहद्ग्रामेषु तस्य सहायतार्थं ग्रामप्रतिनिधिभूता पञ्चजनी प्रबभूव। स ग्रामस्य राज-सदृशस्तस्य रक्षणं विपत्तिनिवारणं सम्पत्ति-निधानं च व्यदधात्। प्रतिग्रामं ग्रामणीरासीत्।[4] प्रायः क्षत्रियाः क्वचिद् वैश्याश्च ग्रामण्यो बभूवुः।[5]

यजुर्वेदानुसारेण ग्राम्यवादी ग्रामीणानां न्यायाधिकारी बभूव। तस्य सभा सहायतार्थमाचरति स्म।[6] उपनिषद्युगे ग्रामणीः सूतेन सह ग्रामस्य राज्ञश्च मध्ये बन्धको बभूव।[7] बहूनां ग्रामाणां समवायो जनपदो विख्यातः। जनपदे पुराणां गणना नाभवत्। जानपदाः पौराश्च द्विविधा प्रजा बभूवुः।

महाभारतेऽरण्यवासिनां दस्यूनामपि ग्रामणीर्दृश्यते। क्वचित् स्वीय-

---

१. Grāma did not necessarily mean a village but may have been applied to a town (though not a capital). Hist of Dharmaśāstra. Vol. III 154

२. ईसवी सन् की प्रारम्भिक सदियों में इसे उत्तरभारत में ग्रामिक या ग्रामेयक तैलङ्गदेश में मुनुन्द कहा जाता था। ६०० से १२०० के बीच महाराष्ट्र में ग्रामकूट या पट्टकील कर्नाटक में गावुन्द और उत्तरप्रदेश में महत्तक या महतक कहा जाता था। अलटेकर—प्राचीन भारतीय शासनपद्धति पृ० १६९

३. Presumably the Grāmaṇī was the head of the village both for civil purposes and for military operations. Vedic Index Grāma. स एव ग्रामिको वा ग्रामाधिपतिर्वा ग्रामकूटो वा पट्टकिलो (पटेल) वा संज्ञितः।

४. Presumably, there must have been many Grāmaṇīs in a kingdom. Vedic Index Grāma.

५. तै० सं० २.५.४४। ब्राह्मणो ग्रामणीरिति निन्दास्पदम्। महाभारते अनु० ९६.३४

६. तै० सं० २.३.१.३। काठक सं० ११.४। मै० सं० २.२.१।

७. यथा राजानमायान्तं सूतग्रामण्यः प्रतिकल्पन्ते अयमायाति इत्यादि ४.३.३७। अत्र ग्रामणीवृत्तिः शोभना न प्रतीयते।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

चारित्र्योत्कर्षेण स वृतोऽभवत् ।[1] अधोलिखितग्रामशासनवर्णने ग्रामस्याधिपतिर्ग्रामणीरेव—

ग्रामस्याधिपतिः कार्यो दशग्राम्यस्तथापरः ।
द्विगुणायाः शतस्यैवं सहस्रस्य च कारयेत् ॥[2]

एतेऽधिपतय उपर्युपरि अधिकारिभ्यो ग्रामदोषान् निवेदयन्ति स्म । अनेन क्रमेण ग्रामवृत्तं राष्ट्रपतिसमक्षं यथोचितव्यवस्थाकरणाय समासादितम् ।

यथा केन्द्रीयसभा समग्रं राष्ट्रं विविध-विभागाध्यक्षीय-सदस्यैः शास्तुं विनिबद्धाभूत्, तथैव ग्रामसभा ग्रामोचित - विविधकार्यार्थं यथायोग्यं सदस्यान् उपसमितिद्वारेण नियोजितवती ।[3] शुक्रानुसारेण तत्र ग्रामाधिवासिनो नियोगिन आसन्[4]—

१. साहसाधिपतिः —न्यायाधिष्ठाता, अपराध-नियन्ता च ।
२. ग्रामनेता–चोर-दस्यु-राजकर्मचारिणां दुर्वृत्तेर्ग्रामवासिनां पितृवद् रक्षकः ।
३. भागहारः—ग्रामावस्थितवृक्षसंवर्धकः, नवनवपादपारोपकश्च ।
४. लेखकः —गणकः, स्वीयज्ञानाञ्जलिना ग्रामवासिनां लाभेप्सुः ।
५. प्रतिहारः —भीमकायोऽपि विनयंधरः, भाषणेन सर्वेषां चित्तानुरञ्जकः ।
६. शुल्कग्राहः — करसंग्रहीता, ग्रामवासिनां सम्पत्ति-संवर्धनौपयिकः ।

इत्येतादृशं प्रजातान्त्रिकविधानमासीद् ग्रामाणाम् ।

अर्थशास्त्रानुसारेण समग्रजनपदस्याधिकारी समाहर्ता बभूव । स प्रतिपञ्चग्रामं प्रतिदशग्रामं वा गोपं न्ययोजयत् ।[5] जनपदस्य चत्वारो भागाः कृताः । प्रत्येकभागस्याधिकारी स्थानिको बभूव । प्रदिष्टा तयोः सहाय आसीत् । कतिपयग्रामेषु गृहपतिवेषेण, व्यापारिवेषेण, तपस्विवेषेण वा विहरन्तो गुप्तचराः कृषक-गोरक्षक-वैदेहकानामध्यक्षाणां च कार्यविधौ शौचाशौचं विदन्ति स्म । अन्यविधाश्चोरगतिकाश्चराश्चैत्य-चतुष्पथ-शून्य-

१. मुहूर्तदेशकालज्ञ-प्राज्ञशील-दृढायुधः ।
ग्रामणीर्भव नो मुख्यः सर्वेषामेव सम्मतः ॥ शा० १३३.११

२. शान्ति० ८८.३

३. अलटेकरः —प्राचीन भारतीयशासनपद्धति पृ० १६८–१८१ । प्रो० अलटेकरो निष्कृषति—इससे यह न समझ लेना चाहिए कि ग्रामसभा ग्रामवासियों की मौलिक उन्नतिमात्र की ही चिन्ता करती थी । ग्रामसभाओं द्वारा सांस्कृतिक और साहित्यिक विकास के कार्यों के भी अनेक उदाहरण हैं । पृ० १८१

४. शुक्रनीतिसार २.१७०–१७५

५. महाभाष्ये ८,१.१; ३.३.७४; ३.३.५८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पदोदपान-नदी-निपान-तीर्थायतनाश्रमारण्य-शैल-वनगहनेषु स्थिताः स्तेना-मित्रप्रवीरपुरुषाणां गमनागमन-स्थानादिकप्रयोजनानि पर्यवेक्षन्त ।[1]

पतञ्जल्यनुसारेण सार्वजनिकोपयोगाय बहुकृतमासीत् । यथा पानीयम् (कूपः, जलाशयः), निपानम् (पशूनां पानार्थमुपकूपं जलसंचिका) प्रपा च[2] । यथावश्यकं कूपादिजलं स्वच्छीकृतमासीत् । एतानि कार्याणि ग्राम-सभयायोजितानीति प्रतीयते ।

कतिपयराजा ग्रामाणां रमणीयतामाधातुं सविशेषं सचेष्टा आसन् । तथा हि कश्मीरको द्वादशशताब्दीको जयसिंहः —

स एव ग्रामान् सामग्री-महापणसमर्पणैः ।
निर्दोषपारिषद्यादि-हृद्यान् निश्चोद्य धीर्य्यधात ॥ राजत० ८.३३१९

जातकसाहित्यानुसारेण ग्रामभोजका ग्रामे शान्तिं समृद्धिं च प्रवर्तयितुं राजभिर्नियुक्ता बभूवुः । चरित्रनिष्ठ एव ग्रामभोजको ग्रामाभ्युदय-योजनाः सम्पादयितुं समर्थ आसीत्, अन्यथा स ग्रामजनैः स्वपदाच्च्यावितः । कतिपयग्रामेषु स्वच्छीकरणयोजना लोकेच्छया प्राचरत् । तत्र प्रातःकाल उत्थाय जना ग्राममार्गादीनां सौष्ठवं विधातुं व्यापृतवन्तः, अन्ये जलाशय-सभाभवनादीनि सार्वजनिककार्याणि सम्पादयितुमश्राम्यन्त । न केवलं पुरुषाः स्त्रियोऽपि तदर्थं साह्यमाचरन्ति स्म ।[3]

प्रो० पी० वी० काणे ग्रामाणां प्रजातान्त्रिकसम्भूय-समुत्थानात्मकं शासनं वर्णयन् निष्कर्षति—

Village administration was selfcontained and would function whatever Government might happen to be at the centre. The village communities were miniature states. They were also entrusted with civil and criminal Justice.

History of Dharmaśāstra Vol. III. p. 158.

ग्रामाणां न्यायव्यवस्था साधारणतः पृथगेवासीत् । तत्र पञ्चमण्डली आधुनिकपञ्चायतसमा बभूव ।[4] नैकग्रामाणां केन्द्रीयन्यायसंस्था 'कुलानि'

१.-२. तत्प्रदिष्टः पञ्चग्रामीं दशग्रामीं वा गोपश्चिन्तयेत् । अर्थ० २.३५.२-१६
ग्रामान् परस्परं संयोजयितुं जलधारासु संक्रमाः कृता आसन् । मनु० ९.२८५ ।

३. महाअस्सारोह जातक २ । कुलावक जातक ३२

4. Gupta Inscriptions pp. 29, 31

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

इति ख्याता बभूव ।[1] तत्रासीद् ग्रामाष्टकुलाधिकरणं गुप्तयुगे ।[2]

पौरशासनम्

आर्यसंस्कृतौ यद्यपि बहुलत्वात् ग्रामाणां सविशेषं महत्त्वमासीत् तथापि पुराणां तत्र सत्ता विरलापि आसीदेव । दासानां शारदी पूः, आयसी पूश्च शतभुजी पूश्च गोमतीपूश्च ऋग्वेदे चर्चिताः ।[3]

किं पूः ग्राम्यविशां निर्मितिरासीत्, उताहो महर्धिकानां दासानामार्याणां वेति प्रश्नस्य समाधानदिशि स्पष्टमेव प्रतिभाति यद् पुरनिर्माण-साधनं ग्राम्यविशां नासीदेव । तदा ये राजानः शासका वा बभूवुस्त एव बहुव्ययेन स्वीयावासस्थलीं दुर्गनिर्माणेन सुरक्षितां व्यदधुः । परवर्तियुगस्य राज्ञां वसती राजधानी दुर्गरूपा बभूवेति निश्चप्रचम्[4] । वैदिकयुगेऽपि काचिदीदृशी स्थितिर्बभूव ।[5]

पूस्तु रमणीया वसतिरिति उपनिषत्सु निम्नोक्तोदाहरणेन प्रतीयते—

अपराजिता पूर्ब्रह्मणः । छा० ८.५.३
पुरः पुरुष आविशत् । बृह० २.१५.१८
पुरमेकादशद्वारम् । कठ० ५.१

अर्थशास्त्रानुसारेण पुरस्समीपं वनानि बभूवुः । तेषां संरक्षणोपाया राज्ञा विहिताः । वृक्षाणां शाखाच्छेदनं, पुष्पफलादिभञ्जनं च दण्ड्यमासीत् । ३.१९.४६-५०

रामायणानुसारेण पुरोधसा मन्त्रिभिश्च सह राजा रामः स्वयमपि पौरकार्याणि नित्यं सम्पादितवान्[6] । प्रतिदिनं प्रातःकाले सभाभवनं समागतः

---

1. It appears likely that Kulani means officers who presided over a group of eight or ten villages. P. V. Kane : Hist of Dharm. Vol. III p. 280.
2. Epigraphiā Indica Vol. XVII p. 345, 348.
३. Vedic Index पुर् । ऋ० २.२०.८
४. प्राकार-परिखावती बृहत्तमा वसतिर्नैकभागेषु विभक्ता पूर्नगरं वेति नाम्नाभिहिता महानगरं संवाह इति ख्यातिं लेभे । प्रभुदयाल अग्निहोत्रीः पतञ्जलि-कालीन भारत पृ० १८५
५. इन्द्रः पुरुकुत्सस्य सप्त पुरो विध्वंसितवान् । ऋ० १.६३.७
६. पौरकार्याणि यो राजा न करोति दिने दिने ।
संवृत्ते नरके घोरे पतितो नात्र संशयः ॥ रामायणे उत्तर० ५३.६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स कार्यार्थिनः पुरुषान् स्त्रियश्चामिलत् ।[1]

राजा यथाशक्यं स्वयमेव न्यायं व्यदधात् । यदा स एवं कर्तुमसमर्थोऽभवत् तदा तस्य स्थानं तेन नियुक्तः कश्चिद् विद्वान् ब्राह्मणोऽध्यकरोत् ।[2] तस्य ब्राह्मणस्य सहायास्त्रयः सभ्या आसन् ।

अर्थशास्त्रे नगराणां शासनस्य स्पष्टपरिचयो लभ्यते । तदनुसारेण नगरवासिनां कुलानि दश वा विंशतिर्वा चत्वारिंशद् वा गोपाधिकारे विभक्तानि बभूवुः । गोपस्तेषां कुलानां विषये सर्वविधपरिचयं संगृहीतवान् नगरं चतुर्भागेषु विभज्य प्रत्येकं स्थानिक इति संज्ञितोऽधिकारी नियुक्तः । गोपस्थानिकानामध्यक्षो नागरिक इति संज्ञितोऽधिकारी बभूव ।

पुरापि नगरं बहुविधव्यवसायव्यापृतानां जनानां सङ्कुलानां कार्यस्थली बभूव । नैकविधकार्यार्थमितस्ततः समायातानां लोकानां परीक्षणं, निरीक्षणं वसतिव्यवस्थापनं, व्यवसायवर्तनं च कथं भवेदिति स्थानिकस्य कर्तव्यमासीत् । स किमपि नव्यं दृष्ट्वा तद्विषयकं वृत्तं नागरिकाय न्यवेदयत् ।

नगरविध्वंसोऽग्निदाहान्न भवेदिति नैकविधपूर्वोपायैः संकल्पितम् । तथा हि—अग्निप्रतीकारं च ग्रीष्मे मध्यमयोरह्नश्चतुर्भागयोः । बहिरधिश्रयणं वा कुर्युः । अग्निजीविन एकस्थान् वासयेत् । अग्निदाहकोऽग्नौ प्रक्षिप्य वध्यः । अग्निशमनेऽनुद्यमो भृशं दण्डनीयः ।[3]

नगरस्य स्वच्छता कथं स्यादिति राजनियमाः कठोरा आसन् । न केवलं मानवानामपितु पशु-पक्षिणामपि मृतशरीराणि यदि नाम कश्चित् नगर उदसृजत्, स तु भृशं दण्डनीयोऽभवत् । श्मशानादन्यत्र न्यासे दहने च द्वादश पणो दण्ड आसीत् ।[4]

अर्थशास्त्रे निर्दिष्टो नागरको मनुस्मृतौ सर्वार्थ-चिन्तक इति संज्ञितः । तथा हि—

नगरे नगरे चैकं कुर्यात् सर्वार्थचिन्तकम् । ७.१२१

ग्रामेषु नगरेषु वा ये केचिद् भ्रष्टाचाराः कर्मचारिण आसन् तेषां राज्याद् बहिर्निर्वासनं मनुना प्रकीर्तितम्—

---

१. राजा महापथे संचरन् लोकान् मिलेदिति अयोध्या० १००.५१ ।

२. मनु० ८.९ ।

३.-४. अर्थ० २.३६ । नगरेषु राजमार्गेषु मलमूत्रादिविसर्जनं दण्डविधानेन निषेधितमासीत् । यथाशीघ्रं सर्वं घृण्यमपसारितं भवेदितिकराः कर्मचारिणो नियुक्ता आसन् । मनु० ९.२८२–२८३ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

राज्ञो हि रक्षाधिकृता परस्वादायिनः शठाः ।
भृत्या भरन्ति प्रायेण तेभ्यो रक्षेदिमाः प्रजाः ॥ ७.१२३

नगरशासनं मौर्ययुगे नागरिकैः स्वयमुद्भावितमासीदिति रायचौधुरी-मतम् ।[1] पाटलिपुत्रस्य नगरव्यावहारिकाधीनं शासनं समितिषट्केन कृत-मासीत् । तथा हि—(१) शिल्पकला-समितिः (२) वैदेशिक-समितिः (३) जनगणना - समितिः (४) वाणिज्य-व्यवसाय - समितिः (५) उद्योग-समितिः (६) करसमितिश्च ।

दशकुमारचरिते दण्डी 'रात्रौ नगररक्षोपायं वर्णयन् सूचयति—आपतच्च दीपिकालोकपरिलुप्यमानतिमिरभारं यष्टिकृपाणपाणि-नागरिकबलमनल्पम् । पृ० ३९

परवर्तियुगे तत्र नगररक्षार्थं बहवः सेनापतयो नियुक्ता इति मृच्छकटिके सन्दृब्धम् ।[2]

मृच्छकटिकानुसारेण नगरेषु प्रायशो राजधानीषु राज्ञा नियुक्तोऽधिकार-मण्डप आसीत्, यत्र न्यायाधीशोऽधिकरणिक इति संज्ञित आसीत् । स श्रेष्ठिना कायस्थेन च सहायीभूतः व्यवहार-प्रक्रियां प्रावर्तयत ।[3] अत्राधि-करणिको मन्त्रीत्यभिहितः चारुदत्ते । ९.१४ । सेयं संस्था वर्णिताधोविधम्—

चिन्तासक्तनिमग्नमन्त्रि-सलिलं दूतोर्मिशङ्काकुलं
पर्यन्तस्थित-चारनक्रमकरं नागाश्वहिंस्राश्रयम् ।
नानावाशक - कङ्कपक्षिरुचिरं कायस्थसर्पास्पदं
नीतिक्षुण्णतटं च राजकरणं हिंस्रैः समुद्रायते ॥ ९.१४

तत्र वन्दीकरणीयजनान् राजपुरुषा गृह्णन्ति स्म । ९.३८,३९

उपनगरं चाण्डालाधिष्ठितवध्यभूमिरासीत् यत्र घोरापराधिनो निस्त्रिंशेन शिरोविहीना कृताः ।

---

1. Nevertheless it is a fact that autonomous communities did exist in Maurya India, and classical writers make distinct mention of selfgoverned cities. An Advanced Hist. of India. p. 130,

२. तत्र नगररक्षाधिकृतौ वीरकश्चन्दनकश्च सेनपतीति मृच्छकटिके ९.२३,२४।६.१६, १७ । तौ भट्टप्रमुखौ । बहवस्तत्र सेनापतयो वा भट्टप्रमुखा वा नगरारक्षाधि-कृता इति मृच्छ० ६.४।५ द्रष्टव्यम्

३. मृच्छ० नवमेऽङ्के ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

युद्धम्

धन्वना गा धन्वनाजिं जयेम धन्वना तीव्राः समदो जयेम ।
धनुः शत्रोरपकामं कृणोति धन्वना सर्वाः प्रदिशो जयेम ॥

यजु० २९.३९

इतो जयेतो विजय संजय जय स्वाहा । अथर्व० ८.८.२४

अत्र दिग्विजयाश ऋषिः स्वधनुषा नैकविध-युद्धविजयं कामयमानो दिग्विजयमाशंसति । इदं युद्धगानम् ।

युद्धकारणानि

युद्धस्यावश्यकता नैकविधाः सन्ति । पृथग्जनानां युद्धं स्वार्थसमीहितं स्वाभाविकं वा प्रकृतेर्गुणैः क्रियमाणं वा सृष्टेरादिकालतः प्रचरति । देवा ऋषयो, राक्षसा दानवाः सर्वे युद्धाभिमुखा आसन् ।

वैदिकार्याणामादिकालतः सर्वोत्तमो निधिस्तेषां सर्वाभ्युदयकारिणी संस्कृतिरासीत् । तस्या रक्षणार्थं युद्धेऽपि प्राणोत्सर्गेण त आत्मानं धन्यधन्यान् मेनिरे । तेषां संस्कृतिर्यज्ञपरायणासीत् ।

सर्वेषामुपकाराय दानदाक्षिण्यदयोपेतैः कर्मभिः परिलक्षितो यज्ञस्तेषां जीवनसर्वस्वमेव साध्यसाधन-रूपेण प्रबभूव ।[1] एतादृशीं याज्ञिकीं संस्कृतिं शाश्वतीं विधातुं ते यज्ञविध्वंसकैरयुध्यन्त । तद्यथा—

इन्द्रा वरुणा युवमध्वराय नो विशे जनाय महि शर्म यच्छतम् ।
दीर्घप्रयज्युमति यो वनुष्यति वयं जयेम पृतनासु दूढ्यः ॥

ऋ० ७.८२.१

स्त्रीकारणाद् युद्धानि बहूनि बभूवुः । प्रथमं तावत् स्वयंवरेषु युद्धावसरो प्रत्यर्थिभिः प्राप्त आसीत् । कस्याश्चिद् रमण्याः सौन्दर्येणाकृष्टा वीरा स्तामवाप्तुं युध्यन्ते स्म ।

युद्धप्रिया वीरोद्धता अकारणमपि युद्धमेव परं साध्यं मन्यमाना अयुध्यन्त । दुन्दुभिरिति ख्यातोऽसुरवीरश्चिरं मृगयमाणो युद्धोचितं वालिमवाप, तेन द्वन्द्वयुद्धे घातितश्च ।[3]

'राजा' इति नाम साधयितुं नित्यं शत्रुभिः सह युद्धमावश्यकमेव । भीष्मो युधिष्ठिरं प्रणोदयति शान्तिपर्वणि—

---

१. अत्र पञ्चमहायज्ञानां प्राग्भावो हृदि संन्निवेश्यः । प्रस्तुत ग्रन्थस्य पृष्ठानि १५१-१६२

२. हरिवंशानुसारेण उग्रायुधो विधवां सत्यवतीं पाणिग्रहीतुं युध्यमानो भीष्मेणाहतः ।

शान्ति० २७.१७

३. किष्किन्धाकाण्डे ११ सर्गे ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

द्वावेतौ ग्रसते भूमिः सर्पो विलशयानिव ।
राजानं चाविरोद्धारं ब्राह्मणं चाप्रवासिनम् ।। ५७.३

महाभारतानुसारेण युद्धस्य परं शाश्वतं च कारणमस्ति भूमिप्राप्तिः ---

भूमौ हि जायते सर्वं भूमौ सर्वं प्रणश्यति ।
भूमिः प्रतिष्ठा भूतानां भूमिरेव परायणम् ।।
यस्य भूमिस्तस्य सर्वं जगत्स्थावरजङ्गमम् ।
तत्राभिगृद्धा राजानो विनिघ्नन्तीतरेतरम् ।। भीष्म० ५.२०,२१

अहंभद्र - प्रतिष्ठाकारणान्महतामपि युद्धं समभवत् । महाभारते तदनु शिशुपालवधे कृष्णशिशुपालयोर्मध्ये यद् भीषणयुद्धं समारब्धं तस्य कारणमासीत् शिशुपालस्याभिमानो यदहं कृष्णादपि महत्तरो, ममाग्रपूजोचिता न कृष्णस्येति । एवमेवोद्दण्डानां लोकविद्वेषकारिणां शमनाय युद्धं कृतमासीत् ।

न केवलं भारतेऽपितु विदेशेष्वपि स्त्रीणां रक्षणार्थं देशरक्षणार्थं धर्मरक्षणार्थं च प्राणपणेन बहुशो युद्धानि बभूवुः ।[1]

धार्मिकाभिनिवेशेन ब्राह्मणानामपि युद्धाभिमुख्यं प्रगल्भमेव दृश्यते । सिकन्दरनामकस्य यवनराजस्य विरोधीभूता इमे ब्राह्मणा अधोविधं प्रशंसिताः ---

But the Europeans in this region had more implacable enemies than the native princes. The power behind the throne was the Brahman community, and here for the first time, we come upon an opposition inspired by the conception of a national religion, the only germ to be found in ancient times of the idea of nationality. It was the philosophers i. e. the Brahmins who denounced the princes, if they submitted to the foreigner and goaded the free tribes into revolt. A city of Brahmins had to be stormed whilst the operations against Sambus were going on.

The Cambridge Hist. of India Vol. I p. 378.

---

१. लीडन की लड़ाई में देशरक्षक दुश्मन को चुनौती देते थे—हम चाहे कुत्ते, चूहे खायें, हार न मानेंगे । जब हमारे सिवा कुछ न रहेगा, तो हम अपनी बाँयीं बाँह खाकर दाहिनी से लड़ेंगे, ताकि अपनी स्त्रियों की, स्वतन्त्रता की और धर्म की रक्षा कर सकें ।

जवाहरलाल नेहरू : विश्वइतिहास की झलक १९५७ पृष्ठ १७८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

परस्वग्रहणाभीप्सा राज्ञामप्यासीदेव । तस्याः संस्कारितस्वरूपं दिग्विजयादिषु कोशप्रवर्धनं दृश्यते ।[1] क्वचित् पराजितराजस्य सर्वस्वमपि गृहीतं विजयिना । पराजिता नैकशः करदीकृताः । एतस्याः प्रवृत्तेः क्वचित् कारणमासीदहंप्रथमिका लोभश्च । दस्युभ्य आत्मरक्षार्थं प्रजाश्चतुर्वर्णाः सम्मिल्यायुध्यन्त ।[2]

प्रोफेसर अलटेकरो युद्धकारणानि राजनीतिक—परिपाट्याधोविधं गणयति —(१) साम्राज्यपदाकांक्षा, (२) आत्मरक्षार्थम्, (३) राज्यविस्तारः सामन्तेभ्योऽधिककरादानं च, (५) वैरसाधनार्थम्, (६) पीडितप्रजारक्षणं च । प्राचीन भारतीय शासनपद्धति पृ० २१९

सृष्टेरादिकालतः प्रायः सर्वेषां जीवजन्तूनां स्वोदरपूर्तये वा परेषां सर्वस्वापहरणाय वा क्वचिद् यशोलिप्सायै वा युद्धं प्रमुखं साधनमास्ते । यस्मात् कारणात् साधारणजनाः कलहायन्ते न्यायालयं वाश्रयन्ते प्रायस्तस्मात् कारणाद् युद्धे शक्तिशालिनो वा राजानो वा बलप्रयोगं साहसं च प्रदर्शयन्ति ।[3] इदं तु युद्धस्य स्वाभाविकं बीजम् । युद्धसमारम्भ उचितानुचितयोर्न्याय्यान्याय्ययोश्च मर्यादा न प्रसीदति । अन्याय्योद्देश्याभिरता उदण्डा युद्धं प्रसाधयन्ति । यथा जङ्गल आखेटकैर्निर्द्वन्द्वा निस्पृहा अपि पशवः संह्रियन्ते क्षाय्यन्ते च, तथैव युद्धे सात्त्विकाः स्वकर्मनिरता अपि लोका अभिभूयमाना पीड्यमानाश्च प्रतिरुन्धन्ति विगृह्णन्ति च । युद्धं तु सांस्कृतिकक्षयाय सम्प्रभवति यतो हि नाम तेन दुर्वृत्तानां दस्युवृत्तिनिरर्गलं प्रोत्तेजिता भवति ।[4] महाभारतीयं कौरव-पाण्डवीयं युद्धं पूर्वोक्तस्य प्रत्यक्षं निदर्शनं प्रस्तौति । रामायणे संस्कृतिरक्षणाय नैकयुद्धानि रामेण

---

१. सभा० २३.३४

२. शान्ति० ७९.३४–३६

३. ऋग्वेदानुसारेण युद्धस्य शाश्वतकारणानि सन्ति—तोके वा गोषु तनये यदप्सु वि क्रन्दसी उर्वरासु ब्रवैते । ६.२५ ४ । अर्थात् पुत्रार्थं, गवार्थं, जलार्थमन्नबहुलपृथिव्यर्थं वा युद्धं ि तन्यते । समर्थितमेतदधो विधम्—
अजयो गा अजयः शूरसोमम् ।
अवासृजः सर्तवे सप्तसिन्धून् ॥ ऋ० १.३२,१२

४. It it easiest to lead man to combat and to stir up their passions than to temper them and urge them to the patient labours of peace. Andre Gide.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

समारब्धानि । अन्यत्र 'भूमिर्हिरण्यं रूपं च विग्रहे कारणानि इति प्रोक्तम् । किष्किन्धा० १७.३१

युद्धे सेनायाः सेनापतेश्च नितरामावश्यकता भवत्येव । तत्र सेनापतेः परिचय इदंप्रथमतया दीयते ।

वैदिकसंहितासु सेनानीः सेनानायक इति परिचितः । ऋग्वेदे इन्द्रः प्रथमसेनानीर्वर्तते यस्य विशेषाः सन्ति—स्वधावान्, उग्रः, पराक्रान्तः, लोकरक्षक इति ।[1]

यजुर्वेदे परमवीर इन्द्रः सेनापतिरूपेण वर्णितः —

आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम् ।
संक्रन्दनोऽनिमिष एकवीरः शतं सेना अजयत साकमिन्द्रः ॥ यजु० १७.३३
बलविज्ञायः स्थविरः प्रवीरः सहस्वानवाजी सहमाने उग्रः ।
अभिवीरो अभिसत्त्वा सहोजा जैत्रमिन्द्रः ॥ १७.३७
आसामभिभञ्जन्तीनां जयन्तीनां देवसेनानां नेता इन्द्रः । १७.४०

महाभारते सेनापतेर्गुणा नारदमुखेन परिगणिताः सन्ति—हृष्टः, शूरः, मतिमान्, धृतिमान्, शुचिः, कुलीनोऽनुरक्तः, दक्षश्च ।[2] महाभारतेऽन्यत्र सेनापतिगुणाः सविस्तरं वर्णिताः । स तनुत्यक्, वेदवित्, सुचरितव्रतः, ह्रीमान्, नीतिमान्, युद्धविशारदः, इष्वस्त्रकुशलः, सर्वास्त्रयोधी, वयःशास्त्रधैर्यकुलाभिजात्यः, पुत्रपौत्रैः शतशाखः, समितिशोभनः, दिव्यास्त्रवित्, रथघोषेण महामेघ इव गर्जनः, सिंहसंहननः, सिंहविक्रान्तविक्रमः, सिंहोरस्कः, सिंहवक्षाः, महाबलः, सुप्रतिष्ठितः, सर्वशस्त्राणामभेद्यः, वारण इव प्रभिन्नः, सत्यवादी, जितेन्द्रियः, क्षिप्रहस्तः, चित्रयोधी, अभेद्यकवचः, मातङ्ग इव यूथपो भवेत् ।[3] सेनापतिपदं गौरवास्पदमिति कृष्णेनोक्तम्—सेनानीनामहं स्कन्दः । गीता० १०.२४

महाभारतानुसारेण युधिष्ठिरबलस्य दुर्योधनबलस्य वा स्थायिसेनापतिर्नासीत् । युद्धाय कस्मिंश्चिद् दिवसे पदे रिक्ते कः सेनापतिर्भवत्विति राजाज्ञया

---

१. उग्रो जज्ञे वीर्याय स्वधावाञ्चक्रिरपो नर्योयत करिष्यन् ।
जग्मिर्युवा नृषदनमवोभिस्त्राता न इन्द्र एनसोमहश्चित् ॥ ७.२०.१
वृषा जजान वृषणं रणाय तमु चिन्नारी नर्यं ससूव ।
प्र यः सेनानीरध नृभ्यो अस्ती नः स त्वा गवेषणः सधृष्णु ॥ ७.२०.५

२. सभापर्वणि ५.३६

३. उद्योग प० १४९.५–२८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

निर्णीतम्।[1] कौरवसेनायाः सेनापतयो भीष्मः[2], द्रोणः, कर्णश्च महापराक्रमशालिनो वीरा बभूवुः। एतेषां न केवलं शस्त्रयोगेनापितु वयसा सच्चारित्र्येणापि चयनं निष्पन्नं प्रतिभाति। सेनापति-रहितो राजा न विजयते।[3] पाण्डवसेनायाः प्रत्येकमक्षौहिण्याः सेनापतयो द्रुपद-विराट-धृष्टद्युम्न-शिखण्डि-सात्याकि-चेकितान-भीमसेनादय आसन्। सर्वसेनापतीनां पतिरासीद् धृष्टद्युम्नः। तस्य चयनमभवत्।

अर्थशास्त्रानुसारेण सेनायाश्चतुरङ्गाणां प्रत्येकमपृथक् पृथगध्यक्षा आसन्। तेषां समेषामध्यक्षः सेनापतिर्बभूव। तस्य योग्यता कार्याणि चाधोविधं वर्णितानि—

"तदेव सेनापतिः सर्वयुद्धप्रहरणविद्याविनीतो हस्त्यश्वरथचर्या-संपुष्टश्चतुरङ्गस्य बलस्यानुष्ठानाधिष्ठानं विद्यात्। स्वभूमिं युद्धकालं प्रत्यनीकम—भिन्नभेदनं, भिन्नसन्धानं संहतभेदनं भिन्नवधं दुर्गविधं यात्राकालं च पश्येत्। २.३३.१२,१३। तत्र युवराजोऽपि सेनापति-पदे नियोजनीय इति रीतिरासीत्। १.१७.४५

तूर्यध्वजपताकाभिर्व्यूहसंज्ञाः प्रकल्पयेत्।
स्थाने याने प्रहरणे च सैन्यानां विनये रतः॥ २.३३.१४

क्वचिदपरविध एव सेनापतिर्मृच्छकटिकस्य षष्ठेऽङ्के वीरकचन्दनकौ निरूपितौ। अयं वीरकः षष्ठाङ्कस्य सेनापतिरधिकरणिकेनाज्ञप्तश्वर इवाचरति।[4]

सेना

पत्त्यश्वरथद्विपाः सूर्योदये बहिः शिल्पयोग्याः करणीयाः। तेषु राजा नित्ययुक्तः स्यात्। अभीक्ष्णं चैषां शिल्पदर्शनं कुर्यात्।' अर्थशास्त्रे ५.३.३८,३९ अनेन सेनायाः शाश्वत-प्राग्भावो राज्ञां कृतेऽभ्युदितः प्रतिभाति।

---

१. पाण्डवसेनानां अक्षौहिणीनां सेनानायकाः (सेनाप्रणेतारः), तेषामधिष्ठाता सेनापतिः, तस्याधिष्ठाता सर्वसेनापतिः सेनापतिश्च नियुक्ताः। द्रुपद-धृष्टद्युम्नादयः सप्तनायकाः, धृष्टद्युम्नः सर्वसेनापतिः, अर्जुनः सेनापतिपतिः कृतः। उद्योग० १५४ अध्याये। अर्जुनस्यापि नेता कृष्णो बभूव। उद्योग० १५४.१४ महाभारतानुसारेण सेनापतेश्चयनमभवत्। पश्चात् स स्वपदायाभिषिक्तः। उद्योग० १५३.२३,३१

२. उद्योग० १५४.१–३

३. उद्योग० १५३.१०

४. वीरकः मृच्छ० ९.२४–२५। प्रेष्योऽस्ति। चन्दनकः वीरकश्च सेनापतिरिति मृच्छ० ६.२२; ६.२३। उभौ शूद्रौ चर्मकारो नापितश्च। तत्रैव।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सुदूरप्राचीनकालतः सैन्यनियोगः सर्वेषामार्याणामार्येतराणां चाभीप्सित आसीत्। देवा ऋषयः क्षत्रा विशः शूद्राश्चाविरतमनसायुध्यन्त। कौटिल्यः क्षत्रियबलं श्रेष्ठं मन्यते। तदनुसारेण बहुलसारं वा वैश्यशूद्रबलम्। प्रणिपातेन ब्राह्मणबलं परोऽभिहारयेदिति।[1] किन्तु बहव आचार्या ब्राह्मण-क्षत्रिय-वैश्य-शूद्र-सैन्यानां तेजसः प्राधान्यात् पूर्वं पूर्वं श्रेय इति मन्यन्ते।[2]

वैदिकयुगे आर्यवर्गीयाणां महतीसेना, तस्या अस्त्रशस्त्राणि, शत्रुकोटि-संहारिणी विस्फोटकपदार्थयोजना, सर्पराक्षसादीनां सैन्यबलेन शत्रुविनशनं चैते विषया अथर्ववेदे सविस्तरं वर्णिताः।[3]

वेदादिपुरातन साहित्ये युद्धपरायणानां सैन्यवीराणामुत्साह-समृद्धिः पदे पदे भूयिष्ठं विभाति। तेषां शौर्यगाथा चारित्रिकौदात्त्यं च कविमानसं शाश्वतमुत्कलापयतः।

ऋग्वेदे इन्द्रस्य सेनाया उल्लेखो वर्तते।[4] सेना सेनान्या नेतृत्वे प्रायात्।[5] शत्रूणां शतशः सेना इन्देण परास्ताः।[6] न केवलं राज्ञामपितु ऋषीणामपि सेना युद्धाय सन्नद्धा आसन्। तथाहि—ऋषिः अप्रतिरथो वक्ति—

अस्माकं सेना अवतु प्रयुत्सु। ऋ० १०.१०३.७

अथर्ववेदे त्विषीमती सेना वर्णिता।[7]

गोपथब्राह्मणे (२.२९) राजत्वं सेनां विना न कल्पनीयमिति घोषितम्।[8]

वैदिकयुगीनसेनायां रथिनां पदातीनां च विशेषमहत्त्वमासीत्। रथानां सर्वत्र गतिः स्वभावतो न भवति। अतएव शत्रुप्रतिरोधायाश्वसेनायाः प्रचलनमासीदेव। हस्तिसेनाया उपयोगो वैदिकयुगे कियन्मात्रमासीदिति न विज्ञातमवर्णनत्वात्। हस्तिनां बाहुल्येन राज्ञामृषीणां चैश्वर्यं प्रतिष्ठितमासीत्।

महाभारतयुगे सेना षडङ्गिनी संजाता। तत्र ये सैनिका वेतनभोगिन आसन्, ते समाजे हीनप्रतिष्ठा गण्यन्ते स्म।[9] कीदृशी सेना विजयिनी भवेदिति महाभारते निर्दिष्टमधोविधम्—

---

१. अर्थशास्त्रे ९.१.४४–४७ २. अर्थशास्त्रे ९.१.४३

३. अथर्व० ११.९,१० अध्याययोः।

४. ऋ० १.३३.६। रुद्रस्य सेना ऋ २.३३.११

५. ऋ० ९.९६.१ ६. ऋ० १०.१०३.१

७. अथर्व ४.१९.२। आर्याणां सेनासु क्वचिदार्येतराः—सर्पाः, राक्षसाश्च सम्मिलिताः। ११.१०.१

८. सेनेन्द्रस्य पत्नी।

९. उद्योगे ९४.१६। अन्यत्र चतुरङ्गा सेना। शान्ति १०३.१६

१०. उद्योगे ३७.२८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

उदीर्णमनसो योधा वाहनानि च भारत ।
यस्यां भवन्ति सेनायां ध्रुवं तस्यां जयं वदेत् ॥ शा० १०३.५
परस्परज्ञाः संहृष्टास्त्यक्तप्राणाः सुनिश्चिताः ।
अपि पञ्चाशतिः शूरा मृदनन्ति परवाहिनीम् ॥ शा० १०३.२०
अथवा पञ्च षट् सप्त सहिताः कृतनिश्चयाः ।
कुलीनाः पूजिताः सम्यग् विजयन्तीह शात्रवान् ॥ शा० १०३.२१

इत्यनेन सैनिकानां सच्चारित्र्यं महोत्साहः सत्त्वं च विजयाय प्रभवन्तीति सम्मतं प्रतिभाति ।

युद्धाभिमुखी सेना महाभारतेऽधोविधं वर्णिता—

सानुकर्षाः सतूणीराः सवरूथाः स तोमराः ।
सोपासङ्गाः सशक्तीकाः सनिषङ्गाः सपोथिकाः ॥
सध्वजाः सपताकाश्च सशरासनतोमराः ।
रज्जुभिश्च विचित्राभिः सपाशाः सपरिस्तराः ॥
सकचग्रहविक्षेपाः सतैलगुडवालुका ।
साशीविषघटाः सर्वे ससर्जरसपांसवः ॥
सघण्टाफलकाः सर्वे वासीवृक्षादनान्विताः ।
व्याघ्रचर्मपरीवारा वृताश्च द्वीपिचर्मभिः ॥
सवस्तयः सशृङ्गाश्च सप्रासविविधायुधाः ।
सकुठाराः सकुद्दालाः सतैलक्षौमसर्पिषः ॥
चित्रानीकाः सुवपुषो ज्वलिता इव पावकाः ।
तथा कवचिनः शूराः शस्त्रेषु कृत निश्रमाः ॥
एते सन्ति पदातयः । उद्योग० १५२.३–८

चतुर्युजो रथाः सर्वे सर्वे शस्त्रसमायुताः ।
संहृष्टवाहनाः सर्वे सर्वे शतशरासनाः ॥
नगराणीव गुप्तानि दुरादेयानि शत्रुभिः ।
आसन् रथसहस्राणि हेममालीनि सर्वशः ॥
एते सन्ति रथाः । उद्योग० १५२.१०,१२

यथा रथास्तथा नागा बद्धकक्ष्याः स्वलंकृताः ।
बभूवुः सप्तपुरुषा रत्नवन्त इवाद्रयः ॥
द्वा अङ्कुशधरौ तेषु द्वावुत्तमधनुर्धरौ ।
द्वा वरासिधरौ राजन्नेकः शक्तिपताकधृक् ॥
गजैर्मत्तैः समाकीर्णं सवर्मायुधकोशकैः ।
इति गजसेना । उद्योग० १५२.१३–१५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विचित्रकवचामुक्तैः सपताकैः स्वलंकृतैः ।
सादिभिश्चोपसंपन्ना आसन्नयुतशो हयाः ।।
सुसंग्राहा सुसन्तोषा हेमभाण्डपरिच्छदाः ।
अनेकशतसाहस्रास्ते च सादिवशे स्थिताः ।।
इति अश्वसेना । उद्योग० १५२.१६,१७

युद्धाय प्रयाण-समारम्भदृश्यं तु हर्षणमासीत् । तद्यथा महाभारते—

अशोभन्त महेष्वासा ग्रहाः प्रज्वलिता इव ।
सोऽयं सैन्यं यथायोगं पूजयित्वा नरर्षभः ।
दिदेश तान्यनीकानि प्रयाणाय महीपतिः ।। उद्योग० १९७.४,५

अर्थशास्त्रे सेना-प्रयाणस्य सुनियोजितयोजना दृश्यते । प्रयाणात् पूर्वं मार्गस्थग्रामाणां सेनावश्यकतापूर्त्यर्थं प्राप्यवस्तूनां साधनानां च विस्तृत-सूची कृतासीत् । सेनापतिरधस्तात् प्रातिष्ठत । सेनायाः पुरस्सरं नायका मध्ये चान्तःपुरं राजा च, उभयोः पार्श्वयोरश्वसादिनोऽङ्गरक्षकाश्च प्रयान्ति स्म । संवाधे सति पुरतः मकरव्यूहः, पश्चात् शकटव्यूहः, पार्श्वयोः वज्र-व्यूहश्च निर्मिताः । तस्याः परिवृतये सर्वतोभद्रव्यूहः सन्निवेशितः । सङ्कीर्ण-मार्गेषु सूचीमुख-व्यूहो विरचितः ।[1] नदीनां मरुप्रदेशानां च संक्रमणाय नैकविधसाधनानि संयोजितानि ।

विविधदेशानां सैनिकानामायोधने विशिष्टशस्त्रोपयोगा युद्धप्रक्रियाश्च लक्षिता आसन् । अङ्गविद्या[2]धिकारेण सर्वपारगाः, शठयोधिनः, नियुद्ध-कुशलाः, प्रमाथिनः, चण्डाः, दुरासदाः, पारयिष्णवः, तनुत्यजः, घोरा इत्यादयः सैन्यगणाः वर्गीकृताः पृथक्-पृथक् कार्येषु नियोजनीया सन्तीति विचारणा बभूव ।

अनुबन्धदृशा सेना षड्विधाभवत् ।[3] तथा हि—

१. मौलकोटिकी—आनुवंशिकपरम्परया राजसेनानिविष्टा ।
२. भृतककोटिकी—वेतनादि-प्रदानेन सेना-निविष्टा ।
३. श्रेणीतः प्राप्ता—श्रेणीनां स्थायिसैनिका यथावश्यकं राज्ञा प्रतिबद्धाः ।
४. मित्रेभ्यः प्राप्ता—प्रयोजनमुद्दिश्य मित्रेभ्यो गृहीता ।
५. अमित्रेभ्यो निगृहीतसेना—पराजितशत्रूणां स्वीकृता सेना ।

---

१. अर्थशास्त्रे १०.२
२. अर्थशास्त्रे १.१२ अङ्गविद्या उल्लिखिता । बृहत्संहितायाः ५१ तमेऽध्यायेऽङ्ग-विद्या समुद्धाटिता ।
३. अर्थशास्त्रे ९.२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

६. अटवी-सेना—आटविकसमुदायेभ्यो गृहीताः सैनिकाः । निषाद-म्लेच्छादि-वनवासिनां सेना ।

अन्तिमं सेनाद्वयं सच्चारित्र्यादर्शविहीनं स्वार्थेऽसिद्धे भयकारकमन्यत ।[1]

सेनाया आनन्त्यं रामायणे रामरावणयोर्युद्धप्रकरणे महाभारते च कौरवपाण्डवचमूनामक्षौहिणी-विधानेन प्रकल्पनीयम् ।[2] नैकराजानां महती चमूः नैकलक्षपदातीनामासीदिति ग्रीकपर्यटकलेखकैर्वर्णितम् ।

चन्द्रगुप्तमौर्यस्य सेनायां ९,००० गजा आसन् । अपरं च ६,००००० सैनिका बभूवुः । सेनायाः प्रबन्धः षड्भिः समितिभिः कृतः । रथे सारथिना सह सैनिकद्वयं गजे चाङ्कुशधरेण सह सैनिकत्रयमुपविष्टमासीत् । पदातिनः ३½ हस्तोच्छ्रायं धनुर्गृहीत्वा प्रयान्तिस्म । बहवः पदातिनः भल्लं धारयन्ति स्म । सर्वे सैनिका असिधारिण आसन् । अश्वसादाः प्रासधारिणो बभूवुः । पादयोर्मध्ये गृहीतशरणं वीरं हस्तिनः स्वयमेव युध्यमानास्तं रक्षन्ति स्म । पृष्ठात्पतितं च वीरं ते पुनः पृष्ठे स्थापयित्वा तं दूरं सुरक्षितं निन्युः ।[3]

कलिङ्गयुद्धे लक्षाधिकजना अशोकसेनया मारिताः, सार्धलक्षलोका वन्दीकृताश्च । अनेनोभयपक्षयोः सेनावैपुल्यं प्रतीयते । हर्षस्य सेनायां तस्य शासनस्य षष्टे वर्षे ६०,००० हस्तिनः १००,००० (लक्ष) अश्ववारा आसन् ।

श्रेष्ठसैनिकचयोऽर्थशास्त्रे वर्णितः—पितृपैतामहो नित्यो वश्यस्तुष्टभृत-पुत्रदारः, प्रवासेष्वपि संपादितः सर्वत्राप्रतिहतो दुःखसहो बहुयुद्धः, सर्वयुद्ध-प्रहरणविद्याविशारदः सहवृद्धिक्षयिकत्वाददृष्यः क्षत्रप्राय[4] इति अनेन स्पष्टं प्रतिभाति यन्महत्त्वपूर्णयौधिकनियोगेषु साफल्याय राजादय उदात्तकोटिकान् सैनिकान् संचेतुं कृतश्रमा बभूवुः ।

कालिदासो रघुवंशे ४.२६ षड्विधं बलं निर्दिशति ।

---

१. अर्थशास्त्रे ११.२ । कामन्दकीयनीतिसारे १८.७

२. अक्षौहिण्यां २१८७० हस्तिनः, २१८७० रथाः, ६५६१० अश्वाः तथा १०९३५० पदातयो भवन्ति । तत्र सेनायां ५०० गजाः, ५०० रथाः, १५०० अश्वाः २५०० पदातयो बभूवुः । १० सेनाःपृतना । १० पृतनाःवाहिनी । १० वाहिन्यःध्वजिनी । १० ध्वजिन्यःचमूः । १० चम्वःअक्षौहिणी । सेनापरिमाणं कौरवाणामेकादश अक्षौहिण्यः पाण्डवानां च सप्त अक्षौक्षिण्य आसीत् ।

३. Arrian : Ancient India p. 9 ।

४. अर्थशास्त्रे ६.१.११

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दशमशताब्दे नवलक्षपरिमाणेन सैन्यबलेन राजराजचोलः प्रतिवेशिनं चालुक्यवंशीयं राजानं सत्याश्रयमाक्रान्तवान् । विभीषिकेयं कल्पनातीता तत्कालीनरणनीतिं कलङ्कयति ।

गजसेना

हस्तिप्रधानो हि परानीकवधः । अर्थशास्त्र ७.११.१९

ऋग्वेदे हस्ती युद्धप्रसङ्ग इन्द्रस्योपमेयतां गतो विराजते ।[1] अथर्ववेदानुसारेण वर्चस्विषु हस्तिनोऽग्रगण्याः सन्ति ।[2]

यजुर्वेदे युद्धप्रकरणे हस्तिना प्रयाणं स्पष्टमेव वर्णितमधोविधम्[3]—

कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवान् इभेन ।
तृष्वीमनु प्रसितिं द्रूणानो अस्तासि विध्य रक्षसस्तपिष्ठैः । १३.९

अत्र 'याहि' इति पदेन शत्रुसंहाराय प्रयाणं विधेहि इति अभिप्रायः ।

वैदिकयुगे राज्ञां सविधे हस्तिनां महती संख्या आसीदिति नैकस्थलेषु वर्णितम् ।[4]

महाभारते गजसेना सविशेषं प्रतिष्ठिता दृश्यते । तथाहि—

(१) पत्तौ एको गजो भवति । आदिप० २.१५
(२) अणौहिण्यां २१,८७० गजा भवन्ति । आदि २.१९
(३) युधिष्ठिरसेनायां योधिनां हस्तिनां संख्या सहस्रशतमासीत् । उद्योगे १४९.८२
(४) कर्णे सेनापतौ भूते नागाः प्रकल्पिताः ।। कर्ण० ७.५

---

१. 'मृगो न हस्ती तविषीमुषाणः' इत्यादि योद्धा इन्द्रः । ऋ० ४.१६.१४

२. 'येन हस्ती वर्चसा सम्बभूव' । अथर्व० ३.२२.३
'यो अश्वेषु वीरेषु यो मृगेषु उत हस्तिषु ।
कन्यायां वर्चो यद् भूमे' इत्यादि अथर्व० १२.१.२५
या हस्तिनि दीपिनि या हिरण्ये त्विषिः । अथर्व० ६.३८.२
तस्य (हस्तिन.) भगेन वर्चसाभिषिञ्चामि मामहम् । अथर्व० ३.२२.६

३. मैकडानल-महोदयस्य वैदिकसाहित्यविषये मतमासीत्—But there is no trace of its (elephants) use in war. Vedic Index हस्तिन् । तस्य मतं पूर्वोक्तेनोद्धरणेन वितथीकृतमेव ।

४. तथाहि—अङ्गो दश सहस्रहस्तिनां दानं पुरोहिताय ददौ । राजा वा पुरोहितो वा युद्ध उपयोगाय तानरक्षन्निति वास्तविकता । ऐतरेय ब्रा० ८.४.६ । हस्तिपोऽश्वपश्च यजुर्वेदे वाज० ३०.११ वर्णितौ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(५) ते सेनेऽन्योन्यमासाद्य प्रहृष्टाश्वनरद्विपे ।
बृहत्यौ संप्रजहाते देवासुरचमूपमे ।। कर्ण० ८.१
ततो गजा रथाश्चाश्वाः पत्तयश्च महाहवे ।
सम्प्रहारं परं चक्रुर्देहपाप्मप्रणाशनम् ।। कर्ण० ८.२

(६) हस्तिभिस्तु महामात्रास्तव पुत्रेण चोदिताः ।
धृष्टद्युम्नं जिघांसन्तः क्रुद्धाः पार्षतमभ्ययुः ।। कर्ण० १७.११

(७) हस्तिनः पुरभेत्तारो भवन्ति । सभा० ५४.१०

(८) मेकलाः कोशला मद्रा दशार्णा निषधास्तथा ।
गजयुद्धेषु कुशलाः कलिङ्गैः सह भारत ।। कर्ण १७.२

अर्थात् नैकदेशीयाः सैनिका गजयुद्धेऽनुत्तमा आसन् । अन्यत्रापि महाभारते युद्धे हस्तिनां महत्त्वं विशदीकृतम् । तथापि काणे महोदयः प्रवदति—

In the Mahābhārata elephants do not except in rare cases, play any role in the fighting that went on. Hist. of Dharmaśāstra Vol. III page 203.

इति काणे महोदयस्य मतं सर्वथा सत्यं न प्रतिभाति ।

महाभारतीययुद्धेषु हस्तिनो न केवलं शत्रुपक्षस्य गजानघ्नन्नपितु सैनिकानपि घातयन्ति स्म ।[1] युधिष्ठिरो गजसेनाध्यक्षोबभूव ।[2]

परवर्तियुगे हस्तिसेनाया महत्त्वं सातिशयं वर्धते स्म । कौटिल्यानुसारेण पत्त्यश्वरथद्विपानां पूर्वं पूर्वमुत्तरेण घातयेत् । अर्थ० १०.६.४५

बौद्धजातकसाहित्ये मङ्गलहस्तिनो संग्रामावचारे भृशं महत्त्वमासीत् । सन्नाहधारी राजा मङ्गलहस्तिनः स्कन्ध आरुह्याङ्कुशेन तमवाहयत् । हस्ती शुण्डेन स्तम्भानभ्रंशयत्, शत्रुसैन्यं प्राद्रावयत्, आक्रामकं राजानं न्यगृह्णाच्च तोरणमपातयत्, नगरद्वारमत्रोटयच्च । मङ्गलसन्नाहेन सुरक्षितो बभूव ।

कौटिल्यो हस्तिनां युद्ध उपयोगं निदर्शयन्नाह—परानीक-व्यूह-दुर्ग-स्कन्धावार-प्रमर्दनाः प्राणहरणकर्माणो हस्तिन इति । २.२.१५ । अपरं च 'हस्तिप्रधानो विजयो राज्ञाम्'[3] । २.२.१४ कामन्दकेन हस्तिसेनामहत्त्वं प्रति-

१. द्रोणपर्व २५.१०–२३ । प्रकरणेऽस्मिन् प्रोक्तम्—
येन नागेन मघवानजयद्दैत्यदानवान् ।
स नागप्रवरो भीमं सहसा समुपाद्रवत् ।।

२. संगामावचरजातक ।

३. हस्तिनां युद्धोद्योगं वर्णयति कौटिल्यः—स्कन्धविनियोगादनेकं कर्म कुर्वाणाः स्वेषामपाश्रयो युद्धे । परेषां दुर्धर्षा विभीषणाश्च । अर्थ० ७.१२.१४ 'पक्षकक्षोरस्यानां च प्रभञ्जनम्, अवस्कन्दः सौप्तिकं च' इति हस्तियुद्धानि । १०.५.६६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पादयता प्रोक्तम्—

नागेषु हि क्षितिभुजां विजयो निबद्धः। तस्माद् गजाधिकबलो नृपतिः सदा स्यात्। कामन्दक० १९.६२।

युद्धार्थं हस्तिनां सम्यक् प्रशिक्षणं सम्पादितम्[1] यतो हि अशिक्षितगजाः स्वपक्षमेव प्रतिहन्तीत्यनुभूतमासीन्नीतिविदाम्। मेगस्थनीजः समर्थयति—In ancient India elephants were trained for war and turned the scale of victory. Frgment I p. 30.

कौटिल्यः प्रथयति हस्तिकार्याणि युद्धभूमौ—(१) पुरोयानम् (२) नवमार्गवासतीर्थनिर्माणम् (३) अग्निशमनम् (४) भिन्नसेनाया एकत्रकरणम् (५) शत्रुसेना-भेदनम् (६) आपत्प्रतीकारः (७) शत्रुसेना-संहारः, भयोत्पादनम् (८) सालद्वाराट्टालकभञ्जनम् (९) शत्रुकोशहरणम्।[2]

रथसेना

वैदिकयुगे प्रायो द्विचक्रो रथोऽश्वद्वयेन वाहितः। रथसेनायांस्तदा सविशेषं महत्त्वमासीत्। विजयेन तस्या महदवदानं प्रशंसितम्।[3] युद्धरथे सारथिरुत्तिष्ठन् योद्धा च। तस्य सव्ये उदयुञ्जाताम्। युद्धभूमौ रथिनो वज्रधरा आसन्।[4] रथे आयुधसम्भारो निभृत आसीत्।[5]

अथर्ववेदे परिष्कन्दा वर्णिताः। परिष्कन्दनामानौ प्रतिरथं द्वौ पदाती रथस्य चक्रं रक्षितुं तस्योभयपार्श्वयोरधावताम्। ग्रीकलेखका युद्धरथान् वर्णयन्ति—

---

१. अर्थशास्त्रानुसारेण—संनाह्यः सप्तक्रियापथः, उपस्थानं संवर्तनं संयामं वधावधो हस्तियुद्धं नागरायणं साग्रामिकं च। २.३२.५,६
स्वपराक्रमेण हस्तिनो युद्धस्थले शत्रुराजस्य हस्तिनः परावर्तयन्। पलायमाना हस्तिनः स्वपक्षमेव मर्दयन्ति। अर्थ० ७.१२.११। अल्पाः शूरा बहून् शूरान् भञ्जन्ति। ते भग्नाः स्वसैन्यावघातिनो भवन्ति। ७.१२.११।

२. अर्थशास्त्रे १०.४.१५।

३. तथा हि—अस्माकमिन्द्र रथिनो जयन्तु। ऋग्वेदे ६.४७.३१। रथे युक्ता अश्वा-अमित्रान् विदारयन्ति स्म। यजु० २९.४.४।

४. अश्वेन रथेन च वज्री। तैत्तिरीयसंहिता ४.४.८.३; अथर्व० १५.२.६। वैदिक इण्डेक्स परिष्कन्द। महाभारते चक्ररक्षा वर्णिताः। भीष्मपर्वणि ११८.१६

५. ऋ० ५ ५७ ६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

Each of them was drawn by four horses and carried six men of whom two were shield-bearers, two archers posted on each side of the chariot and the other two, charioteers as well as men-at-arms.[1]

कौटिल्यो रथयुद्धं वर्णयति—उन्मथ्यावधानवर्जान्येतान्येव स्वभूमाव-भियानापयानस्थितयुद्धानीति । अर्थ० १०.५.६७

रथसेनायाः प्रचलनं गुप्तकाले न दृश्यते । तदा वङ्गाधिपस्य नौसेना प्रशस्तासीत् ।

अश्वसेना

वैदिकयुगेऽश्वसेनासीन्नवेति विषये कतिपयपाश्चात्यविद्वांसः प्रतिपादयन्ति—'यदश्वसेना नासीत्तदा । अश्वसेनासीदिति न क्वचिन्निर्दिष्टं, यद्यपि बहुष्वन्यकार्येषु अश्वानामुपयोगो वर्णित एवेति ।' एतन्मतं सर्वथा वितथं यतो हि नामाथर्ववेदे युद्धभूमौ अश्वसादिनां सैनिकानामधोविधोल्लेखो वर्तते—

ये रथिनो ये अरथा असादा ये च सादिनः ।
सर्वानदन्तु तान् हतान् गृध्राः श्येनाः पतत्रिणः । ११.१०.२४

अर्थात् युद्धस्थले शत्रुपक्षस्य हतानश्वारोहिणो योद्धॄन् पतत्रिणो भक्षयन्तु । अपि च—

ऋग्वेदेऽश्वसेनायाः स्पष्टोल्लेखो वर्ततेऽधोविधम्—

मां नरः स्वश्वा वाजयन्तो मां वृताः समरणे हवन्ते । ४.४२.५

अर्थात् युद्धे व्यापृता अश्वारोहिण इन्द्रमाह्वयन्ति ।

तैत्तिरीयसंहितायामश्वेन च रथेन च वज्री' इत्यनेनाश्वारोहिणां वज्र-धारिणां वीराणां युद्धे प्रवर्तनं द्योत्यते । ४.४.८ । पुनश्च 'अश्वा इव स जित्वरीः । ४.२.६ तदेव समर्थयति ।

वैदिकयुगेऽश्वाः सुविदितवाहना बभूवुः । अश्वस्य विशेषाः—'अत्यः,

---

1. Mc Crindle, Alexander's Invasion p. 260
2. No mention is made of riding in battle, but for other purposes It was not unknown. Vedic Index अश्व ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अर्वाः, वाजी, सप्तिः, हयः' इत्यादयस्तस्य पर्यायत्वेन महत्त्वं बेदयन्ति।[1]

ऋग्वेदेऽश्वस्य वर्णने प्रोक्तम्—

यद् वाजिनो देवजातस्य सप्तेः प्रवक्ष्यामो विदथे वीर्याणि। १.१६२.१

अश्वस्य वीर्याणि तस्य युद्धे पराक्रमान् द्योतयन्ति।[2] वीर्यमत्र युद्धे पराक्रम इति वेदे पठ्यतेऽधोविधमन्यत्रापि—

इन्द्रस्य नु वीर्याणि प्रवोचम्। यानि चकार प्रथमानि वज्री॥ १.३२.१

एतद् घेदुत वीर्यमिन्द्र चकर्थ पौंस्यम्। ४.३०.८।

अश्वस्तु अश्वमेधयाजकस्य राज्ञः प्रतिरूपः स्वीयं दिग्व्यापिप्रभावं परीक्षितुं परिभ्रमति। उपक्रमेऽस्मिन् स्वभावतो युद्धं प्रवर्तते। तदेतद् वर्णित-मृग्वेदे—'सप्तेः प्रवक्ष्यामो विदथे वीर्याणि। १.१६२.१।

अन्यच्च ऋग्वेदे—

आमूरज प्रत्यावर्तयेमाः केतुमद्दुन्दुभिर्वावदीति।
समश्वपर्णाश्चरन्ति नो नरोऽस्माकमिन्द्र रथिनो जयन्तु। ६.४७.३१

अत्राश्वपर्णा इति अश्ववारा युद्धे सैनिकाश्चर्चिताः सन्ति। वैदिकयुगे युद्धभूमौ रथसेनया संगताश्वसेना क्वचित्पराक्रममाणा बभूव। तथाहि—

अश्वारथेभिः सहवाजयन्तः। अवक्रामन्तः प्रपदैरमित्रान्
क्षिणन्ति शत्रूँरनपव्ययन्तः॥ ऋ० ६.७५.७

अश्वानां स्वतन्त्ररूपेण महती प्रतिष्ठा दृश्यते—

आ जंघन्ति सान्वेषां जघनाँ उपजिघ्नते।
अश्वाजनि प्रचेतसोऽश्वान्त्समत्सु चोदय॥
ऋ० ६.७५.१३, यजु० २९.५०

ऋग्वेदेऽन्यत्राश्विद्वयेन पेदुरिति प्रख्याताय नृपाय युद्धे विजेताश्वः प्रदत्त

---

१. अनेन युद्धार्थं तेषां योग्यतानल्पा प्रतिभाति। शत्रूणामवमर्दने तेषां नैपुण्यं वर्णितम्। ऋ० ६.७५।

अश्वमेधयज्ञात् पूर्वं दिग्विजयाय महती सेना कस्यचिन्मेध्याश्वस्यस्य पश्चाद् वर्षं यावत् प्रायात्। अयमश्वो नैकदेशेषु निखिलभारते पर्यभ्रमत् युद्धार्थिप्रतियोगिना यत्र स गृहीत आसीत् तत्र तं मोचयितुं युद्धं समारभ्यत। प्रकरणेऽस्मिन् इन्द्ररूपोऽश्वो सेनानायक इति प्रतीकः युद्धे व्यापृत एव। ऋग्वेदे ३.५३.११ मन्त्रेणैतत् स्पष्टं प्रमाण्यते।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

इति वर्णितम् ।[1]

अथ च—

'वयमग्ने अर्वतावा सुवीर्यं ब्रह्मणा वा चितयेमा जनाँ अति । २.२.१०

इति युद्धेऽश्वेन विजयलाभ द्योतयति ।

ऋग्वेदे दधिक्रावेति नामकोऽश्वः युद्धभूमौ स्वपराक्रमवीर्यादिकारणात् परमप्रसिद्धिं गतो दिव्यकोटिं प्राप ।[2] तस्य विशेषाः सन्ति—पुरुनिष्पिष्वा नृपतिरिव शूरः, वायुवद् वेगवान्, शत्रुद्रावकः, आक्रामकान् भाययन्, सहस्रयोधः, भीमः, सहस्रैः परा, त्वरमाणः ।[3]

यजुर्वेदेऽध्योलिखिते मन्त्रेऽर्वतां युद्धे धनग्रहणस्य वर्णनं कृतम्—

ते नो अर्वन्तो हवनश्रुतो हवं विश्वे शृण्वन्तु वाजिनो मितद्रवः ।

सहस्रसा मेधसाता सनिष्यवो महो ये धनं समिथेषु जभ्रिरे ।। ९.१७

अत्रार्वन्तोऽश्वारोहिणः सन्ति । ते युद्धे विजयिनो भवन्ति ।

युद्धप्रकरणे—अरिष्टचा अश्वसादम्[4] इत्यनेनाश्वस्य युद्धोपयोगिता प्रमाण्यते ।

पुनश्च—

आगत्य वाज्यध्वानं सर्वा मृधो विधूनते ।। यजु० ११.१८

अर्थादश्वो युद्धभूमा आगत्य शत्रूणां ध्वंसनं करोति ।

परमस्याः परावतो रोहिदश्व इहागहि ।

पुरीष्यः पुरुप्रियोऽग्ने त्वं तरा मृधः ।। यजु० ११.७२

---

१. युवं पेदवे पुरुवारमश्विना स्पृधां श्वेतं तरुतारं दुवस्यथः ।
शर्यैरभिद्युं पृतनासु दुष्टरं चर्कृत्यमिन्द्रमिव चर्षणीसहम् ।। १.११९.१०
एतस्य आंग्लभाषया ग्रिफिथेनानुवादोऽधोविधः—A horse did ye provide for Pedu, excellent, while, O ye Aśvins, conqueror of combatants, Invincible in war by arrows, seeking heaven worthy of fame, like Indra, vanquisher of men. प्रसङ्गोऽयं १.११६.६ मन्त्रेऽपि समीकृतः ।

२. Regarding Dadhikrāvā Professor ludwig thinks that the hymn Rg. IV. 38 is a fragment, referring not to the mythical being but to an actual war-horse bearing this name. Ralph T. H. Griffith : The Hymns of the. Ṛgveda p. 226

३. ऋ० ४.३८ सूक्तात् ।

४. यजु० ३०.१३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अत्राश्वारोहिणो युद्धसाफल्यं निगदितम् ।

वाजिनां वाजिनान्युद्धर्षय । यजु० १७.४२
आजंघन्ति सान्वेषां जघनामुष जिघ्नते ।
अश्वाजनि प्रचेतसोऽश्वान् समत्सु चोदय ।। यजु० २९.५०

पथमग्ने अर्वता वा सुवीर्यं ब्रह्मणा वा चितयेमा जनाँ अति ।
अर्थाद्श्वबलेनातिशयो लभ्यः । ऋ० २,१०.२

अथर्ववेदे च

तेन त्वं वाजिन् बलवान् बलेनाजिं जय समने पारयिष्णुः । ६.९२.२
अर्थाद् युद्धभूमौ अश्वेन वीरो जयति ।

छान्दोग्योपनिषदि उक्तं—कुरुनश्वाभिरक्षतीति । ४.१७.१०
अत्र युद्धक्षेत्रेऽश्वा कुरुन् कर्तॄन् योद्धॄनारूढानश्वा वडवा यथाभिरक्षतीति शाङ्करभाष्यम् ।

खीष्टपूर्वपञ्चमशताब्दे पाणिनिश्चतुरंगिणीं सेनां निर्दिशति ।[1] तत्रोष्ट्राणां[2] गर्दभीनां च सेनासीदेव । प्रमुखासीदश्वसेना ।

युद्धेऽश्वानां सविशेषं महत्त्वं परीक्ष्य तेषां प्रशिक्षणार्थामधिकारिणो नियुक्ता आसन्[3] ।

अश्वसेनया शत्रुसेनायाः प्रध्वंसनाय विविधकार्यकलापोऽर्थशास्त्रे निर्दर्शितः —अभिसृतम्, परिसृतम्, अतिसृतम्, अपसृतम्, उन्मथ्यावधानम्, वलयो, गोमूत्रिका, मण्डलं, प्रकीर्णिका, व्यावृत्तपृष्ठम्, अनुवंशम्, अग्रतः पार्श्वाभ्यां पृष्ठरक्षा, भग्नानुपात इति । १०.५.६४ । प्रशिक्षिताश्वाः क्वचिद् राजहत्यां कर्तुं नियुक्ता बभूवुः । १३.२.३० ।

महाभारते युद्धस्याष्टाङ्गेषु नावः प्रकीर्तिताः सन्ति ।[4]

---

१. हस्त्यारोहाः रथिनः, सादिनश्च पदातयश्च । २.४.२
२. उष्ट्रवामी ६.२.४० रथिकाश्वारोहम् ।
३. Rastrakutas and Their Times p. 252
४. रथा नागाह्याश्चैव पादाताश्चैव पाण्डव ।
विष्टिनावश्चराश्चैव देशिका इति चाष्टमम् ।। शान्ति० ५९.४१
अन्यत्र आर० २६७.२६,२८
स्यन्दनाश्वैः समे युध्येदनूपे नौद्विपैस्तथा ।
वृक्षगुल्मावृते चापैरसिचर्मायुधैः स्थले । मनु० ७.१९२
अर्थशास्त्रानुसारेण नदीदुर्गेविजये नौभिः कृतकार्यो भवति राजा ।। ७.१०.४०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नौसेना

नौसेनायाः प्रथमैतिहासिकप्रयोगो मौर्ययुगे दृश्यते । तत्र काचिद् विशिष्टसमितिस्तस्याः प्रबन्धाय बभूव ।[1] मनुर्नौसेनामुल्लिखति । पश्चाद् गुप्तयुगे बङ्गानां नौसेना रघुवंश उल्लिखिता ।[2] सप्तमशताब्दस्य श्रीहर्षस्य नौसेना इदंप्रथमतया गणिता मधुवन-ताम्रलेखे । प्रायः समकालीने दशकुमारचरिते नौसेनोल्लिखिता ।[3] परवर्तियुगे तत्र पालनरेशानां महती चमूरासीत् । तामिलराज्यस्य सामुद्रिकव्यापारिणां जलयात्रा तेषां नौसैनिकैः सुरक्षिता बभूव । एकादशशताब्दस्य चोलराजाः स्वनौसैन्यबलैर्बहून् द्वीपानजयन् । पश्चिमभारतस्य शिलाहारराजानां नौसेना श्रूयते ।

एकादशशतके राजेन्द्रचोलस्य नौसेना समुद्रपारंगता कटाह (आधुनिककेडा) द्वीपमजयत् । नौसेनाप्रयोगेण चोलाः पूर्वद्वीपसमूहे राज्यं स्थापयितुमचेष्टन्त, वर्षशतं च तदर्थंमयुध्यन्त ।

सप्तदशशतके शिवराजस्य तस्य वंशजानां च नौसेना पुर्तगाल-डचांग्ल देशीयानां नौसेनां प्रत्ययुध्यत ।

सेनाया विविधता

सेना मूलतो द्विविधा भवति—पदचारिणां वाहनचारिणां च । पदचारिणः पदातयो वा स्वीयास्त्रशस्त्रैर्युक्ताः शत्रूणामभिमुखं पराक्रमन्ते ।[4] एतेषां विशेषमहत्त्वं दृष्ट्वादिकालतः सेनामध्ये प्रथमगणना कृता । वाहनचारिषु अश्ववाराणां सैनिकानां द्रुतगत्योच्चावचस्थलेषु लोकोत्तरकार्यसाधनेन महती प्रतिष्ठा स्वाभावतो भवति ।[5] अस्त्रशस्त्रसम्भार-वाहना रथा

---

१. A governing body co-operates with the admiral of the fleet. Hist of Dharm. Vol III page 206.

२. रघु० ४. ३६

३. अस्मिन्नेव क्षणे नैकनौकापरिवृतः कोऽपि मद्गुरभ्यधावत् । पृ० १७८-१७९ । मद्गुर्युद्धनौकास्ति ।

४. सर्वदेशकालशस्त्रवहनं व्यायामश्चेति पदातिकर्माणि । अर्थ० १०.४.१७ । तेभ्यो भिन्ना आसन् विष्टयः । शिविरमार्गसेतुकूप-तीर्थ-शोधनकर्मयन्त्रायुधावरणोपकरणग्रासवहनम् । आयोधनाच्च प्रहरणावरणप्रतिविद्धापनयनमितिविष्टकर्माणि ।

५. भूमिवासवननिचयो विषमतोयतीर्थवातरश्मिग्रहणम्, वीवधासारयोर्धातो रक्षा वा विशुद्धि-स्थापना च बलस्य प्रसारवृद्धिर्बाहुत्सारः पूर्वप्रहारो व्यावेशनं व्यावेधनमाश्वसो ग्रहणं मोक्षणं मार्गानुसारविनिमयः कोशकुमाराभिहरणं जघनकोटचभिघातो हीनानुसारणमनुयानं समाजकर्मेत्यश्वकर्माणि । अर्थ० १०.४.१४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

हस्तिनश्च महिमाशालिगौरवं भजन्ते स्म ।[1] शूरा तेषामुपरिष्ठिता दूर-दूर-तरलक्ष्यं कुर्तुं समर्था भवन्ति । हस्तिनः सैनिकवत् शत्रुसैन्यविमर्दनाय दुर्गद्वारभञ्जनाय चालम् ।

पाणिनिः 'औष्ट्रकः' इति उष्ट्राणां सेनां निर्दिशति ।। ४.२.३९

तत्र खरोष्ट्रशकटानां प्रचुरोपयोग आसीदर्थशास्त्रानुसारेण ।

व्यसन-दृष्टचा सेनानां ३४ भेदाः प्रकल्पिताः । तद्यथा—अमानिता (यस्याः सम्मानोऽकृत एव) विमानिता (अपमानिता) अभृता (अदत्तवेतना) व्याधिता (रोगग्रस्ता) नवायता (द्राक् समागता) दूरयाता (दूरतः समायाता) परिश्रान्ता (युद्धे कृतश्रमा) परिक्षीणा (युद्धे नष्टप्रवीरा) प्रतिहता (पराङ्मुखवीरा) हताग्रवेगा (युद्धाग्रे मृतसैनिका) अनृतुप्राप्ताः (ऋतुयोग्य-शस्त्रावरणहीना) अभूमिप्राप्ता (पराक्रमानुकूलभूमिमलभमाना) आशानिर्वेदिनी (निराशा) परिसृप्ता (यस्या नेता परित्यक्तभूमिरस्ति) कलत्रगर्हिणी (स्त्रीणां विनिन्दिका) अन्तःशल्या (विद्वेषधारिणी) कुपितमूला (क्रोधप्रगल्भिता), भिन्नगर्भा (अन्योऽन्यस्माद् विगलिता), अपृता (एकराज्यातिक्रान्ता), अप-क्रान्ता (नैकराज्यातिक्रान्ता), उपनिविष्टा (शत्रुभूता सहगमनी), उपरुद्धा (एकतो रुद्धवेगा) परिक्षिप्ता (सर्वतोऽवरुद्धा), छिन्नधान्या (स्वीयान्न-रहिता), छिन्नवीवधा (अन्नादिवाहन-रहिता साधनहीना), स्वक्षिप्ता (स्वदेशे कार्यभारेमुक्ता) मित्रविक्षिप्ता (मित्रनृपस्य कार्यलग्ना), दुष्टयुक्ता, दुष्टपार्ष्णिग्राहा, शून्यमूला (अवशिष्टसेना) अस्वामिसंहता (राजसेनापतिहीना) भिन्नकूटा (यस्याः सेनापतिः शत्रुसन्धिः स्यात्) अन्धा

---

१. अर्थशास्त्रानुसारेण रथकर्माणि सन्ति—स्वबलरक्षा, चतुरङ्गबल-प्रतिषेधः, संग्रामे ग्रहणं मोक्षणं भिन्न - सन्धानम्, अभिन्नभेदनम्, त्रासनमौदार्यं भीमघोषश्चेति रथकर्माणि । १०.४.१६

हस्तिकर्माणि पुनः —पुरोयानम्, अकृतमार्गेवासतीर्थकर्म, बाहूत्सारस्तोयतरणा-वतरणे, स्थानगमनावतरणं, विषमसंबाधः प्रवेशोऽग्निदानशमनमेकाङ्गविजयः; भिन्नसन्धानमभिन्नभेदनम्, व्यसने त्राणमभिघातो विभीषिका त्रासनमौदार्यं ग्रहणं मोक्षणं सालद्वारा अट्टालकभञ्जनं कोशवाहनम् । १०.४.१.५

संहतानीकं हस्तिभिर्भेदयेत् । अर्थ० १०.३.६

अपरविधमासीत् खनकबलं यस्य सैनिकाः खनकाः हि खातेन शस्त्रेण चोभयथा युध्यन्ते । अर्थ० ७.१०.४७

२. खरोष्ट्रशकटानां वा गर्दभमल्पगजस्तथा । अर्थशास्त्रे १०.४.१९

विपर्यये खरोष्ट्राश्वबलप्रायः । अर्थ० ९.१.५१ शकटगर्भ इति ९.२.४९ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(या सेना शत्रुविषयेऽज्ञा)।[1]

जाति-नाम्नापि सेना ख्यातासीत्। पाणिनियुगे विशेषास्त्रशस्त्रधारिणां सेना तस्या नायकश्च प्रथितौ। यथा वज्रधराणां सेनाथर्ववेदे—

त्रिसन्धेरियं सेना सुहितास्तु मे वशे। अर्थ० ११.१०.४

त्रिसन्धिस्तु वज्रम्।

अस्त्रशस्त्राणि

प्रायः सदैव सैन्योद्योगसाफल्यार्थमधिकाधिकास्त्र - शस्त्राणां निर्माणं, संग्रहणं, तेषां कार्य-क्षमतां शाश्वतीं विधातुं च नैकाधिकारिणो राजभिर्नियुक्ताः। तेषां पर्यवेक्षकोऽर्थशास्त्रानुसारेणायुधागाराध्यक्ष आसीत्।[2]

वैदिकयुगस्याधोक्धिमस्त्रशस्त्राण्युल्लिखितानि सन्ति।

ऋष्टिः—ऋग्वेदे ५.५२.६; ५.५७.२,६

इषुः—ऋग्वेदे ५.५७.२; ६.७५.१७

निषङ्गः—ऋग्वेदे ५.५७.२

वाशी—ऋग्वेदे १.३७.२; १.८८.३; ५.५३.४; ५.५७.२; ८.२९.३

अङ्कुशः—ऋग्वेदे ८.१७.१०; १०.४४.९

परशुः—ऋग्वेदे १०.२८.८

कृपाणः—ऋग्वेदे १०.२२.१०

वज्रः—ऋग्वेदे १०.४८.३; १०.११३.५

वज्रस्यापरं नाम त्रिसन्धिरासीत्। त्रिसन्धिर्बहुविध आसीत्—अयोमुखः, सूचीमुखः, विकंकतीमुखः, क्रव्यादः, वातरंहा। अथर्व० ११.१०.३

अलौकिकास्त्राणां प्रयोगो वैदिकयुगे प्राचलत्। अथर्ववेदानुसारेण युद्धभूमौ शत्रूणामन्धतमसाच्छन्नतायै प्रयोगाः कृताः।[3]

शतघ्नी—तैत्तिरीय-संहितायां १.५.७.६; रामायणे बालकाण्डे ५.१९; युद्धकाण्डे ३.१३; सुन्दरकाण्डे २.२१,२२

---

१. अर्थशास्त्रे ८.५.१–१९

२. आयुधागाराध्यक्षः सांग्रामिकं दौर्गकर्मिकं परपुराभिघातिकं चक्रयन्त्रमायुधमावरणमुपकरणं च तज्जातकारुशिल्पिभिः कृतकर्मप्रमाणकालवेतनफलनिष्पत्तिभिः कारयेत्। स्थानपरिवर्तनमातपप्रवातप्रदानं च बहुशः कुर्यात्। ऊष्मोपस्नेहक्रिमिभिरूपहन्यमानमन्यथा स्थापयेत्। जातिरूप-लक्षण-प्रमाणागम - मूल्य निक्षेपैश्चोपलभेत। अर्थ० २.१८.१–५

३. तां विध्यत तमसापव्रतेन यथैषामन्योऽन्यं न जानात्। अथर्थ० ३.२.६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

आग्नेयास्त्रम्-आदिपं० १५८.५४

महाशूलम्, गदा, मुसलम्, भुशुण्डी शतघ्नी, खड्गः, आर० १६६.१४–१६

महाभारते शतघ्नी अन्यत्रापि चर्चिता। यथा आदि० २०७.३४ वनपर्व १६९.१६; २८४.५; २०९.२४; द्रोण० १५६.७०; कर्ण० ११.८; शल्य प० ४५.११०; शान्ति० ६९.४३; १९९.३३

महाभारतकालीयेऽष्टाध्याय्यां प्रहरणाभिख्ययास्त्रशस्त्राण्यधोविधं सूचितानि—

धनुः (कार्मुकः) अष्टाध्याय्यां ३.२.२१
शक्तिः— ,, ४.४.५९
परश्वधः— ,, ४.४.५८
कासू तथा कासूतरी ,, ५.३.९०
हेति ,, ३.३.९७
असिः (कौक्षेयकम्) ,, ४.२.९६
सपत्रवाणाः ,, ५.४.६१

अर्थशास्त्र आयुधानां नामानि अधोविधवर्गीकृतानि—

स्थिरयन्त्राणि सर्वतोभद्र-जामदग्न्य-बहुमुख-विश्वासघाति-संघाटी-यानक-पर्जन्यक-बाहूर्ध्वबाह्वर्धबाहूनि ।

चलयन्त्राणि–पञ्चालिक–देवदण्ड-सूकरिका-मुसलयष्टि-हस्तिवारक-ताल-वृन्त-मुद्गर-गदा-स्पृक्तला-कुद्दालास्फोटिमोत्पाटिम-शतघ्नी-त्रिशूल-चक्राणि ।

धनूंषि—कार्मुक-कोदण्ड-द्रूणाः ।

इषवः—वेणु-शर-शलाका-दण्डासन-नाराचाः ।

खड्गाः—निस्त्रिंश-मण्डलाग्रासि–यष्टयः ।

क्षुरकल्पाः—परशु-कुठार-पट्टिस-खनित्र-कुद्दाल-क्रकच-काण्डच्छेदनाः ।

आयुधानि—यन्त्र-गोष्पण-मुष्टिपाषाण-शेचनी-दृषदः ।

पर्वतदुर्गाक्रमकारिणः प्रतियोद्धुं शिलावृक्षमोक्षोऽकारि ।[1]

हलमुखानि—शक्ति-प्रास-कुन्त-हाटक–भिन्दिपाल–शूल–तोमर-वराहकर्ण-कणय-कर्पण-त्रासिकादीनि ।

अतः परमर्थशास्त्रे वर्मावरणादीनि सैन्योपयोगीनि उपकरणानि वर्णितानि ।[2]

चतुर्थखीष्टशताब्दस्य समुद्रगुप्तस्य प्रयागस्तम्भलेखे परशु-शर-शङ्कुशक्ति-प्रासासि-तोमर-भिन्दिपाल-नाराच-वैतंसिकाद्यस्त्रशस्त्राणां चर्चा वर्तते ।

१. अर्थ० ७.१०.४२ २. अर्थशास्त्रे २.१८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

युद्धाचार-संहिता

युद्धाचार-संहिता महाभारतयुगे धर्मयुद्धप्रकरणे सर्वोच्चं विकसिता दृश्यते ।[1] शनैः शनैः योद्धव्यं प्रति औदात्त्यमाचरणीयमिति महात्मनां निर्देशो विस्मृतप्राय क्वचिद्वलोक्यते । येन केन प्रकारेण शत्रुर्वा तस्य सम्बन्धिनो वा घातयितव्या इति कौटिल्योऽर्थशास्त्रे निर्घृणं प्रतिपादयति । युद्धप्रकरणं तु तत्र न धर्मस्यापितु अधर्मस्य क्षेत्रं संजातम् । प्राग्भावेण विकसति स युद्धाचारो येन शत्रुभूता व्रणिता राजानः सैनिकाश्च चिकित्सित्वा स्वदेशे प्रत्यावर्तिताः[2] विजितदेशस्य प्रजाः सहानुभूत्या समाश्वस्ताश्च ।[3]

कूटयुद्धस्य वैरस्यं निन्दितमेव शास्त्रेषु । तथा हि महाभारते—

न तथा बलवीर्याभ्यां विजयन्ते जिगीषवः ।
यथा सत्यानृशंसाभ्यां धर्मेणैवोद्यमेन च ।। भीष्म० २१.१०
यो वै जयत्यधर्मेण क्षत्रियो वर्धमानकः ।
आत्मानमात्मना हन्ति पापो निकृतिजीवनः ।। शान्ति० ९६.१५
धर्मेण निधनं श्रेयो न जयः पापकर्मणा ।। शान्ति० ९६.१६
नाधर्मेण महीं जेतुं लिप्सेत जगतीपतिः ।
अधर्मविजयं लब्ध्वा कोऽनुमन्येत भूमिपः ।। शा० ९७.१

कौरवपाण्डवीये युद्धेऽधोविधः समयः कृतो धर्माश्च स्थापिताः[3]—

(१) युद्धे निवृत्ते परस्परं प्रतिदिनं प्रीतिः स्यात् ।
(२) छलनं न स्यात् ।
(३) वाचा युद्धे वाचा प्रतियोधनं भवेत् ।

---

१. महाभारते युद्धाचारस्योदात्त-निदर्शनानि तत्र तत्रैकस्थलेषु प्रकीर्णानि विलसन्ति — आदि० १७२.३६ । विराट० ४८.६,७ । उद्योग० १९५.१५; १९६.८,१० । भीष्म० १.२७-३३; २.१४; १९.३६; ४१.३२–३५; ५५.७९; ७३.२८; १०३.७१-७४; १०५.२४, २५; ११६.३ । कर्ण० ४९.२२ । शल्य० ५९.५-१०, २३; ६३.१२-१४, २७.१२९ । शान्ति० ९६.७, ११, १२, १३; ९७.९,१०; ९९.४७; १००.१४; १०१.२३–२६ ।

क्वचिद् भयादुपनतं क्रीबं वा रिपुमागतम् ।
युद्धे वा विजितं पार्थ पुत्रवत् परिरक्षसि ।। सभा० ५.४५

२. शान्ति० ९६.१३

३. शान्ति० १०३.३४-३९

३. भीष्म प० १.२७, ३२; ४१.१७–१९; ३२ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(४) सेनातो बहिर्गतो न हन्तव्यः ।
(५) समानवाहनेन युद्धार्थिना योद्धव्यम् ।
(६) विश्वस्ते वा विह्वले वा सैनिके न प्रहर्तव्यम् ।
समाभाष्य प्रहर्तव्यम् । समयोगवीर्योत्साहवयस्केन सैनिकेन योद्धव्यम् ।
(७) परेण संयुक्तः प्रमत्तः, विमुखः, क्षीणशस्त्रः, विवर्मा च कथंचन न हन्तव्यः ।
(८) युद्धातिरिक्तकर्मचारिणो न प्रहर्तव्याः ।
(९) युद्धपूर्वं गुरूणामनुमतिर्लभ्या ।

रामायणानुसारेणप्रयाण-काले नगर-जनपदा दूरत एव परिहरणीयाः । युद्धकाण्डे ४.३८,३९

मनुरसाधारणास्त्रशस्त्रैः प्रहरणं निषेधति ।[1] तथा हि—

न कूटैरायुधैर्हन्याद्युध्यमानो रणे रिपून् ।
न कर्णिभिर्नापि दिग्धैर्नाग्निज्वलिततेजनैः ॥ ७.९०

मनुरप्रयोज्यशस्त्राणां विधानं करोति—कूटायुधैः, कर्णिभिः, दिग्धैः, ज्वलिततेजनैरिपून् न हन्यादिति ७.९० । सोऽहन्तव्यसैनिकानां सूचीं प्रस्तौति अधोविघ्नम्—स्थलारूढः, क्लीबः, कृताञ्जलिः, मुक्तकेशः, तवास्मीतिवादी, सुप्तः, सन्नाहरहितः नग्नः, निरायुधः, अयुध्यमानः, दर्शकः, अन्यैः सह युध्यमानः, त्रुटितायुधः, आर्तः, परिक्षतः, भीतः, परावृतश्च ।[2] महाभारते पुनः समर्थितम्—

वृद्धबालौ न हन्तव्यौ न च स्त्री नैव पृष्ठतः ।
तृणपूर्णमुखश्चैव तवास्मीति च यो वदेत् ॥ शान्ति० ९९.४७

शङ्खानुसारेणाराजो राजानं न हन्यात् । अश्नन्, जलं पिबन्, उपानहमुत्सारयन् योद्धा न हन्तव्यः ।

शत्रुरपि योद्धा क्षतः सन् चिकित्स्यः । यदा स स्वस्थो भवेत् स स्वगृहगमनाय मोक्तव्यः ।[3]

युद्धाचारसंहितानुसारेण युद्धकालेऽपि प्रायो लोका स्वकर्मणि प्रावर्तन्तेति प्रत्यक्षदर्शिनो मेगस्थनीजस्याधोवर्णनेन संकेत्यते—

---

१. महाभारते समर्थितमेतत् ! शान्ति० ९६.१२ । द्रोणोऽश्वत्थामानं ब्रह्मशिरसः प्रयोगो न करणीय इत्यादिष्टवान् । सौप्तिक० १२.८
२. मनुस्मृति ७.९०-९३
३. शान्ति० ९६.१३,१४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

Tillers of the soil even when battle is raging in the neighbourhood are undisturbed by any sense of danger, for the combatants allow those engaged in husbandry to remain quite unmolested.

Frgment I, p. 32,

सत्यमेतद्यद् यद् युद्धनियमानामतिक्रमो भीम-दुर्योधन-कृष्ण-युधिष्ठिरादिभिःकदाचित् कृतस्थापि तेषामस्माद्धेतोर्भृशं निन्दा महाभारते शाश्वतीकृता ।[1]

सन्ध्याकाले युद्धविरामोऽभवत् । रात्रौ नैव युध्येत इति नियमः सर्वदा न प्रतिपालितः । क्वचिद् रात्रावपि रथगजाश्वारोहाः प्रदीपसाह्या अयुध्यन्त ।[2]

कौटिल्यानुसारेण कतिपयसेना रात्रियुद्धविशारदा अभवन् । ७.१५.२६

युद्धभूमेर्भग्नं शत्रुं न पीडयेदिति युद्धनीतिः कौटिल्येन प्रतिपादितामोविधम् —

पुनरावर्तमानस्य निराशस्य च जीविते ।
अधार्यो जायते वेगस्तस्माद् भग्नं न पीडयेत् ।। अर्थ० १०.३.७५

युद्ध-विज्ञानम् व्यूह-विधानं च

कस्मिन् देशे कस्मिन् काले कीदृश्या सेनया कीदृशी सेना कैश्चिदस्त्र-शस्त्रैर्युध्येतेति चिरकालिकानुभवयुतां युद्धविद्यानिष्णातानां मतानि पूर्वाचार्यैः संगृहीतानि, अभिनवज्ञानसन्दोहे निकषितानि बहुमतेन स्वीकृतानि दृश्यन्तेऽर्थ-शास्त्रे । सन्ध्यादिषाड्गुण्येन सामादिना उपायचतुष्केण कूटविधानेन च वीराणां युद्धपराक्रमाः प्राग्भाव-प्रपन्ना आसन् । नित्यनूतानानुसन्धानेन तेषां शस्त्रास्त्राणां वैविध्यं प्रयोगकौशलं च समुन्नतमासीत् ।[3]

वैदिककाले युद्धकौशलमाकूतमिति ख्यातमासीत् । अथर्व० ११.९.१,१३ । कोटिशोऽपि शत्रवो वैज्ञानिकप्रयोगेण निष्प्राणिता वैदिककाले ।[4] युद्धविज्ञानस्य कूटपक्षे निष्णाता अर्थशास्त्रे प्राज्ञा इत्यधोविधं विख्याताः —

---

१. जातकेषु युद्धातिचारा अपि नैकशो वर्णिताः । असातरूपजातकम्, एकराजजातकं घतजातकं च पराजितैर्नृपैः सह दुर्व्यहारस्य वृत्तं प्रस्तुवन्ति ।

२. द्रोणपर्वणि १५४ अध्याये ।

३. अर्थशास्त्रे ७.३-१८; ९.२–७; १०.१–६; ११.१; ११.१; १२.१–५; १३.१–५ १४.१–४

४. अथर्ववेदानुसारेण शत्रवः सहस्रमयुतं च बृहज्जालप्रयोगेण संहृताः । ८.८.७ । अपरं च दुर्गान्धकरणीं रज्जुं प्रज्वाल्याधुनिकगैस (gas) वद् धूमप्रचारणेन शत्रवो भयाक्रान्ता एवासमर्थाः कृता । अथर्व० ८.८.२ । त्रिसन्धिनामकेन वज्रेण भृशं कदनं सम्भावितमासीत् । अथर्व ११.१०.२–४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

एकं हन्यान्नवा हन्यादिषुः क्षिप्तो धनुष्मता ।
प्राज्ञेन तु मतिः क्षिप्ता हन्याद् गर्भगतानपि ।। १०.६.५५

युद्धेऽनायासेनैव महतीं सिद्धिमवाप्तुं विषयोगाः, अग्नियोगाः, यन्त्र-योगाः, आकृतिपरिवर्तन-विधानानि, बुभुक्षा-हरणानि, इन्द्रजालानि[1] छाव-श्यकानि बभूवुः । तेषां निर्माणं विज्ञानप्रौढिम्ना समभवत् । अन्ये तत्रासन् अन्तर्धानयोगाः, प्रस्वापनयोगाः, आकाश-विचरणयोगाः, ज्याच्छेदनयोगाः मारणयोगाः, अन्नाद्यक्षययोगाः, नवनीतसंग्रह-योगाः, नामग्रहणेन फललाभ-योगाश्च साधनीयाः ।[2]

कौटिल्यानुसारेण

मन्त्रभैषज्य-संयुक्ता योगा मायाकृताश्च ये ।
उपहन्यादमित्रांस्तैः स्वजनं चाभिपालयेत् ।। १४.३.९६

अपरे चासन् विषापहरणयोगा यैः स्वसैन्यस्य राजा रक्षणं कुर्यात् ।[3]

रामायणानुसारेण बहुविधव्यूहा रचिता आसन् । यथा श्येन-सूची-वज्र-शकट-मकर-दण्ड-पद्मव्यूहाः । रामाय गरुडव्यूहो रोचते स्म ।

व्यूहरचना युद्धविज्ञानस्य महाभारतानुसारेण महत्त्वपूर्णमङ्गमभवत् । सम्यग्व्यूहरचनया नैकविधसेनानां सातिशयो योगः शत्रुक्षयायात्मविजयाय च प्राभवत् । महाभारते व्यूहानां रचनाकौशलमुद्भावितं प्रतिभाति । तत्र चक्रव्यूहे निगृह्याभिमन्युर्घातितः । कौरवसेनाया व्यूहरचना आसुर-पैशाच-राक्षसरीतिभिर्भीष्मेण दिवसे दिवसे कृतासीत् ।[4] अनेन प्रतिभाति यदार्येतराणां व्यूहरचना-विज्ञानं प्रकामं विकसितमासीत् । भीष्मानन्तरं द्रोणः शकटव्यूहं स्वसैनापत्ये विरचितवान् । तदा पाण्डवसेना क्रौञ्चव्यूहेऽवस्थिता ।[5]

परवर्तियुगे नवनवविधा व्यूहा विरचिता । अर्थशास्त्रानुसारेण प्रमुख-व्यूहा अधोविधा विदिता आसन्—दण्ड-प्रदर-दृढकासह्य-श्येन-चाप-कुक्षि-प्रतिष्ठ - सुप्रतिष्ठ - संजय-विजय - स्थूल-कर्ण-विशालविजय-चमूमुख-झषास्य-सूचीमुख - वलयव्यूह-दुर्जय-भोग-शकट-मकर-परिपतन्तक–मण्डल–सर्वतोभद्र-वज्र-गोधा-काकपदी-कर्कटकारिष्टाचलप्रतिहता ।[6] एतेषां प्रत्येकशः प्रति-

१. अर्थशास्त्रे १४.१–२ अध्यायतः २. अर्थशास्त्रे १४.३.१—९४
३. अर्थशास्त्रे १४.४.१—१३ । धूमप्रयोगेण शत्रुसेनान्धीकृता । अथर्व० ११.१०.७
४. भीष्मपर्व १०४.१६ । शुक्रोऽसुराणां कृते बृहस्पतिर्देवानां कृते व्यूहमरचयताम् । अर्थशास्त्रे १०.६.१,२
५. द्रोणपर्व ६.१५ । पाण्डवानां कृते क्रौञ्चारुण-मकरव्यूहौ रचितौ ।
६. एतेषां रचना-विन्यासोऽर्थशास्त्रे १०.६.८–३५ द्रष्टव्यः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

घाताय व्यूहा निर्दिष्टाः सन्ति ।[1]

युद्धाभिरुचिः

'विशं विशं युद्धाय सं शिशाधि' । अथर्व० ४.४.३१
युद्धाय क्षत्रियः सृष्टः । उद्योगे १३३.११
'पराक्रमो हि व्यसनमपहन्ति । स्वधर्मश्चैष क्षत्रियस्य ।'
अर्थ० १२.१.४५

स्वार्थस्य प्रपूरणायानिष्टनिवारणाय च वैदिकयुगे युद्धं प्रियमासीत् । अन्यच्च देवान् स्वविजयेन प्रीणयितुं वीराः समुत्सुका बभूवुरिति ।

'जयन्तं त्वा नु देवा मदन्तु ।' ऋग्वेदे ६.७५.१९ वाक्येन प्रतीयते । अन्यच्च

मा ते अमाजुरो यथा मूरास इन्द्र सख्ये त्वावतः । ८.२१.१५

अर्थान्मूर्खवद्वयं गृहचेतसो भवितुं नेच्छामः । अनेन ऋषीणामपि युद्ध-प्रवृत्तिः परिचीयते ।

तदा युद्धवीराः परवर्तिवीराणां कृते गौरवात्मकमितिहासं निर्मान्ति स्म ।[2] प्रकृत्या वैदिकवीरा विश्वास-निर्भरा युद्धाय संस्कृता दृश्यन्ते । अथर्ववेदे वीरो गायति—

कृतं मे दक्षिणे हस्ते जयो मे सव्य आहितः ॥ ७.५२.८

ऋग्वेदे वीरो युद्धाय प्रोत्साह्यते—

प्रेता जयता नर इन्द्रो वः शर्म यच्छतु ।
उग्रा वः सन्तु बाहवोऽनाधृष्या यथासथ ॥[3]

---

१. केन व्यूहेन कस्य व्यूहस्य प्रणाशनं भवेदिति अर्थशास्त्रे १०.६.३६-४२

२. स्वादुषसदः पितरो वयोधाः कृच्छ्रश्रितः शक्तीवन्तो गभीराः ।
चित्रसेना इषुबला अमृध्राः सतो वीरा उरवो व्रातसाहाः ॥ ६.७५.९

३. अन्यच्च—

प्रेह्यभीहि धृष्णुहि न ते वज्रो नियंसते । १.८०.३
उत्तिष्ठत संनह्यध्वमुदाराः केतुभिः सह ॥ ११.१०.१

पृथिव्या अन्तरिक्षात्, दिवो दिग्भ्यस्तं निर्भंजामो योऽस्मान् द्वेष्टि अथर्वं० १०.५ । इतो जयेतो विजम संचय जय स्वाहा । अथर्वं० ८.८.२४ । यजुर्वेदे कवचिनः, वर्मिणः, निषङ्गिणः, तीक्ष्णेषवः, सुधन्वानो नमस्या इति कीर्तितम् । यजु० १६.३४–३६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

युद्धे साफल्यं प्रशंसाकारणमिति वैदिककालादारभ्याद्यावधि बहूनां स्तुत्यदेवानां[1] युद्धप्रियता च सदैव मानववीरान् युद्धक्षेत्रे पराक्रमं दर्शयितुमुत्साहन्ती आस्ते। तेषु देवेषु माहात्म्यं युद्धेन भूयिष्ठं लभ्यमिति प्रवृत्तिरभूत्। मानवोऽपि तानुनुचकार। राजपदस्य प्राग्भावं साधयितुं राज्ञा युद्ध्वा नैकशत्रूणां पराभवोऽपेक्षित आसीदिति अथर्ववेदे वसिष्ठेन निदर्शितम्—

अभिवृत्य सपत्नानभियानो अरातयः।
अभिपृतन्यतं तिष्ठाभि यो नो दुरस्यति॥ १.२९.२
अभीवर्तो अभिभवः सपत्नक्षयणो मणिः।
राष्ट्राय मह्यं बध्यतां सपत्नेभ्यः पराभुवे॥ १.२९.४
यथाहं शत्रुहोऽसान्यसपत्नः सपत्नहा॥ १.२९.५
सपत्नक्षयणो वृषाभिराष्ट्रो विषासहिः।
यथाहमेषां वीराणां विराजानि जनस्य च॥ १.२९.६

दिग्विजयो राज्ञां कर्तव्य एवेति शास्त्रकारैरनुमतम्। अथर्ववेदेऽस्मिन् प्रकरणे संकेतितम्—

व्याघ्रोऽधि वैयाघ्रे विक्रमस्व दिशो महीः। ४.८.४
एना व्याघ्रं परिषस्वजानाः सिंहं हिन्वन्ति महते सौभगाय।
समुद्रं न सुभुवस्तस्थिवांसं मर्मृज्यन्ते दीपिनप्स्वन्तः। अथर्व. ४.८.७

अतएव राज्ञां चिकीर्षितमासीत्—

मह्यं नमन्तां प्रदिशश्चतस्रः। मह्यं षडुर्वीर्धृतमावहन्तु। अथर्व० ९.२.११

परिणामतः पदे पदे युद्धं सम्बभूव।

अहमस्मि सहमान उत्तरो नाम भूम्याम्।
अभीषाऽस्मि विश्वाषाडाशामाशां विषासहिः॥ अथर्व १२.१.५४

वैदिकयुगीना न केवलं पुरुषा अपितु स्त्रियोऽपि शत्रुसंक्षयाय समुत्मुकाः प्रवदन्ति—

अवीरामिव मामयं शरारुरभिमन्यते।
उताहमस्मि वीरिणीन्द्रपत्नी मरुत्सखा विश्वस्मादिन्द्र उत्तरः। ऋ० १०.८६.९

---

१ महाभारतानुसारेण दस्युवधायेन्द्रो वर्म शस्त्रं धनुश्चोत्पादितवान्। इन्द्रविषयेऽथर्ववेदे —विषासहिं सहमानं सासहानं सहीयांसं। सहमानं सहोजितं स्वर्जितं गोजितं संधनाजितम्। ईड्यं नाम ह्व इन्द्रम्। १७.१.१। अस्मिन् सन्दर्भे 'इन्द्रः स्वर्जित्' इति बहूनां महिमाकांक्षिणां नृपाणां दिग्विजयोपक्रमस्य निदर्शनमुपस्थापयति।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

'मम पुत्राः शत्रुहणोऽथो मे दुहिता विराट् । उताहमस्मि संजया' इत्यादि ऋ० १०.१५९.३ । सुवीरासो वयं जयेम । ऋ० ९.६१.२३

सर्वे देवा राजन्या वैश्याः शस्त्रधारिण आसन् ।[1] विजयिनोऽधिकृत्य स्तोमा विरचिता आसन् ।[2]

पुरा प्रायः सदैव राज्ञां समक्षमिन्द्रादीनां युद्धप्रियाणां देवानामादर्शः प्रतिफलतिस्म । महाभारतानुसारेण—

सहस्राक्षेण राजा हि सर्वथैवोपमीयते । शान्ति० ९२.४१

तत्रैव पुनः प्रोक्तं युद्धप्रसंगे—

एतद्वृत्तं वासवस्य यमस्य वरुणस्य च ।
राजर्षीणां च सर्वेषां तत्त्वमप्यनुपालय ।। ९२.५२

महाभारते युद्धायाभिरुचिः सम्यङ् निर्दर्शिता । तद्यथा—

उत्थानेनामृतं लब्धमुत्थानेनासुराहताः ।
उत्थानेन महेन्द्रेण श्रैष्ठ्यं प्राप्तं दिवीह च ।।
उत्थानधीरः पुरुषो वाग्धीरानधितिष्ठति ।
उत्थानधीरं वाग्धीरा रमयन्त उपासते ।।
उत्थानहीनो राजा हि बुद्धिमानपि नित्यशः ।
धर्षणीयो रिपूणां स्याद् भुजंग इव निर्विषः ।।[3] शान्ति९ ५८.१४-१६

अतएव महाभारतीये युद्धे—

वेदाध्ययन-सम्पन्नाः सर्वे युद्धाभिनन्दिनः ।
आशंसन्तो जयं युद्धे वधं वाभिमुखा रणे ।। भीष्म० १.४

युद्धातिथ्यं तस्य प्रमाणमेव ।[4] युद्धं तु स्वर्गद्वारम् ।[5] वीराणां युद्ध-श्रद्धा विशिष्टैव प्रतिभाति ।[6]

अपरस्य कस्यचिद् वीरस्योत्कर्षमसहमानः कश्चिदहमन्यस्तेन द्वन्द्वयुद्धं समाह्वयत् । द्वैरथमीदृशं युद्धमासीत् कर्णजरासन्धयोः ।[7] युद्धेऽस्मिन् कर्णो जरासन्धं पराजयत् ।

युद्धे मृताः क्वचिद् योगिवत् स्वर्गं लभन्ते । पलायमानसेनाया अपलायि—

---

१. अथर्व० ६.१३.१
२. रात्रि स्तोमं न जिग्युषे । ऋ० १०.१२७.८
३. प्रकरणेऽस्मिन्नुत्थानं तु—युद्धानुकूलव्यापार उत्थानमितिकीर्तितम् । शुक्र० १.३२५
४. कर्ण० १२.१९
५. भीष्म १७.८
६. कर्ण० ३३.१२
७. शान्तिप० ५.१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

योद्धुः प्रतिपदमश्वमेधादिवत् पुण्यप्रदम् ।[1] याज्ञ० १.३२५

स्वर्गेऽप्सरसां प्रणयस्य पात्रत्वं युद्धे मृतानां सम्भवतीति पराशरसन्देशः । ३.३१—३५

वीरेभ्य उत्साहोत्तेजनपराणि शास्त्रीयप्रवचनानि राज्ञा मन्त्रिभिः पुरोहितैश्च दत्तानि । स्तुतिपाठका वीराणामन्वयानुसारिपराक्रमेतिहासं प्रवदन्ति स्म । शत्रुपक्षस्य महावीराणां प्रणाशेन महापुरस्कार-प्रतिश्रुतिः घोषिता सेनापतिभिः ।[2] कौटिल्यो धूमिलाभं शत्रुकर्शनं प्रतापं च युद्धविजयेन प्राप्याणि मन्यते ।[3] एतदर्थं साधारणमानवो जीवति ।

राज्ञः कृते शत्रुप्रणाशस्तु नितरामावश्यकः । तस्य सिद्धिर्युद्धं विना न भवति । कौटिल्य उपदिशति सुमहतापि (सैन्य-) क्षय - व्ययेन शत्रुविनाशोऽभ्युपगन्तव्यः । अर्थशा० ७.१३.३६

शोधयोजनायाः फलितार्थो युद्धेनैव सम्भवतीति युद्धासक्तेः परमं शाश्वतं च कारणम् ।[4]

क्षत्रियो गृहावासे मृत्युं नेयादपितु रणे रमणीयं मृत्युमुपगच्छेत् । यदि नाम तन्न सम्भवेत्तर्हि वने वसन् वानप्रस्थेन विधिनेहलोकलीलाया विश्रामं लभेत ।[5]

युद्धान्ते विजयिनां राज्ञां सेनापतीनां सैनिकानां च हर्षोल्लसितं स्वागतम-

---

१. रथाश्वं हस्तिनं छत्रं धनं धान्यं पशून् स्त्रियः ।
सर्वद्रव्याणि कुप्यं च यो यज्जयति तस्य तत् ।। मनु० ७.९६
राज्ञा च सर्वयोधेभ्यो दातव्यमपृथग्जितम् । मनु० ७.९७

२. अर्थशास्त्रे समर्थितम् —
यान् यज्ञसंघैस्तपसा च विप्राः स्वर्गैषिणः पात्रचयैश्च यान्ति ।
क्षणेन तानप्यतियान्ति शूराः प्राणान् सुयुद्धेषु परित्यजन्तः ।। १०.३.३५
स्वर्गीयाश्चाषिशो वाचयेत् । १०.३.४२
सूतमागधाः शूराणां स्वर्गं वर्णयेयुः । १०.३.४९

३. शतसाहस्रो राजवधः । पञ्चसाहस्रो हस्तिरथवधः । साहस्रोऽश्ववधः ।
अर्थ० १०.३.५२—६१

४. अर्थ० ७.१०.४ । त्रिविधश्चास्य (युद्धस्य) लम्भः । नवो भूतपूर्वः पित्र्य इति ।
अर्थ १३.५.४ ।

५. एष एव परो धर्मो राजर्षीणां युधिष्ठिर ।
समरे वा भवेन्मृत्युर्वने वा विधिपूर्वकम् ।। आश्रमवासिकपर्वणि ८.१२ विराट-पर्व ३२.४७-५० ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कारि[1]। तदपि पराक्रमशालिनां जीवितोद्देश्यं परमं भवति। अत एव तेषां युद्धाभिरुचिरुदग्रा संजाता।

राजस्थानीयेतिहासानुसारेण मृत्यौ सन्निहितेऽनागतमेव युद्धमिति दृष्ट्वा जयशैलमेरुप्रदेशस्य राजा चाचकः पञ्चदशखीष्टाब्दे मुलतानराजं युद्धमप्रार्थयत्। युद्धे उभयपक्षयोः सैनिकाः सहस्रशो मृताः। चाचकस्तदनु युध्यमानः स्वर्गं गतः।[2]

युद्धसज्जा-स्कन्धावार-शिबिराणि

युद्धात् पूर्वं युद्ध-शङ्खाजनिते शङ्खचजना निस्सारिताः स्युः, आग्नेय-द्रव्याणि प्रच्छादितानि भवन्तु च।

यथापूर्वं दृष्टमेव राजा 'इच्छन्ननिच्छन् वा यौद्धिकव्यापारपरायणो भवेदिति राजपदस्य परमयोग्यता बभूव। राजा सैनिकप्रयोजनमुद्दिश्य सेतुबन्धान्[3] निर्मापयामास, वणिक्पथानकारयत्[4], खनिजानि द्रव्याणि भूगर्भान्मित्रदेशाद्वा संग्राहितवान्,[5] द्रव्यवनं हस्तिवनं, व्रजांश्चावर्धयत्[6]। एतानि व्यतिरिच्य नानाविधसैन्यं, तस्य सम्भरणोपायं दुर्गसंस्थानमस्त्र-शस्त्रादीनां संग्रहणं गुप्तचरनियोगं, कूटप्रयोगं च दुर्गे संविधत्ते स्म। मुद्रादर्शनेन तत्र प्रवेशोऽनुमतः।

युद्धस्थलस्य समीपमेव स्कन्धावारो (अस्थायी दुर्गः) विनिर्मितः। तत्र पृथक्-पृथक् स्थानं विविध-सैन्यपदाधीशानां, सेनानां, भोज्यादीनां च कृते निर्दिष्टमासीत्।

महाभारतानुसारेण युद्धात् पूर्वं दुर्योधनेन यच्छिबिरं कृतमासीत् तत्तु—

यथैव हास्तिनपुरं द्वितीयं समलंकृतम्।
न विशेषं विजानन्ति पुरस्य शिबिरस्य वा॥
तेषां दुर्योधनो राजा ससैन्यानां महात्मनाम्।
व्यादिदेश सबाह्यानां भक्ष्यभोज्यमनुत्तमम्॥

---

१. शल्यप० ५९.३१; ६३ अध्यायश्च।

२. टाडः राजस्थान का इतिहास हिन्दीसंस्करण पृष्ठ ५७६

३. सेतुबन्धः सस्यानां योनिः। नित्यानुषक्तो हि वर्षगुणलाभः सेतुवापेषु। अर्थ० ७.१४.३५, ३६

४. वणिक्पथः परातिसन्धानस्य योनिः। वणिक्पथेन हि दण्डगूढपुरुषातिनयनं, शस्त्रावरणवान-वाहन-क्रयश्च क्रियते। अर्थ० ७.१४.३७, ३८

५. खनिः संग्रामोपकरणानां योनिः। अर्थ० ७.१४.४०

६. द्रव्यवनं दुर्गकर्मणां यानरथयोश्च। हस्तिवनं हस्तिनाम्। गवाश्वरथोष्ट्राणां च व्रजः। तेषामलाभे बन्धुमित्रकुलेभ्यः समार्जनम्। अर्थ० ७.१४.४१-४५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सगजाश्वमनुष्याणां ये च शिल्पोपजीविनः ।
ये चान्येऽनुगतास्तत्र सूतमागधवन्दिनः ।।
वणिजो गणिका वारा ये चैव प्रेक्षका जनाः ।
सर्वांस्तान् कौरवो राजा विधिवत् प्रत्यवैक्षत ।।
उद्योग० १९६.१२-१९

निष्पक्षसमीक्षकाणां ब्राह्मणादीनां पुरापि मतमासीद् यद् युद्धे किंचित् प्रियं न भवतीति ऋग्वेदेऽपि निगदितम् । ७.८३.२ । महाभारतीयवीराणां युद्धदोषा विज्ञाता आसन् । युधिष्ठिरानुसारेण 'अयुद्धं युद्धाद् गरीयः । को दैवशप्तोऽभिवृणीत युद्धम्' ।[1] गान्धारी एवमेव दुर्योधनं प्रबोधयति—

न युद्धे तात कल्याणं न धर्मार्थौ कुतः सुखम् ।
न चापि विजयो नित्यं मा युद्धे चेत आधिथाः ।। उद्योगे० १२७.३९

संजयो युधिष्ठिरं ब्रूते—

एवं विद्वान् नैव युद्धं कुरुष्व । उद्योगे २७.२६

भीमोऽपि सन्धिप्रस्तावमन्वमोदयत् प्राह च कृष्णं यत्त्वया तथा प्रयतनीयं यथा युद्धं न भवेत् ।

मनुः 'युद्धं विवर्जयेत्' इति शिक्षयति ।[2] कौटिल्यानुसारेण सन्धि-विग्रहयोः सन्धिरेव वरीयान्, यतो हि नाम विग्रहे हि क्षय-व्यय-प्रवास-प्रत्यवाया भवन्ति ।[3]

युद्धस्वरूपम्

पुरापि स्वल्पजनैः संहत्य स्वल्प-प्रयोजन-साध्यानि युद्धानि कृतानि । तेषां प्रभावोऽपि नातिविशेषमार्हत् । महत्त्वपूर्णमासीदुदात्तपराक्रमाणामिन्द्रादीनां वृत्रादि-संहाराय द्वन्द्वयुद्धम् । नैकमहायुद्धानां वर्णनं वैदिकसाहित्यमलंकरोति । अपरविधमासीद् दिग्विजयाय बहुक्षेत्रीययुद्धपरम्परा । वैदिककालत एव प्रायः शाश्वत आसीद् दिग्विजयार्थिनां पृथ्वीलाभाय परमोद्योगः ।

दिग्विजयः

ऋग्वेदे दिग्विजयस्य प्रथमचर्चाधोविधं वर्तते—

उप प्रेत कुशिकाश्चेतयध्वमश्वं राये प्रमुञ्चता सुदासः ।
राजा वृत्रं जंघनत् प्रागपागुदगथा यजाते वर आ पृथिव्याः ।।
३.५३.१२

---

१. उद्योगे २६.१-३ २. मनु० ७.१९९
३. अर्थ० ७.२.२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मन्त्रेऽस्मिन् सुदासो दिग्विजयो लक्षीकृतः । कौशिका ऋषयो युद्धेन रायं समाहर्तुमश्वं मुञ्चन्तिवति विधिः । सोऽयमश्वः पृथिव्याः पूर्वपश्चिमोत्तर-दिशासु परिभ्रमन् राज्ञः कृते शत्रुसंहारोपक्रमं निर्दिशति । तदनन्तरं रामायणे रामस्य महाभारते च पाण्डवानां दिग्विजय-प्रकरणं महत्त्वपूर्णं राजते ।[1] परवर्तियुगे रघुवंशे रघुदिग्विजयः कालिदासेन सोल्लासं वर्णितम् । समुद्रगुप्त-विक्रमादित्य-हर्षादीनां दिग्विजया ऐतिहासिकयुगे विदिता एव सम्राट्पदधिषणा राजसूययज्ञ-प्रवर्तनार्थमासीदयं दिग्विजयः प्रथमपदम् ।[2]

किंविधं राजतन्त्रात्मकं युद्धमित्यस्मिन् प्रसङ्गे ऋग्वेदे वर्णितानि युद्धानि परीक्षणीयानि । तत्रासीद् विश्रुतं युद्धमिन्द्रवृत्रयोः । युद्धेऽस्मिन् सेनायाः संहतिर्नासीत् ।[3] आयुधमपि अद्वितीयं वज्रमासीत् । प्रयोजनमासीत् शत्रुवधो गवां विमोचनं च ।

उपयुद्धमुभयपक्षयोर्दुन्दुभिघोषो वीराणां प्रोत्साहनाय प्रावर्तत । तत्र विजेतुर्दुन्दुभिस्तारतरं घोषं चकार ।[4] दुन्दुभिघोषेण शत्रवः परास्ताः ।[5] सङ्केतनिदर्शनायापि दुन्दुभिघोषः प्रायुज्यत ।[6] अथर्ववेदानुसारेण दुन्दुभि-घोषस्य प्रयोजनानि बभूवुः —

(१) शुचा विध्य हृदयं परेषां हित्वा ग्रामान् प्रच्युत्वा यन्तु शत्रवः । ५.२०.३

(२) मित्रैरमित्राँ अव जंघनीहि । ५.२०.८

(३) शत्रूषाण्नीषाडभिभातिषाहो गवेषणः सहमान उद्भित् ।
वाग्वीव मन्त्रं प्रभरस्व वाचं सांग्रामजित्यायेषमुद्वदेह ।। ५.२०.११

ऋग्वेदीययुद्धेषु नरसंहार-कदनस्य विभीषिका वर्णनीयास्ते ।[7] इन्द्रो वर्चिनो

---

१. महाभारते त्रेतायुगीनहरिश्चन्द्रस्य दिग्विजयो महिमशाली विभाति । सभा० ११.४८-६२ । स पाण्डवानामादर्शः । ततः परं सभापर्वणि पाण्डवानां चतुर्दिग्विजयो वर्णितः २३ अध्यायतः २९ अध्यायं यावत् ।

२. साधारणलोकाः शत्रुभूतानपरलोकान् पराभवितुं युध्यन्ते । ईदृशं युद्धं राजतन्त्रा-त्मकं नासीत् । ऋ० ४.२४.४ ।

३. ऋ० १.३२ । वेषीदेको युधये भूयसश्चित् । ऋ० ५.३०.४ । अर्थाद् इन्द्र एकाकी नैकान् युद्धे पराभवितुं समीहते ।

४. ऋ० १.२८.५ ५. ऋ० ६.४७.२९

६. ऋ० ६.४७.३१

७. ऋग्वेदे ६.१८.८,१०; ६.१९.६,७,१०; ६.२६.३,४,६; ६.३२.४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दासस्य लक्षमेकं सैनिकान् हतवान्। ४.३०.१५। अथर्ववेद इन्द्रकृतयुद्धानि नैकशो वर्णितानि। तेषां स्वरूपमधोविधं निगदितम्--

(१) नव नवतिं पुरो विभेद। २०.७.२।

(२) वंगृदस्य शताः पुरोऽभिनत्। २०.२१.६

(३) चक्रेण २० जनराजान् ६००९९ सैनिकांश्च जघान यदा सुश्रवसा तेषां युद्धमभवत्। २०.२१.९। ऋग्वेदे रथसङ्गः प्रसिद्धोऽभवत्। ९.५३.२।

(४) स यज्ञकुण्डस्य रक्षणाय यज्ञविरोधिनो जघान।

(५) युधा देवेभ्यो वरिवः (वैभवं) चकार। २०.८७.३।

(६) युद्धे मायिनामसुराणां कूटिलप्रवृत्तिविफलीचकार। २०.८७.५।

(७) स शंबरमहिं दानुं च जघान। २०.१४.११।

साक्षाद् दृष्टमेव युद्धमधोविधं वर्णितम्—

अतिधावतातिसरा इन्द्रस्य वचसा हतः।
अविं वृक इव मथ्नीत स वो जीवन् मा मोचि।
प्राणमस्यापि नह्यत। अथर्व० ५.८.४।

वैदिकयुगीनराजतन्त्रात्मकयुद्धस्य विशदस्वरूपं सुदाससो दाशराज्ञयुद्धे प्रकटति। तद्यथा ऋग्वेदे वर्णितम्—

'युद्धक्षेत्रे कृतध्वजो नरः समयन्ते। रजसा क्षितिजपर्यन्ता भूमिर्धूसरीभवति। योधानां घोषो दिवि आरोहति। उभयपक्षौ सहायतार्थमिन्द्रं वरुणं च निर्घोषतः। युद्धस्थलस्यैकभागे देवस्तुति-गायना इन्द्रवरुणादीनां सहायतार्थं जगुः।[1]

अन्यत्र युद्ध-वर्णन-सन्दर्भे सेनान्या वर्म, धनुस्तस्य ज्यात्नीषुधयः सारथिः तस्य श्म्यश्वरथाः पितरः, (रथगोपाः), इषवः, प्रतोदः, हस्तघ्नः स्वस्वकर्मनिदर्शनपुरस्सरं वर्णितानि।[2]

युद्धस्य महति सम्मर्दे स्वभावतो घोरध्वानो बभूवेति वर्णितमथर्ववेदे—

उद् वीराणां जयतां घोषः।
पृथग्घोषा उलूलयः केतुमन्त उदीरताम्। ३.१९.६

स ध्वनिः 'उलूलिः' इति संज्ञितः।

वयं द्युमन्तं घोषं विजयाय कृण्मसि। ४.३१.४

युद्धक्षेत्रं रौद्रं भयंकरं करुणं बीभत्सं च सर्वनाशदृश्यं स्वभावतः

---

१. सत्या नृणामद्मसदामुपस्तुतिर्देवा एषामभवन् देवहूतिषु।
विवत्स्वतो यत्र नमसा कपर्दिनो धिया धीवन्तो असपत्न तृत्सवः॥ ऋ० ७.८३.७,८

२. ऋ० ६.७५.१-१९। अथर्व० ११.९.१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

समुपास्थापयत्[1]। अथर्ववेदानुसारेण युद्धे—

रुजन् मृणन् प्रमृणन् प्रेहि शत्रून्। ४.३

इति सैनिकस्य प्रवृत्तिः। इन्द्रस्तु ऋग्वेदानुसारेण 'पञ्चाशत् सहस्रराक्षसानहन् पुरश्च ध्वंसयामास। अत एव भृशमासीद्युद्धदृश्यम्।[2]

अग्निना प्रदाहोत्सवः शत्रुविनाशाय सोल्लासं सम्पादितः।[3] यजुर्वेदे च

याः सेना अभीत्वरीराव्याधिनीकगणा उत।

अग्नेऽपि दधाभ्यास्ये॥ यजु० ११.७७

सद्योहतपतिकाया दुःस्थितिरथर्ववेदे वर्णिता। रामायणानुसारेण शत्रुसेनां दुर्गाद् बहिष्कर्तुं दुर्गदाहः समारब्धः।

शत्रुं हतोत्साहं कर्तुं वीराणामुत्साहनाय च युद्धभूमिराधुनिक-भाषण-मञ्चवदासीत्। विशेषतो महाभारते वीराणामात्मप्रशंसा,स्वशत्रूणां निन्दात्मकं सम्भाषणं च प्रचुरायते।

भृशमासीद् युद्धदृश्यं यन्महाभारते[4] वर्णितम्—

गजवाजिमनुष्याणां शोणितान्त्रतरंगिणी।

प्रावर्तत नदी तत्र केशशैवलशाद्वला॥ भीष्म० ८९.२५।

न तत्रासीन्महाराजानामपि युद्धे पतितानां कोऽपि अवेक्षकः।[5] अगणित-बाणैर्विद्धा अपि वीराः सोत्साहं युध्यमाना द्रष्टुं शक्यास्तत्र।

---

१. अथर्ववेदे ११.९; ११.१०.२५।

२. पञ्चाशत् कृष्णा निवपः सहस्रा अत्कं न पुरो जरिमा वि दर्दः॥ ऋ० ४.१६.१३
अथर्ववेदे प्रोक्तम्—हनाम अमित्राणां सहस्रशः॥ ११.१.२३
बृहत्ते जालं बृहत इन्द्र शूर सहस्राधस्य शतवीर्यस्य।
तेन शतं सहस्रमयुतं न्यर्बुदं जघान।
शक्रो दस्यूनामभि धाय सेनया। अथर्व० ८.८.७।
भञ्जन्नमित्राणां सेनां भोगेभिः पर्यावारय। ११.१.५।
सहस्र कुणपा शेतामामित्री सेना समरे वधानाम्॥ ११.१०.२५।

३. प्रव्लीनो मृदितः शयां हतोऽमित्रो न्यर्बुदे।
अग्निजिह्वा धूमशिखा जयन्तीर्यन्तु सेनया॥ अथर्व० ११.९.१९।

४. अन्यानि वर्णनानि भीषणयुद्धस्थलस्य भीष्म० ८५.३३,३४; ९२.६१-७५; १०.१३-१८ द्रष्टव्यानि।

५. सौप्तिकप० ९.३-५, १६, १७,५६ स्त्रीप० १७.१३–१५

६. कर्णपर्व ३४, ३५ अध्यायौ

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यद्यपि प्रशंसनीयमासीत्कस्यचिद् वीरस्य युद्धे शत्रुपक्षस्य कन्यानां हरणं[1] तथापि किन्नेदं मानवतायाः परमो ह्रासो यन्निर्दोषाः कन्याः स्वपितृभ्यो बलाद्धृताः। न केवलं भारतेऽपितु विश्वप्राङ्गणे प्रायः सर्वत्र योधानामियं धिक्करणीया वृत्तिस्तत्रत्यमनीषिभिर्न निन्दितेति लाञ्छनमेव कविसम्प्रदाये

असत्यापि शत्रुपक्षस्य हानिः स्वपक्षस्य प्रगमनं च विजयधोष इव श्रावितमासीत्। स्वयं राजापि वीरानुद्बोधयन्नर्थशास्त्रे दृश्यते।[2] देवानां साह्यलब्धये वीरास्तेषामाह्वानं कुर्वन्ति स्म। मन्त्रिपुरोहिताः सूतमागधाश्च शूराणां स्वर्गं भीरूणामस्वर्गं वर्णयन्ति स्म।[3]

दुर्गेऽवस्थितस्य शत्रोः बहिरागमनाय पराजयाय च तस्य भोजनपानादीनां शस्त्रास्त्राणां पूतौ च प्रतिबन्धनमकारि। तस्य प्रदेशेऽन्नादिक्षेत्राणि प्रदग्धानि। अनेन विधिना प्रकृतिक्षयोऽभवत्। अर्थ० १३.४.६-७। शत्रुबल आपद्ग्रस्ते अन्यत्र व्यापृते सति तस्य मर्दनं सुकरमिति कौटिल्य-निर्देशः।[4]

कौटिल्यो युद्धविधिं वर्णयति तेषामुत्तिष्ठमानं संधिना मन्त्रयुद्धेन कूटयुद्धेन वा प्रतिव्यूहेत्। शत्रुपक्षमस्य सामदानाभ्याम्। स्वपक्षं भेददण्डाभ्याम्। दुर्गं राष्ट्रं स्कन्धावारं वास्य गूढाः शस्त्ररसाग्निभिः साधयेयुः। सर्वतः पार्ष्णिमस्य ग्राहयेत्। अटवीभिर्वा राज्यं घातयेत्। तत्कुलीनावरुद्धाभ्यां वा हारयेत्। अर्थ० १२.१.१८–२४

युद्ध-महोत्सवः

प्राचीनभारते युद्धं तु महोत्सवो वीरजयन्तिकेति समाम्नातम्। यथा शलभः सानन्दमात्मानमग्निचये निपात्य विपुलं सुखं लभमान इव प्रतिभाति, तथैव वीराः संग्रामे सन्निपतन्ति स्म। विदुला राज्ञी स्वपुत्रमुत्तेजयत्यधोविधम्—

स्वर्गद्वारोपमं राज्यमथवामृतोपमम्।
युद्धमेकायनं मत्वा पतोल्मुक इवारिषु॥ उद्योगे १३२.२९

वीररसाप्लावितहृदयः कविर्वीरदृष्ट्या वीरगतिकानां पराक्रमभूमिमधोविधं परामृशति—

संछन्ना वसुधा भाति वसन्ते कुसुमैरिव। भीष्म० ८५.३५

---

१. आरण्यकपर्वणि ९७.२६ २. अर्थशास्त्रे १०.३.२८-३६

३. अर्थशास्त्रे १०.३.४९

४. स्वयमग्नौ जाते समुत्थापितेवा प्रहवणे प्रेक्षानीकदर्शनसङ्ग सौरिककलहेषु।

५. अव स्वराति गर्गरो गोधा परि निष्वणत्।
पिङ्गा परि चनिष्कददिन्द्राय ब्रह्मोद्यतम्॥ ऋग्वेदे ८.६९.९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सेनापतिं प्रोत्साहयितुं नृत्य-गीतवाद्यानि, स्वस्तिवाचनानि, जयध्वनिश्चा-योजितानि।[1]

युद्धे कूटनीतिः

इन्द्रस्य युद्धप्रसङ्ग ऋग्वेदे प्रोक्तम्—स मायिनो मायाभिर्हन्तीति।[2] अर्थशास्त्रे त्रिविधं युद्धं निर्दिष्टम्—प्रकाशयुद्धम्, कूटयुद्धम्, तुष्णीं युद्धं च।[3]

कूटनीतिप्रकरणे मानवताया उत्कृष्टगुणाः सर्वशो विस्मृता आसन्। नानायुक्तिभिः शत्रोर्दुर्गस्य भस्मसात्करणं प्रचोदितं कौटिल्येन, यद्यपि स सभ्यग्जानाति यदग्निः 'अप्रतिसंख्यातप्राणिधान्यपशुहिरण्यकुप्यद्रव्य क्षयकरः।' अर्थ० १३.४.२५। शत्रुर्विपत्तिग्रस्त आक्रमणीयः। १३.४.२९ इति भृशमेव निर्घृणम्।

युद्धे क्षिप्रकारिता प्रशस्यासीत्। गोतम इन्द्रं शिक्षयति—

प्रेह्यभीहि धृष्णुहि।[4] ऋ० १.८०.३

अर्थात् शत्रुं प्रति सत्वरं प्रयात्याभिक्रम्य च धर्षणं कर्तव्यम्।

राजधर्मप्रणेतारः

वेदादिग्रन्थेषु या राजनीतिः प्रकीर्णं प्रस्फुटिता तस्याः प्रणेतारः पूर्वे ऋषिराजा बभूवुः। तद्यथा—बृहस्पतिः, विशालाक्षः, काव्यः, सहस्राक्षः, मनुः, भरद्वाजः, गौरशिराश्च। एते सर्वे ब्रह्मण्या ब्रह्मवादिनः सन्ति।[5]

राजनीति-वैशिष्ट्यम्

भारतीयं राजसिंहासनं तु सिद्धान्ततो भोग-विलास-साधनं नाभवत्, अपितु देवनियोगेन लब्धं तत् प्रजापालनव्रतैकनिष्ठं श्रमस्थानं बभूव।

स्वप्राणोत्सर्गेणापि प्रजा रक्षितुमहर्निशं सन्नद्धो राजा स्वयमेव युद्धभूमौ अग्रणीर्बभूव। धर्मेण प्रजाः शासिताः स्युरित्यर्थं न केवलं गुप्तचरैः सह प्रजास्थितिं ज्ञातुं स प्रायततापितु स्वयमपि परिभ्रम्य प्रजावृत्तं विज्ञाय यथोचितं यथाशीघ्रं व्यदधात्।

---

१. द्रोण० ५.३९,४०

२. मायाभिरिन्द्र मायिनं त्वं शुष्णुभवातिरः १.११.७

३. अर्थ० ७.६.२१; १३.४.३०।

४. प्रकाशयुद्धं निर्दिष्टो देशे काले च विक्रमः।
विभीषणमवस्कन्दः प्रमादव्यसनार्दनम्॥
एकत्रत्यागघातौ च कूटयुद्धस्य मातृका।
योगगूढोपजापार्थं तूष्णीं युद्धस्य लक्षणम्॥ अर्थ० ७.६.४६, ४७।

५. शान्ति० ५८.१-३।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

राजा न्याय-विभागस्योच्चतमाधिकारी बभूव । अन्ये न्यायाधिकारिणोऽमात्यादयः कथं व्यवहरन्तीति ज्ञातुं तेषां कृताकृतं स यथाकालं पर्यैक्षत ।

प्रज्ञानपरायणानां वृद्धानां मनीषिणां च भूयसा योगेन स स्वीयां प्रजापालन-प्रवृत्तिं शत्रूणामपाकरणविधिं च निरचिनोत् ।

यस्य कस्यचिद् वर्णस्याश्रमस्य च पुरुषस्य कृते कीदृशी प्रवृत्तिः स्वस्वजीवनोद्देश्यं सम्यक् प्रापयितुं समर्थास्तीति धर्मशास्त्रेषु निदर्शितं वर्तते । तदेव लब्धुं क्वचिद्राज्ञः विधिविधानमन्यत्र वैषम्य-निवारणाय अर्थयोगः शस्त्रप्रयोगो वापेक्षित आसीत् । तत्सर्वं राज्ञो निरलसं कर्तव्यं बभूव । सर्वेषां धर्माणां सम्प्रदायानां चोन्नायका राज्ञा सम्मानिताः, प्रोत्साहिताः, योगक्षेम-पुरस्कृताश्चासन् ।

न केवलं ज्ञानविज्ञानयोरपितु सर्वेषां शिल्पानां काव्यकलादीनामुन्नतिः कस्यचिद्राष्ट्रस्य वास्तविकमभ्युदयं प्रकटयतीति शाश्वतसत्यं सन्धार्य राजात्मनः सत्त्वोद्योगेन सर्वविधविद्यावैशारद्यं सार्वजनीनं कृतवान् ।

आदर्शराज्यं तु राज्ञस्तपसा विना न संभवेदिति सत्यं न केवलं शास्त्रेषु प्रोक्तमपितु महाभारतादिषु प्रत्यक्षदर्शितमेव । चक्रवर्तिनोऽपि शासिता भवेयुः अशोकस्य स्तम्भेषु सिंहस्योपरि धर्मचक्रं यत् प्रतिष्ठितं तदेव द्योतयति ।

राजात्मानमेव स्वराष्ट्रे आदर्शयतिस्म—यथा राजा तथा प्रजेति ।[1] प्रियलोक एव राजा लोकप्रियो भवितुमर्हति । अन्यच्च स्वर्गाधिकारो राज्ञा प्रजानां पालनं सत्त्वेन कुर्वतैव प्राप्यः, अन्यथा तस्य नरकेऽवश्यंभावी पातः ।

---

१. यादृशो जायते राजा तादृशोऽस्य जनो भवेत् । स्त्रीप० ८.३२
भरतेन समर्थितम्—यान् यान् प्रकुरुते राजा तांस्तान् लोकोऽनुवर्तते ।
ना० शा० २२.२०३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

धार्मिकप्रवृत्तयः

यतोऽभ्युदय-निःश्रेयससिद्धिः स धर्मः[1] ।
स्वधर्मः स्वर्गायानन्त्याय च[2] ।

भारते प्रतिष्ठाकामो मानवो न केवलमात्मनोऽपितु परेषामपि दुःख-दारिद्र्य-निवारणाय, सुख-सम्पत्ति-संवर्धनाय, वैषम्य-निराकरणाय सौकर्य-योगाय, मालिन्य-मार्जनाय, वैशद्य-संचयाय, पापशोधनाय, पुण्यार्जनाय च नानाविधोपायानुपक्रमांश्च समीहमान आस्ते । अस्मिन्नुत्कर्ष-प्रसङ्गे स एकाकी एव पूर्णसाफल्यमलभमानः सहायानपेक्षते । तत्र सहायेषु सकलचराचराः समग्रवस्तुजातमाध्यात्मिकाः सत्त्वाश्चापि समाहृता भवन्ति । वस्तुतः परमाणुतः प्रभृति निखिलसृष्टिः सकामस्य मानवस्य कामनाः पूरयितुमात्मकीया कर्तुं शक्यते । पूर्वोक्ताः सर्वाः प्रवृत्तयो धर्माभिप्रायेण सूक्ष्मातिसूक्ष्मं स्थूलातिस्थूलं च विलसन्ति । एतस्य विषयस्य प्रपञ्चः धर्म-प्रकरणम् ।[1]

---

१. नाना दिशा धर्मानुसन्धानं लक्षितम् । तथा हि (१) श्रौतधर्मः, स्मार्त धर्मश्च । श्रौतधर्मे वैदिकसाहित्ये निर्दिष्टा यज्ञादिधार्मिकविधयः । स्मार्ते पुनः स्मृतिषु वर्णिता वर्णाश्रमोचितकर्तव्याकर्तव्यादीनि च प्रामुख्येणावधार्यन्ते । (२) वर्णधर्मः आश्रमधर्मः, वर्णाश्रमधर्मः, गुणधर्मः, नैमित्तिकधर्मः, साधारणधर्मः । एतेषु साधारणधर्मो मानवमात्रकृते समीहितः विश्वकल्याणाय सर्वेषु देशेषु कालेषु च ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सर्वेषां भूषणं धर्मः । चाणक्यसूत्रम्

यथाधुना तथैव पुरापि नैकजनसमुदायानां नैकोपास्या देवाः, यज्ञाः, स्तुतयः, तीर्थानि, व्रतानि, पूजाविधानानि, भक्ति-मार्गाश्चासन् । तत्सम्बन्धि-कर्मकाण्डविधि-विधानानि प्रत्येकशो वैविध्यविशेषितानि बभूवुः । पूर्वोक्तानि सर्वाणि सर्वेषां कृते समन्वयेन सामञ्जस्येन च परिनिष्ठितधिया प्रत्येकशोऽङ्ग-भावेन पूर्णतां प्रापितान्येव सुषमं शोभन्ते । भारतीयधर्मस्य समन्वयसंचारिणी नीतिर्देशे काले च सफला परस्परलोकोत्थानमयी प्रबभूवेति समीक्षात्मक-दृष्टया धर्मस्य शाखा-प्रशाखानां विश्लेषणेन प्रतिफलति । तद्यथा श्रीमद्भागवतं प्रस्तौति —

सर्व एव यजन्ति त्वां सर्वदेवमयेश्वरम् ।
येऽप्यन्यदेवताभक्ता यद्यप्यन्यधियः प्रभो ॥
यथाद्रिप्रभवा नद्यः पर्जन्यापूरिताः प्रभो ।
विशन्ति सर्वतः सिन्धुं तद्वत्त्वां गतयोऽन्ततः ॥ १०.४०.९--१० ।

सर्वेषु विश्वधर्मेषु प्रायो देवानां प्रीत्यर्थं नानाविधयज्ञस्य बलेर्वा प्रचलनं सुदूरप्राचीनकालतो वर्तत एव । वैदिकधर्मे तु यज्ञ ऋग्वेदादिषु दृढमूलो दरीदृश्यते ।

यज्ञस्थली पवित्रा भवेदिति धारणया जलेन परिपूता नदीतटादिप्रदेशा अभीप्सिता आसन् ।[1] प्रासङ्गिकरूपेणैते परं पावित्र्यमवापुः । एतादृशाः प्रदेशाः पुण्यकारणात् परवर्तियुगे तीर्थानीति संज्ञितानि । यज्ञार्थमुद्युञ्जानो यजमानो मनसा वाचा कर्मणा व्रतधारी बभूव । यज्ञानुबन्धेन संपृक्तान्येव तीर्थानि व्रतानि च शनैः शनैर्महत्त्वं भेजिरे । कालान्तरेण फलप्रदायसमृद्ध्या तानि तीर्थानि व्रतानि च महाभारतयुगे पौराणिकयुगे च यज्ञस्थानीयानीव सर्वाधिकपुण्यप्रदानि विभावितानि । प्रायो महासमृद्धिशालिनां राजादीनां यज्ञकर्म प्राचरत् । युगपदेव प्रायः सर्वसाधारणानां कृते तीर्थव्रतानां स्वी-करणीयता समवर्धत । तीर्थव्रतानि यज्ञाश्च सम्पादिता बहुफलप्रदाः, । एतानि त्रिविधपुण्यार्जनभावेन लोकप्रियतामवापुः । वैदिककालानन्तरं पूर्वोक्ता धर्मस्य त्रिवेणी—यज्ञः तीर्थं व्रतं च धार्मिकप्रवृत्तीनां संगमनेन समानरूपेण चकास्ति ।

दैविकधर्मः

किमपि कार्यं कारणं विना न सम्भवतीति साधारणतः प्रतिदिनं पश्यन् लोको यदि नाम तद्विपरीतं कारणं विनापि कार्यं पश्यति तदा विस्मितः

१. दृषद्वतीं-सरस्वत्योस्तटे यज्ञा वैदिकयुगेऽपि सम्पादिताः । Keith Religion and Philosophy of the Veda etc. p. 352

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सन्नदृष्टमेव तत्र हेतुर्भवेदिति प्रतिपद्यते । कारणं विनापि व्यष्टिशः समष्टिशश्च लोकः क्वचिद् द्वितयं-सम्पत्ति विपत्ति, जयं पराजयं स्वास्थ्यं क्लेशं लाभमलाभं, सुखं, दुःखं चाभीक्ष्णमीक्षमाण एतस्याकस्मात् प्रतिपत्तिः कस्मादप्यदृष्टाद् भवतीति मनुते । तददृष्टं स्वपक्षे परिग्रहीतुं यद्विधानं स वितनुते तदेव मूलतस्तस्य धर्मप्रवृत्तिः । अस्माकीनक्षय्यशक्तेर्भूयसी पूर्णतमा शक्तिः केषाञ्चिददृष्टसत्त्वानामस्त्येव यया चित्रविचित्रमस्माभिरनाकलित-नित्यनूतनशुभाशुभमिहलोकेऽपि तेऽस्मदर्थं सम्भावयन्ति । ते सत्त्वा देवा इति संज्ञिताः । तत्र देवकल्पना कालगणना-परिधेः प्रागेव प्रादुर्भूता, शनैः शनैरद्यावधिकं संवर्धमाना च लोकान् परितोषयति । भारते तेषां देवानां प्रथमपरिनिष्ठितस्वरूपं वैदिकसंहितासु वर्णितम् ।

अत एव देवानां सम्यग्ज्ञानं तेषामनुग्रहोपलब्धये यज्ञ-स्तुति-प्रणति-ध्यान-योगाश्च प्रथमपदे प्रकीर्तिता वेदसंहितादिषु ।

साधारणलोकानां कृते धर्मस्य प्रमुखं साधकत्रितयमस्ति—यज्ञः, तीर्थं तपश्च । यज्ञसम्पादनार्थमग्नेः, तीर्थसेवनायापां, तपश्चर्यायै व्रतस्य च भूयो महत्त्वमभिलक्षितम् । असाधारण - मनीषिणां कृते विश्वसृष्टेः सोद्देश्यं ब्रह्मपरकं रहस्यानुसन्धानं प्रथमानुयोगः यतो हि नाम तेन पुरुषस्य मुक्तिर्वा ब्रह्मसायुज्यं वा सम्भवति ।

लौकिकधर्मः

विश्वस्य प्रायः सर्वेषु भूभागेषु पुरायुगे मानव-सभ्यता विकसिता । तत्र जनानां परस्पर-व्यवहारेषु सौष्ठव-सम्पत्तये ऋत-सत्यादि व्रतानामादौ शनैः शनैः प्राथमिकी भूमिका यदृच्छयाभवत् । परस्पर-सहयोगेन विना समुदाये समाजे वा लोकानां नैसर्गिको जीवन-विधिः सुसाध्यः प्रशान्तश्च नाभविष्यत् । परस्पर सहयोगेन सार्वजनिक-कल्याणं पश्यन्तस्ते सहायशीला बभूवुः । अत एव तेषां सामाजिक - सौष्ठवानुगुणानि व्रतानि स्वभावतः प्रादुरभवन् । एतत्तु समाजोपयोगि - धर्मस्य नैसर्गिकं मौलिकं च स्वरूपं क्वचिच्चराचरणां पशूनामपि साधारणमिति प्रत्यक्षम् ।

अतः परं धर्मस्य सोद्देश्यं प्रत्यक्षं च चतस्रः प्रवृत्तयोऽधोविधं विकसन्ति—

(१) वर्चस्व-वर्धनमात्मशुद्धि[1]श्च मनसा, वाचा कर्मणा च साम्मनस्यं जीवन-यात्रां प्रशान्तां प्रकरोति ।

---

१. अथर्व ६. १९.१–३ । मनु स्मृतौ २.९८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(२) लोकोपकारः—चराचरात्मकं विश्वं निजसर्वस्वार्पणेन प्रसाधयति।[1]
(३) अलौकिकसिद्धीनामुपलब्धिः —देवादेवादीनां प्रत्यक्षफलदायिनः कर्म-काण्डविधयो यज्ञा मन्त्रतन्त्रादयः, तपः, ध्यानं, समाधिश्च साधनानि।
(४) आध्यात्मिकसाजना च।

वैदिको धर्मः

महामहिमशालिनस्ते वैदिकमनीषिणो यैः परात्परं प्रकर्षितो धर्म ऋग्वेदादिषु प्रकाशितः प्रत्यक्षमाचरितश्च। अथ च वैदिकधर्मोऽयमप्रतिरूपः, यस्यानुयायिनस्ते मनीषिणो धमार्थकामाभिनिवेशात् संस्कृतिशिखरोच्चपदे-प्रतिष्ठापिताः, पारमेष्ठ्यं प्रापिताश्च। प्रसङ्गेऽस्मिन् तेषामृषीणामृतविहितो जीवनादर्श इदं प्रथमतया निदर्शनीयः। वस्तुतस्तस्याग्रहेण शाश्वतं देवा मुनयो राजानः, आचार्याः सन्तश्चोन्नीयमाना भारतं भारतं विभावयन्ति विश्वगुरुत्वं च प्रसाधयन्ति। तेषामृषीणां धर्मप्रयोजकाः पारारोहणकाम्या, उपलब्धिः, ऐश्वर्याभिलाषः, चतुर्वर्गधीरित्यादय आत्मवृत्तानि च तेषां सूक्तिभिः साक्षाद् ग्रहणीयानि। एतैश्च तेषां धर्मपथोऽवगन्तव्यः।

धर्मार्थकाममोक्षेषु धर्म एव प्रथमस्थानीयो यतो हि नाम स साधारणतः सर्वेषां समग्रं जीवनं सम्यक् शास्ति। अन्ये तु केषांचिदेकमेव भागं गार्हस्थ्यं संन्यासं वा व्याप्नुवन्ति।

के त आसन् वैदिकधर्मस्य प्रवर्तका अनुयायिनः प्रतिष्ठापयितारो महात्मानः कीदृशां मनस्विनां मध्ये किमुद्देश्यमभिलक्ष्य वैदिको धर्मो भूयो भूय उन्नीत इति ज्ञानं साध्य-साधनाभिलक्ष्येण तदानीन्तनमनीषि-ऋषिवाणी-वितानोद्वर्तितं प्रस्तूयते।

वैदिकानामादर्शाः

गिरयस्ते पर्वता हिमवन्तोऽरण्यं ते पृथिवि स्योनमस्तु।
अथर्व० १२.१.११

ऋग्वेदे

(१) तरणिरिज्जयति क्षेति पुष्यति। न देवासः कवत्नवे। ७.३२.९
(केवलं क्षिप्रकारिणो विजयन्ते, प्रशान्तं वसन्ति, अभ्युदयं यान्ति च। कदर्या देवानुग्रहं न लभन्ते।)
(२) शिक्षाणो अस्मिन् पुरुहूत यामनि जीवा ज्योतिरशीमहि। ७.३२.२६
(भो इन्द्र, अस्माकं नेतृत्वं कुरु, अस्मिन् पथि वयं ज्योतिष्मन्तो भवेम।)

---

१. इन्द्रोऽपि जीवलोकस्य सुखावहः। महा० आदि ५५.१४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(३) कृधी न ऊर्ध्वाञ् चरथाय जीवसे । १.३६.१४
(अस्मानुच्चतरान् करोतु, येन कर्मक्षेत्रे जीवनयात्रायां चास्माकं प्रगमनं स्यात् ।)

(४) अहमिन्द्रो न परा जिग्ये ।
(यथेन्द्रस्तथैवाहं पराजितो न भवामि ।)

(५) यत्र ज्योतिरजस्रं यस्मिल्लोके स्वर्हितम् ।
तस्मिन् मां धेहि पवमानामृते लोके अक्षिते ।।
यत्रानन्दाश्च मोदाश्च मुदः प्रमुद आसते ।
कामस्य यत्राप्ताः कामास्तत्र माममृतं कृधि ।। ९.११३.७,११

(६) न ऋते श्रान्तस्य सख्याय देवाः । ४.३३.११
(देवा उद्योगिनमेव मित्रयन्ति)

(७) यादृश्मिन् धायि तमपस्यया विदत् । ५.४४.८
(ध्येयं तपसा श्रमेण च सुलभं भवति ।)

(८) सा मा सत्योक्तिः परिपातु विश्वतः । १०.३७.२

(९) दक्षिणावन्तोऽमृतं भजन्ते । १.१२५.६

(१०) अस्ति रत्नमनागसः । ८.६७.७

(११) मज्जन्त्यविचेतसः ।
(ज्ञानहीना नोदयन्ति)

(१२) केवलाघो भवति केवलादी । १०.११७.६
(योऽसंविभज्य भुनक्ति स महापापः)

(१३) सं गच्छध्वं सं वदध्वं सं वो मनांसि जानताम् । १०.१९१.२
(एकमुखा एकमानसा भवामः ।)

(१४) तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।
धियो यो नः प्रचोदयात् । ३.६२.१०

(१५) विश्वदानीं सुमनसः स्याम । ६.५२.५

(१६) वयं स्याम यशसो जनेषु । ४.५१.११
(वयं यशस्विनो भवेम)

(१७) सं पूषन् विदुषा नय । ६.५४.१
(ज्ञानिनां सङ्गतिरभिप्रेता)

(१८) सुवीर्यस्य पतयः स्याम । ४.५१.१०
(पराक्रमो भवत्वस्माकम्)

(१९) पुमान् पुमांसं परिपातु विश्वतः । ६.७५.१४
(मानवो मानवं सर्वतो रक्षतु ।)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(२०) अप्नस्वती मम धीरस्तु ।
वसुविदं भगमिन्द्रा भरा नः ।। १०.४२
(मम बुद्धिः कार्यपरा भवतु । समृद्धं मे भाग्यं स्यात् ।)
(२१) भद्रं भवति पुरः । ऋ० २.४१.११
(२२) भद्रं जीवन्तो जरणामशीमहि । १०.३७.६

यजुर्वेदे

(१) भूत्यै जागरणम् । अभूत्यै स्वपनम् । ३०.१७
(२) अश्मा भवतु नस्तनूः । २९.४९
(३) तन्मे मनः शिवसंकल्पमस्तु । ३४.१
(४) मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे । ३६.१८
(५) अदीनाः स्याम शरदः शतम् । ३६.२४
(६) मा गृधः कस्यस्विद् धनम् । ४०.१
(७) कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः । ४२.३
(८) मा सुचरिते भज । ४.२८
(९) भूर्भुवः स्वद्यौरिव भूम्ना । पृथिवीव वरिम्णा ।
(१०) ऊर्जं मयि धेहि । ४.१०
(११) विश्वानि देव सवितो दुरितानि परासुव । ३०.३
(१२) या तनूरियं सा मयि या मम तनूरेषा सा त्वयि । ५.६
(१३) अमृतत्वमशीय । ७.४७
(१४) मा भेर्मा संवृक्थाः । १.२३
(१५) पुनन्तु मा देवजनाः पुनन्तु मनसा धिया ।
पुनन्तु विश्वा भूतानि जातवेदः पुनीहि माम् ।। १९.३९
(१६) सा मा शान्तिरेधि । सर्वं शान्तिः । यजु० ३६.१७

अथर्ववेदे

(१) यथा सूर्यश्च चन्द्रश्च न विभीतो न रिष्यतः ।
एवा मे प्राण मा बिभेः । २.१५.३
(भयं नैव तु जानामि)
(२) माता भूमिः पुत्रोऽहं पृथिव्याः । १२.१.१२
(३) याँश्च पश्यामि याँश्च न तेषु मा सुमतिं कृधि । १७.१.७
(४) ब्रह्माहमन्तरं कृण्वे । ७.१००.१
(५) अप्नस्वती मम धीरस्तु ।
(६) अहं वृणे सुमतिं विश्ववाराम् ।। ७.१५.१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(७) अहं सुमेधा वर्चस्वी । १९.४०.२
(८) प्रियाः श्रुतस्य भूयास्म । ७.६१.१
(९) तेजो मयि धेहि । ७.८९.४
(१०) सं धाता सृजतु तेजसा । १४.१.३४
(११) यशसः स्याम । ६.३९.२
अहमस्मि यशस्तमः । ६.३९.३
यशस मेन्द्रो मघवान् कृणोतु ।
यशसा मा देवः सविता कृणोतु ।। ६.५८.१
वयं सर्वेषु यशसः स्याम । ६.५८.२
यशो गृहीत्वा पृथिवीमनु संचरेम । १९.५८.३
वर्चो गृहीत्वा पृथिवीमनुसंचरेम ।। १९.५८.३
(१२) सत्यं वक्ष्यामि नानृतम् । ४.९.७
(१३) अभयं नोऽस्तु । १९.१४.१
(१४) वाचा वदामि मधुमत् । १.३४.३
यद् वदामि मधुमद् तद् वदामि । १२.१.५८
(१५) भूयासं मधुसदृशः । १३.४.३
वयं मधुमन्तः स्याम । ७.६८.२
वाचो मधु पृथिवि धेहि मह्यम् । १२.१.१६
चारु वदेम ते । १२.१.५६
(१६) स्वस्ति मात्र उत पित्रे नो अस्तु स्वस्ति गोभ्यो जगते पुरुषेभ्यः ।
विश्वं सुभूतं सुविदत्रं नो अस्तु । ज्योगेव दृशेम सूर्यम् । १.३१.४
(मातापित्रोः, पशूनां, जगतो विश्वेषां पुरुषाणां च कल्याणं भवतु । ऐश्वर्यं ज्ञानं च तेषां विश्वतो संजायेत ।)
(१७) शं नो भवन्तु प्रदिशश्चतस्रः १९.१०.८
(१८) उच्च तिष्ठ महते सौभगाय[1] । २.६.२
(१९) मा गतानामादीधीथाः । ८.१.८
(२०) मा क्रुधः । ११.२.२०

---

१. अथर्ववेदे पराक्रमस्यान्यत्र समर्थनम्—उत्तिष्ठत संनह्यध्वम् । ११.९.२ वीरयध्वं प्रतरता सखायः । १२.२.२६ । उत्क्रामातः पुरुष भावपत्थाः । ८.१.४ । उत्तिष्ठ प्रेहि प्रद्रव । १०.३.८ । आरोहत दिवमुत्तमामृषयो मा विभीतन । १८.३.६४ । तपसा युजा विजहि शत्रून् । ४.३२.३ । प्रेता जयता नरः, उग्रा वः सन्तु बाह्वः । ३.१९.७ । हृदं सपत्नानां भिन्धि । १९.२८.३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(२१) श्रेष्ठा भूयास्थ । १८.४.८६

(२२) निर्द्विषन्तं दिवो निः पृथिव्या निरन्तरिक्षाद् भजामः । १६.७.६ (विद्वेषिणो विदूरीकरणीयाः)

(२३) अहं शत्रुहोऽसानि । १.२९.५

(२४) अहमुत्तरोऽसानि । अहं भूयासमुत्तमः । ३.५.५; ६.१५.२

(२५) योगं प्रपद्ये क्षेमं च । १९.८.२

(२६) अन्नस्य पुरुषस्य पशूनां भूमा श्रयन्ताम् । ५.२८.३

(२७) ओजः सहो, बलमायुः श्रोत्रं चक्षुर्मे दाः २.१७.१–६

(२८) पश्येम, जीवेम, बुध्येम, रोहेम, पूषेम, भूयेम शरदः शतम्, भूयसीः शरदः शतात् । १९.६७.१–८

(२९) वाचो मधु पृथिवि धेहि मह्यम् । १२.१.१६

(३०) सा नो भूमे प्ररोचय हिरण्यस्येव संदृशि । १२.१.१८

(३१) श्रियां मा धेहि भूत्याम् । १२.१.६३

देवानुग्रहः

ऋषीणां मानवानां च कृते परमुपकारपरायणा देवाः स्वभावतो निरन्तरं तेषां कृते सुख-सौरभं शुचितां च वितरन्ति[1], दुःखं दुःखकारणं मलिनतां च निवारयन्ति । तथापि नैतन्मात्रेण परितुष्टा ऋषयस्तेषामनुग्रहेण[2] समृद्धिं लब्धुं दैहिक-दैविकभौतिकतापान् दूरीकर्तुं च पुत्रभावेन भक्तिपथेन सख्यभावेन च गृणन्ति (ऋग्वेदे १.५९.२) । देवेभ्यः सर्वं प्राप्तुं शक्यत इति

---

१. (क) मित्रो दाधार पृथिवीमुतद्याम् । ऋ० ३.५९.१
(ख) रात्रिर्जगतो निवेशिनी । ऋ० १.३५.१
(ग) (सविता) निवेशयन्नमृतं मर्त्यं च ।
अप विश्वा दुरितानि बाधमानः ।। ऋ० १.३५.२
उपस्थे विश्वा भुवनानि तस्थुः । ऋ० १.३५.५
अमृता अधितस्थुः । ऋ० १.३५.६
(विष्णुः) दाधार भुवनानि विश्वा । ऋ० १.१५४.४

२. यथा ऋग्वेदे विश्वामित्रो वक्ति—
वयं मित्रस्य सुमतौ स्याम । ३.५९.३
अपि भद्रे सौमनसे स्याम । ३.५९.४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ऋषीणामनुभूतिः प्रतिभाति । सैषा वैदिकसूक्तेषु विशदं वर्णिता ।[1]

यथा पूर्वं दृष्टं, वैदिकधारणानुसारेण कार्यार्थं यद्यपि साधनानि बहूनि सन्त्येव, श्रमस्योद्योगस्य च सातिशयं महत्त्वं वर्तते च, तथापि देवानुग्रहेण महती सिद्धिरनायासं तत्रापि सम्भवति यत्रान्यानि साधनानि विफलतां यान्ति ।[2] वैदिकानां कृतेऽसंख्या नैकविधाः सन्ति देवाः । अखिलचराचरं देवरूपमेव । सर्वे देवाः समानधर्माणः समानमाना न सन्ति । अपरं चैकस्मिन् युगे कश्चिद् देवः श्रेष्ठ आसीत्; अपरस्मिन् युगे ततोऽश्रेष्ठतरोऽपरो देवः समाम्नातः पूजितश्च ।

देवानुग्रहं लब्धुं नैकविधोपायाः प्रयोजनापेक्षया स्वीकृता आसन् । तद्यथा वैदिककालत एव यज्ञो हविर्दानं, स्तुतिः तपः, नमः, उपसदनम्, उपासना, उपह्वानं, नामजपः, ज्ञानं, ध्यानं, योगः, भक्तिश्च सन्ति ।[3]

---

१. तथाहि ऋग्वेदे ४.५०.११

बृहस्पत इन्द्र वर्धतं नः सचा सा वां सुमतिर्भूत्वस्मे ।
अविष्टं धियो जिगृतं पुरन्धीर्जजस्तमर्यो वनुषामरातीः ।।

पूर्वोक्तमेतदृषीणामनुसन्धानम् । तद्यथा मैक्समूलरो प्रवदति—The whole of nature was alive to the poets of the Veda, the presence of the gods was felt everywhere and in that sentiment of the presence of the gods, there was a germ of religious morality.

Heritage of India p. 86.

२. तद्यथा ऋग्वेदे दर्शितम्—

देवा नो यथा सदमिद् वृधे असन् ।
नप्रायुवो रक्षितारो दिवे दिवे ।
देवानां भद्रा सुमतिर्ऋजूयतां देवानां रातिरभि नो निवर्तताम् ।
देवानां सख्यमुप सेदिमा वयं देवा न आयुः प्रतिरन्तु जीवसे । १.८९.१,२ ।

सन्दर्भेऽस्मिन् भगः, दक्षः, मित्रः, अदितिः, अर्यमा वरुणः, सोमः अश्विनौ, सरस्वती, वातः, पृथिवी, द्यौः, सोमः, अश्विनौ, पूषा, तार्क्ष्यः बृहस्पतिः, मरुतश्चानुग्रहार्थमाहूताः ।

मित्रमधिकृत्य प्रोक्तम्—न हन्यते न जीयते त्वोतः । ऋ० ३.५९.२ ।
तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौभनसे स्याम ।। ऋ० ३.५९.४

३. धर्मस्याङ्गान्येतानि अथर्ववेदे संग्रहेण निगदितानि । यथा अग्निहोत्रं च श्रद्धा च वषट्कारो व्रतं तपः ।
दक्षिणेष्टं पूर्तम्—११.७.९ । ऋग्वेदे यज्ञ-नमोहविर्भिरिति २.३५.१२ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

शंकराचार्यो वर्णयति—कांचिद्देवतां स्तुति-नमस्कार-याग-बल्युपहार-प्रणिधान-(सर्वकर्मार्पणम्)-ध्यानादिना उप आस्ते । बृहदारण्यकोपनिषदि १.४.१६ अधिकृत्य भाष्यम् ।

वैदिकयुगे देवानुग्रहसाधनेषु यज्ञः प्रथमं स्थानं भजते स्म, यतो हि नामान्यानि नैकसाधाति प्रायशो यज्ञे समाहितानि भवन्ति । परवर्तियुगे षोडशोपचारो देवानां पूजा, तीर्थोपासना, व्रतचर्या च सविशेषं महत्त्वं देवानुग्रहदिशि लेभिरे ।

अर्चा, पूजा वा यज्ञस्य परिवर्तियुगीनपर्याय[1] एव पौराणिकधर्मे परमतां गता सर्वजनग्राह्या यज्ञस्थानीया प्रबभूव । यज्ञः पूजा चोभौ अनादि-कालतः भक्तिप्रवणौ ।

याज्ञिकदेवाः

सर्वान् देवान् यज्ञे यज्यते । तत्र प्रश्न आसीत्—'कस्मै देवाय हविषा विधेम ।' अर्थात् प्रयोजनविशेषमुद्दिश्य यजनीयदेवस्य योग्यतां निर्धार्य तस्मै यज्ञो विहितः । तत्र यजनीयाः प्रमुखा देवाः सन्ति—इन्द्रः, सविता, मरुतः, विष्णुरग्निमित्रावरुणौ ।

न केवलं देवेभ्योऽपितु देवीभ्योऽपि यज्ञो विहितः । सरस्वती, भारती च प्रमुखा देव्यो यज्ञेन प्रीणिताः ।[2]

यज्ञस्वरूपम्

सोम आत्मा यज्ञस्य पूर्व्यः । ऋ० ९.२.१०
मा यज्ञादिन्द्र सोमिन्वः । अथर्व० १३.१.५९

अर्थात् सोमयज्ञो भूयिष्ठं लोकप्रिय आसीत् ।

ऋग्वेदे पुरातनतः प्रचलितस्य यज्ञस्य पर्याप्तं विकसितो विधिः । प्राप्यते । तद्यथा—

स्तीर्णे समिधाने अग्नौ सूक्तेन महा नमसा विवासे ।
अस्मिन्नो अद्य विदथे यजत्रा विश्वेदेवा हवींषि मादयध्वम् ॥
६.५२.१७

अर्थात् यज्ञार्थं कुशासने विस्तीर्णे अग्नौ प्रज्वलिते सति विश्वेदेवा

१. भागवते देवयजनं देवपूजा च समानार्थे । १०.४०.९

२. भारती पवमानस्य सरस्वतीडा मही । इमं नो यज्ञमागमन् तिस्रो देवी सुपेशसः ।
ऋ० ९.५.८

इडा सरस्वती मही तिस्रो देवीर्मयोभुवः बर्हि सीदन्त्वस्रिधः । ऋ० १.१३.९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भागग्राहिणः समाहूताः । ते देवा हविष्यान्नेन सानन्दा भवेयुरिति ।[1] हविर्दानायाग्निररणिद्वयस्य घर्षणेनोत्पादितः । ऋ० ३.२९.१–३ । दिग्विजयमनपेक्ष्यापि ऋषिभिरेव सम्पादितोऽश्वमेध इति विश्रुतो यज्ञ ऋग्वेदे सोल्लासं वर्णितः ।[2]

एको यजमानो यजेन्नाम किन्तु बहवो जनाः संघशो यज्ञं विदधति स्म । तद्यथा —

तं त्वां हविष्मतीर्विश उप ब्रुवत ऊतये । उरूजयसमिन्दुभिः ।
ऋ० ८५.२७ । अत्र विशो नैके जनाः ।[3]

नैकदेवानां कृते एकत्र यज्ञस्य रीतिर्बहु प्राचरत् । तद्यथाग्निमरुदिन्द्र वरुणादीनां कृते एकत्र हविः —

स्वाहाग्नये वरुणाय स्वाहेन्द्राय मरुद्भ्यः । स्वाहा देवेभ्यो हविः ।
ऋ० ५५.११ । विश्वेदेवानां सहार्चा, स्तुतिः, नमश्च प्रकल्पितमासीत् ।[4]

ये केचिदुपकारशीला प्रतीता त एव हविर्दानाय पात्रं समादृताः । तद्यथा —यत्र गावः पिबन्ति नः सिन्धुभ्यः कर्त्वं हविः । ऋ० १.२३.१८ ।

अत्रिणा नदीभ्यो यज्ञः प्रस्तावितो यतो हि नाम तत्र ऋषीणां गावो जलं पिबन्ति । यथा देवानां तथैव ।

पितॄणां कृते यज्ञाः प्रचरिताः सन्ति । यज्ञेऽनुष्ठिते पितरो यजमानाय धनादि ददति । ते यज्ञे ऊर्जं दधात ।[5] अन्यत्रापि समर्थितमेतद् —अथर्ववेदे

---

१. देवानां कृतेऽग्नौ हविर्यज्ञस्य रीतिः इटली-ग्रीसेरानादि-देशेषु पुरासीत् । अपरं च — The religion of the parent Indo European race they (gods) were worshipped with sacrifice, accompanied with potent formulae and prayer, the offerings being either laid out on grass for the gods to eat or wafted to them on the fire and smoke of the altar. J.N. Farquhar : The Religious Quest of India. p. 1

२. ऋ० १.१५२, १५३ सूक्तयोः

३. विशोऽध्वरे । ऋ० १.१२.१ सामूहिकयज्ञं सूचयति ।
अध्वर इति वर्षपर्यन्तं यज्ञः । विशस्तु वसतिर्देवानां वा मानवानां वा ऋषीणां वा । तेषां प्रत्येकं बाहुल्येन संज्ञितः ।

४. सहार्चायाः प्रमुखकारणमासीद्यद् विविधदेवानां पृथक् प्रयोजनं प्रकल्पितमस्ति । तद्यथाग्निरिन्द्रो वा वर्चो ददातु । विष्णुर्मेधां ददातु । विश्वेदेवा धनं ददातु, आपः पावनतां ददातु । सविता दीर्घायुः प्रददातु । पितरो द्रविणं वीरांश्च ददत्विति । अथर्ववेदे १८.३.१०–१४

५. ऋग्वेदे १० १५.७; यजु० १९.६३; अथर्व० १८.३.४३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१८.४.४०;१८.२.२९। देवैः सह पितरोऽग्निनाहूता भागग्राहिणो बभूवुः। ऋ० १०.१५.१०

ऋग्वेदानुसारेण बर्हिषदः पितरो रक्षकाः सन्तो यजमानेनाहूतास्तस्य दत्तं हव्यं जुषन्ते।[1] राक्षसानां कृतेऽपि कतिपययज्ञेषु आहुतिः प्रदत्ता, यथा स्विष्टिकृतयज्ञे।

विविधाख्याः शतविधा यज्ञा वैदिककालतोऽद्यावधि परम्परया सातत्यं भजन्ते। तेषु यज्ञेषु बहुव्ययसाध्या राजभिरेव सम्पादनयोग्या बहवः शनैः शनैः विरलापि मध्ययुगे प्राचीनयुगे च प्रचरिता बभूवुरित्यत्र नास्ति मनागपि सन्देहः, किन्तु स्वल्पव्ययश्रमसाध्याः प्रचुरसंख्यका यज्ञा अद्यावधि सुसंस्कृतपण्डितवर्गे प्रचरन्त्येवेति प्रत्यक्षमेव। यज्ञिया मानसिकवृत्तयो भारतीयधर्मश्च लोकान् तत्त्वतः प्रोत्साहयन्ति।

अथर्ववेदानुसारेण हविषा, द्रव्येण च यज्ञो भवतु नाम किन्तु वाचा, श्रोत्रेण, मनसा च हवनं व्यधीयत। १९.५८.५। तत्र सुमनसो देवा आयान्ति स्म। मनुर्जपयज्ञं विधि-(कर्मकाण्डीय) यज्ञाद् विशिष्टतरं मन्यते। २.८५-८७

यस्य देवस्य कृते यज्ञ उपानीयत तस्य महिमानं कृतित्वं च ऋषिः स्तुतिभिः (सूक्तैः) प्रागायत्। अत एव स्तुतयो यज्ञस्य प्राणा एव।

ऋग्वेदानुसारेण कतिपय ऋषयो देवेभ्यो मधुना घृतेन चायजन्त।

प्राणमपानेऽपाने प्राणं च जुहुयादिति यजुर्वेदे २१.४३ यज्ञस्य सात्त्विक-विधिं निदर्शयति।

महाभारतानुसारेण क्वचिद् ब्राह्मणयज्ञाद् भिन्न एवासीत् क्षत्रिय-यज्ञः। ब्राह्मणयज्ञो नमस्कारादिभिः साध्य आसीत्। क्षत्रयज्ञस्तु महासम्भारापेक्षी पुरोहितस्य लौल्यात् महाहविर्भिः, महादानैः, महादक्षिणाभिर्निष्पादनीयो

---

१. ऋग्वेदे १०.१५.४। यजु० १९.५५; अथर्व० १८.१.४५।

महामहोपाध्यायः काणे ऐतिहासिकयुगे कतिपयै राजभिः सम्पादितान् यज्ञान् सूचयति—

(क) सेनापतिः पुष्यमित्रः द्वितीयशताब्दे ई०पू० राजसूयं,
(ख) महाराजखारवेलः प्रथमशताब्दे ई० पू० राजसूयं,
(ग) समुद्रगुप्तः चतुर्थशताब्दे ई० अश्वमेधं
(घ) धरसेनः पञ्चमशताब्दे ,,
(ङ) पल्लवराजः सप्तमशताब्दे ,,
(च) प्रवरसेन प्रथमः तृतीयशताब्दे ,, च

द्रष्टव्यम्—History of Dharmaśastra Vol. II, Part II, Page 978

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

बभूवेति पुराविदां मतं भारतीयधर्मस्य शाश्वतप्राञ्जलधारां प्रकाशयति।[1] क्षत्रयज्ञे लुब्धा ऋत्विजः परिभाषिताः सन्ति—

वनस्पतीनोषधींश्च फलमूलं च ते विदुः ।
न चैतानृत्विजो लुब्धा याजयन्ति धनार्थिनः । शान्ति० २५५.२५

कतिपयदेवानां कृते कतिपययज्ञेषु हविष्यरूपेण विशंसितपशोर्मांसं प्रत्तमासीत् । तथापि बहवो महर्षयो न केवलं पशुवधमपितु किमपि हविष्यं विनैव स्तुतिभिरेव यजन्ते स्मेति वैदिकमतम् ।[2]

यज्ञस्य फलमुद्देश्यं च

यज्ञश्च भूत्यै सर्वस्य । मनु० ४.३९ ।
देवान् भावयतानेन ते देवा भावयन्तु वः । गीता० ३.११

व्यावहारिकदृष्ट्या प्रत्यक्ष आसीन्महांल्लाभो यज्ञस्य यत्तत्र ब्रह्मोद्यं समायोजितमासीत् । ब्रह्मोद्ये महामनीषिणां समूहे धार्मिक-दार्शनिक-रहस्य-प्रश्नानधिकृत्य सौमनस्यपूर्वकं भाषणं प्राचरत् । यजुर्वेद २२.२ । कीथ महाभागो निष्कृषति—It is a feature of the Vedic sacrifice that at certain points are found Brahmodyas, discussions about the Brahman, the holy power in the Universe. The Religion and Philosophy of the Veda etc. page 435.

यज्ञस्य लोके परलोके च बहुविधफलानि कल्पितानि सन्ति । तथाहि—वैश्वदेवेन वरुणप्रघासैः साकमेधैश्च क्रमशोऽग्नेः वरुणस्येन्द्रस्य च सायुज्यं, सलोकतां च जयति, अग्निः वरुणः, इन्द्रश्च भवति । चातुर्मास्ययाजी परमां गतिं गच्छति ।[3] अपरं च आयुष्कामेष्ट्या दीर्घायुः, स्वस्त्ययन्या यात्रासुखं, महावैराज्या बृहद्राज्यं, मित्राविन्द्या बहुमित्राणि, संज्ञान्या शत्रूणामपि मैत्री वारीष्ट्या जलवृष्टिश्च सम्भाव्यन्ते । गवामयनेन सन्ततिः, स्मृद्धिः भूमा, सहिमा च प्राप्यन्ते । शत० १६.५.१४ ।

१. शान्ति० २५५.१–८

२. सामवेदे १.२.९.२ । महाभारते विशदीकृतं यज्ञस्येदं स्वरूपम्—
आरम्भयज्ञा क्षत्राश्च हविर्यज्ञा विशः स्मृताः ।
परिचारयज्ञाः शूद्राश्च तपोयज्ञा द्विजातयः ।। शान्ति० २२४.६१
गीतायां यज्ञवैविध्यं विशदीकृतम् । तथाहि—
'द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे' इत्यादि ४.२८–३० ।
अत्र यज्ञस्य विश्वात्मकस्वरूप दर्शितम् ।

३. शतपथ २.६.४.८,९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यज्ञस्य प्रायोऽभीष्टं फलमासीद् युद्धे शत्रोः पराभवः। देवा अपि असुर-विजयार्थमयजन्त।

समिधा यस्त आहुतिं निशितिं मर्त्योनशत।
वयावन्तं स पुष्यति क्षयमग्ने शतायुषम्॥ ऋ० ६.२.५

अर्थादग्नौ समिधमाहुतिं चादधानो बहुशाखं कुटम्बं पोषयति शतं च जीवति। अन्यत्र समर्थितसेतन्मित्रस्यावदानेनाधोविधम्

प्र स मित्र मर्तो अस्तु प्रयस्वान् यस्त आदित्य शिक्षति व्रतेन।
न हन्यते न जीयते त्वोतो नैनमंहो अश्नोत्यन्तितो न दूरात्॥ ऋ० ३.५९.१

अग्नौ मित्राय हविरा जुहोत। ऋ० ३.५९.५

मित्रो देवेष्वायुषु जनाय वृक्तबर्हिषे। इष इष्टव्रता अकः॥ ऋ० ३.५९.९

देवानां सामर्थ्यस्य वर्धनाय न केवलमृषयो राजनश्चापितु देवा अप्ययजन्त। तथा हि—इन्द्रस्य पराक्रममुत्तेजयितुं विष्णुरयजत। ऋ० ८.६६.१०

ऋग्वेदे सृष्टेरुपक्रमो देवानां यज्ञादाविर्भवति। तद्यथा—
यत्पुरुषेण हविषा देवा यज्ञमतन्वन्त। १०.९१.४। तेन देवा अयजन्त साध्या ऋषयश्च ये। १०.९१.७। वरुणस्य, वसूनां च यज्ञो यजुर्वेदे २१.२२,२३। वर्णितः। ऋग्वेदे दशग्वानां (मरुतां) देवा यज्ञसंस्थाया प्रथमोद्वाहका इति वर्णितम्। २.३४.१२। अश्विद्वयं सविता सरस्वती, वरुणश्चेन्द्रं यजन्ते। यजु० १९.८०। ऋग्वेदानुसारेण यज्ञस्य सम्भाव्यलाभोऽस्ति यद् यजमानः सुखसागरे निष्णातुमवसरं लभते।[1]

यज्ञः परमपुरुषार्थसाधनम्[2]। यत्कामा जुहुमस्तन्नोऽस्तु—छा० उ० ८.५१ अधिकृत्य शाङ्करभाष्यम्।

देवानां परितोषाय तेभ्यो महत्तमलाभाय च श्रेष्ठं विधानं यज्ञ एवासीत्। तद्यथा वसिष्ठो मैत्रावरुणौ प्रार्थयत ऋग्वेदे—

इयं देव पुरोहितिर्युवभ्यां यज्ञेषु मित्रावरुणावकारि।
विश्वानि दुर्गा पिपृतं तिरो नो यूयं पात स्वस्तिभिः सदा नः॥
७.६१.७

अर्थाद् यज्ञेषु कृतं पौरोहित्यं मित्रावरुणादिभिर्देवैर्यजमानस्य वैषम्यापहरणाय प्रभवति। तत्र प्रार्थिता देवा यजमानस्य स्वस्ति वितन्वन्ति।

---

१. उप क्षरन्ति सिन्धवो मयोभुव ईजानं यक्षमाणं च धेनवः। ऋ० १.१२५.४।

२. The maximum utilisation of one's all possible resources for universal good is यज्ञ (Sacrifice)। इयं परिभाषा प्रायः सर्वत्र सम्यक् प्रसज्यते।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यज्ञ-सम्पादनाय प्रथमं देवा अग्निना दूतेनानीयन्ते। नमःपूर्वं यजमानस्तस्य पुरोहिताश्च देवान् स्तुवन्ति। प्राय ऋषयः स्वयमेव यजमाना आसन्। ते स्तुतिभिर्देवानामावाहनं कुर्वन्ति स्म। सख्यभावप्रपन्ना समाहूता देवा ऋषिभिः सादरं कुशासनेषु प्रतिष्ठापिता अग्नौ हव्यप्रदानेन भोजिता इति रीतिरासीत्। अत्रातिथिवद् देवानां सुस्वागत - स्तुत्यासन - भोज्यादिभिरतिथि-सत्क्रिया यज्ञ इति संज्ञिता।

अपरं च —यज्ञस्योद्देश्यं देवस्य यजमानस्य, पुरोहितस्य लोकस्य कृते च पृथक् पृथगेव विभाति। प्रतियज्ञं प्रायो देवानां कृते (भूयोभूयः) हविः सोमश्च प्रीतिकर एव। यत्किञ्चिद्देवानां भोगाय संकल्पितं भवति तदेव भूरिशोऽवशिष्टं प्रसाद इति कृत्वा यजमानेन, पुरोहितैश्च गृह्यते। यत्किंचिद् याज्यदेवेभ्यः समर्प्यते, तत्सर्वं देवरूपेण पुरोहितेनात्मसात्क्रियते। पुरोहितेभ्यो दत्ता दक्षिणा यावदधिकं तावद्भृशतरं फलं यजमानायावहतीति धारणा बभूव। सर्वस्वमेव क्वचिद् दक्षिणारूपेण प्रत्तं श्रूयते। ऋग्वेदे नैकदानस्तुतिषु दक्षिणा-प्रकरणं विशदीकृतम्। तद्यथा भावयत्यस्य यज्ञदाक्षिण्यं तस्य पुरोहितेन काक्षीवता वर्णितम्—स राजा तस्मै पुरोहिताय सहस्रं सवान् इयाज। तत्र शतं निष्कान्, शतं प्रयतानश्वान्, शतं गा वधूमन्तो दशरथाः षष्टि सहस्रं गव्यं, सहस्रस्याग्रे दशरथस्य चत्वारिंशद् शोणा अश्वा प्रादीयन्त। ऋग्वेदे १.१२६.१–४

न केवलं यजमानस्यापितु सर्वलोकानामपि विश्वतोऽभावाः — दैहिक-दैविक-भौतिकतापा यज्ञैर्दूरीकर्तुं विश्वविजयं लब्धुं पारमेष्ठ्यं प्रपत्तुं च एक एव प्रशस्तमार्गः पुरावधारितो यज्ञ एव।

महद्यशो यज्ञैर्जितं भवति यजमानस्येति दानस्तुतिभिः प्रमाणितमेव। दिवि श्रवोजरमा ततान। ऋ० १.१२६.२। यश एव प्रधानं लक्ष्यम्।

ऋग्वेदानुसारेण कस्यचिद्देवस्य क्रोधो यज्ञेन दूरीकर्तुं शक्यते। वरुणाय निवेदयति वसिष्ठः - हे वरुण तव हेडं (क्रोधं) नमोभिः, यज्ञेभिर्हविर्भिर्दूरीकुर्मः।[1]

अथर्ववेदे सारसंग्रहेण यज्ञस्योपलब्धीनामाशा वर्णिताः। तद्यथा—

मनसे चेतसे धिय आकूतय उत चित्तये।
मत्यै श्रुताय चक्षसे विधेम हविषा वयम्॥ ६.४११

यजुर्वेदे याज्ञिकोपलब्धीनां बृहत्तरसूची वर्तते। तथाहि - धीतिः (बुद्धिः) ज्योतिः, (प्रकाशः), ऐन्द्रियकशक्तयः, ओजः, शर्म, वर्म, आयुः, ज्येष्ठता,

---

१. अव ते हेडो वरुण नमोभिरव यज्ञेभिरीमहे हविर्भिः। १.२४.१४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

महिमा, सत्यं, श्रद्धा, मोदः, सूक्तं, सुकृतं, ऋतममृतमनामयमभयं, सुखं, सुदिनं, संवित्, शं, प्रियं, सौमनसः, द्रविणं, भद्रं, श्रेयः कृषिः, वृष्टिः, वित्तम्, सुमतिः, विजयः, अन्नानि, घृतं, मधु, क्षुत्, वनस्पतयः, हिरण्यं, वसु, वसतिः गतिः, कर्म, शक्तिः, व्रतं, तपः, गौरित्यादीनि यज्ञेन यजमानस्य भवन्तु। १८.१–२७;७.१७.४

यज्ञस्यैको लाभ आत्मशुद्धिरेव। तदधिकृत्य काणे महाभागः प्रवदति— When initiated for a sacrifice the sacrificer and his wife had to observe a fast or live on a low diet both were called upon to observe many strict rules such as speaking the truth. They had to nake large preparations and spend wealth on the materials and the fee to the priests. These things are deemed to cleanse the mind and soul of the taint of sin. Hist. of Dharma. Vol IV p. 38.

सारसंग्रहेण मौलिकमादिकालिकं च यज्ञोद्देश्यं काणे महाभागो निदर्शयति—The old idea of sacrifice seems to have been that it was propitiatory in character. Sacrifice was not demanded or regarded as a present which pleased God, induced him to forgive a man for his transgressions and enabled erring man to regain God's favour which had been lost by some shortcoming or some sinful act. Sacrifices, therefore, had an expiatory or cleansing funetion or character. Hist. of Dharma. Vol IV p. 44.

शनैः शनैर्यज्ञफलानां बृहत्तमसङ्कल्पो दृश्यत एवेति पूर्वमेवोक्तम्।

यज्ञस्यैकः प्रासङ्गिकलाभोऽस्ति सर्वसाधारणस्यापि मनोरञ्जनम्। तथाहि—वाजपेययागे मध्याह्ने 'आजिधावनम्' समारब्धम्[1]। अश्वमेधयज्ञे पारिप्लवसंज्ञकं आख्यान-गायनं प्रतिदिनं वीणावादनादि - सङ्गीतोपक्रमैः संपृक्तमासीत्। तत्र श्रोतारः साधारणजनता बभूवुः।[2] राजसूययज्ञे गविष्टेरभिनय आयोजितः।[3] महाव्रतविधान आर्यसम्राट् शूद्रसेनां प्रत्याक्रामत। सामविधानब्राह्मणानुसारेण शत्रोस्तस्य सेनायाश्च, मूर्तीः कृत्वा तासामङ्ग-प्रत्यङ्ग-कर्तनस्याभिनय-दृश्यं समुपस्थापितम्।[4] आवसथ्याग्नेः प्रतिष्ठायां पूर्णाहुतेरनन्तरं द्यूतक्रीडा प्रावर्तत।[5]

१. शतपथब्राह्मणे ५.१.४ २. शतपथब्राह्मणे १३.४.३

३. तत्र यजमानो राजा स्वसम्बन्धिनं राजानं प्रत्याक्रामत्।

४. सामविधाने २.५.४; ३.७.६

५. Hist. Dharma Vol II p. 997। पूर्णया स्रुचाहुतिः पूर्णाहुतिः।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मन्वनुसारेण ब्राह्मणस्य जन्मत्रयं भवेत्—मातुः कुक्षितः, उपनयनेन, यज्ञदीक्षया च। अर्थाद्यज्ञेन ब्राह्मणत्वं विजायते।[1]

प्रासङ्गिकलाभदृष्ट्या सत्रान्ते महाव्रतस्यानुत्तमं स्थानमवर्तत। सार-संग्रहेण काणे निष्कृषति—

These features of the Mahāvrata show that it was some folk festival in the hoary past and was welded on to the solemn Vedic sacrifices as a relaxation after the weary days and months of sacrifices. H. D. Vol II p. 1245.

पौराणिकयुगे यज्ञस्य लाभा आशंसिताः सन्ति। तेष्वेकमस्ति देवानां वर्तनम्। वायुपुराणानुसारेण यज्ञनाशाद् देवानां नाशो, देवनाशात् सर्वेषां विनाशः। षष्टितमाध्याये। एषोक्तिर्ब्रह्ममुखेन लोकहितार्थं कृता।

ब्रह्मोपासका उपनिषत्परायणा यज्ञस्य वैकल्यं न्यूनतां च प्रपश्यन्ति। तद्यथा मुण्डकोपनिषदि—

प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म।
एतच्छ्रेयोऽभिनन्दन्ति मूढा जरा मृत्युं ते पुनरेवापि यान्ति॥ १.२.७
इष्टापूर्तं मन्यमाना वरिष्ठं नान्यच्छ्रेयो वेदयन्ते प्रमूढाः।
नाकस्य पृष्ठे तेऽनुभूत्वेमं लोकं हीनतरं वा विशन्ति॥ १.२.१०

परवर्तियुगे मनुर्यज्ञस्य वैदिकस्वरूपमक्षुण्णं प्रतिपादयति। ३.११७,११८। तथापि भक्तिमार्गे यज्ञानां महत्त्वं न्यूनतां प्रपेदे।

यज्ञ-विश्लेषणम्

विहितकर्मकाण्डदृष्ट्या यज्ञास्त्रिविधाः सन्ति—इष्टिः, पशुबन्धः सोमश्च। इष्टिषु अग्निहोत्रं प्रायभवेन प्रथमस्थानीयम्।

अग्निहोत्रम्

अग्निहोत्रमकुर्वन् ब्राह्मणो ब्रह्महत्यापापफलं लभते। मनु० ११.४२

गृहस्थः स्वगृहेऽग्नयाधेयविधिना गार्हपत्याग्निं प्रतिष्ठापयति। तस्मादग्नेः प्रतिदिनमाहवनीये सपत्नीकः स प्रातःसायमग्निहोत्राग्नये होमं करोति।

---

१. मातुरग्रेऽधिजननं द्वितीयं मौञ्जिबन्धने।
तृतीयं यज्ञदीक्षायां द्विजस्य श्रुतिचोदनात्॥ मनु० २.१६९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

इदं कर्म 'अग्निहोत्रम्' ।[1] अग्निहोत्रयज्ञस्य कृते कस्यचित् पुरुषस्य पूर्णो जीवनावधिरेव सत्रम् । अग्निमानयन् स मन्त्रं जपति—देवं त्वा देवेभ्यः श्रियोद्धरामीति, दिवारात्रं यत्कृतं पापं तस्माद्विमुक्तये प्रार्थयते च ।

आहवनीयनिकट आसन उपविश्य गृहस्थ आचमनं करोति—विद्युदसि । विद्या मे पाप्मानमृतात् सत्यमुपैमि मयि श्रद्धा । पत्नी च आचमनं करोति । पर्युक्षणानन्तरं होमो प्रारभ्यते उष्णीकृतगोदुग्धेन ।[3] तदर्थं ब्राह्मणो गोदोग्धा भवेत् । दोहनं तु सूर्यास्तमनकाले प्रारभेत । पूर्णस्रव-दुग्धेन यजमानस्य पुत्रः पूर्णप्रतिभां लभतेऽल्पतरेण चाल्पां प्रतिभां प्राप्नोतीति धारणासीत् । अग्निहोत्रं तु ब्राह्मणानां कृत्ये नैत्यकविधिरासीत् ।[4] क्षत्रिय-वैश्यानां कृते तु द्वितीयापूर्णिमादिनयोः कृतम् ।

अन्येषु दिवसेषु पक्वान्नं ब्राह्मणगृहे प्रेषणीयमासीत् । मनुरग्निहोत्राद् ब्राह्मणभोजनं वरिष्ठं मन्यते—

वरिष्ठमग्निहोत्रेभ्यो ब्राह्मणस्य मुखे हुतम् । मनु० ७.८४ ।

अग्निहोत्रविधिः पदे पदे प्रपञ्चितो (नात्र सविस्तरं वर्णितो) नैकहोराणां व्यापृतिमपेक्षते ।

अग्निहोत्रानन्तरं यजमानो भुनक्ति, देवेभ्यः, पितृभ्यः, सप्तर्षिभ्योऽग्नये च पृथिव्यां जलं प्रददाति ।

महाभारतानुसारेणाग्निहोत्राधिकारिणः सन्ति शुचि-निर्णिक्तपाणि-ब्रह्म विद्विपश्चिच्छ्रोत्रियाः सत्यव्रताः श्रद्दधाना हुतशिष्टाशिनः ।[5]

मुण्डकोपनिषदनुसारेण—

एतेषु यश्चरते भ्राजमानेषु यथाकालं चाहुतयो ह्याददायन् ।

---

१. 'अग्नये होत्रं होमोऽस्मिन् कर्मणि' इति अग्निहोत्रम् । सन्ध्याविधेर-नन्तरमग्निहोत्रं सम्पाद्यते । सन्ध्या तु—
उत्थायावश्यकं कृत्वा कृतशौचः समाहितः पूर्वां सन्ध्यां जपंस्तिष्ठेत् स्वकाले चापरां चिरम् । मनु० ४.९३;२.६९

२. संन्यासग्रहणानन्तरं मृत्योः पश्चाद् वा सत्रस्य विरतिः ।

३. दुग्धेन नैत्यकसन्ध्याविधौ । ये ग्रामं बह्वन्नं बलं, प्रभां वा कांक्षन्ति ते क्रमशो यवागुना, भक्तेन, दधिनाज्येन च होमंनिष्पादयन्ति ।

४. यज्ञस्त्रिविधो भवति कालापेक्षया । (१) प्रतिदिनमवश्यमेव कर्तव्यमिति नैत्यकः नित्यविधानात् । (२) यथोद्दिष्टकाले पर्वणि कर्तव्यमिति नैमित्तिकः । (३) सोद्देश्यं कर्तव्यमिति काम्यः कामनाप्राप्त्यर्थम् ।

५. आरण्यकपर्वणि १८४.१३–१५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तं नयन्त्येताः सूर्यस्य रश्मयो। यत्र देवानां पतिरेकोऽधिवासः ।। १.२.५.
अर्थादग्निहोत्री स्वर्गे प्रतिष्ठां लभते।

दर्शपूर्णमासौ यज्ञौ

दर्शस्तु शुक्लपक्षस्य प्रथमदिवसोऽमावस्येति ख्यातः। पूर्णमासस्तु मासस्यान्तिमो दिवसः।[1] एतयोर्यज्ञयोः प्रवर-गणना सांस्कृतिकदृष्ट्या महत्त्वपूर्णास्ति। प्रवरास्ते श्रेष्ठा ऋषयो येषां कुले सो यजमानोऽङ्कुरितोऽभवत्। नैकदेवेभ्यो नानाविधहविरर्पितमासीत्। राक्षसानामप्यंशस्तत्र प्रत्त आसीत्। यावज्जीवं वा त्रिंशदवर्षपर्यन्तं वा, पञ्चदशवर्षाणि वा यज्ञौ समारब्धौ यथा कालमनुवृत्तिशः।

चातुर्मास्ययज्ञाः

वर्षस्य प्रतिचतुर्मासं फाल्गुन-(चैत्र) पूर्णिमा दिवसे वैश्वदेवेन, आषाढ-(श्रावण) पूर्णिमायां वरुणप्रघासैः कार्तिकपूर्णिमायां साकमैधेन तदनन्तरं शुनासीरीयेण यजेत। ऋतूनामादौ क्रमशो वसन्तस्य, प्रावृषः, हेमन्तस्य (शरदः) च समारम्भोत्सवः प्रतीयते। यजमानस्य तदर्थं व्रतमासीत्—केशान् निवर्तयीत, श्मश्रूणि वापयीत, अधः शयीत, मधु-मांस-लवण-स्त्र्यव-लेखनानि वर्जयेत्।[2] (आश्व० २.१६.२२-२६)

एतेषु सर्वेषु यज्ञेषु अग्नये सवित्रे पुरोडाशः, सोमाय, सरस्वत्यै, पूष्णे च चरुः समर्पितः। स्वर्गस्य प्राप्तिः सम्भावितास्ति चातुर्मास्यविधानेन[3]। यावज्जीवं वा वर्षैकं वा चातुर्मास्यं कुर्यात्।

आग्रयणम्

आग्रयणं तु नवान्नभोगोत्सवः।[4] श्यामाकेन वर्षर्तौ, तण्डुलेन शरदि, यवेन वसन्ते चाग्रयणं सम्पादितम्। एतस्य कालश्चातुर्मास्यवत् निर्दिष्टो

---

१. यः परमो विप्रकर्षः सूर्याचन्द्रमसोः सा पौर्णमासी। यः परमः सन्निकर्षः सामावस्या।
एकत्रस्थितचन्द्रार्कदर्शनाद् दर्श उच्यते।

२. इमानि व्रतानि यजमानस्य तपोमयजीवनविधिं निर्दिशन्ति। तीर्थयात्रिणां कृतेऽपि तानि निर्दिष्टानि, शान्ति-प्रायश्चित्तविधाने च।

३. तैत्तिरीयब्राह्मणानुसारेण चातुर्मास्य-यज्ञाः क्रमशः प्रजासृष्टिं, वरुणपाशमुक्तिं, प्रतिष्ठां च प्रभावयन्ति। १.६.८। शुनासीरीयेण समृद्धिः सारं च लभ्यम्। शतपथब्रा० २.६.३.२

४. अग्रेऽयनं भक्षणं येन कर्मणा तदाग्रयणम्। आश्व० २.९.१। मनुस्मृतौ ४.२६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विधिश्च दर्शयज्ञवत् । अद्यापि प्रचरत्ययं यज्ञो नवान्न-भोगनाम्ना । यदि आग्रयणं न सम्पाद्यते तर्हि नवान्नामिषगर्धिनोऽग्नयो यजमानं हन्ति ।[1]

काम्येष्टिः

काम्येष्टयः केनचित् पुरुषेण स्वकामना-पूर्त्यर्थं सम्पादिताः सन्ति । एताः सन्ति—आयुष्कामेष्टिः, स्वस्त्ययनी, पुत्रकामेष्टिः, लोकेष्टिः, महावैराजी, मित्रविन्दा, संज्ञानी, कारीरीष्टिः । कारीरीष्टिर्वर्षार्थं सम्पाद्यते ।[2] शेषाः स्वनाम्नैवाख्याताः ।

पशुबन्धयज्ञास्तु पशुमांस-हव्येन घोरतरं कर्मानुशीलन्ति । ते नैकोदृश्यान्नि पूरयितुं पशुहिंसया सम्पादिता विशेषतः पुरोहितानामास्वादायेति चिन्त्यम् ।

सोमयज्ञः

केवलं पर्याप्तसमृद्धिशालिन एव सोमयज्ञाधिकारिण इति मनुना निर्दिष्टमधोविधम्—

यस्य त्रिवार्षिकं भक्तं पर्याप्तं भृत्यवृत्तये ।
अधिकं वापि विद्येत स सोमं पातुमर्हति ॥ ११.७

अस्मिन् यज्ञे कुशग्रासे सोमरसो देवेभ्यः प्रदीयते ।

प्रातर्मध्याह्ने सायं च त्रिः सोमसवनं क्रमशोऽग्नये, इन्द्राय, ऋभुभ्यश्च निष्पाद्यते । यज्ञोऽयं जलवर्षणकृत उद्दिष्ट इति नैकसन्दर्भेषु प्रतीयते ।

सोमोऽत्र काचिद् वल्ली बभूवाभारतीयेति विज्ञायते । दुर्लभत्वात् तस्याः स्थाने शतपथब्राह्मणानुसारेण फाल्गुनलता, दूर्वा, हरितकुशो वा गृहीतः । शतपथे ४.५.१० । ताण्ड्यब्राह्मणानुसारेण—यदि सोमो न विन्देयुः, तर्हि पूतीकानभिषुणुयुः । यदि न पूतीकान्, अर्जुनानि । सप्तविधाः सन्ति सोमयज्ञाः ९.३.३ । अग्निष्टोमः, अत्यग्निष्टोमः, उक्थ्यः, षोडशी, वाजपेयः, अतिरात्रः, अप्तोर्यामश्च । एतेषां वैशिष्ट्यं प्रक्रियागर्भितमेव ।

वाजपेययज्ञः

वाजपेययज्ञस्यान्तिमे चरणे १७ रथानां धावनमायोजितमासीत् ।[3] अन्यच्च सुरापानस्य मदिरं दृश्यमभवत् । यूपे यजमानस्यारोहणं तत्र १७ लवणकोश-ग्रहणं च । एते कार्यक्रमा मनोरञ्जका बभूवुः । अस्य यज्ञस्य

---

१. मनु० ४.२८

२. आश्व० २.१०-१४

३. अस्मिन् यज्ञे सोमस्य सुरायाश्च १७ चषकाः, १७ रथानामाजिः, १७ दुन्दुभयश्च प्रयुक्ताः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यजमानो ब्राह्मणो राजन्यो वा केवलं भवितुमर्हति । तदनन्तरं यजमानो राजा राजसूययज्ञं, ब्राह्मणो बृहस्पतिसवं च कुर्यात् । श्रैष्ठ्यापत्तये प्रभवत्ययं यज्ञः ।

राजसूयः

राजसूयेन यजमानो राजा भवति[1], वाजपेयेन सम्राट्-संजायते । शत० ९.३.४.८

राज्ञां कृतेऽवधारितोऽयं राजसूययज्ञो महिमान्वितो वर्षद्वयं यावत् प्राचरत् । अस्मिन्नवधौ नैकविधा इष्टयः —सोमयज्ञाः पशुबन्धाश्चानुषङ्गिकभूता निष्पादिताः । फाल्गुनमासस्य शुक्लपक्षस्य प्रथमदिवसे प्रारब्धोऽयं यज्ञो यजमानस्य दीक्षया प्रारभ्यत । यज्ञेऽस्मिन् क्वचिद् गविष्ठिरन्यत्र द्यूतक्रीडा मनोविनोदप्रकरण आयोजिता ।

अश्वमेधयज्ञः

प्राचीनतमो महत्तमोऽयं यज्ञोऽश्वमेधः, यस्मिन् मङ्गलो जविष्ठश्चाश्वः कश्चित् स्वपरिभ्रमेण यावद् भूमिं निर्बाधं पर्यवरत्, सा यजमानस्य स्वराज्येऽधिकृता ।[2] नैकविधप्रयोगैः संस्कृतः प्रस्थानकाले सविशेषणगर्भितैराशीर्वचोभिः प्रशंसितोऽश्वः । यथा—

मात्रा विभूः पित्रा प्रभुः अश्वः, हयः, अत्यः, मयः, अर्वा, सप्तिः, वाजी, वृषा, नृमणो, ययुः शिशुर्नामासि । आदित्यानां पत्वान्विहि । देवा आशापाला एतं देवेभ्योऽश्वं मेधाय प्रोक्षितं रक्षत । इह रन्तिः । इह रमताम् । इह धृतिः । इह स्वधृतिः । स्वाहा ।

अश्वस्य रक्षकाः शस्त्रास्त्रसज्जिताः श्रेष्ठराजन्याः शतचतुष्टयं नियुक्ता आसन् ।

अश्वस्य परिभ्रमणावधौ प्रतिदिनं यजमानो महाराजः सवित्रे त्रिकालमिष्टत्रयं विधत्ते स्म । तदनन्तरं त्रिः प्रयाजकाले कश्चिद् वीणागाथी ब्राह्मणो यजमानस्य वदान्य[3]सुकृतमुपवीणं स्वरचितश्लोकैरगायत् । क्षत्रियवैणिको महाराजस्य युद्धविजयगाथामगायत् ।

---

१. राजा यत्र सूयते, तस्माद् राजसूयः । राज्ञो वा यज्ञो राजसूयः । एतद्यजमानो यद्राजसूयेन यजते, सर्वेषां राज्यानां श्रैष्ठ्यं स्वाराज्यमाधिपत्यं पर्येति । शत० १५.१३.१

२. दशरथस्याश्वमेधो रामायणानुसारेण पुत्रप्राप्त्यर्थमभवत् । बालकाण्डे १२.९। अश्वमेधेन इडा पुरुषात्वमवाप । उत्तर० ९२

३. इदमिह दानमिदमिहेष्टमिदमिह संविभागायापीपचत् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सवितरिष्ट्यनन्तरं प्रतिदिनं वर्षं यावद्धोता पुत्रमन्त्रिपरिवृतं महाराजं पारिप्लवाख्यानं[1] श्रावयति स्म। एवमेव चतुर्थदिवसे सोमं, पञ्चमदिवसेऽर्बुदकाद्रवेयं, षष्ठदिवसे कुबेरं, सप्तमदिवसेऽसितधान्वनं तेषां प्रजाः क्रमशोऽप्सराः सर्पान्, राक्षसान्, असुरान्, जलचरान् इत्यादीनुपलक्ष्य गाथागायनं समारब्धं। वर्षानन्तरं यथाकालं २१ यूपेषु बद्धाः पशवः स्वर्गं प्रापिता असिधारया। अन्तराले क्वचिन्मनोरञ्जककार्यक्रमो ब्रह्मोद्यानि चायोजितानि। अन्तिमे दिवसे मेधीयाश्वो महता समादरेण निस्त्रिंशीकृतः।

विनिहताश्वेन राजमहिष्याः संयोगः, होत्रा तस्या अश्लीलगालियदानं, पुरोहितानां परिचारिकाणां च परस्पराश्लीलमुत्तरं च यज्ञमहिमावरोधकप्रवृत्तयस्तान् सर्वान् विस्मृतार्यसमुदाचारान् स्खलयन्तीति शिष्टानां दृष्टिः कथं न प्राभवदिति सर्वमप्रमोदस्थानम्।

ब्रह्मोद्यस्य प्रश्नोत्तरी प्रहेलिकान्विता क्वचिद् ब्रह्मदर्शनानुप्रेक्षिणी यज्ञप्रद्योतनी च सम्बभूव।

प्रश्नः—कः स्विदेकाकी चरति क उ स्विज्जायते पुनः।
किंस्विद्धिमस्यभेषजं किं वा वपनं महत्॥

उत्तरम्—सूर्य एकाकी चरति चन्द्रमा जायते पुनः।
अग्निर्हिमस्य भेषजं भूमिरावपनं महत्॥

प्रश्नः—किंस्वित् सूर्यसमं ज्योतिः किं समुद्रसमं सरः।
किंस्वित् पृथिव्यै वर्षीयः कस्य मात्रा न विद्यते॥

उत्तरम्—ब्रह्म सूर्यसमं ज्योतिर्द्यौः सूर्यसमं सरः।
इन्द्रः पृथिव्यै वर्षीयान् गोस्तु मात्रा न विद्यते॥

प्रश्नः—केष्वन्तः पुरुष आविवेश कान्यन्तः पुरुषे अर्पितानि।

उत्तर—पञ्चस्वन्तः पुरुष आविवेश तान्यन्तः पुरुषे अर्पितानि॥

यजु० २३.४५-५२

---

१. तथाहि—प्रथमेऽहनि मनुर्वैवस्वतस्तस्य मनुष्या विशस्त इम आसत इति गृहमेधिन उपसमानीताः स्युस्तानुपदिशत्यृचो वेदः सोऽयमिति सूक्तं निगदेत्। द्वितीयेऽहनि यमो वैवस्वतस्तस्य पितरो विशस्त इम आसत इति स्थविरा उपसमानीताः स्युस्तानुपदिशति। यजुर्वेदो वेदः। सोऽयमित्यु वाकं निगदेत्। आश्व० १०.७.१-२। तृतीयेऽहनि वरुणस्तस्य प्रजा गन्धर्वा नागरकाणां प्रतिनिधीकृताः सम्बोध्यन्तेऽथर्ववेदसूक्तैः।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अश्वमेधयज्ञान्ते जलधारायां यजमानः स्नाति। तत् स्नानमवभृथ इति संज्ञितम्। सा स्नान-स्थली तीर्थवत् पापप्रक्षालनी मन्यते।[1]

यथा युद्धभूमौ राष्ट्ररक्षणाय आत्मरक्षणाय वा मनुष्यादीनां नैकजीवानां हननेऽद्यापि दोषो न दृश्यते, अपितु गुणा एव वर्ण्यन्ते, तथैव यज्ञभूमिकायां पशुमारणे दोषो नादृश्यत हन्त धर्मधुरीणैरपि। न केवलं वैदिकधर्मानुयायिनामेवेदृशी मनोगतिः। विश्वस्मिन् सर्वत्र लोकानां धर्मानुबन्धेन पशुबलिदानं भवति। तच्छोच्यमेव राधाकृष्णन् प्रवदति—No religion can be regarded as true if it encourages blood sacrifice. Speeches and Writings P. 262

पौराणिकयुगे यज्ञस्य स्थाने तपःसाधु स्वीकरणीयं बभूव, यतो हि नाम यज्ञप्रकरणे हिंसा नाभिनन्दनमर्हति प्राणिहिंसनात्।[2] प्रागेव मनुना तत्त्वदर्शिनां यज्ञस्य शाश्वतसात्त्विकस्वरूपं—इन्द्रिय-यज्ञं वाग्यज्ञं, ज्ञानयज्ञं च तपोमयं व्यधात्।[3] श्रीमद्भवद्गीतायां ब्रह्मेन्द्रियात्मसंयमयोगादीनग्निमिव सन्धार्य ब्रह्मेन्द्रियप्राणकर्माणि तत्र हवनमेव श्रेष्ठयज्ञविधानमिति प्रकीर्तितम्। ४.२४-३०

प्राग्वैदिका अपि नैकयज्ञा वैदिककाल एव विरलविरला संजाता इति नैकत्र चर्चितम्।[4] किन्तु परवर्तियुगेऽपि नैकाश्वमेधयज्ञाः सम्पादिता इति बोधितं मनुस्मृतौ, महाभारत-रामायण-पुराणादिगौरवग्रन्थेषु, काव्येषु पुरालेखेषु च।[5]

---

1. When the sacrificer comes out of the water after Avabhṛtha, persons guilty of such grave sins as Brahmaṇa murder plunge into that water and become purified. H.D. Vol II p. 1236 कात्यायनश्रौतसूत्रे २२.८.१७,१८

२. वायुपुराणे च अध्याय ५७।

३. एतानेके महायज्ञान् यज्ञशास्त्रविदो जनाः।
अनीहमानाः सततमिन्द्रियेष्येव जुह्वति॥ ४.२२
वाच्येके जुह्वति प्राणं प्राणे वाचं च सर्वदा।
वाचि प्राणे च पश्यन्तो यज्ञनिर्वृत्तिमक्षयाम्॥ ४.२३
ज्ञानेनैवापरे विप्रा यजन्त्येतैर्मखैः सदा।
ज्ञानमूलां क्रियामेषां पश्यन्तो ज्ञानचक्षुषा॥ ४.२४
ईदृशो यज्ञो भक्तिमूलकः।

४. भवत्युत्सन्नयज्ञो वा एष यदश्वमेधः। तै० सं० ५.४.१२.३। शतपथ० १३.३.३.६।

५. मनुर्यज्ञैरिष्ट्वा मोक्षमिच्छेदिति सिद्धान्तयति। ६.२७। धर्मस्तु यज्ञो दानं च। ७.७९। महाभारते युधिष्ठिरस्याश्वमेधयज्ञो विश्रुत एव। रामायणानुसारेण दशरथः पुत्रोत्पत्तिमुद्दिश्याश्वमेधं कृतवान्। बाल० १३.९।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तथापि यज्ञस्थाने तपो व्रतं च स्पृहणीये इति परवर्ति तत्त्वदर्शिनामुज्जागर-वाक्यं शाश्वतमहत्त्वं भजते । यज्ञात्तपो विशेषफलप्रदमिति प्रायः सम्मतम् ।[1]

नानारूपकल्पितस्य यज्ञस्य सार्वजनीनता, सार्वभौमिकता सार्वकालिकता च मनुस्मृतौ निगदिताः । अद्यापि भारतस्य सर्वेषु भागेषु क्वचित्संक्षिप्ति गता अन्यत्र विवृतिं याता याज्ञिकसंस्कृतिः शासनसूत्रादपि दृढतरं भारतस्य भारतानां चैक्यं निबध्नाति । प्रागेव वर्णिताः पञ्चमहायज्ञा अद्यापि प्रचरन्ति ।

स्तुतिः

परि वन्दे ऋग्भिः । ऋ० २.३५.१२

स्तुतिस्तु परवर्तिभक्तिमार्गस्य प्रथमा प्रसूतिः ।[2]

वैदिकधर्मस्य परिधौ पुरातनतमकालतोऽद्यावधि देवानां प्रीत्यर्थं तषा स्तुतिः सातिशयं प्राग्भावं भजते[3] । सेयं स्तुतिः पर्यायेण स्तोमः, प्रार्थना वन्दना, शंसनम् मन्म, मतिः, विदथः, धीर्ब्रह्म इति संज्ञिता । एतासु स्तुतिषु देवानां पराक्रमगाथाः, परोपकारकार्याणि, लोकैश्वर्यप्रदानप्रवृत्तय इतोप्यधिकानि तेषां वैभवानि पौनःपुन्येन ग्रथितानि । चत्वारो वेदा एतादृशीभिः स्तुतिभिः सर्वतः सम्भृता एव ।

स्तुतीनां स्वरूपं निम्नलिखितेषु सूक्त-सन्दर्भेषु परिचेयम्—

इयं मनीषा इयमश्विना गीरिमां सुवृक्ति वृषणा जुषेथाम् । ऋ० ७.७१.६
उप त्वाग्ने दिवे दिवे दोषावस्तर्धिया वयम् । नमो भरन्त एमसि ।
राजन्तमध्वराणां गोपामृतस्य दीदिवम् । वर्धमानं स्वे दमे ।

---

१. वायुपुराणे ५७.१०४–१२५ । स्कन्दपुराणानुसारेण—
अविद्यान्तर्गतैर्यज्ञकर्मभिर्न प्रयोजनम् । मम हिंसात्मकैरस्ति निगमोक्तैरचेतनैः ।
समित्पुष्पकुशप्रायैः साधनैर्यद्यचेतनैः । क्रियते तत्तथा भाविकार्यं कारणवन्नृणाम् ॥
१.२.१३.५०–६० ।

२. आधुनिकयुगे भजनं तु देवस्तुतिगायनम् । भजनं भज् धातोर्निष्पद्यते । यस्माद् भक्तिर्निष्पन्ना भवति ।

३. यथा—स्तुहि रुद्रम् । ऋ० २.३३.११
प्र वां स मित्रावरुणावृतावा विप्रो मन्मानि दीर्घश्रुदियर्ति ।
यस्य ब्रह्माणि सुक्रतू अवाथ आ यत्कृत्वा न शरदः पृणेथे ॥ ऋ० ७.६१.२
अर्थादृषेः स्तुतिर्मित्रावरुणयोः प्रतिभाप्रदानप्रवृत्तिं तस्मै प्रददाति ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स नः पितेव सूनवेऽग्ने सूपायनो भव ।
सचस्वा नः स्वस्तये ।[1] ऋग्वेदे १.१.७–९
यः सुन्वते पचते दुध्र आ चिद् वाजं दर्दर्षि स किलासि सत्यः ।
वयं त इन्द्र विश्वह प्रियासः सुवीरासो विदथमावदेम ।।
ऋ० २.१२.१५

अत्रेन्द्रस्य स्तुतिः प्रगीता—'त्वं महाशक्तिमान्, सत्यश्चासि । सोमपाकादियज्ञकारिणे धनं ददासि । वयं तव शाश्वत-प्रेमास्पदम् । स्वगीतेषु तव कीर्तिं गायाम' इति ऋग्वेदे रुद्रस्य प्रशस्यतमा स्तुतिर्द्वितीयमण्डले त्रयस्त्रिंशे सूक्ते सम्यक् प्रपन्ना यत्र स स्तोत्रे भेषज-सुम्न-शं-यु-रक्षादिकं प्रार्थ्यते ।[2]

न केवलं देवानामपितु राज्ञामपि स्तुतिर्ऋषिभी रचितानि । अधोलिखितमन्त्रे बृहस्पतेः पोषको राजा प्रशंसितः —

स इद्राराजा प्रतिजन्यानि विश्वा शुष्मेण तस्थावभि वीर्येण ।
बृहस्पतिं यः सुभृतं बिभर्ति वल्गूयति वन्दते पूर्वभाजम् ।।
ऋ० ४.५०.७
स इत् क्षेति सुधित ओकसि स्वे तस्मा इला पिन्वते विश्वदानीम् ।
तस्मै विशः स्वयमेव नमन्ते यस्मिन् ब्रह्म राजनि पूर्व एति ।।
ऋ० ४.५०.८

एताभ्यां मन्त्राभ्यां स्पष्टं प्रतिभाति यन्न केवलं देवा अपित्वन्येऽपि संश्रयणीया महापुरुषा राजादयः स्तुता एव । पितरोऽपि स्तुतिभिः प्रीता भवन्ति ।[3] देवा अपि देवान् स्तुवन्ति स्म ।[4]

प्रायः साम्मनस्यं गता जना एकस्य बहूनां वा स्तुतिं निषद्यागायन्त । तद्यथा—

इन्द्राय साम गायत । अथर्व० २०.६२.५

---

१. अत्र कविरग्निकार्याणि प्रथमं प्रशंसति—
प्रतिदिनं त्वमन्धकारं विदूरयसि । त्वां स्तुत्या नमःपूर्वमुपगच्छामः । अग्निर्यज्ञस्य राजा । स सत्यस्य द्युतिमान् रक्षकः । स्वगृहे वर्धते । अग्निरुपायन-विशिष्टः पुत्राय पितेव प्रार्थितः । अस्माकं स्वस्तये सहायो भवेति ।

२. महो महीं सुष्टुतिमीरयामि । २.३३.८ । अत्र स्तुतिः प्रवचनीया ।

३. ऋग्वेदे १०.१५.२,५,६; अथर्व० १८.३.१४४; १८.४.६५ ।

४. वसवोऽदितिर्वरुणो मित्रोऽर्यमा च सावितारं स्तुवन्ति । ऋ० ७.८८.३,४ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by eGangotri Foundation USA

समेत विश्वे वचसा पतिं दिवः । अथर्व० ७.२१.१
आ त्वेता निषीदत इन्द्रमभि प्रगायत । अथर्व० २०.६८.११
ब्रह्मेन्द्राय वोचत । अथर्व २०.११९.१
एकाकी स्तौति—स्तुहि देवं सवितारम् । अथर्व ६.१.१

कीथः परिणामयति—ऋग्वेदस्य सूक्तानि—made for such occasions as the ploughing (Rg. IV. 57), the return of the cattle from the pasture (Rg VI. 28), their driving in and driving out (Rg V. 112; X. 169)

देवेभ्यो याचना—सुमतिं, शर्म, वर्म, भोजनमारोग्यं च मह्यं देहीति ।[1]

इयं स्तुति-पद्धतिरद्यावधि प्रतितिष्ठति एव । देवालयेषु अन्यत्र वा जना देवान् स्तुवन्ति । इयं सामूहिकप्रार्थनास्ति । सहस्रशो जनाः समूढा इन्द्रं स्तोतुं नियोजिताः । तद्यथा—

सहस्रं साकमर्चत परि ष्टोभत विंशतिः ।
शतैनमन्वनोनवुरिन्द्राय ब्रह्मोद्यतमर्चन्ननु स्वराज्यम् ॥
ऋ० १.८०.९

यज्ञकर्मणि स्तुतयो याज्यदेवस्य महत्त्वं प्रतिपादयितुं प्रयुक्ता एव प्रायशो दृश्यन्ते । तत्र यज्ञैः सह स्तुतीनां प्रभावो यजमानस्य फलसिद्धये भवति । यज्ञं विनापि स्तुतिमात्रेण ऋषेराकांक्षा पूर्यत इति स्तुतीनां प्रभावो प्रकटतीति न विस्मरणीयम् । ऐतरेयब्राह्मणानुसारेण शुनःशेपः स्तुतिभिः प्रजापति-सवित्रादिदेवानुपसद्य स्तौति वरुणपाशाद्विमुच्यते च । ७.३ ऋग्वेदस्य प्रथममण्डलस्य पञ्चाशत्तमे सूक्ते सूर्यस्य स्तुतिमात्रेण ऋषेर्हृदय-रोगस्य हरिम्णश्च विनाशोऽभीष्टः ।[2]

देवानां शक्तेरभिवृद्धये क्वचित् स्तुतयः प्रयुक्ता बभूवुः । स्तुतिभिरिन्द्रस्य शक्तिर्वृत्रवधाय संवर्धितासीत्[3] । शत्रूणां वधाय देवा ऋषिभिः प्रायः

१. ऋ० १.११४.४–६ तद्यथा कीथः परिगणयति—Long life, riches in cattle and heroes, in chariots and gold, sons in abundance, freedom from disease, success over enemies and prosperity in general were prayed for. Religion and Philosophy of the Veda. etc. p. 311.
२. हृद्रोगं मम सूर्य हरिमाणं च नाशय । १.५०.११
३. A. B. Keith : The Religion and Philosophy of the Veda and Upaniṣads. p. 311

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रोत्साहिताः । पितॄणां प्रीत्यर्थमपि स्तुतयः कृताः ।[1]
बृहस्पतेः स्तुतिः सुसंस्कृता राजते । तद्यथा—

अनर्वाणं वृषभं मन्द्रजिह्वं बृहस्पतिं वर्धया नव्यमर्कैः ।
गाथान्यः सुरुचो यस्य देवा आशृण्वन्ति नवमानस्य भर्ताः । १.१९०.१

ऋग्वेदे विष्णोः स्तुतिः (१.१५४) परवर्ति विष्णुस्तोत्रसाहित्यस्य मूलमेव । अत्र कविः प्रार्थयते—

तदस्य प्रियमभिपाथो अश्यां नरो यत्र देवयवो मदन्ति ।
उरुक्रमस्य स हि बन्धुरित्था विष्णोः पदे परमे मध्व उत्सः ।। १.१५४.५

स्तुतिमात्रेण प्रीता देवाः स्तोतुः प्रार्थनां सफलां कुर्वन्ति, अनिष्टमरिष्टञ्च निवारयन्तीति सूक्तेषु पुनः पुनः श्लोकितम् ।

कीयस्तासां स्तुतीनां विरलत्वं प्रतिप्रादयति यासु आध्यात्मिकाभ्युदयाय प्रेरणा दृश्यत[2] इति पाश्चात्यानां भारतं प्रति दुर्भावनावशादालोचनं प्रतिभाति । तस्य मतस्य वैतथ्यमस्मिन्प्रकरणेऽस्य ग्रन्थस्य ६२१-६२५ पृष्ठेषूद्धृतासु सूक्तिषु प्रत्यक्षमेव ।

नैकदेवानां सहस्तुतिर्नैकस्तोतृभिर्भूरिफलदायिनी समाम्नाता । अथर्ववेदे ३.१६ सूक्तऽग्निः, इन्द्रः, मित्रावरुणौ अश्विनौ, भगः, पूषा, ब्रह्मणस्पतिः सोमः, रुद्रश्च स्तुताः ।

न केवलं देवा अपितु अदेवा अपि, केचन चराचरा अपि लोककल्याणं विधातुं स्तुतिभिः प्रार्थिता आसन् । तद्यथाथर्ववेदे विशदीकृतम्—

अग्निं ब्रूमो वनस्पतीनोषधीरुत वीरुधः ।
इन्द्रं बृहस्पतिं सूर्यं ते नो मुञ्चन्त्वंहसः ।। ११.६.१

प्रकरणेऽस्मिन् साधारणतः सर्वे देवाः, ऋषयः, पितरः गन्धर्वाः, यक्षाः, अप्सरसः, अहोरात्रे, दिशः, आशाः, पार्थिवा दिव्या पशवः, आरण्या मृगाः, पर्वताः, समुद्राः, नद्यः, यज्ञः, यजमानः, भेषजाः, वीरुधः, दर्भः, यवः, सहः, असुराः, राक्षसाः, पुण्यजनाः, ऋतवः, संवत्सराः, मासा मुञ्चन्त्वंहसः इति प्रार्थयमान ऋषिर्निवेदयति —

विश्वान् देवानिदं ब्रूमः सत्यसन्धानृतावृधः,
विश्वाभिः पत्नीभिः सह ते नो मुञ्चन्त्वंहसः ।। ११.६.१९१

अत्र गोस्तुतिः सविशेषमुल्लेखार्हा[3] । ऋग्वेदे मण्डूकानां स्तुतिर्विचित्रैव ।

---

१. ऋग्वेदे १०.१५.२५,६; अथर्व० १८.३.१४४; १८.४.६५ ।
२. अथर्व० १२.५.६२-७२ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ऋषिः कवयति—

गोमायुरदादजमायुरदात् पृश्निरदाद्धरितो नो वसूनि ।
गवां मण्डूका ददतः शतानि सहस्रसावे प्रतिरन्त आयुः ॥ ७.१०३.१०

न किंचिदभ्यर्थयते कविरण्यानीं यामधिकृत्य वनं गतः स स्तौति—

अरण्यान्यरण्यान्यसौ या प्रेव नश्यसि ।
कथा ग्रामं न पृच्छसि न त्वाभीरिव विन्दती ॥
वृषारवाय वदते यदुपावति चिच्चिकः ।
आघाटिरिव धावयन्नरण्यानिर्महीयते ॥
उत गाव इवादन्त्युत वेश्मेव दृश्यते ।
उतोऽरण्यानिः सायं शकटीरिव सर्जति ॥
गामङ्गैय आ ह्वयति द्वार्वङ्गैयो अपावधीत् ।
वसन्नरण्यान्यां सायमक्रुक्षदिति मन्यते ॥
न वारण्यानिर्हन्त्यन्यश्चेन्नाभिगच्छति ।
स्वादो फलस्य जग्ध्वाय यथाकामं निपद्यते ॥ १०.१४६

अयोग्यं क्वचित् कार्यं निष्पादयितुं देवाः स्तुतिभिः प्रार्थिताः । तद्यथेन्द्रो दुर्भाषकं गर्दभं हन्तुं प्रार्थितः । तस्मिन्नेव श्वसिते स सहस्रशोऽश्वान् गाश्च प्रतिश्रोतुं निवेदितः । ऋ० १.२९.५

कीथो वैदिके धर्मे यज्ञार्थाद् बहिरपि स्तुतीनां महत्त्वमधोवचनेन प्रतिष्ठापयति—

The Rgveda shows quite clearly that the conception of prayer for aid to a god without the performance of any sacrifice was quite natural and intelligible. The heroes of its narratives of the deeds of the Aśvins in special seem to have been specialy eager in their prayers for the aid they desired. (ऋग्वेदे १.११८.७) Religion and Philosophy of the Veda. Page 310.

अथर्ववेदे नैकस्तोतॄणां स्तुतिपूर्वकं देवोपासनं चर्चितम्—

समेत विश्वे वचसा पतिं दिवः । ७.२१.१

देवैः सहर्षीणां सख्यमासीदिति प्रागपि वर्णितम् ।[1] सख्यभावोऽय ऋषीणां

---

१. अग्ने सख्ये मा रिषामा वयं तव । ऋ० १.९४.१; वयं त इन्द्र विश्वह प्रियासः । ऋ० २.१२.१५; इन्द्रः स नो युवा सखा । ऋ० ६.४५.१; ब्रह्माणं ब्रह्म वा ह स सखायम् । ऋ० ६.४५.७; सखायं ब्रह्म वा हस्तमं हुवे । ऋ० ६.४५.१९; तव सख्यं दूणाशम् । ऋ० ६.४५.२६ । अन्यत्र ऋग्वेदे २.४३.४; १.१०.६; ४.२५.२; अथर्ववेदे च—सखा नो असि परमं च बन्धुः । ५.११.११; न यस्य हन्यते सखा । १.२०.४ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

न केवलं नमसापितु परिष्वङ्गेणापि प्रस्फुटितमासीत् ।

तथाहि—

विश्वं पुष्यसि वार्यं तं त्वा परिष्वजामहे । ऋ० १०.१३३.२

अर्थादृषिरिन्द्रगुणलुब्धस्तं परिष्वजते । सख्यस्य परमं लक्षणमासीत् परस्परादान-प्रदानानि ।[1] अन्यत्र कतिपयदेवा मातापित्रादिरूपा नमस्याः सन्त्येव ।[2]

बृहदारण्यकोपनिषदि वैदिकयुगस्यानुत्तमा प्रार्थनाधोविधा वर्तते—असतो मा सद्गमय । तमसो मा ज्योतिर्गमय । मृत्योर्मामृतं गमय । १.३.२८ तत्रादेशो वर्तते—एतानि जपेत् ।

नमः, अभिवादनम्, पादग्रहणं च

वैदिकयुगे नमस्कारस्य महान् प्रभावोऽधःश्लोकेन प्रतिभाति—

नम इदुग्रं नम आ विवासे, नमो दाधार पृथिवीमुत द्याम् ।
नमो देवेभ्यो नम ईश एषां कृतं चिदेनो नमसा विवासे ।।

ऋ० ६.५१.१८

अत्र चतुर्थपादेन पापाद् विमुक्तिरपि नमसा सम्भाव्यते ।

देवोपस्थानं नमःपूर्वकं भवेदिति ऋग्वैदिकरीतिः ।[3] उपसदनं नमः पूर्वकं ज्ञुबाधं (क्षितितले जानुनी निधाय) सम्पादनीयमासीत् ।[4] उत्तानहस्तो यजमानो नमश्चकार ।[5]

कस्मै नम इति प्रश्नो यजुर्वेदधिया समाधेयः । तत्र रुद्राष्टाध्यायीति भागे साधारणदेवान् व्यतिरिच्य तक्षभ्यः, कुलालेभ्यः, कर्मारेभ्यः, निषादेभ्यः, श्वनिभ्यः श्वभ्यः श्वपतिभ्यः, ह्रस्वाय, वामनाय, वृद्धाय नम इत्येतैर्नमसः प्रायोवादः प्रतीयते ।[6] रुद्राय तस्य मन्यवे इषवे बाहुभ्यां च नमः । १६.१

---

१. न स सखा यो न ददाति सख्ये । ऋ० १०.११७.४
गीतायां प्रोक्तम्—देवान् भावयतानेन ते देवा भावयन्तु वः । इत्यादि ।

२. ऋग्वेदे—त्व हि नः पिता वसो त्वं माता शतक्रतो बभूविथ । ८.९९.११

३. 'ऋग्वेदेऽग्निर्नमसोपसद्य' इति ३.१४.५ उप त्वाग्ने दिवे दिवे नमो भरन्त एमसि । १.१.७ ।

४. उप ज्ञुबाधो नमसा सदेम । ऋ० ६.१.६ ।

५. ऋ० ६.१६.४६; १०.७९.२ । ६. यजु० १६.२७–४८ ।
अथर्ववेदे च नमस्ते अस्तु विद्युते । १.१३.१ । किं बहुना, नमः शीताय तक्मने, नमो रूराय शोचिषे कृणोमि । यो अन्येद्युरुभयद्युरभ्येति, तृतीयकाय नमो अस्तु तक्मने । १.१५.४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दिवा सकृदेव नमस्कारस्यौचित्यं नासीत् । अथर्वर्षिः स्वाभ्यासं श्रावयति—

नमः सायं नमः प्रातर्नमो रात्र्या नमो दिवा ।
भवाय च शर्वाय चोभाभ्यामकरं नमः ।। अथर्व० ११.२.१६

अत्र स्वतन्त्रोऽयं नमोविधिः पौनःपुन्येन महिमान्वितः । उपासना-पद्धतिः सुप्रचलितासीत् । तद्यथा—

विभूः प्रभुरिति त्वोपास्महे वयम् । अथर्व० १३.४.४७

देवानामनुग्रहार्थं 'तेभ्यो नमः' इति सरलतमं विधानं प्रचरति स्म । रुद्राय नमसा सह हविर्दानमृग्वेदेऽधोविधं वर्णितम्—

मृड नो रुद्रो तनो मयस्कृधि क्षयद्वीराय नमसा विधेम ।। १.११४.२

अन्यत्र 'अग्निं नमोभिर्वन्दध्यै । ऋ० १.२७.१ नमो महद्भ्यो नमो अर्भकेभ्यः, नमो युवभ्यः नम आशिनेभ्यः । ऋ० १.२७.१३ ।

नमःपूर्वकं देव उपास्य आसीदिति ऋ० ३.१४.५ मन्त्रे उत्तानहस्ता नमसोपसद्य पदैः प्रकटति । अन्यत्रापि उत्तानहस्तो नमसा विवासेत्, ऋ० ६.१६.४६, उत्तानहस्ता नमसाधि विक्षु ।। १०.७९.२ ।

नमस्कारस्य अपरा रीतिरासीत्—'उपशुबाधो नमसा सदेम' अर्थाज्जानुबलेनोपविश्य प्रणतिर्भवेत् ।[1] ऋ० ६.१.६ । तत्र वाचा च नमः प्रणीतमिति ऋग्वेदे—

'नमः पुरा ते वरुणोत नूनमुतापरं ब्रवाम' २.२८.८ वाक्येन प्रकटति । न केवलं देवाः स्तुत्या अपि तु ऋषयोऽपि परस्परं नमः कुर्वन्ति स्म ।[2]

नमसा कृतज्ञता-प्रकाशनस्य रीतिरासीत् । देवेभ्यः किंचितु समर्प्य, अथवा तेभ्यः किंचिद् गृहीत्वा यजमानो नमोऽकरोत् ।[3]

नमोमात्रेण कार्यसिद्धिः वर्णिताथर्ववेदे ।[4] तत्र 'विद्युते, अश्मने, हेतये, स्तनयित्नवे नमः' इति वचनेनानुकूलतार्जिता तेषाम् ।

---

१. इयं रीतिरधुनापि प्रचरति, पौराणिकयुगेऽप्यासीदित्यग्रे द्रष्टव्यम् ।

२. जरितो नमस्ते । ऋ० ३.३३.८
बृहदारण्यकोपनिषदि 'नमस्तेऽस्तु याज्ञवल्क्य' ३.८.५; ४.२.१,४ इत्यत्र गार्गी याज्ञवल्क्यं नमस्करोति जनकश्च तमेव नमस्करोति । मुण्डकोपनिषदि नमः परमऋषिभ्यः ३.२.११

३. नमो वः पितर ऊर्जे नमो वः पितरो रसाय । अथर्व० १८.४.८१ ।
अग्नये कव्यवाहनाय स्वधा नमः । अथर्व० १८.४.७१

४. अथर्व १.१३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मातृभूमिरथर्ववेदेऽधोविधं नमस्कृता—

शिलाभूमिरश्मा पांसु सा भूमिः संधृता ।
तस्यै हिरण्यवक्षसे पृथिव्या अकरं नमः ।। १२.१.२६

बृहदारयकोपनिषदि बहुशो वाचा नमस्कारेणाग्निः[1] प्रीत इव पापहरणं कर्तुं निवेदितः । शङ्करोऽस्य मन्त्रांशस्य व्याख्यां कुर्वन्नाह—'भूयिष्ठां बहुतरां ते तुभ्यं नम उक्तिं नमस्कारवचनं विधेम । नमस्कारेण परिचरेम ।[2]

उपनिषद्युगे नमस्कारेण देवेभ्यो ब्रह्मिष्ठेभ्यश्च श्रद्धाधोवाक्यैः सुविदिता प्रतिभाति—

१. तन्नम इत्युपासीत ।[3] तै० उ० ३.१०.४ ।
२. नमोऽग्नये, वायवे, आदित्येभ्यश्च विश्वेभ्यश्च देवेभ्यः । छा० २.२४.५, ९.१४ ।
३. ब्रह्मणे नमः, नमः परमात्मने, नमो ब्रह्मिष्ठाय । बृहदा० २.६.३; ३.१.१,२

अतिथिर्महतामपि नमस्करणीय आसीत् । कठ० १.९ ।

महाभारते देवतानां पूजाविधौ नमस्कारस्य प्रथमं स्थानं तत्त्वदर्शिभिर्निर्दिष्टम् ।[4] अथ च कुटुम्बे कनिष्ठा ज्येष्ठान् नमस्येरन् ।[5] ब्रह्मणो नमस्कारमात्रेण गिरिमुञ्जनामके तीर्थे गोसहस्रफलं लभ्यमिति —

गिरिमुञ्जं समासाद्य त्रिषु लोकेषु विश्रुतम् ।

पितामहं नमस्कृत्य गोसहस्रफलं लभेत् । आरण्यक० ८०.१०.२

रामायणानुसारेण गुरुः, वृद्धः, तापसः, देवता, अतिथिः, चैत्यः ब्राह्मणश्च नमस्करणीयाः ।[6] अन्यच्च—

प्रणमन्ति हि ये तेषामृषीणां भावितात्मनाम् ।
न तेषामशुभं किंचिच्छरीरे राम विद्यते ।। कि० १३.३६ ।

नारदमुखेन कृष्णः श्रावितोऽधोविधम्—

---

१. भूयिष्ठां ते नम उक्तिं विधेम । ५.१५.१ ।
२. ईशावास्योपनिषदि अष्टादशमन्त्रस्य भाष्यम् ।
३. तत् (ब्रह्म) नम इत्युपासीत । नमनगुणवत् तदुपासीत् । शाङ्करभाष्यम् ।
४. नमस्कारेण हविषा स्वाध्यायैरोषधैस्तथा ।
पूजा स्याद्देवतानां हि यथा शास्त्रनिदर्शनम् ।। शान्ति० २५५.८
५. अनु० १०८.१७
६. अयो० १००.६०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वरुणादि-देवान् ये नमस्यन्ति, तानहं नमस्यामि। तपोधनाः, वेदविदः, सन्तुष्टाः, क्षमायुक्ताः, सस्य-धन-पृथिवी-गवां दातारः, मूलफलाशिनः तपस्विनः, अतिथिप्रियाः, ब्रह्मवादिनः, याजनाध्यायन-रताः भैक्ष्यचर्यरताः, निःसुखाः निर्धनाः, निर्ममाः, अहिंसा-निरताः, कपोतवृत्तयः, पुण्यशीलाः, ब्राह्मणाः, व्रतधारिणः लोकज्येष्ठाः, स्वाध्यायिनः—इत्थंविधा देवर्षिमनुष्या नमस्करणीयाः। अनु० ३२ अध्यायतः।

महाभारतीययुगानन्तरं यदा शूद्रादीनां कृते वेदमन्त्रा निषिद्धास्तदापि तेषां कृते देवस्य नाम मनसा ध्यात्वा 'नमो नमः' इति जपेन महाफलावाप्तिर्विहितासीत्।[1]

ब्रह्मपुराणानुसारेण तु—

कृत्वापि बहुशः पापं नरा मोहसमन्विताः।
न यान्ति नरकं नत्वा सर्वपापहरं हरिम्॥ २१६.८७,८८

महाभारतानुसारेण—

अभ्यर्च्य देवतास्तत्र नमस्कृत्य मुनींस्तथा।
ततः सिद्धो दिवं गच्छेत् ब्रह्मलोकं सनातनम्॥

अनुशासनपर्वणि २६.५९

अर्थाद् ब्रह्मलोकावाप्तये ऋषीणां नमस्कारस्य योग्यतास्ति।

महाभाष्ये क्रोशशतिकः संन्यासीति स विशेषितो यः शतक्रोशदूरस्थोऽपि नमस्कारमर्हति।[2]

रामायणे सीता रामो लक्ष्मणश्च गङ्गां पारयन्तः तां प्रणमतः।[3]

अभिवादनविधिं[4] मनुः प्रवदति—गुरूणां निवेदनं प्रत्युत्थाय कुर्यात्। अभिवादनशील आयुर्विद्यायशोबलादीनि लभते। स्त्रीणमभिवादनस्य रीतिरासीत्। अभिवादने स्वनाम्नोऽन्ते भोः उच्चरेत्। तत्र प्रत्यभिवादनस्य रीतिरासीत्। प्रत्यभिवादनमासीदाशीर्वादः—आयुष्मान् भव सौम्य।

कुशलप्रश्नविधिः सौष्ठवविषयान् समाश्रयते। यथा—

---

१. याज्ञवल्क्य ३.२६२ अधिकृत्य मिताक्षरा। तद्यथा—शिवाय नमो नम इति जपेन।
२. महाभाष्ये ५.१.७४
३. अयो० ५२.७९,८७; बाल० २४.११।
४. अभिमुखीकरणाय वादनम् (नामोच्चारणपूर्वकः नमस्कारः) अमरकोषानुसारेण पादग्रहणमभिवादनम्। २.७.४१। अभिवादने चतुष्क्रियाः समवेताः—प्रत्युत्थानं पादोपसंग्रहः, अभिवादः प्रत्यभिवादनं च। मनु० २.११९–१२५।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ब्राह्मणं कुशलं पृच्छेत् क्षत्रबन्धुमनामयम् ।
वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च ।। मनु० २.१२७

रामायणे रामस्य ऋषीणामभिवादनं वर्णितम् । अभिवाद्य रामः कृताञ्जलिः तस्थौ । किष्किन्धा० १२.२४ । अभिवादनं स्वत एव महत्तमं कर्तव्यं जुष्टमेव । १३.१ ।

पौराणिकयुगे नमोविधिर्विशदीकृतः । कालिकापुराणानुसारेण त्रिविधो नमस्कारः —कायिकः, वाचिकः, मानसिकश्च भवति । कायिको नमः स्यात्—

उत्तमः—प्रसार्य पादौ हस्तौ च पतित्वा दण्डवत् क्षितौ ।
जानुभ्यां धरणीं गत्वा शिरसा स्पृश्य मेदिनीम् ।।
मध्यमः —जानुभ्यां क्षितिं स्पृष्ट्वा शिरसा स्पृश्य मेदिनीम् ।
अधमः —पुटीकृत्य करौ शीर्षे, अस्पृष्ट्वा जानुशीर्षाभ्यां क्षितिम् ।

वाचिकं नमः[1]

उत्तमम् —या स्वयं गद्यपद्याभ्यां घटिताभ्यां नमस्कृतिः ।
मध्यमम्—पौराणिकैर्वैदिकैर्वा मन्त्रैः क्रियते नतिः ।
अधमम्—यत्तु मानुषवाक्येन नमनं क्रियते सदा ।

मानसिकं नमः

इष्टमध्यानिष्टगतैर्मनोभिस्त्रिविधं पुनः ।
नमनं मानसं प्रोक्तमुत्तमाधममध्यमम् ।।

पूर्वोक्तेषु कायिको नमस्कारः श्रेष्ठः प्रणाम इति कथ्यते, येन 'देवास्तुष्यन्ति नित्यशः ।[2]

अन्ये कतिपयनियमा आसन् । यथा—

पुष्पहस्तो वारिहस्तस्तैलाभ्यङ्गो जलस्थितः ।
आशीःकर्ता नमस्कर्ता उभयोर्नरकं भवेत् ।। कर्मलोचनम्

तत्र नमोयुता महामन्त्राः सन्ति द्वादशाक्षरः —'ओऽम् नमो भगवते वासुदेवाय', अष्टाक्षरः —'ओ३म् नमो नारायणाय', 'पञ्चाक्षरः —नमः शिवाय' च । एते सर्वार्थसाधकाः सन्ति ।

नमो नमः, नमः वा शूद्राणां स्त्रीणामपि कृते जपमन्त्र एव सिद्धार्थकोऽभवत् । मन्त्रं विनापि नमः शिवाय आदि वचस्तेभ्यो महाफलदायकमिति विहितमेव ।

---

१. ऋग्वेदेऽपि को नानाम वचसा सोम्याय । ४.२५.२
२. सप्ततितमाध्यायतः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नित्यमेवोपसंग्रहणं प्रत्युत्थानं नमस्कारोऽभिवादनं प्रत्यभिवादश्च समाजे परस्परमादरभावस्य प्रीतिवर्धनस्य संश्लेषस्य वा प्रथमकारणमिति सन्धार्य-शास्त्रेषु विहितानि । उपसङ्ग्रहणस्य रीतिरधोविधास्ति—'अमुकगोत्रोऽमुक-शर्माहं भो अभिवादये' इत्युक्त्वा कर्णौ स्पृष्ट्वा दक्षिणोत्तरपाणिभ्यां दक्षिणेन पाणिना गुरोर्दक्षिणं पादं सव्येन सव्यं गृहीत्वा शिरोऽवनमनम् । एकस्मिंश्चि-द्दिवसे उपसंग्रहणं सकृत् कुर्यात्, अभिवादनं तु पुनः पुनः दर्शनकाले ।

अभिवादनमात्रे पादसंग्रहणं नास्ति । पादस्पर्शनं कार्यं न वा ।[1] प्रत्युत्थायाभिवादनं कार्यम् । आप० ध० सूत्र १.४.१४.१६ । पश्चात्पादपीडन-मित्येतैरुपसंग्रहणम् ।

प्रत्यभिवादस्तु गुरूणामाशीर्वचांसि अभिवादनस्योत्तरं कर्म ।[2] सर्वे गुरवः श्रेष्ठजना आचार्या उपाध्यायाः पितरौ ज्येष्ठभ्रातरश्चाभिवादनं यथायोग्य-मर्हन्ति । येऽभिवादनीयास्तेषां कृते प्रत्युत्थानं कर्तव्यम् ।

स्वर्गलाभाय, दीर्घजीवनप्राप्तये चाभिवादनं यत्कृतं, तत् काम्यमस्ति । नित्यकृतमाचारमनुसृत्य तु नित्याभिवादनम् । यात्रातः पुनरागतस्याभिवादनं नैमित्तिकं भवति ।

अभिवादने सम्बोधनार्थं भवन् भवति चेति पदयोः प्रयोगः कृतः । नामाभिधाने श्रीशब्दस्य प्रयोगः समीहित आसीत् ।

वैदिकधर्मे नमस्तु सरलतमो लघुतमो विधिरस्ति, यत् स्वतोऽपि पूर्णं देवादीनां मानवानां च सर्वेषामनुग्रहप्रसादप्राप्तयेऽलमस्ति । वैदिक-कालादद्यावधि नमो धार्मिकसमाजे सुप्रतिष्ठितं विराजमानं विभाति ।

शूद्राणां कृते बहुविधकर्मकाण्डस्थानीयं नमः प्राभवत् । तथा हि—

(१) शूद्रो देवानां ध्यानमात्रं कृत्वा श्राद्धकर्मणि तारस्वरेण नम इत्युच्चरेत् ।

(२) सोऽग्नये स्वाहेति न वदेत् किन्तु अग्निं ध्यात्वा नम इत्युच्चरेत् ।

जैनधर्मे 'नमः' सर्वपापविमुक्तये निर्वृतये च महत्त्वं भजते । तत्र पंचणमोक्कार इति महामन्त्र इव राजते । तद्यथा

---

१. स्मृत्यर्थसार पृ० ७

२. ये प्रत्यभिवादनेऽसमर्थास्ते न सन्ति अभिवादनार्हाः । मनु० २.१२६ । ब्राह्मणो ब्राह्मणेतरं नाभिवादयेत् । केवलं स्वस्ति वदेत । समजातीयाः परस्परमभिवदेयुः । निन्द्यवृत्तिकाः केनाप्यभिवादनीया न सन्ति ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

णमो अरहन्ताणं । णमो सिद्धाणं । णमो आयरियाणं । णमो उवज्झाआणं णमो सर्वसाहूणं इति । अपरं च दिगम्बराणां नित्यपूजावन्दनादिषु सिद्धक्षेत्रेभ्यो[1] नमनं विधीयते ।

बौद्धसंस्कृतावपि रत्नत्रय-नमस्कारेण पुण्यप्राप्तिरन्तरायनाशश्च वर्णितौ । तथा हि—

इच्चेवमच्चन्तनमस्सनेयं नमस्समानो रतनत्रयं यं ।
पुञ्जाभिसन्दं विपुलं अलत्थं तस्सानुभावेन हतन्तरायो ।।
बुद्धघोषरचित—समन्तपासादिका प्रथमभागपृष्ठ १

अथ च नमो तस्मे भगवतो अरहतो सम्मासम्बुद्धस्स ।

दानं, दक्षिणा, वरश्च

न भोजा मम्रुर्न व्यथमीयुर्न रिष्यन्ति न व्यथन्ते हि भोजाः ।
इदं यद्विश्वं भुवनं स्वश्चैतत् सर्वं दक्षिणेभ्यो ददाति ।।
भोजा जिग्युः सुरभिं योनिमग्रे भोजा जिग्युर्वध्वं या सुवासाः ।
ऋ० १०.१०७.८-१०

प्रकरणेऽस्मिन् ऋग्वेदानुसारेण दानशीला न म्रियन्ते, दुःखिता न भवन्ति, ते दिव्यालोकं गृह्णन्ति च । दातारः सुरभितवासं लभन्ते । सुवस्त्रावृतां प्रेयसीं लभन्ते, शत्रून् जयन्ति च । तस्य गृहं रमणीयं भवति ।

दानस्य धर्मदृष्टचा गुरुप्रभाव आसीदेव[2] । 'महत्पुण्यं दानेनावाप्यते' इति शाश्वतधारणा भारते विभाति । ऋग्वेदानुसारेण—
'मा पृणन्तो दुरितमेन आरन् अपृणन्तमभि संयन्तु शोकाः ।। १.१२५.७

अर्थाद् दानशीलः पापाद् विनिर्मुक्तो भवति, कृपणस्तु शोकपात्रं भवत्येव । महतां च महच्च यद्दानमप्रतिरूपमेव तत् ।

वेदेऽस्मिन् 'केवलाघो भवति केवलादी[3] इति मन्त्रांशे दानप्रवृत्तिः सम्प्रतिष्ठापिता दृश्यते । अनेन भोजनदानस्य रीतिस्तदा सम्यग् विलसितवतीति प्रमाण्यते ।

---

१. जैनतीर्थङ्करा मुनयश्च यत्र निर्वाणं लब्धवन्तस्तत्र सिद्धिक्षेत्रमिति प्रतिष्ठा सम्बभूव ।

२. ऋग्वेदे १.१२५, १२६, ५.६१, ६.४७.२२-२५; ७.१८.२२-२५, ८.५.३७–३९; ८.६.४६-४८; ८.४६.२१-२४; ८.६८.१४-१९; १०.६२.८-११

३. ऋग्वेदे १०.११७.६ । अत्र भोजनदानं तु सर्वश्रेष्ठदानम् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

न केवलं मानवा अपितु देवा अपि दानशौण्डा आसन् । इन्द्रस्तत्र प्रमुखः । यथा—

पूर्वीरिन्द्रस्य रातयो न विदस्यन्त्यूतयः ।
यदीवाजस्य गोमतः स्तोतृभ्यो महते मघम् ।। ऋ० १.११.३

अर्थादिन्द्रस्य महादानं प्रसिद्धमेव । इन्द्रस्य दानशीलता प्रशस्या । ऋ० २.१७.८ स स्तोतृभ्यो गा ददाति । कविर्विशदयति—सहस्रं यस्य रातयः । ऋ० १.११.८

स्तुतिगानेन देवानां प्रसादोऽधिगम्यते । तेभ्यः स्तोतृभ्यो नैकविधदानानां प्राप्तिरधोविधं वर्णिता ऋग्वेदे—यो भोजनं ददाति स भोजो वदान्यतमः ।

मदे मदे हि नो ददिर्यथा गवामृजुक्रतुः ।
सं गृभाय पुरू शतोभयाहस्त्या वसु शिशीहि राय आ भर ।। ऋ० १.८१.७

अत्रेन्द्रं प्रसाद्य गवां यूथाः, बहुविधवसु, रायश्च लभ्या इति निदर्शितम् । अपरं च—ये अश्वदा उत वा सन्ति गोदा ये वस्त्रदासु भगास्तेषु रायः ।
ऋ० ५.४२.८

न केवलं धनस्य दानमपितु बुद्धि-शिक्षा-ज्योतिरादीनां दानमभीप्सितमासीत् ।[1] भगवद्गीतानुसारेण कृष्णो बुद्धियोगं ददाति । १०.१०

अभयदानं प्रशस्तमेव[2] । यज्ञसम्पादनायापि दानं सोपयोगम् । विश्वामित्रो दानेन धनं प्राप्य नैकशः सोमयज्ञमनुष्ठितवान् । ऋ० ३.५३.७

दानस्य महाफलमृग्वेदे वर्णितम्—येऽश्वदास्ते सूर्येण सह संस्थिता भवन्ति, स्वर्णदा अमृतत्वं भजन्ते, वस्त्रदा दीर्घायुषो भवन्ति । ऋ० १०.१०७.२

अथर्ववेदानुसारेण दानेन स्वर्गलाभो भवति । गोदानाद् उपबर्हण-वासो-हिरण्यादिदानाच्चोत्तमं दिवं लभ्यते । ९.५.२९

उपनिषद्युगे धर्मस्कन्धे दानं प्रथमस्थानीयमेव प्रतिष्ठितम् ।[3] आत्मज्ञानाय दानं तु विशिष्टं साधनमिति सम्मतम् ।[4] शंकराचार्यानुसारेण दानमपि पापक्षयहेतुत्वात्, धर्मवृद्धिहेतुत्वाच्चात्मज्ञानकारणम् ।

बृहदारण्यके यज्ञदानतपोभिर्लोका जेतुं शक्या इति निर्दिष्टम् । ६.२.१६ । प्रजापतिर्मानवान् दत्तेत्युपादिशत् । ५.२.२

---

१. तथाहि—इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा ।
शिक्षां णो अस्मिन् पुरुहुत यामनि जीवा ज्योतिरशीमहि । ऋ० ७.३२.२६

२. विष्णुधर्मसूत्र ९२.१

३. छान्दोग्ये २.२३.१

४. अन्यसाधनानि सन्ति—वेदानुवचनं, यज्ञः, तपश्च ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दान-विमुखकृपणास्तु विनिन्दिता आसन् ।[1]

फलदृष्ट्या दानस्य वैविध्यं लक्षितमासीत् । निष्कामं फलाशारहितं तु पञ्चमहायज्ञेषु दीयमानं नित्यदानं भवति । सन्तति-पत्नी-विजय-समृद्धि-स्वर्गादिलाभाय काम्यदानं भवति । वापीकूपधर्मशालादीनामुत्सर्जनं ध्रुवदानं प्रचक्षते । विमलदानं ब्रह्मविद्भ्यः परमेश्वरानुग्रहाय समर्प्यते । गीतायां त्रिविधं दानं-सात्त्विकं, राजसं, तामसं च वर्णितम् ।

वैदिकर्षयो यज्ञं, दानं, संज्ञानं,[2] सन्तानं[3] च धर्मस्य प्रमुखमङ्गं मेनिरे । दानस्य प्रकर्षो यज्ञे विलसति । यज्ञेषु देवेभ्यो यजमानेन हविर्दानं भवति । ततोऽपि महत्त्वपूर्णमभवत् पुरोहितेभ्यो सर्वविधरत्नहिरण्यधनधान्यपरिधान-गवाश्वादीनां दानम् । दानस्यासंख्येयो राशिः प्रागेव निर्दर्शितः[4] ।

अथर्ववेदानुसारेण देवानां प्रेरणया नैके महिमशालिनो वदान्या बभूवुः । तद्यथा—

त्वं नो देव दातवे रयिं दानाय चोदय । ३.२०.५
अदित्सन्तं दापयतु प्रजानन् । ३.२०.८
शतहस्त समाहर सहस्रहस्त संकिर । ३.२४.५
दिवो विष्ण उत वा पृथिव्या महो विष्ण उरोरन्तरिक्षात् ।
हस्तौ पृणस्व बहुभिर्वसव्यैराप्रयच्छ दक्षिणा दोतसव्यात् ।। ७.२६.८

अत्र दानाय विष्णुर्याचितः ।

अमोतं वासो दद्याद् हिरण्यमपि दक्षिणाम् ।
तथा लोकान्त्समाप्नोति ये दिव्या ये च पार्थिवाः ।। ९.५.१४

अर्थाद् गृहे कृतं वासो हिरण्यं च ददतो दिव्याः पार्थिवाश्च लोकाः प्राप्या भवन्ति ।

तत्र नैमित्तिकं दानमथर्ववेद उपवर्णितम्—

अनुपूर्ववत्सां धेनुमनड्वाहमुपबर्हणम् ।
वासो हिरण्यं दत्त्वा ते यन्ति दिवमुत्तमम् ।। ९.५.२९

---

१. ऋ० १.२९.४; ७.८२.२१

२. संज्ञानेन सामाजिक-संरचना सम्भवति । सर्वेषामैकात्म्य-भावः संज्ञानं येन समाज-स्याचारे व्यवहारे च माधुर्यं प्रजायते ।

३. सन्तानः पुत्रपौत्रादयः स्वर्गेऽपि कस्यचित् तृप्तिकारका वंशस्य ज्ञाननिधेः सातत्यं प्रवर्तयन्ति । उपार्जनं तु दायं भवति ।

४. पृष्ठं ३०७ ग्रन्थेऽस्मिन् द्रष्टव्यम् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अर्थाद् वासो-हिरण्यादि-दानेन साक्षात् स्वर्गलाभः ।
ऋग्वेदे धनान्नदानमिति १०.११७ सूक्तेऽतिरिच्यते । तदनुसारेण
१. उतो रयिः पृणतो नोपदस्यत्युतापृणन् मर्डितारं न विन्दते ।
२. स इद् भोजो यो गृहवे ददात्यन्नकामाय चरते कृशाय ।
३. पृणीयादिन्नाधमानाय तव्यान् द्राघीयांसमनुपश्येत पन्थाम् ।
४. मोघमन्नं विन्दते अप्रचेताः ।
५. पृणन्नापिरपृणन्तमभि ष्यात् ।

पूर्वोक्तवचनैः स्पष्टं प्रतिभाति यद् वैदिककालेऽपि किमप्यदेयं नासीत् । परवर्तिनैकधर्मग्रन्थेषु स्पष्टमेव प्रतिपादितं यत्—

यद्यदिष्टतमं लोके यच्चापि दयितं गृहे ।
तत्तद् गुणवते देयं तदेवाक्षयमिच्छता ।। अनु० ५८.७; विष्णुधर्म सू० ९२.३२; मत्स्य० ७२.३९; मार्कण्डेय० ३५.५२,५३ ।

'वाजश्रवा प्रव्रज्याग्रहणावसरे सर्ववेदसं ददौ' इति कठोपनिषदि सूचितम् । मनुः समर्थयति—

प्राजापत्यां निरूप्येष्टिं सर्ववेदसदक्षिणम् ।
आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद् गृहात् ।। ६.३८

मनुः सत्पात्रेभ्यः, वेदपारंगेभ्यश्च देशकालविधानेन दत्तं दानं प्रशस्ततमं मन्यते ।[1]

रघुवंशे कालिदासो रघोर्विश्वजिद्यज्ञमनु सर्वस्वदानं प्रथयति—

तमध्वरे विश्वजिति क्षितीशं निःशेषविश्राणितकोशजातम् ।
उपात्तविद्यो गुरुदक्षिणार्थी कौत्सः प्रपेदे वरतन्तुशिष्यः ।। ५.१

हर्षवर्धनः प्रतिषष्ठवर्षं प्रयागे कुम्भावसरे सर्वस्वं दानं व्यधात् ।

अभयदानम्

न केवलं धनिनामेव दानं सम्भावितमपितु निस्स्वानां ब्रह्मवादिना-मभयदानं तेषां तेजोमयलोकविधृतयेऽलम् । मनु ६.३९

यस्मादण्वपि भूतानां द्विजान्नोत्पद्यते भयम् ।
तस्य देहाद्विमुक्तस्य भयं नास्ति कुतश्चन ।। ६.४०

एतदभयदानं तु संन्यासिनां कृते निर्धारितम् ।

महादानानि

पौराणिकयुगे महादानानां प्रचलनं भूय आसीत् सुसमृद्धवर्गे । तेषां संक्षिप्त-विवरणमधोविधं वर्तते—

---

१. मनुस्मृति ७.८५,८६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१. तुलापुरुषदानम्—यजमानस्य शरीरभरेण गोविन्दरूपया तुलया स्वर्णं समानीकृतम्। तस्यार्धं गुरवे शेषार्धमपरब्राह्मणेभ्यो यजमानः प्रायच्छत्। तस्मिन्नवसरे स दीनानाथासहायेभ्यो दानं प्रायच्छत्। राजादीनां महासमृद्धिशालिनामेवेदं शक्यं प्रतिभाति।

२. हिरण्यगर्भदानम्—७२ अङ्गुलानि उच्चैः ४८ अङ्गुलव्यासात्मके स्वर्णकुण्डे आत्मानं निधाय गर्भावासादिस्थितिं प्रकल्प्य जातकर्मादिसंस्कारान् कारयित्वा दिव्यशरीरमवाप्नोमीति घोषयित्वा हिरण्यकुण्डं गुरवे, पुरोहितेभ्यश्च प्रादीयत।

३. ब्रह्माण्डदानम्—ब्रह्माण्डस्य प्रतिरूपं स्वर्णस्य गोलार्धद्वयं कारयित्वा तस्मिन् अष्टानां दिग्गजानां, वेद-वेदाङ्गानां, ब्रह्मकेन्द्रीकृत्याष्टानां लोकपालानां, शिव - विष्णु - सूर्योमालक्ष्मी - मरुदादीनां मूर्तिभिः समलङ्करणं विधीयते। सर्वमेतद्दानार्थमासीत्।

४. कल्पवृक्षदानम्—वस्त्रस्वर्णालङ्कारमण्डितं सफलं, सशाखं च स्वर्णवृक्षं निर्माय यजमानस्तं प्रार्थयत--भवार्णवात्तारय मा प्रभो। 'कल्पवृक्षादि-स्वर्णं तु दानेन विसर्जितम्।

५. गोसहस्रदानम्--शिवलोक आवासारक्षणाय विधिपूर्वकं स्वर्णमयनन्दिकेश्वरसहितं गवां सहस्रं तासां पूजनं विधाय ब्राह्मणेभ्यः प्रादीयत।

कामधेनुदानम्—सवत्सां गां स्वर्णमयीं विरचय्य गुरवे यजमानः प्रादात्।

हिरण्याश्वदानम्-स्वर्णमयमश्वं परमात्मरूपं ध्यात्वा यजमानो गुरवे ददौ।

हिरण्याश्वरथदानम्—यजमानः स्वर्णमयं रथं सप्ताश्वेन सहितं प्रायच्छत्।

६. हेमहस्तिरथदानम्—सलोकपालं ब्रह्मशिव-सूर्य-नारायण-लक्ष्मी-पुष्टीनां समावेशपूर्वकं रथं ध्वजदण्डोपरि हस्तिचतुष्टयं प्रतिष्ठाप्य यजमानो ददाति स्म।

७. पञ्चलाङ्गलक-दानम्—काष्टफाल-पञ्चकं, स्वर्णमयफालपञ्चकं, स्वर्णमयवलीवर्ददशकं च प्रादीयत।

८. धरादानम्—स्वर्णमयीं पृथिवीं जम्बूद्वीपाकारा निर्माय तत्र प्रान्तपर्वतान् केन्द्रे मेरुं विरच्य दानं दद्यात्।

९. विश्वचक्रदानम्—नेम्यष्टकारषोडशकयुतं स्वर्णमयं चक्रं कारयित्वा तत्र क्रमशः शङ्ख-चक्र-गदा-पद्मधरो योगमुद्रायां विष्णुः, सप्तर्षयो विष्णोर्दशावताराश्च, गौरी मातृकाश्च, द्वादशादित्याः, चत्वारो वेदाः, पञ्चतत्त्वानि एकादशरुद्राश्च अष्टलोकपालाः, अष्टदिग्गजाश्च, अष्टशस्त्राणि[1], अष्ट

---

१. खड्गशूलगदाशक्ति-कुन्ताङ्कुशधनूंषि च।
स्वधितिश्चेति शस्त्राणि तेषु चापं प्रशस्यते॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मङ्गल्यानि[1] च, अन्तरालेषु-स्थिता देवाश्चोत्कीर्णानि। आवाहानपूर्वकं चक्रं प्रादीयत।

१०. महाकल्पलता—विद्याधरयुगल-शक्तिमूर्तिमण्डिता नैकपुष्पफलादि-युता दशकल्पलताः स्वर्णमयीः कारयित्वा ददाति स्म।

११. सप्तसागरकम्—स्वर्णमय-सप्तकुण्डेषु क्रमशो दधिदुग्धलवणादिकं निधाय तेषु ब्रह्मविष्णु-शिवादित्यादीनां मूर्त्तीर्निमज्ज्य वरुणाय होमं विधाय सप्तसागराणामावाहनं सम्पाद्य तेषां दानं विधीयते स्म।

१२. रत्नधेनुदानम्—दुर्लभरत्नमयीं सवत्सां धेनुं कारयित्वा मुखे ८४ पद्मरागमणीन् निधाय, नासाछिद्रे पुष्परागमणि-शतकं च समाविश्य भाले स्वर्णमयतिलकमङ्कयित्वा, नेत्र-कर्ण-शृङ्ग-ग्रीवा-शिरःपृष्ठ-कटि-पार्श्वोदर-पुच्छादिभागान् नानाविध-मुक्ता-मणि-रत्नादिभिः समलङ्कार्यादात्।

१३. महाभूतघटदानम्—स्वर्णमयो विशालघटो दुग्धघृतपूरित उत्कीर्ण-ब्रह्म-विष्णुशिवः अङ्कितवराहोद्धृतपृथिवि, मकरवाहनवरुणाङ्कितः, मूषक-वाहनगणेश-प्रतिमूर्तीकृतः, अक्षमालया ऋग्वेदः, पद्मेन यजुर्वेदः, वीणया सामवेदः, स्रुचा स्रुवेण चाथर्ववेद इत्येतैरुपलक्षितः प्रादीयत।

दानस्य विशेषता दत्तद्रव्यस्य मात्रया मूल्येन वा नाकलनीयापितु दरिद्रस्येषदपि दानं धनिकानां कोटिकादपि दानादधिकं फलं दद्यादिति नैकत्र प्रतिपादितम्। महाभारते तपोधनस्य ब्राह्मणस्य सक्तुदानं महिमा व्यासस्य मनोहरतीति तद्वर्णनेन निश्चप्रचम्। दानवीराणां दानशौण्डता संहितासु दानस्तुतिषु सरसमेव निबद्धा महाभारतपुराणादिषु सम्यगुप-बृंहिता जनमानसं हरति। तत्रातिदानं परिभाषितम्[2]—

त्रीण्याहुरतिदानानि गावः पृथ्वी सरस्वती।
अतिदानं हि दानानां विद्यादानं ततोऽधिकम्॥ व० स्मृति २९.१९.२

अपरं च बृहत्तमं दानं पुरुषस्यात्माहुतिरेव।[3] तदनुसारिशिबिदधीचादे गौरव-गाथास्ति। इतिहासेऽशोकहर्षादीनां महाराजानां दानातिरेको विदित एव[4]। राजा प्रतिदिनं ब्रह्मज्ञाय ब्राह्मणाय दोग्ध्रीः, स्वर्णभूमिं, गृहान्,

१. दक्षिणावर्तशङ्खश्च रोचना चन्दनं तथा।
मुक्ताफलं हिरण्यं च छत्रं चामरमेव च॥ आदर्शश्चेति।

२. कतिपयवस्तूनां दानं प्रशस्यमिति धर्मशास्त्रविदां मतम्। तथा हि स्वश्रमेणार्जितम्, आवासः, भेषजमित्यादि देयानि।

३. ऋग्वेद १०.९०.१६

४. राजभिर्ब्राह्मणेभ्यो विशेषतो नैकविधमहादानानां सूची History of Dharmaśāstra Vol. II pt II. page 56 द्रष्टव्या।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कन्यकाश्च ददातु ।[1] दानं प्रच्छन्नं भवेत् । प्रकाशनेन तस्य गौरवं क्षीयते ।

एतादृशां वस्तूनां दानं न कर्तव्यं येषां त्यागेन कुटुम्बस्य सदस्या दुःखमनुभवेयुः ।[2] मनुना स्पष्टं निर्दिष्टम्—

शक्तः परजने दाता स्वजने दुःखजीविनि ।
मध्वापातो विषास्वादः स धर्मप्रतिरूपकः ॥ ५१.९

महाभारते परिजनानां परितोषानन्तरमेव दानं देयमिति विधानमधोविधम्—

अपीडयन् भृत्यवर्गमिति । अनु० ३७.३
अपीडया च भृत्यानां धर्मस्याहिंसया तथा । अनु० ३७.५

मनुः प्रबोधयति—याचकायाभीष्टमवश्यमेव देयम्, यतो हि नाम कश्चिद्याचकोऽज्ञात एव तारको भवेद् भवार्णवात् । जलदानेन तृप्तिः, अन्नदानेनाक्षयं सुखं, तिलदानेनाभीष्टसन्ततिः, दीपदानेनोत्तमचक्षुः, भूमिदानेन भूमिः, स्वर्णदानेन दीर्घायुः, गृहदानेन प्रासादः, रूप्यदानेन रूपव्युष्टश्च प्राप्यन्ते ।[3] न केवलमिहलोके परलोकेऽपि दानं भूयिष्ठं फलति । वस्त्रदानेन चन्द्रस्य, अश्वदानेनाश्विनो लोकश्च प्राप्यते । रथदानेन सुपत्नी, अभयदानेनैश्वर्यं, धान्यदानेन सौख्यं, ब्रह्मदानेन ब्रह्मपदं[4] च लभ्यम् । दानेन कीर्तिर्भवतीति प्रतिपाद्य महाभारते नैकविधवस्तुदानेनेह लोके परलोके च व्यष्टिशः पृथक् पृथग् लाभा निर्दिष्टाः । यथा—

१. गन्धमाल्यपानीयानां प्रदानेन कीर्तिर्भवति ।
२. अन्नपानप्रदानेन कामभोगतस्तृप्यते ।
३. सर्वभूतानां सान्त्वनाप्रदानेन सर्वशोकविमुक्तिः ।
४. दीपलोकप्रदानेन चक्षुष्मान् भवति ।
५. प्रेक्षणीयप्रदानेन स्मृतिमेधावित्तिः प्राप्यन्ते ।
६. ब्रह्मदेयां कन्यां दत्त्वा दासीदासमलंकारान् क्षेत्राणि गृहाणि च लभते ।
७. बलिपुष्पप्रदानेन चिरं स्थानं लभते ।
८. सहस्रगोप्रदानेन देवलोकं प्राप्नोति, सर्वं कुलमासप्तमं तारयति च ।
९. हिरण्यदानं स्वर्गाय भवति ।

---

१. याज्ञ० स्मृति १.१३३
२. आप० ध० सू० २.४९.१०-१२; बौ० ध० सू० २.३.१९; याज्ञ० स्मृति २.१७५
३. मनुस्मृति ४.२२८-२३० ।
४. तत्रैव ४,२३१,२३२ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१०. छत्रप्रदानेन वरिष्ठं गृहम्पादत्रप्रदानेन यानं च लभते ।
११. वस्त्रप्रदानेन सुन्दररूपमवाप्यते ।
१२. गन्धप्रदानेन सुरभिर्नरः स्यात् ।
१३. पुष्पफलयुक्तवृक्षदानेन—
स स्त्रीसमृद्धं बहुरत्नपूर्णं लभत्ययत्नोपगतं गृहं वै ।
१४. स्रग्धूपादिदानेनारोग्यं लभते ।[1]

अन्यच्च—

परं लोकं गोप्रदास्त्वाप्नुवन्ति दत्त्वानड्वाहं सूर्यलोकं व्रजन्ति ।
वासो दत्त्वा चन्द्रमसं स लोकं दत्त्वा हिरण्यममृतत्वमेति ॥

आर० १८४.८

धेनुं दत्त्वा सुव्रतां साधुदोहां कल्याणवत्सामपलायिनी च ।
यावन्ति रोमाणि भवन्ति तस्यास्तावद्वर्षाण्यश्नुते स्वर्गलोकम् ॥ १८४.९

अदानान्महती क्षतिर्दानेन च विभुता प्राप्यत इति गरुडपुराणे २.२४.२ विशदीकृतम् । अन्यच्च—

अदत्तदान्नाच्च भवेद्दरिद्रो दरिद्रभावात् प्रकरोति पापम् ।
पापप्रभावान्नरकं प्रयाति पुनर्दरिद्रो पुनरेव पापी ॥ २.१४.१९

गोदानम्

मरणासन्नो गोदानं कुर्यादिति अथर्ववेदे १२.४.३६ । गोदानं वैदिकयुगे सविशेषं प्रशस्यमासीदेव । मनुमतेन गोदानेन सूर्यलोकोऽवाप्यते ।[2] अग्निपुराणानुसारेण स्वर्णालंकारादिभूषितगोदानेन तावद्वर्षाणि स्वर्गवासो लभ्यते यावन्ति तस्याः शरीरे लोमानि भवन्ति । २१०.३० । याज्ञवल्क्यानुसारेण कपिलाया गोर्दानेन सप्तवंशश्रेणीः पुनाति । १.२०५ । अग्निपुराणानुसारेण मरणकाले या गौर्दीयते सा वैतरणीं तारयति । २१०.३४ ।

याजकस्य प्रोत्साहनाय पारिश्रमिको दक्षिणासीत् ।[3] दक्षिणा स्वयमेवेहलोके परलोके च प्रभूतफलदायिनीति वैदिकयुगे धर्मस्यैकं प्रधानमङ्गमासीत् । ऋग्वेदे दक्षिणाप्रकरणे बहुविधदेयानि अधोविधं निर्दिष्टानि—विंशतिगाः, वध्वश्च सम्राट् चायमानो भरद्वाजाय ददौ । ६.२७.८ । कीदृशी दक्षिणा किं फलं ददातीति वर्णितम् । यथा—

---

१. अनुशासनपर्वणि ५८ अध्यायतः ।
२. गोदो ब्रध्नस्य विष्टपम् । मनु० ४.२३१
३. दक्षिणा तु प्रायो दानस्य पर्यायः । मनु० ४.२४७ अनुसारेणाभयदक्षिणा भवति सर्वतो ग्राह्या ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१. स्वर्गे उच्चस्थाने दक्षिणावन्तः प्रतिष्ठिता भवन्ति।
२. अश्वदाः सूर्यलोके स्थानं भजन्ते।
३. हिरण्यदा अमृतत्वं भजन्ते।
४. वासोदा दीर्घायुर्लभन्ते।[1]

अस्मिन् सूक्ते कविरग्रे निदर्शयति दक्षिणाशौण्डस्य लाभाः —

तमेव ऋषिं तमु ब्रह्माणमाहुर्यज्ञन्यं सामगामुक्थशासम्।
स शुक्रस्य तन्वो वेद तिस्रो यः प्रथमो दक्षिणया रराध।
दक्षिणाश्वं दक्षिणा गां ददाति दक्षिणा चन्द्रमुत यद्धिरण्यम्।
दक्षिणान्नं वनुते यो न आत्मा दक्षिणां वर्म कृणुते विजानन्।

ऋ० १०.१०७.६,७।

अपरं च भोजाः (दानशौण्डाः) न म्रियन्ते वा विनश्यन्ति, न कष्टं विपत्तिं वा सहन्ते। स सुरभितावासं सुवासिनीं वधूं, विजयं च लभते। ऋषिर्भोजाय प्रार्थयते—

भोजं देवासोऽवता भरेषु भोजः शत्रूनुत्समनीकेषु जेता।[2]

गौतमानुसारेण पापाद् विमोचनं हिरण्यगोवासोऽश्वभूमितिलघृतान्न-दानेन संभवति। १९.१६। वसिष्ठोऽस्यां दिशि भूमिदानं विशेषयन्नाह —

यत् किंचित् कुरुते पापं पुरुषो वृत्तिकर्शितः।
अपि गोचर्ममात्रेण भूमिदानेन शुध्यति॥ २९.१६

संवर्तः समर्थयति—

सुवर्णदानं गोदानं भूमिदानं तथैव च।
नाशयत्याशु पापानि अन्यजन्मकृतान्यपि॥

हिंसातो यानि पापानि जायन्ते तेषामपवर्तनाय दानमेव भूयो प्रभवति।[3]

कस्य दानं न ग्रहणीयं प्राणरक्षार्थमपि' इत्यस्मिन् विषये महाभारतीयं मतमनुशासनपर्वणि विमर्शमर्हति। तथाहि—

राजन् प्रतिग्रहो राज्ञो मध्वास्वादो विषोपमः। ९४.१७।

मनुना समर्थित मेतन्मतमधोविधम्

दश सूनासहस्राणि यो वाहयति सौनिकः।
तेन तुल्यः स्मृतो राजा घोरस्तस्य प्रतिग्रहः॥[4] ४.८६

---

२. ऋ० १०.१०७.२
३. ऋ० १०.१०७.८-११
१. मनुस्मृति ११.१२७, १२९-१३१, १३३-१३८
२. मन्वनुसारेणान्येऽपि दानग्रहणदिशायोग्याः सन्ति—

सूनाचक्रध्वजवतां वेशेनैव च जीवताम्। ४.८४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तीर्थे दानग्रहणं तु कुम्भीपाके पतनाय भवति ।[1]
कस्मै दानं किं च देयमिति मनुर्विशदयति—

सान्तानिकं यक्ष्यमाणमध्वगं सर्ववेदसम् ।
गुर्वर्थं पितृमात्रर्थं स्वाध्यायार्थ्युपतापिनः ॥ ११.१

एते ब्राह्मण-स्नातका दानार्हा धर्मभिक्षुकाः संज्ञायन्ते । ११.२

सर्वरत्नानि राजा तु यथार्हं प्रतिपादयेत् ।
ब्राह्मणान् वेदविदुषो यज्ञार्थं चैव दक्षिणाम् ॥ ११.४

शक्तः परजने दाता स्वजने दुःखजीविनि ।
मध्वापातो विषास्वादः स धर्मप्रतिरूपकः ॥ ११.९

अर्थाद् दुःखार्तेभ्यः स्वजनेभ्योऽपि दानं दद्यात् ।

पुराणेषु दानवैशद्यं सौम्यं प्रतिभाति । तथाहि पद्मपुराणे—

ग्रासमात्रं तथा देयं क्षुधार्ताय न संशयः ।
वचनं च तृणं शय्यां गृहच्छायां सुशीतलाम् ।
भूमिमापस्तथा चान्नं प्रियवाक्यमनुत्तमम् ।
आसनं वसनं पाद्यं कौटिल्येन क्विर्जितः ।
आत्मनो जीवनार्थाय नित्यमेव करोति यः ।
इत्येवं मोदतेऽसौ वै परत्रेह तथैव च ॥ भूमि० १३,११–१४

पापनिवृत्तिः

मन्वनुसारेणान्नाद्यजानां जीवानां हिंसया प्रभवं पापं घृतप्राशेनापाकृतं स्यात् । दुग्धाहारेण शस्यौषधानां पापाद्विमुच्यते । कृषिकर्मोत्पन्नानां हिंसानामपवर्तनं पयोव्रतेन दिनमेकं गोरनुगमनेन च जायते ।[2]

दानवद् वरदानं प्रथितमेव । तद्यथा बृहदारण्यके प्रवाहणो गौतमाय कथयति—वरं भगवते गौतमाय दद्मः । ६.२.४ । अर्थाद् यद् भवतोऽभीष्टं तद्दास्यामि । कठोपनिषदि यमो नाचिकेतसे वरं ददाति—त्रीन् वरान् वृणीष्वेति । १.१.९

---

१. ब्रह्मवैवर्ते प्रकृतिखण्डे तीर्थानि गणयित्वा निष्कृष्टमधोविधम्—

एतेष्वन्येषु यो दानं प्रतिगृह्णाति कामतः ।
स च तीर्थं प्रतिग्राही कुम्भीपाकं प्रयाति च ॥

२. मनुस्मृति ११.१४१–१४४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तं वृक्षा अपसेधन्ति छायां नो मोपगा इति ।
यो ब्राह्मणस्य सद्धनमभि नारद मन्यते ।। अथर्व० ५.१९.९

अर्थात् पापिनो जीवने सौरभं न सम्भवति । अत एव पापनिवृत्तिः करणीया ।

मानवो जानन्नजानन्नपि पापं चरति ।

इन्द्रियाणां प्रसङ्गेन धर्मस्यासेवनेन च नरकगमनमिति मनुः १२.५२ ।

तस्माद् दुर्गतिं विभाव्य नैकोपायैरात्मरक्षणं वैदिककालतः समीहितं दृश्यते । द्विविधा पापनिवृत्तिः सम्भवति । तथाहि—

(१) पापं न कुर्यात् ।

(२) यदि नाम पापं कृतमेव, तर्हि तस्मात् कारणाद् दण्डो नापतेत् ।

पापप्रक्षालनायासंख्योपाया युगप्रवृत्तिमनुसन्धाय निर्दिष्टाः । तेषु प्रार्थना समीचीनतमम् । प्रायः सर्वे देवाः स्तुतिमात्रेणापि पापफलाद्रक्षितुं प्रार्थिता[1]-स्तथापि तत्र देवद्वयी सविशेषं महत्त्वं भजते यतो हि नाम इयं द्वयी सर्वत्रानायाससुलभा, प्रत्यक्षमेव पावित्र्यकारिणी वर्तते ।[2] सा आपः (जलम्), अग्निश्चेति संज्ञिता । तथाहि—

इदमापः प्रवहत यत्किंच दुरितं मयि ।
यद्वाहमभिदुद्रोह यद्वा शेप उतानृतम् ।। ऋ० १.२३.२२
अप नः शोशुचदघमग्ने । ऋ० १.९७.१–८

ऋषि-मनीषा प्रथयति—'अनागसः स्याम' ऋ० १.५०.१५ । अर्थात् लोके पापं न प्रचरेत् ।

नानाविधपापं नैकपर्यायान् परितः कृत्वा वर्णितम् ।[3] यथा पुण्येनेहलोके परलोके च सुखशान्त्यभ्युदयानां प्राप्तिर्भवेत्तथैव पापेनेहामुष्मिल्लोके च विपत्तिदुःखसन्तापानां प्रादुर्भावोऽवश्यम्भावी एव । तद्यथा निरुक्ते भणितम्—पापत्यमानोऽवाङ्गेव पतति । अर्थात् नरके पतति पापः ।

अत एव पुण्यानां संचयादपि यतः कुतश्चिज्जातानां पापानां क्षयोऽभीष्टतमं कार्यम् ।

---

१. कृष्णस्मरणं प्रायश्चित्तेष्वनुत्तमम् । विष्णु० २.६.३९

२. अस्मादेव कारणात् प्रायः सर्वेषु धार्मिकविधानेषु कलशे वान्यथा वा जल-सम्भृतिर्होमादिनाग्नेश्च प्रतिष्ठा चादिकर्म भवति । तीर्थानां परवर्तियुगे महत्त्वं तदेव प्रकटयति ।

३. पापस्य पर्यायाः सन्ति—अघम्, आगः, एनस्, अंहस् रिप्रं, दुश्चरितम्, दुष्कृतम्, दुरितम्, द्रुग्धम् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

देवाः पितरश्च पापाद् रक्षितुं समर्था इति निरूढा धारणासीत्। तद्यथा वामदेव ऋषिर्ऋग्वेदे सवितारं प्रार्थयते—

अचित्ती यच्चकृमा दैव्ये जने दीनैर्दक्षैः प्रभूती पुरुषत्वता।
देवेषु च सवितर्मानुषेषु च त्वं नो अत्र सुवतादनागसः॥ ४.५४.३

पापान्मुञ्चन्तु पितरो यथाथर्ववेदे—पितॄन् ब्रूमस्ते नो मुंचन्त्वंहसः। ११.६.१६ कुत्सोऽघं (पापं) विनाशयितुमग्निं प्रार्थयते—अप नः शोशुचदघम्[1]।

पापमाचरन्तो जना गभीरं पदं (नरकस्थानं) स्वस्मै परिकुर्वन्ति[2]। ते 'पापाः सन्ति अनृता असत्याः। अर्थादसत्याचरणं मिथ्याभाषणं च पापं नरकाय भवतः। बहूनां देवानां व्रतानि सन्ति। तेषामतिक्रमो मूलपापम्।

पुरा कतिपयमुनीनां मतमासीद्यत् क्वचित् कश्चिज्जनः स्वेच्छया पापं नाचरेदपितु सर्वेश्वरेण प्रेरितः स साधु वासाधु वाचरति।[3]

कस्मात् कारणात् पापं भवतीति विशदयन् ऋषिरापः पवमानं च प्रार्थयते 'एनसो मुञ्चतु' इति। पापं तु मलमेवावद्यं घोषितम्। तत्तु द्रोहेण, अनृतेन, शापेन च प्रादुर्भवति।[4]

पापस्य प्रवर्तकानि अन्यत्रापि दर्शितानि। तद्यथा—सुरा, मन्युः, द्यूतः, अचित्तिः (अनवधानम्) च। ऋ० ७.८६.६

महापापस्यापाकरणाय यज्ञोऽप्यनुष्ठितः[5]। यज्ञप्रकरणे पापस्य स्वीकारेणापि तस्मान्निवृत्तिर्जायते।[6]

---

१. ऋग्वेदे १.९७.१–८ अघमर्षण-सूक्तमिदं। कुत्सेन कृतं कौत्समिति प्रथितम्।

२. पापासः सन्तो अनृता असन्ता इदं पदमजनता गभीरम्। ऋ० ४.५.५
अन्यत्रापि ऋग्वेदे नैकशः पापनिवृत्तये देवाः प्रार्थिताः। यथा २.२८.६; १.१०६.१; २.३३.३; ५.८३.९।

४. इदमापः प्र वहतावद्यं च मलं च यत्।
यच्चाभिदुद्रोहानृतं यच्च शेपे अभीरुणम्।
आपो मा तस्मादेनसः पवमानश्च मुञ्चतु॥ ६.१७

३. कौषीतकिब्राह्मणोपनिषदि ३.९

५. सर्वं वा एतेन पाप्मानमतरन्नपि वा एतेन ब्रह्महत्यामतरन् सर्वं पाप्मानं तरति, तरति ब्रह्महत्यां योऽश्वमेधेन यजते। तै० सं० ५.३.१२.१,२; शतप० १३.३.१.९

६. तै० ब्रा० १६.५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

देवा विषमतां संदधानानि अघानि परावर्तयितुं समर्था इति विज्ञाय ऋषयस्तान् प्रार्थयन्ते विशेषत आदित्यान्[1]। तद्यथा—

विदा देवा अघानामादित्यासो अपाकृतिम् । ऋ० ८.४७.२

अगस्त्यर्षिः नैकपापानि समं शमयितुं द्यावापृथिव्यौ प्रार्थयते—

देवान् वा यच्चकृमा कच्चिदागः सखायं वा सदमिज्जास्पतिं वा ।
इयं धीर्भूया अवमानमेषां द्यावा रक्षतं पृथिवी नो अभ्वात् ।
ऋ० १.१८५.८

अतिथेः सत्कारेण पापानि विरलीभवन्ति । अथर्व० ९.६.२५

अन्यत्रापि—

ब्राह्मणासः पितरः सोम्यासः शिवे नो द्यावापृथिवी अनेहसा ।
पूषा नः पातु दुरिताद् ऋतावृधः रक्षा माकिनो अघशंसे ईशत ॥
ऋग्वेदे ६.७५.१०

आपः पापं प्रक्षालयतीत्यथर्ववेदे

आपो मा तस्मात्सर्वस्माद्दुरितात् पान्त्वंहसः ।
अरिप्रा आपो अप रिप्रमस्मत् प्रास्मदेनो दुरितं सुप्रतीकाः ॥ १०.५.२२-२४
स्योना मापः पवनैः पुनन्तु । अथर्व० १८.३.११

यजुर्वेदे च—आपः शुन्धन्तु मैनसः ॥ २०.२०

अर्थात् जलं मम पापानि प्रक्षालयतु ।

त्रिविधं पापशोधनं सम्भवेदिति अथर्ववेदे (६.११५) ब्रह्मा नामको ऋषिर्ब्रूते । विश्वे देवाः प्रार्थिताः पापं शोधयन्त्विति निगदितम् ।

शतपथब्राह्मणानुसारेण आपः (जलं) शुद्धिं विदधाति ।[2]

छान्दोग्योपनिषदि महापातकानि संख्यातानि सन्ति । तद्यथा—स्वर्णचौरः सुरापायी, गुरु-तल्पगामी, ब्रह्मघाती, च पञ्चकस्त्वेतेषां सहचरः । ५.१०.९ । स तु पञ्चमः पञ्चाग्नीनामौपनिषदिकज्ञानेन शुद्धो भवति । ५.१०.१० ।

महाभारते गोदानेन च पापप्रक्षालनमिति—

कानिचिद्यानि दुर्गाणि दुष्कृतानि कृतानि च ।
तरन्ति चैव पाप्मानं धेनुं ये ददति प्रभो ॥ अनु० ७७.९

---

१. मैकडानलः प्रवदति—His (Varuṇa's) wraths aroused by sin, the infringement of his ordinances, which he severely punishes. He removes sin as if untying a rope. Vedic Reader p. 135.

२. आपोऽस्मान् मातरः शुन्धयन्तु । शत० ३.१.२.११ । परवर्तियुगे नदीकासार-सरोवरकुण्डादीनां तीर्थत्वं प्रपन्नमित्यत्र मूलितं विभाति ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ऋग्वेदे १.१०६.१–६ मन्त्रेषु 'विश्वस्मान्नो अंहसो निष्पिपर्तन' इति पुनरावर्तने पापेभ्यः पारगमनं समीहितम् ।

अथर्ववेदस्यैकादशकाण्डस्य षष्ठसूक्ते पुनरावर्तनेन २२ मन्त्रेषु पापनिवृत्तये स्तुतिः ।[1] तद्यथा प्रथममन्त्रः —

अग्निं ब्रूमो वनस्पतीनोषधीरुत वीरुधः ।
इन्द्रं बृहस्पतिं सूर्यं ते नो मुञ्चन्त्वंहसः ।। ११.६.१

सूक्तेऽस्मिन् न केवलं देवा अपितु पशवः, पक्षिणः, यक्षाः, पर्वताः, समुद्राः, नद्यः, मनीषिणः, यज्ञः, यजमानः, दर्भः, यवः, राक्षसाः, सर्पाः, संवत्सराः, मासाः, विश्वे देवाः, सपत्नीका इत्यादयः 'मुञ्चन्त्वंहसः' इति प्रार्थना ।

यजुर्वेदेऽग्निर्दुरितेभ्यो रक्षितुं प्रार्थितः —

अग्निर्नः पातु दुरितादवद्यात् । ४.१५
परिमाग्ने दुश्चरिताद् बाधस्वा मा सुचरिते भज । ४.२८

इहलोकेऽपि पापानि फलन्ति नामेति प्रतिपादितमथर्ववेदे । यथातिथ्यदोषादातिथेय इष्टापूर्तपयोरसोर्जास्फाति-प्रजाकीर्तिपशुयशाःश्रीसंविद्विहीनो जायते । अथर्व० ९.६.३१–३७

यथा पूर्वमुक्तम्—यज्ञेन, स्तुत्या, मनसा जपेन, तपसा प्रायश्चित्तेन वा[2] पापाद्विरतिर्भवेन्नाम । उपनिषदनुसारेण पुनर्ब्रह्मज्ञानेन पापात् प्रमुच्यते[3] । ब्रह्मज्ञानेन पापात् प्रमोचितो ब्रह्मलोकं गच्छति । गायत्रीमुखमग्निरिति जानन् पुरुषः स्वकृतपापेभ्योऽनाविल उपतिष्ठते[4] । मरणकाले पापेन पापलोकं नीयते ।[5] वैश्वानरविद्यां विजानन् योऽग्निहोत्रं करोति, तस्य सर्वे पाप्मानः प्रदूयन्ते । छान्दोग्ये ५.२४.३ । ब्राह्मणो (ब्रह्मज्ञः) पापेभ्यः सर्वथा निर्लिप्तः । बृहदारण्यके ४.४.२३ । य एवं वेद स पाप्मानं जहाति । बृहदा० ५.५.३ ।

---

१. अस्य वेदस्य चतुर्थकाण्डस्य षड्विंशसूक्ते 'ते नो मुञ्चन्त्वंहसः' इति पुनरावर्तनेन सप्त मन्त्राः सन्ति । तेषु द्यावापृथिव्यौ पापनिवारणाय प्रार्थिते ।

२. तैत्तिरीय संहिता २.१.४.१; ३.१.३.२; ५.१.९.३ । ५.३.१२.१ । वाज० सं० ३९.१२ । अथर्व० १४.१,३०

३. विज्ञानं ब्रह्म चेद्वेद, तस्माचेन्न प्रमाद्यति, शरीरे पाप्मनो हित्वा सर्वान् कामान् समश्नुते । तैत्तिरीयोपनिषद् २.५.१ । छान्दोग्ये च ब्रह्मज्ञानेन पापं न श्लिष्यते इति । ४.१४.३

४. बृहदारण्य० ५.१४.८; तैत्तिरीप० २.९.१

५. प्रश्न० ३.७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्यत्रापि उपनिषत्कालिकब्रह्मदर्शनस्य महत्त्वं पापानामपाकरणदिशि प्रसिद्धं प्रतिभाति। यथा—बृहदारण्यके विद्यत्येनं पाप्मनः। ५.७.१। 'शरीरे पाप्मनो हित्वा' इति तैत्तिरीये २.५.१। तरति शोकं तरति पाप्मानम्। मुण्डके ३.२.९। एवं हवै स पाप्मना विनिर्मुक्तः। प्रश्न ५.५।

मन्वनुसारेण वेदज्ञ आत्मनः कर्मजं दोषं दहति। १२.१०१

महात्मनां प्रभावः

यथा तीर्थदर्शनेन पापानि अपाक्रियन्ते तथैव महात्मनां दर्शनेनापि सम्भवति। महाभारतस्यारण्यकपर्वणि भीष्मो ब्रह्मर्षि-पुलस्त्यं दृष्ट्वा निवेदनं करोति—

"तव संदर्शनादेव मुक्तोऽहं सर्वकिल्विषैः"। ८०.१९

भागवते समर्थितमेतत्—

न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः।
ते पुनन्त्युरुकालेन दर्शनादेव साधवः॥ १०.४८.३१

महात्मनां चरितस्य श्रवणेनापि पापप्रणाशो भवति। वैशम्पायनो महाभारते प्रवदति जनमेजयं प्रति—

हन्त ते कथयिष्यामि ययातेरुत्तरां कथाम्।
दिवि चेह च पुण्यार्थां सर्वपापप्राणाशिनीम्॥ आदि० ८१.९

उपनिषद्युगे पापः पाप्मा च समानार्थौ इति नैकशश्चर्चितम्। उपासनेन पापान्मोक्ष इति कौषीतकिब्राह्मणोपनिषदि निगदितम्[1]। २.७

पापावरोधनम्

वैदिकयुगे भ्रूणहत्या भृशं पापमासीत्। ततोऽवरं पापं ब्राह्मणहत्या निर्णीता।[2] तदा सूर्योदये सूर्यास्ते च शयनं पापमासीत्।[3] नैकविधानि पापानि।

उपपातकिनः सन्ति वेदविहीनः, गुरुदूषकः, नास्तिकः नास्तिकजीवीः, सोमविक्रेता च।[4]

पापिष्ठानां सर्वथा बहिष्कारः समाजे पापवृत्तेरवरोधाय प्रथमोपायः संचिन्तित आसीत्। तेषां संसर्गस्त्याज्य इति घोषः।[5] अन्यत्रापि पूर्वमेव

---

१. सूर्योपस्थानेनाहोरात्रेण कृतं पापं नश्यति।
२. तै० सं० २.५.१२। काठकसं० ३१.७ ३. तै० ब्रा० २.८.११
४. शब्दकल्पद्रुमे पृष्ठे २५७। ४९ विधानि उपपातकानि गणितानि।
५. मनु० ११.१८०; याज्ञ० ३.२६१; अग्निपु० १७०.१७२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

संसर्गजं पापं व्याकृतम्।[1]

बौधायनानुसारेण त्रिविधानि पापानि भवन्ति—पातनीयानि समुद्र-संयानम्, ब्रह्मस्वन्यासापहरणम्, भूम्यनृतम्, सर्वपण्ये व्यवहरणम् शूद्रसेवा, शूद्राभिजननं च।

पापानां वैविध्यं तेषां संख्या च कालक्रमेण बृहत्संजाते। तत्रोपपातकानि सन्ति नैकविधानि गणनापरिधेर्बाह्यानि। कतिपयध्यानाकर्षकाणि उपपातकानि सन्ति—नास्तिकेभ्यो जीविकाग्रहणम्, वेदविस्मृतिः, आत्मविक्रयः, पित्रोस्त्यागः पुत्रत्यागः, स्वाध्याय-त्यागः, वार्धुष्यम्, तडागारामयोर्विक्रयः आकराधिकारः, महायन्त्रप्रवर्तनम्, औषधीनां हिंसा, स्त्रियाजीवः, अशुष्कवृक्षपातनम्, असच्छास्त्राध्ययनम्, संगीतनाट्यनृत्यादिकम्।[2]

सुरापानं मनुर्भृशं निनिन्द। तत्तु महापातकमेव। तत्समान्येव वेदत्यागः, वेदनिन्दा, मिथ्या साक्ष्यम्, अखाद्यभोजनम्, निन्द्यान्नभक्षणं, परस्त्रीगमनम् अगम्यगमनं च। स नामग्राहं तानि धिक्करोति स्म।[3]

प्रायश्चित्तम्

साधारणतो येनोपायेन पापफलाद् विमुक्तिः स्यात्, स प्रायश्चित्तम्। कुकृत्यं कृत्वा पापी पण्डितपरिषदा निर्णीतं प्रायश्चित्तमनुष्ठायैवेहलोके परलोके वा पापाफलभोगाद् विमुक्तो भवतीति लोकेधारणा बभूव।[4] प्रायश्चित्तविधानं सौष्ठवानुरूपं सुकृतं विभाति। यतो हि नाम अशीतिवर्षेभ्योऽधिकवृद्धः षोडशवर्षान्न्यूनतरवयस्कोऽर्धं दण्डमर्हतः। तथैव स्त्रियो

---

१. संसर्गस्तु त्रिविधः—प्रथमकोटिकः—योनिसम्बन्धः, पौरोहित्यम्, वेदशिक्षणम्, एकपात्रभोजनम्। द्वितीयकोटिकः एकवाहनासनशय्योद्धरच्छदभोजनपंक्तिभोगः सहाध्ययनं च। तृतीयकोटिकः वार्तालापः, शरीरस्पर्शः, गृहे भोजनम्, दानग्रहणम्। कलियुगे तु केवलं पाप एव त्याज्यः। अन्यथा सत्ययुगे पापस्य जनपद एव त्याज्य आसीत्, त्रेतायुगे ग्रामः द्वापरे तु पापस्य कुटुम्बं सम्बन्धयोग्यं नासीत्। पारस्कर गृह्यसूत्रे १.२५,२६। संसर्गिणां प्रायश्चित्तेन शुद्धिः।

२. मनु० ११.५९–६६

३. मनु० ११.५६–५८

४. मनुर्विशदयति—अकुर्वन् विहितं कर्म निन्दितं च समाचरन्।
प्रसक्तश्चेन्द्रियार्थेषु प्रायश्चित्तीयते नरः॥ ११.४४
प्रायश्चित्तविधानाद् भिन्नमेवासीद् राजदण्डः। उभयविधं दण्डविधानं प्राचरत् पुरा। विष्णुधर्मसूत्र ५४.३३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

रुग्णाश्च प्रायश्चित्तार्धगम्या मताः। साधारणतो ब्राह्मणानां कृते दण्डोऽन्यवर्णापेक्षयाधिकतरो निर्धारित आसीत्[1]। वारंवारं कृतपापाय कठोरप्रायश्चित्तं विहितमासीत्।

स्वयमेव प्रायश्चित्तनिर्णयो न विधेयोऽपितु—

विख्यातदोषः कुर्वीत पर्षदोऽनुमतं व्रतम्॥ याज्ञ० ३.३००

परिषदो राजकीयन्यायालयवद् व्यवाहरन्। परिषत्सदस्या यदि धर्मशास्त्रविरुद्धं प्रायश्चित्तं निर्णयेयुस्तर्हि ते पापभाजो भवेयुः। निर्णयस्तु सर्वसम्मतो भवेदिति प्रचोदितम्।[2]

साधारणतोऽकामतः कृतं पापं प्रायश्चित्तेन शुद्धचतीति मतमासीत् शास्त्रकाराणाम्। तथापि वैदिककालतः कामतः कृतानि पापानि शोधयितुमपि प्रायश्चित्तानि क्वचिद् दृश्यन्ते। प्रायश्चित्तं करणीयमेव। यतोहि नाम प्रायश्चित्तमकृत्वा समाजाद् बहिष्कृत आसीत् पाप्मा पुरुषः।[3] अपरं च स पापानुसारेण रूपविपर्ययं, कुनखित्वं, विविधरोगं नरकं च भजते। प्रायश्चित्तं विशुद्धयेऽवश्वयमेव चरितव्यम्। मनु० ११.४८–५३, ७१। इहलोके परलोके च पापेभ्यः फलिता दुर्गतिः प्रायश्चित्तेन प्रोज्झितुं शक्यते।

प्रायश्चित्ते किं करणीयम्? मन्वनुसारेण वने वासः (११.७२), अग्नौ पतनं (११.७३), अश्वमेधादियज्ञः, वेदादीनां जपः इत्यादीनि प्रायश्चित्तम्। कठोरतमं प्रायश्चित्तं तु प्राणान्तकमेव। तत्र सन्ति बहूनि प्रायश्चित्तानि सुकराणि। यथा घृतप्राशः, ऋक्शतजपः, शंखपुष्पीशृतपयःपानं, कुशवारि-

---

१. अन्यत्र ब्राह्मणाय स्वल्पतरो दण्डोऽपि विहित आसीत्। हत्याभियोगे ब्राह्मणस्य प्रायश्चित्तादर्धमेव क्षत्रियकृते निर्धारितमस्ति।

२. विचारस्तादृशः कार्यो यथा सर्वे सभासदः।
एकवाक्यतया ब्रूयुस्तथा श्रेयोऽधिगच्छति॥

३. पापे कृते प्रायश्चित्ताकरणं जातिभ्रंशकरं स्मृतम्। मनु० ११.६७। अन्यच्च— अपात्रीकरं मलावहं च पापम्। ११.६९,७०। सर्वस्वदानं (११.७६) ग्रामान्ते वासः (११.७८) गोब्राह्मणार्थं प्राणत्यागः (११.७९), अश्वमेधावभृथजले स्नानम् (११.८२), अग्निप्रतप्तमदिरापानं (११.९०), वालवास-जटिध्वजिजीवनविधिः (११.९२), राजदण्डयाचनम् (११.९९)। तप्तलौहशय्याशयनम् (११.१०३), कृच्छ्राचरणम् (११.१०५), चान्द्रायणं (११.१०६), गोचर्मपरिधानं कृत्वा गोष्ठे वासः (११.१०८), गोधूलिपानम् (११.११०) गर्दभचर्मावरणं पापकथनं च (११.१२३), प्राणायामः (११.१४१), जपः (११.१४२), व्रतप्राशः (११.१४३), पयोव्रतं (११.१४४) इत्यादीनि प्रायश्चित्तविधानानि।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पानं, प्राजापत्यव्रतम्, पञ्चगव्यपानं, पयःपानं, सचैलस्नानमित्यादीनि । मनु० ११.१७४ ।

पापप्रवृत्तेः सूक्ष्मं विश्लेषणं परवर्तिग्रन्थेष्वपि परिचीयते । तथा हि गरुडपुराणानुसारेण गोवनोपवन-तडाग-भार्यादीनां विक्रयस्तु पापमेव । १०५.१४–१७ ।

परवर्तियुगे पापनिवृत्ति-योजना धर्मशास्त्रेषु सम्यक् प्रथिता । तथाहि—

ख्यापनेनानुतापेन तपसा ध्यानेन च ।
पापकृत्मुच्यते पापात्तथा दानेन चापदि ॥ मनु० ११.२२७

पापस्य फलं भोक्तव्यमेवेति प्राचां निश्चितधारणासीत् । यदि नाम पापं कृतमेव तर्हि तस्य फलं नापतेदिति धर्माचार्याणामुपायप्रपञ्चैः सम्भावितम् । काणे महोदयः पापनिवेदनं, अनुतापः, प्राणायामः, तपः, होमः, जपः, दानम्, उपवासः, तीर्थयात्रा च पापहराणि प्रभवन्तीति पौराणिकानां मतं समग्रहीत् ।[1]

पापनिवेदनम्

पापनिवृत्तिपरकभिक्षणे स्वपापनिवेदनं ग्रामाञ्चलेषु यथा पुरा तथैवाधुनापि प्रचरति ।

अनुतापः

पापं कृत्वा यदि पापी स्वीयकुकृत्यं हृदयेनरिति विनिन्दति तत्कारणादनुतपति च तर्हि स पापाद् विमुच्यते । नैवं कुर्यां पुनः । मनु० ११.२२९, २३० ।

प्राणायामः

प्रतिदिनं प्रणवेन गायत्रीमन्त्रेण च सह १६ प्राणायामा मासेन ब्रह्महत्यामपि परावर्तयन्ति ।

तपः

मनुस्तपसः पापनिवारिणीं शक्तिं वर्णयत्यधोविधम्—महापातकिनः पापात् प्रमुच्यन्ते, पशुपक्षिणः स्थावराणि भूतानि च तपसा दिवं यान्ति । सर्वविधपापानि तपसैव प्रदह्यन्ते । मनु० ११.२३९-२४१ । जनास्तपसा सर्वविधं पापं निर्दहन्ति । ११.२४१ ।

---

1. History of Dharmaśāstra Vol. IV p. 41-56 । अकामतः कृतं पापं वेदाभ्यासेन शुध्यति । ११.४६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वेदाभ्यासादिना पापनाशः

मन्वनुसारेण—

वेदाभ्यासोऽन्वहं शक्त्या महायज्ञक्रियाक्षमा ।
नाशयन्त्याशु पापानि महापातकजान्यपि ।। ११२४५
हत्वा लोकानपीमांस्त्रीनश्नन्नपि यतस्ततः ।
ऋग्वेदं धारयन् विप्रो नैनः प्राप्नोति किंचन ।। ११.२६१

होमः

मनुः प्रतिपादयति यत् कश्चिद् ब्राह्मणो होमेन जपेन चात्मन आपदं तरेत् । ११.३४ । वैदिकयुगे पापाशौचनिवृत्तये कूष्माण्डहोमो विहित आसीत् ।[1] अत्र कूष्माण्डमन्त्रस्य [तै० आरण्यके २.३–६] प्राधान्यमस्ति । तस्मात् कूष्माण्डयज्ञोऽयम् । गायत्रीमन्त्रेण तिलस्य हविर्दानेन च घोरपापैः प्रमुच्यते । याज्ञ० ३.३०९ । होमस्तु याग[2] एवाग्ना आहुतिप्रदानपूर्वकः ।

उपवासः

वैदिकयुगस्य प्रारम्भत एव सर्वेषां धार्मिककार्याणामनुष्ठानस्य योग्यता तस्यैव पुरुषस्य समाम्नाता यो मनसा वाचा कर्मणा शरीरेण चानुष्ठानदिवसे शुद्धोऽभवत्[3] । एतस्मै प्रयोजनाय नैकव्रतानि ग्रहणीयानि बभूवुः । तेषु 'उपवासः' अन्यतमः । उपवासस्य प्रत्यक्षाभिप्रायोऽस्ति भोजनपानादि-शरीरयात्रासाधकवस्तूनां त्यागः किन्तु सूक्ष्माभिप्रायेण निर्वचनोपस्कार-दृष्टचोपवासोऽस्ति—

उपावृत्तस्य पापेभ्यो यस्तु वासो गुणैः सह ।
उपवासः स विज्ञेयः सर्वभोगविवर्जितः ।। अपरार्कः पृ० १९७

---

१. जीवनचर्यां तपोमयीं कृत्वा नैकमन्त्राणां जपेन, नैकविधव्रतधारणेन, नैक-मन्त्रैर्हविर्धानेन, अग्नि-स्तोत्रेण च कूष्माण्डहोमोऽनुष्ठितः । महापातकर्मविपाके विस्तृतविवरणं द्रष्टव्यम् ।

२. समन्त्रं देवेभ्यो भोज्यं पेयं च समर्प्यत इति यागः । शाबरभाष्ये प्रोक्तम्— यजति-ददाति-जुहोतिषु सर्वेषूत्सर्गः समानः । तत्र यजतिर्देवतामुद्दिश्योत्सर्गमात्रं, जुहोत्यासेचनाधिकः । ददातिरुत्सर्गपूर्वकः परस्वत्वेन सम्बन्धः । जैमिनि ७.१.५ अधिकृत्य शबरः ।

३. Almost all religious (except Zoroastrianism) such as the Hebrew, Christian and Moslem (in Ramjan) emphasise the necessity of fasting as a discipline or as a preparation for penitence. Hist. of Dharm. Vol IV. p. 54.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

उत्तमोपवासे भोजनपानप्रसाधनादीनां सर्वथा त्यागो विहितः ।[1] मध्यमोपवासे लघुमात्रायां तेषां ग्रहणमनुमतम् । वन्यभोजनं फलादिग्रहणमुपवासे विहितम् ।[2]

गौतमः [१९.११] उपवासेन पापान्निवर्तनं सूचयति । मन्वनुसारेण—

वेदोदितानां नित्यानां कर्मणां समतिक्रमे ।
स्नातकव्रतलोपे च प्रायश्चित्तमभोजनम् ॥ ११.२०३

महाभारत उपवासस्य महती प्रतिष्ठा प्रतिपादिता यतो हि नाम 'दरिद्रेण यज्ञाः अनुष्ठातुं न शक्याः, बहूपकरणा यज्ञा नानासम्भारविस्तराः । यज्ञफलैस्तुल्य उपवासः । अतएवोपवासः सार्वजनीन इति'।[3] विविधप्रकारैरुपवासैर्नैकयज्ञानां फलानि लभ्यानि । उपवासिनो देवलोके वासः सम्भवति । तथाहि—

पूर्णेऽथ विंशे दिवसे यो भुङ्क्ते ह्येकभोजनम् ।
सदा द्वादशमासांस्तु सत्यवादी धृतव्रतः ।
स लोकान् विपुलान् रम्यानादित्यानामुपाश्नुते ॥
यस्तु मासे गते भुङ्क्ते एकभक्तं शमात्मकः ।
सदा द्वादशमासान् वै ब्रह्मलोकमवाप्नुयात् ॥

अनुशासने १०७.९०,९१,१२७

वैदिकयुगे भारतीयसंस्कृतेः केन्द्रं यज्ञो बभूव । असंख्यविधयज्ञाः शनैः शनैः कल्पिताः, पूर्वं सरलातिसरला अपि नानाकर्मकाण्डीयविधानैरुपबृंहिता बहुसंख्यकपुरोहितैनिरतिशय-सामग्री-सम्भारैः सुदीर्घकालव्यापृतिभिश्च सम्पादनीया प्रायो राजन्यवर्गेण साधनीया बभूवुः । वैदिकयुगीन-धर्मस्य बहुफला अपि कर्मकाण्डबहुला बहवो यज्ञा बहुभारत्वात् सर्वसाधारणकृते दुर्वहाः सन्ति । ते समृद्धिशालिनां राजन्यानां च प्रतिष्ठानुकूलं संवर्धिताः शाश्वतप्रचलिताश्चासन् ।

वैदिकयुगस्य बौद्धिकवर्गस्य ऋषीणां च यज्ञादिकं नातिव्ययसाध्यं, सर्वसाधारण-निर्वाह्यं लोकहितसाधकं परम्परागतं च प्राचलत् । तेषां जीवनविधौ तपसो ब्रह्मचर्यस्य मनसा वाचा कर्मणा च पुण्योदर्कस्य महिमा

---

१. प्रसाधन-निषेधोऽन्याश्यक इति गरुडपुराणे (१.१२८.६) भविष्यपुराणे १.१८४.२७ देवलानुसारेणोपवासदूषणानि सन्ति—

असकृज्जलपान्नाच्च ताम्बूलस्य च भक्षणात् ।
उपवासः प्रदुष्येत्तु दिवास्वापाच्च मैथुनात् ॥ स्मृतिचन्द्रिका भाग २ पृ० ३५५

२. तै० सं० १.६७.३–४ ३. अनु० १०७, २–४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विलसति स्म। एतेषां प्रभव ऋषीणामाक्षमपदं तीर्थमस्तीति वैदिकधारणा शनैः शनैः दृढमूला बभूव।

श्रमः

देवस्य सवितुः सवे कर्म कृण्वन्तु मानुषाः। अथर्ववेदे ६.२३.३

अर्थात् सवितुरादर्शानुसारेण कर्म करोतु मानवः।

ऋग्वेदानुसारेण—

श्रमयुवः ··· ··· तस्थुः पदे परमे। १.७२.२

अर्थात् श्रमवीरा उत्कृष्टं पदमधितिष्ठन्ति।

यादृश्मिन् धायि तमपस्यया विदत्। ऋ० ५.४४.८

अर्थान्मनसा यद् ध्यातं तत्तु श्रमेण प्राप्तमेव।

देवानां श्रमपरायणता वैदिकसंहितासु पदे पदे विभाति। स्वभावत ऋषयो मानवीविशश्च तान् देवानादर्शीकृत्य स्वयमेव श्रमशीलाः स्वकार्य-क्षेत्रेषु सफला बभूवुः। प्रत्यक्षानुभूतमेव श्रमस्य महत्त्वं वैदिकयुगे दृश्यते। महर्षिरगस्त्यः सिद्धान्तयति—देवाः श्रान्तमवन्ति।[1] अर्थात् श्रमकर्शिता एव देवानुग्रहं लभन्ते। अपरं च—

न ऋते श्रान्तस्य सख्याय देवाः। ऋ० ४.३३.११। अर्थाद् देवैः सह श्रमशीलानामेव मैत्रीभावः सम्पद्यते। वेदेऽस्मिन् श्रमस्य दायं च चर्चितम्।[2]

अथर्ववेदानुसारेण [४.११.१०] श्रमेण कीलालं [रसो] लभ्यते। अथ च देवाः स्वप्नाय न स्पृहयन्ति। अतन्द्राः प्रमादयन्ति।[3] देवानां कृतेऽपि श्रमस्य महत्त्वमासीत्[4] अथ च नानाश्रान्ताय श्रीरस्ति[5]। यत् किंचित् करणीयं तत्तु यथाशीघ्रं समापनीयं यतो हि नाम को मनुष्यस्य श्वो वेदेति शतपथ-ब्राह्मणे सत्यापितम्। समर्थितमेतदैतरेये—इन्द्र इच्चरतः सखा। कृतं सम्पद्यते चरन् चेति। तत्रादर्शदेवो राजते सूर्यो यथैतरेये निगदितम्—

सूर्यस्य पश्य श्रेमाणं यो न तन्द्रयते चरन्। ७.१५.१६

अन्यच्च—

यः श्रमात्तपसो जातो लोकान् सर्वान् समानशे।
तस्मै ज्येष्ठाय ब्रह्मणे नमः।

अत्र श्रमेण तपसा च श्रेष्ठब्राह्मणत्वं प्रकल्पितम्। स ब्राह्मणः सर्वान् लोकान् व्याप्नोति।

---

१. ऋग्वेदे १.१७९.३ २. ऋ० २.११४.१०
३. ऋग्वेदे ८.२.१८; अथर्व० २०.१८ ३
४. श्रमेण ह सा वै तदेवा जयन्ति। शतपथे १.६.२.३
५. शत० २ १.३.४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्रमानन्तरमेव स्वर्गलोके स्थानं प्राप्यमिति—

अन्तरिक्षे··· स्थाम श्रान्तसदाम् । अथर्व० १.३२.२

श्रमस्तपश्च लोकपालनशक्तिं विधत्त इति वैदिकमतम् ।[1]

श्रमस्य पर्याय एवोत्थानं यत् प्रशंसितमधोविधम्—

[क] उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत । कठ० ३.१४

[ख] उत्तिष्ठन् परिचरिता भवति । छान्दोग्ये ७.८.१

[ग] तस्मादुत्तिष्ठ यशो लभस्व ॥ गीता० ११.३३

[घ] श्रान्तस्य तप्तस्य तेजो रसो निवर्ततेऽग्निः । बृहदा० १.२.२

'कुर्वन्नेवेह कर्माणिजिजीविषेच्छतं समाः । इति ईशोपनिषदः पुष्कल-वाक्यम् ।

वैदिककालानन्तरं स्पष्टत उद्भिन्नाश्रम-व्यवस्था श्रमेणैव विशेषिता । आसमन्तात् श्रमो यत्रेति आश्रमः । तत्र पूर्वाश्रमे वेदज्ञानाय, गृहाश्रमे पञ्चमहायज्ञसम्पत्तये, वानप्रस्थे तपोनिधये, संन्यासे च निःश्रेयसोदयाय भूयिष्ठः श्रम आशंसितो दृश्यते ।

अशोको वैदिकश्रमप्रवृत्तिं न केवलं वाचापितु लेखे कर्मणापि प्राञ्जलं पुरश्चकार । तद्यथा चतुर्दशशिलालेखे—सर्वा च निरतिर्भवतु या श्रमरतिः ।

अन्यच्च—

सर्वं कालमदतो मेऽवरोधने गर्भागारे, वर्चसि, विनीते, उद्याने—सर्वत्र जनस्यार्थं करिष्यामि । नास्ति हि मे तोष उत्थानेऽर्थसन्तरणाय । कर्तव्यं हि मे सर्वलोकहितम् ।[2]

---

१. अथर्व० ११.५.४

२. श्रमाभिरतिः भारते सदैव प्रशंसिता । तथाहि यजुर्वेदे—कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ॥ ४०.२

मनुः —आरभेतैव कर्माणि श्रान्तः श्रान्तः पुनः पुनः ।
कर्मण्यारभमाणं हि पुरुषं श्रीर्निषेवते ॥ ९.३००

भासः—यत्नैः शुभैः पुरुषता भवतीह नृणाम् ।
दैवं विधानमनुगच्छति कार्यसिद्धिः ॥

भर्तृहरिः—विघ्नैः पुनः पुनरपि हन्यमानाः ।
प्रारभ्य तूत्तमजनाः न परित्यजन्ति ॥

दृढकारी स्वर्गं जयेदिति इति मनुः विस्पष्टयति । ४.२४६

अन्यच्च—

कलिः प्रसुप्तो भवति स जाग्रद् द्वापरं युगम् ।
कर्मण्यभ्युद्यतस्त्रेता विचरंस्तु कृतं युगम् ॥ ९.३०२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ब्रह्म, ब्रह्मचर्यं ज्ञानं च

'प्रज्ञानं ब्रह्म' ऐतरेयोप० ५.३

पुरातनतमसांस्कृतिकयुगे आर्यवर्याणां यावज्जीवं सात्त्विकतमो जीवन-विधिर्ब्रह्मेति ख्यात आसीत्[1]। तस्य स्वीकरणात् कश्चिद् ब्रह्माभवत् ब्राह्मणो, ब्रह्मचारी वा। ब्रह्मचारिणो व्रतं ब्रह्मचर्यमिति[2] जैनबौद्धानुयायिनामप्यभिप्रेतं पदम्। अतिक्रान्ते ब्रह्मचर्यं विना कश्चिद् ब्राह्मणो नाभवदिति रीतिरासीत्। ब्रह्मणे ब्राह्मणानां वा कृते परमं धर्मं ब्रह्मचर्यमेव। तथापि ये केचिदन्येऽपि आत्मनि महत्[3] प्रतिष्ठापयितुंकामा आसन्, ते ब्रह्मचर्यव्रतमङ्गीकृतवन्तः। तद्यथाथर्ववेदे निर्दिष्टम्—

ब्रह्मचर्येण तपसा राजा राष्ट्रं विरक्षति।
ब्रह्मचर्येण कन्या युवानं विन्दते पतिम्।
ब्रह्मचर्येण तपसा देवा मृत्युमुपाघ्नत। ११.५.१७—१९

छान्दोग्ये च फलेन परिचीयत इति परिभाषितं ब्रह्मचर्यम्—तद्य एवैतं ब्रह्मलोकं ब्रह्मचर्येणानुविन्दन्ति तेषामेवैष ब्रह्मलोकः, तेषां सर्वेषु लोकेषु कामचारो भवति। ८.४.३। ब्रह्मचर्यमिदं सत्त्रायणं (सत आत्मनस्त्राणं विन्दते), मौनं (तेन मनुते), अनाशकायनं (आत्मा न नश्यतीति ब्रह्मचर्येणानुविन्दते) अरण्यायनं चास्ति। ८.५.१—३।

ब्रह्मचर्यं बिना ब्रह्मलोकस्य प्राप्तिर्न भवतीति प्रश्नोपनिषदि व्याख्यातम्—तेषामेवैष ब्रह्मलोको येषां तपो ब्रह्मचर्यम्। १.२.१५। ब्रह्म विद्वान् ब्रह्माभिप्रैतीति कौषीतकिः १.४। ब्रह्मैव पुष्पमिति छा० उ० ३.५.१। अभयं ब्रह्म। बृहदा० ४.४.२५। सत्यं ब्रह्म। बृहदा० ५.४.१। विज्ञानं ब्रह्म। तै० उ० २.५.१।

---

१. ब्रह्मा आदिदेवः स्वयमेवाभ्युत्थानार्थं यच्चर्यं (जीवन-विधिं) पुरस्कृतवान् तदेव तस्य नाम्ना ब्रह्मचर्यं ब्रह्म वा विख्यातं बभूव। ब्रह्मचारी ब्रह्मणोऽवतार एव। प्रकरणेऽस्मिन् नैष्ठिकब्रह्मचर्यं प्रसज्यते। तदेव श्रेयः। नैमित्तिकं ब्रह्मचर्यमल्पकालिकमभवत्।

२. तद्यथाथर्ववेदे ब्रह्मचारिविषये प्रोक्तम्—
तमहं ब्रह्मणा तपसा श्रमेणानयैनं सिनामि। ६.१३३.३
अर्थात् ब्रह्मज्ञानेन तपसा श्रमेण ब्रह्मचर्यमभिज्ञायते। अर्थशास्त्रानुसारेण ब्रह्मचारिणः स्वाध्यायोऽग्निकार्याभिषेको भैक्षव्रतत्वम्। १.३.१०
एतानि बाह्यलक्षणानि। ब्रह्मज्ञानमेव तत्त्वतो ब्रह्मचारिणो लक्षणम्।

३. महदिति ब्रह्म भूमा, वेदज्ञानमैश्वर्यमलौकिकशक्तिश्च।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ब्रह्मचर्येण सह ज्ञानं संगच्छते। मुण्डकोपनिषदि सम्यग्ज्ञानेनात्मा लभ्य इति प्रतिपादितम्।[1] अथर्ववेदे ऋषयः प्रार्थयन्ते—

बुध्येम शरदः शतम्। १९.६७.२८

प्रसङ्गेऽस्मिन् ऋषिजीवनस्य प्रथममुद्देश्यं नित्यं ज्ञानप्राप्तिर्बभूव। तदनु अभ्युत्थानमुपपन्नमासीदिति वेदविभूतिः। बहुविधफलानि सिद्धयश्च ब्रह्मचर्यस्य विभाव्यन्ते। तेषु ब्रह्मज्ञानमन्यतमम्।

श्रद्धा

ऋग्वेद उपासनार्हा श्रद्धाधोलिखितमन्त्रेषु भक्तियुता सम्प्रवर्तते—

श्रत्ते दधामि मन्यवेऽहन्यद् वृत्रं नर्यं विवेरपः। १०.१४७.१
श्रद्धचाग्निः समिध्यते श्रद्धया हूयते हवि।
श्रद्धां भगस्य मूर्धनि वचसा वेदयामसि॥ १०.१५१.१
प्रियं श्रद्धे ददतः प्रियं श्रद्धे दिदासतः।
प्रियं भोजेषु यज्वस्विदं म उदितं कृधि॥ १०.१५१.२
यथा देवा असुरेषु श्रद्धामुग्रेषु चक्रिरे। १०.१५१.३
श्रद्धां देवा यजमाना वायुगोपा उपासते।
श्रद्धां हृदय्य याकूत्या श्रद्धया विन्दते वसु॥ १०.१५१.५
श्रद्धां प्रातर्हवामहे श्रद्धां मध्यंदिनं परि।
श्रद्धां सूर्यस्य निम्नुचि श्रद्धे श्रद्धापयेह नः॥ १०.१५१.५
श्रद्धया विन्दते वसु। ऋ० १.१४१.४

यजुर्वेदे च—

व्रतं च श्रद्धां चोपैमीन्धे त्वा दीक्षितो अहम्। २०.२४

देवानामनुग्रहः स्तोतुः श्रद्धया सम्भवति।[2] यजुर्वेदानुसारेण अश्रद्धामनृतेऽधाच्छ्रद्धां सत्ये प्रजापतिः। १९.७७

दक्षिणा श्रद्धामाप्नोति, 'श्रद्धया सत्यमाप्यते' इति यजुर्वेदः। १९.३०

अन्यत्र—सत्यं च मे श्रद्धा च मे यज्ञेन कल्पन्ताम्। १८.५

'यो यच्छ्रद्धः स एव सः' अर्थात् पितॄन् प्रति श्रद्धया (श्राद्धेन) पितृसंस्कृतिमनुयाति। अतएवानुवंशिकगुणग्रहणेन सनातनधर्मस्य शाश्वतत्वं

१. सत्येन लभ्यस्तपसा ह्येष आत्मा। सम्यग्ज्ञानेन ब्रह्मचर्येण नित्यम्। मुण्डक० ३.१.५

२. ऋ० १.१०८ ६; ६.२६.६; ७.३२.१४।
शंकराचार्यानुसारेण श्रद्धा तु हिरण्यगर्भादिविषया विद्या। मु० उ० १.२.११ अधिकृत्य भाष्यम्।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रतीयते। शंकराचार्यानुसारेण[1] श्रद्धापूर्वकः सर्वपुरुषार्थसाधनप्रयोगः चित्त-प्रसाद आस्तिक्यबुद्धिर्भवति।

सत्यम्, ऋतं च

सत्यं तु नितान्तभूमानन्त्यरूपम्। तस्य दर्शनं, प्रवचनं, व्यवहारः, प्रसक्ति-साधनं विषयो विषयीकरणं च सर्वं सत्यमिति विविधाभिप्रायेण सत्यपदस्य प्रयोगः प्रसङ्गेऽस्मित् प्रवर्तते।

वैदिकयुगे सत्यस्य विष्वक् समादरः प्रतीयते। ऋग्वेदानुसारेण—'सत्यं तातान सूर्यः। १.१०५.१२। देवः सत्यवादिनं रक्षति, असत्यवादिनं च हन्तीति सालंकारं प्रोक्तमधोविधम्—

सुविज्ञानं चिकितुषे जनाय सच्चासच्च वचसी पस्पृधाते।
तयोर्यत्सत्यं यतरदृजीयस्तदित् सोमोऽवति हन्त्यासत्॥ ७.१०४.१२

तत्र सूर्या सावित्री सत्यस्य महिमानं वर्णयति—

सत्येनोत्तभिता भूमिः। १० ८५.१

अर्थात् सत्यं विना लोको विनंक्ष्यति।

सत्यस्य ज्ञानं स्पृहणीयमासीत्। १०.१३९.५

न केवलं मानवानामपितु देवानामपि भर आसीद्यत् 'विश्वं सत्यं' प्रवर्तेत ३.३०.६। अन्यत्र 'नः सत्याकरदिति' तदेव समर्थयति। ४.१७.२०। इन्द्रः स्वयमेव सत्यस्वरूपः सत्यं प्रवर्तयति। २.१५.१। ऋग्वेदानुसारेण 'द्रुहः सचन्ते अनृता जनानाम्। ७.६१.५

हिरण्मयपात्रेण पिहितं सत्यस्य मुखं यथानावृतं स्यात्तथा सत्यधर्मा प्रयतते।[2] शतपथब्राह्मणे देवमनुष्ययोरन्तरं वर्णितम्—

सत्यमेव देवा अनृतं मनुष्याः। १.११.४

यजुर्वेदे पुनः 'इदमहमनृतात् सत्यमुपैमि' १.५।

अर्थात् दिव्यतां प्राप्तुं सत्यमेवाधारपदम्। अन्यत्र यजुर्वेदे उपदिष्टम्—

ऋतस्य पथा प्रेत। ७.४५

अथर्ववेदानुसारेण—असत्यवादी तथैव घृणास्पदं भवति यथा राक्षसः। तथाहि—

न वा उ सोमो वृजिनं हिनोति न क्षत्रियं मिथुया धारयन्तम्।
हन्ति रक्षो हन्त्यासद् वदन्तमुभाविन्द्रस्य प्रसितौ शयाते॥ ८.४.१३

इति सोमराजस्य भरः।

---

१. मुण्डकोप० २.२.७ अधिकृत्य भाष्यम्।

२. यजु० ४०.१७। ईशावास्योपनिषदि १५।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ऋतस्य काचिदलौकिकी उद्भावना ऋग्वेदे परिलक्ष्यते। तदनुस्मारेण ऋषिर्वामदेवो गौतमः कवयति—

पुरुणि चन्द्रा वपुषे वपुषि। ऋतेन गाव ऋतमाविवेशुः॥ ४.२३.९

सत्येनात्मरक्षा सम्भाविता।[1]

सत्यं परममिति तैत्तिरीयारण्यके समर्थितमधोविधम्—

सत्येन वायुर्वाति सत्येनादित्यो रोचते दिवि।
सत्यं वाचः प्रतिष्ठा सत्ये सर्वं प्रतिष्ठितम्॥
तस्मात् सत्यं परमं वदन्ति। १०.६३

ऋतसत्ययोर्नास्ति महदन्तरम्। काणे महोदयेन परिणीतम्—Ṛta involves a wider conception and Satya had orignally a restricted meaning (viz. truth and static order). Gradually, however, the word Ṛta receded into the background and Satya took its place even in Vedic literature. History of Dharma. Vol. VI p. 5.

तदिदं सत्यं तूपनिषत्सु परा विद्या यया ब्रह्माधिगम्यते ज्ञानमार्गिभिः[2]। पौराणिकयुगे सत्याश्रिता भक्तिर्विष्णुशिवादिसायुज्य-रसरागस्य जनयित्री वैदिकब्रह्मचर्यरूपिणी विभाति। महाभारते सत्यस्थ महिमापरदिशापि बृहत्कृतास्ति। तथाहि—

अश्वमेधसहस्रं च सत्यं च तुलयाधृतं सत्यमेव विशिष्यते। सर्वं सत्ये प्रतिष्ठितम्। सत्यवन्तः स्वर्गलोके मोदन्ते। गीताप्रेस संस्करणे अनु० ७५.२९–३३।

जपः

पृथिव्यां यानि तीर्थानि पुण्यान्यायतनानि च।
तानि सर्वाण्यवाप्नोति विष्णोर्नामानुकीर्तनात्॥
वामन पु०:९४.६३, पद्म पु० ६.२४५.८५

विधियज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणैः। मनु० २.८५

वैदिकयुगे नामजपस्य रीतिः प्राचरत्। तद्यथा ऋग्वेदे—

गृणीमसि रुद्रस्य नाम। २.३३.८
मनामहे चारु देवस्य नाम। १.२४.१
नामानि ते शतक्रतो विश्वाभिर्गीर्भिरीमहे। ३.३७.३

---

१. स॒ मा सत्योक्तिः परिपातु विश्वतः। ऋ० १०.३७.२
२. विषयोऽयं ब्रह्माश्रमे विवृतम्।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथर्ववेदेऽ[1]पि—

नाम्ना जोहवीति पुरा सूर्यात् पुरोषसः । १०.७.३१

मन्त्रस्य वचनं क्रियते । नाशास्यते, न स्तूयते इति स जपयज्ञः । शबरः — जैमिनि १२.४.१ अधिकृत्य ।

सामगानस्य प्रस्तावः [प्रारम्भः] अधोलिखितमन्त्राणां जपेनाकारि— असतो मा सद् गमय । तमसो मा ज्योतिर्गमय । मृत्योर्मामृतं गमयेति ।[2] बृहदारण्यके १.३.२८ । अनेन मृत्योर्मुक्तिर्भवति ।

महाभारते प्रयागस्य नामसङ्कीर्तनेन पापाद् विरतिः प्रोक्ता ।[3] रामायणानुसारेण प्रतिदिनं प्रातः स्नानान्तरं जपो नित्यकर्मेति रामो विश्वामित्रेण प्रबोधितः —

इह वासः परोऽस्माकं सुखं वत्स्यामहे निशाम् ।

स्नाताश्च कृतजप्याश्च हुतहव्या नरोत्तम ।।[4] बाल० २३.१७,१८

परवर्त्ति युगे जपस्य त्रैविध्यं प्रकीर्तितम्—वाचिकः, उपांशु, मानसिकश्च ।[5] कतिपययज्ञेषु मन्त्रजपः प्रावर्तत । यथा मनुः प्रतिपादयति—

---

१. तुरीयेणामन्वत नाम धेनोः ७.१.१ । अत्र नामजपः संकेतितः ।

२. स यत्र प्रस्तुयात्तदेतानि जपेत् ।

३. श्रवणात्तस्य तीर्थस्य नाम संकीर्तनादपि ।
मृत्तिकालम्भनाद्वापि नरः पापात् प्रमुच्यते ।। आरण्यके ८३.७५

४. अन्यच्च—
स्नात्वा कृतोदकौ वीरौ जेपतुः परमं जपम् । बाल० २३.३
प्रभातकाले चोत्थाय पूर्वां सन्ध्यामुपास्य च ।
प्रशुची परमं जप्यं समाप्य नियमेन च ।। बाल० ३१,३२

५. श्रूयमाणश्लोको जपो वाचिकः । स्वरयन्त्रादिसंचारे सत्यपि किंचित् श्रुतश्लोको जप उपांशुः । स्वरयन्त्रादिसचारं विनैव मन्त्रजपः मानसिकः । त्रितयमिदमुत्तरोत्तरं गुणवत्तरम् । मानसिकजपो जंजपूकः ।
हारीतः स्पष्टयति—
शनैरुच्चारयेन्मन्त्रं किंचिदोष्ठौ प्रचालयेत् ।
किंचिच्छ्रवणयोग्यः स्यात् स उपांशुर्जपोः स्मृतः ।।
धिया पदाक्षरश्रेण्या अवर्णमपदाक्षरम् ।
शब्दार्थचिन्तनाभ्यां तु तदुक्तं मानसः स्मृतम् ।। ४.४२–४४
जपस्तुत्योर्भेदः —वचनं जपनमिति समानार्थः, यस्यां जपो व्यक्तायां वाचि स्मर्यते । तेन यत्र वचनमात्रं मन्त्रस्य क्रियते न स्तूयते नाशास्यते स जपः । जैमिनिपूर्वमीमांसासूत्रस्य १२.४.१ अधिकृत्य शबरः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विधियज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणैः ।
उपांशुः स्याच्छतगुणः साहस्रो मानसः स्मृतः ॥ २.८५
जप्येनैव तु संसिध्येद् ब्राह्मणो नात्र संशयः ।
कुर्यादन्यन्नवा कुर्यान्मैत्रो ब्राह्मण उच्यते ॥ २.८७

कतिवारं जपः ? जपस्तु कतिवारं कर्तव्य इति विविधोद्देश्यपूर्त्यर्थं तत्र निगदितमेव । यदि क्वचिदनाख्यातं तर्हि शतवारं जपेत् ।

ऋग्विधानानुसारेण ऋग्वेदस्य विविधसूक्तानां जपेन विविधरोगाणां पापानां शत्रूणां च शमनं भवति ।[1]

काणेमहाभागो जपस्य सर्वोच्चोद्देश्यमधोविधं निर्णयति – Japa at the highest level was contemplation of God and endeavour to attain unity with god. The habit of repeating the sacred tests should lead to maintaining the soul in the presence and thought of god. Japa demands three things—purity of heart, detachment and placing ourselves in the hands of God. Hist. of Dharm Vol. IV p. 46.

जप्यमन्त्रादीनां निर्देशो गौतमेन कृतः । तेषु प्रमुखाः सन्ति—उपनिषदः, पुरुषसूक्तम्, कूष्माण्डानुवाकाः, सावित्री [गायत्री] । एतानि पावमानानि ।

पौराणिकयुगे जपस्य सविशेषं महत्त्वं दृश्यते । तथाहि—कूर्मपुराणे

जपेदीशं नमस्कृत्य स याति परां गतिम् । पूर्वा० ३५.३३ ।

नैकप्रसङ्गेषु जप उपादेयः । यथा—

श्राद्धे वा दैविके कार्ये रात्रावहनि वा द्विजाः ।
नदीनां चैव तीरेषु देवायतनेषु च ॥ ३५.३२

मनुस्त्रिविधं जपं निभालयति—यज्ञं, देवमात्मानं चाधिकृत्य । एतेषां त्रयाणां रहस्यं तदधिगतमन्त्रैर्जपविषयः ।[2]

ब्राह्मणो जपेनापत्तरणं कुर्यादिति मनुः प्रोवाच । ११.३४ । पापा जपेन महापातकादपि विशुध्यन्तीति । ११.२४९, २५० । स्थूल-सूक्ष्माणां पाप-वृन्दानामपाकरणं 'अव ते हेलो वरुण नमोभिः' ऋग्वेदे १.२४.१४ मन्त्रजपेन

---

१. Hist. of Dharma. Vol. IV p. 49

२. अधियज्ञं ब्रह्म जपेताधिदैविकमेव च ।
आध्यात्मिकं च सततं वेदान्ताभिहितं च यत् ॥ ६.८३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सम्भवति ।[1]

वैदिकमन्त्राणां जपं कः कुर्यात् । यः कश्चिज्जपस्य लाभं स्वीकर्तुमिच्छेत्, स स्वयमेव जपं कुर्यात् । प्रतिनिधिभूतः पुरोहितो जपं करोत्विति मृषावादः । ये वेदमन्त्रोच्चारणेऽयोग्या घोषितास्तेषां जपस्तु मन्त्ररहितो भवेत् । यथा शिवाय नमः, भगवते नमः । तेषामपि फलप्राप्तिर्न्यूना नासीत् ।[2]

पुनरेतत्पापं न करिष्यामीति निश्चयेन, विष्णोर्ध्यानेन च पापनिवृत्तिः स्यादेवेति पुराणवचनम् ।

मनुः प्रायश्चित्तविधाने जपस्य महत्त्वं निर्दिशति । तथाहि—

जपन्वान्यतमं वेदं योजनानां शतं व्रजेत् ।
ब्रह्महत्यापनोदाय मितभुङ्नियतेन्द्रियः ।। ११.७५

शातातपानुसारेण रौद्रादिमन्त्रेण नैकविधज्वरा दूरीभवन्ति ।[3]

तपः[4]

ऋग्वेदानुसारेण 'ऋतं च सत्यं चाभीद्धात्, तपसोऽध्यजायत । १०.१९०.१ अर्थात्तपसा सत्यं साधनीयम् । मनीषिणां या प्रार्थना भवति—'असतो मा सद्गमय' सा तपसा लब्धकामा भवति ।

अथर्ववेदानुसारेण स्वर्गारोहणं तपस्विनां तपसा[5]पि सम्भवति ।[6] ब्रह्मज्ञानेन यत् सायुज्यं प्राप्यते तत्तु तपसा साध्यम् ।[7]

---

१. एनसां स्थूलसूक्ष्माणां चिकीर्षन्नपनोदनम् ।
अवेत्यृचं जपेदब्दं यत्किंचेदमितीति वा ।। ११.२५२

२. कृत्वापि बहुशः पापं नरा मोहसमन्विताः ।
न यान्ति नरकं नत्वा सर्वपापहरं हरिम् ।।
शाठ्येनापि नरा नित्यं ये स्मरन्ति जनार्दनम् ।
तेऽपि यान्ति तनुं त्यक्त्वा विष्णुलोकमनामयम् ।। ब्रह्मपु० २१६.८७,८८
अद्यापि न निवर्तन्ते द्वादशाक्षरचिन्तकाः । विष्णुपु० ६.३९

३. शातातपस्मृति १४०-१४१

४. अस्य ग्रन्थस्य पृ० २१७–२३९ पृष्ठेषु तपः सविशेषं वर्णितम् ।

५. तपस्तु इन्द्रियमनएकाग्रता । मनसश्चेन्द्रियाणां च ह्यैकाग्र्यं परमं तपः । इति मुण्डकोपनिषदि ३.१.५ व्याख्यामधिकृत्य ।

६. दिवमारुहत् तपसा तपस्वी । अथर्व० १३.२.२५ । ऋग्वेदे १०.१५४.२ अस्या धारणाया मूलम् ।

७. ब्रह्मैनद् विद्यात् तपसा विपश्चित् । अथर्व० ८.९.३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तपसा श्रुतस्य [ज्ञानस्य] प्रियो भवति, आयुष्मान्, दीर्घायुश्च । ७.६३.१ । विपश्चित्तपसो ब्रह्म विद्यात् । ८.९.३ अत्र तपसा योगोऽपि साध्यत इति वेदवचनम् ।[1]

सप्तर्षयो ज्ञानेन तपसा च सिद्धिमवाप्नुवन् ।[2] उपनिषद्युगे तपो यज्ञादपि प्रशस्यमिति धारणा ब्रह्मज्ञानिनां बभूव । छान्दोग्ये ५.१०.१,२ मुण्डके १.२.१०,११ । कीदृशी जीवनचर्या प्रायः शरीरकष्टप्रदायिनी बभूवेति गौतम-बौधायनादिभिर्वर्णितम् ।[3]

नैकविधतपस्सु मनुः प्राणायाममुच्चस्तरीयं गणयति । तथाहि—

प्राणायामा ब्राह्मणस्य त्रयोऽपि विधिवत्कृताः ।
व्याहृतिः प्रणवैर्युक्ता विज्ञेयं परमं तपः ॥ ६.७०

मनुः प्रतिपादयति—

अहिंसयेन्द्रियासङ्गैर्वैदिकैश्चैव कर्मभिः ।
तपसश्चरणैश्चोग्रैः साधयन्तीह तत्पदम् ॥ ६.७५

अर्थात् तपसा ब्रह्मपदं साध्यम् । सन्नियम्येन्द्रियग्रामं तपः । २.१७५

महाभारतानुसारेण तपसो नैकविधानि फलानि लभ्यानि । तद्यथा—

तपसा प्राप्यते स्वर्गस्तपसा प्राप्यते यशः ।
आयुःप्रकर्षो भोगाश्च लभ्यन्ते तपसा विभो[1] ॥ अनु० ५७.८
ज्ञानं विज्ञानमारोग्यं रूपं संपत्तथैव च ।
सौभाग्यं चैव तपसा प्राप्यते भरतर्षभ ॥ अनु० ५७.९
धनं प्राप्नोति तपसा इत्यादि अनु० ५७.१० ।

तपोधनस्य तीर्थयात्रा बहुगुणं फलति । तथाहि—

पुण्यार्धं हरते यानं तदर्धं छत्रपादुके ।
तदर्धं तैलमांसाभ्यां सर्वं हरति मैथुने ॥ कर्मलोचनम् ।

न केवलमृषयः, प्रजापतयः, असुराः, राक्षसा यक्षास्तपसा स्वोद्देश्यं पूरयन्त्यपितु देवाः —ब्रह्मा, विष्णुः,[4] शिवश्च तपसा सिद्धकर्माणो बभूवुरिति

१. अस्मिन्नेकं युज्यते यस्मिन्नेकम् । अथर्व० ८.९.३
२. अथर्ववेदे ८.१०.४ १३–१६ । तद् ब्रह्म च तपश्च सप्त ऋषय उपजीवन्ति इति ।
३. ब्रह्मचर्यं सत्यं, त्रिकालस्नानम्, आर्द्रवस्त्रस्य शरीरे शोषणं, धरातले शयनम्, उपवासश्च । गौतम० १९.१५ । बौधायनानुसारेणाहिंसा, अस्तेयं, गुरुशुश्रूषा च तपसोऽङ्गम् । बौ० ध० सू० ३.१०.१३
४. तद्यथा विष्णुः रामायणे बालकाण्डे
इह राम महाबाहो विष्णुर्देवनमस्कृतः । वर्षाणि सुबहूनीह तथा युगशतानि च ॥
तपश्चरणयोगार्थमुवास सुमहातपाः । २९.२, ३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वृत्तानि पुरासाहित्ये विलसन्ति ।

पारलौकिकम्

वैदिककालतोऽद्यावधि शवदाह एव बहुप्रचरति ।[1] निस्सन्देहमपवाद-स्थितौ शवस्य भूगर्भे निधानं, जले प्रवाहः, आकाशवायुशरणीकरण-मनुष्ठितम् ।[2] मरणासन्नः पुरुषो गोमयलिप्ते आस्तृतकुशे च प्रदेशे शायितः । क्वचित्तस्य पुरुषस्य पित्रा धृता स्वर्णोर्मिका हस्ते धारिता ।[3]

मरणानन्तरं शवस्य स्नानं नववस्त्रावरणं च कारितम्[4] । पश्चात् शवयात्रा शकटेन समारब्धा । अथर्व० १८.२.२७; १८.४.४४ । अग्निना शवो दग्धः, तस्य प्राणाश्च पितृलोके नीताः । ऋ० १०.१६.२ । तत्र दाहान्ते यमादिदेवेभ्यो हविर्दत्त्वा प्रेतः सम्बोध्यते—

सूर्यं चक्षुर्गच्छतु वातमात्मा द्यां च गच्छ पृथिवीं च धर्मणा ।
अपो वा गच्छ यदि तत्र ते हितम् ओषधीषु प्रतितिष्ठा शरीरैः ॥
ऋ० १०.१६.३ । अथर्व० १८.२.७

सहस्रणीथाः कवयो ये गोपा यन्ति सूर्यम् ।
ऋषीन् तपस्वतो यम तपोजां अपि गच्छतात् ॥ ऋ० १०.१५४.५
सं गच्छस्व पितृभिः संयमेनेष्टापूर्तेन परमे व्योमन् ।
हित्वायावद्यं पुनरस्तमेहि संगच्छस्व तन्वा सुवर्चाः ॥ १०.१४.८

---

१. ऋग्वेदे १०.१५.४ । अथर्ववेदानुसारेण शवस्य चतुर्था निर्वहणमभवत्—
ये निखाता ये परोप्ता ये दग्धा ये चोद्धिताः ।
सर्वांस्तानग्ने आवह पितॄन् हविषे अत्तवे ॥ १८.२.३४
अर्थात् शवा भूगर्भे धृता वा दूरं प्रक्षिप्ता वा दग्धा वा परिलम्बिता वा ।
ऋग्वेदे १०.१८ अथर्व० १८.२.५०–५२ । अजातदन्तानां भूगर्भे निधानम् ।
महाभारतेऽपि शवस्य चतुर्विधं निर्वहणं प्रावर्ततेति श्रूयते । आदि० ८५.१७

२. कुटीचकं तु प्रदहेत् पूरयेच्च बहूदकम् ।
हंसो जले तु निक्षेप्यः परहंसं प्रपूरयेत् ॥ स्मृत्यर्थसार उद्धृतम् पृ० ९८
इति संन्यासिनां शवस्य निर्वहणं चतुर्विधं प्राचरत् । क्षितिः, आपः तेजः (अग्निः), मरुत् (वायुः) व्योम (आकाशः) इति पञ्चतत्त्वानि । तेषु यत्र कुत्रचित् शवस्योत्सर्जनम् ।

३. पितृलोकेऽभिज्ञानार्थं तस्या उपयोगः स्यात् ।

४. अथर्व० ५.१९.१४; १८.२.५७ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पारलौकिकजीवनम्

इहलोकलीला - समाप्तौ स्वसुकृतदुष्कृतादीनां फलं भोक्तुं मानवोऽधोविधमवस्थितिं लभते—

[१] ब्रह्मणा सायुज्येन ज्ञानयोगिनः परमानन्दायिनी मोक्षावस्था ।

[२] पितृलोके स्वर्गलोके वा भौतिकशरीरेण सूक्ष्मशरीरेण वा संयुक्तस्य यथेष्टसुकृतानुरूपिणी सुखदायिनी दिव्यावस्था ।

[३] नरकेषु भौतिकशरीरेण सूक्ष्मशरीरेण वा संयुक्तस्य दुष्कृतानुपातिप्रपीडनसहा दुर्गतावस्था ।

पितृलोकाद्वा, स्वर्गलोकाद्वा, नरकाद्वा कृतकर्मणां फलान्यनुभूय पुनर्मर्त्यलोक आगमनं भवत्येव, यतो हि नामात्रैव पुनर्ज्ञानेन कर्मसौष्ठवेन वा जीवनान्तेऽभीष्टतमं सर्वोच्चफलं निःश्रेयसपदं लभ्यम् । एतदेव सृष्टे रहस्यं परमेश्वराधिष्ठितं शाश्वतं सुप्रवर्तितम् । अतो मोक्षाभिधं निःश्रेयसं पुरस्क्रियते ।

उत्तरजीवनम्

स्वर्गे नरके च मरणानन्तरमुत्तरजीवनं सम्भवति ।

मरणानन्तरमिहलौकिकपार्थिवशरीरेण संयोगः यमवरुणाधिष्ठिते पितृलोके भवतीति वैदिकी प्रमुखधारणास्ति ।[1] अग्निर्मृतपुरुषं पितृसमीपं तत्र नयति ।[2]

ऋग्वेदानुसारेण मनुष्यस्य मरणानन्तरं यमस्य साम्राज्ये पितृलोके सशरीरं स्थितिर्भवति । देवानां मध्ये स तत्र स्वर्गमधिशेते[3] । सर्वं सुखदं प्रकामं भोग्यं वर्तते । तत्र पितृभिः सम्मेलनं सम्भवति । तद्यथा ऋग्वेदे—

(१) यत्र नः पूर्वे पितरः परेयुरेना जज्ञानाः पथ्या अनुस्वाः । १०.१४.२,७

(२) स नो देवेष्वा यमद् दीर्घमायुः प्र जीवसे । १०.१४.१४
त आ गतावसा शंतमेनाथा नः शं योररपो दधानः ॥ १०.१५.४

(३) पितरो यमलोकात् सोमयज्ञे समागत्य सोमं गृह्णन्ति । ऋ० १०.१६.८;

१. ऋग्वेदे १०.१६.६ । १०.१४.७; १०.१६.५ । अथर्ववेदे १४.२.२४ । पितरः कुत्र वसन्तीत्यस्मिन् विषय ऐकमत्यं न दृश्यते । मृतस्थानस्य समीपमेतेऽवतिष्ठन्तीति धारणासीद् बहूनाम् । अथर्व० १३.३.९ । वृक्षमूले वसन्तीति शत० १३.८.१.२० ।

२. ऋग्वेदे १०.१७.३ । अथर्व० १८.२.५४ । ऋ० १०.१६.२ ।

३. तेन गेष्म सुकृतस्य लोकं स्वरारोहन्तो अभिनाकमुत्तमम् ॥ अथर्व ११.२.३७ । अयमेव यमलोकः परवर्ती स्वर्गलोको वस्तुतः पितृलोक एव । १०.१४.१५ । प्रकाशमये यमलोके सशरीरं पितृणां सम्मेलनमिति ऋ० १०.५६.१ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तत्र गमनागमनयोर्मार्गः पितृयानम् ।[1]

तत्र सन्ति प्रकाशः, भोगानन्दाः स्वधा च ।[2] पितृलोकेऽपि भौमिकरस-निर्भरजीवनं सम्भावितम् । तत्र भोग्यानि आसन् सोमः, पयः, मधु, सुरा शृङ्गारसम्भाराश्च ।[3]

पितरो दूरं पितृलोके वसन्तोऽपि स्ववंशजान् सहायन्ते यदा ते आहूताः सन्ति ।[4] पितृणां कृत इह लोकादग्निर्हविर्नयति । पितृभ्यो हविः कव्यमित्य-भिधीयते । ऋ० १०.१५.१२, अथर्व १८.३.४२, ऋ० १०.११, १२ यजु० १९.६६ अथर्व० १८.४.६५, १८.४.७ ।

एकजीवनावध्यनन्तरं पाञ्चभौतिकशरीरं विहाय मानवोऽपरजीवनावधिं लभेतेति भारतीयास्था । मरणानन्तरं किं भवति कस्यचित् पुरुषस्येति प्रश्नस्य समाधानमाप्तप्रमाणेनाधोविधं ग्राह्यमृग्वेदानुसारेण—

द्यां च गच्छ पृथिवीं च धर्मणां अपो वा गच्छ यदि तत्र ते हितम् ।
ओषधीषु प्रति तिष्ठा शरीरैः ।। १०.१६.३
वहैनं सुकृतामु लोकम् ।। १०.१६.४
आयुर्वसान उप वेतु शेषः सं गच्छतां तन्वा जातवेदः ।। १०.१६.५

अर्थात् पुरुषो मरणानन्तरं नवजीवनसमारम्भार्थं द्युलोके, पृथिवीलोके वरुणलोके वा पुण्यपापानुसारेण गच्छति । तत्र सुकृतां लोकेऽभिनवजीवनावधौ सूक्ष्मशरीरेण युक्तो भवेत् ।

अपरं चोत्तरजीवन मधोविधं वर्णितमृग्वेदे—

संगच्छस्व पितृभिः संयमेनेष्टापूर्तेन परमे व्योमन् ।
हित्वायावद्यं पुनरस्तमेहि संगच्छस्वा तन्वा सुवर्चाः ।। १०.१४.८

लोका यत्र ज्योतिष्मन्तस्तत्र माममृतं कृधि ।[5] ऋ० ८.१३३.९

---

१. अथर्व० १८.४.६२; ६.११७.३ ।

२. ऋग्वेदे ४.२६.४

३. अथर्व० ४.३४.२; तै० ब्रा० २.४.६.६; शतपथ० १०.४.४.४

४. ऋ० १०.१५.१ ।

५. मर्त्यलोके विविधयोनिषु कर्मानुसारेण पुनर्जन्म भवति । विविधदेवलोकेषु स्वर्गनरकादिषु योनिषु जन्म न स्यात् । केवलं धृतधर्माधर्मविचारेण सुखानि दुःखानि च भोग्यानि भवन्ति ।

६. अनेन प्रतीयते मोक्षावस्था कस्य चिद्दृषेरभीष्टम् । अमृतं तु मोक्ष एव ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अशुभकर्मभिः नरकपातः स्वभावतः सन्धारितः प्रतिभाति ।

ऋग्वेदानुसारेण ब्रह्मचारीहलोके देवानामेकमङ्गं भवतीति तस्य देव-संस्थत्वं प्रकटयति ।[1] अथर्ववेदे तस्य तृतीयनाकस्य गतिस्तमोलोकान् तीर्त्वा संभाविता ।[2] छान्दोग्यानुसारेण—अथ खलु क्रतुमयः पुरुषो यथाक्रतुरस्मिँल्लोके पुरुषो भवति, तथेतः प्रेत्य भवति ।[3] प्रकरणेऽस्मिन् क्रतुस्तु 'अध्यवसायः' निश्चयो वा । अतः पुरुषो यथाध्यवसायो यादृङ्निश्चयोऽस्मिँल्लोके जीवन्निह भवति, तथेतोऽस्माद्देहात्प्रेत्य भवति । समर्थितमेतद् गीतायाम्—

यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम् ।
तं तमैवेति कौन्तेय सदा मद्भावभावितः ॥ ८.६

मोक्षः

'मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतम् । मोक्षोऽपवर्गः इत्यमरकोशे ।

अनेन मोक्षस्य नैकपरिभाषाः स्फुरन्ति । तत्र परा विद्या मोक्षसाधिका वेदेभ्यः प्रागेव समुदिता । वेदादयस्तु अपरा विद्या प्रायः स्वर्गादिसाधकाः । परा विद्या उपनिषदि बौद्ध-जैनधर्मयोश्च सम्यक् समुल्लसति उभे मोक्ष-कारणम् ।[4] मुक्तिर्ब्रह्मणैक्यमिति गरुडपु० १.२१८.९ ।

सर्वं दृश्यमदृश्यं विश्वमहं च ब्रह्म-तत्त्वस्यांश एव परस्परमनिर्भिन्नमिति मनोभावो ज्ञानिनं वितृष्णं निराकांक्षं निर्भयं च करोति । अयं भाव ऋषिणा ऋग्वेदे प्रकाशितः —

पुरुष एवेदं सर्वं यद् भूतं यच्च भव्यम् । उतामृतत्वस्येशानः । १०.९०.२
यस्येमे हिमवन्तो महित्वा यस्य समुद्रं रसया सहाहुः ।
यस्येमा प्रदिशो यस्य बाहुः । १०.९७.४
शश्वद्विशः सवितुर्दैव्यस्योपस्थे विश्वा भुवनानि तस्थुः । १.३५.५
हिरण्यगर्भः समवर्तताग्रे । १०.९७.१

अस्य भावस्य प्रगुणताधोविधं छान्दोग्योपनिषदि प्रकटिता—

---

१. ऋग्वेदे १०.१०९.५

२. तीर्त्वा तमांसि बहुधा महान्त्यजो नाकमाक्रमतां तृतीयम् । ९.५.१ अस्मिन् लोके मुक्ता वसन्तीति 'अजः' विशेषेण प्रमाणितम् । तत्रैव द्रष्टव्यम् ९.५.७ । तत्र ९.५.२६ मन्त्रैः स्वर्गं लोकमश्नुते' इति वर्णितम् ।

३. छा० ३.१४.१

४. अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते । ईशोपनिषद् ११
विद्यामात्मोपासनमविद्यां वर्णाश्रमधर्मजातमन्योन्यसमुचितमेतदुभयं मोक्षोपायत्वेन वेद, नासौ अन्धतमः प्रविशति । अपरार्कौ याज्ञ० ३.२०.५ अधिकृत्य ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ब्रह्मसंस्थोऽमृतत्वमेति । २.२३.१

मोक्षस्तु जन्म-मरण-बन्धनात् सर्वथा विमुक्तिः । सोऽयं मोक्षः संस्कृतेः परमोपलब्धिर्ऋग्वैदिकर्षीणां परापरदार्शनिकानां च स्पृहणीयतमो बभूव ।[1] नैकनामधेयो मोक्षः (मुक्तिः, अमृतत्वं, निःश्रेयसः, कैवल्यं, अपवर्गश्च) भारतीयसंस्कृतौ परं राजते । मोक्षार्थिनस्तु ऋग्वेदे वर्णिता अधोविधम्—

द्वासुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ॥ १.१६४.२०

अत्रानश्नन्निति भोगविरतः, संन्यासी मोक्षाधिकारी भवति । ऋग्वेदानुसारेण न केवलं देवा अपितु मनुष्या अपि सोमेनामृता भवन्ति ।[2]

अथर्ववेदेऽथर्वा ऋषिः ब्रह्मणा तादात्म्यं प्रतीत्य गायति—

अहं जजान पृथिवीमुतद्यामहमृतूंरजनयं सप्त सिन्धून ।
अहं सत्यमनृतं यद्वदामि यो अग्नीषोमावजुषे सखाया ॥ ६.६१.३

यजुर्वेदानुसारेण—

परीत्य भूतानि परीत्य लोकान् परीत्य सर्वाः प्रदिशो दिशश्च ।
उपस्थाय प्रथमजामृतस्यात्मनात्मानमभि संविवेश ॥ ३२.११

अर्थादात्मनः परमात्मना सायुज्यं भवति ।

अन्यच्च—वेदाहमेनं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् ।
तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेऽयनाय ॥ ३१.१८
उद्वयं तमस्परि स्वः पश्यन्त उत्तरम् देवं ।
देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् । २७.१०

उत्तममिति ब्रह्मलोको गन्तव्य एव ।

वेनस्तत् पश्यन्निहितं गुहा सत् । यत्र विश्वं भवत्येकनीडम् ॥ ३२.८

अथर्ववेदे तत्र ब्रह्मविदो वर्णिताः ।[3] ब्रह्मविद् ब्रह्मैव भवति । तत्रास्ति

---

१. All ancient Indian philosophy (whether Vedānta, Sāṅkhya or Nyāya) held that liberation from the never ending cycle of births and deaths and escape from the three kinds of Duḥkha were the highest good. H. D. Vol. II p. 422.
महाकविः कालिदासोऽभिज्ञानशाकुन्तलेऽभीष्टं प्रवदति—शिवो ममापि पुनर्भवं क्षपयतु इति ।

२. Vedic Reader p. 154.

३. पुण्डरीकं नवद्वारं त्रिभिर्गुणेभिरावृतम् ।
तस्मिन् यद्यक्षमात्मन्वत् तद्वै ब्रह्मविदो विदुः ॥ १०.८.४३
अकामो धीरोऽमृतः स्वयंभूरित्यादि अथर्व० १०.८.४४ ब्रह्मलक्षणम् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

परिव्राजको यस्य संयतेन्द्रियत्वमनारम्भो, निष्किञ्चनत्वं सङ्गत्यागो, भैक्षमरण्यवासः, बाह्याभ्यन्तरशौचं च वर्णितम् । १.३.१२ । परवर्तियुगस्य संन्यासिलक्षणोपेतः स मोक्षार्थी विभाति । अन्यच्च तत्रैव ब्रह्मणा सायुज्य-मुत्प्रेक्षितम्—

येन ऋषयो बलमद्योतयन् युजा । ४.२३.५

अथर्ववेदे 'ब्रह्मैनद् विद्यात् तपसा विपश्चित्' ८.९.३ इति मन्त्रेण तपो ब्रह्मज्ञानाय प्रथमं साधनम् ।

मोक्षैषणा ऋग्वेदे वर्णिताग्निमधिकृत्य—'मुमुक्ष्वोऽ मनवे मानवस्यते' यजनेन सायुज्यं शतपथब्राह्मणे चर्चितम् । तथा हि—

'यदातिथ्येन यजन्ते, विष्णुमेव देवता यजन्ते, विष्णुदेवता भवन्ति, विष्णोः सायुज्यं सलोकतां जयन्ति । १२.१.३४

अत्र यज्ञद्वारा विष्णुना तादात्म्यं प्रतिपादितम् । प्रकरणेऽस्मिन् अग्नि-षोमादित्य-संवत्सरर्तु-मित्रावरुणेन्द्र-विश्वेदेव-प्रजापति (ब्रह्म) - प्रभृतिदेवैः सायुज्यं संकल्पितम् ।

देवैस्तादात्म्यं तु वैदिकी भावनानादिकालतः स्फुरिता विलसति । तद्यथा ऋग्वेदे - राजर्षिः त्रसदस्युर्निबध्नातीन्द्रवरुणादिभिरात्मसायुज्यम्—

अहमिन्द्रो वरुणस्ते महित्वोर्वी गभीरे रजसी सुमेके ।
त्वष्टेव विश्वा भुवनानि विद्वान् त्समैरयं रोदसी धारयं च ।। ४.४२.३

इयमत्र सायुज्यमुक्तिः । अयं सायुज्यभावो नैकदेवैः सह सम्भवेत् । तद्यथा वामदेवो निगदति—

अहं मनुरभवं सूर्यश्चाहं काक्षीवाँ ऋषिरस्मि विप्रः । ४.२६.१

यजुर्वेदे च—

वस्व्यस्यदितिरस्यादित्यासि रुद्रासि चन्द्रासि ४.२१ इत्यत्र 'अहं ब्रह्मास्मि, सोऽहम्' इत्यादि-मोक्षभावः प्रकटयति ब्रह्मसंस्थत्वम् । अस्या भावनायाः प्रौढोक्तिर्यजुर्वेदेऽस्ति—

यस्मान्न जातः परो अन्यो अस्ति ।
य आविवेश भुवनानि विश्वा प्रजापतिः प्रजया संरराणः ।। ८.३६

अथर्ववेदे वेनस्तु प्रथमो वेदान्ती । ५.६.१

वैदिकी मोक्षप्रक्रिया—ध्यानम्

'सूर्यो मे चक्षुर्वातः प्राणोऽन्तरिक्षमात्मा पृथ्वी शरीरम् ।' अथर्व० ५.९.७

अत्र स्वस्य विराट्स्वरूपस्य ज्ञानेन पुनर्ध्यानेन स्वभावतः स्वोद्योग-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

क्षमता वर्धते । अनेन विधिनाध्यायी सूर्यादीनां विभवमात्मसात् करोति ।[1] अन्यत्र यजुर्वेदेऽग्निं प्रति

या तव तनूरियं सा मयि यो मम तनूरेषा सा त्वयि ।। ५.६

इति सायुज्यं ज्ञेयं ध्येयं चासीत् । अथर्ववेदे—

ब्रह्माहमन्तरं कृण्वे । ७.१००.१

अर्थान्मयि ब्रह्म विराजते ।

अन्यत्र 'धीती वाये अनयन् वाचो अग्रं मनसा' । ७.१.१ प्रसङ्गेऽस्मिन् धीती ध्यानी एव ।

'मनसाधीती' अथर्व० ७.१.१ इत्यनेन मनोयोगो वर्णितः । अपरं च शतपथे प्रोक्तम्—ब्रह्मविद्यया सर्वं भविष्यन्तो मनुष्या मन्यन्ते । तदात्मानमेवावेदहं ब्रह्मास्मीति । य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवति । शत० १४.४.२.२०–२२ । ब्रह्मा तपसा मृत्युपाशाद्विमुक्तः इति शतपथे १०.४.४.१–३ ।

बृहद्योगियाज्ञवल्क्यानुसारेण मोक्षो ज्ञानकर्मसमुच्चयेन प्रभवति । केवलं ज्ञानेन मोक्षो न सम्भवति । उभयोर्योगेन सिद्धिर्भवति ।[2]

नैतन्मतमुपनिषत्प्रवर्तितम् । कौषीतकि-ब्राह्मणोपनिषदि स्पष्टमेव प्रोक्तम्—स एष विसुकृतो विदुष्कृतो ब्रह्म विद्वान् ब्रह्मैवाभिप्रैति । १.१.४

परवर्तियुगे मोक्षः कथं स्यादित्यस्मिन् विषये मनुः[3] प्रमाणयति सामग्र्येण—

वेदाभ्यासस्तपोज्ञानमिन्द्रियाणां च संयमः ।
अहिंसागुरुसेवा च निःश्रेयसकरं परम् ।। १२.८३
सर्वेषामपि चैतेषामात्मज्ञानं परं स्मृतम् । १२.८५
प्रवृत्तं कर्म संसेव्य देवानामेति साम्यताम् ।
निवृत्तं (कर्मयोगं) सेवमानस्तु भूतान्यत्येति पञ्च वै । १२.९०

अन्यत्रापि मनुरेवमेव निगदति—

---

१. वेदान्तदर्शनस्य 'अहं ब्रह्मास्मि' इति ज्ञानं च ध्यानं च मूलभूतं संहितासु लक्ष्यते ।

२. ज्ञानं प्रधानं न तु कर्महीनं कर्मप्रधानं न तु बुद्धिहीनम् ।
तस्माद् द्वयोरेव भवेत् सिद्धिर्न ह्येकपक्षो विहगः प्रयाति ।
परिज्ञानाद् भवेन्मुक्तिरेतदन्मुक्तिरेतदालस्य - लक्षणम् ।
कायक्लेशभयाच्चैव कर्म नेच्छन्त्यपण्डिताः ।। ९.२८.२९, ३४

मतमिदं शङ्करादीनां मोक्षकारणविवेचनं समर्थयति । विश्वरूपो निगदति—अपवर्गार्थं हि पारिव्राज्यं ज्ञानैकसाधनम् । न तत्र कर्मणां प्रयोजनम् ।

३. अत्र मनुः संन्यासाश्रमस्य ब्रह्माश्रमस्य च जन्ममरणबन्धनविमुक्तिपथं निदर्शयति । ब्रह्मज्ञानेन ब्रह्मलीनतेति शतपथब्रा० ११.५.६.९; ११.४.४.१; ३.१०.९.११ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सम्यग्दर्शन-सम्पन्नः कर्मभिर्न निबध्यते ।
दर्शनेन विहीनस्तु संसारं प्रतिपद्यते ।। ६.७४

मनुर्धर्मस्य दश लक्षणानि प्रोच्य तस्याचरणेन मोक्षप्राप्तिं निर्दिशति—

दश लक्षणानि धर्मस्य ये विप्रा समधीयते ।
अधीत्य चानुवर्तन्ते ते यान्ति परमां गतिम् ।। ६.९३

यदि मोक्षं न लभते तर्हि भाविजीवनेऽपकर्मभावेन विपत्तिं सम्पद्यते ।[1] मोक्षार्थं संन्यासस्य नितान्तावश्यकता नास्तीति चिन्तनेन परमश्रेयो (मोक्षः) लभ्यमिति मनुना प्रकीर्तितम् । तथाहि—

एकाकी चिन्तयेन्नित्यं विविक्ते हितमात्मनः ।
एकाकी चिन्तयानो हि परं श्रेयोऽधिगच्छति ।। ४.२५८

दानेन वा ज्ञानेन वा यज्ञेन वाप्यमृतत्वं सम्भवतीति वैदिकसाहित्ये प्रमाणितम् । ऋग्वेदे स्वर्णदानमात्रेणाप्यमृतत्वं विभावितम् । तथाहि—

हिरण्यदा अमृतत्वं भजन्ते । १०.१०७.२

ज्ञानमात्रेणाप्यमृतत्वं (मोक्षो मुक्तिर्वा) साध्यमिति शतपथब्राह्मणे स्पष्टीकृतमधोविधम्—

यो हैवमेतं संवत्सरमध्यात्मं प्रतिष्ठितं वेद, प्रतितिष्ठति प्रजया पशुभिरस्मिल्लोकेऽमृतत्वेनामुष्मिन् । १२.१.४.३; १२.२.१.१६

कथमात्मनः सर्वभावो मृत्युजयं वितनोतीति प्रपञ्चितमधोविधम्—

'सर्वान् लोकानात्मन्नधिषि । सर्वेषु लोकेष्वात्मानमधाम् । सर्वेषु देवेषु, वेदेषु, प्राणेष्वात्मानमधामित्यक्षिता वै लोका देवा वेदाः प्राणाः । अक्षितं सर्वम् । अक्षिताद्ध वा अक्षितमुपसंक्रामति । अप पुनर्मृत्युं जयति । सर्वमायुरेति, य एवमेतद् वेद । १२.३.४.११ । एतद् ब्रह्मसंस्थत्वमाविष्करोति । अपरञ्च—'एवंवित् सर्वेषां भूतानामात्मा । शतपथे १४.४.३ ।

शतपथानुसारेण य उपदग्धेन हविषा यजते सोऽग्निना ब्रह्मणो द्वारेण प्रतिपद्य ब्रह्मणः सायुज्यं सलोकतां जयति । ११.४.४.१ । पुनश्च—

ब्रह्मयज्ञेन ब्रह्मणः सात्मतां गच्छति । ११.५.६.९

अन्यच्च—तदेष श्लोको भवति—

विद्यया तदारोहन्ति यत्र कामाः परा गताः ।
न तत्र दक्षिणा यन्ति नाविद्वांसस्तपस्विनः ।। शत० १०.५.४.१६

उपनिषद्युगे देवानां प्रतिष्ठा किंचिन्न्यूना विभाव्यते । मनुष्यो देवार्थं यज्ञादिकं न कुर्यादिति स्पष्टीकृतम् । यज्ञकारको मनुष्यो देवानां पशुरेवोप-

१. शतपथ० १२.९.१.१ । अत्र पुनर्जन्म सम्भावना वर्तते ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भोग्यत्वात्[1] । एतद्विपरीतं ब्रह्मज्ञानेन 'अहं ब्रह्मास्मीति ज्ञात्वा स (पुरुषः) इदं सर्वं भवति । तस्य ह न देवाश्च नाभूत्या ईशते ।

'तस्मादेषां तन्न प्रियं यदेतन्मनुष्या विद्युः । अर्थाद् ये लोका यज्ञादिं कुर्वाणा देवान् भावयन्ति ते स्वीयां प्रवृत्तिं विहायोत्तमलाभार्थं ब्रह्मज्ञानं प्राप्य देवपराङ्मुखा भवेयुरिति देवानामुभयम् । तथापि ब्रह्मसंस्थत्वं देवानामपि स्पृहणीयम्, ऋषीणां मनुष्याणां च ।[2]

उपनिषदां यज्ञोपेक्षया खिन्नैरिव पूर्वमीमांसकैः प्रतिवादरूपेण तासां ब्रह्मविद्यासर्वस्वमपहृतमेव । ते वदन्ति—आत्मानं नैव जानीमः, जानीमो न ब्राह्मीं स्थितिम् । खर्वं खलु यज्ञेन साध्यं लभ्यं वा, तर्हि ब्रह्मण ईश्वरस्य वा स्थानं विचारणां नार्हति तेषां मीमांसकानाम् ।

योगेन तस्याङ्गेन ध्यानादिना च मोक्षो भवतीति मनुः प्रतिपादयति ।

प्राणायामा ब्राह्मणस्य त्रयोऽपि विधिवत्कृताः ।
व्याहृति-प्रणवैर्युक्ता विज्ञेयं परमं तपः ॥ ६.७०
तथेन्द्रियाणां दह्यन्ते दोषाः प्राणस्य निग्रहात् ।
प्राणायामैर्दहेद् दोषान् धारणाभिश्च किल्विषम् ।
प्रत्याहारेण संसर्गान् ध्यानेनानीश्वरान् गुणान् ।
ध्यानयोगेन सम्पश्येद् गतिमस्यान्तरात्मनः ॥ ६.७२
सम्यग्दर्शन-सम्पन्नः कर्मभिर्न निबध्यते ।
दर्शनेन विहीनस्तु संसारं प्रतिपद्यते ॥ ६.७४
अहिंसयेन्द्रियासङ्गैर्वैदिकैश्चैव कर्मभिः ।
तपश्चरणैश्चोग्रैः साधयन्तीह तत्पदम् ॥ ६.७५
ध्यानयोगेन ब्रह्माभ्येति सनातनम् ॥ ६.७९
सर्वभावेषु निःस्पृहः शाश्वतं सुखमवाप्नोति ॥ ६.८०

मनुमतमेतद्बौद्धनिर्वाणपथेन साम्यभजते ।

उपनिषद्युगे मोक्षस्य परं साधनं ब्रह्मज्ञानं तपश्चान्ववर्तत । तथा हि—

---

१. मुण्डकोपनिषदनुसारेण—
प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म ।
एतच्छ्रेयो ये अभिनन्दन्ति मूढा जरां मृत्युं ते पुनरेवापि यन्ति ॥ १.२.७

२. स्तुति-नमस्कार-याग-बल्युपहार-प्रणिधान-(सर्वकर्मार्पणम्) ध्यानादिना उपास्ते, मयास्मै ऋणिवत् प्रति कर्तव्यम्—इत्येवं प्रत्ययः सन्नुपास्ते । न स इत्थम्प्रत्ययो वेद विजानाति तत्त्वम्' इति शाङ्करभाष्यम् । बृहदा० १.४.१० अधिकृत्य । तत्तत्र यो यो देवानां मध्ये प्रत्यबुध्यत, प्रतिबुद्धिवानात्मानं यथोक्तेन विधिना, स एव प्रतिबुद्ध आत्मा तद् ब्रह्माभवत् । तथर्षीणां तथा मानुषाणां च मध्ये ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

'ब्रह्म विद्वान् ब्रह्माभिप्रैति'। कौषी० १.१.४। ब्रह्मवेद ब्रह्मैव भवति। मुण्ड० ३.२.९। ब्रह्मलोकं तु परमं पदम्। छान्दोग्यानुसारेण ब्रह्मलोकं ब्रह्मचर्येणानुविन्दति। ८.४.३। अत्र ब्रह्मचर्यं तु ब्रह्मज्ञानोपयोगि व्रतम्। अन्यच्च—सर्वं खल्विदं ब्रह्म। छा० ३.१४.१। अहं ब्रह्मास्मि। बृ० उ० १.४.१०। ब्रह्मैव सन् ब्रह्माप्येति। बृ० उ० ४.४.६। विद्वान् ब्रह्मामृतोऽमृतम्। ४.४.१७

तैत्तिरीयोपनिषदि 'तपसा ब्रह्म विजिज्ञास्व, तपो ब्रह्मेति।' ३.२.१। मुण्डकोपनिषदि 'तपसा चीयते ब्रह्म। १.१.८।

मुण्डकोपनिषदनुसारेण सा 'परा विद्या यया तदक्षरम् (ब्रह्म) अधिगम्यते। १.१५। अथ च—

तपःश्रद्धे ये ह्युपवसन्त्यरण्ये शान्ता विद्वांसो भैक्ष्यचर्यां चरन्तः।
सूर्यद्वारेण ते विरजाः प्रयान्ति यत्रामृतः स पुरुषो ह्यव्ययात्मा[1]॥ १.२.११

पुनश्च—

वेदाभ्यासतपोज्ञानमिन्द्रियाणां च संयमः।
अहिंसा गुरुसेवा च निःश्रेयसकरं परम्॥ १२.८३

मनोरयं समन्वय-पथः।[2] वस्तुतः स उपनिषत्पथेन ब्रह्मज्ञानस्य श्रैष्ठ्यं प्रतिपादयति—

सर्वेषामपि चैतेषामात्मज्ञानं परं स्मृतम्।
तद्ध्यग्र्यं सर्वविद्यानां प्राप्यते ह्यमृतं ततः॥ १२.८५

मनुः ससारं प्रवदति—दशकं धर्मलक्षणम्।[3] तेषामध्ययनेन तदनुवर्तनेन परमा गतिः।

महाभारतानुसारेण हिरण्यदानेन पुण्यात्मामृतत्वमेति[4]। अन्यत्र मोक्षापन्ना विशेषिताः—

तं वै परं वेदविदः प्रपन्नाः परं परेभ्यः प्रथितं पुराणम्।
स्वाध्यायदानव्रतपुण्ययोगैस्तपोधना वीतशोका विमुक्ताः॥

पुराणेषु मोक्षार्थं सरलः पन्था अपि संस्तुतः[5]। यथा—

---

१. ब्रह्माश्रम-प्रकरणे विषयोऽयं प्रकामं निदर्शितः।

२. सा समन्वय-दृष्टिरन्यत्रापि प्रतीयते। यथा—

वैदिके कर्मयोगे तु सर्वाण्येतान्यशेषतः।
अन्तर्भवन्ति क्रमशस्तस्मिंस्तस्मिन् क्रियाविधौ॥ मनु० १२.८७

३. धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्॥ ६.९२

४. दत्त्वा हिरण्यममृतत्वमेति। आर० १८४.८

५. गरुडपुराणे मनुमतं समर्थितम्—निवृत्तरागस्य गृहं तपोवनम्॥ १.२०.५.९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दानतीर्थाश्रितं मोक्षं स्वर्गं च ।। गरुड० २.२८.१

पूर्वमीमांसायां मोक्षस्य प्रतिष्ठा यथोचिता न प्रतिभाति । आदि-भाष्यकारौ शबरः प्रभाकरश्च मोक्षं नाभिजानीतः । प्रकरण-पञ्चिकानुसारेण—

आत्यन्तिकस्तु देहोच्छेदो निःशेषधर्माधर्मक्षयनिबन्धनो मोक्षः ।

चतुर्विधो मोक्षः

वेदान्तिनो चतुर्विधं मोक्षं प्रस्तावयन्ति[1]—सालोक्यम्, सामीप्यम्, सारूप्यम्, सायुज्यं च ।

मुण्डकोपनिषद् ब्रह्मज्ञानान्तरं ध्यानेन मोक्षं सुलभं प्रस्तावयति । तथा हि-

ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलं ध्यायमानः ।। ३.८

अन्यच्च हृदयस्थमोऽम्' इत्येवंध्यानेन ब्रह्मप्राप्तिः सम्भवति ।[2] डा० भण्डारकरो निदर्शयति—

This way to redemption is meditation on the supreme soul, which way is characteristic of the Upaniṣad doctrine in general.[3]

स्वर्गः

अमरकोशानुसारेण स्वर्गस्य पर्यायाः सन्ति—

स्वरव्ययं स्वर्गनाक-त्रिदिव-त्रिदशालयाः ।

सुरलोको द्यो-दिवौ द्वे स्त्रियां क्लीबे त्रिविष्टपम् ।। १.१.६

स्वर्गपर्याया इमे वैदिकसंहितासु प्रकामं विलसन्ति ।[4]

ऋग्वेदे स्वर्गस्य प्रसादमयी चर्चा वर्तते । तत्र ते जनाः स्वर्गे प्रतितिष्ठन्ति ये पुण्यकर्माणो भवन्ति । तत्र ते मित्रवरुणादिदेवैः सह विहरन्ति । देववत्ते स्तोतृभ्योऽमरत्वं प्रयच्छन्ति ।

वैदिकसाहित्ये स्वर्गस्य वर्णनमधोविधं वर्तते—

(१) यत्रानन्दाश्च मोदाश्च मुदः प्रमुद आसते ।
कामस्य यत्राप्ताः कामास्तत्र माममृतं कृधि ।

(२) संगच्छस्व पितृभिः संयमेनेष्टापूर्तेन परमे व्योमन् ।
स नो देवेष्वा यमद् दीर्घमायुः प्रजीवसे ।। ऋग्वेदे १०.१४.८

---

१. ब्रह्मलोकेऽवस्थानं सालोक्यम् । ब्रह्मणः समीपेऽवस्थानमिति सामीप्यम्, ब्रह्मण-स्तद्रूपता सारूप्यम् । ब्रह्मणि लीनता सायुज्यं भवति । एतेषु प्रत्यक्षमेव सायुज्यं श्रेष्ठम् । सायुज्यं सारूप्यं, सलोकता च ऐतरेयब्राह्मणे २.२४ ।

२. 'ओमित्येवं ध्यायथ आत्मानं स्वस्ति वः पाराय तमसः परस्तात् । २.२.६

३. Vaiṣṇavism, Śaivism etc. Page 157.

४. ऋग्वेदे १.१२५.५;५.५५.४;५.६३.२; १०.१०७.२ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मरणानन्तरं स्वर्गे शुभ्रतमा स्थितिरथर्ववेदेऽधोविधं परिकल्पिता—

यत्रा सुहार्दः सुकृतो मदन्ति विहाय रोगं तन्वः स्वायाः ।
अश्लोणा अङ्गै रहृ ुताः स्वर्गे तत्र पश्येम पितरौ च पुत्रान् । ६.१२.३

अर्थादस्मान्मर्त्यलोकात् स्वर्गलोकं ः गमिष्यामः । लोकोऽयमधोविधं लक्षितः —

(१) स्वर्गस्य निवासिनस्ते सज्जनाः सन्ति, येषां हृदयं कार्यं च सुनीथमस्ति । अथ च ते सानन्दा भवन्ति ।

(२) स्वर्गे रोगादिविमुक्तं सर्वाङ्गसम्पन्नं शरीरं भवति ।

(३) स्वर्गे पितरो मिलन्ति पुत्राश्च यथाकालं मिलिष्यन्ति ।

अत्रैव मोक्षस्य कल्पना वर्ततेऽधोविधम्—प्रेहामृतस्य यच्छतां प्रैतु बद्धकमोचनम् । ६.१२१.३ । अत्रामृतं तु मोक्ष एव ।

प्रागेव ऋग्वेदे स्वर्गस्य परिकल्पना स्पष्टीकृताधोविधम्—

यत्र ज्योतिरजस्रं यस्मिन् लोके स्वर्हितम् ।
यत्र राजा वैवस्वतो यत्रावरोधनं दिवः ॥ ९.११३.७

स्वर्गे वासो नैकविधोपायैः सम्भाव्योऽमन्यत । तेषु ऋषीणां तपः श्रेष्ठोपायः[1] । तथाहि—

तपसा ये अनाधृष्यास्तपसा ये स्वर्ययुः ।
तपो ये चक्रिरे महस्ताँश्चिदेवापि गच्छात् ॥ १०.१५४.२

मानवलोके भोगविलासानामानन्त्यं बहुविधं भवति । किन्तु तत्र क्षणंक्षणं दुखं मिश्रितं स्यादेव । विपरीतास्तु स्वर्गादिलोकानामानन्दाः । तत्र दुःखस्य नामापि न श्रूयते । अथ चानन्द-भोगविलासादीनां मात्रासंख्यगुणा भवति । शतपथानुसारेण मनुष्य-पितृ-कर्मदेवाजानदेव-देव-गन्धर्व-प्रजापति-ब्रह्मणां क्रमशः शतगुणानन्दः प्रगुणीभवति ।[2] कौषीतक्युपनिषदि निष्कृष्टम् या ब्रह्मणि चितिर्या व्यष्टिस्तां चितिं जयति तां व्यष्टिं व्यश्नुते य एवं वेद ।[3]

स्वर्गः कुत्रास्ति ? स्वर्गलोकस्तु देवलोका एव त्रिदशालया इति ख्याताः । ते सन्ति —अग्नि-वायु-वरुणादित्येन्द्र-प्रजापति-ब्रह्मादीनां लोकाः । देवपथै[4]-

---

१. मनुः प्रथयति—सर्वे चरा अचराश्च दिवं यान्ति तपो बलात् । ११.२४०
न केवलं तपसापितु युद्धोद्योगेन, सहस्रदक्षिणयज्ञेन, ऋतपालनेन च स्वर्गो लभ्यः । ऋ० १०.१५४.३,४

२. शत० १४.७.१.३२–३९ ३. कौषीतकि० १.७ ।

४. कौषीतकि० १.३; बृहदा० ३.६ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्तत्र गन्तव्यमस्ति ।[1] अथर्व० २.३४.५

ऐतरेयब्राह्मणानुसारेण स्वर्गो वै लोको ब्रघ्नस्य (सूर्यस्य) विष्टपम् । ५.३४ ।[2] तैत्तिरीयब्राह्मणे स्वर्ग उपरीव निर्दिष्टः । ३.२.१.५ । पराङ् हीतोऽसौ (स्वर्गलोकः) ।

उपनिषत्सु स्वर्गो भूयिष्ठं स्पृहणीयश्चित्रितः । तथाहि कौषीतक्युपनिषदि तं पञ्चशतान्यप्सरसां प्रतिधावन्ति, शतं मालाहस्ताः शतमाञ्जनहस्ताः, शतं चूर्णहस्ताः शतं वासोहस्ता··· ब्रह्मालङ्कारेणालंकुर्वन्ति, स ब्रह्मालंकारेणालंकृतो ब्रह्म विद्वान् ब्रह्मैवाभिप्रैति । १.४ । कठोपनिषदि वर्णितम् – शोकातिगो मोदते स्वर्गलोके । १.१२.१३

स्वर्गस्य स्थायिनिवासिनः सन्ति— देवाः साध्याः, विश्वे मरुतः, गन्धर्वाः, अप्सरसः । ते स्वस्वनिकायेषु तत्र प्रतिवसन्ति । आर० २४७ । तेषां पृथक् पृथग् लोकाः स्थिताः । तत्र मेरुपर्वतः, नन्दनादिदेवोद्यानानि विहाराश्च सन्ति । सर्वतोभद्रं सर्वत्र यतो हि नाम क्षुत्पिपासाग्लानिशीतोष्णभयबीभत्सादिकं तत्र नास्ति । अपरं च

मनोज्ञाः सर्वतो गन्धाः सुखस्पर्शाश्च सर्वशः ।
शब्दाः श्रुतिमनोग्राह्याः सर्वतस्तत्र वै मुने ।।
न शोको न जरा तत्र नायासपरिदेवने ।। आर० २४७.१०,११

महाभारतानुसारेण स्वर्गलोक उपरि स्थितः —

उपरिष्टादसौ लोको योऽयं स्वरिति संज्ञितः ।
ऊर्ध्वगः सत्पथः शश्वद्देवयानचरो मुने ।। आर० २४७.२
एषां देवनिकायानां पृथक् पृथगनेकशः ।
भास्वन्तः कामसम्पन्ना लोकास्तेजोमयाः शुभाः ।। ७
त्रयस्त्रिंशत् सहस्राणि योजनानां हिरण्मयः ।
मेरुः पर्वतराडत्र देवोद्यानानि मुद्गल ।। ८
नन्दनादीनि पुण्यानि विहाराः पुण्यकर्मणाम् ।। ९

महाभारतानुसारेण (आर० २४७.३) तपस्विनः, महायज्ञयाजिनः, सत्यवादिनः आस्तिकाश्चार्हन्ति स्वर्गे प्रवेशम् । अथ च —

धर्मात्मानो जितात्मानः शान्ता दान्ता विमत्सराः ।
दानधर्मरताः पुंसः शूराश्चाहतलक्षणाः ।। आर० २४७.४

---

१. अत्र योगिनां स्वर्ग-पर्यटनं विभावितम् । समर्थितमेतत्—
ब्रह्मौदनो देवयानः स्वर्गः । अथर्व० ११.१.२०
स्वर्गः पन्थाः सुकृते देवयानः ।। अथर्व० १८.४.१४

२. परो वा अस्माल्लोकात् स्वर्गो लोकः । ऐ० ब्रा० ६.२०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तत्र गच्छन्ति कर्माग्र्यं कृत्वा शमदमात्मकम् ।
लोकान् पुण्यकृतां ब्रह्मन् सद्भिरासेवितान्नृभिः ॥ ५
ईदृशः स मुने लोकः स्वकर्मफलहेतुकः ।
सुकृतैस्तत्र पुरुषाः सम्भवन्त्यात्मकर्मभिः ॥ १२

ये मांसभोजनं नाकुर्वन् तेऽपि बहवो राजानः स्वर्गावासं लभन्ते स्म । अनु० ११६.६१–७०

महाभारते कीदृशो नराः स्वर्गं नरकं वा गच्छन्तीति विवेचनमधिकृत्य समाजे समष्टिशो व्यष्टिशश्च लोका आत्मनोऽन्येषां च हितचिन्तकाः सत्पुरुषा भवन्त्विति व्याख्यातम् । समासेन तस्योद्धरणमधोविधम्—

दानेन तपसा सत्येन धर्मानुवर्तिनः, प्रतिग्रहनिस्पृहाः विद्वांसः, स्वप्रयत्नेन भयपाप-बाधा-दारिद्र्य-व्याधिधर्षणात् लोकरक्षकाः[1], क्षमावन्तः, धीराः, धर्मकार्येषूत्थिताः, मङ्गलाचारयुक्ताः, आश्रम-कुल-देश-नगर-कर्तारः, वस्त्राभरणान्नपानदातारः, मातापितृसेवकाः, भ्रातृसस्नेहाः, हिंसानिवृत्ताः, सर्वसहाः, सर्वाश्रयभूताः[2] जितेन्द्रियाः, अपराद्धेषु सस्नेहाः, आत्मवत्सर्वेषां प्रियंकराः,[3] कन्या-विवाह-सहायकाः, पूर्तकारकाश्च स्वर्गगामिनः ।[4]

महाभारतानुसारेण मरणानन्तरं स्वर्गाय सत्यं, धर्मः, तपः, ब्रह्म, आचारः, शौचं चावश्यकानि ।[5] अन्यच्च—

यो ब्रह्म जानाति यथाप्रदेशं स्वाध्यायनित्यः शुचिरप्रमत्तः ।
स वै पुरो देवपुरस्य गन्ता सहामरैः प्राप्नुयात् प्रीतियोगम् ॥ शा० १८४.५

स्वर्गवासिनां शरीरादिकं पार्थिवं न भवति, अपितु—

तैजसानि शरीराणि भवन्त्यत्रोपपद्यताम् ।
कर्मजान्येव मौद्गल्य न मातृपितृजान्युत ॥
न च स्वेदो न दौर्गन्ध्यं पुरीषं मूत्रमेव च ।
तेषां न च रजो वस्त्रं बाधते तत्र वै मुने ॥

---

१. भयात् पापात्तथा बाधाद्दारिद्र्याद् व्याधिधर्षणात् ।
यत्कृते प्रतिमुच्यन्ते नराः स्वर्गगामिनः ॥ अनु० २४.८५

२. सर्वहिंसानिवृत्ताश्च नराः सर्वसहाश्च ये ।
सर्वाश्रयभूताश्च ते नराः स्वर्गगामिनः ॥ २४.९०

३. सहस्रपरिवेष्टारस्तथैव च सहस्रदाः ।
त्रातारश्च सहस्राणां पुरुषाः स्वर्गगामिनः ॥ २४.९४

४. अनुशासनपर्वणि २४ ८३–१००

५. शान्ति० १८१.२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

न म्लायन्ति स्रजस्तेषां दिव्यगन्धा मनोरमाः ।
पर्युह्यन्ते विमानैश्च ब्रह्मन्नेवं विधाश्च ते ।।
ईर्ष्याशोकक्लमोपेता मोहमात्सर्यवर्जिताः ।
सुखं स्वर्गजितस्तत्र वर्तयन्ति महामुने ।।

ब्रह्मलोकाः

देवानां ३३ लोका उपर्युपर्यवतिष्ठन्ते । तेजोमयाः, शुभाः ब्रह्मलोकास्तेषु पुरस्ताद् वर्तन्ते । तत्र स्वशुभकर्मभिर्ऋषयो यान्ति । अन्यदेवैः पूजिता देवदेवाः सन्ति ऋभवस्तत्रत्यस्थायिवासिनः ।[1]

स्वर्गीयसुखोपभोगसामग्री तत्र विपुला वर्तते । तथाहि—

तत्र स्म रम्या विपुला विशोकाः सुपुष्पिताः पुष्करिण्यः सुपुण्याः ।
अकर्दमा मीनवत्यः सुतीर्था हिरण्मयैरावृताः पुण्डरीकैः ।।
शा० १८४.६
तासां तीरेष्वासते पुण्यकर्मा महीयानः पृथगप्सरोभिः ।[2]
सुपुण्यगन्धाभिरलंकृताभिर्हिरण्यवर्णाभिरतीव हृष्टः ।। १८४.७
नन्दनादीनि देवानां वनानि बहुलान्युत । आरण्यक० १६४.४१

तत्र शक्रस्य भवनममरावती आदर्शं प्रस्तौति[3]—

दिव्यैः कामफलैर्वृक्षै रत्नैश्च समलङ्कृताः । आरण्यक० १६४.४२
नित्यपुष्पफलास्तत्र पादपा हरितच्छदाः ।
पुष्करिण्यश्च विविधाः पद्मसौगन्धिकायुताः ।। ४६
शीतस्तत्र ववौ वायुः सुगन्धो जीवनः शुचिः ।
सर्वरत्नविचित्रा च भूमिः पुष्प-विभूषिता ।। ४७
मृगद्विजाश्च बहवो रुचिरा मधुरस्वराः ।
विमानयायिनश्चात्र दृश्यन्ते बहवोऽमराः ।। ४८

सर्वोपरि वर्तते ब्रह्मलोको यत्र पुण्यकृद्वशी देवलोकात् संचरणमकरोत् ।[4]

---

१. आरण्यकप० २४७.१८, १९,२२

२. अप्सरोविलासो महाभारतकालात् प्रभृत्येव प्रभवति । वैदिकयुगे मनागेवासां प्रतिष्ठा परिलक्ष्यते ।

३. ययातिमुखेनापीन्द्रस्यपुरी परिचेया—
ततः पुरीं पुरुहूतस्य रम्यां सहस्रद्वारां शतयोजनायताम् । आदि० ८४.१४

४. यथा ययातिः —
देवलोकाद् ब्रह्मलोकं संचरन् पुण्यकृद्वशी ।
अवसत् पृथिवीपालो दीर्घकालमिति श्रुतिः ।। आदि० ८२.२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्वर्गे क्वचित् महात्मनां तपस्विनां पूजापि कतिपयदेवैः कृतासीत् ।[1]

नैकपुराणेषु स्वर्गस्यानुत्तमसुखदायिन्यो विभूतयः सातिशयं विभाविताः ।[2] तदनुसारेण सर्वमभीष्टं—दृष्टं वादृष्टं वा काल्पनिकं वा प्रकाममेव स्वर्गे विलसति ।[3] दुःखाविहता प्रीतिरेव स्वर्ग इति सुश्लिष्टं मतं प्रतिपादितम् ।

स्वर्गसुखानि मरणानन्तरमेव भोग्यानि भवन्ति । अपरतस्तु मोक्षानन्दं जीवन्मुक्त इहलोकेऽस्मिन् जीवनेऽपि लभते ।

स्वर्गमार्गः

परमरम्यः स्वर्गः । रम्यतमस्तत्र गमनमार्गः पद्मपुराणे वर्णितः । तदनुसारेण मार्गः प्रस्तरैरिष्टकैर्बद्धः, दिव्यवस्त्रैः समावृतः, गन्धर्वकन्या-गीत-निनादितः अप्सरोनृत्यरञ्जितः, नानावाद्यध्वनितः, कुसुमवृष्टि-शीतलतोय-वायु-पुष्पमनोरमः, पादप-लता-वल्लीमण्डितोऽस्ति । मार्गेऽस्मिन् नाना-भोगान् भुञ्जानाः स्वर्गपथगामिनस्तत्रत्यैः स्वागतसत्कृता निकामं निकामं प्रचरन्ति ।[4]

स्वर्गस्य शोचनीय एकः परमाभावो वर्तते यत् तत्रत्यानां वसतिकालः सीमितो भवति पुण्यमात्रया सम्मितः । तथाहि महाभारते आरण्यकपर्वणि—

कृतस्य कर्मणस्तत्र भुज्यते यत्फलं दिवि ।
न चान्यत् क्रियते कर्म मूलोच्छेदेन भुज्यते ॥ २४७.२८
सोऽत्र दोषो मम मतस्तस्यान्ते पतनं च यत् ।
सुखव्याप्तमनस्कानां पतनं यच्च मुद्गल ॥ २४७.२९
असन्तोषो परीतापो दृष्ट्वा दीप्ततराः श्रियः ।
यद्भूयवत्यवरे स्थाने स्थितानां च दुष्करम् ॥ २४७.३०
आब्रह्मभवनादेते दोषा मौद्गल्य दारुणाः । २४७.३२

क्षीणे पुण्ये मर्त्यलोकं विशन्तीति[5] प्रकरणस्य व्यावहारिकपरिचयो

---

१. स्वर्गतो ययातिः 'त्रिदशैः साध्यैर्मरुद्भिस्तथा वसुभिः पूजितः । आदि० ८२.१
२. ब्रह्मपुराणे २२५.६; पद्मपु० २.९५.२–५ मार्कण्डेयपुराणे १०.९३–९५
३. स्वर्गोऽयमस्ति सत्यो वा सर्वथा काल्पनिको वेत्यस्मिन् विषये भारतीयतार्किक-मनीषानुसन्धान-प्रगल्भिता दृश्यते । तथाहि शबरः—पुरुषाणामेवंविधेन देशेना-नुसन्धानप्रमाणं वचः । आख्यानमपि पुरुषप्रणीतत्वादनादरणीयम् । वैदिकमपि स्वर्गाख्यानं विधिपरं नास्त्येव । भवति तु विधयन्तरेणैकवाक्यभूतं स्तुतिपरम् । पूर्वमीमांसा ६.१.१ अधिकृत्य शाबरभाष्यम् ।
४. पाद्मोत्तरे क्रियायोगसारे २२ अध्यायतः
५. इन्द्रो ययातिं सूचयति—क्षीणे पुण्ये पतितोऽस्यद्य राजन् । आदि० ८३.३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ययाति-मुखेनावगन्तव्यो महाभारते—

ज्ञातिः सुहृत् स्वजनो वा यथेह क्षीणे वित्ते त्यज्यते मानवैर्हि ।
तथा तत्र क्षीणपुण्यं मनुष्यं त्यजन्ति सद्यः सेश्वराः देवसंघाः ।।
आदि० ८५.२

इमं भौमं नरकं ते पतन्ति लालप्यमाना नरदेव सर्वे ।
पुण्यां योनिं पुण्यकृतो व्रजन्ति पापां योनिं पापकृतो व्रजन्ति ।
कीटा पतङ्गाश्च भवन्ति पापा न मे विवक्षास्ति महानुभाव । ८५.१९

'अन्ते मतिः सा गतिः' इति धाराणाया आधारोऽजामिलाख्यानं (भागवते ६.१.२०; पद्मपु० १.३१.१०९;६.८७.७) वर्तते । सर्वथा पतितोऽपि मृत्युकाले नारायणनामकस्य स्वपुत्रनामोच्चारण-मात्रेण अजामिलो विष्णुधाम लब्धवान् ।

स्वर्ग-नरक-प्रकल्पनान्येषु धर्मेषु वर्तत एव । ख्रीष्टधर्मे स्वर्गः (Heaven) शाश्वतसुखायास्ति, नरकश्च (Hell). शाश्वतप्रपीडनाय क्रमशः पृथिव्या उपरिष्टादधस्ताच्च स्थितः । इस्लामधर्मे बिहिश्त-(जन्नत) दोज़खौ क्रमशः स्वर्गनरकौ । मिसरदेशे शेओल, ग्रीसदेशे हेड्स च नरक एव प्रवृत्तिनिमित्तात् । बौद्धानां स्वर्ग-नरककल्पना प्रगल्भिता वर्तते । जैनानां विवासुयं (विपाकश्रुतम्) वैदिककर्मविपाकमेवानुहरति स्वर्गनरकादि-विषये ।

पितृलोकः देवलोकश्च

पितृलोकस्य कल्पना ऋग्वेदे वर्तते ।[1] यमस्तु पितृलोकस्याधिष्ठाता देवलोकस्येन्द्रवद् राजते । देवयानेन देवलोकः पितृयानेन पितृलोकश्च गन्तव्यः । बृहदारण्यकानुसारेण—ये यज्ञेन, दानेन, तपसा लोकान् जयन्ति ते उत्तरोत्तरं क्रममाणाः पितृलोकं भजन्ते । न तत्र तेषां स्थायिवासः । ते क्रममाणा मानवलोक उद्भूता घटीयन्त्रवच्चक्रीभूताः पुनः पुनर्भ्रमन्ति । अन्ततोगत्वा ब्रह्मज्ञानेन तेषां मुक्तिः स्यात् । ६.२.१५

श्रद्धया सत्योपासका अर्चिरादिमार्गेण देवलोकं तदनन्तरं ब्रह्मलोकं प्रपद्यन्ते । तस्मादिहलोके पुनरागमनं नास्ति । ६.२.१५; छान्दोग्ये ५.१०.१ ।

महाभारतानुसारेण इज्याध्ययनदानतपोभिः पितृयानपथोऽधिगम्यते, सत्य-क्षमा-दमालोभैश्च देवयानपथः प्राप्यते । आर० २.७१–७३ । संसारस्य

---

१. द्वे स्रुती अशृणवं पितृणामहं देवानामुत मर्त्यानाम् ।
ताभ्यामिदं विश्वमेजत् समेति यदन्तरा पितरं मातरं च ।। १०.८८.१५ अथर्व० १५.१२.५ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विजगीषूणां कृतेऽपर एव पन्थाः । संकल्प-सम्बन्धस्य, इन्द्रियनिग्रहस्य, व्रतविशेषस्य, गुरुसेवनस्य, आहारयोगस्य, अध्ययनागमस्य, कर्मसंन्यासस्य, चित्तनिरोधस्य च सम्यक्त्व-सम्पत्त्या ते सिद्धिं लभन्ते । आर० २.७४–७५

नरकः

ऋग्वेदे पापानां दुष्कृतामिह लोके मरणानन्तरं वा दुर्गतिः प्रकल्पितासीत् ।[1] तद्यथा ऋग्वेदे—

(१) दुष्कृतो अनारम्भणे तमसि प्र विध्यतम् । ७.१०४.३
(२) पापासः सन्तो अनृता असत्या इदं पदमजनता गभीरम् । ४.५.५
(३) यो अस्माँ अभिदासत्यधरं गमया तमः । १०.१५२.४

पूर्वोक्तेषु यस्तमसाच्छन्नो लोकः, स एवेशोपनिषदि अन्धेन तमसावृत इति वर्णितः । उभौ नरक इति स्पष्टमेव ।[2]

ऋग्वेदस्य दशममण्डलस्य १०६ सूक्तानन्तरं खिले कामचारिणीनां नारीणां नरकभयं चर्चितम् । अथर्ववेदे नरकः स्पष्टं वर्णितोऽधोविधम्—

अथाहुर्नारकं लोकं निरुन्धानस्य याचिताम् ।। १२.४.३६

परवर्तिपौराणिकनारकीययातना अपि तत्र वर्णिताः । यथा—

ये ब्राह्मणं प्रत्यष्ठीवन्ये वास्मिन् शुल्कमीषिरे ।
अस्रस्ते मध्ये कुल्यायाः केशान् खादन्त आसते ।। ५ १९.३

निरुक्तानुसारेण 'नरकं न्यरकं नीचैर्गमनम्'—
अर्थात् 'नीचैरस्मिन्नर्यते गम्यते' इति नरकम् । अपरं च—

'नास्मिन्रमणकं स्थानमल्पमस्ति' इति नरकम् ।

कीदृशा जना नरकगामिन इति महाभारते वर्णितमधोविधम् —

पारदार्यसहायकाः, सार्वजनिकसाधनानां विध्वंसकाः, परवृत्त्युपजीवकाः, अकृतज्ञाः, समय-दूषकाः, मिथ्यावादिनः, छेदवृत्तयः, वेदविक्रयिणः, वेददूषकाः, वेदलेखकाः, विकर्मजीविनः, शस्त्रकर्तारः, शस्त्रविक्रयिणः उपाध्याय-भृत्य-

---

१. ऋग्वेदे नारकीयदुर्गतिरधःसन्दर्भेषु स्पष्टीकृता—२.२९.६;४.५.५;७.१०४.३,११; १०.१५२.४;९.७३.८ । काणे महोदयो निष्कृषति—The sages of the Ṛgveda had some faint glimmerings of (or belief in) the idea of a dark pit below earth to which wicked persons were relegated by the gods. Vol. IV p. 154-155.

२. असूर्या नाम ते लोका अन्धेन तमसा वृताः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भक्त-त्यागिनश्च ।[1] अन्यच्च—

कामलोभानुगो मूढो नरकं प्रतिपद्यते । आर० ३२.१८
उत्सन्नकुलधर्माणां मनुष्याणां जनार्दन ।
नरके नियतं वासो भवतीत्यनुशुश्रुम ।। भीम० २३.४४
अनेकचित्तविभ्रान्ता मोहजालसमावृताः ।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ ।। ३८.१६
त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्रजेत् ।। ३८ २१

नरकस्येदं प्रकल्पनं वस्तुतश्चरित्रनिर्माणात्मकं विलसति ।
मनू राज्ञो दानस्य ग्रहणेनैकविंशति-नरकेषु पतनं निर्दिशति ।[2]

पौराणिकसाहित्ये नरकाणां, नारकीययातनानां, तासां कारणभूत-विविधपापानां च सुविस्तृतं वर्णनं वर्तते ।[3] नरकाणां संख्या कालान्तरे समवर्धत । ब्रह्मपुराणे लक्षकोटिशतनरकाः (२१५.८२–८३); विष्णुधर्मोत्तरे चाष्टाविंशतिकोटयो नरकाः परिगणिताः ।

बौद्धसंस्कृतौ नरकाणां गणना नातिहीना । तत्राष्ट महानिरयाः सन्ति । लघुनिरयास्तेषामनुवर्तिनः । जैनानां निरया असह्यकष्टदायिनः सन्तीति उत्तराध्ययनादिषु ग्रन्थेषु वर्णितम् ।

---

१. अनुशासनप० २४.६०-८०

२. इमे नरका मनुस्मृतौ ४.८८–९० परिगणिताः —
तामिस्रमन्धतामिस्रं महारौरवरौरवौ ।
नरकं कालसूत्रं च महानरमेव च ।
संजीवनं महावीचिं तपनं सम्प्रतापनम् ।
संहातं च सकाकोलं कुड्मलं प्रतिमूर्तिकम् ।।
लोहशङ्कुमृजीषं च पन्थानं शाल्मलीं नदीम् ।
असिपत्रवनं चैव लोहदारकमेव च ।।

३. विष्णुपुराणे १.६.४१;२.६.२–५; अग्निपुराणे ३७१.२०–२२; ब्रह्मपुराणे २२ अध्याये २१४,२१५ अध्याययोः; ब्रह्मवैवर्ते २९ अध्याये, नारदपुराणे १५.१–२० पद्मपुराणे २२७ अध्याये; भविष्यपु० १९२.११–२७, मार्कण्डेय पुराणे १२ अध्याये ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पुनर्जन्म

पुनर्जन्म भवत्येवेति ऐतिहासिकप्रमाणेन पी. वी. काणे महोदयो निदर्शयति।[1]

पुनर्जन्म-विषये भारतीय मनीषादिकालतः प्रभवन्ती आस्ते। वायु-पुराणानुसारेण महातपस्विनोऽपि स्वयोगदृष्ट्या मृतात्मनां गतिं ज्ञातुं न समर्थाः।[2]

मरणानन्तरं कृतकर्मानुसारेण प्राणिनो मुक्ताः स्वर्गगामिनो नरक-गामिनो वा भवन्ति। जीवनकाल आश्रमधर्मभ्रष्टाः, स्वाहा-स्वधा-रहिताः प्रेता नरकगामिनो भवन्ति यमपुरीवासिनस्ते यातनाः सहन्ते, पश्चात्तापग्रस्ताश्च चिरं दुःखभाजो भवन्ति। ते कृशकायाः, दिगम्बराः, क्षुत्पिपासापीडिता इतस्ततो व्यर्थमटन्ति। कुजलं कुभोजनं च ते गृह्णन्ति। विविधनरकपुर्यां ते कर्मानुसारेणासंख्यविधप्रताडना अनुभवन्ति। अपरे ते भवन्ति प्राणिनो ये स्वकर्मानुसारेण लोकेऽस्मिन् पशवः, स्थावरा वा भूतास्तिर्यग्योनयो वा जायन्ते दुःखभोगाय[3]। एते सर्वे श्राद्धकर्म-विधिना प्रदत्तमन्नादिकं गृह्णन्ति[4]।

मानवलोके पुनर्जन्म भवतीति महाभारते निर्वर्णितम्—स्वर्गवासी ययातिश्चक्रवर्ती सम्राट् पुण्यप्रभावेण वानप्रस्थाश्रमे तपसा च नैक लोकानधिशेते स्म। स स्वर्गात् क्षीणपुण्यो देवसंघैस्त्यक्तोऽपतत्। कुत्र—इमं भौमं नरकम्[5]। आदिपर्व ८५.४। तत्र पतनस्य पूर्वापर-शोचनीया गाथास्ति—

ते कङ्कगोमायुबलाशनार्थं क्षीणा विवृद्धिं बहुधा व्रजन्ति। आदि ८५.४
ऊर्ध्वं देहात् कर्मणा जृम्भमाणाद् व्यक्तं पृथिव्यामनुसंचरन्ति। ८५.७

स्वर्गात् पतितानां गर्भभावो वर्णितः —

अस्रं रेतः पुष्पफलानुपृक्तमन्वेति तद्वै पुरुषेण सृष्टम्।
स वै तस्या रज आपद्यते वै स गर्भभूतः समुपैति तत्र॥
आदि० ८५.१०

बनस्पतीनोषधीश्च विशन्ति आपो वायुं पृथिवीं चान्तरिक्षम्।
चतुष्पदं द्विपदं चापि सर्वमेवं भूता गर्भभूता भवन्ति॥८५.११

1. Hist. Dharm Vol V page 1609.
२. वायुपुराणे अध्याय ५६ तः।
३. छा० उ० ५.१०.७ कठोपनिषद् २.५. ७, योगसूत्र २.१३
४. वायु० ५६ अध्यायतः।
५. अयंदियमस्माकं संसारस्तत्त्वविदां मतेन नरक एव।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कर्मविपाकः

सुकृतस्य प्रभावेण सुखं चेह परत्र च । गरुड० २.३५-३७

पुनर्जन्म कस्यचित्पुरुषस्य कृतकर्मणामनुसारेण निर्धारितमिति छान्दोग्योपनिषद्यधोविधं वर्णितम्—

तद्य इह रमणीयचरणा अभ्याशो[1] ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा । अथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा सूकरयोनिं वा चाण्डालयोनिं वा । अथैतयोः पथोर्न कतरेणचन तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति । जायस्व म्रियस्वेत्येतत्तृतीयं स्थानम् । ५.१०.७-८

कर्मविपाकब्राह्मणे बृहदारण्यकोपनिषदि ६.२ च पुनर्जन्मदिशा कामेन कर्मणा चावधारितम् । तदधोविधम्—

१. अथाकामयमानो योऽकामो निष्काम आप्तकामः स ब्रह्मैव सन् ब्रह्माप्येति ।[2] ४.४.६ ।

यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः ।
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समुश्नुते ॥४.४.७

२. यथाकामो भवति तत्क्रतुर्भवति । यत्क्रतुर्भवति, तत्कर्मकुरुते । यत्कर्म कुरुते तदभिसम्पद्यते । ४.४.५

३. यथाकारी यथाचारी तथा भवति, साधुकारी साधुर्भवति, पापकारी पापो भवति । पुण्यो पुण्येन कर्मणा । पापः पापेन ।[3] ४.४.५

४. प्राप्यान्तं कर्मणः (कर्मफलं भुक्त्वा) तस्माल्लोकात् पुनरैत्यस्मै लोकाय कर्मणे ।[4] ४.४.६

---

१. अभ्याशोऽत्र द्योतयति मरणानन्तरं सपद्येव । अत एव नैकमध्यवर्ति-व्यवधानात्मकक्रमाणामभावः प्रकटति ।

२. परवर्तियुगे बौद्धधर्मस्य निर्वाणोऽनेन सिद्धान्तेन प्रवर्तितः । गौतमानुसारेण यदा कामा न भवन्ति कस्यचित् पुरुषस्य स निर्वाणं लभते । शङ्कराचार्यो व्याख्याति—अकामस्य हि क्रियानुपपत्तेरकामयमानो मुच्यते एव । सर्वात्मदर्शिनः कामयितव्याभावात् कर्मानुपपत्तिः । अतः कामाभावाद कामयमानो न जायते, मुच्यत एव । स इहैव ब्रह्मभूतः ।

३. शङ्करो व्याख्याति पुण्यापुण्ये संसारस्य कारणम् ।

४. शङ्करो व्याख्याति—पुनः कर्म कृत्वा फलासङ्गवशात् पुनरमुं लोकं याति । वस्तुतः 'कामो मूलं संसारस्य ।' इति बृ० आ० ४.५.७ अधिकृत्य शंकरो निगदति ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

उपनिषदि नैकविधमेतत्सत्यं निदर्शितम्। तथा हि—'तद्यथा तृणजलायुका तृणस्यान्तं गत्वान्यमाक्रममाक्रम्यात्मानमुपसंहरत्येवमेवायमात्मेदं शरीरं निहत्याविद्यां गमयित्वान्यमाक्रममाक्रम्यात्मानमुपसंहरति। बृ० उ० ४. ४.३ 'यथाहि निर्ल्वयनी (निर्मोकः) वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदं शरीरं शेतेऽथायमशरीरोऽमृतः प्राणो ब्रह्मैव तेज एव। बृ० उ० ४. ४. ७। अन्यच्च—पुण्यो वै पुण्येन कर्मणा भवति, पापः पापेनेति। बृ० उ० ३. ३. १३। अर्थात् शुभकर्मणा धर्मेण वापरजन्मनि शोभनगतिं पापकर्मणाधमगतिं नरकं वा तिर्यग्योनिं वा लभते।

कामस्तु प्रत्यक्षदृष्टचा संश्लेषणगुणप्रपन्नः सर्वं संस्पृष्टभूतमात्मना संयोज्य तन्मलिनीकरोति, अविशुद्धं व्यभिचरतीति मे मतिः।

गौतमानुसारेण पापकारणाद् द्विजातिकर्मभ्यो हानिः पतनम्' इहलोके। तथा परत्र चासिद्धिः। २१. ४-६। कर्माणि क्रमशः फलन्ति। एषा प्रक्रिया गौतमेन वर्णिता--वर्णाश्रमाः स्वस्वधर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टदेशजातिकुलरूपायुःश्रुतवृत्त-वित्तसुखमेधसो जन्म प्रतिपद्यन्ते। विष्वञ्चो विपरीता नश्यन्ति। ११. २९-३०। अर्थात् स्वर्गनरकवासभोगानन्तरमवशिष्टकर्मफलानुरूपदेश-जाति-कुलादौ जन्म लभते। अधर्मेण नरकगतिरिति आपस्तम्बः। इयं नरकयात्रा सम्पाद्यतेऽधोविधम्--हृष्टो दर्पति, दृप्तो धर्ममतिक्रामति, धर्मातिक्रमेण तु पुनर्नरकः। १.४.१२.१२;१.४.१३.४

मनुस्त्रिविधं कर्म वर्णयति--मनःसम्भवम्, वाक्सम्भवम्, देहसम्भवं च।[1] एतेषां फलं परलोकेऽपि भोग्यमेव। तद्यथा मनुः प्रपञ्चयति --अशुभकर्मणां फललाभाय पुनर्जन्म सम्भवत्यधोविधम्[2]--

मानसिक कर्मणोः विपाकेन चाण्डालादिहीनजातिः।
वाचिक ,, ,, पक्षिमृगादिजातिः।
कायिक ,, ,, स्थावरजातिः।

---

१. एतेषु त्याज्य-मानसं कर्म त्रिविधं भवति—परद्रव्येषु लोभः, कुकर्मचिन्तनम्, वितथवस्तुषु आग्रहः। त्याज्यं वाक्कर्म चतुर्विधं भवति--कटुभाषणं, मिथ्याभाषणम्,पिशुनता, अप्रासङ्गिकवचनं च। त्याज्यं शारीरिकं कर्म त्रिविधं भवति--अदत्तस्य स्वीकरणं, हिंसा, परस्त्री-सम्बन्धश्च।

२. अशुभं कर्म तु पापमेव। शुभकर्म। पुण्यं धर्मो वा। मनु० १२.१९,२०।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विविधजन्मसु जीवात्मा सर्वं सुखं च दुखं वेदयते।[1] अथ च क्षेत्रज्ञोऽधोविधो विशिष्टः --

असंख्या मूर्तयस्तस्य निष्पतन्ति शरीरत.।
उच्चावचानि भूतानि सततं चेष्टयन्ति याः ।।१२.१५।।

पापकारणाद् यामीर्यातना भुक्त्वा मनुष्यः परिणामतो वीत-कल्मषः पुनरपि मानवकुले जायते। मनु० १२.२२। धर्मेण सत्त्वगुण-बाहुल्यात् स मोक्षपरायणो भवति। रागात्मकपरिनिष्ठया सोऽर्थ-परायणो भवति। इहलोके परपीडा-प्रवृत्तिभिः स परस्मिञ्जन्मनि असद्वृत्तिरतो कामपरायणो जायते। मनु० १२.३८। सत्त्वस्य लक्षणं मनुर्निगदति--

यत् सर्वेणेच्छति ज्ञातुं यन्न लज्जति चाचरन्।
येन तुष्यति चात्मास्य तत्सत्त्वगुणलक्षणम् ।।१२.३७

मरणानन्तरं सत्त्व-रजस्तमोगुणिनः क्रमशो देवत्वं मनुष्यत्वं तिर्यक्त्वं चाधिगच्छन्ति। १२.४०। एते क्रमश उत्तममध्यमाधमगतिकाः सञ्जायन्तेऽधोविधम्--

गुणात्मकगतिः	उत्तमकोटिकी	मध्यमकोटिकी	निकृष्टकोटिकी
सात्त्विकी	ब्रह्मा, प्रजा-पतयः, धर्मः	यज्वा, ऋषयः देवाः, पितरः साध्याः	तापसाः, यतयः, विप्राः दैत्याश्च
राजसी	गन्धर्वाः,यक्षाः, अप्सरसः	राजानः क्षत्रियाः राजपुरोहिताः,	झल्लाः, नटाः शस्त्रवृत्तयः राजपुरोहिताः,
तामसी	चारणाः, कपट-राक्षसाः, पिशाचाः	हस्तिनः तुरङ्गाः शूद्राः, सिंहाः, वराहाः	स्थावरवृक्षादयः कृमिकाटाः पशवः, मृगाः,

---

१. मन्वनुसारेण त्रिविध आत्मा--क्षेत्रज्ञः, भूतात्मा जीवात्मा च। आत्मनः कारयिता क्षेत्रज्ञो भवति। भूतात्मा कार्यं करोति। जीवात्मा सुख-दुःखवेदनामनुभवति। मनु १२.१२-१४। इमे त्रयः परमात्मानमेक व्याप्नुवन्ति'।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पापः	पुनर्जन्मगतिः
महापातकिनः, ब्रह्महाती	पशु-पक्षि-चाण्डालयोनिः
मद्यपः	कृमिकीटहिंस्रमृग ,,
स्तेनः	लूता-सर्प-हिंस्रमृग-पिशाच ,,
असत्संसर्गः	ब्रह्मराक्षस ,,
स्ववर्णोचितकर्मच्युतः	शत्रुदासः
धर्मच्युतब्राह्मणः	प्रेतः[1]

मनुः स्पष्टयति--

यादृशेन तु भावेन यद् यत्कर्म निषेवते ।
तादृशेन शरीरेण तत् तत् फलमुपाश्नुते ।। १२. ८१

तत्र ब्रह्मराक्षसाः प्रेताः, मांसादाः कुकर्मविपाकेन भवन्ति ।[2]

कृतकर्मणां विपाकेनेहलोके परलोके च नानायोनिषु वा प्रपीडनं भवतु नाम किन्तु वस्तुतः सर्वे प्राणिनोऽन्ततोगत्वा मुक्तिमार्गं विलम्बेनापि प्राप्स्यन्तीति धर्मशास्त्राणां सुनिश्चितो निर्णयः ।

महाभारतानुसारेण

शुभैर्लभति देवत्वं व्यामिश्रैर्जन्म मानुषम् ।
अशुभैश्चाप्यधोजन्म कर्मभिर्लभतेऽवशः ।।

शान्ति० ३१६.९५

विपाकक्रमदृष्ट्या कर्म त्रिविधं भवति--संचितम्, संचीयमानम्, प्रारब्धं च ।

यावज्जीवनं कृतं कर्म फलभोगाय संचितम् तत्तु संचितम् । यन्नित्यं संचीयते तत्संचीयमानम् । यस्य प्रभावेण भाविजीवनं वासितं तत्प्रारब्धम् ।

किं नाम कर्माणि स्वत एव फलप्रदानि[3] । महाभारतानुसारेण धातुरनुज्ञया कर्माणि फलन्ति । कर्मफलं परवर्तिजन्मनि फलत्येवेति पी० वी० काणे महोदयः सोदाहरणं प्रतिपादयति ।[4]

---

१. विशेषविवरणानि मनुस्मृतौ १२. ५५–८०

२. अन्नचौर्येण ब्राह्मण आखुर्जायते । इक्षुचौर्येण कुक्कुरो भवति, मांसचौर्येण गृध्रः, हस्तिचौर्येण वृको भवति । मनु० १२. ५४–६९

३. विराटपर्वणि २०. १४

4. Hist. of Dharmas'āstra Vol. V. P. 1573.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कस्यापि सम्पत्तिर्विपत्तिर्वा पूर्वजन्मनां फलस्य कारणादेव प्रतिफलतीति महाभारतरामायणादीनामाख्यानेषु नैकत्र वर्णितम्[1]। पुराणेषु कर्मविपाकधारा प्रगच्छति। तथाहि—

अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्।
नाभुक्तं क्षीयते कर्म ह्यपि जन्मशतैः प्रिय॥
नारदीयपुराणे उत्तरभागे २९.१८

यादृशं क्रियते कर्म तादृशं परिभुज्यते।
विनाशहेतुः कर्मास्य सर्वे कर्मवशा वयम्॥ २.९४.७-८
उपभोगादृते तस्य नाश एव न विद्यते।
पद्मपु० २.८१.४८

यादृशं वपते बीजं क्षेत्रे तु कृषिकारकः।
भुनक्ति तादृशं वत्स फलमेव न संशयः॥
मार्क० पु० १४. १७

साधारणतः कर्ता स्वयमेव स्वकर्मणां फलानि भुङ्क्ते किन्तु कर्ता स्वसुकृतां सम्प्रदानं स्वेच्छया परेषां सुखाय वा लोकसम्भावनाय वा कर्तुं शक्नोतीति भारतीये साहित्ये प्राय उदाहृतम्। कालिदासस्य शिवः कुमारसम्भवे पार्वतीं प्रवदति--

किंयच्चिरं श्राम्यसि गौरि विद्यसे
ममापि पूर्वाश्रमसंचितं तपः।
तदर्धभागेन लभस्व काङ्क्षितं
वरं तमिच्छामि च साधु वेदितुम्।

राजा प्रजानां सुकृतदुष्कृतफलानि संविभागेन[2] लभत एवेति सुप्रथितम्।

नैकपाश्चात्त्यपुराविदां धर्मसमीक्षकाणां मतमुदाहरन् पी० वी० काणे महोदयः सम्यगुद्गिरति--

The ancient Indian doctrine as regards man's destiny after death is far more preferable to Biblical ideas on the same subject. Hist. of Dharm. Vol. V p. 1594.

---

१. रामायणे कौसल्या स्वपुत्रस्य वनवासप्रसंगेन दुःखिता कथयति—
मन्ये खलु मया पूर्वं विवत्सा बहवः कृताः।
प्राणिनो हिंसिता वापि तस्मादिदमुपस्थितम्॥ अयो० ३९.४॥

२. सर्वतो धर्मषड्भागो राज्ञो भवति रक्षतः।
अधर्मादपि षड्भागो भवत्यस्य ह्यरक्षतः॥ मनु० ८.३०४॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

बृहदारण्यकोपनिषदि पुनर्जन्मनोवृत्तमधोविधं वर्णितम्--

अयमात्मेदं शरीरं निहत्याविद्यां गमयित्वान्यन्नवतरं कल्याणतरं रूपं कुरुते पित्र्यं वा गान्धर्वं वा दैवं वा प्राजापत्यं वा ब्राह्मं वा भूतानाम् । ४.४.४

पुनर्जन्मनि कश्चित् पुरुषो देवो वासुरो वा पशुर्वा सर्पो वा संजायते । श्राद्धद्वारेण तस्मै प्रत्तं भोजनममृतं महाभोग्यं वा घासो वा वायुर्वा क्रमशो भूत्वा पितरं तर्पयति । मत्स्यपु० १९.३-११, १२ । शास्त्रानुसारेण पितरो यत्र कुत्रापि वर्त्तमानाः कालं यापयन्ति । तत्र वसवो वा रुद्रा वादित्या वेति प्रतिनिधीभूता स्तान् बिभ्रति । पुनश्चेमे देवाः श्राद्धपरायणेभ्यो वंशजेभ्यः कल्याणकारका बहुविधं ददति ।[1]

श्राद्धम्

पितृदानं निवापः स्यात् श्राद्धं तत्कर्म शास्त्रतः ।[2]
श्राद्धदेवो वैवस्वतोऽन्तकः । अमरकोशे २.७.३१;१.१.५९
महाभारतानुसारेण--

पितॄन् पूज्यादितः पश्चाद्देवान् सन्तर्पयन्ति वै ।
तस्मात् सर्वप्रयत्नेन पुरुषः पूजयेत् सदा ।। अनु० ८७.५

मन्वनुसारेण--

तदेव मासिकं श्राद्धमन्वाहार्यम् । ३.१२३
देवकार्याद् द्विजातीनां पितृकार्यं विशिष्यते । ३.२०३

श्राद्धं मूलतः पूज्यानां कृते तान् प्रति श्रद्धाप्रदर्शनं भोजनादिदानेन । महाभारते श्राद्धं तु आतिथ्यमेव पौष्योत्ताङ्कप्रकरणे । आदि० ३.१२३

आर्या आर्येतराश्च सर्वे श्राद्धपरायणा आसन्निति महाभारते--

देवासुरमनुष्याणां गन्धर्वोरगरक्षसाम् ।
पिशाचकिन्नराणां च पूज्या वै पितरः सदा ।। अनु० ८७.४

श्राद्धशब्दः प्रथमतमं कठोपनिषदि चीयते ।[3] ततः प्रागपि पितॄणां

---

१. विवृतमेतन्मार्कण्डेयपुराणे २८.८-१३, स्कन्दपुराणे ७. १, २०५. २३-२६; ब्रह्मपुराणे २२०.८९-९५ ।

२. श्रद्धात्रास्तीति श्राद्धम् । श्रद्ध+अण् । श्रद्धाहेतुत्वेनास्त्यस्य अण् ।

३. य इमं परमं गुह्यं श्रावयेद् ब्रह्मसंसदि ।
प्रयतः श्राद्धकाले वा तदानन्त्याय कल्पते ।। १.३.७
श्राद्धावसरे तत्रासीद् ब्रह्मविचारणा ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कृते तेषां वंशजैर्यज्ञः संपादितः। नित्यमेवासीत् महायज्ञेषु प्रतिष्ठितः पितृयज्ञः।[1] श्राद्धस्य बहुविधा लाभाः प्रकीर्तिताः। तत आयुः स्वर्गः यशः, पुष्टिः (समृद्धिः) च लभ्यन्ते।[2] विष्णुपुराणानुसारेण श्राद्धविधिना ब्रह्मेन्द्ररुद्रादिदेवा ऋषयः, पशुपक्षिणो मनुष्याः, सरीसृपादयः पितरश्च प्रीता भवन्ति।[3] विष्णुधर्मोत्तरं श्राद्धं समूर्तं विधौ शंसति। तथाहि--

पितृपैतामही पिण्डी वासुदेवः प्रकीर्तितः।
पैतामहश्च निर्दिष्टस्तथा संकर्षणः प्रभुः॥
पितृपिण्डश्च विज्ञेयः प्रद्युम्नश्चापरार्जितः।
आत्मानिरुद्धो विज्ञेयः पिण्डनिर्वपणे बुधैः॥ १.१३९.२०-२२

स्वयमपि पिण्डदो दिव्यप्रतिष्ठाधिकारी भवति।[4] न केवलं स्ववंशजानां कृतेऽपितु सुहृत्सम्बन्धिवर्गेभ्यो जलाञ्जलिंदद्यात्।

पाणिनिः पितॄणां कृते हव्यवाहनमग्निनाकृतमिति निर्दिशति। ३. २. ६५। पितृदेवताभ्यः पित्र्यनामकहविर्पितम्। ४. २. ३१। पितृपक्षे तत्रासीत् शारदिकश्राद्धम्। ४. ३. १२। श्राद्धे भुञ्जाना ब्राह्मणाः श्राद्धिनो वा श्राद्धिका वा सम्बोधिनताः। ५. २. ८५।

श्राद्धे तर्पणं तिलोदकाभ्यां सम्पादितम्। ततः परं पिण्डदानं कृतमासीत्। शारदिकश्राद्धः सविशेषं महत्त्वं भजते। महाभाष्ये १. ४. २; ४. ३. १२। तत्रासन्नश्राद्धभोजिनो ब्राह्मणा ये श्राद्धे न भुक्तवन्तः। पाणिनि० ५. २. ८५।

मनुर्निर्दिशति—

कुर्यादहरहः श्राद्धमन्नाद्येनोदकेन वा।
पयोमूलफलैर्वापि पितृभ्यः प्रीतिमावहन्॥ ३.८२

सोऽन्यत्र हव्यकव्यानां प्रदानेन तीर्थ मिति ब्राह्मणा निर्धारिताः

---

१. ऋग्वेदे १०. १६. १०; १०. १५.३। शतपथब्राह्मण। ११.५.६। श्राद्धस्तु पितृयज्ञ इति महाभारतेऽनुशासनपर्वणि ८७.३।

२. बौधा० ध० सूत्रे २.८.१। महाभारतेऽनुशासने ८७.३ च।

३. वि० पु० ३.१४.१-४

४. महाभारतस्य शान्तिपर्वणि प्रागेवोद्भावितमेतत्—
पिता पितामहपिता चैव तथैव प्रपितामहः।
अहमेवात्र विज्ञेयस्त्रिषु पिण्डेषु संस्थितः॥३३३.१९

अत्र मूर्तिपूजा विभृश्यते। भारते मूर्तिपूजा सिन्धुसभ्यतायुगेऽपि प्रवर्तितासीत्।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सन्ति ।[1] अर्थाद् ब्राह्मणानां तदा भोजनं प्रदेयमासीत् । कव्यं तु ज्ञान-निष्ठायै[2] प्रदेयमासीत् ३. १३४ । श्राद्धे मित्रादीनां कृते भोजनदानस्य महत्त्वं नास्ति । ३. १३८–१४० ।

भोजनं किं ब्राह्मणेभ्यो देयम् । तत्र कारणमस्ति मनुना प्रोक्तम्— यो ह्यग्निः स द्विजो विप्रैर्मन्त्रदर्शिभिरुच्यते । मनु० ३.२१२ । 'द्विजोत्तमाः श्राद्धदेवाः' इति ३.२–१३ ।

पितर एव ब्राह्मणरूपधराः श्राद्धकर्मणि । ३.२२३ । तेभ्य उभाभ्यां हस्ताभ्यां श्राद्धान्नं देयम् । १३.२२५ ।

प्रथमश्राद्धेन प्रेतात्मा सशरीरं स्वपितृभिः पितृलोके संगच्छते ।

सार्वजनिकलाभाः

इष्टापूर्तेन श्राद्धभाजः सद्गतिं लभन्त इति महाभारतीया धारणासीत् । तदुद्दिश्य युधिष्ठिरविषये शान्तिपर्वणि प्रोक्तम्—

सभाः प्रपाश्च विविधास्तडागानि च पाण्डवः ।
सुहृदां कारयामास सर्वेषामौर्ध्वदैहिकम् ॥ ४२.७

श्राद्धभोजनकाले ब्रह्मोद्याः कथाः कर्तव्या आसन् । मनु० ३. २३२ अथ च—

स्वाध्यायं श्रावयेत् पित्र्ये धर्मशास्त्राणि चैव हि ।
आख्यानानीतिहासांश्च पुराणानि खिलानि च ॥मनु० ३. २३२

महाभारतीयं श्राद्धस्वरूपं सुविकसितं दृश्यते । महाभारतानुसारेण प्रथमं पितृपूजा[1] विधेया, पश्चाद्देवपूजा नित्यं सम्पादनीया[2] । अनु० ८७.५ ।

---

१. मनु० ३. १३०–१३३ ।

२. पित्र्ये कर्मणि तु प्राप्ते परीक्षेत (ब्राह्मणान्) प्रयत्नतः । ३.१४९

३. पिता, पितामहः, प्रपितामह इति क्रम आसीत् निवापे गायत्रीजपेन । अनु० ९२. १३. १४ ।

४. महाभारतानुसारेण प्रतिपदि पितृयज्ञेनाभिरूपबहुलसन्ततिप्रदायिनी भार्या, द्वितीयायां, तेन कन्यास्तृतीयायां वाजिनः चतुर्थ्यां क्षुद्रपशवः, पञ्चम्यां बहवः पुत्राः, षष्ठ्यां कान्तिः, सप्तम्यां गाव एकादश्यां धातुवृद्धिः, ब्रह्मवर्चस्विनः पुत्राश्च, द्वादश्यां राजतस्वर्णराशयः, त्रयोदश्यां जाति-श्रेष्ठ्यममावस्यायां सर्वकामनापूर्तिश्च लभ्यन्ते । चतुर्दश्यां श्राद्धेन हानि-र्जायते । अनु० ८७. ९–१९ ।

एवमेव प्रतिनक्षत्रं श्राद्ध-विधानेन विशिष्टफलानि—साम्राज्यं स्वास्थ्यं, सौभाग्यं, राजचक्रप्रवर्तनमित्यादीनि लभ्यानि । श्राद्धप्रभावेण शशबिन्दुः —

अक्लेशेनाजयच्चापि महीं सोऽनुशशास ह ॥ अनु० ८९. १५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रतिपदि पितृश्राद्धम् 'अन्वाहार्यः' इति प्रथितम् । ८७.६ मनु० ३.१२३ ।

श्राद्धभोजनेकेवलमुदात्तचरिता ब्राह्मणा एव निमन्त्रणीयाः[1] । पंक्ति-दूषकेभ्यो भोजनं तत्र न दातव्यम् । काणाः, षण्ढाः, श्वित्रिणः वेष्टित-शिरसः, सोपानत्काश्च त्याज्याः । अनु० ९० तमेऽध्याये ।

श्राद्धविधौ पितृणां निवापात् प्रागेवाग्निर्निवप्त आसीत् । अनु०९२.१० । न केवलं पितरोऽपितु देवा अपि श्राद्धान्नैस्तृप्ता भवन्ति ।९२.३,४।

मन्वनुसारेण श्राद्धे दौहित्रोऽवश्यमेव भोजयेत् । ३.२३३ । भिक्षु-केभ्यो भोजनं देयम् । ३.२४३

प्रथमं तावद भवति पाथेयश्राद्धम् । मृतात्मा पार्थिवलोकात् पितृ-लोकं दश दिनैर्याति । मरणदिवसाद् दशदिनानि यावत् तस्मै प्रतिदिनं मध्याह्ने ओदनमुष्टिर्देया ।[2]

श्राद्धकर्मान्ते पितृभ्यो याचना कृतासीत्--

दातारो नोऽभिवर्धन्तां वेदाः सन्ततिरेव च ।
श्रद्धा च नो मा व्यपगमद् बहुदेयं च नोऽस्त्विति ।। ३.२५९

श्राद्धाभावेपि पितृणां तृप्त्यर्थं जलमात्रेण तर्पणं पितृयज्ञक्रियाफलं प्रददाति । मनु० ३.२८३

पी० वी० काणे श्राद्धविधानस्य पुनर्जन्मनश्च सहभावं समीक्षमाणः प्रवदति—

It is difficult to reconcile the doctrine of karma and punar-janma with the system of Śrāddhas in which balls of rice are offered to the three paternal ancestors of the performer of Śrāddha. The offering of balls of rice to the spirit of the departed male ancestors was in vogue in the times of the Veda probably and even before the Vedas and the theory of Karma and punarjanma arose later and as people were not.

---

१. ते सन्ति पंक्तिपावनाः —विद्यावेदव्रतस्नाताः, सदाचारपराः सर्वपावनाः ।
अनु० ९०. २३-३६
क्रोशादर्धतृतीयाच्च पावयेदेक एव हि ।
न मित्रं न च शत्रुमपितु मध्यस्थं भोजयेत् । ९०. ३०,३६

२. धर्मसिन्धुः पृ० ४६५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

prepared to give up the theory of Śrāddhas, they kept both. Hist. Dharm. Vol. V. P. 1598.

प्रकरणेऽस्मिन्नवधेयं वर्तते यन्मरणानन्तरं प्रथमं कर्मविपाकेन स्वर्गे पितृलोके वा नरके वा पुनर्जीवनसातत्यं भवति। तदनन्तरमवशिष्टेन कर्मराशिना पूर्वजन्मसंस्कारवासितं पुनर्जन्म भवति।

विश्वस्य नैकभागेषु पितॄनुद्दिश्य तेषामावाहनेन महोत्सव आयोज्यते। तथा हि—जापानदेशेऽगस्तमासस्य प्रथमदिवसे दीपोत्सवे पितॄन् स्वगृहान् दर्शयन्ति। पितृकृते अमेरिकामहाद्वीपे-रेडइण्डियन-जातीयाः फरवरी-मासे उत्सवं सम्पादयन्ति। अनाम-लाओस-वियटनाम-कम्बूचियादिदेशेषु सोत्साहं पितृस्मरणं विधीयते।

व्रतपूजा-प्रतिष्ठा

नियमो व्रतमस्त्री तच्चोपवासादि-पुण्यकम्। अमरकोशः देवानुग्रहार्थं वा स्वजीवनसौष्ठवार्थं वा आत्मनः परस्य चाभ्युदयोपलब्धये वा सत्त्वानुसन्धानाय वा कस्यचित् शिष्टपुरुषस्य संकल्पः साधारणतस्तदनुकूलं मनसा वाचा कर्मणा विशिष्टानुष्ठानं[1] क्वचित्तपोनिष्ठात्मकं भोगवर्जनं[2] तु व्रतमित्यभिप्रायो वैदिकसाहित्ये नैकार्थेषु प्राग्भावं लभते।[3] अनेनाभिप्रायेण व्रतं साधारणत इन्द्रियसुखनिग्रहात्मकं भवेन्नाम, किन्तु तत्र नियमोपपत्त्या चारित्रिकादर्शनिष्ठा बलवती प्रबभूव। भारते लोकानां धार्मिकप्रवृत्तिषु प्रतिपदं प्रतिदिनं च विविधव्रतानु-

---

1. Vrata came to be restricted to sacred vows and rulex of conduct to be observed by a person as a member of community or as an individual. H. D. Vol. V page 2.
२. नैकस्थलेषु व्रतं लघुकालिकं तप एवेत्यग्रे द्रष्टव्यम्।
3. The several meanings of the word vrata are command or law, obedience or duty, religious or moral praetices, sacred or solemn vow or undertaking etc. H. D, Vol. V page ९. संवत्सरं शशयाना ब्राह्मणा व्रतचारिणः Rg. VII. 103. Here Vrata has the meaning 'a sacred vow or observance' which in the sense in which the word is used in mediaeval times and is so used even upto this day. Ibid. p. 18.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ष्ठानस्य महिमा शनैः शनैः समवर्धत । तद्यथाथर्ववेदे वर्णितम् —

अग्निहोत्रं च श्रद्धा च वषट्कारो व्रतं तपः ।
दक्षिणेष्टं पूर्तं चोच्छिष्टे समाहिता । ११.७.९ ।

अत्र व्रतं तपसा सम्पृक्तं परवर्तिपौराणितव्रतविधानस्य मूलम् । यथा छान्दोग्योपनिषदि विवृतम् –महामनाः स्याद् तद् व्रतम् । न काञ्चन परिहरेत् तद् व्रतम् । लोको न निन्देत् तद् व्रतम् । सर्वमस्मीत्युपासीत तद्व्रतम् । २.११–२१

विशिष्टा रागरङ्गहीना तप इव क्वचिद्या जीवनचर्या मनसो वचसः शरीरस्य शुद्धीकरणाय प्रवर्तते, सा व्रतमिति । यो व्रतविषयकोऽभिप्रायो मध्ययुगे प्रभवति स वैदिककालिक एवेति कीथ-महाभागस्याधो विधोद्धरणेन स्पष्टमेव —

In a considerable number of cases we find that at certain times the intending sacrificer mnst abstain from sexual intercourse, must fast, or feed on certain specified foods above, must sleep on the ground and so on. The man who intends to establish the sacred fire must for the night before performance be awake in silence; this he is said to secure puirty and Tapas for his approach to the gods next day.

Religion and Philosophy of the Veda. P. 306.

तत्र व्रतरूपा विधिनिषेधा वैदिकयुगीना परिकल्पिताः । ते सन्ति भोजने लवणत्यागः, पत्नीविरतिः, उच्चाशयनत्यागः, मौनं, नेत्रनिमीलनं मांसाशन-त्यागः केवलदुग्धपानेन भूमौ शयनेन च कतिपयदिनयापनं, हास्यत्यागः[1] । शबलीहोमे द्वादशाहं रात्रा अनास्तृतस्थण्डिले शयनम्, उष्णदुग्धपानं च व्रतमिवाभाति ।[2]

सत्रावधौ स्त्री-प्रसङ्गः,धावनं,स्त्रीभिः परिहासः,आर्येतरैः सम्भाषणं, गभीरजलेऽवगाहनं, मृषावाद-क्रोध-परित्यागः, वृक्षारोहणं, संगीतमित्यादीनि यजमानेभ्यः परिवर्जितानि । दुग्धेनैव स जीवति दीक्षाकाले ।

---

१. Religion And Philosophy p. 306-308. तत्रैव पृ० ३४९. व्रतमिति काणे दर्शयति । H. D. Vol. p. 122.

२. राजसूययज्ञे

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

महाभारते सावित्र्यास्त्रिरात्रव्रतं संकल्पितम्[1]। तदनुसारेण सा दिवारात्रं स्थिताभवत्।[2] अत्र व्रतं तु नियमस्य पर्यायः[3]। नियमतो निराहारव्रतमासीद्यस्यान्ते पारणाविधा आहारकालः सम्प्राप्तः।[4] व्रतात् पूर्वं संकल्पं सा कृतवती—

एष मे हृदि संकल्पः समयश्च कृतो मया।

आरण्यके २८०-१७

नियमव्रतेन सा संसिद्धासीत्।[5] प्रतिज्ञायाः पर्यायो नैकप्रकरणेषु व्रतम् तथा हि--महाभारतानुसारेण कर्णस्य व्रतमासीत्--

द्विजमुख्येभ्यो दद्यां प्राणानपि ध्रुवम्॥ आरण्यक० १२३.५

भीमस्य व्रतमासीत्--

'एवं वक्ता च मे वध्यस्तेन चोक्तोऽस्मि भारत। द्रोण० १२३.५

व्रतेन किमपि संकल्पितं कार्यं सम्पादयितुं परमोत्साहो जागर्तीति पूर्वोक्तेन निदर्शितम्।

सर्वे वर्णा व्रताधिकारिणः सन्तीति महाभारतीयं मतं देबलेन समर्थितम्--

ब्रह्मक्षत्रे त्रिरात्रं तु विहितं कुरुनन्दन।
चतुर्थभक्तक्षपणं वैश्ये शूद्रे विधीयते॥ अनुशासनप० १०९.११,१३

अनेन सर्ववर्णानामुपवासो विहितः।

पौराणिकयुगात्प्राग्धार्मिकजीवने व्रतानां महत्त्वं नाधिकमासीत्। पुराणेषु व्रतस्य विकसितं स्वरूपं काणे-महोदयेन संगृहीतम्। यथा—

Its principal meaning from at least the first centuries of the Christian era onwards has been that of a religious undertaking or vow observed on a certain Tithi, weekday,

---

१. व्रतविधाने संकल्पस्याविनाभावः प्रमाणितो मनुनाद्योविधम्--

संकल्पमूलः कामो वै यज्ञाः संकल्पसम्भवाः।
व्रतानि यमधर्माश्च सर्वे संकल्पजाः स्मृताः॥ २.५

२. आरण्यकपर्व २८७.३

३. तं श्रुत्वा नियमं दुःखं वध्वा दुःखान्वितो नृपः। २८७.४

४. व्रतो यथोपदिष्टोऽयं यथावत् परिपारितस्त्वया।
आहारकालः सम्प्राप्तः क्रियतां यदनन्तरम्॥२८०.१६

५. आरण्यकपर्व २८१.१८।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ष्ठानस्य महिमा शनैः शनैः समवर्धत। तद्यथाथर्ववेदे वर्णितम्—

अग्निहोत्रं च श्रद्धा च वषट्कारो व्रतं तपः।
दक्षिणेष्टं पूर्तं चोच्छिष्टे समाहिता। ११.७.९।

अत्र व्रतं तपसा सम्पृक्तं परवर्तिपौराणितव्रतविधानस्य मूलम्। यथा छान्दोग्योपनिषदि विवृतम् –महामनाः स्याद् तद् व्रतम्। न काञ्चन परिहरेत् तद् व्रतम्। लोको न निन्देत् तद् व्रतम्। सर्वमस्मीत्युपासीत तद्व्रतम्। २.११–२१

विशिष्टा रागरङ्गहीना तप इव क्वचिद्या जीवनचर्या मनसो वचसः शरीरस्य शुद्धीकरणाय प्रवर्तते, सा व्रतमिति। यो व्रतविषयकोऽभिप्रायो मध्ययुगे प्रभवति स वैदिककालिक एवेति कीथ-महाभागस्याधो विधोद्धरणेन स्पष्टमेव—

In a considerable number of cases we find that at certain times the intending sacrificer must abstain from sexual intercourse, must fast, or feed on certain specified foods above, must sleep on the ground and so on. The man who intends to establish the sacred fire must for the night before performance be awake in silence; this he is said to secure puirty and Tapas for his approach to the gods next day.

Religion and Philosophy of the Veda. P. 306.

तत्र व्रतरूपा विधिनिषेधा वैदिकयुगीना परिकल्पिताः। ते सन्ति भोजने लवणत्यागः, पत्नीविरतिः, उच्चाशयनत्यागः, मौनं, नेत्रनिमीलनं मांसाशन-त्यागः केवलदुग्धपानेन भूमौ शयनेन च कतिपयदिनयापनं, हास्यत्यागः[1]। शबलीहोमे द्वादशाहं रात्रा अनास्तृतस्थण्डिले शयनम्, उष्णदुग्धपानं च व्रतमिवाभाति।[2]

सत्रावधौ स्त्री-प्रसङ्गः, धावनं, स्त्रीभिः परिहासः, आर्येतरैः सम्भाषणं, गभीरजलेऽवगाहनं, मृषावाद-क्रोध-परित्यागः, वृक्षारोहणं, संगीतमित्यादीनि यजमानेभ्यः परिवर्जितानि। दुग्धेनैव स जीवति दीक्षाकाले।

---

१. Religion And Philosophy p. 306-308. तत्रैव पृ० ३४९. व्रतमिति काणे दर्शयति। H. D. Vol. p. 122.

२. राजसूययज्ञे

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

महाभारते सावित्र्यास्त्रिरात्रव्रतं संकल्पितम्[1]। तदनुसारेण सा दिवारात्रं स्थिताभवत्।[2] अत्र व्रतं तु नियमस्य पर्यायः[3]। नियमतो निराहारव्रतमासीद्यस्यान्ते पारणाविधा आहारकालः सम्प्राप्तः।[4] व्रतात् पूर्वं संकल्पं सा कृतवती—

एष मे हृदि संकल्पः समयश्च कृतो मया।

आरण्यके २८०-१७

नियमव्रतेन सा संसिद्धासीत्।[5] प्रतिज्ञायाः पर्यायो नैकप्रकरणेषु व्रतम् तथा हि--महाभारतानुसारेण कर्णस्य व्रतमासीत्--

द्विजमुख्येभ्यो दद्यां प्राणानपि ध्रुवम्॥ आरण्यक० १२३.५

भीमस्य व्रतमासीत्--

'एवं वक्ता च मे वध्यस्तेन चोक्तोऽस्मि भारत। द्रोण० १२३.५

व्रतेन किमपि संकल्पितं कार्यं सम्पादयितुं परमोत्साहो जागर्तीति पूर्वोक्तेन निदर्शितम्।

सर्वे वर्णा व्रताधिकारिणः सन्तीति महाभारतीयं मतं देवलेन समर्थितम्--

ब्रह्मक्षत्रे त्रिरात्रं तु विहितं कुरुनन्दन।
चतुर्थभक्तक्षपणं वैश्ये शूद्रे विधीयते॥ अनुशासनप० १०९.११,१३

अनेन सर्ववर्णानामुपवासो विहितः।

पौराणिकयुगात्प्राग्धार्मिकजीवने व्रतानां महत्त्वं नाधिकमासीत्। पुराणेषु व्रतस्य विकसितं स्वरूपं काणे-महोदयेन संगृहीतम्। यथा—

Its principal meaning from at least the first centuries of the Christian era onwards has been that of a religious undertaking or vow observed on a certain Tithi, weekday,

---

१. व्रतविधाने संकल्पस्याविनाभावः प्रमाणितो मनुनाद्योविधम्--

संकल्पमूलः कामो वै यज्ञाः संकल्पसम्भवाः।
व्रतानि यमधर्माश्च सर्वे संकल्पजाः स्मृताः॥ २.५

२. आरण्यकपर्व २८७.३

३. तं श्रुत्वा नियमं दुःखं दत्त्वा दुःखान्वितो नृपः। २८७.४

४. व्रतो यथोपदिष्टोऽयं यथावत् परिपालितस्त्वया।
आहारकालः सम्प्राप्तः क्रियतां यदनन्तरम्॥२८०.१६

५. आरण्यकपर्व २८१.१८।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

month or other period, worship of a deity, usually accompanied by restrictions as to food and behaviour.[1]

H. D. Vol. V. P. 28.

The vratas mentioned in the Purāṇas had not attained prominence in the time of याज्ञवल्क्यस्मृति (100 A.D. to 300 A. D,) Ibid p. 123.

मनुः प्रवदति--प्रायश्चित्तं तु व्रतमेव[2] । न तत्साधु । संकल्पो नापेक्षितः प्रायश्चित्ते । प्रायश्चित्तं तु शास्त्रनिर्देशानुसारेण पापाद्वापराधाद्वा विमुक्तयेऽनुष्ठीयते । व्रतं सुकृतां कृते प्रायश्चित्तं च दुष्कृतां कृते भवति । प्रायश्चित्तेऽपि संकल्पाभावात् व्रतात्तस्यान्तरमवधेयम् । प्रायश्चित्तपदे व्रतस्य पवित्रता न स्फुरति । व्रतं पुण्यार्जनाय प्रायश्चित्तं पापशोधनाय च भवत इत्युभयोर्महदन्तरं मौलिकमेव[3] ।

परवर्तियुगे व्रतस्वरूपं यत् समाम्नातं तदग्निपुराणे सम्यङ् निगदितमधोविधम्--

शास्त्रोदितो हि नियमो व्रतं तच्च तपो मतम् ।[4]
नियमास्तु विशेषास्तु व्रतस्यैव दमादयः ।।
व्रतं हि कर्तृसन्तापात् तप इत्यभिधीयते ।
इन्द्रियग्रामनियमान्नियमश्चाभिधीयते ।। १७५. २, ३

व्रतस्येन्द्रियनिग्रहांशो नियम इति सारम् ।

व्रतानुष्ठानम्

नैकाङ्गैर्व्रतविधानं विलसति । तत्र स्नानं प्रातः सन्ध्या, संकल्पः,

---

१. व्रतमिति च मानसं कर्मोच्यते । इदं न करिष्यामीति यः संकल्पः कृतमतः तद् व्रतम् । नोद्यन्तमादित्यमीक्षेतेति । यथा तदीक्षणं न भवति तथा मानसो व्यापारः कर्तव्यः । तस्य पालनम् । जैमिनेः पूर्वमीमांसासूत्रं ६.२.२० आधारीकृत्य शबरः ।

२. मनुस्मृति ११.१०७,११७ ।

३. हेमाद्रिः प्रायश्चित्तशब्दस्य टीकामन्यथा करोति--
प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते ।
तपोनिश्चयसंयोगात् प्रायश्चित्तमितीर्यते ।।
इदं मतं त्वर्धसत्यं प्रतिभाति ।

४. यत् शास्त्रोद्दिष्टं नास्ति तद् व्रतं नास्ति ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

होमः, आराध्यदेवार्चनम्, उपवासः, ब्राह्मणभोजनं[1], नैकविधवस्तूनां दानं, व्रतकालोचितजीवनचर्यानुशासनं च निर्दिष्टम्। व्रतिनो भोजनं किं भवेदित्यस्मिन्विषये तत्र सात्त्विकता प्रणोदिता--स्वल्पं भोजनं तदपि क्षार-क्षौद्र-लवण-मधु-मांस-रहितं भवेत्।

मूलतो वैदिकसंस्कृतेरङ्गं व्रतपूजादिः

नानारूपाणि व्रतानि सुदूरप्राचीन कालतो लोकनिवहेषु विश्व-प्राङ्गणे सर्वत्र विश्वजनीनं विलसन्ति।[2] अत्र प्रश्नः समधेयो यत् किं नाम वैदिकार्याः पूजादि-व्रतविधिमार्येतरेभ्यो गृहीतवन्त उताहो मूलतस्तेषु स्वतः स्वकानि व्रतानि प्रावर्तन्त। प्रो० काणे प्रकरणेऽस्मिन् सोदाहरणं विशदयति यद्वैदिकार्या मूलत एकपूजाविधेः षोडशोप-चारादिषु निष्णाता आसन्।[3] तद्यथा—The gods are even asked to eat apūpa, puroḍāśa, dhānā, milk, curds, honey etc. in Ṛgveda III. 53.8; III. 52.1–7; IV. 32.16; VIII. 91.2; in Atharva-veda XVIII.4, 16–26. The underlying conception in these passages is the same as that involved in offering Naivedya to an image. In the Śatapatha Brāhmaṇa the word upacāra appears to have been used in the sense of 'honour' or mode of showing honour.....The Nighaṇṭu III. 14 enumerates 44 verbs that have the sense of worship among which pūjayati is included.....From Paṇini V.3.99 and the Mahābhāṣya thereon it is clearly seen that in the days

---

१. कुमारीणां, सभर्तृकाणां, दरिद्राणामसहायानां च भोजनं व्रतविशेषानु-सारेण विहितम्।

२. प्रो० काणे प्रतिपादयति—Vows are found in all religions. The Old Testament and the New Testament both bear witness to the sacredness of vows. The Jains have five great vows and the Buddhists have the Pañcaśīlas. H. D. Vol. V p. 28. इस्लामधर्मानुयायिनां रोजाव्रतं सुविदितमेव।

3. It should not be supposed that these upacāras (particularly puṣpa, gandha, dhūpa, dīpa and naivedya) were absent in the Vedtc age and came into promience at a very late stage by being borrowed from on Aryan people. Ibid. Vol.V. p.35.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

of the former, images of gods were made for sale and also for worship. H. D. Vol. V p. 35–37.

स निर्णयति—In my view the theory that pūjā and upacāras were borrowed from the Dravidian or some Non-Aryan people cannot be held to be proved, is quite speculative and that pūjā of images of gods was an indigenous development.[1] H. D. Vol. V p. 37.

ऋग्वेदे इन्द्रस्य स्तुतिगानं, अर्चा, प्रतिष्ठाधानं चाधोविधं वर्णितम्–

गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः ।
ब्रह्माणस्त्वा शतक्रतो उद्वंशमिव येमिरे ॥१.१०-१६

मनुर्यज्ञं पूजां च समानार्थकं प्रयुङ्क्ते ।[2]

रामायणे पूजा देशस्य वैभव-संस्करणमेवेति वाल्मीकिरामायणे निगदितम् ।[3]

लौकिकलाभः

व्रतविधिसामग्र्येण पारलौकिकसद्गतिवाहिपुण्यं भवतीति लोकानां धारणास्ति । इह लोकेऽपि व्रतोपचारैर्भूयिष्ठो बहुविधो लाभो जायेतेति विश्वासो विशेषतः पौराणिकयुगतो लोकमानसे धृतमूल एव विलसति । तथाहि–अग्निपुराणानुसारेण व्रतलाभाः सन्ति—

कीर्तिसन्तति - विद्यादिसौभाग्यारोग्यवृद्धये ।
नैर्मल्यभुक्तिमुक्त्यर्थं कुर्वे व्रतपते व्रतम् ॥
धर्मं देहि धनं देहि सौभाग्यं गुणसन्ततिम् ।
कीर्तिं विद्यां देहि चायुः स्वर्गं मोक्षं च देवि मे ॥

अग्नि० १७५. ४४,५७

सार्वलौकिकव्रतधर्मो प्राग्भावमधोविधं भजते—

एको धर्मो मनुष्याणां व्रतमेव महात्मना ।
प्रोक्तो नानाविधैस्तन्त्रैः शङ्करेण हरिं प्रति ॥

---

१. पौराणिकयुगे आर्येतरवर्गस्य यानि व्रतानि बभूवुस्तेषामपि स्वीकरणं प्राचीनमनीषिभिः शास्त्रकारैः सादरं कृतमिति निश्चप्रचम् । हिन्दवस्तु आर्याणामार्येतरलोकानां च सम्मिश्रितो राष्ट्रः । ते द्वयोर्व्रतपर्वादीनि समानं स्वीकृत्य संज्ञानं प्रकटन्ति ।

२. मनुस्मृति ३.११७,११८ । महाभारते व्रतं यज्ञस्य समानार्थकम् । ९.२५

३. बालकाण्डे २४. २४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सन्ति यद्यपि भूयांसो लोके धर्मा युगे युगे।
तथापि व्रतधर्मस्य कलां नार्हन्ति षोडशीम् ॥
देवतादितिपुत्राश्च सिद्धा गन्धर्वकिन्नराः।
ऋषयश्च परां सिद्धिमुपवासैरवाप्नुवन् ॥ पृ० १, २

भविष्यपुराणे प्रतिपदुपवासलाभो वर्णितः —

हैहयैस्तालजङ्घैश्च तुरुष्कैर्यवनैः शकैः।
उपोषिता इहात्रैव ब्राह्मणत्वमभीप्सुभिः ॥
इत्येषा परमा पुण्या शिवा पापहरा तथा।
ब्राह्मपर्व १६. ६१, ६२

अर्चनासामग्री

अर्चनासामग्री-विशेषेण विशिष्टफलोपलब्धिः प्रकल्पिता। तथाहि करवीर-पुष्पेण स्वास्थ्यं, समृद्धिः, मल्लिकापुष्पेण कुशलसौख्यं, पुण्डरीकेण कल्याणमनश्वरसम्पत्तिः, श्वेतनीलकमलेन परामोदं यशः, मुकुरकेण रोगमुक्तिः, मन्दारेण कुष्ठनाशः, विल्वपुष्पैर्धनं; बकुलमालया सुन्दरी पुत्री, किंशुकपुष्पैः कुष्ठनाशः, अगस्त्यपुष्पेण साफल्यं, कमलेन रमणीया पत्नी, वनमालया श्रान्तिनाशः, अशोकेन त्रुटिप्रणाशश्च सम्भाव्यन्ते।[1] तथैवागुरुधूपेनाभीष्टपूर्तिः, गुग्गुलुनारोग्यं, श्रीवासेन वाणिज्यवृद्धिश्च जन्यन्ते।[2] तत्र प्रत्यक्षलाभो धूपादिना स्वास्थ्यसंवर्धन-मिष्टमेव मक्षिकाणां मशकानां विनाशनं गरुडपुराणे प्रकाशितोऽस्ति—

विफलार्जुनपुष्पाणि भल्लातकशिरीषकम्।
लाक्षासर्जरसश्चैव विडङ्गश्चैव गुग्गुलुः ॥ १.१७७.८८,८९

कात्यायनानुसारेणैश्वर्य-सन्ततीत्यादिकामनाः पूर्यन्त एकादश्याम-नाहारेण।[3] पद्मपुराणानुसारेणैकादशीव्रतेन सुकलत्रं सुपुत्रश्च लभ्ये।[4] एकादशीव्रतं सोत्सवं सम्पादनीयम्। तदा विष्णुमन्दिरं मण्डनीयम्। आषाढशुक्लपक्षस्यैकादशी महैकादशी हरिशयनी वेति विख्याता।

---

१. भविष्यपुराणे ब्राह्मपर्वणि १९७. १–११
२. कल्पतरुः १८२, १८३ पृष्ठयोः।
३. संसारसागरोत्तारमिच्छन् विष्णुपरायणः।
ऐश्वर्यं सन्ततिं स्वर्गं मुक्तिं वा यद्यदिच्छति ॥
एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि ॥
४. सुकलत्रप्रदा ह्येषा जीवत्पुत्रप्रदायिनी ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

एकादशीव्रताधिकारो नारदानुसारेणाष्ठवर्षादधिकस्याशीतिवर्षान्न्यूनस्यैव प्राप्तः। अस्मिन्नवस्थावधौ यो व्रतं न करोति, स तु पापभाक्। अनाहारस्तु सर्वोत्तमं व्रतं भवति। ये पूर्णतो भोजनविरतिं सोढुमसमर्थास्ते फलमूलदुग्धजलादिभिर्हरिवासरं यापयेयुः। केवलं रात्रौ खादेत्, प्रतिनिधिना व्रतं पारयेद्वेत्यसमर्थानां कृतेऽपवादः।

व्रतारम्भः

व्रतारम्भाय प्रातःकाले (सूर्योदयात् त्रिघटिकावधौ) तदर्थः संकल्पः प्ररोचनीयः।[1]

भोजनीयाः

व्रतान्ते ब्राह्मणा भोजनीयाः। तैः सह दीनान्धकृपणा अपि भोजनीया इति नैकशास्त्रकाराणां मतम्। तथा हि—

दीनान्धबधिरादीनां तद्दिने वानिवारितम्।
कल्पयेदन्नपानं च सुमृष्टं रुच्यमात्मनः॥

भविष्यपुराण उत्तर० २२, ३२ हेमाद्रिव्रत० १. ४४३

महाभारतानुसारेण युधिष्ठिरस्याश्वमेधान्ते दीनादिभ्यो दानं दत्तम्।

तर्पितेषु द्विजाग्र्येषु ज्ञातिसम्बन्धिबन्धुषु।
दीनान्धकृपणे चापि तदा भरतसत्तम॥
घुष्यमाणे महादाने दिक्षु सर्वासु भारत॥ आश्व०९१.३

व्रतानुशासनम्

सर्वेषां व्रतिनां कृते सामान्योऽनुशासितजीवनं विहितमासीत्। तथाहि—

क्षमा सत्यं दया दानं शौचमिन्द्रियनिग्रहः।
देवपूजाग्निहवनं सन्तोषोऽस्तेयमेव च॥
सर्वव्रतेष्वयं धर्मः सामान्यो दशधा स्मृतः॥

अग्निपुराणे १७५. १०, ११

व्रतिनां भोज्यं हविष्यान्नं भवेत्। ब्रह्मचर्यं तु सर्वथावश्यक-

---

१. संकल्पवाक्यानि नैकविधानि सन्ति। तेषु प्रायः प्रातःकाले स्नानान्तरं व्रतस्य कार्यक्रम आराध्यदेवं प्रति सम्बोधनं च स्तुतिरूपेणोच्यते। यथा—

एकादश्यां निराहारो भूत्वा चैवापरेऽहनि।
भोक्ष्येऽहं पुण्डरीकाक्ष शरणं मे भवाच्युत॥
ततो विद्वान् पुष्पाञ्जलिमर्पयेत्। वराहपुराणे ३९, ३२

संकल्पाकरणे फलहानिर्भवेदिति शास्त्रवचनम्।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मासीत्।[1] व्रतिनामशनासनशय्याः कतिपय शास्त्रकारैर्निर्दिष्टाः। व्रतस्य पूर्णपरिपालनं तु फलप्रदं किन्तु मध्ये व्रतभङ्गो दुर्गतिकारक इति छागलेयो निर्णयति--

यो गृहीत्वा व्रतं मोहान्नाचरेत्काममोहितः।
जीवन् भवति चाण्डालो मृतः श्वा चैव जायते॥

व्रतभङ्गः

एकादशी व्रतमधिकृत्य वराहपुराणे समर्थितम्—

यो गृहीत्वा व्रतं मोहादेकादशीदिने नरः।
न समापयते तस्य गतिः पापीयसी भवेत्॥

किन्तु व्रतमध्ये यदि मृत्युर्भवति तर्हि—

स तत्पुण्यफलं प्रेत्य प्राप्नोति मनुरब्रवीत्॥

प्रतिनिधिभूतोऽन्यस्मै व्रताचरणस्य भूयः फलं समाम्नातम्। अस्यां स्थितौ प्रतिनिधिस्तस्य कारकश्चोभौ फलभाजौ। प्रतिनिधिरधिकं फलं लभत इति सर्वेषां शास्त्रकारणां मतम्।

व्रतानां संख्या

प्रथमख्रीष्टाब्दे व्रतानां संख्याङ्गुलिगणनीयासीत्। पौराणिकयुगे सा सहस्रप्राया सञ्जाता।[2]

उपवासः

व्रतस्य प्रमुखमङ्गमुपवासः।[3] यज्ञस्थानीयोऽयं प्रेत्य चेह च सर्वंश उपोषितमुपकरोतीति भीष्ममतं महाभारते युधिष्ठिरस्य प्रबोधायाधोविधं प्रगीतम्--उपवासफलात्मको विधिर्यज्ञफलैस्तुल्य इति तत्र—

१. प्रातःसायंभोजी षड्वर्षैः सिद्धो भवति सुवर्णविमानं च लभते।
२. त्रीणि वर्षाणि दिने सकृद् भोजी 'अग्निष्टोमफलं' लभते।
३. द्वितीयदिवसभोजी अप्सरोभिः सह वसेत्।
४. तृतीयदिवसभोजी अतिरात्रयज्ञफलं प्राप्नोति। वसति सप्तर्षीणां लोकेऽप्सरोभिः सह।

---

१. नारदीयपुराणे पूर्वार्धे ११०. ४८

२. भोजस्य राजमार्तण्डे २४ (एकादश शताब्दे) लक्ष्मीधरस्य कृत्यकल्पतरौ १७५ (द्वादशशताब्दे) शूलपाणेः हेमाद्रेश्चतुर्वर्गचिन्तामणौ ७०० (त्रयोदशशताब्दे) व्रतानि गणितानि।

२. संकल्पेन विनोपवासः। ससंकल्पमुपवासोव्रतं भवति।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अनेन प्रकारेणैकैकदिनाधिकव्यवधानेनोपोषितो दिव्यलोकसंवासेन सह नैकविधाभ्युदयं लभते। तथाहि—महाभारते अनुशासनपर्वणि—

यस्तु मासे गते भुंक्ते एकभक्तं शमात्मकः।
सदा द्वादशमासान् वै ब्रह्मलोकमवाप्नुयात् ॥ ११०.१२१
मासोपवासी वर्षैस्तु दशभिः स्वर्गमुत्तमम्।
महर्षित्वमथासाद्य सशरीरगतिर्भवेत् ॥ ११०.१३०

महाभारत उञ्छवृत्तेः सुव्रतस्य ब्राह्मणस्याभ्युदयो वर्णितः। स सक्तुदानेन सभार्यः ससुतश्चापि सस्नुषश्च दिवं ययौ ॥ आश्व० ९८.८१

अनुशासनपर्वणि भगीरथो ब्रह्माणं प्रवदति--

तपो हि नान्यच्चानशनान्मतं मे। नमोऽस्तु ते देववरप्रसीद ॥ १०६.४१

भीमो युधिष्ठिराय प्रसाधयति--

मतं मम तु कौन्तेय तपो नानशनात्परम्[1]। १०६.३

वैज्ञानिकदृष्टचोपवासस्य जीवनवर्धनाय महत्त्वमस्ति। तद्यथा प्रोक्तम्—

He (Pro. Niktin) believes that it is the best to keep to the regimen of the Roman Emperor Vespasian--to fast once a month. The scientists' conclusion that carefully phased hunger may increase life-expectancy is based on many years of observations of rats. Thus he explains the mechanism of rejuvenating organism by fasting. Tass April 67.

व्रतानां वर्गीकरणम्

व्रतानि साधारणतः त्रिविधानि सन्ति--

मानसिकम्-सत्याहिंसास्तेयब्रह्मचर्याकल्कताः[2]।

कायिकम्—दिवा सकृद्भोजनम्, रात्रौ सकृद् भोजनम्, अहोरात्रे सकृद्भोजनम्, अपाचितभोजनं च।

वाचिकम्--वेदस्याध्ययनं, विष्णोः कीर्तनं, सत्यभाषणम्, अपैशुन्यं च।[3]

कालानुरोधेन व्रतं वैविध्यं भजते। यथा एकदिनावधिकं पक्षावधिकमयनावधिकं, वर्षावधिकं, यावज्जीवं च।

---

१. समर्थितमेतद्वायुपुराणे। ५७.१०४-१२५

२. अकल्कता भावशुद्धिः, ऋजुता वास्ति।

३. पद्मपुराणे ४. ८४. ४२. ४४।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्यविधानि सन्ति तिथि-वार-नक्षत्र-योग-करण-संकीर्ण-मासर्तु-संवत्सर-प्रकीर्णकानि व्रतानि। देवानुद्दिश्य व्रतानि गणेशशिव-विष्णु-प्रभृतीनां प्रसादनाय भवन्ति। कतिपय-व्रतानि जाति-लिङ्ग-प्रतिष्ठा-पेक्षाणि भवन्ति।

तीर्थ-व्रत-पूजादीनां समन्वयः

तीर्थस्थलेषुकतिपयव्रतोत्सवाः प्रतिष्ठाशोभागौरवप्रहर्षोन्मादैः समन्विता मेलारूपेण समारभ्यन्ते। यथा रामनवमीव्रतमयोध्यारामेश्वरा-नासिक-तिरुपतितीर्थेषु महानुत्सवो भवति। मथुरा-वृन्दावनादिषु जन्माष्टमी-व्रतं कोटिशो दर्शकानां सोत्साहाह्लादप्रवृत्तिभिः परां शोभामावहति।

वैशाखमासस्य शुक्लपक्षस्य तृतीया तिथिरक्षयतृतीयेतिख्याता विष्णु-धर्मसूत्रानुसारेण 'उपवास-वासुदेवार्चन-दान-होमादिभिर्यथाविधिमहो-त्सवेनाभिनन्दिता। अवसरेऽस्मिन् दानमक्षयं भवतीति धारणा। अनेन सर्वविधपापविमुक्तिः सम्भाव्यते।

प्रमुखव्रतानि

असंख्यव्रतेषु कतिपयविशेषमहत्त्वपूर्णानि नातिविस्तरेण वर्ण्यन्ते।

एकादशी

तेष्वेकादशी अनुत्तमा विलसति। प्रत्येकमासस्योभयपक्षयो-रेकादशतिथौ संस्कृतान्नं न ग्रहणीयमिति मूलव्रतम्। तत्र कारणं विशदयन् नारद आह—

यानि कानि च पापानि ब्रह्महत्यासमानि च।
अन्नमाश्रित्य तिष्ठन्ति सम्प्राप्ते हरिवासरे॥
तानि पापान्यवाप्नोति भुञ्जानो हरिवासरे।
न भोक्तव्यं न भोक्तव्यं सम्प्राप्ते हरिवासरे॥

अतएव गृहस्थाश्रमी शुक्लपक्षैकादश्यामुपवसेत्[1]।

पद्मपुराण एकादशीव्रतस्यानन्यफलदायित्वमोविधं वर्णितम्—

अश्वमेधसहस्राणि राजसूयशतानि च।
एकादश्युपवासस्य कलां नार्हन्ति षोडशीम्॥

एकादशीव्रतानुष्ठानेऽनाहार इन्द्रियनिग्रहो विष्णुमूर्तिनिकटे भूशयनं च भवन्तु नाम किन्तु तत्र मनोरञ्जनम यासीत्। विष्णोः प्रीत्यर्थं नृत्य-संगीतवाद्य-नाट्यादिभिर्विष्णुकथा तत्र प्रावर्तत।

---

१. कृष्णपक्षैकादशी-व्रतं केवलं वानप्रस्थाः संन्यासिनश्च चरेयुः।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

एकादश्यां विष्णुपूजाविधिर्विलसति पुष्पमण्डपे मूर्तिप्रतिष्ठापनेन षोडशोपचारसहितः। भक्तोरात्रौ जागर्ति। दिवारात्रं विष्णुं ध्यायति। अपरेद्युः प्रातः पारणकाले भक्तो विष्णुं प्रार्थयते उद्यापनविधौ[1]—

एकादश्यां निराहारः स्थित्वा चाहं परेऽहनि।
भोक्ष्येऽहं पुण्डरीकाक्ष शरणं मे भवाच्युत॥

ब्राह्मणभोजनं दान-दक्षिण ाप्रदानंतु पुण्यावहं सुकृतम्।

हरिशयनी एकादशी विशेषोत्सवस्यावसर आसीत्। उपासको विष्णवे वस्त्रपुष्प-शय्यादिकं रचयित्वा रात्रौ तं देवमर्चित्वा ओऽम् नमो नारायणायेति मन्त्रजपेन विष्णुमूर्तिं शाययति स्तौति च—

सुप्ते त्वयि जगन्नाथे जगत् सुप्तं भवेदिदम्।
प्रबुद्धे त्वयि बुध्येत जगत्सर्वं चराचरम्॥

प्रबोधिनीं एकादशीं यावद् विष्णुः शेते। द्वादश्यां तस्य जागरणं मूर्तेः स्नानप्रसाधनादिभिर्मण्डनं विधाय वेदादिमन्त्रैः स्तुतिपूर्वकं सम्पाद्यते।

विष्णुसायुज्यपथे परमपदाकांक्षी भक्तो निश्शेषात्मगुणाचारसम्पन्नो गुरोर्वैष्णवीं दीक्षां गृहीत्वा सुषमे विषमे वा काले एकादशीव्रतं शाश्वतं समाचरन् यस्मिन् कस्मिन्नपि वर्णाश्रमे[2] नित्यं विष्णुमयं जगदिति भावनया लोकहितचिन्तको रमते। स एव वैष्णवः।

जन्माष्टमी

कृष्णस्यपूजा ५०० ख्रीष्टाब्दपूर्वं प्रचलितासीदेवेति निःसन्दिग्धा मान्यता।[3] भाद्रमास्य कृष्णपक्षे विष्णोरवतारस्य जन्माभिलक्ष्योपवासादिव्रतमेकादशीवत् प्रवर्तते। तत्र विशेषोऽस्ति भगवतः कृष्णस्य जन्मवृत्तस्य रसात्मकबाललीलानां चाभिनयोऽनुयोगि प्रदर्शनम्। नैकपौराणिकदेवानां सन्निधौ

---

१. पारतीरकर्मसमाप्तौ। ततः पारणं व्रतसमापनमुद्यापनं वा। उद्यापनं विना व्रतं निष्फलमेव। तत्र दानमवश्यकर्तव्यम्।

२. यस्यां मुखे हरेर्नाम हृदि विष्णुः सनातनः।
उदरे विष्णुनैवेद्यं स श्वपाकोऽपि वैष्णवः॥ पद्मपु० ४. १०. ६६

3. The preceding items of evidence indicate that the worship of Vāsudeva was prevalent in Northern and Central India from at least 500 B. C., if not earlier. H.D. Vol V p. 131.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

व्रतमारब्धमासीत्।[1] 'गोविन्दः स्तुतो भक्तस्य पापानि नाशयतीति धारणासीत्—

आजन्ममरणं यावद्यन्मया दुष्कृतं कृतम्।
तत्प्रणाशय गोविन्द प्रसीद पुरुषोत्तम॥

ऋषिपञ्चमी

सर्ववर्णानां स्त्रीपुरुषाणां सर्वसाधारणं ऋषिपञ्चमीव्रतं भाद्रमासस्य शुक्लपक्षपञ्चम्यामनुष्ठीयते। व्रतेऽस्मिन् मूलमस्ति सप्तर्षीणां मूर्तीनां पञ्चामृतेन स्नापनं, गन्धद्रव्यपुष्पादिभिः पूजनं, धूपदीपनैवेद्यार्पणं, अर्घ्यसमर्पणञ्च। ऋषिवज्जीवनचर्या तस्मिन् दिने भक्तस्य प्रकल्पिता। त्रिविधतापहरणं सर्वविधाभ्युदयप्रदायकं व्रतमिदं स्त्रीणामभीष्टतमम्।

दुर्गोत्सवः, नवरात्रम्

महासिद्धिप्रदं धन्यं सर्वशत्रुनिबर्हणम्।
सर्वलोकोपकारार्थं विशेषादतिवृष्टिषु॥
कृत्यर्थं ब्राह्मणाद्यैश्च क्षत्रियैर्भूमिपालकैः।
गोधनार्थं विशा वत्स शूद्रैः पुत्रसुखार्थिभिः॥
सौभाग्यार्थं स्त्रिया कार्यमाढ्यैश्च धनकांक्षिभिः।
महाव्रतं महापुण्यं शङ्कराद्यैरनुष्ठितम्॥
देवीपुराणतः

सर्वत्र सर्वैः[2] सर्वदा सर्वदेशीयैरहर्निशं पूजनीया दुर्गा।

देव्याः पूजा नैवेद्यानुसारेण त्रिविधं भवति,—सात्त्विकी, राजसी तामसी च।

सात्त्विकी जपयज्ञाद्यैर्नैवेद्यैश्च निरामिषैः।
पाठः (देवीपुराणस्य) तस्य जपः प्रोक्तः पठेद् देवीमनाः प्रिये।
राजसी बलिदानेन नैवेद्यैः सामिषैस्तथा।
सुरामांसाद्युपहारैर्जपयज्ञैर्विना तु या।
विना मन्त्रैस्तामसी स्यात् किरातानां च सम्मता।

---

१. सूर्यः सोमो यमः कालः सन्ध्ये भूतान्यहः क्षपा।
पवनो दिक्पतिर्भूमिराकाशं खचरामराः।
ब्राह्मं शासनमास्थाय कल्पध्वमिह सन्निधिम्॥

२. न केवलं चातुर्वर्ण्येनापितु म्लेच्छदस्युचाण्डालादिभिश्चापि पूजनीया सा।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नवरात्रस्य नवदिनेषु देव्या उपचार[1]प्रसङ्गेन प्रतिदिनं क्रमशः (१) केशसंस्कार-द्रव्याणि (२) केशसंयमोपयोगिकौशेयरश्मिः (३) आलक्तक-दर्पणं (४) मधुपर्कः तिलकं (५) अङ्गरागः अलंकरणानि (६) देव्या जागरणम् (७) विल्ववृक्षे देव्या वास-व्यवस्थापनं (८) उपोषणम्, पूजा, जागरणं च (९) विधिवद् बलिःरित्यादिभिः प्रसाधनं, प्रसादनं च।

देव्याः परितृप्त्यर्थं नैकविधजलचरस्थलचरादीनां खड्गेन घातो जीवदयादर्शिनां मतेनारोचनीयमिति धारणा पुरापि बलवती बभूव। जीववधस्थाने फलादीनां बलिरूपेणार्पणं शोभनमिति नैकशास्त्रकाराणां मतं तेषां सौहार्दं प्रकलयितुमधोविधं प्रणीतम्--

कुष्माण्डमिक्षुदण्डो मद्यमासवमेव च।
एते बलिसमाः प्रोक्तास्तृप्तौ छागसमाः सदा॥
कलिका० ७१. २३, २४

न तथा तुष्यति शिवा होमदानजपादिना।
कुमारीपूजनेनात्र यथा देवी प्रसीदति॥

कुमारीभ्यो भोजनं दक्षिणा च प्रदेयास्ति।

व्रतदिवसेषु मनोरञ्जनकार्यक्रमः प्रचरितः। कालिकापुराणानुसारेण--

नटनर्तकसंघैश्च वेश्याभिश्चैव भैरव।
नृत्यगीतैः समुदितो जागरं कारयेन्निशि॥ ६१. ८८

दशम्यां तिथौ देव्या मूर्तिः समन्त्रं सरोवरे वा नदे वा प्रवाह्यते—

दुर्गे देवि जगन्मातः स्वस्थानं गच्छ पूजिते।
संवत्सरे व्यतीते तु पुनरागमनाय वै॥

तदनन्तरं शबरोत्सवो निष्पादितः। कालिकापुराणानुसारेण--

विसर्जनं दशम्यां तु कुर्वीद्वै शाबरोत्सवे।
धूलिकर्दमविक्षेपैः क्रीडाकौतुकमङ्गलैः॥
परैर्नाक्षिप्यते यस्तु यः परं नाक्षिपत्यपि।
क्रुद्धा भगवती तस्य शापं दद्यात् सुदारुणम्॥

---

१. आसनं पाद्यमर्घ्यं च ततो ह्याचमनीयकम्।
मधुपर्कं स्नानजलं वस्त्रं भूषण-चन्दने।
पुष्पं धूपश्च दीपश्च नेत्राञ्जनमतः परम्।
नैवेद्याचमनीये तु प्रदक्षिणं नमस्कृतिः।
एते षोडश निर्दिष्टा उपचारा अम्बिकार्चने॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

एषा प्रवृत्तिर्वैदिकयज्ञ-सम्पादनविधा अपि नैकत्र दृश्यते ।

एवं विधो दुर्गोत्सवो नानारूपधरो सर्वा मानवोचिताः वृत्तीः प्रवृत्तीश्च संसाधयति ।[1]

प्रतिमासं कृष्णपक्षस्य चतुर्दश्यां शिवरात्रिर्भवति । माघमासस्य शिवरात्रिर्महाशिवरात्रिरिति प्रोच्यते ।[2] पुण्यफलयोगेन महाशिवरात्रिः सातिशयं प्रशंसिता । तथाहि—

महाशिवरात्रिः

तस्यां जागरणाद् रुद्रः पूजितो भुक्तिमुक्तिदः ।
उपोषितैः पूजितः सन्नरकात्तारयेत्तथा ॥

गरुड० १. १२४. २, ३

कृतोपवासा ये तस्यां शिवमर्चन्ति जाग्रतः ।
बिल्वपत्रैश्चतुर्यामं ते यान्ति शिवतुल्यताम् ॥
शिवरात्रिरिति ख्याता सर्वयज्ञोत्तमोत्तमः ।
दानयज्ञतपस्तीर्थव्रतकर्माणि यानि च ।
शिवरात्रिव्रतस्यापि कोटयंशेन समानि न ॥

पद्म० ६, १२४, ४, ३८, ३९

न केवलं श्लोकमात्रेण शिवरात्रि-माहात्म्यं सम्यङ् निर्दर्शितं स्यादिति मन्यमानो गरुडपुराणरचयिता निषादराजस्य मृगयालोः सुन्दरसेनकस्य रात्रौ वृक्षशरणगतस्याज्ञात्वापि शिवरात्रौ शिवलिङ्गे बिल्वपत्रपातेन जललवनिपातेन, हस्तात्पतितस्य शरस्यादानाय दण्डवत्

---

१. प्रो० काणे समीक्षते—

This provision that everyone how highsoever was to join in the śabarotsava was probably made for emphasizing that before the Devi, the highest and the lowest were of equal status and everyone must join in the frolics on the tenth tithi to show that all men are equal at least one day in the year. H. D. Vol. V. P. 177.

२. माघमासस्य शिवरात्रिर्महाफलेति शिवमुखेन ज्ञेयम्—

माघमासस्य कृष्णायां चतुर्दश्यां सुरेश्वर ।
अहं यास्यामि भूपृष्ठे रात्रौ नैव दिवा कलौ ॥
लिङ्गेषु च समस्तेषु चलेषु स्थावरेषु च ।
संक्रमिष्याम्यसन्दिग्धं वर्षपापविशुद्धये ॥ स्कन्दपु० नागरखण्डे

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रणिपातेन बुभुक्षया पीडितस्यैव रात्रौ अनिमिषचक्षुषोर्भरेणानन्तरं सकुक्कुरं शिवपार्षदत्वं सुलभं जातमिति कथां कल्पितवान्[1]।

अग्निपुराणानुसारेण

'लुब्धकः प्राप्तवान् पुण्यं पापी सुन्दरसेमकः।[2]

नैकपुराणेषु पूर्वोक्ता कथा नव-नवकाल्पनिकवृत्तैः संयोजिता विलसति।

शिवरात्रिव्रतं प्राय एकादशीवत् प्रवर्तते। तत्र मूलत उपवासः परतो जागरणं पूजा चानुष्ठीयन्ते। स्कन्दपुराणानुसारेण---

एवं द्वादशवर्षाणि शिवरात्रिमुपोषको
यो मां जागर्यते रात्रिं मनुजः स्वर्गमारुहेत्।
शिवं च पूजयित्वा यो जागर्ति चतुर्दशीम्।
मातुः पयोधररसं न पिबेत् स कदाचन॥

नागरखण्डे व्रतमिदं नित्यं काम्यं चास्ति। व्रतमकुर्वन् पुरुषो जन्मसहस्रेषु भ्रमति। अथ च सर्वपापप्रणाशनमिदम्--

आचाण्डालमनुष्याणां भुक्तिमुक्तिप्रदायकम्।
शिवरात्रिव्रतानुशासनं प्रगल्भं विलसति। तद्यथा—
अहिंसा सत्यमक्रोधो ब्रह्मचर्यं दया क्षमा।
शान्तात्मा क्रोधहीनश्च तपस्वी ह्यनुसूयकः॥
तस्मै देयमिदं देवि गुरुपादानुगो यदि॥

कालनिर्णय पृ० २०७

तत्र शिवध्याने तस्य स्वरूपविनिर्णयो विशेषः --

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसम्।
रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम्॥
पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानम्।
विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम्॥

धर्मसिन्धौ पृ० १२७

प्रतिमासं शुक्लपक्षस्य चतुर्दशी-दिवसः शिवस्य महोत्सव एव प्रतिगृहीतः। दुर्गा नैकपर्याया वैदिककालतः पूज्या देवी प्रवर्तते। अमरकोषानुसारेण—

---

१. एवमज्ञानतः पुण्यंज्ञानात् पुण्यमथाभयम्। गरुड० १.१२४.११

२. अग्नि० १९३.६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

उमा कात्यायनी गौरी काली हैमवतीश्वरी।
शिवा भवानी रुद्राणी शर्वाणी सर्वमङ्गला।
अपर्णा पार्वती दुर्गा मृडानी चण्डिकाम्बिका॥

एतैर्नामभिरनुमातुं शक्यते यदार्याणामार्येतराणां च विविधजन-समवायेषु शक्तिरूपिणी देवी पूर्वं विविधनामधारिणी स्वतन्त्रापि दुर्गाभिख्यया एकीभूता सर्वेषां पूजास्पदं बभूव। वैदिकसाहित्ये तस्याः पूजा नावलोक्यते।

बाणानुसारेण तत्रासीत् कात्यायन्या मूर्तिः पादपोत्कीर्णा। अरण्येऽपि रक्तध्वजमण्डिता चण्डिकामूर्तिरासीत्। चण्डिकामन्दिरे शयनानुष्ठानेन पुत्रप्राप्तेराशा प्रबभूव। खड्गहस्ता दुर्गा तत्राशंसिता। शबरा दुर्गादैव्यै बलीकर्तुं नृशंसहत्योद्यता आसन्। सुसभ्या जना सभ्योपपत्तिभिर्दुर्गा-पूजां सम्पादयन्ति स्म।[1]

पुण्यकव्रतम्

व्रतविधौ नैकविधोपकरणानां महादानानां च महत्तमं निदर्शनं पुण्यकव्रत-प्रकरणे वर्तते। अनेन व्रतेन श्रीकृष्णतुल्यपुत्रस्य पति-सौभाग्यस्य चोपलब्धिः सम्भवति।[2] तत्रोपकरणानि--
श्वेतचम्पक–नीलोत्पल–श्वेतचामर–बन्धूक-मुक्ताफल–रत्न--गेण्डूक — रत्नपाशक – रत्नसारनिर्मितकर्णभूषण–रत्नपाशक-रत्नप्रदीप – रत्न-निर्मितमाध्वीककलश – रत्नपद्म – मणीन्द्रसार–श्रीफलानां प्रत्येकस्य लक्षम्; दर्पण-रत्नरचित–पुटक-सुधाकलश - पद्मनाल-रत्ननिर्मिताङ्गु-रीयक-रत्नहार–सुवर्णरत्नकुम्भ – स्वर्ण – रचितखञ्जन – स्वर्णच्छत्र-मणिसाराणां प्रत्येकस्य सहस्रम्।

दक्षिणा –१३६० विप्रेभ्यो भोजनमष्टोत्तरशतं पारिजातपुष्पाणां दत्त्वा १३६० स्वर्णदक्षिणा देया।[3]

विचित्रव्रतानि

व्रतानां वैविध्यं रोचकं विभाति। अवन्तिसुन्दरी-कथानुसारेण

---

१. गौरीशंकर चटर्जीः हर्षवर्धन पृ० २१३, २१४

२. हरितुल्यो भवेत् पुत्रो विख्यातो भुवनत्रये–
सौन्दर्यं स्वामि–सौभाग्यमैश्वर्यं विपुलं धनम्।
सर्वंवाञ्छितसिद्धीनां बीजं जन्मनि जन्मनि॥

३. ब्रह्मवैवर्तपुराणे गणपतिखण्डे पुण्यकव्रतवर्णनम् ३; ४ अध्याययोः।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तत्रास्ति मूर्खव्रतम् । व्रतेऽस्मिन् मूर्खाय वस्त्रयुग्मेन सह भोजनं देयमासीत् । अनेन दाता भाविजन्मनि मूर्खो न भविष्यतीति धारणा बभूव ।[1]

अन्यत् प्रकरणं दृशद्वती-सत्रे प्रवर्तते यत्र वत्सतरी शतं वृषभेन सह वने चार्यन्ते । यज्ञसम्पत्तिस्तदा भवति यदा तेषां संख्या सहस्रमुपयाति ।[2]

व्रतं तु मूलतस्तप एव वैदिककालतोऽद्यावधि भूयो विलसति ।

महाभारतीयो धर्मविशेषः –व्रतम्

वैदिकधर्मानुसारेणेहलौकिकपारलौकिकलाभाः प्रायो यज्ञसम्पादनेन साध्या आसन् ।तेषु यज्ञेषु बहवः स्वल्पव्ययसाध्या बभूवुः । तथापि श्रेष्ठफलावाप्तये कतिपययज्ञा महाव्ययसाध्या विकसिताः । तानि महाफलानि दरिद्राणां कृतेऽपि हस्तगतानि विधातुं सरलधार्मिकविधाः सोत्साहमुपनिषत्सु अनुशासनपर्वणि ११०.१३५ च पुरस्कृताः ।

तपसा ब्रह्मज्ञानेन च सर्वोच्चं पदं ब्रह्मसायुज्यमेव बहुलीकृतम्, लौकिकलाभाश्च सम्भाविताः । ब्रह्मसाधनापि जनसाधारणकृते दुष्करीति प्रतीत्य याज्ञिक-पथं विकल्पीकृत्य भक्ति - तीर्थदर्शन – सदाचारैश्च सर्वमभीष्टं स्वीकर्तुं मनीषिणो निबोधितवन्तः —

न ते शक्या दरिद्रेण यज्ञाः प्राप्तुं पितामह ।
बहूपकरणा यज्ञा नानासंभारविस्तराः ।
नार्थन्यूनैरवगुणैरेकात्मभिरसंहतैः ॥
यो दरिद्रैरपि विधिः शक्यः प्राप्तुं सदा भवेत् ।
तुल्यो यज्ञफलैरेतैस्तन्मे ब्रूहि पितामह ॥

इति भीष्म-युधिष्ठिरसंवादस्य भूमिकानुशासनपर्वणि गीताप्रेस-संस्करणे १०७.२–४

मूर्तिपूजा

वैदिकयुगीना तत्र देवानामर्चा स्तुत्या पुष्पादिनापि च सम्पादिता। तेषां भावात्मकप्रतिष्ठानुष्ठितासीदार्यजनैः[3] । मूलतः साक्षादेव नैकदेवा ऋषिभिर्यज्ञद्वारेण पूजिता आसन् । कालान्तरेण यथा सोमवल्यास्तथैव देवानामपि मानवैः प्राप्तिर्विरलं बभूव । एतस्य देव-मानवयोः

---

१. अवन्तिसुन्दरी-कथा पृष्ठ १८२

2. Keith : Religion and Philosophy of Veda etc. p. 352.

३. ऋ० ७.२१.५;१०.९९.३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

परस्परसंपर्कस्य कारण-विमर्शः श्लथ एव प्रतिभाति। यथा पितृणां तर्पणादिकं तेषामनुपस्थितौ क्रियते, तथैव यज्ञैर्हविषा स्तुत्या च देवानां पूजानुपस्थितौ प्रावर्तत[1]। तथापि विरलापि मूर्तिद्वारा पूजा वैदिकसाहित्य उल्लेखतः प्राप्यत एव। तद्यथा तैत्तिरीय-ब्राह्मणे--

होता यक्षत्पेशस्वतीः तिस्रो देवीः हिरण्मयीः। भारतीबृहतीर्मही:। अत्र भारतीडासरस्वत्य इति देवीत्रयस्य मूर्तिद्वारेण पूजा चर्चिता।

आर्येतरसंस्कृत्यनुयायिनां शिश्नदेवानां चर्चा ऋग्वेदे वर्तते। ते शिवलिङ्गपूजकाः प्रतिभान्ति।

निश्चितनयेनेदमेव कथनं समीचीनं यत् सिन्धुप्रदेशवासिनः खीष्टात् सहत्रत्रयं प्राक् लिङ्गपूजा-निष्णाता आसन्। ते न केवलं लिङ्गस्यापितु शिवमूर्तेरप्यर्चनामनुष्ठितवन्तः। परवर्तियुगे कुत्र ते गता इति न सम्यग्ज्ञातं किन्तु निःसन्देहं ते भारतप्राङ्गण इतस्ततः परिभ्रमन्तः स्वधर्मं पूजासाधनं च सातत्येनांभजन्त। तेषां मूर्तिपूजाया उल्लेखः संस्कृतसाहित्ये तावन्मात्रेऽभ्युपगम्यते यावन्मात्रे तेषां धर्मो वैदिक-धर्मेण सम्मिश्रितः सार्वजनीनतामलभत। इदं तु परवर्तियुगे समभवत् यत्तेषां धर्म आर्यधर्मैः परिनिष्ठितः पौराणिकसाहित्ये प्रकामं प्रकाशन-मलभत।

खीष्टात् प्रायः ६०० वर्षपूर्वं नैकधर्मशास्त्रीयग्रन्थेषु मूर्तिपूजाया उल्लेखोऽधिगम्यते।[2] पाणिनिर्मूर्तिपूजामधोविधं निदर्शयति-जीविकार्थे चापण्ये। ५.३.९९। तदधिकृत्य पतञ्जलिरुदाहरति-अपण्य इत्युच्यते। तत्रेदं न सिध्यति। शिवः, स्कन्दः, विशाख इति। किं कारणम्। मौर्यैर्हिरण्यार्थिभिरर्चाः प्रकल्पिताः। भवेत्तासु न स्यात्। यास्त्वेताः सम्प्रति पूजार्थास्तासु भविष्यति।

न केवलं मूर्तयोऽपितु देवायतनानि (मन्दिराणि) मूर्तिरक्षणाय

---

१. भागवतानुसारेण प्रतिमाष्टविधा भवति—शैली, दारुमयी, लोहा, लेप्या, लेख्या, सैकती, मनोमयी, मणिमयी। ११.२७.१२। अत एव मनोमयी प्रतिमा देवानां वैदिककाले सविशेषं पूजितासीत्।

२. मानवगृह्यसूत्रे २.१५.६, बो० गृ० सू० २.२.१३। गौ० ध० सू० ९.१३.१४. मनु० २.१७६; ४.३९, १३०; ८, ८७; ३.११७, ९.२८५; विष्णु० ध० सू० २३, ३४; ६३, २७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

निर्मितानि बभूवुः ।[1] ख्रीष्टपूर्वं द्वितीयशतकस्य राजराजेश्वरः खारवेलः सर्वदेवायतन-संस्कार-कारक इत्यभिहितः । अर्थशास्त्रे कौटिल्यो राजधान्याम्—पराजिताप्रतिहत-जयन्त-वैजयन्त-शिवाशिव-वैश्रवण-लक्ष्मी-प्रभृतीनां देवायतनानां निर्माणं निर्दिशति । २.४ ।

मूर्तिपूजासमीचीनम्

मूर्तिपूजाया भारते पुष्कलप्रतिष्ठा प्राचीनतमे युगे प्रबभूवास्ति च । उपासनादिशि भक्तिभावस्य हृदि सन्निवेशाय मूर्तिरनुत्तमं साधनमेव प्रवर्तते । यथाभिनयेन कस्यचिन्नायकस्य चरित्रं प्रेक्षकस्य हृदि ब्रह्मानन्दरसं समुज्जृम्भयति तथैव कश्चिदेवस्य मूर्तिरपि सान्निध्यमुपगतस्य पुरुषस्य मानसं तस्य देवस्य गुणै रसनिर्भरं वासयति । अस्मिन् प्रकल्पने देवस्य प्रतिष्ठा सारूप्येण सायुज्येन च निर्विशेषं प्रतिभासते ।[2]

---

१. लौगाक्षि गृ० सू० १८३; गौ० ध० सू० ९. ६६ वसिष्ठ ध० सू० ११. ३१; विष्णु ध० सू० ६९. ७; ३०.१५; ७०. १३; ९१, १० । महाभारते आदि० ७०. ४९, २ अनु० १०. २०, २१ आश्व० ७०, १६; भीष्म० ११२, ११ ।

२. न खलु मूर्तेः पूजा भवति, अपितु मूर्तिस्तु स्थानमेव यस्मिन्देवस्य पूजानुष्ठीयते । नैकसंस्कारग्रन्थेषु मतमिदमधोविधं समर्थितम्—

अप्स्वग्नौ हृदये सूर्ये स्थण्डिले प्रतिमासु च ।
षट् स्थानेषु हरेः सम्यगर्चनं मुनिभिः स्मृतम् ।। ऋग्विधान १, २९, २
हृदये प्रतिमायां वा जले सवितृमण्डले ।
वह्नौ च स्थण्डिलेवापि चिन्तयेद् विष्णुमव्ययम् ।।
वृद्धहारीत ६, १२८, १२९

अर्चायां स्थण्डिलेऽग्नौ वा सूर्ये वाप्सु हृदि द्विजे ।
द्रव्येण भक्तियुक्तोऽर्चेत् स्वगुरुं माममायया ।। भागवते ११. २७. ९
अप्सु देवा मनुष्याणां दिवि देवा मनीषिणाम् ।
काष्ठलोष्ठेषु मूर्खाणां युक्तस्यात्मनि देवताः ।। शातातप स्मृति
अग्नौ क्रियावतां देवो दिवि देवो मनीषिणाम् ।
प्रतिमा स्वल्पबुद्धीनां योगिनां हृदये हरिः ।। ऋग्विधाने ३. २९. ३
हविषाग्नौ जलैपुंष्पैर्ध्यानैर्वा हृदये हरिम् ।
अर्चन्ति सूरयो नित्यं जपेन रविमण्डले ।। स्मृतिमुक्ताफले

पूर्वोक्तेषु पूजा-सन्दर्भेषु नैकसांस्कृतिक-सम्प्रदायानां देवप्रीत्यर्थंकृतानि लोकप्रचलित-कार्याणि समीकृतानि समन्वयदृष्ट्या ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तत्त्वविमर्शविहीना एव मूर्तिपूजा-विरोधका इति प्रतिभाति।

वस्तुतः संस्कृति-सोपानस्योच्चावचपदेषु वर्त्तमानानां लोकानां योग्यतापेक्षया तेषां कृते मूर्तिपूजायाः सूक्ष्मातिसूक्ष्मः स्थूलातिस्थूलश्च विधिर्विभावितो मनीषिभिरिति तस्योपादान-विमर्शेन स्पष्टं भवति।

नैके मध्ययुगीनाः सन्तो मूर्तिपूजाविरोधका आसन्। तेषु कबीर-दासो, दादूः, मलूकदासश्च सूप्रथिताः। एते रामभक्ता ध्यानोपासना-व्रतिकाः सन्ति। एतेषामनुयायिनोऽद्यावधि नैकप्रदेशेषु विलसन्ति। मध्ययुगे महाराष्ट्रियो हरिभक्तो पण्ढरपुरस्य नामदेवः सुप्रसिद्धो मूर्तिपूजा-विरोधको बभूव।[1]

वैदिकभक्तिः

वैदिकर्षयो भक्तिपरिपूतहृदया विभान्ति' इति संहितासु प्रतिपदं लक्ष्यते। तत्र गृत्समदर्षेरादित्यान् प्रति ऋग्वेदे भक्तिर्मनोहरति—

न दक्षिणा विचिकिते न सव्या न प्राचीनमादित्या नोत पश्चा।
पाक्या चिद् वसवो धीर्या चिद् युष्मानीतो अभयं ज्योतिरश्याम्॥
२.२७.११

अकिञ्चनः कविरादित्यानां पथप्रदर्शनेनाभयं ज्योतिरात्मसात्कर्तुम-भिलषति।

को नानाम वचसा सोम्याय मनायुर्वा[2] भवति वस्त उस्राः।
क इन्द्रस्य युज्यं कः सखित्वं को भ्रात्रं वष्टि कवये क ऊती॥
ऋ० ४.२५.२

अत्र भक्तेरङ्गानि प्रणतिः प्रार्थना आत्मनिवेदनं सख्यं च वर्णितानि।

ऋग्वैदिकयुगे देवानामनुयायिनो भक्तस्य नाम देवयुर्बभूव[3]—

---

1. Bhandakar : R. G. : Vaiṣṇavism, Śaivism etc. p 128.

२. मनायुर्भक्तस्य पर्यायः। यथा गीतायाम् मन्मना भव मद्भक्तो मद्याजी। १८.६५

३. अथर्ववेदे ११.७.९। या श्रद्धा धर्माङ्गेष्वन्यतमा सा परवर्तिभक्तिरेव। अन्यच्च देवयुः—Devoted to the gods, pious (Ṛgveda). देवयत्–Loving or serving gods. Mon. Williams : Skt. Eng. Dictionary p. 495. देवयुशब्द ऋग्वेदे ४.९.१ ५.४८.२;५.३४.५; ९.९६.२४;१०.४१.५। तथैव ऋग्वेदे वीरयुः अश्वयुः गव्ययुः। १९.३६.६।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तदस्य प्रियमभि पाथो अश्यां नरो यत्र देवयवो मदन्ति।
उरुक्रमस्य स हि बन्धुरित्था विष्णोः पदे परमे मध्व उत्सः ॥१.१५४.५

मन्त्रेऽस्मिन् देवयवो भक्ताः सन्ति। त इहलोकलीला-समाप्तौ विष्णुलोक आनन्दभाजो भवन्ति। स विष्णुर्भक्तस्य बन्धुर्भवति। विष्णोः परमे पदे मध्वः (अमृतस्य) उत्सः प्रवर्तते। इन्द्रस्य भक्ता (त्वायवः) अधोविधं वर्णिता :—

वयमिन्द्र त्वायवः सखि त्वामारभामहे।
ऋतस्य नः पथा नयाति विश्वा दुरिता ॥ ऋ० १०.१३३.६

मन्त्रेऽस्मिन् प्रकृष्टभक्तेः परिचयः सन्निहित इति देवयवः, मदन्ति, बन्धुः, प्रियं पाथोअभि अश्याम्, विष्णोः परने पदे मध्व उत्स इति पदैः प्रत्येकशो व्यज्यते। अनुरागमयी नवधा या भक्तिस्तस्याः कीर्तनं, सख्यं शरणागतिः (आत्मनिवेदनं) चात्र रूपाणि द्रष्टुं शक्यन्ते। सूक्तेऽस्मिन् सर्वेषु पञ्चसु मन्त्रेषु सानुरागं कीर्तनं (नामचरितोच्चारणं) विलसति[1]। वैष्णवी भक्तिरनामितापि अत्राविरलं प्रवाहिता। अपि च ऋग्वेदे सवितारं प्रति भक्तिः प्रकटिताधोविधम्—

नाके सुपर्णमुप यत्पतन्तं हृदा वेनन्तोऽभ्यचक्षत त्वा ॥ १०.१२३.६

अत्र हृदा वेनन्त इति पदद्वयेन भक्तिः सूचिता—

विभुर्विभावा सुषखा सखीयते।[2] ऋ० १०.९१.१

अत्र सख्यमिति भक्तिरूपं प्रकटितम्।

वैदिकसंहिताब्राह्मणादिषु पञ्चमहायज्ञानां प्रायशो वर्णनं वर्तते। एतेषां यज्ञानां भक्तिभावेनाविनाभावः प्रत्यक्ष एव विभाति। भक्तस्यापरं नाम ऋग्वेदे मनायुर्वर्तते।[3]

गीतानुसारेण कृष्णभक्तिरपि यज्ञपर्याय एव। यथा—

यान्ति मद्याजिनोऽपि माम्। ९.२५

अथवा किमधिकेन। कृष्णः स्पष्टं कथयति—

नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम। गीता ४.३१
यज्ञायाचरतः कर्म समग्रं प्रविलीयते ॥ ४.२३

---

१. विष्णोर्नामगुणकर्मादेः कीर्तनम्—यथा पार्थिवानि रजांसि विममे, उत्तरं सधस्थमस्कभायत्, त्रेधा विचक्रमाणः, विक्रमणेषु विश्वानि भुवनान्यधिक्षियन्ति, एको दाधार भुवनानि विश्वा।

२. अस्य ग्रन्थस्य पृष्ठे ३१३ विशदीकृतोऽयं विषयः।

३. प्रिय इन्द्रे मनायुः। ४.२५.५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यजुर्वेदे भक्तिभाव ईशं प्रत्यधोविधं प्रकटितः —

ईशा वास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद् धनम् ॥

प्रागेव विशदीकृतं यद् वैदिकस्तुतिषु देवान् प्रति सुव्यक्तानुरागधार प्रावर्तत ।[1] देवेभ्यो यज्ञो भक्तिभावेन निष्पादितः । परवर्तिप्रणिहितभक्ते-र्मूलं तु सानुरागधारा ज्ञानकर्मसमुच्चयेन समुदिता । वैदिकसाहित्ये भक्तिपदस्य प्रथमोल्लेखः श्वेताश्वतरोपनिषदि वर्तते--

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥ ६.२३

शतपथब्राह्मणानुसारेणोपनीयमानब्रह्मचारिणमाचार्यः 'इन्द्राय, अग्नये, ब्रह्मणे, प्रजापतये, सवित्रे परिददाति । ११.५.४

देवानां शरणागतिस्तु[2] भक्तेः प्रथमं प्रसाधकं लक्षणम् । तत्तु छान्दोग्योपनिषदि प्राग्भावेन दर्शितम् —

इन्द्रं, प्रजापतिं, मृत्युं वा शरणं प्रपन्नोऽभुवम् । न केवलं देवानां शरणागतिरपितु तेषां २.२२.३,४ मनसा ध्यानम्, आत्मनः परिदानं

---

१. ऋग्वेदे भक्तिभावद्योतका मन्त्रा अधोविधमादर्शभूताः --इन्द्रः सखेति ३ ४३.४; १०.४२.११; १०.११२.१० । मन्त्रेषु पितेति १.१०४.९; ७.३२.२६ मन्त्रयोर्वर्णितम् । वरुणः सखेति ७.८६.४; ७.८८.५ । अग्निः सखा ३.९.१

अन्यत्रापि भक्तिभावः प्रदर्शितः । तथाहि--

हृदा वेनन्तो अभ्यचक्षत त्वा । ऋ० १०.१२३.६
उप त्वाग्ने दिवे दिवे दोषावस्तर्धिया वयम् ।
नमो भरन्त एमसि । ऋ० १.१.७
स नः पितेव सूनवेऽग्ने सूपायनो भव । सचस्वा नः स्वस्तये । ऋ० १.१.९
जातवेदसं प्रियं मित्रं न शंसिषम् । ऋ० ६.४८.१
वयं त इन्द्र विश्वह प्रियासः । ऋ० २.१२.१५

अन्यत्रापि ऋग्वेदे १.१६४.३२; १.८९.१०; मुण्डकोपनिषदि ३.२.३, कठोपनिषदि २.१३; २.२२ बृहदारण्यकोपनिषदि ३.७ च ।

२. तद्यथा ब्रह्मचारी 'ब्रह्मण एव तदात्मानं परिददाति ।'
अत्र शरणागतिरात्मनिवेदनं वा । शत० ११.५.४
कार्यं त्वा परिददामीति । आश्व० गृ० सूत्र १.१९०८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(समर्पणं) स्तुतिः (आगानं) प्रसङ्गेऽस्मिन्न वर्णितम्।, मनसा ध्यानं तु पूर्वतरमथर्ववेदे 'मनसाधीती ७.११' मन्त्रे वर्णितम्। तत्रैव नामजपोऽभीष्टः पूर्वोक्तेषु सन्दर्भेषु नवधा भक्तिरङ्गरूपेण भृशं विलसति। अतः परं श्रीभद्भगवद्गीतायां कर्मयोगोद्भिन्ना भक्तिरङ्गीभवति,[२] धर्मपथेऽनुत्तमं पदं च लभते।

श्वेताश्वतरे—तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणं प्रपद्ये। ६.१८ ईत्यनेन भक्तिभावः प्रद्योतितः।

महाभारतीया भक्तिः

भगवद्गीताया योगेन युक्ता भक्तिर्ब्रह्माधिगमाय प्रशंसिताधोविधम्-

कविं पुराणमनुशासितारमणोरणीयांसमनुस्मरेद्यः।
सर्वस्य धातारमचिन्त्यरूपमादित्यवर्णं तमसः परस्तात् ॥८.१०

पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया।
यस्यान्तःस्थानि भूतानि येन सर्वमिदं ततम् ॥ ८.२२

उपासनापथे भक्तेरुपयोगो वर्तते। ९.१४ तदनु षोडशेपचारविधे-र्भक्त्याविनाभावः। तथाहि—

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥ ९.२६

भक्त्या सायुज्यं सम्भवति गीतानुसारेण। तथाहि--

ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम्। ९.२९
भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तपः[३] ॥ ९.५४

सम्यक् कृष्णभक्तिर्ब्रह्मसंस्थैः सुसाध्या। तथाहि--

ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति।
समः सर्वेषु भूतेषु मद्गतिं लभते पराम् ॥ १८.५४

---

१. अमृतत्वं देवेभ्य आगायानि। मनसाध्याय ध्यायन्नप्रमत्तः स्तुवीत। २.२२.२ प्रजापतेरात्मानं परिददानीति। २.२२.५

२. यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥
श्लोकेऽस्मिन् भक्तिरङ्गिभावेनोन्नीतं यस्य कर्म-भोग-होम-दान-तप आदीनि अङ्गानि।

३. समर्थितमेतदुद्योगपर्वणि ६७.४,५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पूर्वोक्तेषु सन्दर्भेषु ब्रह्मज्ञानान्तरमपि भक्त्यैव परमपदं प्राप्यमिति प्रतिपादितम्। भक्त्या देवप्रसादो भवति। तस्य फलेन अव्ययपदप्राप्तिः। १८-५६ मत्प्रसादात् तरिष्यसीति कृष्णवचनम्। १८.५८। कृष्णस्तु भगवान् स्वयम्। १८.६८

गीतायां भक्तियोगेन ब्रह्मसंस्थत्वप्राप्तिः परिभाषिता—

मद्भक्त एतद्विज्ञाय मद्भावाय प्रपद्यते। १३.१८
मां च योऽव्यभिचारेण भक्तियोगेन सेवते।
स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते॥

भवतु नाम श्वेताश्वतरोपनिषदि महाभारते चापि नैकस्थलेषु भक्तिः समादरभावमात्रम्[1] प्रेमियुग्मस्य सौहार्दमनुरागो वा। परन्तु दास्यभावेन वानुरागेण वात्मोत्थानार्थं पूजापरा शरणागतिर्गुरोर्देवस्य वा सन्निधौ भक्तिपदस्य व्यञ्जना पूर्वोक्तेषु श्लोकेषु सर्वप्रथमं गीतायां परिदृश्यते।[2]

भक्तिपथगामिनां चारित्रिकवैशद्यं प्रभवतीति महाभारते निगदितं संजयमुखेन। तथाहि—

---

१. परस्परभक्तिरादरभावमात्रं विलसति सूर्यकर्णाख्यान आरण्यकपर्वणि २८५ अध्यायेऽधोविधम्—

भक्तोऽयं परया भक्त्या मामित्येव महाभुज।
ममापि भक्तिरुत्पन्ना स त्वं कुरु वचो मम॥७

प्रकरणेऽस्मिन् भक्तिस्तु सौहार्दमात्रम्। आरण्यकपर्वणि २८४.२२, २८६.३; शल्यपर्वणि २९.२३। अनुशासनपर्वणि पितृभक्तः १६७.४७ शान्तिप० ६९.२६ अनुसारेणाश्रितान् प्रति भक्तिविशेषोऽस्ति।

२. भज् (सेवायाम्) + क्तिन् = भक्तिः धात्वर्थेनोपास्यस्य सेवां परवर्तियुगे व्यनक्ति।

तस्मात् सेवा बुधैः प्रोक्ता भक्तिशब्देन भूयसी। गरुड० २.९.२०
भजनं भक्तिरित्युक्ता वाङ्मनःकायकर्मभिः। लिंगपु० २.९.२२।
गाढस्नेहेन या सेवा भक्तिरित्यभिधीयते।
शरणागतिः गरुडपुराणे निबद्धा-
भवोद्भवक्लेशशतैर्हतस्तथा परिभ्रमन्निन्द्रियरन्ध्रकैर्हयैः।
नियम्य मां माधव मे मनोहयस्त्वदंघ्रिशङ्कौ दृढभक्तिबन्धने॥
१.२१९.३७, स्कन्दपु० २.९.२५.६१ च

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मायां न सेवे भद्रं ते न वृथा धर्ममाचरे।
शुद्धभावं गतो भक्त्या शास्त्राद् वेद्मि जनार्दनम् ॥ उद्योगे ६७.५

भक्तिपथगामिनः सर्वे वर्णजातीया लोकाः समाना इति पौराणिक-विचारधारा वैदिकसंस्कृतौ सन्निहिता वर्तते। वेदान्तदर्शनस्य सर्वं खल्विदं ब्रह्म' इति अद्वैतविज्ञानं तत्त्वदर्शिनां सामाजिकसंश्लेषस्य महदुपदानम्। गरुड० १.२१९.३८। शूद्राः श्वपचा भिल्ला निषादा द्विजातयश्च भक्तिमन्तः सर्वे समानमानाः।[1] प्रह्लादाद्यसुरा विभीषणादिराक्षसा हनुमदादि-वानरा भक्तिसूत्रेण समवायिभूता इति परं माहात्म्यं भक्तेर्जागर्ति।

अयं भक्तिपथः पुराणेषु प्रवर्तितः शङ्कराचार्येण प्रोद्भावितो रामानुजाचार्येण परिपोषितो यज्ञादुच्चतरः सम्मतः पौराणिकयुगे।[2] तथापि यज्ञस्य विरोधो नासीत् तत्र[3]। यतो हि नाम 'वेदधर्मादिगुप्तये', 'दैत्यधर्मस्य नाशार्थं च भगवतोऽवतारो भक्तानां श्रद्धायाः प्रमुखभूमिकां प्रास्तौत्।[4]

यज्ञमनपेक्ष्यौपनिषदजीवनदर्शनं पौराणिकयुगे श्रीमद्भगवद्गीता-द्वारेण प्रावर्तत। यथोपनिषद्युगे प्रव्रज्या विरलैव विभाति तथैव पौराणिकयुगेऽपि प्रव्रज्या वा गृहत्यागो वा नातिसत्कृतो बभूव।

के ते सन्ति पूज्यवर्याः

सुदूरप्राचीनकालत आर्या आर्येतराश्च बहुदेवानामनुग्रहेण बहुलं फलं लब्धुकामा बहुविधविधि-विधानानां संग्रहेण, हानोपादानैश्च धर्मार्णव उपप्लवमाना आलोच्यन्ते। कश्चिदेकः पुरुषो जनसमुदायो वा कमप्येकं देवं देवसमुदायं वा प्रपन्नभावेन यज्ञ-स्तुति-नमस्तपःसाध्यादिकानि समाचरन् स्वीयजीवनचर्यां दिव्यां विदधमान आसीदस्ति च।

साधारण्येन सर्वे देवाः पूज्याः सन्ति। तथापि तेषां मानवतायाः कल्याण-दिशि अवदानराशिं परीक्ष्य युगानुसारिसामाजिकावश्यकताश्चोद्दिश्य देशकालसामञ्जस्यानुरोधेन कतिपयदेवाः प्रामुख्येण प्रतिष्ठापिताः।

---

१. गरुड० १.२२२.४९।
२. किं यज्ञाराधने पुंसाम्। १.२१९.३१.१८
३. प्रत्युत तर्पणहोमादिभिर्विष्णुः प्राप्यत इति गरुड० १.२१५.२–३
४. गरुड० १.१४६.१,७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

शंकराचार्यः पञ्चायतनपूजां संस्तुतवान्। साद्यावधि लोकमानसं राजयति। तत्र विष्णुः, शंकरः, गणेशः सूर्यः दुर्गा च पूज्याः। पूजा-विधाने तेषु कश्चिदेकः केन्द्रे शेषाश्च क्रमशः चतुष्कोणे प्रतिष्ठापिता दृश्यन्ते। अनेन स्पष्टं प्रतीयते यदावश्यकतानुसारेण प्रसङ्गानुरोधेन च नानादेवासक्त्या भारतीय-देवप्रपत्तिः प्रतिघटं वैचित्र्यं समुपस्थापयति। अत्रैकस्यैव देवस्य नैकरूपाणि नैकदेवानामेकप्रकृतिश्चेति भारतीय-भावना लोकानां धर्मक्षेत्रं शबलीकरोति।

पूर्वोक्तेषु देवेषु प्राक्तनतमोऽभिज्ञातो देवाधिदेवो ब्रह्मा सर्वव्यापि-संसक्त्या शाश्वतमाहात्म्यं लेभे। तस्य गौरवशालिनी विशुद्धाध्यात्मिक-ज्ञानमयी निष्ठा वेदान्तदर्शनं विभावयति। तपो विरागः पराविद्या च तत्र वैशिष्ट्यं भजन्ते। सोऽयं ब्रह्म ब्राह्मणधर्मस्य ब्रह्मधर्मस्य वा प्रवर्तको भारतीयसंस्कृतिनभोमण्डले चतुर्दिशं शिखरायते। परमतां-गतमपि ब्रह्मधर्मस्यौदात्त्यं दुःसाध्यत्वात् सर्वसाधारणलोकानां मानस-मधिकर्तुं स्वभावतः सफलं नासीत्। तथापि ब्रह्मधर्मस्यौदात्त्यं निःसन्देहं सर्वेषां परवर्त्याचार्याणां धर्मोपदेशस्रोतस्विनीमात्मनिष्यन्दमिश्रणेन बहुलीचकार करोति च।

ब्रह्मानन्तरमपरो धर्मोन्नायको विष्णुः प्राभवत्। वासुदेवनारायणादि-नैकनामभिरवतारैर्वा लोके प्रतिष्ठितो विष्णुर्लोकसंवर्धनेन सर्वप्रियतां लेभे। अपरं च स विष्णुर्ब्राह्मसंस्कृतिमुपनीय तत्र सुकरत्वं विधातुं दृढमूलमपि तप ऊनीकृत्य तत्स्थाने विरागं निष्कामतां च समा-रोप्याराध्यदेवं प्रति श्रद्धातत्त्वमुन्निनाय। सा श्रद्धा भक्तिरिति गीतायां सम्प्रकीर्तिता परवर्तियुगे षोडशोपचारवती नवधा रराज। इयं भक्तिः प्रवर्तकस्य भगवतो विष्णोः प्रामुख्येण भागवतो धर्मो वैष्णव धर्मो वा प्रथितः प्रथमानुयायिनां सात्वतानां प्रमुख्येण सात्वतधर्मः। एको भगवानेवाश्रयणीय इति प्रवचनेन एकान्तिकधर्म इत्यादि तत्र पर्याया एव।

भक्तिपथगामिन इदंप्रथमतया सात्वतजानपदिकाः सुप्रथिताः। महाभारतयुगे कृष्णावतारसमकालिकः सात्वतानां प्रभावः प्रसारश्च नितरां समवर्धत। कृष्णोऽयमनुत्तमो लोकनेता बभूव। तेन निर्मितो भक्तिपथो न केवलं द्विजानां समुद्धाराय प्रबभूवापितु नानाविधाचार-विचारसरणिमवलम्बमानानां चाण्डालानां पशुपक्षिकृमिकीटानामपि परमपदप्राप्तिं सम्भावयामास। एतैरभिनवगुणैर्मण्डितो वैष्णवधर्मो समग्रभारतीयानां वैदेशिकानामापि हृदयं जग्राह।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्यदेवताः

वासुदेवः कृष्णोऽन्यान् देवान् स्वस्मिन् समीकृतान् वर्णयति महाभारतेऽरण्यपर्वणि। तदनुसारेण कृष्ण एव सर्वभूतानामादिरन्तश्च क्षेत्रज्ञः, विष्णुस्त्रिविक्रमः ब्रह्मा, सोमः, सूर्यः, धर्मः, धाता, यमोऽनलः, वायुः, वैश्रवणः, रुद्रः, कालः,खं ,पृथिवी, दिशः, नभः, चन्द्रः,सूर्यश्चास्ति। कृष्णे सर्वलोककार्यं प्रतिष्ठितम्।[1]

भक्तिः केवलं देवान् प्रति न प्रबभूव। तीर्थं प्रतिभक्तिस्तस्य नामसंकीर्तनेन महाभारते प्रयागमधिकृत्य व्याख्याताधोविधम्—

श्रवणात्तस्य तीर्थस्य तीर्थस्य नामसंकीर्तनादपि।
मृत्तिकालम्भनाद्वापि नरः पापात् प्रमुच्यते॥ ८.३.७५

गुरुभक्तिस्तु भारतेऽनादिकालतः प्रवर्तते। उपनयनप्रकरणे देवान्, आचार्यांश्च प्रति भक्तिभावः प्रगाढं समुदित इति प्रकृतग्रन्थस्योपनयनविधिप्रकरणे वर्णितम्। गुरुभक्तिः सेवया समुदिता भवति। मातृभक्तिः पितृभक्तिश्च विश्रुते श्रवणकुमारस्य कथाद्वारेण।[2] पतिभक्तिः सुविदितैव। देशभक्ती रामायणे विश्वामित्रमुखेनाधोविधं समुदीरिता—

साधु साध्विति तं देवाः पाकशासनमब्रुवन्।
देशस्य पूजां तां दृष्ट्वा कृतां शक्रेण धीमता॥ बाल० २४.२४

अत्रेन्द्रेण देशपूजा कृतेति निर्दिष्टम्।

स्वतन्त्ररूपेण भक्तिधर्मः सात्वतधर्मो वा[3] विष्णुपर्यायेण नारायण—

---

१. एते विशेषाः कृष्णेन प्रोक्ताः। आ० प० १३.१५–३६

२. मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। एतेषूपनिषद्वाक्येषु अनामितापि भक्तिः पुष्कलं विभाति।

३. It will appear that Sātvata was another name of the Vṛṣṇi race of which Vāsudeva, Saṅkarṣaṇa and Aniruddha were members and that the Sātvatas had a religion of their own according to which Vāsudeva was worshipped as the supreme being. R G Bhandarkar: 'Vaiṣṇavism, Śaivism and Minor Religious Systems. p. १२ काणेमहोदयस्य मतानुसारेण भक्तिस्तु Religion of Loving Faith in God. Hist. Dharma V p. 950

नारायणः सात्वतधर्मगोप्ता। शान्ति० ३२२.४५

नरनारायणाभ्यां च कृष्णेन हरिणा तथा। शान्ति ३२१.१७

धर्मस्य कुलसन्तानो महानेभिः सुरैरिह॥ ३२१.१७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नामकेन ऋषिणा प्रवर्तितः ।[1] वैदिकधर्मे भक्तिभावा अङ्गरूपेण प्रगल्भिता आसन्नित्यग्रे विवृतम ।

प्रकरणेऽस्मिन् सृष्टिप्रक्रिया विज्ञातुं शक्यते—

अन्तरात्मा[2]
क्षेत्रज्ञः पुरुषश्च
|
अव्यक्तः[3] प्रकृतिः
|
नरनारायणयोर्योनिः

तत्रैको ब्रह्मा मूलरूपेण स्वकर्मणा प्रतिष्ठितो वैदिकसंहितासु ऋषीणां देवानां च मध्ये तेषामधिष्ठाता प्रभवति ।[4] उपनिषद्युगे तं प्रति सर्वोच्चमनीषिणां ध्यानं संवर्धतेतमाम् । 'अहं तस्मिन्, स मयि सन्निनविष्टः' इति ज्ञानं, मननं, निदिध्यासनं च मानसिक-वाचिकैन्द्रियकप्रवृत्तिभिः समुन्नीतम् ।

महाभारते स ब्रह्मा नारायणो हरिर्वासुदेवः कृष्णो वा नानानामभिरभिहितः गीतायां जीवनव्यवहारस्य परमादर्शं 'कर्मयोगः' भक्तिर्वेति प्रतिपादयति । ततः परं स कर्मयोगपथो भक्तिमार्गोन्नायकानां परमप्रकाशपुञ्जान्वितवृत्तिं समीहमानो लोकाभ्युदयाय नित्यमेव भक्तिमयीभिर्ललामलतिकाभिर्विकसितः ।

---

१. नारायणोऽयं मूलत ऋषिरिति—
सोऽभ्यर्चयित्वा तमृषिं (नारायणं) पुराणम् । शा० ३२२.६
शतपथब्राह्मणे 'पुरुषं नारायणं प्रजापतिरुवाच । १२.३.४.१
पुरुषो ह नारायणोऽकामयत । १३.६..१.१

२. गुणव्यतिरिक्तोऽसौ । ३२१.२९

३. त्रिगुणम् ३२१.२९

४. ततो ब्रह्मण एकान्तिकधर्मोऽजायत । स एव गीतायां स्पष्टीकृतः
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना । ४.२४
एतदधिकृत्य तिलको व्याख्याति—
सृष्टि के सब पदार्थों में सदैव हो ब्रह्म भरा हुआ है । इस कारण इच्छारहित बुद्धि से सब व्यवहार करते-करते ब्रह्म से ही सदा ब्रह्म का यजन होता है ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भक्तिः

सा भक्तिः नवधा परानुरक्तिरीश्वरे । शा० सू० १.१.२

भक्तिस्तु मानसी वृत्तिस्तादात्म्यभावेनोत्पद्यते । उपास्योपासकयोर्मध्ये सर्वेशे मनसो वृत्तिर्भक्तिरित्यभिधीयते । भक्तिरसायन १.३

भक्तिमांस्तु भक्तः । तस्य स्वीयभागवती वृत्तिर्नवविधिकर्मभिर्लक्ष्यते ।

नवधा भक्तिः

भागवतानुसारेण नवधा भक्तिः प्रकीर्तिता

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्[1] ॥७.५.२३

तत्र श्रवणं तु हरिगुणचरितात्मकं भवति । विष्णोर्नामगुणकर्मादेः कीर्तनं स्यात्[2] । सर्वपापहरं हरिकीर्तनम् । परं कल्याणप्रदं हरिस्मरणम् । अर्चायाः पादपीडनं पादसेवनं भवति । अर्चनमर्चाद्वारेण षोडशोपचारपूजा भवति । वन्दनं तु भगवत्स्तुतिः । दास्यभावेन कर्मयोगदृष्ट्यात्मनो व्यापृतिर्हरिसेवार्थम् । हनुमतो दास्यं प्रथितम् । सख्यं तु अर्जुनस्य गीतायां प्रसिद्धम् । कृष्णस्य सुदामानं प्रति सख्यंभागवते २.८०.११ । आत्मनिवेदनं भवति शरणागतिर्भगवतः सर्वाश्रयस्य पादपद्मेषु ।

एतेषु किमप्येकमपि पूर्णफलप्रदमिति सर्वासां स्वीकरणं नानिवार्यतोऽपेक्षितम् ।[3] स्वशक्त्यनुरोधेनैकमपि साधयन् भक्तोऽभीष्टं लभते ।

परमपदप्रदायिनी सती भक्ति-प्रक्रिया मूलतः सुसरला द्रव्याद्युपादानं विनापि प्रवर्तेत । अतएव भक्तेर्लोकप्रियता विपुलायते । केवलं मानसिकवृत्त्यैव दास्यं, सख्यमात्मनिवेदनं स्मरणं च निष्पद्यन्ते । शेषा

---

१. नारदभक्तिसूत्रे एकादशधा भक्तिः--गुणमाहात्म्य-रूप-पूजा-स्मरण-दास्य-सख्य-वात्सल्य-कान्तात्मनिवेदन तन्मयता-परमविरक्तिरूपा इति ८३ । स्मरणं कीर्तनं श्रवणं, जपः, रूपध्यानं, पादसेवा, अभिवन्दनं चेति नवलक्षणा भक्तिः । नैवेद्यभोजनं च

२. शाण्डिल्यसूत्रे ७३ । रामनामजपेन सर्वपापदुःखव्याधिविनिर्मुक्तिर्मोक्षश्च भवति ।

३. भागवत० ८.७.४४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भक्तिविधय इन्द्रियाणां सुखदसंचारमात्रेण श्रवणं, कीर्तनं, पादसेवनमर्चनं, वन्दनं च सम्भवन्ति[1]।

आत्यन्तिकप्रकर्षेण भक्तिर्भक्तं विष्णुवल्लोकसंग्रहप्रवृत्तिषु नियोजयति, चराचरं विश्वं च ससुखं दुःखरहितं च विधातुं प्रवर्तयति[2]। अथ च वस्तुतो भगवान् विष्णुः स्वयमेव भक्तरूपधरः स्वविभूतिभिर्लोकमभ्युदय-निःश्रेयसपरायणं विधत्ते।[3]

वैदिकधर्मे प्रायो लोकैषणा-निमित्तं बहुसंख्यकदेवेषु यस्य कस्यचित् प्रसादेनेहजीवने तस्यानुग्रहेण प्रत्यक्षमिव नैकविधोपलब्धयः सम्भाविता आसन्। देवानां प्रसादनाय तानुद्दिश्य यज्ञस्तुति-नम-उपासना-दान-तपो-ब्रह्मचर्य-ब्रह्मज्ञानानि साधनभूतानि सुप्रचलितानि बभूवुः। परवर्ति वैदिकयुगे ब्रह्मज्ञानेन तपसा च मुक्तिरेव महामनीषिणां जीवनोद्देश्योपलब्धिर्लोके स्पृहणीयतमा सविशेषं संजाता। कर्मकाण्ड-विस्तारयुतेन याज्ञिक-होमेन भवतु नाम महती सिद्धिः किन्तु सानल्पव्ययश्रमसाध्यास्तीति पश्यन्तो मनीषिणो द्रव्ययज्ञाद् विमुखभूता ज्ञानेन, ध्यानेन, तपसात्मसमर्पणेन च स्वीया परात्परा सुगतिर्हस्तगता भवतीति प्रतिपादितवन्तः। एतदुपनिषद्युगीनं प्रगमनम्। उपनिषदनुसारेण ब्रह्मज्ञानेन कश्चित् पुरुषो ब्रह्मसंस्थो भवति। स ब्रह्मसंस्थो ब्रह्मज्ञानप्रकाशेन लोकैषणातो विरक्तो भूत्वा प्रव्रज्याद्वारेण मुक्तो भवतीति आस्था दृढमासीत्। अयं ज्ञानमार्गः प्रशस्यतमोऽपि कठिन आसीत्, यतो हि नाम ज्ञानाय ब्रह्मचर्यात्मकं तपोऽपेक्षितमिति निर्धारितमासीत्। नायं सार्वलौकिको प्रतीतः।

---

१. रूपोपादानं चिन्ता च मानसं भजनं विदुः।
वाचिकं भजनं धीरा प्रणवादिजपं विदुः॥
कायिनां भजनं सद्भिः प्राणायामादि कथ्यते॥ लिङ्गपु० २.२४,२५
अर्चनं षोडशोपचारपूजा, श्रवणं कथाश्रवणं, कीर्तनं नामचरितोच्चारणं स्मरणं ध्यानमेव, अर्चनं पूजा, दास्यं हनुमतः, सख्यमर्जुनस्य, आत्मनिवेदनं शरणागतिः।

२. अहं भक्तपराधीनो ह्यस्वतन्त्र इव द्विजः।
साधुभिर्ग्रस्तहृदयो भक्तैर्भक्तजनप्रियः॥ भागवत ९.४.६३
श्वपाकोऽपि च मद्भक्तः सम्यक् श्रद्धासमन्वितः।
प्राप्नोत्यभिमतां सिद्धिमन्येषां तत्र का कथा॥ भागवत० ६.१ ब्रह्मपु० १७८.१८६

३. अर्जुनो वासुदेवं प्रसादयितुं—
कीर्तयामास कर्माणि सत्यकीर्तेर्महात्मनः॥ आर० १३.८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तपो विनापि 'अस्ति कश्चिदुपायो येन परमपदं प्राप्येत' इत्यस्मिन् विषये महाभारते वैदिककाले च या श्रद्धासीत्, सैव परतो भक्तिनाम्ना प्रथितेति ज्ञेयम्।[1] सा श्रद्धा बौद्धसंस्कृतौ बहु विलसति। यथा सुत्तनिपाते आडवकसुत्ते श्रद्धा पुरुषस्य श्रेष्ठं वित्तम्, श्रद्धयौघं तरति, धर्मं श्रद्दधानः प्रजा लभते उपासकानां गृहस्थानां श्रद्धया सत्य-धर्म-धृतित्यागादयो लभ्याः।

गीताया भक्तिर्भक्तस्य माधुर्य-सिक्त-जीवनं सम्यग्भगवन्मयं विधातुं प्रयतते। भक्तजीवनस्य प्रत्येकं क्षणं भगवद्वासितं भवेदिति भक्तस्याग्र-भूमिः। वैदिकयज्ञैर्यद देवसान्निध्यमवाप्यते तत्तु यज्ञावधिकं संवर्तते। तदनन्तरमन्यो यज्ञोऽन्यत् कार्यं वा समीह्यमानं भवेत्। भक्तिपथे एकदा दीक्षितो यावज्जीवं भगवज्ज्ञानदर्शनध्यान प्रपत्तिभिरेव केवलं निर्भर-मात्मानमनुभवति।

वैदिकयुगीनविदुषां नैकविधसरलसरलोपाया निदर्शिताः। महा-भारतानुसारेण मुक्तिर्नैकरुपायैर्भवति। तेषु सर्वश्रेष्ठोपायो गीतायां प्रतिपादिता एकमात्रभगवद्भक्तिरेव यस्या निष्कामकर्मयोगेनाविना-भावः सर्वसम्मतः। निष्कामकर्मयोगो भक्त्योद्भाव्यते।

गीतायां भक्तेर्विशेषाः

भगवते भक्तस्य सर्वस्वसमर्पणं समीहितम्।[2] प्रसंगेऽस्मिन्नैकविधि-तत्त्वानि सर्वोपरि सम्मानितानि--

---

१. अस्य ग्रन्थस्य पृ० ६७६

श्रद्धा—Loyalty (Faith or Faithfulness is often personified and in Rgveda x. 151 invoked as a deity, in Taittiriya Brāhmaṇa. she is the dangther of Prajāpati, and in the ŚatapathaBrāhmaṇa of the sun, in the Mahābhārata shs is the daughter of Dakṣa and wife of Dharma etc. Monicr Williams, A Sanskrit English Dictionary p. 1095.

भक्ति की प्राचीनतम परम्परा प्राग्वैदिक काल तक पहुँचती है। दिनकरः संस्कृति के चार अध्याय पृ० ३५७।

२. यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(१) निष्कामकर्म २.४७,७१;३.८ (२) लोकसंग्रहः[1] ३.२० (३) समदृष्टिः (४) विष्णोस्तस्य पूजा ४.५-७ (५) आत्मनो नित्यता २.२० (६) सुखदुःखसमभावः २.३८,५६ (७) वेदोपेक्षा २.४५,४६ (८) इन्द्रियनिग्रहः २.५८ (९) भक्तिपथेन ब्राह्मीस्थितिः, ब्रह्मनिर्वाणः २.७२ (१०) जहि कामम् ३.४३ (११) देवयज्ञः द्रव्ययज्ञः, योगयज्ञः[2], स्वाध्याययज्ञः ज्ञानयज्ञः, (१२) यज्ञः सम्पादनीय एव ४.३१ (१३) ज्ञानेनैव मोक्षः[3] ४.३३-४१ (१४) अहं सर्वेषु भूतेषु सर्वाणि भूतानि मयि इति भावना ४.३५;६.२९. सर्वभूतात्मा ५.७।

वैदिकयुगे ऋषीणां प्रवृत्तिमार्गीयो याज्ञिकधर्मो बहुसंख्यकैर्जनैः समादृतो बभूव। तदा--

ब्रह्मोपासनयामरत्वं परमानन्दं च लभते' इति निवृत्तिमार्गीयाध्यात्मिकजीवनधारापि वैदिकधर्मस्याङ्गरूपेण प्रतीयते। सैवोपनिषद्युगे ब्रह्मज्ञानेन ब्रह्मचर्येण च सुसंगताङ्गीधर्म एवौपनिषदानाम्।

वैदिकार्याणां यः प्रवृत्तिमार्गीयो धर्मो महाभारतयुगे स एव सात्वतानां वासुदेवानां पाञ्चरात्राणां वा वैष्णवधर्मो भक्तियोगस्य विशेषैः समन्वितो दृढमूलो बभूव। तत्तु श्रीमद्भगवद्गीताया अधःश्लोकः ससारं व्याख्याति--

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत्।
यत्तपस्यसि कौन्तेय तत् कुरुष्व मदर्पणम्॥

'तत् कुरुष्व मदर्पणम्' इति वैष्णवभक्तियोगस्य परमं लक्षणम्। परवर्तिपौराणिकभक्तिर्नवधा प्रपञ्चिता तदेवानुस्मारयति पदे पदे। अत्र कर्मयोगस्य शाश्वतभूमिकोपरि भक्तिः परं राजते।[4]

---

१. लोकसंग्रहस्तु सर्वभूतहिते रतिः।

२. योगयज्ञे ध्यानस्य, सांख्ये ज्ञानस्य च विशेषता विभाव्यते।

३. भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम्।
सुहृदं सर्वभूतानां ज्ञात्वा मां शान्तिमृच्छति॥ ५.२९
वस्तुतो ब्रह्मैव गीतायाः कृष्णः। ५.१०

४. वैदिकसंहितायुगस्यलोकैषणाया, उपनिषद्युगस्य तपोमयब्रह्मोपासनायाश्चास्तित्वं भक्तियोगे यद्यपि वर्तत एव किन्तु तयोर्महत्त्वं समुच्छ्रितं न प्रतिभाति।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वैदिककालतो भक्तिप्रवृत्तिः

ऋग्वेदस्य पुरुषसूक्ते भारतीयधर्माणामाद्यन्तविकासस्यैकसूत्रता पुरुषस्य विराट्स्वरूपस्य व्याख्यानेनेदंप्रथमतया विज्ञापिता वर्तते। तद्यथा

पुरुष एवेदं सर्वं यद् भूतं यच्च भव्यम्। १०.९०.२

अयं पुरुष एवौपनिषदानां ब्रह्म, ईशश्च सम्मतः परमपिता ब्रह्माण्डे कृतवसतीनां सर्वेषां चराचराणाम्।[1]

कस्यचिद् देवस्य ज्ञानेनोपासकस्य तद्देवसंस्थत्वं सिध्यतीति वैदिकसाहित्ये नैकशः प्रतिपादितम्। तदेव परवर्तिविविधधर्मोन्नायकानामपि निर्विरोधं प्रतिपाद्यं वर्तते। तथाहि--

श्वेताश्वतरोपनिषदि सर्वप्रथमं भक्तिरधोविधं प्रस्तुता वर्तते।
यस्य देवे पराभक्तिर्यथा देवे तथा गुरौ। ६.२३

अनया भक्त्या देवब्रह्मणः[2] ज्ञानप्राप्तेर्योग्यता जायते। ततः परम्--

तमात्मस्थं येऽनुपश्यन्ति धीरा—
स्तेषां सुखं शाश्वतं नेतरेषाम्॥ श्वे० ६.१२
'ब्रह्मवेद ब्रह्मैव भवति'। मुण्डके ३.२.९

इति प्रागेव प्रतिपादितम्।

भक्त्या भगवतः (ब्रह्मणः महेश्वरस्य, देवस्य, भुवनेशस्य वा) अनुग्रहेण ज्ञानं प्राप्यते। ज्ञानेन शाश्वतं सुखमुत्पद्यते। औपनिषदानां ब्रह्मलोको ब्रह्मचर्येण साध्यो वर्तते।[3]

वैदिकयुगे मोक्षार्थं यज्ज्ञानमपेक्षितमासीत् तदर्थं ब्रह्मचर्यं प्रथमसाधनं बभूव। भक्तियुगे भगवच्छरण-प्रपत्तेरेव प्रमुखता स्वीकृता।

---

१. (क) सर्वं खल्विदं ब्रह्म। छान्दोग्ये ३ १४.१
(ख) इदं ब्रह्मेदं सर्वम्। २.५.१
(ग) ब्रह्मैवेदममृतं पुरस्ताद् ब्रह्म पश्चाद् ब्रह्म दक्षिणतश्चोत्तरेण।
अतश्चोर्ध्वं च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम्। मुण्डक० २.२.११
(घ) सर्वं ह्येतद् ब्रह्म। माण्डूक्ये २

२. देव एकः स्वमावृणोति स नो दधातु ब्रह्माव्ययम्। श्वेत० ६.१०

३. ये ब्रह्मलोकं ब्रह्मचर्येणानुविन्दन्ति। छा० ८.३.३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ब्रह्मचर्यस्य भक्तेश्च मिलनस्थली भगवद्गीतास्ति यस्यां ब्रह्मचर्यस्य भक्तेश्च प्रतिष्ठा युगपद् दृश्यते ।[1]

भक्तेः फलम्

श्रीमद्भगवद्गीतायां भक्तेः सर्वोच्चफलमिहलोकेऽस्ति भगवतो विश्वरूपदर्शनम् । तत्तु नान्यथा साध्यमिति कृष्णेन प्रोक्तम्--

नाहं वेदैर्न तपसा न दानेन चेज्यया ।
शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ॥

गीता ११.५३

भक्त्या त्वनन्यया शक्योऽहमेवंविधोऽर्जुन ।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप ॥ ११.५४

अर्थाद् भक्तिः क्रमशः त्रिविधं फलति—

भगवतो ज्ञानं, तदनु तस्य दर्शनं, तदनु तस्मिन् प्रवेशः ।[2] प्रवेशं मम भक्ता यान्तीति ७.२३ । कृष्णे भक्ताः, भक्तेषु कृष्ण इति ९.२९ । भक्तो न प्रणश्यति ९.३१ । भक्तः कृष्णस्यप्रियो भवति २.१२.२०

मुक्त्युपनिषदनुसारेण भक्तो भगवतः सारूप्यं, सामीप्यं, सायुज्यं च लभते । १४, २१, २३, २४ । वल्लभाचार्यो भक्तिमेव भक्तेः परं फलं मनुते अन्यदेवभक्ताः स्वल्पतरफलभाजस्तान् देवान् यान्ति । ७.२०-२२ । कृष्णस्तेषां प्राप्यं फलं निर्णयति । स एवाध्यक्षः सर्वेषां देवानां प्रदाय फलस्य ।

भक्तियोगः

क्वचित् सकामा भक्तिरपि भवति यया भक्तोऽभीष्टं प्राप्नोति ।

---

१ (क) प्रशान्तात्मा विगतभी ब्रह्मचारिव्रते स्थितः ।
मनः संयम्य मच्चित्तो युक्त आसीत मत्परः ॥ गीता० ६.१४
(ख) ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधये । गीता० ४.२४
(ग) ब्रह्मण्याधाय कर्माणि संगं त्यक्त्वा करोति यः ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥ गीता० ५.१०
अत्र ब्रह्म तु वासुदेवः । कृष्णो जनार्दनो वा गीतायां कथयति—
यत् करोषि यदश्नासि तत्कुरुष्व मदर्पणम् ।
निष्कामकर्मरितिरियं भक्तिमार्गे परिपोषिता ॥

२. प्रवेश एव भक्तिः । भगवतो भाग एव भक्तो भवति । भक्तोऽनन्यभाक् भवति । गीता० ९.२२,३० । अर्थाद् भगवतो भोगस्य ग्राही ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

किन्तु यदि नाम प्रह्लादवद् भक्तो निष्कामो भवति स भक्तियोग-विशिष्टः फलाशारहितः स्यात्। ईदृशो भक्तो नैकदेवानामुपासको न भवति। सोऽनन्यदैवतः, एकान्तिकभक्तः भक्तियोगमादर्शयति। स भगवतः शरणागतो भगवन्तं प्रपद्यते।

फलकामा भक्ता भगवन्तं न प्रपद्यन्ते। ते च्यवनधर्माः सन्ति।[1]

भक्तस्य चारित्रिकविशेषाः

गीतानुसारेणा अधोलिखितविशेषा भक्तस्य भवन्ति—

(१) मत्कर्मपरमः १२.१०। सर्वकर्मफलत्यागं करोति १२.११, अनन्यभाक् ९.२२,३०।

(२) यतात्मा (संयतवृत्तिः) १२.११, सर्वभूतहिते रतः, मैत्रः, करुणः, निर्ममः, निरहंकारः, समदुःखसुखः, क्षमी १२.१३। सन्तुष्टः, योगी, दृढनिश्चयः, मय्यर्पितमनोबुद्धिः १२.१४। अनपेक्षः, शुचिर्दक्ष उदासीनः, गतव्यथः, सर्वारम्भपरित्यागी १२, १६। शत्रुमित्रसमः, संगविवर्जितः तुल्यनिन्दास्तुतिः, मौनी, अनिकेतः १२.१९

(३) श्रद्दधानः, मत्परमः। १२.२०

भक्तस्तु परमप्रयोजनेन लोके 'पद्मपत्रमिवाम्भसाम्' जीवति, किन्तु लौकिककार्यार्थं जना भक्तिं साधनीकृत्य प्रवर्तन्ते। तद्यथा गीतायाम्—

चतुर्विधा भजन्ते मां जनाः, सुकृतिनोऽर्जुन।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ। ७.१६

अर्थार्थी तु गृहस्थ एव।

भक्तस्य जीवनदर्शनम्

गीतानुसारेण भक्तस्य जीवनविधा अधोलिखिता गुणाः प्रकाशयन्ति—अहिंसा, क्षमा, ऋजुता, गुरुसेवा, वैराग्यं, अभिमान-शून्यता, अनासक्तिः, इष्टानिष्टयोः समानभावः, एकान्तवासः, कुटुम्बविरतिः, लोकैषणाभावः, तत्त्वज्ञानाभिनिवेशश्च। १३.७-११

भागवते भक्तस्यात्मगुणाः प्रगुणिताः सन्ति। तथाहि—

अथ मां सर्वभूतेषु भूतात्मानं कृतालयम्।
अर्हयेद्दानमानाभ्यां मैत्र्याभिन्नेन चक्षुषा॥ ३.२९.२७
मय्यर्पितात्मानः पुंसो मयि संन्यस्तकर्मणः।
न पश्यामि परभूतमकर्तुः समदर्शनात्॥ ३.२९.३३

---

१. शान्ति० ३२८.३०,३१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

गीताया निष्कामकर्मधारणा भागवतस्यापि संस्तुतिं प्रस्तौति स्वकर्मकृत् श्रेयान् धर्मदोग्धा स कर्मयोगी स्यात्। ३.२९.३२ अपरं च—भगवद्भक्तिरुपासकमकर्मण्यं न विदधाति, अपितु भक्तो महाराज-पृथुवन्निस्सीमकर्मण्यो जायते।[1]

महाभारतकालानन्तरं भक्तेः सर्वोच्चप्रतिष्ठा सुस्पष्टं सम्मतास्ति। भक्तिप्रचारका यज्ञविधानं,ब्रह्मज्ञानचर्यां च लोपयितुमुत्सुका न दृश्यन्ते,[2] किन्तु यज्ञादपि ब्रह्मज्ञानादपि च सविशेषमुच्चतरं प्रतिष्ठापिता भक्तिः प्रमुखाचार्यैरनुमोदिता च राजते। तथाहि—गरुडपुराणे

मन्त्रयाजि-सहस्रेभ्यः सर्ववेदान्तपारगः।
सर्ववेदान्तवित्कोटया विष्णुभक्तो विशिष्यते॥ १.२१९.१२
किं यज्ञाराधने पुंसां सिध्यते हरिमेधसः।
भक्त्यैवाराध्यते विष्णुर्नान्यत्तत्रापि कारणम्॥ १.२१९.३१

भक्तिप्ररोचनेऽद्वैतवेदान्तस्य पृष्ठभूमिरधोविधं निर्मिता—

विष्णुमानन्दमद्वैतं विज्ञानं सर्वगं प्रभुम्।
प्रणमामि सदा भक्त्या चेतसा हृदयालयम्॥ १.२२०.२

इयं समन्वयात्मिकी दृष्टिर्भक्तानां भक्तेश्च लोकप्रियतां समवर्धयत। तेषां मतेन यज्ञस्तु भगवानेव।[3]

भक्तिरनुरागेण लक्ष्यते। सोऽनुरागः प्रीतिर्वा सर्वस्वत्यागयुता भवेन्नाम। अन्यथा भक्तेर्दृढानुबन्धो न साकल्येन प्रभवति। भागवतानुसारेण सर्वस्वसमर्पणं तस्याः प्रथमं लक्षणम्। गीतायुगीना निष्कामकर्ममणिरूपेति विशेषवती भक्तिः कर्मफलत्यागेन, सर्वारम्भाणां तेषां फलानां च भगवते समर्पणेन राजते।

यत् सायुज्यं ज्ञानेन ब्रह्मचर्येण तपसा वा पूर्वं साध्यमासीत् तदनायासं भक्त्या सिद्धं भक्तीति गीतायां प्रोक्तम्—

ये भजन्ते तु मां भक्त्या मयि ते तेषु चाप्यहम्। ९.२९

---

१. भागवते ४.२२.५३–६२

२. गीतानुसारेण भक्तानां कृष्णार्चनं यज्ञ एव। तद्यथा—
येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः।
तेऽपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम्॥ ९.२३

३. 'त्वं यज्ञः' इति गरुड० १.२२६.२७। भागवतेऽपि साक्षात् स यज्ञ-पुरुषः, छन्दोमयः इत्यादि २.७.११

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दुराचाराः, पापयोनयः, शूद्रा अपि भक्त्या परां गतिं लभन्ते। गीता ९.३०–३२

कृष्णाय स्वीयं सर्वस्वं समर्पयेदिति यथा गीतायामुपदिष्टं तथैव भागवतेऽपि प्रोक्तम्—

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वानुसृतस्वभावात्।
करोति यद्यत् सकलं परस्मै नारायणायेति समर्पयेत्तत्॥
११.२.३६

समर्थितमेत त् लिङ्गपुराणे २.९.२४,२५

गीतायां भक्तिर्निष्कामकर्मयोगेन युता सर्वङ्कषा विभाति। ईदृशी भक्तिर्नैकपुराणेषु समर्थिता दृश्यते।[1]

नवधा भक्त्याः पुण्येन विष्णु-सायुज्यमपि सम्भवति। यदि नामकश्चिद्भक्तिविमुखस्तर्हि तस्य मरणानन्तरं नरके विनिपातो भवत्येवेतिगरुडपुराणे प्रथितम्। २.१२.१२

भक्तपथे हर्षोल्लासायोजनम्

यथा यज्ञेषु मनोरञ्जनाय नैकविधकलाशिल्पक्रोडास्पर्धादीनामायोनानि क्वचिद् यज्ञस्याङ्गभूतान्येव प्रवर्धमानानि विलसन्ति स्म, तथैव परवर्ति भक्तिपथस्य देवाराधना-प्रसङ्गे नैकविधशिल्प-नृत्य-सङ्गीतनाट्यादीनां प्रस्तावेनोपास्यदेवस्य महिमा प्रद्योतितः। महामन्दिरेषु परिसरे भित्तिषु च परितो रागमयीषु मूर्तिवीथिषु, सज्जासीत्। मण्डपेषु च संगीतकादि मनोरञ्जक-कार्यक्रमा लोकैश्वर्यविभावका दर्शकानां रसास्वादनाय प्रायोजिता आसन्।[2]

स्वयं भक्ताः प्रनृत्यान्तीति चैतन्यमहाप्रभोरादर्शेन चिर-प्रवर्तितमेव।

---

१. तस्मात् सर्वप्रयत्नेन त्यक्त्वा कर्माश्रितं फलम्।
अविद्वानपि कुर्वीत कर्माप्नोति चिरात् पदम्॥ कूर्म० १,३-११
न बन्धाय तत्कर्म भवत्यनभिसन्धितम्। मार्क० १२.१५
वेदोक्तमेव कुर्वाणो निःसङ्गोऽर्पितमीश्वरे।
नैष्कर्म्यां लभते सिद्धिं रोचनार्था फलश्रुतिः॥ भाग० १.१३.४८

२. पतञ्जलिरष्टाध्यायी २.२.३४ अधिकृत्य पद्येनैकेन सूचयति यत् रामकेशवादीनां कृते देवायतनेषु वाद्यमायोजितमासीत्।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भक्त्यधिकारिणः सर्वे प्राणिनः

भक्तिर्विकासक्रमेण सर्वोदयपरायणा सञ्जातेत्यपूर्वोपलब्धिस्तस्याः। न केवलं द्विजातयो वा विद्वांसो वा तपस्विनो वा भक्त्या हरिशरणं परमपदं च लभन्तेऽपितु चाण्डाला अपि भक्तिपथगामिनो माहात्म्यं गौरवं च लभन्ते।[1] तद्यथा शास्त्रेषु प्रतिपादितम्—

अनिन्द्ययोन्यधिक्रियते पारम्पर्यात् सामान्यवत्। शाण्डिल्ये सूत्रे ७२

पुल्कसः श्वपचो वापि ये चान्ये म्लेच्छजातयः।
तेऽपि वन्द्या महाभागा हरिपादैकसेवकाः॥ पद्मपु० १.५.१०
येषां मुखे हरेर्नाम हृदि विष्णुः सनातनः।
उदरे बिष्णुनैवेद्यं स श्वपाकोऽपि वैष्णवः॥ पद्मपु० ४.१०.६५
किरातहूणान्ध्र-पुलिन्दपुल्कसा आभीरका यवनाः खसादयः।
ये अन्ये च पापा यदुपाश्रयाश्रयाः शुध्यन्ति तस्मै प्रभविष्णवे नमः॥
भागवते २.४.१८

यज्ञकर्म - निष्णाता मुनयोऽपि भक्तिप्रवणा दृश्यन्ते। रामायणानुसारेण विश्वामित्रो मुनिर्वामनस्य भक्त आसीत्। बाल० १९.२२। स तु स्वयज्ञरक्षार्थं रामं नीतवान्।

अत्र भक्तेर्यज्ञस्य च साह्यं निर्दिष्टम्। भक्तिप्रधानो यज्ञः पूजेति प्रथितं परवर्तियुगे।

न केवलं सैद्धान्तिक-प्रवचनमात्रमेतदपितु व्यवहारतोऽपि दृश्यते यद् बहवोऽनुत्कृष्टजातीयाः सन्तो भक्तिपथगमनेन भारतीयसमाजे न केवलं स्वजीवनकालेऽपित्वद्यावधि प्रभविष्णवः सुसम्मानिताश्च गौरवास्पदं सन्ति।

प्रो० काणे तादृशां महात्मनां निदर्शनं प्रस्तौति—The most important way was on the spiritual front... ज्ञानेश्वर, नामदेव, रामानन्द, कबीर, चैतन्य, दादू, नानक, वल्लभाचार्य, एकनाथ, तुकाराम, रामदास all agreed on fundamentals viz. unity of God, the need of self purification, condemnation of the pride of caste and of formalities of worship, and surrender to the deity for salvation.

अवतारः

भक्तिपथे देवानामवतारः सविशेषं महिमान्वितो भवति। तद्यथा गीतायां प्रोक्तम्—

---

१. गीता ९.३०-३२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥

तत्र प्रमुखतो विष्णोर्दशावतारा अनादिकालतः सम्प्रतिष्ठिता विलसन्ति । तद्यथा जयदेवेन मधुरतमं निदर्शितम्—

मीनः —प्रलयपयोधिजले धृतवानसि वेदम् ।
विहितवहित्रचरित्रमखेदम् ॥

कच्छपः —क्षितिरतिविपुलतरे तव तिष्ठति पृष्ठे ।
धरणिधरणकिणचक्रगरिष्ठे ॥

सूकरः —वसति दशनशिखरे धरणी तव लग्ना ।
शशिनि कलङ्ककलेव निमग्ना ॥

नरहरिः —तव करकमलवरे नखमद्भुतशृङ्गम् ।
दलित - हिरण्यकशिपुतनुभृङ्गम् ॥

वामनः —छलयसि विक्रमणे बलिमद्भुत-वामन ।
पदनखनीरजनितजन - पावन ॥

परशुरामः —क्षत्रियरुधिरमये जगदपगतपापम् ।
स्नपयसि पयसि शमितभवतापम् ॥

रामः —वितरसि दिक्षु रणे दिक्पतिकमनीयम् ।
दशमुखमौलिवलिं रमणीयम् ॥

कृष्णाः —वहसि वपुषि विशदे वसनं जलदाभम् ।
हलहतिभीतिमिलितयमुनाभम् ॥

बुद्धः —निन्दसि यज्ञविधेरहह श्रुतिजातम् ।
सदयहृदयदर्शितपशुघातम् ॥

कल्किः —म्लेच्छनिवह-निधने कलयसि करवालम् ।
धूमकेतुमिव किमपि करालम् ॥

भक्तिपथे विष्णोरनुत्तमो महिमा यथा पूर्वं दर्शितम्, तस्य दशावतारेण प्रगल्भायते । सर्वलोकपालकत्वेन प्रतिष्ठितः सोऽन्यान् देवानतिशेते । न केवलं स्वलोके देवभूतः सो ऽनिशं लोकहितकाम्यया व्यापृतो भवति अपितु भूलोके

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नानारूपेणादचरितनायको देवर्षिभिरप्यसाध्यं साधयितुमवतरति ।[1] कतिपयेषामवताराणां वर्णना वैदिकसाहित्ये वर्तते। परवर्तिसाहित्ये भारतीय-संस्कृति-निरूपण-दिशा 'रामकृष्णौ इत्यवतारद्वयस्य वर्णना सार्वलौकिकतां सार्वकालिकतां च भूयिष्ठं सुषमं चाधिकुर्वाणाभ्युदयनिःश्रेयस-सिद्धये प्रभवति। ऋग्वेदे ६.४९.१३; ७.१००.४; १.१५५.४ वामनावतारः, शतपथब्राह्मणे १.८.१.१–१० मत्स्यावतारः मोहिनी, वराहः[2], सनचतुष्टयं च प्रतिज्ञातम्।

कतिपयमन्दिरेषु दशावताराणां प्रतिष्ठापिता मूर्तयः शोभन्ते। ललितपुर-जनपदस्य देलवाडा-नामके ग्रामे दशवतारो मन्दिरो गुप्तकालीनोऽधुनापि तात्कालिकधर्मादर्शं रूपसंपदा सह प्रस्तौति। अवतारा द्विविधा भवन्ति—योनिजा अयोनिजाश्च। वामनो नरसिंहश्चायोनिजौ।

पौराणिकयुगे त्रिमूर्तेः कल्पना परमतां लेभे। तदनुसारेण प्रजापतिरेव ब्रह्मरूपेण सृष्टिं सृजति, विष्णुः (पुरुष-) रूपेण पालयति, रुद्रः (शिव-) रूपेण च संहरति।[3]

आदौ ब्रह्मणो या ब्राह्मी संस्कृतिर्जाता, तत्र नासीद् विशेषमहत्त्वं तस्य मूर्तेर्मूर्तिपूजायाश्च। ध्यान-धारणा-समाधिभिर्ध्येयस्य ब्रह्मणो मूर्तयो मन्दिराणि च विरलान्येव वर्तन्ते। तेषु प्रमुखाणि सन्ति अजयमेरुसमीपे पुष्करक्षेत्रे, ईदरराज्ये, बडौदाराज्यस्य पद्रतालुकायां साधिग्रामे च।

---

१. विष्णोरसंख्यावताराः सन्तीति पुराणमतम्। भागवते प्रोक्तम्—
अवतारा ह्यसंख्येया हरेः सत्त्वनिधेर्द्विजाः। १३.२६
ऋषयो मनवो देवा मनुपुत्रा महौजसः।
कलाः सर्वे हरेरेव सप्रजापतयस्तथा॥ १.३.२७
क्रमशस्ते सन्ति महत्तमा २४ अवतारा अधोविधाः—सनकः, सनन्दनः, सनातनः, सनत्कुमारश्च ऋषयः वराहः नारदः नर-नारायणौ, कपिलः, दत्तात्रेयो, यज्ञः, ऋषभदेवः, पृथुः, मत्स्यः, कच्छपः, धन्वन्तरिः, मोहिनी, नरसिंहः, वामनः, परशुरामः, व्यासः, रामः बलरामः, कृष्णः, बुद्धः, कल्किश्च। दक्षिणभारते भूयः पूजितो महायोगी दत्तात्रेयो भागवतादिपुराणेषु चर्चितः।

२. स (प्रजापतिः) वै वराहो रूपं कृत्वा उपन्यमज्जत्। तै० ब्रा० १.१.३.६

३. सृज्यते ब्राह्ममूर्तिस्तु रक्षते पौरुषीतनुः।
रौद्रीभावेन शमयेत्तिस्रोऽवस्थाः प्रजापतेः॥ वनप० २७२.४८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

षोडशोपचार-पूजा

कतिपयदेवानां षोडशोपचार-पूजा[1] खीष्टात् प्राक् पञ्चमशतकाब्देऽपि प्रवर्तिता दृश्यते। तस्या विस्तृतं वर्णनं विष्णुधर्मसूत्रे (१०० ई०-३०० ई०) लभ्यते। तत्रोपचाराणां प्रायः प्रत्येकं पदं वैदिकमन्त्रयुतं च पुरुष-सूक्तपाठो होमश्च पौराणिकविधीनां वैदिकानुवर्तनं विशदयतीति तत्र भारतीयधार्मिकधारायाः सुविचारितां समन्वयात्मकां पृष्ठभूमिं प्रकटयति।

महादेवशिवस्य परिचर्या विष्णुपूजासदृशी बौधायनगृह्यशेषसूत्रे २.१७ वर्णिता। शिवोऽयं वैदिकार्याणां रुद्र एव विष्णुवद् वैभव-प्रपन्नः नैकशैव-सम्प्रदायानामादर्शभूतो यज्ञ-पूजा-स्तुतिभिः परमतामधिगतो विश्वात्मक-प्रतिष्ठां भजमानो भूमानं लभते।

---

१. चतुष्षष्टि उपचारपूजा देव्याः कृते निर्दिष्टाः सन्ति। अन्यत्राष्टादशोपचारः, दशोपचाराः, पञ्चोपचाराश्चोपासकस्य विभुतानुरूपं निर्दिष्टाः। तत्र षोडशोपचाराः —

आसनं स्वागतं पाद्यमर्घ्यमाचमनीयकम् मधुपर्काचमनस्नानवसनाभरणानि च, गन्धपुष्पे धूपदीपौ नैवेद्यं वन्दनं तथा। तन्त्रसारे इयं सूची संवर्धमाना पूजाप्रकर्षं चित्रयति। तत्रावाहनं, यज्ञोपवीतं, प्रदक्षिणा, विसर्जनं स्तोत्रं, प्रणामः, ताम्बूलं च समाविष्टानि। अभावे सति महत्त्वपूर्णा दशोपचाराः पञ्चोपचारा वा विधेयाः। महाभावे सति केवलं पुष्पैः षोडशोपचारः सम्पादनीयः। एतैर्विकल्पैः षोडशोपचारस्य सार्वजनीनत्वं विधीयमानं सिध्यति। अर्घ्यमष्टवस्तूनां सम्मिश्रणेन क्रियते। तानि सन्ति—

आपः क्षीरं कुशाग्रं च दधि सर्पिः सतण्डुलम्।
यवः सिद्धार्थकश्चैव अष्टाङ्गोऽर्घः प्रकीर्तितः॥

आचमनीये जले एला-लवङ्गोशीर-कक्कोलानां मिश्रणं भवति। देवमूर्तिस्नानं क्रमशः क्षीर-दधि-घृत-मधु-खण्डैर्विधीयते। एतानि पञ्चामृतम्। पञ्चाज्जलाभिषेकः। पञ्चामृताभावे तुलसीमिश्रजलेन स्नानं भवेत्। एतज्जलावशेषः तीर्थमित्यभिधीयते यस्याचमनेन पावनता भवति। पञ्चामृतमिश्रणेन मधुपर्को भवति। विविधदेवानां कृते निर्धारितानां विविधपुष्पफलमिष्टान्नादीनां, मालाभरणादीनां च समर्पणं त्रिविधप्रकारं फलमाहरतीति धारणास्ति। विविधदेवेभ्योऽर्पितं नैवेद्यं विविधकोटिकजनेभ्यो देयमस्ति। भूतप्रेतपिशाचादीनां कृतेऽपि नैवेद्यं प्रदेयमस्ति। नैवेद्यान्ते ताम्बूलं देयं पूज्यमानदेवायेति रीतिः खीष्टाब्दप्रारम्भानन्तरमारब्धा। नवाङ्गं ताम्बूलम्—

क्रमुकादित्रयं गन्धकर्पूरमेलकां तथा।
लवङ्गं चैव कक्कोलं नारिकेलं सुपक्वलम्॥
मातुलुङ्गं तथा पक्वं ताम्बूलाङ्गान्यमूनि वै।

इति नवाङ्गं ताम्बूलं प्रधानतया दद्यात्॥ नित्याचारपद्धतिः पृ० ५१०

उपचारैः सह प्रत्येकशो मन्त्रैर्निवेदनं क्रियते स्तुतिपरकम्।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पूजा पञ्चधा प्रवर्तते—अभिगमनम्, उपादानम्, योगः, स्वाध्यायः, इज्या च।[1]

शाङ्करभक्तिः

नवमशताब्देऽद्वैतवेदान्तस्य महत्तमोन्नायकः शङ्करो भक्तिपथारूढः शिवं विष्णुं देवीं चाधिकृत्य रमणीयतमं स्तुतिसाहित्यं विरचितवान्[2]। देवी-भक्तिस्तान्त्रिकैर्विरूपाकृतासीत्। सौन्दर्यलहरीति देवीस्तुतिकाव्ये स देव्या नितरामानन्दमयं स्वरूपं प्राबोधयत्। अनया संघटनया व्यज्यते यद्भक्तेः प्रह्लादनं ज्ञानम्बुधिनिमज्जनानन्दादपि वैशिष्ट्यमभजत। अत एव जायते भक्तेर्लोकप्रियता।

भक्तेः साम्प्रदायिकाचार्याः

रामानुजं श्रीः स्वीचक्रे मध्वाचार्यं चतुर्मुखः।
श्रीविष्णुस्वामिनं रुद्रो निम्बादित्यं चतुस्सनः॥

रामानुजः

वैष्णवधर्मं नित्य-नूतन-परिष्कारैर्व्याख्याभिश्च सर्वजनग्राह्यं विधातुं दक्षिणभारते धर्मचिन्तकाः (आल्वारा आचार्याश्च) प्रयत्नपरायणा आसन्। तेषु आल्वारा विष्णोर्लोकोन्नयन-माधुर्यनिर्भरैर्गीतसमुच्चयैर्भक्तानां हृदयानि हरन्ति। आचार्याः पुनर्वैष्णवसम्मितज्ञानराशिमनुसन्धानतर्कादि-सिद्धान्त-समर्थनप्रवृत्तिभिः परमतां नयन्ति।

मध्ययुग एकादश-शताब्दे श्रीसम्प्रदाय-प्रवर्तको रामानुज आचार्यपथं समग्रभारते शाखा-प्रशाखाभिः संयोजयामास।[3] स स्वगुरोरद्वैतवेदान्तिनो यादवप्रकाशस्य शांकराद्वैतमपूर्णं मन्यमानो वैष्णवीं भक्तिधारां वगाह्य तस्या अमृतस्रोतस्विनीं सर्वजनसुलभां कर्तुं स्वीयभगीरथ-प्रयासेनोत्तर-भारतेऽपि स्वयात्राभिरुन्नयति स्म। यामुनाचार्यस्य शिष्यभूतः स श्रीरङ्गे-

---

१. अभिगमनम्—देवस्थानस्य स्वच्छीकरणम्। उपादानम्-पूजा-सामग्रीसंग्रहणम्। योगः -उपास्यदेवेन तादात्म्यस्थापनम्। स्वाध्यायः —वैदिक-पौराणिकस्तुतीनां स्तोत्राणां च पाठः, उपास्यदेवस्य सुचरित-सच्चास्त्रिययोश्चर्चा कीर्तनं च। इज्या—षोडशोपचारविधिना आसनादिनमस्कारपर्यन्तं विधानम्।

२. द्रष्टव्यं पद्मपुराणे रामस्य शत्रुघ्नं प्रतिवचः

शिवे विष्णौ न वा भेदो न च ब्रह्म-महेशयोः।
तेषां पादरजःपूतं वहाम्यघविनाशनम्॥ ४.२५०

३. रामनुजाचार्य १०१६ ख्री० उपकाञ्चीवरम् प्रादुर्बभूव।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रचुरं वैष्णवभक्ति-साहित्यं विरचितवान् ।[1] ईश्वरः (परमात्मा) चित् (आत्मा), अचित् त्रिकोटिकसत्तेति तस्य भक्तिप्रतिपादनदिशा ।

रामानुजानुसारेण विकास-क्रमेण ईश्वरः पञ्चविधो विभाव्यते—(१) परः —नारायणः परं ब्रह्म वा (२) व्यूहः—चतुर्विधः वासुदेवः, संकर्षणः, प्रद्युम्नः, अनिरुद्धश्च (३) विभवः—दशावताराः (४) अन्तर्यामी—हृद्देशे वर्त्तमानो योगिभिर्दर्शनीयः (५) मूर्तिरूपधरो मन्दिरादिषु पूज्यते । जगदिदं मिथ्या मायात्मकमिति शाङ्करमतस्य दाक्षिणात्यभक्तिमनीषिणो विरोधका एव ।

भगवतः शरणं गता भक्ता लोकपरायणा, मोक्षपरायणा वा प्रवृत्त्या भवन्ति । मोक्षकामः शरणं प्रपन्नो यो वा को वा जात्या, लिङ्गेन व्यवसायेन वा भवतु नाम, आत्मसमर्पणेन जीवन्मुक्त एव विचरति । स ज्ञानयोगे कर्मयोगे वा व्यापृतः श्रीमद्भगवद्गीतोक्तमर्चनं, तपः, तीर्थव्रतं, दानं, यज्ञं च यथेष्टमनुतिष्ठति ।

प्रपत्तिदिशोत्तरभारते रामानुजीया वानरीक्रोडधरशावमादर्शयन्ति, दक्षिणभारतीयाः पुनर्मार्जारीधृतशावं निदर्शयन्ति । प्रथम उपासकस्य द्वितीये पुनरुपास्यस्योत्तरदायित्वेन प्रपत्तिः प्रगीयते ।

मध्वः (आनन्दतीर्थः) (११९७–१२७६ ख्री०)

शङ्करस्याद्वैतं रामानुजस्य विशिष्टाद्वैतं च हानोपादानग्रस्तं मत्वा मध्वः किंचिन्नवीनमेव सत्तापञ्चकं निर्दिशति—

(१) परमात्मा	जीवश्च
(२) परमात्मा	प्रकृतिश्च[2]
(३) जीवः	प्रकृतिश्च
(४) जीवः	भिन्नो जीवश्च
(५) प्रकृतिः	भिन्ना प्रकृतिश्च

स्वमतस्य प्रचारार्थं मध्वो यात्रापथेन समग्रं भारतं बभ्राम । बदरिकाश्रमस्तेन स्पृहणीयतमो मतः । स भागवतधर्मस्य पाञ्चरात्र-स्वरूपात्मकपरिधिं विदार्य वैशेषिकदर्शनानुसारेण विष्णोर्व्यापकविभूतिं गुणान्वितां प्रादर्शयत् । तत्र परमात्मनोऽसंख्यगुणाः (कर्मणि) सन्ति—सृष्टिः, स्थितिः, संहारः, नियमनम्, ज्ञानम्, आवरणम्, बन्धनम्, मोक्षश्च ।

---

१. वेदान्तसारः, वेदार्थसंग्रहः, वेदान्तदीपश्च मौलिकग्रन्थाः । ब्रह्मसूत्रभाष्यं गीताभाष्यं च ।

२. जगदुत्पत्तौ परमात्मा नित्यकारणं प्रकृतिश्चोपादानकारणम् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

परमात्मा सम्यक् साम्यमवतारैर्गुणकर्मदृशा बिभर्ति। तस्य पत्नी तद्वत् मुक्तावस्थां भजते सर्वतन्त्रस्वतन्त्रापि परमात्मानमेवाश्रयते।

हरेः सम्यग्ज्ञानेन दर्शनेन वा मोक्षो भवति। सम्यग्ज्ञानं वा दर्शनं हरेः कथं सम्भवतीति साधनं निर्दिष्टम्। वैराग्यम्, शमः, दमः, सख्यम्, आत्मनिवेदनम् (शरणागतिः) गुरुसेवा, गुरोर्ज्ञानग्रहणम्, मननं श्रद्धा च परमात्मभक्तिः, आदरभावः, भगवदर्पणबुद्ध्या कर्मयोगः, उपासना (ज्ञानसमृद्धये, ध्यानयोगाय च[1])।

मध्वो रजतपीठनामके नगरे मध्यगेहवंशे जनिं लेभे। नगरस्यापरं नाम कल्याणपुरम् (उडुपी-जनपदे) आसीत्। स मायावादिनो पराजेतुं दूरदूरतरं भारते भ्रमणं चकार।

मध्व आत्मविषयकं साध्यं वदति—

सदागमकविज्ञेयं समतीतक्षराक्षरम्।
नारायणं सदा वन्दे निर्दोषाशेषसद्गुणम्॥

निम्बार्कः

सनक-सम्प्रदायस्य प्रवर्तको दक्षिणे जातोऽपि वृन्दावनवासी निम्बार्कः समग्रभारते शिष्य-मण्डलीपूजितो वर्तते। तैलङ्गब्राह्मणो निम्बार्को बल्लरी-जनपदे निम्बापुरे जनिं लेभे। कदेति न निश्चितम्। निम्बार्कस्य ग्रन्थद्वयं—वेदान्तपारिजातसौरभम् (ब्रह्मसूत्रभाष्यं) सिद्धान्तरत्नं च प्रसिद्धम्।

भक्तिसम्प्रदाये कृष्णेन सह राधायाः प्रमुखभूमिका प्रथमं निम्बार्केण समुदाहृता। द्वादशख्रीष्टाब्दशतके तस्य प्रादुर्भावोऽनुमीयते।

रामानन्दः

रामानन्दो मध्ययुगस्य विश्वचेता महात्मासीत्। तथाहि—Ramanand made no distinction between Brāhmaṇas and members of the degraded castes and all could even dine together provided they were the devotees of Viṣṇu and had been admitted into the fold. He permitted the use of the Vernaculars for the propogation of

---

१. मध्वाचार्यस्योपदेशात्मकं मतमधःश्लोके वर्णितम्—

श्रीमन्मध्वमते हरिः परतरः सत्यं जगत् तत्त्वतो
भेदो जीवगणा हरेरनुचरा नीचोच्चभावं गताः॥
मुक्तिर्नैजसुखानुभूतिरमला भक्तिश्च तत्साधनं
ह्यक्षादित्रितयं प्रमाणमखिलाम्नायैकवेद्यो हरिः॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

the new creed. He introduced the purer and more chaste worship of Rāma and Sṛtā in place of Kṛṣṇa and Rādhā.

Bhandarkar R. G. —Vaiṣṇavism etc. p. 94

गौतमबुद्धस्यावतारः स प्रतिभाति ।

रामानन्दः १३०० खीष्टाब्दे उपप्रयागं ब्राह्मणकुले प्रादुर्बभूव । स काश्यां ब्रह्मचर्येण वैदिकीं शिक्षाप्रणालीं समुत्तीर्य रामानुजसम्प्रदाये दीक्षितो बभूव । गुरोः प्रशिक्षणपरिधेर्बहिर्भूय सोऽसच्छूद्रानपि दीक्षितानकरोत् । तस्य प्रमुख-शिष्येषु[1] नरहर्यानन्दः, पीपा, कबीरः, धन्ना, रविदासः, पद्मावती चाग्रगण्याः । स्वकृतित्वेन रामानन्दीयं सम्प्रदायं प्रतिलोकानां प्रीतिपरं समाकर्षणं विदधुः । एतैः सह स समग्रभारतस्य प्रमुखतीर्थस्थलेषु अपरसम्प्रदायाणां तैर्थिकैः सह शास्त्रार्थ-मन्थनदिशा धर्मोन्नयनोपक्रमेषु देशव्यापि महत् साफल्यमलभत । रामानन्दस्य विशिष्टाद्वैतधर्मस्तस्य जीवनकाले महतीं लोकप्रियतामवाप । तस्य शतायुः प्राय उत्तरभारते रामोपसनाप्रचारेण शुभ्रं विभाति ।[2]

रामनाम्ना वैष्णवसम्प्रदायो नातिप्राचीन इति भण्डारकरमहोदयस्य मतं प्रमाणितं न प्रतिभाति । तस्य मतानुसारेण—

Though Rāma was regarded as an avatara, there was no cult in his honour. The cult of Rāma musl have come into existence about the eleventh century. Vaiṣṇavism, Śaivism p. 66

डा० भण्डारकर-महोदयेन रामभक्तानां सम्प्रदायविषयकसूचना न दृष्टेति प्रतिभाति । तृतीय-खीष्टाब्दस्य भासोऽभिषेकनाटके रामस्य दिव्य-प्रतिष्ठां साम्प्रदायिकसत्तां च निम्नश्लोकेन प्रपञ्चयति—

नमो भगवते त्रैलोक्य - कारणाय नारायणाय ।
ब्रह्मा ते हृदयजगत्त्रयपते रुद्राय कोपस्तव ॥
नेत्रं चन्द्रदिवाकरौ सुरपते जिह्वा च ते भारती ।
सब्रह्मेन्द्रमरुद्गणं त्रिभुवनं सृष्टं त्वयेव प्रभो ॥
सीतेयं जलसम्भवालयरता विष्णुर्भवान् गृह्यताम् ॥ ६.३०

---

१. रामानन्दस्य शिष्यमण्डले सेना नापितः, धन्ना जाटः, रविदासः चर्मकारो बभूवुः । स जैनबौद्धाद्वैतवादिभिर्दार्शनिकैः सह प्रश्नोत्तरसभीहात्मकं वाग्वैभवं प्रतेने ।

२. Rāma culture represents to a saner and purer form of Hindu religious thought than Rādhakṛṣṇaism. Bhandarkar, R. G. Vaiṣṇavim, śaivism etc. p. 124.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कबीरः

जन्मना ब्राह्मणो वा मुस्लिमो वा कबीरो रामानन्दस्य पादपद्मरजः-क्षपितकलिकल्पितवैषम्यो मध्ययुगस्य प्रगुणोद्बोधको महात्मा प्रबभूव। स काश्यां पञ्चदशख्रीष्टशताब्दे प्रादुर्बभूव।

कबीरो रामभक्तेर्मोक्षदिशि सर्वार्थसाधकं पदं प्रतिपादयति। रामस्तु ब्रह्मा एव यस्मात् गायत्रीसाह्येन सर्वजगत् प्रस्फुटितम्। गायत्री-कल्पना कबीरस्य विशिष्टाद्वैतं प्रमाणयति। स जातिव्यवस्थाया निस्सार्थकतां प्रादर्शयत्। ज्ञानाद् भक्तिः श्रेष्ठतरं साधनं मन्यते मोक्षाधिगमाय।

कबीरस्य समीक्षादृष्टिर्वैज्ञानिकी प्रत्यक्षपरायणासीत्। कर्मकाण्डादि-डम्बराश्रितभेदभावस्य वैतथ्यं तेन प्रतिपादितम्। यो रामं न जानाति सोऽज्ञ एवेति स मनुते।

गीतायाः कर्मयोगं सर्वस्वसमर्पणं हरिभक्तिं चात्मसात्कर्तुं स लोकान् शिक्षयति। स मूर्त्तिपूजाया विरोधक आसीत्। स आध्यात्मिकोपासनां, स्तुतिं, सदाचारं च परमानन्दाय विमुक्तये चावश्यकं वितनुते। कबीरस्य महान् प्रभावो भारतस्य धार्मिकप्रगतौ प्रत्यक्षमेव विभाति।

मलूकदासः, दादूः, रविदासश्चान्ये रामानन्दीयाः सन्तः प्रसिद्धाः।

तुलसीदासः

ब्राह्मणकुलावतंसो महात्मा तुलसीदासो वाँदाजनपदे उत्तरप्रदेशे पञ्चदशख्रीष्टशताब्दे जनिं लेभे। गार्हस्थ्यजीवनमचिरेण विहाय सोऽयोध्यां काशीं चित्रकूटं चाभजत्। वैष्णवभक्तिदीक्षां समवाप्य स आचार्याणां पाद-पद्मेषु समाचरन्तः स्मृति-पुराणागमे निगूढं प्रावीण्यं लेभे। अयोध्यायां १५७४ ख्रीष्टाब्दे स हिन्दी-भाषया रामायण-रचनां प्रारभत, वाराणस्यां च पूर्णतां नीतवान्। मध्ययुगे ये सन्तः प्रादुर्बभूवुस्तेषु तुलसीदासोऽनन्यतमः स्वीयप्रभविष्णु-प्रकृष्ट-काव्यरत्नैर्भक्तिमार्गं लोकप्रेष्ठं व्यधात्। तस्य वैराग्य-निष्ठानुत्तमानुशासनं विभाति[1]। विनयपत्रिका, कवितावली, दोहावलीति प्रख्यातकृतयो विलसन्ति।

सारसंग्रहेण तुलसीदासस्तस्यरामश्च भण्डारकरमहोदयेन समीक्षितः[2]—

According to Tulasīdāsa Rāma is the supreme God and that through his grace man becomes holy and blessed. He should therefore be adored where he is, sin is not and therefore, for the purification of the mind he should always be throught of and

१. स मनुते वादि बिरति विनु ब्रह्मविचारू।

२. Bhandarkar, R. G. Vaiṣṇavism Śaivism etc.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

meditated on. The ways to God usually followed are inefficacious and as such may be thrown into the fire.

वल्लभः

लक्ष्मणभट्टनामकस्य तैलङ्गब्राह्मणस्य पुत्रो वल्लभः पित्रोः तीर्थपथे १४७९ खीष्टाब्दे जातः, पितुः सकाशात् कांकरवनामके स्वग्रामे आनुवंशिक-यजुर्वेदादीनधीतवान्। अपरं स मथुरा-वृन्दावने भक्तिप्रवणश्चिरमुवास।

वल्लभो गोवर्धने श्रीनाथं तदादिष्टं पुष्टिमार्गं प्रतिष्ठापयामास। श्रीनाथस्तु गोपालकृष्णस्य पररूपम्। तमाश्रित्य वल्लभो गोपालकृष्णस्य पूर्वलीला अभिनवरसेन तत्रत्यगोपीगोपकल्पे लोकसमवाये प्रावर्तयत्। सोऽयं वल्लभो राधायाः कृष्णेन प्रेमादर्शयत्।

एक एव परमात्मा (ब्रह्म) स्वप्रीत्यर्थं विलासभूमिं जगदात्मानञ्च स्वतोऽसृजत्। स तत्र चिदानन्दयोर्निष्यन्दं प्रादुर्भावयामास। आत्मा द्विविधो भवति मुक्तः बद्धश्च। बद्ध आत्मा भगवदनुग्रहेण मुक्तिं भजते। अनुग्रहोऽयं वल्लभस्य पुष्टिः।

पुष्टिर्द्विविधा—महापुष्टिः पुष्टिश्च। महापुष्टिर्भक्तिमुन्नमयति। तया मोक्षोऽथवा ब्रह्मतादाम्यमीयते। पुष्टिमात्रेण चतुर्वर्गसम्पत्तिर्भवति।

पुष्टिभक्तिश्चतुर्विधा भवति—प्रवाह-,मर्यादा-,पुष्टि-,शुद्धपुष्टयः। एताः क्रमशः भक्तिभावनां क्रमशः प्रगुणतरं परिपारयन्ति। चतुर्थपदे तत्र क्रमशः प्रेम, भक्तिः, आसक्तिः, व्यसनं च जाग्रति। अतः परं शाश्वतहरिसेवा सम्भवति। सा चतुर्विधमुक्तेरपि परमा।[1] भक्तः कृष्णस्य व्रजलीलाः गोपगोपी-पशुपक्षिचराचररूपधरो निरुपमं रसयति। गोपालकृष्णस्यार्चना विपुलोपचारैर्विभवन्ति—(१) निशान्ते घण्टिकावदनम् (२) शंखध्वनिः (३) जागरणम् (४) प्रातराश-प्रदानम् (५) दीपाराधनम् (६) स्नानम् (७) वस्त्रधारणम् (८) गोपीवल्लभाशनम् (९) गोचारणम् (१०) मध्याह्न-भोजनम् (११) दीपाराधनम् (१२) विश्रामावरणम् (१३) समापनम् (१४) सायंभोजनम् (१५) शयनं च। एतत्सर्वं भक्तो गोपालकृष्णाया-योजयति।

---

१. भण्डारकरो व्यसनं लक्षयते—By the haunting passion about Hari he is seen everywhere, and therefore everything becomes an object of love, and the devotee identifies himself with everything. Then the inner and outer world is, for the devotee full of Purushottama or the highest soul. Bhandarakar R. G. : Vaiṣṇavism, Śaivism etc. p. 113

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पुष्टिमार्गानुयायिनो गुर्जरप्रदेशे, राजस्थाने, मथुराया उत्तरभूभागे च प्रायो वैश्येषु प्रभवन्ति। स्वीयं सर्वस्वं गुरवे समर्पितमिति तेषां प्रथमानुयोगः।

विष्णुर्लोकादपि उपरि वर्तते गोलोको यत्र भक्तो बालकृष्णस्य गोकुल-ग्रामकृतचराचरगोप-गोपी-लीलासु भागग्राही भूत्वा प्रमोदमेति। भूलोकादुपरिगतः गोकुलं हरिलोकः।

चैतन्यः

वल्लभाचार्यस्य समकालीनश्चैतन्यो महाप्रभुराधुनिकबाङ्गलादेशस्य सिलहटजनपदे निवासिनः १९८५ ख्रीष्टाब्दे जगन्नाथमिश्रनामकस्य ब्राह्मणस्य पुत्रो नवद्वीप[1] (नदिया) नगरे जातो मातुः शचीदेव्याः। चैतन्यस्य नाम पित्रा दत्तं विश्वंभर आसीत्। स तु गौराङ्गो वा गौरचन्द्रो वा, कृष्णचन्द्रो वा स्वीयगौरवर्ण-विशेषेण, कृष्णगुणवर्तनेन चाभिहितः।

यौवनप्रवेशे स लक्ष्मीदेवीं परिणीय गार्हस्थ्यं प्रपेदे, अध्यापकश्च बभूव। धनार्जनाय स पूर्वबङ्गप्रदेश इतस्ततः परिभ्रम्य गायको बभूव। अत्रान्तरे तस्य पत्नी दिवंगता। आशु पुनर्व्यूढः स लोकधर्मनियुक्तोऽभवत्।

चैतन्यः कबीरवद् वैदिक-धार्मिक–कर्मकाण्डमाडम्बरं च विनिन्दितवान् वर्णा-व्यवस्थां च पराकृतवान्।[2] मानवमात्रं समानमिति तस्य सम्मतम्। यः कोऽपि भगवत्सामीप्ययोग्यः हरिप्रीत्यर्पितः स तस्मै नृत्य-गीत-कीर्तनानुराग-प्रवृत्तिभिर्भगवदनुग्रहं लभते। 'नाम्नैव मोक्षः' इति महदाकर्षणमासीत्तस्याभिनवयोजनासु।

वैष्णवभक्तिपथे चैतन्यस्य नृत्यगीतादीनां स्वभावतो लोकमानसहारित्वादचिरमेवनुयायिनां संख्या समवर्धत। सर्वे लोका स्त्रियः पुरुषो वा हिन्दवोऽहिन्दवो वा भगवतः सान्निध्यं लब्धुं चैतन्यस्य नेतृत्वं भूरिशोऽगृह्णन्। स लोकानां प्रत्यक्षमेव समाधितो भगवत्सान्निध्यमवाप्यानवाप्तमेवाप्नोतीति लोकमानसे धारणां प्रेष्ठं द्रढयति स्म।

१५१० ख्रीष्टाब्दे स संन्यासी बभूव। तस्य दीक्षागुरुः केशव-भारती प्रसिद्ध एव। तदनन्तरं पुरीं गत्वा जगन्नाथदर्शनेन स्वकार्यसरणिमनुसन्धाय समग्रे भारते षड्वर्षाणि यावद् व्याख्यानेन चरित्र-प्रकर्षेण च भागवतपथं प्रचारयामास। स शङ्करस्याद्वैतवेदान्तं तस्य निःस्सारत्वं च प्रतिपादयन् काश्यां प्रकाशानन्दनामकमद्वैतवादिनं पराजयत्। पुरीं पुनः परावर्तितः स

१. पुत्रजन्मनः पूर्वं जगन्नाथमिश्रः सिलहटं परित्यज्य बङ्गदेशे नवद्वीपमध्यवसत्।

२. तथापि चैतन्यानुयायिनोऽविवहिता भवेयुरिति नियमः। स्वयं चतन्यो संन्यासी भूत्वा पुरीमष्टादशसमा अधिवसतिस्म।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तत्र यावज्जीवमुवास । चैतन्यानुसारेण कृष्णस्तु परब्रह्म । स तस्यानन्यरूपराशिं प्रथमतया स्वव्याख्यानेन लोकदृष्टिविषयीचकार । तस्य स्वरूपमेव मायाशक्तिलोकविभवं रुचिरमाविर्भावयति । कृष्ण एव सत्त्वरजस्तमसां न्यूनातिशयभावेन शिव-ब्रह्म-विष्णुरूपेण प्रतीयते ।

कृष्णलीला लोकहिताय शाश्वती प्रवर्तते यथा सूर्यो नित्यमेव विश्वं प्रकाशयति । तस्या मूलस्थितिर्देवलोकोपरि गोलोके भवति । सा लीला इह भौमलोकेऽपि यथेच्छं भगवता प्रचार्यते यथा गोकुले । चैतन्यमतेन कृष्णं प्रति प्रेमा एव रमणीयतमा सर्वगुणराशिः साकारभूता । राधा कृष्णस्य प्रेष्ठा । राधा भक्तानामपि हृदयेश्वरी ।

कृष्णस्तु आश्रयो जीव आश्रितः । ईदृशे वैभिन्न्ये सत्यपि द्वयोरैक्यमेव वास्तविकम् । प्रेम्णा निर्भरो जीवः कृष्णो भवति, तस्मात् सर्वथा भिन्नः । कृष्णस्तु मायापतिः । सा माया जीवमीशते । यदा जीवो मायापाशाद् विनिर्मुक्तो भवति स आत्मदर्शीभूय परमात्मदर्शी भवति ।

नामदेवः

नामदेवो महाराष्ट्रे उप पण्ढरपुरं १२७० खीष्टाब्दे तन्तुवायकुले जनिं लेभे ।[1] पण्ढरपुरं विष्णुभक्तानां प्रेष्ठक्षेत्रं नामदेवस्य वैष्णव-कीर्तिकलापेन सविशेषं सार्वजनीनतां लेभे । नामदेवस्य शिक्षा चरित्रनिर्माण-दृष्ट्या प्रशस्यास्ति । स भगवच्छरणागतिं प्रतिपादयति । पश्चात्तापेन पापाद्विमुक्तिर्जायते न तीर्थ-व्रतोपवास-योग-यज्ञ-प्रायश्चित्तादिभिरात्मशुद्धिः सम्भवति । स विश्वस्मै नामदानेन नामदेवः । हरेर्नामानन्तपुण्यप्रदम् । तेन पाण्डुरङ्गस्य दर्शनं जायते । निरन्तरं नित्यं हरेर्नामस्मरणमेव सुगृहीतोपायो मोक्षार्थः । स्वभावतो हरिभक्तः सदाचार-निष्ठः, निरभिमानः सन् सर्वत्र हरिमेव प्रपश्यति । नामदेवस्य कतिपयशिक्षापदानि गुरुग्रन्थसाहेब इति प्रख्याते शिक्खग्रन्थेऽपि संकलितानि सन्ति । सर्वजनबोधसौकर्याय नामदेवो सरल-हिन्दीभाषया-धुनिकमराठी-भाषया च पदानि विरचितवान् ।

तुकारामः

महाराष्ट्रे पुण्यपत्तनसविधे देहू - ग्रामे मराठा-परिवारे जातस्य सन्त-तुकारामस्य षोडशखीष्टशतकस्य प्रथमार्धं (१६०७-१६४९ ई०) जीवनावधिर्निगद्यते । स वैष्णवकुलोद्भव आनुवंशिकवैष्णव - संस्कृतिसम्पन्नो गार्हस्थ्येऽकृतमतिः क्वचिद् वाणिज्य-व्यापारे विफल एवौदार्येण चार्किंचनी-

१. भण्डारकरमहोदयोऽनुसन्धानेन नामदेवं सम्भवतश्चतुर्दश-खीष्टाब्दे तस्य पश्चाद्वा निर्धारयति ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भूतोऽकाले स्वपत्नीं बुभुक्षया मृतं ददर्श। तस्य भ्रातापि तस्मात्पृथग्भूतः। अस्यां स्थितौ तुकारामो भगवच्छरणमेव शान्तये परमं पदं मत्वा समाश्रितो दिवा निकटस्थपर्वतप्रस्थे रात्रिं च देहूग्रामस्य बिठोबा मन्दिरे यापयामास।

तुकारामौ पथकृतां सतां महात्मनां च वाणीं स्वाध्यायेन चिन्तनेन च हृद्देशे सन्निधीकृत्य स्वीयैः 'अभङ्ग-पदैः' जनताया मनसि वैष्णवभावना-भरणाय नित्यमेव स्वगानेन कीर्तनेनोपायनी कर्तुमारेभे। तुकारामस्य संगीतसुधा - धारासु निमज्जितुं सहस्रशो भागवतरसिका नित्यं सङ्गताः। तस्याभंगललिता व्याख्यान-सरस्वती सम्यग्भगवती सती भूयिष्ठं जन-मनोहारिणी सम्प्रबभूव। तद्यथा स्यात्तथा शिवराजः स्वय मेव लोहग्राम-मागत्य तस्य प्रवचनमभङ्ग-संगीतं च श्रुतवान्।

तुकारामो गौतमबुद्धवद्यज्ञ-तीर्थव्रतोपवास-प्रायश्चित्त-तपआदीनां सातिशयं महत्त्वमनीचकार। तस्य मान्यतासीत्—सदाचारेण श्रद्धया भक्त्या च परमगतिः सम्भवति। अभङ्गसंख्या ४७३३,८१०। हवनेनान्नं दह्यते न तु कामः क्रोधो वा। अभङ्ग सं० ९०.१-२
एकः पाण्डुरङ्गो हरिरेव—

त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव।
त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देव देव॥

केवलं स एव सर्वतो रक्षकः, सत्पथदर्शकः। अभङ्ग १८७०

सानुतापं तुकारामो हरेरात्मनीनं क्षणिकमपि पार्थक्यं परिचाययति—नारायणान्ममेहान्तरे कामक्रोधयोर्महापर्वताः सन्ति। अहं तानारोढुमसमर्थः। दरी तत्र नास्त्येव शत्रुवद् दुरारोहास्ते। कथमहं नारायणं पाण्डुरङ्गं मिलिष्ये। अभङ्गः ४४२०। कीदृशो मनुष्यो जीवनोद्देश्यं लभेत ? यः क्षमावान्, निर्भीकः, शक्तिमान्, न निन्दति, न प्रशंसति, लौकिकमहिमानं लोकोत्तरत्वं न गणयति, अन्तर्बहिः स्वच्छो गङ्गासदृशः, सुहार्दः। तस्य पादे मम शिरो नतम्। अभङ्गः ५३८३

तुकारामो पुरामनीषिणां भारतीयं सांस्कृतिकपथं समुद्धृतवानिति स उद्घोषयति स्वजीवन-प्रसङ्गेन—

We lived in the Vaikuṇṭha and have come for this very reason, viz, for bringing into practice truly what the Ṛṣis taught. The world is overgrown with weeds; we will sweep clean the paths trodden by the right course and aceept what has remained. The old truths have disappeared. Mere verbal knowledge has

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

brought about destruction The mind (of man) is eager for worldly enjoyments and the way to God has been wholly obliterated. We will beat the dream of Bhakti.

भक्तेर्दार्शनिकभूमिका

भक्तेः सर्वसम्मता दार्शनिकभूमिका सुप्रतिष्ठिता वर्तते । तद्यथा—

(१) जगत् सत्यम् । अस्योपादानमपि सत्यमेव ।
(२) जीवः स्वभावतो ज्ञानरूपो नित्योऽणुर्ज्ञाता, कर्ता, भोक्ता, ब्रह्मवशो बहुत्वलक्षितः ।
(३) परमार्थतो ब्रह्म सविशेषं निर्दोषं, सर्वकल्याणगुणसम्पन्नं वर्तते । स एव ब्रह्म जगतः कर्ता, सर्वव्यापकः, सर्वान्तर्यामी, मोक्षप्रदः, उपास्यश्चास्ति ।
(४) मोक्षस्तु ब्रह्मलोके ब्रह्मणो नित्यकैङ्कर्यम् ।
(५) भक्तिरेव मोक्षोपायोऽनुत्तमः ।
(६) कर्म, ज्ञानं योगश्च भक्तेरङ्गानि । त्रयी समुच्चयेन प्रभविष्णुतमा ।
(७) उपाधिस्तत्र नास्त्येव ।
(८) माया तु ब्रह्मणः परमैश्वर्यस्य शक्तिः ।
(९) परिणमति न विवर्तते किञ्चिदिति परिणामरहस्यम् ।
(१०) भक्त्युपास्या विष्णु-शिव-कृष्णादयो ब्रह्मैव । तस्मिन्नाश्रयो जीवस्य यथास्थात्तथा प्रयतनीयम् ।

समष्टिपरायणता

अनन्यतमैव समष्टिपरायणता वैष्णवधर्मस्य । वैष्णवधर्मोऽयं भागवतधर्मः । भगवानेक एव विश्वेषां कृते पितृवदाचरति । तमाश्रित्य परमतां गतो भागवतधर्मो न केवलं विश्वस्य मानवसमष्टिमपितु चराचरमपि सौहार्देन, सौमनस्येन संज्ञानेन च प्रवर्तयितुमुपदिशति ।

भक्तिपथ-विशेषाः

वैदिकधर्मानुवर्तिनो भक्तिपथस्य कतिपयविशेषा अधोविधं प्रतीयन्ते—

वैदिकधर्मः	भक्तिपथः
१. यजमानस्योपास्यदेवा बहवो भवेयुः । कार्यविशेषं परिलक्ष्य तद्योग्यो देव आराध्यते यज्यते स्तूयते वा ।	१. एक एव देवः, निरन्तरमात्मसन्निधिगतः, सान्निध्यरसस्यानन्त्यं, सातत्यं चोपगन्तुं पञ्चधोपसेव्यते,

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

२. वैदिकधर्मानुयायिनो धर्मायोगेन भूयिष्ठं कर्मफलार्थिनो बभूवुः ।	२. भक्तो निष्कामकर्मयोगमाश्रित्य सर्वं कर्म भगवतेऽर्पितवान् । सकाम-भक्तिमन्तो निकृष्टइति गीतामतम् ।
३. वैदिकधर्मानुयायिनः यज्ञमण्डपे कर्मकाण्ड-सम्भारान् समाहृत्य प्रायः पुरोहितानुयोगेनायजन्त ।	३. भक्तपथानुयायिनः प्रायो देवायतने भगवतः साक्षात् सान्निध्ये कर्म-काण्डादिकमनाश्रित्य तीर्थ - व्रत-मूर्त्यनुबद्ध-पूजादिकं सम्पादयन्ति । मूलतः पत्रं पुष्पं फलं तोयमेव समर्पण-सामग्री ।
४. वैदिकधर्मो वर्णाश्रम-धर्मयुतो विकसितः ।	४. वर्णाश्रम - विषयकाणि विधानानि उपेक्षितानि सन्ति ।

कालान्तरेण सा भक्तिः सामष्टयेन भारतीयधार्मिकसाधनावृक्षस्यानुत्तमं फलमिति साधु प्रतिज्ञातम् । महात्मा तुलसीदासोऽन्वर्थयति—

तीर्थाटन -साधनसमुदाई । योग -विराग -ग्यान- निपुनाई ॥
नाना कर्म धर्म व्रत दाना । संजम दम जप तप मख नाना ॥
भूतदया द्विज गुरु सेवकाई । विद्या विनय विवेक बड़ाई ॥
जहँ लग साधन वेद बखानी । सब कर फल हरि भगति भवानी ॥
मानस० उत्तर०

प्रागेव प्रबोधितं शंकराचार्येण विवेकचूडामणौ—

मोक्षकारण-सामग्र्यं भक्तिरेव गरीयसी । ३२

भक्तिपथस्य भारतीय-सामाजिकजीवने महनीयतममवदानं वर्तते—
नास्ति तेषु जातिविद्या-रूपकुलधनक्रियादि भेदः । नारदभक्तिसूत्रम् ७२

भागवत-पुराणे हिंसात्मकयज्ञ-प्रक्रियाया भृशो विरोधो वर्तते । तथाहि—
येषां पशूनां वधेन यज्ञः प्रपद्यते त एवाकाशे स्थिता यजमानं प्रतिकर्तुं प्रतीक्षन्ते । ४.२५.७-९

निर्धनानां, शूद्रचाण्डालानामपि भक्त्या, पत्र-पुष्पसमर्पणेनापि हरिः प्रीतिभाग्भवतीति भागवतमतम् । अन्यच्च सरलासीद् भक्तिप्रपत्तिः । ४.३.१.१०–२२ । हरिनाम-संकीर्तनेन भगवतात्मसात्क्रियते भक्तः । भाग० ६.२.२–१२ । प्रायश्चित्तादयोऽन्ये शोधोपायास्तावन्मात्रं समर्था न भवन्ति यावद् भगवद्गुणगायनम् । भाग० ६.२.४६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रपत्तिः

भक्तिसमा प्रपत्तिः प्रद्योतते[1] गीतायामधोविधं परिलक्षिता—

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥
सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥ १८.६५,६६
ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् । ४.११
ज्ञानवान् मां प्रपद्यते । ७.१९
तमेव चाद्यं पुरुषं प्रपद्ये । १५.४

भक्तः समुद्योगेन प्रपन्नो भवति ।

प्रपत्तेर्वैशिष्ट्यं परवर्तियुगेऽधोविधं व्याख्यातम्—आनुकूल्यस्य संकल्पः, प्रातिकूल्यस्य वर्जनम्, रक्षिष्यतो विश्वासो, गोप्तृत्ववरणं, आत्मनिक्षेपः कार्पण्यं च ।[2]

शैवधर्मः

भिन्न एव शैवो मार्गः सिन्धु-सभ्यता-युगेऽपि सुप्रतिष्ठितो बभूव तस्य प्रवर्तकः शिवो वैदिकरुद्रा[3]नुप्रतिम एव तस्य नैकगुणविशेषान् स्वीकुर्वन्नपि श्रेष्ठवैदिकदेवेभ्यश्चारित्रिकविशेषानात्मसात्कृत्य स्वगौरवमुदात्ततमं प्रकरोति ।[1]

---

१. वैदिकसाहित्ये भक्ति-स्थाने प्रपत्तिर्बहुधा दृश्यते । प्रपन्नस्तु ब्रह्मसंस्थ इव विभाति । तथाहि—इन्द्रं शरणं प्रपन्नोऽभुवम् । छान्दोग्ये २.२२.३ । प्रजापतिं शरणं प्रपन्नोऽभूवं···मृत्युं शरणं प्रपन्नोऽभुवम् । छा० २.२२.४ प्रमापद्यस्व । तै० उ० १.४.३ । मुमुक्षुर्वै शरणमहं प्रपद्ये । श्वे० उ० ६.१८

२. Bhakti has as synonyms the word ध्यान, उपासना and is subsidiary to प्रपत्ति ।

३. भण्डारकरमहोदयः सप्रमाणं निगदति—The Rudras are called Gaṇas or tribles, and Gaṇapatis or leaders of tribes, workmen, potters, cart-makers, carpenters and Niṣādas or men of the forest tribes. ... ... thus they are brought into close connection with Rudra, prohably they were his worshippers with their own peculiar gods were identified with the Aryan Rudra. Vaiṣṇavism, Śaivism etc. p. 147

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथर्ववेदे पुराभयङ्करोऽपि ऋग्वैदिकरुद्रः शिवत्वं स्वस्मिन् वर्धयन् दृश्यते। भण्डारकरो वर्णयति—

Rudra is the lord of all creatures. He controls the stars and the moon. He reigns in the sky and middle regions. He is in fire, and water, in plants and herbs and in all beings and he is the protector of Vrātyas in all quarters; and he is pre-eminent by the ruler (Īśāna). Bhandarkar : Vaiṣṇavism Śaivism p. 149.

श्वेताश्वतरोपनिषदि शिव औपनिषदानां ब्रह्मरूपतां सम्यग्दधौ। अपरं च भक्तिमार्गस्य प्राञ्जलप्रदीप इव विभाति श्वेताश्वतरस्य व्याख्यानम्—

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः॥ ६.२३

सोऽयं महान् घोषो भक्तिप्रपत्तेः।

महाभारतस्य किरातार्जुनीय-प्रकरणेन शिवस्य भक्तिगम्यस्वरूपं लोकप्रतिष्ठं भूयिष्ठं भवति। प्रकरणेऽस्मिन् शिव आद्यः, शङ्करः, सर्वभूतनमस्कृतः, महादेवः परपुरञ्जयः गिरिशः, शूलपाणिः, कपर्दी, सर्वभूपेशः, भगनेत्रनिपातनः, देवेशः, पिनाकी, त्र्यम्बकः, हरिरित्यादि संज्ञितः। अर्जुनस्य तपसा युद्धकौशलेन च प्रीतस्तस्मै स गाण्डीवं, पाशुपतास्त्रं, प्रशिक्षणं च ददाति।[1] द्रोणपर्वणि अर्जुनः शिवात् पाशुपतास्त्रमवाप्नोति।

अपरं च शिवस्य विशेषान् संग्रहेण विशदयति भण्डारकरः —

He is a powerful, wrathful and impetuous god, but generous and bountiful and spares nothing when he is propitiated to fiulfil desires of a devotee. He lived on the Himalaya, with his wife Umā, Pārvatī or Durgā (Kāli, Karāli etc.) attended by his Gaṇas His vehicle is an ox. Adapted. Vaiṣṇavism, Śaivism etc. P. 162-3

वैदिकसंस्कृतौ रुद्रस्य प्रतिष्ठासीत्। तत्र प्रायः समगुणस्य शिवस्य नाम विरलमेव श्रूयते। पूर्वोक्ताः शिवस्य रुद्रस्य च य उच्चावचगुणाः पूर्ववर्णितास्ते आर्याणमार्येतराणां च विशां अन्येष्वपि बहुषु देवेषु प्रगुणिताः परम्परया सर्वैः सम्मानिता बभूवुः[2]। देशकालान्तरालस्य विस्तारे क्षीणे सति

---

१. आरण्यकपर्वणि ४१–४२ अध्यायतः।

२. वेदे वर्णिताः शिश्नदेवाः, व्रात्याः, निषादाः, राक्षसा इत्यादयः आर्येतरा शिवानुषक्ताः प्रतिभान्ति।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विविधसांस्कृतिक - समुदायानां परस्परसान्निध्ये प्रकल्पिते तेषां स्थानीय-पूर्वोक्ता रुद्रशिवार्येतरदेवा मिश्रीभूताः । तेषां स्थाने एकः शिव एव स्वीयनैकपर्यायनामभिरपि सर्वसम्मतः सुप्रथितो राजते ।

शिवार्चनविधिः

आदौ महाभारते शिवार्चनविधिः किरातार्जुनीयप्रकरणे दृश्यत अर्जुन-दर्शनान्तरं शिवप्रसादनाय । प्रथमं तावज्जानुभ्थां महीं गत्वा शिरसा प्रणमति तदनन्तरं स्वीयां शरणागतिं निवेदयति स्तोत्रं च पठति । शिवः प्रहस्य प्रसादं प्रकटयति । सोऽर्जुनं भूयो प्रशंसति गाण्डीवदानेन तस्य कामांश्च पूरयति ।[1]

सौप्तिकपर्वणि शिवायाश्वत्थामात्मानमुपहारं चकारेति भयङ्करमेव प्रकरणम् । तेन प्रसादितः शिवस्तस्मै लोकविनाशाय खड्गं प्रददौ इति महादेवानामपि क्वचिदविमृश्यकारि-प्रवृत्तिरवद्या प्रतिभाति ।

पाशुपतधर्मः

परवर्तियुगे शैवधर्मस्योन्नायको लकुलीशो बभूव । भक्त्या प्रीतः शिवो महाभारतानुसारेण वरं यच्छति । (आर० १९२.२२) । भक्त्या शिवेऽभ्यासः सम्पाद्यते । (आर० १९२.२४) । पुराणेषु व्यासस्य शिवभक्तिः प्रथिता । तदनुसारेण—

वासं च तत्र नियतो वाराणस्यां चकार सः ।
शान्तो दान्तस्त्रिषवणं स्नात्वाभ्यर्च्य पिनाकिनम् ।।
भैक्षाहारो विशुद्धात्मा ब्रह्मचर्यपरायणः ।। पूर्वा ३५.२९

शैवधर्मो नैकविधं सनातनधर्मं विरुणद्धि । तत्र पाशुपतसम्प्रदायो वर्णाश्रमधर्मं नानुमनुते । (शान्ति० २८४.१२१–१२४) । पौराणिकयुगे शैवसम्प्रदायः कापालाः, लकुलीशाः, वामाः, भैरवाः पाशुपताश्च स्वीय-नैकविधार्चाभिर्नाममात्रमेव शिवासूत्रिताः प्रतिभान्ति ।[2] वस्तुतो भारती-योच्चाचचधर्मरीतीरात्मसात्कुर्वाणाः स्वस्वास्तित्वं स्वीयवैशिष्ट्येन लोका अशिवा आदि क्वचिन्नाममात्रं शिवानुगताः सन्ति । तथापि समग्रभारत-स्यैक्यानुसन्धाने शैवतत्त्वस्य सामग्र्यं महत्त्वं भजते । उद्देश्यमिदमन्यथापि प्रपन्नम् । तथा हि बाणासुरः शिवलिङ्गानां चतुर्दशकोटीः प्राचीनभारतस्य ग्रामे ग्रामे शैले शैले कान्तारे कान्तारे च स्थापयामास ।[3]

---

१. आरण्यकपर्वणि ४० अध्यायतः ।

२. कूर्मपुराणपूर्वार्धे षोडशाध्यायतः ।

३. तानि बाणलिङ्गानीति कथ्यते ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

लिङ्गपूजा

वैदिकसंहितासु भक्तेः समुदितं स्वरूपमङ्गभावेन निभाल्यते। तथाहि —

१—अर्चा शक्राय शाकिने—इति अर्चनम् ऋग्वेदे १.५४.२

२—वन्दामहें त्वा। ऋ० ३.८.९ इति वन्दनम्

३—स्वाध्यो मनसा देवयन्तः। ३.८.४ इति ध्यानम्

४—इन्द्रं सख्याय हवामहे। ऋ० १.१०.१.३ इति सख्यम्

५—भर्गो देवस्य धीमहि। ऋ० ३.६२.१० इति ध्यानम्

६—को नानाम वचसा सोम्याय इति प्रणतिः ४ २५.२

७—मनायुर्वा भवति वस्त उस्राः। इति दास्यम् ४.२५.२

८—क इन्द्रस्य युज्यं कः सखित्वम्। ४.२५.२

को मात्रं वष्टि कवये क ऊति। वन्दनम्। ऋ० ४.२५.२

श्रीमद्भगवद्गीतायां कृष्णो भक्तेः सरलविधिं कथयति। तथाहि—

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः॥ ९.२६

ईदृशो भक्तिविधिरकिंचनानामपि ग्राह्यो लोकव्यवहारयोग्यो बभूव।

आकाशं लिङ्गमित्याहुः पृथिवी तस्य पीठिका।
आलयः सर्वदेवानां लयनाल्लिङ्गमुच्यते स्क'न्दपुराणे॥[1]

प्रतिष्ठादृष्टया शिवस्य पूजास्थानानि द्वादश ज्योतिर्लिङ्गानीति विश्रुतानि सन्ति।[2]

पूजानिमित्तं नैकोपादानैर्निर्मितं शिवलिङ्गं प्ररोचितम्—हीरक-मुक्ता-धातु-प्रस्तर-मृत्तिका-दारूणां मूर्तयो भवन्तु नाम। कादम्बर्यां बाणो वालुका-लिङ्गं वर्णयति। काश्मीरप्रदेशेऽमरनाथस्य शिवपरिवारो लिङ्ग-पार्वती-गणेशाददयः स्वयंजाता हिमस्तुति-संहिता। गणेशस्तु गोमयकृतः सुविदित एव। शिवपूजाविधौ बहुविधोपचाराः सुसंगताः प्रतिभान्ति। शिवोपासकानां बहुविध-मालाभस्मकपालादिधारणं बहुविधसिद्धिं जनयतीति धारणास्ति। तथाहि

---

१. ज्योतिर्लिङ्गानि मान्धातृ - क्षेत्र ओङ्कारेश्वरस्य, उज्जयिन्यां महाकालस्य, उपनासिकं त्र्यम्बकस्य, एलोरायां धृष्णेश्वरस्य, अहमदनगरात् पूर्वदिशि नागनाथेश्वरस्य, सह्याद्रौ भीमानद्या उद्गमस्थले भीमाशङ्करस्य, गढवालप्रदेशे केदारनाथस्य, काश्यां विश्वनाथस्य, सौराष्ट्रे सोमनाथस्य, विहारस्योत्तर-पूर्व-संभागे वैद्यनाथस्य, श्रीशैले मल्लिकार्जुनस्य भारतस्य दक्षिणधुरि समुद्रद्वीपे रामेश्वरस्य च विलसन्ति। भारतस्य विविधप्रदेशेषु शिवतत्त्वेन सांस्कृतिकमै-क्याभिमानिलिङ्गानि सन्धारयन्ति।

२. द्रष्टव्यं शब्दकल्पद्रुमे लिङ्गम्। पृ० २२१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विविधसांस्कृतिक - समुदायानां परस्परसान्निध्ये प्रकल्पिते तेषां स्थानीय-पूर्वोक्ता रुद्रशिवार्येतरदेवा मिश्रीभूताः । तेषां स्थाने एकः शिव एव स्वीयनैकपर्यायनामभिरपि सर्वसम्मतः सुप्रथितो राजते ।

शिवार्चनविधिः

आदौ महाभारते शिवार्चनविधिः किरातार्जुनीयप्रकरणे दृश्यत अर्जुन-दर्शनान्तरं शिवप्रसादनाय । प्रथमं तावज्जानुभ्थां महीं गत्वा शिरसा प्रणमति तदनन्तरं स्वीयां शरणागतिं निवेदयति स्तोत्रं च पठति । शिवः प्रहस्य प्रसादं प्रकटयति । सोऽर्जुनं भूयो प्रशंसति गाण्डीवदानेन तस्य कामांश्च पूरयति ।[1]

सौप्तिकपर्वणि शिवायाश्वत्थामात्मानमुपहारं चकारेति भयङ्करमेव प्रकरणम् । तेन प्रसादितः शिवस्तस्मै लोकविनाशाय खड्गं प्रददौ इति महादेवानामपि क्वचिदविमृश्यकारि-प्रवृत्तिरवद्या प्रतिभाति ।

पाशुप्तधर्मः

परवर्तियुगे शैवधर्मस्योन्नायको लकुलीशो बभूव । भक्त्या प्रीतः शिवो महाभारतानुसारेण वरं यच्छति । (आर० १९२.२२) । भक्त्या शिवेऽभ्यासः सम्पाद्यते । (आर० १९२.२४) । पुराणेषु व्यासस्य शिवभक्तिः प्रथिता । तदनुसारेण—

वासं च तत्र नियतो वाराणस्यां चकार सः ।
शान्तो दान्तस्त्रिषवणं स्नात्वाभ्यर्च्य पिनाकिनम् ।।
भैक्षाहारो विशुद्धात्मा ब्रह्मचर्यपरायणः ।। पूर्वा ३५.२९

शैवधर्मो नैकविधं सनातनधर्मं विरुणद्धि । तत्र पाशुपतसम्प्रदायो वर्णाश्रमधर्मं नानुमनुते । (शान्ति० २८४.१२१–१२४) । पौराणिकयुगे शैवसम्प्रदायः कापालाः, लकुलीशाः, वामाः, भैरवाः पाशुपताश्च स्वीय-नैकविधार्चाभिर्नाममात्रमेव शिवासूत्रिताः प्रतिभान्ति ।[2] वस्तुतो भारती-योच्चाचचधर्मरीतीरात्मसात्कुर्वाणाः स्वस्वास्तित्वं स्वीयवैशिष्ट्येन लोका अशिवा आदि क्वचिन्नाममात्रं शिवानुगताः सन्ति । तथापि समग्रभारत-स्यैक्यानुसन्धाने शैवतत्त्वस्य सामग्र्यं महत्त्वं भजते । उद्देश्यमिदमन्यथापि प्रपन्नम् । तथा हि बाणासुरः शिवलिङ्गानां चतुर्दशकोटीः प्राचीनभारतस्य ग्रामे ग्रामे शैले शैले कान्तारे कान्तारे च स्थापयामास ।[3]

---

१. आरण्यकपर्वणि ४० अध्यायतः ।

२. कूर्मपुराणपूर्वार्धे षोडशाध्यायतः ।

३. तानि बाणलिङ्गानीति कथ्यते ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

लिङ्गपूजा

वैदिकसंहितासु भक्तेः समुदितं स्वरूपमङ्गभावेन निभाल्यते। तथाहि —

१—अर्चा शक्राय शाकिने—इति अर्चनम् ऋग्वेदे १.५४.२

२—वन्दामहें त्वा। ऋ० ३.८.९ इति वन्दनम्

३—स्वाध्यो मनसा देवयन्तः। ३.८.४ इति ध्यानम्

४—इन्द्रं सख्याय हवामहे। ऋ० १.१०.१.३ इति सख्यम्

५—भर्गो देवस्य धीमहि। ऋ० ३.६२.१० इति ध्यानम्

६—को नानाम वचसा सोम्याय इति प्रणतिः ४ २५.२

७—मनायुर्वा भवति वस्त उस्राः। इति दास्यम् ४.२५.२

८—क इन्द्रस्य युज्यं कः सखित्वम्। ४.२५.२

को मात्रं वष्टि कवये क ऊति। वन्दनम्। ऋ० ४.२५.२

श्रीमद्भगवद्गीतायां कृष्णो भक्तेः सरलविधिं कथयति। तथाहि—

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः॥ ९.२६

ईदृशो भक्तिविधिरकिंचनानामपि ग्राह्यो लोकव्यवहारयोग्यो बभूव।

आकाशं लिङ्गमित्याहुः पृथिवी तस्य पीठिका।
आलयः सर्वदेवानां लयनाल्लिङ्गमुच्यते स्कन्दपुराणे॥[1]

प्रतिष्ठादृष्टचा शिवस्य पूजास्थानानि द्वादश ज्योतिर्लिङ्गानीति विश्रुतानि सन्ति।[2]

पूजानिमित्तं नैकोपादानैर्निर्मितं शिवलिङ्गं प्ररोचितम्—हीरक-मुक्ता-धातु-प्रस्तर-मृत्तिका-दारूणां मूर्तयो भवन्तु नाम। कादम्बर्यां बाणो वालुका-लिङ्गं वर्णयति। काश्मीरप्रदेशेऽमरनाथस्य शिवपरिवारो लिङ्ग-पार्वती-गणेशाददयः स्वयंजाता हिमस्तुति-संहिता। गणेशस्तु गोमयकृतः सुविदित एव। शिवपूजाविधौ बहुविधोपचाराः सुसंगताः प्रतिभान्ति। शिवोपासकानां बहुविध-मालाभस्मकपालादिधारणं बहुविधसिद्धिं जनयतीति धारणास्ति। तथाहि

---

१. ज्योतिर्लिङ्गानि मान्धातृ - क्षेत्र ओङ्कारेश्वरस्य, उज्जयिन्यां महाकालस्य, उपनासिकं त्र्यम्बकस्य, एलोरायां धृष्णेश्वरस्य, अहमदनगरात् पूर्वदिशि नागनाथेश्वरस्य, सह्याद्रौ भीमानद्या उद्गमस्थले भीमाशङ्करस्य, गढवालप्रदेशे केदारनाथस्य, काश्यां विश्वनाथस्य, सौराष्ट्रे सोमनाथस्य, विहारस्योत्तर-पूर्व-संभागे वैद्यनाथस्य, श्रीशैले मल्लिकार्जुनस्य भारतस्य दक्षिणधुरि समुद्रद्वीपे रामेश्वरस्य च विलसन्ति। भारतस्य विविधप्रदेशेषु शिवतत्त्वेन सांस्कृतिकमैक्याभिमानिलिङ्गानि सन्धारयन्ति।

२. द्रष्टव्यं शब्दकल्पद्रुमे लिङ्गम्। पृ० २२१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

हस्ते बाहौ तथा कण्ठे मूर्ध्नि रुद्राक्षधारणम् ।
अवध्यः सर्वभूतानां रुद्रवद् विचरेद् भुवि ।।

स्कन्दपुराणनुसारेण :—

अनेकजन्मसाहस्रं भ्रममाणश्च योनिषु ।
कः समाप्नोति वै मुक्तं विना लिङ्गार्चनं नरः ।।
सर्वमन्यत् परित्यज्य क्रियाजालमशेषतः[1]
भक्त्या परमया विद्वान् लिङ्गमेकं प्रपूजयेत् ।

मत्स्यपुराणं समर्थयति—

अश्वमेधसहस्राणि वाजपेयशतानि च
महेशार्चनपुण्यस्य कलां नार्हन्ति षोडशीम् ।।[2]

किमधिकेन—

यो यजेत् पारदं लिङ्गं स एव शम्भुरव्ययः ।। इति मातृकाभेदतन्त्रे

भागवते शैवसम्प्रदायस्य कुरीतयो भृशं निन्दिताः । सच्छास्त्रविरोधेन ते घृण्यमाचरन्तीति सुष्ठु व्याख्यातं तत्र भागवते ४.२. २७–३०

उपासना

अथर्ववेदे उपासना विवृता वर्तते—

यो देवमुत्तरावन्तमुपासातै सनातनम् । १०.८.२२
समेत विश्वे वचसा पतिं दिवः १७.२१.१ ।
विभुः प्रभुरिति त्वोपास्महे वयम् । १३.४.४७

वेदान्तदिशोपासनास्ति—

मनो ब्रह्मेत्युपासीत । छान्दो० ३.१९.१

तदाश्रित्य शंकरो प्रवदति—

ब्रह्म ममात्मेति उपासना कार्या ।

रामानुजो लक्षण-व्यपदेशेनोपासनेति सर्वग्राहि प्रपञ्चयति उपासना-विच्छिन्नस्मृति-सन्ततिरूपा ध्यान-वेदन-भक्तिज्ञानादिशब्दवाच्या संस्कार-परिपाकसमासादित-विशदतमप्रत्यक्षकरा ।

उपासनायाः किं प्रयोजनमिति स व्याकरोति—

उपासनायाः पूर्वकृतं प्रारब्धभिन्नं कर्मोपासनातो विनश्यति, उत्तरकृतं कर्म न श्लिष्यते, प्रारब्धकर्म त्वनुभवेनैव नश्यति ।

---

१. शब्दकल्पद्रुमे लिङ्गम् पृ० २२२

२. उप + आसना—निकटे स्थानम् । भगवत्सान्निध्य-प्रतीतिः । सा ध्यानेन सम्भवति ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ब्रह्मोपासन-निष्ठा अर्चिरादिमार्गेण विष्णुलोकं गत्वा तत्र परमात्मानमनुभवन्ति।

मध्वमतानुसारेण—अदृश्योऽपि विष्णुः स्वप्रसादादुपासकानां व्यक्तो भवति। स सत्यं ज्ञानमानन्दो ब्रह्मेति चतुर्गुणैर्मानुषैरुपसंहारः कर्त्तव्यः। दीक्षानन्तरमपि मुक्तजीवा स्वेच्छयोपासनां कुर्वन्ति।

देवा अपि हिरण्यगर्भस्य प्रशिषमुपासते। ऋ० १०.१२१.२। अर्थादुपासक उपास्यदेवस्यादर्शमात्मसात्कृत्य तस्याङ्गिनोऽङ्गमिव समुदाचरेत्।

उपासना चतुर्विधा भवति—अर्चना, स्तुतिः जपः, ध्यानं च। तत्र अर्चना मूर्तिमाध्यमेन, स्तुतिश्च ऋषिविरचितभक्तकविकृतश्लोकैर्भवति। जपस्तूपास्यदेवादीनां तेषामवताराणां नाम्नो वचनेन भवति नामरञ्जित मन्त्रोच्चारणेन वा।[1]

ध्यानं भवति अष्टाङ्गिकयोग-प्रक्रियया उपास्योपासकयोर्निर्विशेषप्रतीती रसात्मकम्।

पूर्वोक्ते वैदिकधर्मे देवानां प्रीत्यर्थं यद् यज्ञपूजार्चादीनां महत्त्वमुत्प्रेक्षितं तन्निर्वाणदिशि व्यर्थत्वान्नानुमोदितं बौद्धजैनादिभिर्वैदिकेतरधर्मप्रवर्तकैः। एतैर्वैदिकतपोब्रह्मचर्ययमनियमादिभिरेव जीवनस्य परमोद्देश्यं निर्वाणो मोक्षो वा साध्यं मन्यते।[2]

बौद्धधर्मः

खीष्टपूर्वं षष्ठशताब्दे (५६३—४८३ ई० पू०)[3] गौतमबुद्धः

---

१. जपस्तु मन्त्रस्य भवति। मन्त्रस्तु ओ३म् पूर्वकं देवतानाम, तस्यान्ते नमः। यथा 'ओ३म् शिवाय नमः' इति मन्त्रः। जपानन्तरं पूजा भवति—'गन्धं समर्पयामि' इत्यादि। मन्त्रस्त्रिविधो भवति—वैदिकः, तान्त्रिकः, शाबरी च।

२. सुत्तनिपाते पुण्णकमाणवपुच्छा। गौतमबुद्धो वैदिकसंस्कृतेर्वानप्रस्थाश्रमिणां मुनीनां निर्वाणयोग्यतां भूयिष्ठं प्रशंसति। सु० नि० मुनिसुत्त। 'ब्रह्मचरियं सुगते चरामसे' इति तत्रैव धनियसुत्ते १५। गौतमस्तु प्राक्तनब्रह्मचर्यं विशोध्य प्रचारयामास। तत्त्वतो ब्रह्मचर्यं परा विद्या तदनुसारी सात्त्विक-जीवनविधिः।

३. अयं षष्ठो बुद्धो। दीघनिकायानुसारेणानादिकाले आदिमो बुद्धः विपश्यीति ख्यात आविर्भूतः। तदनु शिखी, विश्वभूः, ककुच्छन्दः, कोणागमनः, काश्यपश्च क्रमशो बुद्धा बभूवुः। अन्तिमो बुद्धः कपिलवस्तुनि सिद्धार्थः शाक्यवंशीयः समुत्पन्नः। प्रथमधर्मचक्र-प्रवर्तनं विपश्यिना कृतम्। दीघनिकाये महापदानसुत्ते २.१। दीघनिकाये ३.९ आटानाटियसुत्ते च।
राधाकृष्णन् बुद्धस्य जन्म ई० पू० ५६७ संवत्सरे मन्यते। Indian Philosophy p. 347

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

किञ्चित्परिष्कृतमेव जीवनदर्शनं सार्वजनिकेहलौकिकपारलौकिकप्रशान्तये ऽनुसमदधातु। तस्य प्रकाशः सुदूरप्राचीनकालतोऽद्यावधि प्रकामं प्रद्योतयति श्रीमती रीज डेविड्स तस्य कृतित्वमाशंसमाना निगदति—

a man reckoned for ages by thousands as the Light not of Asia only but of the world and the saviour from sin and misery should call this little formula (the doctrine) the chain of causation his Norm or Gospel, or at least one aspect of that Gospel.[1]

गौतमबुद्धस्योपाधय आसन् ब्राह्मणः, ऋषिः मुनिरित्यादयः। अनेन तस्याभीष्टः पुरातनतमब्राह्मणधर्मः प्रतिभाति।[2]

आधुनिकनेपालदेशस्य कपिलवस्तु - नामके नगरे शाक्यवंशीयो राजासीत् शुद्धोदनो यस्य ललितो राजकुमारः सिद्धार्थो यौवन एव साधारणलोके जीवनस्य निस्सारतां समीक्ष्य मानवजीवनस्य तत्त्वार्थ-मधिगन्तुं राजप्रासादं, स्वपत्नीं, नवजातं पुत्रं च विहाय शनकैर्निशीथे प्रवव्राज। नैकमहाविदुषामुपदेशैरपि तस्येहलौकिकपारलौकिक - वैषम्य-निवारण-परिपृच्छा न शशाम। अन्ततः स तपोभिस्तत् सत्यं व्यजानाद् येन न केवलं स्वस्यापितु सर्वसाधारणस्यान्यथानिवार्यां शाश्वतदुःख-निर्झरिणीं शोषयितुं स समकल्पयत्। इयं प्रक्रिया तस्य बोधिप्राप्ति—राधुनिकबोधगयापार्श्वे बोधिवृक्षसमाश्रये समपद्यत। तदननन्तरं स स्वीयं बोधनिधिं जगतो दुःख-दारिद्र्यं दूरीकर्तुमौदार्येण वितरितवान्। पराक्रमेऽस्मिन् तस्य चातुर्देशिकी शिष्यमण्डली सत्त्वेन सामर्थ्येन च कृतभूरिपरिश्रमा विरराज।

बोध्यनन्तरं उपकाशि सारनाथे ऋषिपत्तने मृगदावे गौतमो धर्मचक्र-प्रवर्तनं प्रारभत। तस्य प्रथमोपदेश आर्यसत्यचतुष्टयमधोविधं वर्तते—(१) दुःखमस्ति (२) दुःखस्य समुदयो भवति (३) दुःखस्य निरोधो भवति (४) दुःखनिरोधगामिनी प्रतिपद् वर्तते। गौतमानुसारेण दुःखस्य

---

१. Buddhism p. 89.

२. सुत्तनिपाते बंगीससुत्ते, सम्मापरिब्बाजनियसुत्ते, माघसुत्ते, नालकसुत्ते च स मुनिः, ब्रह्मा, भगवान् ब्रह्म इत्यादयः सम्बोधितः।
स पुरातनधर्म ऋग्वेदादपि प्राक्तर इत्यभ्यजानात्। तस्मात् प्रस्तुत एव वैदिको धर्मो यस्य विषये गीता प्रवदति—
यावनर्थ उदपाने सर्वतः सम्प्लुतोदके तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजानतः।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

समुदयस्तृष्णाकारणाद् भवति । यदि लोके जन्म न भवेत्तर्हि दुःखं न स्यात् । जन्मकारणं तु अविद्यास्ति तृष्ण च[1] । आर्यसत्येषु चतुर्थो दुःखनिरोधगामिनी प्रतिपद् (आचारपद्धतिः) अष्टाङ्गिकमार्गो विश्रुतः ।[2] स तु अधोविधः —

दृष्टिः, संकल्पः, वाक् कर्मान्तः, आजीवः (जीविका) व्यायामः (श्रमः) स्मृतिः, समाधिरित्येतेऽष्ट सम्यगुत्तमकोटिका भवन्तु । अयमष्टाङ्गिकमार्गो बौद्धधर्मो वा सदाचारप्रधानत्वादनुत्तम एव विश्वधर्मेषु ।

अष्टाङ्गिकमार्गस्य यावज्जीवनमभ्यासोऽनुष्ठानं चावश्यकम् । मार्गोऽस्मिन् समाधेः सर्वोच्चं स्थानमस्ति । स्वयं गौतमबुद्धः प्राणायामपरायणः मासत्रयं यावत् समाधा अनन्यमनाश्च नैकवारं प्रातिष्ठत । न केवलं सम्बुद्धानां कृत एवंविधः समाधिर्नित्यमनुष्ठेयोऽपितु नवशिष्याणां कृतेऽपीदमनुशासनं श्रेयः ।[3]

उपनिषद्जीवनदर्शनं सर्वसाधारणकृते सोपयोगं विधातुं गौतमबुद्धः साधारणलोकानां भाषया द्वारं द्वारं पर्यटन् यावज्जीवनं प्रबोधयामास ।

---

१. तृष्णा तु भोगेच्छास्ति । He (Gautama) does not ask us to suppress desire but only divert it. Radhakrishnan : Indian Philosophy Vol. I p. 433

२. अष्टाङ्गिकमार्गोऽयं ब्रह्मयानं, धर्मयानं वेत्यभिधीयते । राधाकृष्णनन्-Indian Philosophy, Introduction p. 43

3. As for those monks who are learners who have not won their goal for such the intent concentration on in-breathing and out-breathing conduces to the destruction of the āsavas.

For those monks in whom the āsavas are destroyed.....who by perfect knowledge have become frce... ... for such also the intent concentration on inbreahing and outbreathing, if cultivated and made much of conduces both to pleasant living and to mindful composure even in this very life.
The Book of the kindred Sayings V; Book X Icchanangala p. 289.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

उपनिषत्सु निगूढमध्यात्मं[1] तपस्समाधिभिरेषणीयं वर्तते, तत्तु गौतमो महाब्राह्मणानां प्रातिस्विकं निधिं मत्वा न ज़ग्राह। किन्तु तेषां दर्शनाद् विशदीकृतं विकसितं च जीवन-सौष्ठवं फलीभूतं सदाचारं परमं सत्यं शिवं सुन्दरमवधार्य संगृह्य च भिक्षूणां गृहस्थानां च मध्ये सहस्रगुण-मुत्कर्षितं वितरितवान्। स गृहस्थधर्ममावश्यकमपि वानप्रस्थाद् भिक्षुधर्माद् हीनतरं मेने। सुत्तनिपाते मुनिसूत्त १५

यथोपनिषत्सु तथैव गौतमस्य धर्मेऽपि उच्चावचहिंसात्मकयाज्ञिक-कर्मकाण्डं न्यक्कृतमेव[2]। प्रारम्भिकबौद्धधर्म उपनिषदः प्रज्ञानमिति राधाकृष्णन्-महोदयस्याभिमतं सुप्रमाणितमेव[3]। गौतमः परिष्कार-पद्धत्या यज्ञं समर्थयति कथयति च—श्रेष्ठस्तु यज्ञेषु समाधियज्ञः, त्रिशरणयज्ञः, शिक्षापदयज्ञः, शीलयज्ञः समाधियज्ञः, प्रज्ञायज्ञश्च। घृत-तैल-दधि-मधु शर्करादिभिर्यज्ञो भवेत्, न तु पशुवधेन पुण्यात्मको यज्ञो भवेत्।[4]

गौतमबुद्धस्याकारादाचाराच्च कोप्यनन्यः प्रभावोऽस्फुरत्। तस्य प्रतिमूर्ता अपि तत्रासीदाकर्षणम्। अनातोले फ्रान्स-महोदयः स्वदेशस्य संग्रहालये गौतमस्य मूर्तिं दृष्ट्वोदाजहार—

My eyes fell on the statue of the Buddha with upraised hands beckoning to suffering humanity. When I looked at that image,

---

१. अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते। गीता० ८.३। स्वस्यैव ब्रह्मण एवांशतया जीवस्वरूपेण भावो भवनं स एव आत्मानं देहमधिकृत्य भोक्तृत्वेन वर्तमानोऽध्यात्मशब्देनोच्यते। श्रीधरः।

राधाकृष्णन् प्रवदति—Early Buddhism ... .. is only a restatement of the thoughts of the Upaniṣads from a new viewpoint. Indian Philosophy.

रीज डेविडस् कथयति—Gautama was born and brought up and lived and died a Hindu. There is not much in the metaphysics and principles of Gautama which cannot be found in one or the other of the orthodox systems. Buddhism p. 83.

२. लोहकुम्भी जातक।

3. The spirit of the Upaniṣads is the life spring of (early) Buddhism. Indian Philosophy p. 362.

४. दीघनिकाये कुटदन्तसुत्तानुसारेण बौद्धधर्मे त्रयो धर्मस्कन्धाः—शील-समाधि-प्रज्ञा नामका विभवन्ति, तत्रैव सुभसुत्ते च।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

I felt like kneeling down and praying to him as to a god, for if ever a god walked on this earth, it was he.[1]

अनातोले बौद्धो नासीत्, न चेश्वरनिष्ठः ।

नैके वैदेशिका अन्यधर्मनिष्ठा गौतमस्य प्रतिमूर्तिं दृष्ट्वा ध्यात्वा च परमां शान्तिं लभन्ते[2] ।

गौतमो यावज्जीवनं लोकानां कृते नित्यमभिगम्य आसीत् । स सूचनां लब्ध्वास्वस्थोपासकानां प्रबोधाय स्वयं तेषां गृहे गत्वा यथोचित-मन्वतिष्ठत् ।[3] सभिय-नामको ब्राह्मणस्तं विशेषयति —अञ्ञेसु समणब्राह्मणेसु ओकासमत्तम्पि नालत्थं । तं मे इदं समणेन गोतमेन ओकासकम्मं कतं ति । सुत्तनिपाते सभियसुत्तं; महापरिनिब्बाणसुत्ते च । कुशीनगरमहत्तरास्तं लोक-चक्षुरिति बोधयन्ति ।

गौतमस्य पूर्वोक्तविशेषान् समीक्ष्य पौराणिकास्तं भगवतोऽवतारं मन्यन्ते ।[4] स्वजीवनकाले स ब्रह्मेति उपाधिना मण्डितो बभूव ब्रह्मभूतो अतितुलो मारसेनप्पमद्दनो बुद्धः । इति सुत्तनिपाते सेलसुत्तो १४.१६ ।

गौतमस्तु कर्मोद्योगेन, परमोत्साहेन, अविश्रमेण कालातिपातपरिहारेण । सर्वलोकहितश्रमेण चाद्वितीयो धर्मोन्नायको प्रबभूव । मरणशय्यां गतोऽ पि स सुभद्रमुपदिदेश परिव्राजितवांश्च । स तत्रैवानन्दं भिक्षुसंघं च सद्धर्मनिकषं प्राबोधयत् ।

गौतमो भिक्षूणां कृते निवृत्तिमार्गं व्याहरत्[5] । 'न स्याल्लोकवर्धनः, इति स लोकं शिक्षते । धम्मपदे १३.१ । लोकस्तु मरीचिकावद् बुद्बुद् वद् वावेक्षणीयः । १३.४ । लोकेऽनासक्तः स्यात् । १३.५ । साधरणमानवस्तु अन्धभूतः । ससारं स प्रवदति भिक्षुन् प्रति —

1. President Radhakrisonan's Speeches and Writings. p. 79.
2. The great General Sir lan Hamilton, when he died left as a bequest to Sir Winston Churchill an image of the Buddha and said, "If your mind is tormented, if you are tortured, if you do not know what to do; if you are confused, look at that image. It will give you some consolation.
President Radha Krishnanan's Speeches And Writings. p. 80.

३. संयुत्तनिकाये ११.३ दीधावु-प्रकरणम् ।

४. मत्स्यपुराणे, भागवतपुराणे च गौतमो भगवतोऽवतारः । ब्रह्माण्डे बुद्ध-निमित्तेन महोत्सवो निर्दिष्टस्तस्य मूर्तेः पूजा च वर्णिता ।

५. पुत्ता मत्थि धनं मत्थि इति बालो विहञ्ञति ।
अत्ताहि अत्तनो नत्थि कुतो पुत्ता कुतो धनं ॥ धम्मपदे बाल० ३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पृथिव्या एक राज्याच्च स्वर्गस्य गमनादपि ।
सर्वलोकाधिपत्याच्च स्रोत आपत्तिफलं वरम् ।

गौतमानुसारेण पञ्चशीलेन मानवजीवनं समुदितं भवति । धम्मपदे १३.१४ । तत्तु सत्यम्, अपरिग्रहः, अस्तेयम्, ब्रह्मचर्यम्, सुरापान-निषेधश्च ।

'सर्वे भवन्तु सुखिनः' इति भावना गौतमेनोत्कर्षिता । सेयं मैत्री भावना । सुत्तनिपाते मेत्तसूत्त २-७ । माता यथा पुत्रं रक्षति तथैव सर्वे प्राणिनो रक्षणीयाः । सुत्तनिपातस्य" मेत्तसूत्ते ८ । अनेन तस्य लोकपोषणात्मक-प्रवृत्तिमार्गो विभाति ।

शत्रुर्यदि तवाङ्गानि कृन्तति तथापि तस्मै क्रोधो न जायते तव मानसे, तर्हि त्वं वस्तुतो ममानुयायी वर्तसे नान्यथा । म० नि० ककचूपम-सुत्तन्त ।

महापरिनिब्बाणसुत्तानुसारेण गौतमः क्षान्तिवादी बभूवेति स्तूपनिर्माण-प्रकरणेन ज्ञायते ।

गौतमानुसारेण तीर्थजलस्नानेन, अग्नितपनेन, जटाधारणेन वा पापा-च्छुद्धिर्न जायते । बुद्धचर्या, धम्मपदे ब्राह्मणवग्गो; म० नि० वत्थसुत्तन्त । सर्वप्राणि-कल्याणकामना तीर्थमेव । सत्याहिंसास्तेयादीनि च गयातीर्थमेव । धम्मपदे निगदितम्—

न नग्गचरिया न जटा न पङ्का नानासका थण्डिल-सायिका वा ।
रजो च जल्लं उक्कुटिकपधानं सोधेन्ति मच्चं अवितिण्णकंखं ।। दण्ड० १३

गौतमो गृहस्थानुपासकान् भिक्षुभिः समानं नामन्यत, यतो हि नाम गार्हस्थ्ये हिंसात्यागः सम्यङ् न भवति । सुत्तानिपाते मुनिसुत्त १४,१५

उपासकानां कृते कस्य पूजा कर्तव्येति गौतमस्यान्य एव पन्थाः । न देवादीनामपितु (१) पित्रोः (२) गुरोः (३) पत्न्याः (४) बन्धु-बान्धवानाम् (५) सेवकस्य च पूजा विधेया । पूजा तु तेषां ससम्मानं सम्भरणमाज्ञापालनं, सात्त्विकव्यवहारः, संरक्षणं चेत्येतानि यथायोग्यं सम्पादनमेव । प्रकरणेऽ-स्मिन् गौतमो लोकसंग्रहं सर्वोपरि निश्चिनोति पूर्वोक्तैर्विधानैरिह लोके व्यष्टिशः समष्टिशश्च जीवनसौष्ठवं सामाजिकसहभावश्च समुदीयेत इति निश्चप्रचम् । स शिल्पज्ञानमुत्तमं मङ्गलमिति विवृण्वन् सुष्ठुसमाजनिर्माणं व्याकुरुते ।[1]

बुद्धो जन्मना जातिरिति वैदिकधर्मानुयायिनां विधानं भृशं विरुणद्धि । तदनुसारेण कर्मणा जातिर्भवति । जातिः कर्मपरिवर्तनेन परिवर्तनीयेति स प्रोक्तवान् ।[2] यथा स निर्दिशति—ब्राह्मणस्तु सत्याहिंसा-ब्रह्मचर्यापरिग्रहाणां

---

१. सुत्तनिपाते महामंगलसुत्तं ।
२. मज्झिमनिकाये अस्सलायण सुत्तन्त, वासेट्ठ सुत्तन्त, फसुकारी सुत्तन्त ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

निधिपः ।[1] स ब्राह्मणं निर्वाणाधिकारिणममन्यत ।[2] निर्वाणार्थं स्मृत्युपस्थानचतुष्टयस्य साधना चिरकालिकी अपि प्रभवति ।[3]

गृहस्थानां कृते बुद्धो भोगविलास-प्रवणं जीवनं निषेधयतिस्म । स कथयति धम्मिकसुत्ते—मद्यपान, मालाधारणं, गन्धोपयोगं च वर्जयेत् । तत्र प्रसिद्धास्ति बुद्धस्य मध्यमा प्रतिपद् यस्यां घोरतपसो विलासस्य च समानं वर्तते निषेधः । तथापि तपोमयजीवनस्यादर्शबौद्धधर्मेणाविनाभावः ।

सप्तधर्मरत्नेषु स्मृत्युपस्थानं तु प्रथमस्थानीयम् ।[4]

वैदिकदर्शनस्य जीवन्मुक्तिरिव बौद्धानां ब्रह्मविहारः—मैत्री-करुणा-मुदितोपेक्षेति चतुष्टयेन सिद्धो भवति । तस्याभ्यासेन पापाद्विरतिः सम्भवति । (अङ्गुत्तरनिकाये ४-६) । प्रकरणेऽस्मिन् विज्ञेयं यद् गौतमेन वैदिकधर्मस्यादिप्रवर्तकं ब्रह्मेति ख्यातं सम्यग्विज्ञाय तस्य व्यावहारिक-मनोवृत्तिं मैत्री-करुणा-मुदितोपेक्षेति चतुष्टयं ब्रह्मविहार इति स्वीकृत्य भिक्षूनुपादिशत्[5] । ब्रह्मविहारस्तु ब्रह्मसंस्थत्वम् । अस्यां स्थितौ कश्चित्साधको ब्रह्मवत् सर्वेषु द्वन्द्वेषु मैत्रीकरुणादिकमेव व्यवहरति । सोऽयं वैदिकदर्शनस्य ब्रह्मानन्दो गौतमेन स्वधर्मे उपरिकृतः ।

---

१. धम्मपदे ब्राह्मणवग्गो ।

२. दीघनिकाये ५ २ उण्णाभब्राह्मण-सुत्त । The Exalted one said 'If at this time, the Brahmin Uṇṇābha were to make an end there is no fetter, bound by which, he would come back to this world.

३. मज्झिमनिकाये सतिपट्ठान-सुत्तन्त १५, १६ देहस्य, वेदनायाः, चित्तस्य मनोवृत्तीनां च यथार्थावलोकनं स्मृत्युपस्थान-चतुष्टयम् । एतेषु यथा श्मशाने शवशरीरदर्शनेन देह (काया)दर्शनं भवति । मज्झिमनिकायः सतिपट्ठानसुत्तन्ते ।

४. स्मृत्युपस्थानं, सम्यक् प्रधानं (प्रणिधानं प्रयत्नो वा), ऋद्धिपादं संकल्पोद्योगोत्साह-संयमेनाभ्युत्थानम्) इन्द्रियाणि (श्रद्धा, समाधि-वीर्य स्मृति-प्रज्ञा) इत्यादीनि ।

५. गौतमबुद्धः पुराणब्राह्मणधर्मं व्याख्यातवान् सुत्तनिपाते ब्राह्मणधम्मिकसुत्ते । तदनुसारेण पुरायुगे ब्राह्मणाः संयतात्मानः, तपस्विनः, स्वाध्यायधना लौकिक-सम्पत्ति-रहिताः, ब्रह्मनिधिपालकाः ४८ वर्षं यावद् विद्याध्ययनरताश्च बभूवुः । इदं विशुद्धं ब्रह्मचर्यं गौतमः सर्वार्थसाधकं मेने । सुत्तनिपातस्य सुन्दरिक-भारद्वाज सुत्ते भारद्वाजो गौतमं सम्बोधयति ब्रह्मन्निति २५ तमे सुत्ते ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अत्र प्रश्नः समुदेति—किं नाम ब्रह्म, ब्रह्मा वा। वैदिकदर्शने ब्रह्मा आदिसत्ता, आदिदेवो वा। ब्रह्मा देवानां प्रथमः सम्बभूव। मुण्डकोपनिषद् ११ बौद्धसाहित्येऽयं ब्रह्मा तु, यथा वैदिकसाहित्ये नैकस्थलेषु संकेतितम्, महामानव एव। दीघनिकाये महाब्रह्ममुखेन व्याख्यातं वर्तते।[1] तदनुसारेण महाब्रह्मा अनभिभूतः, परार्थ-द्रष्टा, वशी, ईश्वरः, कर्ता, निर्माता, श्रेष्ठः सर्वभूतभाविपिता चास्ति। स देवलोकाधिष्ठितः, देवानां गणनायकस्सन्नपि गौतमबुद्ध इव सर्वज्ञाता नास्ति।

प्रकरणेऽस्मिन् देवा ब्रह्मा वा विशेषशक्तिसम्पन्ना मानवसमा वर्तन्ते।

गौतमनुसारेण तत्रास्ति ब्रह्मचर्यमिति आचार्यप्रवेदितः कश्चित्सनातनो धर्मो न मनागपि कर्मकाण्डविधानस्पृष्टः। धर्मे तस्मिन् शीलसमाचारयोर्वैशिष्ट्यमस्ति। तस्य धर्मस्यानुयायिनोऽधोलक्षणैरभिज्ञाता भवन्ति—

(१) अनुत्तरा ते वचसा, मनसा, कर्मणा च।
(२) ते शान्ति-सौरत्य-समाधि-संस्थिता भवन्ति।
(३) ते ऋतस्य प्रज्ञायाश्च सारमधिगताः।[2]

तमार्यप्रवेदितं (सनातनं) धर्मं स लोकसमक्षं विशदीचकार।

गौतमो यज्ञस्य विरोधको नाभवत्[3]। नैकविधयज्ञेषु यत्र यत्र स व्यर्थप्रपञ्चं दृष्टवान् तत्र तर्कबुद्ध्या स विरोधम् प्रकशितवान्। यथा सुत्तनिपाते सुन्दरिकभारद्वाजसुत्ते सोऽग्निहोमनामकं यज्ञं निषेधति। स प्रबोधयति यद् हव्यं तु तस्मा अर्पणीयं यो निष्कामः, सुसंयतात्मा, वीतरागः सुसमाहितेन्द्रियः, मायारहितो निर्लोभः, निर्ममः, निराशः, अपरिग्रहः, समाधि-विप्रमुक्तः, निरकांक्षः, साक्षाद् ब्रह्मा भवति[4]। हव्यं तु महासत्त्वाय न तु अग्नये, प्रदेयमिति बुद्धस्य मतम्[5]।

---

१. केवट्टसूत्ते १.११ ३; सक्कपञ्हसुत्ते गाथा ४८

२. सुत्तनिपाते किंसीलसुत्ते १,७।

३. सुत्तनिपाते सुन्दरिकभारद्वाजसुत्ते २९-३१। अन्यत्र स प्रबोधयति—
यज्ञस्य शुद्धसनातनस्वरूपं यो यजति उप्पज्जति ब्रह्मलोकं। माघसुत्त २३
ये वे असत्ता विचरन्ति लोके अकिंचना केवलिनो यतत्ता।
कालेन तेसु हव्यं पवेच्छे यो ब्राह्मणो पुञ्ञपेक्खो यजेथ॥ सु. नि. माघसुत्त ४
यजस्सु यजमानो इत्यादि माघसुत्ते २०

४. सुत्तनिपाते सुन्दरिकभारद्वाजसुत्तं।

५. सुत्तनिपाते माघसुत्ते ४–१७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

बौद्धमते देवानां प्रतिष्ठा प्रबभूव । स पाटलिग्रामे सुनीथवर्षकारौ प्राबोधयत् – देवेभ्यो दक्षिणा प्रदेया । ते लोकमौरसपुत्रवदनुकम्पन्ते । फलत उपासको मङ्गलमनुभवति ।[1] महापरिनिब्बाणसुत्तानुसारेण बुद्धस्य महापरिनिर्वाणदिवसे श्रेष्ठतमा अपि देवास्तस्य दर्शनार्थं कुशीनगरं समागताः । दीघनिकाये देवानां विविधकोटिकानां नामवसतीत्यादयः सहासमयसुत्ते बुद्धेन गणिताः ।

गौतमबुद्धो ब्राह्मणेभ्यो ब्रह्मसलोकता-पथमपि प्रत्यपादयत् । दीघनिकायस्य तेविज्जसुत्ते स वासिष्ठमाणवकं ब्रूते –पञ्चशीलैर्भिक्षुः प्रमुदितो भवति । क्रमशः स प्रीतिमान्, शान्तः, प्रश्रब्धः, एकाग्रचित्तश्च भवति । तदनन्तरं स ब्रह्मविहारेण (मैत्री-करुणामुदितोपेक्षा भावनाभिर्ब्रह्मसलोकतां भजते । सोऽपरिग्रहः, निर्वैरः, अव्यापादः असंक्लिष्टचित्तः, आत्मवशः, ब्रह्मवद् भवति । इहलोकलीलासमाप्तौ स ब्रह्मसलोकतामधिकरोति ।

ब्रह्मा महाब्रह्मा वा बुद्धानामपि किंकर्तव्य-समाधायकोऽमर एव वर्तते । यदा प्रथमो बुद्धः विपश्यी आदौ धर्मचक्रप्रवर्तनमुपेक्षते स ब्रह्मलोकेऽन्तर्धाय बुद्धसमीपमायाति । तं धर्मचक्रप्रवर्तनाय प्रोत्साहयति च ।[2]

गौतमबुद्धस्य सांघिकजीवनं क्वचित् सरसमपि विभाति । दीघनिकायस्य सक्कपञ्हसुत्तानुसारेण स पञ्चशिखनामकस्य गन्धर्वस्य वेलुवपण्डु-वीणायाः सङ्गतौ बुद्ध-धर्म-सङ्घार्हदभोगविषयकगाथाः श्रुत्वा गीतवाद्य-स्वर-सामरस्येन सौमनस्यं सम्प्राप्तः । अत एव बौद्धधर्मानुयायिनां पूजा माला-गन्धद्रव्य-स्तुतिगान-गीतवाद्ययुता सम्पाद्यते ।

गौतमस्य शिष्या यद्यपि ऋद्धि-प्राप्त्या[3] प्रगुणा आसन् तथापि महिमार्जनाय ऋद्धि-प्रदर्शनं निषेधितमासीत् । महापरिनिब्बाणानुसारेण बुद्धः पाटलिग्रामेऽन्तर्हितो गङ्गापारं गतवानासीत् ।[4] अन्यत्रापि बहुशस्तस्य ऋद्धिमत्त्वं वर्णितम् ।

बौद्धा जैना वा निवृत्ति-परायणा भवितुं शिक्षिता इति अर्धसत्यमेव । वस्तुत एतद्धर्मद्वयस्य द्विविधा लोका उन्नेया आसन्—उपासका गृहस्था वा भिक्षवः साधवो वा । तत्र निवृत्ति-परायणास्तु अवश्यमेव निर्वाणार्थं निवृत्तिपरायणा भवन्तु नाम । किन्तु गृहस्थाः सदाचारयुता महता

१. महापरिनिब्बाणसुत्ते सुनीथवर्षकारावसथ उपदेशः ।
२. दीघनिकाये २.१ महापदानसुत्ते धर्मचक्रप्रवर्तनम् ।
३. ऋद्धयस्तु अलौकिकशक्तयः प्रायो योगाभ्यासेन स्वयमुपस्थिता भवन्ति ।
४. उदुम्बरिक-सीहनादसुत्तं ३.२ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्रमेणोद्योगेन च लौकिकसमृद्धिभूमानमवाप्य समाजे सत्यं शिवं सुन्दरं च सर्वत्र प्रकल्पयन्तु इति तेषां कृते गौतमेनाष्टाङ्गिकमार्गेषु सम्यगाजीव इति व्याख्यातम् । मरणानन्तरं गृहस्थोपासकोऽप्यनागामी भवितुमर्हतीति दीर्घायुप्रकरणेन ज्ञायते ।[1]

श्रीमती रीज डेविड्स प्रवृत्तिपरायणानां बौद्धानां ग्रामसौरभं सुमनसा-वर्णयति—How happy would have been the village or the clan on the bank of the Ganges, where the people were full of the kindly spirit of fellow-feeling, the noble spirit of justice, which breathes through these naive and simple sayings (in the Sigalovāda-sutta). Buddhism p. 148.

गौतमेन नैकशोऽभ्युदयशीलमानवस्य द्विविधप्रवृत्तिर्व्याख्याता—प्रवृत्तिः, निवृत्तिश्च । प्रवृत्तिपथेन स चक्रवर्ती विश्वजयी सम्राड् भवति । कायिक-सदाचारेण, प्रियङ्करत्वेन, अहिंसा-व्रतेन, सौमनस्य-प्रजननेन, धर्मार्थोपदेशेन न्यायवृत्त्या परिग्रहेण, दानेन, परहिताकांक्षया, सुचरितेन, सत्येन, मधुर-भाषणेन, ऐक्यसमुत्थानेन, सम्यगाजीवेन, सर्वजनहितकाम्यया च विश्वलोकमतिशेते ।[2]

उपासक-गृहस्थानां कृते गौतमेन पञ्चशीलानि निर्धारितानि । तद्यथा—(१) प्राणातिपात-विरतिः (२) अदत्तादानविरतिः (३) काममिथ्याचार-विरतिः । (४) मृषावाद-विरतिः (५) सुरामैरेय-प्रमाद-स्थान-विरतिश्च ।

सुत्तनिपातस्य धम्मिकसुत्ते बुद्धः प्रणोदयति—

पयोजये धम्मिकं सो वणिज्जं ।। २९

सिगालोवादसुत्ते प्रवृत्तिमार्गनिदर्शनं गृहस्थानामुपासकानामार्याणा-मभ्युदयार्थं कथितम्—

सन्तानकर्तव्यम्—पित्रोः सम्भरणम्, कुलवंशसातत्यकरणम् ।

पित्रोः कर्तव्यम्—पुत्राय शिल्पप्रशिक्षण-व्यवस्था, पुत्रोद्वाह-करणम् ।

आचार्यं प्रति कर्तव्यम्—शिल्प-प्रशिक्षणम्, पत्नीं प्रति कर्तव्यम्—अलंकार-प्रदानम् ।

पत्न्याः कर्तव्यम्—स्वामिनोर्ऽजितस्य रक्षणमिति । मित्रं प्रति कर्तव्यम्—तस्मै दानं दातव्यम्, अर्थसम्पादनं च । सेवकं प्रति कर्तव्यम्-भोजनवेतन-दानम्, श्रमण-ब्राह्मणानां कर्तव्यम्—आर्येभ्य उपासकेभ्यः स्वर्गमार्ग-निदर्शनम् ।[3]

---

१. संयुत्तनिकाये ११.३ ।

२. दीघनिकाये ३/७ लक्खणसुत्तं ।

३. दीघनिकाये ३ ८ सिगालोवाद सुत्त

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ईदृग्भाषी गौतमबुद्धो नास्ति निवृत्तिचर्योपदेशको गृहस्थानां कृते। भारते। सदैव गृहस्थानां संख्याधिकतरासीत् श्रमण-ब्राह्मणसंख्यातः।

राजनीतिनिपुणो गौतमो राज्ञां विजयलाभोचितप्रवृत्तिमपि प्राबोधयत् महापरिनिब्बाण-सुत्ते सोऽजातशत्रोर्दूतं वर्षकारेण परामृशति स्म—के ते सत्यपरिहाणीयधर्मा येषां परिपालनेन वज्जिगणोऽजेयो वर्तत इति। अन्यत्र स पाटलिपुत्रस्यान्तरायत्रयं विवृणोति—अग्निः, जलप्लावनं, पारस्परिकशात्रवं च।

आर्यश्रावको ब्रह्मविहारेण दिक्चतुष्टयमखिलजगदपि अभिव्याप्नोति।[1] गृहस्था अपि शीघ्रातिशीघं भिक्षु-पथमेव प्रचरन्तु इति स निःसन्दिग्धं प्रणोदयति।[2]

गौतमबुद्धः प्राक्तनतमवैदिकधर्मस्य स्वरूपं सम्यक् परिष्कृत्य प्रकाशितवान्। तद्यथा सुत्तनिपातस्य सेलसुत्ते प्रकटितम्—गौतमः केवल-(वेद)[3] परिपूर्णं परिशुद्धं ब्रह्मचर्यं प्रकाशयतीति। अत्र ब्रह्मचर्यं हि ब्रह्मविद्यया ब्रह्मविहारः (करुणा-मुदितोपेक्षा-मैत्री) साध्यते। उपनिषदां ब्रह्मचर्येण ब्रह्मसंस्थत्वं प्राप्यते।

प्रसङ्गेऽस्मिन्निदमपि विचारणीयं यद् बौद्ध-जैनधर्मोपासका बहवो राजान[4] महासम्राजो बभूवुर्येषां विजयिनी गाथा लोकोत्थानमय्यः प्रवृत्तयश्चानन्या एव न केवलं भारतेऽपितु विदेशेष्वपि प्रगीयन्ते स्म। तस्य जीवनकाले सम्राडजातशत्रुः कथं तस्य शिष्यो बभूवेति ऐतिहासिकी गाथा।

प्रवृत्तिमार्गेण महापुरुषः कश्चिच्चक्रवर्ती सम्राडादर्शो भवेत्, निवृत्तिमार्गेण च बुद्धो भवेदिति लोकशास्ता प्रतिपादयति।[5]

श्रमण-ब्राह्मण-भिक्षु-साधूनां कृते बौधधर्मानुयायि-गृहस्थेषु सत्प्रवृत्ति-प्रवर्तनं परमकर्तव्यं निर्धारितम्। तद्यथा ते कुलपुत्रान् (१) पापान्निवारयन्तु

---

१. अङ्गुत्तरनिकाये दसकनिपातो।

२. ओरोपयित्वा गिहिब्यंजनानि संसीनपत्तो यथा कोविदारो।
छेत्वान वीरो गिहिबन्धनानि एको चरे खग्गविसाणकप्पो॥
सु० नि० खग्गविसाण सुत्ते १०

३. केवलं तु Doctrine of the absolute unity of spirit Mon. Willioms Skt. Eug. Dictionary p. 310

४. दीघनिकाये सामञ्जफलसुत्ते (१.२) अजातशत्रोर्बुद्धादुपासकधर्मग्रहणं सविस्तरं वर्णितम्।

५. दीघनिकाये लक्खण-सुत्त ३.७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(२) कल्याण-पथे नियोजयन्तु (३) कल्याणं प्रापयन्तु (४) अश्रुतं ज्ञानं श्रावयन्तु (५) स्वर्ग-पथं दर्शयन्तु। अनेन विधिना राष्ट्रियचरित्रनिर्माणदिशि श्रमणादीनां राष्ट्राभ्युदये उद्योगः प्रशस्य आसीत्।

न केवलं मानवं प्रति बौद्धकरुणा समुदितापितु 'सब्बेसु भूतेसु निधाय दण्डं' अविहेठयं अञ्ञतरं पि तेसं इति प्ररोचनं विहितम्। सु० नि० खग्गविसाण-सुत्ते अन्यत्र च। स त्रसस्थावरेष्वपि अविरुद्धः स्यात्।[1]

इहलोके कथं व्यवहर्तव्यम्

शरणत्रयोपलब्धिरार्यसत्यस्याष्टाङ्गिकमार्गस्य च प्रपत्तिः; ध्यानं, नैष्कर्म्यमुपशमः, सद्धर्मश्रवणं, पुण्यार्जनं, आत्मविशुद्धिः, क्षान्तिः तितिक्षा अहिंसा च नित्यमेव संसेव्यानि। अन्यच्च—

यथापूर्वं प्रोक्तं, वैदिकधर्मे इन्द्रादिदेवादीनामनुग्रहार्थं यज्ञ-स्तुति-तपो नम उपासना—ध्यान-योगादीनां महत्त्वमासीत्[2]। एतेषां स्थाने गौतमेन बुद्धानां, श्रावकाणां प्रपञ्चसमतिक्रान्तानां च पूजा व्यधात्।

गौतमबुद्धस्य स्तूपमुद्दिश्योपासकैः माला-गन्ध-चूर्ण-प्रदानमभिवादनं च सुखाय भवतः। महासुत्ते षष्ठपरिच्छेदे

पूजा रहे पूजयतो बुद्धेयदिव सावके।
पपञ्चसमतिक्कान्ते तिण्णसोकपरिद्दवे॥
ते तादिसे पूजयतो निब्बुते अकुतो भये।
न सक्का पुञ्ञं संखातुं इमेत्तमपि केन चि॥
धम्मपदे बुद्धवगो १७, १८

न खलु स्वकार्यार्थमेवास्माकं कार्यप्रवृत्तयो भवन्तु, अपितु लोकहिताय बहुजन-सुखायास्माकीनं ब्रह्मचर्यमिति मनसा धारयेत्[3]।

गौतमबुद्धो वैदिकधर्मस्य महत्त्वपूर्णं तपसो दुःसहस्वरूपमात्रं निषेधितवान् किन्तु स तपस उदात्तररूपं भिक्षुणां कृते ऽनिवार्यमपरिहार्यं च व्यधात्[4]। तथैव स वैदिकयज्ञस्याग्निहोत्रं पशूनां बलिदानं च

१. सु० नि० नालकसुत्त २६। दशशिक्षापदेषु प्राणातिपातविरमणं निर्दिष्टम्। त्रसास्तु मनुष्य-जीव-जन्तवः। स्थावराः पुनः मृत्तिका, पर्वत-तृण-वृक्षादयः।

२. महापरिनिब्बाणसुत्ते। अन्यत्रापि—
धम्मचरियं ब्रह्मचरियं। सु० नि० धम्मचरिय-सुत्त

३. गौतमबुद्धोऽपि विशुद्धयज्ञसम्पादनेन स्वर्गलाभस्य सम्भावनां स्वीकारेति। दीघ-निकायस्य कुटदन्तजातकस्य महाविजितेस्य यज्ञस्य वर्णनप्रसङ्गोनोदाहृतम्।

४. अस्य ग्रन्थस्य पृष्ठ २२७, २२८ द्रष्टव्यम्।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भृशं निनिन्द किन्तु स पञ्चमहायज्ञानां महान् पक्षधरो विभाति[1]।

मरणोत्तरगतिः

मरणानन्तरं निर्वाणमेव मानवजीवनस्य सर्वोच्चमुद्देश्यम्। तत्तु धर्माचरणेन आर्यसत्यचतुष्टयेन, अष्टाङ्गिकमार्गेण, ब्रह्म-विहारेण च लभ्यम्[2]। निर्वाणं तु मुक्तिरेव। यदि भिक्षुः साधनाया अपूर्णत्वात् निर्वाणं न लभेत तर्हि स ब्रह्मलोकमधिगच्छति[3]। पुण्यपथगामिनां कृते बहवः स्वर्गलोकाः सुखभोगविलासार्थं तत्र निर्दिष्टाः।

निर्वाणायाकिञ्चन्यमनादानं चावश्यकम्। सु० नि० कप्पमाणवपुच्छा[4]। तृष्णाया विमुक्तिरवे निर्वाणम्[5]।

सदाचारिणः श्रावकाः स्वर्गं गच्छन्तीति बुद्धः प्रबोधयति सुत्तनिपाते—

धम्मेन-माता पितरो भरेय्य पयोजये धम्मिकं सो वणिज्जं।

एतं गिही वत्तयं अप्पमत्तो सयंपभे नाम उपेति देवेति। धम्मिकसुत्ते २९ पापा निरयं (नरकं) गच्छन्ति[5]। पापं तु भृशमेव परदारोपसेवनं, दुष्परामृष्टं

---

१. तुलनात्मक दृष्टचाधोविर्ध प्रस्तुतिर्वर्ततेऽस्य प्रकरणस्य—

१. ब्रह्मयज्ञः (स्वाध्यायः, अध्यापनम्)	अध्यापनमध्ययनम्
२. देवयज्ञः (देवानां पूजा)	बुद्धपूजा, भिक्षुपूजा
३. पितृयज्ञः	पित्रोः पूजा
४. भूतयज्ञः	प्राणिनः प्रति अनुकम्पा
५. अतिथिपूजा	भिक्षुभ्यो भोजनदानं

२. धम्मं चरे सुचरितं न तं दुच्चरितं चरे।
धम्मचारी सुखं सेति अस्मिं लोके परम्हि च॥ धम्म पदे १३.३
महापरिनिब्बाण-सुत्तानुसारेण स कोटिग्रामे भिक्षुसंघं प्राबोधयत्। आर्यसत्य-चतुष्टयस्य सम्यग्दर्शनेन पुनर्जन्म न विद्यते।

३. अङ्गुत्तरनिकाये मेत्तसुत्तं।

४. तृष्णाया विप्रहानेन निर्वाणमित्युच्यते। सु० नि० उदयमाणवपुच्छा।

५. धम्मपदे निरयवग्गे नरकगामिनां लक्षणानि वर्णितानि। सुत्तनिपाते धम्मचरियसुत्ते
विनिपातं विनिपन्नो गब्भा गब्भं तमा तमं।
स वे तादिसको भिक्ख् पेच्च दुक्खं निगच्छति॥ ५ एष मार्गो निरयगामी। ४ महापरिनिब्बाणसुत्तानुसारेण सदाचारेण मरणानन्तरं स्वर्गो दुराचारेण च नरको लभ्यते। पाटलिग्रामे उपासकानां कृत उपदेशः।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्रामण्यं मिथ्यादृष्टिः । एतानि निरयकारकाणि । धम्मे पदे २२.१.१४

नैकविधनरकेषु असंख्यविधयातना गौतमेन सुत्तनिपातस्य कोकालिय-सुत्ते विस्तारेण वर्णिताः सन्ति ।

यदि नाम निर्वाणपथे सम्यग् गतिर्नाभवत् तर्हि भिक्षुः सकदागामी भवति । अर्थात् सकृदेवेह जातः पुनर्निर्वाणं लभते[1] । कतिपयभिक्षवो मरणानन्तरं देवा भवन्ति[2], देवलोक एव निर्वाणं लभन्ते । अन्ये बोधिपथे स्रोतआपन्ना जायन्ते । अर्हन् प्राप्तनिर्वाणो महात्मा शाश्वतं जन्मबन्ध-विनिर्मुक्तो प्रतिभाति ।

किं पुण्यं नामेति नैकशो बुद्धेन व्याख्यातम् । प्रथमं तावदष्टाङ्गिक-मार्गो दशशिक्षापदं च व्यनक्ति पुण्यपथम् ॥

बौद्धधर्मस्य विदेशेषु प्रसारो राजभिरपि सम्भावितम् । तत्राशोकस्य गणना प्रथमस्थानमर्हति । स धर्मदूतान् ग्रीस–मिस्र–सीरिया-मेसीडोनिया लङ्कादिप्रदेशेषु प्राहिणोत्[3] । रालिन्सन महोदयो निगदति—

The Buddha story became graduaally known in the west until by a coincidence hardly to be paralled in literature, it was narrated in the eighth century A. D. by John of Damascus as the

---

१. महापरिनिब्बाणसुत्ते सुदत्तोपासकविषये भगवद्वचनम्

२. बुद्धशरणं गतो न हि नरकं गच्छति । मरणानन्तरं स देवशरीरं लभते । दीघनिकाये सहासमय-सुत्ते ।

3. When Ashoka was converted to Buddhism, his first thought was to despatch missionaries to his friends, the Greek monarchs, Egypt, Syria and Macedonia that they might share in the glad tidings of this new creed.
Intercourse Between India And Western World. p. 39.

स स्वजनानपि धर्मप्रचारार्थं प्रेषितवान् । यथा तेन प्रेषितौ संघमित्रा–महेन्द्रौ श्रीलङ्कदेशे बौद्धधर्मं प्रचारितवन्तौ ।

ग्रीकराजो मिनेण्डरो भद्रनागसेनस्य प्रभावेण न केवलं स्वयं बौद्धधर्मं जग्राह, अपितु नैक देशेषु विदेशेषु बौद्धधर्मप्रचारार्थं योजना विधत्तेस्म । महाराजकनिष्कस्य प्रभावेण बौद्धधर्मो मध्यएशिया–चीन–जापान--तिब्बत--वर्मा थाईलैण्ड--कम्बोडियादि-देशेषु प्रासरत् । बौद्धधर्म के २५०० वर्ष पृ० ३९-४२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

life of a Christian saint. Under the guise of Josaphat, Gautam, the Bodhisattva found his way into the Christian church and was included in the Martyrology of Gregory XIII.

Intercourse Between India And Western World p. 142.

काव्य-नाटकादिभिर्मध्येशियानामके भूखण्डे बौद्धधर्मस्य प्रचारः समभवत् । तत्रत्यानां भाषाभिर्विरचितेषु नाटकेषु बुद्धं नायकं विधाय तस्य जीवन-चरितं सिद्धान्ताश्च प्रतिपादिताः ।[1] चीन-तिब्बत-कोरिया जापानादिदेशान् बौद्धाचार्याः स्वधर्मोपदेशेन सच्चारित्र्यप्रकाशनेनासंख्य-ग्रन्थानां तेषां भाषाभिर्विरचनेन चानन्यतमं योगदानं दर्शयन्तिस्म । तत्र तत्र शिल्पकला-साहित्यादिसांस्कृतिकप्रवृत्तीनां विकासोऽनुभारतं लक्षितुं शम्यतेऽधुनापि ।

पूर्वदिश्यप्रदेशेषु बौद्धधर्मो वर्मा-स्याम-मलय-सुवर्णद्वीप-जावा-बालि-बोर्नियो-भारत-चीनादिदेशेषु भूयिष्ठं परिव्याप्तः[२] । वर्मादेशे १८७१ ख्रीष्टाब्दे मिनदोनराजस्य समाश्रयेण २४०० भिक्षूणां संगमः प्राभवत् । तत्र त्रिपिटकस्य पाठसंशोधनं विहितम् । अधुना ७२९ संगमर्मर पट्टिकासूत्कीर्ण-स्त्रिपिटकस्य शुद्धपाठः प्रचरति ।

१९५४ ख्रीष्टाब्दे षष्ठबौद्धमहापरिषद् रंगूननगरे आयोजिता; त्रिपिटक-संशोधनं पुनरपि विहितम् । अस्मिन्नवसरे भारतराष्ट्रपतिः सन्दिदेश-

इस संगायन द्वारा न केवल उन देशों में जहाँ बुद्धधर्म का पालन नहीं हो रहा है, वहाँ बुद्धधर्म के प्रति प्रेम बढ़ेगा, परन्तु उन लोगों के जीवन में भी, जो सौभाग्य से इस धर्म का पालन आज भी कर रहे हैं, श्रद्धा और आदर पुनर्जीवित करने में सहायता मिलेगी। आज की भटकी हुई मानव जाति में यह संगायन पुनः शान्ति और सद्भावना का सन्देश प्रचारित करे।

तस्मिन्नवसरे भारतस्य प्रधानन्त्री जवाहरलालो नेहरुः सन्दिदेश—

बुद्ध की स्मृति में मैं अपनी श्रद्धा अर्पित करता हूँ और रंगून के बड़े संगायन को अपनी आदरपूर्वक शुभ कामनायें भेजता हूँ। यह संगायन इस मङ्गलमय समारोह के अवसर पर जुट रहा है, जब दुनिया को शान्ति की बड़ी जरूरत है।

---

1. India and Central Asia. p. 54.

२. अस्य विषयस्य विशदवर्णनमग्रे द्रष्टव्यम्।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मध्येशियायां बौद्धधर्मप्रवेशः

तरिमोपत्यकायां तुरुष्काणा[1]माधिपत्यं खीष्टपूर्वं द्वितीयशताब्देऽभवत्। तत्र ते बौद्धधर्मानुयायिनो जाताः। ५७० खीष्टाब्दे तौबा-रवाखानः बौद्धधर्मे दीक्षितो भ्रमचारिणां तुरुष्काणां सांस्कृतिकसमुत्थानाय तेषु बौद्धधर्मप्रचारमनुष्ठितवान्। विहारमेकं स निर्मितवान्[2]। स चीनदेशाद् बौद्धग्रन्थान् प्राप्तुं दूतं प्राहिणोत्।

अन्येषु देशेषु बौद्धधर्मो लोकप्रियतामवाप। तथाहि— महायान-बौद्ध धर्मः चीन-कोरिया-जापान-त्रिविष्टपेषु हीनयानश्च लङ्का-वर्मा-स्यामे न्डोचाइनेण्डोनेशियासु च प्राचरत्।

गौतमबुद्धस्य शरणत्रयं परवर्तियोजनमासींद्यदा तस्य शिष्याणां संख्या सातिशयवृद्धिं लेभे। बुद्धं शरणं गच्छामि धम्मं शरणं गच्छामीति प्रारम्भिकस्थितौ समीचीनमासीत्। तदा नासीत् सङ्घः। भिक्षुबहुत्वे संघस्य कल्पना जाता। पूर्वतस्तु गौतमस्य मतमासींत्—

एको चरे खग्गविसाण कप्पो। सु० नि० खग्गविसाणसुत्ते।

तदा बौद्ध-भिक्षूणां संस्थोपनिषत्संन्यासवानप्रस्थ संस्थावत् प्ररूढा बभूव। गौतमस्तु विश्वस्य तादृशेषु धर्मोन्नायकेषु अनन्यतमं पदं भजते, ये वर्ण-जाति-व्यवसायलिङ्ग-वैषम्यादिकं कस्यचिज्जनस्य धर्मोपचयपथे न केवलं सिद्धान्ततोऽपितु व्यवहारतोऽपि विचारार्हं न मन्यन्ते। तत्र सर्वेषां योगदानं तस्याभीप्सितमासीत्।

तीर्थानि

स्वयं गौतमबुद्धेन आनन्दाय निर्दिष्टानि तीर्थनि सर्वोच्च-प्रतिष्ठां गतानि अद्यावधि विराजन्ते। तानि सन्ति लुम्बिनी गौतमस्य जन्मभूमिः, बोधगया गौतमस्य बोधि-स्थली, सारनाथो गौतमस्य धर्मचक्र-प्रवर्तन-स्थली, कुशीनगरं गौतमस्य निर्वाण-स्थली च। तद्यथा बुद्धः प्रत्यबोधयत्— एतानि संवेगं (वैराग्यं) कुलपुत्राणां मानसे जनयन्तीति[3]।

गौतमस्यास्थिभस्मावशेषं स्वीयप्रतिष्ठापदं मत्वा लिच्छवयः वैशाली-नगरे, शाक्याः कपिलवस्तुनि, बुलयोऽल्लकप्पे, कोलिया रामग्रामे, ब्राह्मणा वेठद्वीपे, मल्ला पावापुर्यां कुशीनगरे च स्तूपान् रचयामासुः। एतानि स्थानानि तीर्थनि बभूवुः। यानि यानि स्थानानि गौतम-चरिते

---

१. तुरुष्काः (तुर्काः) मूलतो हूणा बभूवुः

२. तोबा-खाकानो नैकस्तूपान् रचयामास, धर्मोत्सवांश्चायोजनामास।

३. महापरिनिब्बानसुत्ते।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रसिद्धिं गतानि तानि सर्वाणि तीर्थानि सन्त्येव। न केवलं भारते विदेशेष्वप्यसंख्यस्मारकाणि तस्य तीर्थभूतानि।

जैनधर्म

वैदिकयुगे परवर्तिजैनधर्मानुयायिनामाचार-विचारधाराया मूलरूपं संक्षिप्तमेव प्रकीर्णं विद्यते। आर्यसंस्कृतेरीषद् भिन्न एवासीत् यतीनां, वातरशनानां केशिनां, व्रात्यानां समवाया च यद्यप्येते सर्वे आर्यवर्गीया आसन्। तत्र वातरशना ऋग्वेदेऽधोविधं वर्णिताः —

मुनयो वातरशनाः पिशङ्गा वसते मला।
वातस्यानुध्राजिं यन्ति यद्देवासो अविक्षत॥
उन्मदिता मौनेयेन वाताँ अतस्थिमा वयम्।
शरीरेदमस्कामं यूयं मर्तासो अभि पश्यथ॥ ऋ० १०.१३६.२,३

अर्थादिमे मुनयो वातरशना (वायुना मेखलिताः), पिशङ्गपरिधानाः, मलदिग्धाः, वायुवत् संचारिणो देवस्थानीयाः सन्ति। मुनिजनोचित-वृत्तिभिस्तेऽलौकिकानन्दभाजो वायुभावं भजन्ते। तेषां प्रत्यक्षरूपमात्रं नेत्राभ्यां विभाव्यते, न तु वास्तविकी सत्ता प्रतीयते चर्मचक्षुर्भ्याम्।[1]

तत्र केशिनां परिचयोऽधोविधं प्रस्तावितम्

केश्यग्निं केशी-विषं केशी बिभर्ति रोदसी।
केशी विश्वं स्वदृशं केशीदं ज्योतिरुच्यते। १०.३६.१

तीर्थङ्कर-परम्परा

पूर्वोक्तेन स्पष्टं प्रमाणितं भवति यद् ऋग्वैदिकयुगे परवर्तिजैन-

१. वातरशनो वैदिकसाहित्येऽधोविधं परिचीयते—Wind-girt is applied to the Munis in the Ṛgveda X. 136.2 and the Taittirīy Āraṇyaka 1.23.2;24 4; II.7.1. Naked ascetics, such as are known throughout later Indian religious history, are widely meant. Vedic Index Vātaraśana. Mon. Williams explains Vātaraśana-Wind-girt, having only air for a girdle said of Munis and Ṛsis. Ṛgveda. Taittrīya Āraṇyaka. A naked monk (दिगम्बर, दिग्वास) भागवतपुराण। Patronymic of seven sages Ṛṣis of ऋष्यशृङ्ग, एतश, करिक्रत, जूति, वातजूति, विप्रजूति and वृषाणक)। ऋग्वेदानुक्रमणी विपुला--चलपर्वते स प्रथमोपदेश चकार।
महावीरमतमचेलकमासीद्, यतो हि नाम तस्य शिष्या अनुयायिनश्च निर्वस्त्रादिगम्बरा आसन्।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

संस्कृतेर्मूलरूपमामीदेव। जैनसंस्कृतेर्वैदिकयुग एव परमोन्नायक ऋषभो वृषभो वा प्रथितः। स[1] प्रथमस्तीर्थङ्करो जैनधर्मस्य परिलक्षितः। यजुर्वेदानुसारेण ऋषभदेवः, अजितनाथः, अरिष्ठनेमिश्च वैदिककालिका विलसन्ति।

ऋषभस्तु जैनधर्मस्य प्रथमस्तीर्थङ्करो वैदिक-पौराणिकधर्मस्य चतुर्विशत्यवतारेष्वन्यतमो भागवतपुराणेऽधोविधं वर्णितः —

उर्वरित-शरीर-मात्रपरिग्रहण उन्मत्त इव गगनपरिधानः प्रकीर्णकेश आत्मन्यारोपिताहवनीयो ब्रह्मावर्तात् प्रवव्राज। जडान्ध-मूक वधिर-पिशाचोन्मादकवद् अवधूतवेषः, अभिभाष्यमाणोऽपि जनानां गृहीतमौनव्रतस्तूष्णीं बभूव। परागवलम्बमानकुटिल-जटिल-कपिशकेशिभूरिभारः, अवधूतमलिननिजशरीरेण ग्रहगृहीत इवादृश्यत। भागवते ५.६.२३-३१। वर्णनमिदमाचाराङ्गस्य तीर्थङ्करेषु महावीरवर्णनं सम्यग्नुहरति।

पूर्वोक्तविवरणेन प्रतिभाति यन्मूलतो जैनधर्म आर्यधर्मस्यैवैका शाखा बभूव। न केवलमादितीर्थङ्करस्य हिन्दुधर्मेऽवताररूपेण पूजा वर्ततेऽपितु जैनानां प्रायाः श्लाध्यपुरुषा हिन्दुपुराणेषु प्रतिष्ठिता एव परिगृहीताः[2]।

तीर्थङ्कराः

आदितीर्थङ्करस्तु पूर्वोक्त एव। तदनन्तरं २३ तीर्थङ्करा बभूवुः। तेषु प्रमुखाः सन्ति विंशो नेमिनाथः त्रयोविंशो पार्श्वनाथः, चतुर्विंशश्च वर्धमानो महावीरोऽन्तिमोऽपि सर्वश्रेष्ठः।

नेमिनाथः

नेमिनाथस्तु कृष्णस्य पितृव्यस्य समुद्रविधयस्य पुत्र आसीत्। स्वविवाहोत्सव-प्रसङ्गे वध्यहशूनामार्तिं दृष्ट्वा ततः पलाय्य विवाहमेव परेषां प्राणनाशस्य कारणं विज्ञाय गिरि-नगर-पर्वतोपरि दिगम्बरत्वं कल्पयामास। स तत्रैव निर्वाणं लेभे।

---

१. ऋषभस्तु वृषभ एव। स ऋग्वेदे वर्णितः —
त्रिधा बद्धो वृषभो रोरवीति महादेवो मर्त्यानाविवेश। ४.५८.३
अयं वृषभ ऋषभ एव महादेवः शिव एव वैदिकसंस्कृतौ महादेवः।
ऋषभ एव शिवः, शङ्करो, हर इति महापुराणे २५.६८–७४ वर्णितम्।

2. Buddhism and Jainism must be regarded as religions developed out of Brahmanism not by a sudden reformation but prepared by a religion in movement going on for a long time.
Sacred Books of the East Series Vol. XXII. Iain Sūtras : Introduction p. XXII.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पार्श्वनाथः

त्रयोविंशस्तीर्थङ्करः पार्श्वनाथोऽष्टमशताब्दे ई०पू० वाराणस्यां राजकुले जातः। आ जन्मन एव स लोकैश्वर्यानासक्त आसीत्। जीवनस्य विनशनमेव परमं सत्यं दर्शं दर्शं स प्रव्रजितः। अहिच्छत्रनामके वने नैकोपसर्गैः पीडितोऽपि सोऽनिर्विण्णः केवली बभूव। तदनन्तरं ७० वर्षाणि यावत् स धर्मोपदेशं कुर्वन् शतायुः सन् पञ्चत्वं गतः। सम्मेदशिखरे स निर्वाणं जगाम। पार्श्वनाथपरम्परायां मुनीनां कृते वस्त्रधारणमनिषिद्धमासीत्।

महावीरः

महावीर आधुनिकविहारस्य मुजफ्फरपुर - जनपदे ई०पू० षष्ठशताब्दे उपगण्डकवैशालीनगरस्य राजवंशे जातः। लिच्छविगणस्य चेटको नाम राजा तत्रैव राजधानीं विधाय शशास। समीपमेव तत्राधुना वासुकुण्ड इति ख्यातं स्थानं प्राचीनकुण्डपुरः स्यात् महावीरस्य जन्मभूमिर्भवेत्।

त्रिंशद्वर्षीयो महावीरः प्रवजितो द्वादशवर्षं यावत् तपश्चकार। तदनन्तरं स ऋजुकूलानदी - तटे केवलज्ञानमवाप्तवान्। केवली महावीरः त्रिंशद्वर्षं यावदितस्ततः परिभ्रमन् भारतस्य विविधप्रदेशेषु निर्वाणपथं स्वीयजीवनचर्यया धर्मानुशासनेन च विशदीचकार[1]। राजगृहसमीपं विपुलाचलपर्वते स प्रथमोपदेशं प्राकाशयत्।[2]

महावीरमतमचेलकमासीत्, यतो हि नाम तस्य शिष्या अनुयायिनश्चनिर्वस्त्रा दिगम्बरा आसन्।

महावीरेण तस्यानुयायिनो मुनिः, आर्यिका, श्रावकः, श्राविकेति चतुर्वर्गेषु विभाजिता आसन्। तेषु मुनिः श्राविका च प्रव्रज्यानन्तरं गृहावासं परित्यजन्ति। श्रावकाः श्राविकाश्च गृहस्था भवन्ति[3]। एते चतुर्वर्गीया संघसदस्या भवन्ति।

---

१. तस्य व्याख्यानभूमयः सन्ति—काशी, कोशलः, पञ्चालः, कलिङ्गः, कुरुजांगलं, कम्बोजः वाह्लीकं, सिन्धुः, गान्धारा आदयः।

२. एतत्तु दिगम्बरमतानुसारेण प्रथितम्। पावेति ख्याते स्थले तस्य प्रथमधर्मोपदेशो बभूवेति श्वेताम्बरा मन्यते।

३. गृहस्थानां कृतेऽपि महावीरो भोग-विलासात्मकं-जीवनचर्यं न समाद्रतवान्। तेऽपि श्रद्धापरायण-सरलजीवनं यापयन्तः कौपीनधारिणोऽपि भवन्तिवति तस्य जीवनदर्शनम्।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

महावीरधर्मेऽहिंसा प्रथमस्थानीया विराजते । तस्याः सहचारिपञ्चव्रतानि सन्ति—अहिंसा, अमृषा (सत्यम्), अचौर्यम् (अस्तेयम्) अमैथुनं (ब्रह्मचर्यम्), अपरिग्रहश्च । एतान्येव शाश्वतं मुनिवराचरितानि महाव्रतानि यथाकालं गृहस्थैः परिपालितानि चाणुव्रतानि संज्ञायन्ते ।

महावीरस्य धर्मस्य दार्शनिकभूमिकाद्वोविधं वर्तते—जीवोऽजीवश्च चेतनो जड इति मूलतत्त्वं सम्मिश्रितमेव । चेतनस्य मनसा वाचा शरीरेण च याः क्रियाः प्रवर्तन्ते ताभिरेव जडतत्त्वं तं परिगृह्णाति । तस्मादेव कारणात् परस्पर-सम्बद्धौ तौ संसारे पुनः पुनर्जन्मग्रहणेन विचरन्ति । इदं कर्मजातं बन्धनं कर्मास्रवो वा कर्मबन्धो वा परिभाषितम् । कर्मबन्धनं यमैर्नियमैर्नियन्तुं शक्यते । संयमेन तपसा च पूर्वतो गृहीतानि कर्मफलानि अवरोद्धुं शक्यन्ते । ततश्चेतनो जडाद् विनिर्मुक्तः स्वीयमनन्तज्ञानदर्शनात्मकं स्वरूपमधि गच्छति । इयं स्थितिर्निर्वाणः, यत्र जन्म-मरण-परम्परा शाश्वतं विच्छिन्ना जायते ।

महावीरो ५२७ खीष्टपूर्वसंवत्सर इहलोकलीलां पावानगरे समाप्तवान् । तस्य निर्वाणोपलक्षेणाधुनापि प्रतिवर्षं दीपमालिकोत्सवः प्रवर्तते ।

महावीर-शिक्षा-संग्राहक इन्द्रभूतिनामको जिनमत–दीक्षितो गौतमगोत्रीयो वेदवेदाङ्गाधीती शीलसम्पन्नो ब्राह्मणो बभूव । स प्रथमगणधर इति ख्यातः । महावीरो साधूनां कृते दिगम्बरत्वं विहितवान् । पूर्वतरं पार्श्वनाथेन शरीरस्य उपरिभागाय, अधोभागाय च वस्त्रद्वयं निर्धारितमासीत् ।

लोकप्रियता

प्राचीनभारते जैनधर्मस्य लोकप्रियता समुदिता प्रतिभाति । बहवो राजानो जैनधर्मस्य पक्षधरास्तस्य प्रचार-प्रसारप्रवृत्तिषु सहाया आसन् । वैशालीराजश्चेटकः (६०१-५५२ ई० पू०) अजातशत्रुः (५५२-५१८ ई० पू०) मौर्यसम्राट् चन्द्रगुप्तः, अशोकः, सम्प्रतिश्च सुप्रथिता जैनधर्मसहाया आसन् ।

कलिङ्गराजश्चक्रवर्ती खारवेलः १७४ ई० पू० 'जैनधर्मो राष्ट्रियधर्म इति घोषितवान् । सोऽखिलभारतवर्षतो जैनविद्याधिषणान् समाहूय महाधर्मसम्मेलनमायोजितवान् । जैनसंघस्तं महाविजय-क्षेमराज-भिक्षुराज-धर्मराजोपाधिभिः समलङ्कृतवान् । तस्य प्रभावेण जैनधर्मप्रसारो वृद्धिमवाप ।

पश्चिमवङ्गदेशो जैनसंस्कृतेरुर्वरा भूमिः परिचिता । तत्र सुन्दरवने जैनमूर्तीनां दशकं के० डी० मित्रेण लब्धम् । प्रदेशेऽस्मिन् बहवो जैनमूर्तयो

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भैरवनाम्ना पूज्यन्ते । आचार्यक्षितिमोहनसेनः प्रमाणयति—परीक्षा करने से बङ्गाल के धर्म में, आचार में और व्रत में जैन धर्म का प्रभाव दृष्टिगोचर होता है । जैनों के अनेक शब्द बङ्गाल में प्रचलित हैं । प्राचीन बङ्गाली लिपि के बहुत से शब्द विशेष तौर से युक्ताक्षर देवनागरी के साथ नहीं मिलते, परन्तु प्राचीन जैन लिपि से मेल खाते हैं ।

दक्षिणभारते दिगम्बरजैनधर्मस्य भृशः प्रचारः समभवत् । चन्द्रगुप्त-मौर्यस्य शासनकाले यदोत्तरभारते दुर्भिक्षं द्वादशवार्षिकं समजायत, तदा भद्रबाहुः स्वसंघेन सह दक्षिणभारतं प्रति यातः । तत्र तमिलप्रदेशे चोलराजाः, पाण्डचराजाश्च जैनधर्ममाश्रयन्ते स्म ।

दक्षिणभारतस्य कलाः साहित्यिकप्रवृत्तयश्च जैनसंस्कृतिपरायणाः समृद्धिं गताः ।[1]

कर्णाटप्रदेशे दिगम्बरसम्प्रदायो भूयः संवर्धितः । तत्रत्या आन्ध्रराजा जैनधर्मसहाया आसन् । गंगवंशीया होयसलाः, राष्ट्रकूटाश्च कतिपयराजा जैना आसन् ।

पूर्वोक्तेषु प्रदेशेषु नैकराज्ञयः साध्वीमहिलाश्च जैनमन्दिराणां निर्माणेन ख्यातिं लेभिरे ।

गुर्जरप्रदेशः श्वेताम्बरजैनधर्मस्य कृत उर्वरां प्रास्तौत् । तत्र राष्ट्रकूट-चालुक्य-चावडावंशीया राजानस्तेषां बहवो मन्त्रिणश्च जैनमतावलम्बिनः संजाताः ।

मध्यप्रदेशे जैनधर्मस्य सम्यक् प्रसारो दृश्यते । तत्र बहवो कलचुरिराजा जैनसंस्कृतेः पोषका बभूवुः । जैनानां मन्दिराणि तत्र शतशो निर्मितानि प्रमाणयन्ति यत् प्राचीनयुगे मध्ययुगे च मध्यप्रदेशस्य बहुषु भागेषु जैनधर्मानुयायिनां संख्या गणनातीतासीत् । तत्र कतिपयजैनतीर्थभूता मन्दिर-समवाया अधोलिखिता अद्यापि पुरातनजैनधर्माभिवृद्धिं विभावयन्ति । वैतूलजनपदे मुक्तागिरिः, दमोह-जनपदे कुण्डलपुरं, निमाड़जनपदे सिद्धवर-क्षेत्रं, मध्यभारते बेसनगरे गुहाः, बुन्देलखण्डे सोनागिरिः, नयनागिरिः, द्रोणगिरिश्च पन्ना-जनपदे खजुराहो, टीकमगढ़समीपं पपौरा इत्यादयो जैनधर्म-शौक्ल्येन सह भव्यतामादर्शयन्ति ।

उत्तरप्रदेशे जैनधर्मस्याभ्युदयो न सम्यग्ज्ञातः । तथापि प्रदेशोऽयं चतुर्दशतीर्थङ्कराणां जन्मभूमिरिति प्रदेशस्य जैनदृष्ट्या पावित्र्यं विदधाति ।

1. Sir Walter Eliot : Coins of Southern India. p. 38,40,126

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्राचीनयुगे मध्ययुगे चोत्तरप्रदेशस्य जैनसांस्कृतिककेन्द्राणामवशेषा अधोविधं वर्तन्ते—

(१) बलरामपुर-समीपं श्रावस्ती ।
(२) बरेलीजनपदेऽहिच्छत्रा ।
(३) इटावातः १४ क्रोशदूरं परवानामके स्थाने जैनमन्दिराणां ध्वंसावशेषाः ।

श्रावकाणां कृते मूलतो जैनधर्मः शरीरसुखमुपेक्ष्याध्यात्मिकसाधनां प्रचारयति[1] । कालान्तरेऽपि दृश्यते यद् जैनधर्मावलम्बनेन गृहस्थस्य कस्यचित्पुरुषस्य चतुर्वर्गप्रतिपत्तौ कोऽपि अभावो बाधा वा नाभवत् । नैकमहाराजास्तेषां मन्त्रिणश्चोत्कृष्टा युद्धेषु विजेतारोऽभवन्निति भारतीयेतिहासे दृश्यत एव । जैनमहाराजखारवेलस्य भारतविजयः शिलालेखेनामरीकृतः । जैनगृहस्था महासमृद्धिसमेधितवैभवा एव महामहिमशालिमन्दिराणां विशालमूर्तीनां च निर्माणेनालौकिकैश्वर्यं शाश्वतं लेभिरे ।

धर्मस्य प्रयोजनानि

देशयामि समीचीनं धर्मं कर्मनिवर्हणम् ।
संसारदुःखतः सत्त्वान् यो धरत्युत्तमे सुखे ।। समन्तभद्रः

इह लौकिकजीवने कश्चित् पुरुषो धर्मानुबद्धैः सम्यग्-दर्शन-ज्ञान-चरित्रैः (रत्नत्रयेण) प्रत्यक्षमेव मानसिकप्रशान्तिं लभते । पारलौकिकलाभास्तु इहलौकिकसाधनानुसारेण पुण्येन कैवल्यप्राप्तिः[1], देवत्वं[2], इन्द्रपदप्राप्तिश्च[3] सम्भवन्ति । पापेन मरणान्तरं यथा हिन्दूशास्त्रे वर्णितं तथा जैनागमानुसारेण नरकगतिर्लभ्यते । धर्मेणैव नरकभयं नश्यति ।

---

१. स्वयं महावीरो निगदति—सांसारिकवस्तुभ्यः सम्बन्धं विहाय स्वशरीरं नित्यं पीडयित्वा शरीरान्तं कुर्यात् । आचाराङ्गे १३७

२. सम्यग्दर्शन-ज्ञानचारित्राणि मोक्षमार्गः । मोक्षो निर्वाणः । कैवल्यं तु निर्वाण एव । ततः पुनर्जन्म न विद्यते । कैवल्येन सिद्धव्रतः विश्वमण्डलस्य शिखरे ईषत् प्राग्भारलोके शाश्वतमवस्थितेऽशरीरी, आत्मरूपः ज्ञानदर्शनानन्दमयो रोचते ।

३. तपसा ये साधका निर्वाणं न लभन्ते ते देवलोके देवा भवन्ति । तत्र तेषां जीवनं प्रकामविलासादिभिः पूर्णतः सन्तोषप्रदमभिजायते । सल्लेखना-(अनशन) व्रतेन य उपासकगृहस्था असून् त्यजन्ति ते स्वर्गं इन्द्रपदभाजो देवराजा भवन्ति । इन्द्राणां स्वर्गे निवासो नियतकालिक एव स्यात् । ततः पुनस्ते मानवलोके जाता इन्द्रावतारो भगवन्निति अभिषिक्तश्चक्रवर्तिनः सम्राजो दिग्विजयिनो भवन्ति । तत्र वैराग्येण संन्यासेन च पुनः श्रेष्ठगतिकाः प्ररोचन्ते ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

धर्मलक्षणम्

धर्मस्य दशलक्षणानि जैनाम्नाये सन्ति—क्षमा, मार्दवम्, आर्जवं, सत्यं, शौचं, संयमः, तपः, त्यागः, आकिंचन्यं, ब्रह्मचर्यं च। धर्मपथे कण्टकत्रयं वर्जनीयम् —तृष्णा, माया, मिथ्यात्वं च। माया तु कुटिलतास्ति। शेषद्वयं नाम्नैव ख्यातम्। अन्यत्र सम्यग्दर्शन-ज्ञान-चारित्राणि धर्म इति प्रबोधितम्।

महाभारतेऽपि प्रोक्तम्—

एष धर्मो महायोगो दानं भूतदया तथा।
ब्रह्मचर्यं तथा सत्यमनुक्रोशो धृतिः क्षमा॥
सनातनस्य धर्मस्य मूलमेतत् सनातनम्॥ आश्व० ९१.३३,३४

पूजाविधिः

वैदिकदेवानां स्थाने जैनधर्मे पूज्याः पञ्चपरमेष्ठिनः सन्ति—अर्हन्तः[1], सिद्धाः[2], आचार्याः[3], उपाध्यायाः[4], साधवश्च[5]।

पञ्चपरमेष्ठिनां पूजाविधौ प्रथमः कल्पोऽस्ति नमस्कारः। तेषां कृते प्रत्येकशो नमस्कारो नियतः। यथा णमो अरिहन्ताणं।

मूर्तिपूजा जैनसम्प्रदाये भूयिष्ठं प्रचरति। प्रायोऽर्हतां तीर्थङ्कराणां ध्यानस्थमुद्रायां पद्मासने खड्गासने वा मूर्तयः शिलाभिर्धातुभिर्वा कृता मन्दिरेषु प्रतिष्ठापिताश्च विराजन्ते। सिद्धानां मूर्तयो धातुपट्टिकातः कल्पितमानवाकारस्य कर्तनेन प्रतीकतां यान्ति। आचार्योपाध्यायानां मूर्तयो विरला एव क्रियन्ते।

१. जीवन्मुक्तमहात्मानोऽर्हन्तो भवन्ति, ये सन्ति तीर्थङ्करा लोककल्याणैकनिष्ठाः। तेषां दर्शनं, ज्ञानं, सुखं, वीर्यं चानन्तं भवति। आजन्मनस्ते मति-श्रुतावधि-ज्ञानधारिणो भवन्ति। लोकेऽपि तेषामलौकिकविशेषाः सन्ति। यथा तेषां शरीरे रक्तमांसं च श्वेतवर्णं भवति। पशु-पक्षिणोऽपि तेषामुपदेशग्राहिणो भवन्ति। तीर्थङ्करं परितः सर्वविधप्रशान्तिर्विराजते। इहलोकलीलानन्तरं ते लोकोपरि अग्रभागे तिष्ठन्ति।

२. ये मुक्तात्मानः कर्मबन्धनात् सर्वथा विमुक्तास्ते ईश्वरा जायन्ते। ते एव सिद्धा इत्युपाधिं लभन्ते। अनादिकालतोऽसंख्या एव सिद्धा ईश्वरभूताः स्वयं-सिद्धाः, अनवशिष्टकर्माणः, कृतकृत्याः सन्ति ते। यथार्हन्तस्तथैव सिद्धा अपि केवलिनो भवन्ति।

३-४. आचार्या असाधूनाचारपथे नियोजयन्ति; उपाध्यायाश्च जिनमतानुयायिनां साधकानां दर्शनज्ञानदातारः।

५. साधवस्तु लोकाद्विमुखा जैनपथगामिनः जितेन्द्रिया भवन्ति।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नमःस्तुतिपूर्वकं मूर्तेः प्रदक्षिणा क्रियते । पश्चात् पूजारभ्यते प्रथममभिषेको भवति मूर्तेः पयसा, दधिना, धृतेन, रसेन वा । जल-चन्दनाक्षत-पुष्प - नैवेद्य - दीप - धूप - फलादि - द्रव्यैः पूजा विधीयते ।[1] पूजासामग्रीणां प्रत्येकशः समर्पणं स्तुतिपूर्वकं भवति । पूजया शारीरिकसुखस्य मानसिकशान्तेर्मरणानन्तरं मोक्षस्य सम्भावनास्ति । अवशिष्टसामग्रीणां मिश्रणेनार्घो विधीयते । तत्र मानसिकपूजापि प्रचरति । तस्यै द्रव्यादिकं नापेक्षितम् ।

मन्दिरेषु शास्त्राणि निधीयन्ते । पूजानन्तरं तेषां स्वाध्यायोऽपेक्षितः ।

श्रावक-(गृहस्थ-) धर्माः

मूलत ऋषभनामकः प्रथमस्तीर्थङ्करः श्रावकाणां जीविकार्थमधोविधं व्यवसाय-निर्णयं व्यधात्—

असिः, मसिः, कृषिः, शिल्पं, सेवा, वाणिज्या च । एतेषां व्यवसायानामनुवर्तने पञ्च यमा अवधारणीयाः —अहिंसा[2] सत्यम्, अस्तेयमपरिग्रहो ब्रह्मचर्यं च ।

गृहस्थकृतेऽष्ट मूलगुणाः —अहिंसादि पञ्चकस्यैकदेशपालनं मांस-मधु-मद्यानां सर्वथा त्यागश्च[3] । हिंसा (१)चतुर्विधा—संकल्पी, आरम्भी, उद्योगी, विरोधी च भवति । स केवलं संकल्पिहिंसां त्यजति । आरम्भस्तु कृष्यादि जीविका-व्यवसायः । स हिंसां विना क्वचिन्न प्रवर्तेत । तत्रापि स्वल्पतमहिंसा यस्मिन् व्यवसाये भवेत् स एव स्वीकरणीयः ।

२. रात्रिभोजन-त्यागः ।

३. जलं पेयम् ।

एकपत्नीव्रतं ब्रह्मचर्याणुव्रतं भवति । स्वल्पधनेन जीवन-यापनमपरिग्रहाणुव्रतं भवति ।

---

१. एतैः क्रमशः ज्ञान-शरीरगन्ध-समृद्धि-मन्दारमाला-धन-कान्ति-सौभाग्याभीष्ट-पदार्थ-मानादीनां प्राप्तिः सम्भवति । सागारधर्मामृते २.३०

२. जैनमतेन हिंसा द्विविधा भवति—द्रव्यहिंसा, भावहिंसा च । अविचारिता हिंसा द्रव्यहिंसा भवति । विचारपूर्वकं कृता हिंसा भावहिंसा भवति । अत्र भावस्तु मानसिकनियोग एव । द्रव्यहिंसा तु कर्तुर्बन्धनाय न भवति । लोकरक्षणार्थं हिंसा तु साधु इति मतं यशस्तिलके प्रतिपादितम्—

यः शस्त्रवृत्तिः समरे रिपुः स्याद् यः कण्टको वा निजमण्डलस्य ।
अस्त्राणि तत्रैव नृपाः क्षिपन्ति न दीनकानीनशुभाशयेषु ।।

३. पृथिवी-गर्भे जातानि (आलू-गृञ्जन-मूल-कन्द - शलजम-चुकन्दरादीनि) अखा द्यानि सन्ति ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

त्रिविधा गृहस्था भवन्ति—पाक्षिकः, नैष्ठिकः, साधकश्च । पाक्षिक आंशिकरूपेण पूर्वोक्तानि व्रतानि पालयति । निरतिचारं व्रतपालनमध्यात्म-साधना च साधकगृहस्थस्य लक्षणम् । मर्यादानुसारेण अधिकाधिकत्यागपूर्ण-जीवनमपेक्ष्यते गृहस्थानां कृतेऽपि ।

अष्टमी-चतुर्दशी तिथ्योरुपवासः । उपवासोऽयं न केवलं भोजनत्यागोऽस्ति अपितु सर्वेषामिन्द्रियाणां भोगाप्रसक्तिरेवात्राभिप्रेता ।

वैदिकधर्मस्य पञ्चमहायज्ञेन समतामावहन्ति जैनानां शीलव्रतानि । प्रतिदिनं साधुभ्यो भोजनदानं वैदिकधर्मस्यातिथियज्ञ एव । तत्र स्वाध्याय-ध्यानाध्यात्मचिन्तनानि समग्रं जायन्त इति ब्रह्मयज्ञः ।

गार्हस्थ्यं शनैः शनैः परित्यज्य श्रावकोऽन्तिमपदे मुनीनां संगतौ वसन् तेषां सेवां करोति[1] । सोऽन्तरङ्गबहिरङ्गं च तपश्चरति । प्रकरणेऽस्मिन् वैयावृत्यस्य सर्वोपरि स्थानं विलसति ।

भावनाचतुष्टयम्

अहिंसा - पालनदिशि भावनाचतुष्टयस्य योगो वर्तते । तदस्ति (१) जीवनमात्रं प्रति मैत्री (२) गुणिजनं प्रति प्रमोदः (३) दीनार्तान् प्रति कारुण्यम् तथा (४) विरोधिनः प्रति माध्यस्थ्यभावः ।

गुणव्रतत्रयम्

गुणव्रतानि सन्ति (१) दिग्व्रतं येनेयन्मात्रं गमनागमनम् (२) एतानेव समुद्र-नदी-पर्वत-ग्रामान् परितो मम कार्यक्षेत्रमिति देशव्रतम् (३) अनर्थ-करमुपदेश-चिन्तनास्त्रशस्त्र-विष-बन्धनादिकं कस्मैचिन्न दास्यामीति अनर्थ-दण्डव्रतम् ।

एतानि गुणव्रतानि मूलव्रतानि प्रगुणयन्ति । अत एवैतेषां गुणव्रतत्वम् ।

शिक्षाव्रतचतुष्टयम्

तत्र गृहस्थानां कृते सामायिकः, प्रोषधोपवासः, भोगोपभोगपरिमाणः, अतिथिसंविभागश्च शिक्षाव्रतानि भवन्ति । वैदिकत्रिकालसन्ध्यावत् सामायिको भवति । तत्र प्रातः, मध्याह्ने, सायंकाले च ध्यानं, चिन्तनं चानुष्ठीयेते । प्रोषधोपवासेन देववन्दनं, पूजनं, जपः, स्वाध्यायश्च प्रवर्तन्ते । अष्टम्यां चतुर्दश्यां च तस्य विधानं निर्दिष्टम् । आहार - पान-परिधान-शयनासनादीनां मात्रानिर्धारणं भोगोपभोगपरिमाणो भवति । अतिथि-

१. तत्र सेव्यपरिधौ आचार्योपाध्याय-तपस्वि - रोगग्रस्त-गण-कुल-संघ-साधु-लोक सम्मतादयः समायान्ति ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

संविभागस्तु चतुर्थः सामायिको येन अतिथये आहारौषधीनां सत्कारपूर्वकं प्रदानं भवति ।

पूर्वोक्तैर्व्रतैः श्रावकस्य ग्रहण-क्रमेण उत्थानमयी पदवी एकादश-संख्यका निर्मीयते । एकादश प्रतिमाभिधा त्यागमयी सा (१) सम्यग्दृष्टिः (२) पञ्च अणुव्रतानि, सप्त शिक्षापदानि (३) सामायिकाः (४) प्रोषधोषवासः (५) सचित्त-त्यागः (६) रात्रिभोजन-त्यागः (७) ब्रह्मचर्यम् (८) आरम्भ-त्यागः (९) परिग्रहत्यागः (१०) पूर्णविरागः (११) उद्दिष्ट-त्यागः ।[1]

मुनिधर्मः

जैनानां मुनिधर्मस्तु वैदिकधर्मस्य संन्यास-जीवनविधिना साम्यमावहति । प्रमुखलक्षणान्यधोविधानि सन्ति—नग्नता, सास्त्र-पिच्छिका-कमण्डलुमात्र-धारणं, स्तुति-वन्दना-नमोऽपराधनिन्दनानि च । अपराधि-प्रकीर्णसाधनानि सन्ति—केशलुञ्चनं, दिगम्बरत्वं, स्नानत्यागः, मुखमार्जनत्यागः, भूतले शयनं, तिष्ठन्नेव भोजनं केवलं सकृदेव मध्याह्ने च ।

द्वाविंशविधानि दुःखप्रदानि वैषम्याणि जैनसाधुभिः निर्विकारमेव सह्यानि सन्ति । इयं वृत्तिः परीषहाभिधा साधनास्ति निर्विकारभावेन पूर्णतः सर्वथा वा सहनम् ।

जैनधर्मसाधनायाः सम्यक् परिपालनेन साधकः सिद्धो भवति । तस्य पराक्रमपथः संक्षेपेणाधोविधो वर्तते—

सम्यग्ज्ञानत्रयेण प्रतिदिननिखिलज्ञेयतत्त्वप्रपञ्चाः
प्रोद्ध्य ध्यानवातैः सकलमथ रजःप्राप्तकैवल्यरूपाः ।
कृत्वा सत्त्वोपकारं त्रिभुवनपतिभिर्दत्तयात्रोत्सवा ये
ते सिद्धाः सन्तु लोकत्रयशिखरपुरीवासिनः सिद्धये वः ॥

सोऽयं सिद्धौ वैदिकधर्मस्य जीवन्मुक्त एव ।

धर्मादर्शः

राधाकृष्णन्-महाभागेन धर्मोद्भवा गुणवत्ता सम्यगालोचिता । तथाहि—

A truly religious man will spend his life in the service of the unfortunate, the unregenerate, the ignorant, the poor and the destitute. The so called stress on asceticism is not to be associated with a negative attitude. It is one of the positive participation

---

१. उद्दिष्टत्यागो द्विविधः—क्षुल्लकस्य, ऐलकस्य च भवति । क्षुल्लकस्तु एकवस्त्रं धारयति क्षुरेण केशवपनं करोति, पात्रेण भोजनं करोति च । ऐलकस्तु कौपीनमात्रं धारयन्ति, केशलुञ्चनं करोति, भोजनं करपात्रेण करोति च ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

in the work of the world. If God is the creator of the world, we participate to some extent in his nature. We are co-creators with the divine. Our duty is not to escape from time but to establish our supeirority to the tyranny of time. It is the conceit of redeeming the world by men whose hearts are emancipated by love. World-redemption (सर्वमुक्ति) has been the consistent theme of Hindu and Buddhist religons classies. A religion of this type is rational, ethical and spiritual.

Speeches and Writings. p. 224.

The spirit of this land from the time of the Ṛgveda till today, asks us to move together to develop common ideals and purposes.

संगच्छध्वं संवदध्वं सं वो मनांसि जानताम् । समानो मन्त्रः समितिः समानी ।

समानं मनः सहचित्तमेषाम् ।

समाना व आकूतिः समाना हृदयानि वः ।
समानमस्तु वो मनो यथा वः सुसहासति ॥

स पुनः स्पष्टयति—

The enfranchised human beings are free from all prejudices, they do not think of caste and community; they look upon the whole of mankind as one kindred and it is such people alone that are entitled to be called truly religious.

Speeches And Writings. p. 340.

धार्मिकसहिष्णुता

'पितामहस्य जगतः । गीता० ९.१७ । मया ततमिदं सर्वं जगत् । गीता० ९.४ । सर्वभूतानि मत्स्थानि । गीता० ९.६ ।

भारतीया धार्मिकसाहिष्णुता संस्कृतेर्मूलादेव प्रसूता दृश्यते । तत्रैकस्मादेव सतः सर्वे जाताः सन्तीति मानवातायाः कृते वेदस्य प्रथमोपदेशः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

परस्परसाह्यमुद्भावयति न तु वैरम्[1] । नैकधर्मा धार्मिकसम्प्रदाया श्चान्योन्याश्रयीभूताः स्वपूर्णतां विदधुरिति प्रागेव विशदमुदाहृतम् । तेषां जीवनोद्देश्यं तत्कृत उपाय-सम्भाराश्च समाना एवेति प्रागेव प्रतिष्ठितम्[2] । कतिपयदेवाः सर्वेषामादरास्पदम् ।

अथर्ववेदे व्रात्यान् प्रति समादरभावः महनीयो वर्तते । अनेनान्यधर्मावलम्बिनः प्रति सहिष्णुता प्रकटति[3] । स्वधर्ममपि चावेक्ष्य परधर्मं न दूषयेदिति पद्मपुराणवचनम् ।[4]

महाभारतानुसारेण—

ब्राह्मणः सर्वधर्मरतिर्भवेदिति आर० १९.३४

अथच—धर्मोयो बाधते धर्मं न स धर्मः कुधर्म तत् ।
अविरोधात्तु यो धर्मः स धर्मः सत्यविक्रम ।। आर० १३१.१०

---

१. एकस्मात् पुरुषाद् ब्रह्मणो वा जगतो विश्वेषामुत्पत्तिरिति ऋ० १.११.५१ ऋग्वेदे १० ९०; अथर्व० १०.१७; मुण्डक० २.१० दृश्यते ।

The idea involved in एकं सद्विप्रा बहुधा वदन्ति ऋ० १.१६४.४६ has fused all the jarring faiths of India into Hinduism which at rock bottom is this faith in one universal God. This is the priceless legacy which India has received from Aryan culture and which has unified all opposite and contradictory faiths and cults into that mysterious Hinduism.

Some Aspects of Ancient Indian Culture p. 23.

परवर्तियुगेऽपि नानको प्रवदति—(He) taught universal toleration and insisted that not only were the essential doctrines of Hinduism and Muhammadanism analogous, but that the supreme being adored either as Hari (Viṣṇu) or Allah was sought, after by the devout of both creeds.

Encyclopaedia of Religion and Elhics 1917.

२. मोक्षः स्वर्गो वा धर्मेण प्राप्यः । तपस्त्यागो, आचार-विचारशुद्धिः दया, दानं, परोपकारः सत्याहिंसास्तेयब्रह्मचर्यापरिग्रहादयो व्रतोपवासाश्च निःश्रेयसाय स्वर्गाय च शाश्वतं साधनमिति सर्वे धर्माः सम्प्रदायाश्चामनन्ति ।

३. अथर्व० १५.११.१३

४. सृष्टिखण्डे १९.३३२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अथर्ववेदे नानाधर्मान् प्रति सहिष्णुता सन्दर्शिता पृथ्वीदेव्या आदर्शेन। तद्यथा—

जनं बिभ्रती बहुधा विवाचसं नानाधर्माणं पृथिवी यथौकसम्। १२.४.४५

राज्ञां समक्षं मान्धातुरादर्श आसीदधोविधो महाभारतानुसारेण—

पृथिव्यां सन्ति ये धर्मा मया सर्वे समादृताः।

अशोकेन प्रणिगदितम्—

सारबुद्धिः स्यात् सर्वपाषण्डानाम्। समवाय एव साधुः। सर्वे पाषण्डा बहुश्रुताश्च कल्याणागमाश्च भवेयुः। द्वादशशिलालेखात्। सर्वे पाषण्डा वसेयुरिति च सप्तमशिलालेखात्।

अशोकः सर्वान् पाषण्डान् धार्मिकसम्प्रदायान् पूजयतिस्म। तत्रैव।

कनिष्कः स्वयं बौद्धधर्मानुयायी बभूव। तथापि स हिन्दू-पारसीक-धर्माश्च समादृतवान्। Pageant of India p. 80

राज्ञां वंशे नैकधर्मानुयायिनः परस्परं प्रेम्णा प्रावर्तन्त। मौर्यवंशे चन्द्रगुप्तो जैन आसीत्, अशोको बौद्धः, सम्प्रतिः जैनश्च। हर्षस्य कुलं, नैक-सम्प्रदायानां सम्भावनामनुष्ठितवान्।[1]

पूर्वाग्रहं परित्यज्यैव लोकः सत्यानुसन्धानेन पूर्णतामेतीति गौतमः शिक्षयति—

हित्वान सब्बानि विनिच्छयानि न मेधकं कुरुते जन्तु लोकेति॥
सुत्तनि० चूलवियूहसुत्ते १७

उपयो हि धम्मेसु उपेति वादं अनूपयं केन कथं वदेय्य।
अत्तं निरत्तं नहि तस्य अत्थि अधोसि सो दिट्ठिमिधेव सब्बन्ति॥
सु० नि० दुट्ठट्ठकसुत्त ८

न कप्पयन्ति न पुरक्खरोन्ति अच्चन्तसुद्धीति न ते वदन्ति।
आदानगन्थं गथितं विसज्ज। आसं न कुब्बन्ति कुहंचि लोके॥
सुद्धट्ठकसुत्ते ७

इत्यनेन धर्माचार्याणां कृते संयमव्रतमावश्यकं प्रतिपादयति बुद्धः। धार्मिकसहिष्णुता-दिशि बुद्धस्य चिन्तनमौदात्त्यं भजते। तथाहि—

---

१. हर्षवर्धनः शैव आसीत्। तस्य ज्येष्ठभ्राता राज्यवर्धनो बौद्धो बभूव। तस्य पिता सूर्योपासक आसीत्।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

परस्य चे बंभयितेन हीनो न कोचि धम्मेसु विसेसि अस्स ।
सद्धम्मपूजा च पना तथेव यथा पसंसन्ति सकायनानि ।
सब्बे पवादा तथिवा भवेय्युं सुद्धि हि तेसं पच्चत्तमेव ॥
सुत्तनिपाते महाविय्यूहसूत्तं ११,१२

गौतमो धार्मिकविवादमनाद्रियत । तदनुसारेणैवं विवदमानः केवली नास्ति ।[1] अथच—

परस्स वे धम्ममनानुजानं बालो मगो होति निहीनपञ्ञो ।
सु० नि० चूलवियूह—३
न चाहमेतं तथियं ति ब्रूमि । ५

स धर्माचार्यान् श्रमणा इति सत्यवादिनस्ते सन्तीति प्रबोधयन्नाह—

कस्मान्न श्रमणा एकं वदन्ति ।

धार्मिक - सहिष्णुतायाः परंपारं गौतमसूक्तिषु दर्शनीयम्—

इधेव सुद्धिमिति वादियन्ति नाञ्ञेसु धम्मेसु विसुद्धिमाहु ।
एवं पि तित्थ्या पुथुसु निविट्ठा सकायने तत्थ दलहं वदाना ॥
सु० नि० चूलवियूहे १५

ब्राह्मणा वेदवादरता अपि निर्वाणमधिगच्छन्तीति तस्य घोषो विविधधर्मप्रवृत्तिं समुन्नयति । स प्रबोधयति सुत्तनिपाते—

यं ब्राह्मणं वेदगुं आभिजञ्ञा अकिंचनं कामभवे असत्तं ।
अद्धा हि सो ओघमिमं अतारि तिण्णो च पारं अखिलो अकरवो ॥
मेत्तगूमाणव-पुच्छा ११

काणेमहाभागेन नैकराजानां सर्वधर्मसहायभावोऽधोविधं निदर्शितः —

(१) महीपालः पालराजः प्रथमः — परधर्मे सहायप्रवृत्तयः, बुद्धसम्भावना-निमित्तं ब्राह्मणाय ग्रामदानम् ।
(२) राजा शुभाकरदेवः परमसौगतः — २०० ब्राह्मणेभ्यः ग्रामद्वयदानम्
(३) गुप्तराजानो वैदिकधर्मानुयायिनः — नालन्दा-विश्वविद्यालयाय प्रचुरदानं प्रदत्तम् ।
(४) सम्राड् हर्षः शैवः — (क) परममौगतस्य तस्य ज्येष्ठभ्रातुः महतीं सम्भावनां प्रकटयति ।
(ख) कुम्भोत्सवे प्रयागे सर्वधर्मोन्नायकानां सम्भावनां चकार

---

१. सकं एकं दिट्ठिं परिब्बसाना विग्गय्ह नाना कुसला वदन्ति ।
यो एवं जानाति स वेदि धम्मं इदं पटिक्कोसमकेवली सो ॥
सुत्तनिपाते चूलवियूह-सूत्तं १

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(५) उषवदातः — ब्राह्मणेभ्यो बौद्धभिक्षुभ्यश्च सहैव महादानं प्रायच्छत् ।

(६) वलभिराजो गुहसेनः माहेश्वरः — ग्रामचतुष्कं बौद्धभिक्षुभ्योऽदात्

(७) कश्मीर-राजो ललितादित्यः — विहार-चैत्यस्तूपान् विष्णुमन्दिराणि च निर्ममे ।

राजेतराः सर्वसाधारणसमृद्धिशालिनो गृहस्था अवरसम्प्रदायानां विभूतीरौदार्यं च प्रकटयामासुः ।[1]

हनुमन्नाटकस्याधोलिखितश्लोको बहुविधसम्प्रदायानामैक्यभूमिकां प्रतिपादयति तेषामेकपरत्वेन—

यं शैवा समुपासते शिव इति ब्रह्मेति वेदान्तिनः ।
बौद्धा बुद्ध इति प्रमाणपटवः कर्तेति नैयायिकाः ।
अर्हन्नित्यथ जैनशासनरताः कर्मेति मीमांसकाः ।
सोऽयं वो विदधातु वाञ्छितफलं त्रैलोक्यनाथो हरिः । १.३

धर्माणां परस्परादानप्रदानाभ्यां तेषामनुयायिनां परस्परं सधर्मत्व-विवेकेन सहिष्णुता, वर्धिष्णुता च जायत एव । तथाहि बौद्धधर्मप्रर्वतको गौतमबुद्धो जैनधर्मस्य तीर्थङ्कर ऋषभश्च हिन्दूधर्मस्यावतारभूतौ परस्पर-सहिष्णुताया निदर्शनं प्रस्तुतः ।[2]

सर्वेषां भारतीयधर्माणां मानवकृते जीवनोद्देश्यं मोक्षः स्वर्गश्चेति साधनं च तपो विरतिश्च तेषां सहिष्णुतां सम्पादयन्ति ।

शङ्कराचार्यः षण्मतस्थापनाचार्यभूतः शैव-वैष्णव-सौर-शाक्त-गाणपत्य कापालिकानां सिद्धान्तान् सप्रमाणं प्ररोचितवान् । शङ्कर-तुलसीदासादयो विविध-सम्प्रदायानां समादृतदेवानां विनयगीतिं प्रणिन्युः ।
प्रो० राधाकृष्णन् शङ्कराचार्यस्य धार्मिकसहिष्णुतां पर्यालोचते—

Śaṅkarācārya is called the one who established the six different creeds. He codified all the creeds which were prevalent in his time; he gave respectability to them, and he pointed out

---

१. History of Dharmaśāstra Vol. II p 388.

२. गौतमबुद्धोऽन्यधर्माणां सत्सिद्धान्तान् समाद्रियत । महावग्गे १.७.५ । ते अन्य धर्मोपासकाः समादरणीया सन्तीति स शिक्षयते स्म । जैनसम्प्रदाये ६३ श्लाघ्य-पुरुषेष्वधिकतरा वैष्णवपुराणतो गृहीताः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

that you should not quarrel about these creeds themselves. Each one of them must be regarded as respectable, as authentic, only if you practise it will you be able to touch the heights.[1]

धार्मिकसहिष्णुतायाः परमोदाहरणं तामिलप्रदेशस्य तञ्जौर-जनपदस्य कोलंकज-वल्लन्तनपट्टु-ग्रामवासिनामल्लाह-मन्दिरे पूजा-विधानेषु दृश्यते। वर्णचतुष्टयस्य हिन्दवस्तत्र पूजोत्सवेषु सम्मिलिता भवन्ति । तत्र नास्ती-स्लामधर्मानुयायिनां वसतिः । ग्रामप्रधानोऽल्लाह - मन्दिरस्य व्यवस्थां विधत्ते । Times of India, date 16.9.82

अपरं च—

In Erumeli there is also a temple of Vavara, a Muslim devotee of the Lord. Vavara became his devotee after a fierce fight and was appointed his lieutenant by the Lord. Hindus and Muslims join in worshipping in the temple of Vavara, a symbol of Hindu Muslim unity. Pyyappan : Lord Ayyapan, p. 54.

अपरं च—

The entire teachings of Guru Nanak are but a synthesis of the fundamental principles of both the religions, By birth Kabir was a Mussalman and Nanak a Hindu. Yet they are both products of the fusion which was going on despite outward separation. Muslim kings endowed temples and Mathas and granted jagirs to pious Hindus and Pandits. Likewise such endowments were made to Muslim places of worship by Maratha rulers even after the political strife with Delhi Emperors.

Rajendra Prasad : Indian Inherituce Vol II. p. 150.

मध्ययुगे हिन्दु--मुस्लिमयोः परस्परसाह्यस्येदृशमुदाहरणं तत्कालीन-समाजस्य धर्मोद्भूतसात्त्विकताया औदात्त्यं प्रकटयति । तथाहि—दक्षिण भारतस्य—

(१) आदिलशाही-कुतुबशाही-आसफशाही-नृपा हिन्दू-संस्थानानां कृते वृत्तिवर्धनं चक्रुः । तथैव दिल्लीसाम्राज्य-विरोधका महाराष्ट्रीया राजानो मुस्लिमधर्मस्थानानि समवर्धयन् ।

(२) बोधगयामठस्य सम्पोषणाय महासमृद्धिशालिनी भूवृत्तिर्दिल्लीराजेन मुहम्मदशाहेन प्रदत्ता ।

(३) दारुवङ्ग-(दरभङ्गा) राज्यं सम्राजाकबरेण वर्त्तमानराजवंशस्य कस्यचिन्महापण्डितस्य वैदुषीं सात्त्विकतां च परिलक्ष्य प्रदत्तमासीत् ।

---

१. President Radhakrishnau's Speeches and Writings p. 262.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(४) हिन्दूप्रजानां शिक्षणार्थं सम्राजा शेरशाहेन महाधर्मदायं तासामाध्यक्ष्ये व्यवस्थापयामास।

(५) कश्मीराधिपतिः सुल्तान-जैनुलाब्दीनोऽमरनाथस्य शारदादेव्याश्च नैकशो दर्शनं कृतवान्, तीर्थयात्रिणां कृते धर्मशालाश्च निर्मितवान्।

(६) निजाम-वंशीया नृपाः सिक्ख हिन्दू-संस्थानां मन्दिरादीनां च कृते भूयिष्ठं धनराशिं वितरितवन्तः।

(७) औरङ्गजेबो महेश्वरनाथ-मन्दिराय बहुधनं प्रादात्।

(८) सार्वजनिकधार्मिकमहोत्सवेषु हिन्दवो मुसलमानाश्च समं भागग्राहिणो भवन्ति।

(९) बङ्गदेशस्य नैकमुस्लिमशासका महाभारतभागवतादीनां हिन्दू-धर्मग्रन्थानां बङ्गभाषयानुवादं कारितवन्तः।[1]

अङ्किताभिः प्रतिमाभिः शासकानां मुद्रासु धार्मिकसहिष्णुता रिचीयते मध्ययुगे इस्लामधर्मानुयायिनां कतिपयमहाराजानां मुद्रासु हिन्दूदेवानां प्रतिमा निर्मिता द्रष्टुं शक्यन्ते। तथाहि—

> Akabar's coins had the images of Rāma and Sītā with inscriptions on them in Devanāgarī. Foreign invaders both Greeks and Muslims were at least secular in character because their coins had images of Hindu gods. Coins of even invaders like Muhammad Ghori and Muhammad Ghazni bore sueh images.
>
> Dr. P.L. Gupta quoted in Hindustan Times dated 25.9.80.

अकबरस्य धार्मिकसहिष्णुतादर्शभूता विलसतिस्म। स ईरानराजं अब्दुसफरीं पत्रद्वारा प्रत्यबोधयत्—

भाँति-भाँति के धार्मिक सम्प्रदाय दैवी थाती हैं, और खुद परमेश्वर ने ही उन्हें हमारे हाथ में सौंपा है। इसलिए हमें उन सबको मिलाकर एक करना चाहिए।[2]

अकबरस्य सहिष्णुता-सिद्धान्ता अधोविधं सूत्रिताः —

१. सोऽल्लोपनिषदं लेखयामास।[3]

२. तस्य दीन-इलाही-मतमेकेश्वरवाद एव।

३. बलाद् धर्मपरिवर्तनं तेन निषिद्धम्।

---

१. अरब और भारत के सम्बन्ध पृ० १५०–१५५

२. दिनकरः संस्कृति के चार अध्याय पृ० ३९२

३. सत्यार्थप्रकाश उद्धृतेयमुपनिषद्।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

४. स्वधर्मनिकेतननिर्माणस्याधिकारोऽस्ति सर्वेषाम् ।

५. जजियाकरस्तीर्थयात्राकरश्च तेनापाकृतः ।

६. स धर्मपरिवर्तनं घृष्णास्पदं मेने ।

अकबरस्य धार्मिकप्रेरणा इस्लामधर्मस्य सूफीसम्प्रदायस्य जीवन-दर्शनाद् बहुशो गृहीतासीत् । सूफीजीवनदर्शनं भारतीयमूलददर्शनस्य (वैदिकब्रह्मवादस्य) अपरं नामैव ।[1] नैकेस्लाम सम्प्रदायाः परवर्तिहिन्दू-जीवन - दर्शनस्याकर्षणशीलतत्त्वानि स्वीकृत्योभयोर्धार्मिकसहिष्णुतां निबध्नन्ति । तथाहि—

इस्लामधर्मस्य नैकसम्प्रदाया हिन्दू--प्रभावतः समुत्पन्ना दृश्यन्ते । तथाहि-इस्माईलिया सम्प्रदायः खोजावर्गस्य वर्तते । अस्य सम्प्रदायस्य मान्यता-नुसारेण हजरत-अली विष्णोर्दशमोऽवतारः ।[2]

खोजामुसलमानानां मस्जिदः पृथगेव भवति । ते सर्वसाधारण-मस्जिदे प्रार्थनां न विदधति । अली--इलाहिया--सम्प्रदायस्य मुसलमाना आत्मनः पुनर्जन्म मन्यन्ते[3] ।

रामानन्दस्य कतिपयशिष्या मुसलमाना आसम् । तेषु कबीरः प्रसिद्ध-तमः । वैष्णावकवी रसखानस्य दीक्षागुरुर्गोस्वामी विट्ठलनाथ आसीत् ।[4]

चैतन्यस्य (१४८५--१५३३) शिष्येषु बहव इस्लामधर्मानुयायिन आसन् । तथैव स्वामिनोऽय्यप्पनस्य शिष्योषु हिन्दव इस्लामधर्मानु-यामिनश्च सम्मलिता बभूवुः ।[5] चैतन्यशिष्यी भक्तहरिदासो यवन आसीत् ।

---

१. सूफीदर्शनस्य मौलिकसिद्धान्ताः सन्ति—

(अ) ध्यान-समाधि-प्रार्थना-नामजपादिभिः परमात्मना ऐक्यं साधनीयम् ।

(आ) मनुष्यः स्वप्रवृत्तिषु परमात्मना नियोज्यते । यथा गीतायां प्रोक्तम्—

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ।।

(इ) जगति सर्वं परमात्मन एव जातम् ।

(ई) ईश्को (मधुमत्त्वं) मानवजीवनवृत्तेरौदात्त्यं प्रकरोति ।

दिनकरः संस्कृति के चार अध्याय पृ० ३०८,३०९

२. Thomas ; Mutual Influences of Mohammed and Hindus in India.

३. दिनकरः संस्कृति के चार अध्याय पृष्ठ ४७४

४. रसखानो मुस्लिम-कुले जातः ।

५. *Payappan : Lord Ayyappan p. 54.*

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सहस्रशो हिन्दवस्तस्य चरणस्पर्शेनात्मानं धन्यान् मन्यन्ते स्म । स्वयं चैतन्यो मरणानन्तरं तस्य शवं समाधिस्थं व्यधात् ।

कतिपयवैदेशिकोदाहरणानि धार्मिकसाहिष्णुतां प्रतिबोधयन्ति । तथाहि लङ्कायां कस्मिंश्चित् पर्वत--प्रस्थे पदचिह्नं स्वत एवोद्भूतं हिन्दू-मुस्लिम-बुद्धानां सममेव पूजनीयं विद्यते । मुस्लिमास्तद् हजरतादमस्य, बौद्धा बुद्धाय, हिन्दवश्च शिवस्य विष्णोर्वा पदचिह्नं सम्मान्य समाद्रियन्ते । पुरारब-यात्रिका ईराकीयाः सन्तश्च तस्य दर्शनार्थं सोत्साहं समागच्छन्तिस्म ।[1]

पूर्वदिश्यबृहत्तरभारते धार्मिकसहिष्णुता प्रावर्ततेतिमजुमदारो वर्णयति—

There was a spirit of religious toleration in all the colonies. Although various Brahmanical sects flourihed along with Buddhism, there was no animosity between their followers. On the other hand, kings and people alike paid revereuce to all religious seets. The same king endowed both Shaiva and Buddhist religious establishments or installed images of different seets and gods. In this respect the Indian colonists maintained the best traditions of their mother land.[2] तत्तु समर्थित सदानन्देन ।[3]

कालिदासः कुमारसम्भवे कलाद्वारेण धार्मिकसहिष्णुतां प्रभावयति । तथाहि—

एकैव मूर्तिर्बिभिदे त्रिधा सा सामान्यमेषा प्रथमावरत्वम् ।
विष्णोर्हरस्तस्य हरिः कदाचिद्वेधास्तयोस्तावपि धातुराद्यौ ।। ७.४४

परवर्तियुगे-मुसलमान-चिन्तकस्याकबरस्य दाराशिकोहस्य च धार्मिक-सहिष्णुतात्मकप्रवृत्तयः प्रशंसनीया आसन् । अकबरस्य दीन-इलाही-प्रचारो ऽस्यां दिशि महान् प्रकाशस्तम्भ इव राजते । काश्यां वेदान्तादिग्रन्थानधीत्य दाराशिकोह उपनिषदामनुवादं प्रणीतवान् । स चासौ 'सूफी-वेदान्तयोः सङ्गम इति ग्रन्थं प्रणिनाय, योगवासिष्ठस्य पारसीकभाषयानुवादं न्यबध्नाच्च ।[4]

---

१. अरब और भारत के सम्बन्ध पृ० १९१,१९२
२. Indian Inheritance Indian Colonies in the Far East. p. 260
३. Swami Sadanand : Hindu Culture in Greater India p. 145. तत्र सदानन्दः प्रथयति—It was contrary to the Aryan code to despise another cult.
४. अरब और भारत के सम्बन्ध पृ० २०३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

हिन्दुराजानां सेनासु इस्लामधर्मानुयायिनो मुस्लिमराजानां सेनासु हिन्दूनां संख्या प्रचुरायतेस्म। तथाहि—महीशूर-राज्यस्य राज्ञो बल्लाल-देवस्य लक्ष्यसंख्याकसेनायां प्रायः विंशतिसहस्रं मुस्लिमा आसन्।[1] बीजा-नगरराजस्य सेनायां १०,००० मुस्लिमा आसन्[2]। औरंगजेबस्य सेनाधिप-तयः सेनाश्च हिन्दूबहुलासीत्। मुस्लिम-व्यापारिभिः सह हिन्दूलोकानां राज्ञा-मपि सद्व्यवहारस्तान्देशेऽस्मिन्नधिकाधिकसंख्यायां वसतिं विधातुं प्रोत्साहया-मास।[3] तद्यथारबयात्री सुलैमानो निगदति—वल्लराज और उसकी प्रजा अरबों और मुसलमानों से बहुत प्रेम करती है। अरबव्यापारियों और नये बसे हुए मुसलमानों के साथ यहाँ लोगों का बहुत अच्छा और मित्रता-पूर्ण सम्बन्ध था। यही कारण था कि इस राज्य के नगरों में अरब लोग बहुत अधिक संख्या में बस गये और बिल्कुल अन्त समय तक बसे रहे।[3]

स्वजीवनविधौ शाश्वतं सर्वधर्मसहास्तित्वं पश्यन्तोऽपि लोका धर्माणां परस्परविमुखतां समाद्रियन्त इति मानवताया अभिशाप एव। न खलु कश्चिद् धर्म एकेषां कृते भवति अपितु सर्वेषां लाभाय, अभ्युदयाय सुखाय च प्रवर्तेतेति शुद्धात्मनादिकालतः मनीषा जागर्ति।[4]

भारतीय--समाजे हिन्दु--मुस्लिमयोर्जीवनस्याधिकांशप्रसङ्गेषु सह-चरित्वेन परस्पराकर्षक - सम्यता-संस्कृतितत्त्वानां निस्सङ्कोचं स्वीकरणं स्वभावतः संजातम्। मुस्लिमसमाजे मुहर्रमे ताजिया-शोभायात्रा, वैभव शालिवैयक्तिकजीवन - विधिः, ताम्बूलचर्वणं, ग्रहगत्यनुकूलं वस्त्रधारणं उच्चनीचजातिविचारः, शबेबरातपर्व, स्नानविधिरित्यादयो हिन्दू - संस्कृतेः प्रभावतोऽधिगृहीताः। सौभाग्यवतीनां मुस्लिमस्त्रीणां क्वचित्सीमन्ते सिन्दूर-

---

१. १३१७ ई० संवत्सरे मोरक्कोनगरस्य यात्री इब्नबतूता भारत-भ्रमणं कृत्वा अजायबुल अस्फार नामके ग्रन्थ एतद्विवृतवान्। अरब और भारत के सम्बन्ध पृ० २४४

२. अरब और भारत के सम्बन्ध पृ० २४५

३. अरब और भारत के सम्बन्ध पृ० २३५

४. कश्चिद् रुग्णः स्वरोगनिदानं कस्यांचिच्चिकित्सापद्धतौ यदा सम्भवं नानुभवति, सोऽपरामपरां चिकित्सापद्धतिमवलम्बते, यावत्कालं स आरोग्यं न लभते। यथावश्यकं स युगपदेव नैकचिकित्सा-पद्धतीः समाश्रयते। तथैवाभ्युदयनिःश्रेयस-कृते कस्यचिदेकधर्मस्य नैकधर्माणां वा समाश्रयणं परमं लोकहितावहमिति परमं सत्यं विश्वात्मना सर्वत्र शाश्वतं निदर्शितं प्रत्यक्षीक्रियते चेति लेखकस्य सम्मतम्।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भरणं हस्ते कंकण-धारणं च हिन्दुप्रभावात् प्राचरत्।[1]

सङ्गीतक्षेत्रे हिन्दु-मुस्लिमानां घनिष्ठतमा संगतिस्वीकृता दृश्यते।[2]

प्राचीनयुगे बहवो वैदेशिका अहिन्दवोऽपि भारतमागता भारतीयै राजभिरपि सम्भाविताः सदैव पुरातनसम्बन्धान् स्मारं स्मारं सुहृदिव व्यहरन्तिस्म।[3]

स्वधर्मरक्षणम्

ऐतरेयब्राह्मणानुसारेण राजा धर्मस्य ग्रोप्ता जायते। ८.१२। वरुणो राजानं धर्मस्य पतिं करोतीति शतपथे ५.३.३.९। अर्थशास्त्रानुसारेण—

स्वधर्मः स्वर्गायानन्त्याय च। तस्यातिक्रमे लोकः संकरादुच्छिद्यते। तस्मात् स्वधर्मं भूतानां राजा न व्यभिचारयेत्। स्वधर्मं संदधानो हि प्रेत्य चेह च नन्दति।

व्यवस्थितार्थमर्यादः कृतवर्णाश्रमस्थितिः।
त्रय्या हि रक्षितो लोकः प्रसीदति न सीदति॥ १.३.१४-१७

स्वधर्म एव राष्ट्रधर्मो विश्वधर्मश्चादर्शः प्रतिष्ठापनीयो लोकहिताय।

कौटिल्यो दण्डस्य फलं मन्यते प्रजासु धर्मार्थकामयोजना।[4] पूर्वोक्तं तु संग्रहेणोक्तम्—

---

१. हिन्दुओं और मुसलमानों के बीच जो समान रीति-रिवाज और आदतें प्रचलित हैं, उनकी काफी लम्बी सूची राष्ट्रपति राजेन्द्र प्रसाद ने अपनी पुस्तक खण्डित भारत में दी हैं। दिनकर : संस्कृति के चार अध्याय पृ० ४७४ इस्लाम का प्रभाव अमीरों की पोशाक और खान-पान पर भी पड़ा तथा रहन-सहन और लिबास में ऊँचे तबके में हिन्दुओं और मुसलमानों में कोई फर्क नहीं रह गया। मुगल अमीरों ने बहुत सी बातें हिन्दुओं की अपना लीं। इसी प्रकार हिन्दू अमीर भी बहुत सी बातों में मुसलमानी ढंग अपनाने लगे।
दिनकर : संस्कृति के चार अध्याय पृ० ४७७।

२. संगीत इस्लाम में वर्जित था। तब भी सूफी संगीत के बड़े प्रेमी थे। सूफियों के यहाँ संगीत साधना का एक अङ्ग समझा जाता था। भारतीय एवं ईरानी संगीत के मिलन से नई-नई उद्भावनायें हुईं।
दिनकर : संस्कृति के चार अध्याय पृ० ४७७।

३. जब पारसी लोग भारत पहुँचे, गुजरात के राजा यादव राणा ने उनका प्रेम से स्वागत किया और तब से वे धर्मप्राण लोग सचाई से भारतवासियों के साथ रह रहे हैं। दिनकर : संस्कृति के चार अध्याय पृ० ५६।

४. अर्थशास्त्रे १.४.१४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

चतुर्वर्णाश्रमो लोको राज्ञा दण्डेन पालितः ।
स्वधर्मकर्माभिरतो वर्तते स्वेषु वर्त्मसु ।। १.४.१९

न केवलं सिद्धान्ततो राजा धर्मस्य रक्षकोऽपितु यथापूर्वमेव दृष्टमशोक-कनिष्कखारवेलादिराजा धर्मप्रवर्धनाय बहु कृतवन्तः । भारतस्य स्वर्णयुगे गुप्त-वाकाटक-पल्लववंशीया राजानो धर्मानुष्ठानमुत्तालयितुं दृढसंकल्पा बभूवुः । तद्यथा के० एम० मुंशी समीक्षते—

The Gupta Emperors upheld Dharma in all its aspects and in consequence, its content was enriched and its scope enlarged. An overarching law of life, though it existed since Vedic times, it received under them the form which in the main it still retains. They drew their inspiration from it and in so doing carried the people with them.

Indian Heritage Vol II. p. 161–162.

भारतमाक्रम्येस्लाम-धर्मानुयायिनो बलाद्वा राजशक्तिसमर्थनप्रलोभनाद्वा-संख्यान् हिन्दूनिस्लामधर्मं स्वीकतु प्रेरयन्ति स्म । भारतं विहाय नैकेषु देशेषु तेषामाक्रमणकारिणां प्रभावात् प्रायः सर्वदेशवासिनः स्वधर्मं परित्यज्य मुसलमाना अभवन् ।

भारते तु कोटिशो हिन्दवः सन्त्रासिताः प्राणान्तकपीडाप्रपन्नाश्च मरणमेव वृतवन्त न तु धर्मपरिवर्तंतम् । नैकत्र सतीभूता धर्मप्राणवीरङ्गनास्तत्र प्रमाणम् ।

अपरं च दक्षिणभारतेस्य लिङ्गायता वीरशैवा वाराध्यशैवाश्चभ्युन्नता धर्म-परिवर्तनविरोधका बभूवुः । तद्यथा प्रो० नीलकण्ठशास्त्री प्रबन्धयति—

In its single minded devotion to Shiva .... and in its ideal of perfect equality among the Bhaktas, the new Shaivism was a worthy rival of Islam, and the impetus it gave to politics had not a little to do with the failure of Tughlaq rule to take root in many parts of Deccan.

A History of South India (1955) pp. 226, 417.

शङ्कराचार्यो भारतस्य चतुर्दिक्कोणे महामठान्[1] संस्थाप्य भारतीय धर्मस्य विष्वक्स्तम्भान् विधत्ते स्म । तद्यथा पन्नीकरो निदर्शयति—

It is undesirable that these great monasteries together with their subsidiary institutions, also under religious teachers have helped to maintain the orthodoxy of Shankar's teachings and the hold of Hinduism on the people.

Indian Inheritance Vol. II. P. 198.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

शाङ्करमठानां महतीयमुपलब्धिर्यत्ते हिन्दुधर्मस्य प्रत्नविशुद्धिमुद्धृत्य नवजीवनसंचारेण साफल्यं लेभिरे।

पन्नीकर-महाभागो धर्मरक्षणदिशि संस्कृतस्य शाश्वतयोगदानं विवृण्वन् प्रवदति—

The universality of the religious revival i.e. its prevalence at the same time from Cape Comorin to the Himalayas is undoutedly due to the pre-eminent influence that Sanskirt continued to exercise on the Hindu mind.....It is in fact Sanskrit that gives an all India character to the renaissance of the period. The crisis brought about by Islam led undoutedly to the popularisation of religion and literature.

Indian Inheritance Vol. II. p. 141-143

सनातनो धर्मः

मा नः पथः पित्र्यान्मानवादभि दूरं नैष्ट परावतः। ऋ० ८.७४.३
मा प्रगाम पथो वयम्।
मा यज्ञादिन्द्र सोमिनः। अथर्व० १३.१.५९
कठोपनिषदि ब्रह्म सनातनमस्ति। ५.६

महाभारते समर्थितमेतदधोविधम्—

कच्चिदाचरितां पूर्वैर्नरदेव पितामहैः।
वर्तसे वृत्तिमक्षीणां धर्मार्थसहितां नृषु॥ सभा० ५७.८

मनुः सनातनधर्मं स्वस्थं रक्षितुं प्रणोदयति।[1] गीता 'कुलधर्माः सनातनाः' इति सनातन-धर्ममाशंसति।

कालिदासः प्रथयति—

रेखामात्रमपि क्षुण्णादामनोर्वत्मनः परम्। रघु० १

बौद्धाः 'एस धम्मो सनन्तनो' इति ब्रुवाणाः पूर्वोक्तमेव समर्थयन्ति।

धर्मो विकसति, परिवर्तते, संशोध्यते चेति नात्र मनाक् सन्देहः, किन्तु तत्र भवेद् धर्मविधौ किंचित् शाश्वततत्त्वं यस्माद् व्यतिक्रमो भ्रंशकर इवाभिज्ञातः। तदेतस्य प्रमाणं श्रीमती रीज डेविड महोदयाया अधोवाक्येषु बौद्धधर्ममधिकृत्य दृश्यते—

१. उत्तरस्यां बदरिकाश्रमे पूर्वस्यां पुरीनामके तीर्थे पश्चिमस्यां द्वारकायां दक्षिणे च शृङ्गेरी-तीर्थे विराजन्ते मूलमहामठाः।

१. मनु० ९.६४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

That the Buddha is expressing not only his own convictions, the fruit of intense effort and self communing but also something that was and had in the infinite past been, and would ever be, objectively and constantly valid and true for any and every human society, may, something that was cosmic law eternal, necessary, omnipresent whether discerned or not. And the function and hall-mark of a Buddha was not to devie or create a new Dhamma, but to rediscover, recreate and revive that ancient norm.[1] Buddhism. p. 33.

राधाकृष्णन् महाभागः प्रमाणपुरस्सरं निगदति—

This country has been preserved all these ages not on account of its material prosperity or military prowess but because of its adherence to religious truth, which our saints and sages have testified to. We are living today on account of the great heritage which we have inherited. The saints by their Tapas sustain this world... ... ... Secretn ourishment is supplied to us by the great seers and saints of our country.

For national solidarity. There should be social justice, equality of men and women equality of all castes.

Speeches and Writings p. 332-333.

धर्मस्य नूतनप्रवृत्तयः

नात्र विस्मरणीयं यद् धर्मस्य नूतनप्रवृत्तयो देशकालापेक्षयाविर्भवन्ति। आदौ मनुना सत्यमेतद् विशदीकृतम्—

अन्ये कृतयुगे धर्मास्त्रेतायां द्वापरेऽपरे ।
अन्ये कलियुगे नृणां युगह्रासानुरूपतः ॥
तपः परं कृतयुगे त्रेतायां ज्ञानमुच्यते ।
द्वापरे यज्ञमेवाहुर्दानमेकं कलौ युगे ॥[2]

---

१. रीज़ डेविड्स संयुत्तनिकायस्य 'The City' नामकं सुत्तं प्रकरणेऽस्मिन्नाश्रयते इति तयाग्रे सूचितं प्रबोधितं च—And thns of course says every great reformer : The words that I speak are not mine.

२. अत्र ऋग्वेदानुसारेण सृष्टेरादौ—तपसस्तन्महिनाजायतैकम् ।
तपसोऽन्तिमफलं ब्रह्मज्ञानं, तस्य प्रवृत्तिप्रधानं सार्वलौकिकफलं यज्ञः, तस्य नैत्यिकोदाहरणं च दानमेव ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

राधाकृष्णन्महाभागेन सम्यगुदीरितं यद् धर्मपथे नूतनप्रवृत्तीनां समुदयस्तस्य जीवत्सत्तां प्रकटयति । विकासविहीनो यो धर्मः स मृत एव । स भारतीयं धर्मं लक्षयते—

Any religion becoming static, becomes stagnant and dies. The religion which has come down to us over many centuries is a religion which is perpetually refashioning itself, making itself responsive to the requirements uptodate.

Speeches and Writings. p. 339.

तदनुसारेण ऋग्वेदः, उपनिषदः, भगवद्गीता, शङ्कराचार्यश्च नवं नवं धर्मपथानुसन्धानं प्रवर्तयन्ति स्म ।

एकं जगद् विश्वकल्याणधायम्

जगतः पूर्वमृग्वेदानुसारेणैकमासीत् । तदनन्तरं पुरुषः प्रादुर्बभूव ।[1] तथाहि—

स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम् । १०.९०.१

तस्मात् पुरुषाद् विश्वमिदं जातमिति—

पादोऽस्य विश्वा भूतानि १०.९०.३
तस्माद्विराडजायत । १०.९.५
विराजो अधिपुरुषः । १०.९०.५

तस्मात् सर्वं ब्राह्मणादयः, सूर्यश्चन्द्रादयो जाताः ।

इदं वैदिकान्वेषणमेव राधाकृष्णन्महोदयस्याधोविधं मतमनुवर्तते—

Mankind has stemmed from one root, though it is split up into different communities. It is striving for the recovery of its basic unity and reconciliation of different cultures. The history of the new world, of one world, promises to be rich in range and majestic in its scope. Speeches and Writings p. 222.

यजुर्वेदे ऋषीः रुद्रं निवेदयति —

शिवेन वचसा त्वा गिरिशाच्छा वदामसि ।
यथा नः सर्वमिज्जगदयक्ष्मं सुमना असत् ॥ १६.४

धर्मो न केवलं मानवानां कल्याणाय प्रबभूव अपितु तदधिकृत्य द्विपदां

---

१. आनीदवातं स्वधया तदेकम् । १०.१२९.२ तपसस्तन्महिनाजायतैकम् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

चतुष्पदां ग्रामीणानां च 'शम्' यथा स्यात्तथा स्तुतयः प्रगीता ऋषिभिः।[1]

नैकलोकाः सर्वेषां कृते देवान् प्रार्थयन्ते स्म । विरलमेवैकस्य कृते प्रार्थनाः प्रगल्भन्ते । तद्यथा—जाता सुक्रतो पृण। ऋ० ८.१.१८ अर्थात् हे इन्द्र सर्वाणि भूतानि पूर्णानि कुरु।

मनीषिणः स्वदाक्ष्येण पृथिवीं सेवन्त इति अथर्ववेदस्य मूलमन्त्रः। ऋग्वेदानुसारेण द्यावा पृथिव्यौ विश्वशंभुवौ स्तः। १.१६०.१। अथर्ववेदानुसारेण वायुः सविता च भुवनानि रक्षतः। ४.२५.३। अर्थात् प्राणिमात्रं रक्षतः। हिरण्यगर्भादर्शेन कश्चित् पुरुषो भूतपतिर्भवेत्, पृथिवीलोकं द्युलोकं च धाययेत् (यजु० १३.४)

अथर्ववेदानुसारेण—प्रियं मा कृणु देवेषु प्रियं राजसु मा कृणु ।
प्रियं सर्वस्य पश्यत उत शूद्र उतार्ये ॥ १९.६२
स्वस्ति गोभ्यो जगते पुरुषेभ्यः ॥ १.३१.४

अग्निहोत्रेणान्तरिक्षं, दिवं, पृथिवीं च परितर्पयेदिति वैदिकी धारणा शतपथब्राह्मणे प्रकाशिता।[2] कौषीतकि ब्राह्मणानुसारेण—

त्वमेव वृणीष्व यं त्वं मनुष्याय हिततमं मन्यसे। ३.१

तदेव समर्थयति मनुरहिंसा-प्रकरणे—

यद् ध्यायति यत् कुरुते धृतिं बध्नाति यत्र च ।
तदवाप्नोत्ययत्नेन यो हिनस्ति न किंचन। ५.४७

मनुर्वेदानां विश्वकल्याण-प्रवृत्तिमधोविधं प्रथयति—

बिभर्ति सर्वभूतानि वेदशास्त्रं सनातनम् । १२.९९

शङ्खानुसारेण तर्पणविधौ 'अञ्जलित्रयजलदानेन सहाधोलिखित-मन्त्रपाठो चराचरलोकस्य तर्पणाय बभूव—

'आ ब्रह्मस्तम्बपर्यन्तं जगत्तृप्यतु'।[3]

अर्थशास्त्रे 'सर्वभूतहिते रतो राजानन्यां पृथिवीं भुंक्ते' इति १५.१८

---

१. इमा रुद्राय तवसे कपर्दिने क्षयद् वीराय प्रभरामहे मतीः ।
यथा शमसद् द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामेऽस्मिन्ननातुरम् ॥
गौतमोऽनुवदति—सब्बे सत्ता भवन्ति सुखितत्ता ॥ सु० नि० मेत्तसुत्त ५.१.११४.१
अशोकोऽपि शिलालेखेषु मानवेतरप्राणिनामपि सुखसंवर्धनाय पूर्तं कृतमिति लेखयामास।

२. शतपथ० ११.६.२.६। पुत्रो जायते स लोकं प्रत्युत्थायेदिति च ११.६.२.१०।

३. आह्निकप्रकाशे तृ० १४५
आब्रह्मस्तम्बपर्यन्तं यत्किंचित् सचराचरम् ।
मयादत्तेन तोयेन तृप्तिमायान्तु सर्वशः ॥ वायु० ११०.६४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

गरुडपुराणानुसारेण 'लोककल्याणाय नित्यं कर्मानुष्ठानं स्वीकरणीयम्। १.१०.१-२

अन्यच्च—सर्वेषां मङ्गलं भूयात् सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेत्॥

गरुड० २.३५.५२।

मेत्तसुत्ते समर्थितमेतदधोविधं सुत्तनिपाते—

'सब्बे सत्ता भवन्ति सुखितत्ता'।

रतनसुत्ते च—सब्बे व भूता सुमना भवन्तु॥

महाभारते सर्वलोकहितप्रकरणं प्रगुणतरं वर्णितम्।[1] तत्र युधिष्ठिरः 'सर्वलोकानां हितं किं भवेदिति मनो दधे'। सभापर्व १२.६। स निर्विशेषं सर्वेषां हितं चक्रे। सभा० १२.७। सोऽजातशत्रुरासीत्। सभा० १२.८

स्वयं भगवान् सर्वभूतानां सुहृत्। गीता ५.२९

सर्वलोकहितमशोकस्य परमो धर्म आसीदिति शिलालेखेषु तस्य वचांसि प्रमाणयन्ति—कर्तव्यं हि मे सर्वलोकहितम्। नास्ति हि कर्मान्तरं लोकहितात्। मे पुत्रदार-पौत्र-प्रपौत्राश्च पराक्रमन्तां सर्वलोकहिताय।

षष्ठशिलालेखात्।

विश्वसाम्यं प्रवर्तनीयमिति प्रकाशो विदेशेष्वपि प्रगल्भितो दृश्यते। स आसीदलक्षेन्द्रो येन सम्यक् प्रतीतमासीद्यद् विश्वमानवतायामुच्चावचभावौ निराधार एव।[2] तथाहि—

---

१. एतदर्थं वैदिकसर्वभावो गीतायां प्रगीतः—
सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि। ६.२९
सर्वभूतस्थितं यो मां भजति। ६.३१
लोकसंग्रहस्तु सर्वलोककल्याणमेव। ३.२०

१. अलक्षेन्द्रविषयकस्तत्रैकः संवाद ऐतिह्यपदमधोविर्धं लभते—

He was taught by Aristotle to treat all non Greeks as inferiors, as barbarians, as slaves. "You must not deal with them" was the advice Aristotle gave to Alexander when he came out. He came out, looked at the Persians, looked at the Afghans, looked at the Indians. Looked at them all and said, How can I treat them as inferiors, as barbarians? They are people with great intellectual powers, with great spiritual insight and they are capable of great socialogical investligation etc. He talked about one world.

President Radha Krishnan's Speeches and Writings. p. 50.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

Alexander brought together into one body all men every where, uniting and mixing in one great loving cup, as it were men's lives, their characters, there marriages, their very habits of life. He looked upon the whole inhabited world as his fatherland. All good men are of one family; the only foreigners are the wicked. Alexander felt that it was his saered mission to reconcile mankind. In Egypt, in Iran, in North West India, he felt the impaet of the great civilizations of the East and looked upon them as worthy partners of the Hellenic civilisation. Shortly before his death Alexander held a banquet to celcbrate the end of a great war and he invited to it 9000 people Hellenes and non-Hellenes. At the end of it he prayed for peace, for the partnership of all peoples of the world to live in amity and concord Homo-noia, of one mind; the world should be based on a communion of minds and hearts.

President Radha Krishnan's Speeches and Writings p. 221.

अहिंसा

भारतीयसंस्कृतौ हिंसायास्तथैव प्रतिषेधोऽस्ति यथा युद्धस्य । किन्तु कतिपययज्ञेषु हिंसा प्रचुरायते स्मेत्यत्र नास्ति सन्देहः । यथा युद्धेषु तथैव यज्ञेषु हिंसा प्रोत्साहिता । अन्यच्च जिह्वास्वादमात्राय हिंसादिकालत एव विगर्हिता । अपवाद एव यद् याज्ञिकी हिंसा यौद्धिकी हिंसावेति सर्वहित-काम्यतया न त्यक्ता । प्रमाणयन्ति वेदोपनिषदां वाक्यानि हिंसाया निरोधमधोविधम्—

देवा विश्वस्य भुवनस्य गोपाः ।
प्रियो देवानां प्रजानां पशूनां समानानां भूयासम् ।।

अथर्व० १७.१.२–५

यद्यपि याज्ञिकी हिंसा त्वहिंसेति सुगृहीतम्[1] तथापि नैकगौरवग्रन्थेषु यज्ञेऽपि हिंसा न करणीयेति वर्जितमेव ।[2]

---

१. विधिना या भवेद्धिंसा सा त्वहिंसा प्रकीर्तिता । गरुड० १.२२९.१५
अनेन वचनेन 'अहिंसा परमो धर्मः' इति सिद्धम् ।
सम्मितो हि दुराचारो यो हन्त्यविधिना पशून् । गरुड० १.९६.७१

२. इज्यायज्ञश्रुतिकृतैर्यो मार्गैरबुधोऽधमः ।
हन्याज्जन्तून् मांसगृध्नुः स वै नरकभाङ् नरः ।। अनुशासनपर्व० ११६.४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अहिंसा परमो धर्मस्तथाहिंसा परं तपः ।
अहिंसा परमं सत्यं ततो धर्मः प्रवर्तते ॥ अनु० ११६.२५
तेषां हिंसानिवृत्तानां ब्रह्मलोको विधीयते ॥ अनु० ११६.६३

मनुरहिंसां प्रतिपादयत्यधोविधम्—

संरक्षणार्थं जन्तूनां रात्रावहनि वा सदा ।
शरीरस्यात्यये चैव समीक्ष्य वसुधां चरेत् ॥ ६.६८

अज्ञानतोऽपि यदि कश्चित् प्राणी घातितः तर्हि शुद्धचर्थं प्राणायामो विधेयः । ६.६९ । मन्वनुसारेण मोक्षपथेऽहिंसायाः प्रथमोपयोगो विद्यत एव । ६.७५

एकेश्वरवादः, एकमुखता च

वेनस्तत्पश्यन्निहितं गुहा सद्यत्र विश्वं भवत्येकनीडम् ।
तस्मिन्निदं सं च वि चेति सर्वं स ओतः प्रोतश्च विभूः प्रजासु ॥
यजुर्वेदे ३२.८

अर्थात् तस्मिन् (ब्रह्मणि) विश्वमेकाश्रयं लभते, संगच्छते च । प्रजासु स व्याप्तः । अन्यत्रापि—

यस्येमे हिमवन्तो महित्वा यस्य समुद्रं रसया सहाहुः ।
यस्येमाः प्रदिशो यस्य बाहू । इत्यादि यजु० २५.१२

इदं तु ब्रह्मणो विश्वरूपं निदर्शितम् ।

'सर्वे जना एकमुखा भवन्तु' इति वैदिकी धारणा सम्प्रतिष्ठिता दृश्यते । तथा हि—

भारते एकेश्वरवादेन, देवानां परस्परमेकभावेन[1] च प्रभावित इव लोकः समाजे जनसम्पृक्तिं गुर्वीं कुर्वाण इव प्रतिभाति । ऋषयो वदन्ति—

सं जानानाः सं मनसः सयोनयः । अथर्व० ७.२०.१
संज्ञानं नः स्वेभिः संज्ञानमरणेभिः । अथर्व० ७.५२.१

सं जानामहे मनसा संचिकित्वा मा युध्महि दैव्येन ।

इयं प्रार्थना-श्विद्वयस्यानुग्रहेण सामाजिक-सौहार्दस्याभिवृद्धये सामूहिक-संगीतमासीत् ।

---

१. (क) प्रस्तुत ग्रन्थस्य पृष्ठ २९५ द्रष्टव्यम् ।
(ख) Vedic Mythology देव ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्यत्र वेदेऽस्मिन्—

'सं जानीध्वं सं पृच्यध्वं सं वो मनांसि जानताम्'[1] । इत्यनेन मन्त्रेण चतुर्दिशं प्रेम्णा परस्परसम्पृक्तिरनुमोदिता । समर्थितं च—

'सर्वा दिशः समनसः सध्रीचीः' । ६.८८.३

परस्परं प्रोत्साहयन्तीभिर्ऋषयः । यथा

आरोहत दिवमुत्तमा ऋषयो मा बिभेति न । अथर्व० १८.३.६४

एतदर्थं तैर्विनिश्चितमासीत्—

'प्रियो देवानां, प्रजानां, पशूनां, समानानां भूयासम्' । १७.१.२–५

यांश्च पश्यामि यांश्च न तेषु मा सुमतिं कृधि । १७.१.७

वैदिकयुगे बहवो देवाः सम्मता आसन् । ते सर्वे एकस्य महादेवस्य भेदा जनिर्वेति द्विविधं प्रतिपादितम्—

(१) एकस्मादेव सर्वे जाताः । यथा पुरुष-सूक्ते[2]—पुरुषस्य मनसश्चन्द्रमाः, चक्षोः, सूर्यः, मुखादिन्द्रः, प्राणाद् वायुरजायत । ऋग्वेदे १०.९०.१३,१४

(२) यस्मान्न जातः परोऽन्योऽस्ति । यजु० ८.३६

यत्र विश्वं भवत्येकरूपम् ॥ अथर्व० २.१.१–२

स नः पिता जनिता स उत बन्धुर्धामानि वेदे भुवनानि विश्वा ।

यो देवानां नामध एक एव तं सं प्रश्नं भुवनायन्ति सर्वा ॥ अथर्व २.१.३

---

१. समानं व्रतं सह चित्तमेषाम् ।

समानं चेतो अभि संविशध्वम् ।

समानी व आकूतीः समाना हृदयानि वः ।

समानमस्तु वो मनः यथा वः सुसहासति ॥ ६.६४.२, ३

प्रस्तुतग्रन्थस्य पृष्ठं ३२८ द्रष्टव्यम् ।

२. अन्यत्रापि—

इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः सुपर्णो गरुत्मान् ।

एकं सद् विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः ॥ ऋ० १.१६४.४६

सुपर्णं विप्राः कवयो वचोभिरेकं सन्तं बहुधा कल्पयन्ति ॥ ऋ० १०.११४.५

सर्वा दिशः पुरुष आ बभूव । अथर्व० १०.२.२८

इदमेव गीताया निष्कामकर्मयोगमूलम् ।

अकामो धीरो अमृतः स्वयम्भूः । अथर्व० १०.८.४४

Free from desire, wise, immortal, self-evident, satisfied with sap, not deficient in any respect—knowing that wise, unaging, young soul one is not afraid of death. अथर्व १०.८.४४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

उतास्मिन्नल्प उदके निलीनः। अथर्व ४.१६.३
धाता नाम स दाधार पृथिवीं धाता द्यामुत सूर्यम्। ६.६०.३
सम्राडेको विराजति। ६.३६.३

ग्रीक-वैदिकधर्मयोः साम्यम्

वैदिकधर्मस्य छाया ग्रीसदेशवासिनां प्राक्ख्रीष्टधर्मे सुस्पष्टमासीदिति मिलेटमहोदयो वर्णयति—

Religion for him (Greek) suggested Poetry and Music and Nature, his ancestors and the history of his country. His gods were the impersonations of the powers of Nature and of his own passions and attributes, of the Earth and the Sky and the sea, fire, wind and thunder, of Love and Wisdom. The gods were, further more, his own ancestors—every family traeed its origin to some hero who was the son of a god and a mortal. In form and desires the gods were beings like men. Like men, they loved and fought and quarreled, they had their favourites and their enemies; they often thwarted each other in their desire and frequently bore grudges against certain mortals or against other gods; and a great deal of their time was spent on earth; interfering, helping, hindering in the affairs of men.

Millett : The Art of The Drama p. 19.

धर्मप्रचारसाधनानि

धार्मिकजीवनमेवेहलोके परलोके चाभ्युदय-निःश्रेयसयोर्मूलकारणमिति श्रद्दधाना लोका धर्मस्य तत्त्वं विज्ञातुं प्रकाशयितुं च बहुविधं प्रायतन्त। न केवलं विपुलं धार्मिकं साहित्यं विरचितमपितु स्वपुत्रा शिष्या वा तं साहित्यकनिधिं शाश्वतीकर्तुं कण्ठाग्रीकुर्वन्त्विति यथाकालं पुनः पुनः श्रवणश्रावणादिकञ्च पुरस्कृतम्। अस्यां दिशि मनीषिणामृषीणां कवीनां च काव्य-मूर्तिचित्रवास्तुकलाविदां च समर्पणश्रद्धाभावेन सुकृतानि लोकरञ्जनानि यज्ञादिककर्म च सविशेषं समादरं भजन्ते। तत्र वर्तन्तेऽशोकस्य शिलालेखाः, स्तम्भस्तूपगुहाः समुद्रगुप्तादीनां धर्माचरणमुद्रा नैकराजानां विहार-चैत्य-मठ-मन्दिरादिषु धर्माचार्याणामद्यापि धर्मोपदेशं प्रतिध्वनयन्त्यो मूर्तयः।[1] महात्मनां चारित्रिकादर्शेन सत्त्वेन च प्रभाविता लोकास्तेषां धर्मानुयायिनो बभूवुः।

१. धर्मसभायोजिता। तत्र धर्मासने धर्माचार्यो धर्मोपदेशं करोति। पंक्तिबद्धधर्मप्रियजनता साधुवादेन कृतज्ञतां प्रकटयति। सत्तुभत्तजातक ४०२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

राजपदमपि परित्यज्य धर्मधुरन्धरा देशे विदेशे च यावज्जीवं परिभ्रमन्तो धर्मामृतेन मानवतामुच्चैः प्राणवतीं विद । न केवलं भारते विदेशेष्वपि प्रायः सर्वत्र धर्मविषयकपाठचक्रमः प्राथम्यं लेभे ।

पण्डितपरिषदा धर्मनिर्णयः

धार्मिकविधौ शङ्कासमाधानाय नवविधान - योगाय च प्राचीनयुगे पण्डितानां परिषद् संघटिता बभूव । तस्याः सदस्याः शिष्टा इति संज्ञिताः । उपनिषद्युगे विदुषामीदृशी परिषद् समितिरिति ज्ञायते ।[1] सूत्रयुगेऽपि दशसंख्याका तादृशी संस्था प्रावर्तत ।[2] यत्तु वेदस्मृत्यादिष्वनिर्णीतं तच्छिष्टेभ्यो ज्ञातव्यम् । अत एव धर्मप्रकरणेऽभिनवोदितविमृश्य-विषयाणां समाधानं शिष्टानामद्वितीयमुत्तरदायित्वपूर्णं कर्मेति रीतिः शाश्वतीभवेदिति प्रयतनीयं सनातनवादिभिः[3] । मनुः प्रमाणयति—

अनाम्नातेषु धर्मेषु कथं स्यादिति चेद् भवेत् ।
यं शिष्टा[4] ब्राह्मणा ब्रूयुः स धर्मः स्यादशङ्कितः ॥ १२.१०८

शिवाजी-महाराजेन-नियुक्तः पण्डितरावो मन्त्रिष्वन्यतमो धर्मानुसन्धाने नैकमहापण्डितानां साह्येन निर्णयं व्यधात् । तथा हि—कश्चिद् ब्राह्मणो मुहम्मदीयैः स्वधर्मीयो कृत आसीत् । स पण्डितरावो विद्वत्पण्डितपरिषदोऽनुमत्या तं बलात् परिवर्तितधर्मं जनं ब्राह्मणवर्णे स्वीकृतवान् ।[5] तत्रोदाहरणानि महाराष्ट्रीयेतिहासे बहुलीकृतानि सन्ति ।[6]

---

१. छान्दोग्ये ५.३.१ समितिः, बृहदारण्यके ६.२.१ परिषद् प्रश्नसमाधानायासीत् ।

२. अनाज्ञाते दशावरैः शिष्टैरूहविद्भिरलुब्धैः प्रशस्तं कार्यम् । गौतमधर्मसूत्रे २८.४६ । अपरं च द्रष्टव्यम् अपस्तम्बध० सू० १.३.११.३४

३. शङ्कराचार्योऽनुमोदयति—अत एव हि धर्मसूक्ष्मनिर्णये परिषद्व्यापार इष्यते । पुरुषविशेषश्चापेक्ष्यो दशावरा परिषत्, त्रयो वैको वेति । बृह० उ० ४.३.२ अधिकृत्य भाष्यम् ।

४. शिष्टास्तु गीताया कर्मयोगिनः ।

५. पी० वी० काणे—Hist. Dharm. द्वितीय भागे पृ० ७२

६. It may be noted in passing that Raje Netaji Palkar who was one of the great commanders under Shivaji, the founder of the Maratha Empire, was made a Muslim by the Mughal emperor Aurangazeb and was subsequently taken back into the Hindu fold by Shivaji. Hist. Dharm. Vol II p. 974

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मन्त्रशक्तिः

धार्मिकविधानेषु मन्त्रस्तुतिपूजादीनामस्ति कश्चित्प्रभावः प्रत्यक्षो वा अथवान्धविश्वासमात्रेण तेषां पारम्पर्यं प्रचरतीत्यस्मिन् विषयेऽधोलिखितं वृत्तमुदाह्रियते—

Mr. K. V. Shidore Shastri of Kolaba district caused a spark out of woods by reciting Navārṇava mantra. He recited the Mantras three time to eause the ignition. Thermocouple instrument placed in the kunda to measure the ignitious did not show any change in temperature till the wood caught fire.

Times of India May 21, 1974

प्रकीर्ण-धार्मिकविधानानि

Keith remarks—There are, however, hymns for marriage, and the funeral ritual, and a few hymnns dealing with magic rites, such as the removal of jaundice by the sun, the prevention of miscarriage and the prognostication of misfortune.

Religion and Philosophy of the Veda. Keith p. 256

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विश्वतोमुखं सौरभम्

उदारचरितानां तु वसुधैव कुटुम्बकम् ।
न पुप्फगन्धो पटिवातमेति न चन्दनं तगरं मल्लिका वा ।
सतं च गन्धो पटिवातमेति सब्बा दिसा सप्पुरिसो पवाति ।।

धम्मपदे पुप्फवग्गो ११

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ।। मनु० २.२०

That (Rgvedic) civilisation pervades in every corner of the civilised world, and is aroused about us every day of our lives.

Max muller; India What Can It Teach us ? page 74.

Movement of Indian ideas through Persia, Alexandria, Cardoba, Padua, and thence by Parison to the Rhine influencing and forming the thought and practice of the first great school of western mysticism. Rufus Johnson : The Flowering of Mysticism.

India is the source from which not only the rest of Asta bus the whole western world derived their knowledge and their religion. Heren : Historical Researches. Vol. II p. 45.

India was the mother land of our race and Sanskrit the mother of Europe's Languages. She was the mother through the Arabs, of much of our Mathematics; mother through the Buddha, of the ideals embodied in Christianity, mother through the village community of selfgovernment and democracy. Mother India is in many ways the mother of us all.

William James Durant

In a greater or less degree the influence of Indian civilisation made itself felt all over Asia. In the west, its influence declined early owing to the impact of Christianity and Islam. '.....We seldom realize the efforts behind (the great success in spreading the elements of Indian culture in all aspects such as language, literature, art and architecture all over the world.) What an amount of adventurous enterprises involving untold hardships and sufferings lay behind those cultural conquests can only be dimly realised when we read in the Tibetan chronicles the detailed anecdotes full of pathos and imbued with deep human interest. Indian cultural influence deeply permeated the soul of diverse races in Asia over widly extended religions and enabled them in many cases to emerge out of primitive barbarism.

Grater India p. 18, 19

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ओ३म् भूर्भुवः स्वरिति भूमण्डलं नभोमण्डलं स्वर्गमण्डलं च समग्रं नित्यमेव त्रिकालं सन्ध्याविधौ ध्यायन्ति ब्रह्मवादिनः। तेषां मानसेऽस्माकमिदं पृथ्वीमण्डलं कुटुम्बभूतमिति स्वाभाविकमेव।

ग्रन्थेऽस्मिन् सांस्कृतिकदृष्ट्या बृहत्तरभारतं यत् प्रकल्पितमासीत् तत्तु समग्रैशिया-महाद्वीपे प्रसृतं बभूव। अन्योऽपि वर्त्तते बृहत्तरभारतस्यावधारको राष्ट्रियसीमा। सोऽपि पारसीकखातं यावत् पश्चिमदिशि पूर्वद्वीपसमूहेन सह इण्डोचीनमिण्डोनेशियां च यावत् पूर्वस्यां दक्षिणस्यां उत्तरस्यां च चीन-मंगोलियां यावत् प्रसृतो बभूव। उभयदृष्टि-परिशीलनेन बृहत्तरभारतस्य गौरवशालिसांस्कृतिकसौरभं विज्ञेयमस्त्येव।

इब्न हौकल (९४३–७९ ई०) अरबयात्री सूचयति—भारत के महादेश में सिन्ध, कश्मीर और तिब्बत का भाग मिला हुआ है। भारत के पूर्व में फारस का सागर है और उसके उत्तर पच्छिम और दक्खिन मुसलमानों के देश हैं और उसके उत्तर में चीन है। मकरान से मंमूरा, बुद्ध और सारे सिन्ध प्रान्त से लेकर यहाँ तक कि कन्नौज (अफानिस्तान में) तक उसका अन्त होता है। अरब और भारत के सम्बन्ध पृष्ठ ३५

पश्चिमैशिया

पुरा भारतस्याङ्गभूतस्य पाकिस्तानस्य हरप्पा-मोहेन्जोदड़ो नगरयोः पश्चिमैशिया-प्रदेशे सांस्कृतिकसम्बन्धोऽद्यपूर्वं पञ्चसहस्रवर्षाणि प्राक् समवर्ततेति व्यापारिकवस्तूनां लब्धावशेषैः प्रतीयते।[1]

खीष्टपूर्वं प्रथमसहस्राब्दस्य पश्चार्धे पारसीकानां महासाम्राज्यं विस्तृत-मासीत्। साम्राज्येऽस्मिन् भारतीयवणिजां जलस्थलमार्गैर्व्यापार-क्षेत्रं संवर्धितमासीत्। परवर्तियुगेऽलक्षेन्द्रो भारतं यावद् विस्तृतस्य पारसीक-राज्यस्य विध्वंसं चकार। तस्याभियानेन भारत-ग्रीकदेशयोः सांस्कृतिक-सम्बन्धाः संवर्धिता बभूवुः।

---

१. एशियामाइनर-प्रदेशे बोगाजकोई-स्थले प्राप्तेनोत्कीर्णलेखेन १५०० ई०पू० भारत-पश्चिमैशिया-सम्बन्धः समर्थितः। मजुमदारो निगदति - The remarkable discoveries of Mohenjodaro have unmistakably shown that there was intercourse between that region and Western Asia in the third millennium before Christ. Indian Inherltance India and the World p. 235.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मेसोपोटामिया-सुमेरु-भारतयोः सम्बन्धाः

सिन्धु–सभ्यतायुगे खृीष्टत ४००० वर्षाणि प्रागेव भारनस्य नैकपश्चिदेमशैः सम्बन्धः प्रबभूवेति उत्तरभारतस्य नैकस्थलेषु सिन्धुप्रदेशे चोत्खनन-प्राप्तावशेषैः प्रमाण्यते। पुरा मेसोपोटामियाप्रदेशं यावद् भारतस्य सांस्कृतिकव्यापारिक-सम्बन्धः प्रायः सततं प्रबभूव।[२] रैप्सन महोदयः सूचयति—

The land-ways which united India with the west had thus beeome increasingly difficult from the middle of the third century B. C. but by sea commerce was still maintained with Mesopotamia (Babylon[१]) and Egypt (Alexandria) through the Persian gulf and the Red sea etc. Cambridge Hist. Vol I p. 516.

मार्शलमहोदयो मेसोपोटामिया-प्रदेशेन सह भारतीयसांस्कृतिकसम्बन्धं विवृण्वन् सूचयति—

It was about the same time (second millennium B. C.) that iron came into general use in Mesopotamia, and it is probable enough that the knowledge of copper also in a previous age was acquired from that region. Between the Babylonian, or Assyrian and Indian civilisation, indeed, many archaeological links are traceable, among which may be noticed, parenthetically, the remarkable resemblance presented by the oblong, short legged terracotta sarcophagi from the neighbourhood of Baghdad to those of a prehistoric date found at Pallāvaram and other places in the Madras Presidency.

Cambridge Hist. of India. Vol. I p. 615.

त्रयोदशखृीष्टाब्दे ईरानदेशे मंगोलानामाधिपत्यं प्राभवत्। तदा हुलाकूवंशीया बौद्धधर्मानुयायिनः मंगोलशासका मुस्लिमदेशेऽपि स्वधर्मं बलवत्तरं विहितवन्तः।[३]

---

१. द्वयोर्देशयोर्मुद्रा आभूषणानि, चित्राणि मूर्तयश्च भूयः साम्यं भजन्त इत्यनेन तयोः सांस्कृतिकसम्बन्धश्चिरकालिको दृढीभूतः प्रावर्ततेति स्पष्टं प्रतिभाति। सतीशचन्द्रकाला—मोहेंजोदड़ो तथा सिन्धुसभ्यता पृष्ठ २२६-२४६

२. Babylon प्रदेशः, बावेरूजातकं द्रष्टव्यम्।

३. राहुलसांकृत्यायन—मध्येशिया का इतिहास भाग २ पृ० ८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

एशिया-माइनर

एशियामाइनरे बोगाजकोई-स्थाने प्राप्तेन पट्टिकाभिलेखेन ज्ञायते यत्तत्र भारतस्य वेदविद्या - निष्णाता नैके पण्डिता उपनिविशन्ति स्म । अभिलेखेऽस्मिन्निन्द्र-वरुण-मित्र - नासत्यादिदेवानां चर्चा वर्तते । नैते देवा भारतं विहायान्यत्रोपास्या बभूवुः ।[1]

एशिया-माइनरस्य लम्सकस-नामके नगरे काचिद राजत-पट्टिका लब्धा, यस्यां भारतमातुर्वा भारतलक्ष्म्या वा प्रतिकृतिरङ्किता वर्तते । भारत-लक्ष्मीर्हस्तिदन्तेन निर्मित आसने विराजते शाटिकावृता । सा वामहस्ते धनुर्धारयति । तस्याः शिरसि वेष्टनमस्ति । भारतमातुरुभयपार्श्वे भारतीय-पशुपक्षिणो निषण्णाः सन्ति । दक्षिणभागे शुको वामतश्च हिमालयीय-चकोरोऽस्ति । पक्षिणामधस्तादुभयतः कुक्कुरद्वयं वर्तते समक्षं च सिंहश्चित्रकश्च स्तः ।[2]

अरबदेशेन सम्बन्धः

भारतेन सहारबदेशीयानां सम्बन्धः प्रागैतिहासिकयुगे[3]ऽपि बभूवेति तेषां मध्ये प्रचलितानां परम्परागतकथाभिः प्रमाणीभूतमिव प्रतीयते । तथा हि स्वयं मुहम्मदेन प्रोक्तम्—'मुझे भारतवर्ष की ओर से ईश्वरीय सुगन्ध आती है ।'[4] सुलेमान-नदवी-महोदयः प्रथयति—सैयदवंशीयाः शाश्वत-कालतोऽर्धभारतीयाः सन्त्येव ।[5]

सृष्टेरादौ हजरत-आदमो लङ्कायां स्वर्गादवातरत् । भारतस्य पवित्रता तस्याः कथाया मूले वर्तते ।[6]

प्रागैतिहासिककालत आरब्या वणिजः स्वदेशात् नौयानेन समुद्रतट-माश्रित्य रक्तसागरतः ईराकेरान - बिलोचिस्तान-सिन्ध-सौराष्ट्र-महाराष्ट्र-कालीकट-कन्याकुमारी-सिंहल-पूर्वसमुद्रतट - ब्रह्मा - स्याम-चीनदेशान् यावद्

---

१. पट्टिकेयमिस्ताम्बूलनगरस्य संग्रहालये रक्षिता वर्तते ।

२. पाम्पियाई नगरस्य ध्वंसावशेषु तादृशी हस्तिदन्तकृता मूर्तिः प्राप्ता । सा भारतीयनारीप्रतिमेति वेशभूषणादिभिः प्रकटति ।

३. भारत के साथ अरबों का व्यापारिक सम्बन्ध ईसा से कम से कम दो हजार वर्ष पहले का है । सुलेमान नदवी: अरब और भारत के सम्बन्ध पृ० ६२ ।

४. सुलेमान नदवी: अरब और भारत के सम्बन्ध पृ० ३

५. तत्रैव पृ० ४

६. मथुरा लाल शर्मा: भारतीय संस्कृति का विकास पृ० ८५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

द्वीपेषु महाद्वीपेषु च भ्रमन्ति स्म । केरलदेशस्य अरब-मिस्र-रोमसाम्राज्यै-र्व्यापारिकसम्बन्धाः प्रचुरायन्ते स्म ।[1]

विक्रमादित्यस्य धर्मदूताः

भारतस्य स्वर्णयुगे चन्द्रगुप्तो-विक्रमादित्यः स्वीयधर्मदूतानरबदेशे प्रेषयतिस्मेति जर्हम विन-तोई - नामकोऽरबीभाषाकविरधोविधं पद्येन प्रकाशयति—

"इत्रश्शफाई सनतुल विकरमतुन,
फहलमीन करीमुन यर्तफीहा वयोवस्ससू ।
बिहिल्लाहायर्मामिन एला मोतकब्बेनरन,
बिहिल्लाहा यूही कैद मिन होवा य फखरू । १ ।
फज्जल आसारी नहनोओ सारिमबेजेहलीन,
यरीदुन बियाबिन कजनबिनयखत रू ।
यह सब दुन्या कनातेफ नार्तफी विजहलीन,
अतदरी बिलला मसीरतुन फकेफ तसबहू । २ ।
कऊन्नी एजा माजकरलहदो बलहदा,
अशमीमान, बुरकन कद तौलु हो वतस्तरू ।
बिहिल्लाहा यकजी बैननावले कुल्ले अमरेना,
फहेया जाऊन बिल अमरे बिकरमतुन ॥ ३ ॥"

अर्थात् वे लोग धन्य हैं, जो राजा विक्रम के राज्य-काल में उत्पन्न हुए, जो बड़ा दानी, धर्मात्मा और प्रजापालक था। किन्तु ऐसे समय हमारा अरब ईश्वर को भूलकर भोग-विलास में लिप्त था । छल-कपट को ही लोगों ने सबसे बड़ा गुण मान रखा था। हमारे पूरे देश (अरब) में, अविद्या ने अंधकार फैला रखा था। जिस प्रकार बकरी का बच्चा भेड़िये के पंजे में फंसकर छटपटाता है, छूट नहीं पाता, वैसे ही हमारी जाति मूर्खता के पंजे में फंसी हुई थी। संसार के व्यवहार को, अविद्या के कारण हम भूल चुके थे, सारे देश में अमावस्या की रात्रि की तरह अंधकार फैला हुआ था। परन्तु अब जो विद्या का प्रातःकालीन सुखदायी प्रकाश दिखाई देता है, वह कैसे हुआ ? यह उसी धर्मात्मा राजा विक्रम की कृपा है, जिसने हम विदेशियों को भी अपनी दया-दृष्टि से वंचित

१. वेणीप्रसाद—हिन्दुस्तान की पुरानी सभ्यता पृ० ४६० । सातवीं शती ईसवी से लेकर पन्द्रहवीं शती तक भारत के व्यापार के मालिक अरब लोग ही रहे हैं । अरब और भारत के सम्बन्ध पृष्ठ ३९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नहीं किया और पवित्र धर्म का संदेश देकर अपनी जाति के विद्वानों को यहां भेजा, जो हमारे देश में सूर्य की तरह चमकते थे। जिन महापुरुषों की कृपा से हमने भुलाए हुए ईश्वर को और उसके पवित्र ज्ञान को जाना तथा सत्पथगामी हुए। वे राजा विक्रम की आज्ञा से हमारे देश में विद्या और धर्म के प्रचारार्थ आए थे।

प्राचीन काल में भारतीय सभ्यता ज्ञान-विज्ञान तथा वैदिक धर्म का प्रचार करने हेतु, हमारे विद्वान और साधु स्वेच्छा से अथवा भारतीय सम्राटों की प्रेरणा से विश्वभ्रमण किया करते थे। 'बृहत्तर भारत' जिस सुदीर्घ प्रक्रिया के फलस्वरूप अस्तित्व में आया तथा विश्व के कोने-कोने में आज भी भारतीय प्रभाव के जो स्मृति चिह्न परिलक्षित होते है, उनमें इन विद्वानों एवं साधुओं का महत्त्वपूर्ण योग है।

ऐसे ही कुछ विद्वान्, विद्या और धर्म के प्रचारार्थ, विक्रमादित्य ने भी अरबस्तान भेजे थे। हजरत मोहम्मद साहब के पूर्वकाल में अरबी के एक सुप्रसिद्ध कवि श्री जर्हम बिनतोई ने अपनी उक्त कविता में उन्हीं के प्रति कृतज्ञता ज्ञापन किया है। यह कविता 'सेअरुल उकोल' नामक संग्रह में समाविष्ट है, जो इस्तंबोल के राजकीय पुस्तकालय 'मुकतब ए जामहुरिया)' में रखा गया है।

अरबदेशे मुहम्मदो सप्तमशताब्दस्य प्रथमचरणद्वये तत्रत्यलोकप्रचलित-धर्मस्य स्थाने स्वीयमभिनवधर्मं प्रवर्तयामास। तत्र प्रचलितधर्मो मूर्तिपूजा-धिष्ठित आसीत्।[1] तस्य धर्मस्य प्रधानपूजास्थलं मक्कानगरे काबानामकं-मन्दिरमासीद्यस्य प्राङ्गणेऽसंख्येया मूर्तयो दूरदूरतः समागतैर्लोकैः पुण्यार्थं पूजिता आसन्। अयं मूर्तिपूजापरकधर्मो यथा पूर्वदिश्यप्रदेशेषु वर्मा-स्याम-मलय-सुवर्णद्वीप-सुमात्रा-जावा-बाली-बोर्नियो - भारतचीनादिदेशेषु तत्रत्य-लोकैरात्मसात्कृतस्तथैवारब्यादिपश्चिमैशियादेशेष्वपि सस्पृहं सुगृहीतमासीत्। राहुलसांकृत्यायनानुसारेण मक्का-मदीनानगरे व्यापारिणां सामन्तानां च वसतिर्बभूव। इमे सामन्ता धर्माधिकारभाजः प्रबभूवुः। तत्रासीदाकाशात् प्राप्तः कृष्णपाषाणः (हज्र अस्वद) तत्रत्यैः परं पूजितः। भारते पाषाणोऽयं शिवप्रतीक एव मन्यते। मुहम्मदस्य पूर्वजा अपि सूर्यादिदेवानां पूजका आसन्।

---

१. अरब के लोग बद्दू (बुद्ध, बौद्ध ?) कहलाते थे। सारा बद्दू-समाज घोर रूप से मूर्तिपूजक था। मक्के के हर एक मन्दिर में ढेर सी मूर्तियां थी। दिनकरः संस्कृति के चार अध्याय पृ० २७७। ये मूर्तियाँ भारतीय प्रभाव द्योतित करती हैं।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

काबामन्दिरस्य कुरैशवंशीयपूजाधिष्ठातृवंशे मुहम्मदस्य प्रादुर्भावः ५७० ख्रीष्टाब्दे बभूव। सोऽरबदेशीयानां महान् नेता प्रादुर्भूतः। यथाकालं न केवलमरबदेशेऽपितु सर्वेषु हिन्दू-बौद्धधर्मानुबद्धेषु देशेषु चीनेण्डोचीनभारतैशियादिदेशेषु हिन्दूबौद्ध-धर्मस्थले तस्येस्लामधर्मो बद्धमूलो बभूव।[1] भारतीयचिकित्साप्रणाली अरबदेशे प्रतिष्ठिता प्रतिभाति। भारतीयचिकित्सको मुहम्मदस्य पत्नचा आयशाया दुस्साध्यं रोगं चिकित्सतेस्म।

सप्तमख्रीष्टशताब्दस्य मध्यभागे कश्चित् पारसीको दासः प्रतिकारशोधनाय पैगम्बरस्य श्वशुरं खलीफाद्वितीयमुमरं जघान। प्रतिकारधुरन्धरा आरब्या ईरानध्वंस परायणाः सर्वान् जर्थुस्त्रसाम्प्रदायिकानाक्रम्य घ्नन्तिस्म शेषप्राणाश्च ते भारतं शरणमाजग्मुः।[2]

अब्बासी - वंशीया राजानो ग्रीक-संस्कृतभाषानिबद्धान् नैकग्रन्थान् अरबीभाषयान्ववदन्। ७६२ ख्रीष्टाब्दे खलीफा - मन्सूरो बगदादनगरं स्थापितवान्। इदं नगरं मूलतो भग (भगवता) दत्तमस्ति।[3] तत्र रावन्दीनां धर्मानुसारेण पुनर्जन्म भवतीति भारतीयप्रभावः प्रतिभाति।[4] तत आरभ्य मध्यैसियां यावद् बौद्धधर्मः सुप्रचित आसीत्। हाशिम-हाकिमपुत्रो मुकन्नाभिधो न केवलं स्वयमपितु आदम–नूहेब्राहीम–मूसेसावमुस्लिमान् अल्लाहस्यावतारममन्यतोपादिशच्च।[5] अपरं च—मन्सूरस्य राजसभायां हिन्दूज्योतिर्विदां प्राग्भाव आसीत। तत्रासीत् कनकापण्डितो ज्योतिषचिकित्सा-शास्त्रप्रवीणः।[6]

अरब-समुद्रीयतटे पारसिक-खाते बसरा-समीपं उबलानामको नौकाशय आसीत्। प्रदेशेऽस्मिन् नौकाशयद्वयमारब्याणामधिकारे चिरमवर्तत।

भारतीयनौकाशयेभ्योऽरबदेशे सुगन्धितकाष्ठं, चन्दनः, कर्पूरः लवङ्गः, जातिफलं, नारिकेल - वस्त्राणि, नागदन्तः, सीसकं, वेत्रं, वंशः इत्यादीनि प्रेषितानि। एतेषां प्रेष्यवस्तूनां नामान्यद्यापि उभयभाषयोः साम्यं भजन्ते। तथा हि—

---

१. मध्यएसिया का इतिहास खण्ड १ पृष्ठ २५५, २५६

२. तत्रैव पृ० २६१

३. राहुल सांकृत्यायनः –मध्येसिया का इतिहास भाग १ पृ० ३०३।

४. तत्रैव रावन्दीति मुस्लिमसम्प्रदायोऽष्टमशताब्दस्य।

५. तत्रैव पृ० ३०५

६. अरब और भारत के सम्बन्ध पृ० १२५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

संस्कृते (हिन्दी)	अरबीभाषायाम्
चन्दनम्	सन्दल
ताम्बूलम्	तम्बोल
कर्पूरः	काफूर
पिप्पली	फिलफिल
नीलोत्पलम्	नीलोफर
एला	हेल
त्रिफला	इस्त्रीफल
कार्पासः	कर्फस
नीलः	नीलज
नारिकेलः	नारजील
आम्रम्	अम्बज
निम्बू	लेमूँ

७७० ख्रीष्टाब्दे सिन्धप्रदेशात् प्रतिनिधिभूता ज्ञान-विज्ञानाचार्या बगदादं गतवन्तः। बृहस्पति-सिद्धान्त-नामा ज्योतिष-ग्रन्थः केनचित् पण्डितेनोपनीत आसीत् । अरबी - भाषायामयं अस्सिन्द-हिन्द - नाम्ना प्रसिद्धो बभूव । तदनन्तरमार्यभटीय-(अरजबन्द)मरबीभाषयानुवादितम् । अनुवाद-द्वारेणारबदेशीयानां कृते ज्योतिषग्रन्थाः प्रापिताः ।

कतिपयसंस्कृत-पारिभाषिकशब्दानामारब्यरूपाण्यधोविधानि सन्ति—

संस्कृते	आरब्ये
ज्या	जैब
उच्च	ओज
उज्जयिनी	उरैन
अधिमासः	बजमास

यहिया-बिन-खालिद - बरमकी भारतीयौषधीनानेतुं कंचित्पुरुषं प्रेषयामास । वैद्यः कश्चित् शासकीयानुवादविभागे अरबीभाषया संस्कृतचिकित्साग्रन्थाननुवादयितुं नियुक्त आसीत् ।[1] नवमख्रीष्टशताब्दे खलीफा-मवप्फिक बिल्लाह-अब्बासी कतिपयानुसन्धानपरायणान् विदुषो भारते प्रेषयामास । ते भारतीयौषधीनां तात्त्विकपरीक्षणाय नियुक्ता आसन् ।[2] खलीफा

---

१. अरब और भारत के सम्बन्ध पृ० ११९

२–३. तत्रैव पृ० १२०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मोतजिद बिल्लाह अब्बासी ज्योतिष-गणित-विद्यानदीष्णं अहमद-बिनखफी-दैलमीं स्वीय ज्योतिष-जिज्ञासा-शमनार्थं भारते प्रेषयामास ।

कतिपयचिकित्सा-विज्ञान-विषयक-ग्रन्था अरबीभाषयानूदिता आसन् । तेषु सुश्रुत-संहिता, चरक-संहिता, सिद्धिस्थानं, निदानं इत्यादीनि बहूनि-पुस्तकानि अरबीभाषयानुवादेनोपयोगीनि संजातानि । रुसाभिख्यायाः कस्याश्चिद् भारतीयमहिलाया नारीरोग-निदानविषयकग्रन्थस्य तत्रानुवादो विहितः ।[1] पशुचिकित्सा-विषयक-ग्रन्थः शानाकेन (चाणक्येन ?) प्रणीतो-ऽरबी-भाषयानूदितः[2] ।

कनका-पण्डित आयुर्वेदस्य ज्योतिषस्य च पण्डिततमः प्रसिद्ध आसीत् । तेन कृतानि षट् पुस्तकानि नाम्नैव ज्ञातानि सन्ति ।[3] अन्यज्योतिर्वित्त्रयं इब्ननदीमेनोल्लिखितम् । हस्तरेखा - विज्ञानविषयकग्रन्थश्चेब्नेन विवृतः ।[5] जजरुलहिन्दनामके पुस्तके भारतीयरमलं विख्यापितम् ।[6] रायनामकोऽपरः पण्डितः, सर्पविषौषध-विज्ञानमधिकृत्य यत्पुस्तकं रचितवान् तस्यानुवादोऽरबी-भाषयाकृत आसीत् । अपरोऽपि कश्चिद् ग्रन्थः पूर्वोक्तविषयमधिकृत्य भारतीय-पण्डितेन रचित आसीत् । तस्यापि अरबीभाषयानुवादो निष्पन्न आसीत् ।[8]

रक्तसागरस्य मुखभागे कस्मिंश्चिद् द्वीपे (सकोतरा ?) तत्रासीद् यवनारबदेशीयैः सह भारतीयानामेका वसतिः ।[9] अद्यापि तत्र सन्ति भारतीयानां 'बानियाना' इति ख्यातानां काहिरौमान-सूडानेराक-बहरैनादि-स्थानेषु व्यापारिणां संस्थानानि ।[7] आरब्या-व्यापारिणां व्यवसायेन भारतीय-राजानामतुलनीय आयः समजायत ।

१–२. अरब और भारत के सम्बन्ध पृ० १२२, १२५

३–४. विवरणं अरब और भारत के सम्बन्ध पृ० १२६-१२७

५. इब्ननदीय पृ० ३१४

६. अरब और भारत के सम्बन्ध पृ० १२८

७. Elphinsnstone : Vol I p. 182

८. अरब और भारत के सम्बन्ध पृ० ७१

९. दक्षिणी भारत के समुद्र-तटों के हिन्दू राजा अरब व्यापारियों से बड़ी आय करते थे । कालीकट और कारोमण्डल के राजा इस समुद्री व्यापार के कारण असीम सम्पत्ति के स्वामी थे । इलियट प्रथमखण्डे पृ० ६९–७०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

आरब्या इतिहासकारा भारतीयविदुषां ज्ञान-विज्ञानार्णवं समालोच्य प्रशंसावाक्यानि मुक्तकण्ठं निगदन्ति स्म। तथा हि[1]—

जाहिजः (नवमशताब्दीकः)—भारत के निवासी गणित और ज्योतिष में बढ़े हुए हैं। चिकित्सा-शास्त्र-निष्णात हैं। वे मूर्ति, चित्र, वास्तु आदि शिल्पों में अग्रगण्य हैं। शतरंज का खेल उनका निकाला हुआ है। सितार की विचित्र रचना करते हैं। नैकविध नृत्य के साथ काव्य, दर्शन नीतिशास्त्र में प्रवीण हैं। उनका कलेला-दमना (करटक-दमनक नामक पञ्चतन्त्रांश) हमारे पास आया है। विचार और चिन्तन की विद्या भी उन्हीं के पास से आई है।[2]

अङ्कानां लेखनस्य विधिं भारतेभ्य आरब्याः शिक्षितवन्तः, पश्चाद् योरपीया अरबदेशिकेभ्यः शिक्षितवन्तः।[3]

अरबदेशीयैः स्पेनदेशे विश्वविद्यालयाः संस्थापिताः। तत्र मध्ययुगे (११–१२ शताब्दे) योरपीया ज्ञान-विज्ञान-पारयिष्णवो भारतीयविद्याभिः सम्भृतमारब्यविद्यार्णवमतरन्।

ग्रीसदेशादरबदेशं यद् दर्शनं प्रापद्यत, तत्तु भारतादेव ग्रीसवासिभिः प्राप्तमासीत्। पाइथेगोरस (५८० ई० पू०) जीवहिंसाविनिन्दकः पुनर्जन्मनि आस्थावानासीत्। प्लेटो पुनर्जन्मसिद्धान्तं कर्मफलानुसारिणं व्याख्यातवान्। कथं नामात्मनो, ब्रह्मणैक्यमनासक्त्याजायत इति ग्रीकदेशदार्शनिकैर्भारताद-शिक्ष्यत। एतत्सर्वमुपनिषदां विलसितमस्ति। परवर्तिसूफीमते ब्रह्मज्ञानस्य स्पष्टच्छाया दृश्यत एव।

कनिष्कराज्यं, पश्चिमदिश्यबृहत्तरभारतम्

मध्यैशिया बृहत्तरभारतभूता महाराज-कनिष्केण संवर्धिता बौद्ध-संस्कृतेरनन्यप्रचार-प्रसारभूमिश्चिरं व्यराजत। तस्याः सांस्कृतिकप्रवृत्तीनां धर्म-कला-शिल्प-साहित्यरचनादिकोपलब्धीनामवशेषा अपि विश्वं विश्वात्मकं

---

१. अरब और भारत के सम्बन्ध पृ० १०३–१०५
अन्यौ इतिहासकारौ याकूबी, अबूजैद सैराफी च पूर्वोक्तमिव भारतीयवैदुष्यं प्रशंसन्ति। तत्रैव पृ० १०५

२. पह्लवीभाषातोऽष्टमशताब्देऽरबभाषयानुवादोऽभवत्।

३. तत्रैव पृष्ठ १०९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विधातुं प्रयतमाना इव मुखरायन्ते ।[1]

पुरा बहवो महात्मानो राजानश्च महाभूखण्डेऽस्मिन् स्वीयसांस्कृतिक समुद्यमेन विश्रुत - कीर्तयः प्रबभूवुः । तेषामादर्शतमस्य महाराजस्य कनिष्कस्य सांस्कृतिकमहावदानानां कीर्तनं चरितार्थतामुन्नमयेत् ।

न खलु मूलतो भारतवंशीयोऽपितु बृहत्तरभारतस्य महान् नागरिकोऽयं कनिष्क उत्तराधिकाररूपेण गङ्गातो वंक्षुपर्यन्तं साम्राज्यमवाप्य सिंहासनारूढोऽद्यापि प्रवर्तमानं शकसातवाहन-संवत्सरं प्रवर्तयामास । ततः परं मध्यैशिया भूखण्डस्योत्तरतमदिग्विभागे ख्वारेज्म-प्रदेशं यावत् स्वराज्यसीमामवर्धयत् । तस्य शासनपरिधौ आधुनिकोजबेकिस्तान-ताजकिस्तान-प्रदेशौ सन्निविष्टौ बभूवतुः ।

कनिष्केण निगृहीताश्चीनदेशीया राजकुमाराः पूर्वपञ्चनदप्रदेशस्य जालन्धर-समीपमवस्थापिताः । सोऽयं प्रदेशश्चीनभुक्तिरिति ख्यातो राजकुमारैः कृतेन महाविहारेण समलङ्कृतः । तस्य यथाकालं नवीकरणाय तै राजकुमारैर्यद्धनं निखातमासीत् तेन ह्वेनसाङ्गो भारतदर्शनावधौ तस्य नवीकरणं विधत्ते स्म ।

अफगानिस्तानेन सम्बन्धाः

प्राचीनकाले चिरमफगानिस्तानं भारतमेवासीत् । वस्तुतो हिन्दुकुशपर्वताद् दक्षिणस्यां भूखण्डो भारतनाम्ना प्रथित आसीत् । ऋग्वैदिकार्याणां प्रेष्ठा भूमिस्तत्रासीदिति तत्रत्यनदीनां कुभा (काबुल) सुवास्तु-क्रुमु-गोमतीनामृग्वैदिकोल्लेखेन प्रतीयते । ऋग्वैदिकदाशराज्ञयुद्धे तत्रत्या नैकराजा अयुध्यन्त । परवर्तियुगे वैदिकसंस्कृत्या सह बौद्धसंस्कृतेः सुषमसामञ्जस्यं तत्र संजातम् । तत्र प्राप्तानां भूरिशः शिल्पकलाकृतीनामवशेषाः पुरातनं भारतीयतायाः प्रगमनं प्रद्योतयन्ति । ख्रीष्टपूर्वं चतुर्थशताब्देऽफगानिस्तानदेशीया आश्वकायना अलक्षेन्द्रेणायुध्यन्त । त एवाधुनिकाफगानिस्तानवासिनां पूर्वजा आसन् ।

---

१. ख्वारेज्म पर कनिष्क के भी बहुत समय बाद तक कुषाणों का प्रभाव रहा, यह रूसी विद्वान् स्वीकार करते हैं और ईसा की दूसरी-तीसरी शताब्दी के ख्वारेज्म की संस्कृति को कुशान्स्कया कुलतुर (कुषाणीय संस्कृति) कहते है । राहुल सांकृत्यायन—मध्येशिया का इतिहास भाग २ पृ० २०८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मौर्यकालेऽफगानिस्तानाद् बङ्गदेशं यावच्चन्द्रगुप्तसाम्राज्यं विस्तृतं बभूव[1] । तदनन्तरं फाह्यान-ह्वेनसांगौ अफगानिस्तानेन भारतस्यैक्यं वर्णितवन्तौ[2] । आधुनिकोत्खननेनाफगानिस्तानस्य भारतीयता सुप्रकटिता विभाति । तथाहि—हड्डानामके स्थले ५३१ स्तूपास्तक्षणेन समलंकृताः प्राप्ताः; बामियान-नगरे बुद्धस्य क्रमशः ६५, ११५ हस्तोच्छ्रितं मूर्तिद्वयमस्ति । प्रदेशेऽस्मिन् भित्तिचित्राणि, गुहाभवनानि, संस्कृतेनोत्कीर्णलेखाश्च विराजन्ते ।

ख्रीष्टपूर्वं षष्ठशताब्दे तस्य प्रदेशस्य गान्धार-कम्बोजादिराज्यं बौद्धग्रन्थेषु वर्णितम् ।

गान्धारं (कन्धारं) परितः प्रदेशः पूर्वं श्वेतभारतम् (White India) इति प्रथित आसीत् । तद्धिकृत्य जेम्स डार्मेस्टीटरः प्रवदति—

Hindu civilisation prevailed in these parts, which in fact, two centuries before and after Christ were known as White India

---

१. मौर्यकाल के बाद भी वहाँ के राजवंशों पर पूर्ण भारतीय प्रभाव था और उनके सिक्के, अभिलेख, कलाकृतियाँ, साहित्य आदि सभी भारतीय थे। पांचवीं और सातवीं शताब्दी में आने वाले फाह्यान और ह्वेनसांग नामक चीनी यात्रियों ने इस प्रदेश को भारत का ही अंग माना था। स्वात की घाटी में स्थित उद्यान का उल्लेख करते हुए फाह्यान ने स्पष्ट कहा है—यह उत्तर भारत का एक भाग है। लोग मध्यदेश की भाषा का प्रयोग करते हैं और लोगों का भोजन-वसन भी मध्यदेश के लोगों जैसा ही है। बौद्धधर्म का वहाँ पूर्णप्रचार है। भार्गव—प्राचीन भारत का इतिहास पृ० ४९१

Eastern regions Afghanistan were always regarded as parts of India and the rest of the country remained Indian in culture and predominently within the political orbit of India.R.C. Majumdar : Indian Inheritance Vol. II, p. 239.

२. ह्वेनसांगानुसारेण लमगान-जलालाबाद-स्वातघट्टादयो भारतस्याङ्गानि बभूवुः। बामियानघट्टे बौद्धधर्मस्य विशेषप्रसारोऽभवत् । तत्रत्यराजो बौद्ध आसीत् । शतशो विहाराः, सहस्रशो बौद्धभिक्षवस्तत्रासन् । राजा हर्षवत् प्रतिपञ्चवर्षं सर्वस्वदानेन पुण्यसंचयमुत्कर्षयामास । तत्र कपिशा (आधुनिक काफिस्तान प्रदेशस्य राजा जात्या क्षत्रियो बौद्धधर्मानुयायी बभूव । तस्मिन्प्रदेशे शतविहारेषु षट्सहस्रबौद्धभिक्षव आसन् । हिन्दूधर्मस्य मन्दिराणि तत्र विलसन्तिस्म । नवम-दशमशताब्दयोस्तत्र पूर्वाफगानिस्ताने हिन्दूवंशीयानां शाहीनां राज्यमासीत् । भार्गव—प्राचीन भारत का इतिहास पृ० ४८१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

and remained more Indian than Iranian till the Muslim conquest.[1]

दशमख्रीष्टशतकेऽपि गान्धारो राजपूत-क्षत्रियाणां देश-विशेष आसीत् ।[2]

महमूद-गजनवी-नामकस्याक्रमणकारिणः सेनायां बहुसंख्यका हिन्दव आसन् । यदा महमूदो मध्येशिया-भूखण्डे आक्रमते स्म ते हिन्दवस्तस्य भृशं साह्यमाचरन् । तिलकनामकः कश्चिद्वीरस्तस्य सेनायामुच्चपदाधीश आसीत् । यदा नियाल्तगीन इति ख्यातः सामन्तो महमूदविरोधं समाचरत्, तिलकस्तस्य प्रशमनाय प्रेषितः ।[3]

काबुलनगरात् ३० कीलोमीटर दूरं तपसिकन्दरे (Alexander Hill) मर्मरोत्पल-निर्मिता पार्वती - परमेश्वरयोरष्टमख्रीष्टशताब्दीया मूर्तिः डा० ताकायसु-हिगुची-नामकेन विदुषोत्खननेन प्राप्ता[4] । कुशनराजकनिष्कस्य युगे गान्धार-मथुरा-कलाकेन्द्रं प्रगतमासीदेव । तद् विहाय अफगानिस्ताने वंक्षु (Oxus) तृतीयं कलाकेन्द्रं कुशनयुगे प्रावर्तत ।[5] डा० हुगुची महोदयस्योत्खननेनाफगानदेशे नैकविहारचैत्यानि भूगर्भात् प्रत्यक्षीभूतानि । तत्रत्यचित्राणि अजन्ताचित्रकलाशैलीमनुवर्तन्ते । हिगुची सप्रमाणं प्रतिपादयति—(1) Buddhist religion and culture came to Japan via. Afghanistan, Turkistan and China and (2) Kushans were of Aryan origin.

तुर्की-प्रदेशस्य दक्षिणभागोऽनातोलियेति विख्यातः । तत्र मित्तानीति जनानां देव इन्द्र आसीदित्युत्खननेन प्रमाणितम् । तत्र पुरा प्रचलितः शमनवादः वैदिककर्मकाण्डस्यापरपर्यायः । एतस्मिन् प्रदेशे स्वयंवरविधिर्भारतीयां पद्धतिमनुहरति ।

भारोपीय-सांस्कृतिक-समुच्चयः

ऐतिहासिकयुगे (ख्रीष्टपूर्वं ६००–४०० अन्तराले) आर्याः केन्द्रत्रये सम्प्रतिष्ठिता भारताः, पारसीकाः, यवनाश्च विश्वविश्रुता बभूवुः । एतेषु क्रमशः पारसीका यवनाः, भारताश्च क्रमशो माहाराज्यं विस्तार्य परस्परं प्रतिवेशित्वं प्रपन्ना ज्ञानविज्ञानादीनि सांस्कृतिकावदानानि संविभजन्तेस्म । प्रथमं तावत् पारसीकानां हखमनीवंशीयं साम्राज्यं

---

१. Quoted in Cambridge Hist. India Vol, I p. 327

२. नदवी—अरब और भारत के सम्बन्ध पृ० ३३

३. संस्कृति के चार अध्याय पृ० २८७

४. हिगुची जापानदेशे क्योटो-विश्वविद्यालयस्य प्राचार्योऽभवत् ।

५. वंक्षुकलाक्षेत्रं वंक्षुनद्या उभयोस्तटप्रदेशे प्रसारं भेजे ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ग्रीसदेशतः सिन्धुतटं यावत् प्रसृतम्। तस्य राजवंशस्य सेनासु भारतीयानां शौर्यप्रसक्ता चमूः सम्मिलितासीत्। खीष्टपूर्वं चतुर्थशतके अलक्षेन्द्रो ग्रीसतो भारतं यावद्राज्यं विस्तारयामास। तृतीयं साम्राज्यं चन्द्रगुप्तमौर्यस्य ख्रीष्टपूर्वं चतुर्थशतके समारब्धं। तस्याधीनं वङ्गतः पारसीकं यावद् विशालभूखण्ड आसीत्। वंशेऽस्मिन्नशोकस्य माहाराज्ये यवनाः पारसीकाश्चापि सम्मिलिता आसन्।

ईरान-भारत-सम्बन्धः

प्रो० राधाकृष्णन् ईरान-भारतयोः पुरातात्त्विकं सम्बन्धं विशदयन्नाह—

India and Iran have worked together from early times. The whole nation is called Iran, Ariana, Aryavarta. The word Aryan is comman to all these three, the Iranian people, the Afghans and the Indian people. They all arose from the same stock. They all belong to the same family.

Presidcnt Radhakrishnan's Speeches and Writings. p. 60

ईरानदेशे प्राङ्मुस्लिमयुगे पारसीकानां कतिपयवर्षसहस्रं यावद् भाषा-संस्कृती वैदिकार्याणामिवास्ताम्। अद्यापि पारसीकभाषायाः शब्दावली अविरलं संस्कृतशब्दकोषछायान्विता प्रतिभासते।[1] राहुलसांकृत्यायनानुसारेण मध्येराने बौद्धचित्रकलादर्शा लभ्यन्ते।[2]

ईरानदेशे सहस्रशोऽग्निमन्दिराणि बभूवुः।[3] ख्रीष्टपूर्वं चतुर्थशतके मौर्यराज्यस्य सीमा पारसीक-ग्रीक-राज्याभ्यां बैक्टिया-समीपं सम्पृक्तो बभूव। अतएव तस्मिन् युगे कृतस्य सारनाथेऽशोकस्तम्भस्य कलासौष्ठवं तयोः शिल्पसाधनया वासितं प्रतिभाति[4]।

ख्रीष्ट ६२५-६२६ संवत्सरे दक्षिणभारतीयनरेशः पुलकेशी-द्वितीय ईरानदेश-नरेशेन शाहखुशरू-द्वितीयेन दौत्य-सम्बन्धं स्थापितवान्। ईराननरेशदूतास्तदननन्तरं पुलकेशिराजस्य राजसभां समलंकृतवन्तः। एतद्दृश्यमजन्तायाः प्रथमगुहायां चित्रितमद्यापि द्रष्टुं शक्यते।

१. तथा हि वरुणः, मित्रः, वृत्रहा (इन्द्रः), यमः क्रमशः पारसीकानां अहुरमज्द, मिथ्र, वेरेथ्रघ्न, यिम च सन्ति। वैदिकसोमः पारसीको हओम अस्ति।

२. बौद्ध चित्रकला के नमूने मध्य ईरान में मिलते हैं, जिन्हें औरलेस्टाइन ने खोज निकाला है। राहुलसांकृत्यायन पुरातत्त्व निबन्धावली पृ० २८३

३. ईरानदेश में नौविहार के अतिरिक्त, हजारों अग्निमन्दिर थे।

सुलेमान नदवी—अरब और भारत के सम्बन्ध पृ० ८७

४. Cambridge Hist. of India P. 621, 622.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दशमख्रीष्टशताब्दे (९३६ई०) पारसीति ख्याता जरथुष्ट्र-साम्प्रदायिका भारते शरणं गृहीत्वा वैभवप्रपन्ना बभूवुः ।[1]

ख्रीष्टत्रयोदशशताब्दे मंगोलवंशीयो बौद्धधर्मानुयायी सुलतानो गाजन (१२९५-१३०४ई०) ईरानदेशे महाबौद्धविहारं निर्मितवान् ।[2]

ईरानस्य पूर्वभागः खुरासान आसीत् । इस्लामधर्मस्य प्रचारात् प्राक् खुरासाने बौद्धधर्मः सुप्रचलित आसीत् ।[3] बलख (बैक्ट्रिया) खुरासानप्रदेशे आसीत् ।

ईरानभारतयोः सम्बन्धं अधिकृत्य प्रो० मजुमदारो निगदति —

During the fourth century A.D. there was regular trade between India and Persia. Tabari (A. D. 838-923) writes that in the thirtysixth year of the reign of Khusrau (A. D. 590-628) a king of India sent to the Persian King ambassadors carrying a letter and presents. According to Bāṇa, the stable of Harshvardhana (A.D. 606-647) was filled with Persian horses. R. C. Majumdar : Indian Inheritance Vol. II P. 239.

वस्तुतो भारतीयज्ञानविज्ञानशिल्पकलासाहित्यादीनां सांस्कृतिकधारा भूयो योरपाफ्रीकामहाद्वीपयोः ईरानद्वारेण प्रवाहितासीत् ।

ज्योतिष - गणितायुर्वेदादि-विषयक-भारतीय - पुस्तकानामरबी-फारसी-भाषाभ्यामनुवादोऽभवत् । तदनन्तरमनुवादेन तेषां ज्ञानं कारडोबा (स्पेनदेशे) गतः । ततः पुनस्तेषां प्रसारो योरपीयविश्वविद्यालयेषु समभवत् ।

दिनकर—संस्कृति के चार अध्याय पृ० ३०६ ।

पञ्चतन्त्रस्य पल्लवीभाषयानुवादस्तत्रत्यः ससानीवंशीयो राजा खुसरो अनुशीरवान (५३१-५७९ ई०) बरजोई - नामकेन भिषजाकारयत् । ५७० ख्रीष्टाब्देऽस्य पल्लवीकथाकुञ्जस्य कलीलग-दमनगनाम्नानुवादः सीरियाई भाषया कृतो लभ्यते ।

---

१. राहुल सांकृत्यायन—मध्येसिया का इतिहास भाग २ पृष्ठ १४५ ।

२. अरब और भारत के सम्बन्ध पृष्ठ ९६ ।

३. दिनकर—संस्कृति के चार अध्याय पृ० ५४ ।
तेषां पारसीकानां ईरानदेशत आनीतोऽग्निरद्यनापि इनगरस्योत्तरस्यामुदवादे ज्वलति । दिनकर—संस्कृतिके चार अध्याय पृष्ठ ५६ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अपरतोऽस्य पशुकथारत्नराशेः प्रकाशोऽनुवादपरम्परया नैकदेशेषु सुविदितः[1]।

धार्मिकप्रभावः

अशोकस्य धर्मविजयेन भारतीया संस्कृतिः एशिया-योरपाफ्रीका-महाद्वीपानां प्रायोभागं प्राभवत्। तत्र यहूदीधर्मे इस्लामधर्मे च प्रत्यक्षाप्रत्यक्ष-रूपेण भारतीयधर्मस्य सौरभमनुद्रष्टुं शक्यते।

इस्लामधर्मस्याङ्गभूते सूफी-सम्प्रदाये ब्रह्मवाद-जीवन्मुक्ति-योग-समाधि-विषयाणां सैद्धान्तिकप्रचारः समभवत्। नैकसूफीसम्प्रदायोन्नायका भारतमागत्य वेदान्तदर्शनमधीत्याभिनवजीवनज्योतिरवापुः। अनलहक-साधना-धुरन्धरो मन्सूरो भारते समागत्य योगविद्यामशिक्षत। सूफीकविः सादी सौराष्ट्रदेश-भ्रमणं चकार।

सूफीसम्प्रदाये फना इति धारणायाः तरीका इति पथ-समावेशः क्रमशो वेदान्तस्य ब्रह्मवादात्, बौद्धधर्मस्याष्टाङ्गिकमार्गात् समभवत्। वस्तुतो-ऽष्टाङ्गियोगः सूफीमतेन समादृत आसीत्। हुमायूँकबीरः सानुसन्धानं निगदति यत् कुराने सूफीमतस्य मूलमस्ति किन्तु भारतीयवेदान्तविचारा-सारैस्तस्य सम्पोषणं प्रत्यक्षमेव।

रमेशचन्द्रदत्तो बौद्ध-ख्रीष्ट-धर्मयोः साम्यं प्रचिनोति। तदनुसारेण-रोमन-कैथालिक-सम्प्रदायस्य नैककर्मकाण्डविधयो बौद्धधर्मकर्मकाण्डम-

---

१. प्रो० पुरुषोत्तमलाल भार्गवो निदर्शयति—प्राचीन भारत पृ० ४७८।
भारत की पशुकथाओं का सबसे प्राचीन संग्रह पञ्चतन्त्र है। छठीं शताब्दी से पाश्चात्त्य देशों में इसका निरन्तर प्रचार हुआ। पह्लवी-अनुवाद से अरबी में अनुवाद कलीला-दिम्ना नाम से आठवीं शताब्दी में हुआ। अरबी अनुवाद से १००० ई० में दूसरा सीरियाई-भाषा में और ११३० में फारसी भाषा में अनुवाद हुआ। १४०४ ई० में हुसैम वईज ने अनवारे सुहाली के नाम से इसे नया रूप प्रदान किया। अरबी अनुबाद से ११८० ई० में ग्रीक अनुवाद १२५१ ई० में स्पैनिश अनुवाद और १२५० ई० में हिब्रू अनुवाद हुए। १२७० ई० में जान आव कैपुआ ने हिब्रू से लैटिन में अनुवाद किया, जिसका जर्मन अनुवाद १४८१ में मुद्रित हुआ। लैटिन अनुवाद से इटालियन अनुवाद १५५२ ई० में मुद्रित हुआ। इस इटालियन अनुवाद से सर टामसनार्थ ने १५७० ई० में अंगरेजी में अनुवाद किया। अंगरेजी अनुवाद और मूल संस्कृत ग्रन्थ के बीच में पाँच अनुवादों और १००० से अधिक वर्षों का अन्तर था।
वैदेशिकानुवादानां बृहत्तमं परिसंख्यानं कीथस्य Hist. of Skt. Lit. P. 357-359 द्रष्टव्यम्।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नुहरन्ति ।[1] एतयोर्द्वयोर्धर्मयोरनुयायिनां सांघिकजीवनविधिरपि भूयः समान एव ।

गौतमबुद्ध-विषयक-कथा नानारूपेण विदेशेषु प्राचरत् । तद्यथा मैकडानल-महोदयः समर्थयति—

The hero of the story prince Josaphat, has an Indian origin, being in fact no other than Buddha (बोधिसत्त्व). The name has been shown to be a corruption of Bodhisattva, a well known designation of the Indian reformer. Josaphat rose to the rank of a saint both in Greek and Roman churches. That the founder of an oriental religion should have developed into a Christian saint is one of the most astounding facts in religious history.[2]

नौविहारः

नौविहार-नामकं बौद्ध-मन्दिरं बलखे (वैक्ट्रियानगरे खोरासान-प्रदेशे) भारतीय-नरेशो मतोशहरो निर्ममौ । अत्र चन्द्रस्य पूजा कृता । प्रधानः पुरोहितो बरमक (ब्रह्मकः, ब्रह्मा) आसीत् । पारसीकराजो मन्दिरं पुरोहितं च समाद्रियत ।[3]

ईराकः

ईराकदेशस्यारब्यसामन्तो हज्जाजोऽष्टमशताब्दे सिन्धप्रदेशं विजित्य भारतेन सांस्कृतिकसम्बन्धान् संवर्धयामास ।[4] दशमशताब्दं यावद् बहव

---

१. Ancient India P. 335, 336.

२. Sanskrit literature P. 420.

प्रो० पुरुषोत्तमलाल भार्गवो निदर्शयति—बर्लाम एण्ड जोसेफैट नामक कथा का वृत्तान्त विशेष रूप से उल्लेखनीय है । आठवीं शताब्दी में खलीफा अलमन्सूर की राजसभा में जान आव डेमास्कस नामक ईसाई था । उसने ग्रीक भाषा में बर्लाम एण्ड जोसेफैट नामक कथा लिखी । इसका एशिया और योरप की अनेक भाषाओं में अनुवाद हुआ । प्राचीन भारत का इतिहास पृ० ४७८

३. अरब और भारत के सम्बन्ध पृ० १०१

४. अरबों ने ज्योतिष, गणित, संगीत, आलेख्य, आयुर्वेद और दर्शन में भारतीयों से बहुत कुछ सीखा । चरक के ग्रन्थ और पञ्चतन्त्र की कथाओं का अरबी में अनुवाद हुआ । उन्होंने भारतीय अंक सीखकर उनको हिन्दसा नाम दिया । इन्हीं हिन्दसों को योरप वालों ने अरब वालों से सीखकर अरबी अंक नाम प्रदान किया । पुरुषोत्तमलालभार्गव—प्राचीन भारत का इतिहास पृ० ३६५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

आरब्याक्रमणकारिणो भारते पराजिता एव पराङ्मुखा बभूवुः ।[1]

बग़दादनगरस्य सांस्कृतिकोत्कर्षमात्मसात्कर्तुं भारतीयाः पुरा तत्र यान्ति स्म । प्रो० राधाकृष्णन् समीक्षते—

In the great days of Baghdad city, when there was an outburst of cultural activities, people from India went to Baghdad—physicians, scholars, scientists for advancing their knowledge.

ईराकदेशस्यारब्यशासको हज्जाजोऽष्टमख्रीष्टशताब्दस्य प्रथमचरणे सिन्धप्रदेशं विजितवान् । तत आरभ्यारबदेशेन भारतस्य ज्ञान-विज्ञानदिशि आदान-प्रदानप्रवृत्तयः संवर्धिताः ।[2]

खलीफा-हारूँरशीदस्य शासनकाले (७८६-८०९ ई०) बगदादराजधान्या राजपरिषद् भारतीयसंस्कृतेर्महापण्डितैर्मण्डितासीत् । तत्र मन्त्री इस्लामधर्मानुगतिकोऽपि बरमकी बभूव । स स्वपरिचितान् पण्डितवर्यान्, ज्यौतिषिकान् वैद्यांश्च भारतादाहूय बगदादे बहूविधज्ञानज्योतिरुत्कर्षयामास । सोऽरबदेशीयान् छात्रानध्येतुं भारतं प्रेषयामास, दर्शनायुर्वेद-ज्योतिष-पुराणेतिहास-काव्यादिविषथकान् नैकग्रन्थान् अरबभाषयानुवाद्य स्वदेशीयानां भारतीयविद्यार्जन-पथं सुसाध्यं चकार । केन्द्रीभूतेयं नगरी तदा योरपदेशेऽपि भारतीयज्ञानधारां प्रवाहयितुं समर्था बभूव ।

मध्ययुगे सिखधर्मप्रवर्तको गुरुर्नानकदेव ईराकस्य राजधानीं बगदादं गतवानासीत् । १५२० ख्रीष्टाब्दे स बहलोलस्य समाधिस्थलीमधिगतस्तस्यानुयायिभिः सह चत्वारिंशद् दिनानि धार्मिकविमर्शं निष्पादितवान् । इदं वृत्तं तत्राङ्गलभाषयारबीभाषया च निबद्धम् । सिखमतावलम्बिनो नानकाश्रितपुण्यभूमिं तीर्थं मत्वा दर्शनं कुर्वन्ति । नानकसंगतौ न केवलं हिन्दवः सिखाश्चापितु इस्लामधर्मानुयायिनोऽपि परिभ्रमणं कुर्वन्ति स्म । ततः स मक्कामदीनेति तीर्थस्थलीमधिगतः ।

---

१. प्राचीन भारत का इतिहास पृ० ३९५

२. जब मन्सूर के विद्याप्रेम की चर्चा फैली, तब सन् ७७१ ई० में गणित, ज्योतिष आदि का एक बहुत बड़ा पण्डित अपने साथ कुछ बड़े पण्डितों को लेकर बगदाद पहुँचा और खलीफा की आज्ञा से दरबार के एक गणितज्ञ इब्राहीम फिजारी की सहायता से उसके अरबी में सिद्धान्त का अनुवाद किया। हारूँ ने अपनी चिकित्सा के लिए मनका नामक वैद्य भारत से बुलवाया। फिर तो वरामका लोगों के संरक्षण में अनेक ज्ञान-विज्ञान के भारतीय ग्रन्थों का अरबी में अनुवाद हुआ। अरब और भारत के संबन्ध पृ० १०३।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कास्पियन-प्रदेशे

कास्पियन-(कश्यप) सागरस्य परिसरे बाकूजनपदस्य अजरबैजाननगरे अग्निशिवयोः प्राचीनमन्दिराणि 'आतिशक्याखाभिधानि सन्ति । तत्र भारतीयैः कृतं त्रिशूलं वर्तते । मन्दिर-प्राङ्गणे २७ लघुकक्षा साधूनामावासाय सन्ति । १७४६ खीष्टाब्दं यावत् तत्र चत्वारिंशत् सन्तो न्यवसन् । मन्दिर-प्राङ्गणे उत्कीर्णं लेखद्वयं प्रथमं संस्कृतेन द्वितीयं च गुरुमुखीभाषया निबद्धमस्ति । संस्कृतलेखः १८४६ खीष्टाब्दे भारतीयेन वणिजा लेखितम् । तस्य सांस्कृतिकमहत्त्वमवधार्य फ्रांसदेशीयोऽलेक्जेण्डरडचूमा, रवीन्द्रनाथ-ठक्कुरश्चावलोकनार्थमुपागच्छताम् ।

ग्रीस-भारतयोः सम्बन्धाः

सुदूरप्राचीनप्रागैतिहासिकयुगेऽपि भारत-ग्रीसयोः पारस्परिकसम्बन्धस्तयोस्समान-सांस्कृतिकपथे समुन्नीतः प्रतिभाति । तथाहि—

These similarities suggest that the two peoples the ancient Greeks and the Vedic Indians must have been in communication with each other, though neither possessed any recollection of those times and they met as strangers when both areas became part of the Persian Empire.

Radhakrishnan's Speeches and Writings p. 222.

परवर्तियुगे ग्रीकभारतयोः सम्बन्धो ग्रीकवंशीयानां राज्ञां भारतं यावत्, राज्यविस्तारेण समवर्धत । बैक्ट्रिया-(बलख, वाह्लीक) नगरं केन्द्रीकृत्य सिल्यूकसवंशीया राजानः तदनु डेमेट्रिअसः, युक्रेटाइडीज इत्यादयः शासका बभूवुः । डेमेट्रियसस्य परवर्तिराजधानी स्यालकोटनगर आसीत् ।

ग्रीसदेशे दायोनिससाभिधस्य महादेवस्य पूजा लिङ्गमहोत्सवे प्रावर्तत । तत्र जना लिंगं नित्यशो धारयन्ति स्म ।

Millett : The Art of the Drama p. 85.

सीरिया—एशियामाइनरम्

अलक्षेन्द्रानन्तरं सीरिया-मिस्रदेशयोर्ग्रीकराजानां दूता भारतं प्रेषिता राजनयिकसम्बन्धं स्थापितवन्तः । सीरियातो ग्रीकवंशीयसेल्यूकसस्य दूतो मेगस्थनीजश्चन्द्रगुप्तमौर्यं प्रति डायमेकसनामको दूतश्च बिन्दुसारं प्रति समागतौ । मगधराजधानी पाटलिपुत्रं तेषां समाश्रयोऽभूत् । चन्द्रगुप्तः सीरियाराजं सेल्यूकसं विजित्य तस्य कन्यामुदूढवान् । अशोकः स्वधर्मप्रचारकान् तेषु तेषु अफ्रीका-पश्चिमैशिया-देशेषु पूर्वयोरीपीयप्रदेशेषु च प्रेषितवान् । तथाहि—

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

The names of these rulers—Antiochus (of Syria), Antigonus Gonotas (of Macedonia) Alexander (of Epirus or Corlnth), Ptolemy (of Egypt) and Magas (of Cyrene) show that India had at this time intimate intercourse with the Western World.

Majumdar—Indian Inharitance p. 236.

न केवलं पार्थिवस्तरे[1]ऽस्मिन् विशालभूखण्डेऽपूर्वसंस्कृतिसमन्वयः सञ्जातोऽपितु काव्य-कला-धर्मादीनां प्रौढि-समुत्कर्षेणापि महानभ्युदयो-जनितः[२] । बौद्धधर्मस्य प्रचारभूमिस्तत्राभवत् । भारोपीयव्यापारमार्गे पामीर इति ख्यातं व्यापारकेन्द्रमासीत् ।

अत्रान्तरे वैदिकसंस्कृतेरुन्नायिकाः कतिपयसंस्थाः पश्चिमेशियाप्रदेशे समुत्थापिता आसन् । तत्र वर्तते लोमहर्षकगाथा भारतीयप्रतापप्रकाशितै-तिह्यस्य सामन्तद्वयस्य । द्वौ प्रवीरौ स्वानुयायिभिः सह भारताद् बहिर्निर्यातौ अरमीनिया-देशस्य राज्ञा समाश्रितौ ।[3] तत्रत्यसम्राड् वैननाकस्य कासारं निकषा ततः पश्चिमदिग्विभागे तान् स्थापितवान् । तौ स्वजनपदे नगरमेकं रचयामासतुः, स्वकीयपूजाविधिं प्रवर्तयितुं मन्दिरे मूर्तीः प्रतिष्ठापितवन्तौ च[४]। तयोः पुत्रैरपि कृष्णमन्दिरं कृतम् । दुर्भाग्यवशात् ३०४ ख्रीष्टाब्दे सेण्ट-ग्रेगोरी-नामको मूर्तिविध्वंसकोऽरमीनियाभियानक्रमे घोरयुद्धानन्तरं देव-मूर्तीर्भङ्क्त्वा तासां स्थाने ख्रीष्टपूजास्थलं (चर्चं) कृतवान् ।[५]

ख्रीष्टधर्मस्य समारम्भकाले तस्योद्भवप्रदेशे वैदिको बौद्धश्च धर्मः

---

1. The thirteenth rock edict of Ashoka specially names five. Greek rulers and it is claimed that on account of the activity of Ashoka's missionaries his Dharma was followed in their dominion.

ग्रीस-देशीय-युद्धस्थलेषु पारसीक-राजानां कृते भारतीयसैनिका अपि युयुधिरे ।

२. बौद्धधर्मः ख्रीष्टपूर्वमेव तेषु तेषु देशेषु लोकमानसं प्रीणाति स्म । ख्रीष्टधर्मस्तु बौद्धधर्मवासित एव विकसित इति सुप्रमाणितम् । अलबेरूनी प्रवदति—पुरातनयुगे खुरासान-पारसेराक-मोसुलभूखण्डाः सीरियां यावत् बौद्धधर्मानु-यायिनः संजाताः ।

३. अयं घटनाक्रमः ख्रीष्टपूर्वं द्वितीयशतकस्य पश्चार्धे समवर्तत ।

४. तत्रैका ताम्रमूर्तिः द्वादशहस्तं द्वितीया च षोडशहस्तमुच्छ्रितासीत् ।

५. अभियानेऽस्मिन् ५००० मूर्तिपूजकाः ख्रीष्टधर्मे बलाद् दीक्षिताः । अपरे ४३८ जना निर्वासिता मरुप्रदेशे ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रवर्धते स्म। ताभ्यां भारतीयधर्माभ्यां ख्रीष्टधर्मो नैकोदात्तप्रवृत्तीरात्मसात् कृतवानिति पुराविद्भिः प्रमाणितम्।

ख्रीष्टानन्तरयुगे प्रायः पञ्चशतं वर्षाणि यावत् पूर्वोक्तपाश्चात्यदेशैर्भारतस्य व्यापारिकसम्बन्धा विशेषतो नौकाशयकेन्द्रीभूतं समवर्धत। पारसारबा-फ्रीका-लालसागरीया नौकाशया भारतीयवणिजामुद्दामोत्साहेन जलयानै-र्भारतीय वाणिज्याभिर्निर्भरा आसन्।[1]

अफगानिस्तानदेशे गजनी यदुवंशीयराजस्य गजसिंहस्य नाम्ना निवेशिता। स राजा गजसिंहः सिककन्दरूगी-ममरेजनामानौ राजानौ परास्य प्रतिष्ठां जग्राह।[2]

सीरिया-प्रदेशस्याब्दुल-अरा बौद्धधर्मेण प्रभावित आसीत्। स लोके मरणानन्तरं पुनरागमनं विश्वसिति स्म। स निरामिषाहारो बभूव, दुग्ध-मधु-चर्मणां प्रयोगं नाकरोत्। तस्य दया-करुणादिका भावाः पशु-पक्षिणोऽपि समस्पृशन्। स ब्रह्मचर्यं यतिवृत्तिं चानुमेने।[3]

फिलीस्तीन-देशेन सम्बन्धः

फिलीस्तीन-प्रदेशे प्राक् ख्रीष्टप्रथमशताब्दे इसेनसम्प्रदायो बौद्धधर्मानुवर्ती प्रबभूव। सोऽयं सम्प्रदायः ख्रीष्टधर्मस्य दिशानिर्देशक इति द्वयोः साम्येन प्रतीयते।

ख्रीष्टानन्तरं द्वितीय-शताब्दे केनचिद् ग्रीकविदुषा प्रहसनमेकं विरचितम्। तत्र काचिद् ग्रीकमहिला ध्वस्तनौका सती भारतीयसमुद्रतटे समाश्रिता। सा तु प्रधाननायिका प्रहसनस्य केन्द्रबिन्दुः। प्रहसनेऽस्मिन् भारतीयनायका भारतीयभाषया संवदन्ति।

---

1. Ships are also customarily fitted out from the places accross the sea from Africa and Barygaza (the Western seacoast of India) bringing to these far sidemarket towns the product of their own places.
In the market towns near the mouth of the Euphrates large vessels are regularly sent from Barygaza (भड़ौच, भरुकच्छ).
Periplus of the Eurythraean Sea.
अपरं चासीद् भारतीयवणिजामेका वसतिः कस्मिंश्चिद्द्वीपेऽफ्रीका-समुद्र-तटोपस्थे। तत्रैव।
2. Tod's Rajsthan Vol. II p. 22.
३. दिनकर—संस्कृति के चार अध्याय पृ० ३०१।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

बलख (बैक्ट्रिया, ग्रीकसाम्राज्यम्)

हिमालयस्य परंपारगमनाय हिन्दुकुशसंक्रमाः पर्याप्ता आसन् । तत्रत्य-मार्गैर्बक्त्रा[1]-नगरं प्राप्ता व्यापारिणः पश्चिमैशिया-योरप-चीनादिदेशैर्व्यापार-केन्द्रं प्रकाम-व्यवहार-वर्धनायोपयुयुजिरे ।

बैक्ट्रिया (वाह्लीकः) सविशेषं समृद्धोऽभ्युदयं गतश्च प्रदेशो बभूव । तत्र जलप्रदायव्यवस्थासंख्यकुल्यादिभिः कृतासीत् । अतएव सहस्रभुजमिदं नगरं नाम लेभे । तत्रोपनगराणां बाहुल्यात् बैक्ट्रिया सहस्रनगरमित्यभिख्यां भजते स्म । राज्यस्य विविधभागेषु पद्मराग-पीरोज-वैडूर्यादीनां ताम्र-लोहादीनां च खनिजपदार्थानां भूयसी उत्पत्तिरभूत् । बैक्ट्रियाया ग्रीकराजाः सेल्यूकसादयो भारतीयसम्राड्भिर्मैत्रीभावं सुस्थिरं प्रतिष्ठापितवन्तः ।[2]

पुरा भारतीयता-प्रसक्तेयं नगरी लघुराजगृहमिति नाम्ना प्रसिद्धासीत् ।[3] यथा ह्वेनसांगेन दृष्टमासीत् तत्र शतप्राया विहाराः सहस्रत्रयं हीनयान-बौद्धभिक्षवश्चासन् । अत्र नवविहारः केनचिद्राज्ञा निर्मित आसीत् । त्रिपिटक-व्याख्याकाराचार्याणामनन्यतमेयं भूमिः परम्परया शाश्वतं प्रतिष्ठिता-सीत् । तत्र संघारामशालायां रत्नखचित - बुद्धमूर्तिः प्रसिद्धासीत् । नातिदूरं ततो दक्षिणदिशि बुद्धस्य प्रक्षालन-पात्रमेकटनप्रमाणमायतमस्ति । नवविहारस्योत्तरदिशि १३५ हस्तोच्छ्रितः स्तूपो वज्रलेपेन संयोजितः । ततो दक्षिणदिशि असंख्यभिक्षूणामर्हतां चाश्रयभूतश्चिरकालात् सङ्घारामो ऽन्तेवासिनां विलसति । शतादधि अर्हतां स्तूपास्तत्रनिर्मिताः ।

बलखातु दशक्रोशदूरं गजनामके प्रदेशे दशविहारान् ३०० सर्वास्तिवादि-भिक्षवोऽधिशेरते स्म ।

बुखारानन्तरं बामियान-प्रदेशो बामियानराजधानीकः स्थितः ।

बलखस्य नवविहारस्य बरमक (ब्रह्मकः, परमकः) इत्युपाधिको विहार-महाधिपतिः आरब्याक्रामकाद् कुतैबाद् (७०५–७१४) भीत आत्मरक्षार्थं

---

१. बैक्ट्रिया, बलखः, वाह्लीकश्च पर्यायाः । भारतीया वाणिजा अफगानिस्तान-मध्यमार्गेण बैक्ट्रिया-प्रदेशं गतवन्तः ।

२. राहुलसांकृत्यायन—मध्येसिया का इतिहास भाग १ पृ० १७३

३. Even the Sussanians of the third century A. D. regarded Bactrians as virtually an Indian country and the Oxus, a river of Buddhists and Brahmans.

R. C. Majumdar. Indian Inheritance Vol II p. 240

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कश्मीरमागतो तत्रत्यराजस्याफगानिस्तानाधिपतेश्च साह्येन पुनरपि स्वजन्मभूमिं वैक्ट्रियां स्वाधिकारे विधातुं योजनां चकार किन्तु कुतैबस्य दुर्दान्तदमनचक्रात् स विफल एव भग्नमनोरथो बभूव ।[1]

वंक्षुनदी-तटस्थे वैकन्दनगरे यो बौद्धविहार आसीत् तस्मिन् स्वर्णमयी बुद्धमूर्तिः ४००० दिरहम-भरासीत् ।[2]

उजबकदेशे समरकन्द-नामकं नगरं तैमूरलंगेन मण्डितम् । तत्र भवनानां निर्माणार्थं भारतादपि वास्तुविद्याविशारदाः समाहूताः ।[3]

तैमूरलङ्गवंशीयः शाहरुखः (१४०६–१४४७ ई०) दूतमण्डलं विजयनगरराजं प्रति प्रेषयामास । मण्डलस्य नेता अब्दुल-रज्जाक आसीत् । सोऽयं रज्जाको विजयनगरवर्णनं सुषमं करोति स्म ।

खोतान-राज्यम्

कश्यपसागरतश्चीनसीमापर्यन्तप्रदेशो बौद्धधर्मेण प्रकाममालोकितो बभूव । विस्तृते भूभागेऽस्मिन् गोबी-मरुस्थले खोताननगरं राजधानीं विधाय भारतीया राज्यं चक्रुः ।[4] पूर्वत एव काबुलकन्धार-हेरात-प्रदेशान् विजित्य तैः स्वप्रभविष्णुता स्थापितासीत् ।

भारताधिष्ठितं खोतान-राज्यं तृतीय-ख्रीष्टशताब्दे प्रावर्तत ।[5] प्रदेशे-

---

१. राहुलसांकृत्यायन—मध्यएसिया का इतिहास भाग १ पृ० २७५

२. तत्रैव पृ० २७८

३. तत्रैव भाग २ पृ० १५०

४. अयं प्रदेशः पामीरपर्वतप्रस्थात् पूर्वदिशि त्रिविष्टप् (तिब्बत-) राज्यस्योत्तरसीमानन्तरं गोबीमरुभूमेरप्यन्तरं विस्तृत आसीत् । खोतान-नाम तत्र राज्यसंस्थापकस्याशोकपुत्रस्य कुस्तनस्याभिख्यया प्रसिद्धमिति पुराविदां कथा । विशाले-भूखण्डेऽस्मिन् बुखारा-समरकन्द-कूचा-काराशहर (अग्निदेश) तुर्फान-काशगर-यारकन्द-खोतानादीनि सुप्रसिद्धबौद्धसांस्कृतिक-केन्द्राणि बभूवुः ।

५. सर आरेल स्टीनः खोतान उत्खननेन प्रमाणयत्यधोविधम्—

(१) तत्र भारतीयानां सुव्यवस्थितं शासनं प्राभवत् ।

(२) तत्र प्राप्तमुद्रा-हस्तलेखैस्तस्मिन् देशे सर्वत्र तृतीयख्रीष्टशताब्दे भारतीयभाषा शासनकर्मणि प्रयुज्यतेस्मेति विभाति ।

(३) शासनाधिकारिणस्तत्राधोविधं संज्ञिताः सन्ति—भीमः, वङ्गसेनः, नन्दसेनः । तत्र चरस्तु अर्थशास्त्रस्य गुप्तचर एव । अन्ये तत्र यथानामप्रकीर्तिता आसन्—राजद्वार-पुरस्थितः, लेखहारकः, दूतश्च ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ऽस्मिन् भारतीया संस्कृतिर्मूर्तिमती व्यराजत। डा० मजूमदारो वर्णयति[1]—

The commercial and political infuence of India in the North resulted in almost a complete cultural conquest of this region in Central Asia. Indian alphabet and literature and above all, Indian ideas, manners, customs profoundly affected these far off countries and civilised their nomadic inhabitants.

Greater India p. 10.

उत्खननकाले तत्र परिभ्रमन् आरेल स्टीन आत्मानं भारतस्य प्राचीन-पञ्चनदनगरे विचरन्तमिव स्वप्नायतेस्म। यथा ह्वेनसाङ्गः प्रवदति—भारताच्चीनमार्ग[2] मुभयतः सर्वे प्रदेशा लिपिं, धार्मिकप्रवृत्तिं, संस्कार-रीतिं, कलात्मकसर्जनां च भारतानुरूपिणीं विकसितवन्तः।

प्रो० मजुमदारश्चीनी-तुर्किस्तान-प्रदेशस्य भारतीयसंस्कृति-परिदृश्यानि प्रशंसति—

Khotan, kuchi and Qura Shahar (अग्निदेश) were the most important centres of Indian culture. A Kharoshthi inscription refers to the Khotanese king Maharaja Rajatiraja Deva Vijit Simha. The ancient rulers of Kuchi bore Indian names such as Suvarṇa-puṣpa, Haripuṣpa, Haradeva, Suvarṇadeva etc. Qura Shahara then known as Agnideśa was ruled by kings called Indrarjuna, Chandrarjuna, etc.[3]

कुचिराज्यं शक्ति-समृद्धया श्रेष्ठतममासीत्। तत उत्तरदिश्यराज्येषु चीनदेशे च बौद्धधर्मप्रचारः संजातः। तत्र प्रथमखीष्टशताब्दे बौद्धधर्मः प्रचारं लब्धवान्; तृतीयखीष्टशतके स्तूपचैत्यादीनां संख्या सहस्रप्रायासीत्। तत्रत्या बौद्धभिक्षवश्चीनं गता बौद्धग्रन्थानन्ववादयन्। अष्टमखीष्टशतकं यावत्तत्र बौद्धधर्मः संवर्धितः प्रबभूव।

खोतानस्य प्रथमभारतीयराजा अशोकस्य पुत्रः कुस्तन (कुणाल) २४० ई०पू० आसीदिति[4] तिब्बतीया जनश्रुतिः। तस्य प्रपौत्रो विजय-सम्भव-स्तत्र बौद्धधर्मं प्रणीतवान्। वैरोचनस्तस्य गुरू। परवर्तियुगे खोतानप्रदेशे

---

१. स परिणामयति—Vast regions in Central Asia owed their civilisation principally to India. Greater India p. 11

२. मार्गोऽयं तुर्किस्तान-प्रदेशमध्यतः प्रचरति स्म।

३. Indian Inheritance Vol II India and the World p. 241

४. राहुल सांकृत्यायन—मध्य-एसिया का इतिहास प्रथमभाग पृ० १३८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कनिष्को राजा बभूव।[1] कनिष्कस्य राज्यम् अफगानिस्तान-विलोचिस्तान-बैक्ट्रिया-काशगर यारकन्दान् यावत् विस्तृतमासीत्।[2]

खोतानप्रदेशे बौद्धसंस्कृतेश्चतुःशतकेन्द्राणि मन्दिर-चैत्य-विहार-मण्डितानि विलसन्ति स्म।

चीनीतुर्किस्तान-प्रदेशे खोतानप्रदेशे सप्तमख्रीष्टशताब्दे तारिमोपत्यकायां बौद्धधर्मानुयायिनां भारतीयानामुपनिवेश आसीत्। तत्र प्राकृतभाषा भारतीया लिपिश्च प्राचलताम्। तत्र पारसीकख्रीष्ट-धर्माभ्यां सह बौद्ध-धर्मस्य सुषमसामञ्जस्यं विभाति स्म।[3]

खोताने प्रथमबौद्धविहारः २११ ई० पूर्वं निर्मितः। तत्र भारतीयराजवंशः ५६ अन्वयानुगतिको रराजेत्यनुश्रुतिः।

खोतानप्रदेशे सहस्रचतुष्टयं धार्मिककेन्द्राणां विहार-चैत्य-मन्दिराणां युगेऽष्टमख्रीष्ट-शताब्दं यावत् खोतानस्य धार्मिकाभ्युदयो बभासे। गोमती-बिहारो मध्यैशियाक्षेत्रे महत्तमः प्रबभूव।

तुर्किस्ताने बौद्धधर्मः

तुर्किस्तान-देशे बौद्धधर्मः प्रावर्तत। तत्रत्यो राजा नेजक-तरखानो बौद्धधर्मस्य प्रवर्धक आसीत्। तस्य शासनकाले हजरतोस्मानो बलखप्रदेशं विजयतेस्म। ततो नवविहारस्य प्रधानपुरोहितो बरमको धर्मपरिवर्तनेन मुसलमानः संजातः महाराजतरखानस्य निर्देशानुसारेण स पुनर्बौद्धो भवितुं नैच्छत्। अत एव क्रोधाविष्टस्तरखानस्तस्येहलोकलीलां समाप्तवान्।[4]

चीनीतुर्किस्तानस्योत्तरभागो बौद्धधर्मप्रचारापेक्षया सविशेषं महिमानम-वाप। तस्माद्देशान्न केवलं चतुर्दिशि, अपितु सुदूरचीनदेशेऽपि धर्मप्रकाशो विद्योतितः। पार्श्ववर्ति कुचप्रदेशे प्रथमशताब्दात् तृतीयशताब्दीं यावत् स्तूपचैत्यादीनां साहस्री विलसति स्म। कुचप्रदेशीया बौद्धभिक्षवश्चीनं समागम्य तत्रत्यभाषया त्रिपिटकादिकं बृहत्साहित्यमनुवादद्वारेण प्रचारयामासुः।

कुचा

ह्वेनसाङ्गानुसारेण तरिमोपत्यकायां कुचा-प्रदेशे शतप्राया विहारा

१. भार्गव—प्राचीन भारत का इतिहास पृ० २०७

२. तत्रैव पृ० २०८

३. कनिष्कराज्यं पश्चिमदिशि खुरासानं, पूर्वस्यां विहारम्, उत्तरस्यां काशगरं, दक्षिणस्यां मालवां यावत् प्रावर्तत। भार्गव—प्राचीनभारत पृ० २७१

४. अरब और भारत के सम्बन्ध पृ० ९६, ९७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

आसन् । तेषु पञ्चसहस्रप्रायाः सर्वास्तिवादिनो भिक्षवोऽवसन् । राजधान्या पश्चिमद्वाराद् बहिः ६० हस्तोच्छ्रितं बुद्धमूर्तिद्वयमासीत् । तत्र बौद्धानां वार्षिकं महासम्मेलनमायोजितमासीत् । तत्र विविधप्रान्तेभ्यो भिक्षवः समागत्य पञ्चवार्षिकोत्सवं कुर्वन्ति । मूर्तीनां सुसज्जितानां रथयात्राः प्रवर्तन्ते । नदीपारं तत्राद्भुतविहारे कलापूर्णबुद्धमूर्तीनां समवायः शोभते ।

ह्वेनसांगपथे भारतीय-संस्कृति-केन्द्राणि

तुखारदेशस्य राजधानी तेर्मिजनगरे प्रतिष्ठितासीत् । तत्र विहारद्वये सहस्राधिकबौद्धभिक्षव आश्रयन्तेस्म । प्रदेशेऽस्मिन् स्तूपा मूर्त्तयश्चातिशयं सौन्दर्यं वहन्तिस्म । तेर्मिजतः पूर्वस्यां दिशि विहारपञ्चकमासीत् । ह्वेनसांग-युगे तत्र भिक्षूणां विरलतासीत् । हुलूमो-प्रदेशस्य राजा तुर्क आसीत् । तत्र विहारद्वये शतप्राया भिक्षव आसन् । हुलूमो पूर्वस्यां दिशि सूमाने विहारद्वयं कतिपयभिक्षुभिः समाश्रितं चकार । कुयेन्-प्रदेशो वंक्षुतो दक्षिण-पश्चिमदिशि स्थितोऽभूत् । तत्र विहारत्रये शतत्रयप्राया भिक्षव आश्रिता बभूवुः । हुलिन्देशे विहारदशके पञ्चशतप्राया भिक्षवो वसन्ति स्म ।

बामियान-राज्यम्

बामियानस्य निवासिनो हिन्दवो बौद्धाश्चासन् । तत्र राजा शकवंशीय आसीत् । बामियानस्य विहारदशके सहस्राधिका लोकोत्तरवादिनो भिक्षवो वसन्ति स्म । बामियानराजधानीत उत्तरपूर्वदिशि गौतमस्य १५५ हस्तोच्छ्रिता स्वर्णिममूर्तिः स्थितासीत् । ततः पूर्वदिशि बौद्धविहार आसीत् । ततोऽपि पूर्वस्यां गौतमस्य ८० हस्तोच्छ्रिता श्वेतमूर्तिः स्थितासीत् । ततोऽपि पूर्वस्यां क्रोशमात्रदूरं ६७० हस्तायामा बुद्धमूर्तिरेकमेव शिलातलमुत्कृत्य निर्मिता । पार्श्वतो विहारे बुद्धशिष्यस्यानन्दस्य प्रशिष्यस्य शाणवासस्य संघाटी सुरक्षिता ह्वेनसाङ्गस्य दर्शनीयतां गता ।

हिन्दुकुशत उत्तरस्यां दिशि वर्तमानानां कतिपय-बौद्धसंस्कृति-प्रियाणां नगराणां परिचयो ह्वेनसाङ्गलेखतो लभ्यते ।

कुओ-सितो (खोश्त) नगरस्य बहुतरा निवासिनो बौद्धा बभूवुः । विहारदशके तत्र हीनयानमहायानभिक्षवः प्रतिवसन्तिस्म । बदख्शां-राज्ये विहारचतुष्टयेऽल्पसंख्याका एव भिक्षवो वसन्ति स्म । तत्र राजा बौद्धधर्मा-नुयायी बभूव । कु-लङ्-ना-नगरस्य कतिपयविहारेषु भिक्षूणां संख्या नात्यधिका समवर्तत । तत्रत्यराजा त्रिरत्नोपासकों बौद्ध आसीत् ।

त-मो-सी-ती (धर्मस्थित, वखान)-नामक-राज्यस्य विहार-दशके बौद्ध-भिक्षवो नाधिका आसन् । राजधान्या एकस्मिन्नेव विहारे पाषाणनिर्मित-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

बुद्धप्रतिमोपरि स्वत आवर्तमानं छत्रमस्ति । शाङ्भीरप्रदेशस्य राजा शक-वंशीयो बौद्ध आसीत् ।

विहार

बुखारा-राज्यम्

बुखारानगरं जरफ्शां-नद्यास्तटे तुर्काणामाधिपत्ये समृद्धिगतम् । तत्रैको महाविहारो निर्मितः । तुर्क-मङ्गोल-भाषायां विहारो बुखारेति प्रसिद्ध आसीत् । अतस्तन्नगरं बुखारा इति प्रथितं बभूव ।[1]

मंगोलिया

मंगोलिया वस्तुतो बौद्धविश्वप्राङ्गणं प्रतिवेशयति । तथा हि—

The exhibition of the Mangolian artist Urginin Yadamusuren (रवीन्द्रभवन) with its ethnographic type is a very very vivid one indeed. It brings to our notice a cultural uniformity. The extent of the Buddhist religis-cultural forms through a vast area embracing not only Japan, China, Sonth-East-Asia, Tibet Ladakh, Sikkim, Bhutan, Sinkiang, Mangolia but others is mind bogging. The topography of the northern mountain region may seem to have formed a subsystem within a bigger system.

Thus the masks, devnagari script, headgear, elongated trumpets, prayer, flags, similar musical instruments, the preoccupation with the skull etc. repeats from place to place. Yadamsuren makes uses of all this content expertly. The eight painting series whether on dances, headgear, signs and symbols or masks are richly evokative. The wild Kali-like dances, as the demonfaced ones, are extraordinary—each single movement having been caught with great attention as to detail. Since the painted images are on glistening ivorish paper without any background they become the more telling, decorative but tastefully so. Some of the more sensually exciting drawings are those of black fur hats and feathers. The Mongolian Ganesha is simply charming one.

---

१. एक चीन की राजकुमारी व्याह करके आई, जो अपने साथ बुद्धमूर्ति लाई थी। मूर्ति के लिए विहार (बुखार) बनाया गया। यही बुखारा नगर के नाम का कारण हुआ।
राहुल सांकृत्यायन—मध्येसिया का इतिहास भाग १ पृ० २२६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मंगोलियादेशे बौद्धधर्मः

मंगोलानामादिवसतिर्मंगोलिया देशे बभूव । अष्टमनवमशताब्दयो-र्मङ्गोलिया-प्रदेशे उइगुर-जातिषु बौद्धधर्मः प्रचलित आसीत् । उइगुर-जातीयाः सुसंस्कृता बभूवुः । तेषां भाषयानूदिता बहवो बौद्ध-ग्रन्थास्तकला-मकानस्य मरुभूमौ प्राप्ताः सन्ति ।[1]

उइगुरराजो बोसत् (६२९–) बोधिसत्त्वस्य तत्रत्यप्राकृतरूपं नाम्ना जग्राह ।[2] स बौद्धधर्मानुयायी बभूव । तुलानद्या उपत्यकायां तस्य राज्यं विस्तृतमासीत् । एकादशशताब्दे पूर्वमध्येसिया-भूखण्डे बौद्धधर्मस्य प्रचार आसीत् ।[3]

उइगुरजातीया बौद्धधर्मानुयायिनो भिक्षव[4] उदग्राः कर्मण्याश्च बभूवुः । ते द्वादश-त्रयोदश-शताब्दयोश्चङ्गेजखान-नामकस्य मङ्गोलसम्राजो बहु-विस्तृते माहाराज्ये स्वप्रतिभया शासनविधिं प्रभावयन्तितराम् । तेषां प्रभावेण बौद्धधर्मो मंगोलानां राष्ट्रियधर्मो बभूव । अद्यापि मंगोलिया-प्रदेशे बौद्धधर्मस्तत्रत्य-निवासिनां जातीयधर्मो विभवति । अस्मिन् प्रसंगे महा-पण्डितो राहुलसांकृत्यायनो वर्णयति[5]—

मुस्लिम इतिहासकारों ने लिखा है—उइगुरों के मन्दिरों में पितरों की पूजा होती है। वे पूजा में घण्टी का उपयोग करते थे। उनके मन्त्रों में 'ओ३म् मणि पद्मे हुँ' होता था। बौद्ध भिक्षु लाल वस्त्र पहनते थे। बौद्ध और ईसाई दोनों प्रकार के उइगुर मुसलमानों के असमान थे।

त्रयोदशख्रीष्टशताब्दे त्रिविष्टपदेशतो महापण्डित आनन्दध्वजो मङ्गोलियाप्रदेशे बौद्धधर्मप्रचारकान् प्रेषयामास ।[6] कुविलेइ-गुरुः फग्-पा कुबिलेईच्छानुसारेण मंगोलभाषाकृते भारत-तिब्बत-देशयोः प्रचलितलिपि-मनुसृत्याभिनव-लेखन-प्रणालीं प्रचारयामास । अयं कुबिलेई १२९० ख्रीष्टाब्दे सुवर्णाक्षरैः १०३ ग्रन्थभागेषु त्रिविष्टपीयत्रिपिटकं लेखयामास ।[7]

---

१. राहुल-सांकृत्यायन—मध्येसिया का इतिहास (१) पृष्ठ २३४।

२. तत्रैव पृ० २३५

३. तत्रैव पृ० २४६

४. वखशीति भिक्षुशब्दस्य मंगोलभाषीयरूपमधुना । भारतेऽपि बख्शीनामकनगर-शासनाधिकारीदानीमपि प्रचरति ।

५. मध्येसिया का इतिहास भाग १ पृ० ४६२

६. मध्येसिया का इतिहास भाग २ पृ० ८

७. तत्रैव पृ० ९–१०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

१२९४ ख्रीष्टाब्दे कुविलेई-दूतो बुद्धदंष्ट्रापूजनार्थं लङ्कादेशं समागतः। कुबिलेई-शासितप्रदेशाः —सम्पूर्णचीन-कोरिया-कोचीन-चीन-पंजाब - साई-वेरिया-तुर्कादयः, पोलैण्ड-हंगरीत्यादयश्च समाहिता बभूवुः। तत्र राजप्रभावेण बौद्धधर्मः समुत्थितः स्यात्।[1]

पञ्चदशशताब्दे मुगोलिस्तानप्रदेशे भ्रमणपरायणा लोका बौद्धधर्म-मनुसरन्ति स्म।[2] तत्र बौद्धाः शिखाधारिण आसन्।[3]

मङ्गोलियाया जुङ्गुरसाम्राज्ये[4] (१५८२–१७५७ ई०) कल्मकेषु बौद्धधर्मः प्रावर्तत। अस्मिन् युगे उर्लुक-नामकस्य जुंगरस्य कनिष्ठः पुत्रो भिक्षुरासीत्। बातुरथैची - नामको जुंगरो महाविहारं नैकलघुविहारांश्च शाश्वतपुण्याय निर्ममे। स त्रिविष्टपप्रदेशे लामाराज्यं १६४३ ख्रीष्टाब्दे स्थापयामास। बातुरस्य द्वितीयः पुत्रो गल्दनः त्रिविष्टपे भिक्षुः सन् बौद्ध-साहित्यमधीतवान्। स महासाम्राज्यं निर्माय स्वयं बुश्तू-खान[5] इत्युपाधिं स्वीकृतवान्।

जे. एन. फार्कोहरमहोदयः प्रमाणयति—Thus Indian Buddhist literature received a sudden expansion of influence and was carried wherever the Mangols went.

The Religious Quest of India p. 277.

चीनदेशेन सम्बन्धः

मध्यैशियातो भारतीय-संस्कृति-प्रचारकाः प्रथमं चीनं गताः, पश्चाद् एशिया-महाद्वीपस्योत्तरीयभूखण्डे दूरदूरतः प्रसृताः। न केवलं भारतादपितु

---

१. मध्येशिया का इतिहास भाग २ पृ० १०

२. मध्येसिया का इतिहास (२) पृष्ठ ३०१

३. राहुलसांकृत्यायनः समीक्षते—जान पड़ता है, मुस्लिमों से अलग करने के लिए शिखा का चिह्न समकालीन भारत में ही नहीं, बल्कि मध्येसिया में भी था। मंचुओं ने चीनियों से बलात् चोटी रखवाई थी। मैंने १९३५ ई० में मंगोल-गृहस्थों की चोटी खैलर के पास देखी थी। तत्रैव पृ० ३०१

४. जुङ्गुर-साम्राज्यस्य संस्थापकः बातुरथैची (१६३४–५३ ई०) कल्मकानां महान् नेतासीत्।

५. बुश्तूखान इति बोधिसत्त्वस्यापभ्रष्टरूपम्। जुंगरराजाओं के नाम प्रायः सभी तिब्बती भाषा में बौद्ध हैं। जुंगर और दूसरे मंगोल बौद्धधर्म को अपना जातीय धर्म मानने लगे थे और तिब्बत के महन्तराज दलाई लामा का इनके ऊपर बहुत प्रभाव था। मध्येसिया का इतिहास (२) पृ० ३३५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पश्चिमैशियातः, मध्यैशियातश्च सुषमा, पारंगताश्च बौद्ध-संस्कृति-साधकाः सहस्रक्रोशपर्यटनेनाभिज्ञातधर्मप्रकाशपुञ्जा इवात्मानं विश्वलोकांश्च समेधितवन्तः । चीनदेशीया अपरदेशीया अपि बुद्धभूमिं, तीर्थानि च प्रत्यक्षं कर्तुं समुत्सुका भारते न केवलं पर्यटका बभूवुरपितु विश्रुतविभवान् बौद्धाचार्यान् विहारांश्च चिरकालं समुपास्य धर्मग्रन्थांश्च प्रचिन्वतः स्वदेशं गता गौतमबुद्ध इव सद्धर्म-प्रकाशस्तम्भा आजीवनं भारते गृहीतग्रन्थैः स्वोपज्ञैश्च ग्रन्थराशिभिर्लोकान् कृतार्थान् विदधुः ।

भारतस्य चीनेन सम्बन्धः प्रथमतमं हानवंशीयराजेषु शासत्सु २०६ ई० पूर्वतः २२० खीष्टाब्दं यावत् समभवत् । खीष्टपूर्वं तृतीयशतके १८ भिक्षवस्तत्र भारताद् गताः ।

खीष्टपूर्वे द्वितीयशताब्दे कश्चिच्चीनदेशीयो राजदूतः स्वस्वामिने बौद्धधर्मात्मकं पुस्तकमेकं प्राहिणोत् । ख्रीष्ट ६१–६२ संवत्सरे यूचीनामकस्य सम्राजो दूतमण्डलेन सह गतास्तस्य समाश्रये कश्यपो, मातङ्गः, धर्मरत्नश्च प्रचारार्थं बौद्धधर्मग्रन्थानां चीनभाषया संक्षिप्तसंस्करणानि ६८ ख्रीष्टाब्दे रचयामासुः ।[1]

स्वीयप्रगुणत्वाद् बौद्धधर्मः कन्फूसियस-लाओत्से-इत्यादीनां सिद्धान्तानतिरिच्य महतीं लोकप्रियतामवाप । तत्र वेई-वंशीया राजानो बौद्धधर्मो राजधर्म इति विहितवन्त ।

कालान्तरे मध्यैशिया-मार्गे सुरक्षिते सति चीने बौद्धधर्मप्रचारोद्योगिनां संख्याऽन्यदेशेभ्योऽपि समवर्धत । आर्षचिन्नामको पारसीको राजकुमारो भारते वा स्वदेशे वा सुशिक्षितश्चीनं सम्प्राप्तो नैकबौद्धधर्मग्रन्थान् चीनभाषयानूदितवान् । भारतीय-बौद्धधर्मज्ञत्रयं तस्य सहायीभूतम् ।

परवर्तियुगे नैकदेशीया बौद्धधर्माचार्याश्चीनभाषापारंगता अनुवादद्वारेण धर्मग्रन्थान् तत्रत्य - जिज्ञासुलोकान् प्रशिक्षितुं समुद्यता बभूवुः । तेषु महापण्डितेषु कुमारजीवः स्वीयाविश्रान्तप्रवृत्तिभिः शतप्रायग्रन्थान् द्वादशवर्षाविधिनानूदितवान् । कुमारजीवो ४१३ ख्रीष्टाब्दे चीनदेशे दिवंगतः । पश्चात् ४१७ ई० यावत् तस्य सहकर्माणः पुण्यत्रातो बुद्धयशोधर्मयशाश्चानुवादोपक्रमं प्राचरताम् । पञ्चमशताब्दीतश्चीनदेशे भारतीयबौद्धाचार्याणां नैकवसतयः समुत्थिताः । चतुर्थ-पञ्चमशताब्दद्वये कश्मीरो बौद्धधर्मस्यानन्यतमं केन्द्रमभ्युदितम् । ततो गुणवर्मेति ख्यातो महामण्डितो राजपदं विहाय

१. 'कश्यपरचितं द्वाचत्वारिंशत्-सूत्रम्' अद्यापि चीनभाषयानूदितं वर्तते । मातङ्गेन चीनसम्राड् बौद्धधर्मे दीक्षितः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भिक्षुभिर्लङ्का जावादिषु बौद्धधर्मं प्रचारयामास । चीनसम्राजाहूतः स ४३१ खीष्टाब्दे चीनं समागतो वर्षेणैकेन ११ संस्कृतपुस्तकानि चीनभाषयानुवाद्य माहात्म्यं लेभे ।

पञ्चमशताब्दे फाहियानश्चीनतो भारतं समागतः तपसा श्रमेण मनोयोगेन च बौद्धसांस्कृतिकसौरभं भृशं समाहृत्य चीनं प्रत्यावर्तत । तस्मिन् युगे चीनदेशे सहस्रत्रयप्राया भारतीयबौद्धा विहारप्रस्था आसन् ।

षष्ठसप्तमशताब्दद्वये एशियामहाद्वीपस्य नैकदेशेभ्यो विशेषतश्चीनतः शतशो बौद्धभिक्षवो भारतं समागता विहारेषु बौद्धशास्त्रेषु शिक्षिता बभूवुः । प्रागेव वर्णितो नालन्दाविहारविश्वविद्यालयो विश्वस्मिन् स्वकोटिकोऽनुत्तमः संवर्धितः । मजुमदार-महोदयो बौद्धसाहित्य-प्रसार-विषये समीक्षते—खीष्टसप्तम - शताब्द उज्जयिन्यां लब्धजनिः परमार्थ इति ख्यातनामा पश्चान्मगधवासी संजातः मगधनरेशेन चीनराजस्य प्रार्थनया चीनं प्रति प्रेषितः । परमार्थो बहुभिर्गौरवग्रन्थैः सह ५४५ खीष्टाब्दे चीनमुपगतः । तत्र सप्ततिप्रायग्रन्थान् चीनभाषयारचयत् । अस्मिन् शताब्दे धर्मगुप्त इति ख्यातोऽपरो बौद्धाचार्यो गुर्जरदेशोद्भवः कान्यकुब्जस्य कौमुदीविहारे लब्धविद्यः स्थलमार्गेण कपिशा-बदख्शां, काशगर - कूची-कराशहर (अग्निदेशं)-तुर्फानहामीत्यादि-बौद्धशिक्षणमहाकेन्द्राणि पर्यवेक्षमाणः ५०२ खीष्टाब्दे चीनमुपागमत् । स आजीवनं चीने न्यवसन् सप्ततिग्रन्थरत्नानि चीनभाषयान्ववदत् । अस्मिन्नेव शताब्दे बोधिधर्मनामको राजकुले प्रादुर्भूतश्चीनसम्राजा समादृतस्तत्र महायानशाखाया ध्यानशाखां प्रवर्तयामास ।

सप्तमशताब्दे सहस्रशो भारतीया बौद्धमतानुयायिनश्चीनं गताः । ततश्चीनवासिनोऽपि गणनातीता भारतं समागताः । तेषु ह्वेनसांगः प्रख्याततमो भारते चीने च बौद्धालोकं स्फारयामास । अस्मिंछताब्दे न केवलं चीनतोऽपितु तत्कालीनविश्वतः समग्रभारतीयज्ञान-विज्ञानात्मक-परापरा विद्या अध्येतुं जिज्ञासवः सहस्रशः समागता भारते ।

ह्वेनसांगः ७४ बौद्धग्रन्थान् चीनभाषयान्ववदत् । उत्तरार्धे सप्तमशताब्द्याः षष्टिचीनयात्रिणो भारतमुपागताः । तेषु इत्सिंगः ख्यातनामास्ति । इत्सिंगः चीनभाषयानुवादं चकार । ततोऽपि महत्त्वपूर्णं तस्य कृतिरस्ति संस्कृत-चीनी-शब्दकोषरचना । स ४०० ग्रन्थान् चीनमनयत् भारताच्चीनं प्रतियातेषु महापण्डितेषु प्रभाकरमित्रो राजतेतराम् । चीन-सम्राज्य-नियुक्तैः ५९ विद्वद्भिः सहायीभूतः स बौद्धधर्मग्रन्थानन्ववदत् । सप्तमशताब्दस्यान्तिमे दशके बोधरुचिरिति प्रख्यातः पण्डितश्चीनदेशं गतः ५३ ग्रन्थानन्ववदत् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अष्टमख्रीष्टशताब्दे वज्रबोधिस्तस्य शिष्योऽमोघवज्रश्च चीने धर्मप्रचारं सोत्साहमकुरुताम् । दशमशताब्दे मञ्जुश्रीर्धर्मदेवश्च चीनं गतौ । धर्मदेवेन लेखकसंघः स्थापितः । सांघिकलेखकैरनेकग्रन्थानां चीनभाषयानुवादोऽकारि ।

प्रज्ञाननामधेयः कश्मीरको बौद्धाचार्यो नवमख्रीष्टशताब्दस्य प्रथमचरणे संस्कृतग्रन्थान् चीनभाषयानूदितवान् । जापानत उपागतः कुकविनामकः प्रतिभादिवाकर ८०५ ख्रीष्टाब्दे तस्य शिष्यत्वं जग्राह । स मन्त्रयानस्य जापानेऽभिनवप्रकर्षमालोकयामास जापाने नागरीं लिपिं प्रचारयामास च । एकादशशताब्दे १०५३ संवत्सरे ज्ञानश्रीश्चीनं गतः ।

मजुमदारमहोदयो भारतबौद्धसाहित्य-प्रचार-प्रसारं समीक्षमाणः प्रबोधयति —

It is difficult to give an adequate idea of the extent of these translations. Beal calculated that the total Indian texts translated into Chinese amount to about seven hundred times the size of the New Testament It is difficult to quote another instance where the literature of one country has been used to any thing like this extent by the people of an altogether different race, or the personal contact between the learned elements of the two has been so intimate. And what we know of China is evidently equally true of many other regions of Asia.

Greater India. p. 13

चीनाधिराजो मंगोलवंशीयः कुबिलाई - खानो पेकिङ्गनगरं राजधानीं विधाय ततः स्वविश्वराज्यं शशास । १२६१ ख्रीष्ट-संवत्सरे स आर्यगुरोर्बौद्ध-दीक्षां जग्राह[1] । १२६३ वर्षे स पितृपूजार्थं पेकिंगनगरे महतीं धर्मशालां चकार । अस्याः शताब्द्या अन्तिमयुगे मंगोलसामान्तास्तेषां सैनिकाश्च सम्यक्तया बौद्धाः संजाताः । ते इस्लामधर्मं प्रति श्रद्धाविहीना आसन् ।[2] ख्रीष्ट-सप्तदशशताब्दस्यान्तिमचरणे बौद्धसंघराजहू-तुक्-तू महाशक्तिशाली बभूव ।

चीनदेशे भारतीयो बौद्धाचार्यो बोधिधर्मः ४७० ख्रीष्टसंवत्सरे ध्यान-(चाना भिधानं) पञ्चशाखीयं धर्मपथं प्रपञ्चयामास । अनेन साधकस्य चतुर्मुख-

१. स्वगुरुं स तिब्बतदेशस्य लामा (राज-) पदे प्रतिष्ठापितवान् । स न केवलं बौद्धधर्मानुयायी बभूव, अपितु स्ववंशजानां कृतेऽपि स्वधर्मस्य नियमं कृतवान् । मध्येसिया का इतिहास भाग २ पृ० १३

२. तत्रैव पृष्ठ ३१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दृष्टचा ज्ञानं सम्पाद्यते । एषा प्रक्रिया रहस्यमयी सती वर्णनापरिधे-र्बाह्या भवति ।

बौद्धधर्मस्य तिएन-ताई-शाखाद्यावधि प्रचरति । सा शाखा चि-काई नामकेन महात्मना तिएन-ताई-पर्वतं साक्षीकृत्योद्भाविता । सम्प्रदायस्तस्य सद्धर्मपुण्रीकं, महाप्रज्ञापारमितां, महानिर्वाणसूत्रं चाश्रित्य प्रवर्धितः । तदनुसारेण मध्यममार्गेणाविद्याजन्यभ्रान्तिरपाक्रियते ।

त्रयोदशशताब्दे तिब्बतदेशे मङ्गोलानामाधिपत्यं समजायत । मङ्गोल-सम्राट् कुबलाखाँ स्वयं बौद्धधर्मानुयायी बभूव । मङ्गोलियादेशेऽपि स लामा-बौद्धधर्मं प्रचारयामास । पञ्चदशशताब्दे साङ्ग-कापानामको लामा स्वीयाभिनवोत्साहेन व्यवस्थापयामास यत् सर्वे लामाः पद्मसम्भवस्यावताराः सन्त्येव । तदनन्तरं लामा अवलोकितेश्वरस्य-बोधिसत्त्वस्यावतारा इति प्रथितं बभूव ।

चीनदेशे यू. फू. शोहनामके बौद्धमन्दिरे बुद्धस्य नानारूपा मूर्तयो विराजन्ते । तत्र पार्श्वपथे प्रत्येकशो नवमूर्तयो बुद्धस्य प्रतिष्ठापिताः । एका मूर्तिः पञ्चमख्रीष्टाब्दे निर्मितास्ति । तत्र चीनीभाषानुवादस्य त्रिपिटकस्य ६००० प्रतयः सन्ति । अत्र बुद्धजन्मोत्सवमभिलक्ष्य लक्षाधिकदर्शनार्थिन आयान्ति प्रतिदिन च १०,००० दर्शका संगच्छन्ते ।

चीने लक्षाधिकबौद्धमन्दिराणि सन्ति ।[1] तेषु प्राचीनतमं लोयाङ्गप्रान्ते प्रथमख्रीष्टशताब्दस्य श्वेताश्वाभिधोऽस्ति । पेकिङ्गनगरस्य लामा-मन्दिरे बुद्धस्य षष्टिहस्तोच्छ्रता चन्दनमूर्तिः १७४४ ख्रीष्टाब्दे निर्मिता ।

सेठ गोविन्ददास पृथिवी-परिकमा पृ० २४४

अधोवृत्तेनाधुनिकयुगेऽपि चीनदेशवासिनां बौद्धधर्माभिनेवेशस्यानन्योदात्ता कीर्तिर्महाघण्टाविषयिणी प्रतिफलति—

'China's great Bell goes on publie display next month when the final phase of the renovation of the geat Bell-temple in Peking is completed.

The bell has excerpts from the Buddhist Diamond Sūtra inscribed around its lower edge and the full text of the Sūtra inside totalling 227,000 Chinese charaeters. Hindustan times May 8,1980.

---

१. चीन में २,६७००० से अधिक बौद्धविहार और ७,३८००० से अधिक बौद्ध भिक्षु और भिक्षुणियाँ हैं । पृथ्वी-परिक्रमा पृ० २८७ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पेकिङ्गनगरस्य उत्तरपूर्वकोणे लामामन्दिरं महांविशालं वर्तते। तत्र प्रतिष्ठापिता बुद्धस्य मूर्तिरेकेन चन्दनकाष्ठखण्डेन निर्मिता ६६ हस्तोच्छ्रिता वर्तते। पूर्वतो मन्दिरमिदं चिंगवंशीय-युवराजस्य युनस्य स्मारकमासीत्। मन्दिरस्याभ्यन्तरं तिब्बतीयकलासौष्ठव — समाचरिता सज्जा बुद्धाकृति-खचिता शोभते।

चीनस्य नैकजनपदेषु तिब्बतीयलामामन्दिराणि सन्ति। न केवलं चीनेऽपितु मङ्गोलियादेशेऽपि लामावादो यत्र-तत्र लोकप्रियोऽस्ति।

प्राचीनसांस्कृतिक-प्रवृत्तीनां संस्कारा विदेशेषु आधुनिकयुगेऽपि भृशं विभान्तीत्यधोवृत्तेन हांगकांगवासिनां गौतमबुद्धस्य ७५ हस्तोच्छ्रितमूर्ति-विषये—

A religious ceremony was held on Tuesday to pave the way for the construction in Hong kong of South East Asia's tallest statue of the Buddha at a cost of 200 million Hong kong dollars contributed by local Buddhists, AEP reports.

The statue will be more than 35 metres (about 110 feet) high and be in a sitting position on a mountain overlooking the 100 year-old monastery on Lantau, the biggest of Hong kong's offshore islands.

Immediately below this concrete-granite statue will be a three-storey Chinese-style altar surrounded by a garden.

कोरियादेशः

चतुर्थख्रीष्टशताब्दस्य पूर्वार्धे चीनद्वारेण बौद्धधर्मः कोरिया-देशं प्राचरत्[1]। सम्पूर्णकोरियादेशे शनैः शनैर्बौद्धधर्मो लोकप्रियतामवाप। इत्सिंगस्य लेखानुसारेण ख्रीष्टस्य सप्तमशताब्दे कोरियातः पञ्चभिक्षवो भारतं समागताः। दशमशताब्दे देशस्यैकीभूते तत्रत्य बौद्धराजवंशो नियमितवान् यद् यस्य यस्य गृहस्थस्य त्रयः पुत्राः सन्ति, तस्यैकः पुत्रो बौद्ध-धर्मानुयायी भविष्यत्यैवेति राजाज्ञा। षोडशशताब्दं यावन्नियमोऽयं प्रभावको बभूव। तदनन्तरं बौद्धधर्मस्तत्र राजधर्मो नास्ति। तथापि तत्र बौद्ध-धर्मस्य भूयान् प्रभावो वर्तत एव।

कोरियाद्वारेण बौद्धधर्मो जापान देशे प्रासरत्। होयेल्यून (प्रज्ञावर्मा) कोरिया-प्रदेशादागत्य ताम्रलिप्तिविहारे चिरमधीतवान्।

---

१. मलानन्दनामकः कश्चिद् बौद्धाचार्यो भारताच्चीनं गतः। स ३७४ ख्रीष्टाब्दे चीनतः कोरियां प्रस्थितः।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

त्रिविष्टप-(तिब्बतदेशः)

पूर्वं तिब्बतदेशे वानपूजा-धर्मो व्यराजत।[1] सप्तमशताब्दे भारतीय-प्रभावो नेपालद्वारेण च प्रासरत्[2]।

ह्वेनसाङ्गेन खीष्टसप्तमशताब्दे दृष्टमासीद् यत् त्रिविष्टपस्य कश्चिद राजदूतो। बौद्धसाहित्यं नेतुं भारते समागत आसीत्। तदनन्तरमष्टमशताब्दे बङ्ग-विहारयोबौद्धाचार्यास्तिब्बतराजेन प्रार्थितास्तत्रधर्मप्रचाराय गताः। अष्टमशताब्दे तिब्बतराजेन निमन्त्रितः शान्तरक्षितनामको नालन्दायाः कुलपतिरन्यतमो महापण्डितस्तत्र गतवान्। स एव महापण्डितस्तिब्बते लामा सम्प्रदायं प्रतिष्ठापितवान्। कमलशीलो मगधदेशात् शान्तरक्षितस्य निर्देश-नेन समागतश्चीनदेशीयमन्यथावादिनं बौद्धपण्डितं परास्य धर्मोत्तमोपाधिना समलङ्कृतः। नवमशताब्दे तिब्बतराजो राल्पचनोऽनन्यधर्मोत्साहेन परम-ख्यातिं लेभे। नैकसंस्कृतग्रन्था भारतीयपण्डितैस्तिब्बतीयभाषयानुवादिताः।

एकादशशताब्दे भारते बौद्धशास्त्रज्ञानेन प्रकीर्तितमहायशाः पाण्डित्या-भिख्याविश्वविश्रुतो द्वीपङ्करो[3] वातीशो वा विद्वत्कुलाधिपतिस्तिब्बतीय-महाराजेन वारंवारं निमन्त्रितस्तत्र गत्वा न केवलं तत्रत्यधार्मिकप्रवृत्तीनां संशोधनं चकार, अपितु असंख्यमौलिकग्रन्थान् रचयामास, महत्त्वपूर्ण-ग्रन्था-नामनुवादं च प्रणीतवान्। यावज्जीवं स बौद्धधर्मं तिब्बत उज्जीवयामास, ज्ञानप्रदीपं प्रज्वालयामास च। त्रिसप्ततिवर्षीय स लासानगरे दिवंगतः।[4]

---

१. तिब्बतस्य वानपूजेति मूलधर्मोवस्तुतो भारतीय आर्येतरधर्म आसीत्। अस्मिन् धर्मे भूतप्रेतपिशाचादीनां पूजा शिवार्चनया सह प्रबभूव। बलिप्रथा तत्रासीदेव।

२. सप्तमख्रीष्टशताब्दे त्रिविष्टपस्य राजा स्रौङ्गसैन गैम्पो बौद्धधर्मावलम्बिनीं नेपालराजकुमारीं चीनराजकुमारीं च विवाह्य तयोः प्रभावेण स्वयमेव बौद्धमतं स्वीचकार। तदनन्तरं स नैकविहारमन्दिराणि निर्मितवान्, स्वदेशे च संस्कृतभाषां भारतीयलिपिं च प्रचारयामास।

३. दीपङ्करस्य विशेषविवरणं ग्रन्थेऽस्मिन् १०१ पृष्ठे द्रष्टव्यम्।

४. The messenger was sent with one hundred attendants and a large quantity of gold. He delivered the letter of the king of Tibet to Dīpaṅkara with a large piece of bar-gold as the present from his sovereign and requested the learned patriarch to honour Tibet with a visit. But Dīpaṅkara declined the presents as well as the invitation. Majumdar R. C. : Greater India p. 16.
अनेन नान्यथालभ्यभारतीय-प्रज्ञानं प्रति वैदेशिकानां सात्त्विकलौल्यं प्रमाण्यते।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अष्टमशताब्दे पद्मसम्भवः कमलशीलश्च बौद्धधर्मप्रचारार्थं भूयः कृतश्रमौ चीनं गतौ। असंख्यबौद्धविदुषां प्रयासैर्भारतीयविद्यारत्नानि भारते विलुप्तान्यपि स्वानुकृतिभिर्मूलरूपेण वा त्रिविष्टपे लभ्यानि सन्ति। तेषां दर्शनेन भारतीयज्ञान - प्रभाया वैदेशिकप्रसार-प्रवृत्तयोऽनुमातुं शक्यन्ते। खीष्ट-त्रयोदशशताब्दे तिब्बतीभाषया कुंजुरतंजुर नामका बौद्धग्रन्थानुवादाः पञ्चदशमहाभारतग्रन्थसमा बृहदाकारा वर्तन्ते।

नेपालः

नेपालस्तु भारतस्य प्रतिवेशेऽधुना स्वतन्त्रदेशः पुरा भारतस्याङ्गमेवासीत्।[1] पशुपतिनाथविशिष्टो देशोऽयं गौतमबुद्धस्य जन्मभूमित्वात् सविशेषं महिमानं भजते। शाक्यवंशीयानां राज्ञां राजधानीं कपिलवस्तु बभूव। ततः सप्तक्रोशदूरं लुम्बिनी - ग्रामो गौतमस्य जन्मस्थानमधुनापि स्मारकस्वरूपं महाराजाशोकस्य तत्रागमन-स्तम्भस्थापनं, स्तम्भे कीर्तिलेखं च निधीकरोति। सप्तमशताब्दे तत्रांशुवर्माभिधेयो राजा बभूव। स बौद्धधर्मस्य प्रचारोत्साहनिर्भरश्चकाशे। तस्य राज्याश्रये त्रिविष्टपे संस्कृतबौद्धग्रन्थानां तिब्बतीयभाषयानुवादः प्रारभ्यत।

विहार-बङ्गप्रदेशौ यदा मुसलमानराजैराक्रान्तौ तदा तयोर्देशयोरसंख्यग्रन्था नेपालदेशं प्रेषिताः, ततः त्रिविष्टपं च प्रापिताः। तिब्बतप्रदेशस्य भारताद् गमनागमनमार्गो नेपाले क्वियरोडद्वारा प्रचरति। बौद्धधर्मस्य स्वाभाविकः, ऐश्वरिकः, कार्मिकः, यात्रिकश्च सम्प्रदायाः यथाकालं नेपाले संप्रवर्तिताः।[2]

दक्षिण-पूर्वदिश्य-प्रदेशाः

भारतस्य पूर्व-दक्षिण-दिशि पुरापि नैकराज्यमाला भारतीय-संस्कृतेर्विकासस्य महत्त्वपूर्णं क्षेत्रमासीत्। तस्या द्वीपा इण्डोनेशिया प्रायद्वीपाश्चेण्डो-

---

१. अशोको युवराजः सन् नेपालदेशे कस्मिंश्चिज्जनपदे कस्य चित्सामान्तस्य विरोधं शमयाञ्चकार। तत्र चतुर्थखीष्टशताब्दे आचार्यो वसुबन्धुस्तत्र बौद्धदर्शनविषयकान् स्वसिद्धान्तान् प्रचारयामास।

२. जगतः सर्वाणि वस्तूनि प्रवृत्ति-निवृत्तिगुणयुतानि सन्तीति स्वभाविकाः। ईश्वर एव स्वयंभूः, अनन्तः, परमात्मास्तीति ऐश्वरिकाः। विश्वमिदमविद्याधारेण भ्रमतीति कार्मिकाः। चेतनस्तु बौद्धिककारणं प्रज्ञा चास्तीति यात्रिकाः।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

चाइनेति स्थूलदृष्टया संज्ञिताः सन्ति ।[1] तयोः प्रथमं स्थलमार्गैरपि गमनागमनसम्बद्धाः सान्निध्यं भजमानाश्च इण्डोचाइना-प्रदेशा दृष्टि-गोचरीकृताः सन्ति ।

चीनतो दक्षिणदिग्विभागे, भारतस्याङ्गानि महासागराञ्चले प्रत्यन्तभूताः प्रायद्वीपा भारतीयवाणिज्या - सांस्कृतिकप्रसारसाम्राज्योत्कर्षादिभिः[2] प्रवृत्तिभिः सम्यगालोकिता इति पुरावृत्तैः प्रत्यक्षीकृतमेवाधुनापि द्रष्टुं शक्यते ।

भारतीयानां वसतय उत्तरबर्मादेशे इरावदी-सालवीन-मेकांगादिनदीनामु-पत्यकासु च युन्नान-पर्यन्तं संवर्धिताः ।[3] ब्रह्मपुत्रनदीतः टाङ्किङ्ग-खातं यावद्-भारतीयसामन्तानामुपनिवेशा सततं विकीर्णा आसन् ।

प्रो० मजुमदारो भारतीय-पूर्वदिश्य-सम्बन्धस्य कालावधारणं करोति—

There is no doubt that as early as the second century A. D., Indians ruled over kingdoms in the remotest parts of Indochina.

---

१. इण्डोचाइनादेशस्य पञ्च भागाः सन्ति—(१) उत्तरस्यां टांगकिन् (२) मध्येऽन्नाम (३) पश्चिमभागे लाओस–कम्बुज (कम्बोडिया)–स्यामश्च (४) दक्षिणभागे कोचीन-चीन ।

इण्डोनेशियेति भारतीया द्वीपा इति शब्दार्थः—इण्डोस तु भारतं नेसास (nesos) द्वीपः । तद्यथा वायुपुराणे वर्णितम्—

भारतस्यास्य वर्षस्य नव भेदाः प्रकीर्तिताः ।
समुद्रान्तरिता ज्ञेयास्ते त्वगम्याः परस्परम् ।।

वामनपुराणे स्पष्टीकृतमेतत्—

इन्द्रद्वीपः कशेरुश्च ताम्रपर्णो गभस्तिमान् ।
नागद्वीपः कटाहश्च सिंहलो वारुणस्तथा ।।

एतेषु इन्द्रद्वीपस्तु अण्डमानः, नागद्वीपस्तु निकोबारः, कटाहस्तु मलयप्रायद्वीपस्य केडा, सिंहलो लङ्का, वारुणस्तु बोर्नियो सन्ति ।

२. मजुमदारः समीक्षते—The Hindu colonists brought with them the whole frame work of their culture and civilization and this was transplanted in its entirety among the people who had not yet emerged from their primitive barbarism.

Greater India p. 21

इमे भूभागा भारतस्याङ्गानि बभूवुरिति अरबयात्रिभिरपि वर्णितम् ।

सुलेमान नदवीः अरब और भारत के सम्बन्ध पृ० ७०

३. युन्नानस्य भारतीयं नाम गान्धार इति प्रथितम् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

Colonisation as distingiushed from the establishment of political authority, evidenly took place much earlier, and the begiuning of trade relations, which preceded colonisation may be placed two or three centuries before the Christian era, if not earlier still.[1]

भारतीयराज्यानि

भारतीयराज्यानां पूर्वद्वीपप्रायद्वीपेषु प्रथमस्थापना ख्रीष्टाब्दस्य प्रारम्भतो मलय-कम्बोडिया-अनामभूखण्डेषु समजायत। एते भूखण्डा एशियामहाद्वीपस्य सम्पृक्त-भागा एव ।

मलयपार्श्व एब सुमात्रा-जावा - बालिबोर्नियो-नामकेषु द्वीपेषु भारतीय-राज्यानि समकालिकं स्थापितानि। तत्र प्रथमं तावन्मलयराज्यं प्रथमख्रीष्ट-शताब्दे समुत्थापितम्। तत आरभ्य पञ्चमख्रीष्टशताब्दं यावन्नैकलघुराज-वंशास्तत्र समुदिताः। तत्राष्टमख्रीष्टशताब्दतो द्वादशख्रीष्टशताब्दं यावत् शैलेन्द्रराजवंशस्य महान् प्रभावः समजायत। पञ्चदशख्रीष्टशताब्दे मलये मलक्काराज्यस्याधिपतिः विश्रुतविभवो मुस्लिमराजकुमारीमुदवहत्। ततः परं भूभागेऽस्मिन् दूरदूरं मुस्लिमधर्मस्य प्रचारः प्रसारश्च वृद्धि गतः।

स्यामः थाईलैण्डः

बर्मादिशस्य[2] राजधानी 'रंगून' इति सुप्रसिद्धनगरान्नातिदूरं पूर्वदिशि 'स्याम'[3] नामको देशस्तस्य प्रत्यन्तभूतो विलसति। वर्मादेशेन सह भौगोलिक-सांस्कृति-दृष्टचा भूयिष्ठं संपृक्तः स्यामदेशो भारतस्याङ्गमिव भारतीय-संस्कृतिक-परायणैर्ब्रह्मर्षिभिः सांस्कृतिकपथ उन्नीतः।

स्यामदेशस्य क्षेत्रफलं प्रायः ५५०० वर्ग - कीलोमीटरं वर्तते। अत्र भारतीय-चीनी-मङ्गोलतिब्बतीयलोकानां सम्मिश्रणं यथायोगमजायत। ते सर्वे भारतीयलिपि-भाषा-धर्माचार-व्यवहारादीन् भारतानुकारेण स्वीकृतवन्तः। भारतेनास्य भूभागस्य प्रथमसम्बन्धः पराक्रमशालिनां सामुद्रिकवणिजां च प्रवर्तनेन समवर्धत। मध्यभागे मेकाङ्गमेनाम-नद्योस्तटीय-

१. Indian Inheritance Vol II Indian Colonies in the Far East p. 252

२. १९३७ ख्रीष्टाब्दं यावद् बर्मा (ब्रह्मा) भारतस्याविभक्तः प्रदेश आसीत्। भारतीयस्वातन्त्र्यसङ्ग्राम - व्यवसितनेतृणां दमनार्थमाङ्गलशासकानां दुर्णीतेः प्रभावादत्र मण्डाले नगरस्य कारागारे वासितः लोकमान्यबालगङ्गाधरतिलको गीतारहस्यं प्रणीतवान्।

३. आर्यैरस्य देशस्य निवासिनां कृष्णवर्णत्वेन श्याम इति नाम दत्तम्।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रदेशो विशेषोर्वरास्ति। खनिजधातुरत्नादीनां निधिरतिशयं भजते। स्यामस्य वन्या, भूगर्भ्या च सम्पत्तिर्वैदेशिकानां तत्र समागमं प्रोत्साहयतिस्म ।

स्यामदेशस्योत्तरीयभागो युन्नान इति ख्यातो मङ्गोल (थाई) जातीयानां महिमशालिराज्यं बभूव । राज्यमिदं भारतीयप्रभावाद् गान्धार इति प्रथितम्। एतस्य राज्यस्यैकः प्रान्तो विदेहनाम्ना ख्यातः। तत्र भारतीय-संस्कृतेः प्रभावः प्रतीयते । तस्य राजधानी मिथिलासीत् । राज्येऽस्मिन् बोधिवृक्षः, पिप्पलगुहा, गृध्रकूटपर्वतश्च पुरा विराजन्ते स्म । नृपतेरुपाधि-र्महाराज आसीत्। ७००–९०० ख्रीष्टसंवत्सरान्तराले गान्धाराणां महाशक्तिः प्रावर्तत यथा ते चीनसम्राजं विजितवन्तः। ८८४ ख्रीष्टाब्दे गान्धारराजश्चीन-सम्राजः कन्यकामुदवहत् । गान्धारराजधानीकं युन्नानराज्यं १२५३ ख्रीष्टाब्दं यावत् प्रावर्तत । तदनन्तरं त्रयोदशख्रीष्टशतके थाईजातीया विजेतारो लाओस-स्यामराज्येऽधिकृतवन्तः[1]। तेषां राज्यं सुखोदय इति ख्यातमासीत्। तत्र थाईराज इन्द्रादित्यः प्रबभूव। तस्य पुत्रो राम कम्हेंग स्याम-दक्षिणवर्मा-मलयप्रायद्वीपानां नैकखण्डान् विजित्य साम्राज्यं स्थापितवान् । तस्य पौत्रः सूर्यवंश-रामाभिधो महाधर्मराजाधिराजोपाधिना-भूषितो बभूव । स नैष्ठिकबौद्धः त्रिपिटकाधीती आसीत् । सोऽन्तकाले प्रव्रजितो यावज्जीवं बौद्धधर्मप्रचारेण जीवनं सफलं चकार। १३६१ ख्रीष्टाब्दे स कतिपयबौद्धभिक्षून् लङ्कां प्रेषयामास। ततश्च महासामीति ख्यातं भिक्षुवर्यं स्याममानीतवान् । तस्य प्रयत्नेन लाओसराज्ये बौद्धधर्मो लोकप्रियो बभूव।

१३५० ख्रीष्टाब्दे स्यामदेशस्य रामाधिपतिरित्युपाधिकः कश्चित् सामन्तोऽयोध्यां राजधानीं विधाय तत्र महाप्रभुत्वं जग्राह । १७६७ ख्रीष्टाब्दे वर्मानरेशेनायोध्या विध्वंसिता । तदनन्तरं नरेशो बैङ्काकनगरं स्वीयराजधानीं चकार। तस्य वंशजोऽद्यापि तत्र शास्तास्ति।

आदौ ब्रह्मर्षीणां पश्चात् मध्ययुगे श्रीलङ्कतो बौद्धधर्मानुयायिभिक्षूणां प्रचारस्तत्राभवत् । ते उभयदेशयोः समाश्रयेण सांस्कृतिकप्रभावमुन्नमया-मासुः । वैदिकधर्मस्तस्य शाखा-प्रशाखाश्च पूर्वतोऽपि[2] स्यामदेशे मूलिता दृश्यन्ते । १३८० ख्रीष्टाब्दे ३१ भिक्षवः स्यामदेशाल्लङ्कां समागताः षड्वर्षाणि तत्राधीत्य कल्याणीमहाविहारे दीक्षिताः पुनः स्वदेशे प्रत्यावर्तिता

---

१. थाईनां प्रभावेण लाओस-पर्यन्तं थेरवादः प्राचरत्।

२. चम्पायां बौद्धधर्मारम्भात् ७०० वर्षाणि पूर्वमेव शैवधर्मो लोकप्रिय आसीत्।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विविधविहारेषु परिचरन्तो बौद्धधर्मस्य विशुद्धस्वरूपं प्रबोधयामासुः। मध्ययुगे थेरवादः, तान्त्रिकबौद्धधर्मश्च स्यामदेशे यथा भारते प्रचरित आसीत्।

मध्ययुगेऽष्टमनवमसंगीतिद्वयं स्यामदेशे निष्पन्नम्। नवमपरिषद् बैङ्काकनगरे २०३१ बौद्धसंवत्सरे समाकारितासीत्।

स्यामदेशस्य पाङ्गटुक-स्थल उत्खननेन प्राप्ता विष्णोः, यक्षस्य, द्वारपालस्यार्धनारीश्वरस्य च नैकमूर्तयो गुप्तकालात् प्रागेव निर्मिताः सम्भवतो भारतात्तत्र नीताः। एतासां कलादर्शाः परवर्तियुगे तत्रत्यैः समाम्नाताः। प्रदेशेऽस्मिन् भारतीयानां वसतिरादौ प्रतिष्ठापिता।[1]

स्यामदेशस्य समुद्रतटीयभूभागेषु प्रथमं निवेशिता भारतीयास्तत्राभ्यन्तरजनपदेषु कालान्तरे प्रसृताः। आभ्यन्तरप्रदेशे श्रीदेवनामकं नगरं गुप्तयुगे भारतीयसंस्कृतेः केन्द्रमेकमासीत्। स्वामी सदानन्दो वर्णयति—One such place is Śrī Deva the ruins of which lie today close to Petchabury buried in the dense forest of Central Siam. These relics attest to the infiltration of Hindu thoughts and culture of the contemporaneous periods of India, some relating to the Guptas of Northern India and others to the Pallavas of the South. That it was of Brahmanic origin is borne out by paleographical and iconographical evidences excavated at sites nearby.[2]

स्यामदेशस्य भाषा संस्कृतशब्दैरुपजीविताभिव्यक्तिशालिनी प्रतिभाति। ऊनविंशशताब्दे यदा स्यामस्याधिकारे कम्बोडियासीत् स्यामतो बौद्धधर्मः कम्बोडियायां प्राचरत्।

स्यामदेशे भारतीयसंस्कृतेः समारोपणमधोविधं समीक्ष्यते—

(१) नगरे नगरे ग्रामे ग्रामेऽरण्ये वा वास्तु-ध्वंसावशेषेषु भारतीया वास्तुकला दृश्यते। तत्र देवानां मूर्त्तय आख्यानगर्भाः सन्निवेशिता बभूवुः।[3]

(२) नगराणां नामानि तत्र भारतानुकारेण राजपुरी, अयोध्या, नखोनश्री तमरत (नगर श्रीधर्मराज) इत्यादीनि सन्ति।

---

१. बौद्धधर्म के २५०० वर्ष।

२. Hindu Culture in Greater India p. 149.

३. पैगोडा, बुद्धप्रतिमाश्च सर्वथा भारतीय-शैलीमनुसरन्ति।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(३) पालिभाषा लिपिश्चाधुनापि राजपरिवारं समाश्रयते ।[1]

(४) राजपरिवार-सदस्याः परस्परं पालिभाषां प्रवदन्ति । उपनयनसंस्कारः तदनन्तरं वनप्रदेशे गुरोराश्रमे २५ वर्षावस्थां यावदध्ययनं प्रचरति ।

(५) षण्णां प्राचीननरपतीनां नाम राम आसीत् ।

(६) १८०७ ख्रीष्टाब्दे रामकियेनं (रामायणं) रामप्रथमेन नरेशेन विरचितम् । नैकरामायणपुराकथास्तत्र विलसन्ति । बैङ्काक-नगरस्य राजमन्दिरे मरकतनिर्मितबुद्धमूर्तिर्विराजते । मन्दिरभित्तिषु रामकया सम्पूर्णा चित्रिता । तत्र नाटचकथा भारतीयमूलमनुहरन्ति ।

स्यामदेशेऽधुनापि सहस्रशो भारतीयानां वसतयो भारतीय-संस्कृति-प्रचारकान् प्रतीक्षते । रवीन्द्रनाथठक्कुरेण प्रेषितः स्वामी सत्यानन्दपुरी नामकोऽनन्यमहात्मा नैकवर्षाणि तत्र भारतीयसंस्कृतिप्रचाररतः १९४२ ई० वर्षे वायुयानदुर्घटनायां मृत इति क्षतिरद्यापि न दूरितः ।

थाईलैण्डदेशे भारतीया संस्कृतिः

दक्षिणपूर्ववर्तिनि एशियाद्वीपस्थिते थाईलैण्डदेशे भाषा-संस्कृति-समाज-व्यवस्था-धार्मिकपरम्परासु भारतवर्षस्य प्रभावः स्पष्टं परिलक्ष्यते । अत्र बौद्धधर्मस्य प्राधान्यात् बौद्धस्थलानि प्रति आकर्षणं स्वभावसिद्धम् । तथापि अधुना हिन्दूदेवान् प्रति आकर्षणमपि क्रमशो वर्धत एव । अचिरादेव कतिपयैः थाईदेशीयैः भारतमागत्य वैष्णवदेव्या दर्शनं विहितम् । तैः स्वगृहेषु प्रतिशुक्रवारं वैष्णवदेव्या विधिवत पूजनमाचर्यते । बैंकाकनगरे महापालिकाभवन - सम्मुखं भगवतो विप्रविष्णोः प्रतिमापि ब्राह्मणमन्दिरस्य सम्मुखं प्रतिष्ठापिता । तत्र ब्रह्मदेवोऽपि पूज्यते । 'रामकोएन (रामकीर्तिः) इति नाम्ना ख्यातं थाईलैण्डस्य रामायणं वाल्मीकिरामायणमुपजीव्यैव निबद्धम् । अत्रत्यप्रसिद्धपण्डिता महाभारतस्य थाईभाषान्तरं समाचरन्ति ।

---

1. In the royal family of Siam they still maintain the tradition of speaking in pure Pāli amongst each other. Coronation and ceremonies such as Upanayana and studies in Āśram are prevalent. Sadanand : Hindu Culture in Greater India p. 154. Script, literature and culture of Thailand and our Script, literature and culture have much in common.

President RadhaKrishnan's Speeches and Writings p. 77

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

थाईभाषा संस्कृतशब्दप्रचुरा विद्यते । अत्र 'विश्वहिन्दीदर्शन'-नामकं हिन्दी-मासिकपत्रं प्रकाश्यते । बौद्धधर्मेण सह ब्राह्मणधर्मो विकसति । तत्र हि नेताजी - सुभाषचन्द्रबसुं प्रति तस्य आजादहिन्दसेनां प्रति च महान् आदरश्चकास्ति । 'जय हिन्द' इत्यभिवादनेन ते गौरवमनुभवन्ति ।

स्यामदेशस्य ९०% जना बौद्धधर्मानुयायिनः सन्ति । तत्र प्रायः चतुर्दश-सहस्रं चैत्यानि सन्ति । तेषु धर्माचार्या नवतिसहस्रं वर्तन्ते । स्यामदेशे प्रायः १० सहस्रभारतीया वसन्ति ।

कम्बुजः (कम्बोडिया)

कम्बोडिया तु बौद्धदेशोऽद्यापि भारतीयां संस्कृतिं भृशमवगाहते । भारतस्य कम्बुजेन सम्बन्धः प्राचीनतमः प्रतिभाति ।[1] कम्बोडियाधुनिके-ण्डोचाइना-देशस्यैकभागो मध्ये वर्तते । राज्यमिदं पश्चिमदिशि स्यामदेशेन संश्लिष्टम् ।

प्राचीनकाले खीष्टाब्दात् पूर्वमेव तत्रासीदङ्गद्वीपो भारतस्याङ्गमेव, यस्मिन्नधुना कम्बोजानां मूलदेशः कम्बोडिया वर्तते ।[2] कम्बोजा नागवंशीया आसन् । तेषां वन्या संस्कृतिरार्याणां वर्णाश्रमधर्मविहीना बभूव । तेषां यौद्धिकशौर्यं यत्र तत्र सर्वत्र भारतेऽपि युद्धार्थिनां राज्ञां समाश्रयप्रदानस्य हेतुरासीत् । महाभारतीये युद्धे कौरवपक्षतः कम्बोजराजकुमारस्य सुदक्षिणस्य महावीरस्य पराक्रमोऽर्जुनेन युद्धे सविस्तरं वर्णितो द्रोणपर्वणि ।[3]

कनिष्कोऽशोकस्य बौद्धधर्मप्रचारपथं प्रशस्यमेव सततं स्वीचकार । तेन धर्मप्रचारका मध्यएशिया-चीन-जापान-तिब्बत-वर्मा-स्याम-कम्बोडियादि-देशेषु प्रेषिताः ।

कम्बोडिया-देशेन परवर्तियुगे दक्षिणस्यां सम्पृक्तं फूनान-नामकं राज्यं खीष्टप्रथमशताब्दे भारतीयेन कौण्डिन्यनामकेन महाब्राह्मणेन स्वीयब्रह्म-

1. सदानन्दो निभालयति —We do not think it all improbable that there existed a political connection between India and Combodia from the time of the Mahābhārata.
Hindu Culture in Greater India p. 80
2. The ancient kingdom of Kamboja extended from the mouth of Mekong upto Tennaserimon, the Bay of Bengal and to Southern Annam (चम्पा) Ibid p. 70.
3. Hindu Culture in Greater India. p. 86.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वर्चसा पराक्रमेण च संस्थापितम् । सोऽयं कौण्डिन्यः फूनानवासिनामर्धसभ्य-लोकानां भारतीयादर्शानुरूपं सांस्कृतिकसमुद्धारेणामरो बभूव । तस्य वंशजाः शतवर्षप्रायं तत्र शशासुः । कालान्तरे चतुर्थख्रीष्टशताब्दे कौण्डिन्या-भिधोऽपरो ब्राह्मणविजेता भारतादागत्य स्वीयं महिमशालिराजवंशं संस्थाप्य तत्र भारतीयसंस्कृतिं दृढं मूलितवान् । प्रो० भार्गवस्तत्र भारतीय-संस्कृति-समुद्धारं निदर्शयति ।[1] मजुमदारमहोदयो निगदति —

Funan may be regarded as one of the important centres from which Indian culture and civilisation radiated on all sides. The empire of Funan must have extened over Siam, the Malaya peninsula and a part of Burma in the time of Fe-ncheman

R. C. Majumdar : Greater India p 30

वर्त्तमानकम्बोडियात उत्तरदिशि कम्बुजराज्यं ख्रीष्टसप्तमशताब्दे भववर्मनामकस्य वंशजैरुच्छ्रयं प्रापितम् । पूर्वोक्तं फूनानराज्यं तैर्विजित्य कम्बोडियाप्रदेशं कोचीन-चीनं च स्वमाहाराज्यस्याङ्गीकृतम् । तेषां राजधानी ईशानपुरमासीत् । तत्रान्तिमराजा जयवर्मा ६८१ ई० वर्षं यावत् शशास ।

अष्टमख्रीष्टशताब्दे कम्बुजराज्यं छिन्न-भिन्नं जातम् । नवमशताब्दे जयवर्मद्वितीयस्याधिपत्ये पुनरपि कम्बोजाः शक्तिमन्तः संजाताः । हरिहरालय-पुरं राजधानीं कृत्वा जयवर्मा द्वितीयो हिरण्यदासनामक-ब्राह्मणस्यानुष्ठानबलेन साम्राज्यदाढर्यमवाप । जयवर्मातृतीयः स्वपितू राज्यपद्धतिं सम्यगनुससार ।

नवमशताब्दे तत्रेन्द्रवर्मणा नवराजवंशप्रतिष्ठापको राजतेस्म । तस्य पुत्रो यशोवर्मा ८८९ ख्रीष्टाब्दे राजधुरं स्वीकृत्य यशोधरपुर-राजधानीकः स्वपराक्रमैः साम्राज्यं स्वज्ञान-विज्ञाननुरागैः[2] सांस्कृतिकसमुद्धारं च भृशं जनयामास । तेन पण्डितपरिषत् समुज्जृम्भिता, नैकाश्रमाः संचालिता नैकधर्मानुयायिनामाश्रया आयोजिताः ।

---

१. ब्राह्मणों ने वहाँ वेदों और वेदाङ्गों का प्रचार किया। भारतीय शैली पर अनेक मन्दिरों का भी निर्माण हुआ। फूनान के दक्षिण के एक अधिष्ठित सामन्त राज्य में भारत से आये सहस्राधिक ब्राह्मण आदिवासियों को सांस्कृतिकोपदेश करते हुए अहर्निश शास्त्रों के अध्ययनाध्यापन में निरत थे।

भार्गव—प्राचीन भारत का इतिहास पृ० ४९४

२. यशोवर्मा महाभाष्यटीकां व्यरचयदिति श्रूयते ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

खीष्टैकादशशताब्दे सूर्यवर्मा प्रथमः गृहकलहानन्तरं कम्बोजनरेशो बभूव। महान् विद्वान्, सद्धर्मनैष्ठिकः शासनपटुरयमग्नेर्ब्राह्मणानां च समक्षं शासनकर्मचारिणां राजनिष्ठानुवृत्तये शपथं कारयामास। तथापि तत्र गृहकलहे समुपस्थिते राष्ट्रप्रगमनमवरुद्धं बभूव। द्वादशशताब्दे सूर्यवर्मा द्वितीयः राजधुरं सम्यक् संसाध्य कम्बोजराज्यं समाहृत्य दक्षिणवर्मादेशं मलयदेशं च यावद् राज्यसीमां प्रसार्य चीनमहाराजेन दौत्यं प्रणिधाय नैक-महायज्ञान् समायोज्य च तत्रत्यराजश्रेण्यामनुत्तमं पदमधिगतः। अङ्गकोरवाट-विष्णुमन्दिरस्य कर्तायं सूर्यवर्मा स्वमन्दिरसदृशं महोच्छ्रयं शाश्वतं यशो लेभे।

११८१ खीष्टाब्दे लब्धराजपदवीको जयवर्मा सप्तमोऽन्तिमो सम्राण्महान् विजिगीषुश्च प्रबभूव। स चम्पाराज्यं दक्षिणवर्माप्रदेशं च विजित्य साम्राज्य-परिधिं वर्धयामास। अन्यच्च कोचीन-चीनः, लाओस-प्रदेशः, स्यामः, उत्तरमलयप्रदेशश्च कम्बोडिया-महासाम्राज्यस्याङ्गभूता एकच्छत्रीकृताः। स्वनिर्मिताभिनवाङ्गकोर इति राजधानीं स प्रकल्पयामास।

त्रयोदशशताब्दात् क्षीणं क्षीणतरं जातं कम्बोडियाराज्यं पूर्वसमृद्धिस्मारकमिव प्रवर्तते।

तद्यथा मजुमदारः प्रथयति—Since then many dynasties with kings bearing Indian names ruled in Kambodia (Kambuja) at least upto the fourteenth century.[1]

तस्मिन् प्राचीनयुगे मध्ययुगेऽपि कम्बोडिया लघुभारतमिवोत्साहसमुच्छ्रयेण भारतीय-संस्कृतेरात्मसात्करणेन भूयिष्ठं विभातिस्म। भारतस्य सर्वे धर्माः—वैष्णवः, शैवः, बौद्धश्च यथाकालं समुत्थापिताः समेधिताश्चासंख्येषु दीर्घतरायामेषु मन्दिर-चैत्य-विहारेषु मूर्तिचित्रशिल्पैः समलंकृतेषु तत्रत्यानां सांस्कृतिकजीवनौदात्त्यं प्रकल्पयन्तिस्मेति भवनादीनां ध्वंसावशेषु द्रष्टुं शक्यते। तत्रोत्कीर्णा मूर्ताश्चित्रिताश्च रामायण-महाभारत-पुराणादीनामाख्यानानि सहोरं वासयन्ति मनांसि विश्वतो दर्शकानाम्।[2] प्रदेशेऽस्मिन्

१. Indian Inheritance : Indian Colonies in the Far East p. 252.

२. कम्बोडियामन्दिरेषु देवदानवैः क्षीरसागर-मन्थनं, बाणासुर-प्रमथनं गोवर्धनधारणं विष्णोः कालनेमिवधश्चोत्कीर्णानि दर्शितानि। रामायणघटनाततिषु वानर-राक्षस-युद्धानि प्रहर्षणानि सन्ति। अन्यत्र भीष्मस्य शरशय्या-शयनम्, यमस्य मरणान्तर-पाप-पुण्य-बलेन फलप्रदानं च दर्शितम्। तत्र नैकस्थलेषु नृत्येश्वरस्य, सरस्वत्या नरसिंहेश्वरस्य, अवलोकितेश्वरस्य, अमिताभस्य यक्षराक्षसादीनां च कार्यकलापो निदर्शितः।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भारतीयशिल्पप्रवीणाः कलाकारास्तत्रत्यशिष्यान् तेषु तेषु प्रातिभशिल्पेषु प्रावीण्यं प्रापयन् ।

भारतीयधार्मिकसाहित्यं भूयः प्रभावयति कम्बोडियादेशस्य लोकजीवनम् । तत्रेष्टापूर्तस्य लोकप्रियता यथा भारते तथा प्रतिभाति प्रतिमन्दिरम् । पुस्तकालयः, चिकित्सालयः सेतु-जलाशय-सरोवराश्च लोकहितार्थं कृताः ।

कम्बोडियादेश उपनयन-संस्कारः सप्तवर्षीयाणां बालकानां क्रियते । तदनन्तरं कतिपयदिवसान् बालको ब्रह्मचारिवेषं धारयति । यज्ञोपवीत-धारिणां समाजे महती प्रतिष्ठा भवति ।

राज्याभिषेकस्तत्र भारतीयपद्धतिमनुसृत्य विधीयते । अङ्गकोरवाटः पुरा कम्बोडियाराज्यस्य वर्षाणां सप्तशतीं प्राक् राजधानी बभूव । पुरा सा राजधानी वास्तु-स्वारस्येन विश्वविख्यातासीत् । अङ्गकोरस्य जनसंख्या तदा दशलक्षप्रायासीत् । जङ्गलादिषु समाहितमिदं नगरमूनविंशख्रीष्टशताब्द उत्खनेन उपरिकृतं पुनः पौर्वविभूतिं स्मारयति ।

कम्बोडिया-देशाधिराजः (८७७–८८९ ई०) आसीद्यशोवर्मा ।[1] तस्य वैष्णवाश्रमादर्शस्तेन निर्मितस्य मन्दिरस्य भित्ता उत्कीर्णोऽधोविधः —

अतिथिं मानयेद्यत्नादातिथ्यानि च वर्धयेत् ।
मान्यो विशेषतः शूरो रणे दृष्टपराक्रमः ॥
रणार्थी त्वरणार्थिभ्यो धर्मरक्षा हितस्थिता ।
अध्यापकं विशेषेण ताभ्यामाचार्यमर्चयेत् ॥
आचार्यवद् गृहस्थोऽपि माननीयो बहुश्रुतः । इत्यादि

Inscriptions Sanskrities de Champa du Combodge.

अङ्गकोरवाटस्याध्यात्मिकाभिव्यक्तेर्वर्णनं प्रत्यक्षदृष्टं कृतमधोविधम्—

The temple and the palace at Angkor Vat are truly enormous affairs. Here as we stand at the foot of this stone grandeur of the Vat, we have a glimpse of the Endless, for it is an offering to the Transcendental; it relates to life after death. The very Nāga, the many headed serpent that guards the portal with its giant hood uplifted is the emblem of the Eternal Couch to the One who is without a beginning and an end.

We are lost in admiration as we gaze at the beautiful facades, long galleries with vaulting roofs, wide halls, arched doors,

१. यशोवर्मा सौगताश्रमं स्थापितवान् यत्र बौद्धभिक्षवः समाश्रिता बभूवुः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

galaxy of vast courtyards which were interspersed with smaller buildings of which only ruins remain. Here there is an image of Viṣṇu about ten foot and half high ... ... The towers are like so many peaks of the Mount Meru. Seen from the base the huge domes are lost in a giddy height; often they remain bathed in the light of the setting sun long after the rest of the building is lost in dim twilight.

There are some paintings on some of the walls depicting the last rest of the Kuru Military General on the bed of arrows, the churning of the ocean by the Devas and Daityas and the judgment scene of Yama. There is a painting where Nārāyaṇa is seen on the back of Garuḍa, his four arms holding suitable weapons for felling the demon leaders. Another portrays the release of Aniruddha; a third one equally as charming, depicts Hari fighting Kālanemi.[1]

अङ्गकोर विषये सदानन्दः पुनर्निगदति—

The whole work is a masterly piece of art. It reveals some very original ideas in architecture. All these qualities have made Angkorvat very famous. It has been rightly acclaimed as the first wonder of the world. American tourists come all the way round to have a glimpse of this rare spot of beauty architectural paradise on earth the blossom of human ingenuity. Indians can, and must justly be proud of this rare work executed by their ancestors. Very few Indians know of this cultural seat of theirs. A vast majority are unaware that their culture claimed at least half the globe.

Hindu Culture in Greater India page 93

कम्बोडिया-महाराजो जयवर्मा सप्तमः (११८१-१२२० ई०) बौद्ध-धर्माभिनिवेशेन प्रथां गतो महापरमसौगतोपाधिनालंकृतः। तस्य विश्वात्मक-कारुण्यं निकाममतिशेतेस्म। तस्य राजमहिषी जयराजदेवी शरणत्रयं गता सोत्साहं बौद्धधर्मं प्रवर्धयामास। तस्या आयोजनेन धर्मप्रचाराय तत्र नाटकानि अभिनीतानि। पात्राणि नाटकाभिनये क्वचिद् भिक्षुण्य आसन्।

थाईनां कम्बोडियाधिपत्ये कम्बोजदेशे बौद्धधर्मस्य प्रभावोऽवर्धत। ततः काम्बोजा बौद्धधर्मानुयायिनः संजाताः। फलतोऽङ्गकोरवाटादिमन्दिरेषु

1. Sadanand : Hindu Culture in Greater India p. 95, 96.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

हिन्दु-देवानां स्थाने बौद्धमूर्तयः प्रतिष्ठापिताः। अद्यावधि तत्र बौद्धधर्मस्य महिमा विलसति।

कम्बोडिया-प्रदेशे भारतीयसंस्कृतेः प्रभावोऽधोविधं संलक्ष्यते—

१. नैकेऽभिलेखाः संस्कृतभाषया निबद्धास्तत्रत्यकाव्यशैल्याः प्रौढिं प्ररोचयन्ते। तेषु वात्स्यायन-विशालाक्ष-प्रबरसेन-मयूर-गुणाढ्याश्चर्चिताः।

२. तत्र नगराणि भारतीयनगराण्येवोत्थापितानि—ताम्रपुरम्, आढ्यपुरम्, ध्रुवपुरम्, ज्येष्टपुरम्, विक्रमपुरमित्यादीनि विप्रशाला-सत्रचिकित्सालयादीष्टापूर्तैर्मण्डितानि शोभन्ते स्म।

३. कतिपयराजा ब्राह्मणा ब्रह्मविदो बभूवुः। अन्येऽपि राजानो धर्मशास्त्रादिपारङ्गता वैदिकसंस्कृतेरुन्नायका देवप्रतिष्ठां प्रपन्ना धर्मपरायणाश्चासन्। हिरण्यदासः, सर्वज्ञमुनिः, शिवपुरोहिताः सोमश्च तत्रत्यराजानां पौरोहित्येन नीतिनिदर्शनेन च सहायकाः आसन्।

३. देवालयेषु रामायण-महाभारतपुराणादीनां वाचनं दर्शकानां ज्ञानवर्धनाय पुण्यार्जनाय च नित्यमायोजितम्।

४. भारत-कम्बोडियावासिनां वैवाहिक-सम्बन्धोऽविरलस्तेषां सौहार्दं प्रास्फोरयत्। यमुनातटे लब्धजनिर्दिवाकरभट्टः कम्बोजराजकुमारीमुदूढवान्।

५. राजभिः कृता असंख्याश्रमा यथा भारते तथैव कम्बोजे समुदिता आसन्। यशोवर्मनामको राजा आश्रमशतीनिर्माणेन प्रख्यातो बभूव।

६. भारतीयशिल्पकलादीनां भारतादप्यधिकतरं प्रगमनं कम्बोडियादेशे विलसतीति अङ्गकोरवाटवर्णनप्रसङ्गे प्ररोचितमेव।

आधुनिककम्बोडियाध्वजे गोपुरत्रयं चित्रितं भवति। राधाकृष्णन् महाभागो निगदति—Flag with its three Gopuras is an indication to us all not to be content with what we are. But to keep moving forward until we reach the goal.
President Radha krishnan's Speeches and Writings. P. 29.

कम्बोडिया-देशे रामायण-कथा रामकेरनाम्ना विरचिता तथैव कम्बोजप्रदेशे प्राप्ता अभिलेखास्तत्र व्युत्पन्नामाध्यात्मिकदृष्टिं निदर्शयन्ति। तद्यथा मजुमदारो वर्णयति—These inscriptions reveal a spirit of piety and renunciation, a deep yearning for emancipation from the tramnels of birth and evils of the world, and longing for the attainment of

१. प्रो० भार्गवः प्राचीन भारत का इतिहास पृ० ४९५–९६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

the highest bliss and salvation by union with Brahman, the ultimate reality.

Indian Inheritance : Indian Colonies in the Far East.

तत्र देवालयेषु पुस्तकाश्रमस्य स्थापना कृता ।

लाओसः

आधुनिकेण्डोचाइना-प्रदेशस्यैकभागः सम्प्रति स्वतन्त्रदेशः प्राचीनयुगे भारतीयैः सांस्कृतिकपथे प्रवर्तितः । तत्र लिपिः पालिरस्ति । मन्त्रिपदं राज्ञो यथा संस्कृतेऽस्ति तथैव वर्तते । सप्ताहस्य प्रथमदिवसस्तत्र भानुवारोऽस्ति,

लाओस-प्रदेशे नैकमन्दिरभित्तिसु रामचरितमुत्कीर्णं वर्तते । तत्र रामचरितस्य संस्करणद्वयं—फालक-कालामं फोमचक्रं च विद्यते । देशेऽस्मिन् मेकाङ्गनदी भारतीया 'मातः गङ्गे' अस्ति ।

अन्नाम, चम्पा, (वियतनाम)

पुरातनयुगे चम्पेति ख्यातं राज्यमधुना अन्नामवियतनामे इति प्रसिद्धम् । चम्पाया राजधानी चम्पानगरी चम्पापुरं वासीत् । अधुना नगरीयं त्रकियु इति स्थानेनावधार्यते ।

चम्पायां सप्तमशताब्दे बौद्धधर्मो लोकप्रिय आसीत् । तत्र बौद्धग्रन्थानां पुस्तकालया विशाला आसन् ।[1] तत्र नैके राजानो बौद्धमन्दिराणि मठांश्च निर्मितवन्तः । गौतमबुद्धस्य मूर्तयः पूजास्थानं बभूवुः ।

कम्बोडियातः पूर्वदिशि सम्पृक्तश्चम्पादेश आदौ श्रीमारनामकेन भारतीयराजेन द्वितीयख्रीष्टशतके[2]ऽधिष्ठित आसीत् । राजवंशेऽस्मिन् पञ्चमशताब्दे भद्रवर्मानन्यसम्राट् शौर्यातिशयेन प्रथां गतश्चीनराजं परास्यत् । तस्य शासनकाले चम्पाया भागत्रयं तस्याधिपत्य एकतां गतम् ।[3] चतुर्वेद-पारङ्गतो महापण्डितः स माइसोन-स्थले भद्रेश्वरस्वामिमन्दिरं राष्ट्रमन्दिरमिति निर्मितवान् । तदनन्तरं महाराजो गङ्गराजो योगेनान्ते ७५७ ख्रीष्टाब्दे तनुं त्यक्तुं भारत आगत्य गङ्गातटमाश्रयत ।

1. Even as early as A. D. 605 a victorious Chinese general carried away 1350 Buddhist books from this country.

2. The oldest Hindu monument is a Sanskrit in scription from Vochanh in South Indian script of the 2nd or 3rd century A. D.

Sadanand : Hindu Culture in Greater India p. 111

३. उत्तरभागोऽमरावती, मध्यभागो विजयः, दक्षिणभागः पाण्डुरङ्गश्चासन् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तत्र परतो भृगुवंशीयो राजेन्द्रवर्मा (९११–९७१ ई०) महान् वेदवेत्ता, बौद्धदर्शन-पाणिनिव्याकरणादिपारगामी च बभूव ।

चम्पादेशस्य परवर्तिनराधिपानां नामानि तेषां सांस्कृतिकाभिनिवेशं प्रद्योतयन्ति । ते सन्ति—जयपरमेश्वरदेव ईश्वरमूर्तिः १०५० ई०, रुद्रवर्मा, उत्कृष्टराजा हरिवर्मा १०७० ई०, परमबोधिसत्त्वश्च । एतेषां महाराजानां प्रजासंवर्धनेन चम्पा त्रयोदशशतवर्षाणि यावद् यशस्वितामधिकरोतिस्म । १४७० ख्रीष्टाब्दतश्चम्पा स्वत्वविरहिता प्रवर्तते ।

चम्पाराज्ये भारतीय-संस्कृति-प्रभावोऽधोविधं संलक्ष्यते—

(१) तत्रत्यसमाजे ब्राह्मणक्षत्रियैः चातुर्वर्ण्यव्यवस्था सुस्निग्धं परिपालितासीत् । वैवाहिक-पद्धतिः, सतीप्रथा समृद्धलोकेषु, व्रतोत्सवचर्या, अन्त्येष्टि-संस्कारादयो रीतयो भारतीयतामनुहरन्ति स्म ।

३. चम्पायां धर्मत्रयं व्यराजन्त । प्रमुखतः शैवधर्मो वैष्णव-बौद्धधर्माभ्यां[1] सुसंगत आसीत् । पाण्डुरङ्गे लिङ्गराजस्य माइसोननगरे च भद्रेश्वरस्य मन्दिरे स्तः । भगवतीपीठं, गौरीपीठं च पूजास्थली । नटराजमूर्तयः[2] गणेशमूर्तयः, कार्तिकेयमूर्तयो विलसन्ति । हनुमान् तत्रास्ति ।

३. राजभाषा संस्कृतमासीत्

४. नैकशिलालेखेषु रामकथानायकानां चर्चा वर्तते ।

चम्पायां बौद्धधर्मस्य आर्यसम्मितीयशाखा, सर्वास्तिवादि - शाखा, महायान-सम्प्रदायश्च[3] महत्त्वं प्रापिताः । तत्र राजा इन्द्रवर्मा ८७५ ख्रीष्टाब्दे दोंग-दुआङ्गे महतीं बौद्धसंस्थां स्थापयामास ।

मलय-प्रायद्वीपः[4]

स्यामदेशतो दक्षिणदिग्विभागे मलयप्रायद्वीपस्तत्समीपवर्तिनो द्वीपाश्च भारतेन पूर्वदिश्यदेशानां व्यापारस्य केन्द्रं बभूवुः । मलयराज्यस्य तक्कोल-

1. A Standing Buddha figure in bronze found in Dong Doung closely related in style to the Indian School of sculpture at Amaravatī. Sadanand : Hindu Culture in Greater India. p. 112.

२. नटराजस्य षड्वाहनाः सन्ति ।

३. पञ्चदशख्रीष्टशताब्दं यावत्तत्र महायान-बौद्धधर्मः सशक्तं प्राचरत् । तदनन्तरमिस्लामधर्मश्चम्पां जग्राह ।

४. वर्मातो दक्षिणदिशि तक्कोलतः(तकुआपा)आरभ्य सिङ्गापुरं यावत् प्रायद्वीपस्तस्य वामदक्षिणयोर्लघुद्वीपमाला च मलय इत्यभिधीयते । बालिद्वीपोऽपि बृहन्मलयस्य भागोऽभूत् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नामके नौकाश्रये बेलेजली प्रान्ते च संस्कृतेनोत्कीर्णलेखानां मन्दिराणां च ध्वंसावशेषा लभ्यन्ते।[1]

प्रदेशेऽस्मिन् खीष्टसंवत्सरस्य प्रारम्भिकयुगे नैकभारतीय-राज्यानि प्रतिष्ठितानि बभूवुः। चीनराजं प्रति मलयाधिराजः कश्चित् षष्ठशताब्दे दूतं प्राहिणोत्। अन्यानि हिन्दूराज्यानि प्रदेशेऽस्मिन् कर्मरङ्गः, कलशपुरम्, कराहः, पहङ्गं चासन्।

खीष्टाब्दतः प्रारभ्य मलयप्रदेशे भारतीयसांस्कृतिकप्रभावः क्षीणतरोऽपि अद्यावधि दृश्यते। पञ्चदशशताब्दे तत्रत्यो राजा इस्लाम-धर्मानुयायी जातस्तथापि यथा सदानन्दो वर्णयति तत्र—A coronation oath of a Muslim Sultan is read in corrupt Sanskrit praising the new ruler etc. Hindu Culture in Greater India. p. 128.

From the cradle to the grave the Malaya is surrounded by survivals of Indian culture. Even his nursery tales are many of them from fables, Jātaka Tales and Ocean of Tales (कथासरित्सागर) Ibid. p. 130.

मलयदेशस्य भाषायामद्यापि संस्कृतशब्दा मौलिकार्थेऽधोविधं प्रयुज्यन्ते—शुचि, स्वामी, स्वर, स्वर्ग, सेतिय (सत्य) सेतियवान् (सत्यवान्), सर्व. सरोज, शृगाल, सेरी (श्री), सेरि नगरी (श्रीनगरी), सेरप (सर्प), सेन्दव (सैन्धव), सेना, रूपवान्, ऋषि, रत (रथ), रस इत्यादि।

मलयप्रदेशे शैलेन्द्राणां माहाराज्यस्य स्थापनाष्टमशताब्दे प्रबभूव।

मलय-प्रायद्वीपस्य विविधभागेषु संस्कृतेन भारतीयलिपौ उत्कीर्णा लेखाः प्राप्यन्ते। श्रीतम्मराट-(लिगोर) नामके स्थले प्राप्तध्वंसावशेषैः प्रतीयते यत्तत्र बौद्धानामुपनिवेशः प्रबभूव।[2] तत्र कश्चिद् विशालस्तूप आसीत्। केडानिकटं प्राप्तेनोत्कीर्णलेखेन ज्ञायते यत् षष्ठखीष्टाब्दे तत्र महायान-बौद्धधर्मस्य प्रचार आसीत्।

मलयदेशे रामचरितं 'हिकायत-सिरीरामा' नामके ग्रन्थे गुम्फितम्। रामचरितमाश्रित्य नाटचप्रयोगाः सङ्गीतकानि चाधुनापि लोकमानसं हरन्ति। तत्र नौसेनानायको लक्ष्मण-पदवीकः सम्मानितः।

---

१. ऊनविंश-खीष्टशताब्दं यावद् मलयराज्यं ज्ञान-विज्ञान-धर्मराजनीति—साहित्य शिल्पकलादीनां कृते भारतमेवोपजीवति स्म।

सदानन्दः Hindu Culture in Greater India P. 127.

२. एतैर्लेखैर्ज्ञायते यत्तत्र ७७५ खीष्टाब्दे इष्टकानिर्मितविहारत्रयं पञ्चस्तूपाश्च निर्मिता आसन्।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सुमात्रा (स्वर्णद्वीपः)

सुमात्रा-जावा-बालि-बोर्नियोद्वीपानामेका संहिता संज्ञा सुवर्णद्वीपोऽस्ति। साधारणतः प्रमुखभूतः सुमात्रादेशः सुवर्णद्वीप इति प्रथितम् । सदानन्दः सुमात्राद्वीप आर्याणां समागमं १००० वर्षाणि ख्रीष्टपूर्वं सूचयति ।[1]

ख्रीष्टसप्तमशतके स्वर्णद्वीपे उभयोर्हीनयानमहायान बौद्धधर्मयोः प्रचारः प्रारभ्यत । सप्तमशताब्दे इत्सिगः ' चीनी यात्री) स्वर्णद्वीपे षण्मासेन संस्कृतं शिक्षित्वा नालन्दामागतो द्वारपण्डितैः परीक्षितस्तत्र प्रवेशं लेभे। ततः परावृत्येत्सिगः सुवर्णद्वीपे ग्रन्थाकराणां प्रतिलिपिं चकार । चीनतश्चतुर्भि प्रतिलिपिकारैः सहितः पुनरागत्य स वर्षचतुष्टयं यावत् बौद्धग्रन्थानां प्रतिलिपिं बहुलीचकार ।

वज्रबोधिः ७११ ख्रीष्टाब्दे सुवर्णद्वीपं समुद्र-यानेन दक्षिणभारतादागतः।

सुवर्णद्वीपस्यान्यतमः शासको नवमख्रीष्टशताब्दे बलपुत्रदेवो बङ्गाधिपं देवपालदेवं ग्रामपञ्चकदानेन नालन्दापरिसरे कस्यचिद् विहारस्य संपोषण-व्यवस्थां निवेदयामास । देवपालेन स्वीकृतमिदं कार्यम् ।[2]

अतिश-श्रीज्ञानदीपङ्करो बङ्गदेशोद्भवः सुर्णद्वीपे १२ वर्षाण्यधीत्य महायान-तान्त्रिकसम्प्रदायस्यानन्यविद्याकरो बभूव । स स्वीयज्ञानप्रकाशेन सुवर्णद्वीपं विद्योतयामास । सुवर्णद्वीपस्य राजकुमारो धर्मकीर्तिर्बोधगया-विहारे श्रीरत्नेन महायान-तान्त्रिक - सम्प्रदाये दीक्षितः । स्वदेशं प्रत्या-वर्तितः स सर्वोच्चबौद्धविद्याधीशः महत्तमां प्रतिष्ठामवाप । अतिशस्य दर्शनेन स आत्मानं धन्यधन्यममन्यत। दीपङ्करस्य सांस्कृतिकयोगदानेनोपकृताः सुवर्णद्वीपवासिनस्तस्य गौरवं माहात्म्यं चामरीकर्तुं नैकलेखेषूद्धरन्ति स्म।

सुवर्णद्वीपे बौद्धशैवधर्मयोः परस्परं सम्मिश्रणं सौम्येन संजातम्। तत्र पौराणिकहिन्दूधर्मेण वासितो बौद्धधर्मः प्रागल्भत । शिवबुद्धयोरेकीभावोऽस्यां दिशि परं रोचते । सदानन्दः समीक्षते—

There is a fine Mūrti, well proportioned and carefully executed which has a too suspiciously close appearance of a Buddha with upturned palms to be identified with a Hindu deity.

Hindu Culture in Greater India. p. 58.

---

1. We could definitely assert that this land came under the cultural sway of the Aryans at least in 1080 B.C. Hindu Culture in Greater India p. 52. It is, however, certain that Hinduism held its own in Sumatra during the fifth century which it coutinued to do for another hundred years at least. Ibid p. 53.

२. अस्य ग्रन्थस्य पृष्ठं ९३ द्रष्टव्यम् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

बालिद्वीपः

भारताद् १५०० क्रोशदूरं समुद्रान्तरितो बालिद्वीपोऽद्यापि हिन्दूधर्म-कुलोत्तम इव हिन्दमहासागरे दक्षिणपूर्वदिशि उच्छलति । तत्रत्यः सर्वे निवासिन आत्मानं हिन्दव इति प्रतिबोधयन्ति ।[1]

बालिवासिनः सर्वशो भारतीयवंशोद्भवाः सन्ति । सदानन्दः प्रबोधयति–

Balinese are of Indian descent. Their graeeful features and alluring complexion are convincing evidence of the same. Their women folk are famous for their beauty. In their desire to preserve and maintain the cherished faith and culture of the ancestors, the Balinese have jealously guarded against Islamic inroads for these years.[2]

बालिद्वीपे भारतानुसारेण महाभारतानुसारेणच वर्णव्यवस्था, संस्कार-विधिः, वेषभूषा, कर्मफलानुसारमरणोत्तरगतिः, पुनर्जन्मास्था, वेदोपनिष-न्महाभारतरामायणादिग्रन्थानां संस्कृतोपजीव्यता श्राद्धविधानादिकमद्यापि प्रवर्तन्ते । तेषां दैनिकजीवनं क्षणशो धर्माभिप्रायमनुवर्तते ।[3]

तत्र शिवस्य पूजा प्रामुख्येण भवति । गणेशो लक्ष्मी च देवद्वयं समृद्धि-कारणं मत्वा पूज्यते । हंसवाहनयुतो ब्रह्मा द्वारस्तम्भे प्रतिष्ठापितो दृश्यते । सर्वेषां समृद्धिप्रददेवानां पूजार्थं पृथक् पृथग् वेदयः स्थाप्यन्ते । शिवालयाः बहुसंख्यका निर्मिताः सन्ति ।

पूजाकर्मणि पुष्पफलानामापूपिकानां च सम्भारा देवालयप्रांगणे पर्वती-क्रियन्ते । पूजाविधौ देवविग्रहस्याभिषेकः, चन्दनलेपः, मालाधारणं, नैवेद्य-समर्पणं च पुरोहितैः सम्पाद्यानि प्रमुखाणि कार्याणि भवन्ति । शंख-घण्टा-क्षुद्रघण्टिका-निनादैरर्चादीपशिखाभिः आहुतिभिश्च समेतं देवार्चनं प्रवर्तते । अन्ते चरणामृतवितरणं भवति । एतत्सर्वं नृत्यसङ्गीतमयं प्रकरणं सर्वेभ्यो रमणीयतां विदधाति ।

---

१. बालि परित. सर्वेषु द्वीपेषु पञ्चदशशताब्दानन्तरं यवना खीष्टाश्च बहुलीभूताः । तथापि बालिद्वीपे हिन्दुत्वं दृढं स्तम्भायते ।

2. Hindu Culture in Greater India P. 8.

३. तथाहि—Even his pleasnre is bound up with it 'spiritual significanee) as he cheerfully devotes his leisure-hours to dances held in honour of the gods of god, the silver white Śiva Śaṅkara. Ibid. P. 9.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रत्येकगृहस्य तत्र मन्दिरं देवपूजानिमित्तं सार्वजनिकोपयोगाय भवति। मन्दिरेषु चातुर्वर्ण्यस्य सम्मेलनं प्रमोदपूर्णं भवति। नास्ति तत्र स्पृश्यास्पृश्य-विचारणा।

बालिद्वीपे उपासनाविधे प्रमुखाङ्गानि सन्ति—

(१) प्रणवः प्राणायामश्च। कुण्डलिनी-जागरणस्याभ्यासः प्रणीयते।
(२) शिल्प-वास्तु-कलाकृतिषु ब्रह्मविष्णुमहेशाख्यदेवत्रयस्यः निदर्शनम्।
(३) तद्यथा सांख्यदर्शने व्याख्याता सृष्टिः प्रकृतिपुरुषयोः संयोगेन जायते।
(४) पञ्चाक्षरो मन्त्रो 'नमः शिवाय' इत्यस्य सार्वजनीनता।
(५) सूर्यसेवनम्।
(७) रामायण-महाभारतयोर्नायकानां तेषां वृत्तानां च लोकप्रियता। अर्जुन-विवाह-कथा सुतरां समादृता वर्तते।

स्वामी सदानन्दो भारतवासिनां कृते बालिद्वीपस्य सांस्कृतिकोपलब्धि-दर्शनं तीर्थदर्शनमिवात्मसात्करणीयं मन्यते।[1]

जागती-नगर-परिसरे परमनवं-मन्दिरे रामचरितमुत्कीर्णम्। अन्यत्रापि नैकमन्दिरेषु रामकथादृश्यानि रामस्य विश्वधर्मसंयोजन-सामर्थ्यं भृशं विभावयन्ति। सांस्कृतिकप्रगमनापेक्षया बालियवद्वीपद्वयं साह्यभावेन चिरं व्यराजेताम्।

भारतीयकला-सौष्ठवमधुनापि स्वीयमौलिकविभवेन बालिद्वीपे प्रचरति। तथाहि—Today the finest Indian based Indian inspired dancing in the world is not in India but ln Bali. The Theatre in the East. p.7.

अद्यापि भारतस्य मानसिकप्रणयो बालिद्वीपं प्रति समादरपूर्वकं सुगृहीत एवेति हिन्दुस्तानटाइम्स पत्रस्याधोवृत्तेन सम्यग् विभाति –

On the Kartik Purnima day in November, four young men will sail out in a wooden boat from the ancient port town of Palur in Orissa for Bali islands to recapitulate the spirit of an Indian heritage.

Kartik Purnima is still celebrated in Orissa as the "Bali jatra" day when banana stick boats, carrying lighted candles, are floated in the sea to commemorate the olden days when trading boats set sail for south-east India.

---

1. Why not we all add Bali to the existing places of pilgrimage for it is a fountain of all round pleasure to all alike.
Hindu Culture in Greater India. p. 17

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

Union Deputy Minister for Shipping and Transport Pranab Mukherjee today laid the keel of the wooden boat which will sail along the eastern coast towns of Vishakapatnam, Masulipatnam, Madras, and reach Bali via Trincomalee in Sri Lanka, the great Nicobar, Penang in Malaysia and Singapore. The boat will also call at the Indonesian ports of Palembong, Jakarta and Surabaya.

The return journey will be routed through Colombo, Cochin, Calicut, Goa and end at the port of Broach in Gujarat, where the Bali youth will receive a people's felicitation.

Mr Mukherjee congratulated the explores' club for planning the expedition and reviving among the youth the spirit to face hazards of the sea.

He promised that the Central Inland Water Transport Corporation, at whose Rajabagan dock the boat is to be built, will make every effort to deliver the vessel in September so that the organisers can keep to the schedule.

The Union Education Ministry will contribute Rs 2.5 lakhs to words the Rs 6 lakh expedition.

The expedition team to be announced soon will comprise three Indians and a Bali youth.

The 39 ft. 9 inches long and 10 ft. 6 inches wide boat will be shaped after the old Kalinga galleons which came into use 2,000 years back and were in operation until a century ago.

The boat will be pointed at both ends and carry 850 sq. ft. of sail on her two square masts. It will have a wireless communication system.

The 10,000 mile voyage to Bali and back to Broach will take six months.

जावा-(यव-)द्वीपः

जावा जन-संख्या-दृष्टचा विश्वस्य निबिडतमः प्रदेश इण्डोनेशियाया दक्षिणावधिको विंशसहस्राधिकलक्ष-वर्गकीलोमीटर-विस्तृतः।

चतुर्दशज्वालामुखपर्वतैः समावृतः सुमेरुनामकेन ४००० मीटरोच्चयेन पर्वतेन शिखरितश्च दीपोऽयं विराजते। यवद्वीपः पुरा हिन्दुबौद्धधर्मानुयायिभिः सम्भृतोऽधुना मुस्लिमजनबहुलोऽपि भारतीयसंस्कृतेरुदात्ततमस्मारकाणि भूयिष्ठं संरक्षति।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्राचीनभारतीयसाहित्ये यवद्वीपोऽनेकत्र वर्णितः। तद्यथा रामायणस्य किष्किन्धाकाण्डे सुग्रीवो वानरानादिशति—यवद्वीपं गच्छेति।[1] ब्रह्माण्ड-पुराणे, मणिमेक्कलई-काब्ये कथासरित्सागरे च द्वीपोऽयं चर्चितः।

सुमात्रातः पूर्वदिशि स्थितो यवद्वीपः (जावा) सर्वप्रथमं प्रथमख्रीष्ट-शताब्दे सौराष्ट्रराजमन्त्रिण आजिशकस्य पदावधारणेन पावनीभूतः। तदन-न्तरं कलिङ्गतो विंशतिसहस्रकुटुम्बानि तत्र स्थायिनिवासिनः संजाताः। १३२ ख्रीष्टाब्दे यवद्वीपनरेशेन देववर्मणा चीनं प्रति दूतमण्डलं प्रहितम्। पश्चिमयवद्वीपस्याभिलेचतुष्टये षष्टशताब्दीकस्य तदानीन्तनराजस्य पूर्णवर्मणः प्रशस्तिर्वर्णिता। अन्यतमे लेखे तस्य पितामहो राजर्षिः पिता च राजाधिराज इति प्रोक्तम्। राजवंशोऽयं जलकुल्यानिर्माणेन यशो लेभे। पूर्णवर्मणा गोमतीनामककुल्योत्खाता। तस्य पिता चन्द्रभागेति ख्यातां कुल्यां कृतवान्।

यवद्वीपो भारतानामुपनिवेशेषु प्रथमगणनामर्हति। सोऽयं द्वीपः समग्रतः सांस्कृतिक-प्रवृत्तिभिरपरं भारतमिव प्रतिभातम्। न केवलं भारतीयराज-शासनपद्धतिरपितु शिल्पकलादयस्तत्र प्रोन्नतिं चिरं लेभिरे। मन्दिरेषु शिवस्त्रिशूलधारी, विष्णुश्च शंख-चक्र-गदा-पद्मादिभिर्दिव्यतामास्थापयतः। फाह्यानानुसारेण पञ्चमशताब्दे द्वीपोऽथं वैदिकधर्मविशिष्टो राजते स्म। तदनन्तरं कश्मीरकेण भिक्षुणा गुणवर्मणा तत्र महात्मनो बुद्धस्य धर्मोपदेशः प्रचारितः।

यवद्वीपे परवर्तिशैलेन्द्रराजवंशस्य कलाकृतयः सार्वभौमप्रशस्तिं समाकलयन्ति। तासु नवमशताब्दीकस्य बोरोबुदुर-स्तूपस्य शोभा स्वमहिम्नाधुनापि राजन्वती मानवीयकलाया विश्वेऽनुत्तमादर्शं विभ्राजयति प्रो० भार्गवो मनुते—इसके सबसे नीचे के चबूतरे की लम्बाई ४०० फुट और सबसे ऊपर के चबूतरे का व्यास ९० फुट है। ४३२ प्रतिमाधिष्ठानों में एक-एक मूर्ति प्रतिष्ठित है। सरणियों में १५०० दृश्य अङ्कित हैं। विशालता, तक्षण और अलङ्करण की अनोखी समंजसित प्रभविष्णुता विलक्षण है। अपनी कोटि की यह विश्व की अनुपम कलाकृति है।

त्रयोदशशताब्द्या अन्तिमे भागे यवद्वीपे कृतनगर इति महान् राजा बभूव। स बाली-सुमात्रादिनैकद्वीपानजयत्। मदिरासक्त्या पतितः स प्रतिवेशिराजेन पंचत्वं प्रापितः। तस्य जामाता विजयः स्वपराक्रमेण कृतनाम-सार्थः तिक्तबिल्वनगरे राजधानीं चकार। तद्वंशीयाः राजानो मजपहित इति

---

१. यत्नवन्तो यवद्वीपं सप्तराज्योपशोभितम्। ४०.३० यवद्वीपमतिक्रम्य। ४०.३१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ख्यातिं लेभे । चतुर्दशशताब्देऽयं राजवंश न केवलं मलयप्रायद्वीपमपितु मलयद्वीपसमूहमपि स्वच्छत्राधीनं चकार। शैलेन्द्र-तिक्तबिल्ववंशयोरनुत्तमा विजयश्रीः भारतीयसंस्कृतिसुरभिं तस्मिन् भूखण्डे प्रसारितवती।

पञ्चदशशताब्दे यवद्वीपस्य कश्चिद् भारतीयशूरः मलक्का-द्वीपे स्वराज्यं स्थापयामास। तस्योत्तराधिकारीस्लामधर्मानुयायी संजातः। तस्य विपरीत-प्रभावेणेस्लामधर्मो नैकद्वीपेषु लोकानां धर्मपरिवर्तनाय प्राभवत्।

यवद्वीपे भारतीयानां राज्यं प्रथमखृीष्टशताब्दे स्थापितमासीत्। तत्र खृीष्टाष्टशतके पूर्णवर्मा प्रख्यातो राजासीत्। अष्टमशतके संजयनामको राजा महान् विजेता बभूव।

यवद्वीपस्तदनन्तरं शैलेन्द्रसाम्राज्यस्याङ्गभूतः। पुनः स्वातन्त्र्यं लब्ध्वा बिल्वतिक्तनामको राजवंशः पञ्चदशशतकं यावत् शशास।

जावाद्वीपे मतराम-वंशीयो महाराजो बलितुङ्ग आसीत्। तस्य राजकवि-र्योगीश्वरः 'रामायण-ककविन्'-नामकं रामचरितात्मकं महाकाव्यं कवि-भाषया नवमखृीष्टशतके निबबन्ध। महाकाव्ये तत्र २६ सर्गाः २७७८ श्लोकाश्च विलसन्ति।

जोहनफेब्रिको यवद्वीपस्य नैसर्गिक-विभवमालोचयति—In that beautiful evergreen island south of the equator once an economic treasure of the world and a happy example of good understanding between peaceful raees.[2]

यवप्रदेशे दशमशताब्दीतः पुत्तलिकाछायाभिनयेन महाभारतरामायणयोः कथास्तत्रत्यजनानां संस्काराय प्रबभूव।[1]

प्रो० भार्गवानुसारेण यवद्वीपो भारतीय-संस्कृति-काव्य-शिल्पकला-धर्म-दर्शन-राजनीतिक - प्रवृत्तीनां कृतेऽनन्योर्वराप्रत्यारोपणप्रक्रियां सुफलां प्रतानयतिस्म। यद् भारते विस्मृतं तदपि क्वचिद् यवद्वीपीयकाव्येषु लब्धुं शक्यत इत्याशया भारतीयपुरातत्त्वविदां कृतेऽस्पृष्टापि महती सामग्री अनुसन्धानदृशा परीक्षणमर्हति। नैके संस्कृतभाषया विरचिता हस्तलिखित-ग्रन्था विदुषामुन्मेषणेन स्वलेखकानां स्वात्मानमानृण्यं स्पृहयन्ति।[3]

युगत्रयेण तत्रत्यसाहित्यं विभाजनमर्हति। प्राचीनयुगसाहित्यं १०००-१४०० ई० पर्यन्तं, बालिद्वीपप्रवासिनां यवद्वीपीयानां विरचितं साहित्यं मध्ययुगीनं,

1. Javanese Shadow Puppets by Jeune-kemball London 1970.
2. Java Revisited, Preface. p. VI.
३. शैलन्द्रराजैर्जावाप्रदेशे भारतीयमूला लिपिः प्रचारिता। बहवो ग्रन्था अभिनव-लिपौ लिखिताः सन्ति।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नवयुगीनं कविरिति प्रथां गतं साहित्यं साम्प्रतिकमेव । प्राचीनयुगस्य रामायणमेकादशशताब्दिकं सर्वाधिकं प्रतिष्ठितं राजते । महाभारतमाश्रित्य तत्र काव्यमहार्णव एव समुदितः ।

श्रीविजय-साम्राज्यम्

भारतस्य कलिङ्गदेशात् केचिद् राजवंशीया अष्टमखीष्टशताब्दे शैलेन्द्रा इति ख्याता दक्षिण-बर्माप्रदेशं कंचित्कालमधिष्ठाय ततो दक्षिणदिशि मलय-प्रदेशमधिगम्य तत्र महाशक्तिसमुच्छ्रिताः प्रबभूवुः । तत्रैव स्वीयसाम्राज्यस्य केन्द्रं राजधानीं विधाय ते शनैः शनैः प्रायः समग्रतः पूर्वदिश्यदेशान् द्वीपांश्चाधिचक्रुः ।[1] खीष्टश्चतुर्दशशताब्दं यावत्तेषां प्रभुत्वं विभाति स्म ।

डा० मजुमदारः प्रमाणयति—Thus ended an empire which was established in Malayasia by chiefs of Indian descent as early as the eigth century A. D. after a glorious existence.[2]

शैलेन्द्रामलयप्रदेशे केन्द्रीभूतां मलयद्वीपमालां सुमात्रां जावां चाधिकृतवन्तः । तेषां प्रभुत्वं कम्बोडियामन्नामं च यावद् व्याप्तमासीत् ।[3]

शैलेन्द्र-साम्राज्यम्

शैलेन्द्राणां भारतीयसंस्कृत्यभिनिवेशो दृश्यते । ते महायानबौद्धधर्मानुयायिनो बभूवः । तेषां प्रथमसम्राट् धरणीन्द्रवर्मा (७८३ ई०) वङ्गदेशीयस्य भिक्षुकुमारघोषस्य शिष्य आसीत् । तस्य पौत्रो बालपुत्रदेवो महान् सम्राट् प्रबभूव । ते नवमखीष्टशताब्दे नालन्दायां विहारमेकं निर्ममिरे । तदर्थं वङ्गराजेन देवपालेन पञ्चग्रामान् दापयामास । देवपालस्योत्कीर्णलेख इयं दानवृत्तिरङ्किता वर्तते । शैलेन्द्राः कम्बोजस्यैकदेशस्य शासका क्वचिदासन् ।

शैलेन्द्राणां भारतीयसंस्कृतिसंवर्धनाय प्रयत्ना न केवलं पूर्वद्वीपसमूह एव सीमिता आसन्नपितु भारतेऽपि बौद्धविद्या धर्मसंस्थाश्च प्रवर्धयितुं ते रुचिकृतो बभूवुः ।

वरुण-द्वीपः (बोर्नियो)

बोर्नियो-द्वीपस्य चतुर्षूत्कीर्णलेखेषु महाराजमूलवर्मणो याज्ञिकप्रवृत्तयो

---

1. R. C. Majumdar : Greater India. p. 35
2. Ibid p. 41.
3. We find it (Śailendra dynasty) established as a royal power in the Malaya Peninsula in the year A. D. 775. Soon the kings of the dynasty made themselves master of the whole of Malaya Archipelago including Sumatra and Java and made their influence felt in Annam and Cambodia. Ibid 32

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वर्णिताः। तस्य यज्ञो बहुसुवर्णको महत्तमस्वर्ण दानेन संलक्षितः प्रतिभाति। स वप्रकेश्वरदेवस्य सान्निध्ये २०,००० गवां दानेन पुण्यमर्जितवान्।

बोर्नियोद्वीपस्य भ्रंशमाना मूलनिवासिनो वनान्तरेषु सन्निविष्टाः प्राचीनतमजीवनविधिमद्यापि प्रायोऽनुसरन्ति।

डाइकाभिधा अन्ये निवासिनः समुद्रतटेषु वा नदीतटेषु वा कृतवसतयः प्रायो मानवीयगुणप्रपन्ना अपि विश्वात्मकजागरणविहीनाः प्रतिभान्ति। सुदूरप्राचीनयुगे ते भारत-जावा-साम्राज्यस्य प्रजाभूता मानवसंस्कृति-पथं किञ्चिन्मात्रं चरन्ति स्म। ततः परं तेषां सम्पर्कश्चीनैरारब्धैश्च दीर्घकालीनः समजायत। तेऽधुनापि नाम्नैव मोहम्मदीया धर्मप्रकाशमर्हन्ति। वन्या डाइका अधुनापि नरहत्याभिरुचेर्विरक्ता न सन्ति। तेषां प्राकृतिकं जीवनं नृत्य-संगीत-कथाभिरुचिसुसङ्गतं क्वचिद् रम्यमेव।

पूर्वबोर्नियो-प्रदेशे प्राप्तस्य मूलवर्मशिलालेखस्य[1] पाठोऽधोविधः —

श्रीमद्विराजकीर्ते राज्ञः श्रीमूलवर्मणः पुण्यम्।
शृण्वन्तु विप्रमुख्या ये चान्ये साधवः पुरुषाः॥
बहुदानजीवदानं सकल्पवृक्षं सभूमिदानं च।
तेषां पुण्यगणानां यूपोऽयं स्थापितो विप्रैः।

मूलवर्मा यज्ञेऽस्मिन् विंशतिं गोसहस्रकं इत्यादि दक्षिणयोत्ससर्जेति वर्णितमस्मिन् लेखे।

प्रो० भार्गवो मूलवर्माणमधिकृत्य प्रवदति—बोर्नियो द्वीप के पूर्वभाग में उपलब्ध हुए, ४०० ई० के आसपास सात संस्कृत अभिलेख इस बात को सिद्ध करते हैं कि उस समय तक वहाँ हिन्दुओं का एक उपनिवेश बस चुका था। इन अभिलेखों में कौण्डिन्य के पौत्र और अश्ववर्मा के पुत्र राजा मूलवर्मा का उल्लेख है। मूलवर्मा ने बहुसुवर्णकनामक यज्ञ में वप्रकेश्वर-पुण्यस्थल में ब्राह्मणों को स्वर्णराशि के साथ २०,००० गौओं का दान किया था।[2]

ख्रीष्टाष्टमशताब्दे प्रतिष्ठापितस्य शैलेन्द्रराजवंशस्य प्रभुत्वं मलय-सुमात्रा-जावा-बाली-बोर्नियो-द्वीपेषु सममेव विभाति स्म।

बोर्नियो-द्वीपस्य कतिपयस्थलेषु प्राचीनगुहाभ्यन्तरे शिव-गणेशागस्त्य-नन्दीश्वर-ब्रह्म-स्कन्द-महाकालादीनां मूर्तयो वर्तन्ते। भारतीयसंस्कृति-प्रसारकेषु महर्षेरगस्त्यस्य नामात्र महतीं श्रियं बिभर्ति।

1. Swami Sadanand : Hindu Cultutre in Greater India p. 68.
२. प्राचीन भारत का इतिहास पृ० ५०१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

लिथुआनियादेशेन सम्बन्धः

खीष्टचतुर्दशशनाब्दं यावद्योरपीयमहाद्वीपस्य बल्टिकसमुद्रोपतटं पोलैण्ड-स्योत्तरस्यां दिशि लिथुआनिया-देशे वैदिकदेवपूजका प्रतिवसन्ति स्म। तत्रत्यो राजा पोलैण्ड-राज्याधिकारिणीं राजकुमारीमुदूढ़वान्, तस्या धर्ममनुबन्धेन स्वीचकार च। अस्मिन् धर्मपरिवर्तनकाले खीष्टधर्मान्धा वैदिकधर्मानुयायिनां मन्दिराणि, मूर्तीश्चैत्यांश्च प्रध्वंसयन्ति स्म।[1]

लिथुआनिया-लातविया-प्रदेशे या जनभाषाधुना प्रचरति सा बाल्टिक-भाषा संस्कृतप्रचुराद्यापि ध्वनि-व्याकरण-वाक्यविन्यासादिभिः, धार्मिक-सांस्कृतिक-वर्णनैश्च पुरातनभारतीयसौरभप्रवाहं साधयन्ती प्रवल्गति। लिथुयानी भाषा वैदिकसंस्कृतं भृशमनुहरति। तत्र जनवासिनोऽरायिः इत्युच्यन्ते। अन्ये बहवः शब्दाः समानरूपाः सन्ति। यथा लिथुआनी, अग्निस, गीस्, आजिस, अविस् सुनिस, त्सूक, वल्कात, क्रमशः संस्कृतस्य अग्निः, गौः, अजः, श्वानः, शुकः वल्कलश्च सन्ति। अपरे च केचित् समरूपाः शब्दाः सन्ति—

संस्कृतम्	लिथुआनी
स्वस्ति	स्वेतित
रथ	राति
लोकः	लोकस्
पद	पदस्
स्वप्न	स्वप्नस्
सकल	सकल
तात	तेत
तोरकण	तोरनिस
अश्मन्	अस्मेन्स

१. राहुलसांकृत्यायनो वर्णयति— लिथुवानी-राजा ल:दिस्लाउर्स ने पोलराज्य की उत्तराधिकारिणी कुमारी हेदविग के साथ ईसाई धर्म स्वीकार करते हुए व्याह किया। इसी समय राजा के साथ उसके साथियों ने भी वपतिस्मा लिया। तब तो विलना में काफिरों की जितनी मूर्तियाँ और पवित्र वृक्ष स्थल थे, सबको ईसाई पादरियों ने नष्ट कर दिया। पुराने पुरोहितों को उनकी मृगच्छाला के बदले श्वेत परिधान बाँटा गया। मध्येसिया का इतिहास भाग २ पृ० ५३। रामानन्द और कबीर के समय तक लिथुक्षानी लोग ईसाई धर्म में दीक्षित न हो अपने प्राचीन धर्म पर आरूढ थे। उनके कितने ही देवता वैदिक देवताओं में से थे।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मिसरदेशेन-सम्बन्धः

सिन्धु-सभ्यतायुगीनावशेषैरनुमीयते यत् प्रायः पञ्चसहस्रवर्षाणि प्राग्-फ्रीकामहाद्वीपस्य मिसर-नामको भूभागो भारतेन सामुद्रिकजलयानैः सम्बद्धो बभूव ।[1]

अशोको मिसरस्य ग्रीकराज्ये धर्मप्रचारेण सह मनुष्याणां पशूनां च चिकित्सां व्यवस्थापयामास ।

बतलीमूसीवंशीये राज्ये भारतस्य सिकन्दरिया-पर्यन्तं स्वतन्त्रो व्यापारिक-मार्गो व्यवस्थापितः । देशोऽयं खीष्टपूर्वं द्वितीयशताब्दे भारत-ग्रीकादान-प्रदानयोर्व्यापारकेन्द्रमजायत । मेम्फिसनगरे भारतीयानां वसतिरासीदिति तत्र प्राप्ता मूर्तिः प्रमाणयति ।[2] ४५ ई० संवत्सरे हिप्पालसनामको नाविकः ततो भारतं यावद् मानसूनबलेन सामुद्रिकयात्रापथं समुद्रतटाश्रयं विनापि आविष्कृतवान्, येन द्वयोर्देशयोर्व्यापारिकसम्बन्धो निरन्तरं प्रगाढतरः सञ्जातः[3] । तदनन्तरं भारतात् सिकन्दरियां यावद् व्यापारिकयात्रा मासत्रयेण सम्पादनीयाभवत् । सिकन्दरिया तदा अफ्रीका-योरपैशियावासिनां वणिजामेकं केन्द्रं बभूव ।

रूसमाहाराष्ट्रे भारतीयाः

पुरा भारतीया रूसदेशं यावद् वसतीः कृतवन्त इति यत्र-तत्र पुरा-तात्त्विकध्वंसावशेषैः प्रमाण्यते । तत्र कृष्णसागरस्य परिसरे काकेशससविधे जनपदे विष्णोर्मूर्त्तिद्वयेन तत्र भारतीयानां प्रगमनं सूचितमधोविधम्—

Discovery of two figurines of Lord Vishnu from two places on the Caucasian Black coast has led scientists to believe that the ancestors of Adyghesis, a small Caucasian people inhabiting the Adyghel autous regionomn of the USSR had come from India.

---

१. They have a temple of Krishna of 500 B. C. in Egypt. Radha Krishnan : नानाजी कालिदास महेता स्मृतिग्रन्थ पृ० १६५ ।

२. इन्साइक्लोपीडिया ब्रिटैनिका ११ वां खण्ड २ पृ० २६४।

3. The result was that whereas before the discovery of monsoon winds hardly twenty ships a year made the voyage, after it. on an average, a ship a day left the ports of Egypt for the East. R. C. Majumdar : Indian Inheritance-India and the World. p. 237.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

While one figurine was discovered during excavation near a senatorium, the other was found about three years ago near Gagra town. Bronze age kolkhis axes bearing drawings and ornaments that are characteristics of ancient India, and images of Indian elephants were also discovered on a fresco in a temple near Gagra. U. N. I. Aprl 14, 1974

इटलीप्रदेशे

पाण्डचनरेशः ख्रीष्टपूर्वं २६ संवत्सरे रोमसम्राज आगस्टसस्य सविधे दूत-मण्डलं प्रेषितवान्।

इटली-प्रदेशे भारतीयधर्मस्य प्रसार आरब्याक्रमकारिणो मुआविया-(६६१-६८० ई०) नामकस्य तत्रत्यमूर्तिविक्रयेण प्रतीयते । तदधिकृत्य राहुलसांकृत्यायनो निगदति—

सन् ५३ हिजरी (६७२ ई०) की गर्मियों में जब सिसली द्वीप (इटली) को जीता गया और वहाँ से रत्नजटित-मुकुट पहने सोने की मूर्तियाँ लाई गईं, तो अमीर मुआविया ने सिन्ध भेज दिया, जिसमें उन्हें वहाँ के राजाओं के हाथ बेच दिया जाय। उसने देखा कि अखण्ड बेचने में कीमत ज्यादा—अर्थात् मूर्ति के एक दीनार भर सोने की कीमत एक दीनार सिक्के की कीमत से अधिक मिलेगी।

अनेन वृत्तेन स्पष्टं भवति यत्ता मूर्तयो हिन्दूदेवादीनामासन्। अतएव भारते तासां विक्रयो लाभप्रद आसीत्।

भारतीयवस्तूनां महती अभीप्सासीत् इटलीदेशे। तद्यथा प्लीनी सूचयति-Nearly fifty million sesterces (half a million sterling) flowed every year from Rome to India to pay for the balance of trade.[1]

भारत-रोमयो राजनीतिक-दौत्यसम्बन्धाः प्रीतिभाजः प्रतिभान्ति। नैकभारतीयराज्येभ्यो दूता सम्राडागस्टसस्य राजसभामलंकृतवन्तः।[२]

भारतीय-व्यापारिणां स्थायिवसतिः सिकन्दरिया - नगरे प्रावर्तत। मजुमदारः प्रबोधयति—

---

1. R. C. Majumdar : Indian Inheritance Vol II page 237.

२. भारतीयदूतमण्डलं ट्राजन (९८–११७ ई०) हड्रियन (११७–१३८), अण्टोनियापियस (१३८–१५९ ई०) हेलिओ गबलस (२१८–२२२ ई०) आरेलियन (२७०–२७५) कानस्टैनटाइन (३२३–३५३ ई०) इत्यादीनां सविधे प्रेषिताः।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

It is interesting to note that some Brahmanas visited Alexandria in A. D. 470. They were guests of consul Severus.. By means of this personal contact both India and the Roman world gained more correct and intimate knowledge of each other.[1]

भारत-रोमसाम्राज्ययोर्व्यापारिकसम्बन्धाः परवर्तियुगे ६०० ई० यावत् प्रचरिता इति रोमसाम्राज्यस्य दक्षिणभारते प्राप्ताभिस्तत्कालीनमुद्राभिः प्रमाणितम् ।

मध्ययुगेऽपि इटलीप्रदेशे भारतस्य सम्मानो भृशमभवदित्यधोलेखेन गङ्गापेक्षया प्रमाण्यते—

In Italy the fountain of four rivers the Plate, the Nile, the Danube and the Ganga. The fountain was unveiled in 1651. Bernini used it as the central place of a remarkable creation.

Hindustan Times dated 2.9.79

सिसिली-जनपदस्य ख्रीष्टसम्प्रदाये सेण्टबरलामनामकः पूज्यो महात्मा बुद्ध एव ।

लङ्का

लङ्कायाः[2] भारतेन सम्बधः पूर्वतमो रामकालिक एव प्रसिद्धः । रामस्य तत्रत्यमहाराजेन रावणेन महायुद्धं सीताकारणाद् बभूव । लङ्काया राजा तिष्यो (२४७–२०७ ख्री०पू०) ऽशोकाय सोपहारं दूतमण्डलं प्रेषयामास । अशोकः स्वपुत्रमनुजं वा महेन्द्रं लङ्कायां बौद्धधर्मप्रचारार्थं प्रेषयमास । तस्योपदेशेन प्रजाभिः सह तिष्यो बुद्धाधर्मानुयायी संजातः । महेन्द्रस्य स्वसा संघमित्रा तत्र बौद्धधर्मे दीक्षिता । सा बोधगयातो बोधिवृक्षस्य शाखामेकां नीत्वा लङ्कायामनुराधापुरे रोपयामास । पञ्चशतवर्षानन्तरं भारताद् बुद्धस्य दंष्ट्रा तत्र नीता । असंख्यचैत्यविहारादिभिर्मण्डितोऽयं देशः । लङ्काया लम्बकर्णवंशीयराजेन गुप्तराजस्य समुद्रगुप्तस्य दौत्यसंबन्धः प्रवर्धितः । तदनन्तरं स समुद्रगुप्तेन बुद्धगयायां विहारमेकं निर्मातु-

---

1. Indian Inheritance p. 238.

१. लङ्काया नाम सिंहलो भारतीयराजकुमारेण विजयेन दत्तमासीत् । स लाटदेशस्य राजकुमारः पित्रा निर्वासितो राजधानीसिंहपुरतः सप्तशतसहचरैः समुद्रमार्गेण लङ्कां समायातः । पितुर्नामानुग्रहेण स तस्य द्वीपस्य नाम सिंहलं चकार । विजयो मदुराराजधान्याः पाण्ड्यराजकुमारीं प्रणीतवान् । ताम्रपर्णी तस्य राजधानी बभूव ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मनुमतः । एकादशशताब्दे भारतीयसम्राड् राजराजः सिंहलस्योत्तर-भागमधिष्ठितवान् । तदनन्तरं लङ्का समग्रतः तस्य राज्यस्य भागोऽभवत् ।

भारते विलुप्तमपि विपुलं पालिसाहित्यं लङ्कायां भृशं जीवति । अद्यापि तत्र पालिभाषा लोकानां पठन-पाठन-साहित्यरचनादिकृते विश्वविद्या-लयेष्वपि प्रयुक्ता महिमान्विता । द्वीपेऽस्मिन् भारतीया संस्कृतिः ससम्मानं जीवति । भारतीया लिपिस्तत्र प्रचरति ।

वर्मा

वर्मादेशे भारतीयानां वसतिः प्रथमख्रीष्टाब्दे समारब्धा । तृतीयशताब्दे वर्मादेशस्य केन्द्रभागेऽवस्थिते लिनियाङ्गराज्ये दशसहस्रभिक्षुपरिवारा न्यवसन् । देशेऽस्मिन् भारताद् प्रवहन्ती नदीरावती देशादस्माद् भारतीय-सांस्कृतिकधारामुपनयति । तत्र राजमहिष्या उपाधिर्महादेवी अद्यापि श्रूयते ।

वर्मेतिहासानुसारेण कपिलवस्तु-राजधान्याः शाक्यवंशीयो राजा अभिराज उत्तरवर्मादेशं विजित्येरावतीतटे संकिस्सनामाभिधानां राजधानीं चकार । तस्य वंशजः श्रीक्षेत्रे तत्र प्रोमसविधे राजधानीं चकार । अशोकः शोणमुत्तरं च भिक्षुद्वयं तत्र बौद्धधर्मप्रचारार्थं प्रेषितवान् ।

श्रीक्षेत्रे प्यूनामधेयजानपदानां मध्ये भारतीयोपनिवेशस्य राजधानी ग्रबभूव । प्रदेशेऽस्मिन् भारतीयलिप्या प्यूभाषां संस्कृतं चाश्रित्य नैकाभि-लेखाः प्राप्ताः सन्ति । सप्तमख्रीष्टशताब्दस्यैकस्मिल्लेखे तत्रत्यराजो जय चन्द्रवर्मा नामधेयो वर्णितः । लेखोऽयं बुद्धमूर्ता उत्कीर्णः । तस्य पूर्वजा हरिविक्रमः सिंहविक्रमः, सूर्यविक्रमश्चासन् । राजवंशोऽयं स्वीयोदात्तवृत्तिभिः महतीं विजयश्रियमवाप ।

वर्मादेशस्याराकाननामके भूखण्डे ६००—१००० ख्रीष्टाब्दं यावद् धर्म-राजानुजवंशीया बालचन्द्रादयो नव राजानः सुप्रथिता बभूवुः । तेषां राजधानी वैशाली नगरे स्थिता । तत्रत्यध्वंसावशेषेषु भारतीयसंस्कृतेरुत्कृष्ट-चिह्नानि वर्तन्ते । तत्र रमन्नजनपदस्य मौना वा तैलङ्गा वा निवासिनो भारतीयसंस्कृतिं प्रगाढमनुहरन्ति । तेषान्नगराणां राज्ञां च नामानि भारतीयानि प्रतिभान्ति ।

एकादशशताब्दे म्रम्म-जातीया बाहुशालिनः प्रभुत्व-प्रपन्नाः प्रायो वर्मादेशं विजित्य महाराज्यं स्थापितवन्तः । तैः पगनस्य नामारिमर्दनपुर-मिति कृतवन्तः । अनिरुद्धराजस्य प्रभावेण देशेऽमिन् थेरवादः प्राभवत् । वंशेऽस्मिन् त्रिभुवनादित्यस्य सुशासनकाले बहवो ब्राह्मणा बौद्धाश्च भारताद् वर्मादेशं समाश्रित्य स्वीयसांस्कृतिकप्रवृत्तिभिः समग्रं देशमुन्निन्युः । राज्ञा

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

निर्मित आनन्दविहारो भारतीयशैलीमनुहरति। विहारेऽस्मिन् बुद्धप्रतिमा-समक्षं गुरुणा सह राजा प्रणतो दर्शितः। बोधगयामन्दिरस्य जीर्णोद्धारस्तेन कारितः। अनिरुद्धो नैकमन्दिराणि विहारांश्च निर्मितवान्।

११८१-८२ ख्रीष्टाब्दे लङ्कातः कपटनामको भिक्षुर्वर्मादेशे लाङ्केय-भिक्षुसंघं प्रवर्तितवान्। तस्य सम्प्रदायः स्वीयशौक्ल्येन अम्मसंघमतिशेतेस्म।

अधुनापि वर्मादेशे प्राचीनबौद्धधार्मिकविधानानुरूपं लोकानां जीवन-विधिः प्रचरति। पालिभाषा-साहित्यादीनां प्रवृत्तयः स्थगिता न सन्तीति तोषकरं वृत्तम्।

ब्रह्मादेशे भारतीयवणिग्भिः द्वादश-त्रयोदशशतकद्वये विष्णोर्मन्दिराणि निर्माय तत्र कुलशेखरालवारस्य पद्यान्युत्कीर्णानि। मन्दिरमिदं पगमप्रदेशे ब्रह्मप्रदेशस्य केन्द्रभागे वर्तते। तत्र दशावतारा विष्णोर्मूर्तीः कृताः।

Hindustan Times March 1972

वर्मादेशस्य राजधानी रंगूननामकं नगरमाधुनिकतां समाश्रयते। तत्र श्वेडगान - पैगोडा रमणीयतमं विभाति। अस्या निर्माणं १०० हस्तोच्छ्रिते ६०० हस्तलम्बे ४०० हस्तोरौ चतुश्चित्ये कृतमासीत् सुदूरपूर्वं ख्रीष्टाब्दा-रम्भात् प्रागेव। आपादशिखरं स्वर्णपत्र-खचितमिदं भवनम्। सप्तलक्ष-रूप्यकव्ययेन राजा मिडनमिनः तस्य शिखरं कारितवान्। पैगोडाधश्चत्वारि मन्दिराणि सन्ति। तेषु बुद्धस्य मूर्तयो नानामुद्रा दर्शयन्ति। बहुभिर्घण्टा-भिर्मन्दिराणि महिमान्वितानि राजन्ते। तत्रानुत्तमा घण्टा ४२ टनमिता तारावडी-राजेन १८४० ख्रीष्टसंवत्सरे प्रतिष्ठापिता।

रंगूने बौद्ध-हिन्दू-मुसलमानेसाईचीनी-वंशीया लोकाः सौहार्देन वसन्ति।

जापानदेशेन सम्बन्धः

ख्रीष्टषष्ठशताब्दस्य मध्ये बोधिधर्मनामको[1] बौद्धमहापण्डितो मध्यै-शियातो जापानं यावद् बौद्धसंस्कृतिं प्रचारयामास। स बौद्धधर्मस्य जेन-(ध्यान-) शाखां जापाने चीने च पल्लवयामास। स धर्म इति प्रख्यां लेभे। तस्य पूजानिमित्तं चीनजापानयोर्देशयोर्मन्दिराणि निर्मितानि। अतः परं ५५२ ख्रीष्टाब्दतो जापाने बौद्धधर्मस्य साक्षात् प्रचारः परिचीयते।

जापानदेशे बौद्धधर्मप्रचारो मार्गत्रयेणाभवत्—(१) कोरियातः, (२) चीनतः (३) भारताच्च। सप्तमख्रीष्टशतके तत्र मञ्जुश्रीरिति ख्यातो

१. बोधिधर्मः काञ्चीपुरस्य राजकुमार आसीत्। स महाराजवुतेः शासनकाले चीनमुपागमत्।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

बौद्धाचार्य आसीत् । ७४७ ख्रीष्टाब्दे जापानदेशे बोधिसेननामकस्य[1] बौद्धमहापण्डितस्याध्यक्ष्ये नारा-नगरे महावैरोचन-बुद्धस्य प्रतिमायाः प्रतिष्ठा निष्पादिता । बोधिसेनस्तत्र संस्कृतमपाठयच्च । स जापानाधीशस्यादरपात्रं भूयो बभूव । तेनाधिष्ठिते नारामन्दिरे ब्रह्मेन्द्रलोकपालचन्द्रसूर्य-सरस्वती-लक्ष्मीत्यादिदेवानां मूर्तयोऽद्यावधि विराजन्ते प्रतिगृहं समाद्रियन्ते च । बौद्धविहारेऽस्मिन् जापानस्य बौद्धविद्या-जिज्ञासवः शतशः समागताः भारतीयसंस्कृतिमध्यैषत । ख्रीष्टनवमशताब्दे प्रज्ञापण्डितस्य शिष्योऽन्नेनः शित्तोन्जो-नामकं शब्दकोशमष्टखण्डेषु भारतीयाक्षरक्रमानुसारेण व्यरचयत् । तदनु संस्कृतस्य प्रभावेण जापानदेशीयभाषा-साहित्यसमृद्धिरुत्कर्षं लेभे ।

बहवो जापानदेशीया बौद्धसंस्कृतिपरायणा भारतयात्रामध्ये विपन्ना अवरुद्धा वेतिहाससरणिमेव शोभयन्ति । तेषु नवमशताब्दिकः शिन्नयो होशिन्नो द्वादशशताब्दिक एइसई त्रयोदशशताब्दिकः शोनिन-कोबेन च प्रख्यातनामानो दैवदुर्विपाकाद् भारतदर्शनाद् वञ्चिता बभूवुः ।

प्रथमो जापानदेशीयो भारतोन्मुखो यात्री शिमजी-नामकः १८७ ख्रीष्टाब्दे स्वप्रस्थाने सफलो बभूव । भारतस्य दुर्गम्यतां विभाय नैके जापानीयाश्चीनं गत्वा तत्रैव बौद्धदर्शनं धर्मं संस्कृतिं चाधीत्य चीनीसंस्कृतभाषानैपुण्यं चावाप्य परितोषमन्वभवन् ।[2]

अद्यापि जापाने प्रतिगृहं सप्तमङ्गलदेवताः —महाकालः कुबेरः सरस्वती गणेशोऽचलो हारीतिर्लक्ष्मीश्च प्रतिष्ठाप्यन्ते । टोकियोनगरे महाकाल-सरस्वती-

---

१. बोधिसेन ७३६ ख्रीष्टाब्दे जापानं गतः । तत्रैव ७६० ख्रीष्टाब्दे स निर्वाणमलभत । बोधिसेनात् पूर्वमेव सप्तमशताब्दे राजगृहाद् होदो नामको बौद्धाचार्यः सम्राजः को कोतुनामकस्य (६४५-६५४ ख्रीष्टाब्दे) शासनकाले उपागमत् ।

२. तद्यथा हजिमे नाकामुरा समुद्धरति--

They visited China one after another and made through an extensive study of Sanskrit and Chinese lauguages to have a deep knowledge of the Philosophy and teaching of the Buddha which were preserved in these languages in China. The Chinese zeal for learning Sanskrit language kept the Sanskrit lore in Japan for nearly 1400 years in the Colleges attached to the great Budhist temples. The Japanese monks also carried some Buddhist texts to their countries and preserved them which must have been brought fram India or Central Asia to China and thence to Japan.

Japan and Indian Asia p. 3.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कुबेराणां मन्दिरत्रयमस्ति । लोका उपवास-श्राद्ध-पितृतर्पण-शाकाहारादिकं (व्रतदिवसेषु) यथा भारतीयास्तथा समाचरन्ति । टोकियो-समीपे गोह्या-कुराकान-मन्दिरेषु ५०० आचार्याणां मूर्तयः स्थापिताः सन्ति । बोधिधर्म आचार्यस्तत्रत्यानां मानसेऽधुनापि समादरणीयो वर्तते । आचार्यप्रज्ञः काश्मीरवासी तत्रगतो नागरीं लिपिं प्रचारयामास । तत्र ध्वनि-पञ्चाशिका वर्तते । १२०० मन्दिरेषु दैनिकपूजा संस्कृतमन्त्रेण भवति । यथा ओ३म् पद्मोद्भवाय स्वाहा । तेषां पुष्पसाधना, ध्यान-मन्दिराणि, उद्यानकला एतत्सर्वं भारतमनुवर्तते । संस्कृत-प्रचारके जून १९७२ पृष्ठ ८, ९

जापानदेशे बौद्धधर्मस्यादिप्रवर्तनयुगे तत्रत्यमहाराजेन 'शोमू' इति ख्यातेन ७३७ ख्रीष्टाब्दे नैकबौद्धमठमन्दिराणि निर्मितानि । तेषु कामाकुरा-मन्दिरं कलासौन्दर्यविभवेन प्रकामं विलसति । मन्दिरेऽस्मिन् १२५२ ख्रीष्टाब्दे शोगुन-नामकेन राजकुमारेण ३० हस्तोच्छ्रिता बुद्धमूर्तिर्निर्माय प्रतिष्ठापिता ।[1] अस्य भारः १०० टनमितोऽस्ति ।

नारानगरे कासुगा-बौद्धमन्दिरं तपोवनमध्ये रमणीयस्थले निर्मितम् । मन्दिरोद्याने भारतवंशीया हरिणयूथाः सप्रेम विचरन्ति, चरन्ति हरन्ति च ।

कियोटोनगरे जापानस्याध्यात्मिकस्वरूपं विलसति । अत्र वाइवुत्स-बौद्धमन्दिरस्य पैगोडा, बुद्धमूर्तिः[2] घण्टा च दर्शनीयाः । मन्दिरेऽस्मिन् वंशीं वादयन् मुरलीधरः प्रतिमानेन परं मोहयति दर्शकान् ।

अमेरिकादेशेन प्रागैतिहासिकसम्बन्धः

बौद्धानाममेरिकाविष्कारः ५८ ख्रीष्ट-संवत्सरे समभवत् । ते जापान-कामटकास्का - एल्यूसियाद्वीपालस्कादीन् भूप्रदेशानन्तरान्तरा पद्भ्यामेव पारयामासुः ।[3] अस्मिन् विषये विधुशेखरशर्मणो बौद्धानामाविष्कार इति

---

१. तत्र मुखायामः ५ हस्तं नेत्रायामः हस्तद्वयं, कर्णायामः ४ हस्तं वर्तते । मूर्तेर्भारः १०० टन मितमस्ति । सेठ गोविन्द दास—पृथ्वीपरिक्रमा पृ० २४४

२. बुद्धमूर्तिस्ताम्रनिर्मिता ३१ हस्तोच्छ्रिता हस्ताङ्गुलीयज्ञानमुद्रायुता राजते ।

३. कामटकास्का एशिया महाद्वीपस्य उत्तरपूर्वान्ते अलस्का च अमेरिकामहाद्वीपस्योत्तरपश्चिमान्ते वर्तेते । तयोर्मध्ये बेहरिंगाभिधा सामुद्रधुनी वर्तते । तदानीन्तन-भारतात् प्रवासिनां जिप्सी-परिव्राजकानां वसतयस्तत्र दृश्यन्ते । अपरं च—गुप्तकालीनभित्तिचित्राणि, स्तूपविहारावशेषाः भारतेन सम्बन्धं प्रमाणयन्ति ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

लेखः प्रकाशं वितरति ।[1]

मैकिसको-राज्यस्य विदेशमन्त्रालयपत्रानुसारेण भारतीयाः प्रथमतममेरिकादेशं समागता न तु योरपीयाः । तत्र भारतीयानां सांस्कृतिकविचाराचारप्रचारा भृशं प्रासरन् । नैकविधधर्मशिल्पकला-ज्ञान-विज्ञानप्रकाण्डेषु भारतीयानां तत्रावदानं प्रशस्यतमं राजते ।

मैक्सिको

अमेरिकायां प्रसिद्धभूखण्डस्य मैक्सिको-नामकस्य संस्कृतिरद्यापि भारतमनुहरति । तत्रत्यसभ्यता मय इति भारतीयसंस्कृति-प्रसारं तस्मिन् देशे प्रकटयति ।[2] अद्यापि भारतभाग एव प्रतिभात्ययं देशः ।

पेरु

मैक्सिको जनपदे प्राप्तेन शिलालेखेन प्रमाण्यते यद् वासुलन इत्याख्येन नाविकेन तस्य देशस्य पूर्वतरमन्वेषणं संभावितम् । शिलालेखेऽस्मिन् ८२३ शकसंवत्सरस्याषाढमास इत्युट्टंकितमस्ति ।[3]

सर-विलियम जोन्स महोदयेन सानुसन्धानं परिणमितम्—Of the cursory observations on the Hindus which it would require volumes to expand and illustrate, this is the result. That they (Hindus) had an immemorial affinity with the old Persians, Ethiopians, and Egyptians, the Phoenicians, Greeks, and Tuscans, the Scythians or Goths and Celts, the Chinese, Japanese and Peruvians.

In Peru Rama (the Indian Bacchus) is represented as a descendant from Sun as the husband of Sita and son of princess Kausalya. It is very remarkable that the Peruvians, where Incas boasted of the same descent, style their greatest festival Ram-Sitva, whence we may suppose that South America was peopled by the same race who imported into the farthest part of Asia the rites and fabulous history of Rama. Asiatic Researches Vol I P. 426

---

१. मित्रगोष्ठी-पत्रिकायां २.३ अङ्के प्रकाशितः ।
The Buddhist Discovery of America published in Harpers' Magazine throws light on the subject,

२. चमनलालस्य पुस्तकं 'हिन्दूअमेरिका' विषयमिमं निःसन्देहं प्रतिपादयति ।

३. विष्णुधर-वाकणकरमहोदयस्य तथ्योद्घाटनमिदं २ मार्च ८ मार्चदिनाङ्किते गाण्डीव-नामके साप्ताहिकसंस्कृतपत्रे प्रकाशितम् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तत्र नैकपुरातत्त्वावशेषा विशेषतो गणेशस्य मूर्तयस्तस्य पूजा च भारतीय-प्रभावं प्रकटयन्ति ।

चीन-जापान-देशवासिनोऽमेरिकां विजानन्ति स्म । कम्बोडियादेशस्य पिरामिडा अमेरिकीयमयानां पिरामिडेन सादृश्यं वहन्ति । भूमध्यसागरीय-सिडननगरात् ५३१ ख्री०पू० द्वादश पुरुषाः तिस्रः स्त्रियश्च नावा दक्षिणा-मेरिकांब्राजिलदेशं गतवन्तः ।[1]

Archaeologists looking for artifacts when bulldozers dig deep in the U. S. Capital to build multistory buildings and who study other evidence. have come to the conclusion that there was an American Indian civilisation thousands of years before. The first white man arrived in the aea in July 1608 reports P. T. I. etc.

Times of India July 15, 1986.

डा० दिलीपकुमारो कांजीलालोऽनुसन्दधाति—प्राक्ख्रीष्टयुगे भारतात् काचित् प्रस्तरपट्टिकालेखो मेक्सिको-पेरू-इक्वेडर-प्रदेशं दक्षिणामेरिका-महाद्वीपे नीता । सा षष्ट्-पञ्चाशदक्षरा पट्टिका जर्मनविदुषो डा० एरिचवान डेनिकन-महोदयस्य सङ्ग्रहालये सुरक्षिता वर्तते । पट्टिकालेखोऽशोकयुगीन-ब्राह्मीलिप्योत्कीर्णः केवलं स्तुत्या स्वर्गोऽभिगम्यः इति विषयकः । लेखस्य भाषोत्तरवैदिककालीनास्ति । तत्रापरा पट्टिका पञ्चविंशत्यक्षराणां वर्तते ।[2]

पट्टिकाभिगमनं तत्र प्राक् ख्रीष्टपञ्चमशताब्दीतः पूर्वमेव सम्भाव्यत इति काञ्जीलालस्य मतम् ।

आस्ट्रेलिया-महाद्वीपस्य समासादनम्

कैप्टेन - जेम्सकुकः १७७० ख्रीष्टाब्दे आस्ट्रेलियां प्रथमतमं गत इति साधारण-मान्यता विद्यते । परवर्त्यनुसन्धानेन ज्ञायते यद् भारतीयैस्तस्य देशस्यावगमः प्रागेव समभवत् ।[3] तद्यथा कैप्टेन यू. शङ्कररावेण राष्ट्रिय-

1. Thomas J. Flemming : Reader's Digest Dee. 1973. Who Really Discovered America.
२. कांजीलालानुसारेण लेखस्याभिप्रायोऽस्ति—
Oh agitating (Shiva/Indra) we pray with Sūtra's. We suffer from Phlegmatic pain and pray with clouds in the surface of water having sharp clouds.
3. Dr. Kanji lal's findings have been published in the Ancient Skies organ of the Ancient Astranaut Society.

Hindustan Times, July 5, 1975

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नौविज्ञान-सङ्ग्रहालयस्यावेक्षकेण प्रमाणपुरस्सरं साधितं यन्मोहदिनवक्श-नामा नाविकः स्वजलयाने भग्ने तत्र निगृहीतो बभूव। कैप्टनरावमहोदया-नुसारेण तत्र न्यूजीलैण्ड-राष्ट्रिय-संग्रहालये १८६६ ख्रीष्टाब्दे एका घण्टिका तामिललेखाङ्किता प्राप्ता।[1]

वैदेशिकैः संव्यवहारः

सुदूरप्राचीनकालतो भारते वैदेशिकाः समागताः प्रीतिपालिता अत्रैव जनसमाजे विलीना वा देशेऽस्मिन् पर्यटनं विधाय ज्ञानविज्ञानशिल्प-कलादिकं देशकालवृत्तवैचित्र्यं वा संगृह्य परावृत्ताः। तेषां भूयसी संख्या शाश्वतं संवर्धमानासीदित्यनेनैव प्रतीयते यत्तेषां पर्याप्तः समादरो बभूव। तद्यथा मेगस्थनीजो वर्णयति—

Among the Indians officers are appointed even for foreigners, whose duty is to see that no foreigner is wronged. Should any one of them lose his health, they send physicians to attend him and take care of him otherwise; and if he dies they bury him, and deliver over such property as he leaves to his relatives. The judges also decide cases in which foreigners are concerned with the greatest care, and come down sharply on those who take unfair advantage of them. Ancient India p. 42

प्रो० मजुमदारो भारतीयसंस्कृतेर्विदेशेषु प्रचार-प्रसार-विधिं प्रबोधयति—

The account is very illuminating as it gives a vivid image of an Indian colony in a foreign land and shows the process by which Indian colonies grew and exerted their influence over the indigenous population. It is the usual story of trade followed by a missionary propaganda of Brahmans, leading to gradual settlement in the country, establishment of political authority, fusion with the indigineous people by inter marriage, and the virtual Indianisation of the entire community. Greater India P. 31.

---

1. The bell was discovered in the museum and photographed during a good will visit of I. N. S. Delhi in 1966 under the command of Captain V. E. C. Borboza of Western command.
U. Shankar Rao's Interview to U.N.I.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ऋषीणामवदानम्

पूर्वेषां सर्वा पृथिवी स्वीयपरिभ्रमणपरिधौ सम्मतासीत् । अथर्ववेद ऋषय आत्ममनीषां विज्ञापयन्ति—

यशो गृहीत्वा पृथिवीमनुसंचरेम
वर्चो गृहीत्वा पृथिवीमनुसंचरेम ॥ १९.५८.३

अर्थात् समग्रपृथ्वी-भ्रमणाय ते समुत्सुका बभूवुः । तेषां यशो वर्चश्च यां संस्कृतिमाश्रयेते स्म, तस्या उपायनं पृथिव्वां विश्वस्मै प्रतिग्राहयितुमहर्निशं ते पर्यटन्तिस्म । एतदेव ऋषिचर्यम् ।

विश्वदर्शन-प्रयाणपथ आदौ ते प्रार्थयन्ते स्म—

कृधी न ऊर्ध्वाञ्चरथाय जीवसे । ऋ० १.३६.१४
शं नः सूर्य उरुचक्षा उदेतु शं नश्चतस्रः प्रदिशो भवन्तु ।
शं नः पर्वता ध्रुवयो भवन्तु शं नः सिन्धवः शमु सन्त्वायः ॥
ये देवानां यज्ञिया यज्ञियानां मनोर्यजत्रा अमृतां ऋतज्ञाः ।
ते नो रासन्तामुरुगायमद्य यूयं पात स्वस्तिभिः सदा नः ॥

ऋग्वेद ७.८ १५

अत्र उरुगायस्य (प्रशस्तपथस्य) कामनोत्साहप्रपत्त्या विश्वपर्यटकं द्योतयति ।

वस्तुतः प्रकाशमानः सूर्य एव तेषामादर्शो बभूव । तथाहि—

चरन् वै मधु विन्दति चरन् स्वादुमुदुम्बरम् ।
सूर्यस्य पश्य श्रेमाणं यो न तन्द्रयते चरन् ॥

ऐतरेयब्राह्मणे शुनःशेपाख्यानम् १६

अत्र 'दिवाकरोऽहं भूयासम्' इति कामयमान ऋषिर्निरन्तरं चरतः सूर्यस्य श्रेमाणम् (सुषमाम्) आत्मसात्कर्तुं तं प्रशंसति, तमेव विश्वदर्शनेन स्वीयपरिचर्यया चानुहरति ।

अपरं च ऋषेर्विश्वपर्यटनप्रवृत्तिरथर्ववेदेऽध्योविधं परिचीयते—

यास्ते प्राचीः प्रदिशो या उदीची र्यास्ते भूमे अधराद्याश्च पश्चात् ।
स्योनास्ता मह्यं चरते भवन्तु मा निपप्तं भुवने शिश्रियाणः । १२.१.३१

यावज्जीवं पर्यटनमिति—

यावत्तेऽभि विपश्यामि भूमे सूर्येण मेदिना ।
तावन्मे चक्षुर्मा मेष्टोत्तरामुत्तरां समाम् ॥ १२.१.३३

यजुर्वेदे च—

परि द्यावा पृथिवी सद्य इत्वा परि लोकान् परि दिशः परिस्वः ॥ ३२.१२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

महाभारतानुसारेण योगप्रभावतो विश्वभ्रमणशक्तिरजायत । तथाहि—

बृहस्पतेस्तु भगिनी वरस्त्री ब्रह्मचारिणी ।
योगसिद्धा जगत्सर्वमसक्तं विचरत्युत ।। आदिप० ६०.२६

अपरं च आर्चीकपुत्रो योगैर्महीं व्यचरत् ।[1]

कथं नाम भारतीयसंस्कृति-प्रचारो लोकोत्थानाय दैवनियोग इवादर्शीकृतः ? प्रकरणेस्मिन् प्रदिश्यते—

The towering peaks of the Himalayas brought up during the remote past a race of gods and sages who by their Tapas were charged with spiritual magnanimity and enchanting vision.[2] Their deeds and words have served as the perennial source of light to humanity in course of its eternal march towards final goal of supreme bliss which it ardently desires.

१. एतदार्चीकपुत्रस्य योगैर्विचरतो महीम् । आरण्यकप० १२९.७

२. महाभारते हिमालय-वर्णनम्—

चत्वारो लोकपालाश्च देवाः सर्षिगणस्तथा ।
यत्र नित्यं समायान्ति लोकस्य हित काम्यया ।।
विष्णुना यत्र···तपस्तप्तं महात्मना । शान्तिपर्वणि ३१४.६,७
अत्र लोकहितमाध्यात्मिकमाधिभौतिकं चोभयविधमभ्युदयमुद्यमयति ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अन्वीक्षणम्

कस्यापि देशस्य संस्कृतिस्तत्रत्यप्राकृतिकभूमानुवर्तिनी भूयसा प्रभवति। भारतीया संस्कृतिर्हिमालयस्य, गङ्गाया, वनोद्देशानां, महार्णवानां च यथायोगसमवायेन, जलवायोः समशीतोष्णतया च प्रकामं मधुमत्त्वं समेधते। अत्र जीवनविधौ कठोरता तुलनात्मकदृशा नास्त्येव। गङ्गाहिमालययोर्निर्मलतामादधाना स्वरूपतः पावनभूता प्रकृतिर्लोकानां दैनन्दिनव्यवहारे 'इदं विमलम्' 'इदमाविलमिति धियं विश्वदानीं प्रकल्पयति। रत्नगर्भा शस्यश्यामला धरा लोकेभ्य आजीवमनायासं प्रददातीत्यादर्शभूतौदार्यवृत्त्या धर्मकर्माचरणेषु निकामं दाक्षिण्यं विश्वम्भरता च भारते निसर्गतः प्रवर्तिता विभाति। सा मानवतां शिक्षयति सर्वलोकहित-प्रवर्तनस्य प्रथमं पाठम्। एते सांस्कृतिकविशेषा यावन्मात्रं भारते तावन्मात्रमन्यत्र विश्वप्राङ्गणे क्वापि न विलसन्तिस्म।

प्रकरणेऽस्मिन् भारतीयसंस्कृतिविन्यासे वेदानामनुत्तमं महत्त्वमुल्लेखनीयम्। मनुः प्रतिपादयति—

> चातुर्वण्यं त्रयो लोकाश्चत्वारश्चाश्रमाः पृथक्।
> भूतं भव्यं भविष्यं च सर्वं वेदात् प्रसिध्यति॥ १२.९७

वेदाश्रिता उपनिषद्रामायण-महाभारत - पुराणादिग्रन्थाः साङ्गोपाङ्गं समाहारेण भारतीयसांस्कृतिकस्रोतस्विनीं निस्सीमं प्रवर्धयन्ति।

जगति यदपरं प्रकृति-तत्त्वं, विज्ञानेन तस्य बहुलीकरणमुपयोगातिशयश्च विधीयते। तदनु आधिभौतिकसुखसमृद्धये तत्र नित्यः प्रयत्नो निर्बाध-प्रगमनेन साधारणलोकं प्रीणाति। तथापि नैतावता परितुष्टा मनीषिणः सर्वलोकहित-साधनेन काव्य-कला-ध्यान-समाधिभिश्चानन्दस्यापरदिशा वितन्वन्ति। एतैर्मानवीयसंस्कृतेरभ्युन्नतिर्निकामं संवर्धिता न केवलं साधकस्यापितु विश्वेषामपि परितोषाय सुषमं व्याप्नोति। इयमुच्चतरा संस्कृतिरादौ भारते समुच्छ्रिता विश्वं क्रोडीकर्तुं व्यवसिता।

भारते मानवजीवनस्य सर्वोच्चमुद्देश्यं पूर्वमनीषिभिरधोविधं निर्णीतमासीत् –

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

असतो मा सद्गमय, तमसो मा ज्योतिर्गमय मृत्योर्मामृतं गमय ।
बृहदारण्यकोपनिषदि १.३.२०

अर्थात् लोकेऽस्मिन् जात एव स्वभावतोऽसति तमसि मृत्युपाशे च जीवनं यापयति । एतेभ्यस्तस्य उद्धारः कथं स्यात् ? अत्र समाधीयते—सता असत्, ज्योतिषा तमः, अमृतेन मृत्युश्च पराभूयन्ते' इति । तत्र सत् तु ब्रह्मैव, ज्योतिः खलु आत्मज्ञानम्, अमृतं तु जन्ममरणबन्धप्रणाशः । एतत् त्रयं परस्परं सन्निविष्टम् । अर्थात् ब्रह्मज्ञानेन साधको मुक्तो भवति । ब्रह्मविद् ब्रह्मैव भवति ।

किमिदं ब्रह्म ? कथं नाम तस्य ज्ञानं भवेत् ? अत्रोच्यते—तपसा ब्रह्मचर्येण च ब्रह्म ज्ञायते । तत्तु 'सर्वं खल्विदं ब्रह्म', 'अहं ब्रह्मास्मि', तत्त्वमसि, 'सोऽहम्' इत्यादिप्रबोधवचनैः स्पष्टमेव । अत एव सत्याहिंसास्तेयब्रह्मचर्या-परिग्रहा इति पञ्चशीलानि परिनिष्ठितानि लोकसौष्ठवं विदधते ।

प्राचीनयुगेऽपि यथाधुना बहुविधजनसमुदायानामुच्चावच-संस्कृतयो विलसन्ति स्म । तत्र प्राचीनतमा सुषमा च संस्कृतिर्देवानां प्रबभूव । तस्या आद्यप्रवर्तको ब्रह्मेत्यनुश्रूयते । ब्रह्मा देवानां ब्राह्मणानामृषीणां चाग्रणीरासीत् । तस्यादर्शानामात्मसात्करणं तेषां प्रथमा प्रतिपत्तिः प्रतिष्ठिता । सारभूतं तैर्ध्यधायि—यत्किञ्चिद् दृश्यते, श्रूयतेऽनुभूयते च तत्सर्वं ब्रह्मैवेति मानसिक-वृत्तिर्नित्यं धारणीया । इमां निष्ठां परिपातुं व्रतमेकं सुगृहीतम् । तत्तु तपः श्रमो वा[1] । तपोव्रतधारिण आदौ देवा ऋषयश्च प्रथिताः ।[2]

आदौ ब्रह्माधिगन्तुं दैनन्दिनजीवनविन्यासे येषां व्रतानामविनाभावः प्रतीतस्तेषामाचरणं ब्रह्मचर्यमासीत् । किन्तु परवर्तियुगे ब्रह्मचर्यं न केवलं ब्रह्मविद्यार्थिनां कृतेऽपितु सर्वेषां शिल्पकलादीनां छात्राणां कृतेऽपि सामान्यं जातम् । जैनबौद्धाद्याम्नायेष्वपि ब्रह्मचर्यं सुदृढं व्यववस्थितं, यद्यपि वैदिक-धर्मस्य ब्रह्मवन्नास्ति तत्र कश्चित्संस्कृतिप्रवर्तको ब्रह्मा ।

ब्रह्मविद्याकृते ब्रह्माद्याचार्यः परवर्ति युगस्याचार्य-परम्परायाः शाश्वतादर्श एव समादृतः । वैदिकयुगे ऋषिः स्वपुत्रैः सहान्यानपि शिष्यानशिक्षयत् ।

---

१. तपसा (ब्रह्मचर्येण) देवा मृत्युमुपाघ्नत । अथर्व० ११.५
तपोभिरेव देवानां देवत्वं सिद्धम् । तै० ब्रा० ३.१२.१३.१ ।
परीवृतो ब्रह्मणा वर्मणाहम् ॥ अथर्व० १७.१.१२८

२. श्रमेण तपसारिषन् । तस्मादृषयः । शतपथ ब्राह्मणे ६.१.१.१ । त एव श्रमणाः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अत एव मूलतः पितृरूप आचार्यः कालान्तरेऽपि अद्यावधि समादियते । आश्रमेषु आचार्यानुशासने पितृत्वमुपलक्ष्यते ।

अन्यथापि आचार्योऽसाधारणविद्वानासीद्यो मनीषां प्रकटयति—इन्द्रो मां मेधया स्पृणोतु, अमृतस्य देव धोरणो भूयासम् । शरीरं मे विचर्षणम् । जिह्वा मे मधुमत्तमा । कर्णाभ्यां भूरिविश्रुवम् । श्रुतं मे गोपाय ।

तैत्तिरीयोपनिषदि १.४

अत्र रामायणयुगीनोऽगस्त्य उल्लेखनीयः । स लोकानां हितकाम्यया महान् राष्ट्रनिर्माता वर्ण्यते—

निगृह्य तरसा मृत्युं लोकानां हितकाम्यया ।
दक्षिणादिक् कृता येन शरण्या पुण्यकर्मणा ॥ अरण्य० ११.८१

प्रातःस्मरणीयाः सन्ति प्राचीनाचार्याः स्वीयत्यागौदार्यावदानकृतिभिर्व्यासो वाल्मीकिः, भरद्वाजः, परशुरामः, गौतमबुद्धः, महावीरः, शङ्कराचार्यः, विवेकानन्दश्च । सर्वे महात्मानस्तु वस्तुत आचार्या एव ।

आचार्यस्याध्यापनं वृत्त्यर्थं नासीत् । तस्याध्यापनं तु ब्रह्मयज्ञः, येन स ब्रह्मसंस्थो भवितुमियेष ।

पुरातनाध्यापन - विषया गणना - परिधेर्बाह्या एव । मनुस्तेषां वर्गीकरणं साधु विशेषयति—

लौकिकं वैदिकं वापि तथाध्यात्मिकमेव च । २.११७

एतेषु लौकिकं तु वैश्य-शूद्राधिगत-समाराधनमेव—वार्ताशिल्पादि राष्ट्रसमृद्धये यथायोगं प्राग्भावं लभते । वैदिकं पुनः धर्माभिवृद्धये द्विजादीनां प्रकर्षं साधयति । आध्यात्मिकं तु विरलतरं संन्याससमन्वितं लोकैषणाविमुखानां तपोधनानां कृते समीहितम् । महाभारतानुसारेणोपवेदानां संग्रहणं महतामपि चिकीर्षितमासीत्—

गान्धर्वं नारदो वेद भरद्वाजो धनुर्ग्रहम् ।
देवर्षिचरितं गार्ग्यः कृष्णात्रेयश्चिकित्सितम् ॥ शा० २०३.१९

महाभारते धनुर्वेदस्य (क्षत्रविद्यायाः) समुत्कर्षोऽपूर्व एव विभाति । तस्य सातत्यं परवर्तियुगे राष्ट्रस्य पारतन्त्र्यापाकरणे न समभवदिति चेतोऽवसीदति । दुर्दान्तानां दमनचक्रान्न केवलं भारतमपरेऽपि बहवो देशाः पारतन्त्र्यपाशेन निबद्धाः प्रपीडिताश्चेति काले काले विष्वगेव दैवदुर्विपाकः प्रतीयते । संस्कृति-प्रगमनपथे कश्चिद्देशः —

नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण

इति नियतिव्याप्त्या स्वभावतो नियमितः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पुराधीतचतुष्षष्टि-कलासु ज्ञान-विज्ञानानि, औद्योगिकव्यवसायाः नागरोचित भोगविलासाः मनोरञ्जनानि, बौद्धिकोहापोहाः, रसात्मकसर्जनाः, यन्त्रमन्त्रचमत्काराश्च समावेशिताः। एतेषां व्यवसायेनोच्चकोटिकसामाजिक-जीवनस्य सौष्ठवं सुषमा च सम्पादिता, बौद्धिक-रसात्मक-सर्जना चाभ्युदिता।

नैकविद्यासु प्रगमनं समीहितमासीद्येन कश्चित्पुरुषो दुर्विलासेऽपि स्वीय-कलादाक्ष्येण स्वाधीनवृत्तिकः सुखं जीवेत्।

प्रथमाश्रमे या वेदविद्याध्यापिता, गुरूणां यद्ब्राह्मचरितं परात्परमुन्नेतुं व्यवसितं तदेव हृदि संनिविष्टं स्नातकस्य न केवलं गार्हस्थ्ये अपितु वानप्रस्थे, संन्यासाश्रमे च प्रकाशस्तम्भ इवोपातिष्ठत्।

समग्रजीवनमेव ज्ञानार्जनाय समर्पितमासीत्। सर्वोच्चज्ञानोपलब्धये युवका वृद्धा अपि विद्याधिषणानुपास्थाय कृतकृत्या बभूवुः।

तस्मिन् प्राचीनयुगे विद्यानिष्क्रयेण शुल्कग्रहणस्य रीतिर्विरलमेवासीत्। शुल्कग्राहिणः पापभाजो निकृष्टाः सन्तीति शाश्वतधारणा बभूव। आचार्य-कुलेऽन्तेवासिभ्यो विद्यार्थिभ्यो भोजनव्यस्थाचार्येण प्रायः सुकृतासीत्। ब्रह्म-चारिणां यद्भिक्षाचर्यमासीत् तेन यद् भोज्यादिकमुपलब्धं तदपि प्रायश आचार्यकुलस्य भरणपोषणायाप्यलमासीत्। समाजेन दत्तमन्नं स्नातकस्योत्तर-जीवने तं पूर्वमेव स्वीयकल्याणकृते समाजाय बहूपकर्त्तुं प्रोत्साहयतिस्म।

प्राचीनयुगस्य विश्वविद्यालया जगतीतले संस्कृति-प्रचारस्य महाकेन्द्राणि बभूवुः। विदेशेभ्यः समागताः, भारतादपि बहिर्गताऽसंख्या आचार्या विद्यार्थिनश्चाद्यापि प्रातःस्मरणीया एवोदात्तं विश्वबन्धुत्वं जागरयन्तिस्म। तक्षशिला - नालन्दाताम्रलिप्ति - विक्रमशिला - जगद्दलादि - स्थलीषु विश्व-विख्यातानि विद्यानिकेतनानि संस्कृति-केन्द्राणि प्रादुर्भूतानि।

वयोवृद्धानामपि जिज्ञासा प्रश्नोत्तराभ्यां सार्वजनिक-प्रशिक्षणाय समवर्तत। अथर्व० ८.९.७

ऋषीणां परिषत्सु प्रश्नोत्तरद्वारानुसन्धान - विचिकित्सा समाधीयत। तथाहि—

कवीन् पृच्छामि विद्मने न विद्वान्। ऋ० १.१६४.६

अथर्ववेदे ऋषिषट्कस्य प्रश्नोत्तरं संगृहीतम्।

विराजमाजहु ब्रह्मणः पितरं तां नो वि धेहि यतिधा सखिभ्यः॥ ८.९.७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

बृहदारण्यकोपनिषदि याज्ञवल्क्यस्य स्वपत्नीं मैत्रेयीं प्रति व्याख्यानं दार्शनिकशैल्यात्मनः सूषमां प्रतिष्ठां व्याकरोति । कठोपनिषदि यमेन नाचिकेतस आध्यात्मिकविश्लेषणं सुश्लिष्टमेव शोभते । श्रीमद्भगवद्गीतायां प्राचीनव्याख्यानविधिः कृष्णार्जुनसंवादेन सम्यक् प्रकाशितः ।

पूर्वोक्तैः सन्दर्भैः स्पष्टं भवति यन्महत्तमा विद्वद्धौरेया महत्तराणां राजादीनां तथा चाध्यात्मरतीनां बालकानामपि जिज्ञासां समाधातुं सविश्रम्भं प्रवदन्ति स्म ।[1]

ज्ञानदानमनवरतं सर्वाधिकप्रतिष्ठां गतमासीदिति उपनिषन्महाभारत-पुराणेषु अध्यात्मैकरुचीनां प्रत्यक्षं परोक्षं च परिहीणसमृद्धीनां महात्मनां समीचीन-संवादात्मकसन्दर्भैर्विभाति । तदसौ रीतिः पुरालोकानां चारित्रिक-सम्प्रतिष्ठायै सम्यक् प्राभवत् । तत्रेतिहास एव प्रमाणम् । भारतस्य चारित्रिकोत्थानाय सैव तत्सदृशी वा रीतिः पुनर्ग्राह्येति मे मतिः । एतदेव परमं कर्त्तव्यं मनीषिणां लोकसंग्रहदृशा ।

विद्वान् विगतलोकैषणो बभूव । स नाभिक्षतापितु लोकस्तमात्मानं सम्पूरयितुमयाचत । स एव विद्यायाः साधिष्ठो महिमेति समादृतम् ।

भारतीयशैक्षणिकविशेषाः सन्ति विद्यार्थिनामन्तेवासित्वं, तेषां सरलं ब्रह्मचर्यव्रतं तपोनिष्ठं जीवनम्, मौखिकशिक्षणम्, अध्येयविषयाणां बाहुविध्यम्, सार्वभौमता, आचार्यस्य समादरः, अध्यात्मविद्यानां सर्वोच्च-प्रतिष्ठा, प्रकृतेः देवानां च सम्पृक्तिः, परापरेति उभयविद्ययोः सामञ्जस्यं च ।

आदौ यावज्जीवं ब्रह्मचर्यमादर्शब्राह्मणानां विद्या अध्येतुमुद्दिष्टम् ।[2] मूलतस्तेषां यावज्जीवं ब्रह्मचर्यं वैदिकसंस्कृतौ सर्वसम्मतमपि परवर्तियुगे वैकल्पिकं बभूव । पञ्चविंशतिवर्षं यावद् ब्रह्मचर्यं तदनन्तरं समावर्तनेन स्नातक इति ब्राह्मणानामपि जीवन-विधानं सर्वसाधारणं सञ्जातम् ।

'स स्नातः पृथिव्यां बहु रोचते' इत्यथर्ववेदवचनेन बहूनां स्नातकानां यथाशक्ति समग्रपृथिवी - मण्डल - भ्रमणेन यावज्जीवं गुरोर्लब्धां विद्यां प्रचारयितुं पर्यटनं समीहितमासीत् ।[3]

नैके स्नातका यथायोगं गार्हस्थ्य-जीवनं यापयितुं 'कर्माधिकार-सम्पत्तये

---

१. महाभारतीययुद्धान्ते भीष्मो युधिष्ठिराय प्रवचनं संवादरूपमकरोत् । शान्तिपर्वणि

२. मनुस्मृतौ ५.१५९

३. महाभारते शान्तिपर्वणि ३१४ अध्याये व्यासस्य समावर्तनभाषणेन बहूनां स्नातकानां वेदाध्यापनं व्रतमङ्गीकृतं लोककल्याणविवृद्धय इति स्पष्टमेव ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भवेज्जायेति संकल्पेन गृहस्था बभूवुः ।[1] गार्हस्थ्येनैव ऋणत्रयं देवर्षिपितृपरं विमोक्तुं शक्यते ।[2] प्राकृतजीवनस्य सुखसौरभं तु सपत्नीकाय स्वभावतः सुसिद्धमेव ।

आर्यसमुदाये कस्य कया सह विवाहः सम्पाद्य इति विवाहार्थिनोः स्वेच्छया साधारणतो नासीत् निर्णीतमपितु वरस्य यथायोगकृतित्वेन प्रीतः पिता वा पालको वा स्वकन्यां तस्मै प्रायच्छत् । प्राजापत्यविवाहः स्वकुलरक्षणार्थमनुसंहितः ।

स्वकुलस्य सातत्यं प्रबन्धयितुं विवाहं परमं साधनं दृष्ट्वा न केवलं भारते अपितु अन्यत्रापि वरः प्रत्यजानात्—अहं स्ववंशस्य सनातनतां विधातुं परिणयामीति ।[3] विवाहस्तूत्तमोत्तमविधिना सम्पन्नः सुफलं करोतीति धारणासीत् । अतएव पुराणवादिनो मनोः सन्ततिर्मानवा अधुनापि सन्तानकामा दृश्यते ।

प्राचीनकाले पत्नीपरित्यागस्य रीतिर्विरलासीत् । मनुः प्रथयति—

न निष्क्रयविसर्गाभ्यां भर्तुर्भार्या विमुच्यते । ९.४५

अथ च 'सकृत् कन्या प्रदीयते[4]' इति विधानं स्त्रीमर्यादां प्रगुणीकरोति ।

बृहदारण्यके (१.४.१६) यथानिर्दर्शितम् —गृहस्थस्य पञ्चमहायज्ञा भारतीयसंस्कृतेः सार्वलौकिकतां सार्वभौमतां सार्वभौतिकतां चोदाहरन्ति । इयं संस्कृतिर्न केवलं मानवस्याभ्युदयनिःश्रेयसाभ्यां संवर्ततेऽपितु सर्वेषां भूतानां, शुनां श्वापदवयस्पिपीलिकानां गृहस्थस्य भोग्यत्वं महायज्ञानुष्ठानेन समीहते । सर्वेषां ब्रह्मा मूलमिति शाश्वतधारणया भारतीया संस्कृतिर्देशजातियोनिधर्मादिभेदेन कस्यापि हानोपादाननिर्धारणं नानुशास्ति ।[5] उपनिषदनुसारेण सर्वेषां देवादीनां पिपीलिकान्तानां भूतानां भोग्यो गृहीति सन्धार्य समुदाचार-प्रवर्तनं श्रेयः ।

---

१. ऋग्वेदे १.१४.७; ३.५३.४

२. गृहस्थ एव सन्तानोत्पत्त्या पितृणात्, अग्निहोत्रेण देवर्णात्, ब्रह्मयज्ञेन ऋषिऋणात् मुच्यते ।

३. जनयत्यै त्वा सं योमि । यजु० १.२२ ४ मनु० ९.४७

५. गीता प्रवदति—

विद्या-विनयसम्पन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यजुर्वेदे ससारं प्रोक्तम्—

सर्वाणि भूतानि आत्मनि। आत्मा च सर्वभूतेषु । आत्मैव सर्वाणि भूतानि । ४०.६,७

वैदिकयुगीना गृहस्था (ऋषयः) यथाकालं तपस्विनो बभूवुः किन्तु प्रायशस्ते धनधान्य-सम्पन्ना आसन्। यज्ञनिष्ठा गृहस्था यजमानेभ्यो बहुधनं प्राप्तवन्तः। ते प्रवृत्तिपरायणा आसन्। अथर्ववेदानुसारेण गृहस्थर्षेर्विभवाः सन्ति–पयः, रसः, ऊर्जा, स्फातिः, सन्ततिः, पशुः, कीर्तिः, यशः, श्रीः, संविच्च।[1]

अध्यात्मयोगेन सह विजयशीलता ब्रह्मणो ब्राह्मणस्य वा लक्षणमृग्वेद-कालादेव दृश्यते।[2] ब्रह्म ह देवेभ्यो विजिग्ये । तस्य ह ब्रह्मणो विजये देवा अमहीयन्त । केनोपनिषद् ३.१। भूत्यै न प्रमदितव्यमिति समावर्तनकाले आचार्यस्य प्रबोधवचनमासीत्। ब्राह्मणकुले वीरो जायेतेति छान्दोग्यवचनम्। ३.१३.६ । अथ च बलेन लोकस्तिष्ठति । बलमुपास्स्वेति ।[3] ७.८.१ महाभारतेऽपि सङ्केतितं ब्रह्मराज्यम्—

ब्राह्मणानां त्रयो वर्णाः क्वचित्तिष्ठन्ति शासने। उद्योगे० ९३.१०–१७

अधुना भारते जनसंख्या भयमुत्पन्नमस्ति। अत एव सन्ततिनिरोधः कर्त्तव्य इति राजविद्या प्रवर्तिता । पुरा नासादीदृशी दुःस्थितिर्लोक-विनाशिनी। तद्यथा बृहदारण्यके घोषितम्—

अस्मिन् सहस्रं पुष्यासमेधमानः। ६.४.२४। गार्हस्थ्येन पूर्णजीवनमेव स्पृहणीयं मतं महाभारते—

अधीत्य वेदान् सर्वकृत्यः सन्तानमुत्पाद्य सुखानि भुक्त्वा।
समाहितः प्रचरेत् दुश्चरं तद् गार्हस्थ्यधर्मं मुनिधर्मदृष्टम्। शान्ति० ६१.१०
एकेनांशेन धर्मार्थश्चर्तव्यो भूतिमिच्छता।
एकेनांशेन कामार्थमेकमंशं विवर्धयेत् ॥ अनु० १२९.१९

तत्रापि यथावश्यकमासीत् ते ब्राह्मणा दुर्दान्तानां शमने कृतश्रमा विभवन्तिस्म। यजु० १७.८२।

---

१. अथर्व० ९.६.३२–३६

२. ब्रह्मा प्रजापतिर्धातेत्यादि । अथर्व० १९.९.१२ । बृहस्पतिर्महान् योद्धेति ऋ० २.२३.१ । स तु देवानां पिता । ऋ० १०.७२.२; २.२३.१४; ६.७३.१,२ । ब्रह्मचारिणं पितरो देवजनाः पृथग्देवा अनुसंयन्ति सर्वे। अथर्व० ११.५.२ । बृहस्पतिर्विप्रगणस्याधिपतिरिति वेलणकर— ऋग्वेदसूक्ति-वैजयन्ती प्रस्तावना पृ० ३७

३. शतं विज्ञानवतामेको बलवानाकम्पयते। छा० ७.८.१

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

आदर्शः सततं तेषां जागर्तिस्म—'ब्रह्म परं धनमिति'। अनुशासने ८.३

राष्ट्ररक्षार्थमाततायिनां दमनार्थं च प्राणपणेन प्रयासा एव क्षत्रिय-गृहस्थान् सर्वोपरि प्रत्यस्थापयेत्। राष्ट्रियभौतिकसंस्कृतिसंवर्धनेन ते कृतकृत्याः समादृता आसन्। परस्परं युध्यमानास्ते विनश्यन्तीति शास्त्र-वचनमितिहासेनापि प्रमाणितम्।

शूद्रोऽपि सच्चारित्र्येण तपस्वी भवति—

स शूद्रः संशिततपाः सत्यसन्धो जितेन्द्रियः।
शुश्रूषन्नतिथिं प्राप्तं तपः संचिनुते महत्॥

इति महाभारतीयमतमनुशासनपर्वणि १२८.५७। मध्ययुगेऽपि नैकशो महात्मानो राष्ट्रस्य सांस्कृतिकसमुत्थानेन शोभमाना अद्यापि नितरां समादृताः फलितविभवाः प्रतिभान्ति। शिल्पसाधना—चित्रमूर्तिवास्तुरचना पुरा शूद्राणामेकाधिकारो बभूव। भारतस्यातीतगौरवं प्रशंसास्पदं यद् विद्यते तस्य श्रेयस्भा शूद्र महिष्ठाः सन्ति।

कर्मयोगपथेन गृहमुनिः समाजे सदैव प्रतिष्ठितो बभूव। महाभारते गृहमुनेरादर्शो जाजलेरुपाख्याने सम्यगुदाहृतः। तत्र तुलाधार आत्मवृत्तिं वर्णयति—

अर्थकामभोगेषु ममापि विगतस्पृहा।

जनकस्त्रिविधमोक्षज्ञोऽपि राज्यशासनभरं सम्यगुद्वढवानित्यनेन प्रवृत्ति-मार्गो निवृत्तिमार्गेऽसन्निविष्टो नास्तीति विभाव्यते। शक्तिमानुभयं वेतनुतेस्म।

यथा प्रागेव प्रकीर्तितमृषीणां वानप्रस्थानां बौद्धभिक्षु-श्रमणानां च भारतीयसंस्कृतेर्वैदेशिकप्रचारपथः सुषममुपपन्नो बभूव। न केवलं भारतस्य चतुर्दिगन्तं यावदपितु भारताद् बहिरपि इमे ऋषयो द्विसहस्रक्रोशपरिधौ एशिया-योरपाफ्रीका महाद्वीपेषु अमेरिका-महाद्वीपयोश्च कान्तार-पर्वत-नदी-नद-मरुस्थलसागरांश्च पारयन्तः प्राणान्तकभयं प्रत्यक्षीकुर्वाणा अपि विश्व-भ्रमणं विदधते स्म। रामायणमहाभारतादिषु श्रूयते कथं रामात् पूर्वमेव ऋषयो दक्षिणभारत आर्षसंस्कृतिं विस्तारितवन्तः। वनवासिनामिव येषां विचरणं विहरणं च भवेत् ते वानप्रस्था भृशं कष्टमनुभवन्तो नितान्तं कठोरां जीवनवृत्तिं स्वेच्छया स्वीकुर्वन्ति स्म। लोमशर्षिः कथयति—

संचरन्नस्मि कौन्तेय सर्वान् लोकान् यदृच्छया॥ आर० प० ८९.५

वानप्रस्थस्य परिचयः शतपथेऽधोविधो लभ्यते—उत्तरनारायणेनादित्य-मुपस्थायानपेक्षमाणोऽरण्यमभिप्रेयात्। तदेव मनुष्येभ्यस्तिरोभवति। १३.६.-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

२.२०। बृहदारण्यके पुनः ये चामी अरण्ये श्रद्धां सत्यमुपासते तेऽर्चिरभि सम्भवन्ति। ६.२.१५

प्राचीनकाले सामाजिकचरित्रनिर्माणदिशि वानप्रस्थानां विशेषमहत्त्व-मासीत्। यतो हि कश्चिद् गृहस्थः तान् दृष्ट्वा मनसि करोति--अहमपि भविष्ये स्वाभ्युदयायैवमेव पुण्यपथं वानप्रस्थं ग्रहीष्यामि। एतस्मै प्रयोजनाय सततं पवित्रजीवनपथो गार्हस्थ्येऽपि मया स्वीकरणीयः।

नैकसंन्यासिनां भारतीयसंस्कृतिनिर्माणेऽनल्पावदानं दृश्यते। ऐतिहासिकप्रथां गतेषु तेषु गौतमबुद्धः, शङ्कराचार्यः, समर्थरामदासः, दया-नन्दः, विवेकानन्दः, महात्मा गान्धी इत्यादयः स्वचरितैर्मानवतां पावयन्ति।

शङ्कराचार्यो न केवलं ज्ञानेनापितु सैन्यबलेनापि भारतीयसमाजस्याभ्यु-दयरक्षणादिकं मन्यमानः संन्यासिनां सैन्यशिक्षणार्थमखाड़ा इति संस्थां प्रचारयामास। गुरुगोविन्दस्य परवर्ति-खालसा-सम्प्रदायो राष्ट्ररक्षा-प्रकरणेन प्रसिद्धिं लेभे।

संन्यासिनामपि देशस्य संस्कृतेश्च रक्षायै दुर्दान्तशत्रुभिर्युद्धं कृतमित्यत्रे-तिहासः प्रमाणम्। १८५७ खीष्टसंवत्सरस्य ब्रिटिशराजविद्रोहावसरे नागा झाँसीराज्ञ्या समवेता आंग्लसेनाभिरयुध्यन्त।

अभिनवसांस्कृतिकवर्गाणां समुत्थानेन प्राक्तनवर्गाणां च परस्पर-सम्मिश्रणेन भारतीय-सामाजिक-विकास आदिकालतः प्रोद्भावितः। प्रथमं तावद् दैवी, दासी, मानवी च प्रजा आसन्।[1] एतासां हानोपादानं दृश्यते। यथा वा ऋभवो मानवा आसन्। स्वीयकौशलेन ते देवाः संजाताः। सर्वे देवाः समुत्थितेषु मानवादिषु विलयं गताः।[2] एवमेव ऋषयो गन्धर्वाश्च विलीनाः। विविधवर्गा परस्परसाह्येन मानवताया उत्कर्षं समादधुः।[3]

ब्रह्मा, देवः, असुरः, ऋषिः, मानवः, गन्धर्वः, राक्षसः, पिशाचश्चोच्चावचा जनससुदायाः सांस्कृतिकसंक्रमणेन 'संघे शक्तिः कलौ युगे' इति विचारेण वा परस्परं सम्मिश्रिता हिन्दवो बभूवुरिति एकमेवैतिहासिकसत्यम्।

---

१. ऋग्वेद ३.३४.२; ४.२८.४; ६.२५.२। अथर्व० १४.२.३२। ऋग्वेद-वैजयन्ती-नामकस्य ग्रन्थस्य भूमिकायां पृ० १७४ प्रो० वेलणकरः समर्थयति। क्वचन ब्रह्मा, देव', ऋषिरिति वर्गत्रयमासीत्। अथर्व ६ १२.२

२. दैव्यजनाः अथर्व० ६.५१.३; ऋग्वेद ३.९.९। देवा नागरा आसन्निति अथर्व० १२.१.४३।

३. इमा याः पञ्च प्रविशो मानवीः पञ्च कृष्टयः। वृष्टे शापं नदीरिवेह स्फातिं समावहान्। अथर्व० ३.२४.३। बृहस्पतिर्ब्रह्मास्ति ऋषिः, देवश्च। ऋ० ४.५०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

परस्पर-साह्येन शतहस्त समाहर सहस्रहस्त सं किर;कृतस्य कार्यस्य चेह स्फातिं समावह। अर्थव० ३.२४.५ इति प्रकल्पनं समभवत्। ऋग्वेदे स्पष्टीकृतम्—विप्रो विप्रेण सनत्सता सखा सख्या समिध्यसे। ऋ० ८.४३.१४

पूर्वे ऋषयो ब्रह्मणि क्षत्रे च सममेव निष्णाता आसन्। पश्चाद् ब्रह्मणि निष्णातानां क्षत्रे निष्णातानां च पृथक् पृथग् वर्गो बभूव।[1]

ब्रह्मणो ध्यानेन ऋषित्वमजायत। ते विप्रा बभूवुः। ब्रह्मा तेषां नेता। ऋ० ४.५०.१। ब्राह्मणाः, क्षत्रियाः, वैश्याः, शूद्राश्च स्वीयमुख्यवृत्त्या विशेषसंज्ञां भजन्ते।

यथा वेदान्तस्य पञ्चीकरणभावेन ज्ञायते यत् पृथ्वी न पूर्णतः पृथिवी, अपितु तस्यां जलादिशेषतत्त्वानामंशाः सन्ति, तथैव ब्राह्मणादिषु स्वीय-प्रधानलक्षणगुणैः सह क्षत्रिय-वैश्यादीनामपि गुणाः प्रवृत्तयो धर्माश्च लक्षिता भवन्ति। ऋ० ४.५७.१—८; ८.९१.५;६.५३ १०; १०.१०१.३-७। ब्रह्मणां ब्राह्मणानां च युद्धविद्यावैशारद्यं कीर्तनीयमेव। सममेव तेऽविरतं पशुपालने वाणिज्ये च कृतबुद्धयो बभूवुः।[2] तथापि प्राधान्येन तेषु स्वभावजं ब्रह्मकर्म परिनिष्ठितमेवासीत्। तेनैव ते प्रतिष्ठां गता।[3]

स्वकर्मभिरन्येषां वर्णाश्रमाणामावश्यकतास्तु पूरणीयैवेति समाजशास्त्र-कृतां विधानं प्रथमपदमलभत।

समानमूलमस्ति सर्वेषामिति धारणा पृथग्भूतेष्वपि जातियोनिगणादिषु परस्परं समभाव ऋग्वेदस्य पुरुषसूक्तेन (१०.१२१) विभवति। अत्र चतुर्वर्णानां पुरुषस्य (ब्रह्मणः) मुखादिचतुर्भागेभ्य उत्पत्तिर्वर्णिता। बृहदा-रण्यकानुसारेण तु—ब्रह्मैव ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्च जायते। १.४.१५

भारते आर्या आर्येतराश्च बहवः सांस्कृतिकवर्गाः सुदूरप्राचीनकालतः क्वचित् साम्मनस्यं वैरायितं वा भजमानाः समाजैकतानताभिमुखैर्मनीषिभिः शनैः शनैर्हिन्दव इति नाम्ना ग्रथिताः सामीप्यं प्रापिताश्च। अमेरिकास्ट्रेलियादि-देशेषु श्वेतवर्णा वैदेशिका अद्यापि तत्रत्यजातानामादिवासिनां शत्रव इव तान् लोपयितुं पराकर्तुं चोद्युञ्जिर इति मानवताया अभिशाप एव।

---

१. ब्रह्मनिष्णाता ऋषयः क्षत्रनिष्णाताश्च क्षत्रिया बभूवुः। ऋषिनाम विलुप्तमेव यथा ऋग्वेदस्य ब्रह्मणो मुखमासीदिति मन्त्रेण ज्ञायते। यजु० ३२.१६ समर्थयति

२. यजुर्वेदे ३२.१६; ऋ० १.१६०.५; यजु० ३४.४६।

३. इदं मे ब्रह्म च क्षत्रं चोभे श्रियमश्नुताम्।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सहास्तित्वं बहूनां सांस्कृतिकसमुदायानां समभवदिति स्पष्टमेव। कथमिति महात्मनो गौतमबुद्धस्य पदं समादधाति--

सुसुखं वत जीवामः शून्या वैरेण वैरिषु।
वैरवत्सु मनुष्येषु विहरामोऽवैरिणः॥ धर्म्मपदे १९७

पापेन धनार्जनं तु निकृष्टतमं कर्मेति अथर्ववेदे उदाहृतम्--रमन्तां पुण्या लक्ष्मीर्या पापीस्ता अनीनशम्। अथर्व० ७.७५.४। सर्वेषां चराचराणां प्रियो भूयासमिति मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे[1] इति च वैदिकपूर्वजैः समाम्नातमासीत्।[2]

इदं ब्रह्मेदं क्षत्रमिमे लोका इमे देवा इमे वेदा इमानि भूतानि। इदं सर्वं यदयमात्मा। बृहदारण्यकोपनिषदि ४.५.७।

राष्ट्रेण वर्धतामिति अथर्ववेदस्य सन्देशः।[3] अर्थाद्यदि कश्चिज्जनः स्वकीयं वर्धनमाकांक्षति स स्वराष्ट्रस्य संवर्धनाय प्रयतेत। राष्ट्रेण सह तव वर्धनमिति ब्रह्मवाक्। राष्ट्रेण पुरुषस्यैकात्म्यं जायेत। राष्ट्रस्य हानिर्न भवेदित्यर्थो नित्यं मननीयः।

काणेमहोदयानुसारेणाद्यतनीयो ब्राह्मणः प्राक्तनब्राह्मणैः सह तुलनां नार्हति। स कथयति--The ideals set before Brahmanas was of poverty, of plain living, and high thinking, of forsaking the active pursuit of riches and cherishing cultural preservation and advancements. History of Dharma Vol. II Pt. I P. 110.

ब्राह्मणस्यौदात्त्यं शब्दकल्पद्रुमः प्रतिपादयति—

ब्राह्मणा जङ्गमं तीर्थं निर्मलं सार्वकामिकम्
येषां वाक्योदकेनैव शुध्यन्ति मलिना जनाः।

तमैवब्राह्मणं महाभारतं प्रस्तावयति—

ब्राह्मण्यं दुर्लभं लोके राज्यं हि सुलभं नरैः॥ अनु० प० ५४.२९

विश्वस्य प्रायः सर्वेषु देशेषु वर्त्तमानयुगेऽपि भारतीयजाति-व्यवस्थावत् समाजविभाजनमष्टादशशताब्दे आसीदेव। पाश्चात्त्यसमाजस्य कस्यचित् पुरुषस्य समाजे प्रतिष्ठापनं तस्य सम्पत्तिमात्रया प्रमाणितमासीद्यथा भारते जन्मना प्रमाणितं भवति।

---

१. यजु० ३६.१८; अथर्व १७.१.७
२. अथर्व० ६.७८.२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भारतीयसमाजस्य सात्त्विकता तु प्राग्भावं प्रापणीया यथा ह्वेनसाङ्ग उदाहरत्—

Though the Indians are of a light temperament they are distinguished by the straightforwardness and honesty of their character. With regard to riches, they never take any thing unjustly; with regard to justice, they make even excessive concessions. Straightforwardness is the distinguishing feature of their administration.

अपरेऽपि समर्थयन्ति। यथा—

एरियन—No Indian is accused of lying.

मेगस्थनीज—People honoured truth and virtue.

इद्रीसी—The Indians are naturally inclined to justice, and never depart from it in their actions. Their good faith, honesty and fidelity to their engagements are so famous for their qualities that people flock to their country from every side.

समसुद्दीन अबू अब्दुल्लाह—Indians are free from all deceipt and violence. They fear neither death nor life.

भारतीयसमाजे वृद्धानां समादर आधुनिकयुग ईषद्धीयमानो दृश्यते। प्राचीनकाले मध्ययुगे च कुटुम्बे समाजे च वृद्धान् प्रति समादरातिरेक आसीत्। न केवलं साधारणजना अपितु राजानोऽपि वृद्धान् समाद्रियन्ते स्म।[1] राजा वृद्धसेवी स्यादितिकौटिल्यमतम्। अर्थ० ८.३.७१। वृद्धानां पर्युपासनं श्रेयः' इति महाभारतस्य शान्तिपर्वणि २८७.२ निगदितम्। 'कल्याणार्थं वृद्धो गृहे वासयितव्यः' इति अनुशासनपर्वणि १०७.१०५। 'न सा सभा यत्र न सन्ति वृद्धाः इति महात्मनां वचः।

स्वकुलस्यौदात्त्यं विचार्याकार्याद् विरमणं सत्यार्थ-प्रवर्तनं चेति श्रेयोऽनुशासनं प्राचां कौलिकव्यवहारोपपन्नतां विभावयति। मनुर्देश-जाति-कुलधर्मांश्च निर्दिशति। १.११८। महाभारतानुसारेण सन्तानोत्पत्त्या कुलं प्रतिष्ठाप्यते। एतदर्थं महाकुलप्रसूता वयस्था च कन्या स्पृहणीया। कुलपुत्राय कन्या दातव्या। १०७.११६-११८। उत्तमानां सङ्गत्या कुलमौदात्त्यमभिगच्छति।[2]

---

१. अशोकः स्वीयपरिभ्रमणेषु वृद्धदर्शनमकरोत्। अष्टमशिलालेखे।

२. उत्तमैरुत्तमैर्नित्यं सम्बन्धानाचरेत् सह।
निनीषुः कुलमुत्कर्षमधमानधमांस्त्यजेत्॥ ४.२४४
उत्तमानुत्तमान् गच्छन् हीनान् हीनांश्च वर्जयन्। ब्राह्मणः श्रेष्ठतामेति।४.२४५
अपरं च—कुलस्योत्कर्षापकर्षौ वर्णितौ। मनु० ३.६२-६६

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

किमर्थः पुत्रः ? पितुरवशिष्टमुपक्रमं सम्पादयितुं पुत्रस्यावश्यकतेति राजसूययज्ञे राजा प्रवदति।[1] अथवा बहुपुत्रः स्वर्गं गच्छतीति महाभारत-वचनम्। अनु० २४.१००।

आदिकालत एव नारी पत्युरर्धाङ्गिनी सम्मता। गार्हस्थ्ये सर्वविधेषु धर्मकार्येषु पत्न्या सहैव पतिः कृतकृत्यो भवति। स्वभावतस्तस्याः पूजानु-मोदिता शास्त्रकारैः। मनुः प्रमाणयति--

तस्मादेताः सदा पूज्या भूषणाच्छादनाशनैः।
भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु च ॥ ३.५९
स्त्रियां तु रोचमानायां सर्वं तद्रोचते कुलम् ॥ ३.६२

नारीणां कार्यक्षेत्रं साधारणतस्तासां गृहाण्येव बभूवुरित्यत्र न मनागपि सन्देहः। भारतीयगृहं तु नैत्यिकानां नैमित्तिकानां महत्त्वपूर्णं स्थलमेव। एतेषामावश्यकतापूर्तिः स्त्रीणां महता दाक्ष्येणैव सम्भावितमासीत्। एतेन सह पत्नीनां सर्वेषु कार्यजातेषु प्रतिपदं पतिसाहचर्यमासीदेव। अन्यच्च लौकिकव्यवहारेषु पत्युः परामर्शदात्री भूत्वा भूमिकानिर्वहणं महत्त्वपूर्णं बभूव। गृहकार्येषु शिल्पनैपुण्यं यदपेक्षितं तस्याधिष्ठात्री नारी भवति।

सरस्वतीरूपेण, लक्ष्मीरूपेण, दुर्गारूपेण च नारीभूमिकां परीक्ष्यैव तासां वैशिष्ट्यं पर्यालोचनमर्हति।

गृहाद्बहिर्युद्धस्थलं राजपरिषदं च यावत् स्त्रीणामुपलब्धयो भारतीय-सांस्कृतिकेतिहासं प्रकाशयन्ति। न केवलं राजनयेऽपितु कविकर्म-शास्त्रार्थ-निर्णय-कूटस्वनादिषु प्रायशस्ता[2] अप्रतिमा दृश्यन्ते। प्राचीनभारतेऽपि नृत्य-सङ्गीत-नाट्यादिषु स्त्रीणामबाह्यत्वं प्रशस्यमेवासीत्। कतिपयराज्ञीनां कृते तु कालिदासवचनानुसारेण सत्यमेव विभाति--

गृहिणी सचिवः सखी तथा प्रियशिष्या ललिते कलाविधौ।

यवद्वीपं गता गुणप्रियानाम्नी भारतीया राज्ञी शासिका प्रबभूव।

महिलानामाध्यात्मिकयोग्यता-विकासः पुरुषवन्निःसीम एव समभवत्। कतिपयमहिला योगनिष्णाता अलौकिकशक्ति-सम्पन्ना मुनिव्रतमाचरन्ति स्म।

महाभारते जनक-प्रतिद्वन्द्विभूता सुलभा स्वोपलब्धिभिर्माहात्म्यं लेभे। वैदिकधर्मे स्त्रीणां मोक्षपथे बाधा नास्त्येवादिकालतः। बौद्धसम्प्रदाये

---

१. Kane : History of Dharm. Vol II P. 127.128.
अन्यच्च पुण्यार्थान् सर्वानपत्यलाभोऽतिशेते। सभा प० ३८.२६,२७

२. मण्डनमिश्रस्य पत्नी स्वपतेः शङ्करस्य च शास्त्रार्थे निर्णायिका बभूव। तस्या निर्णयः शङ्करस्य पक्षे आसीत्।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वैदुष्योपपन्ना नैकभिक्षुण्यः थेरी बभूवुः। तासां कविकर्म थेरीगाथासु उच्चकोटिकं प्रतिभाति। विदेशेष्वपि धर्मप्रचारेण नारीजागरणदिशि तासां गणना प्रथमा।

पुरा भारतीयसमाजे स्त्रीणां स्थितिस्तावत्समुत्थिता नासीद्यावद् विदेशेषु बभूवेति विचारणा तु नितान्तमसत्यमेव। प्रसिद्धेतिहासकारो मिलमहोदयः सानुसन्धानं प्रमाणयति—

And it may be confidently asserted that in no nation of antiquity were women held in so much esteem as amongst the Hindus. History of India Vol II p. 51.

भारते राज्यसंस्थायाः समुदयो न शक्तिसंचयाय न च वैभवसम्पादनाय न वा प्रणाशलीलाविदग्धानां योधानां साह्येन विश्वविजयाय बभूव, अपितु जनपदे, राष्ट्रे, राज्ये, अधिराज्ये च सर्वत्र लोकेभ्यः सुसंस्कृति-सम्प्रदानेनान्यायनिवारणं यथायोगमशक्तानामपि रक्षणं च देशेऽस्मिन् राजत्वस्य परममुद्देश्यं विलसतिस्म। पितेव राजा प्रजाः पातीति शाश्वतादर्शः।[1] यदि राजा शुभ्रचरितो भवति तर्हि प्रजासु सात्त्विकप्रवृत्तयो विकसन्ति।

राजत्वस्य मौलिकादर्शान् देवानां प्रथमो राजा इन्द्रः प्रस्तौति।[2] तस्य-पराक्रमाः, विजयाः, वदान्यताः, अभिमतिः, समृद्धिः, मघवत्ता च ऋषिभिः प्रगीताः[3]।

राज्ञो विशेषगुणा वैदिकसाहित्ये प्रकृष्टाः सन्ति। राजा धर्माध्यक्ष आसीत्। ऋ० ८.४३.२४। शतपथब्राह्मणानुसारेण राजा वरुण इव धर्मपतिः।[4] प्रजया तस्य तादात्म्यमिति यजुर्वेदस्य 'प्रतितिष्ठामि राष्ट्रे' २०.१० 'विशि राजा प्रतिष्ठितः' इत्यादिवाक्यैर्व्यज्यते। ऐतरेयब्राह्मणानुसारेण राज्ञो जीवनसर्वस्वमासीत् परमार्थेन प्रजाहितसाधनम्।

रामराज्यमिति वाल्मीकिना प्रगीतं रामायणे। स रामः —

धनुर्वेदे च वेदे च वेदाङ्गेषु च निष्ठितः।
सत्यधर्मरतः श्रीमान् संग्रहानुग्रहे रतः।
देशकालविभागज्ञः सर्वलोकप्रियंवदः॥ सुन्दरकाण्डे ३५.१४,२१

---

१. यथा पुत्रास्तथा पौराः। महा० शान्ति ६०.२६; पुत्रा इव पितुर्गेहे। शान्ति ५७.३३

२. ऋग्वेदे ८.५१.७; ७.९८.३; ८.६.४१; १०.२४.२; १.११.४; १.८४.२; ४ ६.१४ वदान्यता २.१९.४; २.२२.२; ७.२७.३।

३. ऋ० ७.२१.७; ४.४२.१–३;८.६.२६;१.१७.२

४. शत० ५.३.३.९।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

इतिहासेऽशोक-विक्रमादित्य-हर्षादीनां राज्ञां निदर्शनेन भारतीयराजत्वं प्रद्योतितम् । राजा वर्णाश्रमधर्मस्य संरक्षको भवेदिति शाश्वतनीतिः । सर्वेषु वर्णेषु सर्वेषु आश्रमेषु लोकाः स्वाभ्युदयाय यथोचितसाधनानि प्राप्नुवन्तु; परेषां विघ्नं विहाय स्वतन्त्र-विचार-प्रकाशनावसरः सर्वोदयाय समाजे संभवेत् । तत्रादर्शनृपस्य प्रयासोऽभवदिति कल्पितुं शक्यते । यतोहि नाम तदभावे देशेऽस्मिन्नसंख्यधर्माचार्याणां परस्परविरोधिमतान्तराणां विकासो नाभविष्यत् । भारते धर्ममूलानि युद्धानि संघर्षाश्च विरला बभूवुरिति हिन्दूराज्यसंस्कृतेरनुत्तमोपलब्धिः । प्रायः यस्य कस्यापि धर्मस्यानुयायी राजान्येषां धर्माणामाचार्यान् तेषां विहार-मठ-मन्दिराणि समरक्षत् ।

वैदिककाले युद्धेषु हस्तिनामश्वानां चोपयोगो विरल एवासीदिति पाश्चात्यानां मतं भारतीया पुराविदोऽपि पुरस्कुर्वन्तीति समीचीनं न प्रतिभाति । हस्तियुद्धस्य प्रमाणं ऋग्वेदे ४.१६.१४, अथर्ववेदे ४.१६.१४, १२.१ २५; ६.३८.२ मन्त्रेषु दृश्यते । अश्वसेनाया युद्धे वर्णनमधोविधं लभ्यते—ऋग्वेदे ४.४४.५; १.१६२.१; ६.४७.३१; ६.७५.७, अथर्ववेदे ११.१०.२४, तैत्तिरीयसंहितायाम् ४.४.८; ४.२.६ । महाभारते हस्तिसेनाया उपयोगो विरल इति मतमधोलिखितोदाहरणेन परास्तमेव—आदिप० २.१५.१९; उद्योगे १४९.८२; कर्णपर्व ७.५; ८.१,२; १७.११, सभा ५४.१० ।

भारतीया युद्धाचार-संहिता या विकसिता सानुपमं स्थानं तत्सम्बद्धप्रकरणेष्वर्हति । एतद्विषयकमहाभारतीयसन्दर्भा युद्धोत्सवानां सम्यग्विचारणां परिग्रहणं चार्हन्ति ।

अपरिहार्यमपि युद्धं तु वस्तुतो मानवतायाः कलङ्क एव । वैदिककालत एव देवर्षिमानवासुरराक्षसानां युद्धानि निर्मर्यादानि बभूवुरिति सत्यमेव । देवानामृषीणां च शत्रवोऽसुरा राक्षसाश्चासन् । युद्धं विहाय नान्यत्साधनं शात्रवं समापयितुं तैरुद्भावितमासीदिति विस्मयजनकम् । वस्तुतो वैदिकार्याणां युद्धपरता महाभारतरामायणादियुगेऽपि प्रशंसास्पदं सती भारतस्याहिंसापथस्य परिपन्थिनी प्रबभूव ।

विचारमार्गप्रहितेन चेतसा युद्धस्यावश्यकता नातिन्यूना प्रतिभाति । यदा संस्कृति-भ्रंशकरा उद्वेजिनो विशेषतो वैदेशिकम्लेच्छा देशस्य सर्वस्वमपहर्त्तुं विलोपयितुं चाक्रमन्ते तदा तेषां विनाशायात्मरक्षायै च युद्धमेव समीचीनः पन्थाः । भारतीयेतिहासे संस्कृतिविहीनान् म्लेच्छान् परावर्तयितुं भारतीया विफलप्रयासा क्वचिद् दौर्बल्येन राज्ञो संघर्षनिर्माणाभावेन चासन् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

रघुवंशे कालिदासादर्शानुसारेण राजा तु —

प्रजानां विनयाधानाद्रक्षणाद् भरणादपि ।
स पिता पितरस्तासां केवलं जन्महेतवः ।।

अथवा किं बहुना ? रामराज्यस्य प्रशंसापदं प्रतिमुखं पावनतां विदधाति ।

भारतीयो धर्मो न केवलं स्वस्यापितु चराचरस्य हितं कथं भवेदिति विश्वं सन्धारयितुं साङ्गोपाङ्गविचारणां सूक्ष्मातिसूक्ष्मदृशा प्रस्तावयति । 'सर्वभूतहिते रतः' इति धार्मिकपुरुषस्य लक्षणम् । 'परोपकारः पुण्याय पापाय परपीडनम्' इति महाभारतीयं वचनं सांस्कृतिकमहिमोद्घोषेणानन्यसार्थकतामावहति । परद्रव्यापहारस्तु महान् दोषो निरयकारक इति शिवसंकल्पः ।

'धर्मो यो बाधते धर्मं नहि धर्मः कुधर्म तत्' इति भारतीयधर्माधिपानां कर्मदिङ्निर्देशः शाश्वतं ध्येयं व्रतम् ।

धर्मो मधुमत्त्वं विभर्त्ति । वयं मधुमन्तः स्यामेति अथर्ववैदिकप्रार्थना ।

वैदिकधर्मो देवानां प्रीत्यर्थं यज्ञ-प्रधानोऽस्ति । यज्ञस्तु असंख्यविधः । अधिसंख्यका यज्ञा मनसा वचसा वा सम्पादनीया सन्ति । स्तुतिमात्रेण, ध्यानेन, तपसा, नमसा, जपेन, ज्ञानेन, योगेन वा देवानामपि अनुग्रहो लभ्यः । येन केन प्रकारेणापरस्य कस्यचित् सुखं भवेत् दुःखं च नश्यतु' इति प्रारम्भिकयुगतः पुण्यप्रदमिति सम्मतम् । यत्किञ्चित् पुण्यप्रदं तत्तु यज्ञ एव ।

द्रव्ययज्ञः पशुयज्ञो वा वैभवशालिनां विभव-समृद्धचर्थमासीत् । तेषु तेषु यज्ञेषु महती दक्षिणा महादानेन समं बहुफला भवतीति पुरोहितानां यजमानानां च वरिष्ठताद्योतनाय स्वीकृतम् ।

को देव इति भावनाधिकारेणावगम्यते । अस्मिन् चराचरे जगति वस्तुतो नास्ति किंचिददेवः । सर्वं खल्विदं ब्रह्म । ब्रह्म तु सर्वोपरिप्रतिष्ठितो देवाधिदेवः । एतदर्थं ब्रह्ममयी दृष्टिरपेक्षिता । सा तपसा ब्रह्मचर्येण साध्येति धर्मविदां मनीषा ।

भारतीयो धर्मः सनातन इति बहुवादः । युगे युगे धर्मः परिवर्तत इति मनुवचनम् । उभे पूर्वोक्ते वचने सत्यसंपृक्ते इति वास्तविकी स्थितिः । बहवो देवा युगे युगे परिवर्तन्ते । पुरातनकतिपयदेवानां स्थानमभिनवदेवा गृह्णन्ति । पूजाविधिरपि यत्र-तत्र विपर्यासं याति किन्तु सनातनतत्त्वं धर्मस्यास्ति यल्लोका देवानुग्रहं वाञ्छन्ति । तदर्थं षोडशोपचारो क्रियते अथवा वैदिकधर्मानुसारेण षोडशोपचारस्य मूलरूपो यज्ञः (नाममात्रं अथवा ईषदेव पूजातो भिन्नः) सम्पाद्यते । आदिकालतोऽद्यावधि हिन्दूधर्मे वेदादीनां ब्रह्माधीना प्रतिष्ठा धर्मस्य सनातनतां वितनोति । जीवनस्य सात्त्विकता धर्मार्थकाममोक्षाणां कृते सत्साधनानि, पापपुण्यार्थाः पारलौकिकास्तित्वमित्या-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दीनि शाश्वतश्रद्धास्पदम् । न कापि वैदिकधर्मशाखाद्यावधि कदापि शुष्कतां याता । वैदिकयज्ञा अद्यापि प्रवर्त्यन्ते ।

कथं पापविमोचनं स्यात्, मरणानन्तरं स्वर्गप्राप्तिर्भवेत्, अभावे सति कथं पुण्यार्जनं सम्भवेदित्यादयः प्रश्ना धर्माचार्याणां विशेषतः पौराणिकानां समक्षमासन् । 'धर्मानुयायिनां संख्या कथं वर्धेत' अथवा परधर्मानुयायिनां संख्या कथं क्षीणतरा भवेदिति तथाकथितधर्माचार्याणां प्रयासाः सद्धर्मपथे यद् वैक्लव्यमावहन्ति तेन धर्मस्य सात्त्विकता विनश्यति । तथापि एतत्तु सत्यमेव यत् परितो प्रवर्त्यमानानामवराणां नवधर्माणां प्रभावेण प्राक्-प्रतिष्ठितधर्मस्यास्तित्वमेव यदा संशयास्पदं जायते तदा नूतनयोजनाभिः सनातनधर्मो रक्ष्यते । एतदर्थं धर्मस्य सरलतरविधिविधानानि नित्यनैमित्तिक-कार्यार्थं प्रसंगत आविष्कृत्य संयोज्यन्ते । तस्यां स्थितौ परम्परागतसद्धर्माचरणेन सह विघ्ननिवारण-पापविमोचन-स्वर्गप्राप्तिपारलौकिकसद्गतीत्यादीनां कृते स्वल्पव्यय-साध्यं देवदर्शन-व्रतोत्सव-मूर्तिपूजन-भजन-कथाश्रवणादिकं यथायोगं हिन्दूधर्मे समावेशितम् । अनेनोपायोपक्रमैः साधारणजनताया धर्मपरिवर्तनं निराकृतम्; समाजस्य राष्ट्रस्य चैक्यं दृढीकर्तुं देशाटन-तीर्थ-दर्शन-लोकविचरणेष्टापूर्तविधान-पुराणकथाश्रवण-प्रसादवितरणादीनिमहामनीषिणां गहनविचारणोद्भूतानि निकामं सफलानि संजातानि ।

पुरा धर्मस्य सामाजिकाभ्युदयपक्षः समुदितो बभूव । एतदर्थं धर्मो वर्णाश्रमधारणाय सर्वोदयनीतिं प्रायोजयत् । यस्य कस्यापि वर्णस्य यस्य कस्यापि आश्रमस्य पुरुष आत्मविकासाय जीवनसुखसाधनलाभार्थं च स्वप्रयत्नेनासमर्थोऽपि राजकीयसाधन - विनियोगेनानुत्तमावसरं लभेतेति प्रयतितम् शासन-संस्था पूर्वोक्तविधानेन सर्वहिताय प्रवर्तते स्म, अपितु धर्मानुशासनं परिपालयन्तो ब्राह्मणा ब्रह्मयज्ञेन, क्षत्रियाः प्राणपणेनापि दुर्दान्तानां दमनेन, वैश्या विश्वंभरोद्योगेन शूद्राश्च शिल्पदाक्ष्येण न केवलं स्वसमाजेऽपितु देशे-विदेशेऽपि सौन्दर्यानुयोगिवैभवितरणेनात्मानं धन्यान् मेनिरे । एतादृशी आसीत्तेषां लौकिकपारलौकिकैषणान्ता निष्पत्तिः । अनेन प्रकारेण समाजे परस्परं सार्वभौतिकसाह्यमुच्छ्रितमासीत् ।

धर्मानुसन्धाने वेदान्तदर्शनस्य प्रमुखभूमिका निर्व्यूढास्ति । तदनुसृत्य सर्वं खल्विदं ब्रह्म । अस्मादेव तादात्म्यस्य परा काष्ठा अनन्यताभिव्यज्यते ।[1] लोके यत्किंचित् 'सत्यं शिवं सुन्दरम्' तत् सर्वं मयि, अहं च तस्मिन् सर्वस्मिन्

१. यः तव तनुरियं सा मयि यो मम तनुरेषा सा त्वयि ।। यजु० ५.६
आत्मनात्मानमभिसंविवेश । यजु० ३३.११ । यत्र विश्वं भवत्येकनीडम् । यजु० ३२.८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वर्ते इति धारणया पुरुषो ब्रह्मवदानन्दं निस्सीममनुभवति। आध्यात्मिक-जीवनस्य सम्प्रियतास्मात् कारणाद् बहुलीभवति। इदं तादात्म्यं ब्रह्मज्ञानेन सुशकम्। अथ चातिथियज्ञेनापि विष्णोः सायुज्यं भवति।[1] तादात्म्येनोपास्य-देवस्येश्वर-गुणाः प्रपद्यन्त इति वैज्ञानिकी श्रद्धा।

भारतीयधर्मस्य सर्वोच्चोपलब्धिर्गीतायां सविशेषं प्रतिपादितः कर्मयोगः। तत्र कर्मयोगो भक्तियोगेनोपपन्नः लोकसंग्रहकारकोऽप्रतिम एव। अत्र मानव-संस्कृतेरुपकारक्षेत्रेऽप्रतिमावदानमभिव्यक्तम्।

भारतेऽवतारकल्पना मानवीयशक्तेर्गुणानां सर्वहितकाम्यायाश्च पारमेष्ट्यं साधयितुं प्रभवति। यद् भगवतः कर्म तस्य श्रेष्ठतमसाधकः मानवेषु भगवतोऽवतारः। तद् गीतायां प्रोक्तम्—

परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे॥

पूर्वोक्तं भगवत्कर्म यः कश्चिदलौकिकदाक्ष्येण सम्पादयति, स तु अवतार एव। अवतारस्य कल्पना भगवन्तं मानवतायाः समीपं प्रापयति। अवतार-दर्शनेन भक्त्या च प्रशान्तं मधुमच्च जगत् दिव्यवैभवप्रपन्नं जायते; समाजे सम्प्रियता जागर्ति च।

भक्तिसम्पत्त्या भगवतः प्रसादोऽनुभूयते लोकैः। परिणामतश्चर्तुदिशं समाश्वासः संजायते। भक्तिसूत्रेण संग्रथितः समाजो भगवद्बलमेव स्वीयं मन्यमानो राष्ट्रियं सांस्कृतिकं चैकतां समुत्थापयति। बौद्धधर्म इव भक्तिमार्गो जात्याधारेणोच्चावचत्वं नावधारयति। सर्वे भक्ताश्चाण्डाला अपि समाना इति महत्तमो दायः भक्तिसम्प्रदायस्याचार्याणाम्। भारतस्य सच्चारित्रिकोन्नयनं भक्तिपथस्याचार्याणां साहित्यरचयितॄणां च विशिष्टं योगदानं वर्तते। गार्हस्थ्येऽपि सम्मानार्थमाधिभौतिकैश्वर्यं नापेक्षणीयमिति भक्तिपथस्य-महान् विशेषः।

विश्वधर्मप्रतिष्ठापकेषु बौद्धधर्मप्रवर्तकः सर्वार्थसिद्धो गौतमः स्वीयाभिजात्य-सहानुभूति-महानुरागौदात्त्य-विशेषैः सर्वातिशायी विभाति। सर्वप्रियः स परवर्तियुगे पौराणिकधर्मेऽवतारः ख्रीष्टधर्मे च सेण्ट इति सम्मतः।

गौतमानुसारेण स एव सद्धर्मो येन परोपकारभावनोद्दीप्यते, यस्मिन् निष्णातश्च सर्वोदयेनात्मोत्थानं, स्वस्थचित्तं प्रशान्तिं च सद्य उपलभते। सद्धर्मस्यांशाः सर्वेषु धर्मेषु न्यूनाधिकं विद्यन्ते। तेभ्यः स्वीयबौद्धिकप्रकाशेन सात्त्विकांशाः प्रचेया आत्मसात्करणीयाश्चेति तस्योपदेशमूले व्यराजत।

---

१. शतपथे १२.१.३४।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

गौतमस्यानुभावो विश्वेषां सुखाय आश्वासपूर्णो रम्यश्च प्रावर्तत। तस्य वाग्धारा सुधानिष्यन्दिनी प्रादुरभवत्। तस्य धर्मोपदेशाः समीचीनत्वात् लोकान् प्रीणयन्ति स्म।

अधिकाधिकलोकान् सम्भावयितुं नित्यपर्यटनपरायणोऽभिगम्यः स आसीदेव। तस्य शिष्य-प्रशिष्य-परम्परा कृतभूरिपरिश्रमा विश्वं निर्वाण-पथं विनयेन प्रश्रयेण च दर्शयामास। अत एव स समीक्षकैर्विश्वप्रकाश इति सम्बोधितः।[1] भूमण्डले भारतस्य महाप्रतिष्ठा-संवर्धकेषु गौतमोऽयं स्वधर्मेणोच्चैस्तमामधिराजते।

आर्यसत्यानि, अष्टाङ्गिकमार्गः, शिक्षापदानि, मध्यमप्रतिपदात्मकं सरल-जीवनं, ब्रह्मविहारः, मैत्रीभावादि पञ्चशीलानि सन्ति बौद्धधर्मस्य विशेषाः।

जैनधर्मस्तीर्थङ्करपरम्परया वैदिककालत एव प्रवर्तितो महातपस्विभि-र्विभावितोऽहिंसाव्रतैकनिष्ठया विश्वधर्मेषु प्राग्भावं भजते। आदितीर्थङ्कर ऋषभः स्वौदात्त्येन पौराणिकयुगे अवतार इति सम्मतः। अन्तिमतीर्थङ्करस्य महावीरस्य माहात्म्येन दृढमूलो जैनधर्मो गणधरपरम्परया सद्धर्मदेशनाभि-र्विश्वलोकप्रियतां शाश्वतमर्हति।

बौद्धजैनधर्मयोर्दुष्कृतां विनाशायापि हिंसा न प्रतिपादिता। तथापि तयोरनुयायिनः कतिपयनृपतयो युद्धपथेन दिग्विजयिनो बभूवुः। अयं तु वैदिकधर्मस्य प्रभावः स्यात्। यौद्धिकी हिंसा हिंसा न भवतीति। एतयोर्द्वयो-र्धर्मयोरनुयायिभिः सद्धर्मवासनेन चित्र-मूर्ति-वास्तुशिल्पानां शाश्वतोपयोगेना-लौकिकसिद्धिरवाप्ता। धार्मिकदार्शनिकसाहित्यरचनाभिर्धर्मद्वयमतुलं साफल्यं लेभे।

भारतीयमनीषिणः संस्कृतेरादिकालतो विश्वमानवतायै स्वीयसर्वस्व-वितरणमेव परं पुण्यमामनन्तिस्म। सर्वस्ववितरणं तेषां संज्ञाननिधिर्बभूव। तस्यार्पणं खलु महादानं, महायज्ञः। तदेव ब्रह्मयज्ञ आत्मनो ब्रह्माधिगमाय सर्वसम्मतं साधनम्। एतदर्थं तेषां विष्वकपरिभ्रमणोत्साहः शैलार्णवकान्तार-संकटव्यूहोन्मार्जिनी श्रमपरायणता च न कदापि शैथिल्यं गता।

ऋषिव्रतानां महात्मनामियं प्रवृत्ती राजर्षिभिः संविभक्ता धर्मविजय-स्वरूपमभजत। तेषामिष्टापूर्तकीर्तनानि भारताद् बहिरपि चतुर्दिशमद्यापि धराधामानि समलंकुर्वन्ति। वैश्यशूद्राणामस्यां दिशि सहायनं सविशेषं महिमान्वितम्।

1. Rhys Davids: Light not of Asia only but of the world.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अस्माकं सौभाग्यवैषम्येणाधुनेहत्यलोका न केवलं भारतीय-संस्कृतेः पराङ्मुखा अपितु तामुपेक्ष्य वैदेशिकीं संस्कृतिं साभिमानमात्मसात् कुर्वन्ति। किमतः परं दैवदुर्विलसितं स्यात् यद् विश्वगौरवास्पदं स्वसंस्कृतिं प्रति सम्मानहीना वयं पाश्चात्त्यसंस्कृतेर्भोगविलासप्रवणाः प्रवृत्तीः पराहता इव हृदि संनिवेश्य वैदेशिकैः सह स्वयमपि पतनोन्मुखा विस्मृतात्मनः संजाताः।

भारताः शिवसंकल्पयोगाय भवतामयमेव शुभाशंसिकालः।

इति शम्।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

परिशिष्टम्

The greatness of a culture is judged by the worthiness of its adherents who should be really great and good and contribute eminently towards universal peace and progress. Such persons should live an ideal life in words, thoughts and deeds with a view to elevating humanity higher and higher through their own conduct.

Culture is not worth the name if it serves only a particular individual, group, society or nation. Its appeal and application should essentially imply the infinite in which all differences merge.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तीर्थदर्शन-रहस्यम्

सिद्धक्षेत्रस्य महिमा प्रगीयते

राष्ट्रियसंस्कृतेरुत्थानदिशि पावनभावनया धर्मस्य निगूढतत्त्वानि प्रतिपादयतां तीर्थानां सातिशयमवदानमादिकालतो विभाति। तथाहि—

निपानागमयोस्तीर्थं[1] मृषिजुष्टजले[2] गुरौ । (अमरकोशः ३.३.८६)
तीर्थं शास्त्राध्वरक्षेत्रोपायनारीरजःसु च ।
अवतारर्षिजुष्टाम्बुपात्रोपाध्यायमन्त्रिषु ॥ (मेदिनी ७२.७)
प्रभावाद्द्भुताद् भूमेः सलिलस्य च तेजसा ।
परिग्रहान्मुनीनां च तीर्थानां पुण्यता स्मृता ॥

ऋग्वेदे जलनिधिसिन्धुसरितां पावनत्वात् तेषां तीर्थत्वमधोविधं समुदितम्[3]—

समुद्रज्येष्ठाः सलिलस्य मध्यात् पुनाना यन्त्यनिविशमानाः । ७.४९.१
या आपो दिव्या उत वा स्रवन्ति खनित्रिमा उत वा स्वयंजाः ।
समुद्रार्था यः शुचयः पावकास्ता आपो देवीरिह मामवन्तु । ७.४९.२
यासु राजा वरुणो यासु सोमो विश्वे देवा यासूर्जं मदन्ति ।
वैश्वानरो यास्वग्निः प्रविष्टस्ता आपो देवीरिह मामवन्तु । ७.४९.४

अर्थात् सलिलं निरन्तरं सलीलं पावयति। स्वर्गाज्जलमायाति, खननेनोद्वर्तते स्वतः पृथिव्या उच्चरति च। तत् सर्वं शुचि, पावकं, दिव्यं च मानवतां रक्षतु। तत्रावगाहनेन राजा वरुणः, सोमः सर्वदेवाश्च शक्तिं लभन्ते। तत्राग्निरवगाहते। ईदृशं विशिष्टं जलं (तीर्थवारि) मामवतु।

---

१. तीर्यते अनेन वा। तॄ प्लवनतरणयोः। पातृतुदि उ० २.७ इति थक्। तरति पापादिकं यस्मात्।

२. तीर्थमृषीणां परायणमिति महाभारते आरण्यकपर्वणि ८०.२९।

३. ऋग्वेदस्य सूक्तमिदं मूलतस्तीर्थदर्शनस्य रहस्यं साक्षात्करोति। मूलतस्तीर्थमाप एव। आपो नित्यस्त्रीलिङ्गे बहुवचने प्रयुक्ताः। आदरार्थेऽत्र बहुवचनम्। अर्थादपां बहुत्वमादरणीयतां प्रकटयति। स्वल्पजलमापो न भवति। जलस्य भूमापः। यज्जलं सिन्धु-सरोवर-नद-कुण्डादिषु व्ययीभूतमप्यव्ययं पूर्णं विभवति; तदेवापः। आपः पावयन्ति। धार्मिकविधीनां पूर्तये पवित्रस्थलं भावयितुं तीर्थं कृतमासीदग्नेरपां पावकानां सान्निध्येन। तत्राग्निं समिन्ध्य दीपशिखः कलशः प्रतिष्ठाप्यते।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मानवजीवने अपां (जलस्य) महत्त्वं प्रत्यक्षमेव। तासां पापनिवारिणी पावनशक्तिर्वैदिकर्षीणां विदितासीत्।[1] अस्यां स्थितौ ऋषीणां वसतिः प्राचीनयुगे सरोवराणां नदीनां च तटे समवर्धत। स्वभावतः स्वोपयोगि-जलप्रदायानां नदीसरोवराणां शुचितां संवर्धयितुकामा ऋषयस्तेषां तटदेशं स्वच्छं सुन्दरमभिगम्यं च विदधुः। तत्र जलमृषिभिर्जुष्टमासीत्। तदेव पौराणिकयुगे तीर्थमिति प्रख्यां लेभे[2]। न केवलं तज्जलमपितु जलोपजीविन ऋषयोऽपि तीर्थमित्युपाधिनाभिहिताः। अपि च परितो भूप्रदेशस्तीर्थाभिख्यां लेभे। उपतीर्थं स्थायिनिवासिन ऋषय आसन्। तत्र जलं पातुं समागताः पशुपक्षिण ऋषिभिः कृतेनावतारपथेन गत्वा तृप्ता बभूवुः[3]। दूरदूरतोऽपि समागत्य तत्र लोकाः स्नान्तिस्म। सोऽवतारपथो घट्टो वापि तीर्थसंज्ञां लेभे।

इमानि पूर्वोक्तानि तीथानि यात्रिकाणां नदीपारणायापि लोकोपयुक्तानि सन्त्येव। व्यापारिणस्तत्र नदीमुत्तीर्यार्थवा नदीपथेन कार्यार्थं विदेशं गन्तुं समायाताः, नदीयात्रायां तत्र विश्रान्ताश्च। एवमेव नैकतीर्थेषु वसतिकारणात् कालान्तरेण नगराणि प्रादुर्भूतानि। अधुना काशी एतादृशी महानगरी वर्तते।

नद्याः समुद्रस्य कासारस्य वा तटे स्थितं क्षेत्रमृग्वेदकालत एव तत्रत्य-श्रैष्ठ्यं द्योतयति[4]। तीर्थं तु पुण्यप्रदेश इति शतपथब्राह्मणे प्रोक्तम् (१२.२.२.१.१)। पुण्यप्रदेशः स भवति यत्र पुण्यौदात्त्यं प्रतिफलति। क्वचित्तीर्थं जलौघतरणस्थानमभवत्। सागर-महानदादीनां तरणोपक्रमे लोकैः प्राणसंशयं सम्भाव्य तत्रस्थ-देवमहर्षीणामुपस्थानेन निर्विघ्नता

---

१. इदमापः आपो मा पुनन्तु। अथर्व० १८.३.११। प्रवहत यत् किं च दुरितं मयि। ऋ० १.२३.२२। शतपवित्राः स्वधयामदन्तीर्देवीः। ऋ० ७.४७.३। पुनाना यन्ति। ७.४९.१।

२. तीर्थेषु लभ्यते साधू रामचन्द्रपरायणः। यद्दर्शनं नृणां पापराशिदाहाशुशुक्षणिः॥
तस्मात्तीर्थेषु गन्तव्यं नरैः संसारभीरुभिः। पुण्योदकेषु सततं साधु श्रेणिविराजिषु॥
पद्मपुराणे पातालखण्डे १९.१६,१७।
अकर्दममिदं तीर्थं भरद्वाज निशामय। रमणीयं प्रसन्नाम्बुसन्मनुष्यमनो यथा॥
बालकाण्डे २.५।

३. प्रतिपानह्रदान् पूर्णान् खरोष्ट्रगजवाजिनाम्।
अवगाह्य सुतीर्थांश्च ह्रदान् सोत्पलपुष्करान्।
आकाशवर्णप्रतिमान् स्वच्छतोयान् सुखाप्लवान्॥ रामायणेऽयोध्याकाण्डे ९१.७८।
अथ च मृगयूथनिपीतानि इत्यादि। अयो० ९५.५।

४. मा त्वत् (सरस्वत्याः) क्षेत्राण्यरणानि गन्म। ऋ० ६.६१.१४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सम्पादनीया बभूव । तत्र तीर्थेषु देवानां गृहाणि कृतानि । ते देवा तीर्थकारका न केवलं सागरं तारयितुं समर्था अपितु ते भवसागरमपि तारयिष्यन्तीति आस्थावन्तो जना इहलोके परलोके च लाभमीप्समानारतत्र सश्रद्धं यज्ञदान-तपोजपादीनन्वतिष्ठन्[1] । महाभारतानुसारेण विष्णुस्तु प्रथमस्तीर्थकरः । अनु० १३५.८७ ।

ऋग्वेदे देशविशेषस्यालौकिकशक्तिवाहिनी योग्यताधोविधं वर्णिता—

उपह्वरे गिरीणां सङ्गमे च नदीनां धिया विप्रो अजायत । ऋ० ८.६.२८

पूर्वोक्तनिर्देशैः स्पष्टं प्रतिभाति यद् वैदिकालत एव स्थान-विशेषेषु नैसर्गिकसौहित्यं प्रतीतमासीत्[2] । इयं धारणा गौतमेनाधोविधं जपयोग्यभूमिं विवृण्वता परवर्तियुगे प्रकटिता ।

सर्वे शिलोच्चयाः सर्वाः स्रवन्त्यः पुण्या ह्रदाः ।
तीर्थान्यृषि-निवासा गोष्ठपरिष्कन्धाः इति देशाः ॥
(गौ० ध० सू० ३.१.१४)

अर्थात् पर्वता नद्यो जलाशयाः, तीर्थानि, ऋषिवसतयः, गोष्ठाः, पुलिनानि च विशेषपावनत्वमावहन्ति । महाभारतकालादिमानि सर्वाणि तीर्थानीति प्रसिद्धिं गतानि धर्माचरणस्य महत्तमपीठिकां प्रस्तुवन्ति । तीर्थेषु सम्पादिता

---

१. नदीतटेषु यज्ञाः सम्पादिता इति कीथेन दर्शितम् । Religion and Philosophy of the Veda. p. 352.

महाभारतानुसारेण

ऋषयो धर्मनित्यास्तु कृत्वा निवपनान्युत ।
तर्पणं चाप्यकुर्वन्त तीर्थाम्भोभिर्यतव्रताः ॥ अनु० ९२.२ ।

नदीमासाद्य कुर्वीत पितृणां पिण्डतर्पणम् । अनु० ९२.१६

मनुस्मृतौ तीर्थत्वं तथा संकल्पितम्—

शुचिं देशं विविक्तं च गोमयेनोपलेपयेत् ।
अवकाशेषु चोक्षेषु नदीतीरेषु चैव हि,
विविक्तेषु च तुष्यन्ति दत्तेन पितरः सदा । ३.२०६,७ ।

कूर्मपुराणानुसारेण काश्याम्

स्नानं दानं तपः श्राद्धं पिण्डनिर्वपणं त्विह ।
एकैकशः कृतं विप्राः पुनात्यासप्तमं कुलम् ॥ पूर्वा० ३४.२९

२. 'शुचौ देशे स्वाध्यायमधीयानः' इति छान्दोग्ये ८.१५.१ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यज्ञा देवानां, महर्षीणां, राज्ञां च तत्र तपश्चर्या च तीर्थगुणानां[1] कारकाः।[2]

तीर्थस्य पूर्वोक्ता अभिप्रायाः सुदीर्घकालेन शनैः शनैः परिस्फुटिताः। रामायणे तु तीर्थं पुण्यप्रदं स्थानमिति विरलमेव वर्णितम्[3]। बहुशस्तीर्थं तत्र घट्टार्थे प्रयुक्तम्[4]। महाभारते तीर्थं पुण्यस्थलीत्यभिप्राये सर्वसाधारणं दृश्यते। पुराणेषु तीर्थयात्रा-दर्शन-सेवादयो भूरि वर्णिताः।

रामायणे आश्रमः पुण्यस्थलीति सम्मतम्। परवर्तियुगे सर्वे आश्रमास्तीर्थमित्यभिहिताः। ते पुण्याः सन्ति।[5] रामायणे आश्रमास्तीर्थानि सन्तीति न कथितम्। नद्योऽपि तीर्थानि सन्तीत्यपि न सूचितम् किन्तु पुण्यप्रदत्वेन नदीनामाश्रमाणां च तीर्थत्वं प्राक् प्रेक्षतामर्हति।[6] व्यवहारदृष्ट्या रामायणे नद्यस्तीर्थान्येव। तत्र नदीनां नमस्कारः (अयो० ५२.७९,८७) तासां प्रार्थना (अयो० ५२.८२) नदीतटे दानम् ५२.८८ ता उद्दिश्य यज्ञसम्पादनं (अयो० ५२.८५, ९०; ५५.२०) नदीनां प्रणामाः (बाल २४.११) पुण्यप्रदत्वम् (बाल० ३४.९,११) नद्यः शुभाः (बाल० ३५.४) ऋषयो गङ्गां सेवन्ते। बाल० ३५.७ अयो० ५०.१२ गङ्गा लोकपावनी, लोकनमस्कृता, विपापा चास्ति। (बाल० ३५.१८, २२,२४) इत्येतैर्गङ्गायास्तीर्थत्वं प्रतीयते[7]।

प्रयागे संगमः पुण्यो रमणीयश्च। (अयो० ५४.२२) गङ्गासरय्वोः संगमः शुभोऽस्ति। (बाल० २३.५)। महाभारते (आरण्यक० ८१.६३) पद्मपुराणे (१.२६.७३) इलास्पदं (आधुनिक इलाहाबाद) वर्तते। तदेवं आईन-ए-अकबरी-ग्रन्थे इलावासः।

पर्वतानां पुण्यप्रदत्वमभिलक्षितमासीत्। तथा हि चित्रकूटः पुण्यपर्वतः (अयो० ५४.२८,३०,४१)। गयायास्तीर्थत्वं सम्यक् प्रतिपादितं पितृमोक्ष-

---

१. तीर्थगुणाः सन्ति पुण्यं, लोकपालनं, बाधाहरणं, स्वास्थ्यव्रतमित्यादीनि।

२. स्नानं दानं तपः श्राद्धं, हुतं, ध्यानमध्ययनं, ज्ञानं च पुण्यकारणानि भवन्ति तीर्थेषु। कूर्मपुराणे पूर्वार्धे ३१.२९।

३. पुण्यस्थलीत्यभिप्रायेण श्लोके तीर्थं विद्यते—
यानि त्वत्तीरवासीनि दैवतानि च सन्ति हि।
तानि सर्वाणि यक्ष्यामि तीर्थान्यायतनानि च। अयो० ५२.९०।

४. तीर्थं घट्टार्थे अयो० ५२.६; ५५.५; ५६.३५; ९५.५।

५. बालकाण्डे ६१.१०; २३.६, ७,८,१७।

६. यमुनायास्तीर्थत्वमयोध्याका० ५५.१९,२०।

७. अन्यत्र गङ्गा शिवास्ति (अयो० ८५.१२)। व्यपेतमलसंघाता, अपापा पापनाशिनी च। अयो० ५०.२२, २४.२९।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कारणात्[1]। पूर्वोक्तैः प्रतिभाति यदाश्रमा नद्यः, पर्वताश्च सर्वे पुण्या आसन्[2]।

महाभारतकाले तीर्थं पुण्यप्रदेशस्य, ऋषिवसतेश्च समानार्थकं प्रबभूव। तथा हि शान्तिपर्वणि प्रकीर्तितम्—

दानं त्यागः शोभना मूर्तिरद्भ्यो भूयः प्लाव्य तपसा वै शरीरम्।
सरस्वतीनैमिषपुष्करेषु ये चाप्यन्ये पुण्यदेशाः पृथिव्याम्॥
(२८६.३)

तीर्थं वा घट्टः स प्रदेशो यत्रागत्य मानवाः पशुपक्षिणश्चानिशं निर्बाधं च जलपानेन तृप्ता भवन्ति। एवं विधा नद्यः सरोवराः कुण्डा निर्झराः कासारा नैसर्गिकपुण्ययोगात्तीर्थानि सन्ति। तीर्थस्येदृशी कल्पना स्वभावतः परिणामयति यत्ते मनीषिणः, ऋषयः साधवश्च तीर्थानि सन्ति ये ज्ञानपिपासां शमयन्ति। अर्थविस्तारेण तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्याय-मन्त्रिषु। एते सर्वे नैकविधाश्यकताः परिपूर्य स्वीयतीर्थत्वं साधयन्ति। अन्यच्च तीर्थद्वारेण पृथ्वी-प्रदक्षिणा समग्रदेशदर्शनं च सम्भवति।[3]

स्वर्गयात्रायाः पाथेयं येषु प्रत्यक्षं परोक्षं वा लभ्यते तान्येव स्थलानि तीर्थानीत्यभिलक्षितं भारतीय-संस्कृतौ। तीर्थं नाम यस्य सेवनेन पुण्यं जायते पापं क्षीयते च।

सृष्टेरादिकालतो देवीरूपपृथिवीमातुः क्रोडीकृता नदी-सरोवर-सागरा-रण्य-पर्वता मधुव्रतधारिणो नित्यं चराचरं लोकं तर्पयन्ति। वैदिकसाहित्य इमे पुण्यप्रदा इत्यभिज्ञाता अपि वैदिककालानन्तरमेव महाभारते समष्टिशो व्यष्टिशश्च तीर्थमिति नामधेया भारतीयधार्मिकजीवने पावनं विशेषमावहन्तः शोभन्ते। सुदूरप्राचीनकालतो मनीषिण ऋषयः प्रशान्तानन्दपुष्कल-क्षेत्रेषु रमणीयकाननेषु स्वकृतित्वं वितन्वानाः स्वयमेव तीर्थभूताः।

चतुर्धा तीर्थत्वं भवेत् (१) सत्यं शिवं सुन्दरं यन्निसर्गौदात्त्यं

---

१. तथा हि रामायणेऽयोध्याकाण्डे—
एष्टव्या बहवः पुत्रा गुणवन्तो बहुश्रुताः।
तेषां वै समवेतानामपि कश्चिद् गयां व्रजेत्॥ १०७.१३

२. पुण्यन्तु महाभारते तीर्थस्य पर्यायः। यथा
शिवं महत् पुण्यमिदं दिवौकसां सुसम्मतं स्वर्गगुणैः समन्वितम्॥ शल्य० ५२.२१।
अत्र पुण्यं तु तीर्थस्य पर्यायः।

३. समर्थितमेतत् बाराहपुराणे—
मथुरां समनुप्राप्य यस्तु कुर्यात् प्रदक्षिणम्।
प्रदक्षिणीकृता तेन सप्तद्वीपा वसुन्धरा।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

प्रकामं विलसति (२) लोकोपकारव्रतधारिणो महात्मानो यतस्तपसा योगेनावदानेन वा विश्वं धारयन्ति, पुनन्ति च (३) देवा ऋषयश्च यत्र साक्षात् प्रतिष्ठिताः[1] (४) धर्मसंस्थापनभूमिश्च । रवीन्द्रनाथठक्कुरेण सम्यक् समर्थितमेतदधोवचनेन —

India chose her places of pilgrimage wherever there was in nature some special grandeur or beauty so that her mind could come out of its world of narrow necessities and realise its place in the infinite. This was the reason why in India a whole people cultivated the sentiment of universal sympathy for life. If there is a beauty spot any where, ancient and mediaeval Indians would have thought of erecting a shrine there. (adapted) Sadhana p. 9.

तीर्थदर्शनं वस्तुतोऽखिलभारतदर्शनमेव । तत्र लोकानां स्वाभाविकी प्रवृत्तिरस्ति । वैदिककाले सा प्रवृत्तिः सवितुरादर्शेन प्रकर्षं भाजमानेव प्रतिभाति । तथा हि ऋग्वेदे सवितुर्यात्रादर्शः —

आ देवो याति भुवनानि पश्यन् । १.३५.२
अष्टौ व्यख्यत्ककुभः पृथिव्यास्त्री धन्व योजना सप्त सिन्धून् ।
हिरण्याक्षः सविता देव आगाद् दधद्रत्ना दाशुषे वार्याणि ।। १.३५.८

अर्थात् सविता पृथिव्याः सर्वासु दिक्षु प्रेक्षणं विधत्ते —धन्वत्रयं, सप्त-नदांश्च प्रेक्षते[2] । तत्र स रत्नानि वितरति । इत्थंकृत् सविता तीर्थयात्रिकः प्रतिभाति । यथा सविता चरति तथैव तीर्थयात्रिकोऽपि पृथिवीं पर्यटन् पर्वतान् नदानरण्यानि च पश्यति । यात्रान्ते दानं वितरति । सोऽयमृषिधर्मो

१. तद्यथा प्रयागमधिकृत्य महाभारते प्रोक्तमारण्यकपर्वणि —
यत्र ब्रह्मादयो देवा दिशश्च सदिगीश्वराः ।
लोकपालाश्च साध्याश्च नैर्ऋताः पितरस्तथा ।
सनत्कुमार-प्रमुखास्तथैव परमर्षयः ।
अङ्गिरप्रमुखाश्चैव तथा ह्यर्षयोऽपरे ।
तथा नागाः सुपर्णाश्च सिद्धाश्चक्रचरास्तथा ।।
सरितः सागराश्चैव गन्धर्वा अप्सरसस्तथा ।
हरिश्च भगवानास्ते प्रजापतिपुरस्कृतः ।
यमुना गङ्गया सार्धं संगता लोकपावनी ।। ८३.६५–७०

२. यथा मैकडानलो व्याख्याति —Savitṛ surveys all space, the mountains, the plains the rivers and the regions between heaven and earth. Vedic Reader p. 18.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

गृहस्थानां कृते स्वल्पं ग्रहणीय आसीत्, विशेषतस्तु गृहत्यागिनां कृते बभूवेति महाभारते स्पष्टीकृतम्[1] । तद्यथा—वानप्रस्थाः खलु ऋषिधर्ममनुसरन्तः पुण्यानि तीर्थानि नदी-प्रस्रवणानि सुविविक्तेष्वरण्येषु तपस्यन्तोऽनुसंचरन्ति । (शान्ति प० १८.५.१) एतेषां सर्वेषां तीर्थत्वं तदा संकल्प्यमानं प्रतीयते ।

पौराणिकधारणानुसारेण न केवलं मानवा ऋषयश्च तीर्थसेवनं कुर्वन्ति, अपितु देवाः, यक्षाः, राक्षसाः गन्धर्वाश्च तीर्थे तपश्चरन्ति, वसन्ति, स्नान्ति, दानं कुर्वन्तीति नैकशो वर्णितम् । तद्यथा हरिद्वारे—

सवासवाः सुराः सर्वे गंगाद्वारे मनोरमम् ।
समागत्य प्रकुर्वन्ति स्नान-दानादिकं मुने ।
पद्मपुराणे क्रियायोगसारे तृतीयाध्याये

सामान्यतः सर्वासां नदीनां तैर्थिकगुणा वैदिककालतोऽभिज्ञाताः सन्ति । तत्रापि सरस्वती[2] अनुत्तमेति ऋग्वेदेऽधोविधं वर्णितम्—

एका चैतत् सरस्वती नदीनां शुचिर्यंती इत्यादि । (७.९५.२)
अम्बितमे नदीतमे देवितमे सरस्वति ।
अप्रशस्ता इव स्मसि प्रशस्तिमम्ब नः कृधि ।। २.४१.१६
चोदयित्री सूनृतानां चेतन्तीं सुमतीनाम् यज्ञं दधे सरस्वती ।
महो अर्णः सरस्वती प्रचेतयति केतुना ।। (ऋ० १.३.११,१२)

अत्र सरस्वती देवतास्ति तीर्थरूपा । सा मूर्तिमती उपासकानां सर्वानर्थान् तीर्थवत् पूरयति[3] ।

ऋग्वेदे कतिपयतीर्थानि अभिज्ञातानि प्रतिभान्ति । तेषु उपह्वरे गिरीणां संगमे च नदीनाम् । धिया विप्रो अजायत । ८.६.२८ इति प्रयागं बदरिकाश्रमं च समक्षयति ।

---

१. प्रसङ्गेऽस्मिन् 'तीर्थयात्राधिकारिणः' इति प्रकरणं पृ० १२ द्रष्टव्यम् ।

2. In the times of the hymns of Ṛgveda Sarasvatī was a big river with abundant waters, that it flowed between Yamunā and Śutudrī (X.75.5), in the times of the Brāhmaṇas it disappeared in the sands. It is now generally identified with the modern Sarsutī which is lost in the desert at Bhatnair.
P. V. Kane : Hist. of Dharma. Vol. IV. 557.

३. सा सरस्वती तीर्थभूता महाभारते वर्णिताधोविधम्—
सरस्वती सर्वनदीषु पुण्या सरस्वती लोकसुखावहा सदा ।
सरस्वतीं प्राप्य जनाः सुदुष्कृताः सदा न शोचन्ति परत्र चेह च ।। शल्य० ५३.३५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

निसर्गतस्तीर्थभूतारण्यानीति वनदेवी ऋग्वेदे वर्णिताधोविधम्--

आञ्जनगन्धिं सुरभिं बह्वन्नामकृषीवलाम् । १०.१४६.५
न वा अरण्यानिर्हन्त्यन्यश्चेन्नाभिगच्छति ।
स्वादोः फलस्य जग्ध्वाय यथाकामं निपद्यते ।। (१०.१४६.५)

अतएवारण्यानी[1] तीर्थे प्रसादोऽपि लभ्य इति स्फुरति । अत्र परमपुरुषेणार्पितः फलादिप्रसादो भक्तजनेभ्यो वितीर्यत इति संव्यवहारो व्यज्यते[2]।

अथर्ववेदे यात्री हिमालयं तत्रत्यारण्यं च तीर्थमभिमन्यमान इव प्रशस्तिमुद्गिरति--

गिरयस्ते पर्वता ते हिमवन्तोऽरण्यं पृथिवि स्योनमस्तु ।

अत्र स्योनमिति शिवम् । तत् तीर्थत्वं व्यनक्ति । मनुः समर्थयति--

अपां समीपे नियतो नैत्यकं विधिमास्थितः ।
सावित्रीमप्यधीयीत गत्वारण्यं समाहितः ।। २.१०४

तीर्थप्रख्यामलभमाना मुनिसंघनिषेविताः पर्वतप्रदेशाः स्वीयरमणीयतया रामाय समाश्रयोचिताः, न तु सुग्रीवादीनां राजकीय-वैभवयुता किष्किन्धा[3]। राममुखेन परिचेयमिदं प्रस्रवणे तुङ्गभद्रानदीतटवर्तिमुनिजनसेवितप्रकृतेरातिथ्यम्--

पारिप्लवशतैर्जुष्टा बर्हिक्रौञ्चनिनादिता ।
रमणीया नदी सौम्य मुनिसंघनिषेविता ।। (किष्किन्धा०२७.२३)

अत्र समुदितं तीर्थत्वं तुङ्गभद्रायाः ।

पौराणिकयुगे तीर्थानि बहुलीभूतानि यज्ञादपि विशेषतरपुण्यप्रदानि प्रतिभान्ति । तत्र प्रथमं महाभारतीयं मतमुल्लेखनीयं यत् तीर्थाभिगमनं पुण्यं यज्ञादपि विशिष्यते । (आरण्यक० ८०.३८) स्कन्दपुराणे काशीखण्डे समर्थितमेतत्--

अग्निष्टोमादिभिर्यज्ञैरिष्ट्वा विपुलदक्षिणैः ।
न तत्फलमवाप्नोति तीर्थाभिगमनेन यत् ।।

निर्धना धनापेक्षं यज्ञं कर्तुमसमर्थाः । अथ च यज्ञसम्पादनाय पत्न्याः साह्यमपेक्षितम् । न खलु तीर्थदर्शनविधौ तादृशो बहुसम्भारोऽपेक्षित इति पुराविदां मतं तीर्थयात्रां लोकाभिरुचिकरीं विदधाति । किं बहुना, केवलं स्मरणमात्रेण कतिपयतीर्थानि फलं प्रददति । आरण्यक० ८०.५३

---

१. संव्यवहारात् शौचं मैत्रतां दृढभक्तिं च परीक्षेत । अर्थशास्त्रे १.९ ।
२. स्योनमिति शिवः । शिवमित्येवैतदाह । शतपथ ब्राह्मणे ३.३.३.१० ।
३. अत्रावधेयं वर्तते यत् किष्किन्धायां सुग्रीवस्याभिषेकानन्तरं रामः प्रस्रवणगिरौ वसति चकार न तु सुग्रीवस्य राजधान्याम् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तीर्थयात्राप्रसङ्गः सुसाध्यः केवलं बाह्यदृष्टचा प्रतिभातु नाम। महाभारतानुसारेण तीर्थयात्राफलं स एव सम्यक् प्राप्नोति योऽधोविधं संस्कारेण सम्पन्नो भवति अनुशासनं प्रतिपालयति च—

यस्य हस्तौ च पादौ च मनश्चैव सुसंयतम्।
विद्या तपश्च कीर्तिश्च स तीर्थफलमश्नुते॥ (आर० ८०.३०)
प्रतिग्रहादुपावृत्तः संतुष्टो नियतः शुचिः।
अहंकारनिवृत्तश्च स तीर्थफलमश्नुते॥ (८०.३१)
अकल्को निरारम्भो लघ्वाहारो जितेन्द्रियः।
विमुक्तः सर्वदोषैर्यः स तीर्थफलमश्नुते॥ (८०.३२)
अक्रोधनश्च राजेन्द्र सत्यशीलो दृढव्रतः।
आत्मोपमश्च भूतेषु स तीर्थफलमश्नुते॥ (८०.३४)

अन्यत्र तीर्थदर्शनलाभः सर्वसामान्यकृतेऽवधारितः। न केवलं मानवा अपितु देवाः, साध्याः, गन्धर्वाः, अप्सरसः, दैत्याः, ब्रह्मर्षयश्च तीर्थसेवनं कुर्वन्ति। आरण्यकपर्वणि ८०.४३-४६। अपि च -विष्णुधर्मोत्तरे प्रोक्तमधोविधम्—सर्वेषामेव वर्णानां सर्वाश्रमनिवासिनां कृते तीर्थं फलप्रदं ज्ञेयम्।

सदाचारैकव्रतानां मनीषिणां तीर्थस्य परिभाषापरविधैव विद्यते। तथाहि—

सत्यं तीर्थं क्षमा तीर्थं तीर्थानामुत्तमं तीर्थं विशुद्धिर्मनसः पुनः।
(स्कन्दपु० काशी० ६.२८.४५)

आध्यामिकतीर्थेऽपि तथैवावगाहनं शक्यं यथा नदीतीर्थेषु। वामनपुराणे निदर्शितमेतत्—

आत्मा नदी संयमतोयपूर्णा सत्यावहा शीलतटा दयोर्मिः।
तत्राभिषेकं कुरु पाण्डुपुत्र न वारिणा शुध्यति चान्तरात्मा॥ (४३.२५)

वैदिकेतर-सम्प्रदायानुयायिनोऽपि एवमेव वदन्ति। तीर्थस्य कल्पना विश्वस्य सर्वेषां धर्माणां महत्त्वपूर्णमङ्गमस्ति।

पद्मपुराणे कतिपयाभिनवलक्षणयुतानि तीर्थानि परिगणितानि। तथा हि- अग्निहोत्रभूमिः, श्राद्धस्थली, देवालयः, वेदाध्ययन-स्थली, गोशाला, सोमपायिन आवासः, आरामः, अश्वत्थवृक्षाधिष्ठिता भूमिः, पुराणपाठ-स्थली, आचार्यस्य प्रतिष्ठाभूमिः, पतिव्रतावासः पवित्रार्चा निष्ठयो पितृ-पुत्रयोरावासभूमिरित्यादयः।[1] विचारमात्रेण कुरुक्षेत्रं फलदायि भवति।[2]

१. पद्म पु० २.३९,५६-६१।

२. कुरुक्षेत्रं गमिष्यामि कुरुक्षेत्रे वसाम्यहम्। अप्येकवाचमुत्सृज्य पुण्यं सर्वपापैः प्रमुच्यते॥ आर० ८१.१७६। मनसाप्यभिकामस्य कुरुक्षेत्रं युधिष्ठिर। पापानि विप्रणश्यन्ति ब्रह्मलोकं च गच्छति। आरण्यक० ८१.५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यथा पुराणेषु वर्णितं तीर्थानि त्रिलोकेऽसंख्यानि सन्ति ।[1] महाभारतानुसारेण तेषु पृथिव्यां नैमिषमन्तरिक्षे पुष्करं त्रिलोके च कुरुक्षेत्रं सर्वोत्तमम् ।[2]

नानाविधफललाभः

तीर्थयात्रायाः प्रासङ्गिकफलानि महत्त्वपूर्णानि रमणीयानि च सन्ति। तद्यथा महाभारतस्यारण्यकपर्वणि वर्णितम्--

(क) विष्णुस्थाने स्नानेन विष्णुलोकं गच्छति । ८१.९
(ख) कुरुक्षेत्रदर्शनेन ब्रह्मलोकं गच्छति । ८१.५
(ग) अश्विनोस्तीर्थमासाद्य रूपवानभिजायते । ८१.१४
(घ) मुञ्जवट एकरात्रिवासेन गाणपत्यं लभ्यते ८१.१८,१५४
(ङ) रामह्रदस्नानेनेप्सितं मनसः कामं प्राप्नोति । ८१.३१
(च) श्रीतीर्थं समासाद्योत्तमां श्रियं विन्दते । ८१.३७
(छ) सूर्यतीर्थस्नानेन सूर्यलोके गच्छति । ८१.३९
(ज) देव्यास्तीर्थस्नानेन रूपमुत्तमं लभते । ८१.४१
(झ) ब्रह्मावर्तस्नानेन ब्रह्मलोकं गच्छति । (८१.४३)
(ञ) कोशेश्वरतीर्थस्नानेन सर्वव्याधिविनिर्मुक्तो भवति । १.८६
(ट) मातृतीर्थस्नानेन प्रजा अनन्ता श्रीश्च लभ्यन्ते । ९१.४७
(ठ) किंदत्तकूपस्नानेन ऋणमुक्तिर्भवति । ८१.८३
(ड) कुलंपुनस्नानेन कुलं पुनाति । ८१.८८
(ढ) ब्रह्मस्थानतीर्थसेवनेन ब्राह्मणावरो ब्राह्मण्यं लभते । ८१.९५,१२०
(ण) सप्तसारस्वतस्नानेन किमपि दुर्लभं न भवति । ८१.११५
(त) सर्वदेवानां तीर्थे स्नानेन सर्वदुःखैः परित्यक्तो सदा शशिवद् द्योतते । ८१.१५१
(थ) कन्याश्रमे त्रिरात्रोपोषितः कन्याशतं लभते । ८१.१६०
(द) संनिहत्यां स्नात्वा पद्मवर्णेन यानेन ब्रह्मलोकं गच्छति । ८१.१६०
(ध) तीर्थयात्रा वस्तुतः पृथिवी-परिक्रमा भवति । ८०.२८,२९
(न) श्रद्धावतां स्वभक्तानामुत्सर्गे महत्यपि ।
नोपायान्तरमस्त्येव विनेशचरणोदकम् ।।
ये व्याधयोऽपि दुःसाध्या बहिरन्तःशरीरगाः ।
श्रद्धयेशोदकस्पर्शान्ते नश्यन्त्येव नान्यथा ।। काशीखण्डे ६९.८२,८३

१, तिस्रः कोट्यस्तु तीर्थानामित्यादि । आरण्यक ८१.१५३ ।
२. पृथिव्यां नैमिषमन्तरिक्षे च पुष्करम् । त्रयाणामपि लोकानां कुरुक्षेत्रं विशिष्यते । आरण्यक० ८१.१७३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(प) संगममाहात्म्यश्रवणेन जातिस्मरो भवति। आरण्यके ८३.८७।
न केवलं स्वीयमपितु पूर्वजानामपि सद्गतिस्तीर्थप्रभावेण जायते।

(फ) अयोध्या मथुरा माया काशी काञ्ची अवन्तिका।
पुरी द्वारवती चैव सप्तैता मोक्षदायिकाः।
अर्थात् तीर्थदर्शनमात्रेण तत्र मोक्षो भवति।

तासु वासं प्रकुर्वन्ति ये मृता वा नरा परम्।
लभन्ते न पुनर्जन्म मातृगर्भेषु कुत्रचित्। पाद्मे भूमिखण्डे।

(ब) कामदुधं तीर्थमिति गङ्गामध्यगतनौकायाः सीताया अधोविध-प्रार्थनया प्रकटति—

प्राप्तराज्ये नरव्याघ्रे शिवेन पुनरागते।
गवां शतसहस्रं च वस्त्रापन्नं च पेशलम्।
ब्राह्मणेभ्यः प्रदास्यामि तव प्रियचिकीर्षया॥ (अयो० ५२.८८)

अत्रानुबन्धनात्मकोपचारप्रकाशनमस्ति।[1]

न केवलं मनुष्या अपितु कीटाः पिपीलिकाः, मृगाः, पक्षिणश्च काश्यां मृता मनुष्ययोनौ जायन्ते। एवंभूतेऽपि नास्ति तीर्थयात्रा धार्मिककृत्येषु प्रथमस्थानीया। गार्हस्थ्यधर्म-निर्वहणानन्तरमेव तीर्थयात्रानुष्ठेयेति तत्त्व-दर्शिनां मतम्। तैः सम्यग्विवेचितं यज्जीवनस्य प्रमुखमुद्देश्यं तु ऋणत्रयाद्वि-मुक्तिरेव। एतदर्थं पञ्चमहायज्ञानां नित्यानुष्ठानं परमावश्यकम्। नैतच्छक्यं तीर्थयात्रिणाम्। अत एव विधानमस्ति—

यज्ञाधिकारेऽप्यथवा निवृत्ते विप्रस्तु तीर्थानि परिभ्रमेत्।
यस्येष्टियज्ञेष्वधिकारितास्ति वरं गृहं गृहधर्माश्च सर्वे॥
एवं गृहस्थाश्रम-संस्थितस्य तीर्थे गतिः पूर्वगतैर्निबद्धा।
सर्वाणि तीर्थान्यपि चाग्निहोत्रतुल्यानि नैवेति वयं वदामः॥
तीर्थकल्पतरौ ब्रह्मपुराणोद्धरणम्।

पूर्वोक्तं सर्वं संग्राह्य ससारं घोषिताः पर्यालोचनदृष्ट्या व्यष्टिशः समष्टिश्च तीर्थदर्शनस्य लाभाः काणेमहाभागेनाधोविधम्—Pilgrimages tend to level up all men by bringing them together to the same holy rivers or shrines. The traditions are associated with holy places, the discipline through which the pilgrims pass, association with holy and philosophic men and the whole atmosphere and environment at tIrthas makes it easy for pilgrims to remain at a

---

१. अनुबन्धस्तु भाषया मनौती, मन्नत वा।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

high spiritual level and inculcate in them a mood of reverence that lasts long even after they return from the pilgrimage supplies the much needed stimulus to draw ordinary men away from selfish pursuits and to make them think of the higher and more and more enduring spiritual values. Hist. of Dharm. Vol. IV p. 553

नैकतीर्थानां भूयो भूयः फलप्रदायं प्रशंसितम् । तथाहि —

अश्मना चरणौ हत्वा वसेत् काशीं न हि त्यजेत् । अग्नि०११२.३
अविमुक्तं यदागच्छेत् कदाचित् कालपर्ययात् ।
अश्मना चरणौ भित्त्वा तत्रैव निधनं व्रजेत् ।। मत्स्य०१८१.२३

तीर्थयात्राधिकारिणः

यजुर्वेदानुसारेण रुद्रगणास्तीर्थानि प्रचरन्ति ।[1] इतिहास-पुराणानुसारेण ब्रह्मादि देवा ऋषयश्च तीर्थस्थलीषु प्रचरन्ति वसन्ति यजन्ति च। महाभारतानुसारेण सर्वे वर्णास्तीर्थयात्रया शास्त्रविहितं लाभं प्राप्नुवन्ति। स्त्रीभ्योऽपि तीर्थानि तावत् पुण्यप्रदानि यावत् पुरुषेभ्यः ।[2] मत्स्यपुराणानुसारेण विवर्णाश्चाण्डाला वापि काशीपुण्यप्रभावेण सद्गतिं भजन्ते ।[3] चतुराश्रमिणश्चतुर्वर्णाश्च स्वस्व-नियमचर्यया सत्गतिं लभन्ते ।[4] तेषां कृतेऽपि तीर्थद्वाराणि माहात्म्य-निधानानि सन्ति । यस्य कस्यचित् पत्नी विद्येत स तु स्त्रीसहित एव तीर्थं गच्छेत् । अन्यथा स फलं न लभते । पद्मपुराणे ५९.३३ ।

ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा वा राजसत्तम ।
न वियोनिं प्रजायन्ते स्नातास्तीर्थे महात्मनः ।। आरण्यक० ८०.५१
नानावर्णा विवर्णाश्च चाण्डाला ये जुगुप्सिताः ।
किल्विषैः पूर्णदेहाश्च प्रकृष्टैः पातकैस्तथा ।।
भेषजं परमं तेषामविमुक्तं विदुर्बुधाः ।। मत्स्यपु० १८४.६६,६७

यद्यपि तीर्थानां सर्वेषामेवातिशयोक्त्या पापनिवारणदिशि भूयिष्ठा

---

१. 'रुद्रगणास्तीर्थानि प्रचरन्ति सृकहस्ता निषंगिणः' इति यजुर्वेदे १६.६१

२. जन्मप्रभृति यत्पापं स्त्रिया वा पुरुषेण वा ।
पुष्करे स्नातमात्रस्य सर्वमेव प्रणश्यति ।। आरण्यक० ८०.५४ ।

३. मत्स्यपु० १८४.६६,६७ ।

४. ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा ।कुलानि तारयेत् स्नातः सप्त च सप्त च ।
ब्राह्मणाः क्षत्रिया वैश्या शूद्रा ये वर्णसंकराः ।
तीर्थस्नाता भक्तियुता पश्यन्ति परमं पदम् ।। वामनपु० ३६.७८,७९ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

योग्यता निदर्शिता किन्तु स्थाने-स्थाने तीर्थयात्रिका लोकाः स्मारिता यन्मानसिकशुद्धिं विना तीर्थफलं शून्यमिवालभ्यं भवति। तथाहि—

यो लुब्धः पिशुनः क्रूरो दाम्भिको, विषयात्मकः।
सर्वतीर्थेष्वपि स्नातः पापो मलिन एव सः॥
जायन्ते च म्रियन्ते च जलेष्वेव जलौकसः।
न च गच्छन्ति ते स्वर्गमविशुद्धमनोमलः॥
दानमिज्या तपः शौचं तीर्थसेवा श्रुतं तथा।
सर्वाण्येतान्यतीर्थानि यदि भावो न निर्मलः॥

समर्थितमेतन्नारदपुराणे—

गङ्गादितीर्थेषु वसन्ति मत्स्या देवालये पक्षिगणा वसन्ति।
भावोज्झितास्ते न फलं लभन्ते तीर्थाच्च देवायतनाच्च मुख्यात्॥

स्कन्दपुराणानुसारेण फलावाप्तये श्रद्धाया अविनाभावोऽवेक्षितः। तथा हि—

अश्रद्दधानः पापात्मा नास्तिकोऽछिन्नसंशयः।
हेतुनिष्ठश्च पञ्चैते न तीर्थफलभागिनः॥

तीर्थयात्राधिकारः कस्येत्यस्मिन् विषये नैकमतानि सन्ति। तथा हि—

यज्ञाधिकारे च गते द्विजेन्द्रः सर्वस्वनाशे क्षितिपोऽथ वैश्यः।
शुश्रूषणायां बलवीर्यहीनः शूद्रस्तु तीर्थानि भजेत् सुदान्तः।
मुमुक्षुभिस्तीर्थगतिर्मुनीन्द्रैः कार्या तथा तत्फलकांक्षिभिश्च।

कीदृशानां तीर्थगतिर्निषिद्धेति।

नित्यं गृहस्थाश्रमसंस्थितस्य मनीषिभिस्तीर्थगतिर्निषिद्धा।
मातुः पितुर्भक्तिमना गृहस्थः सुतो न कुर्यात् खलु तीर्थयात्राम्[1]॥

तीर्थसज्जा (ऋषिचर्यम्)

प्राचीनयुगे प्राय ऋषय एव पर्यटनपरायणास्तीर्थयात्रिका बभूवुः। तेषां वेशादिकं चर्यां चानुगृह्य गार्हस्थ्यानन्तरं धार्मिकजनास्तीर्थदर्शनायोद्युञ्जन्ते। तद्यथा पद्मपुराणे निगदितम्—

विरागं जनयेत् पूर्वं कलत्रादिकुटुम्बके।
तत्र तीर्थादिषु स्नात्वा क्षौरं कुर्याद् विधानवित्॥
ततो दण्डं च निर्ग्रन्थिं कमण्डलुमथाजिनम्।
बिभृयाल्लोभनिर्मुक्तस्तीर्थवेशधरो नरः॥
विधिना गच्छतां नृणां फलावाप्तिर्विशेषतः।
तस्मात्सर्वप्रयत्नेन तीर्थयात्राविधिं चरेत्॥

---

१. अपरं च द्रष्टव्यमग्निपुराणे प्रथमाध्याये।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पादचारी गतिं कुर्यात् तीर्थं प्रति महोदयः ॥

पातालखण्डे १९.१९-२६

प्रायश्चित्ती च विधुरस्तथा यायावरो गृहे ।
प्रकुर्यात्तीर्थसंसेवां यश्चान्यस्तादृशो जनः ॥
सहाग्निर्वा सपत्नीको गच्छेत्तीर्थानि यत्नतः ।
सर्वपापविनिर्मुक्तो यथोक्तां गतिमाप्नुयात् ॥
ऋणानि त्रीण्यपाकुर्यात् कुर्वन् वा तीर्थसेवनम् ।
विधाय वृत्तिं पुत्राणां भार्यां तेषु निधाय च ॥

(कूर्मपुराणे २.४४.२०-२३)

यथा वानप्रस्थाश्रमो गृहाश्रमानन्तरमुचितस्तथैव तीर्थयात्रापि समाजं कुटुम्बं प्रति कृतकार्यस्यानुमोदिता ।

तीर्थानुशासनम्

न खलु कस्यापि पुरुषस्य जीवस्य वा भारभूतस्तीर्थयात्री प्रचरेदिति सर्वथावश्यकं मत्वा पद्भ्यामेव तीर्थयात्रां चरेदिति प्रथमानुशासनम्[1] । न खल्वेकं स्थानं तीर्थं भवति अपितु सचराचरं समग्रभारतमेव साकल्येन तीर्थमस्ति । तस्य पूर्णस्य पूर्णवासमात्मनि प्रतिष्ठापयितुं सर्वैर्ज्ञानेन्द्रियैः साक्षात् संयोगः पादचारिणामेव सम्भावनीय इति तत्त्वदर्शिभिर्दृष्टमासीत् स्थाने संस्तुतं चाभूत् ।

संयतः, कृतोपवासः कृतदेवपितृब्राह्मणार्चनः प्रतिष्ठेत । यात्रान्ते पुनर्देवार्चनं ब्राह्मणभोजनं च विहिते ।

तीर्थं व्रतं दानमिति त्रितयं सुसंगतम् । तीर्थेषु स्नानं तु प्रथमं व्रतम् । तीर्थस्थलस्य पञ्चतत्त्वेषु जलं तु साक्षात् पुनाति । स्नानानन्तरं देवदर्शनादिकं भवति । बहुषु तीर्थेषु विशिष्टव्रतानि विशेषफललाभाय निर्धारितानि सन्ति । तद्यथा महाभारत आरण्यकपर्वणि वर्णितम्—

पुष्करे विप्रभोजनम् ८०.४९-५० । पुष्करे स्मरणं ८०.५३ । तत्र तपः, वासः, दानम् एतत्सर्वं स्पृहणीयमेव ८०.५८,५९ । देविकातीर्थे चरुर्निवेद्यते ८०.११२ । आपगातीरे श्यामाकभोजनं देवपितृभ्यो दीयते ८१.५६ ।

महाभारतस्यानुशासनपर्वणि २६ तमेऽध्याये नैकतीर्थेषु निराहारोपवासोदकवृत्तिभिः पारलौकिकपरमगतिर्विशदं वर्णिता ।

मत्स्यपुराणानुसारेण प्रयागे कपिलागोदानं विशेषमर्हति । १०५.२२ ।

---

१. तीर्थानुसरणं पद्भ्यां तपः परमिहोच्यते । विष्णुधर्मोत्तरे ३.२७३.१२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तत्राधिकस्याधिकं फलमिति न्यायेन बहुमूल्यवस्तूनां महादानं स्वर्गं ददाति (१०५.१३,१४)। कतिपयतीर्थेषु विशिष्टकृत्यानि विहितानि। यथा—

प्रयागे वपनं कुर्याद्[1] गयायां पिण्डपातनम्।
दानं दद्यात् कुरुक्षेत्रे वाराणस्यां तनुं त्यजेत्॥

स्त्रीणामपि केशवपनं सर्वविधपापनिरसनायावश्यकमिति नैके धर्मशास्त्रकाराः प्रवदन्ति।

तीर्थवर्णनम्

तीर्थपूर्णं भारतम्। तस्योत्तमप्रदेशः कश्मीरः। हिमक्रोडे तत्र स्वस्थं रक्षितममरनाथतीर्थं शिवरूपं सुषमं मनोहरति शाश्वतं महात्मनाम्। तस्मादारभ्यते तीर्थवर्णनम्।

अमरनाथगुहा

भारतस्योत्तमाङ्गे कश्मीर-प्रदेशे निसर्गतः प्रतिष्ठापितममरनाथ[2] इति ख्यातं तीर्थं स्वामी विवेकानन्दो[3] निर्वर्ण्य पुलकितः सन्नात्मानुभूतिं व्याजहार—

I have enjoyed it so much I thought the ice-liṅgam was Shiva himself. I have never enjoyed any religious place so much. The Swami would afterwards tell of an overwhelming mystical experience which came to him in the cave. Shiva himself appeared before him and granted him the Boon of Amaranatha—the Lord of immortality—not to die until he himself should choose to throw off his mortal bonds. He would also talk of the poetry of the white ice-pillar.[4]

युवराजकर्णसिंहः श्रीनगरतोऽमरनाथमर्चितुं नैकपर्वतशृङ्गाधित्यकाः पारयन् शैत्यार्तिं सहमानो देवदर्शनेन जीवन-साफल्यं मन्यमानो वर्णयति—

The cave is of truly colossal dimensions. Its outer mouth must measure almost 40 yards across and it is about 75 foot high and at least 80 foot deep along its downward slope into the heart of

---

१. केशमूले पापानि प्रच्छन्नं वर्तन्त इति धारणा।

२. अमरेश्वर इति ख्यातमिदं तीर्थं नीलमतपुराणे १५३५ राजतरंगिण्यां १.२६७। आईन-अकबरी द्वितीयभागे पृ० ३६०। तत्र प्रतिमासं शुक्लपक्षे वर्धमानं कृष्णपक्षे क्षीयमाणं हिमलिङ्गं वर्णितम्।

३. अमरनाथस्योपासकेषु शङ्कराचार्यो रामतीर्थो विवेकानन्दश्च प्रमुखाः।

4. Sister Nivedita : Notes on Some Wanderings with the Swami Vivekananda.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

the monutain. Inside, an imposing ice-formation rises about five feet and ends in a glistening cave, the famed representation of the Lord Shiva. To the right is a block of pure white ice, about six foot high and three foot broad, which represents Ganesha while to the left is a smaller ice-formation regarded as the symbol of Shiva's wife, Pārvatī. The cave is one of the most sacred places in India. As I entered it, I suddenly had the curious feeling that I had been there before, and, certainly, the unusual atmosphere of the cave effects many people powerfully. I was overwhelmed as I entered its hallowed precincts.

Pilgrimage to Shree Amaranath Page 34, 35

तत्रामरनाथदर्शकानां कृतेऽनुशासनमस्ति यत्ते गुहाया वामतः परिस्रवन्तीममरावतीमुपस्पृश्य गुहाप्रवेशाधिकारिण भवन्ति । तदनन्तरं ते तटस्थमृत्तिकया स्वशरीरं लिम्पन्ति ।

अमरनाथपथे यात्रिकाणां महाश्रमप्राणसंशयास्पदं प्रयाणमस्त्येव किन्तु तेषामानन्दो महार्णव इव विभाति । तत्र शेषनागो ह्रदः, चतुर्दिशं पर्वतशिखरा येषां वर्णनं युवराजकर्णसिंहलेखिन्याध्योविधं मनो रमयति—

The scene is both calming and inspiring. Its sedate beauty soothes the mind restless from the cares and tribulations, the worries and sorrows of life, Its lofty peaks standing out against the deep, bluesky raise one's thoughts above the mundane into the pure realm of the spirit. One distinctly feels the presence of a power greater, stronger and purer than one's petty self. Pilgrimage to shree Amaranath pp. 23,24

हिंगलाजः

प्राचीनभारतेऽधुना पश्चिमपाकिस्तान-प्रदेशे तीर्थेऽस्मिन् सत्या ब्रह्मरन्ध्रपतनत्वात् शक्तिपीठं प्रतिष्ठितम्[1] । तत्र गुहायां जगज्जननी भगवती जानुकरैः परिसर्पेण दर्शनीया वर्तते । हिङ्गोलोपत्यकायां कराचीतः पारसदेशीयसामुद्रिक-प्रयाणयथे वर्तते—The last grcat place of Hindu pilgrimage towards the west.[2]

---

१. देवीभागवते स्कन्ध ७.१९ अध्यायतः ब्रह्मवैवर्तपुराणे कृष्णजन्मखण्डे ७६.२१ ।

2. Cambridge Hist. of India, Vol. I, p. 381

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कुरुक्षेत्रम्

महाभारते प्रमुखतीर्थेषु कुरुक्षेत्रं शीर्षण्यमेव। काणे महोदयस्तस्य प्राचीनगौरवगाथां प्रगायत्यधोविधम्—

In the remote past Kurukṣetra was the centre of all the culture of the Vedic people. Gradually the Vedic people spread towards the east and south and the countries between the Ganges and Yamuna and later on Videha (or Mithila) became the centre of Indian culture. (Hist. Dharma. Vol. V page 683,4)

महाभारते कुरुक्षेत्रं श्लाध्यतमं तीर्थमिति प्रतिष्ठितम्[1]। अत्रैव भारतीय-संस्कृतेः प्रशस्यं निधानं भगवद्गीता कृष्णेन प्रोक्ता। महाभारतानुसारेण—

पांसवोऽपि कुरुक्षेत्रे वायुना समुदीरिताः।
अपि दुष्कृतकर्माणं नयन्ति परमां गतिम् ॥ शल्यप० ५२.१८
पापेभ्यो विमुच्यन्ते तद्गताः सर्वजन्तवः।
कुरुक्षेत्रे गमिष्यामि कुरुक्षेत्रे वसाम्यहम्।
य एवं सततं ब्रूयात् सोऽपि पापैः प्रमुच्यते ॥

तत्र सरस्वत्यास्तीरे वासः पुण्यदायकः।

कुरुक्षेत्रे ब्रह्मादयो देवा ऋषयः सिद्धचारणा गन्धर्वाप्सरसो यक्षाः, पन्नगाश्च महापुण्यं ब्रह्मक्षेत्रमभिगच्छन्तिस्म।[2] कुरुक्षेत्रस्मरणेन ब्रह्मलोकलाभो निर्दर्शितः।[3]

कुरुनामको राजा स्वतपोभिः कुरुक्षेत्रमिदं पवित्रीचकार। आदिपर्व ८९.४३। मान्धाता तत्र यज्ञमनुष्ठितवान्। वैदिकसाहित्ये कुरुक्षेत्रं पावनत्वेन तीर्थगुणमण्डितमिति वर्णितम्।[4] ७५×७५ किलोमीटर-भूप्रदेशः कुरुक्षेत्र-

---

१. बहूनि नामानि तत्र सन्ति कुरुक्षेत्रस्य। यथा ब्रह्मसरः, रामह्रदः, समन्तपञ्चकम्, विनशनः, सन्निहतिश्च।

२. शल्यपर्वणि ५५.७। अनेन प्रमाण्यते यन्नैकतीर्थैर्भारतस्य नैकसंस्कृति-धारावगाहिनोऽनुस्यूता बभूवुः।

३. आरण्यकप० ८१.१५। अथ च न केवलं मानवा अपितु दैवादयोऽपि तीर्थसेवन-फललाभाय तपश्चरन्ति।

४. मैत्रायणीसंहिता २.१४;४.५ ९। शतपथे ४.१.५.१३; ११.५.१.४; १.४.१.१.२ ऐतरेय ब्राह्मणे ७.३०।
Kuruksetra is always regarded in the Brāhmaṇa texts as a particularly sacred country. Vedic Index Kurukṣetra.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मिति विख्यातं बहुभिस्तीर्थोपतीर्थैर्मण्डितम् । कतिपयतीर्थान्यधोविधानि तत्र सन्ति—

वनानि—काम्यकम्, अदितिवनम्, व्यासवनम्, फलकीवनम्, सूर्यवनम्, मधुवनम्, पुण्यशीतवनम् । एतानि सर्वाणि कल्मषनाशकमिति वामनपुराणे वर्णितम् ।

नद्यः—सरस्वती, वैतरणी, मधुस्रवा, कौशिकी, दृषद्वती, हिरण्यवती। एता महापुण्याः ।

सरोवराः—ब्रह्मसरः, ज्योतिःसरः, स्थानेसरः, कालेसरः ।

कूपाः—चन्द्रकूपः, विष्णुकूपः, रुद्रकूपः, देवीकूपः ।

सरोवरेषु ब्रह्मसरः प्राचीनतममन्येषां सरसां च मूलमिति मन्यते । अधुना सर इदं कुरुक्षेत्रे विलसतितमाम् । १४०० × ७०० मीटरायामे सरसि द्वीपद्वयं मन्दिरैर्वनोपवनैर्मण्डितम् । एतस्य निर्माता महाराजकुरुरिति वामनपुराणे प्रोक्तम्—

सुदर्शनस्य जननीं ह्रदं कृत्वा सुविस्तृतम् ।
तस्यास्तज्जलमासाद्य स्नात्वा प्रीतोऽभवन्नृपः ॥ २२.१४

सूर्यग्रहणावसरे तत्र स्नानेन महती विशुद्धिर्जायत इति धारणया लक्षशः श्रद्धालवस्तत्र स्नान्ति ।

सरस्वत्यास्तटे बहूनि तीर्थानि सन्ति । तेषु पृथूदकं श्रेष्ठम् । तत्र महाराजपृथुस्तपसा ब्रह्मसायुज्यमवाप । ब्रह्मयोनितीर्थे ब्रह्मा सृष्टिं प्रारभत । अत्रैव तपस्तप्त्वा विश्वामित्रादय ऋषयः सिद्धिं लभन्ते स्म । बृहस्पतितीर्थे देवगुरुबृहस्पतिर्यज्ञं सम्पादयामास । रामतीर्थे परशुरामो यज्ञेन माहात्म्यमवाप । विश्वामित्रतीर्थे पुरा विश्वामित्रो ब्राह्मणोचितसाधनामनुष्ठितवान् । वसिष्ठाश्रमस्तत्रैव प्रतिष्ठितः ।

स्नातानां शुचिभिस्तोयैर्गाङ्गेयैः प्रयतात्मनाम् ।
व्युष्टिर्भवति या पुंसां न सा क्रतुशतैरपि ॥ अनु० २७.३०

गङ्गा

रामायणे गङ्गा तीर्थमिति न संज्ञिता स्यात् किन्तु तस्यास्तीर्थगुणा ग्रन्थेऽस्मिन् सादरं वर्णिताः । तथाहि—

(१) सीता भागीरथीं सम्बोध्य प्रार्थयते—

ततस्त्वां देवि सुभगे क्षेमेण पुनरागता ।
यक्ष्ये प्रमुदिता गङ्गे सर्वकामसमृद्धिनी ॥ (अयो० ५२.८५)
अयोध्यां वनवासात्तु प्रविशत्वनघोऽनघे । (अयो० ५२.५१)

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(२) गङ्गायाः प्रियं कर्तुं दानम् । (अयो० ५२.८८)
(३) गङ्गा-सरयू-संगमः शुभः । (बाल० २३.५)
(४) गङ्गा पुण्यनदी । (२३.१६, २४.१०, बाल० ३५.७), शिवा (अयो० ५०.२९)
(५) मुनिसेविता गङ्गा । (बाल० ३५.७; अयो० ५०.१२)
(६) गङ्गा लोकपावनी ३५.१८, लोकनमस्कृता ३५.१२
विपापा बालकाण्डे ३५.२४ । व्यपेतमलसंघाता । अयो० ५०.२२ । अपापा पापनाशिनी (अयो० ५०.२४)

अत्र गङ्गायास्तीर्थत्वेन माहात्म्यं कल्पनीयम् ।[1] कलियुगे गङ्गा तु अनुत्तमं तीर्थमिति व्यासेनाधोविधं निगदितम् ।

सर्वं कृतयुगे पुण्यं त्रेतायां पुष्करं स्मृतम् ।
द्वापरेऽपि कुरुक्षेत्रं गङ्गा कलियुगे स्मृता । (आरण्यकपर्व ८५.८९)

अधमाधमानामपि सर्वपापप्रमोचनी गङ्गा वर्ण्यगुणसंहिता राजते । अन्यच्च महाभारते—

तपसा ब्रह्मचर्येण यज्ञैस्त्यागेन वा पुनः ।
गतिं न लभेज्जन्तुर्गङ्गां संसेव्य यां लभेत् ॥ २६
पूर्वे वयसि कर्माणि कृत्वा पापानि ये नराः ।
पश्चाद् गङ्गां निषेवन्ते तेऽपि यान्त्युत्तमां गतिम् ॥ २९
यावदस्थि मनुष्यस्य गङ्गातोयेषु तिष्ठति ।
तावद् वर्षसहस्राणि स्वर्गं प्राप्य महीयते ॥ ३१
त्रिषु लोकेषु ये केचित् प्राणिनः सर्व एव ते ।
तर्प्यमाणाः परां तृप्तिं यान्ति गङ्गाजलैः शुभैः ॥ ३६

अनु० २७ अध्यायतः

घोरानुष्ठानस्थाने गङ्गासेवनं विशेषप्रभविष्णुरिति कविना व्यासेनाधोविधं प्रतिपादितम्—

चान्द्रायणव्रत-सहस्रेण कायशोधनं न तावन्मात्रं भवति यावद् गङ्गाजलपानेन । युगसहस्रं पादेनैकेनावस्थानं न तावत् कायं शोधयति यावदुपगङ्गं

१. रामायणे गङ्गायास्तीर्थानि घट्टाः सन्ति यतो लोका नदीं पारयन्ति, यत्र तीरं समासाद्य स्नान्ति च । अन्यत्रापि तीर्थं नदीतीरमागन्तुं मार्ग एवाभिज्ञायते । तमसातटमागत्य ऋषयो रमणीयं जलं जुषन्ते स्म । तथाहि—वाल्मीकिर्वर्णयति—

अकर्दममिदं तीर्थं भरद्वाज निशामय ।
रमणीयं प्रसन्नाम्बु सन्मनुष्यमनो यथा ॥ बालका० ३२.६ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मासेकमुपस्थानम् । अमितकालिकमवाक्शिरोलम्बनं गङ्गावस्थानाद्धीनतरगुणमयम् । महाभारते गङ्गागुणान् भूयिष्ठं वर्णयित्वा श्रान्त इव कविः प्रवदति—

उदाहृतः सर्वथा ते गुणानां मयैकदेशः प्रसमीक्ष्य बुद्धया ।
शक्तिर्न मे काचिदिहास्ति वक्तुं गुणान् सर्वान् परिमातुं तथैव ।
अनु० २७.९६

स परिणामयति—

अभिगतजनवत्सला हि गङ्गा भजति युनक्ति सुखैश्च भक्तिमन्तम् ।
अनु० २७.१०० ।

तत्र किं स्यादतः परम्—

ते देशास्ते जनपदास्त आश्रमास्ते च पर्वताः ।
येषां भागीरथी गङ्गा मध्येनैति सरिद्वरा ।। अनु० २७.२५

गीतायां कृष्णो गङ्गामुन्नमयति—स्रोतसामस्मि जाह्नवीति । १०.३१

महाभारते गङ्गाद्वारं गङ्गा-महाद्वारं यमुना-संगमो गङ्गाह्रदो गङ्गोदश्च तीर्थानि वर्णितानि । रामायणे गङ्गा पाप-विनाशिनीति नैकशः प्रोक्तम् । सा सर्वलोकनमस्कृतास्ति । सा मृतान् स्वर्गं लम्भयति ।

परवर्तिपौराणिकसाहित्ये गङ्गायास्तैर्थिकगुणा भूरिशः प्रकीर्तिताः । तथाहि भविष्यपुराणे सा—त्रैलोक्यनमिता, देवादिभिः स्तुता, दिव्यरूपविभूषिता दिव्यमाल्यानुलेपना, त्रिदेवरूपा चास्ति । गङ्गामहात्म्यस्य पठनमात्रेण श्रवणेन वासंख्यपापेभ्यो मुच्यते । गङ्गास्मरणेन बन्धनान्मुच्यते । अथ च रम्यभवनानि, विचित्राभरणाः स्त्रियः, स्वास्थ्यं, वित्तसम्पत्तिश्च लभ्यन्ते । किं बहुना—

दृष्ट्वा तु हरते पापं स्पृष्ट्वा तु त्रिदिवं नयेत् ।
प्रसङ्गेनापि या गङ्गा मोक्षदात्ववगाहिता ।

भविष्यपुराणं तु गङ्गां सविशेषमुत्तालयति—

यत्फलं जायते पुंसां दर्शनात् परमात्मनः ।
तद् भवेदेव गङ्गाया दर्शनेन भक्तिभावतः ।।

अन्यानि पुराणानि गङ्गाप्रशस्तौ मन्दानि न सन्ति । ब्रह्माण्डानुसारेण शिवा गङ्गा स्नातस्य लक्षं कुलं भवात्तारयति । अन्धाः पतिता वा देववत् शुभ्रायन्ते स्नानेन । गङ्गास्नानकामोऽश्वमेधफलं लभते पदे पदे ।

नैकपुण्ययोगेषु गङ्गापूजनादिको महोत्सवः सविशेषं लोकसम्मेलनमावहति । तथाहि काश्यां गङ्गावतार-दिवसे ज्येष्ठशुक्लदशम्यां दज्ञपापहरा (दशहरा) जाह्नवीव्रतपूजाविधानम् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पुराणेषु गङ्गा महिष्ठेति प्रकर्तिता । तथाहि कूर्मपुराणे

तत्राभिषेकं यः कुर्यात् संगमे शंसितव्रतः ।
तुल्यं फलमवाप्नोति राजसूयाश्वमेधयोः ।। पूर्वा० ३७.१३
तीर्थानां परमं तीर्थं नदीनां परमा नदी ।
मोक्षदा सर्वभूतानां पापोपहृत चेतसाम् ।। ३७.३३

गङ्गापूजाफलं प्राग्भावं भजते । ब्रह्माण्डपुराणानुसारेण—

गङ्गायां पूजितायां तु पूजिताः सर्वदेवताः ।
तस्मात् सर्वप्रयत्नेन पूजयेदमरापगाम् ।।
यज्ञो दानं तपो जप्यं श्राद्धं च सुरपूजनम् ।
गङ्गायां यत्कृतं सर्वं कोटिकोटिगुणं भवेत् ।।

गङ्गाजलपानफलं पुण्यवृद्धिमश्वमेधवत् करोतीति भविष्यपुराणे प्रकीर्तितम्—

गण्डूषमात्रपानेनाश्वमेधफलं लभेत ।
स्वच्छन्दं यः पिबेतापस्तस्य मुक्तिः करे स्थिता ।

उपगङ्गं मरणेन तत्रास्थिक्षेपेण महापुण्यफलं लभ्यम् । तत्र गङ्गावगाहनानुशासनं त्रयोदशवर्जनेन प्रवर्तते—

शौचमाचमनं सेकं निर्माल्यं मलघर्षणम् ।
गात्रसंवाहनं क्रीडा प्रतिग्रहमथो रतिम् ।।
अन्यतीर्थरतिश्चैव अन्यतीर्थप्रशंसनम् ।
वस्त्रत्यागमथाघातं सन्तारश्च विशेषतः ।।

गङ्गामाहात्म्यं महाभारते संग्रहेण प्रकीर्तितम्—

न गङ्गासदृशं तीर्थं न देवः केशवात् परः ।

स्कन्दपुराणस्य काशीखण्डे गङ्गाया नामाभिधानेन पुण्यं भवतीति व्याख्यातम्—

तन्नामसहस्रं जपनीयं प्रयत्नेन मौनिना वाचकं विना ।
शुचिस्थानेषु शुचिना सुस्पष्टाक्षरमेव च[1] ।

पुष्करम्

महाभारते तीर्थगुरुरिति[2] ख्यातं पुष्करतीर्थं सविशेषं महत्त्वं भजते । तथाहि—

नृलोके देवदेवस्य तीर्थं त्रैलोक्यविश्रुतम् ।
पुष्करं नाम विख्यातं महाभाग समाविशेत् ।।

---

१. अत्र प्रथमश्लोको विलसति स्वरक्रमेणाधोविधमकारात्—
ओंकाररूपिण्यजरातुलानन्तामृतसवा । अत्युदाराभयाशोकालकनन्दामृतामला ।।

२. तथैव पुष्करं राजन् तीर्थानामादिरुच्यते । महाभारते आरण्यकपर्वणि ८०.५५ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दशकोटिसहस्राणि तीर्थानां वै महीपते ।
सान्निध्यं पुष्करे येषां त्रिसन्ध्यं कुरुनन्दन ।।
आदित्या वसवो रुद्राः साध्याश्च समरुद्गणाः ।
गन्धर्वा अप्सरसश्चैव नित्यं संनिहिता विभो ।।
यत्र देवास्तपस्तप्त्वा दैत्या ब्रह्मर्षयस्तथा ।
दिव्ययोगा महाराज पुण्येन महतान्विताः ।।
जन्मप्रभृति यत्पापं स्त्रियो वा पुरुषस्य वा ।
पुष्करे स्नातमात्रस्य सर्वमेव प्रणश्यति ।।
यथा सुराणां सर्वेषामादिस्तु मधुसूदन ।
तथैव पुष्करं राजंस्तीर्थानामादिरुच्यते ।।

आरण्यके ८०.४९-५५

पुष्करे ब्रह्मणः सावित्र्याः, बदरीनारायणस्य, वराहस्य च मन्दिराणि प्रसिद्धानि । तत्र पितामहसरोवर-समीपं वैखानसानां सिद्धानामृषीणामाश्रमः प्रतिष्ठितः । (आर० ८७.१३-१५) स्वयं ब्रह्मात्र यज्ञमनुष्ठितवान् ।

शान्तिपर्वणि पुष्करसवनस्य विशेषानुशासनमधोविधं वर्णितम्—

दानं त्यागः शोभना मूर्तिरद्भ्यो भूयः प्लाव्यं तपसा वै शरीरम् ।
सरस्वतीनैमिषपुष्करेषु ये चाप्यन्ये पुण्यदेशा पृथिव्याम् ।। (२८६.३७)

नैमिषारण्यम्

नैमिषारण्ये कुलपतिः शौनको द्वादशवार्षिकसत्रमनुष्ठितवान् । तीर्थमिदं महाभारतेऽधोविधं वर्णितम्—

ततश्च नैमिषं गच्छेत् पुण्यं सिद्धनिषेवितम् ।
तन्न नित्यं निवसति ब्रह्मा देवगणैर्वृतः ।।
नैमिषं प्रार्थयानस्य पापस्यार्धं प्रणश्यति ।
प्रविष्टमात्रस्तु नरः सर्वपापैः प्रमुच्यते ।।
तत्र मासं वसेद् धीरो नैमिषे तीर्थतत्परः ।
पृथिव्यां यानि तीर्थानि नैमिषे तानि भारत ।।
अभिषेककृतस्तत्र नियतो नियताशनः ।
गवामयस्य यज्ञस्य फलं प्राप्नोति भारत ।।
पुनात्यासप्तमं चैव कुलं भरतसत्तम ।
यस्त्यजेन्नैमिषे प्राणानुपवासपरायणः[1] ।।

---

१. यथा जैनधर्मे सल्लेखनया मृत्युः प्रकाम्यते तथैव वैदिकधर्मेऽपि मूलतः स्वेच्छया नैकविधा जीवनान्तप्रक्रिया संस्तुता ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स मोदेत् स्वर्गलोकस्य एवमाहुर्मनीषिणः ।
नित्यं पुण्यं च मेध्यं च नैमिषं नृपसत्तम ॥
आर० ८२.५३-५७

नैमिषे नैकतीर्थानि प्रसिद्धानि । यथा गोमती
'यत्र सा गोमती पुण्या रम्या देवर्षिसेविता ।
तत्र देवान् पितॄन् विप्रांस्तर्पयित्वा पुनः पुनः ।
कन्यातीर्थेऽश्वतीर्थे च गवां तीर्थे च कौरवाः ॥
वालकोट्यां वृषप्रस्थे गिरावुष्य च पाण्डवाः ।
बाहुदायां महीपाल चक्रुः सर्वेऽभिषेचनम् ॥ (आर० ९३.४)
नैमिषारण्यपरिसरे चक्रतीर्थं, भूतनाथमन्दिरं च महत्त्वपूर्णम् । अस्य परिक्रमा-परिधौ नैकदेवर्षिमहात्मनां स्मारकाः शोभन्ते ।

हरिद्वारम्

महाभारते हरिद्वारं वर्णितमधोविधम्—
स्वर्गद्वारेण यत्तुल्यं गङ्गाद्वारं न संशयः ।
तत्राभिषेकं कुर्वीत कोटितीर्थे समाहितः ॥
पुण्डरीकमवाप्नोति कुलं चैव समुद्धरेत् ।
सप्तगङ्गे त्रिगङ्गे च शक्रावर्ते च तर्पयन् ॥
देवान् पितॄंश्च विधिवत् पुण्यलोके महीयते ।
ततः कनखले स्नात्वा त्रिरात्रोपोषितो नरः ॥
अश्वमेधमवाप्नोति स्वर्गलोकं च गच्छति ॥ आर० ८२.२३-२६

पद्मपुराणानुसारेण न केवलं मानवा अपितु इन्द्रादयो देवा अपि हरिद्वारे गङ्गास्नानं कुर्वन्ति । तथाहि—
सवासवाः सुराः सर्वे गङ्गाद्वारं मनोरमम् ।
समागत्य प्रकुर्वन्ति स्नानदानादिकं मुने ॥
दैवयोगान्मुने तत्र ये त्यजन्ति कलेवरम् ।
मनुष्यपक्षिकीटाद्यास्ते लभन्ते परं पदम् ॥
(क्रियायोगसारे तृतीयाध्यायतः)
प्रतिद्वादशवर्षं हरिद्वारे महाकुम्भोत्सवः प्रतिषष्ठं वर्षम् अर्धकुम्भोत्सवश्चाखिल-भारतीयश्रद्धालूनां महात्मनां च समागमेन सम्पद्येते । हरिद्वारस्योपतीर्थानि सन्ति ब्रह्मकुण्डः (हरि की पैड़ी), गोघट्टः, कुशावर्तघट्टः, श्रवणनाथमन्दिरं, रामघट्टः, विष्णुघट्टः, मायादेवी, गणेशघट्टः, नारायणी-शिला, नीलधारा, कालीमन्दिरं, चण्डीदेवी, अञ्जनी, गौरीशंकरौ, विल्वकेश्वरः, कनखलः,

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सीताकुण्डः, कपिलस्थानं, भीमगोडा, चतुर्विंशावताराः, सप्तधाराः, सत्य-नारायण-मन्दिरं, वीरभद्रेश्वरः, ऋषिकेशश्च ।

तीर्थोत्तमानि

यद्यपि ऋग्वेदे गङ्गायमुनयोः संगमो महातीर्थमिव विलसति तथापि तस्य लोकव्यवहारमान्यता महाभारतयुगात् प्रगुणीभवति । आधुनिकयुगे मध्ययुगेऽपि प्रयागस्य महिमा राजत इति निःसन्दिग्धमेव । वस्तुतः प्रयागः, काशी, गया च तीर्थोत्तमानीति गणना बभूव ।[1] तथा हि—

ततः पुण्यतमं नास्ति त्रिषु लोकेषु भारत ।
प्रयागः सर्वतीर्थेभ्यः प्रभवत्यधिकं विभो[2] । (आर० ८३.७४)

प्रयागः

कूर्मपुराणानुसारेण युधिष्ठिरो युद्धकृतहिंसा-पातकादात्मानं विमोचयितुं मार्कण्डेयेन प्रबोधितः —

'प्रयागगमनं श्रेष्ठं नराणां पापनाशनम् ।'
तत्र देवो महादेवो रुद्रोऽवात्सीन्नरेश्वर ।
समास्ते भगवान् ब्रह्मा स्वयंभूः सहदैवतैः ।। पूर्वा० ३६.१५–१६
यैः प्रयागे कृतो वास उत्तीर्णो भवसागरः ।। कूर्म० पूर्वा० ३६.३२

ऋग्वेदस्य १०.७५ खिलसूक्ते गङ्गायमुनयोः संगमो वर्णितोऽधोविधं सम्यक् तीर्थत्वेन ।

सितासिते सरिते यत्र संगथे तत्राप्लुतासो दिवमुत्पतन्ति ।
ये वै तन्वं वि सृजन्ति धीरास्ते जनासो अमृतत्वं भजन्ते ।।

अर्थात् संगमे स्नानेन स्वर्गं गच्छति । तत्र शरीरत्यागेन मोक्षलाभः सम्भवति ।

प्रयाग इति [illegible]मात्र ब्रह्मणो यागस्य प्रगतत्वाद्धरिहरादिदेवैः कृतम् । तीर्थेषु यज्ञानां वि शेषत्वात् प्रयागस्तीर्थराज इति प्रसिद्धोऽभवत् । प्रयागस्तु प्रजापतेर्ब्रह्मणः क्षे [illegible]म् । तस्य विशेषाः संक्षेपेण वर्णिताः —

कुरुक्षेत्रसमा गङ्गा यत्र कुत्रावगाहिता ।
तस्माद्दशगुणा विन्ध्ये काश्यां शतगुणा ततः ।।
काश्याः शतगुणा प्रोक्ता गङ्गा यमुनयान्विता ।
सहस्रगुणिता सापि माघे पश्चिमवाहिनी ।।

---

१. एते त्रिस्थलीति विश्रुताः । षोडशशताब्दे नारायणभट्टः त्रिस्थलीसेतुनामके ग्रन्थ एतेषां माहात्म्यं विशदीचकार ।

२. प्रकृष्टो याग इति प्रयागः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

काश्याः शतगुणा प्रोक्ता गङ्गा यमुनयान्विता ।
सहस्रगुणिता सापि माघे पश्चिमवाहिनी ॥

महर्षिव्यासो तदेव समर्थयन् प्राबोधयत्—

यमुना गङ्गाया सार्धं संगता लोकपावनी ।
दशतीर्थसहस्राणि षष्टि-कोटचस्तथा पराः ।
समागच्छन्ति माघ्यां तु प्रयागे भरतर्षभ ।

तत्र देवत्रयाधिष्ठानं तु प्ररोचितम्—

उत्तरेण प्रतिष्ठानात् छद्मना ब्रह्म तिष्ठति ।
वेणीमाधवरूपी तु भगवांस्तत्र तिष्ठति ।
माहेश्वरो वटो भूत्वा तिष्ठते परमेश्वरः । (मत्स्य० ३.४-१०)

अक्षयवटमण्डिते प्रयागे प्रति द्वादशसंवत्सरं महाकुम्भोत्सवः प्रवर्तमानो विराजते । तत्र संगमितं समग्रं भारतं पवित्रीकृतमेव महात्मनां शाश्वत-वचनामृतपानेन । कुम्भस्तु पुराणप्रसिद्धोऽमृतघट एव । कथमयमजायेतेति ऋग्वेदे दर्शितम्—

उपह्वरे गिरीणां संगमे च नदीनाम् । धिया विप्रोऽजायत ।

तर्हि अजस्रपूर्णोऽयं महर्षिवचनामृतकुम्भो लोकैः पेपीयमानो विश्वं धारयति । प्रयागपरिसरे बहूनि तीर्थानि वर्तन्ते । तेषु प्रमुखाणि सन्ति—

त्रिवेणीमाधवं सोमं भरद्वाजं च वासुकिम् ।
वन्देऽक्षयवटं शेषम् प्रयागं तीर्थनायकम् ॥

प्रतीकद्वारेण त्रिवेणीसंगमे ओङ्कार इति प्रकल्पितम् ।[1] यथा काश्यां तथैव प्रयागे स्वेच्छामरणं मोक्षप्रदमिति पौराणिकानां मतं नैराश्योद्भवं प्रतिभाति ।[2] संगमस्य महादानक्षेत्रे हर्षः प्रतिपञ्चवर्षे सर्वस्वदानमकरोत् ।

काशी

विश्वविश्रुता काशी तीर्थदृष्टया भारतस्य प्राचीनतमा नगरी प्रतिभाति ।

---

१. ओमित्येकाक्षरं ब्रह्म परब्रह्माभिधायकम् ।
तदेव वेणी विज्ञेया सर्वसौख्यप्रदायिनी ।
अकारः शारदा प्रोक्ता प्रद्युम्नस्तत्र जायते ।
ऊकारो यमुना प्रोक्ता निरुद्धस्तज्जलात्मकः ।
मकारो जाह्नवी गङ्गा तत्र संकर्षणो हरिः ।
एवं त्रिवेणी विख्याता वेदबीजं प्रकीर्तिता ॥

२. प्रयागस्य संगमस्थले जलसमाधिनाक्षयवटात्ततनेन वा स्वेच्छामृत्युः संस्तुतः ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वैदिकयुगेऽपि सा प्रतिष्ठिताभूदिति तत्रोल्लेखैर्ज्ञायते[1]।

कुत्रापि तदानीन्तनसन्दर्भेषु काश्यास्तीर्थत्वं न संकेतितम्। वस्तुत आर्यसंस्कृतौ तीर्थदर्शन-स्नानसेवनादिभिः पापप्रक्षालनाय पुण्याय वा भवतीति महाभारतयुगात् प्राक् स्पष्टमनुल्लिखितमेव[2]।

आनन्दकाननमिति काश्या नाम शिवमुखेन व्याख्यातमधोविधम्—

यथा प्रियतमा देवि मम त्वं सर्वसुन्दरि।
तथा प्रियतरं चैतन्मे सदानन्दकाननम्॥ स्कन्द० काशी० ३२.१११

महाविभूतिः काश्या योगपीठस्य महाश्मशानस्य। अत्रैव त्रेतायुगे नियुक्तो हरिश्चन्द्रो द्वादशवर्षाणि यावत् श्मशानाधिपस्य शिवस्य सान्निध्यमधिगतः। तस्य सत्यव्रतपालनं कर्तव्यानुशासनं च हरिश्चन्द्रघट्टं शाश्वतं पुनाति। काश्याः पुण्यात्मकप्रभावः संक्षेपेणाधोविधः —

जन्मान्तरसहस्रेण यत्पापं पूर्वसंचितम्।
अविमुक्तं प्रविष्टस्य तत्सर्वं व्रजति क्षयम्॥ मत्स्य० १८१.१७

काश्यां पदे पदे महादेवपूजास्थानानि विलसन्ति—

तीर्थानि सन्ति भूयांसि काश्यामत्र पदे पदे।
क्वचित् तिलान्तरापि नो काश्यां भूर्मिलिङ्गं विना क्वचित्॥

पौराणिकं तत्त्वदर्शनमस्ति काशिवासिनां कृते—

असारे खलु संसारे सारमेतच्चतुष्टयम्।
काश्यां वासः सतां संगो गङ्गाम्भः शम्भुसेवनम्॥

श्रीहर्षेण सम्मोदिता पुरावाक् श्लोकयुग्मेन—

वाराणसी निविशते न वसुन्धरायां तत्र स्थितिर्मखभुजां भुवने निवासः।
तत्तीर्थमुक्तवपुषामत एव मुक्तिः स्वर्गात् परं पदमुदेतु मुदे तु कीदृक्॥
निर्विश्य निर्विरति काशिनिवासिभोगान् निर्माय नर्म च मिथो मिथुनं यथेच्छम्।
गौरीगिरीशघटनाधिकमेकभावं शर्मोर्मि-कञ्चुकितमञ्चति पञ्चतायाम्॥
[नैषधीयच० ११.११६,११८]

---

१. आदत्त यज्ञं काशीनां भरतः सत्त्ववतामिवेति। शतपथ १३.५.४.२१। काशी-कौशल्येषु गोपथे पूर्वभागे २.९। स ह उवाचाजातशत्रुं काश्यं ब्रह्म ते ब्रवाणीति बृहदारण्यक उप० २.१.१।

२. महाभाष्य में तीर्थ केवल एक बार आया है और वह भी गुरुकुल के अर्थ में। प्रभुदयाल अग्निहोत्री—पतञ्जलिकालीनभारत पृ० ७५। प्राचीनोपनिषत्सु तीर्थं नाम नास्ति।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पद्मपुराणानुसारेण--

भाग्यैर्मेऽधिगता ह्यनेकजनुषां सर्वाघविध्वंसिनी
सर्वाश्चर्यमयी मया शिवपुरी संसारसिन्धोस्तरी ।
लब्धं तज्जनुषः फलं कुलमलंचक्रे पवित्रीकृतः
स्वात्मा चाप्यखिलं कृतं किमपरं सर्वोपरिष्टात् स्थितम् ॥

तद्यथा म० म० गोपीनाथकविराजेन लक्षितम्—'ब्रह्मविद्याया अनुशीलनमत्रैवानन्दकानने सम्यगभूत् । जीवानां प्राणप्रयाणोत्सवे दक्षिणकर्णे तारकब्रह्ममन्त्रं ददतो भगवतो शशिशेखरस्य कृपाकणिकोपलिप्सया शरणंगतैर्मुमुक्षुभिरियमेव मोक्षनगरी क्षेत्रत्यागविधित्सुभिराश्रीयते स्म ।'

पुरा बुद्ध इव मध्ययुगे शंकराचार्य-रामानुजतुलसीदासादय आधुनिकयुगे श्रीकृष्णचैतन्यो वल्लभाचार्यश्चात्र धर्मप्रचारमकुरुताम् । तथा कबीरदासो रविदासो रामानन्दादयश्च प्रबभूवुः । पुरातनविश्वनाथमन्दिरं सप्तदशख्रीष्टशताब्दे औरंगजेबस्य शासनाधिकारैर्मस्जिदरूपे विवर्तितमद्यापि अष्टादशशतकस्यान्तिमचरणे अहल्याबाईकृतस्य विश्वनाथमन्दिरस्य सविधे तिष्ठति । अपराणि मन्दिराणि द्विसहस्रप्रायाणि विराजन्ते । काश्यां तीर्थपञ्चकं विशेषमहत्त्वं भजते । दशाश्वमेधः[1], लोलार्कः, केशवो बिन्दुमाधवो मणिकर्णिका च । काश्याः पञ्चक्रोशीप्रदक्षिणा मणिकर्णिकाघट्टतः प्रारभ्यते, तत्रैव पञ्चदिवसयात्रानन्तरं समाप्यते च । मार्गे खाण्डव-धूपचण्डी-रामेश्वर-शिवपुर-कपिलधारासु परिक्रमापथिक एकैकरात्रिकविश्रामं विधत्ते । काश्यां गंगातटीयघट्टानां विपुलशोभा वर्तते । प्रसिद्धघट्टाः' सन्ति—वरुणा-संगमघट्टः त्रिलोचनघट्टः, गोघट्टः, ब्रह्मघट्टः पञ्चगंगाघट्टः, संकटाघट्टः, मणिकर्णिकाघट्टः, दशाश्वमेधाहल्याबाईघट्टः, मानमन्दिरघट्टः, केदारघट्टः, हरिश्चन्द्रघट्टः, तुलसीघट्टः, असिसंगमघट्टश्च ।

काश्यां मन्दिराणि कुण्डाश्च बहवो विलसन्ति । सर्वप्रथमं स्थ विश्वनाथमन्दिरं भजते । ज्योतिर्लिङ्गविशिष्टो विश्वनाथः काश्या राजराजेश्वरः । मन्दिरं परितो मन्दिरमाला वर्तते । अस्य राज्यस्य धर्मोन्नायकाः शासनतन्त्रधारकाः सन्ति—हरेश्वरः, ब्रह्मेश्वरः, भैरवः, तारकेश्वरः, दण्डपाणिः, वीरेश्वरः, ढुण्ढिराजश्च । ज्ञानवापी, अक्षयवटः, अन्नपूर्णा, काशीकरपत्रं, पिशाचमोचनः, धूपचण्डी, कपालमोचनः, वटुकभैरवः, तिलभाण्डेश्वर इति नामधेयानि नैकपुण्यस्थलानि दर्शकानां कृते भारतीयपौराणिकवृत्तं स्मारयन्ति पुण्यनिधिं वितरन्ति च ।

१. ब्रह्मात्र दशाश्वमेधयज्ञानकारयत् । स्कन्द० काशी० ५२.६६-६८ ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

काश्यां जैनतीर्थंकरस्य पार्श्वनाथस्य सप्तमतीर्थङ्करस्य सुपार्श्वनाथस्य जन्मभूमिस्तीर्थभूता पूजास्थानमिति प्रतिष्ठिता। उपकाशीं सारनाथ-परिसरे श्रेयांसनाथस्यैकादशतीर्थंकरस्य जीवनगाथा प्रावर्तत।

काशीवासिनां कृते चर्या निर्धारितास्ति यत्ते सम्यक् पापरहिताश्चरेयुर्यतो हि स्वल्पमपि पापमत्र घोरदण्डकारकं भवति। व्यासस्योदाहरणं तत्र वर्तते।[1] तस्य मानसं विज्ञाय गृहस्थरूपधरः शिवस्तस्मै सुस्वादुभोजनं समर्प्यादिशत्—क्रोधवशोऽसि। मा प्रविश कदापि काशीमष्टमीं चतुर्दशीं च तिथिं विहाय। अनेन सन्दर्भेण काशीवासानुशासनं प्रतीयात्। अन्यच्च—

यात्राद्वयं प्रयत्नेन कर्तव्यं प्रतिवासरम्।
एका स्वर्गतरंगिण्यास्ततो विश्वेशितुः परा॥
तथापि सेव्यो विश्वेशः स्नातव्या मणिकर्णिका॥
(काशी खण्डे १००-१०१)

अत्रैव कृष्णः पाशुपतव्रतं धारयन् महादेवस्य वरं लेभे—

येऽर्चयिष्यन्ति गोविन्दं मद्भक्ता विधिपूर्वकम्।
तेषां तदैश्वरं ज्ञानमुत्पत्स्यति जगन्मयम्।
त्वमीशोऽर्चयितव्यश्च ध्यातव्यो मत्परैर्जनैः।
भविष्यसि न सन्देहोमत्प्रसादाद् द्विजातिभिः॥ पूर्वार्धे ३४.२४,२५

काशीखण्डे गौतमबुद्धस्य विष्णोरवताररूपेण सारनाथे प्रतिष्ठा वर्णिता।[2] अनेन काश्या धार्मिकसहभावः प्रकटति। अतः परं किं प्रवचनीयं यत्—

अन्यानि मुक्तिक्षेत्राणि काशिप्राप्तिकराणि च।
काशीं प्राप्य विमुच्येत नान्यथा तीर्थकोटिभिः॥

मदनमोहनमालवीयेन ब्रह्मर्षिणात्र यो हिन्दू-विश्वविद्यालयः स्थापितः, स सर्वविद्याराजधानी प्रामुख्येण भारतीयां संस्कृतिमुन्नेतुं प्रभवति।

विन्ध्यवासिनी

नन्दगोपगृहे जाता यशोदागर्भसम्भवा।
ततस्तौ नाशयिष्यामि विन्ध्यालनिवासिनी॥ मार्कण्डेय० ११.४२

---

१. महायोगी व्यासः काश्यां भिक्षमाणः किंचिद् भोजनं नावाप। अत एव स चुक्रोध शापोद्यतः—

तीर्थं चातीर्थतां यातु नगरं शापयाम्यहं मा भूत त्रिपौरूषी विद्या मा भूत् त्रिपौरूषं धनम्। मा भूत् त्रिपौरुषं सख्यं व्यासो वाराणसीं शपन्॥ मत्स्य पु० १८५.२१-२२। कूर्मपुराणे च पूर्वा० ३५.२२-२९

२. काशी खण्डे ४.५८, ७१, ७२।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मीरजापुर इति ख्यातस्य नगरस्य समीपे गङ्गातटे मन्दिरत्रये विन्ध्यवासिनी (कौशिकी देवी), महाकाली, अष्टभुजा च प्रतिष्ठिताः सन्ति। देव्याः १०८ शक्तिपीठेषु विन्ध्यवासिनी अन्यतमा। महाकाली चामुण्डादेवीति ख्याता। कालीखोह-स्थाने पर्वतप्रस्थे सा राजते। ततः परं क्रोशमात्रदूरमष्टभुजामन्दिरं वर्तते। महाभारतानुसारेण सिद्धिप्रदेयं तपोभूमिः।

अयोध्या

मनुना मानवेन्द्रेण या पुरी निर्मिता स्वयम्। वाल्मीकिः

स्कन्दपुराणानुसारेण सुदर्शनचक्रे धृतेयं नगरी अकारो ब्रह्मा, यकारो विष्णुः, धकारः शिवश्चेति प्रतीकयति[1]। कथं नामायोध्येति—

सर्वोपपातकैर्युक्तैर्ब्रह्महत्यादिपातकैः—

नैं योध्या शक्यते यस्मात्तस्मात्तामयोध्यां ततो विदुः। स्कन्द० वैष्णव, अयो० १.६१।

तत्र ब्रह्मणा कृतौ ब्रह्मकुण्डः सीताकुण्डश्च पुण्यप्रदौ। सीताकुण्डः कामपूरकः।[2]

अन्यच्च स्वर्गद्वारं सहस्रधारातः ६३६ हस्तायामं, यत्र—

जप्तं दत्तं हुतं दृष्टं तपस्तप्तं कृतं च यत्।
ध्यानमध्ययनं सर्वं दानं भवति चाक्षयम्॥ स्कन्द० वै० अयो० ३.४

अयोध्यातः पश्चिमदिशि सरयूतटवर्तिगोप्रतारतीर्थं, यत्र स्नानेन—

विशत्यसौ परं स्थानं योगिनामपि दुर्लभम्।

प्रकरणेऽस्मिन् तीर्थानां मानुषत्वं प्रकल्पितमधोविधं गोप्रतारविषये—

यत्र प्रयागराजोऽपि स्नातुमायातिकार्तिके
शुद्धचर्थं साधुकामोऽसौ प्रयागे मुनिसत्तम॥

सप्तपुरीषु प्रथमस्थानीया रामस्यावतारभूमिरियमयोध्या त्रेतायुगे सत्यहरिश्चन्द्रस्य महोदयं दृष्टवती। नैकेक्ष्वाकुवंशीयानां सम्राजां धर्माभ्युदयप्रवर्तिनीनां प्रवृत्तीनां कार्यस्थली उत्तर-भारतेऽधुना सा चतुर्वर्गोत्थान-दृष्ट्या भूयिष्ठं चकास्ति। तत्रत्यचरितनायकानां नाममात्रमपि लोकमुत्कर्षपथे नियोजयति। भारतस्य स्वर्णयुगे विक्रमादित्योऽयोध्यां स्वराजधानीं चकार। इयं तीर्थनगरी गौतमबुद्धस्य रुचिकरी विहारभूमिर्बभूव।

---

१. अकारो ब्रह्म च प्रोक्तं यकारो विष्णुरुच्यते धकारो रुद्ररूपश्च अयोध्यानाम राजते। १.६१

२. अन्यकुण्डाः सन्ति—रुक्मिणीकुण्डः, बृहस्पतिकुण्डः, क्षीरोदककुण्डः, वसिष्ठकुण्डः, उर्वशीकुण्डश्च।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

जैनानां नैकतीर्थानि तत्रायोध्यायामतिप्राचीनकालतो विकसितानि दृश्यन्ते। आदितीर्थङ्करस्यादिनाथस्य, द्वितीयतीर्थंकरस्याजितनाथस्य, चतुर्थ-तीर्थंकरस्याभिनन्दनाथस्य, पञ्चमतीर्थंकरस्य सुमतिनाथस्य चतुर्दशतीर्थंकरस्य अनन्तनाथस्य च जन्मभूमिरयोध्या सकलसम्प्रदायानां तीर्थोत्तमा संजाता।

नेपालस्य तीर्थानि

नेपालदेशस्य राजधान्यां काठमाण्डूनगरे पशुपतिनाथस्य विशालमन्दिरं विष्णुमती—नद्यास्तटेऽवस्थितम्। नदीस्नानानन्तरं मन्दिरदर्शनं क्रियते। महिषरूपधारिणः शिवस्य शिरोभागोऽत्र पञ्चमुखशिवलिङ्गरूपेण विभाति। समीपमेव देव्या बृहन्मन्दिरं राजते।

नातिदूरं गुह्येश्वरी-देव्या महामन्दिरमस्ति। सतीदेव्याः ५१ शक्ति-पीठेष्वन्यतममिदं मन्दिरम्। अपरं शक्तिपीठं मुक्तिनाथाभिख्ये तीर्थे काठ-माण्डूतः ७० क्रोशदूरं वर्तते। इदं शालग्रामक्षेत्रम्। तत्र सप्तोष्णजल-निर्झरयुते गाण्डकी[1]-जलप्रवाहे पर्वतशिलाः शालग्रामरूपायन्ते। शालग्रामा विविधरूपाः —हरः, विष्णुः, कुष्णः, रामः, नृसिंहश्चोद्भवन्ति। ततोऽष्टक्रोशदूरं वर्तते शालग्रामोद्भवो दामोदरकुण्डः। नेपालप्रदेशस्य पूर्वदक्षिणस्यां मैथिलभागे सीताया जन्मभूमिर्जनकपुरेऽस्ति। तत्र रामविवाहात्मकचरित-नायकानां मूर्तय आयतनेषु प्रतिष्ठापिताः।

विहार-प्रदेशे तीर्थानि

विहारप्रदेशे नैकहिन्दूजैन-बौद्धतीर्थानि सन्ति। तेषु प्रसिद्धतमा बोधगया त्रिस्थलीषु परिगणिता। प्रदेशेऽस्मिन् तीर्थोचितनदीनद-निर्झर-वनोपवन-पर्वतमालाः सुदूर प्राचीनकालतस्तपःसाधनं सुकृतभाजां समाश्रया एव रोचन्ते। तेषु राजगृहं प्रथमस्थानीयमेव हिन्दू-बौद्धजैनानां समानं प्रतिष्ठितं निसर्गतः पर्वत-नदी-निर्झर-कुण्ड-सरोवरमण्डितं राजते। महाभारतकाले तत्र तीर्थस्नानेन यक्षिणी-प्रसादमवाप्य च ब्रह्महत्यापापादपि विमुक्तिः सम्भाविता। राजगृहे ब्रह्मकुण्डः, सीताकुण्डः, सूर्यकुण्डः, चन्द्रकुण्डः, गणेशकुण्डः, राम-कुण्डश्च सन्ति। रामकुण्डे शीतलजलनिर्झरिणी प्रस्रवति। अन्येषूष्णोदकं निर्झरति। वैतरणी- [सरस्वती] तटे पिण्डदानं क्रियते। वैभार-विपुल-रत्नोदय-स्वर्णाभिख्याः पञ्चपर्वतास्तीर्थायन्ते मन्दिरस्तूप-गुह्य-चरणचिह्ना-दिभिश्च धर्मोन्नायकानादर्शयन्ति च।

विंशो जैनतीर्थंकरः सुव्रतनाथः प्रदेशमिमं स्वजनुषा तपसा केवलज्ञानेन च समलंकरोति स्म। नैकगणधरा अत्र निर्वाणमधिगताः। अत्रैव सहावीर-

---

१. शालग्रामी, नारायणी वा।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्वामिनः प्रथमोपदेशो विपुलाचलपर्वते सम्पन्नः। राजगृहतः पञ्चक्रोशदूरं पावापुरी महावीरस्वामिनो निर्वाणभूमिः। तत्र सरोवरमध्ये विशालमन्दिरे पुण्यस्थली वर्तते। मन्दिरे महावीर-गौतम-सुधर्मस्वामिनां चरणचिह्नानि स्थापितानि।

वैद्यनाथधाम

वैद्यनाथः शिवस्यापरं नाम। तस्य नाम्ना प्रतिष्ठितं धाम शक्तिपीठम्। कामनापूर्त्यर्थं वैद्यनाथस्य विशेषमहत्वं वर्तते। वैद्यनाथस्य गणना द्वादशज्योतिर्लिङ्गेषु भवति। तस्य परिसरे २१ मन्दिराणि सन्ति। तेषु गौरवान्वितं शक्तिपीठमस्ति। अत्रैकस्मिन्नासने जयदुर्गायास्त्रिपुरसुन्दर्याश्च मूर्तिद्वयं राजते। वैद्यनाथस्य परिक्रमापथेऽन्यानि विंशतिप्रायाणि मन्दिराणि सन्ति।

सम्मेदशिखरः पार्श्वनाथपर्वतः

मगधस्य सम्मेदशिखरः पार्श्वनाथस्य तपोभूमिः। न केवलं सोऽपितु तीर्थंकराणां विंशतिका तत्रैव निर्वाणमलभत। अत एव सिद्धक्षेत्रेष्वनन्यतमोऽयं विराजते। तत्र पर्वतशिखरेषु नैकमन्दिराणि तीर्थंकरादीनां मूर्तिभिः समलंकृतानि लक्षशो जैनधर्मानुयायिनां दिगम्बराणां श्वेताम्बराणां चाध्यात्मिकाभ्युत्थानं प्रवर्तयन्ति।

सर्वाणि सिद्धक्षेत्राणि तीर्थानि सन्ति। तेषु अष्टापदं कैलाशे, चम्पा भागलपुरजनपदे, ऊर्जयन्तो गिरिनगरजनपदे, पावा पाटलिपुत्र-जनपदे, सम्मेदशिखरो हजारीबाग-जनपदे च सुप्रसिद्धाः सन्ति।

नैसर्गिकविभूतिर्मगधस्य प्रातिस्विकीं तैर्थिकसर्जनां हिन्दूनां जैनानां बौद्धानां च कृते प्रगुणयति।

गया

मगधे च गया पुण्या नदी पुण्या पुनः पुनः।
च्यवनस्याश्रमं पुण्यं पुण्यं राजगृहं वनम्॥

पितॄणां कृते गया-यात्रा रामायणे चर्चिता।[1] महाभारतानुसारेण गय इति ख्यातः कश्चित् सम्राड् बभूव। तस्य पिता मूर्तरया आसीत्। स परमो याज्ञिको राजर्षिरासाञ्चक्रे[2]। तस्य यज्ञभूमिर्महाभारते वर्णिता—

---

१. अयोध्या० १०७.१३

२. आरण्यक० ९३.१७—२७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सरो गयशिरो यत्र पुण्या चैव महानदी ।
ऋषिजुष्टं सुपुण्यं तत्तीर्थं ब्रह्मसरोत्तमम् ।।

तीर्थेऽस्मिन् धर्मराजो वसति । पिनाकधरः शिवः सन्निहितः[1] । ब्रह्मसरोवराधिष्ठानमस्ति गयद्वारासम्मानितो गयपर्वतः । स देशः, पर्वतः, तीर्थं चेति त्रयं गय नाम धारयति[2] । तत्रास्ति अक्षयवटो यत्र पितृभ्यो दानमक्षयं भवति । तत्रैका शिला पूज्यते । सा मरीचपत्नी धर्मव्रता पत्युः शापाच्छिलीभूता किन्तु तपःप्रीतानां देवानां प्रसादात् सा शिलारूपिणी सर्वेभ्यो नदीदेवर्षिभ्यो विशेषतरं पावनीबभूव, सर्वाणि तीर्थानि च तत्र तामुपवसन्ति । तस्यां सर्वा नद्योऽभ्यन्तरीकृताः । शिलासन्निधौ विष्णुः सर्वेषां पितॄणामुद्धारं कल्पयतीति प्रशस्तिर्वर्तते ।

गयातीर्थस्य प्रादुर्भावविषये काणेमहोदयेनानुसंहितमधोविधम्—

To my mind it appears that Gaya had become a famous pitṛtīrthā centuries before Christ and that the legend of Gayāsura is a postfacto attempt to account for the sanctity of the place and the numerous shrines and holy places that had sprung up round Gayā.

गयायास्तीर्थबहुत्वे सर्वाधिकमहत्त्वं तीर्थत्रयं भजते—फल्गुनदी, विष्णुपदम्, अक्षयवटश्च । एतेषु स्थानेषु पित्रर्थं पिण्डेन सह क्षीर-जल-पुष्प-चन्दन-ताम्बूल-दीपाः समर्प्यन्ते ।

विष्णुपदमन्दिरं गयायां बृहत्तमं श्रेष्ठं चकास्ति । तत्र राजतविष्णुपदं निहितम् । अक्षयवटस्यान्तिमा पूजा भवति । तदनु पण्डा तीर्थिकाद् दक्षिणां गृहीत्वाशीर्वदति—सुफलः, सूचयति च यत्ते पितरः स्वर्गताः । तत्र पिण्डदानेन तर्पणं ब्रह्मसायुज्यं च लभ्येते । वायुपुराणानुसारेण—

'सर्वे भवन्तु सुखिनः' इति विश्वात्मकमाङ्गल्यमधोविधं प्रकटितं तत्र तर्पणे

आब्रह्मस्तम्बपर्यन्तं यत्किञ्चित् सचराचरम् ।
मयादत्तेन तोयेन तृप्तिमायान्तु सर्वशः ।। वायु० ११०.६४
ब्रह्मज्ञानेन किं साध्यं गोगृहे मरणेन किम् ।
वासेन किं कुरुक्षेत्रे यदि पुत्रो गयां व्रजेत् ।।

गयातः १४ क्रोशदूरं देवकुण्डो (च्यवनाश्रमः) वर्तते ।

उत्तरप्रदेशीयतीर्थानि

भारतेऽनादिकालात् तीर्थानि पदे-पदे मान्यताप्राप्तानि सन्ति । तेषु शीर्षण्यानि सन्ति देवतात्मना हिमालयेन क्रोडीकृताः । उत्तरतमप्रदेशे

१. आरण्यक० ९३.१०,१२ २. सभापर्व ४८.१५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तत्र हिमालयीयतीर्थानि पश्चिमदिशात आरभ्य चतुर्भागेषु दर्शनीयानि सन्ति—(१) मानससरः कैलासयात्रा (२) अमरनाथः (कश्मीरे) (३) यमुनोत्तरी-गंगोत्तरी, केदारनाथ-बदरीनाथौ च (४) दामोदरकुण्डो मुक्तिनाथः पशुपतिनाथश्च । एतानि निसर्गेण पावनीकृतानि देवर्षिभिर्जुष्टानि च स्वत एव विलसन्ति ।

मानससरः

रामायणानुसारेण—

कैलासपर्वते राम मनसा निर्मितं परम् ।
ब्रह्मणा नरशार्दूल तेनेदं मानसं सरः ॥

महाभारते मानससरः संस्तुतमधोविधम्—

ततो गच्छेद् राजेन्द्र मानसं तीर्थमुत्तमम् ।
तत्र स्नात्वा नरो राजन् रुद्रलोके महीयते ॥ आरण्यक० ८२.२१ ।

मानससरः ५१ शक्तिपीठेषु एकमेव । तस्याधिष्ठानं कैलासगिरिः शिवस्य परमं धाम । भारतीयसंस्कृतेरौदात्त्य-केतुरिव राजते कैलासः ।

बदरिकाश्रमः

पर्वतकुलेषु रमणीयतमे गन्धमादननामके कश्यपतपसा परिपूते नारायणवसतिभूते हिमगिरिप्रस्थेऽवस्थितो बदरिकाश्रमस्तु नारायणाश्रमो यत्र भगवान् विष्णुस्तपस्तेपे[1] । तद्यथा महाभारते बदरिकाश्रमो वर्णितः —

तमसा रहितं पुण्यमनामृष्टं रवेः करैः ।
क्षुत्तृट्शीतोष्णदोषैश्च वर्जितं शोकनाशनम् ॥
शरण्यं सर्वभूतानां ब्रह्मघोषनिनादितम् ।
महद्भिस्तोयकलशैः कठिनैश्चोपशोभितम् ॥

वराहपुराणानुसारेण—

श्रीबदर्याश्रमं पुण्यं यत्र यत्र स्थितः स्मरेत् ।
स याति वैष्णवं स्थानं पुनरावृत्तिवर्जनात् ॥ १४१.६७

तत्र नारदादिशिलाः, ब्रह्म-वसुधारा-सोम-मेरुतीर्थानि द्वादशादित्य-ब्रह्मकुण्ड-धर्मक्षेत्र-गङ्गासंगमादयः दर्शनीयस्थानानि सन्ति । बदरीमुप शंकराचार्यस्य मठो राजते । तत्र शंकराचार्यस्यासनं पूज्यते ।

१. आरण्यकपर्वणि ४१.१ । नरो नारायणश्चैव हरिः कृष्णस्तथैव च । तेभ्यो नारायणनरौ तपस्तेपुरव्ययौ । बदर्याश्रममासाद्य शकटे कनकामये ॥ शान्ति० ३२१.१० ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

बदरीनाथस्य मूर्तिः शालग्रामशिलानिर्मितास्ति । बौद्धास्तां मूर्तिं बुद्धस्य मूर्तिरिति सन्धार्य पूजयन्ति । शंकराचार्यस्तस्याः पुनरुद्धारक इति श्रूयते । अन्या मूर्तयस्तत्र कुबेरस्य, उद्धवस्य, गरुडस्य च विराजन्ते । सर्वाधिकमहत्त्वं नरनारायणयोर्मूर्तेर्विद्यते । समीपस्थे तत्र श्रीदेवी भूदेवी च स्तः मूर्तरूपेण ।

गङ्गोत्तरी गङ्गावतारः

परमपावनगङ्गाया उद्गमस्थानं पुण्यतममिति सन्धार्य तीर्थयात्रिका गङ्गोत्तरीति समुद्रतलात् १०,०२० फुटोच्चैः सश्रद्धमारोहन्ति । ऋग्वेदे गङ्गाया देवतास्वरूपं तीर्थत्वं च विदितमेव । १०.७५.५ । गङ्गावतार एव गङ्गोत्तरी ।

गङ्गात्र प्रायः ४० फुट विस्तीर्णा हस्तद्वयमितं गभीरा च प्रवर्तते । प्रसिद्धे गङ्गामन्दिरे शंकराचार्येण प्रतिष्ठापिता गङ्गामूर्तिः स्वर्णमयी स्वर्णच्छत्रा च विराजते । तत्र भगीरथ-यमुना-सरस्वती-शंकराचार्यादीनां मूर्तयः पूज्यन्ते । परिसरे सूर्य-विष्णु-ब्रह्मकुण्डाः सन्ति ।

भगीरथशिला तत्र भगीरथस्य तपश्चर्यासनमिति प्रसिद्धा । नातिदूरं ततः केदारगङ्गासंगमे शिवलिङ्गाद् भूयिष्ठोच्चस्थलाद् गङ्गा ज्यवते । पुण्यमिदं स्थानं गौरीकुण्ड इति प्रोच्यते ।

गङ्गा प्रथमं गोमुखनामके उच्चतरस्थाने प्रकटति । तत्र गङ्गायाः प्रथमप्रसवो हिमधारान्तरतः प्रादुर्भवति । ततो गङ्गायाः शीतोदकं मानव-विग्रहौष्ण्यं शमयितुमिव प्रकामतः प्रवहति ।

मथुरा

कृष्णस्य जन्मभूमिर्व्रजप्रदेशे केन्द्रभूतायां मथुरायां राजते । मथुरापुरी महाभारत इदं प्रथमतया श्रूयते कृष्णभूमिरूपेण । जरासन्धभिया कृष्णस्ततो यादवैः सह द्वारकामधिशेते स्म ।

पौराणिकयुगे कृष्णस्य बाललीलाभूमिरिति ख्यातिर्मथुराया विश्वविश्रुत-ललामलतिका प्रससार । वराहपुराणे मथुरायाः सत्यं शिवं सुन्दरं च पुण्यात्मकरूपं श्लाघितम् । तद्यथा—

पूर्णं वर्षसहस्रं तु वाराणस्यां हि यत्फलम् ।
तत्फलं लभते देवि मथुरायां दिने दिने ।। ५२.१४

तत्रैव कृष्णमुखेनोच्चरितम्—

न विद्यते च पाताले नान्तरिक्षे न मानुषे ।
समानं मथुरायां हि प्रियं मम वसुन्धरे ।।
सा रम्या च सुशस्ता च जन्मभूमिस्तथा मम । १५.२, ८, ९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

काशीं प्रयागं चातिशेते मथुरा—

महामाघ्यां प्रयागे तु वाराणस्यां हि यत्फलम् ।
तत्फलं लभते देवि मथुरायां क्षणेन हि ॥ १५.२.१५

द्विविधं तीर्थत्वं मथुराया अभिज्ञायते—आरण्यम् नाद्यं च । तत्र क्षेत्रेऽस्मिन् वनानि विलसन्ति—मधुवनं, कुमुदवनं काम्यकवनं, भद्रवनं, खादिरवनं, श्रीवनं, महावनं, लोहजङ्घवनं, विल्ववनं, भाण्डीरवनं, वृन्दावनम् । एतेषु वृन्दावनं शीर्षण्यं मन्यते—

गुह्याद् गुह्यतमं रम्यं मध्यं वृन्दावनं भुवि ।
अक्षरे परमानन्दं गोविन्दस्थानमव्ययम् ॥

पद्मपुराणे पाताखण्डे ६९.७१

नाद्यतीर्थानि यमुनाघट्टाः सन्ति—विश्राम-प्रयाग-कनखल-बिन्दु-बंग-सूर्य-चिन्तामणि-ध्रुव-ऋषि-मोक्ष-कोटि-बुद्धाभिधेया दक्षिणदिशि सन्ति । गणेश-मानस-दशाश्वमेध-चक्रतीर्थ-कृष्णगङ्गा-सोमतीर्थ-ब्रह्मलोक-घण्टाभरण-धारा-पतन-संगमतीर्थ-नवतीर्थ-घट्टा उत्तरदिशि सन्ति । एतेषु विश्रामघट्टः शीर्षण्यः केन्द्रीभूतश्च राजते । क्षेत्रेऽस्मिन् ध्रुवश्तपश्चचार । मथुरायाः प्रसिद्धमन्दिराणि सन्ति—द्वारकाधीश-गतश्रमनारायण-वाराह-गोविन्द-श्रीराम-कंसनिकन्दना-दीनि । मथुरा-परिक्रमायास्तु सविशेषं महत्त्वं वर्तते ।

वृन्दावनम्

मथुरापरिसरे वृन्दावनमिति प्रख्यातस्तीर्थनिकायः शोभते । पौराणिक-मिदं तीर्थम्[1] । तत्र कालियह्रदः, अद्वैतवटः[2], बाँकेविहारिमन्दिरम्, राधावल्लभ-मन्दिरम् । वृन्दावने गलीतिख्यातो संकीर्णपथः दानगली, मानगली, यमुनागली, कुञ्जगली च प्रसिद्धाः ।

सेवाकुञ्जेऽद्यापि नित्यं रात्रिकाले राधाकृष्णयो रासलीला भवतीत्यनु-श्रूयते । तत्र निधिवने स्वामी हरिदासो विराजते स्म । अत्रैव भगवतो बाँकेबिहारि-विग्रहः प्रकटितः । निकटस्थं वर्तते राधारमण-मन्दिरम् । वंशीवटस्य परिसरे गोकुलानन्दमन्दिरं वर्तते । तत्र राधाकृष्णयोः पदचिह्नं दर्शनीयमस्ति । तदनन्तरं वल्लभाचार्यस्य तपोभूमिः । ब्रह्मकुण्डे कृष्णो गोपान् ब्रह्मदर्शनमकारयत् । तन्निकषा रंगजीति नाम्ना ख्यातं भव्यं मन्दिरं दाक्षिणात्यकलाशैलीमनुहरति । मन्दिरमिदं रामानुजसम्प्रदायानुदर्शि प्रवर्तते ।

---

१. ब्रह्मवैवर्तानुसारेण महाराजकेदारस्य पुत्री वृन्दात्र श्रीकृष्णं पतिरूपेणाप्तुं तपश्चचार । तस्यास्तपसा पूतेयं स्थली तीर्थभूता राधाकृष्णलीलाभूमिर्द्योतते ।

२. महाप्रभोश्चैतन्यस्य शिष्योऽद्वैताचार्यो गोस्वामी अक्षयवटे तपस्तेपे ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ततः पृष्ठभागे ज्ञानगुदडीति ख्याता स्थली विरागप्रपन्नमहात्मनां साधनाश्रयः। अत्रैवोद्धवो गोपीभिः संवादं चकारेत्यनुश्रूयते। पूर्वोक्तेन स्पष्टं भवति यन्नगरेऽस्मिन् मन्दिराणां सर्वप्रियता विभाति।

गोकुलम्

मथुरातः कोशत्रयदूरं गोकुलं यमुनायाः परंपारेऽवस्थितम्, नैककृष्णलीलानां विश्वमनोहारिणीनां दर्शनभूमिरियं जनमानसं कृष्णमयं करोति[1]। वल्लभ-सम्प्रदायनिकेतनानि तत्र भूयः शोभन्ते।

अत्रप्रदेशे महादेवो गोपीश्वर इत्याख्यया प्रसिद्धो विराजते। यदुक्तं महालिङ्गेश्वरतन्त्रे शिवशतनामस्तोत्रे—

गोकुले गोपिनीपूज्यो गोपीश्वर इतीरतः॥

गोकुले गोकुलनाथस्य मन्दिरं २४ मन्दिरैः परीतं शोभते। मथुरा-वृन्दावन-परिसरेऽन्यानि तीर्थभूतानि स्थलानि—नन्दग्रामः,[2] बरसाना, गोवर्धनं च कृष्णचरितं प्रकाशयन्ति[3]।

गोवर्धनम्

लध्वाकारोऽपि गोवर्धनो गिरिराज इति समादृतः कृष्णकृताश्रयो व्रजवासिनाम्। वर्षत्रयेण दण्डवत्कृतपरिक्रमस्तपोधनो महापुण्यभागिति मान्यता वर्तते। परिक्रमापथे नैककुण्डाः सरोवराश्च विलसन्ति।

चित्रकूटः

मधुमूलफलोपेतो निसर्गतो गिरिणदी-निर्झरकुण्डारण्यचित्रितश्चित्रकूट-प्रदेशस्तीर्थभूतः[4]।

ऋषीणां तपोभि[5]स्तिलकायमानस्त्रेतायुगे मुनिपुंगवेन वाल्मीकिना रामचन्द्रस्य सुखदावासार्थं संस्तुतः।

---

१. तद्यथा भागवते—कालेन व्रजता तात गोकुले रामकेशवौ जानुभ्यां सहपाणिभ्यां रिंगमाणौ विजह्रतुः।

२. नन्दग्रामे नन्दमन्दिरं राजते। आधारपर्वतः शिवरूपम्।

३. बरसानानामको ग्रामो राधाया जन्मभूमिः पर्वतपार्श्वेऽवस्थिता ब्रह्मरूपमेव। अत्रानैकस्थलेषु राधाकृष्णयोर्बालोचितप्रणयक्रीडानां दृश्यानि प्रकटीकृतानि। तेषु स्थलेषु बहव उत्सवा जनसम्मर्देन सभाजिता भवन्ति। अत्र राधादिनचर्यात्मक-वृत्तानि मन्दिरेषु प्रदर्शितानि मनो हरन्ति।

४. यावता चित्रकूटस्य नरः शृंगाण्यवेक्षेते।
कल्याणानि समाधत्ते न पापे कुरुते मनः॥ अयो० ५४.३०।

५. महर्षिसेवितः पुण्यः पर्वतः शुभदर्शनः। अयो० ५४.२८।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विनोदयन्तं च सुखं परं शिवम् । सुरम्यमासाद्य समावसाश्रयम् । अ.५४.४३
महाभारते चित्रकूटस्य तीर्थत्वं समुदितमेव । तथाहि—

ततो गिरिवरश्रेष्ठे चित्रकूटे विशांपते ।
मन्दाकिनीं समासाद्य नदीं पापप्रमोचिनीम् ।।
तत्राभिषेकं कुर्वाणः पितृदेवार्चने रतः ।
अश्वमेधमवाप्नोति गतिं च परमां व्रजेत् ।। (आर० ८३.५६)
चित्रकूटे जनस्थाने तथा मन्दाकिनीजले ।
विगाह्य वै निराहारो राजलक्ष्मीं निगच्छति ।। (अनु० २६.२७)

चित्रकूटपरिसरस्य कामदगिरेः प्रदक्षिणा १५ क्रोशायामा महापुण्यावहास्ति । प्रदक्षिणापथे हनुमतः, साक्षिगोपालस्य लक्ष्मीनारायणस्य, रामस्य, तुलसीदासस्य, रामलक्ष्मणयोर्मन्दिराणि प्रमुखाणि सन्ति । अन्यानि पुण्यस्थानानि दर्शनीयानि सन्ति—जानकीकुण्डः, स्फटिकशिला, अनसूयाश्रमः, गुप्तगोदावरी, भरतकूपः । एते सर्वे रामचरितस्मारकाः ।

वङ्गदेशीयतीर्थानि

गङ्गासागरः (कलकत्ता)

कलकत्ता-समीपं नैकतीर्थानि विलसन्ति । कलकत्तानगरे सुप्रसिद्धा महाकाली मन्दिरे प्रतिष्ठापिता भूयिष्ठं पूजिता च । तत्र दक्षिणेश्वरे गङ्गातटे परमहंस-रामकृष्णाराधिता महाकाली भव्यमन्दिरे प्रभवति ।

तत्रैव वटवृक्षस्याधस्तात् रामकृष्णो ध्यानयोगनिरतो बभूव । गङ्गाया अपरतटे स्थिते वेलूरमठे स्वामिनो रामकृष्णस्य साधना-भूमिरासीत् । तत्रैव तस्य समाधिर्दर्शकानानन्दपथं निगमयति । आधुनिकयुगे नैकमहामनीषिणां जनिरियं भूमिर्भारते पूर्वदिशि तिलकायते ।

कलकत्ता-नगरतः ४५ क्रोशदूरं सागरद्वीपोऽस्ति, यत्र गङ्गा सागरं मिलति । तत्रासीत् प्राचीनतमयुगे कपिलमुनेराश्रमः ।

महाभारतनुसारेण—

गंगायास्त्वथ राजेन्द्र सागरस्य च संगमे ।
अश्वमेधं दशगुणं प्रवदन्ति मनीषिणः ।
गंगायास्त्वपरं द्वीपं प्राप्य यः स्नाति भारत ।
त्रिरात्रोपोषितो राजन् सर्वकामानवाप्नुयात् ।। (आरण्यक० ८३.४,५

नवद्वीपधाम

कलकत्ता-नगरतः ३३ क्रोशदूरं नवद्वीपे चैतन्यमहाप्रभुः प्रादुरभवत् । तत्र धामेश्वरो महाप्रभोः प्रधानं मन्दिरम् । अन्यानि प्रमुखमन्दिराणि सन्ति—

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

(१) सोनार-गौराङ्गः—यत्र महाप्रभोः स्वर्णमयी मूर्तिः पूज्यते।
(२) षड्भुज-गौराङ्गः [३] गौराङ्ग-विश्वरूपः [४] श्रीवास-प्राङ्गणम्।

गङ्गापारे तत्र गौडीय-सम्प्रदायानां केन्द्रं मायापुरे वर्तते। तत्र योगपीठं प्रामुख्यं भजते। योगपीठस्थले चैतन्यस्याविर्भावोऽभवदिति गौडीयानां मान्यता। महाप्रभोर्लीलाप्रसङ्गे नाधोविधानि अन्यानि तीर्थानि प्रसिद्धानि सन्ति—गोद्रुमद्वीपः, कुलिया, चोपाहाटीत्यादि।

वङ्गदेशे कटवेति ख्याते नगरे शक्तिपीठं वर्तते।

आसमप्रदेशीयतीर्थानि

महाभारते कामाख्यं तीर्थमधोविधं वर्णितम्—

कामाख्यतीर्थम्

कामाख्यं तत्र रुद्रस्य तीर्थं देवनिषेवितम्।
तत्र स्नात्वा नरः क्षिप्रं सिद्धिं प्राप्नोति भारत॥ [वन० ८२.१०५]

प्रसिद्धतमं शक्तिपीठमिदमसमप्रदेशे तीर्थत्वेन भृशं राजते। तथाहि—

कामाख्या परमं तीर्थं कामाख्या परमं तपः।
कामाख्या परमो धर्मः कामाख्या परमागतिः॥
पीठानि चैकपञ्चाशदभवन् मुनिपुंगव।
तेषु श्रेष्ठतमं पीठं कामरूपं महामते॥ [देवीभा० १२।३०]

तत्र लोहित्ये स्नानेन ब्रह्महापि प्रमुच्यते। १२.३२। अतएव—

कामेश्वरीं च कामाख्यां कामरूपनिवारिणीम्।
सप्तकाञ्चनसंकाशां तां नमामि सुरेश्वरीम्॥ [देवीभा० १२।३५]

अत्र देव्या महाक्षेत्रम्।

उत्कलप्रदेशीयतीर्थानि

भुवनेश्वरे जगन्नाथपुर्यां च मन्दिराणां संख्यागणनीयैव वर्तते। तत्र मन्दिरैः परिवृतानि बिन्दुसरोवरादीनि नवतीर्थानि स्नानार्हाणि सन्ति। तत्र लिङ्गराजमन्दिरं प्राग्भावं भजते। लिङ्गराजो भुवनेश्वरस्य महादेवस्य वा पर्यायः।

चतुर्धामस्वन्यतमास्ति पुरी[1]। अस्या वैभवानुगुणं नामानि पर्यायेण सन्ति—श्रीक्षेत्रम्, पुरुषोत्तमपुरी, शङ्खक्षेत्रं च। शाक्तानामुड्डीयानां पीठमिदम्। सत्या नाभिरत्रापतत्। अतएव शक्तिपीठमत्र प्रतिष्ठितम्।

---

१. सत्ययुगे बदरी त्रेतायां रामेश्वरो द्वापरे द्वारका कलौ पुरी च प्रभविष्णुतीर्थानि जातानि इति पौराणिकमतम्।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पुर्या जगन्नाथस्य च महाप्रसादेऽस्पृश्यता दोषो न जायते । तत्र स्नानार्हाणि तीर्थानि निर्मितानि सन्ति । तेषु महोदधितीर्थं श्रेष्ठमेव। समुद्रोर्मिभिः स्नानविशेषतया तत्र स्नानघट्टः स्वर्गद्वारमित्यभिधीयते । मन्दिरेऽस्मिन् भारतस्याद्यन्तं धार्मिकेतिवृत्तं परमपावननिकेतभूतं नित्यं मानवतां निर्विशेषं जागरयति । जगन्नाथमन्दिर-समक्षं ब्रह्मासनं वा मुक्ति-मण्डपो वा निर्मितः । आदौ स्वयं ब्रह्मात्र यज्ञस्य प्रधानाचार्यो विरराजेति मान्यता वर्तते । अद्यावधि मनीषिब्राह्मणोत्तमास्तत्राधिशेरते परिषदि । मुक्तिमन्दिरस्य पृष्ठभागे रोहिणीकुण्डो विमलामन्दिरं च स्तः। विमला हिन्दूनां शक्तिपीठं, जैनानां च सरस्वती देवीति प्रतीक्यति । उभयोः प्रतिष्ठास्पदमिदं तीर्थम् ।

जगन्नाथ-मन्दिरस्य विशालप्राङ्गणेऽगणितदेवमूर्तयः सन्ति । सर्वोच्चास्ति श्रीमन्दिरं जगन्नाथाधिष्ठितम् । प्रमुखा देवाः सन्ति—विश्वनाथः, गणेशः, सत्यनारायणः, बालमुकुन्दः, सर्वमंगला, नृसिंहः, सरस्वती, नीलमाधवः, लक्ष्मीः, शंकराचार्यः, लक्ष्मीनारायणः, सूर्य-चन्द्रेन्द्राः, पातालेश्वर-महादेवः, उत्तरामणिदेवी, ईशानेश्वरः, जय-विजयौ च । रत्नवेदौ जगन्नाथ-सुभद्रा-बलरामा राजन्ते । जगन्नाथस्तत्र सुदर्शन-चक्रधरः । जगन्नाथमन्दिरं महाप्रभोश्चैतन्यस्याराधनाभूमिः प्रत्यक्षयति । महाप्रभुरष्टादशवर्षाणि निकटस्थे गम्भीरामठे (राधाकान्तमठे) निवसन् जगन्नाथार्चनेनात्मसाधनां सम्पूरयामास । मन्दिरेऽस्मिन् राधाकृष्णमूर्तिर्मनो हरति । चैतन्याधिष्ठिते कक्षे तस्योपभुक्ताः कमण्डलु-पादुका-कन्थामालादयः संरक्षिता दर्शनीयाः । अग्रे चैतन्यस्य प्रथमानुयायिनां हरिदास-वासुदेवादीनां साधना स्थली वर्तते ।

जगन्नाथस्यान्यानि प्रसिद्धमन्दिराणि सन्ति—

(१) गुण्डीचा—अत्र रथयात्रा दिवसे जगन्नाथो विश्राम्यति ।

(२) एमारमठ—अत्र रामानुजाचार्यः कंचित् कालमुवास ।

(३) गोवर्धनपीठम्—शंकराचार्येण प्रतिष्ठापिते पीठचतुष्टयेऽन्यतमम् । मन्दिरमिदं शंकराचार्यस्य मूर्त्या शोभते ।

(४) कबीरमठः—कञ्चित्कालं महात्मना कबीरेणाधिष्ठितः ।

(५) तोटा-गोपीनाथ-मन्दिरम्—अत्र महाप्रभुचैतन्येन गोपीनाथस्य मूर्तिर्वालुकानिकरे निहिता प्राप्ता । अस्यां मूर्तौ चैतन्यो लीनोऽद्यापि स्वर्णिमरेखया प्रतीकितः ।

(६) सोनार-गौराङ्गः—बेड़ीहनुमन्मन्दिरसमीपे मन्दिरेऽस्मिन् चैतन्यस्य स्वर्ण-प्रतिमा विराजते ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मध्यप्रदेशीयतीर्थानि

महाकालं ततो गच्छेन्नियतो नियताशनः ।
कोटितीर्थमुपस्पृश्य ह्यमेधफलं लभेत्[1] ।

स्कन्दपुराणे उज्जयिन्या महिमा वर्णितः —

उज्जयिनी-अवन्ती

महाकालः सरिच्छिप्रा गतिश्चैव सुनिर्मला ।
उज्जयिन्यां विशालाक्षिवासः कस्य न रोचयेत् ।। स्कन्द० २६.१७

अवन्तिमाहात्म्ये शिप्रया परिश्लिष्टा ज्येतिर्लिङ्गेन शक्तिपीठेन च महिमान्वितेयं नगरी सप्तपुरीष्वेका, श्रीकृष्ण-बलराम-सुदामादीनां गुरुकुलमिति वर्णिता । द्वादशवर्षीयः कुम्भोत्सवोऽवन्तिकायाः पुण्यनिधिं प्रगुणयति ।

भारतीयेतिहासस्य स्वर्णयुगे विक्रमादित्यादिसम्राजां राजधानीयं नगरी कालिदासेन समाम्नाताधोविधम्—

प्राप्यावन्तीमुदयनकथाकोविदग्रामवृद्धान्
पूर्वोद्दिष्टामनुसर पुरीं श्रीविशालां विशालाम् ।
स्वल्पीभूते सुचरितफले स्वर्गिणां गां गतानां
शेषैः पुण्यैर्हृतमिव दिवः कान्तिमत्खण्डमेकम् ।
अप्यन्यस्मिञ्जलधर महाकालमासाद्य काले
स्थातव्यं ते नयनविषयं यावदत्येति भानुः ।।
कुर्वन् सन्ध्याबलिपटहतां शूलिनः श्लाघनीयाम्
आमन्द्राणां फलमविकलं लप्स्यसे गर्जितानाम् ।।

उज्जयिन्याः परिसरे विविधतीर्थेषु अधोनिर्दिष्टानि प्रामुख्यं भजन्ते—

१. हरसिद्धिदेवी—उप रुद्रसरोवरं सप्तसागरं च । शक्तिपीठमिदं विक्रमादित्यादिभिराराधितमिति श्रूयते ।
२. गढकालिका—सेयं काली यां समाराध्य कालिदासो निसर्गप्रतिभां प्रस्फोटयामास ।
३. भर्तृहरिगुहा—भर्तृहरिगुहासमीपं भर्तृहरेः समाधिर्वर्तते । अत्र भर्तृहरियौवने संन्यस्य मुनिवर्यस्तपश्चचार ।

केचित्तीर्थयात्रिणोऽष्टाविंशतितीर्थयात्रामपरे महाकालयात्रां, क्षेत्रयात्रां नगरप्रदक्षिणां, द्वादशयात्रां, सप्तसागरयात्रां वा विधायोज्जयिन्या नैसर्गिकीं देवोत्थां च रमणीयतां रसनिर्भरमनुभवन्ति ।

---

१. लिङ्गत्रये महाकालस्य परमा गणना मर्त्यलोके प्रबोधिता—
आकाशे तारकं लिङ्गम् पाताले हाटकेश्वरम् । मृत्युलोके महाकालं लिङ्गत्रयं नमोऽस्तु ते ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नर्मदा

पुण्या कनखले गंगा कुरुक्षेत्रे सरस्वती ।
ग्रामे वा यदि वारण्ये पुण्या सर्वत्र नर्मदा ।।

नदर्मायास्तीर्थत्वं महाभारते विदितमस्ति । तथा हि—

नर्मदायामुपस्पृश्य तथा सूर्पारकोदके ।
एकपक्षं निराहारो राजपुत्रो विधीयते ।। अनु० २६.४७

पौराणिकातिशयोक्तिर्नर्मदामधिकृत्य न शिथिलायते । तथा हि पद्मपुराणानुसारेण—

नर्मदा-संगमं यावद् यात्रच्चामरकण्टकम् ।
तत्रान्तरे महाराज तीर्थकोट्यो दश स्थिताः ।। आदि० २१.४४

ओंकारेश्वरो (मान्धाता) नर्मदा-द्वीपे स्थितो द्वादशज्योतिर्लिङ्गेष्वन्यतमः । सम्राट् मान्धातात्र तपोऽतप्यत । अतएव तस्य नाम्नाभिहितमिदं तीर्थम् । नर्मदा-मध्ये द्वीपे स्थितं मन्दिरं नौयानेनोपगम्यम् । द्वीपोऽयमाकृत्या ओंकारसदृशः । ओंकारेश्वरः खण्डवातो विंशतिक्रोशदूरम्, इन्दौरतश्चतुर्विंशतिक्रोशदूरमवस्थितः । नैकलिङ्गमूर्तयः शिवपरिवारेण सह तत्र पूज्यन्ते ।

नर्मदाया उत्तरतटे पञ्चपुरीषु[1] अन्यतमा माहिष्मती (महेश्वरः) इति ख्यातागणितमन्दिरैर्मण्डितं तीर्थं सुप्रसिद्धम् । अत्र अहल्याबाई-राज्ञ्याः समाधी राजराजेश्वर-मन्दिरं, कालेश्वर-ज्वलितेश्वरमन्दिरे मतङ्गर्षेराश्रमः, मातङ्गेश्वरमन्दिरं भर्तृहरिगुहा, मङ्गलागौरीमन्दिरं, नर्मदाद्वीपे बाणेश्वरमन्दिरं, सिद्धेश्वरलिङ्गं, रावणेश्वरलिङ्गं च सन्ति । अत एव गुप्तकाशीति पर्यायेणाभिहिता माहिष्मती । माहेश्वरलिङ्गं नर्मदाजलेऽन्तर्हितं केवलं ग्रीष्मतौं दर्शनीयं भवति । यथा गङ्गा तथैव नर्मदापि पापनाशिनी, मोक्षदायिनी स्वर्गसोपानवद्राजते ।

दक्षिणभारतीयतीर्थानि

महाभारते गोदावरी प्रसिद्धं तीर्थमिति वर्णितम् । तथाहि आरण्यकपर्वणि—

यस्यामाख्यायते पुण्या दिशि गोदावरी नदी
बह्वारामा बहुजला तापसाचरिता शुभा ।
ततो गोदावरीं प्राप्य नित्यं सिद्धनिषेविताम् ।
गवामयमवाप्नोति वासुकेर्लोकमाप्नुयात् ।। ८६.२. ३

१. पञ्चपुर्यः सन्ति प्रभासः, कुरुक्षेत्रम्, माया (हरिद्वारम्), अवन्तिका, महेश्वरपुरम् ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

गोदावरी

वनवासकाले रामो गोदावर्यास्तटे कञ्चित्कालमुवास। नदीं गोदावरीं रम्यामाश्रित्य न्यवसत् तदा। आरण्यकपर्व २६१.४०। ब्रह्मपुराणानुसारेणा-मृतं गोतमीजलम्। १३३.१७ गोदावर्यास्तटे पदे पदे तीर्थानि प्रादुर्भूतानि तेषु सप्तगोदावरमनुत्तमम्।[1]

गोदावर्या उद्भवो नासिकप्रदेशे त्र्यम्बकक्षेत्रे भवति।[2] तत्र त्र्यम्बकेश्वरो द्वादशलिङ्गेष्वन्यतमः। द्वादशवर्षीय-कुम्भावसरे नासिके गोदावरीस्नानेन महत् फलमवाप्यते कोटिशो जनैः। तत्र रामकुण्डादयो बहूनि पुण्यप्रद-स्नानस्थलानि देवाभिख्यया प्रसिद्धानेकविधपौराणिकाख्यानानि स्मारयन्ति। कुण्डानां सविधे मन्दिराणि भूयिष्ठं प्रचुरायन्ते। रामकुण्डोपरि गङ्गामन्दिरं गोदामन्दिरं, विट्ठलमन्दिरं च सन्ति। अन्यानि प्रमुखमन्दिराणि कपालेश्वर-राम-शारदाचन्द्रमौलीश्वर–रामेश्वर–सुन्दरनारायणोमामहेश्वर–नीलकण्ठेश्वर-मुरलीधर-तिलभाण्डेश्वर-भद्रकालीनामुत्कीर्णचारुचरितेषु दर्शकान् रमयन्ति।

नातिदूरं कपिलासंगमे कपिलाश्रमोऽष्ट तीर्थानि च विलसन्ति। तेषु जलप्लावितेऽग्नितीर्थं बहुश्रुतं, छायासीताचरित-स्मारकेण[3] प्रसिद्धम्। नासिकान्नातिदूरं टाकलीग्रामान्ते गुहायां शिवाजीरामदासयोर्मूर्तिद्वयं तयो-र्हिन्दूराष्ट्रोद्धरणमादर्शीकरोति। नासिकं परितो देवर्षिचरित-चक्रवालोऽद्यापि अनुपमं चकास्ति।

रायगढम्

आधुनिकतीर्थेषु शिवाजी-रामदासादीनां राष्ट्रोन्नायकानां तीर्थस्थलं सह्याद्रि-शिखरे दुर्गसन्निहितमविस्मरणीयमेव। तत्र शिवाजी-महाराजस्या-राध्या देवी जगदम्बा-भवानी मन्दिरे राजते। दुर्गाभ्यन्तरे जगदीश्वरमन्दिरं सविशेषं दर्शनीयम्। तत्र शिवाजी-महाराजस्य समाधि-मंन्दिरं वीररसं भूयिष्ठं वितरति।

पण्ढरपुरम् (पुण्डरीकः)

महाराष्ट्रे पण्ढरपुरं प्रख्याततमं विराजते। अस्य तीर्थस्य प्रथमपरिचयः पद्मपुराणे बिन्दु-माधव-नाम्ना भीमरथी-तटे विट्ठल-विष्णोर्मूर्तिमधिकृत्य विशदीकृतः। सहस्राब्दं प्राचीनं तस्य प्रतिष्ठापनं भवतु नाम।

---

१. सप्तगोदावरे स्नात्वा नियतो नियताशनः महत्पुण्यमवाप्नोति देवलोकं च गच्छति। आरण्यक प० ८३.४१

२. गोदावर्या उत्तरतटे नासिको दक्षिणतटे च पञ्चवटी वर्तते।

३. अत्रैव रामः सीतामग्ना अन्तर्धाय तस्या रावणेन हरणस्य लीलां प्रकरोति स्मेति पौराणिकी गाथा।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पण्ढरपुरस्य केन्द्रभागे विठोबा-विष्णोर्मन्दिरं रखुमाई (रूक्मिणी)-मन्दिरेणानुसंहितं वर्तते । कृष्णपरिवारस्य सत्यभामा-जाम्बवती-राधा-बलरामादीनां मन्दिराण्यभ्यन्तरे वर्तन्ते । चन्द्रभागातटे जनाबाई-एकनाथ-नामदेव-ज्ञानेश्वर-तुकारामादीनां मन्दिराणि सन्ति । विष्णोः परमभक्तस्य पुण्डरीकस्य स्मारकमिदं तीर्थम् । पण्ढरपुर-मन्दिरं पुण्डरीकनामधेयस्य कस्यचित् पितृपरायणस्य विष्णोरनुग्रहेण तस्य विग्रहरूपेणोपस्थितिस्तत्र शाश्वती भवत्विति वरप्राप्तस्य स्मारको राजते ।

विजयनगरम्

मध्ययुगीनभारते विजयनगरं न केवलमाधिभौतिकदृष्ट्या समुत्कर्षं लेभेऽपि तु सांस्कृतिकप्रदायेनाखिलं भारतमृणीचकार । द्वादशक्रोशपरिधौ तत्रत्यतीर्थमालया विरूपाक्षमन्दिरमुप तुङ्गभद्रां शेखरायते । तस्यैकस्मिन् प्राङ्गणे स्वामिनो विद्यारण्यस्य समाधिः श्रीमाधवाचार्यस्य मूर्तिश्च स्तः । विविधप्राङ्गणेषु शिलाचक्रवालेषु च नैकदेवानामवताराणां च प्रतिमा मन्दिरेषु प्रतिष्ठिता दर्शनीयाः सन्ति । विरूपाक्षाद् द्विक्रोशदूरं माल्यवान् पर्वतो स्फटिकशिलाभिः समलंकृतः । तत्र रामलक्ष्मणौ वर्षावासं कुरुतः स्म । सभामण्डपे श्रीराममन्दिरे सीताराम-लक्ष्मणानां विशालमूर्तयः, सप्तर्षि-मूर्तयश्च शोभन्ते ।

क्षेत्रेऽस्मिन् किष्किन्धा-परिसरे नैकरामावास-स्थलानि राजन्ते । तत्र ऋष्यमूकपर्वते श्रीरामन्दिरमवस्थितम् । निकटे मतङ्गपर्वतशिखरे महर्षि-मतङ्गस्याश्रम आसीत् । नातिदूरे गन्धमादनपर्वतशिखरे गुहायां श्रीरङ्गस्य शेषशायिमूर्त्तिर्वर्तते । तुङ्गभद्राया दक्षिणतटे विट्ठलमन्दिरे विट्ठलस्य पदचिह्नं राजते ।

गोकर्णः महाबलेश्वरः

महाभारते प्रथितं गोकर्णतीर्थं त्रिलोकवद्यं शिवं समाश्रयते[1] । कालिदासो रघुवंशे वर्णयति—

अथ रोधसि दक्षिणोदधेः श्रितगोकर्णनिकेतमीश्वरम् । ८.३३

गोकर्णे शिवस्यात्मतत्त्वलिङ्गं वर्तते । ८.३३ । प्रति विंशवर्षं तत्राष्टबन्ध-महोत्सव आयोज्यते । आत्मतत्त्वलिङ्गमेव महाबलेश्वरः । अत एव गोकर्णो महाबलेश्वरस्य पर्यायः । मन्दिरेऽस्मिन् शास्त्रेश्वरलिङ्गं वीरभद्रमूर्तिः, शिवपरिवारसदस्यानां मूर्तयश्च प्रतिष्ठापिताः । तत्र कोटितीर्थे शिवविष्णवोरु-भयोरेका मूर्तिर्वर्ततेऽर्धमर्धम्[2] । वेंकटरमणमन्दिरे चक्रपाणिर्विष्णुर्दृश्यते ।

---

१. आरण्यकपर्वणि ८३.२२-२७

२. ईदृशी मूर्तिर्हरिहरनगरे तुङ्गभद्रातटे वर्तते ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

हालेबिदः द्वारकासमुद्रः

महीशूरजनपदे बंगलोर-आरसी-रेलमार्गतो नवक्रोशदूरमेकस्मिन् लघुग्रामे हालेविदे स्थितमिदं मन्दिरं होयसलेश्वर-सन्तलेश्वरयोः प्रतिनिधिभूतं कलायाः प्राग्भावं निदर्शयति । मन्दिरभित्तिचित्राणि सविशेषं मनो हरन्ति । निकटे पार्श्वनाथ-मन्दिरे जैनधर्मोन्नायकानां सर्वेषां तीर्थंकराणां मूर्तयो विराजन्ते ।

शृङ्गेरी

तुङ्गतटेऽवस्थितेयं नगरी शृङ्गेरी शंकराचार्येण स्थापितमाद्यं मठं क्रोडीकरोति । शृङ्गेरीवसतेः परस्मिन् भागे पर्वतिकोपरि विभाण्डकेश्वर-मन्दिरं शृङ्गिण ऋषेराश्रमस्य प्रतिनिधित्वं करोति ।

उदीपी

दक्षिणकन्नड-देशेऽरब-सागर-पश्चिमघट्टपर्वतयोर्मध्ये परशुरामक्षेत्रे द्वैतवेदान्ताचार्यस्य मध्वस्याष्ट मठाः सन्ति ।

कालडि

पेरियारनदीतटे केरलप्रदेशे कालडिनामके ग्रामे शंकराचार्योऽद्वैतवेदान्तप्रभाकरो जनिं लेभे । तस्य नाम्ना तस्य मातुः सुभद्रायाश्च नाम्ना मन्दिरद्वयं प्रतिष्ठितं दर्शनीयम् ।

मेलूकोटे यादवगिरिः

दक्षिणभारते चत्वारि वैष्णवक्षेत्राणि—श्रीरङ्गम्, तिरुपतिः, काञ्चीपुरम्, मेलूकोटे च सन्ति । वैष्णवदिव्यदेशेषु यादवगिरिः प्राग्भावं भजते । रामानुजाचार्यस्तस्योद्धारकस्तत्र १६ वर्षाणि वसतिं चकार । मेलूकोटे सम्पत्कुमारस्वामिनो बृहन्मन्दिरं सातिशयं रोचते । तत्र नारायणविग्रहः प्रतिष्ठितः । निकटे पञ्चतरणी वेदपुष्करणी वा सरसी राजते । तस्याः सन्निधौ पर्वतप्रस्थे योगनृसिंहस्य मन्दिरं शोभते । तत्र परिधानशिलायां भगवान् दत्तात्रेयः संन्यासं गृहीतवानिति किंवदन्ती श्रूयते । रामानुजाचार्यस्तु पुनः परिधानं जग्राह । अन्ये संन्यासिनोऽत्र स्वीयं परिधानमवतार्य पुनर्गृह्णन्ति ।

गोम्मटतीर्थम्

प्रदेशेऽस्मिन् जैनतीर्थेष्वनुत्तममायतनं श्रवणबेलगोलनगरे रोचते । तीर्थमिदं गोम्मटनाम्ना प्रख्यातम् । अत्रान्तिमः श्रुतकेवली भद्रबाहुः समाधिमरणमवाप्तवान् । तत्रैव भद्रबाहोः ३८ हस्तोच्छ्रयमूर्तिरौदात्त्यं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विभ्राजयति[1]। नातिदूरं पर्वतप्रस्थे चतुर्विंशति-तीर्थंकर-वसतिर्मन्दिररूपेण विहिता। कुण्डसमीपे चेन्नणवसतौ चन्द्रनाथस्वामिनो मूर्तिरस्ति। सन्निधौ उच्छ्रितचत्वरे मन्दिरगर्भगृहे आदिनाथ-शान्तिनाथ-नेमिनाथानां मूर्तयः स्थापिताः। परिसरे शतशो जैनमूर्तयः परिनिष्ठापिता विलसन्ति।

वेंकटाचलम् तिरुपति-बालाजी

वेङ्कटाद्रिनिवासं तं चिन्तयन् घटिकाद्वयम्।
कुलैकविंशतिं धृत्वा विष्णुलोके महीयते॥

स्कन्दपुराणे वैष्णवभूमि वा. ४०

वेङ्कटाचल इति पर्वतः सामग्र्येण भगवत्स्वरूपं प्रतीकयति।[2]

वेङ्कटाचलस्य परिसरे पाण्डव-तीर्थं, पापनाशनतीर्थं, जाबालितीर्थम्, आकाशगङ्गा, वैकुण्ठतीर्थं, चक्रतीर्थं, कुमारधारा, रामकृष्णतीर्थं, घोणतीर्थं इत्यादीनि दर्शनीयानि। आकाशगङ्गाया जलं प्रतिदिनं वेङ्कटेश-देवस्य पूजार्थं नीयते। पापनाशने पर्वतद्वयमध्यतः परिसरन्त्यां धारायां शृंखलां गृहीत्वा स्नानं विधीयते। वैकुण्ठगुहातो निस्सरन्ती जलधारा वैकुण्ठतीर्थमित्यभिधीयते। पाण्डवतीर्थस्य निर्झर-समीपे पाण्डवानां प्रतिमा विराजन्ते। ततोऽर्धक्रोशमात्रं जाबालितीर्थं विलसति। वेङ्कटाचलस्य पादे तिरुपतिरिति ख्यातं नगरं सन्निविष्टम्। तत्र रामानुजेन स्थापितं मन्दिरद्वयं शेषशायि-गोविन्दराजस्याम्बायाश्चास्ति।[3] वैशाखमासे मन्दिरप्राङ्गणे ब्रह्मोत्सवः प्रतिवर्षं सम्पाद्यते। तिरुपतेरुत्तरदिग्विभागे कोदण्डराम-मन्दिरे सीतारामलक्ष्मणा मूर्तिरूपेण पूज्यन्ते।

अरुणाचलम्

स्कन्दपुराणानुसारेण अरुणाचल-माहात्म्यं प्रगीयते—

अस्ति दक्षिणदिग्भागे द्राविडेषु तपोधन।
अरुणाख्यं महाक्षेत्रं तरुणेन्दु-शिखामणेः।
योजनत्रयविस्तीर्णमुपास्यं शिवयोगिभिः।
तद्भूमेर्हृदयं विद्धि शिवस्य हृदयंगमम्॥
तत्र देवः स्वयं शम्भुः पर्वताकारतां गतः।
अरुणाचलसंज्ञावानस्ति लोकहितावहः।

---

१. मूर्तिरियं पर्वतशिखरस्य तक्षणेन निर्मिता।
२. वेंकटाचलस्यापरं नाम शेषाचलोऽस्ति। वेंकः पापं तस्य कटोनाशक इति वेंकटः।
३. रामानुजाचार्यस्य प्रधानाष्टपीठेषु इदमन्यतमम्। आचार्योऽत्र वेंकटाचार्य इत्यभिधीयते।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सुमेरोरपि कैलासादप्यसौ मन्दरादपि ।
माननीयो महर्षीणां यः स्वयं परमेश्वरः ।।

माहेश्वर-खण्डे० उत्तरा ३.१०.१४

शिवस्याग्निलिङ्गमरुणाचले प्रतिष्ठितम् । कार्तिकमासेऽरुणाचल-शिखरे कर्पूरस्य बृहद्राशिं समिन्ध्याग्निशिखोत्पाद्यते । सैव शिवस्याग्निलिङ्गमिति संकल्पः। अरुणाचलस्योपरिप्रस्थे सुब्रह्मण्यस्वामिनो देव्याश्च मूर्ती प्रतिष्ठापिते। अरुणाचलपादेऽरुणाचलेश्वरस्य विशालं मन्दिरं शोभते। अत्र विशालतम-गोपुरप्राशस्त्यं कस्य मनो न हरति । पुराणामुच्छ्रायो दशतलं प्रत्येकश औदात्त्यं विभ्राजयति । अरुणेश्वरस्य परिक्रमापथे शिवपरिवारसदस्यानां नव-ग्रहाणां दक्षिणामूर्तेः, नटराजस्य च कलात्मकमूर्तयो दर्शनीयाः। पार्वती-मन्दिरमुत्तरदिग्विभागे राजते ।

महाभारते काञ्चीप्रदेशस्य नगरस्य वा नाम वर्तते । किन्तु तत्र तस्या-स्तीर्थत्वं न प्रकाशितं दृश्यते ।[1] पौराणिकयुगे काञ्चीमाहात्म्यं ववृधे । तथाहि-

नेत्रद्वयं महेशस्य काशीकाञ्चीपुरीद्वयम् ।
विख्यातं वैष्णवं क्षेत्रं शिवसान्निध्यकारकम् ।।
काञ्चीक्षेत्रे पुरा धाता सर्वलोकपितामहः ।
श्रीदेवीदर्शनार्थाय तपस्तेते सुदुष्करम् ।।

ब्रह्माण्ड० ललितोपाख्यान ३५.१५-२०

मोक्षदायिपुरीषु काञ्ची अन्यतमा। अत्र हरिहरौ उभौ समभ्यर्चितौ। विष्णुकाञ्ची शिवकाञ्ची चोभयमेकनिष्ठं राजेते। इयं नगरी शक्तिपीठेष्व-न्यतमा। शिवकाञ्चयां सर्वतीर्थसरोवरो वर्तते। तस्य केन्द्रे तं परिधीकृत्य च नैकमन्दिराणि विलसन्ति। तेषु मुख्यं मन्दिरं काशी-विश्वनाथाभिहितम्। नातिदूरमेवैकाम्रेश्वरमन्दिरमस्ति । विशालस्यास्यमन्दिरस्य दशतलं गोपुरं विशिष्टमेव। शिवपरिवार-सदस्यानां सुब्रह्मण्यस्य च मूर्तयो दर्शनीयाः सन्ति।

नातिदूरं कामाक्षीमन्दिरं वर्तते । शक्तिपीठमिदं कामाक्षीदेवी त्रिपुर-सुन्दरी पर्यायात्र पूज्यते । एकस्मिन् भागे आद्यशंकराचार्यस्य मूर्तिः प्रतिष्ठिता । कामाक्षीमन्दिरे तन्त्राधिवासेन आद्या-विद्या-सन्तान-सौभाग्य-धन-धान्य-वीर्य-विजयलक्ष्म्यः संस्थापिताः । वामनमन्दिरे त्रिविक्रमविष्णोः सुब्रह्मण्यमन्दिरे च सुब्रह्मण्यस्वामिनः प्रतिष्ठा वर्तते । शिवकाञ्चीमष्टोत्तर-शतमन्दिराणि परिशोभयन्ति ।

---

१. प्राच्यैः प्रतीच्यैरथ दाक्षिणात्यैः ऊदीच्यकाम्बोजशकैः खसैश्च ।
शाल्वैः समत्स्यैः कुरुमध्यदेशैर्म्लेच्छैः पुलिन्दैर्द्रमिडान्ध्रकाञ्च्यैः ।। उद्योगे १५८.२०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

शिवकाञ्चीतः क्रोशमात्रदूरं विष्णुकाञ्ची लसति। तत्र वरदराजस्वामिनो[1] मन्दिरं सर्वश्रेष्ठं मन्यते । अत्र वैशाखमूर्णिमायां दक्षिणभारतस्य बृहत्तमो ब्रह्मोत्सव आयोज्यते। अत्र रामानुजाचार्यस्य प्रधानपीठेष्वन्यतमं पीठं वर्तते। एकस्मिन् मन्दिरे तस्य प्रतिमा विभाति । देवाधिराजभगवतो मूर्तिर्जले निमग्ना सरोवरेऽधिशेते। सा विंशतिवर्षान्तराले सकृदुन्नीयते महामंगलोत्सवे । शंकराचार्यस्य कामकोटिपीठं विष्णुकाञ्च्यां तेन प्रतिष्ठापितं विलसति।

चिदम्बरम्

चिदम्बरम् दक्षिणभारतस्य नितरां प्रसिद्धं तीर्थं नटराजमूर्तिप्रतिष्ठापनेन प्राग्भावं भजते । भगवतः शिवस्याकाशतत्त्वलिङ्गमत्रैव एकस्मिन गोपुरे राजते। तत्र नाट्यशास्त्रानुसारिनृत्यमुद्रा उत्कीर्णाः सन्ति।

नटराजमन्दिरद्वारं दक्षिणदिशि वर्तते। मन्दिरे नृत्यमुद्रायां शिवमूर्तिर्वर्तते। नटराजमन्दिरस्य मण्डपान्तर्गतगोविन्दराजमन्दिरे शेषशायिनारायणमूर्तिर्वर्तते। पार्श्वे पुण्डरीकवल्लीति नाम्ना लक्ष्मी मन्दिरे शोभते। मन्दिराद् बहिः शिवगङ्गासरोवरोऽस्ति । तस्य पश्चिमदिशि पार्वतीमन्दिरं वर्तते। चिदम्बरमन्दिरपरिधौ कस्यचिद्रजकस्य चाण्डालस्य, शूद्रद्वयस्य च मूर्तयः तेषां शिवभक्तिप्रोन्नतिं प्रकटयन्ति ।

कुम्भकोणम्

दक्षिणभारतस्य प्रमुखतीर्थेष्वन्यतमं कुम्भकोणं कावेरीतटे सन्निविष्टम्। तत्रत्यमन्दिरेषु पञ्चप्रमुखाणि सन्ति—कुम्भेश्वरः, शार्ङ्गपाणिः, नारीश्वरः, रामस्वामी, चक्रपाणिश्च । महामघसरोवरे तीर्थयात्रिणां स्नानं भवति। प्रतिद्वादशवर्षं कुम्भकोणे कुम्भमहोत्सवः सविशेषमायोज्यते।

कावेरीतटे महाकालेश्वरमन्दिरं, सुन्दरेश्वरमन्दिरं, इन्द्रमन्दिरं, महामाया (महाकाली) मन्दिरं च प्रमुखाणि सन्ति। महामघः काश्याः प्रतिरूपमेव। कुम्भोत्सवे तत्र सरोवरे गङ्गा वसति[2], प्रमुखमन्दिरे काशीविश्वनाथः सपार्वतीकः प्रतिष्ठितः। अन्येषां विष्णुशिवादिदेवाधिदेवानां समाहारस्तत्र जायते। ब्रह्मणो यज्ञे शंकरोऽमृतघटेन सहोपस्थितो भवति, अतः कुम्भकोणमित्यनुश्रुतिः।

---

१. वरदराजस्तु भगवान् नारायणः।

२. तत्र गङ्गेतिन वगङ्गा—यमुना-सरस्वती-नर्मदा-गोदावरी-काबेरी-महानदी-पयोष्णी-सरयूनद्यो गङ्गायाः सखीभूताः। प्रतिद्वादशवर्षं महामघे स्नानेन स्वस्व-स्नायिनां संगृहीतपापं ताः प्रक्षालयन्तीति पौराणिकी श्रुतिः। अत एव नवगङ्गा-कुण्डस्तस्य पर्यायः।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तञ्जौर-बृहदीश्वरः

तमिलप्रदेशे तञ्जौर-नामके नगरे बृहदीश्वरमन्दिरं नैकदृष्ट्या स्ववृहत्त्वं प्रसाधयति । काबेरी-तटेऽवस्थितं नगरं निसर्गतः 'सत्यं शिवं सुन्दरम्' शाश्वतं बृहत् कृत्वा दिङ्मण्डले प्रतनोति । चोलवंशीयराजराजेश्वराख्य-नगरपतिना नर्मदातः समानीतं शिवलिङ्गमत्र प्रतिष्ठापितम् । तदर्थं ७०० मनमितो नन्दी कुतश्चित् २०० क्रोशदूरात् समानीय प्रतिष्ठापितः ।

श्रीरङ्गम्

त्रिचनापल्लीमुप चतुष्क्रोशदूरं श्रीरङ्गं कावेरीनद्या मध्ये विशालद्वीपे प्रतिष्ठितम् । श्रीरङ्गमन्दिरे शेषशायिचतुर्भुजविष्णोः प्रतिमा श्यामवर्णा प्रतिष्ठापिता । शेषस्य फणावलिस्तां छत्रयति । तत्समीपं लक्ष्मीर्विभीषणश्चो-पविष्टौ । पौषशुक्लैकादश्यां वैकुण्ठद्वारोद्घाटनावसरे द्वाराद्बहिर्निर्गमनं स्वर्गकारणमिति समादृतम् ।

सेतुबन्ध-रामेश्वरः

पौराणिकयुगे रामेश्वरमिति तीर्थं प्रसिद्धिं गतम् । स्कन्दपुराणानुसारेण—

अस्ति रामेश्वरं नाम रामसेतौ पवित्रितम् ।
क्षेत्राणामपि सर्वेषां तीर्थानामपि चोत्तमम् ॥
सेतुदर्शनजं पुण्यं शेषेणापि न गण्यते ।
समस्तदेवतारूपः सेतुबन्धः प्रदर्शितः ॥
सेतुं रामेश्वरं लिङ्गगन्धमादनपर्वतम् ।
चिन्तयन् मनुजः सत्यं सर्वपापैः प्रमुच्यते ॥

ब्राह्मखण्डे सेतु० १७, ४८

समुद्रद्वीपे स्थितो रामेश्वरश्चतुर्षु धामस्वन्यतमः । द्वादशज्योतिर्लिङ्गेष्वपि रामेश्वर एकमेव । भगवता रामेण स्थापितोऽयम् । तस्य परिसरे लक्ष्मण-सीता-रामाभिधानि प्रसिद्धतीर्थानि राजन्ते ।

धनुष्कोटिः

रामेश्वरान्नातिदूरं धनुष्कोटिनामकं तीर्थं स्कन्दपुराणानुसारेण विमुक्तिदं, कैलासादिपदप्राप्तिकारणं, परमार्थदम्, सर्वकाम-ऋणदारिद्र्यनाशनं चास्ति । केवलं नामजपेन स्वर्गापवर्गदं, महापुण्यफलप्रदमिदम् । तत्रैव वङ्गोदधि—हिन्दमहासागरयोर्भेदकस्थलं विद्यते । अत्र षट्त्रिंशद्दानानन्तरं स्वर्णधनुषो दानं क्रियते । स्नानविधिः कृत्यानुमतेरनन्तरं प्रारभ्यते । नातिदूरं राममन्दिरं सीतालक्ष्मणादिमूर्तियुतं विद्यते ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मीनाक्षी-मन्दिरम्

मदुरा-नगरस्य केन्द्रभागे मीनाक्षी मन्दिरं वर्तते। तस्य दक्षिणदिशि उच्चतमं पश्चिमदिशि भव्यतमं च गोपुरं स्थितम्। वृहद्गोपुराणि एकादश-तलोच्छ्रितानि सन्ति। तत्र स्वर्णपुष्करिण्यामिन्द्रो ब्रह्महत्यानन्तरं निगूढ आसीदिति कथा। नैकमण्डलेषु दिव्यमूर्तीनां परिग्रहे मीनाक्षी-देवी अधिराजते। तस्या मन्दिरस्य परिक्रमापथे ज्ञान-क्रियापराक्रमाणां शक्तयो मूर्तिभूता दर्शकान् धर्मपथे नियोजयन्ति।

मीनाक्षीदेव्याः प्रीतये बहव उत्सवा यथाकालं सम्भ्रियन्ते। वृहत्तमोत्सवो मीनाक्षीकल्याण-मण्डपे सम्पाद्यते। चैत्रमासस्य दशदिनानि कल्याणोत्सवः प्रचरति। मीनाक्षी-सुन्दरेश्वर-विवाहानन्तरमगणित-विवाहार्थिनां वरकन्यकानां नातिव्ययेनोद्वाहाः सम्पाद्यन्ते। वैशाखशुक्लपक्षे पञ्चमीतोऽष्टदिनानि वसन्तोत्सवः सम्पाद्यते। आषाढश्रावणौ समग्रतः प्रतिदिनमुत्सववर्धनानुबन्धौ स्तः। आषाढे मीनाक्षीदेव्याः पूजा विशिष्यते। श्रावणे पुनः शिवस्य ६४ लीलानुस्मरणोत्सवा विधीयन्ते। एवमेवापरेषु मासेषु मीनाक्षीशिवयोश्चरितानि स्मृतिपथे द्रढयितुमुत्सवाः सम्पाद्यन्ते।

कन्याकुमारी

मदुरायाः परिसरे सुन्दरराज-पेरुमाल-तिरुप्परकुन्नम्-वृषभाद्रिप्रभृतीनि तीर्थानि सन्ति। कन्याकुमारी-तीर्थस्य प्रतिष्ठा महाभारतानुसारेणाधोविधं प्रतीयते—

ततस्तीरे समुद्रस्य कन्यातीर्थमुपस्पृशेत्।
तत्रोपस्पृश्य राजेन्द्र सर्वपापैः, प्रमुच्यते॥ आरण्यक. ८३.२१
कुमार्यः कथिताः पुण्याः पाण्ड्येष्वेव नरर्षभ॥ (८६.११)

भारतस्य दक्षिणधुरि कुमारीनामकोऽन्तरीपो वङ्गोदधिना, अरबसागरेण, हिन्दमहासागरेण च परिधीकृतोऽनन्तसौन्दर्यराशि क्रोडीकरोति। अत्र समुद्रे स्नानस्य विधानमस्ति। कन्याकुमारीतीर्थस्य प्राकृतिकविभूतिरनुपमैव रोचते। चैत्रपूर्णिमायाः सायंकाले सममेव पूर्णचन्द्रस्योदयः सूर्यस्य चास्तमनं निकामं मनोहरति। प्रतिदिनमेव तत्र सूर्योदयः सूर्यास्तश्च चारुतमं दृश्यमुपहरतः।

तत्र वङ्गोदधौ सावित्री-गायत्री-सरस्वती-कन्याविनायकादितीर्थानि विलसन्ति। कुमारीमन्दिरस्य दक्षिणदिशि मातृ-पितृ-भीमातीर्थानि सन्ति। पश्चिमदिशि स्थाणुतीर्थं वर्तते। नैकद्वाराभिगमनान्तरं देवीदर्शनं भवति। सा हस्ते मालाधारिणी स्वयमेव जपपरायणा भक्तान् ध्यानपरायणं जीवन-सन्देशं प्रवचन्तीव प्रतिभाति।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कुमारी-मन्दिरस्य सन्निधौ भद्रकाली प्रतिष्ठिता। सा शक्तिपीठेष्वन्यतमा सम्मानिता। परिसरे गणपति-मन्दिरं, शिव-मन्दिरद्वयं, काशीविश्वनाथमन्दिरं च शोभन्ते। कुमारीयं दुर्गारूपिणी देवानां यज्ञे चिदग्निः संजाता युद्धे बाणासुर-संहारिणी पुराण-प्रसिद्धा।

कुमारी-मन्दिरं नैकमहोत्सवानां प्राङ्गणमस्ति आश्विन-चैत्रनवरात्रयोस्तत्रोत्सवगर्भा पूजा सम्पाद्यते। चैत्रपूर्णिमा, आषाढाश्विनामावस्या शिवरात्रिश्चान्ये प्रमुखा उत्सवदिवसाः।

विवेकानन्द मन्दिरम्

आधुनिकभारतस्य भव्यतमं तीर्थं कन्याकुमारी-नामान्तरीपादीषद्दूरविच्छिन्ने श्रीपादशिलानामके द्वीपे विराजते विवेकानन्दमन्दिरम्। स्वामी विवेकानन्दः कुमारीतस्तीर्त्वा श्रीपादशिलामभ्युपगत इति पराक्रमोऽद्भुतसाहस-प्रमाण आसीत्। तत्र दिवसत्रयं निराहारव्रतः सोऽध्यात्मिकध्यानयोगेन विश्वकल्याणशक्तिं प्रचुरयामास। मन्दिरस्य प्राङ्गणे पुस्तकालयः स्थापितः। तत्र भारतीय-गौरव-ग्रन्थानां बृहत्तमः संग्रहो लभ्यते।

त्रिवेन्द्रम् तिरुअनन्तपुरम्

कन्याकुमारीतः पञ्चविंशति-क्रोशदूरं त्रिवेन्द्रमिति तीर्थवल्लीलतिकायते। त्रिवेन्द्रस्य पद्मनाभ-मन्दिरं श्लोक्यते। प्रधानमन्दिरस्य गर्भगृहे शेषशायिभगवतो विष्णोर्नाभौ मूलिते पद्मे ब्रह्मा विराजते। शेषशायिविष्णुमूर्तिष्वियं विशालतमा सती तक्षणशिल्पस्य सार्वकालिकीं परां काष्ठां प्रद्योतयति।

पश्चिमभारतीयतीर्थानि

अर्बुदाचलः आबू

महाभारतानुसारेणऽर्बुदाचले वसिष्ठस्याश्रम आसीत् त्रिषु लोकेषु विश्रुतः। तत्रैकरात्रिवासेन गोसहस्रफलं लभ्यम्[1]। अधस्ताद् गौतमाश्रमो वर्तते। तत्र मन्दिरे गौतमर्षेर्मूर्तिः प्रतिष्ठापितास्ति।

अर्बुदाचलस्य परिसरे ओरियाग्रामं निकषा शान्तिनाथ-तीर्थङ्करस्य विशालं मन्दिरं तस्य पुरतोऽचलेश्वर-शिवस्य च मन्दिरमस्ति। तस्य पश्चात् मन्दाकिनीकुण्डो वर्तते। समीपमेव महिषासुरस्यार्जुनस्य च मूर्तिद्वयमस्ति। आबूनगरापणस्य पश्चात् नखीसरोवरो वर्तते। तस्य परिसरे महादेव-रामकपालेश्वराणां मन्दिराणि चम्पागुहा, राममुहा, रामकुण्डः, कपिलातीर्थं च सन्ति। अत्रैवार्बुदादेवी प्रतिष्ठापिता। अर्बुदादेव्या अपरा मूर्तिरर्बुदाचलशिखरे गुहायां प्रतिष्ठापितास्ति।

१. आरण्यकपर्वणि ८०.७५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

जैनमन्दिरमाला देलवाडा-ग्रामं निकषा वर्तते। तत्र पञ्चमन्दिराणि-विमलवसहीलूणवसही-पित्तलहर-चौमुखामहावीराभिधानि सन्ति। आदि-नाथस्य पित्तल-स्वर्णमिश्रित-हस्तद्वयोच्छ्रिता मूर्तिः पद्मासनमुद्रायां वर्तते। विमलशाहेनैकादश-खीष्टाब्दे मूर्तिरियं निर्मिता। तस्य वंशजैर्यथावश्यकं तस्य नवीकरणमनुष्ठितम्।

द्वारका-द्वारवती-पिण्डारकम्

सप्तपुरीषु द्वारकान्यतमा गण्यते। वर्तमानद्वारका गोमतीद्वारमिति प्रचक्षते। महाभारतानुसारेण द्वारका तीर्थमासीद्यत्र गोमती काठियावाडे समुद्रं संगच्छते[1]। स्नानाय पिण्डारकनामकं तत्र तीर्थमासीत्। तथाहि—

ततो द्वारवतीं गच्छेन्नियतो नियताशनः।

पिण्डारके

नरः स्नात्वा लभेद्वहु सुवर्णकम्। (आर० ८०.८२)।

नृगस्य कृकलास-योनित उद्धारः कृष्णेन द्वारकायां कृतः। कृष्णेन तीर्थीकृतमिदं स्थलमिति लहाभारतीयं मतमधोविधम्—

पुण्या द्वारवती तत्र यत्रास्ते मधुसूदनः।
साक्षाद्देवः पुराणोऽसौ स हि धर्मः सनातनः॥ (आ० ८६.२१)
तत्र पिण्डारकं नाम तापसाचरितं शुभम्।
उज्जयन्तश्च शिखरी क्षिप्रं सिद्धिकरो महान्॥ (आ० ८६.१८)

पुराणोचितातिशयोक्तिरेव द्वारका-माहत्म्यवर्णने-स्कन्द पु० प्रभासखण्डे १७.७९

अपि कीटपतंगाद्याः पशवोऽथ सरीसृपाः।
विमुक्ताः पापिनः सर्वे द्वारकायाः प्रभावतः॥
या गतिः सर्वजन्तूनां द्वारकापुरवासिनाम्।
सा गतिर्दुर्लभा नूनं मुनीनामूर्ध्वरेतसाम्॥

द्वारकामन्दिरेषु सप्ततलं द्वारकाधीशमन्दिरं (रणछोडदास-मन्दिरं) प्रमुखं गण्यते। मन्दिरस्य शिखरं सविशेषमुच्छ्रितं दूरतोऽपि लक्ष्यते। तत्रातिलम्बितो ध्वजपट आधूयते। तस्य मन्दिरस्य परिसरे त्रिविक्रम-प्रद्युम्न–कुशेश्वराम्बा-पुरुषोत्तम–दत्तात्रेय-देवकी-लक्ष्मीनारायण–माधव-सत्य-भामा-राधा-जाम्बवती-मन्दिराणि सुसंहतं निर्मितानि। द्वारकाधीश्वर-मन्दिराद् द्वारका-परिक्रमा प्रारभ्यते। कृष्णभवन-स्थानीय-मन्दिरमिदं प्रतिष्ठितमिति पुराकथा। द्वारकाचार्यशंकरस्य मठं क्रोडी करोति।

सोमनाथः प्रभासो वा

महाभारतानुसारेण तत्रासीत् सौराष्ट्रदेशे प्रभासनामकं पुण्यं (तीर्थम्)

---

१. गोमती तु समुद्रजलपूरितकासार एव।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पृथिव्यां प्रवरं प्रभासनात् प्रभासः। तीर्थस्य प्रथमा प्रभावशालिनी गाथा श्रूयते यच्छापेनास्तंगमितमहिमा चन्द्रोऽत्र स्नानेन शापविमुक्तोऽभवत्। ततः परं तीर्थमिदं चन्द्रप्रकीर्तनात् सोमनाथः। पुनस्तेजः सम्प्राप्य चन्द्रो जगद् भासयते। तद्यथा—

अतश्चैनं प्रजानन्ति प्रभासमिति भूमिप।
प्रभां हि परमां लेभे तस्मिन्नुन्मज्ज्य चन्द्रमा॥ (शल्य० ३४.७७)

अर्जुनो वनवासप्रकरणे तीर्थान्यनुचरन् प्रथमतया कृष्णेन प्रभासदेशे सम्पर्कितः[२]। 'उदधौ तीर्थं प्रभासो देवैः प्रतिष्ठापितमिति धौम्यः प्रवक्ति महाभारते[३]। प्रसिद्धोऽयं सोमनाथज्योतिर्लिङ्गप्रतिष्ठया।

विक्रमाङ्कदेवचरिते सोमनाथस्य मन्दिरं वर्णितमधोविधम्—

तेषां मार्गे परिचयवशादर्जितं गुर्जराणाम्।
यः सन्तापं शिथिलमकरोत् सोमनाथं विलोक्य॥ (१८.८७)

महाभारतानुसारेण कृष्णोऽसंख्यवर्षाणि प्रभासे तपश्चचारेति वृत्तेन प्रभासो भूयिष्ठं गौरवान्वितः[४]। युधिष्ठिरो भ्रातृभिः सह तत्र भृशं तपोऽतप्यत[५]। अन्यच्च—

एतत् प्रभासते तीर्थं प्रभासं भास्करद्युते।
इन्द्रस्य दयितं पुण्यं पवित्रं पापनाशनम्॥ (आरण्य० १३०.७)

अस्मात्तीर्थाद् बलरामकृष्णौ देवलोकं ययौ[६]। नैकवारं सोमनाथमन्दिरस्य विधर्मिभिः प्रध्वंसनं कृतम्, मनस्विभिः पुनः पुनः तस्य निर्माणं कृतम्। स्वतन्त्रे भारते सरदार-वल्लभभाई-पटेलेन सुकृतं प्राचीनस्थाने मन्दिरमिदं राजते।

गिरिनगरम् (जूनागढ)

बहूनां जैन-हिन्दू-तीर्थ-स्थलीनां समवायो गिरिनगरस्य विशेषता वर्तते। अस्य स्थानस्य लोकप्रियतां विलोक्य महाराजाशोकः शिलालेखमेकं कारयामास। तस्मिन् शिलोच्चये रुद्रदामा १५० ख्रीष्टाब्दे स्कन्दगुप्तश्च

---

१. शल्यपर्वणि ३४.३६,३७ २. आदिपर्व २१०.४

३. आरण्यकपर्व० ८६ १७

४. प्रभासं चाप्यथासाद्य तीर्थं पुण्यजनोचितम्।
तथा कृष्ण महातेजा दिव्यं वर्षसहस्रकम्।
आतिष्ठस्तप एकेन पादेन नियमे स्थितः। (आरण्यक १३.१४)

५. आरण्यक प० ११८.१५-१७

६. मौसलपर्वणि ४।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

४५६ ख्रीष्टाब्दे सुदर्शनतडाग-विषयकस्वकृतिं लेखितवन्तौ[1]।

गिरिनगरं पुरोर्जवान्, रैवतकगिरिर्वा काठियावाडप्रदेशस्य राजधानी ३२० ख्री० पूर्वतः प्रभृति ४७५ ख्रीष्टाब्दं यावद् बभूव[2]। गिरिनगरद्वारमुपाशोकस्य शिलालेखो वर्तते। तत्र वामनेश्वर-शिवमन्दिरमस्ति।

गिरिनगरपादे दामोदरकुण्डो वर्तते। तत्र स्वर्णरेखा-नदीं बद्ध्वा सरोवरो निर्मितः। तस्य तटे राधादामोदर-मन्दिरं दर्शनीयम्। ततः परं रेवती-कुण्डो वर्तते। तस्य परिसरे नैकमूर्तयः शिवपरिवारस्य सन्ति। गिरिनगरारोहणपथः दशसहस्रसोपानाश्रयैः पद्यते। तस्मिन् पथि जैन[3]-हिन्दूनां देवीदेवाः, तीर्थंकर-सिद्धा मूर्तरूपा मन्दिरेषु समाश्रिताः सन्ति। अत्र नरसीमेहताचमत्कारा धार्मिकप्रवृत्तिं प्रबोधयितुं कीर्त्यन्ते।

भौमतीर्थानि

प्रभावाद्द्भुताद् भूमेः सलिलस्य च तेजसा।
परिग्रहान्मुनीनां च तीर्थानां पुण्यता स्मृता॥
तस्माद् भौमेषु तीर्थेषु मानसेषु च नित्यशः।
उभयेष्वपि यः स्नाति स याति परमां गतिम्॥
(शब्दकल्पद्रुमे पृष्ठम् ६२६)।

तीर्थदर्शनं तु सर्वेषां कृतेऽपरिहार्यमेव यदि नाम ते भाविजीवने दारिद्र्यान्मुक्ता भवितुं कांक्षन्ति। न केवलं स्वयमेव तीर्थयात्रिको भवेदपितु नैकान् सम्बन्धिनस्तदर्थं प्रेरयेत्।

स्नापयेत् स्निग्धमित्रादीन् ज्ञातींस्तीर्थे नरोत्तम।
अन्यथापहरन्त्येते बलात्तीर्थभवं फलम्। (स्कान्दम्)।

तीर्थदर्शनं भारतीयमानसे आध्यात्मिकीं पूर्णतां, रसात्मकं लालित्यं,

---

१. चन्द्रगुप्तमौर्येण पर्वतपादे सेतुबन्धं निर्माय महातडागः कारितः। तस्य पौत्रेणाशोकेन स प्रणालीभिरलंकृतः। तस्मिन् कालक्रमात् परीवहेण ध्वस्ते सति महाक्षत्रपेण रुद्रदाम्नात्रिगुणदृढतरं विस्तारायामं सेतुं विधाय सुदर्शनतरं कारितम्। त्रिंशतवर्षानन्तरं ४५६ ख्रीष्टाब्दे गुप्तवंशीयेन महाराजस्कन्दगुप्तेन तस्य नवीकरणं सुसम्पादितम्।

२. इदानीं नगरमिदं जूनागढ इति ख्यातम्।

३. जैनसम्प्रदायस्य सिद्धक्षेत्रमिदम्। नेमिनाथोऽसंख्या मुनयश्चात्र निर्वाणं लब्धवन्तः।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

राष्ट्रिय-सम्पृक्ति[1] च सम्यक् प्रबोधयितुमासीदिति प्रो० पाण्डुरङ्ग-वामनकाणे महोदयस्य समीचीनं सम्मतम्। भारतस्य शाश्वतनैसर्गिकनिधिर्देशकालान्तराले परिव्यापिनी सांस्कृतिकावदानस्य स्रोतस्विनी च तीर्थे सन्निधिं कुरुतः। तीर्थस्य नैसर्गिकं स्वरूपं नदी-पर्वतारण्येषु विलसति। पुनर्मनस्विनां कलापरायणानां शिल्पिनां चान्तर्दृष्टि-जनितमेव देवतादीनां सांस्कृतिकं रूपायणम् तेन लोकत्रयस्य रमणीयता समाहारीकृत्य मन्दिर-गुहादिषु मूर्तिचित्रादिषु च विन्यस्यते। पूर्वोक्तं द्वयं भावुकदर्शकस्य चित्तं लौकिकव्यापार-पाशबन्धादुन्मोचयति, क्षणं वा चिरं वा व्यावहारिकधरातलादुन्नमयति, भूमानं विभावयति च। इयं मानसी वृत्तिः सौष्ठवस्य, वैपुल्यस्य, शान्तेश्च प्रकर्षं प्रतनोति; अथ च यत् क्षुद्रं तदपाकरोति।

वस्तुतस्तीर्थं तु सर्वं तदेव येन मानवः पावनः पावनतरः पावनतमश्चोन्नीयते। भवतु नाम तत् सरित्-सरोवर-समुद्रजलं, पर्वतस्योदात्तशिखरम्, अरण्यस्य गहनं, महामनीषिणामृषीणां च तपोज्ञानविज्ञानं दिव्यव्रतानां लोकहितं वा। एतानि सर्वाणि समष्टिशो व्यष्टिशश्च तीर्थं यत्रावगाह्य मानवता न केवलं भारतेऽपितु विश्वस्मिन्ननादिकालतः सत्प्रवृत्तिपरायणा भूता, भवति, भविष्यति च।

गौरवग्रन्थवत् प्रायस्तीर्थानि निरक्षराणामपि दर्शकानां मानसे सनातनं दिव्यं च पुरावृत्तसांस्कृतिकादर्शं निष्ठापयन्ति।

तीर्थव्रतो युवराजः कर्णसिंहो निष्कृषति —

A pilgrimage symbolises, as it were, the long pilgrimage of the soul towards its ultimate sublime goal. Almost all the most important pilgrimages in India take the devotee along dangerous and hazardous paths, testing his devotion at every step.

Pilgrimage to Shree Amaranath p. 18.

---

१. तीर्थानि देवैरसु[र]ऋषिभिर्मनुष्यैश्च कृतानि पुरातनकालतः सर्वेषां सांस्कृतिकवर्गाणां सम्पृक्तावदानानि समेषां धर्मधियमेकमुखीमुन्नमयन्ति। ब्रह्माण्डपुराणानुसारेण —

चतुर्विधानि तीर्थानि स्वर्गे मर्त्ये रसातले।
दैवानि मुनिशार्दूल आसुराण्यार्षाणि च॥
मानुषाणि त्रिलोकेषु विख्यातानि सुरादिभिः॥ ७०.१६–१९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

शब्दानुक्रमणिका

अ

अकबरः ८०१
अक्कादेवी ४५०
अक्षमाला ३८०
अक्षयवटः (परि) २५
अक्षरम् (ब्रह्म) ६९१
अगस्त्यः ४६,२२६
आश्रमः ७७, २४२
अग्निदग्धः १५७
अग्निदेशः ८४१
अग्निमन्दिरम् ८३१
अग्निष्टोमः (परि) ८
अग्निहोत्रम् ६३४,
अग्निहोत्र-परायणः १८४
अग्रजन्मा ८१८
अग्रहारः ८६,३५२
अङ्गानि (द्वादश) ६४
अङ्गकोरवाटः ८६१
अङ्गद्वीपः ८५९
अचित्ती ६६३
अजगर-चरितम् २७९
अजातशत्रुः ७७९
अजीवः ७८८
अज्ञः ५४
अण्डमानः (इन्द्रद्वीपः) ८५४
अतिथिदेवः १२८
पूजनम् १६१
प्रियः १६१
अतिथिसत्कारः ६६४
अतीशः (ज्ञानदीपङ्कर) १०१, ८५२, ८६८
अदितिः ४२६
अदीनः १६३
अदृश्यकरणी ७४
अधीतम् १७२
अध्यापकः ३९२
अनलहक ८३३
अनसूया २३०
अनड्वान् (ब्रह्म) २५८
अनागारस्थितिः २०
अनाज्ञातः २१
अनातोलिया ८३०
अनातोले फ्रांस ७७२
अनाम १७२ ८५५, ८६५
अनिरवसित ३६२
अनिरुद्धः ८८१
अनुतापः ६६९
अनुप्रेक्षा ११३
अनुराधपुरम् ८७९
अनुवृत्तिः १६७
—परायणः ४१९
अनुव्याख्यानम् ६०
अनुशासनम् १४
अन्तरात्मा ७३९
अन्तेवासिनः ३६६
अन्नेनः शितोंजो ८८२
अपचमानः १७८, १४९
अपरा संस्कृतिः २०
अफगानिस्तानम् ८४८
अब्दुल रज्जाकः ८४०
अब्बा ४५०
अभङ्गपदम् ७६१
अभयदानम् ६५५
अभिगमनम् १५०
अभिगम्यः ७७३
अभिजनः १२८
अभिराजः ८८०
अभिवादनम् ६४६, ६५१
—विधिः ६४९
अभोज्यान्नम् १८६
अभ्यसनम् ११४
अभ्युदय-निःश्रेयसौ १३४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

अभ्यूष (खादिका) ४५२
अमरनाथः ५,७६७
—गुह्या- परि.
अमृत १७३
—भोजनम् १५०
अमृतत्वम् २६४, ६८९
अम्बा २३१
अम्बिका २३१
अयोध्या परि.
अरण्यम् १०२०२
—संज्ञी २२७
अरण्यानी १९९, ६४५
परि. ८
अरण्यायनम् ७६
अराकान ८८०
अर्चना-सामग्री ७१७
अर्थविद्या ७३
अर्थशास्त्रम् ६५
अर्धनारीश्वरः १३६
अर्धाङ्गिनी १७६
अर्बुदः ३०४
अर्बुदाचलः (आबू) परि. ५०
अर्हः १८३
अलक्षेन्द्रः ८३१
अल्पः ४४
अल्लाहमन्दिरम् ८०७
अल्लोपनिषद् ८०१
अवगुण्ठनम् ४३८
(लज्जार्थम्) ४४१
विदेशेषु- ४४३
अवतारः ७४९, ७७३
अवन्तिका परि. ४०
अवन्ती परि. ४०
अवदानम् (सात्त्विकम्) २
अवलोकितेश्वरः ४८
अविमुक्तम् परि. १२
अव्यक्तः ७३९
—ज्ञातः ७३०
अव्ययपदम् ७३५
अंशुवर्मा ८५३
अशोकः १३, ६७३, ७९७, ८५३, ८७७, ८७९, ८८०
अश्वघोषः ४७
अश्वमेधः ६३८
अश्वत्थामा ३५४
अश्वसूत्राणि ६७
अश्ववर्मा ८७५
अश्वस्तनः २७४
अश्वस्तनिकः १८४
अश्विनौ २९९
अष्टभार्यः ४३२
अष्टविध-विवाहः १३९
अष्टाङ्गिकमार्गः ७७१
अष्टाध्यायी ६४
असर्वः ४१७
असिचर्या ६७
असुरः १४१
असुराः ३२१
अस्पृश्यता ३९१, ४००
अहं सर्वभूतेषु ७४३
अहिंसा ८१२
अहिच्छत्रा ७९०
अहुतम् १५१

आ

आकाशशायी २०२
आगस्टसः ८७८
आग्रयणम् ६३६
आचारप्रतिष्ठापका देवाः ३००
आचार्यः ५०
—देवः १२८
—कुलवासः १३०
—कुलम् ८०
—गौरवम् ४१
—वसतिः ७५
—शिष्यौ ५२
आचार्याः ३९२
आजगर-वृत्तिः २७९
आज्ञानम् १०९
आतिथ्यम् १५८
आत्मगुणाः ३३३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

आत्मजिज्ञासा १६३
आत्मज्ञानम् ४४
आत्मतत्त्वम् २
आत्मरक्षाविधानम् ३५१
आत्मरतिः १
आत्मवान् ३५३
आत्मशुद्धिः ६३३
आत्मसंस्कृतिः २
आत्मा १
आदिदेवः ७७६
आदिनाथः परि. ३०
आदमः ८२१
आदर्शाः १६
आध्यात्मिकसाधना ६२१
आनन्दकाननम् परि. २६
आनन्दतीर्थः ७५४
आनन्दध्वजः ८४५
आनन्दवर्धनः ११८
आनन्दविहारः ८८१
आनृण्यम् १६७
आन्ध्राः ३७५
आन्विक्षिकी ६१
आपूपिकः ३९४
आयः परि. १
आम्नायः ११३
आयंस्टीन २१, १९९
आयशा ८२४
आयुर्वेदः ६६
आयोगवः ३७८
अरुणाचलम् परि. ४५
आरेलस्टील ८४१
आर्जवम् १७
आर्यः ३३७
आर्यावर्तम् ८३१
आर्यिका ७८७
आर्यीकरणम् ३३८
आर्षकर्म १७१
आर्षकुटुम्बानि ३१३
आर्षविवाहः १४६
आल्डुअस-हक्सले २१
आवसथः १८२
आश्रमः ४,७७
आश्वकायनाः ८२८
आसुरम् (मायात्मकविद्या) ७३
आस्ट्रेलिया-समासादनम् ८८५
आहोपुरुषिका ३९३

इ

इटलीप्रदेशः ८७८
इण्डोनेशिया ८५३
इतिहासः ७४
इत्सिंग ८४८, ८६८
इद्रीसी ४०५
इन्द्रः १८८, २२४
—जालम् ७२
—भूतिः ७८८
—आदित्यः ८५६
इन्द्रार्जुनः ८४२
ईरावती १३७
इलावास (इलाहाबाद) परिः ४
इरावती ८५४
इष्टिः ६३४
इस्तंबोल ८२३
इहलोके कथं व्यवहर्तव्यम् ७८०

ई

ईराकः ८३४
ईशानपुरम् ८३४

उ

उइगुर ८४५
उजबकदेशः ८४०
उजबेकिस्तान ८२८
उज्जयिनी परिः ४०
उञ्छवृत्तिः १६०, ३५१
उड्डीयानः परि. ३८
उत्तरः ८८०
उत्तरजीवनम् ६८३
उत्तरीयम् ३२
उत्सर्जनम् १८६
उत्सादनम् ३९८
उदकवाद्यम् ७८
उदन्तपुरी-विद्यापीठम् १०२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

उदवासः २१२
उदात्तजीवनम् १६४
उदारचरिताः ८१८
उद्दालकः १०५
उदीपी परि. ४४
उपचाराः ६२६
उपनयनम् ३२
उपनयन- विधिः ३४
उपनिषदः १४
उपलप्रक्षिणी ३०६
उपविद्या ६५
उपवासः ६७०
उपवेदाः ६५, ८९१
उपसंग्रहणम् ६५१
उपसुन्दः २५२
उपह्वरः ३१२
उपह्वरपरि ७
उपाध्यायः ५१,१७७,३९२, ७९१
उपासना ७६८
उपेक्षा ७७५
उबला ८२४
उरुगायः ८८७
उषस्तिचाक्रायणः १०७
उर्लुक ८४६

ऊ

उर्ध्वरिताः २०२

ऋ

ऋद्धिः ७७७
ऋभवः १९१
ऋषभः २४७, ७८६, ७९९
ऋषयः ३०२, ३०६
ऋषिः ८१,१६६
ऋषिका ३०४
ऋषिकुलम् ७५
ऋषिकेशः परि. २४
ऋषिगणाः २३९
ऋषिचर्यम् परि. १३
ऋषिधर्मः २००
ऋषिपत्तनम् ७७०
ऋषिप्रव्रज्या ७९
ऋषिपञ्चमी ७२३
ऋषिवसतिः परि. ५
ऋषिसंघः २४०
ऋषीणामवदानम् ८८७
ऋष्यशृङ्गः १३९

ए

एइसई ८८२
एकचरः ३५०
एकमुखता ८१३
एकं जगद् विश्वकल्याणधायम् ८०९
एकभार्यत्वम् ४३४
एकलव्यः ३७५
एकादशी ७२१
एकान्तशीली २०६
एकायनम् ६०
एकेश्वरवादः ८१३
एन्नारियम् ८५
एरियन ४०५
एलौरा ८५
एशिया माइनर ८२१

ओ

ओङ्कारेश्वर-मान्धाता परि. ४१
ओजः ६२५
ओदन्तपुरी ९७
ओम् ३८, १०६,

औ

औदात्त्यम् २

क

कटवा (शक्तिपीठम्) परि. ३८
कटाहः (मलयप्रायद्वीपः) ८६६
कठीवृन्दारिका १२४
कण्वः १३२
कदम्ब-युद्धम् ४५२
कनका-पण्डितः ८२४
कनिष्कः ७९७
—राज्यम् ८२७
कन्फूसियस ८४७
कन्या ४३६

 CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

—अनूढा ४३७
—कश्मारी परि. ४९
—तीर्थ परि. २३
—यशःस्वरूपिणी ४३६
—वर्चः ४३६
—शुल्कम् ४३७
कपिलः ११,२५२,४
—मुनिः परि. ३७
—वस्तु ७८४, ८५३, ८८०
कपिशा (कफिस्तान) ८२९
कपोतवृत्तयः ६४९
कबीरः २८८, ८०२
कमलशीलः ९७,८५२
कम्बुजः ८५९
कम्बोडिया ८५७
—ध्वजः ८६४
कम्हेंग- ८५६
करुणा ७७५
कर्ता १०६
कर्मकराः (शूद्राः) ३६२
कर्मणा जातिः ७७४
कर्मप्रवृत्तिः २९०
कर्मफलभोगः २५
कर्मयोगः १९६, २४४
कर्मयोगी ३०३
कर्मरङ्गः ८६७
कर्मविचिकित्साः १२८
कर्मविपाकः ७०२
कर्मास्रवः ७८८
कलकत्ता परि. ८५
कलशपुर ८६७
कला ६५
—चतुःषष्टिः ७३
—कर्माश्रया, द्यूताश्रया,
—शयनोपचारिका,
—उत्तरकलाः ७५
—विलासः २३
कलीलग-दमनग ८३२
(कलेला-दमना) ८२७
कल्चर २
कल्पकुमारः २४५
कल्मकः ८४६
कल्याणागमाः ७९९
कल्याणीमहाविहारः ८५६
कविः ८९२
कवितापाठः ७२
कश्मीरमण्डलम् २४७
काकेशस ८७७
काचपात्रादिकरणम् ७४
काञ्ची परि. ४६
काण्वः ३०७
कापालाः ७६६
काबा ८२३
काबुक ८३०
कामधेनुः २५१
कामाकुरा-मन्दिरम् ८८३
कामाख्यतीर्थम् परि. ३८
कामाक्षी-मन्दिरम् परि. ४६
कामायनी १२
कामार्थः २६४
काम्यक परि. १८
काम्येष्टिः ६३७
कापव्यः (परन्युः ३२४
कारडोबा (स्पेन) ८३२
कारुकर्मकारकाः (शूद्राः) ३७०
कालका २३२
कालडि परि. ४४
कालेयाः २५१
काव्यरचना ७२
काशगर ८४२
काशी परि. २४
काषायपाहुड ६५
कासुगामन्दिरम् ८८३
कास्सियन-प्रदेशः ८३६
कितवः १६८
कीनाशः ३१०
कीर्तनम् १६७, ७३२
कीर्तिलेखः २५३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कुकविः ८४९
कुचा ८४२
कुचिराज्यम् ८४१
कुञ्जगली परि. ८३
कुञ्जुर-तञ्जुर ८५३
कुटीचरः २७८
कुटुम्बम् ४०८
—विरतिः ७४६
कुणालः ८४१
कुण्डलपुरम् ७८७
कुण्डलिनी-जागरणम् ८७०
कुन्दकुन्दाचार्यः ६५
कुभा (काबुल) ८२८
कुमारजीवः ८४७
कुमारतापसी १२३
कुम्भः (अमृतघटः) परि. २५
कुम्भकोणम् परि. ४७
कुम्भीधान्यकः १८४
कुम्भीधान्याः ३५१
कुम्भीपाकः ६६१
कुरुक्षेत्रम् परि. १७
कुलम् ४०८
—अवयवः १६०
—धर्माः ८०७
—पतिः ९७,२४०
— स्त्री ४२०, ४२७
कुलशेखरालवारः ८८१
कुवलयापीडः २०१
कुविलेई-गुरुः ८४५
कुशनयुग ८३०
कुशीनगरम् ७८४
कुसूलधान्यकः १८४
कुस्तनः ८४१
कृतनगरः ८७२
कृतोदकः २७८
कृषिः ७१, १९१, ३१६
कृष्णः परबह्म ७६०
कृष्णमन्दिरम् ८३७
कृष्णलीला ७६०
कृष्णसागरः ८७७
केडा ८६७
केवलज्ञानम् २९०
केवलाघो भवति केवलादी ३३४
केवली २६८
केशवभारती ७५९
कैलासः ५
कैलासयात्रा ३३
कोचीनचीन ८६०
कोरिया ८४१, ८८१
कोल्ला ३७५
कोशकारी ३२०
कौटिल्यः ४९
कौटुम्बिकसमाहारः १८७
कौण्डिन्यः ८५९
कौमुदीविहारः ८४८
कौमुदीमहोत्सवः ४५२
कौसल्या ८८४
क्यिरोड ८५३
क्षत्रः ३५७
धर्मः ३८६
क्षत्रधर्मो लोकज्येष्ठः ३५९
क्षत्रियः १८२, ३४२, ३५७
—यज्ञः ६२९ ३९३
—सर्वाभ्युदयकृत् ३८७
क्षान्तिवादी ७७६
क्षुधितः १५०
क्षेत्रज्ञः ७३८
क्षेत्रदोषगुणज्ञानम् ७२

ख

खनित्रिमा परि. २
खारवेलः ७८८
खिलसूक्तम् परि. ७२
खुरासान ८३२
खोतान ८४०
ख्वारेज्म ८२८

ग

गङ्गराजः ८६५
गङ्गा ७ परि. ४, १८, २२७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

—द्वारम् २४२
—माहात्म्यम् परि. २०
—अवतारः परि. ३४
—सागरः ८५
गजप्रदेशः ८३९
गणः ३१९, ३८५
—धरः १०२
—नायकः ७७६
गणिका ४५३
गणेशः ७६७,८८५
गन्धर्वः १४२, ३२६
गया परि. ३२
गरुडस्तम्भः ३३८
गर्दभः ३१४, ३९४
गर्भागारम् ६७३
गल्दनः ८४६
गवामयः ६३०
गाजन (सुल्तान) ८३२
गाणपत्यम् परि. ५८
गाण्डीवम् ८८४
गाथानाराशंसी ६०
गान्धर्वविद्या (नृत्य-गीत-वाद्यानि) ६८
गान्धर्वविवाहः १४६
गान्धारी २३०
—विद्या ७३
गायत्री १२३
गार्हपत्यम् १४८
गार्हस्थ्यम् १३४
गिरिनगरम् परि. ५२
गुणवर्मा ८४७
गुणवर्मा भिक्षुः ८७२
गुण्डीचा परि. ३९
गुप्तकाशी परि ४२
गुरुकुलम् ३०, ८२
—वासः ३२
गुरुभक्तिः ७३८
गुर्जरः ३३८
गृहकार्यकरी ४१९
गृहकार्याणि ४४४
गृहत्यागः ४२५
गुहदासी ४५८
गृहपतिः ४११, ४१३
गृहपत्नी १३५, ४११, ४१४
गृहमेधी १४९
गैरिकरञ्जितवस्त्रम् २७६
गोकर्णतीर्थम्परि. ४३
—महाबालेश्वरः परि. ९२
गोकामः १४१ ३८१
गोकुलम् परि. ३६
गोदानम् ६५९
गोदावरी परि. ४, २५०
गोधनः ७६, १४०
गोपालकृष्णः ७५८
गोपाल्यम् ३१०
गोपीनाथ कविराजः परि. २७
गोप्रतारतीर्थम् परि २९
गोबीमरुस्थलम् ८४०
गोमतीकुल्या ८७२
गोमती परि. २३
गोमती परि. २३
गोम्मटतीर्थम् परि. ४४
गोवर्धनम्परि. ३६
गोसहस्रदानम् ६५६
गोस्तुतिः ६४४
गोह्याकुराकानमन्दिरम् ८८३
गौः ३३५
गौडीयसम्प्रदायः परि. ३८
गौतमः ५१
गौतमबुद्धः १३,२२७,८५३
गौरीकुण्डः परि. ३४
ग्राफ डर्कहोम २५३
ग्रामः ३१३
—वृद्धाः ४०६
ग्रीकवैदिकधर्मसाम्यम् ८१५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

घ

घटिका ८७
घृताची ४३९
घोराचारिकवृत्तिः १४९

च

चक्रचरादयः २१२
चक्रवर्मा ३५२
चक्रवर्ती ३९३
चतुष्पदीनिःश्रेणी ३२
चन्द्रगोमी ९७
चन्द्रभागा परि. ४३
चन्द्रार्जुनः ८४१
चमनलालः ८८४
चम्पा ८६५
—राज्यम् ८६२
चरकः ४९, ७६, ८२
चराचरलोकः ८१०
चाक्रायणः १७३
चाण्डालः ३६३, ३७०, ४००
—भक्तिः ८४७
चातुर्वर्ण्यम् ३४४
—सेवा ३८८
चारित्रिकसमुत्थानम् १६४
चाहमानः
चिकाइ ८५०
चित्रकूटः २४९, परि. ३६
चिदम्बरम् परि. ४७
चीन ८४६
चीनभुक्तिः ८२८
चीनी तुर्किस्तान ८४२
चूतभञ्जिका ४५२
चूतलतिका ४५२
चेनम्मा ४५२
चैतन्यमहाप्रभुः ४९, परि ३७, ३९, ७५९
चैत्यः ६४८
चैत्यवासः १०८
चौर्यविवाहः १४२
च्यवनः २२४
च्यवनाश्रमः

ज

जगदीशवसुः १०३
जगद्दल- विद्यापीठम् १०१
जगद्- विचरणम् ८८८
जगन्नाथः परि. ३९
जतुयन्त्रम् ७४
जदरूपः २३९
जनकः ११५
जनकपुरम् ३०
जन्मत्रयम् ६३४
जन्मान्तरफलम् २२६
जन्मान्तरवादः २५
जन्माष्टमी ७२२
जपः २८१,६७७
(वाचिकः, उपांशुः, मानसिकश्च) ६७८
जपमन्त्रः ६५०
जपययज्ञः (विधिः-जप-
उपांशु-) २८१
जयराजदेवी ८६१
जयवर्मा ८६०, ८६१
जयसिंहः ११७
जयापीडः ११७
जरथुष्ट्रः ८३२
जर्हमविनतोई ८२३
जलसंश्रयः २०३
जलचिकित्सा ६६
जलालाबाद ८२९
जवाहरलालनेहरु ९
जागरणम् ६२३
जाजलिः १७, १९६
जातवेदाः ३०६
जातिः ३४३
—जननात् ३८६
—परीक्षा ४०३
—प्रथा ४०३
जानश्रुतिः १८८
जापानदेशः ८८१
जाया १३६,१३७
जालन्धरनगरम् ८२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

जावा ८५५
जावा (यवद्वीपः) ८७२
जाह्नवी परि. २०
जीवः ७८८
जीवकः ४७, ७९
जीवनदर्शनम् १६२
जीवनोद्देश्यम् १६
जीवन्मुक्तः २७२
जीवन्मुक्तिः ७७५
जुगुरसाम्राज्यम् ८४६
जेन (ध्यानम्) ८८१
जेम्सकुक ८८५
जैनधर्मः ७८५
—विद्यालयः १०२
जैगीषव्यः २५३, २८७
ज्ञानम् ११९, ६७४
— पिपासा परि. ५
—सन्ततिः ४२
ज्योतिर्लिङ्गम् ७६७
ज्योतिषम् ७२

ट

टाङ्किगखातम् ८५४
टोकियो ८८२
टोलः ८७

ड

डाइका ८७५
डेमोट्रियस ८३६
डैन्यूब ८७९
डोम्बः १२७

त

तक्षणम् ७४
तक्षशिलाविश्वविद्यालयः ७९
तञ्जौर-बृहदीश्वरः परि. ४८
तत्त्वदर्शी २८८
तपती २३२
तपः १४,२६,२०७,२१९,६६९,६८०
—प्रभावः २२१
—स्वरूपम् २१७
—सात्त्विकं राजसं तामसम् २२०
—बाह्याभ्यन्तरम् २९०
तपोधनः ६८१
तपोवनव्युष्टिः २४१
तमसा ९,७७
तरणम् ७३
तरीका ८३३
ताकाय सुहिगुचि ८३०
ताजकिस्तान ८२८
तादात्म्यम् ६८७
ताम्रपर्णी २५०, ८७९
ताम्रलिप्तिः ९९
विहार ८५१
तारावडीराजः ८८१
तारिमोपत्यका ८४२
ति एन-ताई
तिक्तबिल्व ८७३
तिब्बतः ८५२
तिब्बतीयकला ८५१
तिम्मः ३६७
तिरुपतिः परि. ४४
तिलकः १९७, ८३०
(बालगङ्गाधरः)
तिष्यः ८७९
तीर्थम् ८०, १९८, ७०८, ७७४, ७८४ परि ५४
—अनुशासनम् परि. १४
—अभिगमनम् २०२
—गुणाः ४
—गुरुः २९
—दर्शनरहस्यम् परि. १
—दर्शनलाभः परि : ९
—यात्रा परि. ६
—यात्रिकः परि. ६
—वारि १
—व्रत-पूजादीनां समन्वयः ७२१
—सज्जा परि. १३
—स्थानम् ३६६
तीर्थंकर-परम्परा ७८५
तीर्थङ्करः (विष्णुः) परि. ३
तुकारामः ७६०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तुङ्गवर्मा ८५
तुङ्गभद्रा परि. ८,४३
तुर्किस्तान ८४३
तुर्फान ८४८
तुलसीदासः ७५७, ७६५
तुलानदी ८४५
तुलायोगः ७२
तृष्णा ७७१
तेर्मिजनगरम् ८४३
तैमूरलङ्गः ८४०
तैलङ्गाः ८८०
तोटकः ४९
त्रकियु ८६५
त्रयी ६२
त्रयो लोकाः ८८९
त्रसस्थावराः ७८०
त्रिकर्मा १७९
त्रिदण्डी २७८
त्रिपरिक्रान्तः १७९
त्रिपुरसुन्दरी परि. ४६
त्रिभुवनादित्यः ८८०
त्रिमूर्तिः ७५२
त्रिलोकधारणम् १६५
त्रिविष्टप् ८५२
त्रिवृत्करणम् ३६
त्रिवेन्द्रम् परि. ९८
त्रैविद्यः १७९७
त्रैविद्याध्यापनम् १८७
त्र्यम्बकक्षेत्रम्परि. ४२
त्वष्टा ७१

थ

थाई (मंगोल) ८५६
थाईलैण्ड (स्याम) ८५५

द

दक्षिणपूर्वदेशाः ८५३,११६
दक्षिणा ६५२, ६५९
दण्डः ३३
दण्डकारण्यम् २४९
दण्डनीतिः ६१
दत्तात्रेयः परि. ४४
दधीचः २२४, २४२
दम्भोद्भवः १८३
दर्शपूर्णमासयज्ञः ६३६
दशपापहरा गङ्गा २०
दशावतारमन्दिरम् ८५
दस्यवः ३३८
—प्रशस्याः ३७३
दस्युः (दासः ३२३
—वधः १८९
—विशेषाः ३७३
—उत्थानम् ३७३
—दानम् ३२, ११४, ६५२
—वैविध्यम् ६५६
—शीलः १०२
दायोनिसस ८३६
दाराशिकोह ८०३
दारुवङ्गराज्यम् ८००
दाशराजन् १६९
दासाः ३०२, ३१४, ३२०, ३२४, ३३९, ३९७, ३९९
दासानां विशः ३१८
दासी ३९७
दासीदानम् ४६१
दाहरः ४५०
दिवाकरमित्रः ८३, ११६
दिगम्बरत्वम् २७६
दिग्विजयः १८७
दिवाकरोऽहम् ८८७
दीपङ्करः ८५२
दीपनम् २३
दुःखशय्यः २०३
दुर्गोत्सवः ७२३
दुर्वासाः २५३
देवः १५४, २९४, ७७७
—कर्म १५१
—भूमिः ४
देवतात्मकता २२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

देवदासी ४५६
देवभूयः ३९२
देवयज्ञः १५२
देवयानः १७०
देवयानी ४५९
देवयुः १५३, ७३१
देवरः ४११
देवलः २५३
देवलोकः ६९८, ७८२
देववर्मा ८७२
देवानुग्रहः ६२५
देवायतनम् ८०, ७२९
देशभक्तिः ४९, ७३८
देशभाषाविज्ञानम् ७४
देशसेवा १७
देहूग्रामः ७६१
दैवविवाहः १४६
दैवीविशः ३१९
द्योतनम् २३
द्रविडाः ३७५
द्रोणगिरिः ७८९
द्वारका परि.
द्वारवती ४८५१
द्वारिकाधीशः परि. ३४

ध

धनुर्महः १४४
धनुर्वेदः ६९, ७३
—सूत्रम् ६७
धनुष्कोटिः परि. ४८
धन्वत्रयम् परि. ६
धरणीन्द्रवर्मा ८७४
धरादानम् ६५६
धर्मः (दशलक्षणम्) २९२
—अध्यक्षः १०२
—आदर्शः ७९४
—उत्तमः ८९२
—उपदेशः ११३
—कामः १२८
—गङ्गः ९३
—चक्रप्रवर्तनम् ७७०
—चरणम् ४०९
—दानम् ७७२
—ध्वजः ३९२
—निष्ठा ४९
—नूतनप्रवृत्तयः ८०८
—पालः १०१
—प्रवक्ता १२२
—प्रचारसाधनानि ८१५
—प्रयोजनानि ७९०
—लक्षणम् ६९१
धर्मव्याधः ४६
धारी १०५
धार्मिकविवादः ७९८
धार्मिकसहिष्णुता ७९५
धोयी रजकः राजकविः ३६८
ध्यानम् २८२, २८७, ६८७
—योगः १९६
ध्वनि- पञ्चाशिका ८८३

न

नः प्रदिशो भवन्तु ८८७
नगरपरिभवः २०१
नटराजः ८६६
नटराज- मन्दिरम् परिः. ४७
नटसूत्रम् ६३
नतिः १६७
नदीजलमातृकम् ४२६
नन्दिनी २४४
नमः ६४६, ६५०
(कायिकम्, वाचिकम्, मानसिकम्), नमस्कारः ६२९
नयनागिरिः ७८९
नरकः ६९९
नरनारायणौ ७३८
नरसीमेहता परि. ५३
नर्मदा परि. ४१
नवकर्मिकः ११३
नवद्वारम् ३१५
नवद्वीपधाम परि. ३७,८५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नवपत्रिका ४५२
नवरात्रम् ७२३
नाकामुरा ८८२
नागरीलिपिः ८८३
नागसेनः ७८२
नानकदेवः ८३५
नाभागः ३९०
नामजपः ६७७,७३४
नामदेवः ७६०
नाम्नैव मोक्षः ७५९
नारदः ५३
नारायण-धर्मः ४३
नारी (महाभारतीया) ४२
नारी-प्रतिष्ठा ४७५,४२६
नालन्दा-विहारः (विश्वविद्यालयः) ९७
निघण्टुः ६४
निदर्शनम् १०८
निम्बार्कः ७५५
नियोगः ४६६
निरयकारकाणि ७८२
निरवसितः ३६२
निराकृतिः ३९२
निर्णायनम् १३९
निर्वाणम् ७८०, ७८८
—पथः ६९०
निवृत्तिमार्गः १९६,२८०
निषादः ३७४, ३७५, ३७८
—पल्ली ३७५
—स्थपतिः ३७६
निष्कामकर्मयोगः ७४२
निष्कामकर्माधिकारी १९६
नीलनदी ८७९
नीलमाधवः परि. ३९
नेताजी पाल्कर ८१६
नेपाल ८५३, परि ३०
नेमिनाथः ७८६
नैमिषम् परि १०
नैमिषारण्यम् परि २२
नैष्ठिकब्रह्मचर्यम् १३०
नौयानम् ७३
नौविहारः ८३४
न्यग्रोधफलम् १०८
न्यायाधिकरणम्। ५६९-५७४
न्यूजीलैण्ड ८८६

प

पंक्तिपावनः १८३
पञ्चक्रोशी परि. २७
पञ्चगव्यपानम् ६६९
पञ्चपरमेष्ठिनः ७९१
पञ्चपुरी परि. ४१
पञ्चमहायज्ञः १५०-१५८
पञ्चरात्रिकम् २५५
पञ्चविद्या ७१
पञ्चशिखः २९१
पञ्चशीलम् ७७४,७७७,७७८,८९०
पञ्चाक्षर-मन्त्रः ८७०
पञ्चाप्सरसः २१६
पञ्चायतनपूजा ७३७
पञ्चास्तिकायः ६५
पणयः ३०५
पण्डितः १०१
पण्डितपरिषदोधर्मनिर्णयः ८१६
पण्ढरपुरम् परिः ४२
पतिव्रता १३६
पत्नी १३५
—त्यागः ४३३
—व्रतम ४३२
पद्मपादः ४९
पद्मोद्भवः ८८३
पद्मसंभवः ९७,८५३
पपौरा ७८९
पयोव्रतम् ६६१
परब्रह्म १७७
परमहंसः २७८
परमात्मने नमः ६४८
परशुरामः ४७,१७१
—क्षेत्रम्परिं. ४४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

परस्पर-सम्पृक्तिः ८१४
परानुरक्तिः ७४०
परात्रभोजकः ३७६
परा-पश्यन्ती-मध्यमा ३१५
परारोहणकाम्या ६२१
परार्थः १
परा विद्या ५९
सत्यम् ६७७
पराशरः ३०८
परा संस्कृतिः २०
परिचर्या १९२
पर्णशाला २१७
पर्यटनम् ३१२
पलुर ८७०
पशु-पक्षि-चिकित्सा ६६
पशुपतिनाथः ५
–परि. ३०
पशुबन्धः ६३४
पशुविज्ञानम् ७१
पश्चिमेशिया ८१९
पह्लवी ८३२
पाइथेगोरस ८२७
पाकयज्ञः १९३, २८२, ३६५
पाकविज्ञानम् ७४
पाङ्गटुक ८२७
पाञ्चरात्रम् ७४३
पाटलिपुत्रम् ७७९
पाणिनिः ४९
पादग्रहणम् ६४६
पादचारी परि.
पादवन्दन-तत्पराः ४१९
पापनिवृत्तिः ६६१
पापनिवेदनम् ६६९
पापप्रक्षालनम् ६६४
पापशोधनम्(त्रिविधम्) ६६४
पापावरोधनम् ६६६
पारमेष्ठ्यम् (ऋतूनाम्) २१, ६२१
पारलौकिकम् ६८२
—जीवनम् ६८३
पारशवः ३७८
पारसीकः ८३०
पारस्परिकसाह्यम् ३७६
पार्श्वनाथः ७८६
—पर्वतः ३१
पावानगरम् ७८८
पावापुरी परि. ३१
पाशुपतधर्मः
पाषण्डः ७९७
पितरः १५५
पिता (पितृ) ४०९
—तर्पणम् १५१
—देवः १२८
—पूजाः ७०९
—यज्ञः १५१, ७-९
(इहलौकिकलाभाः)
—यानम् ६८४
—लोकः ६९८
—श्रवणम् ४२२
पिप्रुः ३२२
पिशाचः ३२६
(पैशाच-विवाहः) १४३
पिशिताशनः (राक्षसः) ३२५
पिण्डपातनम् परिं १५
पुण्डरीकम् २,३१५
पुण्यत्रातः ८४९
पुण्यपर्वतः परिं. ४
पुण्यकव्रतम् ७२७
पुण्यस्थली परिं. ४
पुण्याश्रमः २४८
पुत्तलिकाछायाभिनयः ८७३
पुत्रः ४२२
—महत्त्वम् १३७
—एषणा २६२
—उत्पत्तिः ४१२
पुनर्जन्म ७०२
पुराणानि १६
पुरी ४८, परि ३८
पुरुषः १.१४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

—उत्तमपुरी परिं . ३८
पुलकेशी ८३१
पुलोमः २३०
पुष्करम् परि . १०,१४,२१
पुष्टिमार्गः ७५८
पुष्पकविमानः ७१
पुष्पगन्धः ८१८
पुष्पावचायिका ४५२
पुष्टिचतुष्टयम् ०५९
पूगः ३८५
पूज्यवर्याः ७३६
पूर्णपात्रम् ३६५
पूर्णवर्मा ९२, ८७२
पृच्छना ११३
पृथिवी १२, ३३२
पृथूदकम् परिः १८
पेकिंग ८५०, ८५२
पेरू ८८४
पेरियारनदी परि ४४
पेशवा ११६, ३४८
पैजवनः १९३, ३६५
पोष्यवर्गः ४२५
प्यूभाषा ८८०
प्रकाशानन्दः ७५९
प्रकीर्णधार्मिकविधानम् ८१७
प्रजातिः ३७८
प्रजापतिः १८९
प्रजापालकः १८९
प्रजापालनवृत्तिः २६,३१
प्रज्ञानम् १०९, ८४९
प्रज्ञापण्डितः ८८२
प्रज्ञावर्मा ८५१
प्रज्ञावान् ५५
प्रणवः ३८
प्रतिग्रहः १८५
प्रतिश्रयः १७९
प्रतिष्ठानम् परिः २५
प्रत्यभिवादः ६५१
प्रत्याहारः २८२
प्रत्युत्थानम् ६५२
प्रपत्तिः ७६४
प्रफुल्लचन्द्र रायः १९
प्रभासः परिः ५१
प्रमिला देवी ४५०
प्रयागः ६७८,
परि २४
प्रवचनसारः ६५
प्रवृत्तिधर्मः २७३
प्रवृत्तिमार्गः २१३,२७९,७७८
प्रवृत्तिमार्गीया ऋषयः ३६९
प्रव्रजितः ४३२
प्रस्तरपट्टिकालेखः ८८५
प्रस्रवणम् परिः ७
प्रहुतम् १५१
प्रह्लादः ७३६
प्लीनी ८७८
प्लेटो ८२७
प्राकृतिकः सहयोगः १८
प्राजापत्यः विवाहः १४६
प्राणत्यागः (विजयपथः)
प्राणायामः २८२ ६६९, ६९०
प्राणयात्रिकम् २७६
प्रायश्चित्तम् ६६७

फ

फना ८३३
फल्गु परिः ३२
फाह्यानः ९०,८२९,८४८
फूनानराज्यं ८५९
फेनपः २१०

ब

बगदाद ८३५
बदख्शां ८४३
बदरिकाश्रमः ५
—परि . ३३
बदरी ४८
बरजोई ८३२
बरमकः ८३४
बरमकी ८२५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

बर्मा ८५४,८७९,८८०
बर्लाम ८३४
बलख ८३९
बलपुत्रदेवः ८६८
बलिः १४२
बलितुङ्गः ८७३
बहुभार्यत्वम् ४३२, ४३४
बहुश्रुतः ७९७
बहुसुवर्णकयज्ञः ८७५
बाणः ४७,२१०,३८०
(सहमरण विरोधः) ४६३
बाणासुरः ७६६
बामियान ८४३
बार्हस्पत्यमर्थशास्त्रम् ७३
बालगङ्गाधरतिलकः ८५५
बालचन्द्रः ८८०
बालपुत्रदेवः ८७४
बाला (वाग्दत्ता) ४६४
बालादित्यः ९१
बालिः ८५५
बालिद्वीपः ८६९
बालियाना ८७०
बाहुदा परिः २३
बिन्दुसरोवरः परिः ३८
बिन्दुमाधवः परिः ४२
बुखाराराज्यम् ८४४
बुद्धः ४७
बुद्धकीर्तिः ९७
बुद्धस्य दंष्ट्रा ८४६,८७९
बुश्तूखान ८४६
(बोधिसत्त्व)
बृहत्तरभारतम् ८१९
बृहस्पतिः ५२
बृहस्पति-सिद्धान्तः ८२५
बेलेज़ली ८६७
बेसनगरम् ७८९
बैक्ट्रिया ८३०
बैङ्काक ८५६
बोग़ाज़कोई ८१९, ८२२
बोद्धा १०६
बोधगया ७८४, ८७९
—परिः ३०
बोधिधर्मः ८४८, ८८१
बोधिवृक्षः ८७९
बोधिसेनः ८८२
बोरोबोदुर-स्तूपः ८७२
बोसत् (बोधिसत्त्व) ८४५
बौद्धगार्हस्थ्यम् १९४
बौद्धचित्रकला ८३१
बौद्धधर्मः ७६८, ७६९
बौद्धविद्यालयः ८८
ब्रह्म ६७४, ८९०
—कर्म १९२, ३५०
—कुण्डः ५
—चर्यम् २६, ३२, १३७, ६७४, ७७६
—चारी ३२, २५६
ब्रह्मज्ञः ३४, १९६
ब्रह्मज्ञानधारा ११०
ब्रह्मदर्शी ३१६
ब्रह्मदेयग्रामः ८७
ब्रह्मधना ३०६
ब्रह्मनिर्वाणम् ७४३
ब्रह्मपुत्रः ८५४
ब्रह्म
—पुरी ८७
—बुद्धिः ३३
—भाषा ९९
—भूतः ५३, ७३४
—भूयम् ३९२, ७३५
—महः ३८७
—यज्ञः १५१, ८९१
—यानम् ७७१
—युज्यम् ३९२
—लोकः परि. १७
—लोकः २६०, ६९६, ८३५
—वर्चस् १७१, ३१४
—वर्चस्वी १८०
—विहारः ७७९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

—वादी १२२, ८१९
—विहारः ७७५
—वेदः ७४४
—संस्थः २५६, २७०
—सत्रम् १८४
—सलोकता ७७७
—सूत्रम् ३६
—स्वरूपम् ५३
(महाब्रह्मा) ब्रह्मा ८९०, २५६, ७७७
ब्रह्मणस्पतिः, बृहस्पतिः ३०१
—देवानां पदवी ३३४
ब्रह्माण्डदानम् ६४६
ब्रह्माधिगमः ७३४
ब्रह्मानन्दः ७७५
ब्रह्माश्रमः २५५, २५६
ब्रह्मासनम् परिः ३९
ब्रह्मिष्ठः २०२
ब्रह्मोद्यः ७६, १०५, ६३०
ब्राजिलदेशः ८८५
ब्राह्मणः ३४८, ३५३, (प्रवृत्ताः) १८३
ब्राह्मणः (निवृत्तः) २६९
—वृत्तिः ३४९, ३५२
ब्राह्मणः १६८, १७७, २६४, २९३, ३१५, ३९२
—गृहकुलम् ८२
—धर्मः ७३७
—भेदाः ३५६
—सेनाः ३६९
—लक्षणम् ३४५
ब्राह्मविवाहः १४६
ब्राह्मश्रीः २२४
ब्राह्मीस्थितिः ७४३
व्लेक फारेस्ट २५३

भ

भक्तः ७४०
—चरित्रम् ७४६
—जीवनदर्शनम् ७४६
—हरिदासः (यवनः) ८०२
भक्तिः ७३४, ७४०, ७४५
—योगः २८७
—दार्शनिकभूमिका ७६२
—पथविशेषाः ७६२
—फलम् ७४५
—नवधा ७४०
—साम्प्रदायिकाचार्याः वैदिक— ७३१
भगीरथः २४४
—शिला परिः ३४
भद्रम् १७१
भद्रबाहुः परि, ४४
भद्रवर्मा ८६५
भद्रेश्वरस्वामिमन्दिरम् ८६५
भरतः ४९
भरद्वाजः ४६
भर्तृहरिगुहा परिः ४०
भर्तहितम् ४१८
भ्रववर्मा ८६०
भारतम् ६२१
दर्शनम् परिः ६
भारतमाता ८२१
भारतभूः ११
भारतम्भृणा आश्रमाः २४९
भारतीया लिपिः ८७३
भार्या १३६, ४१८
भाषाज्ञानम् ७३
भिक्षाचर्यम् १७५
भिक्षाभुक् १८१
भिक्षुकः (भरणीयः) ३३४
भिक्षुकी २८९
भिक्षुसूत्रम् ६३
भित्तिचित्राणि ८२९
भीमरथीतटपरिः ४२
भुवनेश्वरः परिः ३८
भूकम्पज्ञानम् ७३
भूकम्पसूचना ७२
भूतपालः १७७
भूतयज्ञः १५१, १५७
भूमा १४, १६, ४४
भूमिः १२

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भूमिस्पृक् ३९४
भृगुवेन १६९
भृत्यशेषः १५०, १७९
भैक्ष्यम् ४१
भैरवः ७६६
भोजः ११७
भोजनीयः ७१८
भ्राता ४२४

म

मक्का ८२३
—मदीना ८३५
मगः ३३८
मङ्गोलाः ८२०
मंगोलिया ८४४
मजपहित ८७२
मञ्जुश्री ८४९, ८८१
मठः ८१, २१७
मणिलक्षणम् ७३
मण्डकेश्वरः ३९३
मण्डिकर्णी २३४
मतिः ११९
मतोशहर ८३४
मतङ्गपर्वतः परि. ४३
मथुरा परि. ३४
मदनमोहन मालवीयः ४८
—परि. २८
मधु १, ३२७
—पर्कः ११९, १६२
—विद्या १२७
मधुकरीवृत्तिः २७५
मधुच्छन्दा ३११
मधुमत्त्वम् २४, ३३३
मधुरवाणी १२४
मधु
मध्यमा प्रतिपद् ७७५
मध्येशिया (बौद्धधर्मः) ७८४
मध्वः ७५४
—आचार्यः ४९
मनुः १५, ३१६
—स्मृतिः १६
मनुष्य-यज्ञः १५१
मनोरञ्जनम् ६३३
मन्ता १०६
मन्त्रशक्तिः ८१७
मन्दाकिनी २४८
मन्दिर-विद्यालयाः ८८
मन्सूर ८३३, ८३५
मयः ७०
मयूरशर्मा ३९०
मरुद्गणः १८८
मलक्काराज्यम् ८५५
मलयप्रायद्वीपः ८६६
मलूकदासः ७५७
महाकाल परि. ४०
महाकुम्भोत्सवः परि. २३
महाक्षेत्रम् परि. ३८
महात्मा गान्धी ४९, १९९
महागोविन्दः १८७
महातपः (घोरः) २१९
महादानम् ६५५
महादेवः १९०
महापातकानि ६६४
महापुरुषलक्षणम् ६४
महापुष्टिः ७५८
महानियमः २१८
महाबालेश्वरः परि. ४३
महाब्रह्मा १८७, ७७६
महाभारतम् १५
महाभाष्यम् ६४
महामंगलम् ४१०
महामन्त्राः ६५०
महादेवलिंगपूजा ८३६
महाविभूतयः २४
महावीरः ७८६
—स्वामी परि. ३१
महावैरोचनबुद्धः ८८२
महाशिवरात्रिः ७२५
महासंख्यक-परिग्रहः ४३३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

महासामी ८५६
महीविचरणम् ८८८
महेन्द्रः ७८२, ८७९
—गिरिः ४७
महोदधितीर्थम् परि. ३९
मांसभोजनम् ६९५
माइसोन ८६५
मागधः ३७८
माण्डकर्णिः २१६, २४३
मातङ्गः
(राजकविगोष्ठी-सदस्यः) ३७७
माता ४२०, ४२३
—पितरौ ४२१
मातृभूमिः ६२३
मातृत्वम् ४२७
मातृदेवः १२८, १७५
मातृभक्तिः ४९
मानयोगः ७२
मानववसतिः ३१३
मानसरोवरः ५
—मार्गः २४८
मानसरः परि. ३३
मानसीकला ७४
मानसून ८७७
मानुषी ३१८
मान्धाता १७
माया ३२१
मायाकृतम् (इन्द्रजालम्) ७३
मायायोगः ६३
मायूरकः ३८५
मारीचाश्रमः २४६
मार्कोपोलो ३८३
माहिषकाः ३७५
माहिष्मती (महेश्वरः) परिं ४१
मिगदावः ७७०
मिडनमिनः ८८१
मिथिला ८५६
मिनेण्डर ७८२
मिसर-देशः ८७७
मिश्रविवाहः १४६
मिहिरकुलः ८१
मीनाक्षी-मन्दिरम् परि. ४९
मीरजापुरम् परि. २९
मुआविया ८७८
मुक्तः २७१
मुक्ताकणः ११८
मुक्तागिरिः ७८९
मुक्तिमन्दिरम् परि. ३९
मुखश्रीः १६७
मुञ्जवटः परि. १०
मुदिता ७७५
मुनिः ७८७
—धर्मः २०१, ७९४
मुरलीधरः ८८३
मूर्तिपूजा ७२८
— विरोधः ७३१
—समीचीनम् ७३०
मूलवर्मा ८७४
मृतपः ३६२
मेम्फिसनगरम् ८७७
मेखला ३३
मेगस्थनीज ४०५, ८८६
मेधा १०९
मेलूकोटे यादवगिरि परि ४४
मेसोपोटामिया ८२०
मैत्रः १८०
—ब्राह्मणः २८१
मैत्रायणः २७२
मैत्री ७७५
मैत्रेयी १०९
मोक्षः २२, ६८५
—चतुर्विधः ६९३
—(ज्ञानकर्मसमुच्च) ६८८
—धर्मः २७०
—प्रकिया वैदिकी ६८७
मोक्षाकरगुप्तः १०२
मोहदिनबख्शः ८८६
मौखिकशिक्षणम् १०४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मौनम् २८७
—ध्यान-योगाः २८७
—भावः २७६
मौनाः ८८०
म्रम्मः ८८०
म्लेच्छः ४००

य

यज्ञः चातुर्मास्यः ६३६
(आरम्भ—,हविस्तपः,
इत्यादि) ६३०
—उद्देश्यम् ६३३
नैत्यकः, नैमित्तिकः,
—उपलब्धयः ६३३
—उपवीतम् ३६
—काम्यः ६३५
—फलम् ६३०
—दर्शः, पूर्णमासः ६३६
—बौद्धः ७७३
—परमपुरुषार्थ-साधनम् ६३१
—विश्लेषणम् ६३४
—समर्थको बुद्धः ७७६
—स्वरूपम् ६२७
—शेषः (अमृतम्) १५०
यज्यम् ७३१
यतिः १७७
—चर्या १३१
—धर्मचारी २६२
मन्त्रनिर्माणविधिः ७१
यन्त्री २३३
ययातिः २२८
यशस्करः ८८
यशोवर्मा ८६२
याज्ञवल्क्यः ११५
याज्ञिकदेवाः ६२७
यामुनाचार्यः ४९
यायावरः १४९, ३५१
यारकन्दः ८४२
युद्धप्रियत्वम् १६३
युद्धविद्या ६८
युन्नान (गन्धारे) ८५४, ८५६
युयुत्सुः (वैश्यापुत्रः) ३८०
युवराजकर्णसिंहः २५४
—परि. १५
युवा ३२
योगः २१७, २८२, ६२५, ७३४
—अधिकारः २९०
—वासिष्ठम् ८०३
—विधिः
—सिद्धयः २८६
योगिनी २८९
योगी २५९, २७२, २७७

र

रङ्गजी परि. ३५
रङ्गाचार्यः १२७
रङ्गाधारः ३४१
रंगून ८५५, ८८१
रत्नानि (चतुर्दश) ११
संस्कृतेर्निर्मातारः १३
रथसूत्राणि ६७
रविदासः २८८, ७५९
रवीन्द्रनाथः ४, १०३
—ठक्कुरः परि ६
रहस्यम् १
राक्षसः (पिशाचः) ३२१, ३२५
—विवाहः १४३
राजगृहम् (लघु) ८३९
—परि. ३०
राजन्यः २९३, ३१७
राजप्रैष्यम् ३५५
राजम्मा १२४
राजराजः ८८०
राजर्षिः १९१
राजशेखरः ११७
राजसूयः ६३८
राजा (वृद्धसेवी) ४०६
राज्यश्रीः ७६०
राधाकण्णन् ८३१
रामः ८८४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

रामसितवा ८८४
रामकियेन (रामायणम्) ८५८
रामकोयन (रामकीर्तिः ८५८
रामग्रामः ७८४
रामटोपाध्यायः ११७
रामतीर्थः ५
रामानन्दः ७५५
रामानुजाचार्यः ४९,७५३
रामायणककविन् ८७३
रामायणम् १७
—महाभारतम् १५
रायगढम् परि. ४२
रालिंसन ७८२
राल्पचन ८५२
राष्ट्रम् १८३, ३३५
—निर्माणम् ३२
राष्ट्रियधर्मः ८४५
राहुलगुप्तः १०१
रुक् ३२०
रुद्रः ७५२
रूपनारायणनदः ९८
रूस-महाराष्ट्रः ८७७
रैक्वः १७४
रैवतकगिरिः परि. ५३
रोम ८७८

ल

लकुलीशः ७६६
लक्ष्मीः ३२९
लङ्का ८७९
लमगान ८२९
लम्बकर्णवंशः ८७९
लम्सकसनगरम् ८२१
लहुरः ८०
लाओसः ८५६, ८६५
लाओत्से ८४७
लाङ्केयभिक्षुसंघः ८८१
लाटदेशः ८७९
लामा ९७
—मन्दिरम् ८५१
लासा ८५२
लिङ्गराजमन्दिरम् परि. ३८
लिङ्गायत्ताः ४०३, ४३१, ८०६
लिङ्गपूजा ७६७
लिच्छविगणः ७८७
लिथुआनिया ८७६
लुम्बिनी ७८४, ८५३
लेखरूपगणना-व्यवहार—
विधीनां शिक्षा ७२
लोककल्याणम् ८११
लोकमान्यतिलकः १९६
लोकयात्रा १३६
—सहायिनी ४१८
लोकसेवा २९१, २९९
लोकैषणा २६२
लोकोपकारः ६२१
लोपामुद्रा १२३, ३३६
लोयाङ्ग ३८०, ८५०
लौकिकसमृद्धिः (भारतस्य) १९

व

वंशः ४०८
वकव्रतिकः १८५
वंक्षुः ८४०
वज्रबोधिः ८४९, ८६८
वज्रयानः ९८
वत्सभूमिः २४८
वधधर्मः १९०
वनम् १०
—गोचरः १९८
—चरः १९८
—भूमिः ३१३
—आश्रमः १९८
वपनम् परिः १५
वप्रकेश्वरदेवः ८७५
वरः ६५२
वरदानम् ६६१
वराहमिहिरः ४९
वरुणद्वीपः (बोर्नियो) ८७४
वर्णपरिवर्तनम् ३८८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वर्णव्यवस्था (विदेशेषु) ४०४
—विरोधः ४०२
वर्णसंकरता ३७८, ३८१
वर्णाश्रम-व्यवस्था २५
वलभी-विश्वविद्यालयः ९९
वल्लभः ७५८
—आचार्यः ४९
वशीकरणम् ४३२
वसिष्ठः ४६, २३६,२३७
—करालजनकौ १२०
वसुधैव कुटुम्बकम् ४०९
वसुबन्धुः ८५३
वाक् ३०४
वाकोवाक्यम् ६०
वाणिज्यम् १७०
वाचना ११३
वाजपेययज्ञः ६३७
वाजश्रवा ६५५
वातरशना २६०, ७८५
वाजश्रवा ८५२
वानप्रस्थः १९९
—आर्येतरः २३०
—लोकप्रियता २२६
वानप्रस्था (राज्ञी) २३०
वामदेवः ३०७
वामा ७६६
वामियान ८२९
वायुभक्षः २०३
वारुणः (वोर्नियो) ८५४
वार्ता ६१, ३५१
वालखिल्याः २१२, २३८
वाल्मीकिः १३
वासस् ३२
वासुकिलोकः परि.
वासुकन ४२
वास्तुविद्या ८८४
वाह्लीकः ७३
विकरमतुन ३९०
विक्रमशिला-विश्वविद्यालयः ८२२
विक्रमादित्यः परि. १००
—धर्मदूताः २९
विघशासी ८२२
विचारः १५०,१७८
विचित्रव्रतानि ११४
विजयः राजकुमारः ७२७
विजयनगरम् ८७९
—परिः ४३
विजयाङ्का १२४
विज्ञाता १०६
विज्ञानम् १०९
वित्तम् १४
वितैषणा २६२
विदलीकारी ३२०
विदुरः २०५
विदुला ४२७
विदुषां प्रतिष्ठा ११४
विद्या ११८
—कला १९५
—पीठम् १०२
विद्यारण्यम् ४०५
विद्यावृद्धसंयोगः ४०६
विधवा ४६२, ४६६
(संन्यास) ४६३
—पुनर्विवाहः ४६८
विधियज्ञः २८२
विन्ध्यवासिनी परि. २८
विप्रः (षट्कर्मा) ३६२
विभाण्डकेश्वरमन्दिर परि. ४४
विभीषणः ७३६
विभूतयः २०१
विभूतिचन्द्रः १०१
विमदः ३०५, ३१३
विमलामन्दिरम् परि. ३९
विमानसेवा २२४
विमुक्तिः २०
वियतनाम ८६५
विराट् ३०२, ३१५
विवाहः ४३५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

—अवस्था ४३५
विवेकानन्दः ४९
—मन्दिरम् परि. ५०
विशः ३१८
विशाला परि. ४०
विश्वम् (एककनीडम्) ३३२
—सुभूतम् ३३३
विश्वकर्मा ७०
विश्वकल्याणम् १३२, ३३१
—प्रवृत्तिः ८१०
विश्वगुरुत्वम् ६२१
विश्वचक्रदानम् ६५६
विश्वजनः ४१५
विश्वदर्शनम् ८८७
विश्वधारणम् १६६
विश्वपर्यटकः ८८७
विश्वमातृत्वम् ४२६
विश्वंभरता ८८९
विश्वहिन्दीदर्शनम् ८५९
विश्वात्मकब्रह्मत्वम् ४८
विश्वात्मकप्रसारः २७
विश्वात्मकप्रसारः २७
विश्वामित्रः १९०
विश्वेदेवाः १५७
विषविद्या ७३
विष्णुः २२
—काञ्ची परि. ४७
—दासः ४०१
—मन्दिरम् ८६१
—पदमन्दिरम् परिं. ३२
—मूर्तिः ८७७
विष्णु वाकणकरः ८८४
विस्मयजननम् २८७, ८८४
विहारः ८८, २२८
वीतहव्यः ३९०
वीरदेवः ९७
वीर्यशुल्का १४५
वीरशैवाः ८०६
वीरस्थानम् २०७
वृक्षायुर्वेदः ६६
वृत्तम् ३८९
वृत्तयः (ऋतामृत-मृत प्रमृतश्च) १८४
वृत्त्यर्थं विद्या ५७
वृत्रः १४२
वृत्रासुरः २२५
वृद्धानां समादरः ४०५
वृषत्वम् ३८९
वृष्टिज्ञानम् ७३
वेई ८४७
वेङ्कटरमणः परिं ४३
वेङ्कटाचलम् तिरुपति
—बालाजी परिं. ४५
वेङ्कटेश्वर-मन्दिरम् ८५
वेदवादरताः ७९८
वेदस्य वेदता १४
वेदाः १३
—अङ्गानि ६३
—अभ्यासः ११४, ६७०
स्वीकरणम् ११४
वेनः २६१
वेनन्तः ७३२
वेशवासः ४५८
वेश्या ४५३
वैश्वानरः २००, २०३
—परि. २२,
वैडालव्रतिकः १८५
वैतरणी परि. १८
वैतरिणी (सरस्वती) परि. ३०, २५०
वैदिक आदर्शः ६२१
वैदिकभक्तिः ७४४
वैद्यानाथधाम परि. ३१
वैननाकः ८३७
वैरोचनः ८४१
वैवाहिकप्रक्रिया १४६
वैश्यः १९१, २९३, ३६०, ३९४
वैशाली ८८०
वैश्वानरः ५९
वैष्णवदेवी ८५८

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

व्यवसाय-संकरता ३८१
व्यवसायी १०५
व्याख्यानम् १०९
व्यापारः १७०
व्यासः ५१, ७८
—परि. २८
व्याहृतिः ३८
व्युष्टिः परि. १८
व्यूहः ६१
ब्रघ्नः (सूर्यः) ६९४
व्रतम् १६, ३२, ६७५, ७१५, ७२०
—चारी २६१
—पूजा ७११
—भङ्गः ७१९
व्रतारम्भः ७१८
व्रतानुशासनम् ७१८
व्रातः ३८५
व्रात्याः २६२, ३८९
व्रात्यः २६२, ३२९, ३८९

श

शकुनज्ञानम् ७२
शक्तिपीठम् परि. ३३
शंकर-भक्तिः ७५३
शङ्कराचार्य, १३, ४८, ८५, ७३६, ७९९, ८०६
—परि. २७, ३३, ३८
शंकररावः ८८५
शची २९६, ३८०
शतहस्त समाहर ३३१
शबरी २०८
शब्धवेधित्वम् ७३
शमसुद्धीन अबू अब्दुल्लाह ४०५
शम्बरः ३२२
शल्यकर्म ६६
शवः ६८२
शाङ्मीर ८४४
शान्तरसः २७७
शान्तिदेवः ९६
शारङ्गी ३८०
शालातुरी ८०
शालीन ३५१
—वृत्तिः १४९
शाहखुशरु ८३१
शाहरुख ८४०
शाही राज्यम् ८२९
शिक्षण-पदानि १०६
(आचार्यदर्शनम्, उपदेश-श्रवणम्, मननम्, बोधः, आचरणम्, बोधनम्)
—विधिः १०३
—विषयाः ५८
शिक्षा ३१
—अधिकारी ११९
—उद्देश्यम् ५२
—पदानि ७९४
—व्रतचतुष्टयम् ७९३
शित्रया-हो शित्रो ८८२
शिबिप्रदेशः २४८
शिमजी ८८२
शिल ३५१
—वृत्तिः ३५१
—उञ्छन ३५१
उञ्छवृत्तिः १८४
शिल्पकलापाटवम् १९३
शिल्पकाराः ३६२
शिल्पाजीवः ३६४
शिल्पानि २
शिवतत्त्वरत्नाकरम् ७५
शिवपूजा ७५२
शिवमन्त्रः ३६५
शिवराजः ६७२
शिवसंकल्पः २
शिवाजी २३९
—रामदास-मूर्ति परि ४२
शिवार्चनविधिः ७६६
शिष्टाः ३५१
शीलभद्रः ९६
शुक्रः १३१
शुनः ३१०
शूद्रः ४२, १२६, ३४३, ३९५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

—गृहस्थः १९३
—जीविका ३६३
—तीर्थदर्शनम् ३६६
—देवालय-दर्शनम् ३६६
—धर्माः ३६४
—राजा ३६९
—राज्यम् १९२
—विद्याधिकारः १२५
—वृत्तिः १९३
—संघाः ३६७
—सेना ३६८
शृङ्गेरी ४४
शेषनागकासारः २५४
शोणः ८८२
शोगुनः ८८३
शोनिन कोबेन ८८२
शोनू ८८३
शैलेन्द्रराजवंशः ८५५, ८६७, ८७२
—साम्राज्यम् ८७४
शैवधर्मः ७६४
शैवलभक्षणम् २०१
शौनकः परि. २२
शौचेयः १०५
शुनः ३१०
शोणः ८८०
श्यामसुन्दरी १२४
श्रद्धा ६७५, ७४२
—यज्ञः १२७, ३६५
श्रमः ६७२
श्रमणः २८९, ४३२
—कर्तव्यम् ७७८
श्रवणः ३७, २२८, ७३९
श्रवणवेलगोलनगरम् परि. ४४
श्राद्धम् ७०७
—सार्वजनिकलाभः ७०९
श्रान्तः १६२, ६२२
श्रावकः ७८७
श्रावणी १८६
श्रावस्ती ७९०
श्राविका ७८७
श्रीक्षेत्रम् ८८० परि ३८
श्रीतम्मराट ८६७
श्रीदेवनगरम् परि ५०
श्रीमन्दिरम् परि. ३९
श्रीमारः ८६५
श्रीरङ्गम् परि ४४, ४८
श्रीविजय-साम्राज्यम् ८७४
श्रीहर्षः परि २६
श्रेणी ३८५, ३९५
श्रेमा ८८७
श्रोता १०६
श्वेडगानपैगोडा ८८१
श्वेतभारतम् ८२९

ष

षड्दर्शनम् ७२
षण्मतस्थापनाचार्यः ७९९
षोडशोपचारः ७५२

स

संवर्गविद्या १७४
संविभागः १३३, १४९, १७८, ३३१
सगरः २२७
सग्धिः ३३५
सङ्करः १११
सङ्करता (व्यावसासिक) ३४९
संगमः परि ४, ३१२
—माहात्म्यश्रवणम् परि. ११
संग्रामः ३५८
संघ ३८५
संघमित्रा ७८२, ८७९
सजातः, सजात्यः, सनाभिः ३३६
संज्ञानम् १०९, ३२८, ८१३
सञ्जयः ८७३
सतीत्वानुष्ठानम् ४६०
सतीधर्मः ४६४
सत्क्षत्रियः ३६०
सत्पुरुषः ८१८
सत्यम् १४, ६७६
सदानन्दः ८५७, ८६१, ८६७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सद्धम्म ७९८
—पूजा ७९८
सद्धर्मनिकषः ७७३
सद्वृत्तम् ५२
सद्वृत्तिः १७
सनत्कुमारः ४३, १८७
सनातनो धर्मः ८०७
समिदाहरणम् ४३
सनीडाः ३३४
सन्ध्या (गायत्रीजपः)
सन्ध्योपासनम् ४०
संन्यास-योगाधिकारिणः २८९
संन्यासाश्रमः २५५
सपत्नीकवृत्तिः १६५
सपीतिः ३३५
सप्तगोदावरम् परि. ४२
सप्तमंगल देवताः ८८२
सप्तजनाः २०८
सप्तजनाश्रमः २४५
सप्तपुर्यः परि. ११
सप्तर्षयः २१४, ३०४, ३१४, ३१४
समरकन्द ८४७, २५५
समावर्तनम् १२६, १२७
सम्मेदशिखरः परि. ३१
समर्थरामदासः २३९
समलोष्टाश्मकाञ्चनम् १९७
समवायः १९७, ७९७
समयसारः ६५
समष्टिपरायणता ७६२
समाधिः ७७१
समावर्तन-प्रवचनम् १२९
समुद्रगुप्तः ८७९
समावृत्तः १३३
सम्भूय-समुत्थानन् (वर्णानाम्) ३८६
सम्यगाजीवः ७७८
सरस्वती परि. १७
सर्वम् १७४
— कल्याणी ४२७
—कर्मोपजीवी १९३
—धर्मरतिः ७९८
—प्राणिहितैषिता ७५
—भूतपरित्राणम्
—भूतहितम् १,२८८
—भूतहिते रतः २३३
—भूतस्थितः (भगवान्) ८११
—भूतात्मा ७४३
सर्वाणि भूतानि निर्माय ७४३
सर्वभूतानां सुहृत् ८११
सर्वमानवाः ८१८
सर्वलोकहितम् ३५९, ३८७, ६७३, ८११, ८८९
सर्ववर्णाभ्युदयः ३७६
सर्वसन्धासुमतिः ३३१
सर्वस्वसमर्पणम् ७४२
सर्वातिथिव्रती १६२
सर्वेश्वरः १७७
संसर्गविद्या ६४
संस्कृतिः १
—अपरा परा १-३
—चतुर्वर्गपरायणा
—द्विविधाप्रवृत्तयः २०
—नारायणी २४
—ज्ञानसाधनानि २८
—निर्मातारः १३
—विशेषाः २१
—वैविध्यम् २६
—विकासशीलता २७
सस्यम् ३१६
सहः (साहसम्) १६४
—धर्मचरी ४१८
—भक्षा ३३५
—मरणम् ४६२, ४६६
सहोरभूता ३१४
सह्याद्रिः परि. ९०
सांयुगीनः ३९३
सागरः ११
सांख्याः २८६
सात्वत-धर्मः ४३
सात्वताः ३४५

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सात्त्विकजीवनम् ३४५
सादी ८३३
साधनम् १
साधारण-स्त्री ४२०
साध्यम् १
साध्याः २६९
सान्तःपरम् ३९२
सापत्न्यभयम् ४३२
सामाजिकसात्त्विकता ४०५
सामाजिकसौष्ठवम् ३७६
सामीप्यम् ६९२
साम्मनस्यम् ३२८, ३३०
साम्यम् २८७
साम्राज्ञी श्वसुरे १४८
सायणाचार्यः ११७
सायुज्यम् २८४, ६९२
सारनाथः ७८४, ८३१
सारूप्यम् ६९२
सालोक्यम् ६९२
सावित्री वेदमाता ४०
सावित्री १४५
सिंहपुरम् ८७९
सिंहलम् ८७९
सिडननगरम् ८८१
सिद्धिः २२६
सिसिलीद्वीपः ८७८
सीता ८८४
सीरिया ८३२, ८३६
(एशियामाइनर) ८३६
सुखोदयः ८५६
सुगन्धा ४४६
सुजाता ३२
सुतीक्ष्णः २४२
—आश्रमः ७७
सुदासः १६९
सुन्दः २५२
सुपत्नी ४१७
सुब्रह्मण्याः ३०८
सुभद्रवटः २१७
सुभाषचन्द्रवसुः ८५९
सुभाषितम् ५२
सुमनाः १६४
सुमङ्गली १३५, ४१६
सुमतिः २९७
विश्ववारा ६२३
सुमात्रा १०२, ८५५, ८६८
(स्वर्णद्वीपः)
सुमेरुः ८२०
सुय्यः ३७२
सुय्या ४२१
सुरेश्वरः ४९
सुलभा १२३, २७२, २८९
सुवृत्तः ३५१
सुव्रतनाथः परिं. ३०
सुश्रुतः ४९
सूत्रम् ३६
सूत्रक्रीडा ७४
सूत्रेणाकृतिकरणम्) ७४
चिकित्सा ६६
सूफीजीवनदर्शनम् ८०२
सूफीसम्प्रदायः ८३३
सूर्यरश्मिचिकित्सा ६६
सूर्यवर्मा ८६१
सूर्यादेवी ४५०
सेअरुल उकोल ८२३
सेण्टग्रेगोरी ८३७
सेण्टबरलाम ८७९
सेतुबन्धरामेश्वरः परि. ४८
सेवाकुञ्ज परि. ३५
सेल्यूकस ८३६
सैन्यप्रशिक्षणम्
सोनागिरिः ७८९
सोमनाथः (प्रभासः) परि. ५१
सोमपानम् १९४
सोमयज्ञः ३१५, ६३४, ६३७
सौहित्यम् परि. ३
स्तुतिः ६२९, ६४०
—गानम् ६५३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

स्त्री ४५२
—साधारणी ४५२
—कवयः ४३१
—क्रयः ४६०
—दानम् ४६०
—दूषणम् ४७२
—धनम् ४७१
—निन्दा ४२८, ४५९
—मनोरञ्जनम् ४५०
—मन्त्रकर्त्री ४२६
—मानवलोकभूषणम् ४२९
—रत्नम् १२७
—राजनये प्रावीण्यम् ४४६
—राजनीतिज्ञता ४४८
—सैनिकप्रशिक्षणम् ४४८
—स्वातन्त्र्यम् ४४३
स्थापत्य-शास्त्रम् ६९
स्थिरमतिः ९५
स्नातकः ११९, १२९
स्पृष्टास्पृष्टिः ३९२
स्पेनदेशः ८२७
स्याम ८५५
स्यालकोटम् ८३८
सुघ्नः ८२
स्रोत आपन्नः ७८२
स्वजनाः ३३५
स्वधर्मरक्षणम् ८०५
स्वधर्मे प्रत्यावर्तनम् ४०४
स्वयंप्रभा २३०
स्वयंभूः १२९
स्वराज्यम् ६४३
स्वर्गः ६९२
—मार्गः ६९७
स्वर्णरिखानदी परि. ५३
स्वस्ति (जगते) ३३१
स्वातघट्टः ८२९
स्वातन्त्र्यम् ३३५
स्वाध्यायः १५३,१८४
—विषयाः ६०
स्वार्थः १
स्वास्थ्यम् १७१

ह

हंसः २७८
हज्जाज ८३४
हञ्र अस्वद ८२३
हड्डा ८२९
हयग्रीवः २७८
हरदेवः ८४१
हरिकेसवलः ३६३
(श्वपाकोऽपि ऋषिः)
हरिद्वारम् परि. २३
हरिश्चन्द्रघट्टः परि. २६
हरिविक्रमः ८८०
हरिहरबुक्कौ ४०५
हरिहरालयपुरम् ८६०
हर्षः ८२,११६
परि. २५
हस्तकौशलिकः ३६४
हस्तमुद्रा १०४
हस्तरेखा-विद्या ७३
हस्तलाघवम् ४९
हस्तिलक्षणम् ७३
हस्तिसूत्रम् ६४, ६७
हारूँरशीद ८३५
हानराजवंशः ८४९
हालेविदः
—द्वारकासमुद्रः परि. ४४
हिकायत सिरीरामा ८६७
(रामचरितम्)
हिङ्गलाजः परि. १६
हिन्दुः ३३९
—अमेरिका ८८४
—कुशः ८४२
हिप्पालसः ८७७
हिमालयः ३ परि. ८
हिरण्यकशिपुः १४२
हिरण्यगर्भः ६८५
हिरण्यदासः ८६०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

हिरण्यस्तूपः १६९, ३०८
हीनविद्याः ७३
हुतम् १५१
हुल्माकूवंशः ८२०
हुलूम ८४३
हेलियोदोरः ३३८
हैमवती ४
होदो ८८२
होमः ६७०
—धेनुः २५१
होयेल्यून (प्रज्ञावर्मा) ९९
होशंगः ९७
ह्वेनसाङ्गः ३५४, ४०५, ८२८, ८२९, ८४१

स्व. डा. सिनम शर्मा स्मृति संग्रह
पूर्व अध्यक्ष संस्कृत विभाग
गुरुकुल कांगड़ी विश्वविद्यालय, हरिद्वार

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

बन्ध)

as

तिहास

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

लेखकस्य प्रमुखरचनाः

१. प्राचीन भारतीय-साहित्य की
सांस्कृतिक भूमिका (डी. लिट्. निबन्ध)
२. भारतस्य सांस्कृतिकनिधिः
३. महाभारतीय-संस्कृतिकोशः
४. दशरूपकतत्त्वदर्शनम्
५ नाट्यशास्त्रीय-प्रयोगविज्ञानम्
६. नाट्यशास्त्रीय-परिभाषिक-
शब्दानुक्रमणिका
७. महाकविः कालिदासः
८. मध्यकालीन संस्कृत - नाटक
९. सत्यहरिश्चन्द्रोदयम् – उपन्यासः
१०. द्वासुपर्णा—उपन्यासः
११. आधुनिक संस्कृतनाटक भागद्वय
१२. Sanskrit & Prakrit Mahakavyas
१३. नाट्यशास्त्रीयानुसंधानम्
१४. संस्कृतसाहित्य का आलोचनात्मक इतिहास
१५. संस्कृत-व्याकरण, रचना तथा निबन्ध
१६ भारत की प्राचीन संस्कृति

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भारतीय-संस्कृति-सौरभम्

पृष्ठसंख्या १०१५ मूल्य रू० ३००/-

संवत्सरेऽस्मिन् प्रकाशितम् 'भारतीय-संस्कृति-सौरभम्' संस्कृतेन विरचितेषु गौरवग्रन्थेषु स्वमहिम्नानन्यतमं राजते। पञ्चषा महाभारतादिपुराणेतिहास-ग्रन्था भारतीय-संस्कृतेः पूर्णस्वरूप परामृशन्तो विरचिताः। तेषामपि सारं संगृह्याधुनातनानुसन्धान-समन्वितं भारतीय-संस्कृति-सौरभं सुप्रणीतं स्वपरागेण विश्वजनं रञ्जयितुमलमिति निवेदनं लेखकस्य।

भारतीय-संस्कृतेरेतादृशं बृहद्विवेचनं नान्यत्र प्रकल्पितम्। भारतीय संस्कृतये वैदेशिकानां प्रथमानुरागः कथंकार समुन्नत इति सविशेषं प्रदर्शितम्। आधुनिकयुगे भारतवासिनां वैदेशिकीं संस्कृतिं प्रति मृषाप्रवृत्तिरवरुध्येतेति प्रकरणानुसन्धानेन प्रबोधितम्। अत्र प्रतिपादिताः प्रमुखविषयाः सन्ति –

प्रकृतेः सान्निध्यम्, संस्कृतेर्निर्मातारः, ज्ञान-विज्ञानप्रवृत्तयः, गृहाश्रमः, ऋषिजीवनम्, कर्मयोगः, विश्वकल्याणविधानम्, सर्व-वर्णाभ्युदय - योजना, नारीप्रतिष्ठा, राजनीतिकप्रवृत्तायः, धार्मिकप्रवृत्तयः, तीर्थदर्शन-रहस्यम्, विश्वतोमुखं सौरभम्।

The author has in this monumental work delved deep into ancient Indian Literature to research the significant features of our culture which has for thousands of years served as the guiding star for the progress of mankind. A comprehensive and comparative view of the multifaceted aspeets of our cultural heritage has been presented. It looks unseemly that the youth and even the aged of the country seem to be blinded by the allurements of the modern international culture which as the author feels is a mirage leading them astray from the pristine cultural glory of our land

The book aims at bringing in the limelight such salient features of Indian culture as formed the main attraction of millions even outside India, seeking spiritual and divine light for self-realisation.

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA